काश्मीरशैवदर्शनबृहत्कोषः

द्वितीयः खण्डः

श्री रणवीरपरिसरः, जम्बुः

श्रीः

काश्मीरशैवदर्शनबृहत्कोषः

(काश्मीरशैवदर्शनसंकलितशब्दव्याख्याः)

श्रीः

काश्मीरशैवदर्शनबृहत्कोषः

(काश्मीरशैवदर्शनसंकलितशब्दव्याख्याः)

द्वितीयः खण्डः

(टकारादिः – हकारान्तः)



परियोजनानिदेशकः व्याख्याकारश्च

डॉ. बलजिन्नाथपण्डितः

प्रधानसम्पादकः

डॉ. गुव्वल गङ्गन्ना, प्राचार्यः

सम्पादकौ

डॉ. यशःपाल खजूरियाः

प्रो. नीलकण्ठगुर्टुः

2005 (खैस्ताब्दः)

राष्ट्रिय-संस्कृत-संस्थानम्

।।मानितविश्वविद्यालयः।।

श्रीरणवीरपरिसरः, पो. कोट, जम्बुः

प्रकाशक :
डॉ. गुव्वल गङ्गन्ना
प्राचार्यः
राष्ट्रिय-संस्कृत-संस्थानम्, मानितविश्वविद्यालयः
श्रीरणवीरपरिसरः, पो. कोट, जम्बुः

प्रथम संस्करणम् : 2005

मूल्यम् : 320/- रू०

पुनर्मुद्रणादिकाः सर्वेऽधिकाराः दिल्लीस्थ-राष्ट्रिय-संस्कृत-संस्थानेन स्वायत्तीकृताः।

मुद्रकः
स्वस्ति प्रिंटर्स
7308, प्रेमनगरं, दिल्ली-110007

ENCYCLOPEADIA OF KĀŚMĪRA ŚAIVISM

Volume II

Project Director & Commentator
Dr. B.N. Pandita
General Editor
Dr. G. Ganganna, Principal
Editors
Dr. Y.P. Khajuria
Prof. N.K. Gurtoo

2005 (A.D.)
Rashtriya Sanskrit Sansthan
Deemed University
Shri Ranbir Campus, P.O. Kot, Jammu

Published by
Dr. G. Ganganna
Principal
Rashtriya Sanskrit Sansthan, Deemed University
Shri Ranbir Campus, P.O. Kot, Jammu

© Rashtriya Sanskrit Sansthan,
56-57, Institutional Area, Janakpuri, New Delhi-110058

First Published 2005

Price Rs. 320/-

Printed by
Svasti Printers
7308, Prem Nagar, Delhi-110007

The List of Scholars Who Worked on the Project

1.	Project Director	:	Dr. Balajinnath Pandita
2.	General Editors	:	Dr. Mandan Mishra Dr. Muralidhar Pandey Dr. Jagannath Pathak Dr. Raghav Prasad Choudhary Dr. Priyatam Chandra Shastri Dr. G. Ganganna
3.	Editors	:	Dr. Y.P. Khajuria Prof. Neelkantha Gurtoo
4.	Research Assistants	:	Dr. Dwarika Nath Shastri Dr. Brijnandan Sharma Dr. Girija Sharma Dr. Ganesh Shukla Dr. Harish Kumar Sharma Dr. (Smt.) Sunita Gupta Dr. Madhu Kumar Marwaha Dr. Suresh Pandeya
5.	Cūḍāmaṇi Adhyāpaka		Sh. Dinanath Yakash
6.	Copyist		Sh. Krishna Nand Pathak

किञ्चिद् वक्तव्यम्

''काश्मीरशैवदर्शनबृहत्कोषः'' इति नाम्नो ग्रन्थरत्नस्य द्वितीयं खण्डं तत्र भवताम्पुरस्तात् समुपस्थापयतो मोमुद्यते मे मनः। इतः पूर्वं ह्येकाधिकद्विसहस्रतमे (2001) ख्रिस्ताब्देऽस्य प्रथमः खण्डः प्रकाशनतामगमत्, यत्राकारादिञकारान्तशब्दाः विवेचिताः। अत्र च टकारादयोऽवशिष्टाः सर्वेऽपि शब्दाः कोषकुक्षिसंनिविष्टास्सन्ति।

शब्दार्थविवेचनपराः शास्त्रवासनावासिताः नैके ग्रन्थाः कोषात्मकाः सारस्वतीं शोभां समेधयन्ति नूनम्, परमयं कोषो निजया कयाचिद् विलक्षणया शैल्या काश्मीरशैवदर्शनशब्दात्मानं विवृणुत इति सहृदयैर्न चिरं यावत् तिरोहितं स्थायेत्। कोषस्य प्रथमे खण्डे ''मार्गदर्शकाः सङ्केताः'' इति शीर्षकमुपजीव्याष्टादश बिन्दवस्समुपनिबद्धास्सन्ति, तानाश्रित्यैवात्रापि शब्दराशिं विदाङ्कुर्वन्तु मनीषिणः। एतावता प्रथमद्वितीयखण्डयोर्मिथो न तावच्छैल्यादिव्यवायोऽपि तु कालव्यवाय एवावगन्तव्यम्।

पण्डितचक्रचूडामणीनां कोषपरियोजनानिदेशकानां व्याख्याकाराणां काश्मीरशैवदर्शनस्य वर्त्तमाननाथानां डाक्टरबलजिन्नाथपण्डितानामखण्डितप्रयत्नानां सुस्वादुद्वितीयफलनैवेद्यं निवेदयन् तेषां हार्दं धन्यवादं चरीकरोमि। तत्कालिकानां श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठप्राचार्याणां डाक्टरमुरलीधरपाण्डेय-डाक्टरजगन्नाथपाठक-डाक्टरराघवप्रसादचौधुरी-डाक्टररामकिशोरशुक्ल-डाक्टरप्रियतमचन्द्रशास्त्रिमहोदयानामवसरेऽस्मिन् कार्त्तज्ञ्यं विज्ञापयामि, यैः परियोजनां पूरयितुं प्राचार्यपदव्या समपेक्षितप्रबन्धनमकारि। विद्यापीठमुख्यालयस्याधुनिकराष्ट्रियसंस्कृतसंस्थानमानितविश्वविद्यालयस्य नवदेहलीस्थितस्य तत्तदवधिकनिदेशकानां डाक्टररामकरणशर्म-डाक्टरमण्डनमिश्र-डाक्टरकमलाकान्तमिश्रमहोदयानां च वर्तमानकुलपतिपदभाजां प्रोफेसर वेम्पटिकुटुम्बशास्त्रिवर्याणां छत्रछायायामेष प्रयासः साफल्यङ्गतस्तदर्थं तेभ्यो नमो वाक्पुरस्सरं धन्यवादं प्रयच्छामि। सम्पादनप्राग्रूपसंशोधनादिकर्मणा कोषनिर्माणयागे हविर्यच्छन्तो डाक्टरयशःपाल खजूरियाः आचार्य-नीलकण्ठगुर्टुमहोदया अथ च प्रत्यक्षाऽप्रत्यक्षसहयोगकृतो नैके काश्मीरशैवदर्शनकोषपरियोजनासम्बद्धाः मनीषिणोऽत्र सास्मर्यन्ते, येषां प्रयासेन कोषनिर्माणसदृशं क्लिष्टतमं कार्यं पूर्णतामव्राजीत्-इति विनिवेदयति।

डाक्टरगुव्वलगङ्गन्ना
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
रणवीरपरिसरः, जम्मूः

ट

ट ~ मातृका-क्रमे—उपस्थेन्द्रियतत्त्वस्य यद्रहस्यात्मकं स्वरूपं तदभिव्यञ्जको मातृकावर्णः शाम्भवोपायाभ्यासे, अत्र योगी टकारमालम्ब्य शाम्भवे योगे प्रवृत्तः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाशभित्तौ स्वेच्छाविलासतः प्रतिफलितं सत् साक्षात्कुर्वन् स्वात्मानं च तत् प्रतिबिम्बखचितसुन्दरं साक्षात् पश्यन् सद्यः शाम्भवसमावेशभाग् भवति।

टकारः (1) — द्र०-'षट्त्रिंशत्तत्त्वदीक्षा', (24)।

टकारः (2) — कलाशेष इति नामको बीजमन्त्रः।

यथा–

"कलाशेषेण टकारेण।"

(ने० तं० उ०, खं० 2, पृ०, 67)

ट–त–वर्गसृष्टि :— ज्ञेयकालुष्यसम्भिन्नायाश्चलत्स्वभावाया ज्वलनरूपायाः इच्छाशक्तेः सकाशात् टवर्गस्य सृष्टिः, स्थिररूपायाश्च तस्या एव सकाशात् तवर्गस्य। ततो ऋवर्णाट्टवर्गस्य लृवर्णाच्च तवर्गस्य प्रतिबिम्बात्मिका सृष्टिः। तत्रापि नासौ सृष्टिः र-ल इति रूपाभ्यां व्यञ्जनांशाभ्यामपि तु स्वरांशादिवर्णादेवेति वेद्यम्। ततो ऋ-लृ वर्णयोः षण्ठतैव। सृष्टिश्च इ-वर्णादेवेति।

यथा–

"या तूक्ता ज्ञेयकालुष्यभाक् क्षिप्रस्थिरचरयोगतः।।
द्विरूपायास्ततो जातं टताद्यं वर्गयुग्मकम्।"

(तं० आ० 3, 151-152)

अत्र द्वितीय पादे–"क्षिप्रस्थिर योगतः" इत्येव वा पाठः साधुः प्रतिभाति, न पुनः "क्षिप्रचरयोगतः" इति क्षिप्रचरयोरेकतात्पर्यत्वात्; रकारस्य चरत्वाल्लकारस्य च स्थिरत्वात्। चरत्वमेव हि क्षिप्रत्वम्।

ट वर्गः–

मातृकाक्रमे कर्मेन्द्रियगणः (वाक्, पाणिः पादः पायुरुपस्थश्चेति) टवर्गः कथितः। यथा–

"पादादिश्च टवर्गः स्यात्।"

(पू० प्र० 2, 101)

टवर्ग देवता— कुमारी आख्याता यथा–

"..... टवर्गे तु कुमारिका।"

(स्व० तं० 1, 35)

ठ

ठ— (1) पायुरूपेन्द्रियतत्त्वस्य यद् वास्तविकं स्वरूपं तस्याभिव्यञ्जको मातृकावर्णः शाम्भवोपाये।

द्र०– 'ट'–इति।

तद्वदयं वर्णः रसनेन्द्रियखचितं स्वात्मानमभिव्यनक्ति।

ठकारः— (2) द्र०– 'षटत्रिंशत्तत्त्वदीक्षा', (23)

ठडौ— बीजमन्त्ररूपत्वे चन्द्रसूर्यौ।

यथा–

"चन्द्रसूर्यौ ठडौ।"

(ने० तं० उ०, खं० 2, पृ०, 63)

ड

ड— पादतत्त्वस्य यद्वास्तविकं स्वरूपं तद्रहस्याभिव्यञ्जको मातृकावर्णः शाम्भवोपायाभ्यासे।

द्र०–'ट' इति।

तद्वदेवायमपि वर्णः समावेशदः।

डकारः— द्र०– 'षट्त्रिंशत्तत्त्वदीक्षा', (22)

डमरुमुद्रा— लक्षिता यथा–

"डमरुं मुष्टिबन्धेन दक्षहस्तस्य सुव्रते।
सुषिरेण समायुक्तं दर्शयेत्तु वरानने।।"

(स्व० तं०, 14,16)

"तत्त्वमस्याः प्रदर्शितं (श्री भैरवानुकरणस्तोत्रे):–
वीणाघण्टाडमरूनुड्डामारदर्शयन्निदं दिशसि।
वृत्तित्रिभेदभिन्नं नादामर्शं निभालय नन्तः।। इति"

(स्व० तं० 14, पृ०, 116)

डाकिनीमर्म— डकारः। यथा–

डाकिनी मर्म ड।

(तं० आ० वि०, खं० 12, पृ०, 202)

डामरयागः— दीक्षासम्बन्धी भावनामयः कश्चन विशिष्टो यागो यस्य तत्त्वं श्रीशम्भुनाथेनोपदिष्टमभिनवगुप्ताय यश्च विस्तरेण प्रतिपादितस्तेनार्या त्रयोदशकेन तन्त्रालोके पञ्चदशे आह्निके। यथा–

"इह किल दृक्कर्मेच्छा .....। इत्यारम्भ
.....
इति भैरवपरपूजातत्त्वं श्रीडामरे महायागे।।
स्वयमेव सुप्रसन्नः श्रीमान् शंभुर्मामादिक्षत्।
इत्यन्तम्।"

(तं० आ० 15, 339-352)

~ तन्मण्डलं— मण्डलविन्यासपूर्वं क्रियमाणो यागविशेषो हि डामरयागस्तान्त्रिकक्रमे। शूलाब्जविधावुक्त- स्तन्त्रालोके तदुचितो मण्डलविधिः। न खलु मण्डलविधयः स्पष्टतां यान्ति। मण्डलचित्राणामलभ्यत्त्वात्। यथा—

"एष यागः समाख्यातो डामराख्यस्त्रिशक्तिकः।"

(तं० आ० 31, 100)

~ रहस्यमन्त्रस्तत्र— डामराख्ये तु यागे गुप्तस्य नवार्णस्य कालकर्षिणीविद्यात्मकस्य मन्त्रस्य प्रयोगो भवति। यथा—

"नवार्णेयं गुप्ततरा सद्भावः कालकर्षिणी।।
श्रीडामरे महायागे परात्परतरोदिता।"

(तं० आं० 30, 54-55)

न खल्वत्र मन्त्रस्य सम्यक् स्फुटीकरणं कृतं जयरथेन।

डामर्यः— अटनशीलाः रूपपरिवर्तनक्षमाः, मन्त्रार्थगतमानसाः परामृतमश्नन्त्यो मनुष्यवाहिन्यो योगिन्यो भवन्ति। यथा—

"डामर्यस्त्वपरा ज्ञेया मन्त्रतद्गतचेतसः।
परामृतं समश्नन्ति मानुषं वाहयन्ति च।।
पर्यटन्त्यखिलां पृथ्वीं रूपं कुर्वन्त्यनेकधा।

(ने० तं० उ०, खं० I पृ०, 48)

डाव्यः— गुप्तपूजनज्ञानशीलाः छिद्रान्वेषणे चतुराः, पालिकाः डाव्यो भवन्ति। यथा—

"डाव्यश्चैवंविधा ज्ञेया गुप्ताचारार्चने रताः।
स्वादयन्ति न तु घ्नन्ति छिद्रान्वेषणतत्पराः।।"

(ने ०तं०, खं० 1, पृ०, 48)

ढ

ढ— पाणीन्द्रियतत्त्वस्य यद्रहस्यात्मकं स्वरूपं तदभिव्यञ्जको वर्णो मातृकाक्रमे शाम्भवोपायाभ्यासे।

द्र०– 'ट' इति।

तद्वदेवायमपि शाम्भवसमावेशोपायभूतो मातृकावर्णः।

ढकारः— द्र०– 'षट्त्रिंशत्तत्त्वदीक्षा', (21)

ण

ण— वागिन्द्रियतत्त्वस्य यद्रहस्यात्मकं स्वरूपं तदभिव्यञ्जको मातृकावर्णः शाम्भवोपायाभ्यासे।

द्र०– 'ट' इति।

तद्वदेवायमपि वर्णः शाम्भवसमावेशदः।

णकारः— द्र०– 'षट्त्रिंशत्तत्त्वदीक्षा', (20)

त

त— मातृकाक्रमे शाम्भवोपायालम्बनतां नीतः सन् साधकस्य स्वशक्तिविशेषप्रतिबिम्बात्मकतया घ्राणेन्द्रियाख्यं तत्त्वमवभासयँस्तत् प्रतिबिम्बखचितं च स्वात्मसंवित्तत्त्वं साक्षात्कारयन् वर्णविशेषः। यथा-

"तादिनान्तं घ्राणादिश्रोत्रान्तं कर्माक्षपञ्चकम्।"

(प० त्री० वि० पृ०, 113)

तकारः— द्र०- 'षट्त्रिंशत्तत्त्वदीक्षा' इत्यत्र।

तत्त्वम्— (1) देशाध्वनि कतिपय-कतिपय भुवनाद्यनुगतं यद् वस्तुभूतं सकलतत्तद्भावभुवनव्यापकं तत् खलु तत्त्वम्। तत्त्वाध्वधारणानुकूलतया देशाध्वनो विश्लेषणं षट्त्रिंशद्धाकृतं शास्त्रे। तत एव षट्त्रिंशत्तत्त्वसंख्या। पुनर्विश्लेषणेन संख्या वर्धते, संश्लेषणात्मकेनैकीकारेण संख्या ह्रासमुपयाति तत्त्वानाम्। यथा—

"यदिदं विभावात्मकं भुवनजातमुक्तं गर्भीकृतानन्त-विचित्रभोक्तृभोग्यं, तत्र यदनुगतं महाप्रकाशरूपं तत् सामान्यकल्पं परमशिवरूपम्। यत्तु कतिपय-कतिपयभेदानुगतं रूपं तत्तत्त्वम्।"

(तं० सा०, पृ०, 69)

(2) यद् यत् स्वस्य कार्ये स्वधर्मोघे च सर्वत्र सामान्य-कल्पतया तननशीलं व्यापनशीलं च तत् तत्त्वम्। यथा—

"स्वस्मिन्कार्येऽथ धर्मौघे यद्वापि स्वसदृग्गुणे।।
आस्ते सामान्यकल्पेन तननाद् व्याप्तृभावतः।
तत्तत्त्वं क्रमशः पृथिवी प्रधानं पुंशिवादयः।।"

(तं० आ० 9, 4-5)

(3) भिन्नभिन्नानां पदार्थानां सा सामान्यरूपा व्यक्तिता यद्वशात्ते पदार्थाः एकस्मिन्नेव वर्गे गण्यन्ते। यथा—

"भिन्नानां वर्गाणां वर्गीकरणनिमित्तं यदेकमविभक्तं भाति तत्तत्त्वम्।"

(ई० प्र० वि०, खं० 2, पृ०, 192)

व्याख्यान्तराण्येतानि स्पष्टीकरणप्रयोजनानि न पुनर्मतान्तराणीति विदाङ्कुर्वन्तु सुजनाः।

द्र०- (तं० आ० 9, 2), (ई० प्र० वि०, खं० 2, पृ०, 34), (स्व० तं०, उ० 10, पृ०, 556),

(स्व० तं०, प० 4, पृ०, 151) तथा (प० सा० वि०, पृ०,31)

(4) निर्वचनत एतद् अपरं व्याख्यानम्। यथा—

"इह तस्य भावस्तत्त्वमिति वर्गाणां विशेषरूपाणा-मेकीकरणनिमित्तं सामान्यमुच्यते। मृत्पाषाणदार्वस्थिमांसादीनां पृथिवी, सरित्कूपसरःसमुद्रादीनां जलमिति।"

(ई० प्र० वि०, खं० 3, पृ०, 264)

~ अध्वात्मकम्— (1) प्रमाणरूपतावेशशून्या केवला प्रमेयता द्विविधा; सूक्ष्मा स्थूला च। तत्र सूक्ष्मप्रमेयतात्मक-स्तत्त्वाध्वा, स्थूलश्च भुवनाध्वा। यथा—

"शुद्धे प्रमेयतायोगे सूक्ष्मस्थूलत्वभागिनि।।
तत्त्वाध्वभुवनाध्वत्वे क्रमेणानुसरेद्गुरुः।"

(तं० आ० 11,61-62)

भुवनाध्वधारणावत् तत्त्वाध्वधारणायां निजो देहः समस्ततत्त्वभरिततया परिपूर्णतया च भाव्यते। एकैकमपि वा तत्त्वं परिपूर्णस्वात्मशिवात्मकतया भाव्यते। उभयथापि भावनया आणवः शिवभावसमावेशः सम्पद्यते। यथा—

"अध्वषट्कं यथा प्राणे संस्थितं कथयामि ते।।
आपादान्मूर्धपर्यन्तं चितेः सम्वेदनं हि यत्।
भुवनाध्वा स विज्ञेयस्तत्त्वाध्वा च तथैव हि।।"

(स्व० तं० 4,241-242)

(2) कतिपये तस्य प्रकाराः। ते तावत् षट्त्रिंशत्तत्त्वधारणा, अष्टादशतत्त्वधारणा, नवतत्त्वधारणा, पञ्चतत्त्वधारणा, त्रितत्त्वधारणा, एकतत्त्वधारणा चेति मुख्याः।

यथा—

"तत्त्वैः षट्त्रिंशताधेन तदर्धेनाथ पञ्चभिः।
स्थितिरेकेन वा कार्या परापरविभूतये।।"

उद्ध० (तं० आ० वि०, खं० 7/2, पृ०, 34)

(3) परविभूतये एकेनापरविभूतयेऽनेकैरिति वेद्यम्। न च स्पष्टीकृतावष्टादशनवतत्त्वविधी। त्रितत्त्वविधिर्नरशक्ति-शिवात्मकतया वेद्या। एकतत्त्वविधिः परशिवैक्यभावनातः। पञ्चतत्त्वविधिः तत्त्ववर्गपञ्चकमालम्बनीकृत्येति, यथा—

(क) परतत्त्वमालम्बनीकृत्य, (ख) शुद्धतत्त्वविषयतया, (ग) मायादिप्रकृत्यन्ततत्त्वाष्टकविषयतया, (घ) प्रकृत्यादिजलान्ततत्त्वैकोनविंशतिविषयतया, (ङ) धरातत्त्वविषयतयेति।

संक्षेपतश्चाण्डचतुष्टयं शिवतत्त्वं चालम्बनीकृत्येति। इत्येतदनया धारणयाभिप्रेतं स्यादिति तर्क्यते।

सुविचित्रैश्वर्यविषयादिभोगेच्छूनां साधकानां कृते तत्तद्भागे साधनरूपाः इमाः विविधा धारणाः समुपदिष्टाः शिवेन निजेष्वागमशास्त्रेषु। यथा—

"यत्र-यत्र हि भोगेच्छा तत्राधान्योपयोगतः।।
अन्यान्तर्भावनातश्च दीक्षानन्तविभेदभाक्।"
(तं० आ० 11, 38-39)

~ अशुद्ध्यादितः— अशुद्धः, शुद्ध्यमानः, शुद्धश्च तत्तत्त्ववर्गस्त्रितत्त्वतयोपदिष्टः। तत्र पृथिव्यादिर्मायान्तस्तत्त्ववर्गोऽशुद्धः आत्मतत्त्वमिति ख्यातः। विद्यादि सदाशिवान्तः शुद्ध्यमानो वर्गो विद्यातत्त्वसमाख्यः। "शिवशक्त्यात्मकश्च शुद्धो वर्गः शक्तितत्त्व-समाख्यः- इति। यथा—

"अशुद्धि-शुद्ध्यमानत्वशुद्धितस्तु मिथोऽपि तत्।"
(तं० आ० 1, 189)

परस्परमपि भिद्यते, न केवलं व्याप्येभ्य एव तत्त्वेभ्यः।

~ ऊर्ध्वाधोभावतः— यथा—

"यो हि यस्माद् गुणोत्कृष्टः स तस्मादूर्ध्व उच्यते।
ऊर्ध्वता व्याप्तृता श्रीमन्मालिनीविजये स्फुटा।।"
(तदेव, 310)

शुद्धि-दृष्टया गुणोत्कृष्टं तत्त्वमूर्ध्वमपकृष्टगुणं चाधस्तनमिति वेद्यं न दिग्विचारतः।

~ त्रयविनिर्मुक्तम्— नरतत्त्वम्, शक्तितत्त्वम्, शिवतत्त्वञ्चेति तत्त्वत्रयम्। ततो विनिर्मुक्तं सर्वोत्तीर्णं तत्त्वं परमः शिवः। यथा

"तत्त्वत्रय-विनिर्मुक्तं शाश्वतं चाचलं ध्रुवम्।।"
(ने० तं० 8, 26 तथा ने० तं०, खं० 1, 190)

तत्त्वत्रयान्तर्वर्तिनी लीला यद्यपि परमेश्वरस्यैव तथाप्यसौ तर्कदृष्टया तदुत्तीर्ण एवेति तन्निर्मुक्तत्वमुप्युच्यते तस्य।

~ त्रिसंख्यम्— शिव-शक्ति-नरात्मकम्। तत्र शिवः सकलविश्वपरिपूर्णः शुद्धसंविन्मात्रशरीरः। प्रतिबिम्बन्यायेन विश्वसृष्टिसंहारादिकारिणी तस्य शक्तिः परमेश्वरतापरपर्याया। आभासमानं जडं जगज्जडात्मकशून्याद्यभिनिविष्टाहम्भावश्च पशुप्रमातृवर्गो नरतत्त्वमिति। शिवः शक्तिमार्गेण नरत्वस्थितिमवतरतीव, पशुप्रमाता च शुद्धविद्याशक्त्य- भिव्यक्तिमयेन शाक्तेन मार्गेणानायासमेव स्वात्मनः शिवादभेदमनुभवति साक्षात्। सैषा सर्वाऽपि बन्धमोक्षक्रीड़ा नरशक्तिशिवात्मके त्रिकोणे त्रिकसंज्ञके प्रचलति। एतदाधारभूतमिदं नरशक्तिशिवात्मकं तत्त्वत्रयं प्रसिद्धं त्रिकाचारपरम्परायाम्। यथा—

"नरशक्ति— शिवात्मकंत्रिकं हृदये या विनिधाय भासयेत्।
प्रणमामि परामनुत्तरां निजभासां प्रतिभाचमत्कृतिम्।।"
(प० त्री० वि०, पृ०, 2)

~ योगिपरम्परायाम्— प्रमातृतत्त्वानि वर्गत्रये विभज्य तत्त्वत्रयकल्पना स्थापिता योगिभिर्योगधारणार्थम्। तत्र सकलादारभ्य विज्ञानाकलं यावद् ये प्रमातृवर्गास्त्रयस्तेषां वर्ग आत्मतत्त्वमिति। मन्त्रतदीश्वरतन्महेश्वराणां संज्ञा विद्यातत्त्वमिति। शाक्तशाम्भवयोः संज्ञा शिवतत्त्वमिति। यथा—

"विज्ञानाकलपर्यन्तमात्मतत्त्वमुदाहृतम्।
ईश्वरान्तं च विद्याहं शेषं शिवपदं विदुः।।"
(मा० वि० तं० 2, 47)

युक्त्या विचार्यमाणत्वे मन्त्रमहेश्वस्यापि गणना विद्यातत्त्व एवोचिता। तेनेश्वरान्तमिति पदे ईश्वरपदस्योपलक्षणत्वेन वा अन्तपदेनेश्वरादूर्ध्वस्य सदाशिवस्य ग्रहणेन वा व्याख्याने मन्त्र-मन्त्रेश्वर-मन्त्रमहेश्वराः विद्यातत्त्वं, शिवशक्त्यात्मकं च शेषं शिवपदमिति व्याख्यानमुचितम्।

~ मानमेयतया— ऊर्ध्वोर्ध्वानां तत्त्वानामधराधराणि तत्त्वानि प्रति प्रमाणताऽधराधराणां चोर्ध्वोर्ध्वानि प्रति प्रमेयता यथायथं भवति। यथा—

"ऊर्ध्वोर्ध्वतत्त्वव्रातस्य मानत्वे च निरूपिते।
अधराधरतत्त्वांशो मेयतामवलम्बते।।"
(मा० वि० वा० 1, 872)

~ वर्गीकरणतः— तत्त्वानां मध्ये पञ्चभूतात्मकानि स्थूलानि प्रमेयतत्त्वानि पञ्च च सूक्ष्माणि तन्मात्ररूपाणीति दश, इन्द्रियाणि दश, करणत्वगुणीकारेण कर्तृतास्पर्शप्रधानानि तत्त्वानि पञ्च— तत्र त्रीण्यन्तःकरणानि, एका प्रकृतिरेकश्च पुरुषः। प्रमेयतोत्तीर्णं यत्केवलं कर्तृत्वं तत्र नियत्यादिकलान्तानि पञ्च। प्रमेयभेदस्य गलनेन प्रमेयानामेकत्वप्राप्तौ मायाख्यमेकं तत्त्वम्। संविद्विकासक्रमे शुद्धविद्यादिशक्त्यन्तानि चत्वारीति मिलित्वा पञ्च। शिवतत्त्वमेकं षट्त्रिंशम्। यथा—

"प्रमेयत्वं द्विधा, स्थूलसूक्ष्मत्वेनेति दशा। करणत्वं द्विधा शुद्धं (ज्ञानेन्द्रियम्) कर्तृतास्पर्शि च (कर्मेन्द्रियम्) इति दश। करणतोपसर्जनकर्तृभावस्फुटत्वात् पञ्च। शुद्धकर्तृभावात् पञ्च, विगलितविभागतया विकासोन्मुखत्वे पञ्च। सर्वावच्छेदशून्यं शिवतत्त्वम्।"
(तं० सा०, पृ०, 110)

~ वस्तुतः— षट्त्रिंशदपि तत्त्वानि वस्तुतः शिवस्यैव प्रसारः। ततः सर्वाणि शिवात्मकान्येव। नैषां शिवादधिकत्वेन काऽपि सत्ता। तच्छिव एव सकलतत्त्वात्मकतया स्वयं स्वलीलया प्रकाशते। यथा—

"भूतानि तन्मात्रगणेन्द्रियाणि।।
मूलं पुमान् कञ्चुकयुक् सुशुद्धम्।
विद्यादिशक्त्यन्तमियान् स्वसंवित्-
सिन्धोस्तरङ्गप्रसरप्रकारः।।
सकलतत्त्वपरिपूर्णं सकलतत्त्वोत्तीर्णम्।
परिजानीतात्मानं परमशिवेन समानम्।।"
(तं० सा०, पृ०, 91)

~ व्याप्यव्यापकत्वे— **(1) पूर्वं पूर्वं तत्त्वं व्यापकमुत्तरोत्तरं च प्रायो व्याप्यम्। तत्र मुख्यतस्त्रीणि तत्त्वानि। तेषु शिवतत्त्वं शक्तिनरयोर्व्यापकं तदुभयं तेन व्याप्यम्। अग्रे शक्तिर्नरतत्त्वस्य व्यापिनी नरश्च तद्व्याप्यः। नरतत्त्वं पुनर्व्याप्यमेव। यथा—**

"अमीषां तु धरादीनां यावांस्तत्त्वगणः पुरा।
गुणाधिकतयविष्ठन् व्याप्ता तावान् प्रकाशते।।
व्याप्यव्यापकता यैषा तत्त्वानां दर्शिता किल।
सा गुणाधिक्यतः सिद्धा न हेतुत्वान्न लाघवात्।।

(तं० आ० 9, 306-309)

(2) धरातत्त्वादारभ्य शिवतत्त्वान्तं यानि षट्त्रिंशत्तत्त्वानि तेषु भूयसा पूर्वं पूर्वं व्याप्यम्, उत्तरमुत्तरञ्च व्यापकम्। यथा—

(क) " एवमेतानि उत्तरोत्तरमावरणतया वर्तमानानि तत्त्वानि–उत्तरं व्यापकं पूर्वं व्याप्यम् इति स्थित्या वर्तन्ते।

यावदशेषशक्तितत्त्वान्तोऽध्वा शिवतत्त्वेन व्याप्तः। शिवतत्त्वं पुनरप्रमेयं सर्वाध्वोत्तीर्णं सर्वाध्वव्यापकञ्च।"

(तं० सा०, पृ०, 65)

(ख) "अस्मिश्च तत्त्वकलापे ऊर्ध्वोर्ध्वगुणं व्यापकम्, निकृष्टगुणन्तु व्याप्यम्। स एव गुणस्योत्कर्षो यत् तेन विना गुणान्तरं नोपपद्यते। तेन पृथिवीतत्त्वं शिवतत्त्वात्प्रभृति जलतत्त्वेन व्याप्तम्, एवं जलं तेजसा इत्यादि यावच्छक्तितत्त्वम्।"

(तं० सा०, पृ० 91)

~ शक्तिसमन्वयतः— **सर्वेऽपि तत्त्वभुवनाद्याः शिवात्मका अपि शक्त्यात्मका अपि। ततः शिवादिशुद्धतत्त्वान्यन्तरङ्गशक्तिपञ्चकमयानीति कथ्यन्ते। सैष शिवशक्तिसमन्वयस्तेषु।**

~ दृष्टिद्वयतः— **(1) पञ्चसु शुद्धाध्वतत्त्वेषु शक्तिसमन्वयो द्विधा। एकैकत्र तत्त्वे एकैकस्याः शक्तेः प्राधान्येनाभिव्यक्तिरित्येका दृष्टिः। तदनुसारं शिव-शक्ति-सदाशिवेश्वर-तत्त्वेषु चतुर्षु क्रमेण निर्वृतीच्छाज्ञानक्रियाशक्तिमुद्रेकमयी स्फुटाभिव्यक्तिः। परमशिवश्च चिच्छक्तिमयः। यथा—**

(1) "तदेवं प्रसृतो देवः कदाचिच्छक्तिमात्रके।।
इत्यारभ्य–क्रियाशक्ति समाभोगात् इत्यन्तम्।"

(शि० दृ० सवृत्तिः1, 29-31)

(2) "अथास्माकं ज्ञानशक्तिर्या सदाशिवरूपता।"

(तदेव, 2,1)

(3) "ज्ञानशक्तिमान् सदाशिवः उद्रिक्तक्रियाशक्तिरीश्वरः।"

(शि० दृ० वृ० 2,1)

"ज्ञानरूपा या दशा तस्या उद्रेकाभासेन सादाख्यम्.
.....
क्रियाशक्तिमयस्य परत्वे उद्रेकाभासे सति 'पारमेश्वरं' परमेश्वरशब्दवाच्यमीश्वरतत्त्वं नाम।"

(ई० प्र० वि० 3,1-2, खं० 2, पृ०, 191-192)

सिद्धान्तपक्षाश्रितैषां शास्त्रकृतां दृष्टिरेका।

अपरा च दृष्टिरुपासनाप्रधानां यदनुसारं शुद्धतत्त्वपञ्चकं क्रमेण परमेश्वरस्यान्तरङ्गशक्तिपञ्चकस्य बहिर्मुखेन विकासेन सृज्यते। तदनुसारं चिच्छक्तेर्बहिर्विकासः शिवतत्त्वम्, एवमेवानन्देच्छाज्ञानक्रियाणां बहिर्मुखो विकासः क्रमेण शक्तिसदाशिवेश्वरविद्यारूपं तत्त्वचतुष्टयम्। ततः शिवाद्या चिदानन्दशक्तिसमन्वयत उपास्या भवन्ति।

अत्र नये परमशिवस्य न कयापि विशेषशक्त्या समन्वयस्तस्योपासनाविषयत्वाभावात्। शिवान्तमेवोपास्यता, न परमशिवस्य। इयं दृष्टिः समाश्रिता तन्त्रालोके तन्त्रसारे चोत्तरोत्तरतत्त्वभूमिकास्वारोहण प्रयोजनमभिसन्धाय। यथा—

"चिदानन्देषणाज्ञानक्रियाणां सुस्फुटत्वतः।।
शिवशक्तिसदेशानविद्याख्यं तत्त्वपञ्चकम्।"

(तं० आ० 9, 50-51)

अत्र दृष्टावधरतत्त्वधारणायामूर्ध्ववर्तिन्याः शक्तेरुपासना विधेया, येन साधकस्योर्ध्वोर्ध्वं सङ्क्रमो भवेत्, इति न कापि मतभेदशङ्का वा स्ववचनविरोधशङ्का वा कार्यात्र सुधीभिः।

शिवशक्तिमयत्वे— **सर्वाणि तत्त्वानि शिवस्यैव शक्तयः। यथा**

शक्तयोऽस्य जगत्सर्वं शक्तिमांस्तु महेश्वरः।।
पञ्चत्रिंशत्तत्त्वी शिवनाथस्यैव शक्तिरुक्तेयम्।
तत्र चतस्रस्तु परा अन्त्यं वै पञ्चविंशकं स्थूलाः।।
मध्यास्तु सूक्ष्मरूपाः शक्तय इह साञ्जनास्तु परम्"।

उद्ध० (ई० प्र० वि० वि०, खं० 3, पृ०, 271)

पञ्चविंशतिमध्येऽपि तावदष्टादश स्थूलाः पञ्चभूतानि च स्थूलतराः शक्तयः। अथवा— (1) पञ्चभूतानि स्थूलाः शक्तयः (2) तन्मात्राणि करणानि चाष्टादश सूक्ष्माः (3) प्रकृतिः, पुरुषः कञ्चुकानि माया चेत्यष्टौ सूक्ष्मतराः (4) शुद्धविद्यादिशक्त्यन्तानि च पराः शक्तयः। शक्तयः इति विभागः।

~ संख्यातः— **(1) प्रमेयाणां प्रमातॄणां च परस्परं सूक्ष्मतरेण विश्लेषणेन प्रमेयप्रमातृतत्त्वानां संख्या वर्धयितुं शक्यते, संश्लेषणेन च तस्यां न्यूनतापि सम्भवति। परं तत्त्वाध्वधारणाक्रमेण षट्त्रिंशदेव प्रमातृतत्त्वानि। यथा—**

"षट्त्रिंशत् तत्त्वानि।"

(तं० सा०, पृ०, 110)

(2) सप्तत्रिंशमष्टात्रिंशं च यत्तत्त्वद्वयं त्रिकसाधानायां प्रतिपादितं तत्तत्त्वद्वयं भावनाभ्यासायैव कल्पितं वेदितव्यम्। ततो नाधिक्यं तत्त्वसंख्यायाम्। यथा—

"वस्तुतस्तु षट्त्रिंशमेव सर्वसहमित्युक्तप्रायम्।"

(तं० आ० वि०, खं० 7/2, पृ०, 26)

~ सृष्टिक्रमभेदतः— **भिन्नभिन्नेष्वागमेषु भिन्नभिन्नप्रकारतया सृष्टिक्रमो दर्शितः। स च भेदः भिन्नभिन्नप्रमात्रापेक्षया सङ्गच्छते। किञ्च तत्त्वाध्वसाधनायां भावनीयत्वेन तदिदं सर्वमागमेषूपदिष्टं स्वात्मनो विश्वात्मकत्वसंविदे, देशकृतसंकोच विमुक्तये च। ततो भिन्नभिन्नप्रकाराः अपि भावनाः आणव**

समावेशफलाः, इति न किञ्चिद् दोषावहम्। यथा—

"मायाकार्येऽपि तत्त्वौघे कार्यकारणता मिथः।
सा यद्यप्यन्यशास्त्रेषु बहुधा दृश्यते स्फुटम्।।
तथापि मालिनीशास्त्रदृशा तां संप्रचक्ष्महे।"

(तं० आ० 9, 166-167)

त्रिकशास्त्रे हि मालिनीतन्त्रस्यैव सर्वोत्कृष्टं प्रामाण्यम् ज्ञायते चैतेन यदयं क्रमोऽन्येष्वागमेष्वन्यथा प्रतिपादितः इति। अस्माकं तु मालिनीमतमेवाभीष्टम्।

तत्त्वगर्भस्तोत्रम्— भट्ट-प्रद्युम्नेन विरचितं देव्याः पराशक्तेः किमपि सुप्रसिद्धं शास्त्रसिद्धान्तगर्भस्तोत्रं यस्य पद्यान्याचार्यान्तरैरुद्धृतान्येव लभ्यन्तेऽधुना। यथा—

"तथा च तत्त्वगर्भस्तोत्रे गुरुभिः—
यस्या निरुपधिज्योतीरूपायाः शिवसंज्ञया।
व्यपदेशः परां तां त्वामम्बां नित्यमुपास्महे।"

(स्पं० वि०, पृ०, 129)

अस्य स्तोत्रस्य भट्टप्रद्युम्नकृतत्वमुक्तमुत्पलदेवपादैः। यथा—

"यदैतदौन्मुख्यं सैव किञ्चिदुच्छूनता कथ्यते भट्टप्रद्युम्नेन तत्त्वगर्भे।"

(शि० दृ० वृ०, पृ०, 16)

~ तत्पद्यानि— **उद्धृतानि यथा—**

(1)"यस्या निरुपधि..... इत्यादि।"

(शि० दृ० वृ०, पृ०, 94-101)

(2) "..... यावन्नोन्मेषभागणुः
न तावदर्थे वर्तेत स चोन्मेषः क्रिया मता।
क्रिया च नानारूपैव .....।।"

(तदेव, पृ०, 101)

(3) "स्वस्वभावस्थितिमुक्त्वा तस्मान्नान्यास्ति सा दशा।
शिवे यस्या न वाग्रूपं सूक्ष्ममप्राप्तसन्निधि।।"

(तदेव, पृ०, 102)

(4) तदुक्तं तत्त्वगर्भे—
"परमार्थेन न ग्राह्यं ग्राहकं वा न किञ्चन।
यस्मादृते तत् स्वाभासमस्वाभासमिवेक्ष्यते।।"

(स्पं० प्र०, पृ०, 17)

(5) "तथा च तत्त्वगर्भस्तोत्रे गुरुभिः .....।
यस्याः निरुपधि ..... इत्यादि।"

(स्पं० वि०, पृ०, 129)

*(6) "किञ्चिदुच्छूनतापत्तेरुन्मेषादिपदाभिधाः।
प्रवर्तन्ते त्वयि शिवे शक्तिता ते यदाम्बिके।।"*

(तदेव, पृ०, 129)

*(7) "ज्ञानक्रियास्वरूपेण प्रवृत्तायास्तु ते शिवे।
सदाशिवत्वं जगद्भोगाहं तत्त्ववेदिनः।।
गुणीभूतज्ञशक्तिस्त्वं व्यक्तीभूतक्रियात्मिका।
यदा तदैश्वरं तत्त्वं व्यक्ततामेति वृत्तिमत्।।
प्रवृत्तावुन्मुखीभूता भवेस्त्वं परमे यदा।
ज्ञानशक्तिस्तदोदारा विद्या त्वं परिगीयसे।।"*

(तदेव, पृ०, 131)

(8) तत्त्वगर्भे एव—
"यदा त्वेवं विद्यादत्र निजा भोगाज्ञता पशोः।
तदा मायास्वरूपेति गीयसे वैभवाश्रया।।"

(तदेव, पृ०, 132)

द्र०– (शि० दृ० वृ०, पृ०, 94,101-102) तथा
(स्पं० वि०, पृ०, 129, 131-132)

तत्त्वग्रामः— पारमेश्वरीणां शक्तीनां पारमेश्वर एव चित्प्रकाशे तत्प्रकाशेनैव यो बहिर्मुखतयाप्यवभासः प्रतिबिम्बकल्पतया सततमिदन्तया प्रकाशमानोऽस्ति स एव हि तत्त्वग्रामः। यथा—

"परमेश्वरस्य हि परमार्थत एताः शक्तयो यस्तत्त्वग्रामः।"

(ई० प्र० वि०, खं० 2, पृ०, 195)

असौ द्विप्रकारः- प्रमेयतत्त्वानि षट्त्रिंशत् प्रमातृतत्त्ववर्गाश्च सप्त।

तत्त्वज्ञानम्— स्वात्मनो जगतश्च यद्वास्तविकं तत्त्वं शिवरूपत्वं तस्य सम्यग्ज्ञानं विज्ञानञ्च।

~ तत्फलम्— **तत्वज्ञाने सम्पन्ने सङ्कुचितकर्मवासनाया विगमे सति नैव कथमपि साधकस्य पुनः संसरणम् संसृतिकारणनाशात्।**

इति जन्मकर्मादिचिन्तामुक्तोऽसौ सुखमास्ते।

यथा—

"दिक्कालकलनविकलं ध्रुवमव्ययमीश्वरंसुपरिपूर्णम्।
बहुतरशक्तिव्रातप्रलयोदयविरचनैककर्तारम्।।
संसृष्टयादिविधि सुवेधसमात्मानं शिवमयं विबुद्धयेत।
कथमिव संसारी स्याद् विततस्य कुतः क्व वा सरणम्।।"

(प० सा० का, 65-66)

तत्त्वज्ञानी— असौ प्रत्यभिज्ञातात्मतत्त्वः प्रबुद्धो योगी यः स्वात्मानं सर्वं जगच्छिवरूपतया सम्यग् विजानाति। प्रारब्धान्तं शरीरे जीवन्नप्यसौ मुक्त एव सन् न लोकव्यवहारेण कथमपि व्यामोहमुपगच्छति।

~ अन्त्येष्टयाद्यनर्हः— **तस्य नैवान्त्येष्टिदीक्षया न वा श्राद्धादिदीक्षाक्रियाभिः किमपि प्रयोजनम्।**

यथा—

*"तत्त्वज्ञानार्कविध्वस्तध्वान्तस्य तु न कोऽप्ययम्।
अन्त्येष्टिश्राद्धविध्यादिरूपयोगी कदाचन।।"*

(तं० आ० 25,10)

द्र०- (तं० सा०, पृ०, 176)

तत्त्वभेदनम्— एकैकस्य तत्त्वस्य तत्तत्प्रमातृभिस्तत्तत्प्रमातृशक्तिभिश्च या वेद्यता तया तद् भिन्नभिन्नमिव प्रतिभाति। तदेवंविधे न भेदेन भिद्यमानेषु तत्त्वेषु या तत्त्वा-ध्वधारणाप्रक्रिया सापि भिन्नभिन्नप्रकारैव दर्शिता त्रिकाचारीये आणवोपाये। सैव प्रक्रिया तत्त्वभेदननाम्ना प्रसिद्धा। यथा—

"तेषाममीषां तत्त्वानां स्ववर्गेष्वनुगामिनाम्।
भेदान्तरमपि प्रोक्तं शास्त्रेऽत्र श्रीत्रिकाभिधे।।"
(तं० आ० 10,2)

एकमेकमपि तत्त्वमत्र भिन्नभिन्नप्रमातृवेद्यतामापन्नं सद् यतो बहुप्रकारतया भिद्यते, तथा भिद्यमानं च सत्तत्त्वाध्वावधारणाविषयतामुपनीयते, तत इयं साधना प्रक्रिया तत्त्वभेदनमित्याख्या लभते।

ततो धरादीनि तत्त्वानि सप्तभिरेव प्रमातृभिर्वेद्यानि, तेषां च शक्तिभिरिति स्वेन रूपेण सहितानि तानि पञ्चद-शधा भिद्यन्ते। यत उत्तराणां तन्मात्राहङ्कारप्रकृति मायादीनामसत्त्वेऽधराणां धरादीनां सत्तैव न कापि कुत्रचित्, तत उत्तराणि तत्त्वानि व्यापकान्यधराणि च व्याप्यानि। बहुभिरुत्तरैस्तत्त्वैर्व्याप्यत्वेनाधराणां तत्त्वानां विषये भावनाभ्यासोऽपि बहुधैव विधातुं शक्यते। तत इदं तत्त्वभेदनं त्रिकाचारे प्रपञ्चितम्। यथा—

"अधराधरतत्त्वेषु स्थिता पूर्वस्थितिर्यतः।।
अन्यथा स्थितिरेवैषां न भवेत् पूर्वहानितः।"
उद्ध० (तं० आ० वि०, खं० 7, पृ० 4)

~ अभेदधारणामयम्— शिवे तावदालम्बनीकृतेऽभेदेनैवैकेन स्वरूपेण तस्य साक्षात्कारो भवति, तस्य न केनापि वेद्यत्वाद् व्याप्तत्वाद्वा, न च कस्यापि तस्मादुत्तरत्वम्। ततो न तद्विषये तत्त्वभेदनधारणा कापि। यथा—

"..... शिवः साक्षान्न भिद्यते।"
उद्ध० (तं० आ० वि०, खं० 7, पृ० 6)

"शिवो न भिद्यते स्वैकप्रकाशघनचिन्मयः।।"
(तं० आ० 10,5)

एवमेव शक्तितत्त्वे धारणालम्बनीकृते न भेदः। तस्य तत्त्वस्य शिवात्मकत्वात्। तथैवाकले प्रमातृतत्त्वेऽप्येष एव न्यायः यः शिवतत्त्वे।

~ अभ्यासक्रमदृष्ट्या— धरातत्त्वादारभ्य शिवतत्त्वान्तं ह्यधराधरेषु तत्त्वेषूर्ध्वोर्ध्वानि तत्त्वानि व्यापकत्वेन स्थितानि वर्तन्ते। चेदेवं नाभविष्यत्तदाऽधरतत्त्वानामाभास एव नाभविष्यत्। ततोऽधरेधरेऽपि तत्त्वेऽभ्यासत उत्तरोत्तराणां तत्त्वानां साक्षात्कारो जायते शिवयोगिनाम्। तेन सकले प्रमातरि प्रलयाकलत्वादीनामपि विशेषाणां विद्यते स्थितिः। न च प्रलयाकलादौ सकलस्याधराधरस्योत्तरोत्तरस्मिन् विलीन- तयैवावस्थानात्। ततः उत्तरोत्तरं तत्त्वभेदनविधौ संख्यायाः ह्रासः। तद्यथा प्रलयाकले प्रमातरि धारणाविषयीकृते सति तस्य विज्ञानाकलादिभिः पञ्चभिरेव, च तेषामुद्रिक्ताभिः शक्तिर्वेद्यत्वे सति स्वरूपतश्च तस्यैकत्वे ५+५+१=११ इत्येकादशधैव तत्त्वभेदनविधिः। यथा—

(क) "पूर्वस्वरूपे त्वधरं विलीनं तत्त्वजालकम्।
भोगाय नालमित्येवं न्यूनत्वं तत्र भेदगम्।।"
उद्ध० (तं० आ० वि०, खं० 7, पृ०, 5)

(ख) "इह यद्यपि सर्वं सर्वात्मकमिति सर्वत्र पञ्चदशात्मकत्वमेव न्याय्यम्; तथाप्यधराधरतत्त्वक्रोडीकारेण प्रतितत्त्वं प्राक् पूर्णेन रूपेण परसंवित् समुल्लसेत्।

.....
.....

उत्तरोत्तरं पुनस्तत्त्वजातं पूर्वपूर्वस्मिन् रूपे विलीनं सत् क्रमेण संविद्येव विश्राम्येत्।"
(तं० आ० वि०,खं० 7, पृ०, 4)

~ अवधानभेदतः— तत्त्वभेदनभावनाभ्यासे तावदालम्बन- भूतस्य तत्त्वस्य यत् स्वं रूपं प्रमेयतायोग्यं तदेव शक्तिमच्छक्ति स्वरूपात्मैक्यतया भाव्यते। तस्य प्रमातृशक्तिमयं यद्रूपं तच्छाक्तं शक्तिमद्रूपञ्च यत्तच्छिवरूपम्। इत्थं जडमप्यालम्बनं बहुधा शक्तिशक्तिमद्रूपतया भाव्यमानं शिवशक्तिसामरस्यात्मकतया प्रकाशते तत्त्वभेदनाभ्यासेन। यथा—

"तत्र स्वं रूपं प्रमेयतायोग्यं स्वात्मनिष्ठम्, अपरा भट्टारिकाऽनुग्रहात्। प्रमातृषूद्रिक्तशक्तिषु यद् विश्रान्तिभाजनं तत्तस्यैव शाक्तं रूपं, श्रीमत्-परापरानुग्रहात्। तच्च सप्तविधं, शक्तीनां तावत्त्वात्। शक्तिमद्रूपप्रधाने तु प्रमातृवर्गे यद् विश्रान्तं तच्छक्तिमच्छिवरूपम् श्रीमत्पराभट्टारिकानुग्रहात् तदापि सप्तविधम्–प्रमातॄणां शिवात्प्रभृति सकलान्तानां तावतामुक्तत्वात्।"
(तं० सा० पृ०,93)

~ एकात्मकम्— शिवविषये या तत्त्वभेदधारणा तत्र न कोऽपि भेदावभासः। ततः शिवः एकात्मकतयैवोपास्यस्तस्यां योगधारणायाम्। यथा—

"शिवो न भिद्यतेस्वैक प्रकाशघनचिन्मयः।"
(तं० आ० 10,5)

~ एकादशात्मकम्— साधकः प्रलयाकलतत्त्वं वा मायां वा धारणालम्बनतामुपनीयोभयं विज्ञानाकलादिभिः पञ्चभिस्तच्छक्तिभिश्च पञ्चभिर्वेद्यतया, स्वरूपेण चापि 5+5+1=11 इत्येकादशविधतया साक्षात्कुर्वंस्तत्त्व-

भेदनाभ्यासेनैकादशविधमैश्वर्यमाप्नोति। स्वात्मानं च विश्वात्मकं पश्यति। यथा—

"..... रुद्रवत् प्रलयाकलाः।
तद्वन्मायापि विज्ञेया .....।।'

(मा० वि० तं० 2, 5-6)

~ त्रयोदशात्मकम्— तत्त्वाध्वधारणाप्रक्रियायां साधकः पुंस्तत्त्वात् कलान्तेषु किमपि तत्त्वं धारणालम्बनतयोपादाय तद् व्यापकैः प्रलयाकलादिभिः षड्भिः षड्भिश्च तेषां शक्तिभिर्व्याप्तं वेद्यं च सद्यदा साक्षात्करोति तदा तस्य निजेन स्वरूपेण साकं त्रयोदश-विधतया तद्दर्शनं भवति, सकलस्तच्छक्तिश्च यतो नात्र पृथक्तयाऽऽभासेते, तयोस्तत्र विलीनतया विद्यमानत्वात्। ततो ताभ्यां नैतेषां तत्त्वानां ज्ञातता सम्भवति। ततोऽसौ तत्त्ववर्गः साधकैः 6+6+1=13 त्रयोदशविधतया साक्षात्क्रियतेऽभ्यास बलेनेति। यथा—

"अनेनैव विधानेन पुंस्तत्त्वानत्कलान्तकम्।
त्रयोदशविधं ज्ञेयम् .....।।"

(मा० वि० तं० 2,5)

"..... आनरात्।
कलान्तं भेदयुग्धीनम् .....।।"

(तं० आ० 10,4)

सकलाख्ये प्रमातृतत्त्वेऽपि त्रयोदशधेयं धारणा वेद्या।

~ त्रयात्मकम्— तत्त्वभेदनप्रक्रियाभ्यासपरो योगी यदा मन्त्रमहेश्वराख्यं तत्त्वं धारणालाम्बनतां नयति तदा तस्य स्वरूपमेकं, शिवेन दृश्यमानतयाऽपरं, तस्योद्रिक्त-शक्तिमत्तया वेद्यं चेत्यपरम्, इति त्रिरूपतया तत्तत्त्वं साक्षात्कुरुते। सैषा त्र्यात्मकता तस्य तत्त्वस्य। यथा—

"त्रिधा मन्त्रेश्वरेशानाः .....।"

(मा० वि० तं० 2,7)

एवमेव सादाशिवे तत्त्वेऽपि त्रैधं तत्त्वभेदनधारणा।

~ दर्शनसिद्धान्तः— त्रिकशास्त्रे प्रमेयतत्त्वानां कतिपये वर्गाः प्रमातृवर्गाश्च सप्त। प्रमेयतत्त्ववर्गाः प्रमातृवर्गैर्वेद्या भवन्ति। प्रमातृवर्गमध्येऽप्यधराधराः प्रमातारः उत्तरोत्तरैः प्रमातृभिर्वेद्या भवन्ति। भिन्नभिन्नप्रमातृवेद्यतायां चलत्यां वेद्यस्यापि स्वरूपे केचन विशेषाः संवेद्यन्ते वेद्यताकृताः। तत एव पुरातनैर्ज्ञाततताकृतो विशेषाः पदार्थानां स्वीकृतः। धरा स्वयमेका तत्तत्प्रमातृभिर्ज्ञायमाना सती तेनतेन च वेद्या सती भिन्नप्रकारकज्ञातताख्यधर्मविशिष्टा भवन्ती बहुप्रकारतया वेद्यमाना सती बहुधैव भावनाभ्यासालम्बनतां नीयते सूक्ष्मसूक्ष्मतद्विमर्शशालिभिः शिवयोगिभिः। सप्तानां प्रमातृवर्गाणां शक्तयोऽपि सप्त। प्रमाता कदाचिदनुद्रिक्तस्वशक्तिमयेन स्वप्राधान्येन वा विमृशति प्रमेयमुद्रिक्त स्वशक्तिप्राधान्येन वा। तदेकमेव तत्त्वं एकप्रमातृवेद्यतया तच्छक्तिवेद्यतया च त्रिप्रकारतामुपयाति। अनेक प्रमातृवेद्यतया चानेकप्रकारतां ज्ञाताख्यो धर्मोऽवश्यमङ्गीकार्यः। तथाहि—

"तथाहि निभृतश्चौरश्चैत्रवेद्यमिति स्फुटम्।।
बुद्ध्वा नादत्त एवाशु परीप्साविवशोऽपि सन्।
चैत्रवेद्यत्वविशिष्टद्रव्यत्वेनावेद्यस्वरूपा दन्यदिवेति
वेद्यताऽपरपर्याया ज्ञातताख्यो विषयधर्मविशेषः सत्यमस्ति।
सेयं पश्यति मां नेत्रत्रिभागेनेति सादरम्।।
स्वं देहममृतेनेव सिक्तं पश्यति कामुकः।"

सुन्दर्या सकामया दृष्टया दृश्मानं चैत्रशरीरमन्यदिव, दृष्ट्वा प्रवर्धितमाहात्म्यमिति तात्पर्यम्।

(तं० आ० 10,58-60)

इदमत्र शक्तिमच्छक्तिभेदे रहस्यम्—अनुद्रिक्त स्वशक्तिः प्रमाता अन्यप्रकारकः, उद्रिक्तस्वशक्तिः स एवान्यप्रकारकः। कस्यापि चक्रवर्तिनः स्वपरिवारमध्यस्थितस्य स्वे गृहे नासौ चक्रवर्तित्वाभिमानो यः सिंहासनस्थस्येति। गृहे तस्य चक्रवर्तित्वं सदप्यनुद्रिक्तं, सिंहासनस्थश्चान्यथा। तथैवेहापि प्रमातृवेद्यत्वे, तच्छक्तिवेद्यत्वे चान्यथाऽयथाऽऽभासरूपता प्रमेयस्येति विम्रष्टव्यमत्र सुधीभिः।

~ नवात्मकम्— तत्त्वभेदनप्रक्रियाभ्यासे साधकः विज्ञानाकलतत्त्वं धारणालम्बनीकृत्य मन्त्रादिभिश्चतुर्भिः प्रमातृवर्गैस्तच्छक्तिभिश्च चतसृभिर्वेद्यं सत्तद् व्याप्तं च सत् पश्यन् नवधा तस्य स्वरूपं साक्षात्कुर्वन् नवधैवैश्वर्यभाग् भवति। स्वात्मनश्च विश्वात्मकतानिश्चयं दृढतामापादयति। यथा।—

"..... नवधा ज्ञानकेवलाः।" इति।

(मा० वि० तं०, 2,6)

"नवधेति सशक्तीनां चतुर्णां मन्त्रादीनां प्रमातृत्वात्।"

(तं० आ० वि०, खं० 3, पृ०,6)

एवमेव विज्ञानाकलाधारभूतायामधरायां महामायाणां या तत्त्वभेदनधारणा सापि नवात्मिकैव।

~ पञ्दशात्मकम्— धरातत्त्वादारभ्य मूलप्रकृतितत्त्वान्ते तत्त्ववर्गे एकैकशो धारणालम्बनीकृते सति तेषां तत्त्वानामुद्रिक्तानुद्रिक्त शक्तिभिः सकलादिशिवान्तैः सप्तप्रमातृवर्गैर्वेदनीयतया तत्तत्तत्त्वस्वरूपसाक्षात्काराभ्यासः पाञ्चदश्यविधिः। तत्र धरादेः स्वरूपम्=1 सप्तप्रमातृवेद्यत्वेन=7 सप्तप्रमातृशक्तिसंवेद्यतया=7 इत्येवं पञ्दशविधत्वं तत्तत्तत्त्वस्य भाव्यते। ततो भावनामयी विद्येयं पाञ्चदशीति कथ्यते। यथा—

(क) "शक्तिमच्छक्तिभेदेन धराद्यं मूलपश्चिमम्।
भिद्यते पञ्चदशधा स्वरूपेण सह .....।।"

(ख) "तत्र स्वरूपं भूमेर्यत् पृथग्जडमवस्थितम्।
मातृमानाद्युपधिभिरसञ्जातोपरागकम्।
सकलादिशिवान्तैस्तु मातृभिर्वेद्यतास्य या।।
शक्तिमद्भिरनुद्भूतशक्तिभिः सप्त तद्भिदः।
सकलादिशिवान्तानां शक्तिषूद्रेचितात्मसु।।
वेद्यताजनिताः सप्त भेदाः इति चतुर्दश।"

(तं० आ० 10,10-13)

अत्र शक्तिमन्तोऽनुद्रेचितस्वशक्तयः; शक्तयश्चोद्रे-कमाप्तास्तेषां शक्तयः। यथा—

"शक्तिमच्छक्तिभेदेन धरातत्त्वं विभिद्यते।
स्वरूपसहितं तच्च विज्ञेयं दशपञ्चधा।"

(मा० वि० तं० 2,2)

~ पञ्चात्मकम्— तत्त्वभेदनाभ्यासपरो योगी यदा मन्त्रेश्वरतत्त्वे धारणां धारयति तदा तत्तत्त्वं स्वरूपतः एक-विधम्, मन्त्रमहेश्वरेण, शिवेन च तयोश्च शक्तिभ्यां वेद्यं

सद् 1+2+2=5 इति पञ्चधा भिन्नभिन्नरूपतया साक्षात्कुरुते। सैषा पञ्चात्मकता तत्त्वभेदनधारणायाः। यथा—

"……।।"
पञ्चधा मन्त्रनायकाः।"
(मा० वि० तं० 2,6)

"…… तदीशाः पाञ्चध्ये।।"
(तं० आ० 10,5)

तदीशा इति मन्त्रेश्वराः।

ऐश्वरे तत्त्वेऽप्येष एव न्यायो वेदितव्यः।

~ प्रकारभेदतः— **विस्तरतो भेदने तत्त्वभेदनधारणाया प्रकाराः ह्यसंख्या एव। यथा—**

"शक्तिशक्तिमतां भेदादन्योऽन्यं तत्कृतेष्वपि।
भेदेष्वन्योऽन्यता भेदात्तथा तत्त्वान्तरैः सह।।
भेदोपभेदगणनां कुर्वतो नावधिः क्वचित्।
तत एव विचित्रोऽयं भुवनादिविधिः स्थितः।।"
(तं० आ० 10,150-151)

एकैकस्य शक्तिमतोऽपि सप्तरूपत्वादेकैकस्याः शक्तेरपि सप्तप्रकारत्वाद्बहवो भेदास्तत्त्वभेदनप्रक्रियायाम्। सर्वं सर्वात्मकमिति सिद्धान्ततः एकैकोऽपि प्रमाताऽसंख्यरूपः। किञ्चैकत्रापि प्रमातरि अवधानानवधानादिकृताः अर्थक्रियानुसन्धानवैचित्र्यकृताः शक्तिविशेषतिरोभावोद्रेककृताः भूयांसो भेदाः। एकैकस्यापि करणादिपाटवापाटवादिकृता सङ्करवैचित्र्याद्भेदसंख्यातितरां भूयसी तत्त्वभेदने। यथा—

"सप्तानां मातृशक्तीनामन्योऽन्यं भेदने सति।
रूपमेकान्नपञ्चाशत् स्वरूपं चाधिकं ततः।।
सर्वं सर्वात्मकं यस्मात् तस्मात् सकलमातरि।
लयाकलादिशक्तीनां सम्भवोऽस्त्येव तत्त्वतः।।"
इत्यारभ्य……।
चेत्यमानादचेत्याद्वा तन्वाते बहुभेदताम्।। इत्यन्तम्।"
(तं० आ० 10, 154-163)

"इत्थं विस्तरतस्तत्त्वभेदोऽयं समुदाहृतः।।
शक्तिशक्तिमतां भेदादन्योऽन्यं तत्कृतेष्वपि।
भेदेष्वन्योऽन्यतो भेदात् तथा तत्त्वान्तरैः सह।।
भेदोपभेदगणनां कुर्वतो नावधिः क्वचित्।"
(तं० आ० 10, 149-151)

~ फलदृष्ट्या— **एवमैककं तत्त्वं भिन्नभिन्नरूपतयाऽनुसन्धानविषयतां नीतं सद्यदा तत्त्वाध्वधारणाभ्यासे भाव्यते तद्विषये तथाविधाया भावनाया अभ्यासेनैकतस्तु बहुविधैश्वर्यभोगसिद्धिर्भवति, अपरतश्चाभ्यासपरिपक्वतायां व्युत्थानेऽपि साधकः सर्वं स्वात्मशिवरूपमेव पश्यति सर्वत्र। अनेकैः प्रमातृभिः सममेव वेद्यमानं च वस्तुतत्त्वं साक्षात्कुर्वन्नपूर्वं सन्तोषमाप्नोति। नृत्यनाट्याद्यभिनयानां बहुभिर्मिलित्वा दर्शने एव विशेषतया चमत्कारानुभूतिर्नैकैकेन दर्शने। यथा—**

"चैत्रेण वेद्यं जानामि द्वाभ्यां बहुभिरप्यथ।
मन्त्रेण तन्महेशानशिवेनोद्रिक्तशक्तिना।।
अन्यादृशेन वेत्येवं भावो भाति यथा तथा।
अर्थक्रियादिवैचित्र्यमभ्येत्य परिसंख्यया।।
तथा ह्येकाग्रसकलसामाजिकजनः खलु।
नृत्तं गीतं सुधासारसागरत्वेन मन्यते।।"
(तं० आ० 10, 83-85)

~ रहस्यान्तरतः— **इदमपि च तत्त्वभेदनरहस्यम्—मातृमानमेयरूपास्तिस्त्रः परमेश्वरस्य शक्तयः। तत्र प्रमातारः शिवात् सकलान्ताः सप्त। प्रमाणानि तेषां सप्तविधाः शक्तयः। प्रमेयं च धरादिसदाशिवान्तं तत्त्वजातम्। सकलाद्याः शिवादवरे प्रमातृवर्गा अपि प्रमेयतया विमृश्यन्ते उत्तरोत्तरैः साधकैस्तत्तत्त्वं तदुत्तरवर्तिभिः प्रमातृवर्गैस्तच्छक्तिभिश्च दृष्टं सत्तैर्व्याप्तं च सदनेकभेदभिन्नतया भाव्यते। तदभ्यासेन साधको निजविश्वरूपतायाः साक्षात्कारेण सममेव तत्तत्तत्त्ववशीकारादिसिद्धीरवाप्नोति। यथा—**

"तथाहि तिस्त्रो देवस्य शक्तयो वर्णिताः पुरा।।
ता एव मातृमामेयत्रैरूप्येण व्यवस्थिताः।
परांशो मातृरूपोऽत्र प्रमाणांशः परापरः।।
मेयोऽपरः शक्तिमांश्च शक्तिः स्वं रूपमित्यदः।"
(तं० आ० 10,7-9)

मेयो धारणालम्बनभूतो धार्यमाणस्य स्वरूपमिति। शक्तिमान्= सप्त-षट्-पञ्चादिवर्गभिन्नं प्रमातृतत्त्वमनुद्रिक्तस्वशक्तिकम् इति। शक्तिः=तत्तत्प्रमातृवर्गस्योद्रिक्तज्ञानक्रियादिसामर्थ्यरूपा।

द्र० च— (मा० वि० वा० 1,960-969)

~ शिवे— **शिवे तत्त्वभेदनभावना नैव विधीयते। तस्य सर्वथाऽभिन्नत्वात्। यथा—**

"…… शिवः साक्षान्न भिद्यते।।"
(मा० वि० तं० 2,7)

"शिवो न भिद्यते स्वैकप्रकाशघनचिन्मयः।"
(तं० आ० 10,5)

एवमेव शक्तितत्त्वे धारणालम्बनीकृते न भेदः। तस्य तत्त्वस्य वस्तुतः शिवात्मकत्वात्, तत्र चाभेदनिष्ठानां शिवप्रमातृणामेव स्थितेः।

द्र०- **'अभेदधारणामयम्'। इति।**

~ सप्तात्मकम्— **तत्त्वभेदनप्रक्रियाभ्यासपरः साधकः मन्त्रप्रमातृतत्त्वं धारणालम्बनतयाश्रित्य तन्मन्त्रेश्वरादिभिस्त्रिभिस्तच्छक्तित्रयेण च वेद्यं सत्तद्व्याप्ततया च साक्षात्कुर्वन् 3+3+1= सप्तप्रकारतया तस्य वास्तविकं तत्त्वं पश्यति। सैषां सप्तात्मकता तस्या। यथा—**

"मन्त्राः सप्तविधाः ……।।"
(मा० वि० तं० 2,6)

"…… सप्तधा पुनः।।
मन्त्राः ……।"
(तं० आ० 10,4-5)

"सप्तधेति सशक्तिकस्य मन्त्रेश्वरादेस्त्रयस्य
प्रमातृत्वात्।"
(तं० आ० वि०, खं० 7, पृ० 6)

शुद्धविद्यायामुत्कृष्टायां च महामायायामालम्बनीकृतायामेवमेव सप्तधैव तत्त्वभेदनाभ्यासः।

तत्त्वयुक्तिः— किमपि शैवशास्त्रपुस्तकं यदद्यत्वे नैव लभ्यते क्वापि। यथा—

(क) "तत्त्वयुक्तौ च—
"विषयाधिपतिर्यो हि येन जानाति पार्वति।
तस्य यो वेत्ति तत्त्वेन तेन ज्ञातं चराचरम्।।
इति।"

उद्ध०- (स्पं० प्र०, पृ०,44)

(ख) "तत्त्वयुक्तौ च—
"येन येन हि बद्ध्यन्ते जन्तवो रौद्रकर्मणा।
सोपायेन तु तेनैव मुच्यन्ते भवबन्धनात्। इति।"

उद्ध०- (स्पं० प्र०, पृ०, 5)

तत्त्वरक्षणम्— तत्त्वरक्षाभिधमागमशास्त्रम्। यथा—
"श्रीतत्त्वरक्षणे श्रीनिगमे त्रिशिरोमते च तत्
प्रोक्तम्।"

(तं० आ० 29, 141)

तत्त्वरक्षाविधानम्— शैवशास्त्रग्रन्थविशेषो योगविद्याप्रतिपादकः। यथा—

(क) "तत्त्वरक्षाविधानेऽतो विसर्गस्त्रैधमुच्यते।"
इत्यादि।

(तं० आ० 3,115)

(ख) "तत्त्वरक्षाविधाने च तदुक्तं परमेशिना।"

(तं० आ० 3,112)

(ग) "तदुक्तं तत्त्वरक्षाविधाने—
"अशक्तत्वान्निष्क्रियत्वान्न पुंसि न परे पदे।
शक्तौ नियोजयेन्मन्त्रं जपस्तु सफलो भवेत्।।
इति।"

(स्पं० प्र०, पृ०, 33)

तत्त्ववर्गाः— बहुधा वर्गीकरणं तत्त्वानाम्। तद्यथा—

(1) शिवादारभ्य शुद्धविद्यान्तं शुद्धस्तत्त्ववर्गः।

(2) मायामारभ्य पुरुषान्तमशुद्धस्तत्त्ववर्गः मायाप्रमातुरन्तरङ्गभूततत्त्वात्मकः।

(3) मूलप्रकृतिमाभ्य धरान्तः प्राकृतस्तत्त्ववर्गः प्रमातुर्भिन्नः। सोऽप्यशुद्ध एव। असौ वर्गः पुनर्द्विवर्गात्मकः।

(4) तत्र महत्तत्त्वादारभ्य कर्मेन्द्रियतत्त्वानि यावत् करणतत्त्ववर्गः। तन्मात्रपञ्चकं भूतपञ्चकं च प्रमेयतत्त्ववर्गः। सोऽपि पुनर्द्विवर्गात्मकः। तत्र—

(5) पञ्चतन्मात्रवर्गः सूक्ष्मप्रमेयतत्त्ववर्गः।

(6) आकाशादिधरान्तः स्थूलप्रमेयतत्त्ववर्गः। इति।

~ तत्त्वत्रयविधौ– (1) धरादिमायान्तमशुद्धमात्मतत्त्वम्।

(2) शुद्धविद्यादि सदाशिवान्तं शुद्धं विद्या तत्त्वम्।

(3) शिवशक्तिरूपं च परं शिवतत्त्वम्।

~ तत्त्वभेदनप्रक्रियायाम्— (1) धरामारभ्य प्रकृतिं यावत् पञ्चदशधा तत्त्वभेदनम्।

(2) सकलाख्यपुरुषतत्त्वादारभ्य कलातत्त्वं यावत् त्रयोदशधा भेदनम्।

(3) प्रलयाकलस्य मायायाश्चाप्येकादशधा भेदनम्।

(4) विज्ञानाकलस्य नवधा, (5) मन्त्रस्य सप्तधा, (6) मन्त्रेश्वरस्य पञ्चधा, (7) मन्त्रमहेश्वरस्य त्रिधा।

शिवस्य नैव तत्त्वभेदनविषयता। यथा—
"शक्तिमच्छक्तिभेदेन धरातत्त्वं विभिद्यते।
स्वरूपसहितं तच्च विज्ञेयं दशपञ्चधा।।
शिवादिसकलात्मान्ताः शक्तिमन्तः प्रकीर्तिताः।
तच्छक्तयश्च विज्ञेयाः तद्वदेव विचक्षणैः।।
एवं जलादिमूलान्तं तत्त्वव्रातमिदं महत्।
पृथग्भेदैरिमैर्भिन्नं विज्ञेयं तत्फलेप्सुभिः।।
अनेनैव विधानेन पुंस्तत्त्वात्तत्कलान्तकम्।
त्रयोदशविधं ज्ञेयं रुद्रवत्प्रलयाकलाः।
तद्वन्मायापि विज्ञेया नवधा ज्ञानकेवलाः।
मन्त्रा सप्तविधास्तद्वत् पञ्चधा मन्त्रनायकाः।।
त्रिधा मन्त्रेश्वरेशानाः शिवः साक्षान्न भिद्यते।।"

(मा० वि० तं० 2, 2-5)

तत्त्वविचारः— भट्टकल्लटविरचितो ग्रन्थविशेषो य इदानीं नैव लभ्यते क्वापि। तद्यथा—

(क) "ग्रन्थकृताप्युक्तं तत्त्वविचारे—
'शक्तिप्रसरसङ्कोचनिबद्धावुदयव्ययौ।
यस्यात्मा स शिवो ज्ञेयः सर्वभावप्रवर्तकः।।
इति।"

(स्पं० प्र०, पृ०, 9)

(ख) "ग्रन्थकृता तत्त्वविचारेऽप्युक्तम्—
स्वस्वभावस्थिता भावाः सम्बध्यन्ते परस्परम।
भोग्यभोक्तृऽत्वभावेन न कदाचित्स्वभावतः।।
द्रष्टाऽनुभविता स्मर्ता ग्राहको भोक्तृवेदकः।
कर्तोपलब्धा संवेत्ता ज्ञातेति ज्ञानसंज्ञकाः।।"

(स्पं० प्र०, पृ०, 38-39)

तत्त्वविद् (तृ)— द्र० - तत्त्वज्ञानी।

~ आचारनियमतः— विदिततत्त्वेनापि साधकेन, लोकसंग्रहार्थम्, शास्त्रविरुद्धम्, नाचरणीयम्। यथा—
"अतस्तत्त्वविदाऽऽध्वस्तशङ्कातङ्कोऽपि पण्डितः।
प्रकटं नेदृशं कुर्यात्लोकानुग्रहवाञ्छया।।
श्रीमन्मतमहाशास्त्रे तदुक्तं विभुना स्वयम्।
स्वयं तु शङ्कासङ्कोचनिष्कासनपरायणः।।
भवेत् तथा यथान्येषां शङ्का नो मनसि स्फुरेत्।"

(तं० आ० 26, 74-75)

~ माहात्म्यतः — (1) तिर्यचामपि कृते मोक्षदः।

यदि चक्रयागतत्त्ववित् कोऽपि शाकमांसमत्स्यादि भुञ्जीत तदा तेन भुज्यमाना पशवः औषध्यश्चापि मुक्ता भवन्ति। यथोक्तम्—
"भोज्यं मायात्मकं सर्वं शिवो भोक्ता स चाप्यहम्।

एवं यो वै विजानाति दैशिकस्तत्त्वपारगः।
तं दृष्ट्वा देवमायान्तं क्रीडन्त्यौषधयो गृहे।
निवृत्तमद्यैवास्माभिः संसारगहनार्णवात्।
यदस्य वक्त्रं सम्प्राप्ता यास्यामः परमं पदम्।"
दीक्षोत्तरागमवाक्यान्युद्धृतानि .....
(तं० आ० 28, 68-70)

(2) तत्त्वज्ञो गुरुर्विनापि प्रायश्चिताद्येवमेव स्वानुग्रहेण शिष्यान् मोचयितुं समर्थः। सशरीरो ह्यसौ शिवः सर्वथा निग्रहानुग्रहयोः स्वतन्त्रः। यथा—

"सर्वथा वर्तमानोऽपि तत्त्वविन्मोचयेत् पशून्।
इच्छयैव शिवः साक्षात्तस्मात् तं पूजयेत् सदा।।"
(तं० आ० 21, 59)

तत्त्वशोधनम्— गुरुः शिष्यस्यात्मानं तत्त्वशोधनप्रक्रियया तत्त्वेभ्य ऊर्ध्वं प्रापयति। येन तस्य तत्त्वानां विषये ताटस्थ्यभावः, अभिनिवेशात्मकाभिमानिकाहम्भाव गलनात्मक उदेति। एतेन साधकः आत्मनं तत्त्वेभ्य उत्तीर्णं शिवमेव साक्षात्कुरुते। यथा—

"देहैस्तावद्भिरस्याणोश्चित्रं भोक्तुरपि स्फुटम्।
मनोऽनुसन्धिर्नोविश्वसंयोगप्रविभागवत्।।"
(तं० आ० 16,240)

"आत्मनो व्यापकत्वात् स्थितेषु विश्वेन भावव्रातेन संयोगविभागेषु अनेन संयुक्तोऽस्म्यनेन च विभक्तोऽस्मीत्येवं नानुसन्धानम्।"
(तं० आ० वि०, खं०10, पृ०, 94)

तत्त्वसंग्रहाधिकारः— चतुर्थोऽयं भागः ईश्वरप्रत्यभिज्ञायाः। अत्रावशिष्टानां विषयाणां गुणत्रयादीनां, शिवतायाः, जीवतायाः, बन्धमोक्षयोस्तदुपायादेश्च संक्षेपतः प्रतिपादनं कृतं वर्तते। विमर्शिन्यामेकेनैवाह्निकेनास्य व्याख्या कृतास्ति। परं सम्पादकप्रमादेन तत्राप्याह्निकद्वयमिति प्रदर्शितमस्ति मुद्रिते पुस्तके। तच्च वस्तुत ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनीमनुसृत्य सम्पादकैस्तथा कृतम्। परमाचार्येणाभिनवगुप्तेन तथा न कृतं स्वयम्, तत्त्वसंग्रहाधिकारस्यावतरणिकायामेकमेवाष्टा- दशकारिकात्मकमाह्निकमुपन्यस्तं यतः मूलग्रन्थेऽपि तथैव विभागः।

तत्त्वसमावेशः—पृथिव्यादितत्त्वपञ्चकस्य स्थूलसृष्ट्यात्मकत्वेन पृथग् गणितत्वात् तत्त्वसमावेशस्त्रिंशद्विध एव गण्यते गन्धतन्मात्रादारभ्य शिवतत्त्वान्तं गणनात्। पुरुषस्तु समावेशाभ्यासपरो न समावेश्येषु गण्यते। इति त्रिंशदेव तत्त्वसमावेशप्रकाराः। उपासनाक्रमे शिवस्यापि समावेशाभ्यासालम्बनता न दोषावहा। यथा—

"यावदन्ते परं तत्त्वं समस्तावरणोर्ध्वगम्।
व्यापि स्वतन्त्रं सर्वज्ञं यच्छिवं परिकल्पितम्।।
तदप्यकल्पितोदारसंविद्वपर्णबिम्बितम्।
पश्यन् विकल्पविकलो भैरवीभवति स्वयम्।।"
(तं० आ० 3, 276-277)

प्रतिबिम्बतं च शिवतत्त्वम्- "अ" इति।

तत्त्वसृष्टिः— चित्प्रकाशेन स्वस्मिन्नेव स्वशक्तिप्रतिबिम्बावभासनेन सदाशिवादीनां तत्त्वानां बाह्यतयेदं रूपतयावभासनम्।

~ पृथिव्यन्तैव— **यथा—**

(क) "षट्त्रिंशत् संख्या पूर्यते तावत् पार्थिवं तत्त्वम्। तदनन्तरम् नोपलभ्यतेऽत्र तथा। पार्थिवं तत्त्वं स्थूलत्वात् पर्यन्तवर्ति।"
(शि० द० वृ०, पृ०, 25-26)

(ख) "अत ऊर्ध्वं यानि भुवनादीनि कार्याणि तान्येषामेव भूतानां विभवभूतानि अपरिसंख्येयानि स एव निर्मिमीते।"
(तदेव, पृ०, 29)

तत्त्वाधिपाः— उपास्याः— भुवनानां बहुसंख्यत्वात्तदीशानामपि बहुसंख्यतेतिकृत्वा तेषामुपासनाक्रमस्य संक्षिप्तप्रक्रियोपदिष्टा दीक्षोत्तरागमे। सैवोद्धृता तन्त्रालोके। तद्यथा—

"भुवनानामानन्त्ये तदीशानामप्यानन्त्यम्। इति तेषां प्रत्येकमनुसन्धाने जन्मसहस्त्रैऽपि न कश्चित् पारं यायात्। इत्येतदशक्यानुष्ठानमित्याशङ्क्याह। "
(तं० आ० वि०, खं० 5, पृ०, 6-9)

"श्रीमद्दीक्षोतरे चैतानध्वेशान् गुरुरब्रवीत्।
ब्रह्मानन्तात्प्रधानान्तं विष्णुः पुंसः कलान्तगम्।।
रुद्रो ग्रन्थौ च मायायामीशः सादाख्यगोचरे।
अनाश्रितः शिवस्तस्माद् व्याप्ता तद्व्यापकः परः।।"
(तं० आ० 8, 9-10)

द्र०— 'तत्त्वेश्वराः' इति।

तत्त्वार्थचिन्तामणिः— शिवसूत्रस्य चतुर्थे खण्डे भट्टकल्लटेन निर्मिता काऽपि महत्त्वमण्डिता टीका यस्याः पङ्क्तयोऽन्यैराचार्यैः समुद्धृताः स्वेषु ग्रन्थेषु। इदानीमसौ टीका नैव लभ्यते क्वापि। उक्तमस्या विषये—

(क) "तदुक्तम्—इति शिवसूत्रवृत्त्योर्मधुवाहिनीतत्त्वार्थ चिन्तामण्योर्भट्टकल्लटपादैः।"
(ई० प्र० वि० वि०, खं० 2, पृ०, 30)

(ख) "प्रादाद् भट्टाय सूरये। श्री कल्लटाय सोऽप्येवं चतुःखण्डानि तान्यथ।
व्याकरोत् त्रिकमेतेभ्यः स्पन्दसूत्रैः स्वकैस्ततः।
तत्त्वार्थचिन्तामण्याख्यटीकया खण्डमन्तिमम्।।"
(शि० सू० वा०, पृ०, 3)

(ग) "यथा चिन्तामणौ प्रोक्तं तेन रूपेण योगवित्।
निःशङ्कः सिद्धिमाप्नोति गोप्यं तत् प्राणवत्स्फुटम्।।"
(तं० आ० 16, 51)

(घ) "चिन्तामणाविति तत्त्वार्थचिन्तामणौ।"
(तं० आ० वि०, खं० 10, पृ०, 19)

(ङ) "तत्त्वार्थचिन्तामणौ च—
"इत्थं तत्तदनल्पमोहदलनप्राप्तस्वरूपोदयो।
योगी नित्यमनात्मभावविरहात्स्वात्मस्थितौ निर्वृतः।।
दृश्यद्रष्टृविवेकविद्भवपदव्यापी विमुक्तामयो।
व्युत्थानेऽपि समाधिभाग्भवति सन् मोक्षश्रियः कारणम्।'
इति।"
(स्पं० प्र०, पृ०, 30)

(च) "अत एव भट्टकल्लटेन 'प्राणाख्यनिमित्तदार्ढ्यम् 'प्राक् संवित् प्राणे परिणता,' इति तत्त्वार्थचिन्तामणावुक्तम्।।"

(शि० सू० वि, पृ०, 68)

द्र०- (ने० तं० उ०, खं० 2, पृ०, 226)

~ तद्विशेषताः— **तत्त्वार्थचिन्तामणेः कानिचिद्वाक्यानि सूत्राणीव लक्ष्यन्ते तद्यथोपरिदत्ते (च) इत्यत्र द्वे। तन्त्रालोकविवेके चापरमपि वाक्यम्। तद्यथा—**

"देहनीलादीनां सर्वशरीरग्रहणम्।"

(तं० आ० वि०, खं०11, पृ०,138)

इदं वाक्यं व्याख्यात्मकमपि सम्भवति। स्पन्दप्रदीपिकायामुद्धृतंशार्दूलविक्रीडितं पद्यमुपसंहारात्मकमिव भाति। कान्यपि भट्टकल्लटीयान्यपराण्यपि वाक्यानि सूत्राणीव लक्ष्यन्ते। सम्भवतस्तान्यपि तत्त्वार्थचिन्तामणेरेवोद्धृतानि। यथा—

(क) "भट्ट श्री कल्लाटादयोऽप्येवमुचुरित्याह—
तेनाहुः 'किल सम्वित् प्राक प्राणे परिणता' तथा
'अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः'।। इति।"

(तं० आ० 6,12)

(ख) "तथा समानाधिकरण्यमेव व्याख्यातं भट्टश्री-कल्लटपादैः 'चैतन्यमात्मनो रूपम्' इति।"

(ई० प्र० वि०,खं.2, पृ०, 183)

चरमवाक्यमत्र शिवसूत्रस्य व्याख्यानं प्रतिभाति परमन्तः-करणतत्त्वस्येत्यादि सूत्रस्यैवानुष्टुभ् वृत्तानुसरणानुकूलः पदान्तरैरुल्लेखः प्रतिभाति। ततोऽनुमातुं शक्यते यत् तत्त्वार्थचिन्तामणिरिति नामा भट्टकल्लटकृतटीकायुतः शिवसूत्रस्य चतुर्थः खण्ड एव। सर्वोऽप्यसौ खण्डः सव्याख्यो भट्टकल्लटकृतत्वेनैव प्रसिद्ध आसीदिति। तस्य शिवसूत्र-चतुर्थखण्डस्यैकं सूत्रमीश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिन्या-मुद्धृतमाचार्याभिनवगुप्तमहोदयैः सावतरणिकम्। तद्यथा—

"तद्दृढतावशेनैव हि सत्यपि प्रतिक्षणमनेकवेद्यदेहत्वे भावभूतशरीरविभागो भट्टश्रीकल्लटादिभिः श्रीशिवसूत्रे 'प्राणाख्यनिमित्तदार्ढ्यम्' इत्यत्रोक्तः।"

(ई० प्र० वि० वि०, खं०3, पृ०, 349)

एतेन प्राणाख्यनिमित्तदार्ढ्यमिति शिवसूत्रमेव सिद्ध्यति। अपरञ्च सूत्रद्वयं स्पष्टमेव 'शिवसूत्रमित्युद्धृतं तत्रान्यञ्च यथा—

(क) "यत् किल शिवसूत्रम्— "ब्रह्मपदे कमल-शरीरस्तदुत्थप्राणिरूपेण सर्वत्र सर्वदा विचरति" इत्यादि।

(ई० प्र० वि० वि०,खं०2, पृ०, 301)

(ख) "अस्ति च शिवसूत्रम्— 'सकृद्विभातोऽयमात्मा। पूर्णोऽस्य न क्वाप्यप्रकाशसम्भवः।"

(स्पं० सं०, पृ०, 25)

सूत्रत्रयमेतत् स्पष्टमेवोद्धृतं प्रतिभाति। एतैरुद्धरणैरिदं सिद्ध्यति यद् भट्टकल्लटकृता तत्त्वार्थचिन्तामणिरिति नाम्नी शिवसूत्रग्रन्थस्य चतुर्थे खण्डे विरचिता सती टीका विद्वत्समाजेऽतीव प्रसिद्धाऽभूदिति, तथा च प्रसिद्धाभूद् यथा विद्वांसः सूत्राण्यपि भट्टकल्लटकृतान्येवामन्यन्तेति। सूत्राणि टीका चेत्युभयं तत्त्वार्थचिन्तामणिरिति नाम्ना विख्यातमभूदिति च। यथा खलु वाक्यपदीयंतद्वृत्तिश्चोभयं वाक्यपदीयनाम्ना प्रसिद्धम्। तथैवैतत्।

~ सूत्रान्तरम्— **समुद्धृतमन्यत्र यथा—**

"रूपादिषु परिणामात् तत् सिद्धिः इति श्रीकल्लटोक्तनीत्या।"

(प० सा० वि०, पृ०, 91.)

तत्त्वेश्वराः— शिवः, शक्तिः, सदाशिवः, ईश्वरः, अनन्तनाथः इति पञ्च तावदीश्वराः शिवादिविद्यान्तानां तत्त्वानाम्। अग्रे च क्रमेण रुद्रो, विष्णुर्ब्रह्मा च मायीयाद्यण्डत्रये। यथा—

"अत्र च तत्त्वेश्वराः— शिव-शक्ति-सदाशिवेश्वरानन्ताः, ब्रह्मेव निर्वृत्तौ।"

(तं० सा०, पृ०, 94)

"पार्थिवे (अण्डे) ब्रह्मा, प्राकृते (अण्डे) विष्णुः, मायीये (अण्डे) रुद्रः।"

(ई० प्र० वि० वि० खं०3, पृ०, 277)

ब्रह्मा, विष्णु, रुद्र, ईश्वरः, सदाशिवोऽनाश्रितः इति कारणषट्कमेव विशेषतयोपास्यं देशाध्वधारणाक्रमे।

रुद्रादनाश्रितं यावत् कः कुत्रोपास्य इति विषयोऽयमस्पष्ट एव। तर्क्यतेऽत्र यद्रुद्रो मायान्तम्, ईश्वरः शुद्धविद्यायामैश्वरे च तत्त्वे सदाशिवेन हि व्याप्यं तत्तत्त्वद्वयम्। अत उक्तं सादाख्यगोचर इति। नहीश्वरस्योपास्यता सदाशिवतत्त्वे समुचिता। ततः—

"'ईशः' इतीश्वरः। सादाख्यगोचर इति शुद्ध-विद्यादितत्त्वत्रयात्मनि।"

(तं० आ० वि०,खं०5,पृ०, 8)

इति जयरथीया व्याख्या चिन्त्यैव। तत ऊर्ध्वं शक्तितत्त्वेऽनाश्रित उपास्यः। परस्तु शिवोऽनाश्रितपदेऽप्युपास्य एव अनाश्रितस्यापि व्यापक एवेति।

अपरं च अन्यत्र पार्थिवाद्यण्डत्रयाधिपत्वं क्रमेण ब्रह्मा-विष्णु-रुद्राणामुक्तम्

द्र०-'तत्त्वाधिपा': इति।

तत इदमत्रोपर्युक्तानामागमवाक्यानां तात्पर्यं प्रतिभाति—

(1) ब्रह्मा तावदनन्तभुवनादारम्य सर्वेषु पार्थिवाण्डस्थेषु भुवनेषूपास्यः सत्यलोकं यावत्।

(2) तत् ऊर्ध्वं प्रधानतत्त्वान्तं प्राकृताण्डस्थेषु भुवनेषु विष्णुः।

(3) पुरुषतत्त्वादारभ्य कलातत्त्वं यावन्मायीयं यदण्डं तत्रस्थेषु भुवनेषु रुद्र उपास्यः।

(4) ग्रन्थिरूपायां मायायामीश्वरभट्टारक उपास्यः; स एव मायाख्ये तत्त्वेऽपि।

(5) तदूर्ध्वं सादाखगोचरे–सदाशिवतत्त्वव्याप्ते

तत्त्वत्रये-शुद्धविद्याख्ये ईश्वराख्ये सदाख्ये च तत्त्वे भगवान् सदाशिव उपास्यः।

(6) तदुपरि शक्तितत्त्वस्थेषु भुवनेषु भगवाननाश्रितः शिव उपास्यः।

(7) सकलप्रपञ्चव्यापकोऽनाश्रितादिभिरप्युपास्यः परमेश्वरः परमशिव एव। इति।

पुनर्विचारणीयोऽयं विषयः सुधीभिः।

तत्पुरुषः— स्वच्छन्दनाथस्य भगवतः पूर्वदिगुन्मुखं वदनं तत्पुरुषाख्यम्। दर्शनसिद्धान्ततो गुणोत्कर्षेणैवास्य प्राङ्मुखत्वं वेद्यं, न तु दिग्विभागभेदेनेति। ध्यानधारणादौ पुनर्दिग्वि- भागभेदेनेति ज्ञेयम्। स्रष्टव्यानुसन्धानसम्भिन्नं सृष्ट्युन्मेषणम्। इच्छाशक्तिप्रधानेयं स्थितिर्भगवतः स्वच्छन्दनाथस्य। एषा तस्यैश्वरी दशा। ग्राह्यग्राहकभेदस्याप्यत्र स्वरूपान्तरेवोल्लासनं मनाक्। सृष्टेरारम्भोऽत एव पदादिति पुरुषसमाख्यात्र। न चात्र सुस्फुटा भावसृष्टिः, यतो ह्यन्तःस्थैव सा। तत एव प्रबुद्धमपि सत् सौषुप्तमिवैतत् पदम्। एतद्भावोपासकाः श्मशानवासिनो विरक्ताः कापालिकप्रायाः साधकाः। तत्पुरुषमुखस्य वर्णो रक्तः। ईश्वरभट्टारकस्थानीयः तत्पुरुषः। यथोक्तम्—

"तस्मादुन्मेषशक्तिर्या पूर्वमासीदभेदिनी।।
भावोन्मेषस्वरूपासौ याता तत्पुरुषस्थितिम्।
यदभिन्नं तदग्राह्यं यच्चाग्राहकमीश्वरम्।।
अधुना तत्स्थितं ग्राह्यं भेदात्तद्ग्राहकं भिदः।
पुरुषाख्यं ततः प्रोक्तं सृष्टेः प्रारम्भयोगतः।।
सुस्फुटप्रत्यभिज्ञानान्मुखं वक्त्रं च भण्यते।
अत एवात्र विसरभावस्थितिविघातकम्।।
नानारुग्ग्रहसंघातविषादि परिचर्च्यते।
अनेकयुक्तिदलितव्याधिसंशान्तसुस्थिताः।।
अत्र सुस्फुटतां यान्तिभावा भेदैकवृत्तयः।
भावत्वमेव यत्सर्वं तत्त्विदं पूर्वजं मुखम्।।"

(मा० वि० वा०1, 206-211)

"ततो भावान् यदा सम्यगिच्छतीच्छाविभूतितः।।
तदेच्छायां समारूढाः सा चेच्छा चैव निर्मला।
येन तन्मयतायोगात्संविदैक्यं स्पृशन्त्यमी।
किन्तूपाध्युपरक्तेच्छासंछादनतिरोहिताः।
ते तदानीं स्थिता भावा देवस्तु स्वैषणास्थितः।।
पराचीनितसंवित्तिवक्त्रो न च परां स्थितिम्।
पूर्णामध्युषितस्तेन सुषुप्त इव भासते।।

(तदेव 1, 213-216)

"एवं देवे सुषुप्तांशमध्यासीनाः स्थिता अपि।
असद्देशीयतां यान्ति भावाः श्वभ्रकपित्थवत्।।"

(तदेव 1, 230)

"अत्र तादृशमेव स्वं ज्ञानं वैराग्यनिर्भरम्।
निरुपाख्यं निरालम्बं व्यजृम्भत विरागतः।।
कपालमालाभरणाः श्मशानपदवासिनः।
अस्मात्पराङ्मुखीभूता भूतसंघातगोचरात्।।"

(तदेव 1, 231-232)

"सद्योजातश्च यद्रुद्रः पुरुषश्चेश्वरात्मकः।।"

(तदेव 1, 251)

तत्पुरुषकलाः— देहे भ्रूमध्ये स्थिताः ईश्वरभट्टारकस्य शक्तयः बिन्दुना परामृश्याः। यथा—

"निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च।
पुरुषस्य कला ह्येता ईश्वरे तु व्यवस्थिताः।।
वाय्वावरणमाश्रित्य बिन्द्वन्तं यावदुज्ज्वलाः।"

(ने० तं० 22, 31-32)

तद्भावभावितत्वम्— भगवद्गीतासु तद्भावभावितत्वं यन्मरणोत्तरगतिकारणत्वेनोक्तं तस्याभिप्रायस्तन्त्रालोकानुसारमेषः—

"एवं भविष्यामि" इति या वासना प्राणिनस्तदाविष्टत्वे सति तत्स्फुटीभावो जन्मान्तरे यस्तदेव तद्भावभावितत्वम्। यथा—

"तद्भावभावितस्तेन तदेवैष स्मरत्यलम्।
एवमस्मि भविष्यामीत्येष तद्भाव उच्यते।।
भविष्यतो हि भवनं भाव्यते न सतः क्वचित्।
क्रमात्स्फुटत्वकरणं भावनं परिकीर्त्यते।।"

(तं० आ० 28, 347-348)

उदाहरणतः स्पष्टीकृतं। यथा—

"तदहर्जातबालस्य पशोः कीटस्य वा तरोः।
मूढत्वेऽपि तदानीं प्राग्भावना ह्यभवत्स्फुटा।
सा तन्मूढशरीरान्ते संस्कारप्रतिबोधनात्।।
स्मृतिद्वारेण तद्देहवैचित्र्यफलदायिनी।"

(तं० आ० 28, 349-351)

तन्त्रम्— देव्याः वा शिवेन वा प्रोक्तं विशिष्टं शास्त्रम्। अवरप्रकारकञ्च तन्त्रं भगवता श्रीविष्णुना प्रोक्तं पाञ्चरात्रं तन्त्रम्। ततोऽप्यवरं वज्रयानचीनाचारादिरूपम्। प्रायो ह्यागमशास्त्राणि तन्त्राणीत्युच्यन्ते।

~ अनेकार्थत्वेन— (1) गुरुशिष्यक्रमेषु तन्यते विस्तार्यते ज्ञानविज्ञानपरम्पराऽनेनेति तन्त्रम्। तथाभूतं सत् साधाकानां त्राणकारि शास्त्रम्। यथा—

"तनोति विपुलानर्थान् तन्त्रमन्त्रसमन्वितान्।
त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते।।"

(कामिकागमः)

(2) श्रुतेः प्रकारविशेषः। यथा—

"वैदिकी तान्त्रिकी चैव द्विविधा श्रुतिः कीर्तिता।"

(कुल्लूकभट्टस्योक्तिः मन्वर्थमुक्तावल्याम्)

(3) बहवोऽस्य शब्दास्यार्थाः। यथा—

(क) " तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे।"

(अम०, को० रामा०, 3-3-185)

(ख) "तन्त्रं कुटुंम्बकृत्ये स्यात् सिद्धान्ते चौषधोत्तमे।
प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे।।
श्रुतिशास्त्रान्तरे हेतावुभयार्थप्रयोजके।
इति कर्त्तव्यतायां च .....।।" (मेदिनी)

उद्ध०- (अ० को०, रामा, पृ०, 429)

~ कश्मीरपरम्परायाम्— तत्र देशेऽपरोक्षस्य दर्शनतत्त्व-साक्षात्कारस्य प्रसिद्धमभिधानम् "आगम" इति। आगामिकमेव ज्ञानं शिष्यपरम्परयाऽग्रेऽग्रे प्रसार्यमाणं सत्तन्त्राभिधानकम्। ततो नामद्वयमेकत्रापि शास्त्रग्रन्थे प्रयुज्यमानं सन्न शङ्कावहम्।

~ जयरथमते— यथा—

"तन्त्रं तदनुगुणमेव (मारणाद्यनुगुणमेव) पूजाहोमादि।"

(तं० आ० वि, खं० 10, पृ०, 219)

~ लक्षितः— यथा—

"यागत्रयात्मकपौर्णमासाङ्गप्रयाजानुयाजवदेकम नेकसाधारणं तन्त्रम्।"

(त० आ० वि०, खं० 11, पृ०, 172)

~ शैलीविशेषः— सभङ्गाभङ्गादिश्लेषयुक्त्या एकेनैव वाक्येनार्थद्वयप्रतिपादनशैली। तन्त्रशैली। तत्रैकोऽर्थो दशैन-साधनादि रहस्यप्रतिपादकोऽपरश्च शास्त्रीयादर्शविपरीतस्य सामान्यलोकवृत्तस्यापाततः प्रतिपादको भवति। यथा

"(क) "वाक्यद्वयैक्यावभासात्मा तन्त्रापरपर्यायेण श्लेषेणोपन्यस्तः।"

(म० म० प०, पृ०, 14)

उक्तं चास्मद्गुरुभिरप्येवम्—

"नानाफलकसमानाकारक नैकव्यापाराणां मध्य एकेनैव व्यापारेणानेकफलोत्पादनं तन्त्रम्।"

(आ० वि० सुं०, पृ०, 209)

तन्त्रकोशः— ग्रन्थविशेषः। उक्तं हि—

"..... इति तन्त्रकोशयुक्त्या.....।"

(वि० भै० उ०, पृ०, 30)

शैवशास्त्रकोशग्रन्थोऽयम्। यतः श्रीगोपीनाथ कविराजकृते तान्त्रिकसाहित्यनामके ग्रन्थे, पृ०,234, उक्तं यत् अयं तन्त्रकोशग्रन्थः वीरभद्रकृतः। अत्र च ग्रन्थे मातृकावर्णानां रहस्यभूतानामर्थानां दिग्दर्शनं कृतमस्ति इति।

तन्त्र-प्रक्रिया— ~ जयरथमते– तन्त्रालोकस्या-रम्भेऽभिनव-गुप्ताचार्यः स्वगुरून् नत्वा तदनन्तरं क्रमेण कुल प्रक्रियागुरून् त्रिकप्रक्रियागुरूंश्च प्रणमति। तद्व्याख्याने च जयरथः प्रक्रियाद्वयं कुलतन्त्रेति नामद्वयेनोल्लिखति। ततस्तद्विचारे तन्त्रप्रक्रिया प्रकृतत्रिकागमप्रक्रियैव ग्रन्थारम्भेऽ नुताऽऽचार्यवर्यैः। यथा—

(क) "वक्ष्यमाणशास्त्रस्य कुलतन्त्रप्रक्रियात्मकत्वेन द्वैविध्ये.....
.....
कुलप्रक्रियायाः..... अवतारकं
..... कीर्तयति।"

(तं० आ० वि०, खं० 1, पृ०, 24)

(ख) "वक्ष्यमाणतन्त्रप्रक्रियायाः त्रैयम्बकमठिकाश्रयगेनायाति-क्रमोऽस्तीति सामान्येन तावद् गुरूनभिमुखयति।

(तदेव, पृ०, 29)

तन्त्रराजभट्टारकः— किमप्यागमशास्त्रं यस्य पङ्क्तयः समुद्धृता जयरथेन, कालीनयस्यापि प्रतिपादनं कृतमत्रागमे। यथा—

"श्रीतन्त्रराजभट्टारकेऽपि—

'सृष्टिकाली च संहारे ..... इत्यारभ्य.....
.....सुकाली यमकाली
च .....
.....त्रयोदशविधा काली
विज्ञेया नाम भेदतः।' इत्यन्तम्।"

द्र०-(तं० आ० वि० खं०3, पृ०, 189)

अत्र मध्ये पञ्चमी काली सुकालीति कथिता, सर्वाश्च काल्यस्त्रयोदश प्रतिपादिताः।

द्र०- (तदेव, खं०2, पृ०, 145 तथा खं० 5, पृ०,17)

तन्त्रवटधानिका— अतीव संक्षिप्तं त्रिकप्रक्रियाप्रतिपादकं पुस्तकमभिनवगुप्ताचार्यविशेषविरचितम्। तन्त्रसारस्य लघीयान् संक्षेपोऽयं प्रतिभाति। त्रिकसाधानाया या खलु रूपरेखा, तामयं ग्रन्थः सुस्पष्टं प्रतिपादयति। तेन तन्त्रसारस्याध्ययने प्रथमसोपानकल्पमस्याध्ययनम्।

~ तन्निर्माता— ग्रन्थोऽयमाह्निकत्रयात्मकः। केनाप्यभिनव-गुप्तनाम्ना गुरुणा निर्मितोऽयम्। स चास्य रचयिताभिनवगुप्तः संप्रसिद्धाद् गुरोऽन्य एव कश्चिद्- "अभिनवगुप्ताख्याचार्य विशेष" इत्येवमारम्भेऽन्ते चावतरणिका पुष्पिकयोस्तस्य निर्देशात्। किञ्चासौ ग्रन्थकर्त्ता "स्वशक्त्युद्दीप्तये" ग्रन्थरचनां कुर्वन् स्वशक्त्युद्दीप्तिकामः। न च प्रसिद्धोऽभिनवगुप्तस्तथा। तस्य सुसमुद्दीपितस्वशक्तित्वात्, तस्य सुप्रबुद्धत्वादस्य च प्रबुद्धमात्रत्वाद् वा बुद्धमात्रत्वाद्वा। यथा—

"प्रणम्य गुरुमीशानं सत्तन्त्रवटधानिका।
मयाभिनवगुप्तेन स्वशक्त्युद्दीप्तये कृता।।"

(तं० व० धा० 1,1)

ततोऽनुमातुं शक्यते यत् प्रसिद्धस्याभिनवगुप्तस्यासौ पितृव्यसुतोऽयं द्वितीयोऽभिनवगुप्तो यस्य नामोल्लेखस्तेन तन्त्रालोकस्यान्तिमे आह्निके कृतः। यथा—

"अन्ये पितृव्यतनयाः शिवशक्तिशुभ्राः।
क्षेमोत्पलाभिनवचक्रकपद्मगुप्ताः।"

(तं० आ० 37,69)

रचनाशैली चास्य ग्रन्थस्य न तावतीं प्रौढतां व्यनक्ति यावती प्रसिद्धस्याभिनवगुप्तस्योचिता। अत एव प्रतिलिपिलेखकैः "अभिनवगुप्ताचार्यविशेष" इति नामोल्लेखः कृतोऽस्य।

तन्त्रसद्भावः— (1) शैवागमविशेषो यन्मतमुद्धृतं तन्त्रालोके तुलादीक्षानिरूपणप्रकरणे। तद्यथा—

"तुलाशुद्धिपरीक्षां वा कुर्यात् प्रत्यययोगिनीम्।
यथा श्रीतन्त्रसद्भावे कथिता परमेशिना।।"

(तं० आ० 20, 11-12)

द्र०- (ने० तं० उद्, खं०2, पृ०, 145-146)
(शि० सू० वि०, पृ०, 23-24)
(तं० आ० वि०, खं०2, पृ०, 77)

(2) प्रियमेलापमन्त्रोऽप्युद्धृतोऽस्मादेवागमात्। यथा—

"तुलामेलकयोगः श्रीतन्त्रसद्भावशासने।
य उक्तः शम्भुनाथेन स मया दर्शितः क्रमात्।।"

(तं० आ० 30,99)

शम्भुनाथोऽत्र शिव एव तन्त्र सद्भाव शासनोपदेष्टृत्वात्तस्य। ततो न शम्भुनाथाख्यो गुरुरभिनवगुप्तास्येति ज्ञेयम्।

तन्त्रसमुच्चयः– कोप्यागमिको ग्रन्थविशेष इदानीमनुपलभ्यमानः। यथा—

"श्री तन्त्रसमुच्चयेऽपि—
'नरशक्तिशिवावेशि विश्वमेतत्सदा स्थितम्।
व्यवहारे कृमीणां च सर्वज्ञानां च सर्वशः।।' इति।"

उद्ध०- (प० त्री० वि०, पृ०, 80)

तन्त्रसारः— ~ मुख्यः— (1) अभिनवगुप्तकृतस्तन्त्रालोकस्य संक्षेपो यस्य निर्माणं तन्त्रालोकादनन्तरं कृतमाचार्येण स्वयमेव। यथा—

"विततस्तन्त्रालोको विगाहितुं नैव शक्यते सर्वैः।
ऋजुवचनविरचितमिदं तु तन्त्रसारं ततः शृणुत।।"
इति।

(तं० सा०, पृ०, 2)

~ तद्वैशिष्ट्यम्— आचार्याभिनवगुप्त महोदयैस्तन्त्रालोकादनन्तरं निर्मितोऽसौ ग्रन्थो ग्रन्थकर्तुर्विशेषां प्रौढतां व्यनक्ति, तत् फलभूतं च शास्त्रतत्त्वरहस्य- प्रकाशनमत्र विशेषमाहात्म्यमण्डितमिति वेद्यं सुधीभिः। पद्यरचनायां या गुरुलघ्वक्षरविन्यासपरतन्त्रता सापि गद्यमयेऽत्र ग्रन्थे नैव। ततो विशिष्टेनावधानेन विचारणीया अस्य ग्रन्थस्य पङ्क्तयः सुधीभिः, विशेषतो रहस्यभूतानां शब्दैः स्पष्टतरं वक्तुमशक्यानां शास्त्रतत्त्वानां विषये।

~ अपरः— (2) कृष्णानन्दागमवागीशकृतोऽपरस्तदभिधानो ग्रन्थः। सर्वसामान्यागमप्रक्रियाध्ययनायोपयोगी, सर्वसामान्यतान्त्रिकपूजायागादि क्रियाविधिविषयको नैव विशेषतः काश्मीरागमसम्बन्धीति।

~ पुरातनः— (3) केनापि प्राक्तनेनाचार्येण निर्मितो ग्रन्थविशेषोऽभिनवगुप्तीयात् तन्त्रसाराद् भिन्नः। सम्भवतस्त्रिकतन्त्रसारोऽयम्। उक्तं हि—

(क) " अत एव श्रीतन्त्रसारे 'निजोत्तमाङ्गच्छायातत्त्वम्' इत्युक्तम्—
'स्वपदा स्वशिरश्छायां यद्वल्लङ्घितुमीहते।
पादोद्देशे शिरो न स्यात्तथेयं वैन्दवी कलां।। इति।"

(प० त्री० वि०, पृ०, 171)

(ख) "इति नैमित्तिकं श्रीमत् तन्त्रसारे निरूपितम्।"

(तं० आ० 28,9)

(ग) "तथाहि श्रीतन्त्रसारे—
'त्रिंशकार्थस्त्वया प्रोक्तः सार्धकोटिप्रविस्तरः'।

(प० त्री० वि०, पृ०, 17)

(घ) "यदुक्तं श्रीतन्त्रसारे—
'धारयन्ति पशोः पाशान्भावान्स्वात्ममयांस्तथा।
विद्यामायानियत्याद्याः शोध्यास्तेन प्रयत्नतः।।'
इति।"

(प० त्री० वि०, पृ०, 117)

"श्रीत्रिकतन्त्रसार" इति नामकोऽयं ग्रन्थः स्यात्।

तन्त्रालोकः— (1) त्रिकसाधनाविषये सर्वप्रधानमिदं ग्रन्थरत्नमभिनवगुप्ताचार्यविरचितम्। अत्र ग्रन्थे प्रथमं दर्शनसिद्धान्तसारस्य, ततः साधनोपयोगस्य, ततश्च क्रमेण शाम्भवादियोगाभ्यासप्रक्रियाणां, तदनन्तरं दीक्षयैव शिष्यस्य मोचनार्थं विधीयमानानां क्रियाणां, ततश्च शैवसाधकैः कार्याणां नित्यनैमित्तिकादिकर्मणां दीक्षादिविधीनां च प्रतिपादकोऽपूर्वः सकलेऽपि च संसारेऽनुपमो दर्शनसाधनाग्रन्थः। जयरथकृतया व्याख्यया सहितः काश्मीरग्रन्थावलौ पं. मधुसूदनकौलेन सम्पाद्य कश्मीरमहाराजस्य कृते प्रकाशितः महाराजशासनकाले। इदानीमस्य द्वादशखण्डेषु केचन खण्डाः दुष्प्राप्यतां गताः सन्ति। केचन पुनः प्रकाशकैः प्रकाश्यन्ते। अत्र ग्रन्थे कौलाचारनिरूपणमप्येकेनाह्निकेन संक्षेपतः कृतं वर्तते। त्रिकाचारप्रक्रियाणां निरूपणं च विस्तारतः सर्वाङ्गीनतया चात्र लभ्यते। सर्वथाप्यपूर्व एवायं ग्रन्थः। तान्त्रिकसाधानानां दार्शनिकं रहस्यमस्यैव मननेन स्पष्टतां याति। शाक्तमतरहस्यमप्यैवास्यध्ययेन बिना दुःखबोधमेव।

~ आधारतः— विविधानामागमशास्त्राणां दर्शनग्रन्थानां गुरुपेशादिनां चाधारे स्थापितोऽयमपूर्वः साधनाग्रन्थः। ते चाधाराः इमे—

(1) सर्वाणि शास्त्राणि यान्याचार्येण पूर्वमधीतान्यासन्। (2) विशेषतः 10+18 शैवरुद्रागमाः। (3) पुनर्विशेषतः 64 भैरवागमाः (4) सुविशेषतो मलिन्याद्यास्त्रिकागमाः। (5) भर्गशिखाद्या आगमाः। (6) कौलागमाः। (7) अन्ये आगमाः। (8) निजा च तस्य सुतीक्ष्णा बुद्धिः। (9) गुरुभ्योऽवाप्तानि शास्त्ररहस्यविज्ञानानि। (10) स्वकीयाश्चानुभूतय आध्यात्मिके क्षेत्रे। (11) श्री शम्भुनाथकृता उपदेशाः। यथा—

"पूर्वं श्रुतान्याकलयन् स्वबुद्ध्या।
शास्त्राणि तेभ्यः समवाप सारम्।"

(तं० आ० 37,82)

गुरूणां नाम निर्देशस्तत्र तत्र कृत आचार्येण विशेषतः श्रीशम्भुनाथस्य। यथा—

"जयताज्जगदुद्धृतिक्षमोऽसौ,
भगवत्या सह शम्भुनाथ एकः।
यदुदीरितशासनांशुभिर्मे,
प्रकटोऽयं गहनोऽपि शास्त्रमार्गः।।"

(तं० आ० 1,13)

~ आभारतः— अत्र ग्रन्थे बहून् गुरून् प्रति ग्रन्थकृताऽऽभारः प्रकटितः। परं विशेषतः श्रीशम्भुनाथ एव बहुधा प्रशस्तोऽत्र।

द्र०- 'शम्भुनाथः' इति।

'अभिनवगुप्तः' ~ तद्गुरवः- **इत्यत्रैव।**

~ आह्निक संख्यातः— **यतः शैवदर्शने षट्त्रिंशदेव तत्त्वानि निरूपितानि सप्तत्रिंशमपि च सर्वेषामपि तत्त्वानामुत्पत्तिलयस्थानीयं परं तत्त्वं स्वीकृतम्, ततस्तन्त्रालोकोऽपि सप्तत्रिंशदाह्निकात्मकः। यच्च तत्राष्टात्रिंशस्यापि तत्त्वस्येपदेशोपयोगितया कथनं तत्तु तस्य सप्तत्रिंशत्तत्त्वाभिन्नत्वेन केवलमुपदेशसौकर्यार्थमेव तथा गणनं नातिरिक्ततत्त्वतया सूचितमेतद् यथा—**

"द्वात्रिंशत्तत्त्वादीशाख्यात् प्रभृति प्रस्फुटो यतः।
न भेदोऽस्ति ततो नोक्तमुद्देशान्तरमत्र तत्।।"

(तं० आ० 1, 327-328)

अत्र द्वात्रिंशदाह्निकादिति वक्तव्ये द्वात्रिंशात्तत्त्वादिति वचनमेवाह्निकसंख्यायास्तत्त्वसंख्यानुसारित्वं सूचयति। द्वात्रिंशादनन्तरमेव भेदस्य गलनं प्रारभ्यते इत्यनेन विचारेण त्रयस्त्रिंशत्तममारभ्य न भेदेनोद्देशकथनमिति।

~ तद्विषयपरिचयः— **अनुपायः- शाक्तोपायः- शाम्भवोपायः- आणवोपायाः तत् सम्बन्धिनस्तदुपकारिणश्च दीक्षाप्रपञ्चात्मकाः क्रियाकलापाः तन्त्रालोकस्य विषयाः। योगचतुष्केऽपि तस्य तस्य प्रधानभूतस्यैव योगप्रकारस्यात्र निरूपणम्। न प्रत्येकप्रकारविस्तरस्य न चाप्यैहिकभोगसिद्धिसाधनभूतस्य धारणाप्रपञ्चस्य, अपितु मोक्षोपलब्धावेवोपकारकस्य तस्य तस्य मुख्यभूतस्य योगप्रकारस्येति, ततस्त्रयाणामपि शाम्भवादीनां ये केऽप्यन्ये प्रकारास्तेऽन्येषु ग्रन्थेषु द्रष्टव्याः। तेषु शास्त्रेषु मुख्यानिः—विज्ञानभैरवः, परात्रीशिका, शिवदृष्टिः, मालिनी- विजयोत्तरं तन्त्रं, स्वच्छन्दतन्त्रम्, नेत्रतन्त्रम्, मालिनी- विजयवार्त्तिकम्, इत्यादीनि। यच्च किमपि मुक्तिप्रदमत्रोपदिष्टं तदपि क्रममोक्षनीत्या परमेश्वरतालाभोपायभूतमेव। ततो नात्र मारणमोहनाद्युपायभूतानां साधनानां क्वापि निरूपणं विद्यते। तथैव हि प्रतिज्ञातं ग्रन्थकृता——**

"इति ज्ञानचतुष्कं यत् सिद्धिमुक्तिमहोदयम्।
तन्मया तन्त्र्यते तन्त्रालोकनाम्न्यत्र शासने।।"

(तं० आ० 1, 245)

~ तद्विषयसूचिः (आह्निकगतक्रमेण)

(आह्निक-1-ज्ञानविज्ञानभेदः)

संख्याः	विषयाः	कारिकाः
1.	**मङ्गलाचरणम्।**	**1-17**
2.	**शास्त्रविषयस्य ग्रन्थस्य च प्रस्तुतीकरणम्।**	**17-21**
3.	**ज्ञानाज्ञाननिरूपणम्।**	**22-35**
4.	**बन्धमोक्षनिरूपणम्।**	**22-35**
5.	**ज्ञानाज्ञानयोर्द्वैरूप्यम्।**	**36-51**
6.	**मुख्यतया प्रतिपाद्यस्य पारमेश्वरतत्त्वस्य निरूपणम्।**	**52-111**
7.	**उपासनायास्तत्त्वमुपासनाफलञ्च।**	**112-139**
8.	**उपायभेदाः।**	**140-167**
9.	**उपायत्रयम्।**	**168-178**
10.	**शाम्भवोपायलक्षणम्।**	**178-213**
11.	**शाक्तोपायलक्षणम्।**	**214-220**
12.	**आणवोपायलक्षणम्।**	**221-231**
13.	**दीक्षाक्रियाः।**	**232-240**
14.	**अनुपाययोगः।**	**241-244**
15.	**उद्देशलक्षणपरीक्षादि।**	**245-277**
16.	**सामान्येनोद्देशकथनम् (पूर्वजोद्देशः)।**	**278-286**
17.	**विशेषेणोद्देशकथनम् (अनुजोद्देशः)।**	**286-329**
18.	**उपसंहार आह्निकस्य।**	**330-334**

आ०-2

अनुपाययोगः

संख्याः	विषयाः	कारिकाः
1.	**अनुपायत्वं शिवत्वसाक्षात्कारस्य।**	**1-3**
2.	**उपायचतुष्टयम्।**	**3-6**
3.	**अनुपाययोगविधिः (ज्ञानोपदेशात्मिकी)।**	**7-23**
4.	**अनुत्तरतत्त्वस्य स्वरूपम्।**	**24-28**
5.	**अनुत्तरस्वरूपज्ञानोपपत्तिः।**	**29-33**
6.	**अनुपाययोगाधिकारी।**	**34-38**
7.	**शेषवृत्तिरनुपायनिष्ठस्य।**	**38-39**
8.	**अनुपायदीक्षाप्रकारः (प्रथमः)।**	**40-41**
9.	**आलम्बनतारतम्यम्।**	**42-43**
10.	**अनुपायदीक्षाप्रकारो (द्वितीयः)**	**44-50**

आ०-3

शाम्भवोपायः

संख्याः	विषयाः	कारिकाः
1.	**प्रकाशस्वातन्त्र्यम्।**	**1-2**
2.	**प्रकाशस्य परमेश्वरत्वम्।**	**2-3**
3.	**प्रतिबिम्बन्यायेन स्रष्टृत्वम्।**	**4-11**

4.	प्रतिबिम्बक्रियाविस्तारः।	12-23
5.	शब्दादिप्रतिबिम्बप्रपञ्चः।	24-43
6.	प्रतिबिम्बन्यायस्योपयोगः।	44-51
7.	प्रतिबिम्बलक्षणादि	52-64
8.	प्रकृते उपयोगः	65-66
9.	कौलिकी शक्तिः।	67
10.	आनन्द शक्तिः।	68
11.	कालकर्षिणी।	69-71
12.	इच्छाशक्तिः।	71-72
13.	अघोराः शक्तयः।	71-73
14.	उन्मेष-ज्ञान-शक्तिः।	73
15.	घोराः शक्तयः।	74
16.	ऊनता-स्थितिः।	75-77
17.	षण्ठ-वर्णाः।	78-91
18.	क्षोभ्यक्षोभकभावः।	82-85
19.	बीजता।	85-90
20.	सन्ध्यक्षराणि।	91-98
21.	स्फुटा क्रियाशक्तिः।	96-97
22.	परतत्त्वस्य परमेश्वरता।	99-103
23.	क्रियाशक्तिविकासः।	103-110
24.	निरञ्जनसाञ्जनतत्त्वे।	105-108
25.	विन्दुः।	109-113
26.	सोमसूर्याग्नयः।	113-133
27.	अनुस्वारः।	133-136
28.	विसर्गः।	136-141
29.	हकारः-हंसः।	142-153
30.	स्पर्श वर्णाः	149-153
31.	अन्तःस्थाः।	154-158
32.	ऊष्माणः।	159-179
33.	सकारस्य विशेषः।	165-174
34.	कामतत्त्वविषतत्त्वे।	169-174
35.	क्षकारः।	180
36.	वर्णजातविशेषताः।	181-195
37.	अनुत्तरस्य वैभवम्।	195-202
38.	अहमितिविमर्शस्यतत्त्वम्।	202-208
39.	परामर्शोदयः।	203-208
40.	विसर्गशक्तिप्रपञ्चः।	208-231
41.	विसर्गत्रैविध्यम्।	211-219
42.	मालिनी।	232-235
43.	वाक्चतुष्टयप्रपञ्चः।	236-248
44.	शक्तिचक्रम् (द्वादशकालयः)।	248-259
45.	शाम्भवोपायप्रकाराः।	259-260
46.	हठपाकप्रशमनम्।	260-267
47.	शाम्भवसमावेशप्रपञ्चः।	268-293
48.	मन्त्राद्यभिन्नरूपत्वम्।	268-193

आ०-4
शाक्तोपायः

संख्याः	विषयाः	कारिकाः
1.	विकल्पसंस्कारः।	1-7
2.	बन्धमोक्षस्वातन्त्र्यम्।	8-12
3.	सत्तर्कः	13-16
4.	भावना।	13-16
5.	अवरोपायाधिकारिणः।	17-33
6.	सर्त्तकफलम्।	34-39
7.	सत्तर्कोदयप्रकाराः।	40-50
8.	उत्तराधरा गुरवः दीक्षाश्च।	50-79
9.	आश्वासः।	80-86
10.	पातञ्जलयोगाङ्गपरीक्षणम्।	87-97
11.	कल्पितार्चापरीक्षणम्।	98-108
12.	मायाविद्यात्मकौ विलासौ।	109-113
13.	शुद्धविकल्पाभ्यासप्रपञ्चः।	113-122
14.	कालीनयोपासना।	122-147
15.	द्वादशकाल्यः (संविच्चक्रम्)।	148-172
16.	कालीनयप्रसारेतिहासः। (तं० आ० वि०,खं० 3,)	पृ०, 192-203)
17.	काल्याः कालीत्वम्।	173-176
18	काल्याः कलनात्मकं स्वरूपम्।	177-182
19.	काल्याः स्पन्दात्मकता।	182-184
20.	रहस्यमन्त्रोद्धारः (मन्त्रवीर्यं च)।	185-193
21.	जपः शाक्तोपाये।	194
22.	ध्यानम् शाक्तोपाये।	195-199
23.	मुद्रा शाक्तोपाये।	200
24.	होमः शाक्तोपाये।	201-202
25.	दीक्षा शाक्तोपाये।	203
26.	वैविध्यप्रयोजनं शाक्तोपाये।	204-208
27.	शाक्तोपायमाहात्म्यम्।	209-212
28.	शाक्तोपाये विधिनिषेधाभावः।	213-221
29.	विधिनिषेधयोरपारमार्थिकत्वम्।	221-232
30.	अर्थवादस्यापारमार्थिकत्वम्।	232-239
31.	शुद्धयशुद्धी अपारमार्थिक्यौ।	240-247
32.	विधिनिषेधादौ त्रिकशास्त्रदृष्टिः।	247-265
33.	शैवमठिकाभेदः।	265-267
34.	त्रिकाचारे विशेषः।	268-275
35.	त्रिकाचारस्य विशेषमाहात्म्यम्।	276-278

आ०-5
आणवोपायः

संख्याः	विषयाः	कारिकाः
1.	आणवोपायस्य तत्त्वम्।	1-19
2.	बुद्धिध्यानयोगः।	19-42
3.	उच्चारयोगः।	43-127
4.	प्राणवृत्तीनां तत्त्वम्।	43-127
5.	आनन्दभूमयः।	44-50
6.	जगदानन्दः।	50-53
7.	उच्चारस्वरूपम्।	53-96
8.	उच्चारप्रक्रियारहस्यम्।	53-99
9.	प्राणचारस्य चिदात्मता।	56-74
10.	परतत्त्वे प्रवेशः।	100-105
11.	आनन्दादीनि सिद्धिचिह्नानि।	100-111
12.	लिङ्गत्रयम्।	112-124
13.	आणवयोगप्रयोजनम्।	125-128
14.	करणयोगः।	128-131
15.	वर्णयोगः (पीतरक्ताद्यालम्बनः)।	131-155
16.	औत्तराधार्यमुपायजातस्य।	155-159
17.	वर्ण (ध्वनि) योगः।	131-155

आ०-6
कालाध्वा

संख्याः	विषयाः	कारिकाः
1.	स्थानभेदो (सबाह्याभ्यन्तरः)।	1-4
2.	प्राणस्पन्दालम्बनो योगः।	5-28
3.	अध्वानः षट्	28-33
4.	कालाध्वनस्तत्त्वम्।	34-62
5.	वामाद्याः शक्तयः।	56-57
6.	प्राणचारः।	62
7.	कालाध्वविधिः (चारमानम्)।	63-129
8.	तुटिः।	64
9.	कालपरिमाणानि अहोरात्रसंक्रांत्यादीनि।	130-178
10.	संहारचित्रता।	140-160
11.	त्रिलोकीलयः।	140-141
12.	अवान्तरप्रलयः।	149-151
13.	प्रलयः।	156
14.	महाप्रलयः।	158-160
15.	अकल्पः कालः।	156-166
16.	प्रलयाश्चत्वारः।	170
17.	महासृष्टिः।	173
18.	ब्रह्मादीनां सृष्टिः।	177-178
19.	कालाध्वोपयोगः प्राणे।	179-185
20.	अपाने विधिः।	186-208
21.	समाने विधिः।	209-211.
22.	उदाने विधिः।	212-213
23.	व्याने विधिः।	214-215
24.	अयत्नजो वर्णोदयः।	216-250
25.	वर्णविधिः (परः)।	216-224
26.	वर्णविधिः (सूक्ष्मः)।	225-239
27.	अर्धमात्रविधिः।	225-239
28.	स्थूलो वर्णोदयः।	200-250

आ०-7
चक्रोदयः

संख्याः	विषयाः	कारिकाः
1.	चक्रोदयः, चक्रभेदः।	1-3
2.	मन्त्रभेदः।	2-24
3.	अयत्नजमन्त्रोदयः।	2-3
4.	मन्त्रोदयफलम्।	3-5
5.	चक्रोदयविधिः।	5-24
6.	प्राणचारेषु जपविधिः।	5-24
7.	चक्रोदयाभ्यासफलम्।	21-24
8.	कालस्वरूपम्।	25-26
9.	संविदैक्यस्थितिः।	27-29
10.	कालास्पर्शः संविदः।	30-32
11.	विकल्पानुपपत्तिर्बौद्धे।	31-34
12.	विकल्पज्ञानस्वरूपम्।	33-37
13.	प्राणसाम्यविधिर्जपादीनाम्।	38-44
14.	मालामन्त्रेषु विशेषः।	45
15.	पदमन्त्रसंख्या प्राणचारे।	46-51
16.	मध्योदयः।	52-55
17.	चक्रोदयफलम्।	56-59
18.	चक्रोदयाभ्यासे भावना।	59-66
19.	देहे नाडीनां विशेषः।	66-70
20.	उपसंहारः।	71

आ०-8
देशाध्वा

संख्याः	विषयाः	कारिकाः
1.	देशाध्वा।	1-2
2.	अध्वायतनम्।	3-4
3.	प्रमुखं फलम्।	5
4.	धारणा दृष्टिः।	6
5.	धारणाविधिः।	7-8

6. धारणारहस्यम्। 9-12
7. क्रमिकबोधप्रकाशः। 13-20
8. देशाध्वधारणाफलम्। 15-17
9. देशाध्वकल्पनाः। 17-20
10. पुराणां परिमाणम्। 21-39
11. पार्थिवे तत्त्वे भुवनकल्पनाः। 21
12. कालाग्निरुद्रभुवनम्। 22-24
13. नरकभुवनानि। 25-32
14. पातालभुवनानि। 25-32
15. नरकवासिनः। 32-35
16. तेषां गतयः। 35-40
17. भूकटाहः। 41
18. भद्रकालीपुरम्। 42
19. यातना विशेषाः। 43
20. सुमेरुः। 44
21. देवगणस्थानानि। 45-56
22. सुमेरुः। 57-62
23. जम्बुद्वीपे पर्वतमालाः। 62-67
24. वर्षभेदाः। 62-82
25. देशभेदाः 28-82
26. भारतवर्षः। 82-96
27. पुरातनाः राजानः 93-96
28. पर्वतानि। 97-101
29. द्वीपान्तराणि। 102-108
30. सूर्यसञ्चारः। 109-112
31. लोकाचलाद्याः। 113-117
32. भूलोकः। 118-120
33. भुवर्लोकः। 121-143
34. विद्याधराः। 128-139
35. दिग्गजरुद्राद्याः। 139-141
36. वसुरुद्र ऽप्रभृतयः। 142
37. स्वरादिलोकाः। 143-154
38. ब्रह्मविष्णुलोकौ। 155-156
39. रुद्रलोकः। 156-159
40. दण्डपाणिपुरम्। 160-161
41. सप्तलोकविशेषताः। 162-165
42. भूकटाहः। 166
43. शतरुद्राः। 167-168
44. अण्डस्वरूपम्। 168-179
45. एकादशरुद्राः। 179-183
46. शतमण्डानाम्। 184-186
47. जलादीनि तत्त्वानि। 180-193
48. भद्रकालीपुरम्। 193
49. वीरभद्रपुरम्। 194-200
50. त्रयोदशपुराणि। 200-205
51. तेजस्तत्त्वे भुवनानि। 205-211
52. आयतनेषु मरणस्य फलम्। 211-214
53. अहङ्कारादि तत्त्वेषु भुवनानि। 215-228
54. देवयोनिभुवनानि। 229-237
55. श्रीकण्ठनाथभुवनम्। 238-240
56. उमापतेः पुरम्। 240-244
57. अष्टौ मातृकाः 242-243
58. मूर्त्यष्टकपुराणि। 244-248
59. सुशिवाः (द्वादश)। 248-250
60. महादेवाष्टकम्। 251-253
61. गुणतत्त्वम्। 253-260
62. तत्र भुवनानि। 260-267
63. श्रीकण्ठनाथः। 267-271
64. अव्यक्ततत्त्वे पुराणि। 272-277
65. पुरुषतत्त्वे पुराणि। 278-294
66. कञ्चुकतत्त्वेषु पुराणि। 295-298
67. मायातत्त्वे पुराणि। 298-302
68. अनन्तनाथः। 302-307
69. माया-ग्रन्थिः। 307-310
70. मायायां पुराणि। 311-331
71. माया। 332-337
72. शुद्धविद्यायां भुवनानि। 337-340
73. ऐश्वरे तत्त्वे पुराणि। 341-357
74. सादाशिवे तत्त्वे पुराणि। 357-378
75. शुद्धावरणम्। 357-378
76. सुशिवावरणम्। 357-378
77. विन्दुक्षेत्रम्। 379-382
78. अर्धेन्द्वादिक्षेत्राणि। 383-387
79. नादक्षेत्रे पुराणि। 387-389
80. शक्तितत्त्वप्रपञ्चः। 389-397
81. शिवतत्त्वम्। 398-399
82. पराशक्तिः। 400-406
83. भुवनसंग्रहः। 406-452
84. भुवनगणना (पञ्चकलानुसारम्)। 406-427
85. भूतिराजमतम्। 410
86. मतङ्गतन्त्रे भुवनगणना। 428-435
87. अन्ये विकल्पाः। 436
88. मालीनीमतम्। 436-452
89. तत्त्वयोजनम्। 437-452
90. षोडशभुवना निवृत्तिकला। 437-440
91. षट्पञ्चाशद्भुवना प्रतिष्ठाकला। 440-446
92. अष्टाविंशतिभुवना विद्याकला। 447-450
93. अष्टादशभुवना शान्ताकला। 450-452
94. अभुवना शान्त्यतीता कला। 452
95. उपसंहारः। 452

आ०-9
तत्त्वाध्वा

संख्याः	विषयाः	कारिकाः
1.	तत्त्वलक्षणम्।	1-6
2.	शिवस्यैव मूलकारणत्वम्।	7-22,35-39
3.	कार्यकारणभावः।	9, 22-48
4.	वैचित्र्यम् तस्य।	39-48
5.	तत्त्वसृष्टिक्रमः।	49-252
6.	शुद्धाध्वसृष्टिः।	49-60
7.	लोलिका।	61-68
8.	मलनिरूपणम्।	86-87
9.	मलकर्मणी।	88-121
10.	विज्ञानकेवली।	90-138
11.	कार्मो मलः।	100-138
12.	कर्म निरोधः।	129-137
13.	प्रलयाकलाः।	138-141
14.	आणवो मलः।	142-149
15.	माया।	149-168
16.	कला।	154-190
17.	मोक्षभेदाः।	184-188
18.	अशुद्धविद्या।	191-199
19.	रागादितत्त्वानि।	199
20.	कञ्चुकानि।	199-202
21.	कञ्चुकतत्त्वानि।	203-213
22.	प्रकृतिपुरुषौ।	213-221
23.	गुणतत्त्वम्।	221-226
24.	अन्तःकरणानि।	227-239
25.	इन्द्रियतत्त्वानि।	240-260
26.	कर्मेन्द्रियसंख्या (पञ्च)।	261-270
27.	आहङ्कारिकी सृष्टिः।	271-280
28.	तन्मात्राणि।	280-282
29.	भूततत्त्वानि।	282
30.	भूतगुणाः।	294-299
31.	शब्दजशब्दनिरासः।	300-308
32.	उत्तराधरत्त्वे तत्त्वानाम्।	309-313
33.	उपसंहारः।	314

आ०-10
तत्त्वभेदनम्

संख्याः	विषयाः	कारिकाः
1.	पाञ्चदश्यादिप्रक्रिया (सामान्यतः)।	1-5
2.	मातृमानमेयरूपताप्रतिपादनपूर्वकं तत्त्वभेदनसाधनारहस्यम्।	6-55
3.	वस्तुधर्मविस्तरः।	10-91
4.	सप्तप्रमातृणां शक्तयः।	12-17
5.	तत्त्वभेदनम्।	18
6.	ज्ञाततास्थापनम्।	56-78
7.	पाञ्चदश्यादेरुपपत्तिः सप्रमाणा।	79-82
8.	वेद्यतायाः स्वरूपवैचित्र्ये सूक्ष्ममतरो विचारः।	58-60
9.	तत्त्वभेदनविधिः।	83-97
10.	प्रमातृभेदः।	98-100
11.	पाञ्चदश्यम्।	101-104
12.	त्रयोदश्यादि।	105-112
13.	शिवस्यावेद्यता।	113-122
14.	सकलस्य सकलान्तरवेद्यत्वेऽपि प्रलयाकलादीनां न तथा।	122-132
15.	प्रलयाकलानां गतयः।	133-137
16.	विज्ञानाकलानां गतयः।	138-140
17.	प्रलयाकलविज्ञानाकलायोर्वेदकता भोक्तृता च।	140-149
18.	तत्त्वभेदनप्रक्रियाया अनन्तप्रकारता।	150-164
19.	वेद्यं वेदकादभिन्नम्।	165-166
20.	धरादेरपि पञ्चदशात्मकता।	167-172
21.	सुषुप्तेरप्यन्तर्लीनविश्वमयता।	173-177
22.	प्रमातृशक्तयः।	177-181
23.	विश्वस्य त्रिकरूपता।	182
24.	त्रयोदश्याद्युपपत्तिः।	183-185
25.	प्राणचारे पाञ्चदश्यम्।	186-199
26.	प्राणचारे त्रायोदश्यादि।	200-226
27.	विकल्पनिर्ह्रासः।	201-204
28.	तुटिपातरहस्यम्।	206-217
29.	अवस्थापञ्चकम्।	227-237
30.	अवास्थानां नामभेदोऽवान्तर-भेदप्रपञ्चश्च।	237-287
31.	अवस्थाः उत्पलदेवदृशा।	288-294
32.	अवस्थाभेदविषये सारभूतो विचारः।	294-300
33.	पाञ्चदश्याद्यवस्थापञ्चकम्।	301-309

आ०-11
कलाद्यध्वभेदः

संख्याः	विषयाः	कारिकाः
1.	कलास्वरूपम्।	1-7
2.	कलानां वर्गीकरणम्।	8-12
3.	अण्डलक्षणविचारः।	12-15
4.	पञ्चतत्त्वविधिः।	15-34
5.	सप्तत्रिंशाष्टत्रिंशत्तत्त्वविचारः।	21-28
6.	कलाध्वोपासनारहस्यम्।	29-34
7.	त्रितत्त्वैकतत्त्वविधी।	34-36
8.	नवतत्त्वविधिरष्टादशतत्त्वविधिश्च।	37-38
9.	दीक्षाविधिभेदास्तत्त्वविधौ।	39-42
10.	अध्वषट्कस्वरूपम्।	42-50
11.	वर्णमन्त्रपदादिसङ्कलनासङ्ग्रहः।	51-53
12.	मेयमानमातृरूपाणामध्वनामाधारशक्तिः।	54-83
13.	प्रमात्मकवर्णाध्वनो विशेषमाहात्म्यम्।	66-81
14.	मन्त्रवीर्यम्।	81-82
15.	शिष्यात्मशोधनप्रकाराः शोध्यशोधकप्रपञ्चश्च।	83-92
16.	परमेश्वर एव विश्वं नान्यज्जायमानं वा नश्यद् वा किमपि।	93-99
17.	नियत्यादौ स्वातन्त्र्यं पारमेश्वरम्।	99-117

आ०-12
अध्वोपयोगः

संख्याः	विषयाः	कारिकाः
1.	अध्वविस्तारेऽभेदभावना।	1-3
2.	अध्वोपयोगः।	4-13
3.	अध्वोपयोगे देहे बाह्ये च विषये।	6-8
4.	अर्चनाध्यानादिना कम्पनिर्ह्रासः।	9-26
5.	विधिनिषेधादिशङ्काशून्यता।	14-26

आ०-13
शक्तिपातः

संख्याः	विषयाः	कारिकाः
1.	मलादीनां बन्धकारणानां संख्याविचारः (बन्धमोक्षकारणानि परमते)।	1-31
2.	तत्र सांख्यमतपरीक्षणम्।	32-41
3.	तत्र शैवसिद्धान्तमतम् मलस्य तत्त्वं च।	41-52
4.	मलपाकसिद्धान्तपरीक्षणम्।	53-65
5.	कर्मसाम्यसिद्धान्तपरीक्षणम्।	66-96
6.	कालकारणतापरीक्षणम्।	97-92
7.	वैराग्यादिकारणतापरीक्षणम्।	97-101
8.	शक्तिविचित्रता।	102-127
9.	शक्तिपातसिद्धान्तः।	122-128
10.	शक्तिपाततारतम्यम्।	129-190
11.	(प्रतिभा) अनपेक्षितसिद्धिश्च ज्ञानस्या।	130-198
12.	प्रातिभस्य गुरोर्विशिष्टताः।	131-198
13.	शक्तिपातप्रकाराः (मालिनीमते)।	199-239
14.	गुरुलक्षणम्।	218-225
15.	दीक्षाया उपयोगः।	225-239
16.	प्राणोत्क्रमणदीक्षा।	235-239
17.	मध्याः मन्दाश्च शक्तिपाताः।	240-253
18.	शम्भुनाथोपदेशसारः।	254-267
19.	ब्रह्मविष्ण्वादिकृतः शक्तिपातः।	268-281
20.	वैष्णवादीनां शैवे दीक्षा।	281-289
21.	शक्तिपातस्य निरपेक्षता।	290-300
22.	क्रमिकः शक्तिपातः।	300-308
23.	त्रिकवैशिष्ट्यम्।	302-308
24.	तिरोभावविचित्रता।	309-317
25.	ज्ञानाहरणम्।	312-326
26.	शैववैष्णवप्रक्रियामिश्रणे दोषः।	316-320
27.	अधिकारतारतम्यम्।	320-326
28.	ज्ञानभेदतारतम्यम्।	327
29.	योगसिद्धितारतम्यम्।	328-331
30.	स्वभ्यस्तज्ञानवान् गुरुः।	331-333
31.	गुरुवरणे शम्भुनाथोपदेशः।	333-346
32.	गुरुबहुत्वमशङ्कनीयम्।	341-349
33.	अवरे गुरवः।	346-361

आ०-14
तिरोभावः

संख्याः	विषयाः	कारिकाः
1.	तिरोभावस्य स्वरूपम्	1-19
2.	नियत्यनुवर्तनोल्लङ्घनस्वातन्त्र्यं शिवस्य।	2-7
3.	तिरोभावव्यपगमः।	20-25
4.	दीक्षोपक्रमणम्।	25-47
5.	ज्ञानमहिमा।	27-32
6.	उत्क्रन्तेर्भोगात्मकतैव।	32-42
7.	मुख्या दीक्षा।	42-45

आ०-15
समयदीक्षा विधिः

संख्याः	विषयाः	कारिकाः
1.	दीक्षाप्रयोजनानि	1-47
2.	दीक्षायोग्याः शिष्याः	11-19
3.	क्रियाज्ञानदीक्षे	8-19
4.	शिष्यपरीक्षणम्	20-35
5.	गुरुशिष्यसम्बन्धः	36-44
6.	स्नानविधयः	45-79
7.	पीठनिरूपणम् (यागस्थाननिरूपणम्)	80-100
8.	स्थानकल्पनं शरीरस्यान्तः	100-115
9.	सामान्यन्यासविधिः	116-145
10.	अर्घपात्रविधिः (सप्रयोजनः)	146-180
11.	योग्यानि यागद्रव्याणि	162-179
12.	द्वारार्चादिविधयः	179-193
13.	दिग्विभागः (दार्शनिकदृष्ट्या)	194-231
14.	देहप्राणादिशुद्धिविधिः	232-238
15.	विशेषन्यासविधयः	239-262
16.	न्यासरहस्यम्	262-277
17.	तर्पणादि (रहस्यविधिना)	278-283
18.	आन्तरो यागः (भावनातः)	283-296
19.	विशेषार्घपात्रम्	288-291
20.	देहपूजा	290-295
21.	न्यासैः प्राणादिपूजनम्	295-319
22.	अन्यशास्त्रेभ्य उत्कर्षः	319-320
23.	चक्रपूजाविधयः	321-366
24.	बहिर्यागविधिः	367-445
25.	यागक्षेत्रग्रहः	369-370
26.	पञ्चगव्यविधिः	371-374
27.	गणेशादिपूजनम्	375-387
28.	अग्निकार्यम्	388-445
29.	अग्निकुण्डसंस्कारः	388-410
30.	अग्निसंस्कारः	441-415
31.	सुस्तुवादि संस्कारः	416-418
32.	अधिवासनादि	418-435
33.	होमाग्नितर्पणम्	435-445
34.	शिष्यसंस्कारविधिः	445-497
35.	शिवहस्तविधिः	456-463
36.	दीक्षाफलानि	464-471
37.	स्वप्नदर्शनविधिः (शय्या-क्लृप्त्या)	474-494
38.	देवतार्चनोपदेशः (सामयं कर्म)	494-496
39.	संस्कारान्तराणि - 48	497-512
40.	संस्कारफलम्	512-521
41.	समयाः (शिष्येण पालनीयाः)	521-612
42.	जात्यादिग्रहाः	595-604

आ०-16
पुत्रकदीक्षा

संख्याः	विषयाः	कारिकाः
1.	पुत्रकदीक्षा	सर्वस्मिन्नाह्निके
2.	सामुदायिकयागः (मण्डल-यागः)	16त: 25
3.	यागान्तराणि	17त: 30
4.	शिवनिर्माल्यग्रहणव्यवस्था	30-31
5.	पशुयागविधिः	28त: 73
6.	अग्नितर्पणम्	71
7.	विज्ञप्तिः शिष्यार्थं गुरुकृता	74त: 87
8.	पाशविधूननम् न्यासपूर्वकम्	83त: 86
9.	शिवात्मतानुसन्धानम् (स्वस्वभावदीपनम्)	88त: 94
10.	अध्वन्यासः शिष्यदेहे	95त: 150
11.	अध्वशोधनविधयः मन्त्रन्यासरूपाः	151त: 195
12.	शोध्यशोधकभावभेदवैचित्र्यम्	157त: 194
13.	योजनिकादि-दीक्षा-क्रियाफलम्	175त: 205
14.	शोध्य-शोधकभावशेषो (विशेषन्यासात्मकः)	207त: 237
15.	पाशशोधनस्य तत्त्वम्	238त: 249
16.	मन्त्रप्रयोगतत्त्वमाहात्म्यादि	250त: 302
17.	बुभुक्षोरशुभकर्मशोधनविधिः	302त: 311

आ०-17
शिवतादात्म्यप्रक्रिया

संख्याः	विषयाः	कारिकाः
1.	सूत्रबन्धविधिः	1त: 10
2.	आवाह्नादिविधयः	10त: 30
3.	तत्त्वशोधनविधिः	30त: 65
4.	पाशदाहविधिः	66त: 73
5.	शुद्धाध्वशोधनविधिः	74त: 78
6.	योजनिकाविधिः	78त: 99
7.	दीक्षा-निर्बीजा सबीजा च	94त: 101
8.	तत्त्वशुद्धिविधिर्भावनोपाया	102त: 111
9.	इन्द्रियाणां बन्धमोक्षौ	112त: 114
10.	अध्वभेदविधिः	115त: 122

आ०-18
संक्षिप्तदीक्षा

संख्याः	विषयाः	कारिकाः
1.	संक्षिप्तदीक्षाविधिः (पुनर्जननादिमोचिका)	1-7
2.	मन्त्रोपयोगविधिः	3-5
3.	संक्षिप्तदीक्षाकृदधिकारी	8
4.	संक्षिप्तदीक्षा आगमान्तरेषु	9 तः 11

आ०-19
सद्यः समुत्क्रमदीक्षा

संख्याः	विषयाः	कारिकाः
1.	प्राणोत्क्रमणदीक्षायाः कालः	1तः 9
2.	क्षुरिकादिन्यासविधिः	10तः 20
3.	मूलाधारात् सञ्चारादिविधयः	21तः 35
4.	ब्रह्मविद्यापाठविधिविचारः	36तः 51
5.	ब्रह्मविद्यापाठफलम्	40तः 47
6.	प्राणोत्क्रमणदीक्षाविषये प्रमेयान्तरम्	47तः 53
7.	आह्निकोक्तविषयस्योपसंहारः	54तः 56

आ०-20
तुलादीक्षा

संख्याः	विषयाः	कारिकाः
1.	सप्रत्ययदीक्षाविधिः	2-4
2.	निर्बीजत्वकरणं कर्मादीनाम्	4-6
3.	स्थावरादीनामपि मोचनम्	7
4.	सप्रत्ययदीक्षाकरणेऽधिकारः	8तः 11
5.	तुला शुद्धिपरीक्षा (अन्तःसंस्कारः)	11तः 15
6.	तुलाप्रत्ययविधिः (विवेके)	14-15

आ०-21
परोक्षदीक्षा

संख्याः	विषयाः	कारिकाः
1.	परोक्षदीक्षायास्तत्त्वम्	1तः 5
2.	परोक्षदीक्षया दीक्षणीयाः	6-12
3.	परोक्षदीक्षाविधिः (मृतस्य जीवतो वा)	13-25
4.	महाजालप्रयोगदीक्षाविधिः (शम्भुनाथोक्ता)	25-27
5.	जालप्रयोगदीक्षया स्थावरनारकादीनां गतिः	28-30
6.	जालप्रयोगदीक्षया मानवानां गतिः	31-34
7.	जालप्रयोगदीक्षया प्रलयाकलादीनां गतिः	35-36
8.	जालप्रयोगदीक्षया संस्काराः	37-40
9.	जालप्रयोगदीक्षा सप्रत्यया बलाबलविचारतः	41-42
10.	जीवत्परोक्षदीक्षा	42-44
11.	रागद्वेषतो जालाकृष्टेरसम्भवः	45
12.	जालाकृष्टौ तारतम्यं कौलवामयोः	46
13.	जालाकृष्टिदीक्षायां भुक्तिमुक्तिविशेषः	47-49
14.	जालप्रयोगदीक्षाविधौ ब्रह्महत्यादिकृतां विशेषो (धर्मशिवोपदिष्टः)	50-56
15.	प्रत्यक्षस्य पापिनः पापमोचिका दीक्षा	56-58
16.	तत्त्वविदो गुरोः विशेषमाहात्म्यम्	59-61
17.	परोक्षदीक्षाद्वैविध्यम्	61

आ०-22
लिङ्गोद्धारः

संख्याः	विषयाः	कारिकाः
1.	लिङ्गोद्धारसिद्धान्तः	1-14
2.	लिङ्गोद्धारविधयः (श्रावणाभ्यनुज्ञानशोधन-पातकच्युतिशङ्काछेदात्मकाः)	14-27
3.	उद्धृतलिङ्गस्याधिकारानधिकारौ	28-32
4.	निजेऽपि शास्त्रे गुर्वन्तरदीक्षितस्य लिङ्गोद्धारः	33-35
5.	अधरशैवदर्शनदीक्षितस्य लिङ्गोद्धृतिः	35-42
6.	ज्ञानार्थमनेकगुरु-रूपाश्रयः	43-48

आ०-23
अभिषेकविधिः

संख्याः	विषयाः	कारिकाः
1.	अभिषेकनिरूपणम्	1-7
2.	अभिषेकऽधिकार्यनधिकारिविचारः	8-17
3.	अभिषेकविधिः (आचार्यकरणे)	17-26
4.	अभिषेकफलम्	26-30
5.	अभिषेकविधेः शेषः (विद्याव्रताख्यः)	31-44
6.	शिष्यपरीक्षणम्	45-51
7.	ज्ञानाहरणदीक्षाविधिः	51-55
8.	ज्ञानाहरणे शङ्कासमाधानादि	56-64
9.	ज्ञानाहरणविषये स्वमतम्	65-69
10.	शिष्यस्योद्धारः गुरुकृतः	70तः-76
11.	गुर्वन्तराश्रयणम्	77-80
12.	गुरुं प्रति व्यवहारः	81-89
13.	अनुग्रहकृत्ये बहुविचित्रता	90-95

14.	गुरुणा पाल्यमनुशासनम्	96-100
15.	अभिषेकविधे: परिशेष: साधकविषये	101-103

आ०-24
अन्त्येष्टिदीक्षा

संख्या:	विषया:	कारिका:
1.	अन्त्येष्टिदीक्षाधिकारिण:	1-4
2.	अन्त्येष्टिदीक्षा-संस्कार-विधि:	5-20
3.	तत्त्वदर्शिनो नान्त्येष्टि:	8-9
4.	अन्त्येष्ट्यधिकारिण:	9-10
5.	अन्त्येष्टिविधौ विशेषा:	10-24
6.	सप्रत्ययत्वप्रयोजनम्	14-16
7.	अन्त्येष्टिदीक्षाविधिर्दीक्षोत्तरागमानुसारम्	17-20
8.	सान्न्यासिकीदीक्षा	18-20
9.	अन्त्येष्टिदीक्षाफलम्	20-23

आ०-25
श्राद्धदीक्षा

संख्या:	विषया:	कारिका:
1.	श्राद्धविधि:	1-6
2.	श्राद्धविधिप्रयोजनम् (भुक्तिमुक्ती)	7-9
3.	तत्त्वज्ञानसम्बन्धी पर्वविधि:	10-12
4.	पुत्रादिकृतश्राद्धविधि:	13-15
5.	पतितानांश्राद्धविधिनोद्धरणम्	17-18
6.	नाडीचारणविधि:	19-20
7.	श्राद्धविधे: फलम्	21-24
8.	भक्तेर्महिमा	25-29

आ०-26
शेषवृत्ति:

संख्या:	विषया:	कारिका:
1.	शेषवृत्तिप्रयोजनम्	1-8
2.	शेषवृत्त्यनपेक्ष: साधक:	9-10
3.	सांसिद्धिकनिर्बीजयो: कर्त्तव्यम्	10-11
4.	नित्यनैमित्तिकानि कर्माणि (शेषवृत्तौ)	12-16
5.	मन्त्रदानविधि:	17-20
6.	लिखितस्य मन्त्रस्य दाने निषेध:	20-22
7.	मन्त्रवीर्यम्	21, 23-25
8.	मन्त्रस्य गोपनीयता	25-26
9.	शेषवृत्तिशिक्षाप्रपञ्च:	26त: 76
10.	सन्ध्या-चतुष्टयम्	33त: 37
11.	आवाहनादि	41-46
12.	विसर्जनम्	47-50
13.	तर्पणम्	51-66
14.	पूजनतर्पणादिक्रियातत्त्वम्	58-66
15.	शेषो विधि:	59-76
16.	लोकसंग्रहार्थं नियमपालनम्	74-75

आ०-27
लिङ्गार्चा

संख्या:	विषया:	कारिका:
1.	लिङ्गार्चनरहस्यं त्रिकशास्त्रीयम्	1त: 11
2.	लिङ्गस्वरूपवैविध्यम्	12त: 14
3.	लिङ्गसंस्कारादिक्रिया	15-16
4.	लिङ्गानामाधरौत्तर्यम्	17-20
5.	तूरविधिनिरूपणम्	20-29
6.	अक्षसूत्रविधि:	30-39
7.	अर्घपात्रनिरूपणम्	40-43
8.	उपकरणान्तराणि	44-47
9.	प्रतीकान्तराणि वा	44-49
10.	लिङ्गपूजाविधिभेदा:	50-59

आ०-28
नैमित्तिककर्मविधय:

संख्या:	विषया:	कारिका:
1.	नित्यनैमित्तिकविभाग:	1-4
2.	नित्यकर्मनिर्देश:	5
3.	नैमित्तकविभाग:	6-9
4.	पर्वविधिप्रयोजनम्	10-60
5.	पर्वभेदा:	31-40
6.	पर्वविधि:	40-44
7.	पर्वकाल:	45-52
8.	पर्वविधिक्रिया:	53-60
9.	चक्रयाग:	60-111
10.	चक्रचर्चा	60-75
11.	मूर्त्तियाग:	75-78
12.	मूर्त्तियागभेदा:	78-82
13.	तत्र विधि:	82-111
14.	तस्य फलम्	102
15.	पवित्रकविधि:	112-186

16. नैमित्तिकतिथिविशेषः 186-216
17. ज्ञानसन्तानः 178-202
18. गुरुजन्ममृतिपर्वणी 203-208
19. गुरुपर्व विधिः 209-215
20. आत्मनो जन्मदिनम् 216
21. मृतिपरीक्षणम् 217-370
22. जन्मादिपरम्परा 219-232
23. मोक्षावाप्तिक्रमाः (गतिभेदाः) 233-273
24. क्षेत्रमानमायतनानाम् 251-252
25. आयतने मृतिः 274-281
26. मरणकाले स्थितिभेदः 281-291
27. योगिनां मृतौ गतिभेदः 292-302
28. ज्ञानिनां मृतौ गतिभेदः 303-325
29. गुणत्रयाभिभूते तत्त्वे मृतौ गतिभेदः 326-327
30. पुनर्जन्मग्रहणप्रकारः 328-353
31. पुनर्जन्मस्वप्नयोः परस्परं विशेषः 354-359
32. मरणक्षणवासनानुसारं गतिः 360-367
33. पर्वान्तराणि तत्कार्याणि च 368-370
34. योगिन्यादि-मेलकाः 371-379
35. चक्रार्चनस्य विशेषाः 379-385
36. व्याख्याविधिः 385-408
37. श्रुतविधिः 387-393
38. पञ्चलक्षणानि गुरोः 386-387
39. कुलाचारगुरवो दश 370-394
40. समयनिष्कृतिः 408-423
41. गुरुपूजाविधिः 423-434

आ०-29
रहस्यचर्या

संख्याः	विषयाः	कारिकाः
1.	कुलप्रक्रियायाः माहात्म्यम्	1-3
2.	कुलप्रक्रियायागविशेषः	4-17
3.	कुलयागे द्रव्याणि	10-17
4.	पीठिकाबन्धः	18-23
5.	अर्चा-विधिः	24-89
6.	मण्डले पूज्याः कौलिकाः सिद्धाः सिद्धपत्न्यश्च	29-36
7.	ओवल्ल्यादयः	29-42
8.	स्मर्तव्या देवताः	43-45
9.	कुलेश्वरी	45-89
10.	देव्यः पूज्याः (मण्डले)	52-54
11.	तत्र न्यासविधिः	59-64
12.	पूजाविधिः	66-81
13.	जपहोमादि	82-89
14.	भावनाभ्यासः	90-91
15.	निर्विकल्पोऽभ्यासः	92-95
16.	चर्याविधिः	96-121
17.	रहस्यमयो-दौतविधिः (चक्रयागः)	122-173
18.	यागरहस्यम् दूतीयागफलम्	174-177
19.	प्राणे चक्रयागविधिः	178-186
20.	चक्रयागे दीक्षा	186-200
21.	चक्रयागे पुत्रकदीक्षा	201-210
22.	चक्रयागे सप्रत्ययादीक्षा	211-219
23.	पञ्चस्ववस्थासु कुलयागविधिः	220-224
24.	बुभुक्षोः कृते अभिषेकविधिः	225-237
25.	वेधदीक्षा विधिस्तत्प्रकाराश्च	237-273
26.	वेधदीक्षाफलानि, सद्यो बोधोदयः	274-275
27.	शार्वी-दीक्षा	276-283
28.	वेधदीक्षोपसंहारः	284-291

आ०-30
मन्त्रौघः

संख्याः	विषयाः	कारिकाः
1.	मन्त्रफलम्	1-3
2.	आसनपूजायां मन्त्राः	4-10
3.	रतिशेखरमन्त्रः	11-12
4.	प्रणवस्य द्वादश कलाः	12-14
5.	नमस्कारतत्त्वम्	14
6.	भैरवसद्भावमन्त्रः	15-17
7.	सर्वदेवतामन्त्राः साधारणतः	18
8.	परापरादेवी विद्या (मन्त्रः)	20-25
9.	अपरादेवीमन्त्रः	26
10.	परादेवीमन्त्रः	27-28
11.	भैरवहृज्ज्ञानमन्त्रः	29-33
12.	अन्ये मन्त्राः	34-37
13.	ब्रह्मशिरः	38
14.	पुरुष्टुतं नाममन्त्रः	39-40
15.	नेत्रमन्त्रः	40-41
16.	यज्ञाङ्गमन्त्राः	41-45
17.	कालकर्षिणीमन्त्रः	45-46
18.	मातृसद्भावमन्त्रः	47-53
19.	गुप्ततरा नवार्णविद्या	54-55
20.	कालरात्रिमन्त्रः	55-57
21.	क्षुरिका मन्त्रः	55-57
22.	छेदिनी-क्षुरिका-विद्या	58-59
23.	सद्यो निर्वाणदो मन्त्रः	60-62

24.	ब्रह्मविद्या सकला	62-90
25.	निष्कला ब्रह्मविद्या	90-91
26.	पश्वालम्भनमन्त्रः	91-92
27.	शाकिनीस्तोभनमन्त्रः	92-94
28.	सर्वसंहारकारको मन्त्रः	94-95
29.	प्रियमेलापमन्त्रः	96-98
30.	तुलामेलापमन्त्रः	99
31.	बाह्याचाररहितायाः दीक्षायाः मन्त्राः	100-121
32.	विद्यात्रयम्	107-121
33.	मोक्षदा-विद्या	107-110
34.	दीक्षा-विद्या	110-115
35.	पारमेश्वरी-विद्या	116-120
36.	उपसंहारः	121-123

आ०-31
मण्डलविधयः

संख्याः	विषयाः	कारिकाः
1.	दिक्साधनम्	1-52
2.	त्रित्रिशूलमण्डलम्	7-52
3.	त्रिशूलवर्तना	11-24
4.	शृङ्गवर्तना	24-25
5.	पद्मादिवर्तना	26-29
6.	क्षेत्रग्रहणम्	29
7.	अमलसारकविधिः	30-32
8.	चित्रावर्तना	33
9.	शृङ्गवर्तना	33-36
10.	मण्डलानां भेदाः	36-38
11.	रजांसि विविधवर्णानि	39-40
12.	मण्डलमाहात्म्यम्	40-42
13.	त्रिशूलमण्डलस्य विशेषमाहात्म्यम्	42-50
14.	मण्डलाभिज्ञस्य माहात्म्यम्	50-52
15.	चतुस्त्रिशूलं मण्डलम्	53-58
16.	तद्विषये शास्त्रप्रमाणानि	54-61
17.	मालिन्यां मण्डलविधानम्	62-85
18.	मालिन्यां पार्श्ववर्तना	64-67
19.	मालिन्यां शृङ्गवर्तना	67-69
20.	मालिन्यां पार्श्वशृङ्गवर्तना	69-71
21.	मालिन्यां दण्डादिवर्तना	71-78
22.	मालिन्यां रजसां विधानम्	79-85
23.	देवी-यामले-शूलाब्जमण्डलविधानम्	85-99
24.	त्रिशिरो-भैरवे-शूलाब्जमण्डलविधिः	100-104
25.	त्रिशूलवर्तना	105-113
26.	मण्डलवैपुल्यतारतम्यम् (तत्र)	113-116
27.	रजः प्रक्षेपविधिवैचित्र्यम् (तत्र)	114-126
28.	मण्डलाङ्गविशेषवर्णनम्	124-126
29.	मण्डलयागे भावनाभ्यासः	127-131
30.	व्योमेशस्वस्तिकं मण्डलम्	132-154
31.	रजो विक्षेपविधिः स्वस्तिके	147-154
32.	शूलाब्जमण्डलं सिद्धातन्त्रोक्तम्	155-163

आ०-32
मुद्राः

संख्याः	विषयाः	कारिकाः
1.	मुद्रास्वरूपनिरूपणम्	1-3
2.	खेचर्याः प्राधान्यं मुद्रासु	4-8
3.	मुद्रायाः चातुर्विध्यम्	9
4.	खेचरी-निरूपणम्	9-13
5.	त्रिशूलिनी-मुद्रा	13-25
6.	करङ्किणी-मुद्रा	26-31
7.	वीरावलौ मुद्राविधिः	32-47
8.	कामिकागमे मुद्राविधिः	47-48
9.	कुलगह्वरे मुद्राविधिः	49-53
10.	खेचरी-भेदरूपा-मुद्राः	54-62
11.	खेचर्याः प्राधान्यम्	63-68

आ०-33
एकीकारः

संख्याः	विषयाः	कारिकाः
1.	चक्रभेदः	1-15
2.	षडरचक्रम्	2
3.	अष्टारं चक्रम्	3
4.	द्वादशारम्	4
5.	चतुर्विंशारम्	5
6.	चक्रदेवताः	6-17
7.	चक्रमन्त्राः	17-19
8.	सर्वेषामेकीकारः	20-32

आ०-34
स्वरूपप्रवेशविधिः

संख्याः	विषयाः	कारिकाः
1.	स्व-स्वरूपप्रवेशः	1-4

आ०-35
शास्त्रमेलनम्

संख्याः	विषयाः	कारिकाः
1.	आगमतत्त्वनिरूपणम्	1-15
2.	शैवागमस्यैव परिपूर्णत्वम्	16-22
3.	नेतरेषामागमानाम् शैवागमस्य विशेषमाहात्म्यम्	23-30
4.	त्रिककुलयोरैक्यं पर्यन्ते	31-34
5.	आगमान्तराणां स्थितिः	35-39
6.	त्रिकस्यैव परमोपादेयता	40-44

आ०-36
आयातिक्रमः

संख्याः	विषयाः	कारिकाः
1.	त्रिकशास्त्रावतारक्रमः	1-10
2.	त्रिकशास्त्रस्याभिनवं प्रवर्तनम्	11-15

आ०-37
उपादेयता

संख्याः	विषयाः	कारिकाः
1.	शास्त्राणामधरोत्तरताऽधिकारभेदश्च	1-12
2.	शैवागमेष्वधरोत्तरता	12-31
3.	त्रिकागमस्य सर्वश्रेष्ठता	32-33
4.	भारतवर्षस्य विशेषमाहात्म्यम्	33-37
5.	निजवंशस्येतिहासः	38
6.	कश्मीरमण्डलस्य माहात्म्यम्	39-46
7.	प्रवरसेनपुरस्य वर्णनम्	47-48
8.	वितस्ता-वर्णनम्	49-52
9.	निजपूर्वजानां वर्णनम्	53-55
10.	आत्मनः शैशवस्येतिहासः	56-59
11.	निजगुरूणां वर्णनम्	60-62
12.	स्वस्थितेः वर्णनम्	63
13.	तन्त्रालोकनिर्माणहेतुभूता स्थितिः	64-71
14.	स्वशिष्याणां वर्णनम्	64-68
15.	तन्त्रालोकनिर्माणस्थानस्य वर्णनम्	72
16.	वत्सलिकावर्णनम्	73-74
17.	शौरेर्वर्णनम्	75
18.	अम्बावर्णनम्	76-79
19.	अभिनवलुम्पकौ	80-81
20.	तन्त्रालोकनिर्माणस्य वर्णनम्	82-84
21.	शिवे निवेदनं ग्रन्थस्य	85

~ तन्निर्माणकालः — श्रीशम्भुनाथाख्ये गुरुनाथे जीवति सति तदनुज्ञानमवाप्यैव शास्त्रमेतद्विरचितमाचार्याभिनवगुप्तेन, तन्त्रसारात् प्रत्यभिज्ञाविमर्शिन्योश्च प्राक् परं मालिनी-विजयवार्त्तिकादनन्तरम्। यथोक्तम्—

"अदृष्टं प्रकटी-कुर्मो गुरुनाथाज्ञया वयम्।।"

(त० आ०, 1, 19)

तन्त्रालोके मालिनीविजयवार्त्तिकस्योल्लेखः, तन्त्रसारारम्भे च विततस्य तन्त्रालोकस्य, प्रत्यभिज्ञाविमर्शिन्यां चागमाधिकारे तन्त्रालोक-तन्त्रसारादीनाम्।

"मयैतत् स्रोतसां रूपमनुत्तरपदाद् ध्रुवात्। आरभ्य विस्तरेणोक्तं मालिनीश्लोकवार्त्तिके।"

(तं० आ०, 37, 30)

"अन्वर्थं चात्र दर्शितं तन्त्रालोके श्लोकवार्त्तिके च।"

(तं० सा० पृ०, 109)

"एतच्च विस्तरतस्तत्प्रधानेषु तन्त्रालोकसारादिषु मया निर्णीतम्।"

(ई० प्र० वि०, खं० 2, पृ०, 214)

~ तन्निर्माणस्थानम् — मन्द्रस्य पितृव्यपत्न्या वत्सलिकया वितीर्णं गृहं प्रवरसेनपुरे। यथा—

"इत्थं गृहे वत्सलिका वितीर्णे स्थितः समाधाय मतिं बहूनि।"

(तं० आ०, 37, 82)

~ प्रतिज्ञातः — स्वगुरुसम्प्रदायतः परिज्ञातान्यनुभूतानि च स्वानुभवतस्त्रिकशास्त्ररहस्यानि तन्त्रालोकेन प्रकाशनीयातीति ग्रन्थकृता प्रतिज्ञातम्। यथा—

"अतोऽत्रान्तर्गतं सर्वं सम्प्रदायोज्झितैर्बुधैः।
अदृष्टं प्रकटीकुर्मो .....।।"

(तं० आ०, 1, 19)

~ प्रयोजनतः — त्रिकोपासनाक्रमे न कापि स्पष्टार्था पद्धतिरासीदभिनवगुप्तस्य काले। ततः शिष्यैः स ब्रह्म-चारिभिरपि च साधकैः प्रार्थितः सन्नसौ गुरुस्त्रिकार्थे स्पष्टां साधना-पद्धतिं निर्मातुकामः संस्तन्त्रालोकाख्यं बृहत्कायं शास्त्रं निर्ममे। ततोऽस्य ग्रन्थस्य प्रयोजनं त्रिकोपासनापद्धतिविषये स्पष्टं ज्ञानं पाठकानाम्। यथा—

"सन्ति पद्धतयश्चित्राः स्रोतो भेदेषु भूयसा।
अनुत्तरषडर्धार्थक्रमे त्वेकाऽपि नेक्ष्यते।।
इत्यहं बहुशः सद्भिः शिष्यसब्रह्मचारिभिः।
अर्थितो रचये स्पष्टां पूणार्थां प्रक्रियामिमाम्।"

(तं० आ०, 1, 14त: 16)

~ व्याख्यातपूर्वः — तन्त्रालोकस्यैकैव व्याख्या लभ्यते।

असौ हि जयरथकृता विवेकाख्या। तदाधारभूतं च सुभटदत्तकृतं तन्त्रालोकविवरणं यदिदानीं नैव लभ्यं क्वापि। यथा—

व्यधुस्तन्त्रालोके किल सुभटपादा विवरणम्।

(तं० आ० वि०, खं० 12, पृ०, 433)

~ व्याख्यान्तराणि — एवं प्रतीयते यत्तन्त्रालोकस्य टीकाः अनेकैर्विद्वद्भिः कृता आसन् याः जयरथस्य मतेन नैव समीचीनाः।

(क) यदानाकर्ण्य गूढार्थं स्वादु स्वाशयकौशलम्।
साकूतमुक्तमन्यैर्यत्तेन दोलायते मनः।।

(तं० आ० वि०, खं० 1, पृ०, 3)

(ख) अत्र च सम्भवन्त्यपि व्याख्यान्तराणि न कृतानि, ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च। केषांचिदपि व्याख्यान्तराणामासमञ्जस्यमतीव सम्भवदपि न प्रकाशितम्।

(तं० आ० वि०, खं० 1, पृ०, 15)

तन्त्रालोकप्रकाशः — जयरथकृतायास्तन्त्रालोकटीकायाः नामान्तरं यत् प्रारम्भिकाह्निकद्वये पुष्पिकासु लभ्यते लेखकप्रमादतः सम्पादकानवधानतश्च।

तन्त्रालोकोद्द्योतः — तत्र मुद्रिते पुस्तके चतुर्थस्याह्निकस्यारम्भे तन्त्रालोकोपरि जयरथकृतायाष्टीकाया नाम उद्द्योत इति वर्तते, भूरिशस्तु विवेक इत्येवास्या अभिधानम्, क्वचित् पुनः प्रकाश इति। लेखकानां प्रमादः स्यादयं कदाचित्। यथा—

"श्री राजानकजयरथाचार्यकृतो द्योताभिख्यविवरणोपेते चतुर्थमाह्निकम्।"

(तं० आ० वि०, खं० 3, पृ०, 1)

तन्त्रालोकविवेकः — तन्त्रालोकव्याख्यायास्तृतीयस्याह्निकस्यान्ते पुष्पिकायां तस्याः "विवेकः" इत्येव नाम मुद्रिते पुस्तके वर्तते न "प्रकाश" इति। तदग्रेऽपि सर्वत्र तथा विधा एव पुष्पिकास्ततोऽस्या व्याख्यायाः इदमेव प्रमादोद्भूतमिति प्रतिभाति। यथा—

"श्री जयरथविरचितविवेकाभिख्यव्याख्योपेते.....।"

(तं० आ० वि०, खं० 2, पृ०, 264)

तथा च प्रारम्भे—

"तन्त्रालोकस्य .....
विवेकाभिख्यव्याख्योपेतस्य .....।"

(तं० आ० वि०, खं० 2, पृ०, 1)

~ आभारतः — (1) जयरथेन तन्त्रालोकीयस्य तत्त्वस्य ज्ञाने कल्याणाख्यं गुरुं प्रत्याभारः प्रकटितः।

द्र० '**कल्याणगुरुः**' इति

(2) तन्त्रालोकग्रन्थव्याख्याविधौ च तेन सुभटदत्तं गुरुं प्रत्याभारः प्रकटितः।

द्र० '**तन्त्रालोकविवरणम्**' इति, द्र० 'सुभटदत्तः' इति।

~ स्खलितानि (तत्र) — जयरथेन स्वयमपि स्वीकृतं यत् क्वचित्-क्वचित् स्खलितानि वर्तन्त इति। यथा उक्तं हि—

"तन्त्रालोकेऽत्र यस्मात् स्खलितमपि महत् कुत्रचित्कुत्रचिच्चेत्।"

(तं० आ० वि०, खं० 12, पृ०, 434)

प्रकृते कोषेऽपि तत्र-तत्र क्वचित् क्वचिन्निर्देशः कृतोऽस्ति तत्तत्स्खलितविषये। तत्र-तत्र विद्वद्भिर्विचारणा कार्या। विशेषतः करणयोगविधेर्व्याख्याने तन्त्रालोकस्याह्निकान्तरस्थानां पद्यानां यत् समाश्रयणं तत् त्रिहारो भैरवस्य पञ्चशतिकाख्यस्य च ग्रन्थस्य वाक्यैर्न सङ्गच्छते।

तन्त्रालोकविवरणम् — कल्हणस्य कृते श्री सुभटदत्तेन कृता तन्त्रालोकस्य टीका यां जयरथो जानाति स्म, परं येदानीं न लभ्यते क्वापि। यथा—

"व्यधुस्तन्त्रालोके किल सुभटपादा विवरणम्।
यदर्थं यश्चैभ्यो निखिलशिवशास्त्रार्थविदभूत्।।"

(त० आ० वि०, खं० 12, पृ०, 433)

यदर्थमिति कल्याण (कल्हण) तस्यार्थम्।

तन्मात्राणि — अतीवसूक्ष्माणि, विशेषरहितानि, सामान्याकाराणि, बाह्येन्द्रियग्राह्याणि शब्दादीनि पञ्च प्रमेयतत्त्वानि। एतान्येव प्रक्षोभं प्राप्तानि सन्ति भूतपञ्चकत्वं प्राप्नुवन्ति।

(क) "शब्दविशेषाणां हि क्षोभात्मनां यदेकमक्षोभात्मकं प्राग्भावि सामान्यमविशेषात्मकं तच्छब्दतन्मात्रम् एवं गन्धान्तेऽपि वाच्यम्।"

(तं० सा०, पृ०, 89-90)

(ख) "पृथिव्यां सौरभान्यादिविचित्रे गन्धमण्डले।।
यत्सामान्यं हि गन्धत्वं गन्धतन्मात्रनाम तत्।"

(तं० आ०, 97, 280-281)

एवमेव रसादितन्मात्राणि।

~ तत्प्रकृतिः — तमोगुणप्रधानो ह्यहङ्कारस्तन्मात्रपञ्चकस्य प्रकृतिः। स तेषां बीजभूतं स्रोतः उत्संकल्पः। स एव पञ्चतन्मात्रतया परिणमते, सृष्टिक्रमे, तानि च तस्मिंल्लयं गच्छन्ति संहारक्रमे। यथा—

"तमः प्रधानाहङ्काराद् भोक्त्रंशच्छादनात्मनः।
भूतादिनाम्नस्तन्मात्रपञ्चकं भूतकारणम्।।"

(तं० आ० 9, 272)

द्र० (तं० आ० वि०, खं० 6, पृ०, 218)

~ तद्विकृतिः — पञ्चतन्मात्राणि सामान्यतः प्रक्षुब्धानि सन्ति तत्तदिन्द्रियग्राह्यस्थूलविषयरूपतां, विशेषतः प्रक्षोभं प्राप्तानि च पञ्चभूततामापद्यन्ते सृष्टिक्रमे। तेषां क्रमे स्पर्शादीनि चत्वारि पूर्वपूर्वतन्मात्रसहायतया क्षोभमाप्य वाय्वादिरूपतां प्राप्नुवन्ति शब्दस्त्वैकाक्येवाकाशताम्। यथा—

"क्षुभितं शब्दतन्मात्रं चित्राकाराः श्रुतीर्दधत्।।
नभः शब्दोऽवकाशात्मा वाच्याध्याससहो यतः।
तदेतत् स्पर्शतन्मात्रयोगात् प्रक्षोभमागतम्।।
वायुतामेति तेनात्र शब्दस्पर्शोभयात्मता; इत्यादि।

(तं० आ०, 283-288)

~ पञ्च : — तानि च शब्दतन्मात्रम्, स्पर्शतन्मात्रम्, रूपतन्मात्रम्, रसतन्मात्रम्, गन्धतन्मात्रं चेति श्रोत्रादि पञ्चबाह्येन्द्रियग्राह्याः सूक्ष्मतरा भेदरहिताः विषयाः। यथा—

"एषां ग्राह्यो विषयः सूक्ष्मः प्रतिभागवर्जितो यः स्यात्।
तन्मात्रपंचकं तच्छब्दः स्पर्शो महोरसो गन्धः।।

(प० सा०, 21)

~ (मातृकाक्रमे) — चकारादिञकारान्तैर्ध्वनिभिर्मातृकाक्रमे तन्मात्रपञ्चकस्य वास्तविकं स्वरूपमभिव्यज्यते। यथा—

चादिञान्तं गन्धादि शब्दान्तं तन्मात्रपञ्चकम्।

(प० त्री० विवृ०, पृ०, 4)

तपस्विराजः — आचार्यः कोऽपि यथा—

"तदुक्तं तपस्विराजेन।" (वि० भै० उ० पृ० 90)

तपस्वी — कश्चन कालीनयोपासक आचार्यो यस्य वाक्यमुद्धृतं जयरथेन। तद्यथा—

"अनेनैवाभिप्रायेन श्रीतपस्विनापि-
'परतरतयादिरूपं यद्यत् कलयामि तत्तदधरं ते।
अधरतरापि न कलना सा काचिद् यत्र न स्थितास्यभितः।"

(तं० आ० वि०, खं० 3, पृ०, 131)

तपस्विराजः एव स्यादयं कदाचित्।

तपोलोकः — ऊर्ध्वोर्ध्वक्रमे भूलोकात् षष्ठो लोकस्तपो लोकः सत्यलोकादधः, जनलोकाच्चोपरि वर्तमानः।

~ तन्निवासिनः — तत्र निवासिनः सनकाद्या ऋषयोऽधिकारिणश्च प्रजापतयः। यथा—

"जनात्तपोऽर्ककोटयोऽत्र सनकाद्या महाधियः।।
प्रजापतीनां तत्राधिकारो ब्रह्मात्मजन्मनाम्।"

(तं० आ० 8, 152-53)

तमः — गुणः —

(1) त्रिषु गुणेष्वन्यतमोगुणः। तच्च तमः स्व सत्तानन्दप्रकाशाभावांशभूतमभावरूपत्वेनान्धकारमयमज्ञानात्मकम्। इति मोहात्मकत्वं तस्य प्रसिद्धम्। यथा-

यस्तदभावः (प्रकाशानन्दयोरभावः) स सत्त्वस्याभावस्तमः आवरणरूपम्।

(ई० प्र० वि० वि० खं० 3, पृ०, 363)

(2) अवष्टम्भको गुणस्तमः। गुरुत्वादयं गुणो रजसश्चाञ्चल्यस्य वेगं शिथिलयन् जगतः कञ्चित्कालं स्थितिरूपस्यावष्टम्भस्य कारणं भवति। अन्यथा क्षणे क्षणेऽभिनवाभिनवानां त्वरितानां परिणामानां सन्ततौ सृष्टि संहृती एव स्यात्तां, नाभविष्यत् स्थितिः।

"तमोऽवष्टम्भकं प्रोक्तम्....."

(स्व० तं०, 11, 65)

~ गुणत्वं तस्य — शक्तिशक्तिमद्भावस्तावदभेदभूमिकायामेव चकास्ति। ततो भेदरसे पशुभावेऽवभासमानं तमो न मायाप्रमातुः शक्तिरपि तु तस्य गुण एव। यथा—

भेदास्थितेः शक्तिमतः शक्तित्वं नापदिश्यते।
एषां गुणानां.....

(ई० प्र०, 4-1-5)

~ मूलतः — पतिप्रमातुर्या मायाशक्तिस्सैव पशुदशामवतीर्णस्य प्रमातुस्तमोगुणः। यथा—

स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
मायातृतीये ते एव पशोः सत्त्वं रजस्तमः।।

(ई० प्र०, 4-1-4)

~ दुःखप्रकारविशेषः — यथा —

यथा— दुःखं त्रिधा पञ्चधा च.....
तमो मोहो महामोहस्तामिस्राश्च चतुर्थकः।
अन्धतामिस्र एवान्धक.....।।

(शि० सू० वा०, भा०, पृ०, 75)

तमोगुणप्रधानाः — ~ पाणिनः —

द्र० **'पाणिनः'** ~ **'तमोगुणप्रधानाः'** इति।

तरङ्गम् — ~ बीजम् —

णकारः। "तरङ्गंण।"

(तं० आ० वि० खं० 12, पृ०, 202)

तर्कः — ~ तार्किकाणाम्— वास्तविकस्वात्मानुभूतावप्रतिष्ठिता मायाप्रभाविताऽसद्विचारमूला वितण्डादिप्रयोगबहुलाऽवरा दर्शनशास्त्रयुक्तिः।

"गुरुदेवाग्निशास्त्रस्य ये न भक्ता नराधमाः।
असद्युक्तिविचारज्ञाः शुष्कतर्कावलम्बिनः।।
भ्रमयत्येव तान्माया ह्यमोक्षे मोक्षलिप्सया।"

(उद्ध० स्व० तं० 10, 1140-41)
(तं० आ० वि०, खं० 3, पृ०, 18)

~ अप्रतिष्ठः — सामान्यतस्तार्किकाणां तर्कयुक्तयो न सत्ये ज्ञाने प्रतिष्ठिता भवन्ति, तासां मायीयपशुजनानुभूतिमूलत्वात्। यथा—

"तर्कोऽप्रतिष्ठः' इति अप्रतिष्ठता,'

'अद्यास्मानसतः करिष्यति सतः स्थास्नूनथो नश्वरान्' इति स्वशक्तिप्रदर्शनमात्रसारतया गोमयपायसीयन्यायोपहासेन परमार्थानुपयोगिता-

'अहो धिग्व्याख्यातृग्रहमितरहेवाकभृतक-
महो तर्कस्यान्तः क्वचिदपि न लभ्यश्च विबुधैः।'

इति तत्कारित्वतद् द्वेषित्वार्ध-वैशसयोगादप्रामाणिकत्वं "वह्निर्नयस्य सलिलम्" इत्यबद्धाभिधानमात्रमत्र मा सम्भावीति.."

(ई० प्र० वि० वि०, खं० 1, पृ०, 9)

~ योगाङ्गम् — शुद्धविद्यानुकूलविमर्शरूपो यस्तर्कस्तस्याभ्यासः उत्तमयोगाङ्गतया स्वीकृतो वर्तते। तद्यथा—

"योगाङ्गत्वे समानेऽपि तर्को योगाङ्गमुत्तमम्।"

(मा० वि० तं०, 17-18)

शाक्तोपायानुकूलभावनाभ्यासस्य मुख्यमेतदङ्गम्।

~ उपयोगी — यद्यपि स तर्कोऽपि न शिवं विषयीकर्तुमलम्, तस्य विकल्पज्ञानात्मकत्वाच्छिवस्य च विकल्पातीतत्वात्। परं तस्य द्वैतवासनाप्रक्षालने उपयोगः। प्रक्षालितायां तस्यामद्वैतशिवभावः स्वेनैव प्रकाशेन प्रकाशमानः सन् साक्षात्क्रियते शिवयोगिभिः। एतदेवोक्तम्—

एतदेवोक्तम् — "किं तर्केणेति चेत्, उक्तमत्र द्वैताधिवासनिरासप्रकार एवायं, नत्वन्यत् किञ्चिदिति।"

(तं० सा०, पृ०, 24)

~ व्याख्याविधौ —

"संशयनिर्णयान्तरालवर्ती भवितव्यतात्मकः प्रत्ययस्तर्कः।"

(तं० आ० वि०, खं० 11, पृ०, 173)

तर्पणम् — दीनादीनामष्टानां तर्प्याणां तृप्तिकरणम्। समयविशेषः समयदीक्षायाम्। यथा—

"दीनान् क्लिष्टान् पितॄन् क्षेत्रपालान् प्राणिगणान् खगान्। श्मशानिकं भूतगणं देहदेवीश्च तर्पयेत्।।"

(उद्ध. देवीयामलात् तं० आ० 15, 527-28)

पुत्रकदीक्षादीक्षितस्यानुशासनाङ्गभूतमेतत्।

तवर्गः — शाम्भवोपायाभ्यासे मातृकाक्रमतो ज्ञानेन्द्रियपञ्चकस्य वास्तविकस्य चिच्छक्तिप्रतिबिम्बात्मनः स्वरूपस्य साक्षात्प्रकाशको वर्णवर्गस्तवर्गः। यथा—

"तादिनान्तं घ्राणादिश्रोत्रान्तं बुद्धिकरणपञ्चकम्।"

(प० त्री० वि०, पृ०, 113)

"घ्राणादिः स्यात्तवर्गकः" (ए० प्र० खं० 2, 101)

तवर्गदेवता — नारायणी देवी। यथा—

"नारायणी तवर्गे तु" .....।।

(स्व० तं० 1, 35)

तस्करः — छद्मना प्राप्तदीक्षो वस्तुतोऽनधिकारी, अन्तरनाश्वस्तोऽपि बहिराश्वस्तत्त्वं प्रदर्शयन् धूर्तः साधकः। यथा—

"तस्करं तु विजानीयात् सिद्धिहानिं करोति यः।
नाधिकारी भवेद्वै स तन्त्रेऽस्मिन् पारमेश्वरे।।"

(ने० तं० 16. 39)

द्र० — 'ज्ञानाहरणदीक्षा' इति।

ताडनम् — बीजमन्त्रविशेषप्रयोगयुक्तः क्रियाविधिविशेषो मन्त्रोपासनाविषये। यथा—

"तदुक्तं श्रीमदुच्छुष्मतन्त्रे- "फट्कारोभयसंयुक्तं ताडने विनियोजयेत्।।" इति।

(ने० तं० उ०, खं० 2, पृ०, 75)

न सम्यक् स्पष्टीकृतोऽयं विधिष्टीकाकृता।

तामसः — पुरुषः तमोगुणप्रधानः प्राणी। यथा—

"कामक्रोधाभिभूतत्वं लोभेन च समन्वयः।।
ईर्ष्या दम्भो विषादश्च मद उन्माद एव च।
निद्रालस्यमकर्मित्वं दौर्मेध्याज्ञानिते तथा।।
अधर्मताऽबुद्धिमत्त्वं नास्तिक्यं छलचित्रता।
तमः चिह्नानि चैतानि दृश्यन्ते यत्र मानवे।।
तामसः स तु विज्ञेयः पुरुषः कलुषाशयः।"

(स्व० तं०, 12. 70-73)

तारः — वैदिकः प्रणवः। यथा—

"तारः प्रणवः।"

(तं. आ. वि., खं. 97, पृ., 209)
(तं. आ. वि., खं. 10, पृ., 135)
(तं. आ. वि., खं. 12, पृ., 186)
(तं. आ., वि. खं. 30, 23)
(तं. आ. वि., खं. 12, पृ., 200)

ताल्वधिपति — रुद्रस्ताल्वधिपतिः। यथा—

"रुद्रस्तु ताल्वधिपतिः.....।"

(पू० प्र०, खं० 1, 557)

रुद्रस्तालुस्थाने ध्येय इति।

तिथयः — ~ मातृकाक्रमे —

(1) अकारादारभ्यानुस्वारं यावत् पञ्चदश स्वराः। यथा-

"ये अकाराद्या बिन्दुपर्यन्ताः स्वराः त एव परमानन्दरूपस्य स्थितिं पूरयन्तीति तिथय उक्तः।"

(प० त्री० ल० वृ०, पृ०, 5-6)

(2) यथा खलु शुक्लपक्षे तिथयश्चन्द्रमसं पूरयन्ति तथेहापीति बोद्धव्यम्। यथा-

"तिथयः प्रतिपत्पूर्वाः पञ्चदशेति मायया।।
सूर्याचन्द्रमसौ स्वान्तश्चरन्तौ स्थितिहेतवे।

यथा विमर्शवपुषः सर्गस्याद्याः कलाः स्मृताः''।।
(अ० प्र० पं०, 38-39)

तान्त्रिकी परिभाषैषा।

तिथिप्राधान्यम् — ~ पर्वकालनिर्णये यथा-

''भग्रहयोगाभावे तिथिस्तु पूज्या प्रधानरूपत्वात्।''
(तं० आ० 28, 52)

वेलायाः प्राधान्यं तु क्वचित् क्वचिद् विशेषे काम्ये फले। मुख्यतस्तिथेरेव प्राधान्यम्। यथा-

''न च काम्यस्याकरणे स्याज्जातु प्रत्यवायित्वम्।''
(तं० आ० 28, 60)

तिमिरोद्घाटतन्त्रम् — किमप्यागमिकं शैवशास्त्रम्। यथा—

''करंध्रचितिमध्यस्था ब्रह्म पाशावलम्बिकाः।
पीठेश्वर्यो महाघोरा मोहयन्ति मुहुर्मुहुः।।
इति श्री तिमिरोद्घाटप्रोक्तनीत्यनुसारतः।।''
(शि० सू० वि०, वृ०, पृ०, 4)

तिरोधानम् — (1) स्वशक्तिरूपया मायया वास्तविकस्य स्वस्वरूपस्याच्छादनमनुरूपतया च स्वयमवभासनं शिवस्य। यथा—

''मायापरिग्रहवशाद् बोधो मलिनः पुमान् पशुर्भवति।
कालकलानियतिवशाद् रागाविद्यावशेन सम्बद्धः।।''
(प० सा०, 16)

(2) शिवात्मकस्य प्राणिनां वास्तविकस्य स्वरूपस्य माययाऽऽच्छादनं परमेश्वरकृतम्। यथा—

''मायाशक्तिः पुनरचिद्रूपे शून्यादौ प्रमातृताभिमानं प्ररूढं दधती भावानपि चिन्मयान् भेदेनाभिमानयन्ती सर्वथैव स्वरूपं तिरोधत्ते, आवृणुते, विमोहिनी सा।''
द्र० (ई० प्र० वि०, खं० 2, पृ०, 203)
द्र० (ई० प्र० वि० वि०, खं० 3, पृ०, 277-78)

~ कर्मणो भिन्नम् — तिरोधानं शिवेच्छाधीनम्। कर्म च पौरुषयत्नादिसिद्धम्। कर्मफलं केवलं जातिरायुर्भोगश्चेति। तिरोधानफलमधोऽधःपातः। कर्म तावन्नियतिमुखप्रेक्षि, तिरोधानं तु न तथा, यतः शिवस्वातन्त्र्यायत्तम्। यथा—

''यत् किल पारमेश्वरसमयमङ्गीकृतवतोऽप्यन्तस्तद्विषयं द्वेषकालुष्यं तत् कर्मानपेक्षयैव शुद्धया परमेश्वरेच्छयैव प्रकोपापरपर्यायया भवति। तेन ये सुखदुःखे नियतिवदनावलोकिशुभाशुभबलाद् भवतस्ते धर्माधर्मनिमित्ते, ये तु शुभाशुभानुसरणमन्तरेणैव, ते परमेश्वरेच्छात एव केवलायाः। तत्र तत् कृता दुःखावाप्तिर्विलयस्तिरोधानं चोच्यते।''
(ई० प्र० वि० वि०, खं० 3, पृ०, 278-79)

~ कृत्यम् — (1) पशोरधिकाधिकगाढतरबन्धनमध्ये प्रक्षेपकं शिवस्य कृत्यम्। पिधानकृत्यम्, निग्रहकृत्यम्, विलयकृत्यम्, इत्येवं विधान्यस्य नामान्तराणि। शिवस्य पञ्चकृत्येष्वेकं कृत्यम्। यथा—

''सृष्टिसंहारकर्तारं विलयस्थितिकारकम्।
अनुग्रहकरं देवं प्रणतार्तिविनाशनम्।।'' (स्व. तं. 1, 3)
''प्रसिद्धेषु सृष्टि-स्थिति-संहार-तिरोधानानुग्रहकालेषु।''
(ई० प्र० वि० वि०, खं० 2, पृ०, 316)

''आभासयतीति सृष्टि-स्थिति-संहार-तिरोध्यनुग्रहयोग्यतयेति गम्यते।''
(तदेव, खं० 2, पृ०, 317)

(2) एतेन कृत्येन प्रभावितो दीक्षितोऽपि शिष्यः कदाचिद्-गुरुशास्त्रनिन्दादिकं कुर्यात्। यथा- ''तिरोधानमत्र न विलयरूपं मन्तव्यं, यत् कृत्यपञ्चकमध्ये आगमेषु गण्यते, दीक्षितस्यापि गुरुमन्त्रादिनिन्दनप्रायम्।''
(ई० प्र० वि०, खं० 2, पृ०, 244)

विलयकृत्यस्य लक्षणं प्रदर्शितमत्र प्रसङ्गत एव।
द्र० — **'निग्रहकृत्यम्'** इति,
द्र० — **'विलयकृत्यम्'** इति,
द्र० — **'पिधानकृत्यम्'** इति च।

~ द्विप्रकारकम् — उक्तमेतत् स्पष्टम् — यथा—

''तत्र तत् कृता (परमेश्वरेच्छाकृता जीवस्य) दुःखावाप्तिर्विलयस्तिरोधानं चोच्यते। तच्च तात्कालिकमात्रं वा कालान्तरानुबन्धि वा। पूर्वं कामान्धकत्रिपुरराक्षणादीनाम्, उत्तरं तु शिवगुरुशास्त्रसमयादिद्वेषिणां नरकपातमयम्।''
(ई० प्र० वि० वि०, खं० 3, पृ०, 279)

~ तत्फलम् — कालान्तरानुबन्धिनो विलयकृत्यस्य फलं चिरकालम् अवीच्यादिनरकपातः। तात्कालिकस्य च तत् काले एव कश्चनाधःपातो यस्मात् पुनरुद्धारोऽपि सत्वरमेव भवति। इति

द्र० — **''द्विप्रकारकम्''** इति।

~ द्विभूमिकम् — शिवः सृष्ट्यादिकृत्यत्रयं कुर्वन् मूलतः स्वस्वरूपं तिरोहितं कुर्वन्नेव तथा करोति, न हि स्वरूपतिरोधानमकृत्वैव सृष्ट्यादित्रयस्य सम्भवः। ततो मूलभूतं यत् तिरोधानं प्रथमभूमिकं तत्। तत एव सृष्ट्यादीनि त्रीणि कृत्यानि तिरोधानमयान्येव गणितान्याचार्याभिनवगुप्तपादैः। प्रचलत्सु च सृष्ट्यादिषु त्रिषु कृत्येषु शिवः कमपि पशुप्रमातारं पुनर्नितरां तिरोधत्ते येनासौ गुरुशास्त्रादावनाश्वस्तो भवन्न ज्ञानगर्तेऽधोऽधो गच्छति शिवशास्त्रादि च निन्दन् नरके पतति। तदेतत्तिरोधानं द्वितीयभूमिका सम्बन्धि।

द्र० — **''शिवायत्तम्''** इति।

च निन्दन् नरके पतति। तदेतत्तिरोधानं द्वितीयभूमिका-सम्बन्धि।

द्र०- 'शिवायत्तम्' इति।

~ न कर्मफलम्— न हि किमपि कर्म तथाविधं यस्य फलं स्वरूपतिरोधानम्। कर्मणो हि त्रिविधमेव फलम्, जातिरायुर्भोगश्चेति, न तिरोधानम्। ततस्तत् पारमेश्वर-पिधानकृत्यस्वातन्त्र्यादेव, न कर्मतः। यथा—

"न चास्य कर्ममहिमा तादृग्येनेत्थमस्तु सः।
किं हि तत्कर्म कस्माद्वा पूर्वेणात्र समो विधिः।।"

(तं० आ० 14,14)

पूर्वेणअनुग्रहेणेति। यथाऽनुग्रहः स्वातन्त्र्यात्। तथा तिरोधानमपि।

~ नियत्यनपेक्षम्— स्वात्मानं दुखामोहादि परीतमवबिभासयिषुः परमेश्वरोऽविद्या नियत्यादिनिरपेक्षमेव स्वस्वरूपं स्वयं स्वशक्त्या स्वलीलयैव च तिरोधत्तेऽणु-रूपतया चात्मानमवभासयति। तदेवं पारमेश्वरी तिरोधान-क्रिया नियत्यनपेक्षा स्वतन्त्रा। यथा—

"त्यक्त्वा तु नियमं कार्मं दुःखमोहपरीतताम्।।
बिभासयिषुरास्तेऽयं तिरोधानेऽनपेक्षकः।"

(तं० आ० 14, 6-7)

~ बाह्यलक्षणतः— अत्र संसारे प्रचलति परमेश्वरः कस्मिंश्चिज्जीवे यदा तिरोधानकृत्यं करोति तदाऽसौ जीवोऽज्ञोऽपि स्वात्मानं ज्ञानिनमिव वाचा, चेष्टया चावभासयति परप्रतारणार्थम्। एतत् तिरोधानकृत्यं कृत्यपञ्चके गण्यते। मूलभूतं तिरोधानं तु सृष्टिरेव। शिवस्य स्वस्वरूपतिरो-धानमेव जीवस्य मायायाश्च सृष्टिः। यथा—

यथा प्रकाशस्वातन्त्र्यात् प्रतिबुद्धोऽप्यबुद्धवत्।।
आस्ते तद्वदनुत्तीर्णोऽप्युत्तीर्ण इव चेष्टते।

(तं० आ० 14, 7-8)

पूर्वार्द्धेऽत्रानुग्रहकृत्यफलमुत्तरार्धे च तिरोधान-कृत्यचिह्नम्।

~ मायाकार्यभूतम्— मायाप्रभावतो दीक्षितस्यापि गुरु-शास्त्रमन्त्रादिविषयेऽविश्वासः, समयोल्लङ्घनादिकं वा। एतच्च विलयः इत्यपि परिभाषितमागमेषु। यथा—

"चतुर्थमपि विलयनामकतिरोधयनशब्देन
प्रसिद्धं तिरोधानं मायाकर्तृकमाह.....
..... ।"

(ई० प्र० वि० वि०,खं० 3, पृ०, 278)

~ शिवायत्तम्— स्वस्वरूपगोपनपूर्वकं सृष्टि-स्थिति-संहारकरणं शिवकर्तृकमेव। यथा—

"एवं त्रीणि सृष्टयादीनि कृत्यानि तिरोधानरूपाणि प्रतिपाद्य .....।"

(ई० प्र० वि० वि०,खं० 3, पृ०, 278)

द्र०- 'निग्रहकृत्यम्' इति

द्र०- 'विलयकृत्यम्' इति च

तिरोधानशक्तिः— परमस्य शिवस्यासौ शक्तिर्ययाऽसौ स्वकीयां परशिवतां निगूह्य स्वयं जीवरूपतयाऽऽविर्भवति, प्रसरति च तथा संसृतिचक्रेषु।

(२) परमेश्वरस्य सा शक्तिर्ययाऽसौ पशुप्रमातॄन् सततगत्या विषयोपभोगे एव निरतान् तत्रैव स्थापयंति सुचिरम्, यया ते संसृतिचक्रे पुनः पुनर्जायन्ते म्रियन्ते च दुःखसहस्रभाजनानि च भवन्ति। बहुधा ते तिर्यग्योनिष्वपि संसरन्ति, नरकेष्वपि वा पतन्ति। यथा—

"पशुप्रमातॄणां तु परमेश्वरतिरोधानशक्तिः संसरणहेतुरेव येन एते स्वस्वरुपाप्रथनात् शुभाशुभकर्मनिरताः सुखदुःखादिभोगभाजः पुनः पुनः अस्मिन् संसरन्ति।"

(प० सा० वि० पृ०, 29)

तिरोभावः— तिरोधानकृत्यस्य फलम्—

(1) असंवृत्तस्वरूपसाक्षात्कारोऽपि दाम्भिकतयाऽऽत्मानं साक्षात्कारिणमिव वचोभिश्चेष्टाभिश्च प्रदर्शयञ्जनः तिरोभावपात्रतां यातः इति। तिरोभावस्य तदिदं मुख्यं चिह्नं ज्ञानविज्ञानदम्भः। यथा—

"अनाभासितरूपोऽपि तदाभासितयेव यत्।।
स्थित्वा मन्त्रादि सङ्गृह्य त्यजेत् सोऽस्य तिरोभवः"

(तं० आ० 13, 120-121)

(2) दीक्षामासाद्यापि पश्चान्मन्त्रादिजपादावरुचिर्द्वितीयं तिरोभावचिह्नम्। तथाविधेन तिरोभावेन युक्तो जनः मन्त्रादिजपादिकं कुर्वन्नपि तत्रानाश्वस्तो भवति। तस्यासौ मन्त्रादिसाधना निष्फलैव। ततः गुरुशास्त्राद्यवहेलननिन्दना-दिकमपि चिह्नपरम्परायां तिरोभावस्य प्ररोहे। गुरुशास्त्रादि-निन्दनं च नरकादौ पातयति तिरोभूतम्। यथा—

"कश्चिदीशेच्छया सम्यगनाश्वस्तेन चेतसा
निन्दन्नेव भजंश्चर्यां स तिरोहित उच्यते।।
निन्द्यमाने महामन्त्रविद्याचर्यादिकोपजम्।
पाप मेवां पातयेद्घोरे यातनाध्याम्नि सर्वथा।।'

(तं० व० धा० 3, 36-37)

(3) दीक्षितस्यापि गुरुशास्त्रादिनिन्दकत्वं यत् तत् परमेश्वरकृततिरोभावजन्यमेव। दम्भेन मन्त्राराधनमपि तिरोभावजन्यम्। यथा—

"यथा हि प्रकाशस्वातन्त्र्यात् प्रबुद्धोऽपि मूढवच्चेष्टते, हृदयेन च मूढचेष्टां निन्दति, तथा मूढोऽपि प्रबुद्धचेष्टां मन्त्रा-राधनादिकां कुर्यात्, निन्देच्च।"

(तं० सा० पृ०,126)

(4) शैवे शास्त्रे यस्य श्रद्धा चेतसि नास्ति परं तथापि यो दाम्भिकतया श्रद्धाप्रदर्शनं कुर्वन् शैवात् सदगुरोर्दीक्षामासादयति स नैव सिद्धिं लभते। शैवाध्वनि तथा या प्रवृत्तिरसौ तिरोभावस्यैव प्रकारविशेषः। यथा—

"तिरोभावप्रकारोऽयं यत्तादृशि नियोजितः।
गुरौ शिवेन तद्भक्तिः शक्तिपातोऽस्य नोच्यते।।"

(तं० आ० 13, 311)

"अनाभासितरूपोऽपि तदाभासितयेव यत्।
स्थित्वा मन्त्रादि संगृह्य त्यजेत् सोऽस्य तिरोभवः।।"

(तं० आ० 13, 120-121)

"परविप्रलम्भाय दाम्भिकतया भक्तिश्रद्धाप्रदर्शनेनानाभासितरूपतयेव स्थित्वा शैवशास्त्रोक्तं मन्त्रादिसम्यग्दीक्षादिपूर्वं गृहीत्वा पश्चादादराभावाद् यत्त्यजेत् सोऽस्य तिरोभवः।"

(तं० आ० वि०,खं० 8, पृ०, 81)

~ लक्षणान्तरतः— **तिरोभावपात्रतां यातः सन् साधकः प्राप्तदीक्षोऽपि समयोल्लङ्घनं (नियतानुशासनभङ्गं) करोति; मनसा गुरुं शास्त्रं वा निन्दति, योगादिक्रियां कुर्वन्नपि हृदयेन तां निष्फलां मन्यमानो निन्दति। एतानि चिह्नानि तिरोभावस्य। यथा—**

"अन्योऽपि च तिरोभावः समयोल्लङ्घनात्मकः।"

(तं० आ० 14, 18)

उपलक्षणमत्र समयोल्लङ्घनमन्येषामपि लक्षणानाम्।

तिरोभूतेऽप्यनुग्रहः— (1) पारमैश्वर्यक्रीडायां तिरोभूतोऽपि पुनरनुगृह्यते शिवेन, क्रीडार्थमेव। यथा—

"स्वातन्त्र्याच्च महेशस्य तिरोभूतोऽप्यसौ स्वयम्।
परद्वारेण वाभ्येति भूयोऽनुग्रहमप्यलम्।।"

(तं० आ० 14, 20)

वस्तुतः तिरोभावोऽपि क्रीडैवानुग्रहोऽपि तथा।

(2) कदाचित्तिरोभूतो जनः मरणान्तरमपि पुनरनुग्रहपात्रतां याति गुरुकृपया। यथा—

"तिरोभूतः परेतासुरपि बन्धुसुहृद्गुरून्।
आलम्ब्य शक्तिपातेन दीक्षाद्यैरनुगृह्यते।।"

(तं० आ० 14, 22)

असौ जालप्रयोगदीक्षया मोक्षोन्मुखः कार्यते गुरुणा।

तिरोहितिः— तिरोधानम्। विलयः। शिवकृतं तिरोधानं येन प्राप्तदीक्षोऽपि शिष्यश्चर्यामाचरन्नपि मन्त्रादिनिन्दां करोति, गुरौ न विश्वसिति, चर्यां च निष्फलां मन्यते।

द्र०- **'तिरोभावः'** इति।

तिर्यक्प्राणिनः — पशुपक्षिमृगाद्याः क्षुपान्ताः।

~ अभ्युदयस्तेषाम्— **पशुपक्षिमृगादीनां स्थावराणां च शिवाद्यायतनेषु मृतानामभ्युदये जाते ते तेषु तेषु लोकेषु तिर्यग्भावमेव हि प्रथमं लभन्ते स्थावरत्वं वा। परं ततः क्रमेणाध्यात्मिकी प्रगतिस्तेषाम्। सूचितमेतद् यथा—**

स्थावराद्यास्तथाभावमुत्तरोत्तरतां च वा।।
प्रपद्यन्ते न ते साक्षाद् रुद्रतां तां क्रमात् पुनः।
हंसकारण्डवाकीर्णे नानातरुकुलाकुले।।
इत्येतदागमेषूक्तं तत एव पुरे पुरे।

(तं० आ० 28, 249-251)

~ मुक्तिभाजः— **शैवदर्शनानुसारं तिर्यञ्चोऽपि सति शक्तिपाते दीक्षाधिकारितां मोक्षापात्रतां च लभन्ते। यथा—**

"येऽपि तदात्मत्वेन विन्दुः पशुपक्षिसरीसृपादयः स्वगतिम्। तेऽपि पुरातनसंबोधसंस्कृतास्तां गतिं यान्ति।"

(प० सा०,71)

तिलकम्— मण्डले लिखितो बिन्दुः। यथा—

"तिलकमिति बिन्दुमात्रकम्।"

(तं० आ० वि० खं०,12, पृ०, 237)

द्र०- **(तदेव, पृ०, 201) इति।**

तिलकशास्त्रम्— इदानीमलभ्यं किमपि शास्त्रमुल्लिखितमभिनवगुप्तेन। यथा—

"तिलकशास्त्रेऽयं भावः।"

(प० त्री० वि०, पृ०, 235)

तीर्थमृत्यृफलम्— शिवायतनादन्येषु नदीनदप्रस्रवणादिषु तीर्थेषु शरीरत्यागे मुक्तिरेव लभ्यते। स्वर्गादिसौख्यमयी न मुक्तिः। भुक्तिप्रदाद् भुवनात् पुनर्मर्त्यलोके जन्म भवति। यथा—

"नदी नद ह्रदप्रायं यच्च पुण्यं न तन्मृतौ।
उत्कृष्टं तन्मृतानां तु स्वर्गभोगोपभोगिता।।"

(तं० आ० 28, 277)

परं काशीसुरेश्वरी क्षेत्रादौ मृताः क्रमेण मुक्तिमेव लभन्ते न पुनरावृत्तिम्। यथा—

"श्रीकामिकायां कश्मीरवर्णने चोक्तवान् विभुः।

(तद् ग्रन्थमेव पठति)—

सुरेश्वरी महाधाम्नि ये म्रियन्ते च तत्परे।।
ब्राह्मणाद्याः सङ्करान्ताः पशवः स्थावरान्तगाः।
रुद्रजातय एवैते इत्याह भगवाञ्छिवः।।"

(तं० आ० 8, 213-214)

तीव्रतीव्रः ~शक्तिपातः—

द्र०- **'शक्तिपातः'** ~ तीव्रतीव्रः इति।

तीव्रमध्यः ~ शक्तिपातः—

द्र०- **'शक्तिपातः'** ~ तीव्रमध्यः इति।

तीव्रमन्दः ~ शक्तिपातः

द्र०- **शक्तिपातः** ~ तीव्रमन्दः इति।

तुटयः— (1) भिन्नभिन्नपरिमाणाः कालभागाः। यथा—

"तुटयः षोडशैवोक्ताः कालस्य करणं तु ताः।
तदादिः संस्थितः कालः सर्वं चरति वाङ्मयम्।।
तुटिर्लवो निमेषश्च काष्ठा चैव कला तथा।
मुहूर्त्तश्चाप्यहोरात्रः पक्षो मास ऋतुस्तथा।।
अयनं वत्सरश्चैव युगं मन्वन्तरं तथा।
कल्पश्चैव महाकल्पः .....।।"

(स्व० तं० 4, 282-284)

~ योगाभ्यासक्रमे— **योगाभ्यासे परतवसाक्षात्कारस्य भिन्नभिन्नानि सोपानानि। तत्र प्रथमा तुटिरनुत्तर शिवभावसाक्षात्कारमयी, द्वितीया शक्तावेशाविष्टशिव भावमयी।**

तृतीया सदाशिवभावानुभूतिमयी मन्त्रमहेश्वरत्वभोगप्रदा। चतुर्थी चैवमैश्वरदशासाक्षात्काररूपा मन्त्रेश्वरत्वानुभूतिमयी। पञ्चमी पुनर्मन्त्रत्वानुभूतिमयीत्येष एतासामवतरणक्रमः। एतास्तुटयस्तत्तदैश्वर्यभोगप्रदाः, विहाय प्रथमां तुटिम्। तस्यां सर्वथाऽनुत्तरस्वभावायां को भोगः, को भोक्ता, किं भोग्यम्। यथा—

"एवं मन्त्रमहेशतुटेः प्रभृतिस्तत्तदभ्यासात् तत्तत् सिद्धिः।"

(तं० सा० पृ०, 105)

तुटिः~कालभागः— सूक्ष्मतरः कालभागः मानुषाक्षिनिमेषस्य चतुर्थोऽशस्तुटिः, क्षणद्वयं तुटिः। यथा—

"मानुषाक्षिनिमेषस्याष्टमोऽशः क्षणः स्मृतः।
क्षणद्वयं तुटिर्ज्ञेया ..... ।।"

उद्ध०- (स्व० तं० 11,201)
(तं० आ० वि०,खं०7, पृ०,129)

~ तन्न्यूनता— तीव्रतरया गत्या प्रसरत्स्वाभासेषु त्वरित- तरा कालगतिः। यथा—

"विकल्पन्यूनत्वे तु तुटिन्यूता सुखादिसंक्तिविव।"

(तं० सा० पृ०,103)

~ प्राणचारे— प्राणपानयोर्मार्गे सपादाङ्गुलद्वयपरिमितं स्थानं तुटिः सर्वस्य स्वाङ्गुलपरिमाणेन। यथा—

(क) "सपादमङ्गुलद्वयं तुटिः उच्यते।"

(तं० सा० पृ०,48)

(ख) "तुटिःसपादाङ्गुलयुक् प्राणस्ताः षोडशोच्छ्वसन्।"

(तं० आ० 6,64)

प्राणचार एव सूक्ष्मकालभागविशेषोऽन्यथा परिदृष्टः। यथा—

"तुटिश्चषकषड्भागरूपस्य प्राणापानवाहस्य द्वात्रिंशत्तमोऽंशः"।

(स्वं त० उ० पृ०4, पृ०, 146)

~ रहस्ययोगक्रमे— विषयदर्शनोन्मुख्यं, दिदृक्षा, निर्विकल्पकं दर्शनं, विकल्पात्मकं ज्ञानम्, प्रमात्मकतया स्वात्मनि विश्रमणं ज्ञानस्येत्येवं प्रायाः ज्ञानपरम्पराक्षणा अपि तुटिशब्देनोक्ताः शास्त्रेषु। एतेषु ज्ञानक्षणेषु सृष्ट्यादिकृत्यभावनया शिवभाव- समावेशः सिद्धो भवति। यथा—

"नीलादिदिदृक्षारूपातुटिपातापरपर्यायाः दश उदिताः"। इत्यादि

(स्पं० सं० पृ०,7)

~ साक्षात्कारक्रमे— आत्मसाक्षात्कारस्य स्फुटतयोद्द्योतनक्रमे विशेषविशेषसोपानरूपा स्थितयस्तुटयः। तत्रैव तुटिपरिवर्तस्तुटिपात इत्युक्तः सिद्धैः।

द्र०- 'तुटयः' (2) इति।

यथा—

आद्या तुटिः सर्वतः पूर्णा द्वितीया सर्वज्ञानकरणाविष्टाभ्यस्यमाना सर्वज्ञत्वसर्वकर्तृत्वाय कल्पते, न त्वाद्या। यदाह श्रीकल्लटः—

—तुटिपात इत्यत्र पातशब्दम्। सैव भगवती श्रीमत्काली मातृसद्भावो भैरवः, प्रतिभा इत्यलं रहस्यारहस्यनेन।"

(तं० सा० पृ०, 104,105)

~ सृष्टिक्रमे— जगत्सृष्टेरत्यन्तास्फुटत्व-अस्फुटत्व किञ्चित्स्फुटत्व-स्फुटत्व-स्फुटतरत्वादिक्रमः। तत्रौन्मुख्यं सृष्टेः प्रथमा तुटिः, इच्छा द्वितीया शक्तितत्त्वमयी, ज्ञानं तृतीया सादाख्यतत्त्वमयी, क्रिया चतुर्थीश्वरतत्त्वमयी, विद्या पञ्चमी शुद्धविद्यामयीत्येवमादिरूपः क्रमोऽयं गण्यते तुटिभिः। यथा—

"यदा तु तस्य चिद्धर्मविभवामोदजृम्भया।।
विचित्ररचनानानाकार्यसृष्टिप्रवर्तने।
भवत्युन्मुखिता चित्ता सेच्छायाः प्रथमा तुटिः।।"

(शि० दृ०,7-8)

"औन्मुख्यस्य य आभोगः स्थूलः सेच्छा व्यवस्थिता।"

(शि० दृ०, 17)

"तस्या **(इच्छायाः)** पूर्वापरौ भागौ कल्पनीयौ पुरा हिया। तत्कर्मनिवृतिप्राप्तिरौन्मुख्यं तद्विकासिता।।"

(तदेव, 19-20)

"विकासिताचिदास्थाप्रविकास इति"।

(शि०. दृ०,वृ० पृ०, 17)

सा तुटिः सूक्ष्मकालपरिच्छिन्नः इच्छाप्रथमभागः"।

(तदेव, पृ०, 10)

तुटिपातः— साक्षात्कारक्षणपरम्परायामधोऽधोऽवतरणम्। स्वात्मदर्शने सर्वोत्तीर्णायाः अनुत्तरायाः स्थितेर्यः साक्षात्कारोऽसौ तत्र प्रथमा तुटिः, ततोऽवतीर्य परतत्त्वस्य परमेश्वरतात्मिकायाः सर्वशक्तिमत्ताया यो विमर्शोऽसौ द्वितीया तुटिस्तत्र। तस्यामवतार एव हि तुटिपातः। स एव हि शक्तिमच्छिवभावः। ततोऽप्यवतीर्य मन्त्रमहेश्वरत्वादिस्थितेः साक्षात्कृतिः। यथा—

"एका तु सा तुटिस्तत्र पूर्णा शुद्धैव केवलम्।।
द्वितीया शिवरूपैव सर्वज्ञानक्रियात्मिका।
तस्यामवहितो योगी किं न वेत्ति करोति वा।।
तथा चोक्तं कल्लटेन श्रीमता तुटिपातगः।
लाभः सर्वज्ञकर्तृत्वे तुटेः पातोऽपरा तुटिः।।
आद्यायां तु तुटौ सर्वं सर्वतः पूर्णमेकताम्।
गतं किं तत्र वेद्यं वा कार्यं वा व्यपदेशभाक्।।
अतो भेदसमुल्लासकलां प्राथमिकीं बुधाः।
चिन्वन्ति प्रतिभां देवीं सर्वज्ञत्वादिसिद्धये।।
सैव शक्तिः शिवस्योक्ताः तृतीयादितुटिस्तथा।
मन्त्रादिनाथतच्छक्तिमन्त्रेशाद्याः क्रमोदिताः।।"

(तं० आ० 10, 206-211)

प्राथमिकीं भेदकलामिति शक्तिमच्छिवभावरूपाम्।

~ शाम्भवे— शाम्भवादियोगेन साक्षात्करणीयं स्वस्मात् परिपूर्णादनुत्तरपदात् शिवपदेऽवतरणम्। तत्रैव पदे सर्वशक्तिमत्त्वमयं परमेश्वरत्वमिव्यज्यते, न त्वनुत्तरे, तत्र तदपि तावदनुत्तरपदे लीनमिव तिष्ठति। यथा—

"तथावधानातिशयरूढेः सहसैव सर्वज्ञता भूमिरसङ्कुचित-

परमार्था अकृत्रिमतद्रूपा अधिशय्यते एव ....यदाहुः श्री कल्लटपादाः - 'तुटिपातेसर्वज्ञत्व सर्वकर्तृत्वलाभः इति।

(प० त्री० वि०, पृ०,103)

तुम्बुरुदेवः— शैवे बहिर्यागे पूजनीयो देवविशेषः। यथा—

"बर्हियागे क्रमान्तरेणापीत्याह—
"पङ्क्तिष्ठा वा यजेद् देवीर्मध्ये देवञ्च तुम्बुरुम्।
सर्वाः श्रियः समाप्नोति साधकः संयतेन्द्रियः"।।

(ने० तं० भा०1, पृ०, 250)

तुम्बुरुनाथ एवायम्।

तुम्बुरुनाथः— वैष्णवेषु दर्शनेषु स्वर्गे गायको गन्धर्वविशेषः। शैवेषु दर्शनेषु मण्डलदेवताविशेषः। यथा—

"सर्वदिक्षु स्थिता देव्यः पूर्वादौ दूत्य एव च।
आग्नेय्यादि विदिक्ष्वेवं किङ्करा द्वारदेशतः।।
जम्भनी मोहिनी चैव सुभगा दुर्भगा तथा।
दूतयस्तु समाख्याताः किङ्करान् शृण्वतः परम्।।
क्रोधनो वृन्तकश्चैव गजकर्णो महाबलः।

(तुम्बुरुनाथस्य)

सव्यापसव्ये गायत्रीं सावित्रीं च निवेशयेत्।
अध-ऊर्ध्वेङ्कुशं मायां विन्यसेत्तदनन्तरम्।।"

(ने० तं० 11,8-10)

तुरीया ~ दशा— स्वस्वरूपप्रकाशमयी शुद्धविद्यात्मिका दशा।

द्र०- **'तुर्या'** इति।

~ संवित्— सकलजगत्सृष्टिसंहाराद्याधारभूता शुद्धा पारमेश्वरी संवित्। यथा—

"सृष्टिस्थितिसंहारमेलनारूपा इयं तुरीया संविद् भट्टारिका तत्तत्सृष्टयादिभेदान् उद्वमन्ती, संहरन्ती च, सदा पूर्णाक कृशा च उभयरूपा च अनुभयात्मा च, अक्रममेव स्फुरन्ती स्थिता।"

(प्र० ह०, पृ०, 20)

तुर्यनाथः— चतुर्थे युगे (कलौ) कुलमार्गप्रवर्तकत्वेन चतुर्थयुगनाथत्वेन च मत्स्येन्द्रनाथस्तुर्यनाथः। यथा—

"तदवतारकं तुर्यनाथमेव तावत् प्रथमं कीर्त्तयति।"

(तं० आ० वि० खं०1, पृ०,24)

तुर्यरसासेचनम्— शिवयोगी जाग्रदादीनां तिसृणामपि दशानामाद्यन्तकोटिषु तुर्यानन्दचमत्कारं साक्षात्कुर्वंस्तेनैव ताः दशाः व्यापयंस्तास्तुर्यरसात्मकतामेवापादयति। तथा कृते व्यवहारोऽपि तस्य कृते परमार्थायते, संसारोऽपि च मोक्षायते। यथा—

"त्रिष्वपि पदेषून्मेषोपशान्त्यात्मकाद्यन्त कोट्योः परिस्फुरता तुर्यरसेन मध्यदशामप्यवष्टम्भयुक्त्या व्याप्नुयात् येन तन्मयी भावमाप्नुयात्।"

(शि० सू० वृ०, 3,20)

तुर्या ~ दशा— (1) जाग्रदाद्यपेक्षयाऽऽरोहक्रमे चतुर्थी दशा। असौ दशा यस्यां स्वात्मा स्वेनैव चित्प्रकाशेन प्रकाशमानः सन्नपरोक्षसाक्षात्कारविषयतामायाति स्वयम्। तस्यां दशायां विद्यमानाः विज्ञानाकलाः, विद्येश्वराः (मन्त्राः), मन्त्रेश्वराः, मन्त्रमहेश्वराः, प्रमातारः, उत्तरोत्तरमुत्कृष्टोत्कृष्टतरां तुर्यां भजन्ते। उदानाख्यः प्राणस्तुर्यदशायां विजृम्भते। उत्तरोत्तरभेदावभासविगलनमयी दशैषा। यथा—

"मध्योर्ध्वगाम्युदानाख्यस्तुर्यगो हुतभुङ्मयः।
विज्ञानाकलमन्त्रेशः .....।।"

(ई० प्र०,3-2-20)

"यदा तु सा प्राणनावृत्तिर्वाभदक्षिणमार्गौ खिलीभावयन्ती, मध्यरूपेणोर्ध्वेन प्रवहति, तदा तत्तप्रवहणं सकलस्य भेदस्याभेदसारतादानलक्षणं विलापनमाश्यानस्येव सर्पिषो विदधती उदानवृत्तिर्विज्ञानाकलादारभ्य सदाशिवान्तं सा च तुर्यात्मिका दशा।"

(ई० प्र० वि०, खं० 2, पृ०, 247)

(2) यदा शून्यादिदेहधात्वन्तं सर्वमपि प्रमेयदशा प्रक्षिप्तं शरीरादि घटादि च शुद्धसंविदात्मकस्वात्मशिवरूपतया दृश्यमानं सत् तद्रूपतामापाद्यत इव तदासौ तदनुकूला स्वात्मविमर्शमयी दशा तुर्याख्या कथ्यते। यथा—

"यदा तु परामृष्टनित्यत्वव्यापित्वादिधर्मकैश्वर्यघनात्मनाऽहम्भावसिद्धरसेन शून्यादिदेहधात्वन्तं, प्रमेयत्वात् तच्च्यवते इव, तदा तुर्यदशा"

(ई० प्र० वि० वि०,खं० 3, पृ०, 328)

पारमैश्वर्यमण्डितेन चिद्रूपेणैवास्यां दशायामवस्थानं भवति। न केवलमैश्वर्यहीनशुद्धचिन्मात्रतयेति तात्पर्यम्।

(3) शुद्धसंविन्मयतायामसौ स्थितिर्यस्याः प्रकाशे त्रयमपि जाग्रदादि भाति। या च त्रिष्वप्यनुस्यूता सती त्रयमप्येतत् प्रकाशयति सा तुर्या दशा।

यथा—

"त्रयस्यास्यानुसन्धिस्तु यद्वशादुपजायते।
स्रक्सूत्रकल्पं तत्तुर्यं सर्वभेदेषु गृह्यताम्।।"

(तं० आ० 10,296)

(4) उपरि स्वैश्वर्यसाक्षात्कारविहीनापि शुद्धप्रकाशमात्ररूपा विज्ञानाकलदशापि तुर्यमध्ये गणिता। सा तु तुर्यदशोन्मेषमात्ररूपा तुर्योन्मुखी सुषुप्तिरेवेति वेद्यं सुधीभिः यथा—

द्र०- (ई० प्र०, 3-2-11)

~ अभिधानान्तरतः— **तुर्यां योगिनो रूपातीतमिति ज्ञानिनश्च प्रचयः इति वदन्ति। यथा—**

"प्रचयो रूपातीतं च सम्यक् तुर्यमुदाहृतम्"।

(तं० आ० वि० खं० 7, पृ०, 186)

उद्ध० (मा० वि० तं०)

~ तत्त्वभेदने— **तत्त्वभेदनप्रक्रियाभ्यासे प्रयुज्यमानासु पञ्चावस्थासु तुर्याऽपरोक्षज्ञानमयी सा दशा येतरापेक्षया शुद्ध स्वात्मविमर्शबहुला। भिन्नभिन्नप्रकारे तत्त्वभेदनक्रमे भिन्नभिन्नैव**

स्थितिर्जाग्रदादितुर्यातीतान्ता परिगण्यते। ततः पाञ्चदश्यादौ द्रष्टव्योऽयं विषयो विस्तरतः।

द्र०- 'अवस्थाभेदविस्तरः' इति।

~ एकादशात्मकत्वे— तत्र तुर्यामन्त्रमन्त्रेश्वर-मन्त्रमहेश्वरास्तेषां च शक्तयः त्रयोदशात्मक इव। यथा—

" ..... तुर्याद्यत्र च पूर्ववत्।"

(तं० आ० 10, 304)

तत्त्वभेदप्रक्रियायां दशाविभागो भिन्नभिन्नप्रकारतया भावनाविषयतां नीयते इति विग्रष्टव्यं सुधीभिः। तत एवात्र विज्ञानाकला न गणिताः।

द्र०- 'अवस्थाभेदविस्तरः' इति।

~ त्रयोदशात्मके— मन्त्राद्यास्त्रयः प्रमातृवर्गास्तेषां च शक्तयः।

द्र०- 'अवस्थाभेदविस्तरः' इति।

~ त्र्यात्मकभेदे—

द्र०- 'तुर्या' ~ मन्त्रमहेश्वरे इति।

द्र०- 'अवस्थाभेदविस्तरः' इति।

~ नवात्मकभेदे—

द्र०- 'तुर्या'~ विज्ञानाकले इति।

द्र०- 'अवस्थाभेदविस्तरः' इति।

~ पञ्चविधत्वे—

द्र०- 'तुर्या' ~ मन्त्रेश्वरे इति।

द्र०- 'अवस्थाभेदविस्तरः' इति।

~ पाञ्चदश्ये— मन्त्रैः मन्त्रेश्वरैः मन्त्रमहेश्वरैस्तेषां शक्तिभिर्वेद्यत्वमनुस्यूतत्त्वं चात्र तुर्यरूपत्वम्। यथा—

"मन्त्रादितत्पतीशानवर्गस्तुर्य इति स्मृतः।।"

(मा० वि० तं० 2,28)

"..... तुर्यं मन्त्रादि वर्गभाक्"।

(तं० आ० 10, 303)

द्र०- 'अवस्थाभेद विस्तरः' इति।

~ प्रलयाकले—

द्र०- 'तुर्या' ~ एकादशात्मके इति।

~ मन्त्रमहेश्वरे— इच्छाशक्तिः शिवस्य।

द्र०- अवस्थाभेदविस्तरः इति।

~ मन्त्रे— क्रिया शिवस्य क्रियाशक्तिः।

द्र०- 'अवस्थाभेदविस्तरः' इति।

मन्त्रेश्वरे— शिवस्य ज्ञानशक्तिः।

द्र०- 'अवस्थाभेदविस्तरः' इति।

~ विज्ञानाकले— मन्त्रमहेश्वरस्तच्छक्तिश्च।

द्र०- 'अवस्थाभेदविस्तरः' इति।

~ (शिवतत्त्वे)— उक्ता यथा—

शिवस्यानन्दशक्तिरूपता तत्र तत्त्वे तुर्या दशा, तस्याः इच्छा दावोतप्रोतभावेन स्थितत्त्वात्तासामनुसन्धिकारित्वाच्चेति।

द्र०- 'अवस्थाभेदविस्तरः' इति।

~ सप्तात्मके— द्र०- 'मन्त्रे' इति।

द्र०- 'अवस्थाभेदविस्तरः' इति।

~ तद्भागिनः (प्रमातारः)— मुख्यास्तावद्विज्ञानाकल-मन्त्रमन्त्रेश्वरमन्त्रमहेश्वरशाक्तशाम्भवाः।

अवान्तराश्चैषां विश्लेषणतः सुप्रभूताः भेदाः। यथा—

"ततश्च सुप्ते तुर्ये च वक्ष्यते बहुभेदता।"

(तं० आ० 9, 97)

~ तद्भेदत्रयम्— यद्यपि तुर्यायामात्मैव प्रकाशते तथापि तस्या उदयो जाग्रदादिदशा सम्पृक्ततयैव समुदेति योगिनाम्। ते हि कदाचिज्जाग्रद्दशातस्तुर्ये सङ्क्रामन्ति, कदाचित् स्वप्नदशातः कदाचिच्च सुषुप्तितः। तदनुसारं—योगिनस्त्रिभिः पारिभाषिकैर्नामभिरेतां व्यवहरन्ति। तानि च नामानि मनोन्मनम्, अनन्तं, सर्वार्थमिति। यथा—

"जाग्रदाद्यास्तु संभाव्यास्तिस्रोऽस्याः प्राग्दशा यतः।।
त्रितयानुग्रहात् सेयं तेनोक्ता त्रिकशासने।
मनोन्मनमनन्तं च सर्वार्थमितिभेदतः।"

(तं० आ० 10, 276-277)

~ तद्विशेषता— देहे तिष्ठन्नपि साधकः तुर्यदशायाः सोपानभेदे ईश्वरसदाशिवादितुल्यमैश्वर्यं स्वस्य साक्षात्कुरुते। यथा—

"अहमित्येकरसेनानुवेधे तु यदेदन्ताऽऽच्छादिता भवति भावना सात्म्यादीश्वरसदाशिवसंविदीवतुर्यदशायां रसविद्धताम्र-कनकन्यायेन, यदा वा सर्वथैवप्रध्वंसिता विद्राविता वा भवति तुर्यातीतदशायां शाक्त संविदीव तन्निजरूपसम्यग् विधकनकरूपजात्यन्तजरणापादित तत्संस्कारवशपीतलतावशेषविद्रुत-रसन्यायेन; तदा पूर्णस्वातन्त्र्योल्लास एव देह एव सत्यपि निःशेषविभूतिलाभात् सदाशिवादिशरीरवत्'।

(ई० प्र० वि० वि०, खं० 3, पृ०,348)

अत्र पीतलतेति पदं विमृश्यं सुधीभिः। कदाचित् 'पीततां इत्येव स्यात् पाठः शुद्धो लकारश्च लेखक प्रमादयफलं स्यात्।

~ योगसिद्धौ— मितप्रमातृताविमर्शादुत्तीर्णा प्रमात्मक-विमर्शमयी दशा। प्रमातृमात्रतायां प्रमाणन्प्रमेयौदासीन्यम्। अत्र तु तद्विगलनेनौदासीन्यपरिच्युतेः पूर्णात्मकस्वशक्ति समावेशरसः स्फुटतया प्रकाशते विमृश्यते च। यथा—

यत्तु प्रमात्मकं रूपं प्रमातुरुपरि स्थितम्।।
पूर्णतागमनौन्मुख्यमौदासीन्यात् परिच्युतिः।
तत्तुर्यमुच्यते शक्तिसमावेशो ह्यसौ मतः।।"

(तं० आ० 10, 265)

तुर्यातीतम्— (1) पूर्णानवच्छिन्नानन्दनिर्भरमसीमपरिपूर्ण-चिन्मयत्वम् परशिवतापदम्। यथा—

"यत्तु पूर्णानवच्छिन्नवपुरानन्दनिर्भरम्।
तुर्यातीतं तु तत्प्राहुस्तदेव परमं पदम्।।"

(तं०आ०10, 278)

(2) यत्र सर्वमपि बाह्यमाभ्यन्तरं च विश्वं प्रमाणप्रमेयप्रमात्रादि च निखिलमपि भावाभावजातं चिन्मयतायां विगलितमिवाखण्ड- संविन्मात्रतया चकास्ति तत्तुर्यातीतं सर्वथा परिपूर्ण चिद्घनं मूलतत्त्वम्। यथा—

"यत्त्वद्वैतभरोल्लासद्राविताशेषभेदकम्।
तुर्यातीतं तु तत्प्राहुः ..... ।।"

(तं० आ० 10, 297)

(3) **परिपूर्णत्वेनाद्वैतभावेन च प्रकाशमानं संवित्तत्त्वमेव तुर्यातीतं पदम्। तत एव च चतुर्णामप्यवस्थानामुदयस्तत्रैव च तासां लयः। यथा—**

"यत्वद्वैतभरोल्लासि द्राविताशेषभेदकम्।
तुर्यातीतं तु तत्प्राहुः .....।।"

(मा० वि० वा० 1, 1007)

(4) **परिपूर्णचिदानन्दैश्वर्यचमत्कारबहुला शुद्धपरिपूर्णा-नवच्छिन्नसंविन्मात्रमय्यवस्था। यथा—**

"निष्प्रपञ्चो निराभासः शुद्धः स्वात्मन्यवस्थितः।
सर्वातीतः शिवो ज्ञेयः यं विदित्वा विमुच्यते।।"

(तदेव 10, 286)

"यदा वा (इदन्ता) सर्वथैव विध्वंसिता विद्राविता वा भवति तुर्यातीतदशायां शक्तिसंविदीव तन्निजरूपसम्यग् विद्धकनकरूप-तात्यन्त जरणापादिततत्संस्कारवशपीतलतावशेषविद्रुतरसन्यायेन, तदा पूर्णस्वातन्त्र्योल्लास एव, देह एव सत्यपि निःशेषः विभूतिलाभात् सदाशिवादिशरीरवत्।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 348)

~ अभिधानभेदतः— **लोकव्यवहारे संज्ञा तुर्यातीतमिति ज्ञानिपरम्परासु च महाप्रचय इति। योगिपरम्परासु नास्य किमपि विशेषरूपमभिधानं यथा जाग्रदादीनामस्ति, एतस्य पदस्य योगधारणाभावनाद्यतीतत्वात्। यथा—**

"नात्र योगस्य सद्भावो भावनादेरभावतः।
अप्रमेयेऽपरिच्छिन्ने स्वतन्त्रे भाव्यता कुतः।।
योगाद्यभावतस्तेन नामास्मिन्नादिशद्विभुः।"

(तं० आ० 10, 276-280)

"तुर्यातीते पुनर्वक्ष्यमाणदृशा योगो न प्रतपेदिति लोक प्रसंख्यानाभिप्रायेण तुर्यातीतं महाप्रचयश्चेति संज्ञाद्वयमेवोक्तम्।"

(तं० आ० वि०,खं० 7, पृ०, 167)

~ एकादशात्मके (तत्त्वभेदननये)— **शक्तिशिवावेवात्रापि तुर्यातीतम्। यथा—**

"तुर्याद्यत्र व पूर्ववत्"

(तं० आ० 10, 304)

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ तत्त्वभेदने (सामान्यतः)— **विशेषविशेषप्रकारैव हि तुर्यातीततायाः कल्पना पाञ्चदश्यादिविधिषु तत्त्वभेदन-प्रपञ्चभूतेषु। विशेषतः शुद्धतत्त्वविषये। उपासनपरम्परा-नुसारमेवासौ भेदप्रभेदो दर्शितः आगमेषु तन्त्रालोकादौ चेति नात्रविषये मतभेदशङ्का कार्या।**

~ त्र्यात्मकभेदे— द्र०- **'तुर्यातीतम्'** ~ **मन्त्रमहेश्वरे** इति।

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ त्रयोदशात्मके— **शक्तिशिवावेवात्रापि तुर्यातीतम्। यथा—**

"तुर्याद्यत्र च पूर्ववत्"

(तं० आ० 10,304)

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ नवात्मकभेदे— द्र०- **'तुर्यातीतम्'** ~ **विज्ञानाकले** इति।

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ पञ्चविधत्वे— **शिवः एव।**

द्र०- **'मन्त्रेश्वरे'** इति।

द्र०- **अवस्थाभेदविस्तरः** इति।

~ पाञ्चदश्ये— **शक्तिशिवानुस्यूतत्वं ताभ्यां च वेद्यत्वं पाञ्चदश्ये तुर्यातीतता। यथा—**

"शक्तिशम्भूपरिज्ञेयौ तुर्यातीते वरानने।"

(मा० वि० तं० 2, 29)

"तुर्यातीतं शक्तिशम्भू .....।"

(तं० आ० पृ०, 303)

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ प्रलयाकले— द्र०- **'तुर्यातीतम्'** ~ **एकादशात्मके** इति।

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ मन्त्रमहेश्वरे— **शिवः एव।**

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ मन्त्रे— **शिव एव तत्र तुर्यातीतं पदम्।**

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ मन्त्रेश्वरे— **शिव एव तुर्यातीतं पदम्।**

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ विज्ञानाकले— **विज्ञानाकले भावनाविषयतामुपनीते सति शिवः शक्तिश्च तुर्यातीतावस्था।**

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ शिवतत्त्वे— **शिवस्य चिच्छक्तिरूपता तत्र तुर्यातीतता। तस्याः पराद्वैतमयत्वात्।**

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ परिपूर्णम् (तत्त्वभेदने)— **स्पष्टमुक्तं यथा—**

"यावद्भैरवबोधान्तः प्रवेशनसहिष्णवः।
भावा विगलदात्मीयसारा स्वयमभेदिनः।
तुर्यातीतपदे संस्युरिति पञ्चदशात्मके।"

(तं० आ० 10, 293-294)

"शिवशक्तिमात्रात्मना रूपेण परिस्फुरन्ति"।

(तं० आ० वि० खं० 7, पृ०, 199)

~ भेदरहितम्— **मूढा एव तुर्यातीते सततोदिताख्यमेकं भेदं मन्यन्ते। वस्तुतस्तस्य केवलशुद्धसुशक्तसविन्मात्ररूपत्वात्तस्मिन्न वास्तविकः कश्चिद्भेदः। यथा—**

"पूर्णत्वादेव भेदानामस्यां सम्भावना न हि।।
तन्निरासाय नैतस्यां भेद उक्तो विशेषणम्।
सततोदितमित्येतत् सर्वव्यापित्वसूचकम्।।
न ह्येक एव भवति भेदः क्वचन कश्चन।
तुर्यातीते भेद एकः सततोदित इत्ययम्।।
मूढवादस्तेन सिद्धमविभेदित्वमस्य तु।"

(तं० आ० 10, 281-283)

सततोदित एको भेदो य उक्तोऽसौ केवलन्तस्य सर्वव्यापित्वख्यापनायेति न भेदविवक्षयेति तात्पर्यम्।

तुर्यातीतता— (1) तुर्यदशायाः पर्यन्तरूपतैव तुर्यातीतता। यथा—

"तुर्य इति— एतद्दशा समापत्तिपर्यन्तरूपापि तुर्यातीतता तत्रैवोक्ता।"

(ई० प्र० वि० वि०, खं०3, पृ०,331)

~ अव्यतिरेकमयी— **असौ तु शुद्धा शिवतैव सर्वथा जगदुत्तीर्णा। असौ देहपातानन्तरमेव स्फुटतया लभ्या। यथा—**

"देहपाते त्वेकघनैव शिवतेति तदा समावेशादिव्यावहारो न कश्चिदिति।"

(ई० प्र० वि० वि०,खं० 3, पृ०, 328)

~ व्यतिरेकसंस्कारशेषा— **शून्यादिदेहसंस्कारेऽगलितेऽपि या ततः उन्मग्नता शुद्धसंविद्रूपता समावेशेनासौ व्यतिरेकसंस्कारशेषा तुर्यातीतता। समावेशविशेषप्रकारात्मिकासौ। यथा—**

".....

तदापि च शून्यादिसंस्कारोऽप्यस्ति, इति अव्यतिरेकतुर्यातीतसमता।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 328)

तत् समतैव न तदात्मकतेति। शिवतुल्यतेयं न शिवतेति तात्पर्यम्।

~ समावेशमयी— **द्र०- 'तुर्यातीता'**

~ दशा (3) इति।

तुर्यातीता ~ दशा— **(1) देहादिप्रमातृतायाः चिद्रूपतायां सम्यङ्निमज्जनेन ततः शून्यादेः प्रमेयादुन्मज्ज्य शुद्ध- चिद्रूपतायामवस्थानं तुर्यातीता दशा। यथा—**

"यदाहम्भावः स्वातन्त्र्यदिशैव व्यापित्वनित्यत्वादिपरामर्शबलात् शून्यादेः प्रमेयीकृतादुन्मज्ज्य इवास्ते, तदा तुर्यातीतता।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 327-328)

(2) यदा त्वहमिति शुद्धसंविद्रूपत्वेन परामृश्यमानोऽसौ शून्यादिदेहान्तः प्रमेयत्वेनाभासमानः पदार्थः सर्वोऽपि संविद्रूपतायां विगाल्यते इव तदापि सा दशा तुर्यातीतैव। यथा—

"यदापि विद्धोऽसौ प्राणदेहादिधातुः संविद्रसेनाभिनिविष्टोऽत्यन्तं कनकधातुरिव जीर्णः क्रियते, येन स द्रुतरस इवाभाति केवलं तत्संस्कारस्तदापि तुर्यातीतदशा सा भवति।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 328)

(3) शरीराद्युत्तीर्णे निजे वास्तविके चिदात्मके पारमेश्वरे स्वरूपे स्थितिः। सा च नित्यं परमशिवस्य। कदाचिद्भवा च ज्ञानियोगिप्रभृतीनां साधकानां सिद्धानाञ्च। यथा—

"यदा तूक्तगुरूपदेशादिदिशा तेनैवाहम्भावेन स्वातन्त्र्यात्मना व्यापकत्वनित्यत्वादिधर्मपरामर्शमात्मनि विदधता ततः शून्यादेः प्रमेयादुन्मज्ज्येवास्यते तदा तुर्यातीतावस्था।"

(ई० प्र० वि०, खं०, 2, पृ०, 230-231)

~ तद्विशेषता— द्र०- **'तुर्यादशा'** ~ तद्विशेक्ता विशेषता **इत्यत्र**

द्र०- 'अवस्थाभेदविस्तरः' इति च।

तुर्याभोगः— तुर्यं हि स्वस्वरूपाभिव्यक्तिमयी संवित्। तस्याः सततगत्या समुन्मिषत्तात्मको यः प्रबन्धः असौ तुर्याभोगः-इति।

"परिपूर्णशुद्धचैतन्यघनतासविमर्शसन्ततिरेव तुर्याभोगः।"

(शि० सू० विवृ० 1,7)

तुर्यावस्था— द्र०- 'तुर्या' ~ दशा इति।

तुलादीक्षा— तुलादीक्षाविधौ मन्त्रोच्चारपूर्वकं शिष्यः लघ्व्या पुष्पमालया सह तोल्यते। चेत् तदपेक्षया नातिभारवाँस्तदा विशोधितपाशजाल इति, चेत्ततो गुरुतरस्तदा मलमायाकर्माण्यस्य नैव शोधितानि सर्वाणीति प्रतिपद्यते। सैषा तुलादीक्षेति वा तुलाशुद्धिपरीक्षेति वा कथ्यते। यथा—

"पार्थिवदेहाभिमानन्याभावेन पराकाशरूपतामापन्नो येनायं तुलायां कुसुमसमानतामासादयेत्।"

(तं० आ० वि०, खं० 10, पृ, 211)

यदुक्तं तन्त्रराजे—

"आकाशतुल्यो भवति शिष्यः सन्दीक्षितस्तदा।
भैरवो वा भवेत् सो वै दग्धसंसारबन्धनः।।
पश्चात्तुलामर्पयेत अश्मान्येवमपास्य तु।
सप्तविंशतिपुष्पैश्च कृतां मालां समर्पयेत्।।
तत्समः साधको जायात्प्रहीणावरणो यदा।"

उद्ध०- तन्त्रयजात्, तं० आ० वि०, खं० 10, पृ०, 211)

"वायुपुरान्तर्व्यवस्थितं दोधूयमानं शिष्यं लघूभूतं चिन्तयेत्येन तुलया लघुर्दृश्यते इति।"

(तं० सा०, पृ०, 164)

~ कर्माणि-(तत्र)— **न्यासहोमादीनि कर्माणि सर्वाण्यपि तुलादीक्षायां कर्माण्येव भवन्ति न केवलं तोलनमात्रम्। यथा—**

"कर्माणि तत्राशेषाणि पूर्वोक्तान्याचरेद् गुरुः।।"

(तं० आ० 20,15)

~ तद्रहस्यम्—स्पष्टमुक्तं जयरथेन। यथा—

"पार्थिवदेहाभिमानन्यग्भावेन पराकाशरूपतायामापन्नो येनायं तुलायां कुसुमसमानतामासादयेत्।"

(तं० आ० वि०, खे० 10, पृ०, 211)

~ तन्मन्त्रः— "ॐ श्म्र् यूं नमः" इति। यथा—

"तारः शमरयैः पिण्डो नंतिश्च चतुरर्णकम्।।
शाकिनीस्तोभनंः मर्म हृदयं जीवितं त्विदम्।"
(तं० आ० 30, 93-94)

द्र०- 'तुलाशुद्धि' तन्मन्त्र इति।

अत्र चतुरर्णकमिति संशयितमेव। न च शम्रेत्यादि बीजं नापि नमः इति चतुरर्णकौ बीजपिण्डौ। अथवा चतुरक्षरोऽत्र पूर्णो मन्त्रस्तानि चाक्षराणि—

1- ॐ
2- श्म्रयूं
3- न
4- मः इति।

तुलायोगः - तुलाशुद्धिमन्त्रः। यथा—

"तुलामेलकयोगः श्रीतन्त्रसद्भावशासने।
य उक्तः शम्भुनाथेन स मया दर्शितः क्रमात्।।"
(तं० आ० 30,99)

शम्भुनाथोऽत्र शिवो न सिद्धगुरुः।

तुलाशुद्धिः— तुलादीक्षाविधिना शिष्यस्य मलशुद्धेः प्रामाण्यकरणम्। निर्मलोकृतः शिष्यस्तुलामारोपितः सन् पुष्पमालाभारादधिकगुरुर्न भवति। भवति चेत् तर्हि शुद्धरपूर्णेति सिद्धयति। ततः पुनस्तस्य दीक्षया शोधनमावश्यकं भवति।

द्र०- 'तुलादीक्षा' इति।

~ तन्मन्त्रः— तुलाशुद्धयूपयोगी मन्त्रस्तावत् "ॐ श्म्रयूं नमः" इति उद्धारस्तस्य यथा-

"तारः शमरयैः पिण्डो नतिश्च यथा चतुरर्णकम्।
(तं० आ० 30, 93)

तुलाशुद्धिदीक्षा— देहात्मभावशैथिल्येन लघुत्वापन्नस्य शिष्यस्य शरीरे यदैव "उद्भवः" इति परिभाषितं योग-सिद्धिलक्षणं प्रकटतां यायात् तदा गुरुणाऽऽगमशास्त्र-प्रतिपादिता तुलाशुद्धिदीक्षा तस्य विधीयते, यस्यां तस्य शरीरस्य भारः पुष्पमालाभारान्नाधिकोऽवशिष्यते। तेन च तस्य भावि मुक्ति योग्यतायाः प्रमाणं दृढतां याति। यथा—

"तुलाशुद्धिपरीक्षां वा कुर्यात् प्रत्ययोगिनीम्।।
यथा श्रीतन्त्रसद्भावे कथिता परमेशिना।"
(तं० आ० 10, 11-12)

स प्रत्यया खल्वेषा दीक्षा।

द्र०- 'तुलादीक्षा' इति।

तुष्टिः— स्पष्टीकृता तन्त्रालोके। यथा—

"अतत्त्वे तत्त्वबुद्ध्यायः सन्तोषस्तुष्टिस्त्र सा।"
(तं० आ० 8, 279)

"तथा चोक्तं हि कापिलैः
आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।
पञ्चविषयोपरमतोऽर्जनरक्षा सङ्ग संक्षयविघातैः।।"
(तदेव 8, 280)

तुष्टयो ~ नव— परिगणिता यथा—

"अम्भा च सलिला ओघा वृष्टिः सार्घं च तारया।
सुतारा च सुनेत्रा च कुमारी च ततः परम्।।
उत्तमाम्भसिका चैव तुष्टयो नव कीर्त्तिताः।"
(स्व० तं० 10, 1069-107)

नैतासां लक्षणान्युक्तानि तन्त्रे वा तदुद्द्योतेऽपि वा।

तूरम्— दोषवर्जिते पात्रादौ वज्रमय्या सूच्या समुल्लिखिताः पूज्यानां देवीप्रभृतीनामाकृतयः पूज्याः शेषवर्त्तने साधकेन शिष्येण। यथा—

"श्लक्षणया वज्रसूच्यात्र स्फुटं देवीगणान्वितम्।।
सर्वं समालिखेत् पूज्यं सर्वावयवसुन्दरम्।
(तं० आ० 27, 27-28)

"अथवा लक्षणोपेतमूर्धतत्कर्पराश्रितम्।।
पङ्क्तिचक्रकशूलाब्जविधिना तूरमाश्रेयत्।"
(तं० आ० 27, 20-21)

'स्थण्डिलादुत्तरं तूरं तूरादुत्तरतःपटः।"
(तं० आ० 2, 42)

द्र०- (तं० आ० वि०, आ० 2,43 पृ०,36)

~ उपयोगतः— आराधना सुसफला भवति तदुपयोगेन। यथा—

"तूरे योगः सदा शस्तः सिद्धिदो दोषवर्जिते।"
(तं० आ० 27,22)

~ तद्विधिविशेषः— तत्र काम्ये कर्मणि तूरोल्लेखने पात्रादि दोषाः यत्नेन परिहार्याः परं न नित्ये कर्मणि शेषवृत्तिरूपे तद्विचारस्य प्राधान्यम्। यथा—

"गुरवस्तु विधौ काम्ये यत्नाद्दोषांस्त्यजेदिति।
व्याचक्षते पिचुप्रोक्तं न नित्ये कर्मणीत्यदः।।"
(तं० आ० 27, 24)

तृतीयं ब्रह्म= — (1) सकारस्य तान्त्रिकीयं पारिभाषिकी संज्ञा। यथा—

"तृतीयं ब्रह्म = सकारः।"
(तं० आ० वि०, खं० 2, पृ०, 166)

द्र०- 'ब्रह्म' ~ तृतीयम् इति।

द्र०- (प० त्री० वि० पृ०, 7,8) चाहप।

(2) सदाशिवः। यथा—

"तृतीयं ब्रह्म सदाशिवतत्त्वात्मकं ग्राह्यराशिविलक्षणं सद्रूपं विश्वम्।"
(प० त्री० ल० वृ०, पृ०, 9)

तृप्तिः— (1) परः कृतकृत्यताविमर्शः। यथा—

"यं लब्ध्वा चापरं लाभं मन्यते न ततोऽधिकम्।"
(भ० गी० 6,23)

(२) येन केनापि शैवयोगप्रकारेणाभ्यस्यमानेन याऽहरहः परिपूर्णतायाः साक्षादधिकाधिकानुभूतिः सैव तृप्तिर्योगफलम्। यथा—

"अत्रैकतमयुक्तिस्थे योत्पद्येत दिनाद्दिनम्
भरिताकारता सात्र तृप्तिरत्यन्तपूर्णता।।

(वि० भै०, 148)

~ द्विप्रकारा— **(1) जीवन्मुक्तिमात्रलाभात्मिका।**
(2) पारमैश्वर्यशक्त्यंशोद्बोधसहिता च सा।
यथा—

"हृदयङ्गमतावगमनसाध्या हि तृप्तिर्जीवन्मुक्ता, तत्समावेश-साध्या हि तृप्तिर्विभूतिरूपेति द्विविधा तृप्तिः।"

(प० त्री० ल० वृ० पृ०, 3)

तेजोबीजम्— वह्निबीजम्, रकारः। यथा—

"तेजो रेफः"।

(तं० आ० वि० खं०, 3, पृ०, 460)

तोतुलम्— आगमग्रन्थविशेषः यथा—

"तदुक्तं श्रीतोतुले—
'प्रहरार्धभुजः सर्वेऽहोरात्रं च चरन्ति ते।'
इति।"

(स्व० तं० उ०, प० 7, पृ०, 197)

"यश्च श्रीतोतुले—
'रवेः षोडशमध्यान्तु चतुरोऽन्ताच्च भार्गवात्।
चषकौ द्वौ बुधस्यादौ सोमस्याष्टौ तु मध्यतः।।
सौरस्यान्ताच्चतुःषष्टिं मध्यतश्चषकं गुरोः।
द्वात्रिंशतं कुजस्यान्ताद्भुङ्क्ते षट्परिवर्ततः।।'
इति।"

(तदेव, पृ०, 199)

द्र०- (ने० तं० उद्०, खं० 2, पृ०, 150-152,199)

अयमेवग्रन्थो भवेत् तोतुला इति।

तोतुला— कोऽपि तन्त्रग्रन्थः। यथा—

"अन्यत्र– श्रीतोतुलक्रियाकालगुणोत्तरादौ .... तत्र हि–

तस्मात् समाधियुक्तेन..... इत्यारभ्य..... ....तथा तथ्यं विनिर्दिशेत्।।" इत्यन्तम्।

(ने० तं० उ०, खं० 2, पृ०, 199)

अयमेव ग्रन्थो भवेत्। 'तोतुलम्' इति।

त्यागः ~करणयोगे— **आक्षेपपदादतिक्रान्ते स्वरूपे यदा नैव प्रतिष्ठां लभते तदा भेदाभेदात्मकशुद्धविद्यादशायां साक्षात्कृतं स्वरूपज्ञानमपि त्यजन्नग्रे च सरन् पूर्णतयां प्रतिष्ठां लभते त्यागाख्यस्य करणयोगस्याभ्यासतः। यथा—**

"अनुभूय स्वरूपं तु निवृत्तिं नैव गच्छति।
ज्ञानभेदपदप्राप्त्या अत्याक्षेपगमात्मनः।।
स्वरूपं चिन्त्यमानोऽपि ग्राह्यप्रकारधर्मधीः।
त्यजेत् पूर्वपदाद् भेदात् त्यागं तु परिकीर्तितम्।।"

उद्ध०- (त्रिशिरोभैरवात्)

(तं० आ० वि०, खं० 3, पृ०, 441)

अनुभूतिपदं त्यक्त्वा स्वतः सिद्धे भूतिपदे विश्राम्यति योगीति तात्पर्यम्। यथा—

"एवं त्रिविधविसर्गावेशसमापत्तिधाम्नि य उदेति।
संवित्परिमर्शात्मा ध्वनिस्तदेव मन्त्रवीर्यं स्यात्।"

(तं० आ० 29,147)

"इत्यादिना ....चैकोनत्रिंशाह्निके त्यागस्य ....."

(तं० आ० वि०, खं० 3, पृ०, 443)

चिन्त्यमेवैतद् व्याख्यानं जयरथकृतम्।

~ प्रणवापास्तौ— **प्रणवकलानां मध्ये पूर्वपूर्वकलात्यागे-नोत्तरोत्तरकलारोहणं त्यागः। तत् सरणिश्चोत्तरोत्तरैवम्। यथा—**

"हकारः प्राणशक्त्यात्मा अकारो ब्रह्मवाचकः।
हृदि त्यागो भवेत्तस्य उकारो विष्णुवाचकः।।
कण्ठे त्यागो भवेत्तस्य मकारो रुद्रवाचकः।
तालुमध्ये त्यजेत्तं तु बिन्दुश्चैवेश्वरः स्वयम्।।
त्यागस्तत्र भ्रुवोर्मध्ये नादे वाच्यः सदाशिवः।
ललाटान्मूर्धपर्यन्तं त्यागस्तस्य विधीयते।।
शक्तिव्यापिनीसमनास्तासां वाच्यः शिवोऽव्ययः।
मूर्धमध्ये त्यजेच्छक्तिं तदूर्ध्वे व्यापिनीं त्यजेत्।।
समनामुन्मनां त्यक्त्वा षट्त्यागात्सप्तमे लयः।
सूक्ष्मसूक्ष्मतरैर्भावैरेवमेवं त्यजेत् प्रिये।।
स्थूलस्थूलतरैर्भावैर्नानासिद्धिफलप्रदैः।
सूक्ष्मोऽत्यन्तं परो भावस्त्वभावः स विधीयते।।
उन्मना त्वपरो भावः स्थूलस्तस्यापरो मतः।
तस्यापरं पुनः शून्यं संस्पर्शं च ततोऽपरम्।।
शब्दो ज्योतिः ततो मन्त्राः कारणा भुवनानि च।
पञ्चभूतात्मभुवनं कारणैः समधिष्ठितम्।।
भुवनं चिन्तयेद्यस्तु वक्ष्यमाणैकरूपकम्।

भुवनेशत्वमाप्नोति शिवं ध्यात्वा तु तन्मयः।।
ब्रह्मादिकारणानां च साधने विग्रहं स्मरन्।
पूर्वोक्तलक्षणं यश्च तन्मयत्वमवाप्नुयात्।।
मन्त्रैश्च मन्त्रसिद्धिस्तु जपहोमार्चनाद् भवेत्।
पूर्वोक्तरूपकध्यानात् सिद्ध्यन्त्यत्र न संशयः।।
ज्योतिर्ध्यानात्तु योगीन्द्रो योगसिद्धिमवाप्नुयात्।
तन्मयत्वं यदाप्नोति योगिनामधिपो भवेत्।।
शब्दध्यानाच्च शब्दात्मा वाङ्मयापूरको भवेत्।
स्पर्शध्यानाच्च स्पर्शात्मा जगतः कारणं भवेत्।।
शून्याध्यानाच्च शून्यात्मा व्यापी सर्वगतो भवेत्।
समनाध्यानयोगेन योगी सर्वज्ञतां व्रजेत्।।
उन्मन्या तु परं सूक्ष्ममभावं भावयेत्सदा।
सर्वेन्द्रियमनोतीतस्त्वलक्ष्योऽभाव उच्यते।।
अभावं भाव्यं भावेन भावं कृत्वा निराश्रयम्।
सर्वोपाधिविनिर्मुक्तमभावं लभते पदम्।
एष ते कारणत्यागः। .....।"

(स्व० तं० 4,263-279)

त्रयाभाववादिनः— शून्यवादिनो माध्यमिकाः बौद्धाः। तेहि पर्यन्ते प्रमाणप्रमेय प्रमातृरूपाणां त्रयाणामपि पदार्थानामसत्त्वं प्रतिपादयन्ति। ततस्ते त्रयाभाववादिनः। यथा—

"तत्र त्रयाभाववादिनो माध्यमिकाः।"

(तं० आ० वि०, खं 1, पृ०, 95)

त्रयोदशरूपत्वं ~ काल्याः— **उपदेश्यानामवबोधनार्थ- मेव विकल्पात्मकोक्तिप्रपञ्चे द्वादशरूपेभ्य उत्तीर्णायाः काल्याः त्रयोदशत्वं शुद्धायाः केवलमुच्यत उपदेशावसरे। वस्तुत यैव शुद्धा संवित् सैव स्वविलासत एव सततं द्वादशधावभासते इति संवित् स्वरूपोपदेशे द्वादश एव काल्यो न त्रयोदश; द्वादशधैव तद्विषया धारणा यतः। त्रयोदशताः इति केषामपि साधकानां मतम्।**

"विकल्पबलोपनतं भेदमाश्रित्य संविदस्त्रयोदशरूपत्वमुक्तम् इह पुनर्वास्तवमभेदमेवालम्ब्य एवमुपदेश, इति सर्वमेव प्रतिसमाहितम्।"

(तं० आ० वि०, खं० 3,पृ०, 133-134)

त्रयोदशात्मत्वं ~ तत्त्वभेदने— **(1) यदा पुंस्तत्त्वादारभ्य कलातत्त्वं यावत् किमपि तत्त्वं धारणालम्बनतया गृह्यते तदा तत्तत्त्वं व्यापकीभूतैः प्रलयाकलादिशिवान्तैः षड्भिः प्रमातृत्त्वैः षड्भिश्च तेषां शक्तिर्भिर्वेद्यं सत् साक्षात्क्रियते तत्त्वभेदनधारणायाम्। तत्र प्रमातारः=6, प्रमाणानि=6, आलम्बनस्वरूपम्=1, संकलनया=13। यथा—**

"अनेनैव विधानेन पुंस्तत्त्वात् तत्कलान्तकम्।
त्रयोदशविधं ज्ञेयम्।"

(मा० वि० तं० 2,50)

"..... आनरात्।।"
कलान्तं भेदयुग्धीनम्.....।

त्रयोदशभेदात्मकं, भेदयुग्धीनं पञ्चदशभेदापेक्षया-भेदद्वयन्यूनमित्यर्थः।

(तं० आ० 10,4)

"यदा तु मेयता पुंसः कलान्तस्य प्रकल्प्यते।
तदुद्भूतः कञ्चुकांशो मेयो नास्य प्रमातृता।।
अतः सकलसंज्ञस्य प्रमातृत्वं न विद्यते।
त्रयोदशत्वं तच्छक्तिशक्तिमद्द्वयवर्जनात्।।
न्यग्भूतकञ्चुको माता यतस्तत्र लयाकलः।
मायानिविष्टो विज्ञानाकलाद्याः प्राग्वदेव तु।।"

(तदेव 10, 105-107)

"पुंसः प्रभृति कलातत्त्वान्तं त्रयोदशधा सकलस्य तत्र प्रमातृताऽयोगेन तच्छक्ति शक्तिमदात्मनो भेदद्वयस्य प्रत्यस्तमयात्। तथा च सकलस्य स्वरूपत्वमेव केवलम्।"

(तं० सा, पृ०, 98)

द्र०- (मा० वि० वा० 1,166-167)

(2) यद्यपि सर्वसर्वात्मकतासिद्धान्तनीत्या वस्तुतः प्रलयाकलादिशिवान्तानामपि धारणालम्बनत्वेन पञ्चदशात्मत्वमेव सर्वेषां, तथाप्युत्तरोत्तराणां त्रायोदश्यादिकमेव स्फुटमिति तदेव न्याय्यम्। ततो धारणासु तथाविधो भेदः। यथा—

"अनया तु दिशा प्रायः सर्वभेदेषु विद्यते।।
भेदो मन्त्रमहेशान्तेष्वेष पञ्चदशात्मकः।
तथापि स्फुटताभावात् सन्नप्येष न चर्चितः।।"

(तं० आ० 10,183-184)

"सत्यमेवं किन्त्वेतत्त्रायोदश्यादिवन्न स्फुटमिति हि नोक्तम्"

(तं० आ० वि०, खं०7,पृ०,127)

~ अवस्थापञ्चकतः— **(1) स्वरूपम्=जाग्रत्, प्रलयाकलः स्वप्नः, विज्ञानाकलः, सौषुप्तम्, मन्त्र तदीश तन्महेशाः तुर्यम्, शिवस्तुर्यातीतम्।**

यथा—

"स्वरूपम्, प्रलयाकलः, इत्यादिक्रमेण त्रयोदशभेदे।"

(तं० सा० पृ०, 107)

(2) तत्र जाग्रदवस्था = सकलस्य प्रमातुः स्वरूपम् =1
स्वप्नावस्था = प्रलयाकलः 1, तस्य शक्तिः =1=2
सुषुप्तिः = विज्ञानाकलः =1 तस्य शक्तिः 1 =2
तुर्या = मन्त्र-तदीश्वर-तन्महेश्वराः=3
तेषां तिस्त्रः शक्तयः। =3
तुर्यातीतम् =शक्ति–शिवौ = 2
सर्वयोग = 13

यथा—

(1) त्रयोदशाभिधे पुनः।।

स्वरूपं जाग्रदन्यत्तु प्राग्वत् ..... ।"

(तं० आ० 10,303-304

(2) "त्रयोदशात्मके भेदे स्वरूपमकलावुभौ।।

मन्त्रमन्त्रेश्वरेशानाः शक्तिशम्भू च कीर्तितौ।।"

(तं० आ० वि०, खं० 7, पृ०, 200)

उद्ध०- (मा०वि०तं०)

त्रयोदशी ~ काली— द्वादशकालीनां सर्वथाऽभेदमयी-मूर्त्तिस्त्रयोदशी। यथा—

"श्रीमहानयप्रकाशे—

'आसां द्विषट्कदेवीनां वमनग्रासतत्पराम्।

देवीं त्रयोदशीं वन्दे तादात्म्यप्रतिपत्तये।।,"

(म० मं० प०, पृ०, 101)

त्रिपुरामहिमस्तोत्रम्ः — भगवता दुर्वाससा स्रग्धरावृत्तभूयिष्ठमिदं भगवत्याः स्तोत्रमतिसुन्दरं शास्त्ररहस्यगर्भं च। नित्यानन्दसिद्धेन रचितया टीकया सहितं काव्यमालाया एकादशे गुच्छके प्रकाशितमभूत्। तदनन्तरं तमिलभाषानुवाद-सहितमपि क्वापि प्रकाशितं केनापि। तृतीयमस्य संस्करणं हिन्दीभाषानुवादसहितं प्रयागनगरे चण्डीकार्यालये प्रकाशितम-भवत्। मालामन्त्ररूपमतीवशुभफलप्रदमिदं स्तोत्रम्।

त्रसरेणुः— शैव्या दृष्टया त्रसरेणोरष्टमो भागः परमाणुः, यद्यपि वैशेषिकनये षष्ठांश एव। एवं परमाणूनामष्टकं परस्परमिलितं त्रसरेणुः। यथा—

"भूतादेर्यद्दशगुणमणीयो दृश्यते रजः।

जालान्तरगते भानौ परमाणुः स उच्यते

अष्टानां परमाणूनां समवायस्तु यो भवेत्।

त्रसरेणुः स विख्यातः तत्पद्मरज उच्यते।।"

(स्व० तं० प०, 10,15-16)

त्रिंशका—परात्रींशिकाख्यस्यागमग्रन्थस्य नामान्तरम्। यथा—

"त्रिंशका इत्यपि गुरवः पठन्ति, अक्षरवादसाम्याच्च निरुक्तिमाहुः— तिस्रः शक्तीः कायतीति त्रिंशका, न तु त्रिंशच्छलोकयोगात् त्रिंशिका, एतावतोऽपि त्रिंशकार्थत्वात्। तथा हि श्रीतन्त्रसारे—

"त्रिंशकार्थस्त्वया प्रोक्तः सार्धकोटिप्रविस्तरः।'

(प० त्री० वि०, पृ०, 14)

त्रिककाली— तदाख्य आगमः। यथा—

"त्रिककाली कुलादिके"।

(तं० आ० 28,15)

त्रिकगुरुमहिमा— उक्तं स्पष्टं सदृष्टान्तम्।—

"त्रिजगज्ज्योतिषो ह्यन्यत्तेजोऽन्यच्च निशाकृतः।

ज्ञानमन्यत् त्रिकगुरोरन्यत् त्वधरवर्तिनाम्।।"

(तं० आ० 23,76)

यथा ग्रहनक्षत्रादिप्रपञ्चे सूर्यस्यैवोत्कृष्टतरत्वमत्र जगति तथैव शास्त्रवृन्दमध्ये त्रिकशास्त्रस्येति तात्पर्यम्।

त्रिकतन्त्रसारः— कश्चनागमिको ग्रन्थः। यथा—

"शिवशक्तिसंघट्टः स्वयं स्वात्मनैव पूज्यः इत्युपदिष्टं श्री त्रिकतन्त्रसारे—

'शिवशक्तिसमापत्त्या शिवशक्तिघनात्मकः।

शिवाशक्तिसमापत्तित्रिंक संपूजयेत् परम्।।'"

उद्ध०- (प० त्री० वि०, पृ०, 184)

कदाचित् पुरातनस्य तन्त्रसारस्यैवेदं नामान्तरं स्यात्। यथा—

"यथोक्तं त्रिकतन्त्रसारे—

'आनन्दप्रसरः पूजा तां त्रिकोणे प्रकल्पयेत्।

पुष्पधूपादिगन्धैस्तु स्वहृत्सन्तोषकारिणीम्।।'"

(प० त्री० वि०, पृ०, 223)

द्र०- (प० त्री० वि०, पृ०, १४) इति।

त्रिकदर्शनम्— पराद्वैतशैवदर्शनम्। यथा—

"विश्वोत्तीर्णं विश्वमयं च (आत्मतत्त्वम्) इति त्रिकादिदर्शनविदः।"

(प्र० ह० पृ०, 18)

वस्तुतः पराद्वैतशैवदर्शनस्य यः सिद्धान्तपक्षः स एव लोके प्रत्यभिज्ञादर्शनमिति ख्यातो, यश्चास्य मुख्यः साधनापक्षः स एव त्रिकदर्शनमित्युच्यते।

त्रिकप्रक्रिया— शाम्भवादियोगाभ्यासोपायैः स्वात्मनः परिपूर्णपरशिवतादर्शनोपायभूता भुक्तिमुक्तिफलप्रदा साधनापद्धतिः। एतां त्रिकाचार इति, षडर्धक्रम इति चापि वदन्ति। इमां साधनाप्रक्रियां "सिद्धयोगीश्वरीमतम्" इत्यपि वदन्ति स्म गुरवः।

~ विशेषमाहात्म्यतः— **त्रिकप्रक्रियानुसारं सामर्थ्यशाली सद्गुरुर्यस्मिन्नेव काले क्रियादीक्षां विदधाति शिष्यस्य, तस्मिन्नेवकाले शिष्यः सकलपाशमुक्तो भवति। केवलं प्रारब्धकर्मभोगार्थं शरीरे जीवंस्तिष्ठति। तावत्कालं तस्य ज्ञानं स्फुटतया नैवाभिव्यक्तं भवति। क्षीणेषु प्रारब्धकर्मसु, पतिते देहे दीक्षितः शिष्यो मुक्तो भवति, तत्कालमेव तस्य शिवज्ञानमभिव्यक्तं भवति।**

त्रिकम्— पराद्वैतशैवदर्शनस्य या विशिष्टा सर्वोत्कृष्टत्वेन च स्वीकृता साधनापद्धतिरसौ त्रिकमित्युच्यते। अस्यामनेकेषां

पदार्थत्रयसमुदायानामुपयोगो यतस्तत एवास्यास्तथाविधा पारिभाषिकी संज्ञेयम्। त्रिकसाधनैव विस्तरतस्तन्त्रालोकादौ प्रतिपादिताऽस्ति। यथा—

"सन्ति पद्धतयाश्चित्राः स्रोतोभेदेषु भूयसा।
अनुत्तरषडर्धार्थक्रमे त्वेकापि नेक्ष्यते।।"

(तं० आ० 1,14)

षडर्धशास्त्रमित्यप्यस्य रहस्यमयमभिधानान्तरम्। विविधप्रकारकस्य तत्त्वत्रयस्य समन्वयोऽत्र साधनाक्रमे। तत एव त्रिकमित्यस्याभिधानम्।

द्र०- **'त्रिकशासनम्' इत्यादि।**

~ अपरम्— **शिवशक्तिनरात्मकं विश्वमिदमपरं त्रिकम्। तत्र शिवः स्वातन्त्र्यशक्तिमान् परमेश्वरः। शक्तिरस्य क्रमात्मकप्रपञ्चसिसृक्षादिरूपा प्रवृत्तिः स्वाभाविकी। क्रमात्मकाः बद्धप्राणिनस्तेषां प्रमेयजातञ्च सर्वं जडं जगन्नरात्मकम्। यथा—**

"इदानीमपरमपि त्रिकं परामृष्टुमाह—
'स्वातन्त्र्यशक्तिः क्रमसंसिसृक्षा। क्रमात्मता चेति विभोर्विभूतिः।।"

(तं० आ० 1,5)

"स्वातन्त्र्यरूपाशक्तिर्यस्यासावनन्तशक्तिर्भगवान् शिवः विश्ववैचित्र्यस्य सर्गस्य सम्यग् भेदेन सिसृक्षा जगत् सृष्टिनिमित्तं पारमेश्वरीइच्छारूपाशक्तिः क्रमात्मता भेदप्रधानं तदनन्ताभास-सम्भिन्नं संकुचितात्मरूपं नरत्वम्। इत्येवं येयं नरशक्तिशिवात्मिका विभोर्भगवतः परस्यानुत्तरस्य प्रकाशस्य विभूतिः।"

(तं० आ० वि०, खं० 1, पृ०, 20-21)

~ आगमानाम्— **(1) अत्र शास्त्रे मुख्यास्त्रय एवागमाः। ते च — (क) सिद्धातन्त्रम्, (ख) वामक (नामक) तन्त्रम्, (ग) मालिनीतन्त्रं चेति। यथा—**

"तच्च (आगमत्रिकं) सिद्धानामक(वामक)-मालिन्याख्यखण्डत्रयात्मकत्वात् त्रिविधम्। तत्र क्रियाप्रधानं सिद्धातन्त्रं, ज्ञानप्रधानं ना(वा)मकतन्त्रं, तदुभयप्रधानं मालिनीमतम्।"

(तं० आ० वि०, खं० 1, पृ०, 49)

(2) जयरथस्तावत् त्रिकागमत्रयस्य नामानि सिद्धातन्त्रं, नामकतन्त्रं, मालिनीतन्त्रमिति वदति। परं विज्ञानभैरवविवृतौ क्षेमराजेन तेषां नामानि—"सिद्धामालिन्युत्तरादि", इति वदता नामकतन्त्रस्याभिधानं नोक्तम्। न चाप्यन्यत्र क्वापि तन्नाम लभ्यते। इति संशयितमिवैतत् प्रतिभाति। यथा—

"तत्रापि सिद्धामालिन्युत्तरादि क्रमात्—
क्रमम् .....।"

(वि० भै० उ०, पृ०, 4)

एवमपि कश्चिदनुमानं कुर्वीत यत् सिद्धातन्त्रं, मालिनीतन्त्रं, उत्तरमालिनीतन्त्रं च (मालिनीविजयोत्तराख्यम्) इत्येतदेवागमत्रिकं प्रधान्येन त्रिकाचारस्येति। ना (वा) मकं च जयरथेनैव गणितम्, तस्य वामकेश्वरीमतप्रियत्वादिति विचारणीयोऽयं विषयः सुधीभिः। यथा

"अनुत्तरत्रिकार्थरूपे सिद्धाना(वा)मकमालिन्याख्ये त्रिप्रकारे क्रमे .....।"

(तं० आ० वि०, खं० 7/2, पृ०, 70)

नामकपदापेक्षया वामकपदमुचिततरं प्रतीयते। शारदालिप्यां नकारवकारयोर्न महदन्तरम्। ततो लेखकप्रमादस्य स्पष्टोऽवसरः।

~ उपेयम्— **मुमुक्षुभिः परिपूर्णतालाभाय स्वात्माप्रकाशा-त्मक शिवरूपतया, विमर्शात्मकशक्तिरूपतया, शिवशक्ति-सामरस्यतया च साक्षात्करणीयो भवति। तदात्मन एतद्विशेषत्रयमुपेयं त्रिकम्। यथा—**

"तस्य यत्तत् परं प्राप्यं धाम तत् त्रिकशब्दितम्।"

(तं० आ० 35,31)

त्रिकं हि योगाद्यात्मक उपायक्रमः। तस्योपेयं हि परशिवतत्त्वं तदपि प्रकाशविमर्शतत् सामरस्यतया त्रिकनामकमिति तात्पर्यम्।

~ कुलादिभिन्नम्— **उपेयभूतं यत् परं त्रिकं शिवशक्तिसामरस्यात्मकं, तदेव कुलमुच्यते। यथा—**

"सर्वविभेदानुच्छेदात् तदेव कुलमुच्यते।"

(तं० आ० 35,31)

परस्य तत्त्वस्य शुद्धसंविद्रूपतायापि विश्वपूर्णत्वेन कुलमित्यप्याख्येति तात्पर्यमत्र।

~ तन्मन्त्रवीर्यम्— **सर्वे तेऽपि त्रिकाचारमन्त्राः अतीव वीर्यवन्तः समस्तफलप्रदाश्चेति। यथा—**

"अनुत्तरत्रिकानामक्रममन्त्रास्तु ये किल।
ते सर्वे सर्वदा किन्तु कस्यचित् क्वापि मुख्यता।।"

(तं० आ० 11,88)

~ त्रिकात्मकम्— **नरशक्तिशिवा हि प्रत्येकं त्रिकरूप एव। तत एकैकमपि तेषु त्रिकात्मकम्।**

द्र०- **'नरतत्त्वम्'** इति।

त्रिकरत्नकुलम्— कश्चन ग्रन्थो यस्य नामोल्लेखोऽभिनवगुप्ताचार्यैः कृतः। यथा—

"श्री त्रिकरत्नकुलेऽप्युक्तम्—
'अष्टाष्टकविभेदेन मातृका या निरूपिता।
तदेव कुलचक्रं तु तेन व्याप्तमिदं जगत्'।।
इति"।

(प० त्री० वि०, पृ०, 192)

त्रिकशासनम्— सर्वं त्रिकशास्त्रमेव त्रिकशासनम्। अथवा त्रिकशासनमिति कस्यापि ग्रन्थस्यापि नाम कदाचित् स्यात्। यथा—

"न यन्त्रणात्र कार्येति प्रोक्तं श्रीत्रिकशासने।"

(तं०आ०4,274)

द्र०- **'त्रिकम्'** इत्यपि

~ अभिनवक्रमे— **पूर्वं दिव्यादीनां महागुरूणां परम्परया प्रसरणशीलं पश्चाद् दीर्घकालं प्रसरद् यदा प्रक्षीणमिव लुप्तमिव च सञ्जातमत्रलोके तदा श्रीकण्ठनाथाज्ञया भुवमवतीर्णैस्त्रिभिः सिद्धैरत्र पुनः प्रवर्तितोऽस्य क्रमः। तेषु त्र्यम्बकादित्येनाद्वैतदृष्ट्या श्रीनाथेन द्वैताद्वैतदृष्टया अमर्दकनाथेन च द्वैतदृष्टयाऽत्र भूलोके उत्तममध्यमावरकोटिभाग्भ्योऽधिकारिभ्यः। त्र्यम्बकादित्येन दुहितृद्वाराऽपरोऽपि क्रमः प्रवर्तितः। स चार्धत्र्म्बकाख्यः। इत्थं त्रिकशासनस्य चतस्रो मठिकाः प्रवृत्ता अत्र भूलोके तस्याभिनवे प्रसारक्रमे। यथा—**

"तेषां क्रमेणतन्मध्ये भ्रष्टं कालान्तराद् यदा
तदा श्रीकण्ठनाथाज्ञावशात् सिद्धा अवातरन्।।
त्र्यम्बकामर्दकाभिख्यश्रीनाथा अद्वये द्वये।
द्वयाद्वये च निपुणाः क्रमेण शिवशासने।।
आद्यस्य चान्वयो जज्ञे द्वितीयो दुहितृक्रमात्।
स चार्धत्र्यम्बकाभिख्यः सन्तानः सुप्रतिष्ठितः।।
अतश्चार्धचतस्त्रोऽत्र मठिकाः सन्ततिक्रमात्।
शिष्यप्रशिष्यैर्विस्तीर्णाः शतशाखं व्यवस्थितैः।।"

(तं० आ० 36,11-14)

~ आयातिक्रमे— **इदं त्रिकप्रक्रियाशास्त्रं प्रथमं भैरवनाथः शिवः, ततो भैरवी देवी, स्वच्छन्दनाथः इत्यादीनां दिव्यानां गुरूणां क्रमेण ऊर्ध्वतरेषु भुवनेष्वेव प्रचरति स्म स्वर्लोकं यावत्। अनन्तरं रावणेन मन्त्रादिबलाद्धहठमेलापक्रमेण योगिनीर्वशीकृत्य ताभ्यः भूलोके प्रचारितम्। चिरं च तत् प्रसरत् क्रमेण च ह्रासमुपागच्छद् यदा तदा श्री कण्ठनाथाज्ञावशादमर्दकादिभिः सिद्धैरत्र लोके त्रिप्रवाहतया पुनः प्रचारितम्।**

द्र०- ~ **'दिव्यगुरुक्रमे'** इति

~ **'मर्त्यलोकावतारे'** इति चेहैव।

~ काश्मीरप्रवेशे— **त्र्यम्बकादित्यनाथस्य परम्परायां षोडशो गुरुः सङ्गमादित्यः कश्मीरभ्रमणं कुर्वंस्तत्रैवोपनिविष्टवान्। तस्य वंशपरम्परायां शिष्यपरम्परायाञ्च बहवो मठिकागुरवः प्रादुरभूवन्। तैर्भगवत्कृपया मालिन्यादीनि त्रिकागमशास्त्राणि शिवसूत्रादीनि च प्राप्तानि। वसुगुप्तशिष्येण भट्टकल्लटेन साधनासु सुसाफल्यमवाप्य शास्त्रस्यास्य महान् प्रचारः कृतः। सङ्गमादित्यस्य वंशे चतुर्थेन पुत्रेण श्रीसोमानन्देन शिवदृष्टयाभिधानस्य दर्शनशास्त्रग्रन्थस्य निर्माणं कृतम्। तच्छिष्येणोत्पलदेवेनेश्वरप्रत्यभिज्ञादीनां प्राधानानां दर्शनग्रन्थानां रचना कृता। तस्य प्रशिष्येणाभिनवगुप्तेन च दर्शनशास्त्राणां व्याख्यां विदधता त्रिकप्रक्रियाः अपि स्पष्टीकृतास्तन्त्रालोकादिग्रन्थनिर्माणेन। इत्थं कश्मीरमण्डल एव सुविकासं प्राप्तमेतच्छास्त्रमद्यत्वे काश्मीरशैवदर्शनमित्युच्यते। यथा—**

"ब्राह्मणेन विवाहेन ततो जातस्तथाविधः।
तेन यः स च कालेन कश्मीरेष्वागतो भ्रमन्।।
नाम्ना स सङ्गमादित्यो वर्षादित्योऽपि तत्सुतः।
तस्याप्यभूत् स भगवानरुणादित्यसंज्ञकः।।
आनन्दसंज्ञकस्तस्मादुद्बभूव तथाविधः।
तस्मादस्मि समुद्भूतः सोमानन्दाख्य ईदृशः।
करोमि स्म प्रकरणं शिवदृष्टयभिधानकम्।
एवमेषां त्र्यम्बकाख्या तेरम्बा देशभाषया।।
स्थिता शिष्यप्रशिष्याद्यैर्विस्तीर्णा मठिकोदिता।"

(शि० दृ० 7,118-122)

~ कौलादभिन्नमिव— **उक्तं तथा—**

"श्रीमत्कालीकुले चोक्तं पञ्चस्त्रोतोविवर्जितम्।
दशाष्टादशभेदस्य सारमेतत् प्रकीर्तितम्।।
पुष्पे गन्धस्तिले तैलं देहे जीवो जलेऽमृतम्
यथा तथैव शास्त्राणां कुलमन्तः प्रतिष्ठितम्।।"

(तं० आ० 35,33-34)

एतत् पद्येन त्रिकशास्त्रं प्रति निर्देशः।

त्रिक– कुलयोरुभयोरेकप्रकारिकया व्याख्यया तयोः पर्यन्ततः एकरूपत्वमेवानुभवसिद्धमाचार्याभिनवगुप्तपादानामिति बोद्धव्यम्। उत्कृष्टतरा या कौलिकी साधनाऽसौ त्रिकाचारादभिन्नेव भूयसा। यथा—

"अशेषतन्त्रसारं तु वामदक्षिणमाश्रितम्।
एकत्रमिलितं कौलं श्रीषडर्धकशासने।।"

(तं० आ० 37,26)

~ त्र्यम्बकपरम्परायाम्— **श्रीकण्ठनाथाज्ञया भुवमवतीर्णस्त्र्यम्बकादित्यो नाम सिद्धो भगवद् दुर्वाससा मनःसङ्कल्पमात्रेणोत्पादितः, तस्मै मुनिवरेण दीक्षया सर्वाणि त्रिकशास्त्ररहस्यानि प्रदत्तानि सद्यः। स चाभेददृष्ट्या कञ्चित् कालं त्रिकशास्त्रमुपदिश्य मानसमेव पुत्रमुत्पाद्य तस्मै शास्त्ररहस्यानि वितीर्णवान्। एवं क्रमेण चतुर्द्दश पुत्राः सर्वेऽपि त्र्यम्बकनामानः शास्त्रोपदेशं सुचिरं कृतवन्तोऽत्र भूलोके। निवासश्च तेषां कैलासपर्वते त्र्यम्बकाख्यायां गुहायामभूत्। यथा—**

"कैलासाद्रौ भ्रमन् देवो मूर्त्या श्रीकण्ठरूपया।
अनुग्रहायावतीर्णश्चोदयामास भूतले।।
मुनिं दुर्वाससं नाम भगवानूर्ध्वरेतसम्।
नोच्छिद्येत यथा शास्त्रं रहस्यं कुरु तादृशम्।।
ततः स भगवान् देवादादेशं प्राप्य यत्नवान्।
ससर्ज मानसं पुत्रं त्र्यम्बकादित्यनामकम्।।
तस्मिन् सङ्क्रमयामास रहस्यानि समन्ततः।
सोऽपि गत्वा गुहां सम्यक् त्र्यम्बकाख्यां ततः परम्।।
तन्नाम्ना चिह्नितं तत्र ससर्ज मनसा सुतम्।
खमुत्पपात संसिद्धस्तत्पुत्रोऽपि तथा तथा।।
सिद्धस्तद्वत् सुतोत्पत्त्या सिद्धा एवं चतुर्दश।"

(शि० दृ० 7, 109-114)

~ दिव्यगुरुक्रमे— **(1) भैरवः, (2) भैरवी, (3) स्वच्छन्दनाथः, (4) लकुलीशः, (5) अणुराट् (अनन्तनाथः), (6) गहनेशः, (7) ब्रह्मा, (8) इन्द्रः, (9) बृहस्पतिः इति गुरुशिष्यपरम्पराक्रमः। भैरवेण नवकोटिविस्तरं शास्त्रमुक्तम्। क्रमेणैकैककोटिह्रासतो बृहस्पतिना कोटिमात्रविस्तरमुपगृहीतम्। यथा—**

"भैरवो भैरवी देवी स्वच्छन्दो लाकुलोऽणुराट्।।
गहनेशोऽब्जजः शक्रो गुरुः कोट्यपकर्षतः।
नवभिः क्रमशोऽधीतं नवकोटिप्रविस्तरम्।।"

(तं० आ० 36, 1-2)

"भैरवाद्भैरवीं प्राप्तं सिद्धयोगीश्वरीमतम्।
ततः स्वछन्ददेवेन स्वच्छन्दाल्लाकुलेन तु।।
लकुलीशादनन्तेन अनन्ताद्गहनाधिपम्।
गहनाधिपतेर्देवि देवेशं तु पितामहम्।।
पितामहेन इन्द्रस्यं इन्द्रेणापि बृहस्पतेः।
कोटिह्रासाच्छ्रुतं सर्वैः स्वच्छन्दाद्यैर्महाबलैः।।"

(तं० आ० वि०, खं० 12, पृ०, 383)

~ नूतनम्— **वाराणस्यां 1976 तमे वैक्रमाब्दे वरकलवैद्यनाथाह्वयेन ब्राह्मणवटुना देव्या अनुग्रहेण भगवतो दुर्वाससो दर्शनं निजेगृहेऽवाप्तम्। तस्मै भगवता साङ्गोपाङ्ग शाम्भवोपायक्रमः प्रशिक्षितः। तदभ्यासेन तैः पराद्वैतशैवदर्शनस्य सिद्धान्ताः साक्षादनुभूताः। तदनुभवानुसारं तैः परमशिवस्तोत्रं रचितं यच्छैवशास्त्रसिद्धान्तगर्भम्। अग्रे च परिव्राजकवद् भ्रमद्भिस्तैः कश्मीरमण्डले वराहमूलाख्ये पत्तने शैलपुत्र्याः मन्दिरे परिपूर्णः स्वात्मस्वरूपसाक्षात्कारोऽवाप्तः। तत्रैव पुण्यक्षेत्रे तैर्दशनसिद्धान्तगर्भस्य मन्दाक्रान्तास्तोत्रस्य रचना कृता जगदम्बां स्तोतुम्। तदनन्तरं तैः कश्मीरेष्वेव पराद्वैतप्रतिपादकस्य दर्शनस्य निरूपणं किञ्चित् किञ्चिन्नवीनतरया दार्शनिक्या दृष्ट्या विद्धद्भिः आत्मविलासाख्यस्य ग्रन्थस्य निर्माणं कृतम्।**

तदनन्तरमपरेऽपि ग्रन्थास्तैर्नवीनया दृष्ट्याऽन्येषु देशेषु भ्रमद्भिर्निर्मिताः। तेषु मुख्याः— महानुभवशक्तिस्तवः, विंशतिकाशास्त्रम्, श्रीसिद्धमहारहस्यम् इति। यथा—

"तत्रत्य कण्ठभट्टाख्यब्राह्मणप्रार्थनाद्रुतः।
ग्रन्थमात्मविलासाख्यं जग्रन्थ सुमनोरमम्।।"

(आ० वि० 7,7)

"सिद्धं समिद्धममितं हृदयेऽस्मदीये
वाक्कामशक्तिजननीव दिवस्य याऽऽप्तम्।
नोद्घाटनीयमपि सम्प्रति योगिनीना
मादेशतो विवृतमस्ति महारहस्यम्।।

(सि० म० र० 1,1)

~ मर्त्यलोकावतारे— **यथा मर्त्यलोकमवतीर्णं त्रिकशास्त्रं तथोक्तमागमेषु यथा—**

"तदा तस्य तु यच्छेषं तत्सर्वं दुष्टचेतसा।
अपहृत्य गतो लंकां रावणो देवकण्टकः।। इति
तदेवमागतं मर्त्ये भुवनाद्वासवस्य तु।
पारम्पर्यक्रमायातं रावणेनावतारितम्।।
ततो विभीषणे प्राप्तं तस्माद्दाशरथिं गतम्।"

(तं० आ० वि०, खं० 12, पृ०, 385)

"विभीषणेन रामस्य रामेणापि च लक्ष्मणे।
लक्ष्मणेन तु ये प्रोक्तास्तेषां सिद्धिस्तु हीनता।।
सिद्धेभ्यो दानवा ह्रस्वा दानवेभ्यश्च गुह्यकैः।
गुह्यकेभ्यो योगिभिश्च योगिभिश्च नरोत्तमैः।।
सम्प्राप्तं भैरवादेशात्तपसोग्रेण भैरवि।"

(तदेव, पृ०, 388)

रावणः स्वर्गादिदं शास्त्रं भुवमवतारितवान्। तस्य शिष्यो विभीषणः। विभीषणाद् रामेण रामाच्च लक्ष्मणेन तस्मात् सिद्धैस्तेभ्यो दानवैः दानवेभ्यो गुह्यकैस्तेभ्यो योगिभिस्तेभ्यो नरपुङ्गवैश्च क्रमेणोत्तरोत्तरापकर्षतो गृहीतं त्रिकशास्त्रम्। यथा—

"स्वर्गादर्धं रावणोऽथ जह्रे रामोऽर्धमप्यत।
विभीषणमुखादाप गुरुशिष्यविधिक्रमात्।।"
(तं० आ० 36,6)
"स्वर्गादर्धं जह्रे इति हठमेलापभङ्ग्या प्राप्तवानित्यर्थः।"
(तं० आ० वि०, खं० 12, पृ०, 384)
"रामाच्च लक्ष्मणस्तस्मात् सिद्धास्तेभ्योऽपि दानवाः।
गुह्यकाश्च ततस्तेभ्यो योगिनो नृवरास्ततः।।"
(तं० आ० 36-10)

~ सङ्गमादित्यतः— **त्र्यम्बकपरम्परायां पञ्चदशेन त्र्यम्बकेन ब्राह्मणकन्यया सह विवाहं विधाय सङ्गमादित्यो नाम पुत्रः समुत्पादितः। अग्रे च स एव त्र्यम्बकमठिकायाः गुरुरभवत्। त्र्यम्बकादित्यादसौ षोडशः परम्परायाम्। यथा—**

"यावत्पञ्चदशः पुत्रः सर्वशास्त्रविशारदः।।
स कदाचिल्लोकयात्रामासीनः प्रेक्षते ततः।
बहिर्मुखस्य तस्याथ ब्राह्मणी काचिदेव हि।।
रूपयौवनसौभाग्यबन्धुरा सा गता दृशम्।
दृष्ट्वा तां लक्षणैर्युक्तां योग्यां कन्यामथात्मनः।।
सधर्मचारिणीं सम्यग्गत्वा तत्पितरं स्वयम्।
अर्थयित्वा ब्राह्मणीं तामानयामास यत्नतः।।
ब्राह्मणेन विवाहेन ततो जातस्तथाविधः।
.....
नाम्ना स सङ्गमादित्यः ।।"
(शि० दृ० 7,114-119)

~ सर्वोत्कृष्टम्— **सर्वाण्यप्यन्यानि शास्त्राणि त्रिकशास्त्रोपायभूतानि। त्रिकमेवैकं साक्षात् परमोक्षफलदायि। वेदशैववामदक्षादीनामुत्तरोत्तरमुत्कृष्टत्वम्। यथा—**

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम्।।"
इति।
उद्ध०- (प० त्री० वि०, पृ०, 92)

"अनेनैवाशयेन च—
वाममार्गाभिषिक्तोऽपि दैशिकः परतत्त्ववित्।
संस्कार्यो भैरवे सोऽपि कुले कौले त्रिकेऽपि सः।।
इत्यादि श्रीनिशाचारादावुक्तम्।"
उद्ध०- (तं० आ० वि०, खं० 1, पृ०, 49)
"यथोर्ध्वाधरताभाक्सु देहाङ्गेषु विभेदिषु।
एकं प्राणितमेवं स्यात् त्रिकं सर्वेषु शास्त्रतः।।"
(तं० आ० 35,32)
"तस्माद् वैदिकात् प्रभृति पारमेश्वरसिद्धान्ततन्त्रकुलोच्छुष्मादिशास्त्रोक्तोऽपि यो नियमो विधिर्निषेधो वा सोऽत्र यावदकिञ्चित्कर एवेति सिद्धम्।"
(तं० सा० पृ०, 32)

एते त्रिकागमाः मायान्तरुत्कृष्टतरेषु भुवनेषु सालोक्य भूमौ शुद्धविद्याभूमिकास्थेषु भुवनेषु सायुज्यदृशा भेदाभेदभूमौ प्रापका भवन्त्यधिकारिभेदनीत्या। उत्तमाधिकारिवर्गं च शिवात्मकतां प्रापयन्तीति वेदितव्यम्।

त्रिकशास्त्रम्— त्रिकाचारप्रक्रियात्मकस्य परयोगादिसाधनाक्रमस्य प्रतिपादकं शास्त्रम्। तच्च काश्मीरशैवदर्शनस्य प्रयोगात्मकमङ्गम्। इदं तावत् त्रिप्रकारतया प्रवृत्तमत्र लोके- मन्दशक्तीनां कृते भेददृष्ट्या, मध्यानां कृते भेदाभेददृष्ट्या तीव्रबुद्धीनाञ्च कृते पराद्वैतदृष्ट्या; क्रमेण चात्र लोके श्रीमदमर्दकनाथेन, श्रीमच्छ्रीनाथेन, श्रीमत्त्र्यम्बकादित्यनाथेन च प्रवर्त्तितं श्रीकण्ठनाथाज्ञया। तेषु त्र्यम्बकनाथीया परम्पराऽद्यपि प्रचलति।

द्र०- **'त्रिकशासनम्'** इति।

~ परम् —(1) **सुसूक्ष्माणामिच्छाज्ञानक्रियाशक्तीनां सामरस्यम्। परमेश्वरस्योद्यजग्गदानन्दमयत्वेन स्वात्मानं विमृशतः या परस्पन्दात्मकतारूपा पञ्चकृत्यावभासनेच्छा, यच्च तत्रैव तथाविधं स्वप्रकाशरूपं ज्ञानं, या च तत्रैव तथाविधसंरम्भमयी स्वात्मविमर्शनरूपा क्रियातत्त्रयंसने स्थितं परं त्रिकमिति समाख्याते शास्त्रेषु क्वचित्-क्वचित्। तद् यथा—**

"एतत् परं त्रिकं पूर्वं सर्वशक्त्यविभागवत्।
.....
.....
तथा च गुरवः शैवदृष्टावित्थं न्यरूपयन्।
स यदास्ते चिदाह्लादमास्त्रानुभवतल्लयः।।
तदिच्छा तावती तावज्ज्ञानं तावत् क्रिया हि सा।
सूसूक्ष्मशक्तित्रितयसामरस्यैन वर्तते।।
चिद्रूपाह्लादपरमो तदाभिन्नो भवेदिति।"
(मा० वि०, वा०, 1, 20-24)

(2) **परतत्त्वस्य शिवरूपत्वं शक्तिरूपत्वमुभयसामरस्यरूपत्वं च साक्षात्करणीयं भवति। एवं कृते सत्येव ज्ञानं परिपूर्णतां याति योगिनाम्। ततो योगिभिः साक्षात्कार्यं परतत्त्वमेकमभिन्नं च सदेव त्रिप्रकारकं साक्षात्कारमाश्रित्य त्रिकरूपमुच्यते। तदिदं परं त्रिकं परतत्त्वात्मकम्। यथाः—**

"तदेवम् अत्र विसर्गप्रसरस्वभावत्वेन जगद्वैचित्र्यबीजभूतं शिवशक्तिसंघट्टात्मकपरत्रिकशब्दवाच्यम् अनाख्यात्मकम्.....
.....। तदुक्तम्—
'तत्रापि शक्त्या सहितः स्वात्ममय्या महेश्वरः।
यदा संघट्टमासाद्य समापत्तिं परां व्रजेत्।।
तदास्य परमं वक्त्रं विसर्गप्रसरास्पदम्।
अनुत्तरविकासोद्यज्जगदानन्दसुन्दरम्।।

भाविवक्त्राविभागेन बीजं सर्वस्य संस्थितम्।
हृत्स्पन्दोद्यत्परासारनिर्नामोर्म्यादि तन्मतम्।।
एतत्परं त्रिकं सूक्ष्मं सर्वशक्त्यविभागवत्।"

उद्ध०- (त० आ० वि०, खं० 1,पृ०, 7-8)

~ परापरम्— परमेश्वरस्येच्छाज्ञानक्रियारूपं यदन्तरङ्गं शक्तित्रयं तदेव परापरं त्रिकम्। अपरस्मिँस्त्रिके स्थितः साधकोऽस्य परापरत्रिकस्य साक्षात् स्वस्मिन्ननुभवं कुर्वन्नेव स्वात्मानं शिवत्वेन प्रत्यभिजानाति। तदिदं साधनोपायात्मकं त्रिकं परापरम्। इच्छादिशक्तित्रयवन्दनश्लोकारम्भे तथैव निर्दिष्टं जयरथेन। यथा—

"तदेव परं त्रिकं परामृश्य परापरमपि पराम्रष्टुमुपक्रममाणः प्रथमं तावत् परां देवीम् (इच्छाम्) परामृशति।"

(तं० आ० वि०, खं० 1,पृ०, 16)

~ शक्तीनाम्— तच्चेच्छाज्ञानक्रियाख्यं परमेश्वस्यान्तरङ्गशक्तित्रयम्।

द्र०- — 'त्रिकम्' ~ 'परापरम्' **इति।**

~ सर्वानुस्यूतम्— तत्त्वभेदनीत्या सर्वमपि वेद्यम्, भावनादि विषयत्वात्। सर्वमपि च प्रमातृवेद्यं सत् प्रमातृमयम्, सर्वमेव प्रमाणवेद्यं सत् प्रमाणमयम्। सप्तादि प्रमातृमयता वस्तूनां शिवरूपता, प्रमातृशक्त्यात्मकप्रमाणविषयता तेषां शक्तिरूपता, धारणालम्बनभूतवस्तुनः स्वं स्वरूपं प्रमातृभिः प्रमाणैर्वेद्यं त्रिकरूपम्। यथा—

"सप्तधेत्थं प्रमातृत्वं तत्क्षोभो मानता तथा।।
यत्तु ग्रहीतृतारूपसंवित्संस्पर्शवर्जितम्।
शुद्धं जडं तत्स्वरूपमित्थं विश्वं त्रिकात्मकम्।।"

(तं०आ०10,181-182)

त्रिकसद्भावः— त्रिकशास्त्रग्रन्थविशेषो यन्मतं मण्डलनिरूपणे समुल्लिखितं जयरथेन। यथा—

"श्रीत्रिकसद्भावदर्शितं त्रित्रिशूलमण्डलं प्रथमं वक्तुं प्रतिजानीते।"

(तं० आ० वि०, खं० 12,पृ०, 227)

"हैडरे त्रिकसद्भावे .....।"

(तं० आ० 28,15)

"एवं श्रीत्रिकसद्भावोक्तं शूलाब्जविन्यासमभिधाय ....."।

(तं० आ० वि०, खं० 12, पृ०, 252)

त्रिकसारः— (1) कोऽप्यागमिको ग्रन्थो यः समाश्रितोऽभिनवगुप्ताचार्यैस्तन्त्रालोके। यथा—

"अन्यथा न शिवं यायाच्छ्रीमत्सारे च वर्णितम्।।
अन्यायं ये प्रकुर्वन्ति शास्त्रार्थं वर्जयन्त्यलम्।
तेऽर्धनारीशपुरगा गुरवः समयच्युताः।।"

(तं० आ० 23,96,97)

"त्रिकसारोक्तमेव पठति।"

(तं० आ० वि०, खं० 10, पृ०, 302)

(2) किमपि त्रिकोपासनापुस्तकं काल्युपासनाप्रधानम्।

यथा—

(क) "सारशास्त्रे इति श्रीत्रिकसारे यदुक्तं तत्र—
'परां त्वेकाक्षरां मध्ये शंखकुन्देन्दुसुन्दराम्।
चतुर्भुजां चतुर्वक्त्रां योगनी द्वादशावृताम्।।'
इति।"

उद्ध० (तं० आ० वि०, खं० 2, पृ०, 236)

(ख) "तत्तदनुत्तराद्यामर्शरूपत्वमप्यासां संविदां श्री त्रिकसार एव भङ्ग्याभिहितम्। तत्र हि

'अथातः सम्प्रवक्ष्यामि वाग्विधानमनुत्तमम्।' इति वाच एव प्राधान्यमुपक्रम्य—

'तद्बीजं तु विभिन्नं वै स्वरैर्द्वादशभिः क्रमात्।।
ताश्चैव तु तथा देव्यः ..... इत्याद्युक्तम्।"

उद्ध०- (तं० आ० वि०, खं० 2, पृ०, 236)

द्र०- (स्व० तं० उ०, प०, 10, पृ०, 557, प०11, पृ०, 46, स्पं० प्र० पृ०, 33, तं० आ० वि० खं० 7/2, पृ०, 101, खं० 10, पृ०, 302 इति।

त्रिकसूत्रम्— परात्रीशिकाशास्त्रम्। यथा—

"उक्तं श्रीत्रिकसूत्रे च जायते यजनं प्रति।।
अविधिज्ञो विधिज्ञश्चेत्येवमादि सुविस्तरम्।"

(तं० आ० 12,15-16)

"त्रिक सूत्रे इति—त्रिकप्रमेयसूचिकायां श्रीपरात्रीशिकायामिति।"

(तं० आ० वि०, खं० 7/2, पृ०, 101)

त्रिकहृदयम्— किमप्यलभ्यं त्रिकाचारपुस्तकमागमकल्पम्। यथा—

"यदुक्तं श्रीत्रिकहृदये—
'स्वपदा स्वशिरश्छायां यद्वल्लंघितुमीहते।
पादोद्देशे शिरो न स्यात्तथेयं वैन्दवी कला।।'"

(शि० सू० वि०, पृ०, 4)

द्र०- (तं० आ० 31,54)

तदेव, प०, 1, पृ०, 34,

तदेव, प०, 8, पृ०, 25 ने० तं० उ०, खं० 1,पृ०, 36

तत्राप्ययमेव श्लोकः उद्धृतः। ततोऽनुमातुं शक्येत यत्क्षेमराजस्त्रिकतन्त्रसारमेव त्रिकहृदयमिति नाम्ना वक्ति स्मेति।

परं पद्यमेतत् श्री तन्त्रसारनामकस्यैव ग्रन्थस्य। यतोऽभिनवगुप्तपादैस्तथैवोक्तं परात्रीशिकाविवरणे 171 तमे

पृष्ठे। सम्भाव्यते यत्तस्य ग्रन्थस्य पूर्णमभिधानंश्री त्रिकतन्त्रसारः' इत्येवासीत्। तदेव संक्षेपत उक्तमाचार्य वर्यैः 'श्रीतन्त्रसार' इति। श्रीत्रिकहृदस्यान्येपरात्रीशिकाविवरणे पृ० 156 इत्यत्र। पद्यद्वयमुद्धृतम्।

त्रिकाचारः— सिद्धा, नामक (वामक) मालिनीरूपागमन्त्र-योपदिष्टो ज्ञानयोगभक्तिक्रियासमन्वयात्मकः उत्कृष्टतरस्तान्त्रिक-योगप्रधानाचारविशेषो यः काश्मीरेषु शैवेषु सुप्रचलत्यष्ट-माच्छतकादारभ्य, यस्य च गतिरद्यस्मिन् घोरेऽपि कलौ न समुच्छिन्ना सर्वथा। यथा—

द्र०- 'त्रिकप्रक्रिया' इति।

सर्वेष्वाचारेषु श्रेष्ठोऽयमाचारः। यथा—

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम्।।"

उद्ध०- (तं० आ० वि०, खं० 1, पृ०, 49)

त्रिकोणम् — ~ दर्शनसिद्धान्ते— स्वातन्त्र्यशक्ति। यथा—

"त्रिकोणे शक्तिवह्नौ सर्वशक्तिक्रोडीकारिण्यां स्वातन्त्र्यशक्तौ।"

(तं० आ० वि०, खं० 3, पृ०, 386)

~ मातृकाक्रमे — एकारो नाम वर्णः। अनुत्तरानन्द संविदोरिच्छेशनाभ्यां सह संघट्टे सति त्रिकोणाख्यस्य एकारस्य स्थितिः। यथा—

"अनुत्तरानन्दचिती इच्छाशक्तौ नियोजिते।।
त्रिकोणमिति तत्प्राहुर्विसर्गामोदसुन्दरम्।"

(तं० आ० 3,94-95)

~ रहस्यचर्यासु— स्त्रीयोनिः चर्याक्रमे तदुक्तम्—

"त्रिकोणमित्यनेन योगिनी वक्त्रापरपर्यायजन्माधार-रूपत्वमप्यस्य सूचितम्।"

त्रिकोणं भगमित्युक्तं वियत्स्थं गुप्तमण्डलम्।
इच्छाज्ञानक्रियाकोणं तन्मध्ये चिञ्चिनीक्रमम्।।

उद्ध०- (तं० आ० वि०, खं० 2, पृ०, 104)

त्रितत्त्वदीक्षा—क्रमेण तत्त्ववर्गत्रयशोधनात्मको दीक्षाविधिः यथा—

"त्रितत्त्वदीक्षायां तु आत्मतत्त्वे क्षित्यादिमायान्तानि एकत्रिंशत्तत्त्वानि, निवृत्तिः प्रतिष्ठा विद्या कलाः, कालाग्न्याद्यनन्तान्तं भुवनानां शतमेकनवत्यधिकं, प्रकृतिकोष्ठकेशदिग्गतप्रणवात्प्रभृति पूर्वपद्मगतयाम्यक्षकारान्तं पदान्येकोनसप्ततिः, सद्योजात-वामदेवाघोरहृदयशिरः शिखाकवचाः सप्त मन्त्राः, क्षादिद्यान्ताः एकत्रिंशद्वर्णाः।।1।।

विद्यातत्त्वे शान्ता कला, विद्येश्वरसदाशिवास्तत्त्वानि, विद्याराज्ञ्यादिसदाशिवभुवनान्तानि सप्तदश भुवनानि, पदानि पूर्व-पद्मात् र-ओं-ह इति त्रीणि, मध्यपद्मादूकाराद्या हकारान्ता अष्टौ इत्येकादश, तत्पुरुषास्त्रे मन्त्रौ, ग-ख-क-वर्णाः ।।2।।

शिवतत्त्वे शक्तिशिवौ तत्त्वे, पदं प्रणवः, भुवनादि प्राग्वत्। ।।3।।"

(स्व० तं० उ०, प० 5, पृ०, 33-34)

रहस्यप्रायोऽयं विषयोः न स्पष्टीकृतो ग्रन्थेषु, ततो गुरूपदेशगम्य एवेति प्रतिभाति तावत्। क्रियाडम्बरात्मिका प्रक्रियाऽसौ लुप्तेदानीम्।

त्रितत्त्वन्यासः— षोडान्यासे तृतीयो भैरवसद्भावादिन्यासः। यथा—

"त्रितत्त्वं भैरवसद्भावरतिशेखरनवात्मरूपम्"।

(तं० आ० वि०, खं० 9, पृ०, 123)

भैरवसद्भावः, रतिशेखरः, नवात्मा चेति त्रयोबीजपिण्डात्मकमन्त्रविशेषाः तत्रतत्र द्रष्टव्याः।

त्रितत्त्वम्— शिवः शक्तिर्नरश्चेति त्रिकम्। यथा—

"शिवः शक्तिस्तथात्मा च त्रितत्त्वं चेत्यनुत्तमम्।"

(ने० तं० 21,47)

त्रितत्त्वविधिः — ~ तत्त्वाध्वनि— तत्त्वा-ध्वभावनाविशेषे सप्तप्रमातृतत्त्वानि तेषां क्षेत्राणि च प्रमेयतत्त्वानि सर्वाणि तत्त्वत्रयरूपेण भाव्यन्ते। तद्यथा—

(1) सकलाद् विज्ञानाकलपर्यन्तम्, धरातत्त्वाच्च मायान्तम् = आत्मतत्त्वम् (जीवतत्त्वमिति)।

(2) मन्त्राः मन्त्रेश्वराश्च तथा शुद्धविद्येश्वरतत्त्वे च = विद्यातत्त्वम्।

(3) मन्त्रमहेश्वराः शिवश्च सदाशिवशक्तिशिवतत्त्वानि = शिवतत्त्वम्।

यथा—

"..... त्रितत्त्वमधुनोच्यते।।
विज्ञानाकलपर्यन्तमात्मा विद्येश्वरान्तकम्।
शेषे शिवस्त्रितत्त्वे स्यात्.....।।"

(तं० आ० 11,34-35)

"विज्ञानाकलपर्यन्तमात्मतत्त्वमुदाहृतम्।
ईश्वरान्तं हि विद्याहं शेषं शिवपदं विदुः।।"

उद्ध०- (मा० वि० तं० 2,47)

(तं० आ० वि०, खं० 7/2,पृ०, 31)

यद्यपि तत्त्वप्रकाशे सदाशिवतत्त्वं विद्याक्षेत्र एव गणितं यद्यपि च सदाशिवान्तं शुद्धविद्याया एव क्षेत्रम्, तथापि सिद्धान्तदृष्ट्या तत्तथा। इदं वर्गीकरणं च भावना-विशेषाङ्गत्तयैवमुक्तं, सदाशिवस्य शुद्धविद्यान्त-र्विद्यमानतायामपि शुद्धेरेव प्रधानत्वं, तदेव च तस्य सदैव शिवत्वमेवेति सदाशिवत्वम्।

द्र०- 'सदाशिवः' ~ सदाशिवत्वम् (तस्य) इति।

"विज्ञानाकलपर्यन्तमात्मकला, ईशान्तं विद्याकला, शिष्टं शिवकला, इति त्रितत्त्वविधिः।"

(तं० सा० पृ०, 111)

त्रितनुः— ओङ्कारः। अकारोकारमकारशरीरः। यथा—

"त्रितनुमोङ्कारम्।"

(ने० तं० उ०, खं० 2, पृ०, 50)

रहस्यात्मकमभिधानमेतत् प्रणवस्य।

त्रिदेहः— चिन्मात्रतया, अन्तर्यागख्यातत्त्वेन, बहिरवस्थितत्वेन च त्रिरूपेण विराजमानः शिवः। यथा—

"आवाहयेत्ततो देवं त्रिदेहपरिकल्पितम्।"

त्रिदेहेति चिन्मात्रतया अन्तर्यागख्यातेन बहिस्त्वेन च रूपेण त्रिभिर्यथोत्तरं व्याप्यव्यापकतया स्थितैः परसूक्ष्मस्थूलै-र्निष्कलादिसारैः देहैः परिकल्पितमनुत्तरैकरूपमपि—

स्वातन्त्र्यामुक्तमात्मानं स्वातन्त्र्यादद्वयात्मनः।
प्रभुरीशादिसङ्कल्पैर्निर्माय व्यवहारयेत्।।
इति प्रत्यभिज्ञोक्तनीत्या त्रित्वेन विभक्तम्।"

(ने० तं० उ०, खं० 1, पृ०, 79)

त्रिधा निश्चयः— सिद्धान्तनिश्चयस्य त्रयः उपायाः। प्रथमं गुरुर्यः सिद्धान्तमुपदिशति। ततः शास्त्रं यत्रोहापोहपूर्वकं तद्विषये विमर्शनं विधीयते। गुरूक्तं हि शास्त्रसंवादेनैव विश्वासार्हतामुपयाति। तदनन्तरञ्च सिद्धान्तः स्वानुभवेन सुनिश्चितो भवति। एष एव हि परमो निश्चयोपायः। शास्त्रसम्भवतोऽपि सिद्धान्तः सर्वथा निःशङ्कतां पूर्णतया विश्वासनीयतां च स्वानुभवत एवोपयाति। यतः। यथा—

"..... प्राधान्यं प्रकटं स्वसंविदः।
गुरुतः किल शास्त्रतः स्वतः तदयं मुख्यतया कृतः श्रमः
शास्त्रवृत्तिपरतन्त्रितो गुरुः स्वात्मसंविदि च तत् प्रतिष्ठितम्।
तेन सर्वमिदमात्मसंविदा सिद्धमेति न हि जात्वसह्यताम्।।"

(मा० वि० वा० 2, 267-268

द्र०- **'ज्ञानम'** ~ त्रिप्रत्ययम्। इति।

त्रिनेत्रता — ~ शिवस्य— इच्छाज्ञानक्रियाशक्तिमत्ता परमेश्वरस्य। यथा—

"एवं ममेच्छा ज्ञानाख्या क्रियाख्या शक्तिरुच्यते।।
सूर्याचन्द्रमसौ वह्निस्त्रिधामपरिकल्पना।
त्रिनेत्रकल्पना मह्यं तदर्थमिह दृश्यते।।
दहनाप्यायने तेन प्राकाश्यं विदधाम्यहम्।"

(ने० तं० 1, 29-31)

एतच्छक्तित्रयमेवाग्रे स्फुटतां यातं सत् सूर्यचन्द्रवह्निरूपनेत्रत्रयकल्पनाया आधारतां यातीति तात्पर्यमागमवाक्यस्य।

~ रुद्रस्य— **अभेददृष्टिसमुन्मेष एव रुद्रस्य तृतीयं नेत्रम्। यथा—**

"एषां (रुद्रदशाप्रविष्टानां) मध्यमे महाव्योम्नि एकघनतासमापत्त्यभावेऽप्यनुप्रवेशमात्रमस्ति, इति तृतीयेन नेत्रेणोदान महातेजः प्रबोधाद् भेददहनात्मना योगः।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 310)

त्रिपुरसुन्दरीमन्दिरस्तोत्रम्— महेश्वरानन्दस्य परमगुरुणा शिवानन्दनाथेन रचितं किमपि देवीस्तोत्रम्। यथा—

"यदुक्तमस्मत् परमगुरुभिः श्रीत्रिपुरसुन्दरीमन्दिरे स्तोत्रे।"

(म० मं० प० पृ०, 188)

त्रिप्रमाणता— गुरूपदेशशास्त्रविमर्शनस्वानुभूतिसिद्धता। यथा—

"उक्तं यथा—शास्त्रगुरुस्त्वप्रत्ययसिद्धोऽयमर्थः।"

(ई० प्र० वि०, खं० 2, पृ०, 272)

दर्शनविद्यातत्त्वं हि प्रथमं गुरुतः श्रूयते, तदनन्तरं शास्त्रचिन्तनेन दृढीक्रियते। अन्ततश्च स्वानुभवेन स्वयं संवेद्यते। तदाऽसौ नितरां दृढीभवति। यथा—

"अस्यार्थस्य स्वप्रत्ययसिद्धस्यापि गुरुपरम्परोपदेश उपोद्बलको वक्तव्यः, शास्त्रदृष्टिर्हि दर्शितागमाधिकारेण; एवं गुरुतः शास्त्रतः स्वत एतद्दृढीकृतं भवति।"

(ई० प्र० वि०, खं० 2, पृ०, 270-271)

त्रयाणामप्येषां प्रमाणानां सम्यक् संवादे सत्येव तत्त्वज्ञाने दृढो निःशङ्कश्च विश्वासो जायते।

त्रिमूर्तिः— ब्रह्माविष्णुरुद्रशरीर ईश्वरभट्टारकः। यथा—

"त्रिस्वरूपस्तथा देवो रुद्रो विष्णुः पितामहः।
करोति षड्विधां सृष्टिं चतुर्भेदविभेदिताम्।।"

(ने० तं० 21,48)

त्रिवर्गता ~ आगमानाम्— **भेदमयीं भेदाभेदमयीमभेदमयीं च दृष्टिमाश्रित्य क्रमेण शिवै रूद्रैर्भैरवैश्च प्रोक्ता शैवा आगमास्त्रिवर्गमयाः। अभेददृष्ट्या समुपदिष्टाश्चतुःषष्टिर्भैरवागमाः, भेदाभेददृष्टिप्रधानाश्च रौद्राः अष्टादश, भेददृष्टिप्रधाना शिवागमाश्च दश प्रसिद्धाः। दशाष्टादशागमानां दक्षिणभारते विशेषः प्रचारः। उत्तरे भारते एव तदतिरिक्तानां भैरवागमानां प्रचारः। दशाष्टादशानामागमानां नामानि परिगणितानि श्रीकण्ठीसंहितायाम्। तत्रैवाष्टाष्टमात्मकानां चतुःषष्टिभैरवागमानामप्युल्लेखः। स च सर्वः समुद्धृतो जयरथेन तन्त्रालोकटीकायाम्। इत्थं दृष्टित्रयप्रधानतया त्रिवर्गकाः शैवागमाः मुख्याः। यथा—**

"इत्थं तन्त्रं रुद्रशिवभैरवाख्यं स्थितं त्रिधा।
वस्तुतो हि त्रिधैवेयं ज्ञानसत्ता विजृम्भते।।
भेदेन भेदाभेदेन तथा चाभेदसन्धिना"।

(मा० वि० वा० 1, 391-392)

~ योगिनाम्— **अभेदनिष्ठा योगिनः, भेदाभेदनिष्ठा प्रबुद्धाः, भेदनिष्ठाश्चाप्रबुद्धाः। यथा—**

"एतेनाद्वैतमेव सर्वसारः.....।
यासु क्रमात् सुप्रबुद्धः, प्रबुद्धोऽप्रबुद्ध इति योगितारतम्यम्।"

(म० मं० प०, पृ०, 47)

त्रिविधं शरीरम्— स्थूलं सूक्ष्मं परञ्चेति त्रिविधं शरीरम् । यथा —

"महाभूतात्मकं स्थूलं सूक्ष्मं पुर्यष्टकात्मकम्।
समनान्तं परं प्रोक्तं शरीरं त्रिविधं बुधैः।।"

(पू० प्र०, खं० 1, 525)

त्रिविधः समावेशः— शैवः शाक्तः आणवश्चेति समावेशस्त्रिधा। यथा—

"समावेशोऽपि त्रिविधः शैवः शाक्तस्तथाणवः।
इच्छाज्ञानक्रियायोगादुत्तरोत्तरसम्भृतः।।"

(पू० प्र०, खं० 1,74)

त्रिविधा ज्ञानसत्ता— अभेदोपायात्मा शाम्भवः भेदाभेदोभयात्मकः शाक्तः आणवश्च भेदोपायमयः। यथा—

"वस्तुतत्रिविधैवेयं ज्ञानसत्ता विजृम्भते।
अभेदेन पुनर्भेदाऽभेदेनापि च भेदतः।।
अभेदोपाय एवोक्तः शाम्भवः शाक्त उच्यते।
भेदाभेदोभयात्मा यो भेदोपायः स आणवः।।"
(पू० प्र०, खं० 1,71-72)

त्रिशक्तिः— इच्छाज्ञानक्रियाशक्तिमान् चिदानन्दात्मकः शिवः। स एव कुलप्रक्रियायां पराशक्तिमान्, परापर-शक्तिमान्, अपरशक्तिमाश्चेति त्रैधमुपास्यते। यथा—

"कुलप्रक्रियायां तिस्त्रः शक्तयः पराद्याः।"
(तं० आ० वि०, खं० 1, पृ०, 153)

त्रिशिरः — त्रिशिरो भैरवागमः इति।

त्रिशिरो भैरवः — त्रिशिरो भैरवागम इति।

द्र०- **'त्रिशिरो भैरवागमः'** इति।

त्रिशिरो भैरवम्— आगमशास्त्रविशेषः।

द्र०- **'त्रिशिरो भैरवागम'** इति।

त्रिशिरो भैरवागमः— किमप्यतीव माहात्म्यमण्डितं शैवागमशास्त्रं यदद्यत्वे नैव लभ्यते क्वापि, परं यदाचार्याभिनवगुप्तपादैर्बहुधोपजीव्यत्वेन स्मृतं तन्त्रालोकादौ बहुप्रकारतया च यस्य नामोल्लेखः कृतस्तत्र, समुद्धृताश्च शब्दशः काश्चन पङ्क्तयः क्वचित्क्वचित्, क्वापि चार्थश एवानुवादः कृतस्तासामृजयरथेन च तन्त्रालोकविवेके भूरिशोऽस्य वाक्यान्युद्धृतानि सविस्तरम्। तानि च तत्रतत्रैव द्रष्टव्यानि। अस्यागमस्य नामान्तराणि — केवलं त्रिशिरः इति, त्रिशिस्स्तन्त्रम् इति, त्रिशिरो भैरव इति, त्रिशिरो मतमिति, त्रिशिरः शासनमिति, त्रिशिरः शास्त्रमिति, त्रैशिरसमिति, श्रीमत् त्रैशिरसमिति च।

उपजीव्येष्वागमशास्त्रेषु प्राधान्यमभजतैष आगमस्त्रिके इति प्रतीयते। विशेषतः योगसाधनाविषयेषु। अन्येष्वपि टीकाग्रन्थेषु समुद्धृतान्यस्य वाक्यानि। तत्र तत्र तानि द्रष्टव्यानि। सूचिस्तेषामत्रदीयते यथा—

(तं०आ०1,82-114; 3,137-141, 256, 4; 274-275; 5, 9-10, 20, 86-91, 128-130, 136, 137; 15,69-70,370,436,540-545; 17,83,28,63, 64,112, 320-324; 29,9,110,111,141-146 16,4।
तं० आ० वि०, खं० 1, पृ०, 131-132, 157,177;
खं०2,पृ०,142,143,237,
खं०3,पृ०,279-280, 400-405,421,
खं०5,पृ०,9-11,
खं०9,पृ०,64,65,221;
खं०12,पृ०,179,180,187,198-199;
शि०सू०वि०पृ०,30, प्र०ह०पृ०9,
रव०तं०,उद्०,प०10,पृ०,556,
ने०तं०,उद्०,खं०2,पृ०,30
शि०स्तो०वि०,पृ०,278 इति।)

त्रिशिरश्शासनम्— त्रिशिरो भैरवागमः इति।

त्रिशिरश्शास्त्रम्— त्रिशिरो भैरवागमः इति।

त्रिशिरस्तन्त्रम्— त्रिशिरो भैरवागमः। यथा—

"उक्तं च त्रिशिरस्तन्त्रे विमलासनगोचरः।
अक्षषट्कस्य मध्ये तु रुद्रस्थानं समाविशेत्।।"
(तं० आ० 29,110-111)

त्रिशिरोमतम्— त्रिशिरो भैरवागमः इति।

त्रिशूलम्— ~ आयुधम्— इच्छाज्ञानक्रियात्मकं शिवस्य यच्छक्तित्रयं तस्यैव प्रतीकभूतम् शिवस्यायुधम्। यथा—

"ननु कामादेस्तत्त्वत्रयस्येच्छादिशक्तित्रयरूपत्वमस्ति।"
(तं० आ० वि०, खं० 2, पृ०, 171)

"इच्छा कामो विषं ज्ञानं क्रिया देवी निरञ्जनम्।
एतत् त्रयसमावेशः शिवो भैरव उच्यते।"
(तं० आ० 3, 172-173)

"जयमूर्तत्रिशक्त्यात्मशितशूलोल्लसत्कर।"
(शि० स्तो० 14,4)

~ उच्चारयोगे— शरीरे नाडीचक्रविशेषः। यथा—

"नाडीत्रयसंघट्टात्मकत्वात् त्रिशूललक्षणां ब्रह्मारन्ध्रोर्ध्व-वर्तिनीं नाड्याधारामिधां भूमिम्।"
(तं० आ० वि०, खं० 3, पृ०, 357)

~ दर्शनसिद्धान्ते— (1) परम्परसंघट्टतामाप्ताः इच्छाज्ञानक्रियाशक्तयस्त्रिशूलम्। यथा—

"लोलीभूतमतः शक्तित्रितयं तत् त्रिशूलकम्।"
(तं० आ० 3,108)

"एतेष्वेव प्रसङ्गेषु सर्वशक्तिविलोलता।"
(शि० दृ० 1,11)

"इत्थमिच्छाक्रियाज्ञानशक्तिशूलाम्बुजाश्रितः।
भैरवः सर्वभावानां स्वभावः परमेश्वरः।।"
(बो० पं० द०, 15)

"अनुत्तरानन्दशक्तिस्त्रिकोणाद्वृत्तियोगतः।
तथैवोन्मेषयोगेन क्रियाशक्तेः स्फुटं वपुः।।
उक्तं त्रिशक्तिसंघट्टात्त्रिशूलं द्वैतघस्मरम्।।"
(अ० प्र० पं०, 35,6)

(2) लोलीभूतमिच्छाज्ञानक्रियाख्यं शिवस्यान्त-रङ्गशक्तित्रयम्। यथा

"लोलीभूतमतः शक्तित्रितयं तत् त्रिशूलकम्।"
उद्ध०- (तं० आ० वि०, खं० 1, पृ०, 19)

आगमकीयं संज्ञा साधनोपदेशेषु प्रयुज्यते लोलीभूतत्वं क्षीरनीरन्यायेनैकीभूततया स्पन्दमानत्वमत्र शक्तित्रयस्य, न

पृथक्-पृथगवभासमानत्वम्, अपितु सममेवेति। अतोऽत्र यैव स्वातन्त्र्यशक्तिः सैवेच्छा, सैव ज्ञानं, सैव च क्रियेति। यथा—

"स्वान्त्र्यशक्तिस्फारितेच्छाद्यरात्र्यात्मकत्रिशूलाङ्क।"

(वि० भै० उ०, पृ०, 16)

~ बीजपिण्डाङ्गम्— **त्रिशूलबीजम्—औकारः। सौरिति बीजमन्त्रस्याङ्गमिदं बीजम्, तत् औकार एव। यथा—**

"..... त्रिशूलेन तु ताडयेत्।।
..... विसर्गेण पुनः पुनः।
ताडयेत् कलाः सर्वाः कम्पतेऽसौ ततः पशुः।।"

(तं० आ० 24,13-14)

~ बीजमन्त्ररूपोवर्णः— **जकारः। यथा—**

"त्रिशूलं ज"

(तं० आ० वि०, खं० 12, पृ०, 202)

संशयग्रस्तमिवैतद्व्याख्यानं त्रिशूलपदस्य। अन्यत्रौकारस्य स्पष्टतयोक्तं यतस्त्रिशूलत्वम्। कदाचित् त्रिशूलम् और इत्येव पाठः साधुः स्यात्। विचारणीयोऽयं विषयः पुनरपि विवेकवद्भिः सुधीभिः। कदाचिल्लेखकसम्पादकप्रमादतः एव "त्रिशूलं ज" इति पाठो मुद्रितो भवेत्।

~ मातृकाक्रमे— **(1) इच्छाज्ञानक्रियाणां संघट्टात्मको य औकाररूपो मातृकावर्णस्तस्य त्रिशूलमित्यागमिकं नाम रहस्यात्मकम्। क्रियाशक्तेः परिपूर्णस्य रूपस्य व्यञ्जकोऽयं मातृकावर्णः। यथा—**

"अस्मिँश्चतुर्दशे धाम्नि स्फुटीभूतत्रिशक्तिके।।
त्रिशूलत्वमतः प्राह शास्ता श्रीपूर्वशासने।"

(तं० आ० 3,104-105)

(2) परिपूर्णं विकासं प्राप्ता क्रियाशक्तिरौकारेणाभिव्यज्यमानतायां त्रिशूलमिति समाख्यायते आगामिकसाधनाक्रमे। इच्छाज्ञानयोरप्यत्रैव समावेशादस्याः परिपूर्णता शूलत्रयरूपता च। यथा—

"औकारे एव क्रियाशक्तिपरिस्पन्दः परिसमाप्यते इति इच्छाज्ञानयोरत्रैवान्तर्भावात्, त्रिशूलरूपत्वमस्य षडर्धशास्त्रे निरूपितम्।"

(प० त्री० वि०, पृ०, 176)

~ शिवयोगिनाम्— **शिवयोगिनामिच्छाज्ञानक्रियाशक्तिस्वातन्त्र्योपलक्षणरूपं चिह्नम्। यथा—**

"शूलं पुनः—
'इत्थमिच्छाक्रियाज्ञानशक्तिशूलाम्बुजाश्रयः।
इति न्यायादिच्छाज्ञानक्रियात्मकं शक्तित्रयम्।'"

(म० मं० प०, पृ०, 185)

त्रिशूलमुद्रा— कराङ्गुलिसन्निवेशविशेषरूपा। यथा—

"कनिष्ठिकां समाक्रामेदङ्गुष्ठेन समाहितः।
प्रसार्य चाङ्गुलीस्तिस्रस्त्रिशूलं परिकीर्तितम्।।"

(स्व० तं० 14,13)

"वीर्यं च अस्य तत्रैव (श्री भैरवानुकरणस्तोत्रे) दर्शितम्-
'ज्वलदिच्छादिकशक्तित्रितयां तां सुन्दरीं परां शक्तिम्।
देवानुकरोषि बहिस्त्रिशूलधारणमिषेण नित्यमपि।।' इति।"

उद्ध०- (स्व० तं० उ०, प० 13, पृ०, 116)

~ तद्रहस्यम्— **उदानाख्ये प्राण प्राणापानयोरेकीकारः एव त्रिशूलिनीरहस्यम्। स चैकीकारो देहाङ्गसन्निवेशविशेषपूर्वकं तीव्रया भावनया विधीयते। यथा—**

"शून्याशून्यालये कृत्वा एकदण्डेऽनिलानलौ।।
शक्तित्रितयसम्बद्धे अधिष्ठातृत्रिदैवते।
त्रिशूलं तद् विजानीयाद्येन व्योमोत्पतेद्बुधः।।"

(तं० आ० 32,16-17)

खेचर्या एव कश्चन प्रकार इति प्रतीयते। यथा—

"अनिलानलौ प्राणापानावर्थाद् मध्यप्राणे समरसितौ कृत्वा ..... अधिष्ठातृ त्रिदैवते इति भूमध्याद्यवस्थितेश्वरसदाशिवानाश्रिताख्यकारणत्रयाधिष्ठिते इत्यर्थः। तथाशक्तिव्यापिनीसम्बद्धे तत् संयोगमाप्ते, अत एव परपदप्राप्त्यां शून्याशून्यालये विगलित सदसदादिशब्दव्यवहारे इत्यर्थः।"

(तं० आ० वि०, खं० 12, पृ०, 312)

"बद्ध्वा तु खेचरीं मुद्रां ध्यात्वात्मानं च भैरवम्।
खेचरीचक्रसञ्जुष्टं सद्यस्त्यजति मेदिनीम्।।"

(तं० आ० 32, 19-20)

"आकाशभावं सन्त्यज्य सत्तामात्रमुपस्थितः।
शूलं समरसीकृत्य रसे रस इव स्थितः।।"

(तं० आ० 32, 18)

त्रिशूलनीमुद्रा— एवं हि सा वर्णिता—

"जत्रुवधस्तात्करौ कृत्वा वामपादं च दक्षिणे।
विदार्यास्यं कनिष्ठाभ्यां मध्यमाभ्यां तु नासिकाम्।।
अनामे कुञ्जयेत् प्राज्ञो भ्रूमङ्गं तर्जनीद्वयम्।
जिह्वां च चालयेत् मन्त्री हाहाकारं च कारयेत्।
त्रिशूलेन प्रयोगेण ब्रह्मरन्ध्रमुपस्थितः।।
पदं सन्त्यज्य तन्मात्रं सद्यस्त्यजति मेदिनीम्।"

(तं० आ० 32, 13-16.)

"जत्रु शब्देनात्र कण्ठो लक्ष्यते.....चालयेदिति भ्रूभङ्गादौ त्रयेऽपि योज्यम्।"

(तं० आ० वि०, खं० 12, पृ०, 311)

खेचर्या एव प्रकाशविशेषः इति प्रतीयते।

~ तत्फलम्— **उक्तं स्पष्टमेव यथा—**

"त्यक्ताशंको निराचारो निःशङ्को लोकवर्जितः।।
अवधूतो निराचारो नाहमस्मीति भावयन्।
मन्त्रैकनिष्ठः संपश्यन् देहस्थाः सर्वदेवताः।।
ह्लादोद्वेगास्मिताक्रुष्ट निद्रामैथुनमत्सरे।
रूपादौ वा कर्तृकर्मकरणेषु च सर्वशः।।
नाहमस्मीति मन्वान एकीभूतं विचिन्तयन्।
कर्णाक्षिमुखनासिकादिचक्रस्थं देवतागणम्।।
ग्रहीतारं सदा पश्यन् खेचर्या सिद्ध्यति स्फुटम्।"

(तं० आ० 32, 20-24.)

खेचर्या एव प्रकारविशेषोऽयम्।

त्रीशिका— **(1) तिसृणां परापरादिदेवीनामीशिका सती परापारमेश्वरी शक्तिस्त्रीशिकेत्युक्ता आगमेषु।**

द्र०- (तं० सा०, पृ०, 27)

(2) परिपूर्णस्य परमेश्वरस्य पूर्णतामयी पराशक्तिरेव त्रीशिकेत्युच्यते।

द्र०- **'ऊर्मिः'** इति।

(3) परामभट्टारिका इच्छाज्ञानक्रियाणां स्वामिनी पराशक्तिः। यथा—

"तिसृणां शक्तीनामिच्छाज्ञानक्रियाणां सृष्टयाद्युद्योगादिनामान्तरनिर्वाच्यानामीशिकेश्वरी, ईशना चेशितव्याव्यतिरेकेणैव भाविनी—इत्येतच्छक्तिभेदत्रयोत्तीर्णा तच्छक्त्यविभागवती भट्टारिका परा।"

(प० त्री० वि०, पृ०, 16-17)

~ ग्रन्थः— **परात्रीशिकाख्यमागमशास्त्रं यं लोके विद्वांसोऽपि प्रामादिकतया परात्रिंशिकेति वदन्ति। यथा—**

"तद्योगादेव चेदमभिधानं त्रीशिकाख्यम्।"

(प० त्री० वि०, पृ०,17)

"न तु त्रिंशच्छ्लोकयोगात् त्रिंशिका।"

(तदेव)

त्रैविध्य-धारणा — ~ **तत्त्वभेदने—मन्त्रमहेश्वरे धारणालम्बनीकृते सति शिवेन तच्छक्त्या च वेद्यतया ताभ्यामोतप्रोततया दर्शने त्रिधासाक्षात्कारः। एवमेव सादाख्यतत्त्व धारणायाम्। अत्र प्रमाता=1, प्रमाणम्=1, आलम्बनस्वरूपम्=1, इति त्रिधात्वम्। यथा—**

"त्रिधा मन्त्रेश्वरेशानाः .....।"

(तं० आ० वि०, खं० 12, पृ०, 202)

उद्ध०- (मा० वि० तं० 2,7)

(तं० आ० वि०, खं० 7, पृ०, 6)

मन्त्रेश्वराणामपीशाना मन्त्रमहेश्वरा इति।

त्रैशिरसम्— **त्रिशिरो भैरवागमः इति।**

त्र्यक्षरः — ~**मन्त्रः**— **मृत्युञ्जयमन्त्राङ्गभूतं बीजत्रयम्। यथा—**

"ओङ्कारमुच्चरेत्पूर्वं जुं- सश्च तदनन्तरम्।
नेत्रत्रयं प्रकल्पेत विद्यादेहस्य भामिनि।।"

(स्व० तं० 1,63)

"त्र्यक्षरस्तु ऊर्ध्वदक्षिणवामनेत्रत्रयस्य.....।"

(स्व० तं० उ०, प०1, पृ०,52)

अस्माकं गुरूपदेशानुसारं द्वितीयमक्षरं दीर्घस्वरयुतमेव न ह्रस्वयुतम्।

त्र्यम्बकः — ~ आचार्यः— **कलियुगे अद्वैतशैवदर्शनस्य पुनः प्रवर्तयिता गुस्त्र्यम्बकादित्यो, दुर्वाससः शिष्यः। यथा—**

"तेषां क्रमेण तन्मध्ये भ्रष्टं कालान्तराद्यदा।
तदा श्री कण्ठनाथाज्ञावशात् सिद्धा अवातरन्।।
त्र्यम्बकामर्दकाभिख्य श्रीनाथा अद्वये द्वये।
द्वयाद्वये च निपुणाः क्रमेण शिवशासने।।"

(तं० आ० 36,11,12)

'त्र्यम्बकादित्य' इति।

~ शिवः— **अम्बिकेत्युक्तानां तिसृणां शक्तीनामिच्छाज्ञानक्रियाणामीश्वरः शिवः। यथा—**

"भगवतः स्वातन्त्र्योद्रेकबलेनोन्मेष्यमाणानां चेच्छादीनां, शक्तित्वं तिसृणां देवीनां दर्शितं, यतोऽसौ त्र्यम्बक इति प्रसिद्धः। तथा च शतरुद्रियं, 'तिस्त्रो देव्यो यदा चैनं नित्यमेवाभ्युपासते' इत्यादि।"

(ई० प्र० वि० वि०, खं० 2, पृ०,134)

अत्र "शतरुद्रियं" इति पाठो लेखकप्रमादमूलः प्रतिभाति। अथवा शतरुद्रियोपोद्घातभागस्थमिदं वाक्यं स्यात्।

"तिस्त्रो देव्यो यदा चैनं नित्यमेवाभ्युपासते।
त्र्यम्बकस्तु तदा ज्ञेयः .....।।"

(स्व० तं० उ०, प० 2, पृ०,48)

(2) शक्तित्रयोद्भावितमहिममण्डितः शिवः। यथा—

"त्र्यम्बक इति— 'तिस्त्रो देव्यो यदा चैनं .....', इति शक्तित्रयपरिपूर्णत्र्यम्बकदास्यलक्ष्मीयोगात्।"

(ई० प्र० वि० वि० ,खं० 3, पृ०, 404)

त्र्यम्बक मठिका— **प्रथमेन त्र्यम्बकादित्येन पुत्रद्वारा प्रवर्तिता अभेदप्रधानशैवदर्शनमठिका पूर्वं कैलाशपर्वते त्र्यम्बकाख्यायां गुहायां विकसन्ती पश्चात् सङ्गमादित्येन कश्मीरानानीय तत्रैव संरोपिता तत्र च 'तेरम्बा' इति देशभाषायां प्रसिद्धा। यथा—**

"एवमेषां त्र्यम्बकाख्या तेरम्बा देशभाषया।।
स्थिता शिष्यप्रशिष्याद्यैर्विस्तीर्णा मठिकोदिता।"

(शि० दृ० 7,121-122)

त्र्यम्बकशैवदर्शनम्—

द्र०- **'अद्वैतशैवदर्शनम्'** इति।

त्र्यम्बकादित्यः— **शैवशास्त्रप्रचारकः सिद्धो दुर्वाससः शिष्योऽद्वैतशैवदर्शनस्य पुनः प्रवर्तयिता। यथा—**

"अद्वैतशैवशास्त्रं भगवद्दुर्वाससो वदनकमलात्।
सरहस्यं सोपानं सिद्धः सम्प्राप त्र्यम्बकादित्यः।।"

(स्वा० द०,7)

~ चतुर्दशः— **प्रथमेन त्र्यम्बकादित्येन शैवागमरहस्यानि स्वकीये मानसे पुत्रे द्वितीये त्र्यम्बकादित्ये संक्रामितानि, स्वयं चोत्क्रान्तवानुपरितनान् सिद्धलोकान्। द्वितीयेनाप्येवमेव कृतम्।**

इत्थमेवाग्रेऽपि चतुर्दशं त्र्यम्बकादित्यं यावद् गुरुसन्तत्या एषैव नैष्ठिकब्रह्मचारिसरणिर्गृहीता। यथा—

"सोऽपि गत्वा गुहां सम्यक् त्र्यम्बकाख्यां ततः परम्।।
तन्नाम्ना चिह्नितं तत्र ससर्ज मनसा सुतम्।
खमुत्पपात संसिद्धस्तत्पुत्रोऽपि तथा-तथा।।
सिद्धस्तद्वत् सुतोत्पत्त्या सिद्धा एवं चतुर्दश।"

(शि० दृ० 7,112-114)

~ पञ्चदशः— पञ्चदशो मानसपुत्रस्त्र्यम्बकादित्यः पूर्वगुरूणां सरणिं विहाय विवाहं विधाय स्त्रीपुरुषसंगमजं पुत्रं जनयामास सङ्गमादित्यनामानम्। यथा—

"यावत् पञ्चदशः पुत्रः सर्वशास्त्रविशारदः।।
स कदाचिल्लोकयात्रामासीनः प्रेक्षते ततः।
बहिर्मुखस्य तस्याथ ब्राह्मणी काचिदेव हि।।
रूपयौवनसौभाग्यबन्धुरा सा गता दृशम्।
दृष्ट्वा तां लक्षणैर्युक्तां योग्यां कन्यामथात्मनः।।
सधर्मचारिणीं सम्यग्गत्वा तत् पितरं स्वयम्।
अर्थयित्वा ब्राह्मणीं तामानयामास यत्नतः।।"

(शि० दृ० 7,114-117)

~ प्रथमः— महामुनेर्दुर्वाससो मानसपुत्रः, अभेददृष्टिप्रधानस्य शैवदर्शनस्य शिष्यपरम्पराया लोके प्रसारयिता। यथा—

"ततः स भगवान् देवादादेशं प्राप्य यत्नवान्।
ससर्ज मानसं पुत्रं त्र्यम्बकादित्यनामकम्।।
तस्मिन् संक्रमयामास रहस्यानि समन्ततः।"

(शि० दृ० 7,111-112)

त्र्यश्रं बीजम्— एकारः। यथा—

"त्र्यश्रमेकारः।"

(तं० आ० वि०, खं० 3, पृ०,460)

त्र्यस्त्रम्— एकारः। यथा—

"त्र्यस्त्रम् ए।"

(तं० आ० वि०, खं० 12, पृ०, 220)

त्र्यात्मत्वम् — ~ तत्त्वभेदने— मन्त्रमहेश्वरस्य तत्त्वभेदनधारणालम्बनत्वे सति तस्य स्वरूपमेकम्, अकलेन शिवेन तच्छक्त्या च वेद्यतात्मकं व्याप्यत्वमिति (1+1+1) त्र्यात्मकत्वेन भावनीयं भवति। यथा—

"मन्त्रमहेशरस्य स्वरूपत्वे भगवत एकस्यैव प्रमातृत्वे शक्ति-शक्तिमद्भेदात् त्रयः।"

(तं०, सा०, पृ०, 98)

त्र्यायुषम्— होमभस्मनाकृतं तिलकम्। यथा—

"त्र्यायुषं भस्मपुण्ड्रकम्।"

(तं० आ० वि०, खं० 9, पृ०, 252)

थ

थ— शाम्भवे योगे रसनेन्द्रियतत्त्वस्य वास्तविकं स्वरूपमभिव्यञ्जयन् मातृका वर्णः। स हि स्वात्मसंवित्प्रकाशे स्वशक्तिविशेषप्रतिबिम्बतयावभासमानं सद्रसनेन्द्रिय-तत्त्वमभिव्यनक्ति मातृकालम्बनयोगप्रक्रियायां शाम्भव्याम्।

थकारः—

द्र०- **'षट्त्रिंशत्तत्त्वदीक्षा'** (18) इति।

द

द— चक्षुरिन्द्रियस्य यद्वास्तविकं स्वरूपं तस्याभिव्यञ्जको मातृकावर्णः शाम्भवोपायक्रमे। तत्र दवर्णतत्त्वसाक्षात्कारतः स्वात्मनः शक्तिविशेषस्य बर्हिमुखं प्रतिबिम्बं स्वसंवित्प्रकाशस्यान्तश्चक्षुरिन्द्रियरूपतयावभासमानं चकास्ति। स्वात्मा च स्वशक्त्यैव तत्प्रतिबिम्बसुन्दरोऽपरोक्षानुभवतः साक्षात्क्रियतेऽविकल्पेन चित्प्रकाशने। तेन च शाम्भवशिवभावसमावेशः सिद्धो भवति।

दक्षिणम्— प्रकाशरूपताया आनुकूल्यं भजमानं वस्तुदक्षिणम्। यथा—

"प्रकाशः सम्मुखं वस्तु गृहीत्वोद्रिक्तरश्मिकः।
यत्र तिष्ठेद्दक्षिणं तत् प्रकाशस्यानुकूल्यतः।।"

(तं० आ० 15,199-200)

दक्षिणाङ्गुलिः — झकारः। यथा—

"झकारो दक्षिणाङ्गुलितयाऽभिमतः।"

(तं० आ० वि०, खं० 12, पृ०, 185)

(तं० आ० वि०, खं० 12, पृ०, 202) — **इत्यत्र पुनः "दक्षाङ्गुलिर्म," इति निर्दिष्टम्। कदाचित् सम्पादनेऽसावधानता भवेदस्यास्त्रुटेः कारणम्। भकारझकारयोर्बहुतरसमानाकारत्वात्। तदत्र तान्त्रिकक्रियानिष्णाताः साधका एव प्रमाणम्। तत्र—**

"दक्षाङ्गुलिर्भ।"

(तं० आ० वि०, खं० 12, पृ०, 202)

इति पाठः।

दक्षिणाचारः— (1) न सम्यक् स्पष्टीकृतस्तन्त्रालोकादौ। तद्विवेके सङ्केतो लभ्यते यत् लिङ्गार्चादिरूपा शैवसिद्धान्तीया क्रियैव दक्षिणाचार इति। कौलादिशाक्तसाधनाहीना शिवोपस्तिः। वामाचारविपरीता पद्धतिः स्मृत्याद्यनुरोधिनीति केषामपि विचारः। यथा—

"दक्षिणवामतः इति शिवशक्तिरूपतयेत्यर्थः।"

(तं० आ० वि०, खं० 12, पृ०, 398)

(2) विधिनिषेधबहुलो ब्राह्मणोचिताचारप्रधानो भक्तिसाधनामयः साधनाक्रमः। वामाचारापेक्षया तद्विपरीततया वा, दक्षिणदेशेऽस्य प्रचारतया वा, स्वच्छन्दनाथस्याघोराख्यदक्षिणमुखनिःसृतत्वेन वाऽयं 'दक्षिण' इति व्यपदिश्यते।

भैरवतन्त्रानुसारित्वं वा दक्षिणत्वं केषाञ्चन मते। साधनाक्रमविशेषोऽयं वैदिकाद्याचारादुत्तीर्णः कौलादिभ्यश्चा-

धस्तनः। यथा—

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम्।।"

(प० त्री० वि०, पृ०, 92)

"दक्षिणाचारसाराय वामाचाराभिलाषिणे।
सर्वाचाराय शर्वाय निराचाराय ते नमः।।"

(शि० स्तो० 2,19)

"दक्षिणाचारो—भैरवतन्त्रमविपरीतानुष्ठानं च सारः-सारत्वेनाभिमतो यस्य।"

(शि० स्तो० वि०, पृ०, 30)

अविपरीतमिति धर्मशास्त्रानुसारि मद्यमांसादिवर्जितम्।

~ त्रुटिस्तत्र— स्पष्टमुक्ता यथा—

"दक्षिणं रौद्रकर्माढ्यम् .....।"

(तं० आ० 37, 27)

रौद्रकर्माण्यत्र मारणोच्चाटनादीनि जयरथानुसारम्। यथा—

"रौद्रेति मारणोच्चाटनादि।"

(तं० आ० वि०, खं० 12, पृ०, 401)

अस्मन्मत्या पुनः श्मशानवासकपालधारणादीनि तानि।

दक्षिणा दिक्— क्वापि सम्मुखवस्त्वभिमुखस्य प्रकाशस्य यत्तत्त्वमानुकूल्येन स्थितं ततश्च यत्र तस्य रश्मिप्रसरो भूयानसौ दक्षिणा दिक् तस्यां स्थितौ। यथा—

"प्रकाशः सम्मुखं वस्तु गृहीत्वोद्रिक्तरश्मिकः।।
यत्र तिष्ठेद् दक्षिणं तत् प्रकाशस्यानुकूल्यतः।"

(तं० आ० 15,199-200)

प्रमाणांशमयी स्थितिरेषा दिक्। यथा—

"स एव किञ्चित् प्रकाशः स्वसंस्पृष्टं विश्वमवमृश्य यस्मिन्नात्मनि स्वप्रकाशमये पारिपूर्ण्योचिते वर्तते। सैव प्रकाशानुगुण्याद्-दक्षिणा दिगिति।"

(तं० आ० वि०, खं० 9, पृ०, 99)

दण्डः — ~ बीजम्— रकारः, आगामिकसाधनासङ्केतानुसारम्। यथा—

"पूर्वं दण्डं-रेफम्।" (रहस्यसङ्केतोऽयम्)

(तं० आ० वि०, खं० 10, पृ०, 227)

द्र०- तदेव, खं० 11,2, पृ०,127, खं० 12,पृ०, 197,202-203

~ जालप्रयोगे— प्राणः। यथा

"मूलाधारादुदेत्य प्रसृतसुविततानन्तनाड्यध्वदण्डं।
वीर्येणाक्रम्य .....।"

(तं० आ० 21,25)

"नाड्य एव ऊर्ध्वाधरगमागमनिमित्ततया स्पष्ट-प्रवाहात्मकनिमित्ततया चाध्वरूपो दण्डः तात्स्थ्यात्तदाकारः प्राणः .....।"

(तं० आ० वि०, खं० 10, पृ०, 226)

~ मण्डलविधौ— रेखाविशेषो मण्डले। कदाचित् कमलनालदण्डः स्यादयम्। यथा—

"भैरवं दण्ड ऊर्ध्वस्थं रूपं सादाशिवात्मकम्।"

(तं० आ० 31,99)

"कृत्वा दण्डं त्रिशूलं तु त्रिभिर्भागैः समन्ततः।।
अष्टाङ्गुलप्रमाणैः स्याद्धस्तमात्रं समन्ततः।"

(तं० आ० 31,105)

"..... शूलदण्डस्तु पीतलः।"

(तं० आ० 31,95)

"दण्डोपलक्षितस्य शूलस्य उपरि स्थितं भैरवं पूर्णं रूपं .....।"

(तं० आ० वि०, खं० 12, पृ०, 272)

दण्डद्वारवर्तना— मण्डले आलेख्यविशेषः। यथा—

"दण्डद्वारवर्तना चाग्रत एव भविष्यतीति नेह विभज्य व्याख्यातम्।"

(तं० आ० वि०, खं० 12, पृ०, 241)

दण्डपाणिः— देशाध्वधारणासूपास्योऽसौ देवो रुद्रो यस्याधिकारभूः ब्रह्माण्डादधोऽपि, रुद्रलोकस्योपरि चापि। तस्य कार्यमेतद् यदसौ शिवानुग्रहपात्रतां यातानामधिकारी प्राणिनां विषये ब्रह्माण्डं दृणाति, येन ते तद्रन्ध्रमार्गेण ब्रह्माण्डान्मुच्यन्ते। यथा—

"शिवेच्छया दृणात्यण्डं मोक्षमार्गं करोति च।।"

(तं० आ० 8,160)

"ब्रह्माण्डस्याप्यधो भागे रुद्रलोकस्य चोर्ध्वतः।
दण्डपाणेः पुरं ज्ञेयं नानारुद्रगणावृतम्।।
दण्डपाणिस्तु भगवान्योगैश्वर्यबलान्वितः।
दण्डः पाणितलेनैव धृतो येन शिवेच्छया।।
विवृणोति (विदृणाति) च ब्रह्माण्डे मोक्षमार्गं सुदुर्भिदम्।
विधिनाराधितश्चैव अनुध्यानाच्छिवेच्छया।।"

(स्व० तं० 10,612-14)

दण्डमुण्डक्रमः— ज्ञानक्रियाप्रवृत्तिक्रमः। यथा—

"मुण्डनं ज्ञानरूपेण दण्डनं च क्रियात्मना।
मुण्डदण्डक्रमौ तेन मतौ ज्ञानक्रियात्मकौ।।" इति।

(म० मं० प०, पृ०, 175)

दण्डमुद्रा— मुष्टिबन्धयुता काचनावास्थितिर्गुरूपदेशगम्या। यथा—

"दण्डो वै मुष्टिबन्धेन .....।"

(स्व० तं० 14,14)

उक्तं च (भैरवानुकरणाख्ये) स्तोत्रे—

"जगदखिलं मच्छक्त्या दमितं सर्वा व्यवस्थितीर्धत्ते।
इति दण्डधारणवशाद् व्यनक्ति चिद्भैरवोऽस्माकम्।। इति।"

(स्व० तं० उ०, प०, 14, पृ०, 117)

दण्डमुद्रानिरुपणप्रकरणे उद्धृतमेतत् पद्यम्।

दन्तपङ्क्तिः— 'कवर्गः' इति। न सम्यक् स्पष्टीकृतमिदं पदं ग्रन्थे क्वापि उक्तं केवलम् यथा—

"दन्तपंक्त्या द्वितीयं तु वामपादं तथैव च।
अधोदण्डनियुक्तं तु दक्षजानुसमायुतम्।
तिलकेन समाक्रान्तं सर्वसिद्धिप्रदायकम्।"

(तं० आ० वि०, खं० 12, पृ०, 201)

प्रकरणसंगत्या च दन्तपंक्तिः कवर्गस्तस्य एव द्वितीयं 'ख'। प्रकरणे च "ख्फ्रें" इति बीजपिण्डस्योद्धारः। ततो दन्तपंक्त्या द्वितीयो वर्णः=ख्। वामपादः=फ् अधोदण्डः= अधोलिखितो रकारः। दक्षजानुः=एकारः। तिलकं=बिन्दुः। तेन" ख्फ्रें" इति। अत एव दन्तपंक्तिः = कवर्गः इति प्रतिभाति। पुनरपि विचारणीयोऽयं विषयो विद्वद्भिः।

दर्शनम्— चिदेकरूपतया साक्षात्करणं प्रमेयप्रमाण-प्रपञ्चस्य। यथा—

"दर्शनंत्यक्तग्राह्यग्राहकविभेदेन यथावस्तु स्वाङ्गकल्पतया प्रकाशनं भवति। चित्प्रकाशतामभिनिविशमानं हि चित्तं तदाच्छुरितमेव विश्वं पश्यति।"

(शि० सू० वि०, पृ०, 15-16)

दशदिक्शक्तिः— उमादुर्गादिशक्तिरूपतया ध्येयः शिवः। यथा—

दशदिक्छक्तिरिति—यदुक्तम्—

"उमा दुर्गा भद्रकाली स्वस्ति स्वाहा शुभङ्करी।
श्रीश्च गौरी लोकधात्री वागीशी दशमी स्मृता।।"

(तं० आ० वि०, खं० 1, पृ०, 154)

दशनाडीस्थानम्—

हृदयं नाभिश्च। दशनाडीनामभिव्यक्तिर्यद्यपि हृदये, तथापि तेषां प्रसरो नाभेरेव। यथा—

"हार्दीषु-हृदि तासामभिव्यक्तेः।
वस्तुतस्त्वासां नाभेरुदयः।"

(तं० आ० वि०, खं० 4/1, पृ०, 161)

दशसिद्धयः — ~ तन्त्रे—

द्र०- **'सिद्धयः'** ~ दश इति।

दशाः— जाग्रदाद्याः पञ्चावस्थाः।

द्र०- 'अवस्थाः' इत्यत्र।

~ एकादशात्मकभेदे—

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ त्रयोदशात्मकभेदे—

द्र०- **'अवस्थाभेदविस्तरः'** इत्यत्र।

~ त्र्यात्मकभेदे—

द्र०- **'अवस्थाभेदविस्तरः'** इति।

~ नवात्मकभेदे—

द्र०- **'अवस्थाभेदविस्तरः'** इत्यत्र।

~ पञ्चदशात्मकभेदे—

द्र०- **'अवस्थाभेदविस्तरः'** इत्यत्र।

~ पञ्चात्मकभेदे—

द्र०- **'अवस्थाभेदविस्तरः'** इत्यत्र।

~ लक्षण प्रामाण्यतः आचार्याभिनवगुप्तकृते तन्त्रालोके यद्दशापञ्चकनिरूपणं तत् साक्षात्कृतसकलागमरहस्यानामाचार्य श्रीशाम्भुनाथानामुपदेशानुसारमेव कृतमिति तस्य सुतरां प्रामाण्यमशङ्कनीयम्। यथा—

"इति श्रीसुमतिप्रज्ञाचन्द्रिकाशान्ततामसः।
श्रीशम्भुनाथः सद्भावं जाग्रदादौ न्यरूपयत्।।"

(तं० आ० 10,287)

~ शिवे—

द्र०- **'अवस्थाभेदविस्तरः'** इत्यत्र।

~ सप्तात्मकभेदे—

द्र०- **'अवस्थाभेदविस्तरः'** इत्यत्र।

दशाष्टादशागमाः— शैवागमाः= दश, रुद्रागमाश्चाष्टादश।

द्र०- **'आगमाः'** ~ पञ्चस्रोतोमयाः इति।

~ अवान्तरभेदतः—**एकैकस्यापरैर्मेलनेनासंख्यताऽऽगमानाम्। यथा—**

"एकैकं पञ्चवक्त्रं च वक्त्रं यस्मात् प्रगीयते।
दशाष्टादशभिन्नस्य ततो भेदैरसंख्यता।।"

(मा० वि० वा०, 1,378)

दामोदरभट्टः— शैवसाधनागुरुः कोऽपि। यथा—

"तथा च उक्तं सहजचमत्कारकादपरिजनिताकृतकादरेण भट्टदामोदरेण विमुक्तकेषु—

'पूर्णावच्छिन्नमात्रन्तर्बहिष्करणभावगाः।
वामेशाद्याः परिज्ञानाज्ञानात्स्युर्मुक्तिबन्धदाः।।' इति।"

(प्र० हृ०, पृ०, 30)

द्र०- **'वामेश्वरी,** ~ शक्तिः इति।

दारणा— आकारः। यथा—

"दारणा आ।"

(तं० आ० वि०, खं० 12, पृ०, 202)

दाहकं बीजम्— रकारः। यथा—

"यरलानामपि शोषकारित्वं दाहकत्वं स्तम्भकत्वं च क्रमेणावगन्तव्यम्।"

(तं० आ० वि० खं० 2, पृ०, 157)

दाहनम्— **नाडीशोधने सङ्कोचादिरूपस्य मलस्य वासनायाः अप्युच्छेदः। यथा—**

"---------- दाह एतस्य वासनोच्छेदः।"

(म० मं० पं० 44, पृ०, 111)

दिक्— **(1) प्रमातृकल्पितयोर्भावयोर्नियतदेशावस्थानकृतः, परस्परं विशेषः। यथा—**

"इममवधिं कृत्वाऽयमित्थं ततोऽस्यायं पुरस्तादित्यादिर्दिक्।"

(ई० प्र० वि०, खं० 2, पृ०, 43)

(2) नैयायिकादयो दिशमपि स्वतन्त्रं द्रव्यविशेषं मन्यन्ते। परं शैवदर्शनानुसारं संविदः स्वातन्त्र्येण कलितं यन्मूर्त्तिकृतं वैचित्र्यं तदेव तत्तद्दिग्रूपतया व्यवह्रियते लोके। ततो दिक् कल्पितैव, न किमपि विशिष्टं स्वतन्त्रं तत्त्वम्। एवं कालोऽपि क्रियावैचित्र्याश्रयणेन व्यवहारमात्रविषयो, न विशेषद्रव्यरूपं किमपि तत्त्वम्। यथा—

"इत्येवं संविन्महिमैव मूर्त्तिकृतं दिग्भेदं भासयति, इति दिग् न तत्त्वान्तरम्।"

(तं० सा०, पृ०, 139)

दिक्चरी— **(1) चितिशक्तिरेव देवता विशेषरूपैः स्थिता जनानां बन्धमोक्षलीलासम्पादिका सती तत्पदस्था। यथा—**

"(चितिशक्तिरेव पशुभूमिकायां) भेदालोचनादिप्रधान-बहिष्करणदेवतात्मना च दिक्चरी चक्रेण गोपिताभेदप्रथात्मक-पारमार्थिकस्वरूपेण स्फुरति।"

(प्र० ह०, पृ०, 29)

एषा बन्धकारिणी दिक्चरी।

(2) चितिभूमिकायां तु यथा—

"अभेदालोचनाद्यात्मना दिक्चरीत्वेन.....स्फुरति।"

एषा मोक्षदा दिक्चरी क्षेमराजमतेनैतत्। (तदेव, पृ०, 30)

(3) दिक्ष्वन्तःकरणेषु चरतीति दिक्चरी।

(म० मं० प०, पृ०, 86)

महेश्वरानन्दमतेनैत।

दिक्चर्यः — ~ आन्तर्यः— **प्राणिनां देहकरणप्राणादाव-धिष्ठितास्तेषां बन्धमोक्षलीलाविस्तारिण्यः शिवशक्तयः। यथा—**

"दिक्षु च दशसु बाह्येन्द्रियभूमिषु चरन्ति इति दिक्चर्यः अनुगृहीतानामद्वयप्रथनसाराः, परेषां तु द्वयप्रतीतिपातिन्यः।"

(स्पं० सं०, पृ०, 20)

~ बाह्याः— **परापरसिद्धिप्रदाः देवीरूपाः शिवशक्तयः। यथा—**

"दिक्चर्यस्तु भ्रान्तचक्रवत् सर्वत्र चरन्त्यः परापरसिद्धि प्रवणाः।"

(स्पं० सं०, पृ०, 22)

दिक्पालमन्त्राः— **सङ्केतमात्रत उक्ताः, न स्पष्टीकृताः। यथा—**

"लरटक्षवयैर्दीर्घैः समयुक्तैः सबिन्दुकैः।
इन्द्रादयस्तदस्त्राणि ह्रस्वैर्विष्णुप्रजापती।।" **इति**

(तं० आ० 30,42)

"पूतनां शूलदण्डस्तु कपालं नाभिरेव च।
शिखिनी वायुवेगा च परमा च नितम्बकः।।
विज्ञेयाश्च महादेवि दीर्घयुक्ताः सबिन्दुकाः।
मन्त्रास्तु लोकपालानां तदस्त्रा दीर्घवर्जिताः।।

उद्ध०- (तं० आ० वि०, खं० 12, पृ०, 201)

दिक्फलम् — ~ पूजाद्यनुष्ठानविधौ— **यथोक्तं। स्पष्टम्—**

"आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः।
श्रेयः प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते पराङ्मुखः।।"

उद्ध०- (तं० आ० वि०, खं० 9, पृ०, 108)

दिगाभासः—**किञ्चित्किञ्चित्प्रकाशयोग्यता हि दिशां मध्यबिन्दुः। तत्तारतम्यतो मुख्या दिशो दश। यथा—**

"किञ्चित् प्रकाशता मध्यं ततो वै दिक्समुद्भवः।।"

(तं० आ० 15,198)

द्र०- 'दिग्विभागः' इति।

दिग्विभागः — ~ **आगमिकः**— **(1) ऊर्ध्वाधः पुरः पश्चादादिविभागः प्रकाशाप्रकाशादिकृतः सर्वथा लाक्षणिक एव न सूर्यसञ्चारादिविचाराधीनः। यथा—**

"तत्र यद्यत्प्रकाशेन सदा स्वीकरणे क्षमम्।
तदेवोर्ध्वं प्रकाशात्म स्पर्शायोग्यमधः पुनः।।
किंचित्प्रकाशता मध्यं ततो वै दिक्समुद्भवः।
किञ्चित्प्रकाशयोग्यस्य संमुखं प्रसरत्पुरः।।
पराङ्मुखं तु तत्पश्चादिति दिग्द्वयमागतम्।
प्रकाशः संमुखं वस्तु गृहीत्वोद्रिक्तरश्मिकः।।
यत्र तिष्ठेद्दक्षिणं तत्प्रकाशस्यानुकूल्यतः।
दक्षिणस्य पुरःसंस्थं वाममित्युपदिश्यते।।"

(तं० आ०15,197त:200)

द्र०- 'पुरः' 'पश्चात्, 'दक्षिणम्,' 'उत्तरम्' इति।

"तत्र परमेश्वरस्वातन्त्र्यमेव मूर्त्त्याभासनया दिक्तत्त्वमव-भासयति। तत्र चित्प्रकाश एव मध्यम्, तत इतरप्रविभागप्रवृत्तेः। प्रकाशस्वीकार्यमूर्ध्वम्, अतथाभूतमधः। प्रकाशनसम्मुखीनं पूर्वम्; इतरदपरम्; सम्मुखीभूतप्रकाशत्वादनन्तरं तत्प्रकाशधारारोहस्थानं दक्षिणम्, आनुकूल्यात्; तत्सम्मुखं त्ववभास्यत्वाद् उत्तरमिति दिक्चतुष्टयम्।"

(तं० सा०, पृ०, 138)

अनेनैव विचारेण स्वच्छन्दनाथस्येशानादिमुखानां पञ्चानामपि तथा-तथा दिक्सम्बन्धिनी स्थितिः।

~ तत्त्वतः— **वस्तुतो दिग्रूपो नैव कश्चित् स्वतन्त्रः पदार्थो वस्तुभूतः। परं प्रकाशस्वातन्त्र्येण यो मूर्त्याभास-वैचित्र्याभासस्तत्रैव दिग्विभागव्यवहारो लोके प्रचलितः। व्यवहारेऽस्य सत्यत्वमुपयोगित्वाज्ज्ञेयम्। यथा—**

"तस्मात् संवित्प्रकाशोऽयं मूर्त्याभासनभागतः।
पूर्वादिदिग्विभागाख्यवैचित्र्योल्लेखदुर्मदः।।"

(तं० आ० 15,196)

~ त्रिधा— **(1) दिग्व्यवहारस्य मूलकारणं परमेश्वर-स्वातन्त्र्यावभासितं देशक्रमवैचित्र्यम्। (2) लोकव्यवहारे सर्वसाधारणे सूर्योदयास्तमयाधारत्वेन पूर्वादिदिग्व्यवहारः।**

(3) सूर्योदयाभिमुखस्य च यस्ययस्य व्यक्तेर्यो य एव मूर्तिविशेषः पुरतस्तस्य स एव पूर्वा दिक्। इति दिग्व्यवहारस्याधारत्रयं भगवत्स्वातन्त्र्यं सूर्योदयास्तमयादि, प्रमातुरवस्थितिश्चेति। यथा—

"एवं स्वात्मसूर्यपरमेशत्रितयैकीभावनया दिक्चर्चा इति अभिनवगुप्तगुरवः।"

(तं० सा०, पृ०, 139)

~ पञ्चमन्त्रनाथे— **भगवान् सदाशिवो मन्त्रतनुस्थितः सन् पञ्चमुखः। तस्य यत्रेशानाख्यं मुखं पश्यति सोर्ध्वा दिक्, तत्पुरुषाख्यं वक्त्रं च यदाभिमुखं सा पूर्वा सद्योजातमुखस्याभिमुख्ये स्थिता दिक् पश्चिमा। अघोरवक्त्राभिमुख्ये स्थिता दिग्दक्षिणा, वामदेववक्त्राभिमुख्ये च विद्यमाना दिगुत्तरा। अधोमुखं यत्तस्य षष्ठं पिचुवक्त्रं नाम मुखं तदभिमुखा दिगधरा। यथा—**

"ईश ऊर्ध्वं प्रकाशत्वात्पूर्वं वक्त्रं प्रसारि यत्।।
पुरुषो दक्षिणाचण्डो वामा वामस्तु सौम्यकः।
पराङ्मुखतया सद्यः पश्चिमा परिभाष्यते।।
पातालवक्त्रमधरमप्रकाशतया स्थितेः।"

(तं० आ० 15, 204-206)

ईश इतीशानः, पुरुष इति तत्पुरुषः। चण्ड इत्यघोरः। वाम इति वामदेवः। सद्य इति सद्यो जातः।

सुविस्तरतोद्रष्टव्यमिदं तन्त्रालोके (तं० आ० 15, 203-227) **इत्यत्र।**

उक्तं च—

"पिचुवक्त्रं प्रकाशसंस्पर्शायोग्यत्वादधरा चेति।"

(तं० आ० वि०, खं० 9, पृ०, 102)

~ प्रमात्रपेक्षः— **य एव मूर्ति विशेषो यत्र यस्य प्रमातुः पुरतस्स एव तत्र तदृष्ट्या पूर्वमिति व्यवह्रियते। ततः प्रमातृ-निष्ठापि दिग्व्यवस्था। यथा—**

"तत्र पूर्वं व्यक्तेः पूर्वा, यत्रैव च तथा तत्रैव।"

(तं० सा०, पृ०, 139)

~ रहस्यदृष्ट्या— **ऊर्ध्वा दिक् सर्वथा प्रकाशमयी ईशानाधिष्ठिता। तद्विपरीताऽधरा दिगप्रकाशात्मिका। मध्यमाश्च चतस्रः प्रकाशाप्रकाशरूपाः इति। यथा—**

"मुख्यत्वेन खमेवोर्ध्वं प्रकाशमयमुच्यते।
तदेव मुख्यतोऽधस्तादप्रकाशं यतः स्फुटम्।।
मध्ये तु यत्प्रकाशं तन्न प्रकाश्यं न चेतरत्।
प्रकाशत्वाद्दिश्यमानमतोऽस्मिन्दिक्चतुष्टयम्।।"

(तं० आ० 15, 207-208)

~ लोकव्यवहारे— **लौकिकप्रकाशरूपो रविः, ततस्तद-धिष्ठिता दिगूर्ध्वा। अधोऽप्रकाशरूपा दिगधरा। मध्ये प्रकाशाप्रकशरूपं दिक् चतुष्टयम् पूर्वादिकम्। यथा—**

(क) **द्र०-** (तं० आ०15,212-215)

(ख) "स हि सर्वमधिष्ठाता माध्यस्थेनेति तस्य यः।।
सौरः प्रकाशस्तत्पूर्वमित्थं स्याद्दिग्व्यवस्थितिः।"

(तं० आ० 15,230-231)

~ सूर्यप्रभावतः— **स्पष्टतयोक्तं यथा—**

"यथा भगवान् दिग्विभागकारी तथा सूर्योऽपिः; स हि पारमेश्वर्येव ज्ञानशक्तिरित्युक्तं तत्रं-तत्र।"

(तं० सा०, पृ०, 139)

दिनक्षपे— अहरिति रात्रिरिति च व्यवहारो लोके, आगामिकसाधनासु च।

~ उपयोगतः— **दिने क्रूराणि कर्माणि क्रियन्ते क्षपायाञ्च सौम्यानि। यथा—**

"दिने क्रूराणि सौम्यानि रात्रौ कर्माण्यसंशयम्।।"

(तं० आ० 6,72)

~ विपर्ययतः। — **सामर्थ्यशालिनो योगिनः सङ्कल्पात् कदाचिद् दिनेऽपि सौम्यानि रात्रावपि च क्रूराणि कर्माणि सिद्ध्यन्ति। यथा—**

"क्रूरता सौम्यता वाभिसन्धेरपि निरूपिता।"

(तं० आ० 6,73)

"तेन कदाचिद् व्यत्ययोऽपि भवेदिति भावः।"

(तं० आ० वि०, खं० 4/1, पृ०, 64)

~ प्रामाण्यतः— **यद्-यद् दिनरात्रिविभागमधिकृत्य तन्त्रालोके गूढविचारात्मकं निरूपितमाचार्याभिनवगुप्तेन तच्छ्रीशम्भुनाथोपदेशानुसारमुक्तमिति सर्वथा प्रमाणम्। यथा—**

"श्री त्रैयम्बकसन्तानविततम्बरभास्करः।
दिनरात्रिक्रमं मे श्री शम्भुरित्मपप्रथत्।।"

(तं० आ० 6,88-89)

~ वैषम्यतः— **कालाध्वधारणाभ्यासे वेद्यविश्रान्त्या-धिक्ये दिनाधिक्यं रात्र्यल्पत्वं च, वेदकविश्रान्त्याधिक्ये**

विपरीतम्। इत्थं कालाध्वयोगिनो दिनरात्रिपरिमाणवैचित्र्यभावना। यथा—

"द्राघीयसी वेद्यवृत्तिर्दिनदैर्घ्याय कल्पते।
तथैव स्वात्मविश्रान्तिवृत्तिः स्याद्रात्रिविस्तरः।।"

उद्ध०- (तं० आ० वि०, खं० 4/1, पृ०, 76)

दिनं बाह्यव्यवहारबहुलं, रात्रिः स्वात्मविश्रान्तिबहुलेति रहस्यमत्र।

~ साम्यतः— कालाध्वप्रक्रियासु वेद्यवेदकसाम्यावस्थैव दिनरात्रितुल्यता कालाध्वदृष्ट्या। यथा—

"कदाचिद्वस्तुविश्रान्तिसाम्येनात्मनि चर्वणम्।।
वेद्यवेदकसाम्यं तत् सा रात्रिर्दिनतुल्यता।"

(तं० आ० 6, 84-85)

दिनम्— प्राणवृत्तिः।

द्र०- **'सूर्यः'** इति।

दिनलक्षणम् ~ कालाध्वनि— वेद्यग्रहणे वेद्यतन्मयीभावो दिनम्। यथा—

"सर्वथा तन्मयीभूतिर्दिनम् .....।"

(तं० आ० 6,82)

"तेन यावद् वेद्यग्रहस्तावद्दिनम्।"

(तं० आ० वि०, खं० 4/1, पृ०, 72)

दिवाकरवत्सः (भट्टः) — कोऽपि प्राचीनः सुप्रसिद्धो विद्वत्प्रियश्च शैवदर्शनगुरुः। अस्य द्वयोर्ग्रन्थयोर्नाम्नी कानिचिच्चोद्धरणानि लभ्यन्त आचार्यान्तराणां ग्रन्थेषु। तत्रैकं दर्शनतत्त्वगर्भं स्तोत्रकाव्यं कक्ष्यास्तोत्रम्, इतिः; अपरञ्च किमपि दर्शनशास्त्रं विवेकाञ्जनं नाम। अस्य ग्रन्थाभ्यामुद्धरणानि रामकण्ठादारभ्य महेश्वरानन्दपर्यन्तं बहुभिर्ग्रन्थकारैर्निवेशितानि निजेषु ग्रन्थेषु। ततो रामकण्ठकाले वा ततः प्राग्वाऽयमभूदत्र भूतले।।

अत्र विषये केचिदेवं तर्कयन्ति :—

शिवसूत्रवार्त्तिककारो भट्टभास्करः स्वात्मानं "दैवाकरिर्भास्करोऽहम्"। (शि० सू०, वा०, पृ०,30)इति कथयति। आचार्याभिनवगुप्तश्च तन्त्रालोकान्ते स्वगुरूणां मध्ये कमपि भास्करमपि गणयति—

"भूतेशभास्करमुखप्रमुखा महान्तः"

(तं० आ० 37, 62) इति।

तत इदं सम्भाव्यते यच्छिवसूत्रवार्त्तिककृद्भट्टभास्कर एवासौ भास्करः स एव च दैवाकरिः सन् भट्टभास्करवत्स इति। परमस्य रामकण्ठकालीनत्वेनैषा सम्भावना किञ्चित् सुशिथिलेव भवति। अभिनवगुप्तस्य बाल्यं दशमशताब्द्यां यतः। रामकण्ठस्य काल 875 ई० इति। ततोऽयं भट्टदिवाकरोऽपि नवमशताब्दीक इत्यनुमातुं शक्यते। अस्य कृतीनामभिनवगुप्तादिभिर्बहुभिर्महामहिमशालिभिराचार्यैर्बहुधा समुद्धृतत्वेनानुमीयते यत् पुरातने कालेऽतीव समादृतमभूदस्य नाम, कृतिद्वयं चापि। तत्र कक्ष्यास्तोत्रपद्यानि बहुशः समुद्धृतान्याचार्यैः, विवेकाञ्जनं चोल्लिखितं स वाक्योद्धरणं केवलमाचार्याभिनवगुप्तपादैरेव। यथा—

"यदाह भट्टदिवाकरवत्सो विवेकाञ्जने—
प्रकाशश्चैव भावानां .....। इत्यादि
.....
.....न शापोक्त्या विलीयते।।" इत्यन्तम्

(ई० प्र० वि०, खं० 1, पृ०,10)

तर्कयुक्ति प्रधानोऽयं दर्शन ग्रन्थ इति प्रतीयतेऽनेनोद्धरणेन।

द्र०- च **'कक्ष्यास्तोत्रम्'** इति।

अस्य भट्टदिवाकरत्वेन (ई० प्र० वि० वि०, खं० 2, पृ०, 3)

दिवाकरवत्सत्वेन (तदेव, खं० 2, पृ०, 4)

अपि च नामोल्लेखात् सिद्ध्यति यत् काश्मीरविद्वद्ब्राह्मणत्वेनायं 'भट्टः' इति वत्सगोत्रत्वेन च 'वत्स' इति उच्यते स्म, स्वनाम्नायं 'दिवाकर' इति।

एवमपि यथा कथञ्चित् सम्भावयितुं शक्यत एव यदयं भट्टदिवाकरवत्सो भट्टभास्करस्य पिता एवाभूदिति। भट्टभास्करोऽभिनवगुप्तस्य गुरुर्भास्कर इति च। यथोक्तम् प्राक् (तं० आ० 37,62) इति।

तेन भास्करोऽसौ दशमशताब्दिमध्येऽभूत्। तस्य पिता दिवाकरवत्सो नवमशताब्द्युत्तरकालादारभ्य दशमशताब्द्यारम्भकालं यावन्मर्त्यशरीरेऽवर्तत। नवमशताब्द्यन्ते रामकण्ठेन तस्य कक्ष्यास्तोत्राच्छ्लोकद्वयमुद्धृतम्। रामकण्ठस्य समकालीनोऽप्ययं सम्भाव्यते। एते योगिनः सुदीर्घजीविनोऽप्यभवन्। शिष्याश्च कदाचिद् गुरूणामपेक्षया वृद्धा आसन्। अस्य भट्टदिवाकरवत्सस्य यशो विख्यातमासीत्। तत एव भट्टभास्करः स्वात्मानं सगर्वं दैवाकरिरिति वदति स्म। भास्करोऽपि दिवाकरवदेव भट्टः इति ख्यातः। तदत्राप्यवधातव्यं सुधीभिः।

द्र०- (ई०प्र०वि०वि०,खं०1,पृ०,120;खं०2,पृ,० 13,14,145,203,301,328; खं०,3,पृ०,388; स्पं०वि०,पृ०,40; स्पं०प्र०,पृ०,10,11,26; स्व०तं०उ०,प०,7,पृ०,177, स्पं०नि०,पृ०; 25; प०सा०वि०,पृ०,79,103; म०मं०प०,पृ०,80 **इति।**

पुनः सुविचारणीयोऽयं विषयो विद्वद्भिः।

दिव्यं करणम्— मुद्रा विशेषः। किञ्चित्-किञ्चित् स्फुटं प्रतिपादितो यथा—

"..... लक्षणं तस्य वै शृणु।
जिह्वा तु तालुके योज्या किञ्चिदूर्ध्वं न संस्पृशेत्।।
ईषत्प्रसार्य वक्त्रं तु किञ्चिदोष्ठौ न संस्पृशेत्।
दन्तपङ्क्ती तथैवेह दृष्टिश्चाधोर्ध्ववर्जिता।।
कायं समुन्नतं कृत्वा करणं दिव्यमुच्यते।"

(स्व० तं० 4,365-367)

शाम्भवीयं मुद्रा प्रतिभाति। याज्ञवल्क्यस्मृतौ यतिधर्मप्रकरणेऽपि वर्णितेयम्। परमत्र क्षेमराजकृता व्याख्या न यथार्था। विशेषतो जिह्वामधिकृत्य। उक्तं हि तेन—

"अत्र जिह्वायास्तालुयोजने कुञ्चितत्वमर्थलब्धम्" इति।

एतद् व्याख्यानं हठयोगसाधनानुसारि न शोभते त्रिकदृष्टौ। यथा च भगवता दुर्वाससाऽसमद्गुरुवरेभ्यः आचार्यामृतवाग्भवेभ्यः। प्रशिक्षितैषा मुद्रा, तथा नात्र जिह्वायाः। मनागपि कुञ्चनमपि तु वामदक्षिणतः प्रासारणपूर्वकं तालुनायोजनमिति। तदत्र साक्षादुपदिष्टे वस्तुनि किं शास्त्रान्तरप्रक्रियान्तरानुकरणेनेति विदांकुर्वन्तु सुधियः। किञ्च योगिराजेन याज्ञवल्क्येनाप्युक्तम्—

"तालुस्थाचलजिह्वश्चेति।"

(या० स्मृ० 3,199)

दिव्यसम्बन्धः— यत्रोपदेष्टोपदेश्यश्चोभावपि दिव्यदेहौ तत्र तयोर्गुरुशिष्य सम्बन्धो दिव्याख्यः। यथा—

"मयापि तव देवेशि साधिकारं समर्पितम्।।
त्वमपि स्कन्दरुद्रेभ्यो ददस्व विधिपूर्वकम्।
ब्रह्मविष्णिवन्द्रदेवानां वसुमातृदिवाकृताम्।
लोके संगृह्य नागानां यक्षाणां परमेश्वरि।"

(स्व० तं० 8,36-38)

एतावत्पर्यन्तं दिव्या एव सम्बन्धाः शास्त्रावतारस्य।

दिव्या गुरवः—

द्र०- 'गुरवः'— ~ दिव्याः (त्रिके) इति।

दिव्यादिव्यसम्बन्धः— यत्रोपदेष्टा दिव्यदेह उपदेश्यश्च मर्त्यशरीरस्तत्र गुरुशिष्यसम्बन्धो दिव्यादिव्याख्यः। यथा—

"कथयस्व ऋषीणां च .....।।"

(स्व० तं० 8,38)

अस्य दिव्येतर इति मिश्र इत्यन्यदपि संज्ञाद्वयमपरम्।

दिव्येतरसम्बन्धः—

द्र०- 'दिव्यादिव्यसम्बन्धः' इति।

दीक्षणाधिकारः— दीक्षणाधिकारनियमाः भिन्नभिन्नेषु तन्त्रेषु भिन्न भिन्नप्रकाराः। यो यस्य तन्त्रस्यानुसारी तेन च तन्मतमेव पालनीयम्। यथा—

"योगचारे च यद्यत्र तन्त्रे चोदितमाचरेत्।।
तथैव सिद्धये सेयमाज्ञेति किल वर्णितम्।"

(तं० आ० 23,12-13)

"क्रियादिभेदभेदेन तन्त्रभेदो यतः स्मृतः।
तस्माद्यत्र यदेवोक्तं तत् कार्यं नान्यतन्त्रतः।।"

उद्ध०- (तं० आ० वि०, खं० 10,पृ०, 266)

~ त्रिके— कर्मबहुलानां यागादिक्रियाणामेव विषये काणखञ्जादयो नैवाधिकारिणः आचार्यत्वस्य, काञ्च्यादिस्थान-निवासिनश्च त एवानधिकारिणी ये सत्यं क्रोधादिदोषबहुला, नान्ये। यथा—

"यस्तु कर्मितयाचार्यस्तत्र काणादिवर्जनम्।।
यतः कारक सामग्रयात् कर्मणो नाधिकः क्वचित्।
देव्या यामलशास्त्रे च काञ्च्यादि परिवर्जनम्।।
तद्दृष्टदोषात्क्रोधादेः सम्यग्ज्ञातर्यसौ कुतः।"

(तं० आ० 23,13-14)

"काञ्च्यादिदेशजन्मा हि जनः स्वभावत एव कामक्रोधादिभाग्भवेदिति भावः।"

(तं० आ० वि०, खं० 10,पृ०, 268)

ज्ञानिनो विषये नायं नियमः, न चापि ज्ञानदीक्षायामेष नियमो यत्काणाद्याः गुरवो नाधिकारिणः। काञ्च्यादिपदानि लाक्षणिकानि तत्रत्यक्रोधादिदोषदुष्टजनबोधीनि।

~ मालिन्याम्— मालिन्यनुसारं लक्षणहीनोऽपि सकलतत्त्वज्ञानवान् दीक्षायां शिष्यमोचने चाधिकारी भवत्येव। यथा—

"श्री पूर्वशास्त्रे न त्वेष नियमः कोऽपि चोदितः।
यथार्थतत्त्वसंघज्ञस्तथा शिष्ये प्रकाशकः।।
यः पुनः सर्वतत्त्वानि वेत्तीत्यादि च लक्षणम्।"

(तं० आ० 23,11-12)

दीक्षणीयाः — ~ कौले— अतिदुर्लभोऽधिकारी कौलादिरहस्याचारस्य दीक्षायाः। लक्षेषु कश्चनैकोऽभिनवगुप्तकाले। इदानीं पुनरेकोऽपि न कोटिषु। यथा—

"इत्थं यागं विधायादौ तादृशौचित्यभागिनम्।
लक्षैकीयं स्वशिष्यं तं दीक्षयेत्तादृशि क्रमे।।"

(तं० आ० 29,186-187)

~ त्रिके— ये तावच्छिष्या मन्दमतयो न च विद्याभ्यासे रुचिमन्तो वा शक्तिमन्तो वा, तेषां भोगमोक्षलाभो गुरुकृतया क्रियात्मिकया मन्त्रादि दीक्षयैव क्रमेण भवति। निर्मलमतयस्तु शास्त्रज्ञानमवाप्य योगमभ्यस्य स्वेनैव यत्नेन तरन्ति संसारसागरं शाम्भवाद्युपायप्लवमारुह्य। परमशक्तेषु यदा गुरुः कृपापरो भवति शिवेच्छया तदा तान् दीक्षयैव तारयति। यथा—

(क) "येषामध्यवसायोऽस्ति न विद्यां प्रत्यशक्तितः।
सुखोपायमिदं तेषां विधानमुदितं गुरोः।।"

(तं० आ० 15,8)

"तत्राशक्तास्तु ये तेषां दीक्षाचर्यासमाधयः"

(तं० आ० 15,11)

~ साफल्यचिदह्नतः— **(1) तत्र गुरुर्मन्त्रशक्त्या स्वानुग्रहशक्त्या च शिष्यस्य मलानि शोधयति पुत्रकदीक्षावसरे। तत्काले चेत्तस्य आनन्दः, उद्भवः, कम्पो, निद्रा, घूर्णिश्चेति पञ्च चिह्नान्याविर्भवेयुस्तर्हि शोधितानि मलानीति गम्यते। यथा—**

"अनया शोध्यमानस्य शिशोस्तीव्रादिभेदतः।
आविशन्ती रुद्रशक्तिः क्रमात् सूते फलं त्विदम्।
आनन्दमुद्भवं कम्पं निद्रां घूर्णिं च देहगाम्।।"
(तं० आ० 29,207-208)

(2) यथोच्चारयोगाभ्यासे तथैव सद्यः प्रत्ययकारिकायां दीक्षायामपि दीक्षाफलरूपतयानन्दोद्भवकम्पादयः सञ्जायन्ते। यथा—

"लक्षयेच्चिह्नसंघातमानन्दादिकमादरात्।
आनन्द उद्भवः कम्पो निद्रा घूर्णिश्च पञ्चमी"।।
(मा० वि० तं० 11,35)

दीक्षा— (1) ज्ञानदानस्य पाशक्षपणस्य च प्रक्रिया अनेक- प्रकारा। सामर्थ्यवान्, पूर्णज्ञानविज्ञानवान् योगसिद्धिभाक् च गुरुः सर्वाः अपि दीक्षाप्रक्रिया अनुष्ठातुं समर्थः। अल्पज्ञानो योगसिद्धिहीनः पुनः कश्चिदेव ताः विधातुमलम्। यथा—

"दीयते ज्ञानसद्भावः क्षीयन्ते पशुवासनाः।
दानक्षपणसंयुक्ता दीक्षा तेनेह कीर्तिता।।"
(तं० आ० वि०, खं० 1,पृ०, 80)

"तमाराध्य ततस्तुष्टाद् दीक्षामासाद्य शाङ्करीम्।
तत्क्षणाद्वोपभोगाद्वा देहपाताच्छिवं व्रजेत्।।"
(मा० वि० तं० 1,45)

(2) भोगमोक्षदायिनी मलमायापाशदिक्षपणकारिणी दानक्षपणसमर्थाऽनुग्रहपूर्विका गुरुकृता विधिविशेषरूपा क्रिया। यथा—

"सा च दीक्षा समुद्दिष्टा दानक्षपणलक्षणा।"
(ने० तं० 19,161)

"शिवतादानभेदपाशक्षपणलक्षणां दीक्षाम्।"
(प० त्री० ल० वृ० पृ०, 15)

"ज्ञानदानमायाक्षपणलक्षणा च तस्यैव दीक्षा।"
(प० त्री० वि०, पृ०, 253)

~ अन्त्येष्ट्या—
द्र०- 'अन्त्येष्टि'— ~ दीक्षा इति।

~ आध्यात्मिकी— **अनुग्रहप्रवणा ज्ञानदानरूपा दीक्षा। द्र०- 'द्विस्वरूपा' इति।**

~ आवश्यकी— **(1) अदीक्षितस्य शैवे योगेऽधिकार एव नास्ति। वैधी वा सूक्ष्मा वा दीक्षा, योगिनी दीक्षा वा तत्रा-धिकार निबन्धनम्। यथा—**

"न चाधिकारिता दीक्षां बिना योगेऽस्ति शाङ्करे।।"
(मा० वि० तं० 4,6)

(2) दीक्षां विना नैव कथमपि शिवज्ञानं, नापि शैव-योगक्रियादिज्ञानम्। यथा—

"अदीक्षितानां पुरतो नोच्चरेच्छिवपद्धतिम्।"
उद्ध०- (तं० आ० वि०, खं० 1,पृ०, 82)

"अत एव दीक्षायां शिथिलास्थत्वं न वाच्यम्, तस्या एव मुक्तिं प्रति मूलकारणत्वात्।"
(तं० आ० वि०, खं०1,पृ०, 82)

(3) दीक्षां विना जनस्य नैव मुक्तिरिति शास्त्रक्रमः। यत्र च क्वापि तीव्रतरेण शक्तिपातेन शिष्यस्य सद्यो मुक्तिस्तत्रापि ज्ञानदीक्षा वा सूक्ष्मा वा दीक्षाऽवश्यं मन्तव्यैव, केवलं क्रियात्मिका दीक्षा तत्र नापेक्षणीया भवति। समस्तदीक्षाऽभावे योगिनी दीक्षानुमीयते, यथा प्रातिभे ज्ञानोदये। यथा—

"दीक्षानिरपेक्षमेव पुनरेतन्मुक्तौ निमित्तमिति सम्भाव्यम् एवं श्रुति विरोधः स्यात्—
तस्य दीक्षां विनैवात्मसंस्कारपरिणामतः।
सम्यग् ज्ञानं भवेत्सर्वशास्त्रेषु परिनिष्ठितम्।।
इत्यादौ पुनर्बाह्यक्रिया दीक्षाभिप्रायेण तन्निषेधो विवक्षितः।"
(तं० आ० वि०, खं०1, पृ०, 81)

(4) शास्त्रज्ञानप्रवचनात् प्राक् शिष्यस्य यथाकथञ्चि-द्दीक्षणमावश्यकम्। तस्याऽसौ दीक्षा साडम्बरा वा स्यात्, सूक्ष्मा वा, केवलं ज्ञानदीक्षैव वा। यथा—

"ज्ञानं च शास्त्रात्तच्चापि श्राव्यो नादीक्षितो यतः।
अतोऽस्य संस्क्रियामात्रोपयोगो दीक्षया कृतः।।"
(तं० आ० 15,12)

"समयीसंस्कृतो ह्येवं वाचनेऽस्यार्हता भवेत्।
श्रवणेऽध्ययने होमे पूजनादौ तथैव च।।
चर्याध्यानविशुद्धात्मा लभते पदमैश्वरम्।"
(स्व० तं० 4,78-79) **उद्ध०-** (तं० आ० वि०, 9, पृ०,9)

~ उपयोज्या— **दीक्षया साधकः संस्कारवान् भवति, येन तस्य मन्त्रादावधिकारः। उपासनया पुत्रको बलं सञ्चित्य तेन यथेच्छं भोगं वा मोक्षं वा लभते। यथा—**

"दीक्षा ह्यस्योपयुज्येत संस्क्रियायां स संस्कृतः।
स्व बलेनैव भोगं वा मोक्षं वा लभते बुधः।।"
(तं० आ० 16,296-297)

~ उपायाङ्गभूता — **दीक्षादीनां क्रियाणां न पृथगुपायत अपितु तासामाणवविस्ताररूपत्वं, क्रियायोगरूपत्वात्। इति तासां सर्वासामपि सामान्यपूजाहोमजपस्तोत्रपाठपर्यन्ता-नामाण्वोपाये एवान्तर्भावः। तत उपायाङ्गभूतास्ताः क्रियाः। यथा—**

"अन्ते ज्ञानेऽत्र सोपाये समस्तः कर्मविस्तरः।
प्रस्फुटेनैव रूपेण भावी सोऽन्तर्भविष्यति।।"
(तं० आ० 1,231)

~ क्रियाज्ञानमयी— **गुरुकृता क्रियात्मिका या दीक्षा**

तत्फलत्वेन शिष्यबुद्धावुद्बुध्यमानं यज्ज्ञानं तदपि दीक्षाङ्गभूतमेव। तत एव दीक्षा मोक्षदा। गुरूपदेशलभ्यं ज्ञानं तु स्पष्टमेव दीक्षाङ्गम्। गुरुर्दीक्षाविधौ स्वानुग्रहशक्तिप्रयोगपूर्वकं मन्त्रादिसाहाय्येन शिष्यस्य मलदाहनक्रियां विदधाति, येनासौ मुक्तो भवति प्रारब्धान्ते। बुभुक्षुं क्वाप्यूर्ध्वतरे लोके योजनिकाया क्रियया योजयति, येनासौ तत्रत्यान् भोगान् भुक्त्वैवक्रमेण मुक्तो भवति। यथा—

"अत्यन्तमलिनस्यास्य पुंसो विद्धस्य मायया।
कर्मणा भोगसक्तस्य अभिलाषान्वितस्य च।।
मोक्षं ददाति दीक्षाऽसौ क्रियाख्या ज्ञानरूपिणी।"

(ने० तं० 16,77-78)

~ तत्फलम्— **(1) वेदस्मृत्यनुसारिणः साधकस्य भोगसिद्धिः, तस्य निष्कामतावाप्तावेव पुत्रकत्वपदारूढस्य मोक्षसिद्धिर्दीक्षया। शिवधर्मानुसारिणः साधकस्य दीक्षया भोगसिद्धिर्बुभुक्षोरपि च तस्य पुत्रकत्वपदारूढतायां क्रमेण संस्कारपरिपाकतो मोक्षसिद्धिरपि, मुमुक्षोस्तु कथैव का। यथा—**

"तत्र दीक्षा लोकधर्मिणः साधकस्य भोगे निर्बीजस्य च पुत्रकस्य मोक्षे स्वयमुपायः, शिवधर्मिणश्च भोगे, सबीजकस्य च पुत्रकस्य मोक्षे संस्कारयोगादुपायः।"

(तं० आ० वि०, खं०9, पृ०1)

लोकधर्मी च श्रौतास्मार्तधर्मानुसारी।

(2) कदाचिद्दीक्षयाऽत्रैव लोके भुक्तिलाभो, देहान्ते च मुक्तिः। यथा—

"तेन दीक्षाशिवज्ञानदग्धसङ्कोचबन्धनः।।
देहान्ते शिव एवेति नास्य देहान्तरस्थितिः।"

(तं० आ० 28,236-237)

(3) दीक्षाबलेन शिवत्वसंस्कारः प्ररूढतां नीतोऽपि सन् प्रारब्धकर्मान्तं यावन्न तथाभिव्यक्ततां याति यथा प्रक्षीणे प्रारब्धे देहपाते च संवृत्ते सति। तीव्रमध्यशक्तिपातपवित्रीकृतस्यैवं विधं दीक्षाफलम्।

(4) मध्य-मध्यशक्तिपातवतो दीक्षयोर्ध्वलोकेष्वैश्वर्यभोगोऽन्ते च मोक्ष इत्युभयमपि शैव- दीक्षाफलम्। भोगवासनायाः बलात्कारेण निग्रहस्यानुपयुक्तत्वाद् बुभुक्षोर्योजनिका दीक्षा विधीयते ययाऽसावृत्कृष्टेषु लोकेषु योगसिद्ध्यर्थं नीयते, ततश्च भोगान् भुञ्जानस्यैव क्रमशो मोक्षवासना वर्धते, तांश्च तत्र भुक्त्वा क्रमेण मुक्तिं प्रत्यग्रेसरो भवनन्ततस्तां लभते एव। ततो योजनिकापि दीक्षाऽत्र पर्यन्ते मुक्तिदैव, शैवदीक्षायाः पर्यन्ते मुक्तिफलप्रदत्वात्। यथा—

"दीक्षा च भोगमोक्षोभयदायिनी, स्ववासनाबलीयस्त्वाद्; भोगवासनाविच्छेदस्य च असम्भाव्यमानत्वात्।"

(तं० सा० पृ०, 168-169)

"प्रारब्धदेहभेदे तु भुङ्क्तेऽसावाणिमादिकम्।
भुक्तोर्ध्वं याति यत्रैष युक्तोऽथ सकलेऽकले।।"

(तं० आ० 15,30)

(5) मन्दतीव्रशक्तिपातपवित्रिते शिष्ये यां ज्ञानदीक्षां शिवाभिन्नतां प्राप्तो गुरुर्विदधाति, सैव दीक्षा शिष्यं तत्कालमेव, जीवन्मुक्ततामापादयति। यतस्तद्विषये एवाऽऽचार्याभिनवगुप्तैः "यन्त्रं तिष्ठति केवलम्" इत्यागम- वाक्यं समुद्धृतम्। यथा—

"उक्तं च शास्त्रयोः श्रीमद्रत्नमालागमाख्ययोः।
यस्मिन् काले तु गुरुणा निर्विकल्पं प्रकाशितम्।।
तदैव किल मुक्तोऽसौ यन्त्रं तिष्ठति केवलम्।
प्रारब्धकर्मसम्बन्धाद्देहस्य सुखिदुःखिते।।
न विशङ्केत तच्च श्रीगमशास्त्रे निरूपितम्।
अविद्योपासितो देहो ह्यन्यजन्मसमुद्भुवा।।
कर्मणा तेन बाध्यन्ते ज्ञानिनोऽपि कलेवरे।"

(तं० आ० 13,230-233)

(6) (क) दीक्षया शिष्यः संस्कृतो भवति, (ख) दीक्षा मुक्तिप्रदापि भवति, (ग) भुक्तिप्रदापि, (घ) उभयप्रदापि च। संस्कारोऽपि क्रमेण मुक्तिमुक्तिप्रदो भवति। संस्कारेणाध्ययने मन्त्रोपास्तौ योगाभ्यासे चाधिकारो लभ्यते। यथा—

"दीक्षा बहुप्रकारेयं श्राद्धान्ता या प्रकीर्तिता।
सा संस्क्रियायै मोक्षाय भोगायापि द्वयाय वा।।"

(तं० आ० 26,27)

"दीक्षायाः कथिता प्राच्यग्रन्थेन पुनरुच्यते।
पारम्पर्येण संस्कृत्या मोक्षभोगाभ्युपायता।।"

(तं० आ० 15,7)

(7) मन्त्रोपासनयोगसाधनादावधिकारो हि दीक्षायाः दृष्टं फलम्। यथा—

"न च योगाधिकारित्वमेकमेवानया भवेत्।।
अपि मन्त्राधिकारित्वं मुक्तिश्च शिवदीक्षया।"

उद्ध०- (मा०वि०तं०4, 8,तं० आ०16-292,293)

(8) कृतदीक्षः साधकः शिवयोगे शिवज्ञाने चाधिकारितां लभते। एषोऽधिकारः समनन्तरफलं दीक्षायाः। यथा—

"अनयोर्हि दीक्षया संस्कारे कृते योगज्ञानादावधिकारो जायते।"

(तं० आ० वि०, खं० 9, पृ०, 2)

(9) कस्यचिदुत्कृष्टस्याधिकारिणो गुरूपदेशमात्रत एव बोधः समुदेति कस्यचित् पुनरवरस्याधिकारिणो गुरूकृतया विधिपूर्विकया क्रियादीक्षयेति गुरुमन्त्रादिसहायेन स्वेनैव बलेन तथाविधस्य शिष्यस्य मलानां शोधनं दीक्षया करोति। यथा-

"तत्र यावदिदमुक्तं तत् साक्षात् कस्यचिदपवर्गाप्तये

यथोक्तसंग्रहनीत्या भवति, कस्यचिद् वक्ष्यमाणदीक्षायामुपयोग गमनात्।

(तं० सा० पृ०, 115)

~ तद्विद्या — **क्रियादीक्षाकाले मन्त्रत्रयस्य प्रयोगो-विधीयते। गुरुणा ते एव मन्त्राः विद्यात्रयमित्युच्यन्ते। तच्च त्रयं क्रमेण— (1) मोक्षदाविद्या (2) दीक्षा-विद्या (3) पारमेश्वरी- विद्या चेति। तत्र द्वितीयैषा एवमुक्ता—**

"अइङोयरलवअणर्फे महाहाटकेश्वरि क्षमस्व-पापान्तकारिणि पापविमोहनि पापं हन-हन धुन-धुन रुद्रशक्तिवशात् सत्," इति विद्यात्रये द्वितीया विद्या। यथा—

"अनुतरेच्छे धान्तश्च सत्रयोदशसुस्वरः।।
अस्य वर्णत्रयस्यान्ते त्वन्तःस्थानां चतुष्टयम्।
वर्गाद्यश्वौ त्र्यस्रबिन्दुयुक् पान्तोऽर्णत्रयादतः।।
महाहाटकशब्दाद्यमीश्वरीत्यर्णसप्तकम्।
आमन्त्रितं क्षमस्वेति त्र्यर्णं पापान्तकारिणि।।
षडर्णं पापशब्दादि विमोहनिपदं ततः।
पापं हनधुन द्विर्द्विर्दशार्णं पदमीदृशम्।।
पञ्चम्यन्तं षडर्णं स्याद्रुद्रशक्तिवशादिति।।
तत एकाक्षरं यत्तद्विसर्गब्रह्म कीर्तितम्।।
तदनच्कतकारेण सहैकीभावतः पठेत्।
रन्ध्राब्धिवर्णा विद्येयं दीक्षाविद्येति कीर्तिता।।"

(तं० आ० 30,110-115)

विसर्गब्रह्म= सकारः। रन्ध्राब्धिवर्णा=49 वर्णेति।

~ तत्सारम्— **(1) गुरुकृतया क्रियादीक्षया शिष्यस्यान्तरुद्बो धितोन्मनाशक्तिर्या स्वरूपसाक्षात्कारात्म-कज्ञानमयी।**

"उन्मना तु परा शक्तिर्ज्ञानरूपावधूतिका।।
सा क्रियेत्यभिधीयेत न क्रिया त्वध्वमध्यगा।"

(ने० तं० प० 16,78-79)

(2) संविद्रूपस्य स्वात्मनः पूर्णशिवरूपतयावभासनमेव दीक्षायाः परमं तत्त्वम्। उत्कृष्टतमो हि गुरुः शिष्यं परिपूर्णं स्व-स्वरूपं साक्षदनुभावयति। इति तदनुभावनमेव सारं दीक्षायाः। तिलाज्याहुतिस्नानमार्जनप्रभृति सर्वं तदङ्गतयैवो-पयुज्यमानं सप्रयोजनं भवति। तीव्रानुग्रहपात्राणां साधकानां स्वरूपसाक्षात्कारमयीदीक्षा तिलाज्याहुतिप्रभृतिसाधनजातं विनैव भवति। यथा—

"संविदश्च स्वतन्त्रायास्तथारूपावभासनम्।
दीक्षेति किल मन्तव्यं मुच्यन्ते जन्तवो यया।
अत एव तिलाज्यादेः स्वरूपे ग्रहणे मितौ।
क्रमो वा नियमो नेह कश्चिच्छास्त्रे निरूपितः।।"

(मा० वि० वा० 2, 225-226)

"एवं यो वेत्ति तत्त्वेन तस्य निर्वाणगामिनी।।
दीक्षा भवत्यसंदिग्धा तिलाज्याहुतिवर्जिता।"

(प० त्री०, 25)

~ तदपात्रम्— **अन्येषु वैष्णवबौद्धार्हतादिदर्शनशास्त्रेष्व-भिनिविष्टा जना न शिवदीक्षापात्राणि। यथा—**

"अनुत्तरविधानं तु न दद्यात् परदीक्षिते।
स्वशिष्ये दीक्षिते दद्यादन्यथा न प्रसिद्ध्यति।।"

(ने० तं० खं० 1, पृ०, 296)

"परदीक्षितस्य द्वैतशिष्यत्वादद्वयानन्दाननुप्रविष्टत्वादिति।

(ने० तं० खं० 1, पृ०, 296)

~ त्रिविधा (कौले)— **आणवी, शाक्ती, शाम्भवी चेति लक्षिता यथा—**

"गुरोर्मन्त्रोद्भावनद्वारा शिष्यस्य श्रवणमात्रप्राधान्येन स्वरूपसमावेशदायिनी दीक्षाणवी, कुण्डलिनीशक्त्युल्लेखनात्मिका मनोव्यापारानुसन्धेया शाक्ती, सर्वविकल्पवैमुख्येन स्वस्वरूपाविभिन्न-शम्भुसमावेशस्वभावा शाम्भवीति विवेकः।"

(म० मं० प०, पृ०, 170)

~ द्विप्रकारा— **तत्रैका मोक्षदा, अपरा च भोगमोक्षभयफल-प्रदा। यथा—**

द्र०- **'अत्रैवधः' इति।**

~ द्विरूपा— **मुक्तिप्रदा भोगमोक्षोभयप्रदापि वा दीक्षा पुनर्द्विप्रकारा निर्बीजा सबीजा चेति। यथा—**

"मुक्तिप्रदा भोगमोक्षप्रदा वा या प्रकीर्तिता।
दीक्षा सा स्यात्सबीजत्वनिर्बीजात्मतया द्विधा।।"

(तं० आ० .17,94)

सबीजायां मलकर्मसंस्कारशेषस्तिष्टत्येव चिरम्, परं निर्बीजायां तत्संस्कारो विलुप्त एव भवति। इत्यनयोः परस्परं विशेषः।

~ द्विस्वरूपा— **(1) मुख्यतया दीक्षा द्विस्वरूपा भवति, ज्ञानरूपा क्रियारूपा च। ज्ञानरूपा तावत्तत्त्वबोधमयी क्रियारूपा च मन्त्रमण्डलाद्याराधनमयी शैवाचारप्रशिक्षणमयी च। यथा—**

"क्रियाज्ञानविभेदेन सा च द्वेधा निगद्यते।
द्विविधा सा प्रकर्त्तव्या तेन चैतदुदाहृतम्।।"

(मा० वि० तं० 4,7)

(2) बाह्यदीक्षाङ्गभूतैः स्नानाभिषेकन्यासमन्त्र-प्रयोगयागादिभिः शरीरान्तःकरणादिशोधनं विधीयते शिष्यस्य गुरुणा क्रियात्मिकया दीक्षया। तदनन्तरमेव तस्मै शिवज्ञानमुपदिश्यते। उभयपक्षीयेण संस्कारेण संस्कृतः शिष्यो भुक्तिमुक्ती लभते। यथा—

"नाध्यात्मेन विना बाह्यं नाध्यात्मं बाह्यवर्जितम्।।
सिद्ध्येज्ज्ञानक्रियाभ्यां तद् .....।"

(तं० आ० 15,43-44)

सामान्यतो ह्येष नियमः, अपवादरूपतया सामर्थ्यशाली योगसिद्धः सम्पूर्णज्ञानवान् गुरुः येन केनाप्युपायेन शिष्यं शिवपदं प्रापयितुं क्षम इति न विस्मर्त्तव्यं सुधीभिः।

~ निर्बीजा— **यया दीक्षया मलकर्मसंस्काराः सर्वथा शोध्यन्तेऽसौ शैवीदीक्षा, निर्बीजा। विशेषतस्त्रिकप्रक्रियासु।**

आसन्नमरणेऽशक्ते वा शिष्ये निर्बीजायां दीक्षायां क्रियमाणायां सामया अपि पाशाः शोध्या भवन्ति। तया निर्बीजया दीक्षया इहैव भोगान् भुक्त्वा शिवभावावाप्तिरनुग्रहतीव्रताबलात्। यथा—

"बाले निर्ज्ञातमरणे त्वशक्ते वा जरादिभिः।
कार्या निर्बीजिका दीक्षा शक्तिपातबलोदये।।
निर्बीजायां सामयांस्तु पाशानपि विशोधयेत्।
कृतनिर्बीजदीक्षस्तु देवाग्निगुरुभक्तिभाक्।।
इयतैव शिवं यायात् सद्यो भोगान् विभुज्य वा।"

(तं० आ० 17,95-97)

~ निष्फला— **यथार्थज्ञानविज्ञानरहितेन गुरुणा कृता दीक्षात्मिका क्रिया नावश्यं भुक्तिमुक्तिप्रदा भवति। गुरोज्ञार्नविज्ञानसामर्थ्यादेव तत्कृतायां दीक्षायां भुक्तिमुक्तिदाने वा, पाशक्षपणे वा सामर्थ्यमुपजायते। यथा—**

"शिवतत्त्वमविज्ञाय दीक्षां प्रकुरुते तु यः।।
अन्धेनैव यथान्धस्तु सर्वे ते श्वभ्रपातिनः।"

(ने० तं० 16,41-42)

~ पारोक्षी—

द्र०- 'परोक्षदीक्षा' इति।

~ **पौत्रिकी—**

द्र०- 'पुत्रकदीक्षा' इति।

~ प्राणहरी—

द्र०- 'सद्यो निर्वाणदा' इति।

~ प्रातिभी— **गुरुकृतां दीक्षां विनैव यस्य प्रातिभं ज्ञानमुदेत्यसौ शिष्यो नैवेह ज्ञानक्रियादीक्षामपेक्षते। योगिनीभिरन्तरेव तस्य या दीक्षाकृता सत्यनुमीयतेऽसौ प्रातिभी दीक्षा। यथा—**

"यस्य त्वीशप्रसादेन दिव्या काचन योग्यता।
गुरोः शिशोश्च तौ नैव प्रति दीक्षोपयोगिता।।
ज्ञानमेव तदा दीक्षा श्रीत्रैशिकनिरूपणात्।"

(तं० आ० 15,14-15)

"एवं यो वेति तत्त्वेन तस्य निर्वाणगामिनी।
दीक्षा भवत्यसन्दिग्धा तिलाज्याहुतिवर्जिता।।"

उद्ध०- (प० त्री० 25, तं० आ० वि०, खं० 5,पृ०,10)

दीक्षां विनापि तस्य कथं ज्ञानोदयः इति शङ्का प्रशमार्थमुच्यतेयदसौ तथाविधानुग्रहपात्रतां यातः साधको योगिनीभिरदृश्येनैव केनापि प्रकारेण दीक्षितः सन् शिवत्वसंस्कारवान् सम्भवति। यथा—

"न चास्य समयित्वादिक्रमो नाऽप्यभिषेचनम्।
न सन्तानादि नो विद्याव्रतं प्रातिभवर्त्मनः।।"

(तं० आ० 13,140)

"देवीभिर्दीक्षितस्तेन सभक्तिः शिवशासने।"

(तदेव13,142)

~ बहुप्रकारा— **मन्दतीव्रादिवैचित्र्येण शक्तिपातस्य शिष्याणां दीक्षापि चिरक्षिप्रादिकालेनाल्पमहदादिफलप्रदा, समयपुत्रकादिनामभेदभिन्ना च। यथा—**

"कश्चिद्रुद्रांशतामात्रापादनात्तत्प्रसादतः।।
शिवत्वं क्रमशो गच्छेत् समयी यो निरूप्यते।
कश्मिच्छुद्धाध्वबन्धः सन् पुत्रकः शीघ्रमक्रमात्।।"

(तं०आ०13,296-297)

~ बाह्या— **सा च स्नानाभिषेकादिमयी क्रियादीक्षा।**

द्र०- 'दीक्षा' ~ द्विस्वरूपा **इति।**

~ मुक्तिप्रदा— **शैवीदीक्षाऽवश्यं पर्यन्ते मुक्तिप्रदा भवति।**

यथा—

"मुक्तिश्च शिवदीक्षया।"

(तं० आ० 15,6)

~ मृतोद्धारिणी— **अदीक्षितः शिष्यो मरणानन्तरमपि समर्थेन गुरुणा भुक्तिमुक्तिमार्गे योज्यते तस्य मृतशरीर एव कृतेन दीक्षाविधिना। सैषा मृतोद्धारकरी दीक्षा।**

तत्र हेतवः—

(1) मृतस्य बन्धुभार्यादिभिः कृताभ्यर्थना।

(2) स्वयमेव गुरुहृदये समुत्पन्ना करुणा।

(3) तत्काल एव परमेश्वरकृतोऽनुग्रहः इति। यथा—

"बन्धुभार्यासुहृत्पुत्रगाढाभ्यर्थनयोगतः।।
स्वयं तद्विषयोत्पन्नकरुणाबलतोऽपि वा।
विज्ञाततन्मुखायात शक्तिपातांशधर्मणः।
गुरुर्दीक्षां मृतोद्धारीं कुर्वीत शिवदायिनीम्।"

(तं० आ० 21,9-11)

~ योग्यतानुसारिणी— **शैवदर्शनस्य नीतिरेषा यन्न सर्वे एकेनैवविधिनादीक्षितव्या, अपि तु व्यक्तिगतवासनानुसारमेव तत्तद्भोगमोक्षदायिनी दीक्षा हिता भवति तेभ्यः। स एव नियमो योजनिकाविधौ। यथा—**

"यो यत्राभिलषेद्भोगान् स तत्रैव नियोजितः।।
सिद्धिभाङ्मन्त्रशक्त्येति श्रीमत्स्वायम्भुवे विभुः।
योग्यतावशतो यत्र वासना यस्य तत्र सः।।
योज्यो न च्यवते तस्मादिति श्रीमालिनीमते।"

(तं० आ० 15, 2-4)

"योग्यतावशसंजाता यस्य यत्रैव वासना।
स तत्रैव नियोक्तव्यो दीक्षाकाले विचक्षणैः।।"
(मा० वि० तं० 12,40)

द्र०- (तं० आ० वि० खं० 9, पृ०, 3)

~ योजनिका— **उत्तरोत्तरेषु लोकेषूत्कृष्टतरभोगाप्तये तत्र-तत्र प्रापयित्री दीक्षा। त्रिके तु योजनिकानुष्ठानं तासु-तासु दीक्षासु तदङ्गरूपतयैव विधीयते। नेयं तत्र पृथक् स्वतन्त्रदीक्षारूपेण गण्यते। शाक्तादितन्त्रपरम्परास्वस्याः प्राधान्यम्। यथा—**

"होत्री दीक्षा तु सिद्धान्ते तन्त्रे योजनिका स्मृता।"
उद्ध०- (तं० आ० वि०, खं० 8, पृ०,182)

~ लक्षणतः— **आत्मनि शिवभावसंस्काररोपणं तेषां दृढताकरणञ्च दीक्षालक्षणं मूलतः। ततो येन-येन कर्मणा-तद्विधीयते तत्तत्कर्म दीक्षात्मकतया गण्यते। यथा—**

"इहात्मसंस्कार एव दीक्षा।"
(स्व० तं० उ०, खं० 3, पृ०, 76)

"दीयते ज्ञानसद्भावः क्षीयते पशुवासना
दानक्षपणसंयुक्ता दीक्षा तेनेह कीर्तिता।।
इत्याम्नायनिरूपितः।"
(तदेव)

~ लक्ष्यतः— **निरस्तरङ्गपरिपूर्णशिवभावोद्बोधनं ह्यत्र पार्यन्तिकं लक्ष्यं दीक्षायाः। पूर्णत्वेन पारमैश्वर्यमाक्षिप्तं वेदितव्यम्। ततो न प्रशान्तब्रह्मभावोऽपि तु परिपूर्णपरमेश्वरभावो हि शिवदीक्षायाः लक्ष्यम्। यथा—**

"प्रशान्तः स्तिमितो ज्ञेयः स्तिमितो निश्चलः स्मृतः।।
निश्चलो निस्तरङ्गश्च स्थिरः पूर्णः समन्ततः।
एवं भावं समास्थाय दीक्षा कार्या तु दैशिकैः।।"
(स्व० तं० 4,324-325)

पूर्णत्वेनात्र परमेश्वरभावः संसूचितः। समन्ततः इत्यनेन परमेश्वरभावस्य परिपूर्णतापि सूचिता। निश्चलो हि निस्तरङ्गः शान्तब्रह्मः भावस्थ इवः; पूर्णः पुनः परमेश्वरः समस्तैश्वर्यविभूषितः इति।

~ लोकान्तरस्थस्य—

द्र०- 'जालप्रयोगदीक्षा' इति।

~ वेधात्मिका—

द्र० 'वेधदीक्षा' इति।

~ शिवताविशतः— **उभयोर्गुरुशिष्ययोः शिवतावेशः आवश्यकः। न तं विना दीक्षा सुफला। यथा—**

"शिवाभिमानितोपायो बाह्यो हेतुर्न मोक्षदः।
शिवोऽयं शिव एवाऽस्मीत्येवमाचार्यशिष्ययोः।।
हेतुतद्वत्तया दार्ढ्याभिमानो मोचको ह्यणोः।'
(तं० आ० 15,42-43)

शिवाभिमानितैव भोगमोक्षोपायं इति।

~ श्राद्धविधिना—

द्र०- 'श्राद्धदीक्षा' इति।

~ सद्यो निर्वाणदा— **सद्यः प्राणहरी दीक्षा। समर्थेन शिवगुरुणा तीव्रतरशक्तिपाततः कृता दीक्षा शिष्यं सर्वेभ्यो बन्धेभ्यो मलेभ्यश्च तत्कालमेव मोचयति, शिवताञ्चापादयति। सद्यः शरीरत्यागपूर्वकम्। यथा—**

"अभ्यासयुक्तिसंक्रान्तिवेधघट्टनरोधतः।।
हुतेर्वा मन्त्रसामर्थ्यात् पाशच्छेदप्रयोगतः।
सद्यो निर्वाणदां कुर्यात् सद्यः प्राणवियोजिकाम्।।"
(तं० आ० 13,234-235)

"तस्मात् प्रवितताद् बन्धाद् परस्थानविरोधकात्।
दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि।।"
उद्ध०- (तं० आ० वि०, खं० 1, पृ०, 80)

"इति तीव्रतमशक्तिपातादौ पुनरनुपायादिक्रमेण
दीक्षा भवेत्, येनास्य तत्कालमेवापवर्गः।
(तं० आ० वि०, खं, 1 पृ०, 81)

परमेवं विधस्तीव्रतरः शक्तिपातो मरणकाल एव विधीयते। गुरुः शिष्यस्य मरणकालं योगबलेन ज्ञात्वा तदानीमेव देहपातपूर्वकं शिष्यं शिवभावे प्रवेशयति। यथा—

"तत्रत्वेषोऽस्ति नियम आसन्ने मरणक्षणे।
तां कुर्यान्नान्यथारब्धृकर्म यस्मान्न शुद्ध्यति।"
(तदेव० 13,236)

"तस्मात्प्राणहरीं दीक्षां नाज्ञात्वा मरणक्षणम्।
विदध्यात् परमेशाज्ञा लङ्घनैकफला हि सा।।"
(तदेव० 13,239)

द्र०- 'प्राणहरणं दीक्षा' इति।

~ सद्यो मुक्तिप्रदा—

द्र०- 'सद्यो निर्वाणदा' इति।

~ सप्रत्यया—

द्र०- 'सप्रत्यया दीक्षा' इति।

~ सबीजा— **यया दीक्षया मलकर्मसंस्काराः सर्वथा नैव शोध्यन्ते सा सबीजा दीक्षा। तया दीक्षितस्य क्रमश एव मोक्षावाप्तिर्न सत्वरम्। यथा—**

"सबीजायां तु दीक्षायां समयान्न विशोधयेत्। इत्यादि।
(तं० आ० 17,99)

अस्या दीक्षायाः क्रियाडम्बरात्मकं विधानं विस्तरतः प्रतिपादितं तन्त्रालोके।

द्र०- (तं० आ०17,99-122) इति।

~ समावेशमयी— **समावेशफलदा पुत्रकादिदीक्षा। ज्ञानदीक्षा, अनुपायदीक्षा इत्येवं प्रकाराः त्रिकाचारे विधीयमानाः दीक्षाश्च। ततोऽसौ तत्रत्यः समावेशो देवविशेषावेश एव न शिवभावसमावेशः इति विदाङ्कुर्वन्तु सुधियः। यथा—**

"त्रिके समावेशवती .....।"

उद्ध०- (तं० आ० वि०, खं० 8, पृ०, 182)

त्रिके समावेशः दीक्षायाः फलं, नोपायः। अन्यत्र शास्त्रेषु दीक्षाङ्गं समावेशः।

~ सर्वोपकारिणी— **ये स्वयं शाम्भावशाक्ताद्युपाय-परिशीलनेऽसमर्थास्तेषामपि मलशोधनं गुरुकृतया दीक्षया भवत्येव। तेन दीक्षा यस्य कस्याप्युपकारिणी मोचिका चेति। यथा—**

"येषामध्यवसायोऽस्ति न विद्यां प्रत्यशक्तितः।
सुखोपायमिदं तेषां विधानमुदितं गुरोः।"

(उद्ध०-)

"इति ह्यागमे दीक्षायोजनं सर्वानुग्राह्युक्तम्।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 299)

~ सामयी—

द्र० 'समयदीक्षा' इति।

~ सामरस्यमयी— **उपास्योपासकयोः परस्परं सामरस्य-कारिणी, शिवशक्तिसामरस्यसमास्वाददायिनी च (कौलाचारे-विधीयमाना) दीक्षा। यथा—**

"सामरस्यमयी कौले .....।"

उद्ध०- (तं० आ० वि०, खं० 8, पृ०, 182)

~ सारतः— **शिष्ये शिवतावेशसम्पादनमेव सारभूतं तत्त्वं दीक्षायाः। तच्च शिवतावेशभागेव गुरुः सम्पादयितुं शक्तः। यथा—**

"तत्रादौ शिवतापत्तिस्वातन्त्र्यावेश एव यः।।
स एव हि गुरुः कार्यस्ततोऽसौ दीक्षणे क्षमः।
शिवतावेशिता चास्य बहूपाया प्रदर्शिता।।
क्रमिका बाह्यरूपा तु स्नानन्यासार्चनादिभिः।"

(तं० आ० 15,38-40)

अस्येति गुरोः शिष्यस्य च।

~ स्तोभात्मिका— **मध्यविकासदायिनी कुलाचारे विधीयमाना दीक्षा। यथा—**

"कुले स्तोभात्मिका मता।"

उद्ध०- (तं० आ० वि०, खं० 8, पृ०, 182)

~ स्नानादितः— **स्नानादेरपि निजं फलमस्ति मनाङ्। यथा—**

"किन्तु स्नानं सुवस्त्रत्वं तुष्टिसञ्जननं भवेत्।"

(तं० आ० 15,45)

~ होत्री— **शैवसिद्धान्तपरम्परायां विधीयमाना होमादि-साध्या सामयी दीक्षा। यथा—**

"होत्री दीक्षा तु सिद्धान्ते।"

उद्ध०- (तं० आ० वि०, खं० 4, पृ०, 182)

दीक्षोत्तरम्— किमपि महत्त्वमण्डितमागमशास्त्रं यस्य वाक्यानि तन्त्रालोके बहुधा समुद्धृतानि तद्विवेकेऽपि क्वचित्—क्वचित्। यथा—

"ततोऽस्य बहुरूपत्वमुक्तं दीक्षोत्तरादिके।।
भुवनं विग्रहो ज्योतिः खं शब्दो मन्त्र एव च।
बिन्दुनादादिसम्भिन्नः षड्विधः शिव उच्यते।।"

(तं० आ० 1,62-63)

द्र०- तं० आ० 8,9-10; 10,21-22; 15,458-459; 17,97; 18,11; 29,59-61; 24,4, 17-20; 28,65-67; 29,243; तं० आ० वि०, खं० 9, पृ०, 1; खं० 10, पृ०, 312) इति।

दीक्षोपक्रमः — (1) दीक्षाविषयकं तत्त्वज्ञानम्। यथा—

"इत्थं दीक्षोपक्रमोऽयं दर्शितः शास्त्रसम्मतः।"

(तं० आ० वि०, खं० 8, पृ०, 239)

(2) दीक्षाकर्मारम्भो नित्याह्निकयागादिक्रियारूपः। यथा—

"दीक्षायां हि नित्याद्यात्मयजनमुपक्रमोपयोगित्वादङ्गम्, एतदानन्तर्येण तत्सम्पत्तेः।"

(तं० आ० वि०, खं० 9, पृ०, 1)

"नित्याह्निके समाप्ते तु कुर्यान्नैमित्तिकं बुधः।"

उद्ध०- (तदेव)

दीपनम्— मन्त्रप्रयोगे कर्मविशेषः यथा—

"दीपनं मन्त्रस्य प्रणवेन।"

(ने० तं० उ०, खं० 2, पृ०, 75)

"तदुक्तं श्रीमदुच्छुष्मतन्त्रे:—
'दीपने तु महाभाग प्रणवोभययोजनम्।' इति"।

उद्ध०- (ने० तं० उ०, खं० 2, पृ०, 75)

दीपाः— यागादि कर्मसु प्रयोज्याः बलिप्रदीपाः। विशेषतो गोघृतेन प्रदीप्ताः, तदभावे तैलदीपा अपि प्रयुज्यन्ते। यथा—

"दीपा घृतोत्था गावो हि भूचर्यो देवताः स्मृताः।"

(तं० आ० 29,16)

दीर्घाः— षट् स्वराः उक्ताः स्वष्टम्। यथा—

"आ ई ऊ ऐ औ अः इति षड्दीर्घाः।"

(तं० आ० वि०, खं० 12, पृ०, 178)

दीर्घत्वं ह्रस्वत्वं चात्र पारिभाषिकमेव वेद्यम्। ए,ओ, इत्येतौ तन्त्रे ह्रस्वेषु गणितौ न दीर्घेषु। अं इति नैव ह्रस्वेषु न चापि दीर्घेषु गणितो जयरथेन। ततः सर्वथा पारिभाषिकमेवैतत्। नैतद् व्याकरणशास्त्रानुसारि।

दुर्वासाः — **(1) श्रीकण्ठनाथस्य शिष्यः; शैवदर्शनस्य गुरुवरः। गुरूणां प्रथमपङ्क्तो परमर्षिरित्युक्तः त्र्यम्बकादित्यस्य गुरुः, अद्वैतशैवदर्शनप्रचारकः। यथा—**

"..... दुर्वासाः परमस्त्वृषिः।"

(स्व० तं० 10,1076)

(2) यदा खलु पराद्वैतशैवदर्शनोपासनविद्या गुरुशिष्यपरम्परासु क्रमेणात्यन्तं ह्रासमुपयाता, विशेषतः कलियुगे, तदा भगवतः श्री कण्ठनाथस्यादेशेन भुवमवतीर्णस्त्र्यम्बकादित्यनामा सिद्धोऽद्वैतदृष्ट्या शैवीं विद्यां पुनः प्रवर्त्तयितुम् महामुनेर्दुर्वाससोऽसौ मानसः पुत्रः। भगवत श्रीकण्ठनाथस्यैवाज्ञया चिरजीविना महामुनिना दुर्वाससा त्र्यम्बकादित्याय शैवदर्शनरहस्यानां ज्ञानविज्ञाने प्रदत्ते। तेन चाग्रे पराद्वैतदर्शनस्य त्र्यम्बकाख्या मठिका प्रचालिता, याऽद्यापि मनाग्जीवति। तेन दुहितृद्वाराऽपराप्यद्वैतशैवदर्शनमठिका प्रचालिता। ततो महामुनिर्दुर्वासा एव पराद्वैतशैवदर्शनमठिका द्वयस्य प्रवर्त्तकः। ते च मठिके— (1) त्र्यम्बकमठिका, या कश्मीरेषु प्रसरतीदानीमपि, (2) अर्धत्र्यम्बकमठिका या द्वादश शताब्द्यां काङ्गड़ायां प्रसरन्त्यासीत्। वर्तमाने युगे बहवः प्रख्याताः शोधविद्वांसो द्वैतमठिका प्रवर्त्तकस्यामर्दकनाथस्य द्वैताद्वैतमठिकाप्रवर्त्तकस्य च श्रीनाथस्यापि गुरुं भगवन्तं दुर्वाससमेव मन्यन्ते ख्यापयन्ति च। परमस्य विषयद्वयस्य सत्यतायाः असत्यतायाः अपि वा किमपि प्रमाणमवशिष्टे बृहति शैवशास्त्रवाङ्मये न क्वापि लभ्यते, इति विचारयन्त्वत्र सुधियः। यथा—

"कैलासाद्रौ भ्रमन् देवो मूर्त्या श्रीकण्ठरूपया।
अनुग्रहायावतीर्णश्चोदयामास भूतले।।
मुनिं दुर्वाससं नाम भगवानूर्ध्वरेतसम्।
नोच्छिद्येत यथा शास्त्रं रहस्यं कुरु तादृशम्।।"

(शि० दृ० 7, 109-110)

द्र०- 'त्र्यम्बकादित्यः' इति।

द्र०- 'अर्द्धत्र्यम्बकमठिका' इति च।

~ तत्पदम् — **पुंस्तत्त्वे विद्यमानादणिमादिसिद्धिभुवनादूर्ध्वं यास्तिस्रो गुरुशिष्यपंक्तयस्तत्रैव भगवतो दुर्वाससः पदम्। यथा—**

"यथोर्ध्वं गुरुशिष्याणां पङ्क्तित्रयमतः शृणु। इत्यारम्य. ..... दुर्वासा परमो मुनिः।

उद्ध०- (स्व० तं० 10, 1074,) (तं० आ० वि०, खं० 5, पृ०, 192)

~ तद्ग्रन्थाः— **इदानीं भगवता दुर्वाससा निर्मितं ग्रन्थत्रयं लभ्यते। त्रीण्यपि स्तोत्रकाव्यानि। काव्यत्वदृष्ट्याऽतीव महत्त्वशालीनि शास्त्रतत्त्वगर्भाणिच। तानि तावत्:— (1) परशम्भुमहिम्नस्तवः। (2) त्रिपुरामहिमस्तोत्रम्। (3) ललितास्तवरत्नं चेति।**

स्वे-स्वे स्थाने त्रीण्यपि द्रष्टव्यानि।

दूती— **मकारोपयोगबहुलायां कुलप्रक्रियायामयं नियमो यद्गुरुर्ज्ञानं दूत्यां सङ्क्रामयति, तद्द्वारा च शिष्येषु, यतो हि स्त्रियस्त्वरितगत्या सिद्धिं लभन्ते, पुरुषास्तु मन्दगत्या। तत एव स्त्रीसहाय्येन शिष्येषु ज्ञानं सुखेन त्वरितञ्च सञ्चार्यते गुरुणा। ततो ज्ञान सङ्क्रामणोपायभूता स्त्री दूती। यथा—**

"कुल प्रक्रियायां हि दूतीमन्तरेण क्वचिदपि कर्मणि नाधिकारः। इत्यतस्तत् सहभावेनोपनिबन्धः।"

(तं० आ० वि०, खं० 1, पृ०, 32)

"योक्ता सम्वत्सरात्सिद्धिरिह पुंसां भयात्मनाम्।
सा सिद्धिस्तत्त्वनिष्ठानां स्त्रीणां द्वादशभिर्दिनैः।।
अतः सुरूपां सुभगां सरूपां भाविताशयाम्।
आदाय योषितं कुर्यादर्चनं यजनं हुतम्।।"

उद्ध०- (तदेव)

" .....
प्रविकस्वर मध्यपदा शक्तिः शास्त्रे ततः कथिता,
तस्यामेव कुलार्थं सम्यक् सञ्चारयेद् गुरुस्तेन।।
तद् द्वारेण च कथितक्रमेण सञ्चारयेत नृषु।"

(तं० आ० 29,122-123)

द्र०- (तं० आ० वि०, खं० 11/2, पृ०, 88)

"स्त्रीमुखाच्च भवेत् सिद्धिः सुसिद्धं तासु तत्पदम्।।"

(तदेव, खं० 11/2, पृ०, 88)

'स्त्रीमुखे निक्षिपेत् प्राज्ञः स्त्रीमुखाद् ग्राहयेत्पुनः।' इत्याद्युक्ते कुलप्रक्रियायां दूतीमुखेनैव शिष्यस्य ज्ञानप्रतिपादनाम्नायादिह गुरुतद्दूत्योः समस्कन्धतयोपादानम्।।"

(तं० आ० वि०, खं० 1, पृ०, 35)

~ नैव स्वपत्नी— **स्वपत्नी नैव दूतीपदे नियोज्या भवति। तद्विषये भोग्यत्वभावस्योदयः सम्भवेदिति शङ्कया। यथा—**

"स्वपत्न्यां हि रिरंसासम्भावनाया अप्यवकाशः स्यात्"

(तं० आ० वि०, खं० 11/2, पृ०, 73)

~ लक्षणतः— **यद्यपि तन्त्रराजभट्टारके त्रिशिरोभैरवे च कथितानि दूतीलक्षणानि नैव सर्वाणि प्रायः क्वापि लभ्यानि, तथापि मुख्यं लक्षणं दूत्यास्तदेव यदसौ कुलयाजकेन साकं सुदृढमभेदभावना निष्ठा भवेदिति तथा विधैव दूती सिद्धिकारिणी। अन्यानि शास्त्रान्तरोक्तानि लक्षणानि नात्यान्तमावश्यकानि। यथा—**

"शक्तेर्लक्षणमेतावत्तद्वतो ह्यविभेदिता।।
तादृशीं तेन तां कुर्यान्न तु वर्णाद्यपेक्षणम्।"

(तं० आ० 29,100-101)

तद्वतेति शक्तिमता सहाविभेदिता। यथा—

"यदि लक्षणहीना स्याद् दूती वै साधकात्मनाम्।

वीरैकचित्ता निष्कम्पा सर्वकर्मसु गम्यते।।"

उद्ध०- (तं० आ० वि०, खं० 11/2, पृ०, 71)

~ पर्वपूजासु— **तत्र चक्रयागस्य यद् वास्तविकं तत्त्वं तद्वेदिनी, रागवती, अन्त्यजातीया वा, कन्या वा, वेश्या वा दूतीत्वेन योज्या भवति पर्वपूजासु क्रियामाणे तान्त्रिके यागे। यथा—**

"कन्यान्त्यजाऽथ वेश्या रागवती तत्त्ववेदिनी दूती।।
व्याससमासात् क्रमशः पूज्याश्चक्रकेऽनुयागाख्ये।"

(तं० आ० 28,39-40)

दूतीयागः— परिपूर्णज्ञानविज्ञानवान् योगसिद्धश्च गुरुः दूतीति परिभाषितायाः स्वशक्तिरूपायाः स्त्रियाः साहाय्येन स्वशिष्यान् शिवभावे प्रवेशयितुं यां पञ्चमकारोपयोगबहुलां सद्यः सफलां तान्त्रिकीं क्रियामाचरति; तस्याः वीरजनमात्रोचितायाः क्रियायाः सर्वाङ्गसम्पूर्णो विधिर्दूतीयाग इति परिभाष्यते कौलमतत्रिकाद्यागमेषु।

द्र०- (तं० आ० आ०, 29) इति।

विशेषतश्च (तदेव 29,111-146)

दौतविधिः, रहस्यचर्या, दूतीसाधना इत्याद्याः अस्य यागस्य पारिभाषिक्याः संज्ञाः। अतिरहस्यात्मकत्वान्न स्फुटमस्य वर्णनमत्रोचितम्। दीक्षितानामेतावन्मात्रेणैव स्पष्टार्थता। अन्येषां कृते च स्पष्टीकरणस्य निष्फलत्वम्, प्रत्युत तेषामज्ञतया दोषोद्भावकत्वमपि स्यात्।

~ तन्नियमाः— **सर्वथा परसंवित्स्वरूपप्रवेशपरत्वेनैव, न कथमपि रिरंसया दूतीसङ्घट्टोऽभ्यसनीय इति तत्र नियमः। यथा—**

"दूती' कुर्यात्तु कार्यार्थी न पुनः काममोहितः।"

उद्ध०- (तं० आ० वि०, खं० 11/2, पृ०, 73)

"स्थित्यर्थं रमयेत्कान्तां न लौल्येन कदाचन।"

उद्ध०- (तत्रैव)

"शिवशक्त्यात्मकं रूपं भावयेच्च परस्परम्।
न कुर्यान्मानवीं बुद्धिं रागमोहादिसंयुताम्।।
ज्ञानभावनया सर्वं कर्त्तव्यं साधकोत्तमैः।"

उद्ध०- (तत्रैव)

दूत्यः— ब्राह्मी माहेश्वरी प्रभृतयो मातरः। यथा—

"दूत्यो ब्राह्मयादि परिवारभूताः।"

(नं० तं० उ०, खं० 2, पृ०, 115

शिवदूत्यस्ताः भवेयुरिति सभ्याव्यते। न सम्यक्स्पष्टीकृतमिदं टीका कृता।

दूषिका—

द्र०- **'मातरः'** इति।

(ने० तं० उ०, खं० 2, पृ०, 145-146)

दृक्— (1) दृशिस्वभावा परमेश्वरस्य सा चितिक्रियायां विना शैवः प्रकाशः प्रतिबिम्बग्रहणे समर्थोऽपि सन् जड एवाभविष्यद् बाह्यदर्पणवत्। एषा हि प्रमाणप्रमेयादिदर्शनकारित्वेन दृगित्युच्यते। संविन्मयी परेयं शक्तिः। यथा—

"तत्र परमेश्वरः पूर्णसंवित्स्वभावः। पूर्णतैवास्य शक्तिः, कुलं, सामर्थ्यं .... दृग् अभिधीयते।"

(तं० सा०, पृ०, 27)

द्र०- **'काली'** इति।

(2) ज्ञानम्। यथा—

"दृक् स्वाभासैव नान्येन वेद्या रूपदृशेव दृक्।"
रसे .....।"

(ई० प्र०, 1-3-2)

देवः— (1) क्रीडनशीलः परमेश्वरः। क्रीडा चास्य स्वानन्द- घनतया सृष्टयादिमयं विश्वात्मककृत्यजातं प्रतिसमुच्छलत्ता। देवश्च तत्स्वभावः। दिवुक्रीडायामिति। यथा—

"हेयोपादेयकथाविरहे स्वानन्दघनतयोच्छलनम्।
क्रीडा .....।।"

(तं० आ० 1,101)

(2) विजिगीषा-स्वभावः परमेश्वरः। दिवु विजिगीषायामिति। सा च विजिगीषा सर्वोत्कर्षेण परिपूर्ण- स्वतन्त्रतया च प्रकाशनं परमेश्वरस्य। यथा—

"सर्वोत्कर्षेण वर्तनेच्छा तथा स्वतन्त्रत्वम्।"

(तं० आ० 1,101)

(3) व्यवहरणावभासकः। तदनुसारमभिन्नेऽपि निर्विकल्पे स्वात्मनि प्रतिबिम्बन्यायेन विकल्पात्मकभेदव्यवहारावभासनं परमेश्वरस्य देवत्वम्। दिवुव्यवहारणे इति। यथा—

"व्यवहरणमभिन्नेऽपि स्वात्मनि भेदेन संजल्पः।"

(तं० आ० 1,102)

(4) द्योतनशीलः परमेश्वरः। निखिलविश्वावभासनं हि तस्य द्योतनम्। तद्राहित्येन हि शून्यकल्पत्वापत्तिः। यथा—

"निखिलावभासनाच्च द्योतनम् .....।"

(तं० आ० 1,102)

(5) स्तुत्यः। दिवु स्तुताविति। दीव्यते स्तूयते मन्त्रेश्वरमन्त्रमहेश्वरादिभिरपीति। यथा—

" ..... अस्य स्तुतिर्यतः सकलम्।
तत् प्रवणम् .....।।"

(तं० आ० 1,102)

(6) विमर्शनलक्षणक्रियायुक्तः परमेश्वरः दृक्क्रियाशक्तियुक्तश्च। क्रियात्र गतिः। एवं विधगतिशीलत्वाद् देवः। दिवु गताविति। यथा—

"आत्मलाभात् प्रभृति समस्तेऽपि कर्त्तव्ये।

बोधात्मकः समस्तक्रियामयोदृक्क्रियागुणश्च गतिः।
(तं० आ० 1,103)

द्र०- (शि० स्तो० वि०, पृ०, 22)
(स्व० तं० उ०, प० 3, पृ०, 161)
(स्व० तं० उ०, प० 6, पृ०, 114)
(स्व० तं० उ०, प० 1, पृ०, 3)
(म० मं० प० पृ०, 173)
तथा (प० त्री० ल० वृ०, पृ०, 1)

देवताः— यागादौ कर्मणि पूज्याः सूक्ष्मशरीरभाजोऽधिकारिपदप्रतिष्ठिताः प्रमातारः पुरुषा वा स्त्रियोऽपि वा।

~ कौले— महाप्रकाशरूपायाश्चिच्छक्ते रश्म्यौघ एव देवतागणो यः कौलयागे पूज्यः। यथा—

"महाप्रकाशरूपायाः संविदो विस्फुल्लिङ्गवत्।
यो रश्म्योघस्तमेवात्र पूजयेद्देवतागणम्।।"
(तं० आ० 29,50)

~ तदावाहनम्— मण्डलं बोधात्मकं भावयित्वा तत्र प्रतिबिम्बितं देवतागणं भावयेत्। तदेतदेव हि देवगणावाहनं कौले। यथा—

"ततस्ततस्थण्डिलं वीक्ष्य व्योमस्फटिकनिर्मलम्।
बोधात्मकं समालोक्य तत्र स्वं देवतागणम्।
प्रतिबिम्बतया पश्येद् बिम्बत्वेन च बोधतः।
एतदावाहनं मुख्यं व्यजनान्मरुतामिव।।"
(तं० आ० 26, 41-42)

"बोध एव हि बहिः प्रतिफलितस्तथा तथोच्छलितः इति।"
(तं० आ० वि०, खं० 10, पृ०, 343)

~ तद्बीजमन्त्राः— देवताया नाम्न आद्येनाक्षरेण सह औकारः ऊकारश्च सानुस्वारो योज्यः, तेन विशेषबीजमन्त्रः सम्पद्यते। यथा—

"सर्वेषामेव बीजानां तच्चतुर्दशषष्ठयुक्।"
(तं० आ० 30,19)

"तदिति नामाद्यक्षरम्। चतुर्दशः औकारः, षष्ठश्च ऊकारः। तेन गौं इति।"
(तं० आ० वि०, खं० 12, पृ०, 185)

गणपतिबीजमेतज्जयरथानुसारम्। परमस्मन्मते प्रथमं प्रणवस्ततस्तत्तदेवतानमस्कारः। तदनन्तरं देवतानाम्न आद्यमक्षरमाकारेण बिन्दुना च युतं, ततस्तदेव चतुर्दशेन सबिन्दुना षष्ठेनापि स्वरेण सबिन्दुना तदनन्तरं च तानि तान्यामन्त्रितानीति तात्पर्यं तन्त्रालालोकवाक्यानाम्। तद्यथा गणपति मन्त्रे, "ऊँ गणपतये नमः, गौं गाँ गूँ" इत्यादि। तन्त्रालोकपंक्तय इमाः–

"ॐकारोऽथ चतुर्थ्यन्ता संज्ञा नतिरिति क्रमात्।
गणेशादिषु मन्त्रः स्यात् बीजं येषु न चोदितम्।।
नामाद्यक्षरमाकारबिन्दुचन्द्रादिदीपितम्।। **(गाँ इति)**
सर्वेषामेव बीजानां तच्चतुर्दशषष्ठयुक्।।" **(गाँ गूँ इति)**
(तं० आ० 30,18-19)

पुनर्विमर्शनीयोऽयं विषयः सुधीभिः।

देवतामन्त्ररहस्यम्— प्रथममोङ्कारस्तदनन्तरं देवतायाः नाम्नः आद्यमक्षरमाकारयुक्तं सबिन्दुकं च विधाय तदन्ते देवतानाम चतुर्थ्यन्तं तदन्ते च नमः इति। यथा "ओं गां गणपतये नमः" "ओं वां वागीश्वर्यै नमः" इत्यादि। यथा—

"ओंकारोऽथ चतुर्थ्यन्ता संज्ञा नतिरिति क्रमात्।
गणेशादिषु मन्त्रः स्याद्बीजं येषु न चोदितम्।।"
(तं० आ० 30,18)

"तेन ओं गां गणेशाय नमः ओं वा वागीश्वर्यै नमः।"
(तं० आ० वि०, खं० 12, पृ०, 185)

देवत्रयमन्त्राः— नैव स्पष्टीकृतास्तन्त्रालोके वा, तद्विवेकेऽपि वा। तत् साधकैः स्वयमूह्याः।
द्र०- (तं० आ० वि०, खं० 7/2, पृ०, 71)

देवपाणिः— कश्चन शाक्तसम्प्रदायगुरुर्यस्य परम्परायां महेश्वरानन्द आविर्भूतः। यथा—

"तत्रोद्दिष्टभङ्ग्या सृष्ट्यादिभासान्तं चक्रं श्री देवपाणिसम्प्रदायानुप्रविष्टैरस्माभिरनुसन्धीयते।"
(म० मं० प०, पृ०, 104)

देविकाक्रमः— विज्ञानैकत्वं विषयजातस्य प्रतिपादयत् किमपि शास्त्रं महेश्वरानन्देन कृतपङ्क्तिसमुद्धरणम्। यथा—

"तत्तद्रूपतया ज्ञानं .....।
इत्यारभ्य,
..... यातमेतस्मादवसीयते।।
इत्यन्तम्।
इति श्री देविकाक्रमस्थित्या ..... ।"
(म० मं० प०, पृ०, 9-10)

देवी—

क्रीडा विजिगीषादिशीला परावाग्रूपा पारमेश्वरी शक्तिः। सां च पश्यन्त्याद्याभासनक्रमेण सृष्ट्यादिक्रीडनशीला; सर्वोत्कर्षेण प्रकाशमानतया विजिगीषाहे वाकिनी; ज्ञानस्मृतिसंशयनिश्चयादिव्यवहारं कुर्वन्ती व्यवहरणशीला; नीलसुखादिरूपतयाभासनशीलत्वेन द्योतमाना, तदीय, प्रकाशावेशैः स्तूयमाना, सर्वात्मताप्राप्तिशीलतया गमनमयी च सती दिवु धातोः सर्वानप्यर्थान् धारयन्ती सत्यमेव देवी। परमेश्वरो भैरवभट्टारक एव हि च वस्तुतो देवः। यथा—

"इयता पश्यन्त्यादिसृष्टिक्रमेण बाह्यनीलादिपर्यन्तेन स्वविमर्शानन्दात्मना क्रीडानेन, सर्वोत्तीर्णत्वेन सर्वोत्कर्षावस्थितेः

भगवतो भैरवस्य तथा स्थातुमिच्छया विजिगीषात्मना, इयदनन्तज्ञानस्मृतिसंशयनिश्चयादिव्यवहारकरणेन, सर्वत्र च भासमाने नीलादौ तन्नीलाद्यात्मभासनरूपेण द्योतनेन, सर्वैरेव तदीयप्रकाशावेशैः तत्प्रवणैः स्तूयमानतया, यथेच्छं च देशकालावच्छेदेन सर्वात्मतागमनेन; अत एव मुख्यतो भैरवनाथस्यैव देवत्वमिष्यते, तच्छक्तेरेव भगवत्या देवीरूपता। यदुक्तम्—'दिवुक्रीडा-विजिगीषाव्यवहारद्युतिस्तुति-गतिषु।"

(प० त्री० वि०, पृ०, 7-8)

(2) स्वातन्त्र्यशक्तिः। यथा—

"देवी—स्वातन्त्र्यशक्तिः।"

(स्व० तं० उ०, प० 1, पृ०, 6)

(3) सदा विश्वात्मकतया विश्वोत्तीर्णतया च या स्थितिः परमेश्वरस्य तस्याः प्रस्कुरणकारिणी तस्य परमेश्वरता।

"यदागमः—

'लेलिहाना सदा देवी सदा पूर्णा च भासते।
ऊर्मिरेषा विबोधाब्धेः शक्तिरिच्छात्मिका प्रभोः।'"

उद्ध०- (स्प० नि०, पृ०, 4)

~ परा— **परस्य भैरवस्य या पारमेश्वरी परावस्थेत्युच्यते शिष्यसम्बोधनार्थं सैव शास्त्रे परा देवीति व्याख्यायते। यथा—**

"एवं विधा भैरवस्य यावस्था परिगीयते।
सा परा पररूपेण परा देवी प्रकीर्तिता।।"

(वि० भै०, 17)

देवीकोट्टम्— ~ कौले — **पूजालम्बनतया परिगृहीतं स्वं परकीयं वा शिरः कौलविधौ। यथा—**

"सर्वासां देवतानां तु आधारः शिर इष्यते।
देवीकोट्टं तु तत् स्थानं नित्यं तत्र प्रपूजयेत्।।"

उद्ध०- (तं० आ० वि०, खं० 11/2, पृ०, 15)

देवीचक्रं— ~ कौलयागे— **रहस्यभूतोऽयं विषयो नैव प्रकाशनीयो यस्य कस्यचित् पुरतः। साधिकारैः साधकैर्गुरुमुखादेव वेद्यः। तदितरैरस्य रहस्यस्य वेदने न किमपि प्रयोजनं तेषाम्।**

देवीत्रयमन्त्राः— **न स्पष्टतां नीतास्तन्त्रालोके वा, तद्विवेकेऽपि वा। तत् साधकैः स्वयमूह्याः।**

द्र०- (तं० आ० वि०, खं० 7/2, पृ०, 71)

देवीदीक्षितः— **प्रातिभज्ञानवान् साधकः।**

द्र०- 'योगिनीदीक्षितः' इति।

द्र०- (तं० सा० पृ०, 23) **इति च।**

देवीपञ्चशतिका— **देवीप्रोक्तं तदेवागमशास्त्रं यस्य पद्यानि तन्त्रालोकविवेके समुद्धृता जयरथेन यत् पञ्चशतिकेति नाम्ना निर्दिष्टम्। यथा—**

"श्रीदेवीपञ्चशतिकेऽप्यस्य श्रीसोमानन्दभट्टपादेभ्यः प्रभृतित्रिकदर्शनवदेव गुरवः।"

(तं० आ० वि० खं० 3, पृ०, 194)

~ तद्वाक्यम्— **"ननु श्रीदेवीपञ्चशतिकादौ"-**

"निष्क्रियानन्दनाथश्च ज्ञानदीप्त्या सहैकतः।
विद्यानन्दश्च रक्ता च द्वितीयं कथितं तव।।
शक्त्यानन्दो महानन्दा तृतीयं सिद्धपूजितम्।
शिवानन्दस्तथा ज्ञेया समया तच्चतुर्थकम्।।"

उद्ध०- (तं० आ० वि०, खं० 11/2, पृ०, 31)

अत्र कौलविधौ पूज्या गुरुपंक्ति, सपत्नीका परिगणिता।

देवीयामलम्— **कौलिकं किमप्यागमशास्त्रम्। यथा—**

"देव्या यामलशास्त्रादौ ..... ।"

(तं० आ० 28,386)

तन्त्रालोकविवेके (खं०,1 पृ०,42) समुद्धृतेषु श्रीकण्ठसंहितापद्येषु यामलाष्टके सप्तैव नामान्यागमानां लभ्यन्ते। कदाचिद् देवीयामलं तदन्तर्गतमेव स्यादष्टमम्। यतो भूयस्यः कौलत्रिकसाधनाप्रक्रियाः समानतन्त्रसिद्धान्ततया गण्यन्ते।

~ तत्पंक्तयः— **समुद्धृता अस्य पङ्क्तयो भूरिशो यथा—**

(तं० आ० 3,70;8, 16,17,212; 15, 461-463, 521,530; 23, 39 29,68-70)

(तं० आ० वि०, खं० 5, पृ०, 12, 149,169,170; खं० 9, पृ०, 233; 234, खं० 11, पृ०, 164,167,168,170-172; खं० 12, पृ०, 200; खं० 11/2, पृ०, 49) (स्व० तं० उद्०, प० 10, पृ०, 85,104)

देव्यः—

सूक्ष्मशरीराःस्त्रीलिङ्गाः अधिकारिरूपाः प्राणिवर्गाः। तास्वेव परिगणिताः खेचर्यायाः यथा—

"देव्यः खेचर्याद्याः।"

(ने० तं० उ०, खं० 2, पृ०, 115)

देशकालौ—

मायाप्रमातातावन्मूर्तिवैचित्र्यक्रियावैचित्र्ययोः क्रमरूपतां कल्पयन् तदाश्रित्य स्वात्मानं देहादि-रूपं, तत् संसर्गिभावजातं च देशकालकलितं मन्यते। परं वस्तुतः कल्पनाजालाश्रितमेवेदं मन्तव्यम्। ततो न देशः कालो वा किमपि सारभूतं तत्त्वम्, अपि तु कल्पनाकल्पितं भावद्वयम्। यथा—

"न देशः परमार्थेन न च कालोऽस्ति कश्चन।।"

(मा० वि० वा० 1,1100)

~ क्रमाभासमयौ— **मूर्त्तिवैचित्र्यकृतः क्रमो देशक्रमः। क्रियावैचित्र्य कृतश्चकालक्रमः। गृहाजिरबहिर्द्वारसरणि-प्रतोलिदेवमन्दिरनदीतीर्थफलोद्यानसस्यक्षेत्रादिमूर्त्तीनां परस्पर-माकारभेदतः आभासमानं स्वरूपवैचित्र्यमश्रित्यैव मायीयः**

प्रमाता तास्वाभासरूपासु मूर्त्तिषु देशक्रमकल्पनां करोति। आकारभेदराहित्ये देशक्रमकल्पनैव न समभविष्यत्।

एवमधिश्रयणाद्यवश्रयणपर्यन्तं या विविधाः पाकक्रियाङ्गभूताः अवान्तरक्रियास्तासां वैचित्र्यमाश्रित्यैव प्रमाता तासां वितत्वमवितत्वं च प्रकल्प्य क्षणघटिकादिकल्पनां करोति। यथा—

"मूर्तिं वैचित्र्यतो देशक्रममाभासयत्यसौ।
क्रियावैचित्र्यनिर्भासात्कालक्रममपीश्वरः।।"

(ई०, प्र० वि०, 2,1,5)

~ न संविदि— **संविदो भेदकरणे देशकालावपि न समर्थो स्तः। यथा—**

"देशकालौ न चैवास्य भेदकौ भवितुं क्षमौ।
स्वप्रथां प्राप्नुतो यस्मादस्मादेवापि तावुभौ।।"

(पू० प्र० खं० 1,29)

देशकालाध्वानौ— स्थानकल्पनाख्ययोगालम्बनभूतौ साधनामार्गौ। प्रमेयात्मकोऽध्वा देशाध्वा, प्रमात्रात्मकश्च कालाध्वा। प्रमेयता तत्र प्रमात्रपेक्षा, प्रमातृता चापि प्रमेयापेक्षा। ततः प्रमातृप्राधान्यमत्र वर्णाध्वादौ प्रमेयप्राधान्यं च कलादावध्वनि। नामरूपात्मकं हि विश्वम्। नाम्नः प्राधान्यं कालाध्वनि रूपस्य च प्राधान्यं देशाध्वनि। तच्च प्राधान्यं भावनाविषयतयाग्रहणमेव, न सारभूतं तत्त्वम्। तत्तत्त्वं तु संविदेव।

देशक्रमावच्छिन्नत्वम्— तच्च जडपदार्थानां मायाप्रमातुरेव च, न पतिप्रमातुः तस्य पूर्णरूपत्वात्। यथा—

"एवं देशक्रमोऽपि मितात्मनः परिच्छिन्नस्वरूपस्य शून्यादेर्देहान्तस्य स्वात्मनि भाति इह तिष्ठामीति। स्वापेक्षया च भावेष्वपि यन्मम संयोगपारिमित्येन वर्तते तदन्तिकम्, इतरद् दूरम् इति, अमितस्य स्वरूपेयत्ता शून्यस्य तु संवित्तत्त्वस्य भावाः स्वात्मना अहम्भावेन यतो भान्ति ततः पूर्णाः— अपरिच्छिन्नस्वरूपेयत्ताकाः, यतः स्वात्मा तस्य तथा ऽऽभूत एव।"

(ई० प्र० वि०, खं० 2, पृ०, 20-21)

देशना— वाचा कृत उपदेशः। सा चानुपाये मुख्यत्वं भजते। तत्र देशनापदमुपलक्षणम्, स्पर्शनदर्शनचरुदानादीनामपि। एतैरप्युपायैः प्रातिभस्य ज्ञानस्य सद्यः समुदये सति न दीक्षाया वा योगाभ्यासादेर्वा काचिदपेक्षा। इति प्रकारान्तराण्येतानि तावदनुपायस्य योगस्य। यथा—

"सकृत्स्याद्देशना पश्चादनुपायत्वमुच्यते।।"

(तं० आ०, 2,2)

देशनेत्युपलक्षणम्, तेन सिद्धदर्शनाद्यपि ग्राह्यम्। यथा—

"सिद्धानां योगिनीनाञ्च दर्शनं चरुभोजनम्।
कथनं संङ्क्रमः शास्त्रे साधनं गुरुसेवनम्।
इत्याद्यो निरुपायस्य संक्षेपोऽयं वरानने।"

उद्ध०- (तं० आ० वि०, आ० 2,2)

देशाध्वा— (1) मूर्त्तिवैचित्र्यावभासप्रसरमार्गः शिवस्य। यथा—

"यस्तु मूर्त्त्यवभासांशः स देशाध्वा निगद्यते।"

(तं० आ० 6,35)

(2) बाह्य योगाभ्यासमार्गः साधकस्य। तद्यथा स्थानकल्पनयोगे मूर्त्तिवैचित्र्यकृतो देशाध्वा। तत्रेयमेका युक्तिः— पञ्चकलाः, षट्त्रिंशत्तत्त्वानि, अष्टादशाधिकशतं भुवनानां इति यः प्रपञ्चोऽसौ क्रमेण भावनाभ्यासेन निजे शरीर एव परिदृश्यते, तेन च सर्वं स्वात्मशिवरूपत्वेन साक्षात्क्रियते। अपरा युक्तिश्चैषा एकैकमपि तत्त्वभुवनकलारूपं प्रमेयं सर्वसर्वात्मिकया दृष्ट्या परिपूर्णशिवरूपतया भाव्यते। उभयथापि भावनाभ्यासोऽसौ देशाध्वा। तदभ्यासेनैकतो देशकृतात्सङ्कोचान्मुक्तिर्लभ्यते, अपरतश्च तत्तद्भुवनादिषु लभ्या भोगाः भुज्यन्तेऽन्यतश्चाणवः शिवभावसमावेशोऽपि प्राप्यते साधकेन।

द्र०- **'देशाध्वा'— ~ तदभ्यासविधिः इति।**

~ तदभ्यासफलम्— कलातत्त्वभुवनभावाः सर्वेऽपि यदा भावनया स्वशरीरान्तेरेव संविदेकात्मतया दृश्यन्ते तदा तथा दर्शनाभ्यासपरिपक्वतायां साधकोऽव्यवच्छिन्नसंवित्-स्वभावां भैरवतामात्मनः प्रत्यभिजानाति पर्यन्ते। यथा—

"संविदेकात्मतानीतभूतभावपुरादिकः।।
अव्यवच्छिन्नसंवित्तिर्भैरवः परमेश्वरः।"

(तं० आ० 8,15-16)

~ तदंहस्यम्— **देशाध्वधारणाप्रक्रियासु तावत् सर्वमिदं मूर्तिभेदमयं विश्वं बोधमूलं, बोधमदंष बोधाग्रं च सछिमृश्यमानं बोधामत्मकतामेव समुज्जवलां कुर्वन् स्वस्वरूपसाक्षात्कारोपायतां याति। यथा—**

"त्रिशिरः शासने बोधो मूलमध्याग्रकल्पितः।"

(तं० आ० 8,12)

~ तदभ्यासविधिः— **(1) भुवनतत्त्वकलात्मकं सर्वं देशाध्वानं भावनया स्वशरीरान्तरेव स्थितत्वेन दर्शनस्य पुनः-पुनरभ्यासे कृते तत्परिपक्वतायां योगी सद्य एव स्वात्मानं सकलविश्वपूर्णं भैरवात्मकं साक्षात्करोतीति स्वात्मभैरवभाव-साक्षादनुभूतिर्देशाध्वयोगप्रक्रिया। यथा—**

"तत्राध्वैवं निरूप्याऽयं यतस्ततूप्रक्रियाक्रमम्।
अनुसंदधदेव द्राग् योगी भैरवतां व्रजेत्।।"

(तं० आ० 8,5)

"सर्वमहममिति विमर्शनेन स्वात्मविश्रान्तिमयतामापादयन् योगी शीघ्रमेव परसंविदैकात्म्यमियात्।"

(तं० आ० वि०, खं० 5, पृ०, 4)

(2) समस्तमध्वानं तत्तद्भुवनाधीश्वस्वरूपे भावनया विलाप्य, तांश्च भुवनपतीन् स्वदेहे, देहं प्राणे, प्राणं धियि, धियं शून्ये, तज्जीवचैतन्यमात्रे, तच्च शुद्धेनवाच्छिन्ने चिन्मात्रे विलाप्य चिन्मात्रमेव स्वात्मनि विलापिताध्वजातं साक्षात्कुर्वन्नभ्यासेन सद्यो भैरवतां स्वस्य साक्षादनुभवति शिवयोगी। यथा—

"ज्ञात्वा समस्तमध्वानं तदीशेषु विलापयेत्
तान् देहप्राणधीचक्रे पूर्ववद् गालयेत्क्रमात्।।
तत्समस्तं स्वसंवित्तौ सा संविद्भरितात्मिका।
उपास्यमाना संसारसागरप्रलयानलः।।"

(तं० आ० 8,7-8)

"तं समस्तमध्वानं देहे विलाप्य, देहञ्च प्राणे, तं धियि, तां शून्ये, तत्संवेदने, निर्भरपरिपूर्णसंवित् संपद्यते षट्त्रिंशत्तत्त्वस्वरूपज्ञः, तदुत्तीर्णां संविदं परमशिवरूपां पश्यन् विश्वमयीमपि संवेदयेत।"

(तं० सा०, पृ०, 63)

~ तद्विस्तरः— **मूर्त्तिवैचित्र्याभ्यासजननी या पारमेश्वरी शक्तिस्तस्या एव प्रतिबिम्बन्यायेन बहिर्मुखाभिव्यक्तिर्देशाध्वा बहुविस्तरः। सैव सर्वत्र बाह्येषु पदार्थेषु व्याप्य तिष्ठति स्थण्डिललिङ्गपर्यन्तम्। यथा—**

"तत्र समस्त एवायं मूर्त्तिवैचित्र्याभासनशक्तिजो देशाध्वा संविदि विश्रान्तः तद्द्वारेण शून्ये बुद्धौ प्राणे नडीचक्रानुचक्रेषु बहिः शरीरे यावल्लिङ्गस्थण्डिलप्रतिमादौ समस्तोऽध्वा परिनिष्ठितः।

(तं० सा०, पृ०, 63)

~ तत्सृष्टा— **देशाध्वाऽयं न अविद्यादिकृतोऽपि तु शिव एव स्वीकायायाः मायाशक्तेर्बलाद्देशाध्वरूपतया चकास्तीति सिद्धान्तः। यथा—**

"तज्जः इति तस्मात् प्रभोरेव जातः स एव तथा-तथा बहिः स्फुरित इत्यर्थः। यदाहुः—

"आश्यानं चिद्रसस्यौघं साकारत्वमुपागतम्।
जगद्रूपतया वन्दे प्रत्यक्षं भैरवं वपुः।।"

उद्ध०- (तं० आ० वि०, खं० 5, पृ०, 2)

~ त्रिप्रकारः— **(1) देशाध्वनः प्रकाराः—**

(क) कलाध्वा, (ख) तत्त्वाध्वा, (ग) भुवनाध्वेति। यथा—

"कलातत्त्वपुराभिख्यन्तर्भूतमिह त्रयम्।"

(तं० आ० 6, 35)

"क्रमेण भुवनतत्त्वकलाप्रतिपादकं वक्ष्यामाणमाह्निकचतुष्टयम्।।"

(तं० आ० वि०, खं० 5, पृ०, 2)

तत्राष्टमे आह्निके भुवनाध्वा, नवमे तत्त्वाध्वा, दशमे च कलाध्वेति विभागः। अग्रे एकादशे तत्त्वभेदनम्।

(2) तत्र स्थूलो देशाध्वा तावद् भुवनाध्वा, सूक्ष्मः तत्त्वाध्वा, सूक्ष्मतरः (परः) कलाध्वा इति। स च प्रमेयांश धारणा विषयः। यथा—

"इत्थं त्र्यात्माध्वनो भेदः स्थूलसूक्ष्मपरत्वतः।।
मेयभागगतः प्रोक्तः पुरतत्त्वकलात्मकः।।"

(तं० आ० 11, 42-43)

"देशाध्वास्थितिस्तु तत्त्वपुरकलात्मनेति भविष्यति स्वावसरे।"

(तं० सा०, पृ०, 47)

देशिकः— सच्छास्त्रोपदेशकः सद्ग्रन्थतात्पर्यव्याख्याता, सदुपायप्रशिक्षकश्च गुरुः। यथा—

"सदसदनुग्रहनिग्रहगृहीतमुनि विग्रहो भगवान्।
सर्वासामुपनिषदां दुर्वासा जयति देशिकः प्रथमः।।"

द्र०- (ल० स्त० र०, 214)

(त्रि० म० स्तो०,56)

देशिकदर्शनम्— श्रीमदाचार्यामृतवाग्भवप्रणीतं भगवतो दुर्वाससो यथादृष्टं वर्णनं, पद्यात्मकं, यत् सानुवादं प्रकाशितं वर्तते श्री सिद्धमहारहस्याख्येन ग्रन्थेन साकम्।

देहक्षयेमुक्तिः— येषामत्र जीवने मलसंस्काराणामपि प्रक्षयो नैव जातो न तेषामत्र जीवने शिवत्वं स्फुटं विद्योतते। ततः शरीरान्ते एव तेषां शिवता स्फुटमभिव्यक्ता भवति। ततो देहक्षये एवैवंविधानां साधाकानां मुक्तिः। यथा—

"सा चेयं सर्वार्थावभासनयोग्यता नामेश्वरत्वात् प्रभृति शिवतापत्तिपर्यन्ता सत्यपि ज्ञानियोगिदीक्षितानां निवृत्तमलत्वेऽपि मलसंस्कारस्य सद्भावादनभिव्यक्ताः, तस्य प्रक्षयेऽभिव्यज्यते, यतो देहक्षये मुक्तः।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 392)

देहत्यागविधिः— मालिनीतन्त्रे भोगविरक्तस्य प्राणोत्क्रमण- दीक्षादिविधिना देहत्यागोपदेशो न भृगुपातादिनेति। यथा—

"श्री पूर्वशास्त्रे तूक्तं यदुत्क्रान्तेर्लक्षणं न तत्।
मुक्त्युपायतया किन्तु भोगहान्यै तथैषणात्।।
जपध्यानादिसंसिद्धः स्वातन्त्र्याच्छक्तिपाततः।
भोगं प्रति विरक्तश्चेदित्थं देहं त्यजेदिति।।"

(तं० आ० 14,37-38)

ततो न हठसाधना त्रिके प्रशस्ता।

देहत्यागक्षणः— यस्मिन्क्षणे प्राणी देहं परित्यज्य लोकान्तरं प्रति गतिशीलो भवत्यसौ चरमः क्षण एव देहत्यागक्षणो, न ततः पूर्ववर्तीनिश्वासकाससम्मोहादिबहुलानि क्षणानि। यथा—

"यस्त्वसौ क्षण एवैकश्चरमः प्राणनात्मकः।।
यदनन्तरमेवैष देहः स्यात् काष्ठकुड्यवत्।
सा देहत्यागकालांशकला देहवियोगिनी।।"

(तं० आ०28,328-32)

देहप्रमाता— पाञ्चभौतिके स्थूले देह एवात्मत्वाभिमानवान् प्रमाता यो जाग्रद्दशायां ज्ञानक्रियासु प्रवर्तमानस्तिष्ठति। यथा—

"कृशः, स्थूलो, गौरोऽहम्" इत्यादौ शरीरमेव पृथ्वीप्रायम्। (अहमित्यात्मत्वेनाभिनिविश्यते)"

(ई० प्र० वि० वि० खं० 3, पृ०, 280)

द्र०- (ई० प्र० वि० खं० 2, पृ०, 205) चापि।

~ तुलादीक्षायाम्— देहे यः स्वात्मताभिमानस्तस्य विगलनं यदैव साक्षाद्विमृश्यते तदैव देहस्य भारः तत्कालं विनष्टो भवति। येन देहः उत्प्लवते, पुष्पमालासमानभारश्च सञ्जायते तुलादीक्षा विधौ, असावुत्प्लुतिरेव "उद्भव" इत्युच्यते उच्चारादियोगविधिषु। तदा देहप्रमातृभावो गौणतां याति। यथा—

"देहो हि पार्थिवो मुख्यस्तदा मुख्यत्वमुज्झति।।"

(तं० आ० 20,14)

"लघुत्वेन तुलाशुद्धिः सद्यः प्रत्ययकारिणी"

(तं० आ० वि०, खं० 10, पृ०,211)

देहस्थदेवताचक्रस्तोत्रम्—अभिनवगुप्तकृतः स्तोत्रविशेषः। तत्र हृदयमध्ये समस्तकरणवर्गदेवताचक्रपरिवेष्टितस्य चिद्भैरवस्य भावनात्मकं पूजनं वर्णितमस्ति। न च पृथक् क्वापि मुद्रितं लभ्यते तत् स्तोत्रम्।

देहाहन्ता—

द्र०- 'देहप्रमाता' इति।

दैशिकः—

द्र०- 'देशिक': इति।

दोषाः— ~ गुरुशिष्ययोः— सांसारिके व्यवहारे ये दोषा इति गण्यन्ते, ते गुरुशिष्ययोर्विषये नैव दोषाः। ज्ञानापकर्षमात्रं गुरोर्दोषो ज्ञानेऽनाश्वस्तत्वमेव च शिष्यस्य दोषः। यथा—

"दोषश्चेह न लोकस्थो दोषत्वेन निरूप्यते।
अज्ञानख्यापनायुक्तख्यापनात्मा त्वसौ मतः।।
शिष्यस्यापि तथाभूतज्ञानानाश्वस्तरूपता।
मुख्यो दोषस्तदन्ये हि दोषास्तत्प्रभवा यतः।।"

(तं० आ० 23, 79-80)

"तत्र तावद् गुरोरज्ञानं ज्ञत्वेऽपि ख्यापयितुमसामर्थ्यम्।"

(तं० आ० वि०, खं० 10, पृ०, 294)

सिद्धान्तप्रतिपादनयोग्यताशैथिल्यं गुरोर्दोष इति तात्पर्यम्।

दौतविधिः—

द्र०- 'दूतीयागः' इति।

द्वयसम्पत्तिः— वामननाथकृतः कश्चन ग्रन्थः। समुद्धृतः विज्ञानभैरवोद्द्योते शिवोपाध्यायेन। वामननाथोऽयमभिनवगुप्तस्य गुरुः वामनदत्ताचार्य एव स्याद् द्वयसम्पत्तिश्च स्यात् तत्कृतं द्वयसम्पत्तिवार्तिकम्। यथा—

"द्वयसम्पत्तिकारस्तु वामननाथो विवृत्यन्तरमाह। यथा— "अहङ्कारमयी भूमिर्" इत्यादिः "शिवशक्त्यात्मरूपकः" इत्यन्तम्।"

(वि० भै० उ०, पृ०, 78)

एवं प्रतीयते यदद्वयसम्पत्तिवार्तिकादुद्धृतमिदं पद्यमिति। द्वयसम्पत्तिरिति मुद्रितायां पदावलाकारादर्शनं लेखकप्रमादफलं वा सम्पादकानवधानफलं वेति विचारणीयं सम्यग् विद्वद्भिः। यतो वामननाथकृतो ग्रन्थोऽन्यत्र 'अद्वयसम्पत्तिवात्तिकम्' इत्यननैव नाम्नोल्लिखितमस्ति।

द्र०- 'अद्वयसम्पत्तिवार्तिकम्' इति।

द्वयाभाववादिनः— विज्ञानवादिनो योगाचाराः प्रमातुः प्रमेयस्य च सत्यतां निरस्यन्तो विज्ञानरूपस्य प्रमाणाकारस्य चित्तमात्रस्य सत्यतामङ्गीकुर्वान्ति। ततस्ते द्वयाभाववादिनः। यथा—

"ज्ञातृज्ञेयाभाववादिनो योगाचाराः।"

(तं० आ० वि०, खं० 1, पृ०, 95)

द्वादशकलाः— ~ प्रणवस्य— अकार, उकारो, मकारः, बिन्दुः, अर्धचन्द्रो, निरोधिनी, नादः, नादान्तः, शक्तिः, व्यापिनी, समना, उन्मना चेति। प्रणवस्य द्वादशकलानामभिव्य- क्तिस्थाना क्रिमेण-नाभि-हृदये-आनन-भ्रूमध्य-ललाट-ललाटोपरि-शिरो-ब्रह्मरन्ध्रत्वक्-शिखामूल-शिखाग्राणि चेति। योगाभ्यासतः एव ह्युक्तेषु स्थानेष्वेतेषां साक्षात्कारो भवति। यथा—

"अन्येत्वाहुः— नाभ्यादिद्वादशान्तं यावत् प्रणवमात्रासोपानेष्वारोहक्रमम्-नाभावकारं,हृद्युकारम्, आनने मकारं, भ्रूमध्ये बिन्दुं, ललाटेऽर्धचन्द्रं, ललाटोर्ध्वे निरोधिनीं, शिरसि नादं, ब्रह्मरन्ध्रे नादान्तं, शक्तिं त्वक्स्थां, व्यापिनीं शिखामूलस्थां, शिखास्थां समनां, शिखान्तरस्थामुन्मनाम्.....।"

(वि० भै० उ०, पृ०, 36-37)

द्वादशकाल्यः— ~आणवशाक्तयोः— सृष्टिसंहारादिकलनात्मकं जगद्व्यवहारं प्रमातृप्रमाणप्रमेयात्मकत्रिकोणस्थित्या सञ्चालयन्ती स्वात्मपरमेश्वरस्यैतत्कलनासामर्थ्यरूपा या कालीत्यभिधाना पारमेश्वरी शक्तिरसावेवात्र प्रपञ्चे सर्वत्रावभासते। मुख्यतयाऽसावत्रद्वादशविधतयाऽधितिष्ठति। ततो द्वादश एव काल्यो न त्रयोदश। यथा—

"तथा हि संविदेवेयमन्तर्बाह्योभयात्मना।।
स्वातन्त्र्याद् वर्तमानैव परामर्शस्वरूपिणी।
स च द्वादशधा तत्र सर्वमन्तर्भवेद् यतः।।"

(तं० आ० 4,122-123)

स इति परप्रमातृरूपः।

शुद्धासौ पराकलनशक्तिर्द्वादशस्वप्योतप्रोतभावेन स्थिता सती न ताभ्यो भेदगणनामर्हति। द्वादशधा संविद्व्यवहारे भासमानेऽपि संविद एव स्वस्वातन्त्र्यात् तथा-तथावभासमानत्वेन सर्वथाऽभेदः। द्वादशधावभासाच्च तस्मात् शुद्धसंविदवभासो नैव भिन्न; शुद्धायाः एव तस्या स्वविलासत एव सर्वदा प्रतिबिम्बन्यायेन तथा-तथावभासखचितत्वात्। ततो वस्तुस्थित्या द्वादश एव काल्यः।

द्वादशधा संविद्व्यवहारे भासमानेऽपि संविद एव स्वस्वातन्त्र्यात् तथा-तथावभासमानत्वेन सर्वथाभेदः। द्वादशधावभासात्तस्मात् शुद्धसंविदवभासो नैव भिन्नः; शुद्धाया एव तस्याः स्वविलासत एव सर्वदा प्रतिबिम्बन्यायेन तथा-तथावभासखचितत्वात्। शुद्धाऽसौ सर्वास्वप्योतप्रोतभावेन स्थिता सती न ताभ्यो भेदगणनाविषयतां नेतुं शक्यते। यथा—

"स्वस्वातन्त्र्याद्विश्वरूपतामवभासयन्त्या अप्यस्याः संविद्द्वयात्मनः स्वरूपात् प्रच्यावो न जायत इति।"

(तं० आ० वि०, खं० 3, पृ०, 131)

ताश्चभिधानतो यथा—

(1) सृष्टिकाली, (2) रक्तकाली, (3) स्थितिनाशकाली, (4) यमकाली, (5) संहारकाली, (6) मृत्युकाली, (7) रुद्रकाली, भद्रकालीति वा, (8) मार्तण्डकाली, (9) परमार्क काली, (10) कालाग्निरुद्रकाली, (11) महाकालकाली, (12) महाभैरवचण्डोग्रघोरकाली इति।

केचित् त्रयोदशरूपां कालीमुपासते। तत्र तद्विषये जयरथस्यैष एव निर्णयो यन्निजनिजगुरुपरम्परोपदेशानुसारमेवोपासितव्यमिति। यथा—

"एकतरपरिग्रहे यथास्वं गुरूपदेश एव निबन्धनम्। यथोक्तमस्मद्गुरुभिः 'यो यस्य गुर्वादेशः" स तस्य मोचकः इति।"

(तं० आ० वि०, खं० 3, पृ०, 230)

~ गणनातः— **गणनाक्रमश्च तासां द्विधा गणितविधिनाः- (क) — (1) परतराकालकर्षिणी, (2) परादेवी (अभेदभूमौ), (3) परापरादेवी (भेदाभेदभूमौ), (4) अपरा देवी (भेदभूमौ), इति चतस्रोऽपिसृष्टौ, स्थितौ संहारे च तिष्ठन्त्यो द्वादश भवन्ति।**

(ख) — एकैव पारमेश्वरी शक्तिः प्रमातरि, प्रमाणे, प्रमेये चेति प्रत्येकं सृष्टिस्थितिसंहारअनाख्यात्मकरूपचतुष्टयेनाभासमाना द्वादशतया भाव्यते शाक्तयोपायोपासकैः। यथा—

"सा च मातरिविज्ञाने माने करणगोचरे।
मेये चतुर्विधं भाति रूपमाश्रित्य सर्वदा।।"

(तं० आ० 4,125)

"सा पारमार्थिकी संवित् सृष्टिस्थितिसंहारानाख्यत्वेन चतुर्विधं रूपमाश्रित्य प्रमातरि, प्रमाणे, प्रमेये च सर्वदा भाति।"

(तं० आ० वि०, खं० 3, पृ०,127-128)

"तिसृषु तावद् विश्वं समाप्यते ययेदं शिवादिधरण्यन्तमविकल्पसंविन्मात्ररूपतया बिभर्ति च पश्यति च भासयति च परमेश्वरः साऽस्य श्रीपराशक्तिः। यया च दर्पणहस्त्यादिवद् भेदाभेदाभ्यां साऽस्य श्री परापराशक्तिः। यया परस्परविविक्तात्मना भेदेनैव साऽस्य श्रीमदपराशक्तिः। एतत् त्रिविधं यया धारणामात्मन्येव क्रोडीकारेणानुसन्धानात्मना ग्रसते, साऽस्य भगवती श्रीपरैव श्रीमन्मातृसद्भावकालकर्षिण्यादिशब्दान्तरनिरुक्ता। ता एताश्चतस्रश्शक्तयः स्वातन्त्र्यात् प्रत्येकं त्रिधैव वर्तन्ते। सृष्टौ स्थितौ संहारे चेति द्वादश भवन्ति।"

(तं० सा० पृ०, 28-29)

इत्थं शक्तिचतुष्टयस्य मध्ये एकैकस्यास्त्र्यात्मतया (4X3=12) वा, शक्तित्रयस्य वा मध्ये एकैकस्याश्चतुरात्मतया (3X4=12) वा द्वादश शक्तयो भवन्ति। ता एव द्वादशकाल्य इत्युच्यन्ते, तासां वर्गश्चचक्रमित्यभिधीयते। यथा—

**"यावद् द्वादशधा संवित् सृष्ट्यादौ तुल्यगोचरे।।
एकैकशस्त्र्यात्मकत्वात् त्रये वा चातुरात्म्यतः।"**

(मा० वि० वा० 1, 934-35)

नात्र गणितविधिद्वयाश्रयणेन विरोधःशङ्कनीयः कोऽपि। अस्य सर्वस्य भावनाङ्गभूतत्वात्,भावनायाश्च कल्पनामयत्वात्। एवमेवं भाव्यमानं हि शक्तिस्वरूवमेवमेवं स्वरूपसाक्षात्कारं वितरति। इत्येव हि सारमत्र गणितविधिद्वयस्य।

~ शाम्भवे— **मातृकाक्रमे तावदनुत्तरादारभ्य ऊर्मिं यावदेव परमेश्वरतायाः ये परामर्शास्ते एव हि मुख्याः। ते च तत्र षडेव अ,आ,इ,ई,उ,ऊ इति। एते एव प्रसरणप्रतिसञ्चरणयोगेन द्वादश भवन्ति। एताः परमेश्वरस्य मुख्याः शक्तयः एव भगवत्यः कालिकाः इति परिभाष्यन्ते। ताश्च- अ,आ,इ,ई,उ,ऊ,ए,ऐ,ओ,औ,अं,अः इति। षष्ठानामत्र न गणना। यथा—**

"वस्तुतस्तु षडेव परामर्शाः, प्रसरणप्रतिसञ्चरणयोगेन द्वादश भवन्तः परमेश्वरस्य विश्वशक्तिपूर्णत्वं पुष्णन्ति। ता एव एताः परामर्शरूपत्वात् शक्तयो भगवत्यः श्री कालिका इत्युक्ताः"

(तं० सा०, पृ०, 18)

"आसामेव समावेशात्क्रियाशक्तितयोदितात्।।
संविदो द्वादश प्रोक्ता यासु सर्वं समाप्यते।
एतावद्देव,देवस्य मुख्यं तच्छक्तिचक्रकम्।।
एतावता देवदेवः पूर्णशक्तिः स भैरवः।
परामर्शात्मकत्वेन विसर्गाक्षेपयोगतः।।
इयत्ताकलनाज्ज्ञानात्ताः ताः प्रोक्ताः कालिकाः क्वचित्।।"

(तं० आ० 4, 250-253)

द्वादशचक्रनायकः— द्वादशारेचक्रेमुख्यतयोपास्यः शिवः।

द्वादाशचक्राणि— अन्येषु कण्डलिनीयोगक्रमेषु मूलाधारा दारभ्य भ्रूमध्यं यावत् षट् चक्राणि, तदुपरि सहस्त्रारचक्रमिति निरूपितमस्ति। परमत्र त्रिकयोगप्रक्रियायां द्वादशचक्राणां निरूपणमस्ति। अधस्तनेषु चक्रेषु जन्माग्रं नाम चक्रमधिकम्, मध्यमेषु तालुस्थं चक्रम्, ऊर्ध्वे पुनः ललाटस्थं सहस्त्रारादप्यूर्ध्वं च चक्रद्वयं तच्च शक्तिव्यापिनी नामकम्। उक्तं यथा—

"क्रमद्वादशकं सम्यग्द्वादशाक्षरभेदितम्।
स्थूलसूक्ष्मपरस्थित्या मुक्त्वा मुक्त्वान्ततः शिवः।।"
(वि० भै०, 30)

"जन्माग्र-मूल-कन्द-नाभि-हृत्-कण्ठ-तालु-भ्रूमध्य-ललाट-ब्रह्मरन्ध्र-शक्ति-व्यापिन्याख्यं यत् क्रमाणां (क्रमेण) चक्राणां द्वादशकम्।"
(वि० भै० उ०, पृ०, 27)

क्रमाणामिति पदं चिन्त्यमत्र। क्रमेणेति वा स्यात् पाठः।

द्वादशता— ~ काल्याः— संविदो द्वादशात्मकत्वात् तद्व्यवहाराणामपि द्वादशात्मकत्वमिति संवित् परामर्शात्मिका काली द्वादशरूपा। यथा—

"अतश्च सर्वस्यैवात्रान्तर्भावाद् विश्वरूपतया प्रस्फुरन्तयाः परस्याः संविदो द्वादशात्मकत्वमेव वस्तुतः सम्भवति।"
(तं० आ० वि०, खं०, 3, पृ०, 127)

द्वादश शक्तयः— अनुत्तरानन्देच्छाख्यास्तिस्त्रः शक्तयः सृष्टौ, स्थितौ, संहारेऽनाख्ये च तुर्ये विराजमानाः द्वादशधा प्रकाशन्ते। ता एव द्वादश शक्तयो कालीपदेन परिभाषितः शाम्भवोपायनिरूपणे। यथा—

"सृष्टौ स्थितौ च संहारे तदुपाधित्रयात्यये।।
तासामेव स्थितं रूपं बहुधा प्रविभज्यते।"
(तं० आ० 3, 258-259)

एतेनैतदपि सिद्ध्यति यत् काल्युपासना त्रिकप्रक्रियायाः त्रिष्वप्युपायेष्वोतप्रोता सती त्रिकसाधनाया एव मुख्यामङ्गम्। ततो न क्रमप्रक्रिया त्रिकादतिरिक्तः कोऽपि भिन्नः साधनाक्रमः इति।

द्वादश संविदः— अनुत्तरोऽकारः, आनन्दरूप आकारः, इच्छात्मक इकारः, ईशनात्मक ईकारः, उन्मेषरूप उकारः, ऊनतात्मक ऊकारः इति षट्; ए,ऐ,ओ,औ इति सन्ध्यक्षरचतुष्टयम्; अन्तःकृतविश्वभावोऽनुत्तरः अं इति रूपः बाह्यतया विश्वविसर्गोन्मुखतात्मकः अः इति। एता एव द्वादश संविदः। अन्त्याः षट् क्रियाशक्त्यात्मिकाः। यथा—

"आसामेव समावेशात् क्रियाशक्तितयोदितात्।।
संविदो द्वादश प्रोक्ता यासु सर्वं समाप्यते।।"
(तं० आ० 3, 250-251)

"तासामेव षण्णां संविदां क्रियाशक्तितयोदितेन परस्परसंघट्टेन द्वादश संविदः प्रोक्ताः—षण्ठवर्जं सन्ध्यक्षरादि रूपोपग्रहात्स्वरद्वादशकमात्मनावभासिता इत्यर्थः।"
(तं० आ० वि०, खं० 2, पृ०,234)

द्वादशान्तः— प्राणापानयोरुद्गमस्य विश्रामस्य च स्थानं- हृदयं वा बाह्याकाशात्मकं वा। यथा—

"तत्र हृदयाद् द्वादशान्तान्तं स्वाङ्गुलैः सर्वस्य षट्त्रिंशदङ्गुलः प्राणचारो निर्गमे प्रवेशे च।"
(तं० सा०, पृ०, 48)

~ आन्तरः — प्राणिनां कण्ठकूपादधो द्वादशाङ्गुलदूरेऽन्तः- स्थितं हृदयं प्राणस्य मुख्यं पीठम्। अत्रापानस्य विलयः प्राणस्य चात उदयः।

~ ऊर्ध्वः— हृत्पद्मे बहिराकाशे च प्रसिद्धमेव द्वादशान्तद्वयम्। परं विज्ञानभैरवे तदुद्योते च तृतीयस्यापिद्वद्वाशान्तस्योल्लेखः। तथाहि—सहस्रारचक्रादूर्ध्वं मुष्टित्रयदूरे स्थाने समुल्लिखितो यो द्वादशान्तोऽसावूर्ध्वद्वादशान्त इति वक्तुं शक्यते। यथा

"उद्गच्छन्तीं तडिद्रूपां प्रतिचक्रं क्रमात् क्रमम्।
ऊर्ध्वं मुष्टित्रयं यावत् तावदन्ते महोदयः।।"
(वि० भै०, 29)

"कन्दादिब्रह्मरन्ध्रान्तचक्रेभ्यः क्रमात् क्रममुद्गच्छन्तीमल्लसन्तीं चिन्तयेद्, यावत् परं विश्वपूरकम् ऊर्ध्वं मुष्टित्रयं द्वादशान्तधाम तावत् महाभैरवैकात्मतोदयः।
(वि० भै० उ०, पृ०, 26)

परं सांशयिकमिवैतत्। यतोऽत्र विज्ञानभैरवस्य टीकाद्वयेऽपि 28तमकारिकया प्रतिपादितायाः योगधारणाया एव स्पष्टतरं व्याख्यानं 29तमकारिकया क्रियते इति स्पष्टमुक्तम्। 28तमकारिकया च बाह्यद्वादशान्तस्यैव धारणालम्बनत्वमुक्तं न पुनस्तृतीयस्य कस्याप्यूर्ध्वद्वादशान्तस्य। न च मालिनीविजय तद्वार्तिकादौ क्वाप्यूर्ध्वद्वादशान्तस्य तृतीयस्योल्लेखो लभ्यते। अस्य तृतीयस्य द्वादशान्तस्य न प्रसिद्धिः। प्रसिद्धं द्वादशान्तद्वयमेव। तदत्र विषये विचारणीयं सुधीभिः।

~ द्विप्रकारः — आन्तरो द्वादशान्तो बाह्यश्च द्वादशान्तः। तयोर्मध्ये षट्त्रिंशद्ङ्गुलः प्राणापानयोश्चारः।

~ बाह्यः— बाह्याकाशे नासाछिद्राभ्यामधः द्वादशाङ्गुलान्ते श्वासगतेः पार्यन्तिकं स्थानं बाह्यो द्वादशान्तः।

अत्र प्राणवायोर्विलयोऽपानवायोश्चोदयः।

द्वादशारचक्रम्— सृष्टिकाल्यादि रूपं चक्रं द्वादशारम्, कालीनां द्वादशत्वात्। यथा—

"द्वितीयं श्रीसृष्टिकाल्यादिरूपं द्वादशारं चक्रमुच्यते।"
(तं० आ० वि०, खं० 3, पृ०, 138)

~ तद्देवताः—

"दक्षश्चण्डो हरः शौण्डी प्रमथो भीममन्मथौ।
शकुनिः सुमतिर्नन्दो गोपालश्च पितामहः।।"
(तं० आ० 33,8-9)

~ स्त्रियः— अष्टारदेवताभिः सह मिलिताश्चतस्रो

विदिग्देवताः मण्डले पूज्याः। यथा—

"……अष्टाघोर्यादयोऽथवा।।
अग्निनिर्ऋतिवाटवीशमातृभिर्द्वादशान्विताः।"

(तं० आ० 33,3-4)

द्विकुब्जः— बीजमन्त्रवर्णो हकारः। यथा—

"निघण्टावपि—
'त्रयस्त्रिंशो व्यञ्जनं च द्विकुब्जः स्पर्श एव च।' इति। एवं च विसर्गस्यैव स्थूलं रूपं 'हकार' इत्युक्तम्।"

(तं० आ० वि०, खं० 2, पृ०, 145)

द्विचन्द्रभ्रान्तिः— व्याकृता यथा—

"द्वित्वाभासचन्द्राभासयोरपि मेलनाभासे विमर्शानुवृत्तिव्यावर्तनं वाच्यम्।"

(ई० प्र० वि०, खं० 2, पृ०, 115)

तदेवात्रभ्रान्तिमपूर्णख्यातिरूपत्वम्।

द्विजः— कवर्गीयो वर्णः। कादिवर्गस्य द्वितीयत्वाद् द्विजत्वम्। यथा—

"जीवमादिद्विजारूढं शिरोमालादिसंयुतम्।
कृत्वा ततोऽग्रे कुर्वीत द्विजमाद्यमजीवकम्।।"

उद्ध०- (तं० आ० वि०, खं० 12, पृ०, 203)

स्कृक् इति पिण्डमन्त्रव्याख्यायामुद्धृतेनानेनागमवाक्येन— स्पष्टीकृत उपरितनोऽर्थः। शारदालिप्यां संयुक्तानि व्यञ्जनानि परस्परमारूढानि लिख्यन्ते।

द्विजिह्वः— जकारः। यथा—

"द्विजिह्वे ज।"

(तं० आ० वि०, खं० 12, पृ०, 200)

द्वितीया तुटिः— शिवतायाः समावेशावसरे प्रथमायां तुटावनिर्वचनीयस्य पूर्णस्य च संवित्तत्त्वस्यैव स्वात्मतया साक्षात्कारो जायते, द्वितीयस्यां च तुटौ तस्य सर्वज्ञत्वसर्वकर्तृत्वाद्यैश्वर्यस्यापि साक्षाद्दर्शनं जायते। यथा—

"एवञ्च पाञ्चदश्ये स्थिते यावत् स्फुटेदन्तात्मनो भेदस्य न्यूनता तावद् द्वयं-द्वयं ह्रसति यावद् द्वितुटिकः शिवावेशः। तत्राद्या तुटिः सर्वतः पूर्णा, द्वितीया सर्वज्ञानकरणाविष्टाभ्यस्यमाना सर्वज्ञत्व सर्वकर्तृत्वाय कल्पते, न त्वाद्या। यदाह श्री कल्लटः— "तुटिपाते" इत्यत्र पातशब्दम्।"

(तं० सा०, पृ०, 104)

"तुटिपाते सर्वज्ञत्वसर्वकर्तृत्वसिद्धिरिति।" तत्त्वार्थचिन्तामणिवाक्ये पातशब्दस्यावरोहोऽर्थः। प्रथमायास्तुटेर्द्वितीयस्यां तुटाववरोहे सति सर्वज्ञत्वाद्यैश्वर्यस्य साक्षात्कारो भवतीति तात्पर्यम्।

द्विधा वर्णाः— शैवागमे मायिकाः, अमायिकाश्चेति द्विधा वर्णाः गण्यन्ते। यथा—

"वर्णाः सन्ति द्विधा भिन्ना
मायिकाश्चाप्यमायिकाः।।"

(पू० प्र० खं० 2, 64)

अमायिकाः स्वशक्तिविमर्शसम्भिन्नाः, मायिकाश्च वैयाकरणानां व्यवहारे।

द्विविधोऽध्वा— तत्र क्रिया वैचित्र्यममः कालाध्वा, मूर्त्तिवैचित्र्यमपश्चदेशाध्वा। यथा—

(क) "मूर्त्तिवैचित्र्यतो देशक्रममाभासयत्यसौ।
क्रियावैचित्र्यनिर्भासात् कालक्रममपीश्वरः।।"

(ई० प्र० 2, 1-5)

(ख) "द्विधा च सोऽध्वा क्रियया मूर्त्या च प्रविभज्यते।"

(तं० आ० 6, 22)

द्वैतम्— (1) द्विता-द्विरूपता, द्वयस्य भावः, द्वितत्त्व-सिद्धान्तः, उपलक्षणनीत्या चानेकत्वसिद्धान्तोऽपि। यथा—

"द्वितैव द्वैतम्।"

(ई० प्र० वि० वि० खं०1, पृ०,136)

~ आभासात्मकमेव— **द्वैतं तु केवलमाभासते एव, नास्य पारमार्थिकी सत्ता। असौ सत्ताऽस्याद्वैततत्त्वस्यान्तरेव तच्छक्तिरूपतया तदभिन्नतया च। यथा—**

" …… स्वपरविभागस्येह दर्शनेऽतात्त्विकत्वात्। संवेदनं ह्येकमेव परमार्थतः। कल्पितशून्य-प्राणशरीरादिमायाप्रमातृविषयतया तु स्वपरव्यवहारः।"

(ई० प्र० वि० वि०, खं० 1, पृ०, 63)

~ मूलतः— **(2) परमेश्वरस्य स्वात्मस्वरूपप्रच्छादनपूर्वकं लीलयैव यद् भेदस्यावभासनं तदेव द्वैतम्। यथा—**

"तथाभासनमेवास्य द्वैतमुक्तं महेशितुः।"

(तं० आ० 4, 12)

द्वैतापोहः — वस्तुतः परमशिवे न किमप्यादातव्यम् न चापि किमप्यपोहितव्यं वर्तते, तस्य सर्वात्मक शुद्धसंविद्रूपत्वात्। ततो द्वैतवासनापोहनस्येयन्मात्रमेव तात्पर्यं यत्स्वयं प्रकाशमानेऽद्वैतसंवित्स्वरूपे स्वतन्त्रे परमेश्वरे तथाविधतया प्रकाशननिरोधिकायाः स्व-स्वरूपाख्यातेः सर्वथाऽपसारणं क्रमेण। यथा—

"द्वैताधिवासोऽपि नाम न कश्चन पृथग्वस्तुभूतः, अपितु स्वरूपाख्यातिमात्रं तत्। अतो द्वैतोपासनं विकल्पेन क्रियते, इत्युक्तेरयं परमार्थः—स्वरूपं प्रकाशमानमख्याति रूपत्वं स्वयं स्वातन्त्र्यात् गृहीतं क्रमेण प्रोऽझयविकासोन्मुखम्, अथ विकसत्, अथ विकसितम्—इत्यनेन क्रमेण प्रकाशते। तथा प्रकाशनमपि परमेश्वरस्य स्वरूपमेव।"

(तं० सा०, पृ०, 24-25)

प्रकाशमानमख्यातिरूपत्वं……क्रमेण प्रोज्झ्य (स्वरूपं) विकासोन्मुखम्,…… इत्येमवमत्र पदसमन्वयः।

द्विजत्वं— ~शैवे— मायापोहनपूर्वकेन शुद्धसंविद्रूपता-संस्कारेणात्र शास्त्रे द्विजत्वं गण्यते न केवलेन जन्मना। यथा—

"द्विजोऽपि मायी त्याज्यस्तु म्लेच्छो ग्राह्यो ह्यमायकः।।"
[मुकटागमात् **उद्ध०-** (तं० आ० वि०, खं० 9, पृ०, 255)]

ध

ध— त्वगिन्द्रियस्य यत् पारमार्थिकं तत्त्वं तस्याभिव्यञ्जको मातृकावर्णः शाम्भवयोगविधौ। तत्र योगाभ्यासे स्वात्मनः शक्तिविशेषः एव स्वात्मसंवित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितः सन् त्वगिन्द्रियतयाऽऽभासते, स्वात्मा च स्वेच्छया तत् प्रतिबिम्बखचितसुन्दरो भात्यपरोक्षेण साक्षात्कारेण। तेन च शाम्भवः समावेशविशेषः समुन्मिषति।

धकारः—

द्र०- 'षट्त्रिंशत्तत्त्वदीक्षा', (16)

धरा— पृथिवी-तत्त्वम्। सर्वमपि सुस्थूलं घनं च पदार्थजातं धरैव।

~ तदाभासक्रमः — सा च पञ्चतन्मात्रप्रक्षोभतः समुद्भूता। तथाहि—शब्दस्पर्शरूपरसगन्धतन्मात्राण्येव प्रक्षुमितानि सन्ति धरारूपतया परिणमन्ते। तत एव धरायामेते पञ्चगुणाः। यथा—

"सगन्धैर्भूरिति क्रमः।"

(तं० आ० 9, 288)

गन्ध सहितैः शब्दादिभिरिति।

~ सप्तप्रमातृमयी — धरातत्त्वप्रकाशो धरायाः शिवत्वम्। धरातत्त्वगताः सिद्धिर्ये वितरन्ति तेधरामन्त्रेश्वराः, ये तांस्तदर्थं प्रेरयन्ति ते धरामन्त्रमहेश्वराः सिद्धीनां स्फुटत्वकारिणो धरामन्त्राः, अप्राप्तशिवभावाः शिवयोगाभ्यासिनस्तत्र धराविज्ञानाकलाः, सुषुप्तिपदभाजस्तत्र धराप्रलयाकलाः, स्फुटव्यवहारकारिणः धरासकलाः। इति धरायाः सप्तप्रमातृरूपता। यथा—

"धरातत्त्वाविभेदन यः प्रकाशः प्रकाशते।
स एव शिवनाथोऽत्र पृथिवीब्रह्मतन्मतम् (तन्मयम्)।।
धरातत्त्वगताः सिद्धीर्वितरीतुं समुद्यतान्।
प्रेरयन्ति शिवेच्छातो ये ते मन्त्रमहेश्वराः।।
प्रेर्यमाणास्तु मन्त्रेशा मन्त्रास्तद्वाचकाः स्फुटम्।
धरात्त्वगतं योगमभ्यस्य शिवविद्यया।।
न तु पाशवसांख्यीयवैष्णवादिद्विदादृशा।
अप्राप्तध्रुवधामानो विज्ञानाकलताजुषः।।
तावत्तत्त्वोपभोगेन ये कल्पान्ते लयं गताः।
सौषुप्तावस्थयोपेतास्तेऽत्र प्रलयकेवलाः।।"

(तं० आ० 10,168-172)

तत्त्वभेदनप्रक्रियादृष्टिरेषा।

धराद्याः— ~तत्त्वभेदने — धरादिमूल प्रकृत्यन्तानि तत्त्वानि

~ पञ्चदशात्माकाः — धरादीनि मूलप्रकृत्यन्तानि तत्त्वानि सप्तभिः प्रमातृभिरनुद्रिक्तशक्तिभिरुद्रिक्तशक्तिभिश्च; वेद्यानि, ततस्तानि दृष्टता सिद्धान्तनीत्या चतुर्दशात्मकानि स्वस्वरूपयोजनया च तानि पञ्चदशात्मकानि भाव्यन्ते। यथा—

"एवं पञ्चदशात्मेयं धरा तद्वज्जलादयः।।
अव्यक्तान्ताः यतोऽस्त्येषां सकलं प्रति वेद्यता।"

(तं० आ० 10,97-98)

सकलं प्रतिवेद्यतया प्रलयाकलादिवेद्यताप्याक्षिप्तात्र। ततः सप्तप्रमातृवेद्यतैषाम्।

धराबीजम् — लकारः। यथा —

"तथास्थैर्यतो धृतिहेतुं स्थिरत्वाख्यं धर्ममुपरञ्जकत्वेनावलम्ब्य.....धराबीजलकाररूपतां चाभासयतीत्यर्थः।"

(तं० आ० वि०, खं० वृ०, 158)

धर्मभेदाः— शैवसाधकैः पालनीयाः समयाः विशेषतः समयदीक्षापात्रतां यातैः। यथा—

"अक्रोधो गुरुशुश्रूषा शौचं सन्तोष आर्जवम्।।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्कता।
एवं दशविधो धर्मः कथितस्तु वरानने।।"

(स्व० तं०11,144-145)

धर्मशिवः— ~ आचार्यः — अभिनवगुप्तस्य गुरुविशेषः यो महापातकिनां विषये क्रियमाणायां परोक्षदीक्षायां प्रायश्चित्तीयकर्मविशेषमस्मा उपदिदेश। यथा —

"श्रीमान् धर्मशिवोऽप्याह पारोक्ष्यां कर्मपद्धतौ।"
.....
कुर्यात्तत्वविशोधनम्"।। इत्यन्तम्

(तं० आ० 21,50-56)

द्र०- (तं० आ० 37,62)

~ तदग्रन्थः — एतेन साधनापद्धतिरपि काचिन्निर्मिताऽभवत्। यथा—

"एतेन च धर्मशिवाचार्येण स्वपद्धतौ—
.....
.....
.....
.....
सर्वतन्त्रीसमाघाताद्वीणायामिव साधु यः।
मृदुस्तब्धं निनदति झाङ्कारः सप्तमस्त्वसौ।।" इति।

उद्ध०- (स्व० तं० उ०, खं० 6, पृ०, 8-9)

धर्मशिवाचार्य-पद्धतिः — धर्मशिवकृतः कश्चन ग्रन्थो य इदानीं नैव लभ्यते क्वापि। यथा—

"धर्मशिवाचार्येण स्वपद्धतौ—
"एतेषां लक्षणं वच्मो गुरुपारम्परागतम्" इत्यारम्य
.....
.....
"तुङ्गमेघध्वनिनिभः सोऽष्टमो ध्वङ्कृतः स्मृतः।"
इत्यन्तम्।

(स्व० तं० उ० 11, पृ०, 8-9)

धर्मादिभेदाः — उक्ता यथा—

"धर्मश्च दशधा प्रोक्तो ज्ञानं चैवाष्टधा स्मृतम्।
वैराग्यं नवधा चैवमैश्वर्यं चाष्टधा विदुः।।
एत एव विपर्यस्ता अधर्माद्याः प्रकीर्तिता।"
(स्व०तं०प०11,०143-144)

धर्मालङ्कारः— कोऽपि ग्रन्थः उद्धृतपंक्तिर्जयरथेन। यथा—

"यद्धर्मालङ्कारः—
'भाव एवं परस्येह कार्यताभाव.....।' इति।
'स्वभावो जनकोऽर्थनामभूताकारभावकः।। इति च।"
(तं० आ० वि०, खं० 6, पृ०, 15)

द्र०- पुनः (तदेव, पृ०,18, तथा पृ०,21)

धाता— विश्वं स्वात्मनि धारयच्छिवः। यथा—

"धत्ते सर्वमात्मनीति धाता शंकरात्मा स्वभावाः सः।"
(स्पं० नि०, पृ०,55)

धातुसमीक्षा— ग्रन्थ विशेषः कोऽपि। यथा—

"धातुसमीक्षायां च—
..... ।।"
(स्पं० प्र०, पृ०,4-5)

धाम — विश्वविश्रान्तिस्थानभूतं तत्त्वम्। यथा—

"धामेति सूर्यसोमवह्नितेजसामपि प्रकाशकत्वात् विश्वविश्रान्तिस्थानकत्वाच्च धाम।"
(स्व० तं० उ०, 15, पृ०, 126)

धामत्रयम्— सूर्यः चन्द्रमा वह्निश्चेति त्रयम्। यथा—

"सूर्याचन्द्रमसौ वह्निस्त्रिधामपरिकल्पना।
त्रिनेत्रकल्पना मह्यं तदर्थमिह दृश्यते।।
दहनाप्यायने तेन प्राकाश्यं विदधाम्यहम्।।"
(ने० तं० 1, 30-31)

धारणा— (1) असावभ्यासो येन स्वात्मनि परमेश्वरत्वं धार्यते, स्थाप्यत इवाभिनवसाक्षात्कारतः। न तु योगसूत्रीया धारणा यथा—

"धारणा परमात्मत्वं धार्यते येन सर्वदा।
धारणा सा विनिर्दिष्टा भवबन्धविनाशिनी।।"
(ने० तं० 8, श्लो० 16, पृ०, 184)

(2) य, र, ल, व इति वर्णचतुष्टयरूपा यादयः मातृकाक्रमेधारणाख्याः भवन्ति। यथा—

"वाय्वग्निसलिलेन्द्राणां धारणानां चतुष्टयम्।"
(प० त्री०, 7)

"रागो विद्या कला माया यादयो धारणाभिधाः।।"
(पू० प्र० 2,102)

अर्थात्—यकारो-रागो, रकारो-विद्या, लकारः-कला, वकारश्च माया इति।

(3) भगवता नरावस्थायां बहिर्धार्यमाणान् भावान् प्रति धारणोपायतां गच्छन्तीति ते रागादयस्तान् धारयन्ति। तत एव धारणाः इत्युच्यन्ते। यथा—

"रागादिभिरेव तथाविधत्वमस्येति रागादय एव अद्धियमाणान् भावानुक्तन्यायेन धारयन्तमीश्वरं प्रति प्रयोजकतां गच्छन्ति।

..... तदेवं धारणाशब्देनापरशास्त्रेषु कञ्चुकनामधेयप्रसिद्धान्येव तत्त्वानीह निरूपितानि।

यदुक्तं श्री तन्त्रसारे—

"धारयन्ति पशोः पाशान् भावान् स्वात्ममयांस्तथा।
विद्यामायानियत्याद्याः शोध्यास्तेन प्रयत्नतः।।"
(प० त्री० वि०, पृ०, 116-117)

धारणाद्यनुपयोगः— शाक्तशाम्भवादिषूत्कृष्टेषूपायेषु न पातञ्जलस्य योगस्य धारणादीनामङ्गानां कोऽप्युपयोगः किमपि वा प्रयोजनम्। यथा—

"चित्तस्य विषये क्वापि बन्धनं धारणात्मकम्।
तत्सदृग्ज्ञानसन्तानो ध्यानमस्तमितापरम्।।
यदा तु ज्ञेयतादात्म्यमेव संविदि जायते।
ग्राह्यग्रहणताद्वैतशून्यतेयं समाहितिः।।
तदेषा धारणाध्यानसमाधित्रितयी पराम्।
संविदं प्रति नो कञ्चिदुपयोगं समश्नुते।।"
(तं० आ० 4,93-95)

धारणोत्तरं मरणम्— धारणापूर्वको देहत्यागः स तु योगिनामेव भवति। तेन हि मरणे यो दुःखभोगोऽसौ योगिनां कृते नैव जातु। यथा—

"एतेषां मरणाभिख्यो भोगो नास्ति तु ये तनुम्।
धारणाभिस्त्यजन्त्याशु परदेहप्रवेशवत्।।
एतावन्मृतिभोगो हि मर्मच्छिन्मूढताक्षगा।
ध्वान्ताबिलत्वं मनसि तच्चैतेषु न विद्यते।।"
(तं० आ० 28, 294-295)

धारिका— निवृत्तिकला। यथा—

"आद्यं धारिकया व्याप्तं तत्रैकं तत्त्वमिष्यते।।
एकमेकं पृथक् क्षार्णं पदार्णमनुषु स्मरेत्।
कालाग्निभुवनाद्यावद्वीरभद्रपुरोत्तमम्।।
पुरषोडशकं ज्ञेयं षड्विधोऽध्वा प्रकीर्तितः।"
(मा० वि० तं०2,50-52)

धीन्द्रियपञ्चकम्— ~ मातृकासु— तत्र तवर्गवर्णाः ज्ञानेन्द्रियाणां तात्त्विकस्य स्वरूपस्याभिव्यञ्जकत्वेन स्थिताः। यथा—

"तादिनान्तंघ्राणादिश्रोत्रान्तं धीन्द्रियपञ्चकम्।"
(प० त्री० वि०वृ०, पृ०, 4)

धुगधुगायनम्— धुग्-धुग् इति शब्दानुकृतिः। तथाविधः शब्दः कण्ठे समुदयन्निव श्रूयते योगाभ्यास-विशेषे। यथा—

"कण्ठस्थो विरमेच्छब्दः कण्ठं प्राप्य वरानने।
भिन्दतः कण्ठदेशं तु शब्दो धुगधुगायते।।"

(स्व० तं० 4,371)

धूर्जटिः — शिवः। यथा—

"धुनोति सर्वं, रंहति सर्वत्र, जनयति सर्वं, टीकते सर्वत्रेति आगूरिताक्रमचतुष्टयार्थो धूर्जटिः।"

(भा० वि०, पृ०, 31)

प्रत्यक्षरनिर्वचनाश्रितैषा व्याख्या तान्त्रिकी।

धूलिभेदक्रमः— श्लिष्टार्थत्वेन शब्दप्रयोगक्रमोऽर्थश्लेषत एव प्रायः, क्वापि शब्दश्लेषतोऽपि सम्भवेत्। यथा—

"तैस्तु तथाविधागमसाक्षात्कारिभिरनेकयुक्तिशत-सहिष्णुतासूत्रग्रन्थस्य सूत्रितैव; धूलिभेदप्रदर्शनमपि तेनैवाभिप्रायेण तैरितश्चामुतश्च विततम् .....
.....धूलिभेदादिना च कल्पित-सामयिकलिप्यपेक्षणमपि भवेदपि कस्यचिदुपायाय।"

(प० त्री० वि०, पृ०, 100-101)

"शिव उक्तविश्वाभेदविमर्शात्मा परनादरूपतया सर्वोपरि दर्शनीयः .....इति धूलिभेदक्रमः।"

(ने० तं० उ०, खं० 1, पृ०, 51)

ध्यानम्— (1) अन्तकरणवृत्तीर्विलाप्य स्वात्मनः स्वयं स्वेनैव चित्प्रकाशेन यद् दर्शनं तदपि शैवयोगक्रमविशेषे-ध्यानमित्युक्तं क्वचित्। यथा—

"धीगुणान्समतिक्रम्य निर्ध्येयं चाव्ययं विभुम्।
ध्यात्वा ध्येयं स्वसंवेद्यं ध्यानं तच्च विदुर्बुधाः।।"

(ने० तं० 8, 15)

न खलु त्रिकाचारीयविशेषपरिभाषेयं ध्यानमिति। अपि तु साधारणतयाऽत्र शाम्भवयोगाभ्यासोऽपि ध्यानमित्युक्तो वेदितव्यः।

(2) शिवयोगी यद्यदिन्द्रियैर्गृह्णाति तस्य-तस्य सृष्टिसंहारादिकं भावनया कल्पयति। तदेतत् स्वात्मशिव-भावभावनमेव तस्य ध्यानम् आणवक्रमे। यथा—

"ध्यानमनस्तमितं पुनरेष हि भगवान् विचित्ररूपाणि।
सृजति तदेव ध्यानं संकल्पालिखित सत्यरूपत्वम्।।"

(प० सा०, 77)

अत्रापि ध्यानमिति सामान्येनैवोक्तं न विशेष-परिभाषानुसारम्।

(3) बुद्धिमालम्बनत्वेन गृह्णन् विकल्पात्मको योगः। आणवोपायेषु सर्वोत्तमो योगः। यथा—

"तत्र बुद्धिर्ध्यानात्मिका।"

(तं० सा०, पृ०, 35)

एतल्लक्षणं हि त्रिकाचारान्तर्गतस्य विशेषस्य ध्यानयोगस्य। एवं विधस्यैव भावनाभ्यासस्य पारिभाषिकी संज्ञा त्रिके ध्यानमिति।

द्र०- 'बुद्धिध्यानम्' इति।

~ अध्वोपयोगे— भावनाभ्यासतः समुद्भूतस्य स्वात्मनः सम्पूर्णतायाः साक्षात्कारस्य परम्परात्मकोऽभ्यासो ध्यानम् (आणवोपायभूतम्) यथा—

"तथा सम्पूर्णरूपत्वानुसन्धिर्ध्यानमुच्यते।।"

(तं० आ० 12,9)

~ तद्विधिः— बुद्धिध्यानविधिरेषः। यथा—

"यः प्रकाशः स्वतन्त्रोऽयं चित्स्वभावो हृदि स्थितः।
सर्वतत्त्वमयः प्रोक्तमेतच्च त्रिशिरोमते।।
कदलीसम्पुटाकारं सबाह्याभ्यन्तरान्तरम्।।
ईक्षते हृदयान्तःस्थं तत् पुष्पमिव तत्त्ववित्।।
सोमसूर्याग्निसंघट्टं तत्र ध्यायेदनन्यधीः।
तद्ध्यानारणिसंक्षोभान्महाभैरवहव्यभुक्।
हृदयाख्ये महाकुण्डे जाज्वलन् स्फीततां व्रजेत्।।
इत्यारभ्य .....
.....
.....
अनेन ध्यानयोगेन विश्वं चक्रे विलीयते।।
तत् संविदि ततः संविद् विलीनार्थैव भासते।
इति क्रमेण .....
.....
इत्येत् प्रथमोपायरूपं ध्यानं न्यरूपयत्।
श्री शम्भुनाथो मे तुष्टस्तस्मै श्री सुमतिप्रभुः।।"

(तं० आ० 5, 20-49)

त्रिकाचारीयपरिभाषानुसारमेतदेव हि ध्यानम् विस्तरतस्तन्त्रालोके द्रष्टव्यम्।

द्र०- (तं० सा०, पृ०, 36-37)

द्र० 'बुद्धिध्यानम्' इति।

~ तद्विशेषाः — शैवदर्शनग्रन्थेष्वागमेषु च ध्यानपदमनेकाः साधना अधिकृत्यैव प्रायो बहुष्वर्थेषु प्रयुक्तः। सर्वत्र चिन्तनमात्रं सामान्योऽर्थः। यच्च ध्यानपदं त्रिकाचारीयं विशेषपारिभाषिकं पदं, तत्प्रयोगोऽद्वैतशैववाङ्मयस्य विकासकाले एव लोकविश्रुततया प्रवृत्त इति प्रतीयते। तत एव तस्य तां विशेषतां प्रकटयितुमाचार्यैर्बुद्धिपदं समास-पूर्वपदत्वेन प्रयुक्तं "बुद्धिध्यानम्" इति। एतेन ध्यानम् = सामान्यतो विविधप्रकारकस्य चिन्तनस्याभ्यासः इति। बुद्धिध्यानम् = आणवेषु योगप्रकारेषु सर्वोत्तमः प्रकारस्-

त्रिकशास्त्रीयविशेषपारिभाषानुसारम्। एष योगप्रकारः श्रीशम्भुनाथेन श्रीमदभिनवगुप्तायोपदिष्टः इति।

द्र०- ~ 'तद्विधिः' इति।

~ परयोगिनः — **व्यावहारिकेषु फलेष्वनासक्तस्य परयोगिनः स्वात्मशिवस्य विश्वाकृतिध्यानं सततमेव विमर्शपदवीमारोहति। यथा—**

"यस्तु सम्पूर्णचिद्वृत्तिर्न फलं नाम वाञ्छति।
तस्य विश्वाकृति ध्यानं सर्वदैव विजृम्भते।।"
(मा० वि० वा० 2, 138)

विश्वं तस्य ध्येयमेव, शिवात्मकत्वात्।

~ पारमार्थिकम्— **शाक्तोपायमयं ध्यानमेव।**

द्र०- 'ध्यानम्' ~ शाक्तोपाये **इति।**

~ फलार्थिनाम्— **तत्तद्विशिष्टदेशकालाकारसमन्वित-तत्तद्विषयसततविमर्शनस्याभ्यासो यस्तत्तद्विशेषफलदानसमर्थः, स एव हि विशेषं ध्यानम् फलार्थिनाम्। यथा—**

"निराकारे हि चिद्धाम्नि विश्वाकृतिमये सति।
फलार्थिनां काचिदेव ध्येयत्वेनाकृतिः स्थिता।।"
(तं० आ० 4,196)

"बुभुक्षोर्नियताकारं ध्यानं, मुमुक्षोस्तु अनियताकारमिति-विषयविभागः।"
(तं० आ० वि०, खं० 3, पृ०, 231)

~ शाक्तेपाये— **(1) शाक्तोपायनिष्ठो योगी यदेव स्वकीय बुद्धिभूमाववभासयति नीलादि बाह्यं सुखादि चान्तरं तत्तथावभासनमेवास्य ध्यानम्। यतः सर्वमसौ स्वात्मशिवतयैव पश्यति। यथा—**

"यदेव स्वेच्छया सृष्टिस्वाभाव्याद्बहिरन्तरा।
निर्मीयते तदेवास्य ध्यानं स्यात्पारमार्थिकम्।।"
(तं० आ० 4,195)

(2) यो यो विषयो येन येनेन्द्रियेण गृह्यते तस्मिंस्तस्मिन् विषये भावनया शिवताया एव दर्शनं ध्यानम्। यथा—

"येन-येनेन्द्रियेणार्थे गृह्यते तत्र-तत्र सा।
शिवता लक्षिता सत्या तद्ध्यानमपि वर्ण्यते।।"
(शि० दृ० 7,79)

शिवतायाः लक्षणीयतया शाक्तोपायोऽयम्।

(3) सततं शिवोऽस्मीति चिन्तनं ध्यानम्। यथा—

"यस्यां-यस्यां प्रतीतौ तु शिवोऽस्मीति मनोगमः।
तस्यां-तस्यां तथैव चिन्तायां तद्ध्यानमपि जल्पितम्।"
(तदेव 7, 80)

~ शाम्भवोपायमयम्— **बर्हिमुखनवनवोन्मेषरहिता विषयाकारानपगृह्णती त्रिनेत्राद्याकारानगृह्णती कन्दनाभिहृदयादिस्थानविशेषेष्वनिविष्टा निर्वातदीपवत् स्थिरा या बुद्धिः सैव ध्यानम् शाम्भव्यामुपासनायाम्। बुद्धेरेवंविधायाः स्थिरेभ्यासो-ध्यानं तत्रेति तात्पर्यम्। यथा—**

"ध्यानं हि निश्चला बुद्धिर्निराकारा निराश्रया।
न तु ध्यानं शरीराक्षिमुखहस्तादिकल्पना।।"
(वि० भै०, 146)

निर्विकल्परूपतया शाम्भवोपायोऽयम्।

~ षड्विधम्— **तच्चालम्बनषट्काश्रितत्वेन षड्विधम्। विशेषस्तद्विविधभोगफलदम्। शैवदर्शनस्य भोगमोक्षो-भयानुकूलत्वादत्र च भोगोपायस्यापि क्रमशो मोक्षमार्गे एवाग्रेसरत्वकारित्वात्। तत एव मोक्षशास्त्रेऽपि भोगदस्य ध्यानस्य स्थानम्। यथा—**

"भुवनं विग्रहो ज्योतिः खं शब्दो मन्त्र एव च।
बिन्दुनादादिसम्भिन्नः षड्विधः शिव उच्यते।।"
(तं० आ० 1, 63)

ध्येयतया शिवः षड्विधः। षट् तस्याकारा ध्येया इति। यथा—

"यो यदात्मकतानिष्ठस्तद्भावं स प्रपद्यते।
व्योमादिशब्दविज्ञानात् परो मोक्षो न संशयः।।"
(तदेव1,64)

"षण्णामपि शिवात्मकत्वात्—
..... शिवं ध्यात्वा तु तन्मयः।
इत्याद्युक्तेः शिवैकमयतयैकैकानुप्रवेशेऽपि शिवात्मक-स्वस्वरूपलाभो भवेत्।"

उद्ध०- (तं० आ० वि०, खं०1, पृ०,102)

"बिन्दुर्नाभुस्तथा व्योम मन्त्रो भुवनविग्रहौ।
षड्वत्वात्मा शिवो ध्येयः फलभेदेन साधकैः।।"
उद्ध० (तं० आ० वि० खं० 1, पृ०, 100)

(क) "उन्मना तु परो भावः स्थूलस्तस्तस्यापरो मतः।
पुनः शून्यञ्च व्योमात्मा संस्पर्शश्च ततः परम्।।
(ख) व्योमविग्रहबिन्द्वर्णभुवनाध्वविभेदतः।
लक्ष्यभेदः स्मृतो षोढा..... ।।
(ग) यो यत्राभिलषेद्भोगान्स तत्रैव नियोजितः।
सिद्धिभाक्.....।।"
उद्ध०- (तं० आ० वि०, खं० 1, पृ०, 101)

ध्यानयोगः ~ आणवः (संक्षेपतः)— **बुद्धिवृत्त्यालम्बनको भावनामयो योगः आणवः। यथा—**

"अनुजोद्देशे हि बुद्धिध्यानमित्याद्युपक्रमः।"
(तं० आ० वि०, खं० 3, पृ०, 329)

~ तद्विधिः— (संक्षेपतः)— **(1) द्वादश-शक्तिचक्रमण्डितस्य प्रमाणप्रमेयप्रमातृसंघट्टवह्नेरिन्द्रिय द्वारैर्निष्क्रम्य बाह्यवस्तूनां सृष्टयादिकृत्यभावनया**

व्यापनस्याभ्यासः। एतेनाभ्यासेन परमेश्वरतात्मकः स्वभावः स्वात्मनि संस्काररूपतया कीलितो भवति। यथा—

"तद्द्वादशमहाशक्तिरश्मिचक्रेश्वरं विभुम्।
व्योममिर्निःसरद्बाह्ये ध्यायेत्सृष्टिस्थिती दधत्।।
पश्चाद्ग्रस्तसबाह्यान्तर्भावमज्ञानमात्मनि।
विश्राम्येत्पुनरप्येवं ध्यानाभ्यासात्प्रथात्मनः।।"

(तं० व० धा० 2,9-10)

आणवेषुपायेषु सर्वोत्कृष्टोऽयमुपायः। अस्य नामान्तरं बुद्धिध्यानमित्यपि, बुद्धिरेवत्रालम्बनतां नीयते यतः।

द्रष्टव्यं विस्तरतः—(तं० आ० 5, 19-49)

द्र०- 'बुद्धिध्यानम्' इति।

~ विस्तरतः — **आणवोपाये बुद्धिमालम्बनीकृत्य-विधीयमानो विकल्पसंस्काराभ्यासः। तत्र प्रथमं निजहृदय-बोधे सर्वान्तर्यामि रूपस्य परतत्त्वस्य चिन्तनं विधाय तत् प्रमेयप्रमाणप्रमातृरूपस्यत्रिकोणस्यैवैकसंघट्टरूपतया भावनीयं भवति। ततश्च तदेव द्वादशकालीरूपशक्तिचक्रपरिवृत्त-मपरिमितचिदग्नि रूपतया भाव्यते। ततस्तदेव येन केनापीन्द्रियद्वारेण बहिः प्रसृतं सदग्रे पतितं तं-तं विषयं सृष्टयादिकृत्यत्रयविषयत्वेन विषयीकुर्वद् भाव्यते। ततस्स्वात्मनः शक्तिचक्रं विश्वमात्मीकृत्य विश्वपरिपूर्णं साक्षात्क्रियते। तथाविधं च तत् स्वात्मना सर्वथाऽभेदं नीयते। एवं विधेन सततगत्या विधीयमानेनाभ्यासेन योगिनो निजस्य पारमैश्वर्यरूपस्य भैरवीभावस्य साक्षात्कारः सिद्धो भवति। अभ्यासेन च तस्य संस्कारे दृढतां याते सति योगी जीवन्नेव स्वं शिवभावं रसयति, स्वेच्छं च सृष्टयादिकरणे पटुर्भवति। शिवभावस्याणवोऽस्य समावेशोऽपि सिद्धो भवति, शाक्तोपायाभ्यासयोग्यता च तस्मिन्नुदेति। यथा—**

"यदेतत्स्वप्रकाशं सर्वतत्त्वान्तर्भूतं परं तत्त्वमुक्तम्, तदेव निजहृदयबोधे ध्यात्वा तत्र प्रमातृप्रमाणप्रमेयरूपस्य वह्न्यर्कसोमत्रितयस्य संघट्टं ध्यायेद् यावदसौ महाभैर-वाग्निर्ध्यानवातसमृद्धाकारः सम्पद्यते, तस्य प्राक्तनशक्ति-ज्वालाद्वादशकपरिवृत्तस्य चक्रात्मनश्च चक्षुरादीनामन्यतमसुषिरद्वारेण निःसृतस्य बाह्ये ग्राह्यात्मनि विश्रान्तं चिन्तयेत्। तेन च विश्रान्तेन प्रथमं तद्बाह्यं सोमरूपतया सृष्टिक्रमेण प्रपूरितं, ततः अर्करूपतया स्थित्या अवभासितं, ततोऽपि संहारवह्निरूपतया विलापितं, ततः अनुत्तरात्मतामापादितं ध्यायेत् एवं तच्चक्रं समस्तबाह्यवस्त्वभेदपरिपूर्णं सम्पद्यते। ततो वासनाशेषानपि भावान् तेन चक्रेणेत्थं कृतान् ध्यायते।

एवमस्यानवरतं ध्यानिः मूस्वसंविन्मात्रपरमार्थान् सृष्टिस्थितिसंहारप्रबन्धान् सृष्ट्यादिस्वातन्त्रयपरमार्थत्वञ्च - स्वसंविदो निश्चिन्वतः सद्य एव भैरवीभावः। अभ्यासात्तु सर्वेप्सितसिद्धयादयोऽपि।

स्वप्रकाशं समस्तात्मतत्त्वं मात्रादिकं त्रयम्।
अन्तःकृत्य स्थितं ध्यायेद् हृदयानन्दधामनि।।
तद्द्वादशमहाशक्तिरश्मिचक्रेश्वरं विभुम्।
व्योमभिर्निःसरद् बाह्ये ध्यायेत्सृष्टयादिभावकम्।।
तद्ग्रस्तसर्वबाह्यान्तर्भावमण्डलमात्मनि।
विश्राम्यन् भावयेद् योगी स्यादेवं स्वात्मनः प्रथा।।"

(तं० सा०, पृ०, 36-37)

ध्येयबहुत्वप्रयोजनम्— भिन्न-भिन्नव्यावहारिक-फललाभार्थं विशेषप्रकाराणि ध्येयान्युपयुज्यन्ते। नैकरूपस्य ध्येयविशेषस्य ध्यानेन सर्वप्रकारका सिद्धिः सम्भवेत्। यथा—

"निराकारे हि चिद्धाम्नि विश्वाकृतिमये सति।
फलार्थिनां काचिदेव ध्येयत्वेनाकृतिः स्थिता।।
यथा ह्यभेदसम्पूर्णे भावेऽप्युदकमाहरन्।
अन्याकृत्यपहानेन घटमर्थयते रसात्।।
तथैव परमेशाननियतिप्रविजृम्भणात्।
काचिदेवाकृतिः काञ्चित्सूते फलविकल्पनाम्।।"

(मा० वि० वा० 2, 135-137)

ध्वङ्कृतः— ध्वनिविशेषः। कदाचिन्मेघगर्जननिभः कदाचिच्च घण्टानाद इव श्रूयमाणोऽष्टमो नादो नादयोगाभ्यासे। यथा—

'धर्मशिवाचार्येण स्वपद्धतौ—
घण्टानिनादानुकृतिः कदाचिद् व्यज्यतेऽन्यथा।।
तुङ्गमेघध्वनिनिभः सोऽष्टमो ध्वङ्कृतः स्मृतः।' इति।"

(स्व० तं० उ०, प० 11, पृ०, 9)

"झाङ्कारो ध्वङ्कृतश्चैव अष्टौ शब्दाः प्रकीर्तिताः।"

(स्व० तं० 11,6)

ध्वनिः — (1) नादो, ध्वन्यते इति। यथा—

"ध्वनिः सर्ववाचकाभेदविमर्शात्मा नादो हकलारूपः।
अत्र नादेन नादान्तः स्वीकृतः।"

(ने० तं०, खं० 1, पृ०, 51)

(2) नादयोगप्रकारविशेषे धारणालम्बनम्। यथा—

"धर्मशिवाचार्येण स्वपद्धतौ—
'ततोऽतितानधर्मित्वान्नादः श्रोत्रसुखावहः।
विपञ्च्याः पञ्चमीं तन्त्रीं हत्वा तीव्रप्रयत्नतः।।
यथा व्यज्यत आकाशे स षष्ठो ध्वनिसंज्ञकः।' इति।"

(स्व० तं०, उ० 11, पृ०, 8-9)

(3) वीणायाः पञ्चम्यास्तन्त्रया आघातेनोत्थितः इव सुखावहः षष्ठो नादो नादयोगाभ्यासे। यथा—

"ततोऽतितानधर्मित्वान्नादः श्रोत्रसुखावहः।
विपञ्च्याः पञ्चमीं तन्त्रीं हत्वा तीव्रप्रयत्नतः।।
यथा व्यज्यत आकाशे स षष्ठो ध्वनिसंज्ञकः।"

(स्व० तं० उ० प० 11, पृ०, 9)

~ दशविधः—(4)आणवोपायधारणासु प्राणीये ध्वनौ दशविधस्य नादस्य श्रवणं भवति। ते च ध्वनयः चिञ्चिनीप्रभृतिनामकाः। यथा—

"चिञ्चिनीचीरवाकादिप्रभेदाद्दशधा ध्वनिः।"

(मा० वि० तं० 12,12)

ध्वनियोगः — प्राणोच्चारेऽव्यक्तानुकृतिप्रायो यो ध्वनिस्तद्विषये प्राणापानगत्योरुपरि सृष्टिसंहारबीजयोर्भावनया, तद्बीजव्यङ्ग्यार्थभावनया च सतताभ्यासविषयतामाप्तया स्वस्वरूपलाभो भवति। स एष ध्वनियोगो नामाणवः उपायः वर्णयोग इत्यप्यस्य नामान्तरम्, तस्य ध्वनेः सर्ववर्णमूलभूतत्वात्। यथा—

"उक्तो य एष उच्चारस्तत्र योऽसौ स्फुरन् स्थितः।
अव्यक्तानुकृतिप्रायो ध्वनिर्वर्णः स कथ्यते।।
सृष्टिसंहारबीजं च तस्य मुख्यं वपुर्विदुः।।
तदभ्यासवशाद्याति क्रमाद्योगी चिदात्मताम्।"

(तं० आ० 5 131-133)

सृष्टिबीजं सकारः संहारबीजं हकार इति।

~ तत्फलम्— **भिन्नभिन्नानां बीजपिण्डानां ध्वनियोगेऽभ्यासादाप्यायनमर्मनिकृन्तनाद्यनुभूतयः प्रथमं जायन्ते, ततोऽभ्यासबलात् क्रमेण चिदेकतासाक्षात्कारोऽपि सम्भवति। यथा**

"ककारादिसकारान्ते वर्णकलापे पुनःपुनरुच्चारिते स्मृतेऽपि वा सा। सा मर्मनिकृन्तनाप्यायनादिरूपा परस्पर विलक्षणा 'संविद्' अनुभवो जायते। तेन सृष्टिबीजादावभिव्यज्यमानं नादं पौनःपुन्येनोच्चारयन् स्मरन् वापि योगी चिदैकात्म्यमनुभवेत्।"

(तं० आ० वि०, खं० 3, पृ०, 446)

तस्या अनुभवो जायते इति अथवा तथाविधा संविदेवानुभवोऽसौ जायत इति तात्पर्यम्।

न

न— श्रोत्रतत्त्वस्य यद्वास्तविकं स्वरूपं शिवशक्तिप्रतिबिम्ब विशेषात्मकं तस्य व्यञ्जको वर्णो मातृकाक्रमे, शाम्भवोपाये।

नकारः—

द्र०- **'षट्त्रिंशत्तत्त्वदीक्षा' (15)**

(स्व० तं० उ०, प० 5, पृ० 34-35)

नकुलेशमतम्— लकुलीश पाशुपतं मतमुद्धृतं समय विस्तारनिरूपणप्रकरणे तन्त्रालोके। यथा—

"श्रीमद्भिर्नकुलाशाद्यैरप्येतत् सुनिरूपितम्।।
शरीरमेवायतनं नान्यदायतनं व्रजेत्।
तीर्थमेकं स्मरेन्मन्त्रमन्यतीर्थानि वर्जयेत्।।
विधिमेनं सुखं ज्ञात्वा विधिजालं परित्यजेत्
समाधिर्निश्चयं मुक्त्वा न चान्येनोपलभ्यते।।"

(तं० आ० 15, 604-606)

अत्र 'नकुलेश' इति पाठभेदो वा स्यान्नाम भेदो वा लकुलीशस्यैव, लेखक प्रमादतो वैवं मातृका पुस्तकेषु लिखितं स्यात्।

नन्दिशिखा— कोऽपि शैवागमः। भैरवभेदे शिखाष्टकेषु नास्य नाम्नः परिगणनम्। अनेकनामान्यपि भवन्त्यागमशास्त्राणि। ततः शिखाष्टक एव परिगणितोऽयं कश्चनागमः स्याद् योऽनेन नाम्नात्र समुल्लिखितः। अस्यागमस्य भूयस्यः पंक्तयोऽर्थतः शब्दशश्चाप्युद्धृतास्तन्त्रालोके त्रयोदशाह्निके प्रातिभज्ञानप्रकरणे। तद्विवेके च विस्तरतः पद्यान्युद्धतानि। यथा—

तद् दृश्यतां तत्रैव—

"श्रीमन्नन्दिशिखातन्त्रे वितत्यैतन्निरूपितम्।। इत्यारभ्य
.....
.....
.....

इत्येष पठितो ग्रन्थः स्वयं ये बोद्धुमक्षमाः।
तेषां शिवोक्ति संवादाद् बोधो दार्ढ्यं व्रजेदिति।।
इत्यन्तम्।

(तं० आ० 13, 163-196)

"अनिर्देश्यः शिवो ह्येवं कथितः परमेश्वरः।
उपायः कथ्यतां देव भक्तानुग्रहकाम्यया।।"
..... इत्यारम्य
तत् किमर्थं शिशेर्दीक्षा क्रियते तु शिवाध्वरे।" इत्यन्तम्।

उद्ध०- (तं० आ० वि०, खं० 8, पृ०, 105-124)

द्र०- चः– (तं० आ० 13,251, 15,182,83, तं० आ०वि०, खं० 5, पृ०, 15,186,237,241,243,256, खं; 7/2, पृ०, 99, खं० 8, पृ०, 155-156, खं० 9, पृ०, 138, 140, 141; इति)

(स्व० तं० उ०, प० 7, पृ०, 249) (ने० तं० उ०, खं० 1, पृ०, ,246-247) इति।

नभः— क्षकारः। यथा—

'नभः क्ष'।

(तं० आ० वि०, खं०, 12, पृ०, 203)

नमः— भगवत्स्वरूपविमर्शनपूर्वकं तस्मिन् स्वरूपे निजमायीयस्वरूपनिमज्जने प्रवणा भावनैव 'नमः' इति निपातेन द्योत्यते। सा च तथाविधा भावना प्रह्वतोच्यते शैवशास्त्रेषु। यथा—

"तादृशं शिवस्वरूपं प्रधानप्रमातृतयाधिशये, न्यक्करोमि मायाप्रमातृभावाभिमानमिति। अन्यनिपातवद् द्योतक एवायं नमः शब्दः।"

(ई० प्र० वि० वि०, खं० 1, पृ०,7)

"नमः इति शास्त्रकृद् वाङ्मनः कायानां तत् प्रह्वतासाविष्करोति।"

(तदेव)

द्र०- **'नमस्कारः' इति।**

नमस्कारः— (1) वन्दनीयं प्रति नमस्कर्तुः कायवाङ्मनसामेक विषयतानियोजनालक्षणा प्रह्वता। यथा—

"इह परमेश्वरं प्रति येयं कायवाङ्मनसां तदेकविषयता नियोजना लक्षणा प्रह्वता सा नमस्कारस्यार्थः।"

(ई० प्र० वि०, खं० 1, पृ०, 6)

द्र०- (म० मं० प०, पृ०, 5)

द्र०- 'नमः' इति।

(2) उपासकस्योपास्यरूपतया परिणामः। यथा—

"परिणामस्तल्लयश्च नमस्कारः स उच्यते।।"

(तं० आ० 30,14)

"इयमेतावती व्याप्तीरेव जातितया सर्वत्र प्रसिद्धो नमस्कार उच्यते यदसौ नमस्कर्तुर्देहादि प्रमातृताहारात् चित्प्रमातृतादानेन-तात्कर्म्यात परिणाम इव परिणामः।"

(तं० आ० वि०, खं० 12, पृ०, 184)

नयसंगतिः — किमपि कौलप्रक्रियाशास्त्रपुस्तकम्। यथा—

"यच्चोक्तं नयसंगतौ—

'नास्ति नादात् परो मन्त्रो न देवः स्वात्मनः परः।
नानुसन्धेः परा पूजा न हि तृप्तेः परं फलम्।।'इति।"

(म० मं० प०, पृ०, 117)

नरतत्त्वम्— सर्वोऽपि जाड्यप्रधानोऽशो जगतो नरतत्त्वत्वेन गण्यते। तेन पुरुषतत्त्वं प्रकृतितत्त्वं सर्वं च प्राकृतिकं जगन्नरतत्त्वात्मकं मुख्यतो; यद्यपि सर्वत्र तत्र शिवशक्त्यात्मकतापि गुणीभूता सती वर्तमानैव। साक्षात्कुर्वन्ति तां तत्रावधान धनाः सुप्रबुद्धाः साधकाः एव केवलम्। यथा—

"तत्र यत् केवलं स्वात्मन्यवस्थितं तत् केवलं जडरूपयोगि मुख्यतया नरात्मकम्—घटस्तिष्ठतीतिवत्।"

(प० त्री० वि०, पृ०, 73-74)

यत्तत्त्वं न परप्रकाशकं स्वात्मप्रकाशने चापि संवित् साहाय्यमपेक्षते तन्नरतत्त्वम्।

~ शक्तिशिवमयम्— शिवशक्तिनरात्मकानि त्रीण्यपि तत्त्वानि प्रत्येकं त्रिकस्वरूपाणि। तेन नरोऽपि शिवशक्त्यात्मकः। जडत्वस्य प्राधान्यदेव हि तस्य नरत्वेन व्यपदेशमात्रम्। यथा—

"सर्वं हि सर्वात्मकमिति नरात्मानो जडा अपि-त्यक्त-तत्पूर्वरूपाः शाक्तशैवरूपभाजो भवन्ति.....
.....शाक्तमपि युष्मदर्थरूपमपि नरात्मकतां भजत एव शाक्तरूपमुज्झित्वा। 'त्वं गतभयधैर्यशक्तिरिति। अनामन्त्रणयोगेनापि प्रतिपत्तेः। भवनित्यनेन 'पादागुरव' इत्यादिप्रत्यय विशेषैश्चापरावस्थो-चितनरात्मकप्रथमपुरुषविषयतयापि प्रतीतिसद्भावात् त्यक्त शाक्तरूपस्यापि च अहं रूपशिवात्मकत्वमपि स्यात्। वयस्ये, दयिते। शरीरचित्तत्त्वमेव अहं भवामीति प्रत्ययात् शिवस्वरूपमपि च उज्झित चिद्रूपमिव नरशक्त्यात्मकं वपुराविशत्येव।"

(प० त्री० वि०, पृ०, 77-78)

नरलिङ्गम् ~ उच्चारयोगे—

द्र०- 'लिङ्गम्' ~ व्यक्तम् **इति।**

नरसिंहगुप्तः— (1) अभिनवगुप्तस्य पिता। यथा—

"देहेऽस्मिन्नरेऽसिंहगुप्तघटिते लब्धास्पदः पश्चिमे।"

(ई० प्र० वि०, खं० 1, पृ०, 1)

"जनकश्च कीदृशः .....नरसिंहगुप्त-संज्ञया ख्यातः इत्यर्थः।"

(तं० आ० वि०, खं० 1, पृ०, 13-14)

(2) चुखलकापराभिधानोऽयं वराहगुप्तस्य सुतः। यथा

"तस्यात्मजश्चुखलकेति जने प्रसिद्ध श्चन्द्रावदातधिषणो नरसिंहगुप्तः।"

(तं० आ० 37,54)

तस्येति प्रकृतस्य वराहगुप्तस्य।

नरेश्वरभेदवादी— शिवजीवयोः पृथक्-पृथक् स्वतन्त्रां सत्तां प्रतिपादयन् द्वैतशिवदर्शनानुयायी।

तत एव सद्यो ज्योतिषा निर्मितस्य भेददर्शनपुस्तकस्य नामापि नरेश्वरपरीक्षेति। यथा—

"नरेश्वरभेदवादिप्रातिपक्ष्येण चैतन्यपरमार्थतः शिव एव विश्वस्यात्मा।"

(शि० सू० वि०, पृ०, 2)

नरेश्वरविवेकः — किमपि शैवशास्त्रपुस्तकं यस्य पंक्तयो बहुधा समुद्धता ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिन्यादौ। यथा—

द्र०- (क) (ई० प्र० वि० वि०, खं० 1, पृ०, 141, 249,274; खं० 2, पृ०, 35,53,167,323; खं० 3, पृ०, 155,245,260,282,366; (ख) म० मं० प० पृ०, 36,45)

नवतत्त्वविधिः — प्रकृत्यादीनि नवविशेष-तत्त्वान्यालम्बनीकृत्य तत्त्वाध्वदृष्ट्या स्वात्मशिवताया भावनाभ्यासविशेषः।

तत्त्वाध्वप्रकार विशेषोऽयम्। यथा—

"प्रकृत् पुमान् यतिः कालो मायाविद्येशसौशिवौ।
शिवश्च नवतत्त्वेऽपि विधौ तत्त्वाध्वरूपता।।"

(तं० आ० 11,37)

तानि च तत्त्वानिः—प्रकृतिः, पुरुषः, नियतिः, कालः, माया, विद्या, ईशः, सुशिवः, शिवः चेति।

नवद्वाराणि— यथा—

"नवच्छिद्राणि द्वाराणि ब्रह्मरन्ध्रचक्षुश्रोत्रघ्राणास्य-चूचुकनाभिलिङ्गगुदगतानि लक्षणम् यस्य।"

(स्व० तं० उ०, 12, पृ०, 5)

एषा क्षेमराजस्य निजा वा कल्पना अथवा अस्याः कश्चनागमिक आधार इति नैतत् स्पष्टम्।

नवधात्वधारणा ~ तत्त्वभेदने — **विज्ञानाकले धारणालम्बनभूते सति मन्त्रादिभिश्चतुर्भिः तच्छक्तिभिश्च तावंतीभिर्वेद्यत्वेन व्याप्ततया तस्य दर्शने सति तन्नवधा साक्षात्क्रियते योगिभिः।**

अत्र प्रमातारः =4, प्रमाणानि =4, आलम्बनस्वरूपम् =1 इति नव संख्या। यथा—

" .....नवधा ज्ञानकेवलाः।"

उद्धृ०- (मा० वि० तं० 2,6 (तं० आ० वि०, खं० 7, पृ०,6)

"नवधेति सशक्तीनां चतुर्णां मन्त्रादीनां प्रमातृत्वात्"

(तं० आ० वि०, खं०, पृ०, 5-6)

एवम धरायां महामायायामालम्बनीकृतायामपि नवधात्वम्।

नवनादाः — **नादयोगाभ्यासे श्रूयमाणाः नवप्रकारा ध्वनयः; ते च घोषो, रावः, स्वनः, शब्दः, स्फोटः, ध्वनिः, झाङ्कारो, ध्वङ्कृतः, इत्यष्टौ महाशब्दात्मकः सर्वव्यापकश्च नादो नवमः इति। यथा—**

"अष्टधा स तु देवेशि व्यक्तः शब्दप्रभेदतः।
घोषो रावः स्वनः शब्दः स्फोटाख्यो ध्वनिरेव च।।
झाङ्कारो ध्वङ्कृतश्चैव अष्टौ शब्दाः प्रकीर्तिताः।
नवमस्तु महाशब्दः सर्वेषां व्यापकः स्मृतः।।"

(स्व० तं० 11,6-7)

नवनित्याविधानम्— **किमपि तान्त्रिकं योगशास्त्रपुस्तकम्। यथा—**

"नवनित्या विधानेऽपि
"अङ्गुष्ठानामिकाभ्यां तु तर्पयेत्परमेश्वरीः।"

उद्धृ०- (तं० आ० वि०, खं० 9, पृ०, 139)

नवमः — **ओ इति स्वरः। षण्ठानामत्रागणने नवत्वसंख्या। यथा—**

"नवमः ओ।"

(तं० आ० वि० खं० 12, पृ०, 202)

नववर्गाः— —

मातृकावर्णानां नव समुदायाः। ते चः 1 अवर्गः, 2, कवर्गः, 3 चवर्गः, 4 टवर्गः, 5 तवर्गः, 6 पवर्गः, 7 यवर्गः, 8 शवर्गः, 9 क्षकारः।

यथा—

"बीजयोन्यात्मकाद् भेदाद् द्विधा बीजं स्वराः मताः।।
कादिभिश्च स्मृता योनिर्नवधा वर्गभेदतः।"

(मा० वि० तं० 3,10-11)

नवात्मकः ~ बीजपिण्डः — **ह्, र्, क्ष्, म्, ल्, व्, य्, ऊँ इति बीजपिण्डः। पाथः**

"तारो माया वेद कलो मातृतारो नवात्मकः।"

(तं० आ० 30,90)

"बिन्दुप्राणदण्डनाभिनितम्बवामस्तनकण्ठवामस्कन्धवामकर्णाभरणाक्षरारब्धः।"

(तं० आ० वि०, खं० 12, पृ०, 212)

अत्र बिन्दुः—प्राणो = ह्, दण्डो = र्, नाभि =क्ष्, नितम्बोः = म्, वामस्तनो = ल्, कण्ठः = व्, वामस्कन्धो = य्, वामकर्णाभरणः = ऊ,। शारदालिपौ संयुक्तव्यञ्जनान्येकैकस्याधो लिख्यन्ते इति सर्वोपरि स्थितस्य बिन्दोः प्रथमं स्थानम्।

द्र०- 'विद्याराजः' ~ मन्त्रः इति।

नवात्मकत्वं ~ तत्त्वभेदने— **तत्त्वभेदनधारणायां विज्ञानकलस्य धारणालम्बनत्वे, तस्य स्वरूपमेकम्। मन्त्रादि प्रमातृचतुष्टयवेद्यत्वं तच्छक्तिचतुष्टयव्याप्तत्वं चेति 1+4+4=9 इति नवात्मकत्वं भाव्यते तस्य। यथा—**

"विज्ञानाकलस्य स्वरूपत्वे चतुर्णां प्रमातृत्वे नवभेदाः।"

(तं० सा०, पृ०, 98)

नवात्मा— **(1) अघोराद्यष्टकमध्यवर्ती नवात्मा शिवः। यथा—**

"स एवैतदष्टकमध्यवर्ती नवात्मा।"

(तं० आ० वि०, खं० 1, पृ०, 154)

बीजपिण्डरूपत्वेन स्थितः शिवोऽपि नवात्मेति। नववर्गात्मकमातृकाशरीरः एव शिवो नवात्मा।

(2) मन्त्र विशेषः। ह्, र्, क्ष्, म्, ल्, व्, य्, ऊँ इति बीज पिण्डात्मकः। यथा—

"ततो नवात्मदेवेन न्यासस्तत्त्वोदयात्मकः।।"

(तं० आ० 15,239)

द्र०- 'विद्याराजः' ~ मन्त्रः इति।

नवार्णा विद्या ~ गुप्ततरा— **न सम्यक् स्पष्टीकृता। यथा—**

" नवार्णेयं गुप्ततरा सद्भावः कालकर्षिणी।" इति।

(तं० आ० 30,54)

नवेरकनाथः — **कालीनये श्रीकेयूरवत्याः कोऽपि शिष्यः। यथा—**

"नवेरकनाथश्चास्या अपि शिष्यः।"

(तं० आ० वि० खं० 3, पृ०, 196)

नवोमार्गः — **रहस्यशास्त्रेषूपदिष्टोऽपि निगूढत्वात् प्राक्तनैराचार्यैरगृहीतः श्री सोमानन्दादिभिश्च ततो गृहीत्वा सुप्रकटीकृतस्त्रिकाचारयोगमार्गः। तत्रापि विशेषतः शाक्तशाम्भवानुपाययोगरूपः। यथा—**

"इति प्रकटितो मया सुघट एष मार्गो नवो।
महागुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा।।"
(ई० प्र०, 4-2-1)

पूर्वमप्रसिद्धत्वेनैवास्य नवत्वमुक्तं वेदितव्यम्। यथा-

"अस्मत्परमेष्ठिभट्टारकश्रीसोमानन्दपादैः शिवदृष्टि शास्त्रेऽभिनवः सर्वरहस्यशास्त्रान्तर्गतः सन्निगूढत्वादप्रसिद्धो.... ..... ।"
(ई० प्र० खं० 2, पृ०, 271)

ना (नृ) ~ वर्णाः— पुरुषतत्त्वाभिव्यञ्जको 'मकारः' मातृकाक्रमानुसारम्। यथा—

"ना-पुमान् = मकारः।"
(तं० आ० वि०, खं० 3, पृ०, 463)

नगार्जुनः ~ शैवः— माध्यमिकाद्वज्रयानीयाद्रस-शास्त्रज्ञाच्चापि भिन्नः कोऽपि शैवाचार्यो या जालन्धरपीठे ज्वालामुखीमन्दिरात् क्रोशमात्रमूर्ध्वस्थले न्यवसत्। तत्र तस्य स्थानं वर्तते। सिद्धनागार्जुनाख्यमधित्यकायाम्। तस्य स्तोत्रद्वय लभ्यते। तच्च— (1) परमार्चनत्रिंशिका, (2) चित्तसन्तोषत्रिंशिका चेति। उभयं दर्शनरहस्यगर्भं त्रिकसाधनासिद्धान्तक्रमानुसारि च। परमार्चनत्रिंशिकायाः पद्यमेकमुद्धतं महेश्वरानन्देन महार्थमञ्जरी परिमले। स च महेश्वरान्दश्चतुर्दशशताब्द्यामभूदिति परिमलस्य सम्पादकेन प्रदर्शितम्। ततो नागर्जुनस्यास्य कालस्त्रयोदशशतीत्यनुमीयते। तत्र जालन्धरपीठे दशमशताब्द्यां श्रीशम्भुनाथोऽभूत पीठाधिपः। एतत् सम्भाव्यते यदयं शैवो नागार्जुनस्तस्यैव शिष्यपरम्परां प्रविष्टोऽभूदिति। श्रीरणवीर केन्द्रीय संस्कृत विद्यापीठे, जम्मू पुरे प्रकाशितं वर्तते पुस्तकमेकस्य कृते। तस्याभिधानं, "शैवाचार्यो नागार्जुनः" इति।

नाडिकाः— मण्डले न्यस्ताः सूत्रविशेषाः। यथा—

"नाडिकाः सूत्राणि।"
(तं० आ० वि०, खं० 12, पृ०, 285)

"नाडिकाः स्थापयेत्पूर्वं मुहूर्त्तं परिमाणतः।।
शक्रवारुणदिक्स्थाश्च याम्यसौम्यगतास्तथा।।"
एकोनत्रिंशद्वंशाः स्युर्ऋजुतिर्यग्गतास्तथा।।"
(तं० आ० 31,131-133)

नाडीचारणम्— नाडीवाहनमेव।

नाडी जालकम्— यथा वटपलाशादिपत्रे तन्तुजालपं व्यापकं तथैव शरीरेऽपि नाडीजालकम्। यथा—

"श्रीस्वच्छन्देऽतएवोक्तं यथा पूर्णं स्वतन्तुभिः।।
व्याप्तं तद्वत्तनुर्द्वारद्वारिभावेन नाडिभिः।
(तं० आ० 7,67-68)

नाडीवाहनप्रक्रिया—स्वेच्छया वामदक्षिणनाडीवाहन-विधिः। यथा—

"यां वाहयितुमिष्येत नाडीं तामेव भावयेत्।।
भावनातन्मयीभावे सा नाडी वहति स्फुटम्।
यद्वा वाहयितुं येष्टा तदङ्गं तेन पाणिना।।
आपीड्य कुक्षिं नमयेत् सा वहेन्नाडिका क्षणात्।"
(तं० आ० 25,19-21)

नाडीवाहनम्— इडापिङ्गलयोः स्वेच्छानुसारं प्राणचारणम्। यथा—

"विषुवद्वासरे प्रावर्दक्षा वहति नाडिका।
सायमन्यान्तरा मध्या योगिनां तु निजेच्छया।।"
उद्ध०- (तं० आ० वि०, खं० 10, पृ०, 321)

नाडीविषुवत्— द्र०- 'विषुवत्' इति।

नाडीवेधः — वेधदीक्षया षट्चक्रभेदनप्रक्रियाविशेषः। वेधदीक्षायाः प्रकारविशेषः। यथा—

"नाड्यः प्रधानभूतास्तिस्त्रोऽन्यास्तद्गतास्त्वसंख्येयाः।
एकीकारस्ताभिर्नाडीवेधोऽत्र तत्फलकृत्।।
अभिलषितनाडिवाहो मुख्याभिश्चक्षुरादिनिष्ठाभिः।
तद्बोधप्राप्तिः स्यान्नाडीवेधे विचित्रबहुरूपा।।
लाङ्गूलाकृतिबलवत् स्वनाडिसंवेष्टितामपरनाडीम्।
आस्फोट्य सिद्धमपि भुवि पातयति हठान्महायोगी।।"
(तं० आ० 29,268-270)

स्वपुच्छास्फालनेन तर्वादिसम्पातन्यायेन भावनया असंख्यानां शरीरनाडीनासिडापिङ्गलासुषुम्नाभिरेकीकारकरणं नाडीवेधः। तदेकीकारसम्पत्तिस्तस्य फलम्।

नाडी-संधानम्— (1) यागे क्रियाविशेषः। मन्त्रकलशजलेन ग्रन्थेर्भेदनविधिः। क्रियाविज्ञानविद एव सम्यग्विजानीयुरीदृशान् विषयान्। यथा—

"आत्मनो निष्कलोच्चारं कृत्वा कुम्भे निवेशयेत्।
कलशस्थस्य वामेन रेचयेत् पूरयेत्ततः।
मण्डलस्थस्य सव्येन पुनर्वामेन रेचयेत्।।
अग्निष्ठस्य तु तत्तेजो दक्षिणेन विशन् स्मरेत्।
(स्व० तं० 4, 46-48)

(2) अधिवासविधिसम्बन्धीकर्मविशेषः। यथा—

"तस्याप्यनेन न्यायेन विलोमेन विशेद् हृदि।
आत्मनो रेचकेनैव पूरकेण विशेद् हृदि।।
नाडीसन्धानमेतद्धि शिवेन परिकीर्तितम्।"
(स्व० तं० 3,52-53)

द्र०- 'मन्त्रसन्धानम्' इति।

नाडीसंहारः— नाडीनां या वृत्तयस्तासां सौषुम्ने पदे संहारश्चिदाकाशे वा। अथवा भावनया सर्वस्य नाडीजालस्य तत्रैव ..... संहारः। यथा—

"सुषुम्नाया मध्ये वा, चिदाकाशे वा, नाडीनां या वृत्तयस्तासां निमीलनं तत्संहारः। अथवा भावनया सर्वासां नाडीनां तत्र-तत्र संहारः।"

(शि० सू० विवृ० 3, 5)

नाड्यग्रगोचरः — हृद्यानां गीतदिविषयाणामिन्द्रियगोलक-सन्निकर्षदशा। यथोक्तं विज्ञानभैरवे यथा—

"जग्धिपानकृतोल्लासरसानन्दविजृम्भणात्।
भावयेद्भरितावस्थां महानन्दस्ततो भवेत्।।
गीतादिविषयास्वादासमसौख्यैकतात्मनः।
योगिनिस्तन्मयत्वेन मनोरूढेस्तदात्मता।।
यत्र-यत्र मनस्तुष्टिर्मनस्तत्रैव धारयेत्।
तत्र-तत्र परानन्दस्वरूपं सम्प्रवर्तते।।"

(वि० भै०,72-74)

अत्रत्या जयरथकृता व्याख्या चिन्त्या।

द्र०- (तं० आ० वि०, खं० 3, पृ०, 378)

नादः — प्रणवः।

"नादः प्रणवाख्यः शब्दः।"

(स्पं० सं०, पृ०, 34)

~ अष्टधा— **आणवोपाये आलम्बनतया गृहीतोऽन्तर्वनिः। यथा—**

"..... नादः ..... ।।
.....
अष्टधा स तु देवेशि व्यक्तः शब्दप्रभेदतः।
घोषो रावः स्वनः शब्दः स्फोटाख्यो ध्वनिरेव च।।
झाङ्कारो ध्वङ्कृतश्चैव अष्टौ शब्दाः प्रकीर्तिताः।
नवमस्तु महाशब्दः सर्वेषां व्यापकः स्मृतः।।
नदत्यसौ सदा यस्मात्सर्वभूतेष्ववस्थितः।"

(स्व० तं० 11,6-8)

~ कालीनये— **संवित्स्वरूपे विषयस्य विश्रान्तेरनन्तरं पुनरहमिति स्वात्ममात्रपरामर्शशेषता। यथा—**

"नादः स्वात्मपरामर्शशेषता तद्विलोपनात्।"

(तं० आ० 4,175)

"स्वात्मपरामर्शशेषतेति नदनमात्ररूपत्वात्, तद्विलोपनादिति-तेषामविकल्पज्ञानादीनां विलोपनात्।"

(तं० आ० वि०, खं० 3, पृ०, 205)

~ दशधा— **नादयोगे रावदशकस्य पृथक्-पृथक् दश नामानि। तान्येव दश नादा इत्युच्यन्ते। चिनीति नादादारभ्य दुन्दुभिनादान्तास्ते। यथा—**

"नदते दशधा सा तु दिव्यानन्दप्रदायिका।
चिनीति प्रथमः शब्दश्चिञ्चिनीति द्वितीयकः।।
चीरवाकी तृतीयस्तु शंखशब्दश्चतुर्थकः।।
तन्त्रीघोषः पञ्चमश्च षष्ठो वंशरवस्तथा।।
सप्तमः कांस्यतालस्तु मेघशब्दावस्तथा (रवोऽष्टमः)।
नवमो दावनिर्घोषो दशमो दुन्दुभिस्वनः।।
नव शब्दान् परित्यज्य दशमो मोक्षदायकः।
अनेन विधिना येन व्याहरेद् दशधा रवम्।।"

(तं० आ० वि०, पृ०, 410 खं० 3,410)

~ ध्वनियोगे— **(1) पिहितकर्णेन साधकेन श्रूयमाणः स्वयमुच्चरितोऽव्यक्तध्वनिरूपः। यथा—**

"नादो वेगवन्नद्योघनिर्घोषघनोपक्रमः क्रमसूक्ष्मीभावा-भिव्यज्यमानमधुमत्तमधुकरध्वनितानुकारी स्वोच्चरितो ध्वनिविशेषो, यं व्योमतत्त्वाभ्यासिनः शृंण्वन्ति।"

(स्प० वि०, पृ०, 118)

(2) ब्रह्मबिले विराजमानोऽयत्नजः परिपूर्णोऽहं विमर्शः। यथा—

".....येनासौ ब्रह्मबिले विश्रान्तः सन् सर्वेषु भूतेषु—
'नास्योच्चारयिता कश्चित् प्रतिहन्ता न विद्यते।
स्वयमुच्चरते हंसः प्राणिनामुरसि स्थितः।।' इति।"

(स्व० तं० 7,59)

इत्याद्युक्तया नदन्.....शिवशक्त्या त्वधिष्ठितः परसंविन्मात्रात्मकः।"

(तं० आ० वि०, खं० 5, पृ०, 2154-255)

~ प्रणवकलासु— **(1) स्फोटात्मिका तत्तत्पदार्थविमर्शनकरी भेदाभेदविमर्शमयी शक्तिर्नाद इति। यथा—**

"ध्वनिरूपो यदा स्फोटस्त्वदृष्टाच्छिवविग्रहात्।।
प्रसरत्यतिवेगेन ध्वनिनापूरयञ्जगत्।
स नादो देवदेवेशः प्रोक्तश्चैव सदाशिवः।।"

(ने० तं० 21,62-63)

सृष्टिक्रमदृष्ट्या निरूपणमेतत्।

(2) उपासनाक्रमे निरोधिन्या उपरिस्थितिर्नादस्य। असौ स्थितिः सदाशिवदशा। यथा—

" ..... बिन्द्वावृत्यूर्ध्वतो महान्।।
नादः किञ्जल्कसदृशो महद्भिः पुरुषैर्वृतः।"

"महद्भिः पुरुषैः....मन्त्रमहेश्वर रूपैः।"

(तं० आ० वि०, खं० 5, पृ०,253)

संहारक्रमदृष्टया निरूपणमेतत्।

(3) आक्रान्तिः स्वरूपे। यथा—

"नादस्य च ..... बहिरुल्लसितस्य विश्वस्य अन्तराक्रमणमेव रूपमित्याक्रान्तिरिति।"

(तं० आ० वि०, खं० 12, पृ०, 179-180)

व्याख्यानमेतन्नादरूपायाः स्थितेः।

"क्षेपस्तु कथितो बिन्दुराक्रान्तिर्नाद उच्यते।"

उद्ध०- (तं० आ० वि०, खं० 12, पृ०, 180)

~ शाम्भवोपाये— **चित्स्वरूपस्य स्वात्मविमर्शन-क्रियात्मकोऽहमिति विमर्शः। तस्य च व्यक्तिर्मातृकाक्रमेऽकारेण भवति। इति मूलतः अकार एव नादः। यथा—**

"योऽसौ नादात्मकः शब्दः सर्वप्राणिष्ववस्थितः।"

(तं० आ० 3,113)

"शब्दयति स्वाभेदेन विश्वं परामृशतीति शब्दः, परावाग्रूपो विमर्शः। स च नादात्मकः नदति सर्वेषामेव जीवकलात्वेन परिस्फुरतीति नादः।"

(तं० आ० वि०, खं० 2, पृ०, 119)

"हकारर्धार्धरूपिणी अमाकला यैव मुख्यया वृहत्या सर्वत्र अस्वरत्वेन व्यपदिश्यते ..... स एव च— अकारः सर्ववर्णानामन्तर्यामितया स्थितः।"

(तं० आ० वि०, खं० 2, पृ०, 119-120)

~ सृष्टिक्रमादौ—सदाशिवदशा। यथा—

"तस्मादपि शक्त्यात्मनः स्पर्शात् शून्यरूपवाच्यवाचकोभयात्मकस्य जगतो मध्यात् प्रथमं समस्तवाचकाविभागमयो नाद उत्पन्नः।"

(स्व० तं० उ०, प० 11, पृ०, 8)

"अन्तःकृतज्ञानशक्तिप्रधाननादपरामर्शः समस्तवेद्याविभक्तः—।"

(स्व० तं० उ०, प० 11, पृ०, 10)

"अशेषवाचकाविभागपरामर्शमयनादात्मकम्।"

(वि० भै० उ०, पृ०, 5)

"नादः सकलवाचकाविभेदिशब्दनरूपोऽनाहतध्वनिरूपः।"

(स्पं० नि०, पृ०, 63)

नादकलाः— परयोगिभिरेवानुभाव्याः एताः। यथा—

"इन्धिका दीपिका चैव रोचिका तथा।।
ऊर्ध्वगामिन्य इत्येताः कला नादसमुद्भवाः।
एताः स्वतन्त्रतायुक्ताः सकले निष्कले स्थिताः।।
ज्ञानशक्तिस्वरूपास्तु ज्ञाताः सार्वरयदायिकाः।

(ने० तं० 22,40-42)

नादबिन्दू— सदाशिवेश्वरौ। यथा—

"विमर्शप्राधान्यादेव समस्तनामाविभागसारनादभूमिरित्युच्यते दशेयम्; विमर्शांशनिमीलने त्ववभासात्मकसाक्षात्करोचितप्रकाशरूपप्राधान्याद् बोधावभासोन्मेषरूपाविभागस्वभावबैन्दवपदव्यपदेश्या ऐश्वरी दशा।"

(ई० प्र० वि वि०, खं० 2, पृ०, 318)

नादभट्टारकः— भेरीमृदङ्गवाद्यवाद्यभिघातराहित्येनैव स्वयमेवोच्चरन् पिहितकर्णेन साधकेन श्रूयमाणः सामान्यकारशब्दप्रवाहरूपोऽनाहतो ध्वनिः। यथा—

"अभग्नशब्देऽहर्निशं विच्छेदनरहितशब्दने, अनाहते न केनचिदाहते स्वरसत एवोत्थिते, नादभट्टारकात्मनि शब्दब्रह्मणि .....।"

(वि० भै० उ०, पृ०, 32)

नादभैरवः ~ कौले— आनन्दचक्रद्वयसंघट्टरसे योऽव्यक्तहकारप्रायोध्वनिः शक्तिकण्ठादुदेति स्तनितमणितादि प्रायोऽसौ तत्र नादभैरव इत्युच्यते। यथा—

"कुचमध्यहृदयदेशादोष्ठान्तं कण्ठगं सदव्यक्तम्।।
तच्चक्रद्वयमध्यगमाकर्ण्य क्षोभविगमसमये यत्।
निर्वान्ति तत्र चैवं योऽष्टविधो नाद भैरवः परमः।।"

(तं० आ० 29,158-159)

"यत्तदक्षरमक्षोभ्यं प्रियाकण्ठोदितं परम्।
सहजं नाद इत्युक्तं तत्त्वं नित्योदितं जपः।।"

उद्ध०- (तं० आ० वि० खं०11/2, पृ०,110)

"नित्यानन्दरसास्वादाद्धा हेति गलकोटरे।
स्वयम्भूः सुखदोच्चारः कामतत्त्वस्य वेदकः।।

(तदेव)

नादयोगः — आन्तरनादानुसन्धानाभ्यासः। यथा—

"शष्कुलीं कर्णयोर्बद्ध्वा
यो रोवोऽत्र विजृम्भते।
तद्गीतमथ ते वाद्य-
माद्य सम्पुटघट्टनात्।।

(भा०,32)

नादरूपः शब्दः— स हि स्थूलः, सूक्ष्मः, परश्चेति त्रिप्रकारकः शिवताविमर्शः, न पुनः प्राणवाय्वभिघातजन्यरवात्मकः। यथा—

(क) ".....नादरूपादिशब्दस्यास्ति शिवात्मता।
तस्यापि कथिता पञ्चतत्त्वदीक्षाविधौ क्वचित्।।
न वाच इष्यते तद्वत् .....।"

(शि० दृ०, 2, 89-90)

(ख) "अथ नादरूपस्य स्थूलस्य सूक्ष्मस्य परस्य च शब्दस्यास्ति मन्त्रात्मनः परमशिवात्मता, तदिष्टा कथिता पञ्चतत्त्वदीक्षाविधौ दीक्षाशास्त्रे, न पुनरेवं वाच इन्द्रियरूपायाः परभावस्तन्मयत्वं वा जगतो युक्तम्।"

(शि० दृ० वृ०, पृ०, 93)

नादवेधः — वेधदीक्षया षट्चक्रभेदनप्रकारविशेषेष्वन्यतमः प्रकारः। एतेन गुरुः शिष्यस्य षट्चक्रभेदनं स्वानुग्रहशक्त्यैव सद्यः कारयति। यथा—

"नादोच्चारेण नादाख्यः सृष्टिक्रमनियोगतः।।
नादेन वेधयेच्चित्तं नादवेध उदीरितः।"

(तं० आ० 29, 243-244)

कुलगह्वर वाक्यमेतत्ः —

"नादं दीर्घं समुच्चार्य नादं नादे समाक्रमेत्।
नादिफान्तं समुच्चार्य वर्णाध्वानं विशोधयेत्।।
नादेन वेधयेद्देवि नादवेध उदाहृतः।"

उद्ध०- (तं० आ० वि०, खं० 11/2, पृ०, 152)

नादान्तः ~ त्रैशिरसे— **स्वात्मनश्चिद्रू पताया उद्बोधः। यथा—**

"इदन्तानिमज्जनादहन्तोन्मज्जनात्मनि नादान्ते प्रमातृतारूपायाः संविद एव प्रबोध इति चिदुद्बोध इति।"

(तं० आ० वि०, खं० 12, पृ०, 180)

"क्षेपमाक्रमणं चैव चिदब्बोधं च दीपनम्।

.....

चिदुद्बोधः परावस्था .....।"

उद्ध०- (त्रि० भै०) (तं० आ० वि०, खं० 12, पृ०, 180)

~ प्रणवकलासु— **(1) नादाख्यायाः सदाशिवभूमेरुपरितनं सोपानम्। नादस्य शब्दव्याप्तेः शाम्यत्तायां शुद्धविमर्शतोन्मज्जनदशा नादान्तकला। यथा—**

"नादस्यैव शब्दव्याप्तेः शाम्यत्तायां सुसूक्ष्मध्वन्यात्मा नादान्तः।"

(वि० भै० उ०, पृ०, 5)

"नादोर्ध्वगतेच्छाव्याप्त्यवस्थितो यः शक्तेः संस्पर्शस्तदभिन्नत एव नादान्तोऽव्यक्तध्वनिरिति चोच्यते।"

(स्व० तं० उ०, प० 5, पृ०, 65)

(2) उक्तमेतद्विषये नेत्रतन्त्रवाक्योद्धरणतो यथा—

"अत्र नादान्तोऽप्यनुप्रविष्ट इति .....।"

(वि० भै० उ०, प०, पृ०, 38)

एतेन स्पष्टतया ज्ञायते यन्नादान्तोऽपि सदाशिवभूमिकान्तर्गत एव।

नाभिः ~ वर्णः— **क्षकारस्य साङ्केतिकं नाम त्रिकागमेषु। यथा—**

"नाभिः क्षः।"

(तं० आ० वि०, खं० 11/2, पृ०, 127)

द्र०- (तदेव, खं० 12, पृ०, 201-202)

~ मन्त्रः— **लोकपालमन्त्रश्चतुर्थः। न स्पष्टीकृतो जयरथेन।**

द्र०- 'लोकपालमन्त्राः' इति।

नामकतन्त्रम्— दर्शनसिद्धान्तज्ञानप्रधानं त्रिकागमशास्त्रम्। यथा—

"ज्ञानप्रधानं नामकं तन्त्रम्"

(तं० आ० वि०, खं० 1, पृ०, 49)

अस्मात्तन्त्रादुद्धृतानि वाक्यानि नैवाद्य यावत्, लब्धानि क्वापि कोषकृता। कदाचिदस्य तन्त्रस्य "नामकम्" इति नाम न स्यात् अपितु "वामकम्" इत्येव स्यात्। लेखक प्रमादोऽप्यत्र सम्भवति नकारवकारयोरीषन्मात्रान्तरत्वाच्छारदालिप्याम्। न च तान्त्रेलोकविवेकादन्यत्र क्वापि नामोल्लेखोऽस्य। तत्रापि केवलं स्थलद्वय एव। तन्त्रालोकस्य प्राचीनतरा मातृका एतद्विषये द्रष्टव्याः।

द्र०- 'त्रिकम्' ~ आगमानाम् **इति।**

नाराचमुद्रा— यथा—

"मुष्टिं बद्ध्वा वरारोहे संप्रसार्य प्रदेशिनीम्।
नाराचस्तु समाख्यातः समासात्तव भैरवि।।

(स्व० तं० 14,8)

"अस्यापि ..... तत्रैव **(श्री भैरवानुकरणस्तोत्रे)** स्वरूपं निर्णीतम्-

'कोदण्डारूढशरप्रदर्शनाद्ब्रह्मविष्णुरुद्रेशान्।
ससदाशिवकारणहरिणाञ्छक्त्या भिनत्सि युगपत्त्वम्।।'
इति।"

(स्व० तं० उ०, 14, पृ०, 114)

द्र०- 'अनन्तविजयशास्त्रम्' इति।

नाराचास्त्रप्रयोगः— काऽपि तान्त्रिकी क्रिया अनन्तविजयाख्याच्छास्त्रादुद्धृताभिः पंक्तिभिः प्रतिपादिता जयरथेन।

द्र०- 'अनन्तविजयशास्त्रम्' इति।

नारायणः— वेदवेदाङ्गपारगः कान्यकुब्जदेशीयः सर्वतोभद्राख्यभगवद्गीताटीकायाः कर्तुः श्री रामकण्ठराजानकस्य पूर्वजो विद्वान्। यथा—

"यो नारायण इत्यभूच्छ्रुतनिधिः श्री कान्यकुब्जे द्विजः।"

(भ० गी० सं० भ०, पृ०, 405)

नारायणकण्ठः— मतङ्गतन्त्रस्य टीकाकर्तुः काश्मीरिकस्य द्वितीयरामकण्ठस्य जनकः। प्रथमस्तु रामकण्ठो नवमशताब्द्यामभूत्। यथा—

"श्रीमद् विद्यापादे नारायणकण्ठसूनुना रचिता।
वृत्तिरियं मातङ्गे काश्मीरिकरामकण्ठेन।।"

(उपोद्घात भ० गी० सं० भ०, टी०, पृ०)

प्रथमो रामकण्ठः स्पन्दाविवृत्ति-गीताभाव्यादिनिर्माता।

नासा ~ प्रणवकलाः— **यथा—**

"नासा शक्तिः।"

(तं० आ० वि०, खं० 12, पृ०, 212)

~ बीजमन्त्रः — **ईकारः। यथा—**

"नासाम्-ईकारम्।"

(तं० आ० वि०, खं० 10, पृ०, 227)

(रहस्यसङ्केतोऽयम्)

नासिका— (1) कौटिल्येन प्रसरन्ती प्राणशक्तिः। 'नस्' कौटिल्यगतौ। यथा—

"नासिका-नसते कौटिल्येन प्रवहतीति कृत्वा कुटिलवाहिनी प्राणशक्तिः।"

(शि० सू० वि०, पृ०, 68)

द्र०- (शि० सू० वृ० 3, 44)

(2) चित्तवृत्तिः। यथा—

"नसते-कौटिल्येनासाम्येन क्रोधादिवशाद् व्यहरति— इति नासा चित्तवृत्तिः।

(भ० गी० सं० पृ०, 64)

नासिक्यः— उदानाख्यस्य प्रणस्य चारे शिवयोगिजनमात्रसंवेद्यः नाडीधामविशेषो यः आगमेषु शाक्तो द्वादशान्त इति परिभाष्यते। शक्तिरत्र प्रणवकलासु नवमी कला नादान्तादुपरिव्यापिन्याश्चाधः स्थिता। यथा—

"प्राणव्याप्तौ यदुक्तं तदुदानेऽप्यत्र केवलम्।
नासाशक्त्यन्तयोः स्थाने ब्रह्मरन्ध्रोर्ध्वधामनी।।" इत्यादि
(तं० आ० 6,212)

"हृदयात् प्राणचारश्च नासिक्यद्वादशान्ततः।
षट्त्रिंशदङ्गुलो जन्तोः सर्वस्य स्वाङ्गुलक्रमात्।।"

(तदेव 6,61)

"षट्त्रिंशदङ्गुलश्चारो हृत्पद्माद्यावशक्तितः।।"
(स्व० तं०, 4,234)

याव इति यावत्। आर्षस्तकारलोपः।

"नसते कुटिलं गच्छतीति नासिकाशक्तिः, तस्या अयं 'नासिक्यः' शाक्तो द्वादशान्तः।"
(तं० आ० वि०, खं० 4/1, पृ०, 52)

शाक्त इति नवमप्रणवकलासम्बन्धीति।

"अस्य (उदानस्य) तु ऊर्ध्वधामवर्तिशक्ति द्वादशान्तमिति।"
(तदेव 4/1, पृ०, 175)

नास्तिक्यवासना— चार्वाकाणां या नास्तिक्यवासनाऽसौ पापात् पापीयसी, बौद्धार्हतादि वासनाभ्योऽपि पापतरा। चार्वाकाः प्रलयाकलत्वमवाप्यापि नवायामवान्तरसृष्टौ यदा सुषुप्तेः प्रबुद्धा भवन्ति तदा तेषां प्राक्तनी कर्मवासना तान् पुनरपि संसृति चक्रेषु योजयति। किञ्च जन साधारण धर्मलोपित्वादपि तेषां मतं पापात् पापीयस्तरम। बौद्धार्हताद्यास्त्वभिनवसृष्टिकाले श्रीकण्ठनाथस्य कृपादृष्ट्यैव मन्त्रादिपदवीं लभन्ते, नान्यथा। यथा—

"अदाढ्र्यशङ्कनात् प्राच्यवासनातादवस्थ्यतः।
अन्यकर्त्तव्यशैथिल्यात् सम्भाव्यानुशयत्वतः।।
अतद्रूढान्यजनताकर्तव्य-परिलोपनात्।
नास्तिक्य वासनामाहुः पापात् पापीयसीमिमाम्।।"
(तं० आ० 6,19-20)

निगमः— वैदिकं वाङ्मयम्। यथा—

"वेद्यं धर्माद्युपायं निश्चयं गमयतीति निगमो वेदः।"
(ई० प्र० वि० वि०, खं० 1, पृ०, 15)

निग्रहः— पिधानकृत्यम्। यथा—

"सर्गस्थापनसंहारनिग्रहानुग्रहक्रमात्।
पञ्चकृत्यानि कुर्वाणः शिवोऽहमिति विश्वसेत्।।"
(प० पं०, 24)

निग्रहकृत्यम्— (1) परमेश्वरस्यासौ लीला ययाऽसौ प्रथमं स्वं परमेश्वरत्वं निगूह्य जीवरूपतयाऽऽविर्भवति तिरोधानक्रीडया। ततश्चाधोऽधोऽवतरत्यज्ञानगहनेषु तिर्यग्योनिषु च, दीक्षतोऽपि च कदाचिद् गुरौ मन्त्रे साधनाक्रियासु चाविश्वस्ततामायाति, अविश्वासकारणाच्च गुरुं, शास्त्रं, साधनां च निन्दति। कदाचिद्बाह्यव्यवहारे दाम्भिकनीत्या साधनक्रिया आचरन्नप्यन्तस्ताः निष्फला मन्यमानो निन्दति, एकाकी सन् लौकिके व्यवहारे मग्नो भवति, परमन्यसन्निधौ साधकोचितानि भाषितानि भाषते, साधनाक्रियाश्चाऽऽपाततः कुरुते। प्राणिनस्तथा चालयन्त्येवं विधा लीलेवसर्वा शिवस्य निग्रहलीला या तस्य निग्रहकृत्यमित्युच्यते।

पारमेश्वरेषु पञ्चकृत्येष्वैतदेकं कृत्यम्। विलयकृत्यं तिरोधानकृत्यम् इत्यस्याभिधानान्तरे। यथा—

"यथा च बुद्धस्तां मूढचेष्टां कुर्वन्नपि द्विषन्।
हृद्यास्ते मूढ एवं हि प्रबुद्धानां विचेष्टितम्।।"
(तं० आ०, 14,8-9)

"ये यौष्माके शासनमार्गे कृतदीक्षाः
सङ्गच्छन्तो मोहवशाद् विप्रतिपत्तिम्।
नूनं तेषां नास्ति भवद्भानुनियोगः
संकोचः किं सूर्यकरैस्तामरसानाम्।।
ज्ञातज्ञेया धातृपदस्था अपि सन्तो
ये त्वन्मार्गात् कापथगास्तेऽपि न सम्यक्।
प्रायस्तेषां लैङ्गिकबुद्ध्यादिसमुत्थो
मिथ्याबोधः सर्पवसादीपजकल्पः।।
यस्माद् विद्धं सूतकमुख्येन तु ताम्रं
तद्यद् भूयः स्वां प्रकृतिं नो समुपेयात्।
नो तैः पीतं भूतलसंस्थैरमृतं तद्
येषां तृट्क्षुद्दुःखविबाधाः पुनरस्मिन्।"
उद्ध०- (तं० आ०14,10-12)

प्रमाणस्तुतिपद्यान्यतानि—

"यथा हि प्रकाशस्वातन्त्र्यात् प्रबुद्धोऽपि मूढवच्चेष्टते, हृदयेन च मूढचेष्टां निन्दति; तथा मूढोऽपि प्रबुद्धचेष्टां मन्त्राराधनादिकां कुर्यात् निन्देच्च। यथा चास्य मूढचेष्टा क्रियमाणा अपि प्रबुद्धस्य ध्वंसमेति, तथाऽस्य प्रबुद्धचेष्टा। सा तु निन्द्यमाना निषिद्धाचरणरूपत्वात् स्वयं च तयैव विशङ्कमानत्वादेनं दुःखमोहपङ्के निमज्जयति।"
(तं० सा०, पृ०, 126,127)

द्र०- 'तिरोधाम्'~कृत्यम् इति।
द्र०- 'पिधानम्कृत्यम्' इति।
द्र०- 'विलयकृत्यम्' इति।

(2) दम्भेन स्वात्मनः शिवभक्तियुक्तत्वस्य शिवज्ञानित्वस्य च प्रदर्शनमिति तिरोधानकृत्यमेव निग्रहकृत्याख्यम्। यतोऽनाश्वस्तः सन्नसौ मन्त्राद्युपासनापरित्यागमेव कुरुते।

यथा—

"अनाभासितरूपोऽपि तदाभासितयेव यत्।।
स्थित्वा मन्त्रादि संगृह्य त्यजेत् सोऽस्य तिरोभवः।"
(तं० आ० 13,120-121)

"कश्चिदीशेच्छया सम्यगनाश्वस्तोऽपि चेतसा।
निन्दन्नेव भजेच्चर्यां स तिरोहित उच्यते।।
निन्द्यमान महामन्त्र विद्याचार्यादिकोपजम्।
पाप्म तं पातयेद् घोरे यातनाधाम्नि सर्वथा।।"
(तं० व० धा० 3,35,37)

(3) वैष्णवादिशास्त्ररते गुरौ शैवसाधकस्य नियोजनं शिवेन तिरोधानकृत्येनैव क्रियते। यथा—

"तिरोभाव प्रकारोऽयं यत्तादृशि नियोजितः।
गुरौ शिवेन तद्भक्तिः शक्तिपातोऽस्य नोच्यते।।"
(तं० आ० 13,311)

निग्रहचिह्नम्— पिधानकृत्येन निगृहीतो जनः योगभक्तिपूजादिसाधनाः आपाततः कुर्वन्नपि हृदयेन ताः क्रियाः द्वेष्टि, केवलं तासां प्रदर्शनमात्रं करोति। यथा—

"यथा च बुद्धस्तां मूढचेष्टां कुर्वन्नपि द्विषन्।
हृद्यास्ते मूढ एवं हि प्रबुद्धानां विचेष्टितम्।।"
(तं० आ० 14,8-9)

प्रबुद्धोचितविचेष्टितं कुर्वन्नपि तदन्तर्द्विषन्नास्त इति।

निग्रहानुग्रहशक्ती— एकैव परमेश्वरस्य परमेश्वरतात्मिका पराशक्तिर्भिन्नभिन्नविलासविलसनपरा सती भिन्नभिन्नैः शब्दैर्व्यवह्रियते उपासनोपदेशादिव्यवहारे। ततो बन्धरूपविलासोल्लासनपरा सती सैव घोरतरीति, वामेति, तिरोधानरूपेति निग्रहरूपेति च कथ्यते। सैव मोक्षलीलाविलसनशीला सती शान्तेति, अघोरेति, ज्येष्ठेति, अनुग्रहरूपेति च कथ्यते। पारमेश्वर्याः शक्त्या अघोररूपतया जीवं प्रत्यऽवस्थानमेवानुग्रहशक्तिपात इति, घोरतररूपतया च विलय इति, पिधान इति, विग्रह इति च कथ्यते। ततः पशुजनसम्बद्धायाः शिवशक्तेः शान्तरूपताग्रहणमेवानुग्रहशक्तिपातो घोररूपताग्रहणमेव च पिधानकृत्यमिति। यथा संसूचितम्—

"ननु शैवी महाशक्तिः सम्बद्धैवात्मभिः स्थिता।
सत्यं साच्छादनात्मा तु शान्ता त्वेषा स्वरूपदृक्।।"
(तं० आ० 13,207)

निघण्टुः — कश्चन शैवदर्शनकोषः इदानीं यो नोपलभ्यते बीजमन्त्रकोष इवायं प्रतिभाति। यथा—

"निघण्टावपि—
'त्रयस्त्रिंशो व्यञ्जनं च द्विकुब्जः स्पर्श एव च।।' इति।"
उद्ध०- (तं० आ० वि०, खं० 2, पृ०, 145)

निजानन्दः — प्रमाणप्रमेयप्रपञ्चरहिते निजे परिमिते प्रमात्रंशमात्रे विश्रान्त्या य आनन्दः स निजानन्दः। षट्स्वानन्दभूमिकासु प्रथमाभूमिर्निजानन्दरूपा। यथा—

"निजानन्दे प्रमात्रंशामास्त्रे हृदि पुरा स्थितः।"
(तं० आ० 5,44)

नितम्बकः — बीजमन्त्राक्षरं न स्पष्टीकृतम्। यथा—
(तं० आ० वि०, खं० 12, पृ०, 201)

नितम्ब एव भवेन्नितम्बकः। स च म् इति।

द्र०- 'बीजाक्षरकोषः' ~ म इति।

नितम्बम्— साङ्केतिकं नाम मकारस्य बिन्दुतां वागतस्य। यथा—

"नितम्बम्-म्।"
(तं० आ० वि०, खं० 11/2, पृ०, 127)

नित्यं कर्म— तत् कर्म यत् समयिभिः पुत्रकैः साकैराचार्यैश्च सर्वैरपि कर्त्तव्यम्, यस्य चाकरणे प्रायश्चित्तीयता तेषां कृते। शेषवर्तनविषयमेतत् कर्म। यथा—

"नित्यं हि समय्यादीनां चतुर्णामपि नियतम्, इदं (नैमित्तिकं) तु केषाञ्चिदेव।"
(तं० आ० वि०, खं० 11, पृ०, 3)

~ साधकस्य— "सन्ध्यादि पर्वसम्पूजा पवित्रकमिंद सदा।
नित्यं नियतरूपत्वात् सर्वस्मिन् शासनाश्रिते।।"
(तं० आ० 28,5)

एतानि कर्माणि सांसिद्धिकेन निर्बीजदीक्षाभाजा चापि कर्त्तव्यानि।

द्र०- (तदेव 26,10-12)

~ शेषवृत्तौ— **सन्ध्या, पूजा, भूतदया चेति। पूजा च गुर्वग्निदेवशास्त्राणाम्। यथा—**

"तत्र नित्यो विधिः सन्ध्यानुष्ठानं देवताव्रजे।
गुर्वग्निशास्त्रसहिते पूजा भूतदयेत्ययम्।।"
(तं० आ० 26,12)

~ तारतम्यतः— **नित्य कर्मविधिः संक्षेपतोऽपि विस्तरतोऽपि च शिक्ष्यते शिष्य बुद्धयादिसामर्थ्यानुसारम्। यथा—**

"तत्रादौ शिशवे ब्रूयाद्गुरुर्नित्यविधिं स्फुटम्।
तद्योग्यतां समालोक्य विततावितताल्नाम्।।
मुख्येतरादिमन्त्राणां वीर्यव्याप्त्यादियोग्यताम्।
दृष्ट्वा शिष्ये तमेवास्मै मूलमन्त्रं समर्पयेत्।।"
(तं० आ० 26,15-16)

"योग्ये हि शिष्ये विततो विधिरुपदेष्टव्यो मुख्यो वा मन्त्रः समर्प्य; अन्यस्मिंस्तु अन्यथेति।।"
(तं० आ० वि०, खं० 10, पृ०, 334)

~ शेषवर्तनरूपम् — **दीक्षाद्यनन्तरं यावज्जीवमवश्यकर्त्तव्यानि कर्माणि। यथा—**

"तत्र नियतपूजा, सन्ध्योपासना, गुरुपूजा, पर्वपूजा, पवित्रकम् इति कर्मजातमवश्यम्भावि।"

(तं० सा०, पृ०, 179)

"तत्र नियतभवं नित्यं, तन्मयीभाव एव नैमित्तिकं, तदुपयोगि सन्ध्योपासनं, प्रत्यहमनुष्ठानं, पर्वदिनं, पवित्रकम् इत्यादि। तदपि नित्यं स्वकालनैयत्यादिति केचित्।"

(तं० सा०, पृ०, 178)

तदपीति पर्वदिनपवित्रकादिकर्मजातम्, यत् प्रतिदिनं नैव कर्त्तव्यम्।

नित्यत्वम्—

(1) कालस्पर्शरहितत्वम्। यथा—

"नित्यत्वं कालेनानवच्छेदः .....
..... कालविशेषायोगेन च नित्यत्वम्।"

(ई० प्र० वि० वि०, खं० 1, पृ०, 136)

(2) कालावच्छेदराहित्यं परमेश्वरस्य। यथा—

"नित्यभावादाद्यन्तवर्जितः .....।"

(तं० आ० 1,61)

"नित्य इत्यतीतादिकालावच्छेदविगलनात्।"

(तं० आ० वि०, खं० 1, पृ०, 99)

नित्या— (1) जगतां सृष्टिसंहारादिषु प्रचलत्स्वपि सदा स्वेन वास्तविकेन संविदाकारेणैव रूपेण सततगत्या तिष्ठन्ती सती पराशक्तिर्नित्या इत्यभिधीयते। आगमिकीयमस्याः संज्ञा।

द्र०- (तं० सा०, पृ०, 27)

द्र०- 'काली' इति।

(2) पूर्णसंवित् स्वभावस्य परमेश्वरस्य पूर्णताख्या पराशक्तिः सततं तस्य स्वभात्वेन विद्यमानतया नित्येति।

द्र०- 'ऊर्मिः' इति।

(3) अपायरहिता परमेश्वरस्य स्वभावभूता पराशक्तिः।

द्र०- (तं० सा० पृ०, 27)

द्र०- 'काली' इति।

नित्यातन्त्रम्— किमप्यागमशास्त्रम्। यथा—

नित्यातन्त्रविदः कृष्णं कार्तिकाच्चरमं दिनम्।।"

(तं० आ० 28,123)

नित्योदितः ~ शिवः— **अनस्तमितोदयस्थः उदयास्तमयरहितत्वात् सर्वदा स्वात्मविलासेन भासनशीलः, विश्वरूपः, परमेश्वरः। यथा—**

"स्वात्मानं स्वविलासेन विश्वरूपेण भासयन्।
नित्योदितः कोऽपि देवो जयत्यात्मा परः शिवः।।"

(आ० वि० 2,1)

~ मन्त्रः— **शुद्धोऽनाहतनादमयो मन्त्रः। यथा—**

"अतोऽनाहतशब्दस्य वाच्यत्वेन व्यवस्थितः।
मन्त्रो नित्योदितः शुद्धः कथितः आगमेष्वपि।।"

(पू० प्र० 1, 564)

निद्रा ~ उच्चारयोगे— **संविद्रूपतायां पूर्णतया प्रतिष्ठालाभात् प्रागभ्यासी देहतादात्म्यविगलने सत्यन्तर्मुखताया उदयेन निद्राति संविदौमुख्यमात्रत एव सुषुप्त इव जायते कञ्चित् स्वल्पमेव कालम्। तस्यासौ निद्रैव तन्नामकमुच्चारयोगसाफल्यचिह्नं चतुर्थम्। यथा—**

"गलितेदेहतादात्म्यनिश्चयेऽन्तर्मुखत्वतः।।
निद्रायते पुरा यावन्न रूढः संविदात्मनि।"

(तं० आ० 5,103-104)

"भेदाख्यमायारहिते परिपूर्णचिदात्मनि।
प्रविशेत् प्रथमं यावत् स्वबलाक्रमणक्रमात्।।
भवेन्निद्रास्य सा देहावेशशैथिल्यदायिनी।"

(मा० वि० वा० 2, 59-60)

"ततो निद्रा बहिर्मुखत्वविलयात्।"

(तं० सा०, पृ०, 40)

निमेषः— (1) सदाशिवतत्त्वम्। यत्र मायायां भूतानि निधीयन्ते भगवता तन्माया तत्त्वमत्र "इदम्" इति रूपेण यत्र निमिषति—विश्राम्यति तत् सादाशिवं पदमतएव कारणात् क्वापि निमेष इत्युक्तम्। व्याख्यातं यथा—

"मायातत्त्वे च तदा भूतानि निधीयन्ते, तच्च परमेशशक्तिरूपं (मायातत्त्वं) सदाशिवपदे इदमित्यंशस्पर्शेन विश्राम्यतीति निमेषः सदाशिवता।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 267)

"यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ।"

(स्पं० का० 1,1)

इति स्पन्दोक्त्यनुसारमेषा व्याख्येति ज्ञेयं सुधीभिः।

(2) जगतोऽन्तारूपतायां तस्यास्फुटत्वापादनस्वरूपं सादा शिवं तत्त्वम्। यथा—

"यस्य निमेषात् प्रलय .....।
इत्यत्र तु निमेषशब्देन अन्तारूपमस्फुटमुत्थापयत् सदाशिवतत्त्वम्।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 265)

(3) शक्तिसङ्कोचो येन जगतः प्रलयो भवति। यथा—

"निमेषो नाम तत्सङ्कोचः"

(शि० सू० वा०, टि०1,5)

~ कालमानम्— **अक्षिनिमीलनकालः। अष्टक्षणमितः कालः। यथा—**

"मानुषाक्षिनिमेषस्य अष्टमांशः क्षणः स्मृतः।
क्षणद्वयं तुटिर्ज्ञेया तद्द्वयं तु लवः स्मृतः।।
लवद्वयं निमेषस्तु ज्ञातव्यो गणितक्रमात्।"

(स्व० तं० 11, 201-202)

निमेषभूः— चिदभेदप्रथा स्थितिः। यथा—

"भेदासूत्रणरूपा च या उन्मेषदशा सैव चिदभेदप्रथाया निमेषभूः।

(स्पं० सं०, पृ०, 5-6)

निमेषोन्मेषशक्ती— बहिर्मुखतावभासे क्रमेण सदाशिवेश्वरतया प्रसरन्त्यौ शिवस्य शक्ती। यथा—

"एवं निमेषोन्मेषशक्ती एव सदाशिवेश्वरौ।"

(ई० प्र० वि०, खं० 2, पृ०, 195)

द्र०- 'उन्मेषनिमेषौ' ~ शक्तिद्वयम् इति।

निमेषोन्मेषौ— सदाशिवेश्वरस्थिती। यथा—

"ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिवः।"

(ई० प्र०, 3, 1-3)

नियतिः— (1) परमेश्वरकृतोऽसौ कार्यकारणभावनियमो यदनुसारं जगच्चलति जीवाश्च कर्मफलभोगं लभमानाः संसरन्ति सुचिरम्। यथा—

"नियतिर्यतः कर्मणो मूलभूमिः। कार्यकारणभावो हि ततः। तन्मूलं च कर्मवासनाविपाकत्रयम्।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 312)

"नियतिर्योजनां धत्ते विशिष्टे कार्यमण्डले।।"

(तं० आ० 9, 202)

"अस्मादेवकारणादिदमेव कार्यं भवेदिति नियममादध्यादित्युक्तम्।"

(तं० आ० वि०, खं० 6, पृ०, 160)

(2) जगद्व्यवहारस्य नियामिका तत्त्वविशेष रूपधारिणी शक्तिः। यथा—

"नियतितत्त्वं नियामिका पारमेश्वरी शक्तिः श्रुत्यादिशास्त्रप्रसरमयी।"

(ई० प्र० वि० वि०, खं० 1, पृ०, 25)

"नियतिर्निश्चितं नित्यं योजयेच्च शुभाशुभे।।"

(स्व० तं०, प० 11, 99)

(3) परिमितस्य प्रमातुर्ज्ञातृत्वे कर्तृत्वे च नियामकं तत्त्वं, येनायं प्रमातेदमेव किञ्चिज्जानाति करोति च नेदमपरं किञ्चित्, येन च सहकारिविशेषसाचिव्येनैव जानाति करोति च नान्यथेति बहुतरं नियमाकत्वमस्य तत्त्वस्य। अनेन प्रमातुः स्वान्त्र्यमप्यन्ते तिरोधीयते। यथा—

"अस्मिन्नेव कर्तृत्वामित्यत्रार्थे नियतेर्व्यापारः कार्यकारणभावेऽप्यस्या एव व्यापारः। (तं० सा०, पृ०, 82)

"..... नियतिं च नियामिकाम्।।"

(मा० वि०, वा० 1, 876)

द्र०- (तं० आ०, 9,202; तं० आ० वि० खं० 6, पृ०, 160; स्व० तं० प०, 11,99;

अ० प्र०, प०, 16; शि० सू० वा० भा०, पृ०, 44; प० प्रा०, पृ०, 8)

~ तत्प्रभुः— शिव एव मायाक्षेत्रे नियतिकृतनियमस्थापकः। स एव विद्याक्षेत्रे, शक्तिक्षेत्रे योगिसामर्थ्ये च तदुच्छेदकारी। इति स एव नियतेः प्रभुः। नियत्यनुवर्तनोल्लंघनादिषु स्वतन्त्रः शिवः। यथा—

"नियतेश्चिररूढायाः समुच्छेदात् प्रवर्तनात्।
अरूढायाः स्वतन्त्रोऽयं स्थितश्चिद्व्योमभैरवः।"

(तं० आ० 11,99)

"अतश्च पूर्णरूपायाश्चित एवात्र सर्वकर्तृत्वमित्युपपादितम्।"

(तं० आ० वि०, खं० 7/2, पृ०, 80)

नियतिकालौ ~ मातृकाक्रमे— मातृकाक्रमे चतुर्ध्वन्तःस्थेषु षट्कञ्चुकानां व्याप्तिः। तत्र नियतिकालौ न पृथग्गणितौ, नियतेः सर्वानुस्यूतत्वात् कालस्य चाकाशशक्तित्वात्। यथा—

"पञ्चकञ्चुक्यां त्वन्तस्थाः। तत्र नियतिः सर्वानुस्यूतेति न पृथग्गणनार्हा। कालस्य तु आकाशशक्तित्वात्।"

(म० मं० प० पृ०, 65)

कौलसम्प्रदायसाधनानुसारमेतदुक्तं मन्तव्यम्। परमभिनवगुप्तपादानां दृष्ट्योपासनाभेदमूलकोऽयं तत्त्वसमन्वयो वर्णैः साकमिति स्वगुरुसन्तानानुसारमेवैषोपास्तिः। तत एव क्वचित् कियतांशेन भेदोऽपि वर्तते। उक्तमेतद् यथा—

"केषुचिच्छास्त्रेषु महामाया भेदमलाभावोपचाराद् विद्यातत्त्वशेषतयैव निर्णीयते, क्वचित् पुनरज्ञानमलसद्भावोपरोधान्मायातत्त्वपुच्छतया। यथा केषुचिच्छास्त्रेषु रागतत्त्वं पुंस्येव लग्नम्, इति न पृथक् परामृष्टम्। यथा वेहैव त्रिकागमेषु नियतिकालौ न पृथङ्निरूपितौ।"

(प० त्री० वि०, पृ०, 119)

नियतितत्त्वम्— (1) ज्ञानस्य क्रियाया अभिष्वङ्गस्य (रागस्य) च कलने यत् पदे-पदे प्राकृतादिनियमबद्धत्वं पशोरदस्तस्य नियतितत्त्वम्। सर्वोऽपि मायीयः कार्यकारणभावो नियत्या नियमितः। यथा—

"इदमेवेति नियतात्कारणन्नियतं कार्यं यदर्थयते, यथा वह्नेरेव धूमः, अश्वमेधादिकर्मण एव स्वर्गादिफलम्, न सर्वस्मादित्येवं नियमेन स्वसङ्कल्पकृत कर्म प्रबन्ध समुत्थपुण्यापुण्यैः आत्मा नियम्यते येन तदस्य नियतितत्त्वम्।"

(प० सा० वि०, पृ०, 48)

"अत्रैव कस्मादभिष्वङ्ग इत्ययमर्थो नियत्या नियम्यते इति।"

(ई० प्र० वि०, खं० 2, पृ०, 209)

रागोऽपि नियत्या नियम्यते इति सिद्धयत्यनेन वाक्येन। रागस्याभिष्वङ्गरूपत्वात्।

(2) धर्माधर्मानुसारं फलभोक्तृत्वनियमनियमितत्त्वं पशोः। यथा—

"यस्याः स्वतन्त्रताख्या शक्तिः संकोचशालिनी सैव।
कृत्याकृत्येष्ववशं नियतममुं नियमयन्त्यभून्नियतिः।।"
(ष० त्रि० तं० सं०,12)

(3) शिवगतस्य पूर्णा स्वातन्त्र्यस्य परावृत्तिः पशुभावे नियतिकृतनियमबद्धता। यथा—

"स्वातन्त्र्यमेव अस्य परप्रमातुः संकुचत् नियतितत्त्वतामाभासयति, यतः कार्याकार्येषु नियमाधानाद् विशिष्टे कार्ये विशिष्टं कारणमेव आदध्यान्नानियतमिति।"
(ष० त्रि० त० सं० वि०, पृ०, 9)

"तथा सर्वात्मकत्वधर्मविस्मृतेः सर्वत्र नियतकार्यकारणभावाख्यात्मकेन नियतिनाम्ना।"
(स्पं० वि०, पृ०, 135)

~ तदधिष्ठातारः— **वामदेवादयो रुद्राः। यथा—**

"नियतितत्त्वस्थानां वामदेवादीनाम्।"
(तं० आ० वि०, खं० 4/1, पृ०, 134)

~ तदुपादानम्— **कलैव।**

द्र०- 'विद्योपादानम्' इति।

नियतिशक्तिः — **(1) नियतितत्त्वरूपतयावभासमाना, कर्मफलभोगनियमानुसारं च जगत् प्रचालयन्ती, पारमेश्वरी शक्तिः।**

(2) पारमेश्वर्या क्रिया शक्तेः शेषरूपैव तस्य नियतिशक्तिरिति नासावन्तरङ्गशक्तिषु पृथग् गणिता। यथा—

"सा नियति प्रमातुर्धर्मः। तच्छक्तिस्तु क्रियाशक्तिशेषरूपा भगवत एव।"
(ई० प्र० वि० वि०, खं० 3, पृ०, 290)

~ आधारतः— **पारमेश्वरी क्रियाशक्तिरेव नियतेराधारः तस्यास्तच्छेषत्वेनोक्तत्वादुपरि।**

नियत्यनुवर्तनम्— **(1) पार्थिवप्रभृतिष्वण्डेषु सृष्टिसंहारादीन् प्रभुर्नियत्यनुसारमेव कुरुते। तत एव श्रीकण्ठाद्यवान्तररूपतया तदनुवर्तनशीलः एव सन् पञ्चकृत्यानि कुरुते। यथा—**

"नियतिं कर्मफलयोराश्रित्यैष महेश्वरः।
सृष्टिसंस्थितिसंहारान् विधत्तेऽवान्तरस्थितीन्।"
(तं० आ० 14,2-3)

ततो ब्रह्मविष्णुरुद्राः नित्यनुसारमेव पञ्चकृत्यनि कुर्वन्ति यथायथम्।

(2) नियतिमनुवर्तमानः एव शिवः पशुरूपतायां सुखदुःखादिकं कर्मफलं भुञ्जानोऽनवरतं संसरति। यथा—

"नियत्यैव यदा चैष स्वरूपाच्छादनक्रमात्।।
भुङ्क्ते दुःखविमोहादि तदा कर्मफलक्रमः।"
(तं० आ० 14,5-6)

नियत्युल्लङ्घनम्— **शिवः नियत्यनुवर्तने इव तदुल्लङ्घनेऽपि स्वतन्त्रः। एवमेव नियतितत्त्वादुत्तीर्णो योग्यपि तदनुवर्तनोल्लङ्घनयोः स्वतन्त्रः।**

निरञ्जनः— **लोलीभूतशक्तित्रयात्मके औकारव्यंग्ये पदे समावेशभाग्योगी निरञ्जनः, निरञ्जनानाम्न्यां शक्तौ समाविष्टत्वात्। यथा—**

"लोलीभूतमतः शक्तित्रितयं तत्त्रिशुलकम्।
यस्मिन्नाशु समावेशाद् भवेद् योगी निरञ्जनः।।"
(तं० आ० 3,108)

निरञ्जनतत्त्वम्— **(1) अञ्जनं व्यक्तीकरणम्। तद्रहितं न केनचिदपरेणाञ्जनीयं शक्तितत्त्वम्। तस्य स्वयमेव प्रकाशमानत्वात्। सकारात्मकं यच्चान्द्रं तेजस्तदपि निरञ्जनं तत्त्वम्। यथा—**

"बहीरूपतया समुल्लासितत्वात् क्रियाशक्त्यात्मकम्, अत एव विश्वमयं यत् परमापूरकं धाम-सकारात्म-चान्द्रं तेजस्तन्निरञ्जनम्।"
(तं० आ० वि०, खं० 2, पृ०, 171)

(2) औकारात्मिका शक्तिर्निरञ्जनम्। अनया शिवोऽञ्ज्यतेऽभिव्यज्यते। शक्त्या शिवस्याञ्जनं न शक्तेः केनाप्यन्येन। ततोऽसौ निरञ्जनम्, सततमभिव्यक्तैव नाभिव्यंग्येति तात्पर्यम्। यथा—

"परः प्रकाशः, शक्त्या अञ्ज्यतेपरिमितान् प्रमातृन् प्रति व्यक्तीक्रियते। ..... शक्तिः पुनरभिव्यक्तैव तदञ्जने न कोऽप्युपायः। इति न तस्याः केनचिदप्यञ्जनं सम्भेवेद्। इति निरञ्जनं तत्त्वम्।"
(तं० आ० वि०, खं० 2, पृ०, 112-113)

(3) पराशक्तिः। इच्छादीनां शक्तीनामेषणीयादिनाञ्जनं सम्भवति। परं परस्याः पूर्णायाः सर्वशक्तिसंघट्टरूपायाः अञ्जनं केन भवेदिति निरञ्जना सा। यथा—

"एतत् त्रितयमैक्येन यदा तु प्रस्फुरेत्तदा।।
न केन चिदुपाधेयं स्वस्वविप्रतिषेधतः।"
(तं० आ० 3,107-108)

"..... क्रियादेवी निरञ्जनम्।।"
उद्ध०- (तं० आ० वि०, खं० 2, पृ०, 114)

निरञ्जनम् ~ बीजम्— **(1) औकार इति। यथा—**

"निरञ्जनमिदं प्रोक्तं गुरुभिस्तत्त्वदर्शिभिः"
(तं० आ० 3,105)

"औकारलक्षणं चतुर्दशं धाम निरञ्जनं चोक्तम्।"
(तं० आ० वि०, खं० 3, पृ०, 112)

(2) शक्तिमतः शिवस्याभिव्यञ्जिका शक्तिः, सा पुनः स्वयंस्वेनैव प्रकाशेनाभिव्यक्ता सती न केनचिदपरेणाञ्ज्यते। ततः औकाराख्यं परमेश्वरस्य शाक्तं वपुर्निरञ्जनमिति। यथा—

"यथालोकेन दीपस्य किरणैर्भास्करस्य च।
ज्ञायते दिग्विभागादि तद्वच्छक्त्या शिवः प्रिये।।"

इत्याद्युक्त्या शक्तिमान्परः प्रकाशः, शक्त्याऽञ्ज्यते ... .शक्तिः पुनरभिव्यक्तैव .....न तस्याः अपिकेनेनचिदञ्जनं सम्भवेत्।"

(तदेव, पृ०, 112-113)

"निरञ्जनं परं धाम तत्त्वं तस्य तु साञ्जनम्।।
क्रियाशक्त्यात्मकं विश्वमयं तस्मात्स्फुरेद्यतः।"

(तं० आ० 3,171-172)

निरधिकाराः ~ पुत्राः (कौले)— **मच्छन्दनाथस्य ते शिष्या ये नैव पुत्रक्रमेण न चापि शिष्यक्रमेण सम्प्रदायप्रसरकर्तारः। यथा—**

"साधिकारं राजपुत्रषट्कमभिधाय निरधिकारमपि अभिधत्ते"

(तं० आ० वि०, खं० 11/2, पृ०, 30)

ते च भट्टः, इन्द्रो, वल्कलो, अहीन्द्रो, गजेन्द्रो, महीधरश्चेति। यथा—

"भट्टेन्द्रवल्कलाहीन्द्रगजेन्द्राः समहीधराः।"

(तं० आ० 29,41)

निरात्मा— पुंस्तत्त्वादूर्ध्वं निष्क्रान्तः विज्ञानाकलपदभाक् प्राणी। यथा—

"भूतभावविनिर्मुक्तस्तत्त्वधर्मकलोज्झितः।।
मलधर्मैकयुक्तात्मा मायाधर्मतिरस्कृतः।
निरात्मा तु तदा ज्ञेयः .....।।"

(स्व० तं० 11, 87-88)

"एवंभूतो निरात्मा आत्मनः पूर्वोक्तपाशशतवलितात् पुंस्तत्त्वलक्षणात् स्वभावात् निष्क्रान्तः परमेशशास्त्रदृशा अभ्यस्तमायापुंस्तत्त्वविवेकज्ञानो विज्ञानाकल इत्यर्थः।"

(स्व० तं० उ० 11, पृ०, 61)

निरानन्दः— प्रमाणप्रमेयप्रपञ्चरहितायाः केवलायाः परिमितप्रमातृसंविदो यो प्रमेयादिरहितता सैव शून्यता। तस्यामेव विश्रान्त्या यः आनन्दोऽसौ निरानन्दः। द्वितीयोऽयमानन्दभूमिकासु षट्सु। यथा—

"शून्यतामात्रविश्रान्तेर्निरानन्दं विभावयेत्।।"

(तं० आ० 5,44)

"निजात् प्रमातृसंमतादानन्दात् निष्क्रान्तं दशाविशेषं विभावयेत।"

(तं० आ० वि०, खं० 3, पृ०, 350)

जयरथकृतोऽन्यो व्याख्यांशस्तु चिन्त्य एव। तत्र निजानन्दनिरानन्दयोरेकीकार इव कृतः प्रतिभाति। मूलग्रन्थे प्रोक्ताः निरानन्दस्य विशेषताः निजानन्दे योजितास्तत्र। यथा—

"संविदेकात्मनि शून्यतामात्रे विश्रान्तिमाश्रित्य प्राणाद्युदयविश्राम-

धामनि 'हृदि' विषये, निरुपाधित्वात् स्वभावभूत आनन्दो यस्यैवं विधे प्रमेयाद्यंशान्तरापेक्षया प्रमात्रंशमात्रे स्थितः।"

(तं० आ० वि०, खं० 3, पृ०, 350)

शून्यतामात्रविश्रान्त्या तु निरानन्दस्याभिव्यक्तिरभिप्रेता तन्त्रालोककर्तुर्न पुनर्निजानन्दस्येति विमृष्टव्यं सुधीभिः।

द्र०- (उपरि तं० आ० 5,44)

निराभासः — सृष्टेः प्राक्क्षणे केवलः शिव एव। सर्वेऽप्याभासाः सृष्टा एव, यतस्ततः कृत्रिमाः। एते हि शिवेन स्वशक्त्याऽऽभासिताः। स तु स्वयं प्रकाशो, न केनाप्याभासितः। अतोऽसौ निराभासः। सृज्यमानस्यैवाभासरूपता परिभाषिता शैवदर्शने न नित्यसिद्धस्य स्वप्रकाशस्य शिवस्य। सङ्केतितमेतद् यथा—

"निराभासो ह्यसौ। तस्य हि सर्वमाभासते। न तु कस्यचित् सः।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 19)

"यथार्करश्मिसंयोगात्मकलं प्रसरेत्क्षणात्।।
शिवशक्त्या तथात्मा वै गृहीतः सर्वतः शिवः।
सार्वज्ञ्यादिगुणैर्युक्तो भवत्येव शिवो यथा।।
निराभासः परं शान्तो ह्यप्रतर्क्यो ह्यनुत्तमः।"

(ने० तं० 22,54-56)

"नाहमस्मि न चान्योऽस्ति निराभासस्तदा भवेत्।
सावस्था परमा प्रोक्ता शिवस्य परमात्मनः।।"

(ने० तं० 8,39)

अहमिति जीवरूपः पशुरिति तात्पर्यम्।

निराभासम् ~ पदम्— **शाम्भवोपायस्थस्य योगिनः स्थितिः। स्वेनैव प्रकाशेन प्रकाशमाना सर्वेभ्योऽप्याभासेभ्यः समुत्तीर्णा स्थितिः। यथा—**

"नोर्ध्वे ध्यानं प्रयुञ्जीत नाधस्तान्न च मध्यतः।
नाग्रतः पृष्ठतः किञ्चित् पार्श्वयोरुभयोरपि।।
नान्तःशरीरसंस्थाने न बाह्ये भावयेत् क्वचित्।
नाकाशे बन्धयेल्लक्ष्यं नाधो दृष्टिं निवेशयेत्।।
न चाक्ष्णोर्मीलनं किञ्चिन्न किञ्चिद् दृष्टिबन्धनम्।
अवलम्बं निरालम्बं सालम्बं न च भावयेत्।
नेन्द्रियाणि न भूतानि शब्दस्पर्शरसादि यत्।
सर्वं त्यक्त्वा समाधिस्थः केवलं तन्मयो भवेत्।।
सावस्था परमा प्रोक्ता परस्य परमात्मनः।
निराभासं पदं तत्तु तत्प्राप्य विनिवर्तते।।"

(ने० तं० 8,41-45)

द्र०- 'शाम्भवोपायः' इति।

निरोधः— पूजाङ्ग विशेषः। यथा—

"निरोधस्तत्रैवाविचलत्वेनावस्थानम्।"

(तं० आ० वि०, खं० 1/2, पृ०, 22)

निरोधिका ~ प्रणवकला— (1) त्रिकप्रक्रिया— सम्बन्धिन्यां प्रणवोपासनायां यस्यां कलायां परनादाख्यो ध्वनिर्नादान्ततामनुप्राप्य स्वयं प्रशाम्यति सा कला निरोधिनीति निरोधिकेति वोच्यते; तस्याः सर्वदेवनिरोधकत्वात्। यथा—

"ध्वनिध्वगतो यत्र विश्राम्यत्यनिरोधितः।
निरोधिनीति विख्याता सर्वदेवनिरोधिका।।"

(वि० भै० 3, पृ०, 38)

विश्राम्यति निरोधितः इति वा पाठो भवेत् साधुः।

(2) निरोधकत्वं चानधिकारिणामुपरिगमनरोधकत्वम्।

(3) ब्रह्मादीन् कारणान् रुणद्धीति रोधिका। यथा—

"हेतून ब्रह्मादिकान् रुन्द्धे रोधिकां तां त्यजेत्ततः।
निरोधिकामिमां भित्त्वा सादाख्यं भुवनं परम्।।"

(तं० आ० 8,386)

तान् ब्रह्मादीन् सदाशिवपदादधः एव स्थापयति नियतं कालं यावदिति।

द्र०- **'निरोधिनी'** इति।

निरोधिनी ~ प्रणवकला— (1) अर्धचन्द्रादुपरि वर्तमाना प्रणवकला उपासनाक्रमे। यथा—

"पञ्चैता रोधिकास्ततः" (तं० आ० 8, 383)

"तत इति अर्धेन्दोरप्यूर्ध्वम्।"

(तं० आ० वि०, खं० 5, पृ०, 251)

(2) निरोधिकाख्या प्रणवकला। तस्यां पूर्णताविमर्शात्माऽनाहतो ध्वनिर्निरुद्धो भवति, स्वयमेव विश्रान्तो भवति। यथा—

"ध्वनिरध्वगतो यत्र विश्राम्यत्यनिरोधितः।
निरोधिनीति विख्याता सर्वदेवनिरोधिका।।"

(ने० तं० 21, 64)

"विश्राम्यति निरोधितः" इत्येव वा शुद्धः पाठोऽत्र भवेत्।

द्र०- **'निरोधिका'** इति।

(3) लिपिरूपतायां तावद् वेद्यात्मक कौटिल्यविगमे तत्संस्कारशेषता रेखात्मिका निरोधिका निरोधिनी वेति कला। यथा—

"वेद्यकौटिल्यविगमे स्पष्ट रेखात्मिका निरोधिका। मितयोगिनां नादानुप्रवेशस्य इतेरषां तु भेददशावेशस्य निरोधात् तदाख्या।"

(वि० भै० उ०, पृ०, 5)

लिप्याकारदृष्ट्या व्याख्यानमेतत्। अर्धचन्द्रोपर्यसौ ऋजुरेखाकारतया लिख्यते'।' इत्येवम्।

द्र०- **'निरोधिका'** इति।

"निरोधयति देवान्सा ब्रह्माद्यांस्तु वरानने।
निरोधिनीति विख्याता .....।।"

(स्व० तं० 10,1223)

~ तत्कलाः— (1) ताः पञ्च। यथा—

"रुन्धनी रोधनी रोद्धी ज्ञानबोधा तमोपहा।
एताः पञ्चकलाः प्राहुर्निरोधिन्यां गुरूत्तमाः।।

(तं० आ० 8,384)

नासां पृथक्-पृथग् लक्षणानि क्वापि लभ्यन्ते। परयोगिभिरेव साक्षात्कार्याः एताः कलाः।

द्र०- (ने० तं० 22, 39-40)

निरोधी ~ प्रणवकला— असौ कला यस्यां सदाशिवदशोचितो विश्वात्मता विमर्शः स्वयमेव निरुद्धो भवति, या च कला ब्रह्मादीनां परविमर्शाख्ये परे नादे प्रवेशं निरुणद्धि। षष्ठीयं कलाऽऽरोहक्रमेण। यथा—

"अर्धचन्द्रो निरोधी च नादो नादान्त एव च।"

(ने० तं० 22, 21)

द्र०- **'निरोधिका'** ~ प्रणवकला इति।

निर्नाम— परत्रिकात्मकमनुत्तरं परतत्त्वम्।

द्र०- **'त्रिकं'** ~ परम् इति।

निर्बीजः ~ उपासकः— गुरुणा निर्बीजदीक्षया संशोधितसकलमलकलापः साधकः।

~ शेषवृत्तिरहितः— न हि तेन किमपि कर्त्तव्यशेषतया करणीयं भवति। शेषवृत्तिस्तु समयिप्रभृतीनामेव कृते उपदिष्टा न निर्बीजसाधकस्य कृते। यथा—

"यः सर्वथा परापेक्षामुज्झित्वा तु स्थितो निजात्।
प्रत्ययाद् योऽपि चाचार्यप्रत्ययादेव केवलात्।।
तौ सांसिद्धिकनिर्बीजौ को वदेच्छेषवृत्तये।"

(तं० आ० 26,9-10)

केवलं शिवमयताया रसास्वादनं गुरुपूजादि च तैर्विधीयते प्रारब्धान्तम्, परम्परानुसारं च नित्यनैमित्तिकं कर्म। यथा—

"क्रमात्तन्मयतोपायगुर्वर्चनरतौ तु तौ।
तत्रैषां शेषवृत्त्यर्थं नित्यनैमित्तिके ध्रुवे।।"

(तदेव, 26,10)

~ शिष्यः— भोगवासनारहितो मुमुक्षुः शिष्यः।

द्र०- **'पुत्रकः'** इति।

निर्बीजकरणम्— **शास्त्रविधिमर्मज्ञः सामर्थ्यवान् गुरुर्दीक्षाविधौ शाल्यादिबीजानि निर्बीजताकरैः रहस्य-मन्त्रैर्यदाभिमन्त्रयते, ततस्तानि समुचिते काले समुचितेन विधिना समुचितायां भूमावुप्तान्यपि नाङ्कुरं जनयन्ति। एवमेव शिष्सस्य मलमायाकर्माण्यपि फलदानसामर्थ्यहीनानि सम्भवति समर्थेन विधानज्ञेन च गुरुणा कृतेन निर्बीजीकरणमन्त्रप्रयोगेण। तदेजन्निर्बीजकरणं कर्म दीक्षा-विधौ। यथा—**

"उप्तं नैतत् प्ररोहाय तेनैव प्रत्ययेन तु।
मलमायाख्यकर्माणि मन्त्रध्यानक्रियाबलात्।।
दग्धानि न स्वकार्याय निर्बीजप्रत्ययं त्विमम्।"

(तं० आ० 20,5-6)

कर्मणां निर्बीजतायाः प्रत्यायकं प्रमाणमित्यर्थः।

द्र०- निर्बीजदीक्षा' इति।

निर्बीजदीक्षा— **सुसमर्थेन गुरुणा मन्त्रप्रयोगविशेषतः क्रियमाणाऽसौ दीक्षा यया शिष्यस्य संसृतिबीजानां दाहो भवति, 'प्रारब्धान्ते च विनायासमसौ मुक्तो भवति।**

द्र०- निर्बीजकरणम्' इति।

~ तत्पात्रभूताः — **ये योगाद्यभ्यासाक्षमाः शिष्यास्तेषां मुक्तिलाभाय करुणावशीकृतो गुरुर्निर्बीजदीक्षाकर्माचरति येन तेऽनायासमेव मुचयन्ते। यथा—**

द्र०- अत्रैव 'विशेषरूपा' **इति।**

~ विशेषरूपा— **(1) असौ दीक्षा यया गुरुः शिष्यस्य समयाचारपाशानपि शोधयति, अतीतानागतप्रारब्धकर्माणि च सममेव संशोध्य शिष्यं सद्य एव स्थूलसूक्ष्मकारणदेहेभ्यो विमोच्य पृथिवीप्रकृतिमायाऽऽवरणानां पारं नीत्वा शक्त्यावरणे उत्तरोत्तरमारोप्य तत्कालमेव शिवभावे प्रतिष्ठापयति। एषा दीक्षैव सद्यो निर्वाणदा दीक्षेति च कथ्यते। इयमासन्नमरणस्यैव शिष्यस्य विधीयते, न प्रारब्धभोगमध्यस्थस्येति नियमः। अस्यां संसृतिबीजानामपि नाशो भवति। ततः एवेयं निर्बीजा। यथा—**

"समयाचारपाशं तु निर्बीजायां विशोधयेत्।।
दीक्षामात्रेण मुक्तिः स्याद्भक्तिमात्राद्गुरोः सदा।
सद्योनिर्वाणदा दीक्षा निर्बीजा सा द्वितीयिका।।
अतीतानागतारब्धपाशत्रयवियोजिका।
दीक्षावसाने शुद्धिः स्याद्देहत्यागे परं पदम्।।"

(स्व० तं० 4, 147-149)

द्र०- (तं० आ० 15, 31-33)

"मुमुक्षुर्द्विविधः प्रोक्तो निर्बीजो बीजवान् पुनः
बालबालिशवृद्धस्त्री भोगभुग् व्याधितात्मनाम्।।
एषां निर्बीजिका दीक्षा समयादिविवर्जिता।"

(स्व० तं० प० 4, 87-88)

भोगभुगिति सम्राट् प्रभृतिः। न हि ते समयादि परिपालयितुं शक्ताः। मोक्तव्याश्च ते शिवानुग्रहपात्रभूतत्वेन। ततो निर्बीजदीक्षया मोक्तव्याः गुरुणा।

~ सामान्यरूपा— **शाल्यादिबीजैः साकं शिष्येऽपि विधीयमाना सप्रत्यया दीक्षा यया बीजान्यङ्कुरजनना-समर्थतां यान्ति, शिष्यस्यापि कर्माणि जन्मप्रदानेऽसमर्थतां यान्ति। उभयोरपि स्वकार्यकरणसामर्थ्यं दह्यते। यथा—**

"द्वयोरप्येषा दीक्षा निर्बीजा स्वकार्यकरणसामर्थ्य-विध्वंसिनी भवति। स्थावराणामपि दीक्ष्यत्वेनोक्तत्वात्।"

(तं० सा०, पृ०, 164)

निर्बीजसमाधिः— **नासौ सुषुप्तिप्रकारतया गणनीया, अपि तु तुर्यप्रकारमध्ये एव अन्ये प्रकाराः सुषुप्तेरेव सोपानमयाः। यथा—**

"..... चतुर्विधसम्प्रज्ञातयोगस्वरूपमुक्तम्। ततोऽपि शून्यभूमौ विचित्रप्रकारायां विरामप्रत्ययाभास(भ्यास)-योगे तारतम्येनासम्प्रज्ञातयोगस्वरूपम्। इयति सबीजावस्था, तुर्यभूमौ तु निर्बीजः समाधिरिति।"

(ई० प्र० वि० वि०, खं० 2, पृ०, 307)

निर्मर्यादशास्त्रम्— **किमप्यागमशास्त्रम्। यथा—**

"श्री वीरावल्यमर्यादप्रभृतौ शास्त्रसञ्चये।"

(तं० आ० 29,177)

अमर्याद इति संकेततो निर्मर्याद इति वेद्यम्। अन्यत्र तथैवास्य नामोल्लेखात्।

द्र०- (तं० आ० 15, 66; 26, 44)

"श्री निर्मर्यादशास्त्रेऽपि तदित्थं सुनिरूपितम्।
धारादेश्च विशेषोऽस्ति वीरसाधकसम्मतः।।
रणरेणुर्वीरजलं वीरभस्म महामरुत्।
श्मशानाण्यगगनं चन्द्रार्कौ तदुपाहितौ।।
आत्मा निर्धूतनिःशेषविकल्पातङ्कसुस्थितः।
स्नानार्चादावित्युपास्यं वीराणां विग्रहाष्टकम्।"

(तं० आ० 15,66-68)

निर्माणम्— **(1) भगवतः स्वातन्त्र्यशक्त्या तथा-तथाऽवभासनमेव निर्माणम्, नाविद्यमानस्य विद्यमानताकरणम्। यथा—**

"निर्माणशक्त्या निर्मीयमाणस्यावभासनैव निर्माणम्।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 28)

(2) असङ्कुचितात् स्वस्वरूपात् पृथक्कृत्य तथा-तथा-संकोचेनावभासनम्। यथा—

"..... संकोचेनावभासनमेव भगवतः स्वात्मनि तन्निर्माणमुच्यते।"

(ई० प्र० वि० वि०, खं० 1, पृ०, 286)

(3) अन्तरहन्तायां विद्यमानस्य बहिरिदन्तयावभासनम्। यथा—

"बाह्यतावभासनमेव निर्माणम्।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 190)

निर्वाणदीक्षा— उद्यमाख्येनेच्छा शक्तिप्रयोगात्मनोपायेन शिवेन साकमात्मनोऽभेदस्य साक्षात्कारः।

द्र०- 'आत्मनो ग्रहः' इति।

निर्वाणम्— मोक्षः। स्वस्वभावे स्थितिः। द्वैतप्रत्ययस्य लयः। शैवपरम्परानुसारमेषा व्याख्या। मूलतो बौद्धदर्शने आलयविज्ञानपरम्परायाः समुच्छेद एव निर्वाणम्, दीपज्योतिषो निर्वाणवत्। यथा—

"निर्वाणं निर्वृतिद्वैतप्रत्ययलक्षणक्षोभपरिक्षयात् आत्यन्तिकी-प्रशान्तिः संविदः स्वस्वभावव्यवस्थितिः।"

(स्पं० वि० पृ०, 97)

निर्वाणपदं हि मूलतः आलयविज्ञानपरम्पराख्यऽयोतिषः समाप्तिरित्यत्रैवार्थविशेषे बौद्धैः प्रयुक्तः सन् पश्चात् सामान्येन मोक्षार्थे। प्रयुक्तः सर्वैराचार्यैरर्थपरिवृत्तिनियमानुसारम्।

निर्वाणयोगोत्तरम्— कोऽपि दर्शनशास्त्रग्रन्थः। यथा—

"हिमवति गङ्गाद्वारे
वाराणस्यां कुरौ प्रयोगे वा।
वेश्मनि चण्डालादेः
शिवतत्त्वविदां समं मरणम्।।
इति श्री निर्वाणयोगोत्तरे।"

(प० सा० वि०, पृ०, 160)

निर्विकल्पदशा ~ परयोगिदृष्टौ— पशोर्या निर्विकल्पसाक्षात्कारावस्था, सापि योगिजनदृष्ट्या स्वभावतः शाम्भवी दशा, परं पशु प्रमातर्युदिता सती परिमितत्त्वेन नासौ मोक्षप्रदेति न तस्या मोक्षोपायता। यथा—

"पशोर्वैया विकल्पा भूर्दशा सा शाम्भवी परम्।
अपूर्णा मातृदौरात्म्यात् तदपाये विकस्वरा।।"

(तं० आ० 1, 216)

निर्विकल्पकम् ~ ज्ञानम्— (1) इन्द्रियार्थ-सन्निकर्षमात्र-जन्यं, बुद्धिकृतपदपदार्थविमर्शरहितम्, स्वलक्षणाभासमात्रम् अभिलापस्पर्शहीनं मूकबधिरप्रायोचितं लोकव्यवहारनुपयोगि वस्तुमात्रप्रकाशात्मकं ज्ञानम्। यथा—

"निर्विकल्पं चान्धमूकबधिरप्रायं (ज्ञानम्)।"

(ई० प्र० वि०, खं० 1, पृ०, 61)

~ प्रमाणम्— (2) नैयायिका निर्विकल्पस्य ज्ञानस्य विकल्पज्ञानापेक्षयैव प्रामाण्यं स्वीकुर्वते न स्वतः। परं शैवा निर्विकल्पस्यैव मुख्यं प्रामाण्यं प्रतिपादयन्ति, यतो हि निर्विकल्पेनानुभूतमेव वस्तुजातं पश्चाद् विकल्पज्ञानेन निश्चीयते। ततो विकल्पस्य प्रामाण्यं निर्विकल्पज्ञानोपजीवि, निर्विकल्पस्य तु स्वत एव। यथा—

*"विकल्पापेक्षयामानमविकल्पमिति ब्रुवन्।
प्रत्युक्त एव सिद्धं हि विकल्पेनानुगम्यते।।"*

(तं० आ० 1, 180-181)

"तस्य गृहीतग्राहकत्वात् स्वात्मन्येव प्रामाण्यं नास्ति इति कथमन्यस्यापि प्रामाण्ये निमित्ततां यायात्।"

(तं० आ० वि०, खं० 1, पृ०, 211)

"स्वलक्षणं तु तदाभाससामानाधिकरण्याभासरूपमाभासान्तरम् एकमन्यदेव, तत्र च पृथगेव प्रमाणम्। तत् परं तेष्वाभासेषु गृहीतग्राहि न प्रमाणमित्यग्रे भविष्यति।"

(ई० प्र० वि०, खं० 2, पृ०, 71-73)

~ वस्तुप्रकाशकम्— निर्विकल्प एव ज्ञाने विषयस्य स्फुरत्तया तेनैव तस्य सिद्धिर्न सविकल्पेन, तस्य वस्तुशून्यत्वात्। "शब्दज्ञानानुपातीवस्तु शून्यो विकल्पः" इति तल्लक्षणात्। सिद्धिश्चाभासमानता। यथा—

"अविकल्पात्म संवित्तौ या स्फुरत्तैव वस्तुनः।
सा सिद्धिर्न विकल्पात्तु वस्त्वपेक्षाविवर्जितात्।।"

(तं० आ० 1, 182-183)

"आभासवादे ह्याभासमानतैव सिद्धिः।
.....
सर्वो विकल्पः स्मृतिः .....
विकल्पानां वस्त्वनपेक्षित्वम्।"

(तं० आ० वि०, खं० 1, पृ०, 213)

~ विकल्पाधारभूतम्— "अथ ब्रूयात् परो यद् इन्द्रियज्ञानेन प्रकाशनीयं स्वलक्षणं तत् कथं विकल्पः स्पृशेदिति। भवेदेवं यदि विकल्पो नाम स्वतन्त्रो भवेत्। यावता प्रमातुरसौ व्यापारः, प्रमाता च पूर्वानुभवान्तः स्वसंवेदनरूपः, तदस्य चायमेव पूर्वानुभवसंस्कारो यद् विकल्पनव्यापार कालेऽपि पूर्वानुभवात्मत्वनमुज्झन्नेवास्ते। ततः पूर्वानुभवो यावत् स्वलक्षण, प्रकाशनात्मा, तावत् पूर्वानुभवतादात्म्यापन्न प्रमातृतत्त्वव्यापारोऽपि विकल्पस्तद्विषय एव।"

(ई० प्र० वि०, खं० 2, पृ०, 40-41)

~ विकल्पेऽनुप्रविष्टम्— ज्ञातो घट इति विकल्पज्ञानं तु गृहीते एव विषये भवति। परं घटं जानामि पश्यामि इत्यादि विकल्पाः निर्विकल्पमेलनेनैव सम्भवन्ति, यतो गृह्यमाणता। विषयस्यत्र प्रकटीभवति, सा च निर्विकल्पे एव सम्भवति। तेन संस्कारतस्त मेलनमत्र विकल्पके ज्ञाने। यथा—

"गृहीतमिति सुस्पष्टा निश्चयस्य यतः प्रथा।
गृह्णमीत्यविकल्प्यैक्यबलात्तु प्रतिपद्यते।।"

(तं० आ० 1, 181-182)

"यत्तु गृह्णमीति प्रतिपद्यते तद्दृश्य-विकल्प्यार्थैकीकारादिना निर्विकल्पकैकात्म्यावलम्बनबलात्।"

(तं० आ० वि०, खं० 1, पृ०, 212)

~ शुद्धविद्यात्मकम् — सदाशिवेश्वरदशाप्रायत्वात्तद् भेदाभेददशात्मकम्। यथा—

"मायापदे तु सङ्कुचितस्वभावः पशुः, तदस्य मनः समुल्लासावसरे विकल्पभूमिकायां स्फुट उल्लासः। ऐन्द्रियके निर्विकल्पके सदाशिवेश्वरदशाभ्युदयात्।"

(ई० प्र० वि०, खं० 2, पृ०, 39)

द्र०- 'निर्विकल्पबोधः' ~ शिवादिमयः इति।

निर्विकल्पबोधः— वस्तुनः स्वलक्षणात्मकस्य स्वरूपस्याभासो नामरूपारोपणाभासरहितः, बुद्धिकृतकल्पनारोहणशून्यश्च।

द्र०- 'स्वलक्षणं' ~ ज्ञानम् इति।

~ ईश्वरदशात्मकः— **वस्तुत ईश्वरदशैवासौ, परं केवलं योगिभिरेव तथानुभूयते। यथा—**

"तस्य हि सा पूर्वभाविनी निर्विकल्पदशा यस्यामैश्वरो भावः इत्युक्तं प्राक्।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 314)

पूर्वभाविनीति विकल्पदशापेक्षया। असौ क्षणिकेश्वरतोन्मेषदशा न तथा स्पष्टमनुभूयते साधारणेन प्राणिना। सावधानेन पुनर्योगिना तथा साक्षात्क्रियत एव।

द्र०- ~ 'शिवादिमयः' इति।

~ शिवादिमयः— **एष खलु सिद्धान्तो यत् सावधानेन सूक्ष्मतरविश्लेषणेन निर्विकल्पे ज्ञाने शिवसदाशिवेश्वरविद्यादशानां प्रकाशनं भवतीति। यथा—**

"एवं स्थिते बाह्यताध्यवसायरूपायाः प्रमाया इन्द्रियव्यापारस्य चान्तरालवर्तिनी या शिवसदाशिवेश्वरविद्यारूपा निर्विकल्पानुभवदशा .....।"

(ई० प्र० वि० वि०, खं० 1, पृ०, 73)

साक्षादिन्द्रियार्थसन्निकर्षादनन्तरभाविनी बौद्धायाः शब्दानुविद्धायाश्च पूर्वमवभासमानाः काश्चन संवेदन दशाः योगिजनैः शिवादिविद्यान्ततया साक्षादनुभूयन्त इति तात्पर्यम्।

निर्विकल्प शब्दना—

वर्णमन्त्रादिमयी संवृता शाब्दीभावना। यथा—

"संवृता हि शब्दभावना प्रसारितां शब्दभावनां विविधकल्पनारूपामपेक्ष्य तथाभूतवैविध्यकल्पनवैकल्यान्निर्विकल्पेत्युच्यते।"

(ई० प्र० वि० वि०, खं० 2, पृ०, 240)

निर्व्युत्थान समाधिः — सर्वस्मिन् करणव्यापारे प्रचलत्येव शिवयोगी सततगत्याः प्रचलतो व्यवहारजालस्यान्तः सकलव्यवहारप्राणप्रदं यत-तत् संविद्रूपमहंविमर्शात्मकमाधारभूतं केन्द्रभूतञ्च पदं तस्यैव यदा सम्यङ् निभालनं कुरुते, तदासौ व्युत्थानेऽपि समावेशभागेव भवति। स एष सततगत्या प्रचलन निर्व्युत्थानः समाधिः शिवयोगिनाम्। यथा—

"सर्वान्तरतमतया प्रधानं यद्विमर्शमयं रूपं तत्संयमादन्तर्निभालनप्रकर्षात् किमत्रोच्यते। अयं हि सर्वासु दशासु देदीप्यमानो निर्व्युत्थानः परः समाधिः।"

(शि० सू० वृ० 3, 44)

द्र०- (शि० सू० वि०, पृ०, 68)

निवृत्तिकला— कलासु पञ्चमी। स्थूले धराख्ये प्रपञ्चे सर्वत्र व्यापिनी कला निवृत्तिः, यतो धरां प्राप्य बहिस्तत्त्वसृष्टिक्रिया शिवस्य निवर्तते, ततो निवृत्तिरिति नामधेयमस्याः। यथा—

"परां काष्ठां प्राप्ताद्बहिर्मुखत्वान्निवर्तकत्वेन कलयित्री निवृत्त्याख्या।"

(तं० आ० वि०, खं० 7/2, पृ०, 2-3)

"पृथिव्यां निवृत्तिः, निवर्तते यतस्तत्त्वसर्ग इति।"

(तं० सा०, पृ०, 109)

द्र०- (स्व० तं० उ०, प० 4, पृ०, 108)

~ तद्विशेषाः — **अत्रैकं पदम्, एको मन्त्रः, एकश्च वर्णः, तत्त्वमेकं, भुवनानि पुनः षोडश। यथा—**

"पदमन्त्रवर्णमेकं पुरषोडशकं धरेति च निवृत्तिः।"

(तं० आ० 11,51)

द्र०- (तं० सा० पृ०,112)

~ तद्विस्तरः — **यथा—**

"निवृत्त्यभ्यन्तरे पृथिवी शतकोटिप्रविस्तरा।
तस्यां च भुवनानां च शतमष्टोत्तरावधि।।
अष्टाविंशतिः पदानि वर्ण एकोऽत्र संस्थितः।
मन्त्रौ द्वावेव विज्ञेयौ .....।।"

(स्व० तं० 4, 102-103)

~ देहे— **शरीरान्तः कलानां निवेशो भावनया विधीयते कलाध्वाभ्यासे। तदनुसारं पाददेशे निवृत्तिकला। यथा—**

"निवृत्तिकलायाः पादाग्राद्गुल्फान्तं व्याप्तिः, तत्रैव भूतत्त्वस्थितिः ब्रह्मणोऽधिकृतिः।"

(प० त्री० वि०, पृ०, 11)

~ प्रणवकलासु—

"निवृत्तिस्तु यदा सर्वं निष्पन्नं प्रणवं विभुः (विभु)।
अकाराख्यं परं धाम ब्रह्मा स कमलासनः।।"

(ने० तं० 21, खं० 2, पृ०, 294)

"पृथ्व्यन्ततत्त्वसर्गनिवृत्तेर्निवृत्तिः।"

(ने० तं० वि०, खं० 2, पृ०, 294)

तन्त्रवाक्ये "विभु" इति क्लीबं पदं शोभनतरत्वेन साध्विति प्रतीयते।

निशा ~ कालाध्वनि— **(1) वेद्यं स्थितिर्दिनं वेदकत्वे च स्थितिर्निशा। यथा—**

"..... वेत्तृस्थता निशा।"

(तं० आ० 6,82)

"वेतृस्थता-स्वात्मविश्रान्तिश्च निशा। तेन यावद् वेद्यग्रहस्तावद्दिनमन्यथा तु रात्रिरिति।"

(तं० आ० वि०, खं० 4/1, पृ०, 72)

~ सामान्यतः — **(2) अन्धकारमयं मायातत्त्वम्।**

द्र०- 'मायातत्त्वम्' इति।

निशाकान्तकला— संहारदेवी। यथा—

"निशाकान्तस्य कालरात्रीरमणस्य परभैरवस्य कलनात् कला सैव अघोरघोराघोरातिरावरणत्रयोपेतवर्गाष्टक दललालिता .....। निशाकान्तकला संहारदेवी।"

(भा० वि०, पृ०, 5-6)

निशाकुलम्— किमप्यागमशास्त्रम्। यथा—

"श्रीमन्निशाकुलेऽप्युक्तं मिथ्याभावितचेतसः।
मलमायाविचारेण क्लिश्यन्ते स्वल्पबुद्धयः।।
स्फटिकोपलगो रेणुः किं तस्य कुरुतां प्रिये।
व्योम्नीव नीलं हि मलं मलशङ्कां ततस्त्यजेत्।।"

(तं० आ० 13,126-127)

द्र०- (तं० आ० वि०, खं० 8, पृ०, 84-85)

द्र०- (म० मं० प० पृ०, 32)

निशाचारः — श्री निशाटननामा शैवागमविशेषः एव। यथा—

"उक्तं श्री निशाचारेऽपि—
'वाममार्गाभिषिक्तोऽपि दैशिकः परतत्त्ववित्।
संस्कार्यो भैरवे सोऽपि कुले कौले त्रिकेऽपि सः।।' इति।"

(प० त्री० वि०, पृ०, 92)

द्र०- (तं० आ० 14, 43)

निशाटनम्— आगमशास्त्रविशेषो यस्य पंक्तयो बहुधा समुद्धतास्तन्त्रालोकादौ। अस्यैवागमस्य नामोल्लेखो "निशाचारः" इति "निशिचार" इति "नैशसञ्चारः" इति "निशिसञ्चर" इति "निशि सञ्चार" इति "निशाचारः" इति "निशासञ्चार" इति च बहुधा कृतः। यथा—

"श्रीमन्निशाटने चात्मगुरुशास्त्रवशात्त्रिधा।
ज्ञानं मुख्यं स्वोपलब्धि विकल्पार्णतारणम्।।"

(तं० आ० 13,197)

"श्रीनिशिसञ्चरे इति श्री निशाटने।"

(तं० आ० वि० खं० 3, पृ०, 207)

द्र०- प० त्री० वि०, पृ०, 92; तं० आ० 1, 50; 4, 79; 6,31, 12,23; 13,241, 42; 14,43;-45; 15,83; - 87, 12,23; 15,596, 28,72,73; तं० आ० वि०, खं० 1, पृ०, 89; खं० 3, पृ०, 207; खं० 7, 2, पृ०, 107; खं० 8; पृ०, 126; 238, खं० 9, पृ०, 47,50; प० सा० वि०, पृ०, 163; ज० म० वि०, पृ०, 20, इति।

निशिसञ्चरः — निशाटननामा शैवागमविशेषः। यथा—

"श्री निशिसञ्चरे इति श्री निशाटने"

(तं० आ० वि०, खं० 3, पृ०, 207)

निशिसञ्चारः — निशाटननामा शैवागमविशेषः। यथा—

"उक्तं च निशिसञ्चारयोगसञ्चारशास्त्रयोः।
विकल्पात्तु तनौ स्थित्वा देहान्ते शिवतां व्रजेत्।।"

(तं० आ० 13, 241-242)

द्र०- 'निशाटनम्' इति।

निश्चयः — बौद्धोऽध्यवसायः। यथा—

"बुद्धया विषयेण च विषयत्वपर्यन्तभाजा (नियन्त्रितं संवित्तत्त्वम्) अध्यवसायो निश्चयः।

(ई० प्र० वि०, खं० 1, पृ०, 224)

निःशङ्कता— शङ्कानामनुदयः। शङ्कानुदये एव हि ज्ञानस्य परिपक्वता शैवशास्त्रानुसारम्। न पुनः शङ्काशमने। यथा—

"उवाचोत्पलदेवश्च श्रीमानस्मद्गुरोर्गुरुः।
सर्वाशङ्काशनिं मार्गं नुमो माहेश्वरं त्विति।।"

(तं० आ० 12,25)

"सर्वाशङ्काशनिं सर्वालक्ष्मीकालानलं तथा।
सर्वामङ्गल्यकल्पान्तं मार्गं माहेश्वरं नुमः।।"

(शि० स्तो० 2, 28)

निश्श्रेयसाभासः — कुतश्चिदेव बन्धनान्मुक्तिः न सर्वतः। यथा—

"अन्यत्रत्यो ह्यपवर्गः कुतश्चिन्मुक्तिः, न सर्वत इति निःश्रेयसाभास इति"

(ई० प्र० वि०, खं० 1, पृ०, 11)

निष्कम्पता— निर्विकल्पता। यथा—

"निष्कम्पत्व इति निर्विकल्पकत्व इत्यर्थः।"

(तं० आ० वि०, खं० 7/2, पृ०, 102)

निष्कलम्— शुद्धं संवित्तत्त्वम्। यथा—

"निष्कलं च मन्त्रविरामे प्रकाशविमर्शमात्रतत्त्वम्।"

(स्व० तं० उ०, प० 4, पृ०, 323)

निष्क्रियानन्दनाथः — कोऽप्याचार्यः। यथा—

"निष्क्रियानन्दनाथस्तु कराङ्क्रिण्या इति पठति।"

(वि० भै० उ०, पृ०, 67)

नूतनशैवदर्शनम्— (1) 1919 तमे खैष्टे वर्षे वाराणस्यामाचार्यामृतवाग्भवमहोदयाः जगदम्बायाः बालत्रिपुरायाः कृपया भगवतो महामुनेर्दुर्वाससः साक्षाद् दर्शनमवाप्य तस्माच्छाम्भवयोगविधिं परिपूर्णां गृहीतवन्तः। तदभ्यासेन तेषामन्तः स्वयमेव पराद्वैशैवदर्शनसिद्धान्तानां ज्ञानं समुदितम्। ततो 1928 तमे रैव्रष्टाब्दे ते वाराणसीं त्यक्त्वा परिव्राजकवृत्तिं गृहीतवन्तः। तेन रूपेण कश्मीरदेशभ्रमणं कुर्वद्भिस्तैस्तत्र कस्यापि ब्राह्मणस्य प्रार्थनया आत्मविलासाख्यस्य ग्रन्थस्य निर्माणं कृतं 1930 तमे खैष्टे वर्षे। ततोऽग्रे ते आत्मविलासस्य सुन्दरीसमाख्यां व्याख्यां विधाय ग्रन्थान्तराण्यपि यथाकालं निर्मितवन्तः। तेषु ग्रन्थेषु केचन सिद्धान्ताः अभिनवया दृष्ट्या प्रतिपादिताः। यथा पारमेश्वर्यसिद्धान्तो विलाससिद्धान्ततया, शिवशक्त्यभेदसिद्धान्तः शाक्तसिद्धान्ततया प्रतिपादितः। व्यावहारिकस्य मोक्षस्य चाप्यावश्यकत्वं प्रतिपादितम्। स्वातन्त्र्यस्य द्वैविध्यं व्यावहारिकपारमार्थिकतयोपादयत्वेनोपादिष्टम्। जीवनस्य व्याहारिकीः पारमार्थिकीश्चोभयविधाः समस्याश्चिकित्सषदेतच्छैवं पराद्वैत। शास्त्रमस्याभिमूतनं शैवशास्त्रमिति व्यपदिश्यते; आंग्लभाषायां च NEO-SAIVISM इति।

द्र०- 'शाकदर्शनम्' इति।

तन्नूतनैर्विचारैः प्रतिपादितं पुरातनमेव पराद्वैत-शैवदर्शनमेतत्। तत्र नूतनतायाः प्रधानाः अंशाः इमे।

(1) व्यावहारिकं स्वातन्त्र्यं प्रति दार्शनिकैर्गजनिमीलिकाः नैवालम्बनीयाः।

(2) सद्राजनीत्याश्रितं सच्छासनमेव हि चतुर्वर्गफल-प्राप्तेर्मूलाधारः। ततो राष्ट्रे सद्राजनीतिः प्रवर्तनीया; सच्छासनञ्च तया प्रतिष्ठाप्यमिति प्रथमः कल्पः।

(3) एकैकेनापि साधकेन प्रथमं निजा स्वात्मविषयाः स्वगार्हस्थ्यसम्बन्धिन्यश्च शारीरिकार्थिकादि समस्याः सम्यक् प्रशमनीयाः, तदनन्तरमेव मोक्षचिन्ता समादरणीया। इत्येषास्ति नूतना नीतिरस्य नूतनस्य शैवदर्शनस्य। दर्शनसिद्धान्त-निरूपणेऽपि काश्चन नूतनाः परिभाषाः तर्कशैल्यश्चात्र दर्शने प्रतिपादिताः। उदाहरणतोः— यथाः— (1) शाकसिद्धान्तः। तदनुसारं परस्य तत्त्वस्य शक्तिघनतायास्तथाऽवबोधनं यथा वर्तमाने युगे प्रचलतः शाक्तदर्शनात् सुतरां भेदः प्रकटो भवेदस्य। तथा हिः शकनंशाकः, भावे घञ्; शक्त्येकघनः सर्वतः सर्वथा च शकनस्वभावः परमेश्वरः। शक्तिरिति कथने कस्या अप्याधेयभूतायाः विशेषतायाः अवबोधो नाधारभूतस्य द्रव्यस्थानीयस्य तत्त्वस्य। (2) आपेक्षिकयोर्द्वैताद्वैतयोः, नैर्मल्यमालिन्योः, कर्तृत्वाकर्तृत्वयोः, सदसतोरेवं प्राययोश्च सर्वप्रकारकयोर्द्वन्द्वयोरनापेक्षिके परमाद्वैते, पूर्णनैर्मल्ये, पूर्णकर्तृत्वे, पूर्णसत्ये, परे तत्त्वे च प्रतिष्ठानं तल्लीलातश्च व्यावहारिकमेषाम् आभासनं स्वतन्त्र परशिवकृतमित्यत्र प्रतिपादितम् । स एवं विध एव पूर्णतासिद्धान्तोऽपरा नूतनतात्र।

(3) अपरश्च विलाससिद्धान्तो यदनुसारं आरम्भवादः, परिणामवादः, विवर्तवादो, वासनाकारवादः इति सर्वमप्यपूर्णं शास्त्रसिद्धान्तजातं पारमेश्वरलीलाविलासाश्रितं तेभ्यस्तेभ्योः अधिकारिजनेभ्यो हितं तद्विजृम्भितञ्चेति। इत्येवं प्रकारका अत्र नूतनप्रायाः बहवः सिद्धान्ताः बह्वयश्च प्रतिपादन-प्रक्रियाः नूतनयैव शैल्या प्रतिपादिताः सन्ति। तत एवेदं नूतन शैवदर्शनमिति।

एतच्छास्त्रग्रन्थाः— (1) आत्मविलासः (2) तस्य सुन्दरी टीका हिन्द्यां (3) विमर्शिनी टीका च संस्कृते, (4) सिद्धमहारहस्यम्, (5) सिद्धमहारहस्य-विमर्शिनी, (6) विंशतिका शास्त्रं टीकात्रयान्वितम्, (7) परमशिव स्तोत्रम्, (8) महानुभवशक्तिस्तवः, (9) मन्दाक्रान्तास्तोत्रम्, (10) वस्तुस्थिति प्रकाशः इति।

एतेषु मूलग्रन्था आचार्यामृतवाग्भवप्रणीतास्तेषु टीकाश्च तस्य शिष्येण बलजिन्नाथेन। तेनैवापरः (11) स्वातन्त्रयदर्पणाख्यो ग्रन्थोऽपि निर्मितः सटीकः।

नृकपालम्— नरशिरोऽस्थि, भैरवीयोपासनायामुपयोगेन साधकस्य ब्रह्मभावपालकम्। यथा—

"नुः अणोर्यत्कपालं, कं महास्वातन्त्ररूपम् अनवच्छिन्नं ब्रह्म पालयति गोपायतीति नृकपालं कर्परम्।"

(मा० वि०, पृ०, 42-43)

नेत्रतन्त्रम्— काश्मीरशैवदर्शनशास्त्रे आधारत्वेन गृहीत आगम विशेषः। पार्वतीं प्रति भगवतः परमेश्वरस्य नेत्रत्रयस्य रहस्य-स्वरूपाणां यस्मिन् प्रकाशनं क्रियते तन्नेत्र तन्त्रमुच्यते। यथा—

"नेत्र तत्त्वामिधाभित्वान्नेत्रमित्यस्य नाम प्रतिज्ञातं स्फुटयति"

(ने० तं० उ०, खं० 1, पृ०, 17)

"यन्मे नेत्रान्तरे वह्निर्यद्वामृतमनुत्तमम्।
तत्सर्वं कथयिष्यामि योगयुक्त्या शृणु प्रिये।।"

(ने० तं० 1, 21)

"सूर्याचन्द्रमसौ वह्निनस्त्रधाम परिकल्पना।
त्रिनेत्रकल्पना मह्यं तदर्थमिह दृश्यते।।
दहनाप्यापने तेन प्राकाश्यं विदधाम्यहम्।।"

(तदेव, 1,30)

द्र०- 'नेत्रम्' इति।

"सत्सु मन्त्रेषु सर्वेषु नेत्रभूतं प्रकीर्तितम्।
ममाशये न केनापि लक्षितं तु सुदुर्लभम्।।
तवाद्य कथयिष्यामि त्रिप्रकारं परं ध्रुवम्।
मन्त्रयोग ज्ञानलभ्यं मोक्षदं सिद्धिदं ध्रुवम्।।"

(ने० तं०, खं० 1, पृ०,44)

~ तदुद्द्योतः — **असौ टीका ग्रन्थः क्षेमराजेन स्वच्छन्दोद्योतनिर्माणादनन्तरं निर्मितः। यथा—**

"यदत्र भैरवाकृतौ रहस्यमस्ति, तच्छ्रीस्वच्छन्दोद्द्योतेवितत्य मया दर्शितम्।"

(ने० तं० उ०, खं० 1, पृ०, 226)

~ तद्रचनाकालः — **बौद्धार्हतन्यायवैशेषिकादिशास्त्राणां विकासादनन्तरमेवास्य तन्त्रस्य प्रसारो वृत्तः, एतेषां तत्र-तत्रोल्लेखात् यथा—**

"बुद्धः पद्माासनगतः प्रलम्बश्रुतिचीवरः।।
पद्माक्षः पद्मचिह्नश्च मणिबद्धो जगद्धितः।
समाधिस्थो महायोगी वरदाभयपाणिकः।।
अक्षसूत्रधरो देवः पद्महस्तः सुलोचनः।
एवं ध्यातः पूजितश्च स्त्रीणां मोक्षफलप्रदः।।"

(ने० तं० 13, 34-36)

"न्यायारहतयोगेषु वैदिकाद्येष्वनेकशः।"

(तदेव, 39)

नेत्रम्— (1) शिवस्य नामैतन्नेत्रतन्त्रे। निर्वचनतो व्याख्यातं। यथा—

"यदेतत्परमं धाम सर्वेषामालयः शिवः।।
अस्मादेव समुत्पन्ना मन्त्राश्चामोघशक्तयः।
नित्यो नियामको ह्येषां नेतारं निरुपप्लवः।।
निष्प्रपञ्चो निराभासस्त्रायकस्तारणः शिवः।
त्राणं करोति सर्वेषां तारणं त्रस्तचेतसाम्।।
नयते मोक्षभावं तु तारयेन्महतो भयात्।
नयनाच्च तथा त्राणान्नेत्रमित्यभिधीयते।।"

(ने० तं० 22,9-12)

अपरमिति शीघ्रं यथास्यात्तथा नेता इति।

(2) शुद्धं स्वात्मपरमेश्वरताज्ञानं नेत्रतन्त्रेति पदस्य व्याख्याने स्पष्टीकृतं तत्र। यथा—

"तद्वीर्यं परमं धाम यत्परामृतरूपिणम्।
यत्ततत्परमानन्दं यदेतत्परमं पदम्।।
तदेतन्निष्कलं ज्ञानं विशुद्धं नेत्रमुत्तमम्।"

(ने० तं० 1, 33-34)

"यत्परामृतरूपिणम्" इति न सङ्गच्छते। पाठभेदः स्यादत्रकश्चनेति विचार्यं सुधीभिः।

नेत्रमन्त्रः— न स्पष्टीकृतो जयरथेन।

द्र०- (तं० आ० वि०, खं० 12, पृ०, 198)

नैमित्तिकं ~ कर्म— केनापि कदाचिदेव केनचित् कारणेन कार्यं कर्म पर्वपवित्रादिविधिरूपम्। यथा—

"अशङ्कितव्यावश्यन्ता-सत्ताकं जातु चिद्भवम्।
प्रमात्रनियतं प्राहुर्नैमित्तिकमिदं बुधाः।।"
(तं० आ० 28,4)

अशङ्कितव्यानश्चिता। अवश्यन्ताअवश्यं भाविनी सत्ता यस्य तत्। इति व्याख्यात्र।

"जातु चिद्भवमिति कदाचित्कमित्यर्थः।"
(तं० आ० वि०, खं० 11, पृ०, 3)

नैमित्तिक कर्माणि— अधोलिखितावसरनिमित्ततः कर्तव्यानि पूजादिकर्माणि। यथा—

"ज्ञानशास्त्रगुरुभ्रातृतद्वर्गप्राप्तयस्तथा।
तज्जन्मसंस्क्रियाभेदाः स्वजन्मोत्सवसङ्गतिः।।
श्राद्धं विपत्प्रतीकारः प्रमोदोऽद्भुतदर्शनम्।
योगिनीमेलकः स्वांशसन्तानाद्यैश्च मेलनम्।।
शास्त्रव्याख्या पुरामध्यावसानानि क्रमोदयः।
देवतादर्शनं स्वाप्नमाज्ञा समयनिष्कृतिः।।
इति नैमित्तिकं श्रीमत्तन्त्रसारे निरूपितम्।
त्रयोविंशतिभेदेन विशेषार्चानिबन्धनम्।।"
(तं० आ० 28, 6-9)

श्री तन्त्रसारे इति पुरातने त्रिकतन्त्रसारे ग्रन्थे न तु स्वीये तन्त्रालोकसंक्षेपात्मके इति वेद्यम्।

~ शेषवृत्तौ— **पर्वणां पूजनम्, तत्सम्बन्धी जपः पवित्रकविधिक्रमः, इति।**

"नैमित्तिकस्तु सर्वेषां पर्वणां पूजनं जपः।
विशेषवशतः किञ्च पवित्रकविधिक्रमः।।"
(तं० आ० 26, 13)

नैमित्तिकम् ~ शेषवर्तनम्— **सिद्धयोगेनापि केनापि निमित्तेन तत्तत्काले क्रियमाणो विधिः। यथा—**

"नैमित्तिकम्—ज्ञानलाभः, शास्त्रलाभो, गुरुतद्वर्गगृहागमनम्, तदीयजन्मसंस्कारप्रयाणदिनानि, लौकिकोत्सवः, शास्त्रव्याख्या, आदिमध्यान्ताः, देवतादर्शनम्, मेलकः, स्वप्नाज्ञा, समयनिष्कृतिलाभः इत्येतन्नैमित्तिकम्।"
(तं० सा०, पृ०, 179)

"नैमित्तिकं तु तच्छासनस्थानामप्यनियतम्, तद्यथा-गुरुतद्वर्गागमनं, तत्पर्वदिनं, ज्ञानलाभदिनम्, इत्यादिकम्—इति केचित्।"
(तं० सा०, पृ०, 178-179)

"नैमित्तिकस्तु सर्वेषां पर्वणां पूजनं जपः।
विशेषवशतः किञ्च पवित्रकविधिक्रमः।।"
(तं० आ० 26,13)

एष नैमित्तिको विधिः सांसिद्धिकेन निर्बीजदीक्षाभाजा चाप्यनुष्ठेय एव।

"क्रमात्तन्मयतोपाय गुर्वर्चनरतौ तु तौ।।
तत्रैषां शेषवृत्त्यर्थं नित्यनैमित्तिके ध्रुवे।
काम्य वर्जं .....।।"
(तदेव,26,10-11)

~ आचार्यस्य— **शास्त्रव्याख्यादिकर्मरूपः कार्यो विधिः। यथा—**

"आचार्यस्य च दीक्षेयं बहुभेदा विवेचिता।।
व्याख्यादिकं च तत्तस्याधिकं नैमित्तिकं ध्रुवम्।।"
(तं० आ० 26, 14)

नैमित्तिकी ~ संज्ञा— यौगिकी संज्ञा।
द्र०- 'संज्ञाप्रकाराः' इति।

नैर्मल्य ~ तारतम्यम्— **तच्च विज्ञानाकलपदादेवारभते, वर्धते, चोत्तरोत्तरं मन्त्रादिपदेषु। यथा—**

"अयं हि पूर्णतायाः प्रारम्भो विज्ञानाकल इव निर्मलतायाः। प्रलयाकले मायाख्यमलाभावेऽपि न निर्मलता, कार्ममलयोगेन तदभावस्य अनात्यन्तिकत्वात्।"
(ई प्र० वि० वि०, खं० 3, पृ०, 353)

ततः उत्तरोत्तरं निर्मलाः प्राणिनः — विज्ञानाकलाः, मन्त्राः, मन्त्रेश्वराः, मन्त्रमहेश्वराः, शिवाः इति। समलाश्च प्रलयाकलाः सकलाश्चेति।

नैर्मल्यं ~ भावानाम्— **अत्यक्तस्वस्वभावस्य भावस्य यदन्यमिश्रत्वेनापि स्वात्मनः प्रदर्शनस्य क्षमता सैव तस्य निर्मलता। सा च प्रतिबिम्बग्रहणक्षमता। यथा—**

"स्वस्मिन्नभेदाद्भिन्नस्य दर्शनक्षमतैव या।
अत्यक्तस्वप्रकाशस्य नैर्मल्यं तद्गुरूदितम्।।"
(तं० आ० 3,8)

दर्पणः स्वं दर्पणत्वमत्यजन्नेव नगरग्रामवनाद्यवभासयति स्वान्तः। परमेश्वरोऽपि शुद्धमानन्दघनं चिद्रूपत्वमत्यजन्नेव तत्त्वभुवनभावादिवैचित्र्यं स्वात्मन्यवभासयति।

~ मुख्यम्— **जगद्रूपप्रतिबिम्बधारित्वमेव परशिवस्य मुख्यं वास्तविकञ्च नैर्मल्यम्। व्यवहारे तदितरत्वेन भासमानानां च चक्षुर्दर्पणादीनां यन्नैर्मल्यं तन्न मुख्यम्। यथा—**

"नैर्मल्यं मुख्यमेकस्य संविन्नाथस्य सर्वतः।
अंशांशिकातः क्वाप्यन्यद्विमलं तत्तदिच्छया।।"
(तं० आ० 3,9)

नैर्मल्योल्लासपण्डितः — स्वेच्छया स्वविलासात् पशुपदमवतीर्णः, स्वेच्छयैव शिवपदमारुरुक्षुः, सर्वदा आनन्दरूप-नैर्मल्योल्लासने चतुरः परमेश्वरः। यथा

"स्वविलासेनावरूढ आरुरुक्षुः स्वेच्छया।
आरोहते सदाऽऽनन्दो नैर्मल्योल्लासपण्डितः।।"
(आ० वि० 5, 4)

नैवेद्यविसर्जनम्— द्वारपीठगुरुव्रातार्पितं निवेदितं वस्तुजातं जले प्रक्षेप्तव्यम्, मार्जारमूषकादिभिस्तन्न भक्षणीयम्, अपि तु जलजैरेव जनतुभिः। अन्येभ्यो देवेभ्यो निवेदितं स्वयमप्यत्तुं शक्यम्। यथा—

"द्वारपीठगुरुव्रातसमर्पितनिवेदनात्।
ऋतेऽन्यत् स्वयमश्नीयादगाधेऽम्भस्यथ क्षिपेत्।।
प्राणिनो जलजाः पूर्वदीक्षिताः शम्भुना स्वयम्।
विधिना भाविना श्रीमन्मीननाथावतारिणा।।
मार्जारमूषकाद्यैर्यददीक्षैश्चापि भक्षितम्।
तच्छङ्कातङ्कदानेन व्याधये नरकाय च।।"
(तं० आ० 26, 70-72)

साधका अपि ये शिवदीक्षया दीक्षितास्त एव नैवेद्यभक्षणं कर्तुमधिकारिणो नेतरे इति तात्पर्यमत्र वेद्यम्। यथा—

"भुक्तोज्झितं हि यच्चान्मुच्छिष्टं गुरुदेवयोः।
रक्षेन्निक्षेपवन्नित्यं न देयं यस्य कस्यचित्।।
गर्ते चाग्नौ जले कूपे प्रक्षिपेत् प्रयतात्मवान्।
अदीक्षितैर्यदा भुक्तं मन्त्रसिद्धिर्विनश्यति।।"

इत्यादि सुविस्तरं द्रष्टव्यम्।

उद्ध०- (तं० आ० वि०, खं० 10, पृ०, 353-354)

नैशसञ्चारः — निशाटनाख्यः शैवागमविशेषः। यथा—

"यतः श्रीनैशसञ्चारे परमेशो न्यरूपयत्।।"

(तं० आ० 15, 83)

द्र०- 'निशाटनम्' इति।

न्यायमहात्म्यम्— स्वीकृतमुक्तं च बहुधा न्यायदर्शन-प्रक्रियामाहात्म्यम्। यथा—

(क) "न्यायनिर्माणवेधसा निरूपितम्।"

(ई० प्र० वि०, खं० 1, पृ०, 16)

(ख) "नैयायिकक्रमस्यैव मायापदे पारमार्थिकत्वम्।"

(एतदेव, पृ०, 25)

(ग) "परार्थानुमानात्मकं हि शास्त्रम्।
तत्र च प्रमाणादिषोडशपदार्थतत्त्वमयत्वमेव परमार्थः।
..... षोडशसु हि पदार्थेषु निरूप्यमाणेषु सम्यक् प्रतिपाद्यं परः प्रतिपद्यते। .....तत् परिपूर्णपरप्रतिपत्तिकारि परमार्थतः सकलमेव शास्त्रं परार्थानुमानम् आगमव्यतिरिक्तं न्यायनिर्माणवेधसाक्षपादेन निरूपितम्।"

(ई० प्र० वि०, खं० 2, पृ०, 126-127)

न्यासः — मन्त्राक्षराणां शरीराङ्गेषु भावनया स्थापनम्। मन्त्रदेवतास्वात्मनां त्रयाणां भावनयैकीकरणस्यानुकूलं करस्पर्शादि कर्म।

~ तत्फलम — **शैव्यां साधनायां साधकदेहे, अर्घ्यपात्रादौ, स्थण्डिलादौ च सर्वत्र मन्त्रन्यासपूर्वकं सर्वशिताभावना विधीयते। तेन प्रारम्भत एवाभेदविमर्शः दृढो भवति। ततः पर्यन्ते शिवैकत्वरूपस्य फलस्य प्राप्तिः। यथा—**

"एवं क्रियाक्रमेणापि परमेश्वरीकृतसमस्तकारकस्तयैव दृशा सर्वक्रियाः पश्यन् विनापि प्रमुखज्ञानयोगाभ्यां परमेश्वर एव भवति।

(तं० सा०, पृ०, 136)

~ तद्विधिः — **रहस्यभूतत्वेन स्पष्टं नैवोक्तः। गुरुमुखा- देव ज्ञेयोऽसौ**

द्र०- (तं० आ० 15, 233-255)

~ पुत्रकदीक्षायाम्— **तत्र गुरुः शिष्यदेहेऽध्वषट्कन्यासं विधायैव मन्त्रादिबलेन तच्छोधनं करोति। तच्छोधनार्थमेव पूर्वं तस्य न्यासः स च पुरतत्त्वादि संख्यानुसारमङ्गुल-विशेषसंख्या-परिमाणको न्यासः। यथा—**

"शोध्याध्वनि च विन्यस्ते तत्रैव परिशोधकम्।
न्यसेद् यथेप्सितं मन्त्रं शोध्यौचित्यानुसारतः।।"

(तं० आ०16,97)

द्रष्टव्यं विस्तरतः (तं० आ०16,96-150)

~ मतद्वयतः — **तत्र प्रधानं मतं श्रीशम्भुनाथोपदिष्टम् अन्यच्च लक्ष्मणगुप्तोपदिष्टम्। यथा—**

"श्री लक्ष्मणगुप्तमते ह्यन्यथा न्यासविधिरिति।"

(तं० आ० वि० खं०9, पृ०,122)

"श्री लक्ष्मणगुप्तः पुनरेतदन्यथा व्याचख्यौ।"

(तं० आ० वि० खं०9, पृ०,122)

~ तत्फलम — **शैव्यां साधनायां साधकदेहे, अर्घ्यपात्रादौ, स्थण्डिलादौ च सर्वत्र मन्त्रन्यासपूर्वकं सर्वशिताभावना विधीयते। तेन प्रारम्भत एवाभेदविमर्शः दृढो भवति। ततः पर्यन्ते शिवैकत्वरूपस्य फलस्य प्राप्तिः। यथा—**

"एवं क्रियाक्रमेणापि परमेश्वरीकृतसमस्तकारकस्तयैव दृशा सर्वक्रियाः पश्यन् विनापि प्रमुखज्ञानयोगाभ्यां परमेश्वर एव भवति।

(तं० सा०, पृ०, 136)

~ तद्विधिः — **रहस्यभूतत्वेन स्पष्टं नैवोक्तः। गुरुमुखा- देव ज्ञेयोऽसौ**

द्र०- (तं० आ० 15, 233-255)

~ पुत्रकदीक्षायाम्— **तत्र गुरुः शिष्यदेहेऽध्वषट्कन्यासं विधायैव मन्त्रादिबलेन तच्छोधनं करोति। तच्छोधनार्थमेव पूर्वं तस्य न्यासः स च पुरतत्त्वादि संख्यानुसारमङ्गुल-विशेषसंख्या-परिमाणको न्यासः। यथा—**

"शोध्याध्वनि च विन्यस्ते तत्रैव परिशोधकम्।
न्यसेद् यथेप्सितं मन्त्रं शोध्यौचित्यानुसारतः।।"

(तं० आ० 16, 97)

द्रष्टव्यं विस्तरतः (तं० आ० 16, 96-150)

~ मतद्वयतः — **तत्र प्रधानं मतं श्रीशम्भुनाथोपदिष्टम् अन्यच्च लक्ष्मणगुप्तोपदिष्टम्। यथा—**

"श्री लक्ष्मणगुप्तमते ह्यन्यथा न्यासविधिरिति।"

(तं० आ० वि० खं०9, पृ०,122)

"श्री लक्ष्मणगुप्तः पुनरेतदन्यथा व्याचख्यौ।"

(तं० आ० वि० खं०9, पृ०,122)

~ तत्फलम — **शैव्यां साधनायां साधकदेहे, अर्घ्यपात्रादौ, स्थण्डिलादौ च सर्वत्र मन्त्रन्यासपूर्वकं सर्वशिताभावना विधीयते। तेन प्रारम्भत एवाभेदविमर्शः दृढो भवति। ततः पर्यन्ते शिवैकत्वरूपस्य फलस्य प्राप्तिः। यथा—**

"एवं क्रियाक्रमेणापि परमेश्वरीकृतसमस्तकारकस्तयैव दृशा सर्वक्रियाः पश्यन् विनापि प्रमुखज्ञानयोगाभ्यां परमेश्वर एव भवति।

(तं० सा०, पृ०, 136)

~ तद्विधिः — **रहस्यभूतत्वेन स्पष्टं नैवोक्तः। गुरुमुखा- देव ज्ञेयोऽसौ**

द्र०- (तं० आ० 15, 233-255)

~ पुत्रकदीक्षायाम्— **तत्र गुरुः शिष्यदेहेऽध्वषट्कन्यासं विधायैव मन्त्रादिबलेन तच्छोधनं करोति। तच्छोधनार्थमेव पूर्वं तस्य न्यासः स च पुरतत्त्वादि संख्यानुसारमङ्गुल-विशेषसंख्या-परिमाणको न्यासः। यथा—**

"शोध्याध्वनि च विन्यस्ते तत्रैव परिशोधकम्।
न्यसेद् यथेप्सितं मन्त्रं शोध्यौचित्यानुसारतः।।"

(तं० आ०16,97)

द्रष्टव्यं विस्तरतः (तं० आ०16,96-150)

~ मतद्वयतः — **तत्र प्रधानं मतं श्रीशम्भुनाथोपदिष्टम् अन्यच्च लक्ष्मणगुप्तोपदिष्टम्। यथा—**

"श्री लक्ष्मणगुप्तमते ह्यन्यथा न्यासविधिरिति।"

(तं० आ० वि०, खं० 9, पृ०, 122)

"श्री लक्ष्मणगुप्तः पुनरेतदन्यथा व्याचख्यौ।"

(तं० आ० वि०, खं० 9, पृ०, 122)

प

~ पुत्रकदीक्षायाम

प — मनस्तत्त्वस्य यद्वास्तविकं स्वरूपं तस्याभिव्यञ्जको मातृका-वर्णः शाम्भवोपायक्रमे। मातृकाक्रमेणाभ्यासालम्बनीकृतः पकारः साधकस्य स्वात्मन एव शक्ति-विशेषं स्वविलासत एव स्वात्मसंवित्प्रकाशे बहिर्मुखतया प्रतिफलितं सन्मनस्तत्त्वाकारतयाऽऽभासते, स्वात्मा च तत्प्रतिबिम्बखचितसुन्दरः परमेश्वरतया साक्षादपरोक्षतयाऽनुभूयते स्वयम्। तेन च शिवभावसमावेशविशेषः फलितो भवति।

पकारः —

दृश्यतां — 'षट्त्रिंशतत्त्वदीक्षा' इति।

पञ्चकानि ~ सप्त —

दृश्यताम् — सप्तपञ्चकानि इति।

पञ्चकुण्डलिनी ~ खेचरी—**लक्षिताऽस्पष्टार्थेन पदकदम्बकेन यथा —**

"दशानामङ्गुलीनां तु मुष्टिबन्धादनन्तरम्।
द्राक् क्षेपात् खेचरी देवी पञ्चकुण्डलिनी मता।।"
(तं० आ० 32, 58-59)

अभ्यासविदो गुरोरेव सकाशात् सम्यग् वेद्या।

पञ्चकृत्यानि — सृष्टिः, स्थितिः, संहारः, पिधानम्, (तिरोधानम्) अनुग्रहश्चेति परमेश्वरस्य परमैश्वर्यविलासभूतानि लीलात्मकानि कर्माणि। यथा—

"यत्तस्य सर्वशक्तित्वं सा शक्तिरुपचर्यते।
तया तु कुरुते सृष्टिं स्थितिं संहृतिमेव च।।
करोति भगवान्सर्वं तिरोभावमनुग्रहम्।
क्रियाशक्त्या तु सृजति ज्ञानशक्त्या जगत्स्थितिम्।।
संहारं रुद्रशक्त्या तु तिरोभावं तु वामया।
अनुग्रहं ज्येष्ठया तु कुरुते नात्र संशयः।।
कृत्यं पञ्चविधं शंभोर्जगतो दृश्यते यतः ।
क्रियमाणं विकल्प्यं तत्सर्वज्ञस्य विचेष्टितम् ।।"
(ने०तं० 21, 42-45)

"इत्थं सृष्टि-स्थिति-ध्वंस-तिरोभावमनुग्रहः।
इति पञ्चसु कर्तृत्वं शिवत्वं संविदात्मनः।।"
(तं०आ० 14, 24)

~ रहस्याभिधानतः — तानि चाभिधानानि आभासनादीनि। यथा—

"याश्च विचित्रा एव सृष्टिसंहारलीलाः—
आभासन-रक्ति-विमर्शन-बीजावस्थापन-विलापनात्मपञ्च-विधकृत्यानि प्रख्यापयति।"
(स्पं० सं० टिप्प०, पृ०, 1)

साधको विषयाणामाभासनादौ सृष्ट्यादिकर्तृत्वं स्वस्य भावयन् शिवरूपतामात्मनः साक्षात्कुरुते इति।

द्र० (प्र०ह० सू०, 11)

पञ्चतत्त्वभावना : — पञ्चकलाः सूक्ष्मतम - सूक्ष्मतर- सूक्ष्म-स्थूल-स्थूलतररूपत्वेनाकाशादिपञ्चभूताख्ययापिव्यवह्रियन्ते भाव्यन्ते च। यथा—

".....शक्तितत्त्वान्तेऽप्यस्ति सौक्ष्म्यभाक्।
स्पर्शः कोऽपि सदा यस्मै योगिनः स्पृहयालवः।।
तत्स्पर्शान्ते तु संवित्तिः शुद्धचिद्व्योमरूपिणी।
यस्यां रूढः समभ्येति स्वप्रकाशात्मिकां पराम्।।"
(तं०आ० 11, 30-31)

"अत्र च व्योमरूपत्वोक्त्या शक्त्यन्तादौ गुणगुणिनोरभेदोपचाराद्वाय्वादिरूपत्वं ज्ञेयम्।"
(तं० आ० वि० खं० 7-2, पृ., 28)

द्र०- ('मातृकाचक्रविवेकाख्यो ग्रन्थः' – 2, 2-3, 3, 13, 16-17; 4,1, 4,5, 13,14, 5, 18)

तत्र शिवादितत्त्वानाम् विषये आकाशत्वादिभावनाभ्यासो निरूपितः। लाक्षणिकं तद् धरादिखान्तत्वं स्थूल-सूक्ष्म-सूक्ष्मतरत्वादिकं तेषां तत्त्वानामिति वेद्यं सुधीभिः। शान्त्यतीतायां कलायां संवित्तेर्व्योमरूपत्वं यदुक्तं तत एव निवृत्त्यादीनांधरादिरूपताऽभिप्रेता शास्त्रकृतः, इति वेद्यम्।

पञ्चतत्त्वविधि : — (1) षट्त्रिंशदपि तत्त्वानि वर्गशः पञ्चकलात्मकानि। तेन तत्त्वाध्वधारणायां निवृत्त्यादिकलापञ्चकम् अपि यदाऽऽलम्बनत्वेनोपादीयते तदासौ धारणाविधिः पञ्चतत्त्वविधिरित्युच्यते। यथा—

"मतं चैतन्महेशस्य श्रीपूर्वे यदभाषत।
धारिकाऽऽप्यायिनी बोध्द्री. पवित्री चावकाशदा।।
एभिः शब्दैर्व्यवहरन् निवृत्त्यादेर्निजं वपुः।
पञ्चतत्त्वविधिः प्रोक्तः.....।।"
(तं० आ० 11, 33-34)

(2) अभिनवगुप्तस्यापि गुरूणां दृष्टौ षट्त्रिंशदपि तत्त्वानि पृथिव्यादिपञ्चतत्त्वात्मकान्येव भाव्यन्ते। एतच्च सैद्धं मतं श्री स्वतन्त्रानन्दनाथकृतमातृकाचक्रविवेके विस्तरतः प्रतिपादितमस्ति। तत एवोपनिषदामृषयोऽपि सृष्टिक्रमोपदेशे पञ्चतत्त्वक्रममेव स्वीकृतवन्तः। तत्र स्थूलतमं तत्त्वं पृथिवी, तदेव द्रवीभूतं सज्जलम्, वह्निनज्वालात्मकतां यातं सत्तेजः, केवलं पवनात्मकतायां तदेव वायुः, शब्दादितरङ्गाधारभूतद्रव्यरूपतायां चाकाशः।

इति पञ्चतत्त्वानि प्रसिद्धानि संहारक्रमेण। तेषामेव सूक्ष्मतराणि रूपाणि पञ्चतन्मात्राणि। कर्मेन्द्रियाण्यपि तद्विषयतालम्बनेनैवोपयोगीनि, तथा ज्ञानेन्द्रियाण्यपीति तान्यपि पञ्चतत्त्वात्मकान्येव भाव्यन्ते योगिभिः। अन्तःकरणान्यपि तद्विषयत्वेनैव स्वं स्वरूपं लभन्ते इति तान्यपि तथैव। इत्थं सर्वमपि प्रमेयजातं प्रमाणजातं च पञ्चतत्त्वात्मकम्। तदभिन्नं प्रधानतत्त्वमपि तदभिन्नत्वेनैव तथाविधमेव। पुरुषस्यापि कर्तृत्वं तद्विषयमेव, तथैव च कञ्चुकान्यपि प्रमातुरन्तरङ्गाणि तत्त्वानि। ततस्तान्यपि पञ्चतत्त्वात्मकतया भाव्यन्ते योगिभिः। इत्थं प्रमातृतत्त्वमपि पञ्चतत्त्वमयमेव। तदेवं त्रिंशदपि भेदमयानि तत्त्वानि पञ्चतत्त्वात्मकतया भाव्यन्ते। त्रिंशत्तत्त्वाभिन्नायाः मायाया अपि तथा रूपतैव। कार्यत्वकारणत्व-विभागगलने सति शिवशक्तिप्रभृतीनि शुद्धानि

पञ्चतत्त्वान्यपि तथा विधान्येव भावनीयानि भवन्ति। इति सर्वं 'षट्त्रिंशत्तत्त्वमयं विश्वं परयोगिभिः पञ्चतत्त्वतयैव भाव्यते। सैषा त्रिकप्रक्रियान्तर्गताऽपरा पञ्चतत्त्वविधिः। यथा—

"अत्रास्मद्गुरवः प्राहुर्यत्पृथिव्यादिपञ्चकम्।।
प्रत्यक्षमिदमाभाति ततोऽन्यन्नास्ति किंचन।
मेयत्वे स्थूलसूक्ष्मत्वान्मानत्वे करणत्वतः।।
कर्तृतोल्लासतः कर्तृभावे स्फुरतयोदितम्।
त्रिंशत्तत्त्वं विभेदात्म तदभेदो निशा मता।।
कार्यत्व करणत्वादिविभागगलने सति।
विकासोत्कस्वतन्त्रत्वे शिवान्तं पञ्चकं जगुः।।"

(तं० आ० 11, 15-18)

स्थूलमेयत्वे निवृत्तिः धरात्मिका; सूक्ष्मे मेयत्वे जलादि-प्रधानान्ते प्रतिष्ठा जलप्राधाना; प्रमाणत्वे पुरुषकञ्चुकमायान्ता विद्याकला, प्रकाशप्रधान्येन वह्निमयी; शुद्धविद्यादिसादाख्यान्ते कर्तृत्वोल्लासमयी प्रमाणप्रमेयप्रशमतः शान्ता। शिवशक्ति-तत्त्वयोश्च शुद्धप्रमातृत्वरूपा शान्त्यतीता। अत एव मालिनीविजयवाक्यतः पोषितोऽयं सिद्धान्तः। यथा—

"मतं चैतन्महेशस्य श्रीपूर्वे यदभाषत।
धारिकाऽऽप्यायिनी बोद्धी पवित्री चावकाशदा।।
एभिः शब्दैर्व्यवहरन् निवृत्त्यादेर्निजं वपुः।"

(तं० आ० 11, 33-34)

~ तत् प्रामाण्यम्– श्रीमत्कालोत्तरागमेऽस्य विधेः प्रतिपादनम्। यथा —

"श्रीमत्कालोत्तरादौ च कथितं भूयसा तथा।"

(तं० आ० 11, 19)

तथा च मातृकाचक्रविवेके स्वतन्त्रानन्दनाथकृते।

द्र०- 'पञ्चतत्त्वभावनाः' इति।

पञ्चदशतुटिविभागः — एकत्रापि धरादिविषयग्रहणे तुटिप्रविभागेन पञ्चदशात्मत्वं पश्यन्ति सुसूक्ष्मदर्शिनः शिवयोगिनः। यथा—

"अथैकस्मिन् प्रमातरि प्राणप्रतिष्ठिततया भेदनिरूपणम्। इह नीलं गृह्णतः प्राणः तुटिषोडशकात्मा वेद्यावेशपर्यन्तमुदेति। तत्राद्या तुटिरविभागैकरूपा, द्वितीया ग्राहकोल्लासरूपा, अन्त्या (षोडशी) तु ग्राह्यभिन्ना तन्मयी, उपान्त्या (पञ्चदशी) तु स्फुटीभूतग्राहकरूपा। मध्ये तु यत्तुटिद्वादशक (तृतीयामारभ्य चतुर्दशीं यावत्) तन्मध्यादाद्यं षट्कं (तृतीयादष्टमं यावत्) निर्विकल्पस्वभावं विकल्पाच्छादकम्। षट्त्वं चास्य स्वरूपेणैका तुटिः (तृतीया), आच्छादनीये च विकल्पे पञ्चरूपत्वम्। (तच्चैवम्) उन्मिमिषा (चतुर्थी), उन्मिषत्ता (पञ्चमी षष्ठी चेति तुटिद्वयरूपा), सा चेयं स्फुटक्रियारूपत्वात् तुटिद्वयात्मिका, स्वन्दनस्य एकक्षणरूपत्वाभावात्, उन्मिषतता (सप्तमी) स्वकार्यकर्तृत्वम् (अष्टमी) चेत्येवमाच्छादनीयविकल्पपाञ्च-विध्यात् स्वरूपाच्च षट्क्षणा निर्विकल्पकाः। ततोऽपि निर्विकल्पस्य ध्वंसमानता (नवमी) ध्वंसो (दशमी), विकल्पस्योन्मिमिषा (एकादशी), उन्मिषत्ता (द्वादशी त्रयोदशी च), तुटिद्वयात्मिका, उन्मिषितता (चतुर्दशी) चेति षट् तुटयः। स्वकार्यकर्तृता तु ग्राहकरूपता (पञ्चदशी) इत्युक्तं न सा भूयो गण्यते, इत्येवं विवेकधना गुरूपदेशानुशीलिनः सर्वत्र पाञ्चदश्यं, प्रविभागेन विविञ्चते।"

(तं० सा०, पृ०, 102-103)

अतिरहस्यमयमेतत् साधकोत्तमेभ्य एवोपदिष्टं स्पष्टं तैरेव च। स्पष्टं वेदितुं शक्यम् स्वात्मसाक्षात्काररूपस्य साधनाफलस्य यत् स्वरूपं तस्य विश्लेषणंतद्रहस्यवाद-प्रधानया शैल्या प्रतिपादितं वेदितव्यम्। तत्र प्रथमस्यां तुटावनिर्वचनीयायाः परशिवताया एव प्रकाशः; द्वितीयस्यामेव पुनः परशिवस्य परमेश्वरताया अभिव्यञ्जना सम्भवति। इति यदन्यत्रोक्तं भट्टकल्लटोक्तनीत्या तदिह घटते न वेति रहस्य-योगाभ्यासिन एव स्पष्टं प्रतिपादयितुं समर्थाः।

पञ्चदशत्वधारणा — ~ तत्त्वभेदनेः–

द्र०- 'तत्त्वभेदनम्' ~ 'पञ्चदशात्मकम्' इति।

पञ्चदशात्मकत्वं — ~ तत्त्वभेदने — पृथिव्या आरभ्य मूलप्रकृत्यन्तानां तत्त्वानां सप्तप्रमातृवेद्यत्वात् सप्तप्रमातृव्याप्यत्वाच्च सप्तविधत्वम्, तच्छक्तिवेद्यत्वे तद्व्याप्यत्वे च पुनः सप्तविधत्वम्। ततः स्वेन रूपेण साकमेषां पञ्चदशात्मता सर्वेषामपि। तेषां पञ्चदशात्मकतया भावनाभ्यासो विधीयते तत्त्वभेदने। एवं सकलाख्यस्य प्रमातुरपि पञ्चदशात्मकतया भावनाया अभ्यासः कर्तुं शक्यते। यथा —

"इति पञ्चदशात्मकत्व पृथिव्याः प्रभृतिं प्रधान-तत्त्वपर्यन्तम्। तावत्युद्रिक्त-रागादि-कञ्चुकस्य सकलस्य प्रमातृत्वात्, सकलस्याप्येवं पाञ्चदश्यम्, तस्यापि तावत् वेद्यत्वात्।"

(तं० सा०, पृ०, 97)

पञ्चदीक्षा : — पञ्च प्रकारा दीक्षाया उक्ताः। यथा—

"होत्री दीक्षा तु सिद्धान्ते तन्त्रे योजनिका स्मृता।
त्रिके समावेशवती कुले स्तोभात्मिका मता।।
सामरस्यमयी कौले दीक्षा पञ्चविधोदिता।"

उद्ध० (तं० आ० वि०, खं०, 8, पृ०, 182)

होत्री = हवनपूर्वकं विधीयमाना। क्वाप्यूर्ध्वे भुवने प्रापयित्री = योजनिका। साक्षाच्छिवभावावेशकरी समावेशवती। मध्यविकासात्मकस्तोभरूप-परस्पन्दोद्भाविनी स्तोभात्मिका। सद्यः शिवजीवसामरस्य फला कौलाचारीया दीक्षेति वेदितव्यम्।

पञ्चधात्वधारणा —

द्र०- 'तत्त्वभेदनम्' इति।

पञ्चपिण्डनाथः — ~ मन्त्रः—कालकर्षिणीति समाख्यः पञ्चवर्णात्मकः स च "ख् फ्रें" इति। अर्थात् ख्, फ्, र, ए, — इति पञ्चवर्णपिण्डोऽयम्। यथा—

"अक्षिषण्मुनिवर्गेभ्यो द्वितीयाः सह बिन्दुना।।
योन्यर्णेन च मातृणां सद्भावः कालकर्षिणी।"
(तं० आ० 30, 45-46)

द्वितीयषष्ठसप्तमवर्गेभ्यो द्वितीयाः वर्णाः बिन्दुसहिता एकारेण च युता इति।

पञ्चपिण्डविद्या—

द्र०- **'पञ्चपिण्डनाथ'** — ~ **'मन्त्रः'** इति।

पञ्चप्राणा—

द्र०- **'प्राणवृत्तिः'~'पञ्चविधा'** इति।

पञ्चब्रह्माणि — ईशानादयः पञ्च-मन्त्राः नामाधिकारिणः पञ्चब्रह्माणीत्युच्यन्ते, बृहत्त्वादपरिमितत्वाद् विश्वबृंहकत्वाच्चेति। यथा —

"ब्रह्माण्येतानि कथ्यन्ते बृहत्त्वाद् विश्वबृंहणात्।"
(मा० वि० वा०, 1, 253)

पञ्चभूतानि — स्थूलानि पञ्चप्रमेयतत्त्वानि धरादीन्याकाशान्तानि प्रसिद्धानि।

~ भूतत्वम् (तेषाम्) — सर्वेषामपि प्रत्यक्षप्रतीतौ सत्तयावभासमानत्वं मुख्यं भूतत्वम्। तच्च पृथिव्यादि चतुष्टयस्य प्रत्यक्षज्ञानविषयस्य; तदवकाशदानसमर्थस्य चानुमानविषयस्याकाशस्यापि स्पष्टम्। यथा —

"सर्वप्रतीति-सद्भावगोचरं भूतमेव हि।
विदुश्चतुष्टये चात्र सावकाशे तदा स्थितिम्।।"
(तं० आ० 1, 191)

पञ्चमकाराः — ते च कौलाचारे रहस्यचर्यासु सनियममुपयोज्या आनन्दसन्दोहदाः भोग्यविषयाः। तद्यथाः-मद्यं, मांसं, मत्स्याः, मुद्राः (चणकवटकाः) मैथुनं च। स्वात्मसंविद आनन्दरूपतायाः साक्षादभिव्यक्तये तद्द्वारा च स्वात्मसंवित्-साक्षात्काराय प्रयोज्या एते आनन्दोद्दीपका विषयाः। एतदुपयोगतोऽभिव्यक्ते स्वात्मानन्दे एव चिरं सावधानाः सन्तः शिवयोगिन आणवं शिवभावसमावेशम् आसादयन्ति। अत्र जितेन्द्रिया वीरसाधका एवाधिकारिणो न सामान्यजनाः। इत्यत्रावधातव्यं सम्यक्। एते कदाचिच्छाक्तसमावेशेऽपि साहाय्यं भजन्ते।

कौलाचारेऽवश्यमुपयोज्या एते पदार्थाः न त्रिके तथावश्यकाः। परं पुरातनास्त्रिकाचारगुरवः प्रायशो मकारसेविनः कौलोपास्तिपराश्चाभूवन्नेव। तस्या उपास्तेस्त्वरितफलत्वात्। तत एव तन्त्रालोके मालिनी-विजयोत्तरतन्त्रेऽपि कौलिक्युपासना वर्णितास्ति। कश्चन कौलिकोपासनांशस्त्रिकगुरुभिरपि स्वीकृतोऽभ्यस्तश्चेति सूच्यते तेषामेवोक्तिभिस्तत्र तत्र ग्रन्थेषु लभ्यमानाभिः। ताश्चोक्तयस्तेषां तेषां गुरूणां परिचयेऽत्रैव कोषे द्रष्टव्याः।

पञ्चमन्त्रतनुः — ईशानः, तत्पुरुषः, सद्यो जातो, वामदेवोऽघोरश्चेति मन्त्राख्याः ये मन्त्रोचितशुद्धसंविन्मया अपि भेददर्शिनः ईश्वरभट्टारकावताररूपाः पञ्चाधिकारिणस्ते एव तनुः शरीरं यस्य स शिव एव पञ्चमन्त्रतनुः, ईशानादि शरीरयुतत्वेन विद्यमान एव शिवः सृष्ट्यादिपञ्चकृत्यानि सततं चालयति। तत एते पञ्चमन्त्राख्या अधिकारिणोऽस्य शरीरतयोच्यन्ते लक्षणया।

किञ्च — भगवान् स्वच्छन्दनाथशरीरतया विलसन् शिवः सत्यं पञ्चमन्त्रतनुः, तस्य पञ्चमुखत्वात् मुखानां च तेषामीशानतत्पुरुषादिरूपत्वात्।

दाक्षिणात्याश्च शैवसिद्धान्तविद्वांसः बहुरूपाघोरादयः शब्दात्मकाः जपाद्युपयोगिनः पञ्चमन्त्रा एव तनुः शरीरं यस्येति व्याख्यान्ति, यत् तदविचारितकथनमित्येव ज्ञेयं सुधीभिः।

पञ्चमन्त्राः — ईशानाद्याः पञ्च। तथाहि— भगवान् सदाशिवो देवः पञ्चमन्त्र-प्राणी शरीराणि धृत्वा पञ्चमन्त्रात्मकेशान-तत्पुरुष-सद्योजात-वामदेवाघोररूपतया प्रकटीभूय लोकेषु निग्रहानुग्रहकृत्ये निभालयति। यथा —

"क्रमात्सदाशिवाधीशः पञ्चमन्त्रतनुर्यतः।।
ईशत्रघोरवामाख्य सद्योऽधोभेदतो दिशः।"
(तं० आ० 15, 203-204)

'भगवान् सदाशिव एव बहिर्मुखत्वे सतीश्वर इति पञ्चमन्त्राख्यानामधिकारिणां क्वापि सदाशिवावताररूपत्वं कथितं क्वचिच्चेश्वरावतारत्वम्। भावनाभ्यासविषयोऽयम्। यथा—

"शिवशक्तिदशानन्तरं भगवान् पञ्चमन्त्रतनुः सदाशिवनाथो भवति।"
(तं० आ० वि०, खं०, 9, पृ०, 101)

एष क्रमस्तत्वाध्वधारणाविषये नियतः। तत्रैवमेव भावनाभ्यासो विधीयते।

~ धरादिरूपतया — ईशानाद्याः पञ्चमन्त्रप्रमातारोऽपि पारस्परिकसौक्ष्म्यतारतम्यमधिकृत्य पृथिव्यादिपञ्चतत्वरूपतया भाव्यन्ते। यथाः—

"पञ्चमन्त्रतनौ तेन सद्योजातादि भण्यते।
ईशानान्तं तत्र तत्र धरादिगगनान्तकम्।।"
(तं० आ० 11, 20)

पञ्चमुखानि — ~ शिवस्य — चिदानन्देच्छाज्ञानक्रियाख्याः पञ्चान्तरङ्गशक्तय एव शिवस्य पञ्चमुखानि। यथा —

"अत एव पञ्चभिश्चिदानन्देच्छाज्ञानक्रियात्मभिर्मुखैः....
.....शैवी मुखमिहोच्यते।"
(तं० आ० वि०, खं० 1, पृ०, 7)

पञ्चमुद्राः — ज्ञानसिद्ध-मन्त्रसिद्ध-मेलापसिद्ध-शाक्तसिद्ध-शाम्भवसिद्धानां मुद्राः क्रमेण करङ्किणी, क्रोधिनी (क्रोधनी), भैरवी, लेलिहाना, खेचरी चेति। यथा —

"करङ्किणी क्रोधिनी (क्रोधनी) च भैरवी लेलिहानिका।
खेचरी चेति मुद्रा याः पञ्चात्मकतया स्थिताः।।

यो ज्ञानमन्त्रमेलापशाक्तशाम्भवभेदतः।
क्रमस्तस्य यथासंख्यमेताभिः सर्वथान्वयः।।"

उद्धं० (वि०भै०उ०, पृ०, 67)

पंचमूर्त्तिः — ईशानः तत्पुरुषः, सद्योजातः, वामदेवः, अघोरः इति पञ्चमन्त्रशरीरधारी शिवः। यथा—

"पञ्चमूर्त्तिः - सद्योजातादितया।"

(तं० आ० वि०, खं० 1, पृ०, 153)

पञ्चवाहाः — वाहाः परमेश्वरस्य स्फुरणधाराः खेचर्याद्याः यथा —

"वाहाः परमेश्वरस्य स्फुरणधाराः। ताश्च पञ्च..। ते च वाहाः — व्योमवामेश्वरी, खेचरी, दिक्चरी, गोचरी, भूचरीति च भवन्ति।"

(म०मं०प०, पृ०, 85)

विश्वव्यवहारसञ्चालनकारिण्यो देव्यः खेचर्याद्या तत्तद्व्यूहात्मकतया प्रतिजीवमधिकृताः सत्यो विश्वानपि व्यवहारान् वहन्तीति वाहाः परमेश्वरस्येति वेद्यम्।

पञ्चविधः सम्बन्धः — ~ गुरुशिष्यपरम्परासु— शास्त्रतत्त्वज्ञानानामधोऽधोऽवतरणे पञ्च प्रकाराः गुरुशिष्यसम्बन्धा भवन्ति, यैः सोपानकल्पैः शास्त्रतत्त्वज्ञानानि शिवात् सांसारिकं साधकं यावत् प्राप्नुवन्ति। ते च सम्बन्धाः एतेः– (1) महान्, (2) अवान्तरो (अन्तरालो वा), (3) दिव्यो, (4) दिव्यादिव्यः, (5) इतरेतरः, इति।

(1) यत्र शिवः शास्त्रतत्त्वज्ञानस्य परिस्फुरणं सदाशिवे समुद्भावयति तत्र शिवसदाशिवयोर्यः उपदेष्टृपदेश्यसम्बन्धोऽसौ महानिति परिभाष्यते। स च प्रथमः सम्बन्धः।

(2) यत्र भगवान् सदाशिव उपदेष्टा अनन्तनाथ उपदेश्यस्तत्र यः सम्बन्धस्तयोरसाववान्तर इति वा अन्तराल इति वा समाख्यायते। एष द्वितीयः सम्बन्धः।

(3) तृतीयः सम्बन्धो दिव्य इत्युच्यते। तत्र सम्बन्धे उपदेष्टा तावत् भगवान् अनन्तनाथः, उपदेश्यश्च भगवान् श्रीकण्ठनाथः। स एव च सम्बन्धोऽनन्तनाथस्य नन्दिनापि सह। यत् उभाभ्यामनन्तनाथादेव शास्त्रतत्त्वावबोध उपलब्धः। अथवाऽनन्तनाथेन यः सम्बन्धः श्रीकण्ठनाथस्य यश्च नन्दिनः श्री कण्ठनाथेन तदुभयमेककोटिकं दिव्यम् इति परिभाष्यते। गुरुशिष्ययोरुभयोरपि दिव्यत्वात्। एवमेव बृहस्पतिमिन्द्रं च यावत् सम्बन्धो दिव्य एव।

(4) चतुर्थः पुनः सम्बन्धो दिव्यादिव्यः। तत्र दिव्यशरीरधारी नन्दी उपदेष्टा, अदिव्यशरीरधारिणश्च ऋषय उपदेश्याः।

(5) पञ्चमस्य संज्ञा इतरेतर इति। तत्र गुरवोऽप्यदिव्या एव, शिष्या अपि तथाविधा एव। तेन सम्बन्धेन ऋषयः शिष्येभ्यः व्याख्याकारेभ्यश्च शास्त्रतत्त्वानि वैखर्या वाचोपदिष्टवन्तः। दिव्यादिव्यस्तावत् सम्बन्धो मध्यमा वाङ्माध्यमेन। दिव्ये तावत् शङ्काः मध्यमाया माध्यमेन समाधानं च पश्यन्त्या माध्यमेन। अन्तराले पुनः पश्यन्त्या - एवाधरोत्तरस्तद्वयस्य माध्यमेन शङ्कासमाधाने। महति सम्बन्धे पश्यन्त्या माध्यमेन शङ्कोत्थापनं, परायाश्च माध्यमेन तत् समाधानम्। परस्य सम्बन्धस्य क्षेत्रं तुर्यायाः उत्कृष्टतमं सोपानं तुर्यातुर्यम्, महतः पुनस्तुर्यस्य मध्यमं सोपानं तुर्यस्वप्नेति समाख्यम्। अवान्तरस्य क्षेत्रं च तुर्यजाग्रदिति। एतावान् तुर्य एव सर्वम्। दिव्ये पुनः शङ्का स्वप्नदशायां, तत् समाधानं च तुर्यायाम्। दिव्यादिव्यस्य वक्तारः स्वप्नदशाभाजः श्रोतारश्च जाग्रद्दशाधिकारिणः। इतरेतर उभयेऽपि जाग्रद्दशोचिता एव लोकव्यवहारे समुल्लसन्ति। यथा—

"यथोक्तं रत्नमालायां सर्वः परकलात्मकः।
महानवान्तरो दिव्यो मिश्रोऽन्योऽन्यस्तु पञ्चमाः।।"

(तं० आ० 1, 274)

"महानवान्तरो दिव्यो दिव्यादिव्यश्चतुर्थकः।
इतरेतरमार्गेण पञ्चधा भिन्नलक्षणः।।"

उद्धं० (तं०आ०वि०,खं० 1, पृ०, 282)

"एतच्च सम्बन्धपञ्चकं शिवात् सदाशिवस्य, तस्मादनन्तनाथस्य, तस्माच्छ्रीकण्ठनन्दिकुमारादीनां, तेभ्योऽपि सनत्कुमारादीनामृषीणां, तेभ्योऽपि मनुष्यादीनां क्रमेणावगन्तव्यम्।"

(तं०आ०वि०,खं० 1, पृ०, 283)

तदेतद्रहस्यं तन्त्रालोकविवेके समुद्धृतै रत्नमालाऽऽगमवाक्यैः स्पष्टीकृतम्। यथा—

"शिवस्य परिपूर्णस्य परस्यामिततेजसः।
तच्छक्तिश्चैव सादाख्यः स्वेच्छाकर्तृत्वगोचरः।।
तत्त्वं तेन च सम्प्राप्तं सम्बन्धं प्रथमं विदुः।
अवांतराच्च योगेन सादाख्यात् क्रमशः पुनः।।
प्राप्तोऽनन्तेशदेवेन द्वितीयस्तेन कीर्तितः।
तृतीयस्तु पुनर्देवि श्रीकण्ठे नन्दिना सह।।
द्वाभ्यां देवात्तु सत्वेवं तेन दिव्यः प्रकीर्तितः।
ऋषीणां च समासेन नन्दिना प्रतिपादितम्।।
चतुर्थस्तद्भगवता दिव्यादिव्यः प्रकीर्तितः।
व्याख्यानक्रमयोगेन विद्यापीठप्रपूजने।।
शिष्याचार्यस्वरूपेण पञ्चमस्त्वितरेतरः।
इति पञ्चप्रकारोऽयं सम्बन्धः परिकीर्तितः।।"

उद्धः— (प० त्री० वि०, टि०, पृ०, 12)

पञ्चशक्तयः — ~ अन्तरङ्गाः — ताश्च— (1) चिच्छक्तिः, (2) आनन्दशक्तिः (निवृत्तिनामधेयापि), (3) इच्छाशक्तिः, (4) ज्ञानशक्तिः, (5) क्रियाशक्तिः इति। ~ व्यवहारे — एकस्मिन्नपि क्वापि ज्ञानक्रियामये लोकव्यवहारेऽपि पञ्चापि शक्तयो मिलित्वैव तं तं व्यवहारं साधयन्ति। यथा—

"घटादिग्रहकालेऽपि घटं जानाति सा क्रिया।
जानाति ज्ञानमत्रैव निरिच्छोर्वेदनक्षतिः।।
औन्मुख्याभावतस्तस्य निवृत्तिर्निर्वृतिं विना।
द्वेष्ये प्रवर्तते नैव न च वेत्ति विना चितम्।।"
(शि० दृ० 1, 24-25)

अत्रेच्छा पूर्वभाग औन्मुख्यपदेनोक्तः, तस्य पृथग्गणनेन शक्तय इमाः षट्।

पञ्चशतिकम्ः — आगमविशेषः। श्री देवी पञ्चशतिकैव। यथा—

"तदुक्तं श्री पञ्चशतिके—
अलक्ष्या लक्ष्यनिर्लक्ष्या सुकाली नाम सिद्धिदा।।"
डकला भीषणा रौद्रा कुलकालिनिराकुला।
उद्ध०:— (तं० आ० वि०, खं० 3, पृ०, 189)

अत्र या सुकालीति संज्ञया प्रतिपादिता काली सा द्वादशाधिका। एतन्मते ततस्त्रयोदश काल्यः। यथा—

"ननु क्रमदर्शने सर्वत्रैव श्री सृष्ट्यादिदेवीनां मध्ये श्रीसुकाल्या भगवत्या अभिधानं येनानाख्यचक्रे त्रयोदशदेव्यः।"
(तं० आ० वि०, खं० 3, पृ०, 189)

पञ्चशतिका : — कालीनयोपासनाविषयकः कोऽपि महत्त्वमण्डितः आगमशास्त्रग्रन्थः समुद्धृतो बहुशस्तन्त्रालोकविवेके जयरथेन। देवी प्रोक्तमिदं तन्त्रं शिवं प्रति। एतत् स्थिति-नाशकालीवर्णनश्लोकेषु स्पष्टम्। यथा—

"श्री पञ्चशतिकादौ.....।
.....यदुक्तं तत्र—
मन्त्रोदया व्योमरूपा व्योमस्था व्योमवर्जिता।
सर्व विनिर्मुक्ता विश्वस्मिन् सृष्टिनाशिनी (भासिनी)।
या कला विश्वविभवा सृष्ट्यर्थकरणक्षमा।
यदन्तः शान्तिमायाति सृष्टिकालीति सा स्मृता।।"
उद्ध०- (तं० आ० वि०, खं० 3, पृ०, 158)
द्र०- (तं० आ० वि०, खं०, 12, पृ०, 197)

पञ्चस्रोतश्शास्त्रम्ः — ईशान-तत्पुरुष-सद्योजात-वामदेव-अघोरनामकाः पञ्चमन्त्राः श्री-स्वच्छन्दनाथस्य चिदानन्दादि-शक्तिप्रधानाः स्वरूपभेदाः। त एव यानि शास्त्राण्युपदिष्टवन्तस्तानि पञ्चस्रोतोरूपाणि शास्त्राण्युच्यन्ते। तानि च दशशिवागमाः, अष्टादशरुद्रागमाः, चतुष्षष्टि-भैरवागमाश्चेति परिगणितास्ते श्री-श्री-कण्ठी- संहितायाम्। तद्वाक्यान्युद्धृतानि तन्त्रालोकविवेके। यथा —

द्र०- (तं० आ० वि० खं० 1, पृ०, 39-43)

"चिदानन्देच्छाज्ञानक्रियामय - ईश-तत्पुरुष-सद्योजातवामदेवाघोररूपाणि पञ्चस्रोतांसि तन्मयं शास्त्रम्।"
(तं० सा०, टि०, पृ०, 4)

द्र०- (तं० आ० वि० खं० 1, पृ०, 36-45)

"तच्च पञ्चविधं प्रोक्तं शक्तिवैचित्र्यचित्रितम्।
पञ्चस्रोत इति प्रोक्तं श्रीमच्छ्रीकण्ठशासनम्।।"
(तं० आ० 37, 16)

पञ्चाक्षरः — ~ मन्त्रः—

पञ्चकूटबीजमन्त्रः ते च ऊँ, ह्रीं, हूं, फ्रें, ह्, र्, क्ष्, म्, ल्, व्, य्, इति। यथा —

"तारो माया वेदकलो मातृतारो नवात्मकः।
इति पञ्चाक्षराणि स्युः प्रोक्तव्याप्त्यनुसारतः।।"
(तं० आ० 30, 90-91)

पञ्चात्मकत्वम् — ~ तत्त्वभेदने
द्र०—**'तत्त्वभेदनं** ~ 'पञ्चात्मकम्' **इति।**

पञ्चात्मकभेदे ~ अवस्थाः
द्र०—**'अवस्थाभेदविस्तरः'** इति।

पञ्चात्मकभेदे ~ दशाः —
द्र०:—'अवस्थाभेदविस्तरः' इत्यत्र।

पञ्चात्मिका— ~ विद्या
द्र० — तत्त्वभेदनं'— ~ 'पञ्चात्मकम्' **इति।**

पञ्चामृतम् : — किमपि तांत्रिकं योगशास्त्रं यस्य पंक्तयः समुद्धृताः जयरथेन। यथा — "इति। श्री पञ्चामृतेऽपिः —'तर्जनी शत्रुविजये मध्यमा तर्पणेस्मृता। अनामा शोषणे योज्य कनीया क्षीनकर्मसु।। तस्मात्सर्वत्रयत्नेन मध्यमाङ्गुष्ठे सर्वकर्मस्तु सामर्थ्याव्यध्यमातु योगतः तर्पयद्देवदेवेशं मातृचक्रं विशेषतः। प्रशंस्यते।।"

द्र० (तं० आ० वि०, खं० 9, पृ०, 140)

पंचारचक्रम् : — पाञ्चभौतिकं स्थूलं शरीरम्। यथा —

"पञ्चारे-भौतिके शरीरे।"
(तं० आ० वि०, खं० 3, पृ०, 148)

पञ्चार्थप्रमाणम्— कोऽपि शैवशास्त्रग्रन्थः। यथा —

"श्री पञ्चार्थप्रमाणे तु –
'घोरेति पाशजालाख्यं पापयुक्तं भयानकम्।
तद्येषां तु न विद्येत ह्यघोराः परिकीर्तिताः।।" इत्यादि।
(स्व० तं० 3, प I, पृ०, 38)

पञ्चाशत् (समावेशाः) —
द्र० — **'शाम्भवसमावेशः'**—~ 'पञ्चाशद्विधः' **इति।**

पञ्चाशिका : — किमप्यद्वैतशैवशास्त्रमभिनवगुप्तकृतं यद्राघवनमहोदयैः प्रकाशितम्। पर्यन्तपञ्चाशिका इत्यस्य पूर्णं नाम। अत्र ग्रन्थे मातृकोपासनाक्रमः, परापश्यन्त्यादि-वाक्चतुष्टयं च विशेषतया कयापि संख्या प्रतिपादितं वर्तते। यथा—

"पर्यन्त-संपदुपपादन-कल्पवल्ली
पञ्चाशिका परमकारुणिकेन येन।
प्रोक्ता त्विहाद्वयनये जनतां नियोक्तुं
तस्मै नमोऽभिनवगुप्तगुरूत्तमाय।।"
(गु० ना०, पृ०, 19)

पञ्चिका — मालिनीविजयोत्तरतन्त्रेऽभिनवगुप्तकृता व्याख्या याऽद्यत्वे नैव लभ्यते क्वापि। तदुल्लेखः कृतो जयरथेन। यथा —

"अत एवाम्बुजन्मार्कदृष्टान्तोऽत्र निरूपितः।"
(इति तं० आ० 23, 95 इति कारिकाव्याख्यायाम्)
"निरूपित इत्येतद्विवरण एव पञ्चिकायाम्।"
(तं० आ० वि०, खं० 10, पृ०, 292)

विवरण इत्यपि नामान्तरं प्रसिद्धमासीत् पञ्चिकाया इत्यनेन ज्ञायते। सम्भवत इयमेव पूर्वपञ्चिकेत्यन्यत्रोल्लिखितेति।

द्र० — 'पूर्वपञ्चिका' इति।

अस्याः पंक्तयः समुद्धृता जयरथेन तन्त्रालोकविवेके। यथा —

"दिवाकरकरासारविरहात् सङ्कुचत् कजम्।
सत्स्वप्यन्यग्रहमहस्स्वेति नैव विकासिताम्।।
एवं शिष्यहृदम्भोजं गुरुपादविवर्जितम्।
निमीलद् विकसत्येव पुनस्तत्पादपाततः।।"
(तं० आ० वि०, खं० 10, पृ०, 292)

पतनकारणत्रयम् — तच्च (1) अविद्याख्य आणवो मलः, (2) परमेश्वरस्य तिरोधानशक्तिः, (3) माया चेति। कलाविद्यारागास्तु सहकारिणः। यथा—

"एवमविद्यामलिनः समर्थितस्त्रिगुणकञ्चुकबलेन।।
गहनोपभोगगर्भे पशुरवशमधोमुखः पतति।"
(तं० आ० 9, 211-212)

"अविद्यया — आणवेन मलेन तदुपलक्षिताभ्यामीशशक्तिमायाभ्यां च मलिनः .....त्रिविधकञ्चुकबलेन .....।"
(तं० आ० वि०, खं 6, पृ०, 169)

पतिः — ~ प्रमाता— (1) भावान् स्वाङ्गरूपतया पश्यन्नभेददृष्टिप्रधानः प्रमाता। यथा—

"स्वाङ्गरूपेषु भावेषु प्रमाता कथ्यते पतिः।"
(ई० प्र०, 3- 2-3)

एतेन ज्ञायते यन्मन्त्रेश्वरा मन्त्रमहेश्वराश्च पतिप्रमातारः तथैव चाकलाः शिवा अपि।

मन्त्रा अपि भूयसा अंशेन पतयः एव। विज्ञानकलाः पुनः पतिभावगमनोन्मुखाः एव, न पतयः।

(2) मुक्तः प्रमाता। यथा —

"यश्चासौ मुक्तः स भावान् स्वाङ्गवद्भिः मन्यमानः प्रमिमीते – इति स तेषां स्वामी स्वरूपपरमार्थ-समर्पणाच्च पालक इति पतिरुपदिष्टः शास्त्रे।"
(ई० प्र० वि०, खं० 2, पृ०, 220)

~ शिवः —(1) जन्तुचक्रपालकः परमेश्वरः शिवः पालकत्वेन पतिः। यथा—

"निखिलस्य जन्मवतो जन्तुचक्रस्य पालनादियोगात् "पतिः" परमेश्वरः।"
(तं० आ० वि०, खं० 3, पृ०, 63)

(2) ज्ञानोपदेशात्मकशासनकृत्, विलयकृत्येन पशूनां संसारचक्रेऽवस्थापयिता, संसारचक्रस्य प्रवहद्रूपतया स्थापनकारी, मलपाककृच्च, शिव एव पतिः। यथा—

"शासनरोधन-पालन-पाचनयोगात् स सर्वमुपकुरुते।
तेन पतिः श्रेयोमय एव शिवो नाशिवं किमपि तत्र।।"
(तं० आ० 1, 104)

~ तत्कृत्यानि : — तानि च सृष्टिः, स्थितिः, संहारः, विधानम्, अनुग्रहः इति पारमेश्वराणि पञ्च कृत्यानि। यथा —

"सृष्टि-संहार-कर्तारं विलयस्थितिकारकम्।
अनुग्रह करं देवं प्रणतार्तिविनाशनम्।।"
(स्व० तं० 1, 3)

पतिज्ञानम् : — अभेदनिष्ठं विशालदृष्टिकं शैवं ज्ञानम्। तच्च द्वैतादिरूपात् पशुज्ञानादुत्कृष्टत्वेन तद्बाधकम्। यथा —

"सङ्कोचतारतम्येन पाशवं ज्ञानमीरितम्।
विकासतारतम्येन पतिज्ञानं तु बाधकम्।।"
(तं आ० 4, 253)

पतिशास्त्रम् : — अद्वैतपरं पारमेश्वरसिद्धान्तपोषकं शैवं शाक्तं च दर्शनशास्त्रम्। यथा —

द्र० — 'पतिज्ञानम्' इति।

पत्रलेखिकाः —

द्र० 'मातरः' इति।
(ते० तं० उ०, खं० 2, पृ०, 145-146)

पदम् : — एकः परामर्श एवैकं पदं त्रिकशास्त्रे। तच्च सुप्तिङ्पदात्मकं, वर्णसंघट्टरूपमन्त्रात्मकं, वर्णात्मकम्, अर्धमात्रात्मकं चेति बहुधा, नात्र सुबन्तता तिङन्तता च प्रधाना अपितु परामर्शात्मकतैव। वाक्यमप्यकविमर्शविश्रान्तं सत् पदमेवात्र। यथा —

"तत एव परामर्शो यावत्येकः समाप्यते।।
तावत्तत्पदमुक्तं नो सुप्तिङ्नियमयन्त्रितम्।"
(तं० आ० 6, 229-230)
"नमः शिवायेति पदं षडर्णं प्रणवादिकम्।"
उद्ध०- (तं० आ० वि०, खं० 4/1, पृ०, 187)
ॐ नमः शिवायेति मन्त्रः षडक्षर इति।

~ स्वप्ने : — सर्वस्याध्वनः प्रतिष्ठास्थानम्, स च प्राणः। किञ्चावगमात्मकः सङ्कल्पोऽपि तथा। ततः प्राणः सङ्कल्पश्चेत्युभयं पदसंज्ञम्। यथा —

"सर्वाध्वनः पदं प्राणः सङ्कल्पोऽवगमात्मकः।
पदं च .....।।"
(तं० आ० 10, 254-255)

पददीक्षा : — "पददीक्षायां तु नवधा विभक्तायाः प्रथमे प्राकृते प्रणवाद्यूकारान्ते पदानां नवके निवृत्तिप्रतिष्ठे कले, पृथिव्यादीनि प्रधानान्तानि पञ्चविंशतितत्त्वानि, भुवनानां कालाग्न्यादियोगाष्टकान्तं शतं चतुष्षष्ट्यधिकं,

क्षादिटान्ताश्चतुर्विंशतिर्वर्णाः, सद्योजातवामदेवहृदयशिरः शिखाः पञ्चमन्त्राश्चान्तर्भूताः।।1।।

पौरुषे ऊकारादियकारान्ते नवके विद्या कला, पुरुषरागौ तत्त्वे तुष्टिसिद्धी भुवने, अणिमादिगुरुशिष्य-पंक्तित्रयनाडी-विग्रहाष्टकदेह-पाशागन्तुगणेश-विद्येशपाशभुवनानि दश सुहृष्टादिरुद्रदशकस्य कल्याण्यादेर्गुरुशिष्यदशकस्य भुवनमिति चतुर्दशभुवनानि, ञ्झौ वर्णौ, मन्त्रावघोरकवचौ। ।।2।।

ऊकारादिवकारान्ते नैयते नवके कलामन्त्रौ प्राग्वत्। एवमुत्तरत्रापि। नियतिविद्ये तत्त्वे, वामदेवाद्यष्टकभुवनं वामादिनवकभुवनं च, जच्छौ वर्णौ।।3।।

ऊकारादिलकारान्ते कालीये नवके कालकले तत्त्वे, शुद्धादिदशकभुवनं महादेवादिभुवनत्रयं च, चञौ वर्णौ।।4।।

ऊकारादिमकारान्ते मायीये नवके माया तत्त्वं, गोपत्याद्यनन्तान्तानि सप्त भुवनानि, घ-वर्णः ।।5।।

ऊकारादिक्षकारान्ते विद्यापदनवके विद्यातत्त्वं, त्रिगुणादि-विद्याराज्ञी-भुवनमेकं, शान्ता कला, तत्पुरुषास्त्रे मन्त्रौ, ग-वर्णः।।6।।

ऊकारादिरेफान्ते ऐश्वरे नवके कलामन्त्रौ प्राग्वत्, ऐश्वरं तत्त्वं, ईश्वरभुवनादिज्ञानक्रियाभुवनान्तं भुवनपञ्चदशकं, ख-वर्णः ।।7।।

ऊकारादिहकारान्ते सादाशिवे नवके सादाशिवं तत्त्वं, सादाशिवमेव सुशिवाद्यनन्तभुवनव्यापकमेकं भुवनं, क-वर्णः ।।8।।

ऊकारादि प्रणवान्ते शैवे नवके शान्त्यतीता कला, शक्तितत्त्वाभिन्नं शिवतत्त्वं, शान्त्यतीता-भुवनादिकानि शिवभुवनान्तानि षोडशभुवनानि, नेत्राभिन्नमूर्तिः ईशान-मन्त्रः, विसर्गाद्या हकारान्ताः षोडश वर्णाः ।।9।।"

(स्व० तं० उ०, प० 5, पृ०, 31-33)

एताः पदवर्णमन्त्रालम्बना उपासनाप्रक्रिया इदानीं लुप्ता एव। न कोऽपि साधक एतद्रहस्यवित् क्वापि। न चापि शास्त्रेषूपासना पद्धतय इमाः क्वापि सम्यग् रूपेण स्पष्टीकृता। इति विदाङ्कुर्वन्तु सुधियः।

पदशिवाः — ज्ञानशक्तेः साक्षात्कारकारिणो, भगवान् सदाशिवो, मन्त्रमहेश्वराः, साक्षात्कृतनिज-दिव्यज्ञानशक्तयश्च संसारविरक्ता योगिनः। यथा —

"क्वचिदन्तः कृतौ ज्ञानाद् भवेत् पदशिवात्मना।।"

(शि० दृ० 9, 30)

पदस्थम् — (1) योगिनः स्वप्नावस्थां पदस्थमिति वदन्ति।

द्र०- 'अवस्थाः' ~ 'संज्ञाभेदतः' इति।

(2) पदे सकललोकव्यहाराधाररूपे सङ्कल्पभित्तौ, तदाधारे च पुर्यष्टक एव मुख्यतया स्थितो जीवनव्यापारो यः स्वप्नाख्योऽसावत एव पदस्थमिति परिभाषितं योगिभिः। यथा —

"सर्वाध्वनः पदं प्राणः सङ्कल्पोऽवगमात्मकः।।
पदं च तत् समापत्ति-पदस्थं योगिनो विदुः।"

(तं० आ० 10, 254-255)

"याः संवित्तीरवाप्नोति ता अधस्तात्प्रकीर्तिताः।।
तदेव पदमिच्छन्ति सर्वार्थावगतिर्यतः।"

(मा० वि० तं० 20, 4-5)

~ तत्त्वभेदने : — प्राणाधारे स्थितः सङ्कल्पात्मकः प्रपञ्चः पदस्थमिति परिभाषितम्। या पदात्मकप्रपञ्चसमापत्तिस्तत्त्वभेदन-धारणासु सैव पदस्थमिति। यथा —

"पदं च तत् समापत्तिः पदस्थं योगिनो विदुः।"

(तं० आ० 10, 255)

"अवगमात्मकत्वात्सङ्कल्पोऽपि पदं तदैकात्म्यमेव च तत्स्थत्वमुच्यते। ..... तेन प्राणैकात्म्यं सङ्कल्पैकात्म्यं चेत्यर्थः।"

(तं० आ० वि०, खं० 7, पृ०, 174)

~ प्रकारभेदतः — पदस्थं चतुर्विधं भवति। तद्यथा— गतागतं, सुविक्षिप्तं, सङ्गतं, सुसमाहितं चेति। यथा —

".....पदस्थं च चतुर्विधम्।।
गतागतं सुविक्षिप्तं सङ्गतं सुसमाहितम्।।"

(मा० वि० तं० 2, 43-44)

द्र०- 'अवस्थाभेदविस्तरः' इति।

पदाध्वा : — (1) प्रमाणरूपतामवतीर्णा संवित् पदाध्वा। यथा—

"प्रमाणरूपतामेत्य प्रयात्यध्वा पदात्मताम्।"

(तं० आ० 11, 57)

(2) किञ्च वर्णसंघट्टरूपता पदस्य स्वरूपम्। संघट्टता च प्रमात्रा कल्पनया कल्पितेति विकल्पात्मिका असौ प्रमाणरूपता। यथा —

"तथाहि मातुर्विश्रान्तिर्वर्णान् संघट्य तान्बहून्।
संघट्टनं च क्रमिकं संजल्पात्मकमेव तत्।।
विकल्पस्य स्वकं रूपं भोगावेशमयं स्फुटम्।
अतः प्रमाणतारूपं पदमस्मद्गुरुर्जगौ।।"

(तं० आ० 11, 58-59)

(3) पदसाहाय्येन शिवत्वसाक्षात्कारोपायभूतः साधनविशेषः पदाध्वा। पदमन्त्रवर्णालम्बनोऽयमध्वा सर्वथा गोप्य एव। ततो न स्फुटं प्रतिपादितः केनापि। यथा —

"अध्वषट्कं यथा प्राणे संस्थितं कथयामि ते।।
.....पादाध्वाप्रोच्यतेऽधुना।।
एकाशीति पदान्येव विद्याराजस्थितान्यपि।
वर्णात्मकानि तान्यत्र वर्णाः प्राणात्मकाः स्थिताः।।
तस्मादेवं पदान्यत्र तानि प्राणक्रमेण तु।
पदाध्वैवं समाख्यातः .....।"

(स्व० तं० 4, 241, 251-253)

(4) प्रमातृभागगः विकल्पप्रक्षोभयुतः प्रमाणांशप्रधानः शाब्दः स्वात्मतत्त्वविमर्शः पदाध्वा। यथा—

"यत्प्रमाणात्मकं रूपमध्वनो मातृभागगम्।
पदं ह्यवगमात्मत्वसमावेशात्तदुच्यते।।"
(तं० आ० 11, 44)

"यन्नाम हि प्रमात्रंशाश्रयणेन प्रमाणात्मकं बाहिर्मुख्यात्प्रक्षुब्धमध्वनो रूपं तत् पदमुच्यते। ..... यतः पद्यते ज्ञायतेऽनेनार्थः, इत्यवगमात्मकं पदम्, अध्वनोऽप्यवगमात्मत्वसमावेशात्।"
(तं० आ० वि०, खं० 7/2, पृ०, 37)

~तत् प्रामाण्यम् : — यत्तावदभिनवगुप्ताचार्येण पदाध्वनः प्रतिपादनं कृतं तत्स्वगुरोः (सम्भवतः श्रीशम्भुनाथस्य) उपदेशस्यानुसारमेव कृतमिति तत् सर्वथा प्रमाणं, सुविदितवेदितव्यत्वाच्छ्रीशम्भुनाथस्य सूचितं यथा—

"अतः प्रमाणतारूपं पदमस्मद्गुरुर्जगौ।।"
(तं० आ० 11, 59)

पद्मत्रयादिभावना : — शक्तित्रयस्यैवावस्थाभेदानुगुणा भावनाऽरात्रयपद्मत्रयादिमयी मण्डलविधौ। यथा—

"आसामन्योऽन्यासंकीर्णत्वे गलद्भेदतायामरात्रयत्वं, गलितभेदतायां पद्मत्रयत्वम्, अन्योऽन्यात्मकत्वे गलद्भेदतायां शक्त्यादित्रयत्वं गलितभेदतायां तु एवं रूपत्वम्। (कालकर्षिणी रूपत्वमिति)।"
(तं० आ० वि०, खं० 9, पृ०, 174)

पद्मम् :— कौलिकादौ रहस्यचर्याक्रमे स्त्रैणमानन्देन्द्रियम्।

द्र० 'वज्रम्' इति।

पद्मरजः — त्रसरेणुः।

द्र० 'त्रसरेणुः' इति।

पद्मानन्दः — उत्पलदेवस्य सहपाठी वयस्यः।

द्र० 'विभ्रमाकरः' इति।

पयः — न स्पष्टीकृतं पदमिदं टीकाकृता।
(तं० आ० वि०, खं० 12, पृ०, 201)

परं — ~ त्रिकम् —

द्र० 'त्रिकम्' ~ 'परम' इति।

परं ब्रह्म — ब्रह्म हि (1) बृंहद् = व्यापकम्, (2) बृंहितं = स्वत एव विश्वविकासरूपतयाभासमानम्, (3) बृंहकं च = स्वेच्छया स्वशक्त्या विश्वावभासविकासकम्। ब्रह्मविष्णुरुद्रेश्वरसदाशिवापेक्षया परमशिव एव परं ब्रह्म, एतेषामपरब्रह्मत्वमेव यतः।

द्र०- 'ब्रह्म' इति।

~उपास्यत्वे — अमाख्या सप्तदशी कलैव ब्रह्म।

द्र० 'शिवव्योम' इति।

~तृतीयम् : — मातृकाक्रमोपास्तौ तृतीयमुत्कृष्टं ब्रह्म सदाशिवात्मकसकाररूपम्। तत्र शकारः प्रथमं ब्रह्म शुद्धविद्यात्मकं, षकारो द्वितीयमीश्वरतत्त्वात्मकम्। यथा—

"तदेव ब्रह्म परममविभक्तं प्रचक्षते।।"
(तं० आ० 3, 167)

"तृतीयं ब्रह्म सुश्रोणि।"
(मा० वि० तं०, उद्धृ० तं० आ० वि०, खं०, 2, पृ०, 166)

~ तत्स्वभावः — परिपूर्णाहं विमर्शस्वभावः परिपूर्णः संवित्प्रकाश एव परं ब्रह्म। स विमर्शाख्योऽस्य स्वभाव एव हि परः स्पन्दः इत्युच्यते। यथा—

"तस्माद्विमर्शो देवस्य स्वभावोऽस्माभिरुच्यते।।
भवन्त्यस्यैव पर्यायाः शक्तिरैश्वर्यमुद्यमाः।
स्पन्दः स्वतन्त्रता स्फूर्तिरुर्मिरोजः कलेत्यपि।।"
(म० मं० प०, पृ०, 130)

परं— (1) ~ लिङ्गम् — उच्चाराभ्यासक्रमे यद् अव्यक्तलिङ्गं तदेव हि परं लिङ्गम्। तच्च मोक्षमात्रफलप्रदम् शिवात्मकं च। यथा—

"तत्राव्यक्तं (लिङ्गं) परैव संवित्।"
(तं० आ० वि०, खं०, 3, पृ०, 423)

परं (2) ~ विसर्गतत्त्वम् उक्तं यथा —

"विश्रांतित्रयमयशान्तोदिततदुभयलक्षणत्रयैकरसताकारि परं विसर्गतत्त्वं संविद्भैरवनाथ एवेति।"
(प० त्री० ल० वृ०, पृ०, 17)

परं (3) ~ शरीरम् — बिन्दुनादादिसमनान्तं शरीरं परम्। योगिभिः साक्षात्कार्यमेतत्। यथा—

"(1) महाभूतात्मकं, (2) पुर्यष्टकरूपम्, (3) समनान्तं च यत् (1) स्थूलं (2) सूक्ष्मं (3) परं शरीरम्।"
(शि० सू० वि०, पृ०, 38)

परः — (1) कालः—

द्र० 'कालः' इति।

~ कालाध्वा — प्राणचारे यो वर्णोदयः स परः कालोदयः। यथा—

"प्राणचारेऽत्र यो वर्णपदमन्त्रोदयः स्थितः।
यत्नजोऽयत्नजः सूक्ष्मः परः स्थूलः स कथ्यते।।"
(तं० आ० 6, 216)

तत्र वर्णोदयः = परः, मन्त्रोदयः = सूक्ष्मः, पदोदयः = स्थूलः। तत्र वर्णोदयोऽयत्नजः, मन्त्रपदोदयौ यत्नजौ, भावनाश्रितत्वाच्च तयोः, साधकेच्छा-सङ्कल्पादियत्नत एव यत उदयः।

परः — ~(2) प्रकाशः – स च स्वयं शिव एव संविद्घनः। यथा—

"इत्थं स्व संविद्घन एक एव,
शिवः स विश्वस्य परः प्रकाशः।"
(प० च०, 2)

परः — ~ वर्णोदयः— स्वारसिको वर्णोदयः प्राणचारे।

यथा—

"यथा— स तु द्विधा स्वारसिकः प्रायत्निकश्चेति। तत्राद्यो वर्णानाम्, तेषां नैयत्येन सर्वत्रैवाविशेषात्; द्वितीयस्तु पदानां मन्त्राणां च, ...योगीच्छानिबन्धन एवैषामुदयः।"
(तं० आ० वि०, खं०, 4, पृ० 177)

रहस्ययोगप्रक्रिययैव साक्षात्कार्योऽयं न तर्कादिविषयः। प्राणचारे दत्तावधानाः परयोगिन एव साक्षात्कुर्वन्ति तं वर्णोदयम्।

परः — (4) शिवः — पारमैश्वर्यचमत्कारानन्द-दशोत्तीर्णोऽनुत्तरः परसंवित्प्रकाशो यः स्फुटं वर्णयितुमशक्य एव। असावानन्दचमत्कारस्तु पारमैश्वर्यात्मकशक्त्यावेशे एवानुभूयते।

यथा—

"सानन्दा तु परा शक्तिर्निरानन्दः परः शिवः।"

(ते० तं० 21, 32)

निरानन्द इत्यानन्दशक्तेर्निष्क्रन्तस्तत उत्क्रान्त इति। न हि तत्राऽऽनन्दशक्तेर्यथाभिलषिताऽभिव्यक्तिः; तस्य चिच्छक्तिप्रधानत्वादानन्दशक्त्यतीत्वमिवानन्दस्यात्र गौणत्वेन। ततो निर्गत आनन्दादिति निरानन्दः शिवश्चिदेकघनः। स च प्रथमतुटिस्थः साक्षात्कारक्रमे। तत्र द्वितीयस्यामेव तुटावैश्वर्यचमत्कारत इति "तुटिपात" इत्यत्र स्पष्टीकृतम्।

परः — (5) सम्बन्धः — उत्कृष्टतमशास्त्राणा-मुत्स्पन्दनस्यावतारस्य च मूलभूतः कोऽपि सर्वोत्तीर्णो विमर्शः। तत्र गुरुशिष्य संबन्धाः सर्वे षट् तेष्वेकः सम्बन्धः पर एव, यस्तु वस्तुतत्त्वतः सम्बन्ध भेदोल्लास भूमावेव सम्भवाद्, इति वक्तुं नैव शक्यते। सम्बन्धस्य यथाकथञ्चिद् अस्य च सर्वोत्तीर्णस्य शास्त्रतत्त्वविमर्शस्य सर्वथापि भेदोत्तीर्णत्वात्। असौ सम्बन्धः शिवशक्त्योः परस्परं तत्त्वविमर्शनस्वरूपः सङ्घट्ट एव। तत्र परे एव तत्वे शक्तिदशात्मकतायां प्रश्नपरिस्फुरणं शिवदशात्मकतायां चोत्तरपरिस्फुरणम्। तत्र प्रश्नपरिस्फुरणं सृष्टिक्रमेण अ-ह-म्इति विमर्शनम्, उत्तरपरिस्फुरणं च संहारक्रमेण म-ह-अ इति विमर्शनम्। सम्बन्धपञ्चके ओतप्रोतभावेन स्थितः परः सम्बन्धः। सम्बन्धत्वं चास्य लाक्षणिकमेव। यथा—

"केवलं शक्तिप्रधानतया सृष्टिस्वभावाख्यामर्शे अ-ह-म्-इति उचितो देवी परामर्शः, शक्तिमत् प्रधानतया संहारावेशविमर्शे म-ह-अ इति भैरवरूपचमत्कारः।"

(प० त्री०, वि०, पृ०, 11)

(2) यत्र संवादे पश्यन्त्या वाचा शङ्कोत्थापनं परया च समाधानकरणं तत्र संवादे यो गुरुशिष्यसम्बन्ध इव कोऽपि विमर्शोऽसौ परः सम्बन्धः इति। तत्र परादेवी प्रष्ट्री परश्चभैरवो वक्ता इति कल्प्यते। यथा—

"स्वात्मदेवतैव प्रबुद्ध्यमानावस्थायां स्वात्मानं परामर्शांशेनावतरन्तं पृच्छति। तत उच्यते 'श्री देव्युवाच' इति।"

(प० त्री० ल० वृ०, पृ०, 1)

(3) परस्यैव हि स्वात्मविमर्शस्य विस्तरतः प्रसरणे सम्बन्धान्तरोल्लासो यतः, ततोऽसौ विमर्शोऽपि सम्बन्धश्रेण्यां गण्यते लक्षणया। यथा—

"अदृष्टविग्रहायातं शिवात्परमकारणात्।।
ध्वनिरूपं सुसूक्ष्मं तु सुशुद्धं सुप्रभान्वितम्।
तदेवापररूपेण शिवेन परमात्मना।।
मन्त्रसिंहासनस्थेन पञ्चमन्त्रमहात्मना।
पुरुषार्थं विचार्याशु साधनानि पृथक्-पृथक्।।
लौकिकादिशिवान्तानि परापरविभूतये।
तदनुग्रहयोग्यानां स्वे-स्वे विषयगोचरे।।
अनुष्टुप्छन्दसा बद्धं कोटयर्बुदसहस्रधा।"

(स्व० तं० 8, 29-31)

शिवात् परमकारणाददृष्टविग्रहे सर्वथा भेदरहिते पदे आयातम् इति व्याख्याऽत्र। भूमिपतितमितिवत् समासः।

(4) गुरुशिष्ययोर्भिन्नत्वेऽपि विमर्शे सम्बन्धरूपतयैकीकारो जायते। इति शिवसदाशिवयोसम्बन्धः एकः द्वयोरपि। एवमन्यत्रापि सम्बन्धपञ्चके। यत्र पुनर्भेदगन्धोऽपि विगलति तत्र शास्त्रतत्त्वं पराख्येन सम्बन्धेन समुच्छलति। यथा—

"ऐकात्म्यभावे यदा भेदगन्धस्यापि विगलनात् सर्वात्मतालक्षणा पूर्णता स्यात् तदा परः सम्बन्धः।"

(तं० आ० वि०, खं० 1, पृ०, 284)

".....सम्बन्धः परता चास्य पूर्णैकात्म्यप्रथामयी।"

(तं० आ० 1, 275)

सम्बन्धरूपताऽत्र केवलं पारिभाषिकी न, न द्विष्ठताश्रयेति वेद्यं सुधीभिः।

~ व्यापकः — पञ्चस्वपि सम्बन्धेष्वोतप्रोतभावेन स्थितः। स च पर एव सम्बन्धः। यथा—

"यथोक्तं रत्नमालायां सर्वः परकलात्मकः।
महानवान्तरो दिव्यो मिश्रोऽन्योऽन्यस्तु पञ्चमः।।"

(तं० आ० 1, पृ०, 274)

परस्य सम्बन्धस्य यद्वास्तविकं स्वरूपं तस्य स्फुटतया प्रकाशनायैव बहुधा व्याख्यानं न च स्ववचनविरोधोत्थापकं नापि मतभेदप्रकाशकम्।

परः — (5) स्पन्दः — परस्य तत्त्वस्यैकतो विश्वोत्तीर्ण चिन्मात्रस्वरूपस्य शिवताभिधस्य, परतश्च तस्य विश्वमयतावभासनौन्मुख्यात्मकस्य पराशक्तिपदाभिधस्य स्वरूपस्य यत् समकालमेव विमर्शनमसौ तस्य परः स्पन्दः। केवलः स्वात्मन्येव समुच्छलनमात्रमेतस्य स्वरूपम्। केवलोऽपरिच्छिन्नः पूर्णाहन्ताविमर्श एव हि सः। यथा—

"चितिः प्रत्यवमर्शात्मा परा वाक्स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तद् ऐश्वर्यं परमात्मनः।।
सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः।।"

(ई० प्र०, 1-5-13-14)

"परामर्श स्वभावत्वादेतस्या यः स्वयं ध्वनिः।।
सदोदितः स एवोक्तः परमं हृदयं महत्।
हृदये स्वविमर्शोऽसौ द्राविताशेषविश्वकः।।

भावग्रहादिपर्यन्तभावी सामान्यसंज्ञकः।
स्पन्दः स कथ्यते शास्त्रे स्वात्मन्युच्छलनात्मकः।।"
(तं० आ० 4, 181-183)

द्र०: 'स्पन्दः' ~ 'परः' इति।

एवं प्रतीयते यत् पर एव यः स्पन्दः स एव योगिसाक्षात्कारे प्रकाशमानः सन् 'सामान्यस्पन्दः' परिभाष्यते। इति।

परः — ~ (7) स्वभावः— सुखदुःखाद्युत्तीर्णः, परसंविदात्मको जगद्वैचित्र्यलीलोल्लासकश्च यः स्वीयो भावः स एव परः स्वभावः। यथा—

"अहं सुखी च दुःखी च रक्तश्चेत्यादि संविदः।
सुखाद्यवस्थानुस्यूते वर्तन्तेऽन्यत्र ताः स्फुटम्।।
न दुःखं न सुखं यत्र न ग्राह्यो ग्राहको न च।
न चास्ति मूढभावोऽपि तदस्ति परमार्थतः।।"
(स्पं० का० 4, 5)

परचित्तज्ञानम् — (1) संयमविशेषकाले परिगलित-स्वपरविभागो यो योगी स तदा परचित्तमप्यहन्तयैव विमृशन् तत्र प्रकाशमानं विकल्पादिज्ञानमहन्तयैव नेदन्तया साक्षात्कृत्य पश्चात् तद्विषये कल्पितमेव भेदमङ्गीकृत्य वदति "परः इदं जानातीति"। ततो न ज्ञानं वस्तुतो ज्ञानान्तरवेद्यम्। वेद्यत्वं यत् इदन्तयावभास्यत्वम्। यथा—

"तेन योगिन इयत् परज्ञानवेदनं यत् परदेहादि-सहभावी नीलमधुरसुखरागाद्यवभासमयः प्रकाश इति। तत्र च नीलादि पृथग्भावेन वेद्यमेव; प्रकाशांशस्तु अहमित्येव प्रकाशते। प्रमात्रीकृतदेहाद्यवभाससंस्कारात् तु तन्निष्ठामिदन्तां प्रकाशभागेऽभिमन्यते, दृढस्वपरविभागसंस्कारभ्रंशे तु सर्वमात्मतया पश्यन् स्वसृष्टमेव स्वपरविभागं पश्यतीति तदपेक्षणयापि न ज्ञानं ज्ञानान्तरेण वेद्यम्।"
(ई० प्र० वि०, वि० खं० 2, पृ०, 43)

(2) योगी परचित्तेऽहमित्याविष्टः संस्तत्रत्यं विकल्पजातं विमृशन् विजानातीति तस्य तन्निजमेवं ज्ञानं वस्तुतो न परज्ञानम्। यथा—

"धारणाध्यानसमाधिबलात् परचित्तेन सह्राभेदं यदा भावयति, तदा वस्त्वनुसारेण सा भावना।"
(ई० प्र० वि० वि०, खं०; 1, पृ०, 227)

"तत्र योगिप्रत्यक्षेण रागादयश्चैताः प्रकाश्यन्ते। तत् संवेदनेन सह योगिन ऐक्यापत्तेः। संवेदनं स्वप्रकाशमेव भाति, न तु प्रकाश्यत्वेन।"
(तदेव)

~ त्रिप्रकारकम्— योगिनो योगबलेन परचितस्थं ज्ञानं विदन्ति। तत् च त्रिप्रकारतया प्रतिपादितं परचित्तसंवेदनम्। यथा—

"ततश्च यथा घटो मायाप्रमातुः पृथग्भाति, तथा योगिनः परसंवेदनम्। तच्च त्रिधा — परः इदं जानातीति; परत्र शरीरे पूर्वजातिलक्षणे एष मेऽनुभवोऽभूदिति; परेण इदमित्थं पूर्वं दृष्टमधुना स्मर्यते इति।"
(ई० प्र० वि० वि०, खं० 2, पृ०, 42)

परतत्त्वम्— सर्वोत्तीर्णं सर्वाधारभूतमेकं परं शुद्धमपरिच्छिन्न च संविदात्मकं स्वतः सिद्धमनादिसर्वादिभूतं तत्त्वम्। यथा—

"सर्वातीतं पर तत्त्वं सर्वं व्याप्य व्यवस्थितम्।।"
(स्त० तं० 6, 42)

~ अनुभूतौ— परं च तत्त्वं यद्यपि नैव विकल्पात्मकज्ञानगम्यं, सर्वस्य विकल्पस्य परिमितमायाप्रमातृकल्पितत्वान्मायीय त्वाच्च, तथापि शिवोऽविकल्पसाक्षात्कारसाक्षात्कार्य एव भवति योगिनां कृते। यथाहि लोकव्यवहारे क्षुत्पिपासाद्यनुभवो निर्विकल्पः सन्नपि साक्षात्प्रकाशते तथा शिवोऽपि। यथा—

"क्षुधाद्यनुभवो नैव विकल्पो न हि मानः।"
(तं० आ० 1, 76)

"बुभुक्षादीनां विकल्पात्मक एव मानसोऽनुभवो न भवति इत्यर्थः। आसां हि प्रथममविकल्पकमानसप्रत्यक्ष-विषयत्वम् अपि अस्ति, अन्यथा तत्पृष्ठभाविनो बुभुक्षेयम् इति विकल्पस्योदयो न स्यात्।"
(तं० आ० वि०, खं०, 1, पृ०, 118-119)

"अतश्च शिवं शक्तिद्वारेण ज्ञात्वा दैशिकस्तत्र दीक्षया दीक्ष्यं योजयति इति न काचित्क्षतिः।"
(तं० आ० वि०, खं० 1, पृ०, 120)

~ अविकल्प्यम्— न हि तत्तत्वं कथमपि विकल्पज्ञानविषयतामवरोहति। यथा—

"परं तत्त्वन्तु सर्वत्र सर्वरूपतया स्वप्रकाशमेवेति न तत्र विकल्पः कस्यैचिदुपक्रियायै खण्डनायै वा।"
(तं० सा०, पृ०, 23)

~ तत्प्रवेशयुक्ति— (1) उच्चारयोगाभ्यासे रूढिमुपागतो योगी शाम्भवभूमिमासाद्य परतत्त्वे प्रवेशमनायासमेव लभते शिवैक्यभावतः। यथा—

"परतत्त्वान्तः प्रवेशोऽपि निर्णेतुमुपक्रान्तः। भेदे हि सति हेयोपादेय विभागः। स एव यस्य विगलितस्तस्य किं नाम हेयं किं वोपादेयमिति पूर्णैवास्य परा संविदुल्लसेत्।।"
(तं० आ० वि०, ,खं० 3, पृ०, 383)

(2) खदशकाक्रमणक्रमे हि संविद्रूपतासमावेश- प्रकारः। तेषु दशसु प्रकारान्तरमात्रमेतत्। यथा—

"नन्वपेऽपि परतत्त्वान्तः प्रवेश बहव उपायाः सम्भवन्ति।"
(तं० आ० वि०, खं० 3, पृ०, 407)

ते च शाम्भवशाक्ताद्याः ध्यानोच्चारकरणाद्याश्च विविधाः। एतेनैतत् सिद्ध्यति यत् खदशकाक्रमणमपि परतत्त्वान्तःप्रवेशस्यैकतरः उपाय इति।

~ तदुपदेशप्रकाराः — तस्योपदेशस्त्रिधा कर्तुं शक्यते, विश्वोत्तीर्णत्वेन, विश्वमयत्वेन, उभयथा चेति। यथा—

"उपदेश्यजनानुसारेण प्रथमतः संवितत्त्वं भगवता शिवरूपं केषुचिदागमेषु सर्वोतीर्णताप्राधान्येन; अपरेषु

सर्वमयतास्वीकारेण, अन्येषूभयरूपविस्फारणायोपदिष्टम्।"

(ई० प्र० वि० वि०, खं० 2, पृ०, 74)

~ प्रणवकलोपास्तौ— औन्मनसादपि पदादुत्तीर्णं कालस्पर्शरहितं परं शिवतत्त्वम्। यथा—

"ऊर्ध्वमुन्मनसो यश्च तत्र कालो न विद्यते।
न कल्पः कल्पते कश्चिन्निष्कलः कालवर्जितः।
यः शाङ्कर्युन्मनातीतः स नित्यो व्यापकोऽव्ययः।।"

उद्ध० (तं० आ० वि०, खं० 5, पृ०, 259)

~ प्रमाणाविषयम्— यत् सर्वादिभूतं तत्त्वं न तत्र कस्यापि प्रत्यक्षादेः प्रमाणस्यावकाशः, सर्वस्यापि प्रमाण- प्रपञ्चस्य तदाश्रितत्वात् तत्साक्षिकत्वाच्च। यथा—

"अपह्नुतौ साधने वा वस्तूनामाद्यमीदृशम्।
यत्तत्र के प्रमाणानामुपपत्त्युपयोगिते।।"

(तं० आ० 1, 57)

"विश्ववैचित्र्यचित्रस्य समभित्तितलोपमे।
विरुद्धाभावसंस्पर्शे परमार्थसतीश्वरे।।
प्रमातरि पुराणे तु सर्वदाभातविग्रहे।
किं प्रमाणं नवोभासः सर्वप्रमितिभागिनि।।"

(ई० प्र० 2-3-15-16)

~ लक्षणतः — परिपूर्णप्रकाशात्मकं चिदानन्दस्वरूपं सर्वथाऽविकल्परूपम् अनाद्यनन्तं सर्वशक्तिपरिपूर्णं सर्वालयं समस्तविश्वाभासभित्तिभूतं सर्वाभासकं परशिवात्मकं पारमेश्वरं तत्त्वमेव परं तत्त्वम्। यथा—

"भारूपं परिपूर्णं स्वात्मनि विश्रान्तितो महानन्दम्।
इच्छासंवित्करणैर्निर्भरितम् अनन्तशक्तिपरिपूर्णम्।।
"सर्वविकल्पविहीनं शुद्धं शान्तं लयोदयविहीनम्।
यत् परतत्त्वं तस्मिन् विभाति षट्त्रिंशदात्म जगत्।।"

(प०सा०, 10-11)

~ शिवाभिधम् — शिव इत्येव तस्य व्यपदेशः समुचितः। यथा—

(क) "तथा तद्व्यपदेशश्चेद् व्यपदेशः शिवात्मकः।"

(शि० दृ०, 3-2)

(ख) "तथा स्त्रीलिङ्गेन परमशिवस्यैव व्यपदेशो मतश्चेत् तत् सोऽपि व्यपदेश उक्तन्यायाच्छिवशब्दात्मकः कार्यः।"

(शि० दृ० वृ०, पृ०, 96)

~ स्वरूपतः — समस्तकलनोत्तीर्णं सर्वथावच्छेदहीनम् अवाङ्मनसगोचरं स्वानुभवैकसाक्षात्कार्यं सर्वथाऽविकल्पं विश्वभरितं विश्वपूरकं च यच्छुद्धं पारमैश्वर्यात्मकशक्त्येक-घनं भैरवात्मकं शुद्धं संवित्तत्त्वं तदेव परमतत्त्वस्य पारमार्थिकं वपुः। यथा—

"दिक्कालकलनोन्मुक्ता देशोद्देशाविशेषिणी।
व्यपदेष्टुमशक्यासावकथ्या परमार्थतः।।
अन्तः स्वानुभवानन्दा विकल्पोन्मुक्तगोचरा।
यावस्था भरिताकारा भैरवी भैरवात्मनः।।
तद्वपुस्तत्त्वतो ज्ञेयं विमलं विश्वपूरणम्।"

(वि० भै०, 14-16)

भैरवरूपस्य परमेश्वरस्य या भैरवीनामावस्था तदात्मक एवासौ स्वयम्। नामद्वयमेकस्यैव परतत्त्वस्य सम्बोधनानर्थं भैरव इति भैरवीति च कल्पितं वेदितव्यम्।

परत्वम् — (1) शुद्धपरिपूर्णप्रमातृरूपता शिवरूपता च। यथा—

"परत्वं पूर्णत्वमन-न्यापेक्षाहमिति।"

(ई० प्र० वि०, खं० 2, पृ०, 199)

"परत्वं पूर्णत्वमहमिति।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 274)

तच्च शुद्धमसङ्कुचितं च संविन्मयम् "अहम्" इति बोध्यम्, न देहादिभिः परिच्छिन्नम्। तथाऽऽभासमानं' सदपि तद् वस्तुतः शिवात्मकं पूर्णमेवेति वेद्यम्।

(2) स्वात्मनोऽभिन्नत्वम्। यथा—

"सर्वात्मतया पश्यन् स्वसृष्टमेव स्वपरविभागं पश्यति।"

(ई० प्र० वि० वि० खं० 2, पृ० 43)

परप्रकाशः — परिपूर्णः शुद्धश्च संवित्प्रकाशः। स च शिव एव। यथा—

"इत्थं स्वसंविद्घन एक एव,
शिवः स विश्वस्य परः प्रकाशः।"

(प० च० 2)

~ मुख्यरूपतः — सृष्टिसंहारकर्तृत्वमेव परस्य प्रकाशस्य मुख्यं स्वरूपम्, अमुख्यं पुनः प्रमाणप्रमेयप्रपञ्चात्मकं विश्वम्। विश्वोत्तीर्णमनुत्तरचिन्मयत्वमप्यमुख्यमेव। यथा—

"तदेव हि नामास्य परस्य प्रकाशस्यानन्यसाधारणं रूपं यत् सदैव सृष्टिसंहारकारित्वम्।"

(तं० आ० वि०, खं० 3, पृ०, 363)

परप्रमाता — स च परिपूर्णः परमेश्वरः परशिव एव।

~ तत्सत्ता — यद्यपि स्वप्रकाशतयैवासौ स्वयं सिद्धः सदासिद्धश्चेति तथापि तर्कयुक्त्यापि तस्य सत्ता सिद्ध्यति। यथा—

"अयं प्रमातृसद्भाव एव प्रमातुरपूर्वप्रकाशत्वव्यवहारः। .....आरोपितप्रकाशभावो देहादिरपूर्वप्रकाशः सत्येव पुराणप्रकाशे परमार्थप्रमातरि व्यवहर्तुं शक्यः। परमार्थप्रमाता तु परमेश्वरो न कथञ्चिदपूर्वप्रकाशः, तदविभिन्नाश्च सर्वे प्रमातारः।"

(ई० प्र० वि० वि०, खं० 1, पृ०, 65)

"तत्र प्रमेयभूतोऽत्यक्तप्रमातृरूपभित्तितादात्म्यः सृज्यते।"

(तदेव, पृ०, 66)

असौ च देहाद्यहम्भावयुक्तः पशुप्रमाता।

परभैरवः — भैरवेषु सर्वोत्तमः, शिव एव। यथा—

"निशाकान्तस्य कालरात्रीरमणस्य परमभैरवस्य...।"
(भा० वि०, पृ०, 5)

द्र० — 'भैरवः' इति।

परमगुरुः — गुरोरपि गुरुः परमगुरुः।

परमप्रमाता — परमशिवः।

द्र० — 'परमशिवः' इति।

परममहापश्यन्ती— सदाशिवेश्वरादिदशा तावदशेष-महापश्यन्ती-क्रोडीकारेण परममहापश्यन्तीति। यथा—

"अत्र च पश्यन्तीशब्देन श्रीसदाशिवभूमिर्ज्ञानशक्ति-स्वभावोक्ता याऽसौ महापश्यन्तीनां प्रत्यगात्मरूपाणाम- विभागात्मिका परममहापश्यन्ती।"
(ई० प्र० वि० वि०, खं० 2, पृ०, 197)

परमशिवः — (1) तत् परं तत्त्वं यच्छास्त्रेषु शिवतया शक्तितया चोपदिश्यते शिष्यजनसम्बोधनार्थम्। शिवशक्तिसामरस्यरूपं तत् परमद्वैततत्त्वं यत् स्वैश्वर्य-लीलाविलासतः शिवादिधरण्यन्ततत्त्ववाततयाऽसंख्य-सृष्टिसंहारक्रियाप्रपञ्चरूपतया चावभासते। स च परिपूर्ण-प्रकाशविमर्शसामरस्यात्मकपरसंवित्स्वरूपः शब्दैर्वर्णयितुम-शक्योऽपि सम्बोधनार्थं तथा-तथोपदिश्यतेऽरुन्धतीन्यायेनैव। असौ सदैव विश्वोत्तीर्णपरिपूर्णसंवित्स्वरूपः सन्नपि सततं विश्वात्मकसृष्ट्यादिपञ्चकृत्यलीला- विलासमाभासयन् विजयते। यथा—

"अन्यस्तु विश्वोत्तीर्णविश्वमयः परमशिवभट्टारकः।"
(म० मं० प०, पृ०, 37-38)

"अकृत्रिमाहमामर्शप्रकाशैकघनः शिवः।
शक्त्या विमर्शवपुषा स्वात्मनोऽनन्यरूपया।।
शिवादिक्षितिपर्यन्तं विश्वं वपुरुदञ्चयन्।
पञ्चकृत्यमहानाट्यरसिकः क्रीडति प्रभुः।।"
(अ० प्र० पं०, 1-2)

(2) स्वप्रकाशः पूर्णः परमेश्वरः। यथा—

"तस्मिन् विज्ञेयतां प्राप्ते स्वप्रकाशः परः शिवः।।
प्रमाता स्वकतादात्म्यभासिताखिलवेद्यकः।"
(तं० आ० 10, 112-113)

(3) उन्मनामतीत्य स्थितः परिपूर्णः परमेश्वरः। यथा—

"शब्दावबोधरूपेण वस्तुरूपस्वरूपतः।
स्थूलः सूक्ष्मः परश्चैव परातीतो निरञ्जनः।।
व्योमरूपस्वरूपेण समनोन्मन एव च।
उन्मनातीतो देवेशि शिवो ज्ञेयः शिवागमे।।"
(स्व० तं० 11, 14-15)

"उन्मना च ततोऽतीता तदतीतं निरामयम्।"
(तदेव 4, 257)

निरामयमिति परमशिवतत्त्वमिति वेद्यम्।

(4) निर्विभागाऽनवच्छिन्नानन्दमयी चिदेव परम-शिवः। स च चिदानन्देच्छाज्ञानक्रियाशक्तिसामरस्यमयः। चित्तु तस्य स्वरूपम्, आनन्दश्चितः स्वभावः, ऐश्वर्याभ्युपगम इच्छा, प्रकाशरूपता ज्ञानं ऐश्वर्याभिव्यञ्जनोन्मुखः संरम्भः क्रिया, सैव परचमत्कारमयी। तद्राहित्ये शून्यकल्पत्वं शान्तब्रह्मवादिसम्मतं तस्य प्रसज्जेत। इच्छाज्ञानक्रिया-शक्तिमत्त्वेऽपि तस्य चिदानन्द- मयतायामेव स्थितिः। यथा—

(क) "स यदास्ते चिदाह्लादमात्रानुभवतल्लयः।
तदेच्छा तावती तावज्ज्ञानं तावत् क्रिया हि सा।।
सुसूक्ष्मशक्तित्रितय सामरस्येन वर्तते।
चिद्रूपाह्लादपरमो निर्विभागः परस्तदा।।"
(शि० दृ 1, 3-4)

(ख) "तथा च शक्तिपञ्चकमपि तदानीमेकरूपमपि व्यवहारापेक्षया कार्यसम्भवादस्त्येव। .....। इच्छाज्ञान-क्रियास्तु भिन्न-विषयाद्यपेक्षया स्फुटीभवन्ति। परावस्थायां पुनः पूर्णोऽहमित्येव स्वस्वभावः प्रकाशते। तावत् प्रकाशत्वात् तदेव ज्ञानं, संरम्भरूपत्वात् सैव क्रिया, तत् स्वभावत्वेन तदभ्युपगमादिच्छापि स्थितैव।"
(शि० दृ० वृ०, पृ०, 6-7)

(5) परमेश्वरः। परं ब्रह्म। यथा—

"परमात्मस्वरूपं तु सर्वोपाधिविवर्जितम्।
चैतन्यमात्मनो रूपं सर्वशास्त्रेषु कथ्यते।।"
(ने० तं० 3, 28)

(6) तद् विश्वोत्तीर्णमनुत्तरं परादपि परं तत्त्वं यतः सर्वं जगदुदेति यच्च सर्वस्मिञ्जगति स्वयं प्रकाशते सर्वं जगद्यस्मिन्नवभासमानं तिष्ठति, सर्वं च यतोऽभिन्नमेव। यथा :—

"परं परस्थं गहनादनादिमेकं निविष्टं बहुधा गुहासु।
सर्वालयं सर्वचराचरस्थं त्वामेव शम्भुं शरणं प्रपद्ये।"
(प० सा०, 1)

"परं पूर्णं चिदानन्देच्छाज्ञानक्रियाशक्तिनिर्भरमनुत्तर- स्वरूपम्, तथा परस्थं गहनादिति गहनान्मायाभिधानात्तत्त्वात्परस्मिन्पूर्ण एव शिवादिविद्यातत्त्वपर्यन्ते शुद्धाध्वनि स्वरूपे तिष्ठन्तम्।"
(प० सा० वि०, पृ०, 2-3)

(7) सततं पारमेश्वर्यक्रीडाविलासतो विश्वोत्तीर्ण-विश्वात्मकोभयरूपतयाऽऽभासमानः पूर्णस्वतंत्रः परमेश्वरः। यथा—

"स्वज्ञानविभवभासनयोगेनोद्वेष्टयेन्निजात्मानम्।
इति बन्धमोक्षचित्रां क्रीडां प्रतनोति परमशिवः।।"
(प० सा०, 33)

द्र०: — प० सा०, 43, प्र० ह, पृ० 8, स्त, चिं०, पृ०, 1, स्वं० तं० उ० प० 10, पृ० 538, प० पा०, पृ० 6, 11 व 12, प० सा० वि० पृ०, 43, 44, 58, 96, पू० प्र०, 1-4

~ अकल्यः — सकलकलनोत्तीर्णं परं तत्त्वम्। **यथा—**

"नह्यत्र वर्णीकरणसमयः कलनापि वा।।

युज्यते सर्वतोदिक्कं स्वातन्त्र्योल्लासधामनि।"

(तं० आ० 11, 9-10)

द्र०— 'परमार्थतत्त्वम्' इति।

परमशिवस्तोत्रम् — आचार्यामृतवाग्भवैर्योवनकाले विरचितं शिवस्तोत्रम्। अत्र परमशिवः षट्त्रिंशत्तत्त्वात्मकतया स्तुतः। एतेन षटित्रंशत्तत्वानां निरूपणमप्यत्र संक्षेपतः कृतं वर्तते। तेनेदं स्तोत्रकाव्यमपि, शैवशास्त्रमपि चेति स्वीकर्तव्यम्। सानुवादमस्य प्रकाशनं कृतं वर्तते।

परमा — कापि मन्त्रविद्या। लोकपालमन्त्रोऽष्टमः न स्पष्टमुक्तो जयरथेन।

"पूतना शूलदण्डस्तु कपालं नाभिरेव च।
शिखिनी वायुवेगा च परमा च नितम्बकः।।
विज्ञेयाश्च महादेवि दीर्घयुक्ताः सविन्दुकाः।
मन्त्रास्तु लोकपालानां तदस्त्रा दीर्घवर्जिताः।।"

(तं० आ० वि०, खं० 12, पृ०, 201)

द्र० — 'लोकपालमन्त्राः' इति।

परमाचार्यः — परमेष्ठिगुरोरपि गुरुः।

परमाणुः — जालान्तरगतभानुमरीचिमध्ये प्रकाशमानस्य सूक्ष्मतमस्य रजःकणस्य दशमो भागः। तेनसूक्ष्मतमाः पृथिव्यादिभूतचतुष्टयांशाः परमाणवः। यथा—

"भूतादेर्यद्दशगुणमणीयो दृश्यते रजः।
जालान्तरगते भानौ परमाणुः स उच्यते।"

(स्व० तं० 10, 15)

"अयं च परमाणुः तार्किकोपगतपरमाणुतः किञ्चिन्मात्रं विलक्षणः।"

(स्व० तं० उ०, प० 10, पृ०, 10)

तार्किकैस्त्रसरेणोष्षष्ठो भागः परमाणुरङ्गीकृतः परमत्र तस्य दशमो भागः इति।

परमात्मा — (1) परमेश्वरः। परमशिवः। सर्वेषां परिमितानां प्रमातृणामेकरूपत्वेन स्थितोऽपरिमितः प्रमाता यः स्वयमेव स्वेच्छानुसारं भिन्नभिन्नप्रमातृतया स्वात्मानमेवावभासयति पारमैश्वर्यायां लीलायाम्। यथा—

"सर्वकल्पितग्राहकपारमार्थिकस्वभावत्वात् परमात्मा, प्रसिद्धब्रह्मविष्णुरुद्रादीश्वरभावप्रसरपरिग्रहात् परमेश्वरः।"

(ई० प्र० वि०, खं० 2, पृ०, 135)

~ निराभासः — सृष्टमेव हि भावजातमाभासरूपं न परमात्मा सर्वाभासाभासयिता। असावनाभासोऽपि सततं स्वप्रकाशतया प्रकाशमानो वर्तते। आभासभूतस्य वस्तुनो व्यावहारिकी सत्ता निराभासस्य पुनः पारमार्थिकी। यथा—

"सावस्था परमा प्रोक्ता परस्य परमात्मनः।
निराभासं पदं तत्तु तत्प्राप्य विनिवर्तते।"

(ने० तं० 8, 45)

~ निर्मलः — पूर्णनैर्मल्यभाक्, शुद्धसंवित्स्वरूपः परमेश्वरः। यथा—

"मलकर्मकलाद्यैस्तु निर्मुक्तश्च यदा प्रिये।
सर्वाध्वसमतीतश्च मायामोहोज्झितश्च यः।
निर्मलत्वं यदा याति पदं परममव्ययम्।
परमात्मा तदा देवि प्रोच्यते प्रभुरयः।।"

(स्व० तं० 11, 89-90)

~ स्वरूपतः — परमशिवस्य परमात्मनः स्वरूपं सर्वोपाधिरहितं सर्वथा परिपूर्णं स्वतन्त्रं चैतन्यं संकोचरहितम्। यथा—

"परमात्मस्वरूपन्तु सर्वोपाधिविवर्जितम्।
चैतन्यमात्मनो रूपं सर्वशास्त्रेषु कथ्यते।।"

(ने० तं० 8, 28)

परमाद्वयदर्शनम् — त्र्यम्बकशैवदर्शनम्। शिवाद्वैतम्। ईश्वराद्वैतवादः। काश्मीरशैवदर्शनम्। इति।

द्र० - 'अद्वैतशैवदर्शनम्' इति।

परमाद्वयम् — द्र० 'पराद्वैतम्' इति।

परमाद्वैतम्—

द्र० 'पराद्वैतम्' इति।

परमा पूजा— स्वस्वरूपपरामर्शः परा पूजा। यथा—

"स्वस्वरूपपरामर्श एव परमा पूजा।"

(म० मं० प, पृ०, 106)

परमार्कः — ~ कालीनये : — सर्वेषु करणेषु प्रधानोऽहङ्कारः। द्वादशकरणात्मका अर्काः यदधीनतयैव संविद्व्यवहारं प्रकुर्वन्ति स एव परमार्कः। स चाहङ्कार एव। यथा—

"स एव परमादित्यः पूर्णकल्पस्त्रयोदशः।"

(तं० आ० 4, 164)

"एवमहंकारनाम्नि परमादित्ये संहृतेषु बुद्ध्यादिषु द्वादशसु करणेषु स एवाहङ्कारनामा त्रयोदशः ..... परमादित्यः।"

(तं० आ० वि०, खं० 3, पृ०, 179)

परमार्ककाली— (1) परमार्करूपस्याहङ्कारस्यापि जीवचैतन्यात्मके परिमिते प्रमातर्येकीकारकरणकलनामयी संविच्छक्तिः परमार्ककाली ।

यथा—

(क) "ततः करणेश्वरमपि कलयति ।"

(तं० सा०, पृ०, 30)

(2) अहङ्कारात्मकस्य करणेश्वरस्यापि पञ्चविधां कलनां कुर्वती संविच्छक्तिरियमिति स्पष्टीभवति । यथा—

(ख) "स एव परमादित्यः पूर्णकल्पस्त्रयोदशः ।
करणत्वात् प्रयात्येव कर्तरि प्रलयं स्फुटम् ।।
कर्ता च द्विविधः प्रोक्तः कल्पिताकल्पितात्मकः ।
कल्पितो देहबुद्ध्यादिव्यवच्छेदनचर्चितः ।।
.....तत्राहङ्कृत् प्रलीयते ।।"

(तं० आ० 4, 164-167)

(ग) "अहङ्कारनाम्नः परमार्कस्य परिमिते कालाग्निरुद्रसंज्ञे प्रमातरि एवं कलनात् श्रीक्रमस्तोत्रादावियं परमार्ककालीत्युच्यते ।"

(तं० आ० वि०, खं० 3, पृ०, 181)

~ क्रमस्तोत्रद्वये—

(क) "अस्तोदितद्वादशभानुभाजि
यस्यां गता भर्गशिखा शिखेव ।
प्रशान्तधाम्नि द्युतिनाशमेति
तां नौम्यनन्तां परमार्ककालीम् ।।"
उद्ध० (क्र० स्तो० सि० ना०)
(तं० आ० वि०, खं० 3, पृ०, 181)

(ख) "समग्रामक्षार्ली क्रमविरहितामात्मनि मुहु-
र्निवेश्यानन्तान्तर्बहलितमहारश्मिनिवहा ।
परादिव्यानन्दं कलयितुमुदारादरवती
प्रसन्ना मे भूयाद् हृदयपदवीं भूषय तु च ।।"
(क्र० स्तो०, अभि०, 24)

वैविध्येन स्पष्टीकरणमेव प्रयोजनं भिन्नभिन्नानां वर्णनानाम् ततो नात्र मतभेदशङ्कावसरः कोऽपि।

~ चिद्गगनचन्द्रिकायाम्—

**"भूतचक्रमधुकोशसम्भृतं तत्तदर्थमधुपातुमुत्सुकः।
यन्मरीचिविषयः स भास्करस्त्वद्रुचौ शलभवत् प्रलीयते।।"**
(चि० ग० चं०, 243)

~ पञ्चशतिके—

"एकाकिनी चैकवीरा सुसूक्ष्मा सूक्ष्मवर्जिता।
परमात्मपदावस्था परापरस्वरूपिणी ।।
सा कला पररूपेण यत्र संलीयते शिव।
सा कला परमार्केति ज्ञेया भस्माङ्गभूषण।।"
उद्ध० –(पंचशतिकागमात्)
(तं० आ० वि०, खं० 3;, पृ०, 181)

परमार्चनत्रिंशिका— महामाहेश्वराचार्येण नागार्जुनाख्येन सिद्धेन विरचितं किमपि शैवशास्त्रसिद्धान्तगर्भं स्तोत्रम्। व्याख्यादिसंहितं प्रकाशितं श्री रणबीरविद्यापीठेन "शैवाचार्यो नागार्जुनः" इति पुस्तके।

परमार्थः — (1) पराद्वैतकेन्द्रीयसंस्कृतसिद्धान्तरूपोऽर्थः ।

यथा—

" 'परमार्थः' सद्गुरूपदिष्टः स्वात्मज्ञानसतत्त्वः।"
(प० सा०, वि०, पृ०, 114)

(2) विश्वोत्तीर्णः परमः शिवः । यथा—

"शिवान्तेभ्यो धरादिभ्यः शुद्धाशुद्धाध्वरूपतः।
परिच्छिन्नस्वभावेभ्यस्तत्वेभ्यः सर्वतो हि यत्।।
उत्तीर्णमपरिच्छिन्नसंविन्मात्र-स्वरूपकम्।
अनुत्तरं परं तत्त्वं परमार्थस्तदेव हि।।"
(पू० प्र०, पृ०, 414-415)

परमार्थचर्चा—प्रबुद्धान् शिष्यान् प्रति ज्ञानोपदेशार्थं विरचितं संक्षिप्ततरं शास्त्रमाचार्याभिनवगुप्तकृतम्। शैवशास्त्रीयं सत्तर्कमाश्रित्य विरचितोऽयं लघुग्रन्थः। यथा—

"सद्वृत्तसप्तकमिदं गलितान्यचिन्ताः
सम्यक् स्मरन्ति हृदये परमार्थकामाः।
ते भैरवीय-परधाम मुहुर्विशन्ति
जानन्ति च त्रिजगतीं परमार्थचर्चाम्।।"
(पं० च०, 80)

परमार्थतत्त्वम् — व्याख्यातं स्पष्टम्। यथा—

"तदेवं यतो विश्वं निर्भासते, यत्र च विश्रान्तं निर्भासते, यदिच्छया च प्रकाशते, यश्च विश्वस्य प्रकाशमानस्यात्मा, यच्च विश्वत्रापि निर्भासमानेऽनावृतमेव, अनाधिक्येनापि च यत्र विश्वं यस्य स्वातन्त्र्यादधिकमिव निर्भासते, तदेव परमार्थतत्त्वं प्रधानतयोत्कृष्टम्।"
(ई० प्र० वि० वि०, खं०-1, पृ० 8)

द्र० 'परमशिवः' इति।

परमार्थवेधदीक्षा—गुरुप्रसादमात्रतोपलब्धात् शाम्भवादिसमावेशात् तत्क्षण एव सद्यश्चित्स्वरूपे प्रवेशस्य युक्तिः। यथा—

"य एवं वेत्ति तत्त्वेन तस्य निर्वाणगामिनी।
दीक्षा भवत्यसंदिग्धा तिलाज्याहुतिवर्जिता।।"
(प० त्री०, 25)

"अनभ्यासेऽपि तु तत्क्षणावेश एवानन्दोद्भवकम्पनिद्राव्याप्तिरूपघूर्ण्याविर्भावनक्रमेण जीवन्मुक्ततालाभः। यथोक्तम्, 'प्राप्तेऽपि सिद्ध्यन्ति नास्त्यत्र विवादः' इत्यादि 'सैषा परमार्थवेधे दीक्षा' उक्तं हि, 'इयं निर्वाणदीक्षा च ....।"

उद्ध० –(स्पं० का०, 32)

"य एव वेत्ति तत्त्वेन तस्य निर्वाणगामिनी।
दीक्षा भवत्यसंदिग्धा तिलाज्याहुतिवर्जिता।"
(ई० प्र० वि० वि०, खं० 3, पृ०, 330)

परमार्थसारविवृत्तिः — अभिनवगुप्तीये परमार्थसारे योगराजेन विरचिता सुविस्तृता वैदुष्यमयी टीका। यथा—

"योऽयं व्यधायि गुरुणा
युक्त्या परमार्थसारसंक्षेपः।
विवृत्तिं करोमि लघ्वीम्
अस्मिन् विद्वज्जनार्थितो योगः।।"
(प० सा० वि०, पृ०, 1)

परमाशक्तिः — ~ अनुभूतौ

आत्मनो व्यापिकां चिन्मात्रमयतां भावयतो योगिनो हृदये या आनन्दात्मा शक्तिः शिवानुग्रहाद् उन्मिषति सा परमाशक्तिः। यथा—

"व्यापकस्य यतो देवि चिद्रूपस्यात्मनः शिवात्।
प्रसरत्यद्भुतानन्दा सा शक्तिः परमा स्मृता।।"
(ने० तं० 8, 34-35)

~ सिद्धान्ते — **परिपूर्णः स्वस्वभावविमर्शः परमशिवस्य। यथा—**

"यच्छ्रीकालीकुलम् —
तस्य देवादिदेवस्य परबोधस्वरूपिणः।

विमर्शः परमा शक्तिः सर्वज्ञा ज्ञानशालिनी।। इति।"

(ने० तं उ० खं०, पृ०, 21)

परमेशः — असौ स्वतन्त्रः परश्चेशो यस्य स्वातन्त्र्यलीलाविलासत एव परमाणुभ्यो जगतामारम्भः' मूलप्रकृतितस्तत्त्वानां परिणामो, मायातश्च जीवत्वाद्याभासस्तत्र-तत्राभासते । यथा—

"आरभमाणः सततं निरुपादानं स्वतो जगत्सकलम्।
शक्त्या स्वयाऽपरिणमन् बिभ्रत् प्रतिबिम्बकल्पमिव विश्वम्।।
स्वप्नभ्रमतुल्यमिदं निखिलं चाभासयत् विकल्पकुलम्।
स्वस्वातन्त्र्यमहिमा जयति हि विलसन् स कोऽपि परमेशः।।"

(स्वा० द० 1, 2-3)

द्र०: — 'परमेश्वरः' इति।

परमेशता—परस्य तत्त्वस्य परशक्तिस्वरूपता । तस्याः सामर्थ्यविशेषरूपतयाऽनेकानि नामानि सन्ति, यथा—स्पन्दः, स्फूर्तिः, घूर्णिः— इति। यथा—

"परमेशतां च तस्य स्वातन्त्रतां कः कथं स्फुटं ब्रूयात्।
स्पन्दः स्फूर्तिः घूर्णिः सिद्धैरित्थं ततः सुनिर्दिष्टा।।"

(स्वा० द० 2, 10)

द्र०— 'परमेश्वरत्वम्' इति।

परमेश्वरः — ~ आचार्यः —स्तवचिन्तामणिकारस्य श्री भट्टनारायणस्य पितामहः 'परमेश्वरः'। यथा—

"स्तोत्रकारस्य पितामहः परमेश्वराख्यः।"

(स्त० चि० वि०, पृ०, 10)

~ शिवः — परमशिवः। परमभैरवः।

(1) सृष्ट्यादिपञ्चविधकृत्यकारी परतत्वात्मको भगवान्। यथा—

"परमेश्वरः पञ्चविधकृत्यमयः।"

(प० त्री० वि०, पृ०, 3)

एतेन गम्यते यदेषा पञ्चविधकृत्यमयी परमेश्वरतैव परतत्त्वस्य परब्रह्मता, न पुनः परा ऐकान्तिकी च सौषुप्त-कल्पा शान्ततेति।

(2) अभेदे यद् भेदस्यावभासनं भेदाभासे च यदभेदस्य प्रकाशनं, तदतीव दुर्घटं कार्यम्, ईदृशस्यातिदुर्घटस्य कार्यस्यानायासमेव स्वेच्छाप्रयोगमात्रतो यत्सम्पादनं, तत्र सर्वथा स्वतन्त्रः समर्थश्च परः प्रमाता परमेश्वरः। परब्रह्मेति पर्यायः परमशिवः। यथा—

"एवं स्वातन्त्र्यपूर्णत्वादति दुर्घटकार्यम्।
केन नाम न रूपेण भासते परमेश्वरः।।"

(तं० आ० 1, 92)

(3) असत इव भावान् सत्तयावभासकः सतश्च शून्यतयेवावभासकः स्वतन्त्रः शिव एव परमेश्वरः, परम-शिवः। यथा—

"तद्य एष सतो भावान् शून्यीकर्तुं तथाऽसतः।
स्फुटीकर्तुं स्वतन्त्रत्वादीशः सोऽस्मत्प्रभुः शिवः।।"

(त० आ० 11, 115)

द्र० –(प०पृ०, 12 प० सा० वि, पृ० 15, 17,18,19, ष० त० सं० वि०; पृ०, 1-2, प० त्री० ल० वृ०, पृ० 18)

~ अप्रमेय —न हि परमेश्वरो वस्तुतो वेद्यभूमिकामवतरति कदाचित्। उपदेशावसरे कल्पितमात्रैवास्य वेद्यता । यथा—

"यथा-यथा च प्रमेयभूमिकापादनन्यक्कारकलङ्कपरिहारः शक्यस्तथा-तथा यावद्गति यतितव्यम्।.....उपदेशावसरे हि सर्वात्मना तावत् सा प्रमेयता अस्य परिहर्तुमशक्या।"

(ई० प्र० वि०, खं० 1, पृ० 33)

"प्रकाश एव चात्मा; तत् न तत्र कारकव्यापारवत् **प्रमाणव्यापारोऽपि, नित्यत्वत् स्वप्रकाशत्वस्यापि तत्र भावात्।"**

(ई० प्र० वि० खं० 1, पृ०, 34-35)

~ आनन्दस्वभावः —परमेश्वरो हि पूर्णतया स्वतन्त्रः न किमपि स्वतो भिन्नं कदाचिदप्यपेक्षते पञ्चविधकृत्यलीलाविलासने वा, स्वरूपस्थितौ वा। तस्य येयं सर्वथा परापेक्षाविहीना परिपूर्णस्वस्वरूपविमर्शात्मिका परा स्वात्मविश्रान्तिः सैव तस्यानन्दात्मकताप्रयोजिका । यथा—

"स च स्वात्मनि विश्रान्तस्तदन्याभावयोगतः।
स्वात्मविश्रान्तिरेवैषा देवस्यानन्द उच्यते।।"

(मा० वि० वा०, 1, 88)

~ कलनोत्तीर्णः — यत् किमपि मन्त्रमुद्रामण्डलतूर-पटाद्यात्मकं ब्रह्माविष्णुमहेश्वराद्यात्मकं वा परमेश्वरस्य रूपं, तत् सर्वं कलितं सन्न तस्य पारमार्थिकं स्वरूपम् । पारमार्थिकं स्वरूपं तस्याकलितमवाङ्मनसगोचरमनुत्तरमेव। यथा—

"तत्त्वतो न नवात्मासौ शब्दराशिर्न भैरवः।
न चासौ त्रिशिरो देवो न च शक्तित्रयात्मकः।।
नादबिन्दुमयो वापि न चन्द्रार्धनिरोधिकाः।
न चक्रक्रमसम्भिन्नो न च शक्तिस्वरूपकः।।
अप्रबुद्धमतीनां द्वि एता बालविभीषिकाः।
मातृमोदकवत् सर्वं प्रवृत्त्यर्थमुदाहृतम्।।"

(वि० भै०; 11-13)

~ चिदचिदाभासः — चिदेकरूपोऽपि स्वस्वरूपगोपन-पूर्वकमचिद्रूपजगदाकारतयाप्याभासमानः परमशिवः। यथा—

"चिद्धनोऽपि जगन्मूर्त्याऽऽश्यानो यः स जयत्यजः।।
स्वात्मप्रच्छादनक्रीडाविदग्धः परमेश्वरः।।"

उद्धः–(प० सा० वि०, पृ०, 1)

~ जगत्सारः —सर्वभावानां वास्तविकस्वभावभूतं पारमार्थिकं तत्त्वं हि परमेश्वर एव। तस्य पारमेश्वरी शक्तिरेव जगदाकारतयाऽऽभासते यतः। यथा—

"स एव सर्वभूतानां स्वभावः परमेश्वरः।
भावजातं हि तस्यैव शक्तिरीश्वरतामयी।।"

(बो० पं० द०, 2)

~ जगदवभासनस्वतन्त्रः —परमेश्वरस्तावत् स्वस्मिन् सदैव शुद्धसंविद्रूपतया स्वात्ममात्ररूपतया च विद्यमानमपि जगत् स्वस्वातन्त्र्यलीलाविलासतो भिन्नतयाप्याभासयति।

तथाभासनेऽपि तस्य शुद्धसंविद्रूपता नैव विनश्यति। तदेतत् परमेश्वरस्य जगदवभासनस्वातन्त्र्यमस्य नैसर्गिकस्वभावभूतो विशेषः। एतदेवास्य मुख्यं परमेश्वरत्वम्। ततो नैतदौपाधिकम्। यथा—

"परामर्शो हि चिकीर्षारूपेच्छा। तस्यां च सर्वमन्तर्भूतं निर्मातव्यमभेदकल्पेनास्ते।' इत्युक्तम्–स्वामिवनश्चात्मसंस्थस्य' (ई०प्र० 1/5/10) इत्यत्र तेन स्वात्मरूपमेव विश्वं सत्यरूपं प्रकाशात्मतापरमार्थमत्रुटितप्रकाशाभेदमेव सत् प्रकाशपरमार्थेनैव भेदेन प्रकाशयति महेश्वरः, इति तदेवास्यातिदुर्घटकारित्वलक्षणं स्वातन्त्र्यमैश्वर्यमुच्यते।"

(ई० प्र० वि०, खं०, 2, पृ०, 181)

~ **नियत्यनुवर्तनपरः —अवान्तरान् सृष्टिसंहारादीन् नियत्यनुवर्तननीत्यैव कुरुते परमेश्वरः। स एव च पशुरूपतया स्वात्मानमवभासयन् नियतिमनुवर्तते सुचिरं परवश इव। ब्रह्मादिरूपतया स्थितः स एव नियत्यनुवर्तनपूर्वकमेव लोकानां सृष्टिसंहारादिक्रियाः करोति। यथा—**

"नियतिं कर्मफलयोराश्रित्यैष महेश्वरः।।
सृष्टिसंस्थितिसंहारान् विधत्तेऽवान्तरस्थितीन्।"

(तं० आ० 14 1-2)

"नियत्यैव यदा चैष स्वारूपाछादनक्रमात्।।
भुक्ते दुःखविमोहादि तदा कर्मफलक्रमः।"

(तदेव, 14, 15-16)

~ नियत्यनुवर्तनोल्लंघनस्वतन्त्रः **—स्वेच्छास्वातन्त्र्येण विलसन् क्वचिन्नियत्यनुवर्तनलीलां क्वचिच्च तदुल्लंघनलीलामभिनयन् विजयते परमेश्वरः शिवः। यथा—**

"स्वभावात् परमेशानो नियत्यनियतिक्रमम्।
स्पृशन् प्रकाशते येन ततः स्वच्छन्द उच्यते।।"

(तं० आ० 14, 1-2)

~ नियत्युल्लङ्घनक्षमः — **(1) निग्रहानुग्रहलीलाविलासे नैव नियतिमनुवर्तते। गहनतराज्ञानगर्त्तपतितमपि स्वेच्छया तीव्रतरानुग्रहशक्तिपातेन मोक्षलक्ष्मीभाजनं विदधाति कदाचित्। यथा—**

"सहकारि न किञ्चिदिष्यते भवतो न प्रतिबन्धकं दृशि।
भवतैव हि सर्वमाप्लुतं कथमद्यापि तथापि नेक्षसे।।"

(शि० स्तो० 12, 1)

(2) एवमेव तिरोधानमपि स्वतन्त्रतयैव कुरुते। यथा—

"त्यक्त्वा तु नियमं कार्मं दुःखमोहपरीततम्।।
विभासयिषुरास्तेऽयं तिरोधानेऽनपेक्षकः।"

(तं० आ० 14, 6-7)

(3) महासर्गं महासृष्टिं च नियतिकृतनियमराहित्येनैव कुरुते महेश्वरः। यथा—

"महासर्गे पुनः सृष्टिसंहारानन्त्यशालिनि।।
एकः स देवो विश्वात्मा नियतित्यागतः प्रभुः।"

(तदेव, 14 3-4)

~ पञ्चशक्तिः — **सततं प्रकाशमानं स्वस्वातन्त्र्यात् स्वात्मप्रकाशमध्ये सर्वभावावभासकः, इच्छास्वातन्त्र्यमण्डितः, स्वात्मविश्रान्त्यानन्दघनः, चिदानन्देच्छाज्ञानक्रियाशक्तिसमुल्लासनस्वभावः सर्वस्य वास्तविकात्मभूतः परमः शिवः। इत्थं चिदानन्देच्छाज्ञानक्रियास्तस्यान्तरङ्गशक्तयः पञ्च। यथा—**

"यः प्रकाशः स एवायं प्रतिभाति तथा तथा।
नैव चान्यस्य कस्यापि स तु भात्येव केवलम्।।
स एव परमोदारः सर्वस्यैवावभासकः।
स्वतन्त्र इति तस्येच्छाशक्तिः स्वातन्त्र्यसंज्ञिता।।
स च स्वात्मनि विश्रान्तस्तदन्याभावयोगतः।
स्वात्मविश्रान्तिरेवैषा देवस्यानन्द उच्यते।।
स्वातन्त्र्यमहिमा वास्य स्वरूपादपृथक्स्थितिः।
स्वप्रकाशे निजे धाम्नि भासयेद्भावविभ्रमान्।।
भासना च क्रियाशक्तिरिति शास्त्रेषु कथ्यते।
यया विचित्रतत्त्वादिकलना प्रविभज्यते।।
भासनानवभाते च कथं नाम प्रकल्पते।
तदस्यान्तःस्थितं भानं ज्ञानशक्तिरहं स्मृता।।
एतावदस्य देवस्य यद्रूपं स्वात्ममात्रतः।
स उन्मेष इति प्रोक्तः पञ्चशक्तिस्ततो विभुः।।"

(मा० वि० वा० 1, 86-92)

अत्र 'अहम्' इति पदस्य तात्पर्यं विचारणीयं सुधीभिः। पाठभेदः स्यादत्र कश्चित्।

~ प्रसिद्धिप्रवर्तकः — **प्रसिद्धिमूलकस्य प्रमाणात्मकस्य लोकव्यवहारस्य मूलप्रवर्तको नैव कश्चिद् असर्वज्ञो भवितुमर्हति। बहुसर्वज्ञताकल्पने न प्रमाणम्। तेनैक एव सर्वज्ञ ईश्वरो मूलप्रसिद्धिप्रवर्तकः सिद्ध्यति। यथा—**

"व्यवहारो हि नैकत्र समस्तः कोऽपि मातरि।
तेनासर्वज्ञपूर्वत्वमात्रेणैषा न सिद्ध्यति।।
बहुसर्वज्ञपूर्वत्वे न मानं चास्ति किंचन।
भोगापवर्गतद्धेतुप्रसिद्धिशतशोभितः।
तद्विमर्शस्वभावोऽसौ भैरवः परमेश्वरः।।"

(तं० आ० 35, 12-14)

~ बन्धमोक्षकारी **—परमेश्वर एव स्वात्मनि संकोचाद्यवभासयञ्जीवरूपतया परतन्त्रतया स्वात्मानं प्रकटयत् तथा च प्रसरन् बन्धनलीलामवभासयति। स एवानुग्रहलीलाविलासेन जीवं स्वस्वरूपप्रत्यभिज्ञोपायाभ्यासरूपे मोक्षमार्गे प्रेरयन् अन्ततो गत्वा तं परिपूर्णमोक्षलक्ष्मीभाजनं विदधाति। यथा—**

"तेन स्वसृष्टे भावांशे स्वरूपात्मन्यपि स्फुटम्।
पारतन्त्र्यावभासोऽयं देवेनैवावभास्यते।।
पारतन्त्र्यं कलयति स्वतन्त्रः परमेश्वरः।
स्वातन्त्र्ये पारतन्त्र्ये च नान्यल्लक्षणमुच्यते।।"

(मा० वि० वा० 1, 665-666)

~ लक्षितः **—बहुधा लक्षितो यथागमेषुः–**

"परसर्वात्मकं शुद्धमनाद्यं कारणं ध्रुवम्।

अप्रमेयमनिर्देश्यमनौपम्यमनामयम्।।
निराभासं परं शान्तं सर्वावयववर्जितम्।
व्यापकं सर्वतोभद्रं सार्वज्ञ्यादिगुणैर्युतम्।।
विज्ञानघनसंपूर्णं स्वानन्दानन्दनन्दितम्।
निरानन्दं निर्विकल्पं निराचारं निरक्षरम्।।
अद्वैतं कल्पनाहीनं चिद्घनं चिन्मलापहम्।।
चिदचिद्व्यापकं ज्ञेयं नित्योदितमनुत्तमम्।।
निर्विकारं परं नित्यं निर्मलं निरुपप्लवम्।
सर्वोपमानरहितं सर्वभावविवर्जितम्।।
सर्वरूपकलातीतमचलं शाश्वतं विभुम्।
सर्वगं सर्वभावस्थं सर्वभूतेषु संस्थितम्।।
हृदिस्थं सर्वभूतानां प्रेरकं सर्ववस्तुषु।
न तेन रहितं किंचिद्दृश्यते सुरवन्दिते।।
तस्मात्सर्वगतं विश्वं स एकः परमेश्वरः।
सर्वज्ञो नित्यतृप्तश्च तस्य बोधो ह्यनादिमान्।।
स्वतन्त्रोऽलुप्तशक्तिश्चानन्तशक्तिर्महेश्वरः।
तस्य चेच्छा महेशस्य न विकल्प्या कथञ्चन।।
अमेयत्वादनादित्वात्कथं केनोपलभ्यते।
कार्यतो ह्यनुमानेन वस्तुतः परिभाव्यते।।
कार्यं तस्य परा शक्तिर्यथा सूर्यस्य रश्मयः।
वह्नेरूष्मेव विज्ञेया ह्यविनाभाविनी स्थिता।।
सर्वानन्दकरी भद्रा शिवस्येच्छानुवर्तिनी।
तद्धर्मधर्मिणी शान्ता नित्यानुग्रहशालिनी।।
विवर्त एतत्सर्वं हि तच्छक्तेर्नान्यतो भवेत्।"

(ने० तं० 21, 20-32)

~ लीलाविलासी— **(1) परमेश्वर एव स्वयं स्वरसेन समुच्छलन् सृष्ट्यादिपञ्चकृत्यैर्विश्वात्मकतयादभासते, ततो न विश्वावभासे पारमेश्वरीं लीलां विहायान्यत् किमपि मायाऽविद्यावासनाकर्मादिमूलभूतं निमित्तम्, सर्वस्यापि तस्य स्वयं सनिमित्तकत्वात् पारमेश्वरस्य लीलाविलासस्यैव च तत्तदवभासकारणत्वात्। यथा—**

"इत्थं स्वसंविदम्भोधिः स्वात्मनि प्रोच्छलत्ययम्।।
इत्थं च विश्वमेवेदं जगदानन्दसुन्दरम्।"

(मा० वि० वा० 2, 234-235)

एष एव हि जगत्सृष्टिविषये मुख्यः सिद्धान्तः पराद्वैत-शैवदर्शनस्य। एष एव चाद्वैतवैदान्तिकविवर्तवादाच्छैवस्य पराद्वैतस्य भेदः। अस्यैव च सिद्धान्तस्य पूर्वैरपि महर्षिभिरपरोक्षतयानुभूतत्वादेष एव वास्तविकोऽद्वैतसिद्धान्तः।

(2) अनन्तकोटिब्रह्माण्डानां सृष्टिसंहारादिपरमेश्वर-स्यापरिमितो विलासः यस्याभिनयेऽसौ सततं संलग्न एव तिष्ठति। यथा—

"नर्तक आत्मा। रङ्गोऽन्तरात्मा। प्रेक्षकाणीन्द्रियाणि।"

(शि० सू० 3, 9-11)

"अभिनवरमणीयं सच्चिदानन्दकन्दं
स्वनवनवविलासोल्लासनैकप्रवीणम्।"

(आ० वि० 1, 1)

~ विलासमयः —**परमेश्वर एव तस्य विलासस्तद्विलास एव च सः। विलास एव हि परमेश्वरताप्रयोजकः परमेश्वरस्य यतः। स एव तस्य भावः, भावश्च सत्ता। ततो विलास एव सः। यथा—**

"विलासो न स्वतो भिन्नो विलासादिपि न स्वयम्।
तदेतत् सच्चिदानन्दमद्वैतं पारमार्थिकम्।।
तैस्तैर्दार्शनिकैस्तत्तद्रूपेणायं निरूप्यते।
अयमेव विलासोऽस्य स्फुटं सत्योऽनुभूयते।।"

(आ० वि० 2, 3-4)

~ विविधकल्पनाश्रयः — **दर्शनशास्त्रगुरवो विविधाः कल्पना आश्रित्य परमेश्वरस्य विषये उपदेशान् कुर्वन्ति स्वमत्यनुसारं शिष्यजनसामर्थ्यानुसारं च। यथा—**

".....पञ्चशक्तिस्ततो विभुः।।
त्रिशक्तिरेकशक्तिर्वा देवो वा केवलः स्थितः।
शक्तिरेवाथ देवी सा सा च शास्त्रे निरूप्यते।।"

(मा० वि० वा० 1, 92-93)

~ विश्वात्मक — **(1) स्वयमेव विश्वरूपतयावभासमानः परमः शिवः। यथा—**

"तदित्थं परमेशानो विश्वरूपः प्रगीयते।
न तु भिन्नस्य कस्यापि धरादेरुपन्नता।।"

(मा० वि० वा० 1, 1060)

(2) शुद्धसंविन्मात्ररूपतया सततं प्रकाशमान एव स्वस्वातन्त्र्यलीलया विश्वात्मकप्रतिबिम्बखचितोऽपि प्रकाशते सततम्। यथा—

"उक्तं च कामिके देवः सर्वाकृतिर्निराकृतिः।
जलदर्पणवत्तेन सर्वं व्याप्तं चराचरम्।।"

(तं० आ० 1, 66)

(3) परमेश्वरस्य शुद्धचिन्मात्रस्वरूपत्वेन विश्वोत्तीर्णत्वम्, विश्वप्रतिबिम्बधारित्वेन च विश्वात्मकत्वमपीति तात्पर्यम्। यथा—

"अत एवायं विश्वमयत्वेऽपि विश्वोत्तीर्णस्तुदुत्तीर्णत्वेऽपि तन्मयः।
इत्युभयथापि न कश्चिद् दोषः।"

(तं० आ० वि०, खं० 1, पृ०, 105)

(4) स्वविलासलीलयैव जगदाकारतयाऽऽभासमानः स्वतन्त्रो भगवान्। यथा—

"तस्मात्प्रकाश एवासौ गीतो यः परमः शिवः।
स एवाचिन्त्यमहिमा स्वातन्त्र्योद्दामघूर्णितः।।
प्रकाशते तथा तैस्तैः स्वभावैरच्युतस्थितिः।"

(मा० वि० वा० 1 69-90)

द्र०:—तदेवाग्रे–1; 71-74 यावत् इति।

"एकः प्रकाशः स्वातन्त्र्याच्चित्ररूपः प्रकाशते।
वस्तुतश्च न चित्रोऽसौ नाचित्रो भेददूषणात्।।"
(तदेव, 1, 76)

"तस्मात् प्रकाश एवायं चित्रशक्तिसुनिर्भरः।
स्वयं विचित्ररूपेण भाति विश्वत्र विश्वतः।।"
(मा० वि० वा० 1, 607)

~ शास्त्रावतारकः —समस्तरहस्यभूतमन्त्रादिविद्यावतारणपरः परानुग्रहकारी। यथा—

"सर्वेषां मन्त्रराजानां बृहकः परमेश्वरः।।
अनेन ग्रथिता मन्त्राः सूत्रे मणिगणा इव।
अस्य गर्भे स्थिता मन्त्राः जायन्ते मोक्षसिद्धिदाः।।
परं सर्वगतं देवं सर्वसिद्धिफलोदयम्।
व्यापकं सर्वतोभद्रं सर्वतोमुखमव्ययम्।।
पूरणं सर्वमन्त्राणां रक्षणं सर्वतोबलम्।
मन्त्राणां योनिभूतं तु मोक्षदं सिद्धिदं शिवम्।।"
(ने० तं० 18, 16-19)

~ शास्त्रस्रोतोभूतः —सर्वमपि शास्त्रज्ञानतत्त्वं पारमेश्वरे परे स्वात्मविमर्शेऽभेदभावेन सदा परावाग्रूपेण वर्तमानमेव सत् पश्यन्त्यादिदशाक्रमेण बहिः परिस्पन्दते काले काले स्थाने स्थाने च। तत एव सकलशास्त्रज्ञानपरिस्पन्दस्य मूलभूतकेन्द्रस्थानीयो हि यः, स एव परमेश्वरः। यथा—

"उच्यते सर्व एवायं बोधः संवित्प्रभामयः।।
प्रकाशरूपतायोगाच्चिदामर्शघनात्मकः।
तत्रामर्शस्वभावोऽयं यः प्रकाशः प्रकाशते।।
स एव किन्न शास्त्रौघः किमन्यैर्युक्तिडम्बरैः।
परावाग्देवताविद्धस्तत्रासौ केवलं भवेत्।।
न तु लौकिकमायीयवर्णपुञ्जविचित्रितः।"
(मा० वि० वा० 1 25-28)

सकलं शास्त्रजातं पारमेश्वरसंविदि परावाग्रूपतया सततं परिस्पन्दमानं सत् पारमेश्वरानुग्रहपूतेषु सदाशिवादिषु पश्यन्त्यादिरूपतया परिस्फुरति।

~ समस्तनामरूपः —सततमानन्दमयक्रीडाविलासपरः शब्दराशिरूपत्वेन स्वीकृतसदाशिवादिधरान्ततत्त्वशरीरः शुद्धसंविन्मयः स्वतन्त्रः परश्च प्रमाता। यथा—

"परमेश्वरः स्वातन्त्र्यसारत्वात् आदिक्षान्तामायीयशब्दराशिपरामर्शमयत्वेनैव एतत्स्वीकृतसमस्त वाच्यवाचकमयाशेष-जगदानन्द-सद्भावापाद्नात् परं परिपूर्णत्वात् सर्वाकाङ्क्षाशून्यतया आनन्दप्रसरनिर्भरः।"
(प्र० हृ०, पृ०, 49-50)

~ सर्वकर्ता—क्षेत्रज्ञा जीवा यद्यदन्तर्वहिष्करणैः कायेन प्राणेन वा कुर्वन्ति तत्तत् सर्वं मूलतः परमेश्वर एव तथा-तथा कारयति स्वतन्त्रया क्रीडाशीलया स्वेच्छया । ततोऽसावेव वस्तुतः सर्वत्र कर्ता। यथा—

"एतदुक्तं भवति-क्षेत्रज्ञे अनिच्छति स्वरसबलादेव य उल्लेखाद्यास्तत्र तावत् भगवतः स्वातन्त्र्यं, यत्रापि पशोरिच्छा सम्बद्ध्यते, तत्रापि तदिच्छोदये भगवत एव स्वातन्त्र्यमुपजीव्यं, निमित्तान्तराभावात्, भगवत्सृष्टितन्त्रोपजीवनाच्चेति।"
(ई० प्र० वि० वि०, खं० 2, पृ०, 430)

कुम्भकारव्यापारो नाम परमार्थतः ईश्वरेच्छैव, तदवभासित कायस्पन्दपर्यन्ता, न पुनरन्यः कश्चन सः, ...सङ्कल्पेषु यद्यपि क्षेत्रज्ञस्यैव स्वातन्त्र्यं तथापि चित्परमार्थताया न्यग्भावयितुमशक्यत्वाद् ईश्वरस्यैव तद् वस्तुतः।"
(ई० प्र० वि०, खं० 1, पृ०, 334-335)

~ सर्वस्वरूपः —भेदाभेदादिमयानां विश्वेषां पदार्थानां सामान्यं स्वरूपं परमेश्वराख्यम्। यथा—

"भिन्नेष्वपि न भिन्नं य-
च्छिन्नेष्वच्छिन्नमेव च।
नमामः सर्वसामान्यं
रूपं तत्परमेश्वरम्।।"
(स्त० चिं०, 6)

~ सृष्ट्यादिकारी—पारमेश्वरात् स्वातन्त्र्यादेव जगतः सृष्ट्याद्या नाविद्यातः। यथा—

"स्वात्मन्येव प्रभास्वरे प्रकाशनेन ध्रियमाणान् भावान् धारयति स्वयमप्रकाशीभावेन जडतास्वभावेदंभावास्पदताप्रापणेन प्रकाशयति परमेश्वर एव।"
(प० त्री० वि०, पृ० 114)

द्र० चः—(प० प्रा०; पृ० 12, प० सा० वि०, पृ० 15,17,18,19; ष० त० सं०, पृ० 1-2; प० त्री० ल० वृ०, पृ०,18 आ० वि० सं० रि०, पृ० 21; पू० प्र०, 1, 52,53)

~ स्वतन्त्रकर्ता—यः सर्वत्र वास्तविकः स्वतन्त्रश्चैकः कर्त्ता स एव हि परमेश्वरः। यथा—

"वस्तुतः कुम्भकारोऽपि ऐश्वर्येव स्वतन्त्रविश्वात्मतारूपया व्यवस्थया मृदादिसंस्कारापेक्षया प्रदर्शितनियत्यभिधननिजशक्तिविजृम्भातो घटं जनयेत्; अन्यथा अचेतना मृदादयः कथं कुम्भकारेच्छामनुरुध्येरन्। तन्तवोऽपि वा पटसम्पादनेच्छां किं नाद्रियेरन्।"
(ई० प्र० वि०, खं० 2 पृ०, 148)

परमेश्वरता— द्र० — 'परमेशता' इति।
द्र० — 'परमेश्वरत्वम्' इति।

परमेश्वरत्वम्—अनन्तसृष्टभाववैचित्र्येण दर्पणनगरन्यायेन यदवभासनस्वभावत्वं परायाः संविदस्तदेव तस्याः परमेश्वरत्वम्। तद्राहित्ये शून्यप्रायत्वं जडकल्पत्वं च शून्यस्येव गगनस्य भवेत्तस्याः। तच्चासंविद्रूपतामेव पोषयेन्न पुनः संविद्रूरूपताम्। एवमेव सृष्ट्यादिपञ्चकृत्यकारित्वं परस्य तत्त्वस्य परमेश्वरत्वम्। यथा—

"अस्थास्यदेकरूपेण वपुषा चेन्महेश्वरः।।
महेश्वरत्वं संवित्त्वं तदत्यक्ष्यद्घटादिवत्।"
(तं० आ० 3, 100-101)

"परमेश्वरस्य स्वतन्त्रभट्टारकस्य इदमेव परमेश्वरत्वं यदयं.....स्वचिद्भितौ स्वातन्त्र्यशक्त्या दर्पणनगरवत्

स्वानतिरिक्तमपि अतिरिक्तमिव शिवादिक्षित्यन्तमनन्तावान्तरवैचित्र्यचित्रितमाभासयंस्तावदशेषचमत्कारात्मकपूर्णानन्दघनस्वभाव एवेति।"

(स्व० तं० उ० 11, पृ०, 171)

परमेष्ठी— ~ गुरुः — परमगुरोरपि गुरुः परमेष्ठी गुरुः। यथा—

"यदुक्तमस्मत्परमेष्ठिभिः शिवदृष्टौ।"

(ई० प्र० वि०, खं० 1, पृ०, 49)

द्र०—(तदेव, खं० 2, पृ०, 292) इति।

~ अभिनवगुप्तस्य—तस्य प्रत्यभिज्ञाशास्त्रे गुरुर्लक्ष्मणगुप्तः परमगुरुरुत्पलदेवः परमेष्ठी च गुरुः श्री सोमानन्दः शिवदृष्टिनिर्माता। यथा—

"आहास्मत् परमेष्ठी च शिवदृष्टौ गुरूत्तमः।"

(तं० आ० 13, 108)

परमोक्षक्रमः — परतरां मुक्तिदशां प्रत्यारोहे यः क्रमः स एवम्—

(1) शक्तिपातः, (2) मलशैथिल्यम्, (3) गुरुं प्रति यियासा, (4) दीक्षालाभः, (5) बोधः, (6) हेयस्य मलकर्मादेर्हानिः, (7) उपादेयलाभः, (8) पशूचितभोगवासनाया आणवस्य च मलस्य हानिः, (9) उत्तरलोकेषु प्राप्तस्याधिकारस्य क्षयः, (10) शुद्धा परिपूर्णा च स्वात्मस्थितिरिति। यथा—

"क्रमश्च शक्तिसम्पातो मलहानिर्यियासुता।
दीक्षा बोधो हेयहानिरुपादेयलयात्मता।।
भोग्यत्वपाशवत्यागः पतिकर्तृत्वसंक्षयः।
स्वात्मस्थितिश्च.....।।"

(तं० आ० 22, 10-11)

परम्परोपायः —शाक्त आणवश्चोभावपि परम्परया प्रत्यभिज्ञोपायौ।

आणवः शाक्तस्योपायः, शाक्तः, शाम्भवस्य शाम्भवश्च साक्षात् स्वस्वरूपप्रत्यभिज्ञात्मकस्य विज्ञानस्य। यथा—

"तस्य शाम्भवस्योपायः शाक्तः' आदिशब्दात् तस्याप्युपाय आणवः।"

(तं० आ० वि०, खं० 1, पृ०, 182)

शाम्भवस्यैव या पूर्णा परिपक्वता सैवानुपाय इति।

परयूथ्याः — सांख्यवैष्णववौद्धार्हताद्याः, वैयाकरणाश्च ये पराद्वैतशैवादितरेषु शास्त्रेषु श्रद्धाभाजः। स्वयूथ्यास्त्वदयवादनिष्ठा मुख्याः, अमुख्याः पुनः पाशुपतसिद्धान्तशैवाद्याः।

द्र० – **'स्वयूथ्याः'** इति।

परयोगी—अनात्मनि शरीरादौ य आत्मत्वाभिमानः, यश्च वस्तुतत्त्वेनात्मरूपे एव जगत्यनात्मत्वाभिमानस्तदुभयस्य हान्या वास्तविकस्य विश्वप्रतिबिम्बखचितस्य चिन्मयस्य स्वरूपस्य यः साक्षाद्हृदयङ्गमीभावस्तत्पात्रतामुपगतो योगी। यथा–

"इत्थं विभ्रमयुगलकसमूलविच्छेदने कृतार्थस्य।
कर्तव्यान्तरकलना न जातु परयोगिनो भवति।।"

(प० सा०, 40)

परलिङ्गम्—उच्चारादावुत्कृष्ट आणवयोगे साक्षात्कार्यं नरशक्तिशिवात्मकं मुक्तिप्रदं लिङ्गम्।

द्र०:–**'अव्यक्तलिङ्गम्'** — उच्चारयोगे इति।

द्र०:–**'लिङ्गम्'** इति च।

परवेधः —(1) रहस्यात्मको वेधदीक्षाप्रकारविशेषः। यथा—

"नेन्द्रियाणि न वै प्राणा नान्तःकरणगोचरः।
न मनो नापि मन्तव्यं न मन्ता न मनिक्रिया।।
सर्वभावपरिक्षीणः परवेध उदाहृतः।"

(तं० आ० 29, 253-254)

(2) असौ षट्चक्रवेधो येन गुरुः शिष्यं सर्वेषु चक्रेषु भावनाभ्यासेन परशिवतां प्रापयति। असौ स्वं शिवत्वं सर्वेषु चक्रेष्वनुभवति परवेधेनेति। यथा—

"परवेधं समस्तेषु चक्रेष्वद्वैतमामृशन्।
परं शिवं प्रकुर्वीत शिवतापत्तिदो गुरुः।।"

(तं० आ० 29, 271)

गुरुः शिष्यं परवेधेन शिवत्वं साक्षात्कारयतीति।

(3) मन्त्रादिप्रयोगेण, अन्तःकरणप्राणादिक्रियाभिश्च रहितः, गुर्वनुग्रहमात्रसम्पन्नो वेधः। यथा—

"नेन्द्रियाणि न वै प्राणा नान्तःकरणगोचरः।
न मनो नापि मन्तव्यं न मन्ता न मनिक्रिया।।
सर्वभावपरिक्षीणः परवेध उदाहृतः।"

(तं० आ० 29, 253-254)

एवमाणवोपायसचिवोऽयं शाम्भवोपायो यः परवेधदीक्षापूर्वकमभ्यस्यते।

परशम्भुमहिम्नस्तवः —भगवता दुर्वाससा विरचितमति विस्तृतं शास्त्रसिद्धान्तगर्भमागमिकोपासनारहस्यसंसूचकं चातिमहिममण्डितं शिवस्तोत्रम्। तत्र स्तोत्रेऽनेकानि प्रकरणानि विविधविषयरहस्यप्रदर्शकानि। क्वचित्क्वचिदतिगूढरहस्यपूर्णानि कान्यपि पद्यानि दुर्बोधानीव प्रतीयन्ते। मद्रपुरे संस्करणद्वयमस्य प्रकाशं यातम्। परं न तत्र क्वापि टीका वा अर्थावबोधानुकूला टिप्पणिरपि वा विद्यते। यच्च लोके प्रसिद्धं–"महिम्नो नापरा स्तुतिः" इति तदिममेव स्तवमधिकृत्योक्तं मन्तव्यम्। अस्यैवाघोरमन्त्रसमवर्गत्वात्।

पुष्पदन्तकृतं स्तोत्रं प्रति सा प्रसिद्धिर्जनैरतिदिष्टैव मन्तव्या। तस्य स्तवस्य पौराणिकविचारबहुलत्वादघोरमन्त्रवर्गीयत्वाभावाच्चेति विचार्यमत्र सुधीभिः।

परशिवः — परमशिव एव। परब्रह्म।

~ कलनोत्तीर्णः — न हि परशिवपदे कालीकृता कापि कलना। यथा—

"न ह्यत्र कालतत्त्वस्य नाममात्रं विभाव्यते।
वैभव्यपि महाकाली शक्तिर्नात्र विजृम्भते।।"

(मा० वि० वा० 1, 53)

परशिवतत्त्वम्—

द्र०:–'सप्तत्रिंशं तत्त्वम्' इति।

परशिष्यः —वैष्णवसौगतबौद्धार्हतसांख्यवेदान्ताद्यधरसम्प्रदायेषु दीक्षिताः साधकाः शैवे परशिष्याः इति गण्यन्ते। न ते साधारणतया शैव्या दीक्षाया अधिकारिणः। यथा—

"इत्येतत् कथितं देवि परमामृतमुत्तमम्।
एतच्च नैव कस्यापि प्रकाश्यं तु कदाचन।।
परशिष्ये खले क्रूरे अभक्ते गुरुपादयोः।"

(वि० भै०, 157-158)

~ श्रवणमात्राधिकारी— परशिष्योऽपि शास्त्रव्याख्यां श्रोतुमर्हति। परं शास्त्राचाररहस्यं तस्मै न प्रकाशनीयम्। शिवानुग्रहभाज एव तत्राधिकारात्। यथा—

"सोऽपि स्वशासनीये परशिष्ये वापि तादृशं शास्त्रम्।
श्रोतुं योग्ये कुर्याद् व्याख्यानं वैष्णवाद्यधरे।।
करुणारसपरिपूर्णो गुरुः पुनर्मर्मधामपरिवर्जम्।
अधमेऽपि हि व्याकुर्यात् सम्भाव्य हि शक्तिपातवैचित्र्यम्।।"

(तं० आ० 28, 395-396)

"सोऽपीति गुरुः करुणावशेन वैष्णवादावधमेऽपि व्याख्यां कुर्यात्, किन्तु मर्मस्थानं वर्जयित्वा यदसौ साक्षादनायातशक्तिपातः।"

(तं० आ० वि०, खं० 11, पृ०, 169)

तत एव–व्याख्यानमात्रं श्रुत्वैव कैश्चन वैष्णवबौद्धप्रभृतिभिः स्वकीयया दृष्ट्या शैवशाक्तागमरहस्यानि कयापि विकारमात्रया विकृतानि विधाय स्वसम्प्रदायानुकूलतां चापाद्य पाञ्चरात्र-वज्रयानादिशास्त्रविकासनं कृतं बहुधा।

परशुमुद्रा—न स्पष्टतया व्याख्याता। साक्षादेव गुरोः सकाशाच्छिक्षणीया। उक्ता यथा—

"प्रसारयेदङ्गुलीस्तु कनिष्ठानाममध्यमाः।
अङ्गुष्ठेनाक्रमेदाद्यां परशुः समुदाहृतः।।"

(स्वं० तं० 14, 19)

"स्वपराङ्मुखेन दक्षहस्तेन स्कन्धदेशे प्रदर्शनीयोऽयम्। तत्त्वमस्याः.....दर्शितम् (श्री भैरवानुकरणस्तोत्रे) मुद्गरपरशू बिभ्रद्बैन्दवनादानुकाररूपौत्वम्। भेदविभेदनशकलनपरत्वमीशान निर्दिशसि।। इति।"

(स्व० तं० उ०, 14, पृ०, 118)

परसिद्धिलाभः —अखिलप्रपञ्चतादात्म्यभावनया प्राप्यो जीवन्मुक्तिरूपः परसिद्धिलाभः। यथा—

"समस्ततादात्म्यभावनया जीवन्मुक्ततायां परमेश्वरैकरूपतावेशात् परसिद्धिलाभः।"

(ई० प्र० वि० वि०, खं० 2, पृ०, 136)

पराः शक्तयः —

द्र०:–'अघोराः' ~ 'शक्तिः' इति।

पराः सिद्धयः —उत्तमप्रकाराः उत्कृष्टतरा अष्टौ सिद्धयः। यथा—

"तत्र च ताः सिद्धयो यदा प्रकाशरूपतया सर्वपदार्थान्तर्भावसामर्थ्यमणिमा, तथैव व्यापकत्वं महिमा, भेदरूपगौरवव्युदासो लघिमा, स्वात्मविश्रान्तिलाभः प्राप्तिः, वेद्यविलासोपलालनं प्राकाम्यम्, अनवच्छिन्नैश्वर्यशालित्वमीशितृत्वम्, विम्रष्टृतया सर्वसहतां वशित्वम्, पूर्णाहम्भावभावना यत्र कामावसायित्वमिति संविन्मय- त्वौचित्येन परामृश्यते।"

(म० मं० प०, पृ०, 126-127)

पराकुण्डलिका— शुद्धसंविद्बोधात्मिका परा शक्तिः। यथा—

"पारमेशी बोधाख्या शक्तिर्विश्वं गर्भीकृत्य परा कुण्डलिका।"

(स्व० तं० उ०, प० 4, पृ०, 161)

द्र०:– (पू० प्र० 1, 570) इति।

द्र०:–'परा कुण्डलिनी' इति।

द्र०:–'कुण्डलिनी' ~ 'पराः'–इति च।

पराकुण्डलिनी— (1) शाम्भवयोगाभ्यासे मातृकोपासनाक्रमे स्वात्मनि संहरणस्य नीत्याऽन्तर्गतौ चरमपदव्यञ्जिका "आ" इति मातृकावर्णरूपा कला। यथा—

"विसर्गप्रान्तदेशे तु परा कुण्डलिनीति च।
शिवव्योमेति परमं ब्रह्मात्मस्थानमुच्यते।।"

(तं० आ० 3, 140)

सैषा वस्तुतः स्वात्मपरमेश्वरस्य परमेश्वरता।

(2) स्वस्वरूपौन्मुख्यतोऽन्तः प्रसरन्ती स्वात्मस्पन्दस्फुरत्ता। विश्वोत्तीर्णपराहंविमर्शरूपिणी चिच्छक्तिः। यथा—

"प्रत्यावृत्तिक्रमेणान्तर्भावौन्मुख्यरूपान्तकोट्यात्मनि प्रान्ते स्वरूपे पराकुण्डलिनी, स्वात्मविश्रान्तपरसंविन्मात्ररूपेत्यर्थः।"

(तं० आ० वि०, खं० 2, पृ०, 142)

द्र०:–'कुण्डलिनी':– ~'परा' इति।

पराचित्—सतत स्पन्दनशीला परा संवित्। यथा—

"इति षडधिकत्रिंशद्भेदप्रसक्तभेदारक्तजगत्तनुः
प्रसरति महाशक्त्युल्लेखविचित्रमहापटी।
जयति बहुशः स्पन्दाकारा परा चिदनुत्तरा
विमृशत जनाः किं नो भूयः स्वभावविजृम्भितम्।।"

(अ० प्र० पं०, पृ०, 8)

अत्र प्रथमे चरणे पाठश्चिन्त्यः "भेदारक्तजगत्तनुः" इति पाठः साधुः प्रतिभाति।

परातन्त्रम्—किमप्यागमशास्त्रम्। यथा—

"यदुक्तं परातन्त्रे–

'गदिता येऽब्धयः सप्ततेऽत्र गर्भे यतः स्थिताः।
प्रथितस्तेन गर्भोदः समस्ताब्धिरसोद्वहः।।' इति।"

उद्धृ०:–(स्व० तं०, उ० 10, पृ०, 140)

परात्रिंशका— परात्रीशिका-शास्त्रस्य नामान्तरम्। तिस्रः शक्तीः कायति विमर्शयतीति त्रिंशका। कै गै शब्दे

इति। त्रिंशिकेति शब्दप्रयोग इत्थमप्यसाधुरेव। उक्तं च तथा स्पष्टमेवाभिनवगुप्तपादैः। यथा—

"त्रिंशका' इत्यपि गुरवः पठन्ति। अक्षरवर्णसाम्याच्च निरुक्तिमाहुः–तिस्रः शक्तीः कायतीति (त्रिं+श+का) त्रिंशका। न तु त्रिंशच्छ्लोकयोगात् त्रिंशिका । एतावतोऽपि त्रिंशकार्थत्वात्। तथाहि श्री तन्त्रसारे :–

"त्रिंशकार्थस्त्वया प्रोक्तः सार्धकोटिप्रविस्तरः।" इति।

(प० त्री० वि०, पृ०, 17)

श्री तन्त्रसारोऽत्र 'त्रिकतन्त्रसार' इति।

परात्रिंशिकाः —परात्रीशिकाविवरणमेवेदानीं पण्डितसमाजे पुरातनानां लेखकानामिदानीन्तनानां च सम्पादकानां प्रमादात् परात्रिंशिकेति प्रसिद्धम्, न च विद्वांसोऽभिनवगुप्तपादकृतमस्य नाम्नः प्रत्याख्यानं प्रतिसावधाना इति महाश्चर्यम् न चाति विद्वद्भिः सम्पादकैरत्र विषये मनागप्यवधानं दत्तमिति महत्तरमाश्चर्यम्।

परात्रीशिका—(1) रुद्रयामलग्रन्थादुद्धृतः उत्कृष्टतरसाधनोपायप्रतिपादकः पञ्चत्रिंशच्छ्लोकात्मको ग्रन्थविशेषः। जनाः ग्रन्थमेतं परात्रिंशिकेति वदन्ति। परं न तत् साधु। अभिनवगुप्ताचार्यमते त्रीशिकेति त्रिंशकेति च नामद्वयमस्य साधु। तच्च द्वयमपि स्वे-स्वे स्थाने व्याख्यातम्। रहस्योपायप्रतिपादकत्वाद्विरलविरला एव साधका अस्य शास्त्रस्याधिकारिणः।

द्र०:–'परात्रीशिकाविवरणम्' ~ 'तदधिकारी' इति।

(2) तिसृणामिच्छादिशक्तीनामीशिका ईश्वरी ईशना चेति त्रीशिका। त्रिभिरेताभिः शक्तिभिरेव सृष्ट्यादिकृत्यपञ्चकम् उद्योगअवभासन-चर्वण-बीजावस्थापनविलापनाख्य-रहस्यविचारपञ्चकं चोभयं चलति। तत्तासामीशिका सती परादेवी पञ्चकद्वस्याप्यस्येशिका। तस्या एव- माहात्म्यमनुभावयन्ती पुस्तकाकारेयं परात्रीशिकेति। न पुनरियं परात्रिंशिका। तथा प्रयोगोऽज्ञेषु पठनपाठनरतेषु वर्गेषु प्रचलितोऽप्यसाधुरेव। यथा—

"तिसृणां शक्तीनाम् इच्छा-ज्ञान-क्रियाणां सृष्ट्याद्युद्योगादिनामानन्तरनिर्वाच्यानाम् ईशिका, ईश्वरी, ईशना चेशितव्याव्यतिरेकेणैव भाविनी, इत्येतच्छक्तिभेदत्रयोत्तीर्णा तच्छक्त्यविभागमयी संविद्भगवती भट्टारिका पराऽभिधेयम्। तद्योगादेव चेदमभिधानं त्रीशिकाख्यम्।"

(प० त्री० वि०, पृ०, 16-17)

आश्चर्यमेतद् यदेवंविधेऽभिनवगुप्तीये व्याख्याने विद्यमानेऽपि विद्वांसो ग्रन्थस्यास्य, स्वकल्पितमेव तन्नाम व्यवहरन्ति यन्निरस्तमाचार्यवर्येण स्पष्टम्।

परात्रीशिकातत्त्वविवेकः — यच्च लोके परात्रीशिकाविवरणमति प्रसिद्धं तदेव मुद्रिते संस्करणे ग्रन्थारम्भे तत्त्वविवेक इति नाम्नोक्तं शीर्षकाङ्कतया। यथा—

"श्रीमदभिनवगुप्ताचार्यकृततत्त्वविवेकाख्यव्याख्योपेतः।"

(पं० त्री० वि०, पृ०, 1)

परात्रीशिकाविवरणम्—आचार्याभिनवगुप्तकृताऽतिविस्तृता परात्रीशिकागमग्रन्थस्य व्याख्यैव तद्विवरणम् इति नाम्ना सुप्रसिद्धेति ग्रन्थान्तरतो विज्ञायते। यथा—

"अनुत्तरप्रक्रियायामिति श्री परात्रीशिकाविवरणादावित्यर्थः।"

(तं० आ० वि०, खं० 6, पृ०, 249)

इयं व्याख्या मुद्रिते ग्रन्थे प्रारम्भे तत्त्वविवेक इति, उपसंहारे च तत्त्वविवरणमिति, पुनश्च विवृतिरित्येवं त्रिभिर्नामभिरुल्लिखिला। परं जयरथीयकथनानुसारं "विवरणम्" इत्येवास्याः नाम साधु।

~ तदधिकारी—लक्षेषु कश्चिदेव पारमेश्वरानुग्रहपूतहृदयकमलः सूक्ष्मतरविचारदक्षतीव्रधिषणो विद्वान् साधकोऽत्राधिकारी, न साधारणाः शास्त्राभ्यासपरा विद्वांसो, नापि साधारणः सांसारिकविषयपङ्कनिमग्नो जनः। यथा—

"ये तावत् प्रविवेकबन्ध्यहृदयास्तेभ्यः प्रणामो वरः
केऽप्यन्ये प्रविविञ्चते न च गताः पारं धिगेताञ्जडान्।
यस्त्वन्यः प्रविमर्शसारपदवीसम्भावनासुस्थितो
लक्षैकोऽपि स कश्चिदेव सफलीकुर्वीत यत्नं मम।।"

(प० त्री० वि०, पृ०, 281)

~ तन्निर्माणकालः — तन्त्रालोकात् पूर्वमेव निर्मितं परात्रीशिकाविवरणमाचार्यवर्येण। यतस्तन्त्रालोकनिर्माणं परलोकगते कर्णाख्ये शिष्ये विनिर्मितम्, एतत् पुनः शास्त्रं तस्मिन् जीवति सति। यतस्तस्य हितकरणमेतच्छास्त्रनिर्माणप्रयोजकम्। यथा—

"तस्यैवात्मभवो विभावितजगत्सर्गस्थितिः शङ्कर-
ध्यानार्चापरिचिन्तनैकरसिकः कर्णाभिधानो द्विजः।
.....
एतत् प्रियहितकरणप्ररूढहृदयेन यन्मया रचितम्।
मार्गप्रदर्शनं तत् सर्वस्य शिवाप्तये भूयात्।।"

(प० त्री० वि०, पृ०, 279-280)

परात्रीशिकाविवृत्तिः — (1) आचार्यसोमानन्दनाथ कृता लघ्वी व्याख्या। तस्या उद्धरणानि तत्र तत्राभिनवगुप्ताचार्यकृते परात्रीशिकाविवरणे 12 स्थलेषु द्रष्टव्यानि। तद्यथा–

द्र०- प० त्री० वि०, पृ०:– 16, 52, 59, 62, 63, 90, 92, 95, 99, 207, 268, 282।

एतेनास्या विवृत्तेः सुमहन्माहात्म्यं ध्वन्यते।

(2) परात्रीशिकाविवरणमेव ग्रन्थान्ते पुष्पिका- पंक्तौ तद्विवृत्तिरित्युक्तं मुद्रितपुस्तकानुसारम्। यथा—

"विवृतिश्चात्र तत्र भवच्छ्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्ताचार्यविरचिता।"

(प० त्री० वि०, पृ०, 282)

(3) लक्ष्मीरामकृता परात्रीशिकागमटीका।

द्र०: – 'लक्ष्मीरामः', इति।

~ परात्रीशिकालघुवृत्तिः — केनाप्यर्वाचीनेन पण्डितेन विरचिता कापि टीका या तेनाचार्याभिनवगुप्तकृतेति प्रख्यापिता माहात्म्यवर्धनार्थमस्याः। परं परीक्षणेन स्पष्टं

प्रतिभाति यन्नैषा टीकाऽऽचार्यवर्यैः कृता यतः— (1) यो मूलपाठः परात्रीशिकाविवरणे, ततो भिन्नः पाठोऽत्र बहुधा दृश्यते। (2) वेदाचार्यवर्यैरेव रचिताऽभविष्यत्तदा प्रारम्भे वाऽन्ते वैतद्विरचनप्रयोजननिर्देशोऽप्यत्राभविष्यत्। (3) व्याख्यैषाऽनेकेषु स्थलेषु न सर्वथा परात्रीशिका-विवरणानुसारिणी। (4) शैली नात्राभिनवगुप्तीया कथञ्चनापि। (5) आचार्याभिनवगुप्तस्त्वत्र विषये श्रीसोमानन्दकृत-विवृत्यनुसारीति स्पष्टमुक्तं तेन विवरणे, परमेषा लघ्वी वृत्तिः श्रीमदुत्पलदेवीयतन्त्रसारानुसारिणीति कथितं ग्रन्थारम्भ एव। (6) मूलग्रन्थवाक्यानां विभाजनं विवरणे यथा कृतमाचार्यवर्यैर्न तथाऽत्र टीकायां कृतम्। (7) यथा तन्त्रालोकसरणिमनुसरति तन्त्रसारो न तथा परात्रीशिका विवरणसरणिरत्रानुसृता टीकाकारेण। (8) नात्र तादृशी गम्भीरता यादृशी विवरणग्रन्थे। ततो नेयं टीकाऽऽचार्याभिनवगुप्तकृतेति ज्ञेयं सुधीभिः सम्यक् च परीक्षणीयैषा। इति निवेदयते कोषकारः।

परादशा — प्रमाणादित्रिकोणात्मकप्रपञ्चोत्तीर्णतया स्थितिश्चिदात्मनः प्रमातुः। यथा—

"श्रीज्ञानगर्भेऽपि :—
'विहाय सकलाः क्रिया जननि मानसीः सर्वतो
विमुक्तकरणक्रियानुसृतिपारतन्त्र्योज्ज्वलम्।
स्थितैस्त्वदनुभावतः सपदि वेद्यते सा परा।
दशा नृभिरतन्द्रितासमसुखामृतस्यन्दिनी।।' इति।"
(स्त० चि०, वि०, पृ०, 5)

परादिवाग्रहस्यम् — (1) परस्या वाचस्तावद्रसमयी स्थितिः। वाच्यं स्वस्वरूपे निगीर्याऽऽनन्दमयतयाऽवभासमाना परिपूर्णाऽहं विमर्शमयी संविदेव परा वाक्। तेन रसमयताऽस्याः।

(2) पश्यन्त्यां वाच्यं तावत् सामान्येनोल्लसदपि वाचकेन भेदं न जहाति, न च स्फुटतया भासते। अत्र च वाच्यं बुभुत्सितमिव तिष्ठति न बुद्धम्। ततो भुत्सि-तार्थताऽस्याः।

(3) मध्यमायां वाचकोऽनेकविशेषणविशिष्टः सन् वाच्यं पृथग् विमृशति, परं न स्फुटतया तदवभासयति। अत्र शब्दस्यार्थबोधकत्वेऽपि स्वरूपपरता मता, अर्थस्यास्फुटत्वात्।

(4) अर्थपरता पुनर्वैखर्यां वाचि या वाच्यं स्फुटेन स्वरूपेणोद्रिक्तमिवावभासयति। यथा—

"कदाचिद्वाचकांशस्तु स्वरूपग्रस्तवाच्यकः।
निर्भासते कदाचित्तु सामान्योल्लासिवाच्यकः।।
जातुचिन्निकटानन्तविशेषणविशेषितः।
स्फुटस्वरूपवाच्यांशसमुद्रेकेण भासते।।
तेनार्थपरता जातु स्वरूपपरता तथा।
बुभुत्सितार्थता क्वापि क्वचिद्रसमयी दशा।"
(मा० वि० वा०, 1, 422-424)

परादेवी — सिसृक्षात्मिका पारमेश्वरी इच्छाशक्तिः परादेवी। यथा—

"प्रथमं तावत् परां देवीं परामृशति।"
(तं० आ० वि०, खं० 1, पृ०, 16)

"नौमि चित्प्रतिभां देवीं परां भैरवयोगिनीम्।
मातृमानप्रमेयांशशूलाम्बुजकृतास्पदाम्।।"
(तं० आ० 1, 2)

"आद्योच्छलत्तात्मकत्वेन बहिरुल्लिसिषास्वभावाम्।"
(तं० आ० वि०, खं० 1, पृ०, 17)

"इच्छाशक्तिरघोरानां शक्तीनां सा परा प्रभुः।"
(तं० आ० 3, 72)

~ स्वरूपतः — परमेश्वरस्य परमेश्वरतैव परादेवी। सा च तस्य स्वात्मविमर्शलक्षणचमत्कारस्वरूपा। यथा परमेश्वरः सर्वथा सर्वतश्च परिपूर्णस्तथैव तस्येयं पराशक्तिरपि। यथा—

"तस्यैवैषा परादेवी स्वरूपामर्शनोत्सुका।
पूर्णत्वं सर्वभावेषु यस्या नाल्पं न चाधिकम्।।"
(बो० प० द०, पृ०, 5)

~ साधनाभ्यासे — ब्रह्मादिकारणषट्कादूर्ध्वमस्याः स्थानं प्राणोदयानुसन्धानविधौ। यथा—

"तस्यान्ते तु परादेवी यत्र युक्तो न जायते।।
अनेन ज्ञातमात्रेण दीक्षानुग्रहकृद्भवेत्।"
(तं० आ० 6, 191-192)

परादेवीमन्त्रः — नैष स्पष्टतां नीतो जयरथेन। मूलेऽपि संक्षेपत एवोक्तः। यथा—

"परायास्तूक्तसद्व्याप्तिर्जीवः सहचतुर्दशः।"
(तं० आ० 30, 27)

अत्रान्येषां वर्णपदादीनामनुवृत्तिर्भवेत् कदाचित् अत्रत्यं विशेषबीजाक्षरं तावत् "सौः" इति। यतो जीवस्तु निश्चयतः सकार एव। चतुर्दशः स्वरः औकारः। विसर्गः आक्षेप्यः। अन्ये बीजपिण्डा अस्य मन्त्रास्याङ्गत्वे भूता न वेति न स्पष्टतां याति।

परादेवी-विद्या —परापरादेवी मन्त्र एव।

~ अपरप्रकारतः — "स्हौः" इति वा "ह्रूं सौः" इति वा। यथा—

"जीवः प्राणस्थ एवात्र प्राणो वा जीवसंस्थितः।।"
(तं० आ० 30, 28)

जीवः सकारः प्राणो हि हकार एव। यथा—

"पराशक्तितस्तु सावित्र्या इच्छया च नियोजितः।
जीवः प्राणस्थ एवात्र प्राणो वा जीवसंस्थितः।।"
उद्धृ० :- (तं० आ० वि०, खं० 12, पृ०, 188)

"तेन स्हौः ह्रूसौः वेति।"
(तं० आ० वि०, खं० 12, पृ०, 188)

परादेव्यः — अघोराः शिवशक्तयः। यथा—

"तदाघोराः परादेव्यो जाताः शैवाध्वदैशिकाः।।"
(तं० आ० 3, 73)

पराद्याः— ~ वाचः — **परावागभेदमयी, पश्यन्ती भेदोन्मुखाभेदमयी, मध्यमा स्फुटसंवृतभेदमयी, वैखरी पुनः स्फुटविवृततरभेदमयी विमर्शरूपा वाक्। यथा—**

"मयूराण्डरसन्यायेन परा, वटधानिकान्यायेन पश्यन्ती, माषशमिकान्यायेन मध्यमा, ततः परं वैखरी।"

(प० त्री० वि०, टिप्पणी, पृ०, 102)

पराद्वैततत्त्वम् — तत्पूर्णं तत्त्वं यस्मिन् सति यदाश्रयत्वेन चापेक्षिकं द्वैतमद्वैतमप्युभयं तथा-तथा भाति। तच्च पारमेश्वरं तत्त्वं तन्त्रालोकमालिनीविजयवार्तिकादौ पराद्वैतं तत्त्वमिति कथितम्। यथा—

"इदं द्वैतमयं भेद इदमद्वैतमित्यपि।
प्रकाशवपुरेवायं भासते परमेश्वरः।।
अस्यां भूमौ सुखं दुःखं बन्धो मोक्षाश्चितिर्जडः।
घटकुम्भवदेकार्थाः शब्दास्तेऽप्येकमेव च।"

(तं० आ० 2, 18-19)

"अस्यां भूमाविति-परमाद्वयदशायामित्यर्थः।।"

(तं० आ० वि०, खं०, 1-2, पृ०, 15)

"एतौ बन्धविमोक्षौ च परमेशस्वरूपतः।
न भिद्येते न भेदो हि तत्त्वतः परमेश्वरे।।"

(बो० पं० द०, पृ०, 15)

द्र० : – 'पराद्वैतम्' इति।

~ अनिर्वाच्यम् —

"आभ्यामेव तु हेतुभ्यां न द्वयात्मा न द्वयोज्झितः।
सर्वात्मना हि भात्येष केन रूपेण मन्त्र्यताम्।।"

(तं० आ० 2, 31)

द्वयात्मा = सदसद्रूपः।

द्वयोज्झितः = सदसदुभयभिन्नः।

पराद्वैतता — परमः परिपूर्णोऽद्वैतभावः। यथा—

"न खलु भगवति श्री परमशिवे प्रमेयकथा काचिदस्ति, तत्त्वौघस्य सर्वथा तत्र चिद्रूपतामात्रविश्रान्तत्वेन लीनत्वात्। ततश्च सावस्था संवित्स्वभावेन स्वात्मविश्रान्त्यानन्देन अकृत्रिम-नैसर्गिकपरामर्शात्मकस्वात्मचमत्कारलक्षणेनैकघना अविच्छिन्नतद्रूपा परमाक्षरेण विग्रहवती भगवतो विश्वमयस्यानवच्छिन्नानुत्तत-धाम्नो गलितप्रमेयकथा सर्वोत्तीर्णा व्यपदिश्यते।"

(ई० प्र० वि०, खं० 2, पृ०, 268-269)

पराद्वैतदृष्टिः — सर्वसर्वात्मिका सर्वथाऽद्वैतमयी दृष्टिः। प्रमाणप्रमेयप्रमातृप्रपञ्चः सर्वोऽपि वस्तुत एकमात्र-परमशिव एव, नान्यत्, किमपीति विमृशन्ती विमर्शात्मिका दृष्टिः परयोगिनः।

यथा—

"सर्वे भावाः स्वमात्मानं जानन्तः सर्वतः स्थिताः।
घटो मदात्मना वेद्मि वेद्म्यहं च घटात्मना।।
सदा शिवात्मना वेद्मि स वा वेत्ति मदात्मना।
शिवात्मना यज्ञदत्तो यज्ञदत्तात्मना शिवः।।
सदाशिवात्मना वेत्ति घटः स च घटात्मना।
सर्वे सर्वात्मका भावाः सर्वसर्वस्वरूपतः।।
सर्वस्य सर्वमस्तीह नानाभावात्मरूपकैः।
मद्रूपत्वं घटस्यास्ति ममास्ति घटरूपता।।
नानाभावैः स्वमात्मानं जानन्नास्ते स्वयं शिवः।
चिद्वयक्तिरूपकं नानाभेदभिन्नमनन्तकम्।।
एवं सर्वेषु भावेषु सर्वसाम्ये व्यवस्थिते।
तेन सर्वगतं सर्वं शिवरूपं निरूपितम्।।"

(शि० दृ० 50, 105-110)

एवं विधा परमाद्वैतदृष्टिरेव हि शिवदृष्टिः। सैव सविस्तरं प्रतिपादितास्ति शिवदृष्टिसंज्ञके ग्रन्थे।

पराद्वैतम्— (1) सर्वं सर्वमयमेकमखण्डमेव परं तत्त्वमिति सिद्धान्तः पराद्वैतसिद्धान्तः। यथा—

"प्रदेशमात्रमपि ब्रह्मणः सर्वरूपम्, एकैकत्रापि च तत्त्वे षट्त्रिंशत्तत्त्वमयत्वं शास्त्रेषु निरूपितम्।"

(प० त्री० वि०, पृ०, 139)

(2) द्वैतेऽद्वैते चोभयत्र व्यापकतयावभासमानम् परिपूर्णमेकत्वम्। न तत्र द्वैतावभासस्य नाप्यद्वैतावभासस्य निषेधः। उभयमेकस्यैव पराद्वैततत्त्वस्य विजृम्भास्वरूपं तदैश्वर्याभिव्यञ्जकं चेति। यथा—

"इदं द्वैतमिदं नेति तदिदं च द्वयाद्वयम्।
इति यत्र समं भाति तदद्वयमुदाहृतम्।।"

(मा० वि० वा० 1, 629)

"सर्वानुग्राहकं पक्षमालिलम्बिषसे यदि।
परमाद्वयदृष्टिं तत् संश्रयेः शरणं महत्।।"

(तदेव, 1, 631)

"इदं हि तत् पराद्वैतं भेदत्यागग्रहौ न यत्।"

(मा० वि० वा०, 1, 123)

"तदलं प्रकृतं निरूप्यते परमेशः किल भेदकल्पनाम्।
प्रकटीकुरुते यथा-यथा ननु कालोऽपि विजृम्भते तथा।।"

(मा० वि० वा०, 1, 125)

"न तथापि च याति भिन्नतां परमार्थेन कदाचिदेव सः।
युगपत् स हि संविदात्मकः स्वातन्त्र्याद् बहुधा प्रकाशते।।
क्रमकालविवर्जनाशयं युगपच्छब्दममुं प्रयुञ्जते।"

(तदेव, 1, 126-127)

(3) सर्वं सर्वात्मकम्, सर्वस्य विभूतिः सर्वम्, घटोऽपि षट्त्रिंशत्तत्त्वस्वरूपः इति स्वयं परमेश्वरः। इत्येवं प्रकारा सर्वत्र समा परमेश्वरतादृष्टिरेव पराद्वैतदृष्टिः। यथा—

"एको भावः सर्वभावस्वभावः
सर्वे भावा एकभावस्वभावाः।
अर्हद्वादः सोऽयमस्मत्सुदृष्टौ
युक्तश्च श्रीसारशास्त्रेऽपि चोक्तः।"

(मा० वि० वा०, 1, 641)

अर्हतां सिद्धयोगिनां वादो न बौद्धवादः इति वेद्यमत्र। यथा—

"एको भावः सर्वभावस्वभावः
सर्वे भावाः एकभावस्वभावाः।
एकोभावस्तत्त्वतो येन दृष्टः।"
सर्वे भावास्तत्त्वतस्तेन दृष्टाः।"

उद्ध० :– (प० सा०, वि०, पृ०, 59)

(4) एकैव परमेश्वरस्य पराभट्टारिकात्मिका पराशक्तिः सकलप्राणिवर्गात्मकप्रमातृरूपेण सर्वप्रमाणरूपेणाखिल प्रमेयरूपेण च स्वयमेव स्वेच्छयावतिष्ठते, ततः सर्वं सर्वात्मकमित्येवं रूपत्वमेव पराद्वैतत्वम्। यथा—

"अत एव सर्वे पाषाणतरुतिर्यङ्मनुष्यदेवरुद्र-केवलिमन्त्रतदीशतन्महेशादिका एकैव पराभट्टारिकाभूमिः सर्व-सर्वात्मनैव परमेश्वररूपेणास्ते इति।"

(प० त्री०, वि०, पृ०, 188)

(5) असौ सिद्धान्तो यदनुसारमभिधयैव सर्वशिवता प्रतिपाद्या भवति स्मात्र कापि भागत्यागादिरूपा लक्षणोपयुज्यते। यथा—

"अज्ञातपर्यायपदस्थितीन् प्रति
प्रयुज्यते पादप एष भूरूहः।
कुम्भो घटश्चेति तथैव भण्यते
महेश्वरः सर्वमिदं जगत्त्विति।।"

(मा० वि० वा०, 1, 929)

द्र०– च - मा० वि० वा०; 1, 69, 70, 86, 108, 240, 241, 605, 606, 607, 621, 623, 634, 635, 762, 763, 1060, 1063, 1112, 1113, तदेव, 2, 13, 18, 133।

~ प्रामाणिकम् — पराद्वैतसिद्धान्ते मुख्यं प्रमाणं स्वानुभूतिमयः स्वहृदयस्पन्दनसाक्षात्कास्वमत्कारः। यथा—

"अत. एव पराद्वैतं यद्विश्वानुग्रहात्मकम्।
तस्योपायं परं ब्रूते हृदयं स्पन्दनात्मकम्।।"

(भा० वि० वा०, 2, 18-19)

पराद्वैतशास्त्रम्— सर्वसर्वात्मकतयैकमेव तत्त्वं सर्वत्र सर्वथा स्वयं प्रकाशते इत्येवम्भूतस्य वस्तुतत्त्वस्य प्रतिपादकमद्वैतशैवदर्शनशास्त्रम्।

~ सर्वोत्कृष्टम् — अन्येषां शास्त्राणां क्रमेण वाऽक्रमेण वा पराद्वैतशास्त्रोपायभूतत्वम्। साक्षात्कृतस्य पराद्वैतस्यैव केवलस्य परमं मोक्षं प्रति साक्षात्कारणत्वम् स्वयं वा मोक्षात्मकत्वम्, इतरेषां च तद्द्वारैव परिपूर्ण-मोक्षप्रदत्वम्। यथा—

"द्वारद्वारिभावेनैषामुपायोपेयभावस्योक्तत्वात्, तेन परमाद्वयोपदेशप्रतिपादकमेव शास्त्रं शिवसद्भावलाभैकफलम् इत्यवसेयम्। तदेव परमपदप्राप्तौ साक्षादुपायभूतत्वादुत्कृष्टम्।"

(तं० आ० वि०, खं० 10, पृ०, 48-49)

"केतकीकुसुमसौरभे भृशं भृङ्ग एव रसिको न मक्षिका।
भैरवीयपरमाद्वयार्चने कोऽपि रज्यति न भेदमोहितः।।"

(मा० वि० वा०, 2, 151)

पराद्वैतसिद्धान्तः — सर्वमाब्रह्मस्तम्बपर्यन्तं जन्तुजातं जडत्वेन सम्मतं च जगदखिलं परिपूर्णपरशिवात्मकमेवेति सिद्धान्तः। न खलु वस्तुतः कोऽपि भेदः क्वचिदपि। भेदस्य योऽवभासो व्यवहारे सोऽपि शिवरूप एव, तस्य तेनैव स्वेच्छयावस्थापितत्वात्।

द्र०: – **'पराद्वैतदृष्टिः'** इति।

~ स्वसंवेदनसिद्धः — पराद्वैतसिद्धान्ते ऽनुमानतर्काद्य-पहासस्वसवेदनं नाम प्रमाणमुपादेयतमम्। तथाहि निज हृदयस्फुरणं यज्जगदानन्दाभिव्यक्तिमयं सामान्यस्पन्दाख्यं तदेव तथाविधं प्रमाणं येन सर्वं स्थूलसूक्ष्मजाग्रत्स्वप्नादिमयं विश्वमेकशिवरूपमेव साक्षात्क्रियते सूक्ष्मतरावधानधनैः सुप्रबुद्धैः साधकैः। यथा—

" अत एव पराद्वैतं यद्विश्वानुग्रहात्मकम्।।
हृदये बोधमयो यः स्वविमर्शः पूर्णचिच्चमत्कारः।
युगपद्द्रागिति हठतो लीनीकृतविश्वतः स्फुरणः।।
भावग्रहाद्यचरमदशाद्वयोल्लासिनिर्वृतिसुपूर्णः।
जगदानन्दमयोऽसौ सामान्यास्पद इत्युक्तः।।,"

(मा० वि० वा०, 2, 18-20)

परानन्दः — उच्चारादियोगाभ्यासे प्राणोदये आलम्बनतां नीते सति या विश्रान्तिरभ्यस्यते शिवयोगिभिस्तया विश्रान्त्याभिव्यज्यमान आत्मानन्दः परानन्द इति। अनन्त-प्रमेयांशानां विशेषतोऽपानात्मकानां मेलनया परानन्दे स्थिरा स्थितिर्जायते। अनन्तप्रमेयग्रहणसमकालमेव यो नैराकांक्ष्य-भाववशोदित आनन्दः पूर्णतया विकसितोऽसौ परानन्दः। यथा—

"प्राणोदये प्रमेये तु परानन्दं विभावयेत्।
तत्रानन्तप्रमेयांशपूरणापाननिर्वृतः।।
परानन्दगतस्तिष्ठेदपानशशिशोभितः।।"

(तं० आ० 5, 45-46)

"पूरणा तत्तदर्थग्रहणेन नैराकांक्ष्यं सैव पानं पीतिः तेन निर्वृतः स्वात्ममात्रविश्रान्तः।"

(तं० आ० वि०, खं० 3, पृ०, 351)

~ तदभिव्यक्तिस्थानम् — बाह्यद्वादशान्ताद् हृदयं यावदपानसंचारे परानन्दस्याभिव्यक्तिरुच्चारयोगेन भवति। यथा—

"पूरकक्रमेण द्वादशान्ताद्धृदयं यावत् तद्दशामधिशयान इत्यर्थः।"

(तं० आ० वि०, खं० 3, पृ०, 351)

परापञ्चाशिका — अनुत्तरप्रकाशपञ्चाशिकैवादिनाथ-विरचिता। सैवैतन्नाम्नोक्ता योगिनीहृदयदीपिकायाम्। यथा—

द्र०: - यो० ह० दी०; पृ०, 76, 87, 132, 282, 288, 289, 293, 299, 302, 303, 330, 334, इति।

परापरदशा— शिवताया अधः मायायाश्चोपरि-

भासमाना भेदाभेदमयी दशा सदाशिवेश्वरतत्त्वस्वरूपा, यत्र अहमिदमिति वा इदमहमिति प्रमातृप्रमेययोः सामानाधिकरण्येन विमर्शः समुल्लसति। यथा—

"अत्रापरत्वं भावानामनात्मत्वेन भासनात्।
परताहन्तयाच्छादात्परापरदशा हि सा।।"
(ई० प्र०, 3-1-5)

शुद्धविद्यादशापि परापरैव।

परापरलिङ्गम् — उच्चारादावुत्कृष्टे आणवोपायाभ्यासे साक्षात्कार्यं नरशक्तिशिवात्मकं भुक्तिमुक्तिप्रदं लिङ्गम्।

द्र०: — 'व्यक्ताव्यक्तलिङ्गम्' इति।

द्र०' : — 'लिङ्गम्' इति च।

तच्च स्वमेव स्वरूपं तथाविधतया साक्षात्कार्यम्।

परापराः — ~ शक्तयः —

द्र०: — 'घोराः' — ~ 'शक्तयः— इति।

परापरशक्तिः — शुद्धविद्याशक्तिः। यथा—

"परापरशक्तिमये शुद्धे विद्यादिपञ्चकम्।।"
(अ० प्र० पं०, 29)

परापरादेवी — मातृकाक्रमे उकाराभिव्यंग्या ज्ञान-शक्तिः परमेश्वरस्य। यथा :—

"ज्ञातव्यविश्वोन्मेषात्मा ज्ञानशक्तितया स्थितः।
इयं परापरादेवी.....।।"
(तं० आ० 3, 94)

तदुक्तं ज्ञानशक्तिवन्दनश्लोकव्याख्याने : –

"अथ परापरोभयस्वरूपमयीं परापरां देवीं परामृशति इति।"
(तं० आ० वि०, खं० 1, पृ०, 19)

परापरादेवीमन्त्रः — न स्पष्टमुक्तस्तन्त्रालोके वा तद्विवेकेऽपि वा। त्रिशिरःशास्त्रप्रकरणसाहाय्येन च यथा कथञ्चित्तस्योद्धारः क्रियते। तथासौ रहस्यमन्त्रः एवम् –

"ओं अघोरे ह्लीः परमघोरे हुं घोररूपे हः घोरमुखि भीमभीषणे वम पिव रु रु र र फट् हुं हः फट्।।" इति।

अत्राष्टौ पदानि अष्टात्रिंशदक्षराणि च। यथा—

"आमन्त्रितान्यघोर्यादि-त्रितयस्य क्रमोदितैः।
बीजैर्विसर्गिणी माया हुं हकारो विसर्गवान्।।
पुनर्देवीत्रयस्यापि क्रमादामन्त्रणत्रयम्।
द्वितीयस्मिन्पदेऽकार एकारस्येह च स्मृतः।।
ततः शक्तिद्वयामन्त्रो लुप्तं तत्रान्त्यमक्षरम्।"
(तं० आ० 30, 20-22)

"एवं परापरा देवी पदाष्टकविभूषिता।
अष्टत्रिंशाक्षरा सैषा प्रोद्धृता पारमेश्वरी।।
अर्धाक्षरद्वयं चास्या ज्ञातव्यं तत्त्ववेदिभिः।"
उद्ध०— (तं० आ० वि०, खं० 12, पृ०, 186)

अर्द्धाक्षरद्वयमत्र टकारद्वयम्। स्वरासहित्येनार्द्धाक्षरत्वं वेद्यम्। टकारद्वयस्यार्द्धाक्षररूपत्वेनैवाक्षरगणनाऽष्टत्रिंशदिति। यथा—

परापरादेवीविद्या— परापरा देवी - मन्त्र एव।

परापराशक्तिः —सा शक्तिर्यया परमेश्वरः सर्वमपि प्रपञ्चं भेदाभेदात्मतया धारयति, विमृशति, प्रकाशयति च। यथा—

"यया च दर्पणहस्त्यादिवद् भेदाभेदाभ्यां (शिवादि धरण्यन्तं बिभर्ति च पश्यति च भासयति च परमेश्वरः) सास्य श्रीपरापराशक्तिः।"
(तं० सा०, पृ०, 28)

परापरोमन्त्रः — न स्पष्टमुक्तः।

द्र०— (तं० आ० वि० खं० 7/2, पृ०, 71)

परापूजा— सर्वस्मिंल्लोकव्यवहारे शिवभावस्यैव साक्षाद्दर्शनं विमर्शनञ्च। यथा—

"कृत्वाधारधरां चमत्कृतिरसप्रोक्षाक्षणक्षालिता-
मात्तैर्मानसतः स्वभावकुसुमैः स्वामोदसन्दोहिभिः।
आनन्दामृतनिर्भरस्वहृदयानर्घार्घपात्रक्रमात्
त्वां देव्या सह देहदेवसदने देवार्चयेऽहर्निशम्।।"
(तं० सा०, पृ०, 181)

ज्ञानोपायमयी स्थितिरियम्।

पराप्रकृतिः — अजडाप्रकृतिः ईश्वरस्य स्वभावरूपा जीवभूता (प्रकृतिः) प्रकृष्टा। यथा—

"तदपेक्षया जीवभूता परा इति.....।
ननु उभे एते जडाजडे मम प्रकृती,
प्रकृतिश्च स्वभाव उच्यते।"
(भ० गी० सं०, पृ०, 162)

पराप्रावेशिका— शास्त्रे प्रविविक्षूणां कृते क्षेमराजेन विरचितः लघीयान् ग्रन्थः। यथा—

"इति श्रीमन्महामाहेश्वराचार्यवर्यक्षेमराजविरचिता पराप्रावेशिका.....।"
(प० प्रा०, पृ०, 12)

पराबीजम्— तदेव बीजं यत् परात्रीशिकायाम्। यथा—

"चतुर्दशयुतं भद्रे तिथीशान्तसमन्वितम्।
तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः।।"
(प० त्री० 9, 10)

इत्यनेन वाक्येनोक्तम्। शाक्तदर्शने एतद्बीजं शक्तिबीजमिति प्रसिद्धम्। शाक्तोपायेऽस्य प्रयोगः। बीजं चैतत् "सौः" इति।

द्र० — 'अमृतबीजम्' इति।

पराबीजोद्धारः — तत्पराणि पद्यानि तन्त्रालोके रहस्यमय्या शैल्या निबद्धानि। यथा—

"सुखसीत्कारसत्सम्यक्साम्यप्रथमसंविदः।
संवेदनं हि प्रथमं स्पर्शोऽनुत्तरसंविदः।।
हृत्कण्ठ्यौष्ठ्यत्रिधामान्तर्नितरां प्रविकासिनि।
चतुर्दशः प्रवेशो य एकीकृततदात्मकः।।
ततो विसर्गोच्चारांशे द्वादशान्तपथावुभौ।

हृदयेन सहैकध्यं नयते जपतत्परः।।"

(तं० आ० 5, 142-144)

"शक्त्यादिसामरस्येन द्वादशान्तपर्यन्तं पराबीजमुच्चारयेदित्यर्थः।"

(तं० आ० वि०, खं० 3, पृ०, 459)

पराभक्तिः — (1) सर्वत्र परमेश्वरस्यैवाभेददृष्ट्या साक्षाद्दर्शनं विमर्शनं च। शाक्तोपायमयी भक्तिः। यथा—

"न योगो न तपो नार्चक्रमः कोऽपि प्रणीयते।
अमाये शिवमार्गेऽस्मिन् भक्तिरेका प्रशस्यते।।"

(शि० स्तो० 1, 18)

(2) जीवभावनिमज्जनपूर्वकं शिवभावविमर्शनं शाक्तोपायदृशा। समावेशमय्येषा भक्तिः। यथा—

"परया भक्त्या परिमितस्य देहप्राणपुर्यष्टकादेरप्रधानताकरणेन तद्रूपतानिमज्जनात्मकप्रह्वीभावसम्पादनपुरःसरेण तदुक्तरूपयाज्यदेवतात्मकपरसंविद्रूपप्रधानत्वापादानलक्षणेन भजनेन श्रद्धातिशयेन समावेशदायिनेत्यर्थः परा चासौ भक्तिः।"

(प० त्री० ल० वृ०, पृ०, 23)

पराभट्टारिका — ध्यानोपासनाद्यालम्बनतापादनमये विमृश्यमाना शैवी परा-शक्तिः।

पराभट्टारिकास्थानम् ~ तत्स्थानम्— साधनाक्रमे परस्यां पूजायां पराभट्टारिकायाः स्थानं सदाशिवतत्त्वादनाश्रिताच्छिवादपि चोर्ध्वतरमेव। सदाशिवान्तस्य कारणवर्गस्य तस्याः आसनत्वेन निरूपितत्वात्। यथा—

"येयमपरा परापरा पराभट्टारिका पारमेश्वरी भैरवीया सत्ता सा सदाशिवतत्त्वानाश्रितशक्तितत्त्वस्याप्युपरिवृत्तिः, तदन्तस्याप्यासनपक्षीकृतत्वात्।"

(प० त्री० वि०, पृ०, 127-128)

परामतम्— किमपि शैवं दर्शनशास्त्रपुस्तकम्।

द्र०:— (म० मं०, पं०, पृ०, 77)

परामर्शः — चिद्विमर्शः। यथा —

"परामर्शो हि स्पन्दनात्मैव, न तु परिनिष्ठिताचलजडरूपः।"

(प० त्री० ल० वृ०, पृ०, 6)

परामर्शशक्तिः — चित्स्पन्दात्मिकायाः संविदो विमर्शात्मकता। सा च परिपूर्णो "अहम्" इति। यथा—

"इह परमेश्वरस्य महाप्रकाशात्मनो विमलस्यापि एकैव परामर्शशक्तिः किंचिच्चलत्ताभासरूपतया स्पन्दः इति, स्फुरत्ता इति, ऊर्मिः इति, बलम् इति, उद्योगः इति, हृदयम् इति, सारम् इति, मालिनी इति, वरा इत्याद्यन्तसंज्ञाभिः आगमेषूद्घोष्यते।"

(स्प० सं०, पृ०, 5)

परामहामाया – द्र०— 'महामाया' - (उ) इति।

परामुक्तिः — (1) विश्वोत्तीर्णपरशिवता परामुक्तिः- यथा—

"यदा समस्तवेद्यांशसमुत्तीर्णं परं महः।
भाति मुक्तस्तदैवासौ भैरवः परमः स्मृतः।।"

(तं० व० धा० पृ०, 1, 37)

(2) परमशिवात्मकभैरवरूपता परामुक्तिः। यथा—

"यद्रूपत्वं परामुक्तिः पुनरावृत्तिवर्जिता।"

(तं० व० धा०, पृ० 1, 34)

परामुद्रा– लौकिके व्यवहारजाते प्रचलत्यपि स्वरूपे स्थितेरभ्यासः शिवयोगिनाम्। यथा—

"मयोक्तं भोगमोक्षप्रदीपिकायाम्:—
'उद्यन्तृताबलेन तु विकासवृत्त्या स्वरूपगस्तिष्ठेत्।
स्वयमुपसृतेन्द्रियार्थानश्नन्नानन्दभूमिगो योगी।।
एषोच्छृङ्खलरूपा विकस्वरतरा प्रबुद्धबुद्धीनाम्।
सिद्धाः स्थिताः सदाऽस्यां ह्यानन्दरताः परा च मुद्रैषा।।"

(स्पं० प्र०, पृ०, 49)

परामृतपदम्— षण्ठवर्णचतुष्टयम् ऋ, ॠ, ऌ, ॡ इति। यथा—

"परामृतपदात्-षष्ठवर्णचतुष्टयात्।"

(तं० आ० वि०, ख० 2, पृ०, 115)

परामृतरसः — स्वात्मानन्दचमत्कारः। यथा—

"परामृतरसः स्वविश्रान्त्यानन्दघनता।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 388)

परावाक् — (1) पारमैश्वर्यशक्तिस्वभावा परिपूर्णाऽहंविमर्शात्मिका परा संवित्। सैव विश्वं स्वात्मतया विमृशन्ती सती परिपूर्णविमर्शरूपत्वात् परावागित्युच्यते। विमर्श एव हि यतः सर्वत्र वाक्तत्त्वम्। यथा—

"पूर्णत्वात् परा, वक्ति विश्वमपलपति प्रत्यवमर्शेनेति च वाक्। अत एव सा स्वरसेन चिद्रूपतया स्वात्मविश्रान्तिवपुषोदिता सततमनस्तमिता नित्याऽहमित्येव, एतदेव परमात्मनो मुख्यं स्वातन्त्र्यमैश्वर्यमीशितृत्वमनन्यापेक्षित्वमुच्यते।"

(ई० प्र० वि०, खं० 1, पृ०, 205-206)

(2) असौ विमर्शमयी वाणी, यस्यां सर्वेऽपि शास्त्रार्थाः वैखरीवाचा बहिः प्रकटनात् प्राक् वक्तुः स्वान्तरे तिष्ठन्ति। यथा—

"तेन प्रथमतो यावन्मायीयां वैखरीं दरीम्।।
मायीयवर्णसंदृब्धः शास्त्रार्थो नायमागतः।
अन्तः सारविबोधैकपरवाङ्मयवर्णकः।।"

(मा० वि० वा०, 1, 411-412)

(3) संविदः परिपूर्णो यः शुद्धः स्वात्मपरामर्शो "अहमिति" सैव परावाणी। नात्रैदमः कथञ्चिदप्याभासः। सर्वमप्यत्राहमात्मनैव तिष्ठति सततम्। तच्चमत्कारसत एव हि जगत्सृष्ट्यादि सम्भवति। यथा—

"परामर्शस्वभावत्वादेतस्या यः स्वयं ध्वनिः।।
सदोदितः स एवोक्तः परमं हृदयं महत्।"

(तं० आ० 4, 181-182)

"यः खलु परावाग्रूपः स्वरसोदितोध्वनिः अहं

परामर्शात्मानादः.....
'नास्योच्चारयिता कश्चित्प्रतिहन्ता न विद्यते।
स्वयमुच्चरते देवः प्राणिनामुरसि स्थितः।।"
(उद्धरणम्)
.....
यस्मादैश्वर्यात्मा अहं-परामर्श एवास्याः स्वभावो
यन्माहात्म्याद्विश्वात्मनेयं परिस्फुरेत्।"
(तं० आ० वि० खं० 3, पृ० 211-212)

(4) सर्वथाऽभेदमयी पूर्णाहं विमर्शरूपा वाणी। अस्यां सर्वं भेदमयं भेदाभेदादिमयं च विमर्शजातमभेदेनैवास्ते। एषैव पश्यन्त्यादिष्वनुस्यूतत्वेन तिष्ठति। यथा—

"सा च.....प्रथमतः परामर्शमय्या पश्यन्त्या आसूत्रयिष्यमाणानन्तशक्तिशताविभिन्ना, प्रथमतरं परमहामन्त्रमय्याम् अदेशकालकलितायां संविदि निरूढा, तावत्, पश्यन्त्युद्भविष्यदुक्तिप्रत्युक्त्यविभागेनैव वर्तते। सैव च सकल-प्रमातृसंविदद्वयमयी सततमेव वर्तमानरूपा।"
(प० त्री० वि०, पृ०, 3-4)

"पश्यन्त्युपरि पराभूमिर्भगवती यत्र सर्वमभेदेनैव भाति च विमृश्यते च।"
(प० त्री० वि०, पृ०, 130)

(5) अमायीयशब्दशक्तिपारमार्थिकतत्त्वभूता, परमन्त्रवीर्यात्मिका, असांकेतिकाकृतक-मूलभूतसंस्कारसारा, पश्यन्त्यादिवाक्त्रये व्याप्य स्थिता देशकालाकार प्रमेयतादि विमर्शशून्या, परिपूर्णाविच्छिन्नाहंविमर्शरूपा वाणी। विमर्शात्मकतैव तस्यावागात्मता, विमर्शस्यैव वाचः। प्राणकल्पत्वात्। यथा—

"यैव परावाग्सभूमिः सैवमायीयशब्दशक्तिपरमार्थस्वभावा-साङ्केतिकाकृतकपारमार्थिकसंस्कारसारा..... पश्यन्त्यादिदशास्वपि वस्तुतो व्यवस्थिता तया विना पश्यन्त्यादिष्वप्रकाशतापत्त्या जडताप्रसङ्गात्। तत्र चेदमेवमत्रेदानीमित्यादिभेदकलना न काचित्। ..... इयं स्वचमत्कृतिमयी स्वात्मन्येव प्रकाशनमये विश्रम्य स्फुरति, तदेव स्फुरितमविच्छिन्नतापरमार्थम् 'अहम्' इति।"
(प० त्री० वि०, पृ०, 5-6)

"प्रत्यवमर्श एव हि शब्दात्मा परभूमौ प्रमातुः सूक्ष्मभुवि वागिन्द्रियं करणम्।"
(ई० प्र० वि० वि०, खं० 2, पृ०, 275)

द्र० — म० प्र० वि०, पृ०, 3-4, प्र० ह०, पृ०, 27) इति।

"एवं भासा स्वभावेन स्वरूपामर्शनात्मिका।
स्वरूपामर्शनं यच्च तदेव परवाग्वपुः।।"
(प० त्री० वि०, पृ०, 213)

द्र०— स्वा० द० 3, पृ०, 33, इति।
(प० सा० वि०, पृ०, 33,) इति च।

(6) परममहापश्यन्त्या अपि यः परमस्वातन्त्र्यमयः परः आनन्दमहिमा परिपूर्णोऽहं विमर्शात्माऽसौ परावाक्। यथा—

"याऽसौ महापश्यन्तीनां प्रत्यगात्मरूपाणामविभागात्मिका परममहापश्यन्ती तया च योऽसावानन्दमहिमा परस्वातन्त्र्यात्मा उल्लासनीयः सा भगवतः परावागिति।"
(ई० प्र० वि०, खं० 2, पृ०, 197)

~ उत्कृष्टा — अन्तर्लीनविश्वस्य शुद्धसंविन्मात्र-स्वरूपस्यात्मनो विमर्शनं हि परा वाचः उत्कृष्टतरं पदम्। यथा—

"अन्तर्निलीनानन्तार्थस्वात्मामर्शश्चितिः परा।
एकवारवहाद् येयं मन्त्री वाक् शुद्धकर्तृता।।"
(प० पं०, 41)

~ वैखरीगर्भा — परस्यां वाचि वैखरी बीजरूपतया वर्तमानैव तिष्ठति। तथा पश्यन्त्यां मध्यमायामपि। तत एव बालानामहरहरस्फुटस्फुटस्फुटतरादिक्रमेण पदपदार्थ- व्युत्पत्ति-र्जायते। यथा—

"पराभट्टारिकासंविदन्तर्गतं तु वैखरीपदं विमृश्यते। न हि तत्र वैखर्या असम्भवः। तथा हि बाला द्वित्रैर्वर्षैः यद्यपि स्फुटीभूतस्थानकरणा भवन्ति तथापि एषां मासानुमासं दिनानुदिनमेव वा व्युत्पत्तिरधिकाधिकरूपतामेति इति तावत् स्थितम्। तत्र यदि मध्यमापदे तथाविधवैखरीप्रसरस्स्फुटीभविष्यत्स्थान-करणाविभागवर्णांशस्फुरणं न स्यात्, तदहर्जातस्य बालकस्य मासजातस्य संवत्सरजातस्य वा व्युत्पत्तौ न विशेषः स्यात्।.. ..... तस्मादन्तर्मध्यमानिविष्टस्थानकरणादिमयी अस्त्येव वैखरी। मूकेऽप्येवमेव। सर्वात्मकत्वं च संविदो भगवत्या एवोक्तम्।"
(प० त्री० वि०, पृ०, 158-159)

~ शास्त्रजोतोत्सरूपा — परात्वसावभेदविमर्शमयी वाग् यस्यां सर्वं शास्त्रतत्त्वमहमिति परिपूर्णविमर्शात्मतया प्रकाशते। यथा—

"परपरामर्शसारबोधात्मिकायां परस्यां वाचि सर्वभाव-निर्भरत्वात् सर्वं शास्त्रं परबोधात्मकतयैवोज्जृम्भमाणं सत्.....।"
(तं० आ० वि०, खं० 1, पृ०, 36)

पराशक्ति : — (1) स्पष्टरेखा। मन्त्रवर्णसङ्केतोऽयं कश्चन। यथा—

"पराशक्तिर्बिन्दुद्वयमध्यस्था स्पष्टरेखा।"
(ने० तं० उ०, खं० 1, पृ०, 51)

(2) सूर्यस्य प्रभेव, वह्नेरूष्मेवाविनाभावसम्बन्धेन शिवेन साकमभेदत एव सम्बद्धा तस्य परा परमेश्वरता। यथा—

"स्वतन्त्रोऽलुप्तशक्तिश्चानन्तशक्तिर्महेश्वरः।
तस्य चेच्छा महेशस्य न विकल्प्या कथञ्चन।।
अमेयत्वादनादित्वात्कथं केनोपलभ्यते।
कार्यतो ह्यनुमानेन वस्तुतः परिभाव्यते।।
कार्यं तस्य पराशक्तिर्यथा सूर्यस्य रश्मयः।

वह्नेरुष्मेव विज्ञेया ह्यविनाभाविनी स्थिता।।
सर्वानन्दकरी भद्रा शिवस्येच्छानुवर्तिनी।
तद्धर्मधर्मिणी शान्ता नित्यानुग्रहशालिनी।।
विवर्त एतत्सर्वं हि तच्छक्तेर्नान्यतो भवेत्।।"
(ने० तं० 21, 28-32)

(3) अध्वष्टकगर्भिणी शिवस्य शिवता। यथा—
"इयं देवी पराशक्तिः शुद्धाशुद्धाध्वगर्भिणी।।"
(अ० प्र० पं०, 30)

(4) अकारादिविसर्गान्ताऽनुत्तरस्य परमशिवस्य पारमेश्वरी शक्तिः षोडशस्वरवर्णरूपा। यथा—
"कलाषोडशकाकारा शक्तिर्विजयते परा।"
(अ० प्र० पं०, 39)

(5) समस्तशक्तिव्रातोद्भवस्थानभूता परमशिवस्य परिपूर्णा चिच्छक्तिः। यथा—
"जननी सर्वशक्तीनां सर्वशक्तिमयी परा।
राजते संविदात्मैव शक्तिश्चैतन्यचन्द्रिका।।"
(पू० प्र०, खं० 1, 138)

(6) परमेश्वरस्यानन्दात्मकचमत्कारबीजभूता पराऽनुत्तरा परमेश्वरता। यथा—
"सानन्दा तु पराशक्तिर्निरानन्दः परः शिवः।।"
(ने० तं० 21, 32)

निरानन्द इत्यानन्दचमत्कारादप्युत्तीर्णोऽनुत्तरः परमः शिवः इति। प्रथमतुट्यां तथाविध एव तत्साक्षात्कारो यतः।

~ अभिधानान्तरतः — **तानि च अभिधानानिः— त्रीशिका, ऊर्मिः काली, चण्डी, दृक् कर्षिणी, वाणी भोगः, परा, नित्या, कुलम् —इत्यादीनि सर्वाण्यन्वर्थानि। यथा—**
"त्रिंशिकोर्मिस्तथा काली चण्डी, दृक्कर्षिणी तथा।
बाणी भोगः परा नित्या कुलमित्यादिभिः सदा।।
तत्तदर्थप्रवृत्ताभिः संज्ञाभिरभिधीयते।"
(पू० प्र०, खं० 1, 147-148)

अत्र वाक्ये आचार्यवर्येण त्रीशिकापदविषयेऽभिनवगुप्तीयां व्याख्यां प्रति नावहितम्। तत एव त्रिंशिकेति लिखितम्।

~ क्रमनये—**सा पारमेश्वरी शक्तिर्यया परमेश्वरः स्वात्मनि सर्वमविकल्पसंविन्मात्ररूपतया सततं धारयति, विमृशति प्रकाशयति च। यथा—**
"ययेदं शिवादिधरण्यन्तमविकल्पसंविन्मात्ररूपतया बिभर्ति च पश्यति च भासयति च परमेश्वरः सास्य श्री पराशक्तिः।"
(तं० सा०, पृ०, 28)

~ तत्पदम्— (साधनायाम्)— **परमेश्वरस्य सिसृक्षात्मिका या पराशक्तिरसौ तदभिन्नापि सती सम्बोधार्थं शब्दान्तैरुपदिश्यते। यतस्तस्या वहिर्मुखीभावोन्मेषत एवानाश्रितशिवावस्थाया आविर्भावस्ततः उपासनाक्रमे पराशक्तेः स्थानमनाश्रितस्थानादप्युपरि वेद्यम्। यथा—**
"परममहद्रूपतया प्रसिद्धोऽनाश्रितशिवरूपः स यस्याः भागो—अंश : पारमेश्वरी हि शक्तिः अनन्तषट्त्रिंशदादितत्त्वगर्भिणी।"
(प० त्री० वि०, पृ०, 66)

सैषा पराशक्तिः परशिवात्मिकैव तस्य परशिवत्व-प्रयोजिका, न पुनः शक्तितत्त्वरूपिणी।

~ प्रणवकलासु—**(1) उन्मना नाम्नी पारमेश्वरी शक्तिः। यथा—**
"उन्मना तु परा शक्तिर्ज्ञानरूपावधूतिका।।
सा क्रियेत्यभिधीयेत न क्रिया त्वध्वमध्यगा।"
(ने० तं० 16, 78-79)

(2) शक्तिव्यापिनी समनासु व्यापनशीला, तासां बीजभूता ताभ्यः समुत्तीर्णा च शक्तिरुन्मनाख्या। यथा—
"पराशक्तिर्बिन्दुद्वयमध्यगा स्पष्टरेखा। पराशक्त्यापि अधरवर्त्यपरादिशक्तिरूपाः शक्तिव्यापिनी समनाशक्तयोऽन्तःकृताः।"
(ने० तं० उ०, खं० 1, पृ०, 51)

स्पष्टरेखारूपत्वं मन्त्रलेखन विधिविचारत उक्त- मिति वेद्यम्। सा च रेखार्धचन्द्रादुपरि एवं रूपेति।

परासंवित्—
द्र०— **'संवित्'** इति।

परा संहिता — "श्री परा" इति नाम्ना निर्दिष्टं किमप्यागमिकं पुस्तकम् यस्मिन् मण्डललेखनविधिः प्रतिपादित आसीत्। यथा—
"लेख्या चात्र सिता रेखा शालिपिष्टकृता पुरः।
हरिद्रावर्णसंमिश्रा कर्णिका पीतपिञ्जरा।।
सितपीतारुणानां स्यात्केसराणां त्रयं दले।
तानि शुक्लानि वा कुर्याद्धरितान्यन्तराणि वा।
कोणा रक्ताः सितं पीठं प्रतिरेखा सिताङ्गुलात्।।
इति। **तथा—**
अङ्गुष्ठः शक्तिमान्बिन्दुश्चतस्रोऽङ्गुलयः कलाः।
तदाधारं रजः कृत्वा शक्तिस्पर्शा च बिन्दुना।।
पातयेच्छक्तिगर्भं तत्तेन तच्छक्तिमण्डलम्।'
इति श्री परायामस्ति।"
(स्व० तं० उ०, प० 5, पृ०, 23)

परासूक्तम्— किमपि शक्तिस्तोत्रम्।
द्र०:— (म० मं०, पं०, पृ०, 40)

परास्तोत्रम्— महेश्वरानन्दकृतं किमपि स्तोत्रम्।
द्र०: — (मं० मं० प०, पृ०, 74, 91, 103, 134, 142)

परिच्छिन्नत्वम्— पदार्थस्य देशकालाकाराद्यैरितरेभ्यः परितः छिन्नत्वम्; तत्तत्पदार्थेभ्यो भिन्नत्वम्, विशेषणैर्विशेषरूपतामापादितत्वम्; संकुचित्वम्, अतद्व्यावृत्त्या परिच्छिन्नविशेषपदार्थरूपत्वम्।

द्र०:— **'परिच्छेदः'** इति।

परिच्छेदः — अन्येभ्यो व्यपोहनरूपो विकल्पनव्यापारः। घट इति विकल्पात्मकेन निश्चयेनान्यदघटादि सर्वं व्यपोह्यते, तेन च घटोऽन्येभ्योऽघटादिभ्यः पदार्थेभ्यो व्यवच्छिद्यते। यथा—

"तेनाघटस्यात्मनः पटादेश्चापोहनं क्रियते निषेधनरूपम्। तदेव व्यपोहनमाश्रित्य तस्य घटस्य निश्चयनमुच्यते "घट एव" इति। एवार्थस्य सम्भाव्यमानापरवस्तुनिषेधरूपत्वात्। एष एव परितश्छेदात्तक्षणाकल्पात् परिच्छेदः।"

(ई० प्र० वि०, खं० 1, पृ०, 244-245)

परिणामः — ~ प्रकृतेः —

द्र०:— **'प्रकृति-परिणामः'** इति।

परिणामवादनिरसनम् — चेज्जगत्सृष्टिर्मूलतः परिणामन्यायेनाभविष्यत् तदा, मूलतत्त्वस्य प्रकाशस्य जगद्रूपतास्थितौ निजा प्रकाशरूपता तिरोहिताऽभविष्यत्। न च तद् भवति। ततो जगत्सृष्टिर्नैव प्रकाशरूपस्य परमेश्वस्य परिणामतो न चापि तदभिन्नायाः तस्य शक्तेः परिणामतः इति सिद्धम्। यथा—

"परिणामे तु रूपान्तरं तिरोभवति, रूपान्तरं च प्रादुर्भवतीत्युक्तम्। प्रकाशस्य तु रूपान्तराभावात् तत्तिरोधाने स्यादान्ध्यम्। अप्रकाशश्च प्रादुर्भवन् नैव प्रकाशेतेति उभयथापि सुप्तं जगत् स्यादिति न पर्यालोचितम्।"

(ई० प्र० वि०, वि०, खं० 1, पृ०, 8-9)

परिणामिनित्यम् — परिणामशीलतया भिन्नभिन्नाकारतयावभासमानमप्यनश्वरं वस्तु सांख्यानां मूलप्रकृतिरिव। सा हि त्रयोविंशतितत्त्वाकारतयावभासमाना। सत्यपि नैव नश्यति, तत्तत्त्वाकारतया सदा विद्यमानैव तिष्ठति।

परिणामन्यायेन विशेषविशेषरूपान्तरताऽऽपत्तावपि सामान्यरूपतया सततगात्या वर्तमानं तत्त्वम्। यथा—

"तेन नैतत् (तन्मात्रं) कूटस्थनित्यम्, अपि तु परिणामिनित्यम्।"

(तं० आ० वि०, खं० 6, पृ०, 227)

परिमितप्रमाता — विलुप्तपारमैश्वर्यविभवोऽपि पुनः प्रदत्तकिञ्चित्किञ्चिज्ञानक्रियासामर्थ्यो जीवः, पशुरिति ख्यातः। यथा—

"कलाविद्याकालरागनियतिभिरोतप्रोतो माययापहृतैश्वर्यसर्वस्वः सन् पुनरपि प्रतिवितीर्णतत्सर्वस्वराशिमध्यगतभागमात्र एवम्भूतोऽयं मितः प्रमाता भाति—इदानीमिदं किञ्चिज्जानानः, इदं कुर्वाणोऽत्र रक्तोऽत्रैव च यः सोऽहमिति।"

(ई० प्र० वि०, खं० 2, पृ०, 209)

परोक्षदीक्षा — ~ मृतस्य — परोक्षस्य शिष्यस्य दर्भादिमयीं प्रतिमां निर्माय तत्र तं शिष्यं भावयित्वा क्रियमाणो दीक्षाविधः। यथा—

"परोक्षदीक्षणे यद्वा दर्भाद्यैः कल्पिते मृते।
शिष्ये वीक्ष्यार्च्य पुष्पाद्यैर्न्यसेदध्वानमस्य तम्।।
येनाध्वना मुख्यतया दीक्षामिच्छति दैशिकः।
तं देहे न्यस्य तत्रान्तर्भाव्यमन्यदिति स्थितिः।।"

(तं० आ० 16, 95-96)

~ जीवतः — यथा मृतस्य शिष्यस्य परोक्षदीक्षा विधीयते तथैव जीवतोऽपि दूरविप्रकृष्टाप्राप्यादिदेशे स्थितस्य। केवलं जीवाकर्षणमस्य न विधीयते, न चापि दार्भाद्याकृतिनिर्माणम्। ध्यानेनैवोपस्थापितस्यास्य संस्कारो विधीयते। यथा—

"जीवतोऽपि परोक्षस्योत्पन्ने शक्तिपातेऽयमेव क्रमः, दार्भाकृतिकल्पनजीवाकृष्टिवर्जम्। ध्यानमात्रोपस्थापितस्यैवास्य संस्कारः।"

(तं० सा०, पृ०, 168)

"जीवत्परोक्षदीक्षापि कार्या निर्बीजिका तु सा।
तस्यां दर्भाकृतिप्राप्याकल्पने जालयोगतः।
संकल्पमात्रेणाकर्षो जीवस्य मृतिभीतितः।
शिष्टं प्राग्वत् कुशाद्युत्थाकारविप्लोषवर्जितम्।"

(तं० आ० 21, 43-44)

न तस्य दार्भ्याकृतिः कल्प्यते। न चाप्यासौ हूयतेऽग्निसाद्वा क्रियते।

~ तत्पात्राणि – (1) मरणान्तं गुरुसेवातत्परोऽप्यनवाप्तदीक्षः।

(2) मृत्युक्षण एवोदितगुरुकृपारुचिः।

(3) अधरतन्त्रेषु दीक्षितोऽप्यनवाप्तत्रिकदीक्ष एव मृतः।

(4) समयदीक्षामवाप्यापि पुत्रकादिदीक्षारहित एव मृतः।

(5) डिम्बाहतः दुर्घटनादि-हतो वा।

(6) योगेशीभक्षितः।

(7) विषाभिचारादिहतः।

(8) गुरुणैव यन्त्रतन्त्रादिना निहतः।

(9) प्राप्तदीक्षोऽपि समयाचारभ्रष्टः। यथा—

"गुरुसेवाक्षीणतनोर्दीक्षामप्राप्य पञ्चताम्।
गतस्याथ स्वयं मृत्युक्षणोदिततथारुचेः।।
अथवाधरतन्त्रादिदीक्षासंस्कारभागिनः।
प्राप्तसामयिकस्याथ परां दीक्षामविन्दतः।।
डिम्बाहतस्य योगेशीभक्षितस्याभिचारतः।
मृतस्य गुरुणा यन्त्रतन्त्रादिनिहतस्य वा।।
भ्रष्टस्वसमयस्याथ दीक्षां प्राप्तवतोऽप्यलम्।"

(तं० आ० 21, 6-9)

"न प्राप्तोऽपि परां दीक्षां.....। इत्यारभ्य
..... दीक्षाकर्म विधीयते।। इत्यन्तम्।"

उद्ध०:— (तं० आ० वि०, खं० 10, पृ०, 2 16-217)

"नगाग्राल्लुठिता ये च .....। इत्यारम्य
..... दीक्षा मृतवती भवेत्।। इत्यन्तम्।"

उद्ध० :— (तं० आ० वि०, खं० 10, पृ०, 217-218)

~ द्विविधा— मृतस्य जीवतश्च शिष्यस्येति। यथा—

"एषा परोक्षदीक्षा द्विधोदिता जीवदितरभेदेन।।"

(तं० आ० 21, 61)

~ परलोकगतस्य — **जालाकृष्टिविधिना परलोकस्थो हि शिष्य इहलोके आनीयते यागस्थानं, दर्भादिनिर्मिते च शरीरे प्रवेश्यते। ततस्तस्मिन् शरीरे एव सर्वाः दीक्षाक्रिया विधीयन्ते मन्त्रादिबलैः। ताभिश्च शिष्यस्य सकलाध्वशोधनं मलदाहनं स्वरूपप्रकाशनं च सम्भवति। तेनासौ मुक्तिं लभते। भोगवासना चेदवशिष्टा भवेत् तदोत्तरेषु लोकेषु योजनिकया क्रियया ऽऽरोप्यते। तत्र चाभीष्टभोग भुक्त्यनन्तरं तत्रत्येन लोकाधिपतिना पुनरनुगृहीतः सँस्तत्प्रभावतः सद्यो वा क्रमेण वा मुक्तो भवति। यथा—**

"कृत्वा मण्डलमभ्यर्च्य तत्र देवं कुशैरथ।।
गोमयेनाकृतिं कुर्याच्छिष्यवत्तां निधापयेत्।
ततस्तस्यां शोध्यमेकमध्वानं व्याप्तिभावनात्।।
प्रकृत्यन्तं विनिक्षिप्य पुनरेनं विधिं चरेत्।"

(तं० आ० 21, 22-24)

"महाजालप्रयोगेण सर्वस्मादध्वमध्यतः।।
चित्तमाकृष्य तत्रस्थं कुर्यात् तद्विधिरुच्यते।"

(तदेव०, 24-25)

द्र० :- 'महाजालप्रयोगः' इति – **तत्क्षेत्राणि इति च।**

~ पशुबलिसहाया — **परोक्षपुत्रकदीक्षायामपि पशुबलिर्विधीयते। यथा—**

"परोक्षेऽपि पशावेवं विधिः स्याद् योजनं प्रति।"

(तं० आ० 16, 52)

असौ पशुरपि छिन्नपाशो विधीयते इति न विस्मर्तव्यम्।

~ पौत्रिकी — **उक्तमेतद्विषये स्पष्टं पुत्रकदीक्षाप्रकरणे। यथा—**

"परोक्षदीक्षायां जीवन्मृतरूपायाम् अग्रे तं ध्यायेत्, तदीयां वा प्रतिकृतिं दर्भगोमयादिमयीमग्रे स्थापयेत्। इत्यादि।"

(तं० सा०, पृ०, 158)

~ फलतः — **परोक्षदीक्षा प्रायशः शिष्यस्य शुद्धलोक भोगायैव भवति, तस्य भोगवासनाया एवाशङ्क्यमानत्वात्। क्वचिदेव हि भोगवासनाभावो यत्र केवलं मोक्ष एव दीक्षाफलम्। यथा—**

"परोक्षदीक्षणे मायोत्तीर्णे भोगाय योजयेत्।
भोगानीप्सा दुर्लभा हि सती वा भोगहानये।।"

(तं० आ० 21, 49)

परोपायः — शाम्भव उपायः। यथा—

"अथ परौपायिकं प्रणिगद्यते पदमनुत्तरमेव महेशितुः।।"

(तं० आ० 3, 1)

परो मन्त्रः — स हि "सौः" इति बीजमन्त्रः। यथा—

"अतः शोधकभावेन शास्त्रे श्रीपूर्वसंज्ञिते।
परापरादिमन्त्राणामध्वन्युक्ता व्यवस्थितिः।।"

(तं० आ० 11, 89)

"निष्कले पदमेकार्णं त्रयर्णैकार्णमथ द्वयम्।"

(मा० वि० तं० 4, 19)

"सार्णेनाण्डत्रयं व्याप्तं त्रिशूलेन चतुर्थकम्।
सर्वातीतं विसर्गेण पराया व्याप्तिरिष्यते।।"

(तदेव, 4, 25)

पर्यन्तपञ्चाशिका — किमपि शैवदर्शनशास्त्रं यस्य पंक्तिः समुद्धृता महेश्वरानन्देन। यथा—

"स हि भैरवसिद्धान्तपूर्वपक्षोऽपि यन्मयः। इति पर्यन्तपञ्चाशिकायामुक्तम्।"

(म० मं० प०, पृ०, 12)

तदुक्तं पर्यन्त पञ्चाशिकायामः —

"अनन्तैतावदाकारस्वीकारेऽप्येकलक्षणाम्।
तां स्वसंविदमाविश्य विकल्पान्न विकल्पयेत्।।"

(म० मं० प०, पृ०, 47)

द्र०: - (तदेव० पृ०, 43, 67, 90)

डॉ० श्रीराघवनमहोदयैरचिरादेव प्रकाशित मेतत् पुस्तकम्। अत्र भंग्यन्तरेणैव मातृकोपास्तिक्रमस्य वाक्चतुष्टयस्य च प्रतिपादनं कृतमस्ति। मधुराजेनापि गुरुनाथ परामर्शे स्मृतोऽयं ग्रन्थः। यथा—

"पर्यन्तसम्पदुपपादनकल्पवल्ली पञ्चाशिका परमकारुणिकेन येन।
प्रोक्तात्विहाद्वयनये जनतां नियोक्तुं तस्मै नमोऽभिनवगुप्तगुरूत्तमाय।।"

द्र०: — (म० मं० प०, पृ० 12, 43, 47, 67, 70) (गु० ना० 1 19)

पर्व – संविदः पूर्णत्वकरणे सहायभूतः कालः। यथा—

"स्वसंवित्पूर्णतालाभसमयः पर्व भण्यते।"

(तं० आ० 28 16)

बहुप्रकारेषु पर्वसु ज्ञानप्राप्तिसम्बन्धिपर्वदिनं प्रमुखम्।

~ ज्ञानदम् — **ज्ञानोपायप्राप्तिदिनम्। तच्चतुष्प्रकारकम् : — (1) गुरुजन्मदिनम् (2) दीक्षादिनम् (3) गुरुनिर्वाणदिनम् (4) स्वजन्मदिनम्। यथा—**

"गुर्वादीनां च सम्भूतौ दीक्षायां प्रायणेऽपि च।
यदहस्तद्धि विज्ञानोपायदेहादिकारणम्।।
एवं स्वजन्मदिवसो विज्ञानोपाय उच्यते।"

(तं० आ० 28, 213-214)

~ ज्ञानदिनम् — **(1) ज्ञानपारिपूर्ण्यदिनम्। योगिनां ज्ञानं प्रायो देहत्याग एव पूर्णतामापद्यते। ततस्तद्दिनमन्येषां कृते पर्वदिनम्, पर्वपूरणादिति। यथा—**

"यदा हि बोधस्योद्रेकस्तदा पर्वाहपूरणात्।"

(तं० आ० 25, 12)

(2) शिष्याणां कृते गुरोर्योगिनो जन्मदिनम्। तद्दिने ज्ञानपूरणार्थमेव तस्य जन्म यतः। यथा—

"जन्मैक्यदिवसौ तेन पर्वणी बोधसिद्धितः।"

(तं० आ० 25, 12)

ऐक्यदिवसो देहत्यागदिवसः शिवेन साकमैक्यभावप्रदः। तेन गुरुनिर्वाणदिनमपि पर्व।

(3) निखिलस्यापि वर्गस्य कृते ज्ञानिनो गुरोः शिवैक्य-दिनं पर्व। यथा—

"तेषां तु गुरुतद्वर्गवर्ग्यसब्रह्मचारिणाम्।
तत्सन्तानजुषामैक्यदिनं पर्वदिनं भवेत्।।"

(तं० आ० 25, 11)

ऐक्यं शिवेन साकं तेषां देहत्यागो एव भवतीति। तच्च पर्व गुरुसन्ततिवर्गस्य सर्वस्य कृते, तद्वर्गस्थसब्रह्मचरिणां कृते, तत्सन्ततीनां चापि कृते भवतीति।

~ तद्विधिः — **मासिकवार्षिकादिकर्मसम्बन्धी विधिः पर्वविधिः। मासविशेषस्य तिथिविशेषे क्रियमाणो विधिः। नक्षत्रविशेषयोगेऽपि पर्वविधिर्भवति।**

विस्तरतः प्रतिपादितानि पर्वदिनानि तन्त्रसारे।

द्र० — (तं० सा०, पृ०, 183-186)

~ तद्विशेषफलम् — **शक्तियागाद्यनुष्ठानं तद्दिने सिद्ध्यति। यथा—**

"शक्तियागश्च यः प्रोक्तो वश्याकर्षणमारणम्।
तत्सर्वं पर्वदिवसेष्वयत्नेनैव सिद्ध्यति।।"

(तं० आ० 28, 30)

~ तन्निर्वचनम्ः — **पर्वशब्दव्युत्पत्तिर्द्विधा। पर्व पूरणे इत्यस्मादचि प्रत्ययेऽकारान्तः पर्वशब्दः, "पॄ" पालनपूरणयोरित्यस्मादौणादिके वनिपि नकारान्तः पर्वच्छब्दः। पूरणात् पर्व। यथा—**

"अस्मिन्नेवार्थे पर्वशब्दं व्युत्पादयति" इत्यादि।

(तं० आ० वि०, खं० 11, पृ०, 9)

~ तन्महिमा : — **(1) कुलपर्वसु चक्रपूजा निष्णाताः पूर्णसंविदो योगिन्यः सिद्धाश्च परस्परं मेलापके सति चक्रार्चा तत्परा भवन्ति। ततस्तदा पूजनं सत्वरं सफलं भवत्यन्येषामपि साधकानाम्। यथा—**

"तच्चक्रचारनिष्णाता ये केचित् पूर्णसंविदः।।
तन्मेलकसमायुक्तास्ते तत्पूजापराः सदा।
योऽप्यतन्मय एषोऽपि तत्काले स्वक्रमार्चनात्।।
तद्योगिनी सिद्धारुंद्यमेलकातन्मयी भवेत्।"

(तं० आ० 28, 18-20)

"पर्वादौ हि पूर्णायाः संविदः कामधेनुप्रख्यत्वं येनाचिरादेव तत्कालं पूजावशात् तत्तत्फलमुदियात्।"

(तं० आ० वि०, खं० 11, पृ०, 11)

"यथा चिरोपात्तधनः कुर्वन्नुत्सावमादरात्।।
अतिथिं सोऽनुगृह्णाति तत्कालाभिज्ञमागतम्।
तथा सुफलसंसिद्ध्यै योगिनीसिद्धनायकाः।।
यत्नवन्तोऽपि तत्कालाभिज्ञं तमनुगृह्णते।"

(तं० आ० 28, 23-25)

"तद्यांग आदियागस्तत्काम्यं पूजयैव पर्वसु सिद्ध्येत्।"

(तं० आ० 28, 46)

(2) द्वितीयार्द्धे द्वन्द्वत्रुट्यतीवेति पाठभेदोऽत्र स्यात् कोऽपि। अनुमानतः (पूजयैव संसिद्ध्येत्) **इत्येव पाठः स्यात् साधुः। यथा—**

"पर्वसु विनापि योगं ज्ञानं वा पूजयैव (चक्रपूजयेति) काम्यं सिद्ध्येत्।"

(त० आ० वि०, खं० 11, पृ०, 22)

~ मुख्यम् (नैमित्तिकेषु) — **स्वात्मसाक्षात्कारदिनं तु सर्वेषु मुख्यं पर्व। इतरस्य भोगमोक्षप्रदस्य ज्ञानस्य प्राप्तेर्दिनमपि मुख्यपर्वसु गण्यते। यथा—**

"ज्ञानस्य कस्यचित्प्राप्तिर्भोगमोक्षोपकारिणः।
यदा तन्मुख्यमेवोक्तं नैमित्तिकदिनं बुधैः।।"

(तं० आ० 28, 192)

~ लौकिकम्ः — **लौकिका उत्सवा अपि पर्वसु गण्यन्ते। आनन्दसमुद्रोत्तरङ्गता कारणात्। यथा—**

"उत्सवोऽपि हि यः कश्चिल्लौकिकः सोऽपि संमदम्।
संविदब्धितरङ्गाभं सूते तदपि पर्ववत्।।
एतेन च विपद्ध्वंसप्रमोदादिषु पर्वता।
व्याख्याता तेन तत्रापि विशेषाद्देवतार्चनम्।।
पुरक्षोभाद्यद्भुतं यत्तत्स्वातन्त्र्ये स्वसंविदः।
दार्ढ्यदायीति तल्लाभदिने वैशेषिकार्चनम्।।"

(तं० आ० 28, 368-370)

~ विविधम् — **मासपक्षतिथिसंयोगविशेषैर्नक्षत्र-युतिविशेषैश्चषट्प्रकाराणि पर्वाणि त्रिकाचारक्रियाकलापे प्रसिद्धानि। तन्त्रालोकतन्त्रसारयोः सविस्तरं निरूपितानि। यथा—**

"अर्थपर्वविधिः – तत्र (1) सामान्यं, (2) सामान्य-सामान्यं, (3) सामान्यविशेषो, (4) विशेषसामान्यम्, (5) विशेषो, (6) विशेषविशेषश्चेति षोढा पर्व।"

(तं० सा०, पृ०, 183)

~ विशेषरूपम् — **फाल्गुनशुक्लद्वादशी त्रयोदश्यानुविद्धा विशेषरूपं पर्व। तच्च तिथ्योर्योगवेला। यथा—**

"फाल्गुनमासे शुक्लं यत्प्रोक्तं द्वादशीदिनं पर्व।।
अग्रतिथिवेधयोगो मुख्यतमोऽसौ विशेषोऽत्र।"

(तं० आ० 28, 43-44)

~ विशेषविशेषरूपम् — आश्विने मासे भग्रह-कलनाया न कोऽपि विचारो विधीयते। ततस्तस्मिन् मासे यानि पर्वाणि तेषां विशेषविशेषरूपता। यथा—

"भग्रहसमयविशेषो नाश्वयुजे कोऽपि तेन तद्वर्जम्।।
वेलाभग्रहकलना कथितैकादशसु मासेषु।"

(तं० आ० 28, 42-43)

"अत एवात्र विशेषविशेषत्वम्।"

(तं० आ० वि०, खं० 11, पृ०, 20)

द्र० च :– (तं० आ० 28, 43-52) इति।

~ सामान्यरूपम् — मासस्य प्रथमं पञ्चमं च दिनम्। यथा—

"मासस्याद्यं पञ्चमं च श्रीदिनं परिभाष्यते।।
उत्कृष्टत्वात् पर्वदिनं श्री पूर्वत्वेन भाष्यते।"
(तं० आ० 28, 31-32)

~ सामान्यविशेषरूपम् – उभयोः पक्षयोः चतुर्थी, अष्टमी, नवमी, चतुदर्शी व विशेषग्रहनक्षत्रादियुता। यथा—

"यदेतेषु दिनेष्वेव भविष्यद्ग्रहभात्मकः।
उभयात्मा विशेषः स्यात्तत्सामान्यविशेषता।।"
(तं० आ० 28, 34)

सामान्यविशेषपर्वाणि तन्त्रालोकेऽष्टाविंशे आह्निके 36-40 यावत् कारिकाभिर्विस्तरतः परिगणितानि, स्पष्टीकृतानि च तद्विवेके एकादशे खण्डे 17, 18, 19 पृष्ठेषु।

~ सामान्य सामान्यरूपम् — उभयोः पक्षयोश्चतुर्थी, अष्टमी, नवमी, चतुर्दशी, पञ्चदशी च तिथिः। यथा—

"तुर्याष्टमान्यभुवनचरमाणि द्वयोरपि।
पक्षयोरिह सामान्यसामान्यं पर्व कीर्तितम्।।"
(तं० आ० 28, 33)

पर्वाणि ~ अकुलानि :—

द्र० :— 'अकुलपर्वाणि' इति।

पल्ली — (1) कौलोपासकानां भिक्षास्थानम् वा निवासस्थानं वेति। यथा—

"आदिशब्देन च घरं पल्लीपीठोपपीठकम्।।"
(तं० आ० 4, 267)

"पल्ली - भिक्षास्थानम्।"
(तं० आ० वि०, खं० 3, पृ०, 297)

पवनः — यकारः। यथा—

"पवनो यः।"
(तं० आ० वि०, खं० 12, पृ०, 202)

पवर्गदेवता — वाराही। यथा—

".....वाराही तु पवर्गिका।।"
(स्व० तं० 1, 35)

पवर्गसृष्टि— उन्मेषरूपादुवर्णात् प्रतिबिम्बन्यायेन पवर्गस्य सृष्टिः। यथा—

"उन्मेषात् पादिवर्गस्तु .....।।"
(तं० आ० 3, 153)

पवित्रः — नागराजो वासुकिर्वा तस्याग्रजो वा तपःसाधनविधावासनविशेषस्थः तपसो माहात्म्यादेव पवित्र इति नाम्नोच्यते। तस्यैव तन्तुनिर्मिता प्रतिमा पवित्रकम्। यथा—

"पवित्रोऽयमिति तच्छब्दव्यपदेश्यः।"
(तं० आ० वि०, खं० 11, पृ०, 49)

"तेनास्याराधितो देवि पवित्रेण महात्मना।"
(उद्धरणम् तत्रैव, पृ०, 49)

"पवित्रो नाम नागेन्द्रो ज्येष्ठो भ्रातास्ति वासुकेः।"
(उद्धरणम् तत्रैव, पृ०, 50)

पवित्रकम् — वलयितनागराजाकारं षट्त्रिंशदादिग्रन्थियुतं किमपि कुशकार्पासराजतसौवर्णतन्तुप्रभृतिनिर्मितं वस्तु यत् पर्वसु गुरुजनादिभ्य निवेद्यते, यच्च तैर्धार्यते। यथा—

"सौवर्णमुक्तारत्नविरचितात् प्रभृति पट्टसूत्रकार्पासकुशगर्भान्तमपि कुर्यात् (पवित्रकम्)। तच्च तत्त्वसंख्यग्रन्थिकं पदकलाभुवनवर्णमन्त्रसंख्यग्रन्थि च जान्वन्तमेकं, नाभ्यन्तमपरं, कण्ठान्तमन्यत्, शिरस्यन्यदिति चत्वारि पवित्रकाणि देवाय गुरवे च समस्ताध्वपरिपूर्णतद्रूपभावेन दद्यात्, शेषेभ्य एकम्।"
(तं० सा०, पृ०, 187 - 188)

~ तत्प्रयोगविधिः — विस्तरतो द्रष्टव्योऽसौ विधिस्तन्त्रालोकादौ आ० 28, का०: - 138-143 इति।

~ तत्प्रयोजनम् — पवित्रकं हि पूरकं न्यूनतानाम्। सर्वासामपि क्रियाणां नित्यनैमित्तिकानामच्छिद्रीकरणं पावित्रकाख्यं कर्म। यथा—

"अकामादथवा कामाद् यन्मया न कृतं विभो।
तदच्छिद्रं ममास्त्वीश पवित्रेण तवाज्ञया।"
(तं० आ० 28, 175-176)

~ तत्फलम् — क्रियाणां पूर्णतालाभः। यथा—

"नित्यपूजासु पूर्णत्वं पर्वपूजाप्रपूरणात्।।
तत्रापि परिपूर्णत्वं पवित्रकसमर्चनात्।"
(तं० आ० 28, 144-145)

~ तदितिहासः — उक्तो यथा—

"क्षीराब्धिमथनोद्भूतविषनिद्राविमूर्च्छितः।
नागराजः स्वभुवने मेघकाले स्म नावसत्।।
केवलं तु पवित्रोऽयं वायुभक्षः समाः शतम्।
दिव्यं दशगुणं नाथं भैरवं पर्यपूजयत्।।
व्यजिज्ञपच्च तं तुष्टं नाथं वर्षास्वहं निजे।
पाताले नासितुं शक्तः सोऽप्येनं परमेश्वरः।।
नागं निजजटाजूटपीठगं पर्यकल्पयत्।
ततः समस्तदेवौघैर्धारितोऽसौ स्वमूर्धनि।।
महतां महितानां हि नाद्भुता विश्वपूज्यता।
तस्मान्महेशितुर्मूर्ध्नि देवतानां च सर्वशः।।
आत्मनश्च पवित्रं तं कुर्याद् यागपुरःसरम्।"
(तं० आ० 28, 114-119)

~ तद्ग्रन्थयः — व्याससमासाभ्यां तत्त्वसंख्याः ग्रन्थयः कार्याः षट्त्रिंशद्वा, तिस्रो वा त्रितत्त्वविचारतः षड् वा षडध्वविचारतः, पञ्च वा कलापञ्चकविचारतः इत्येवम्। यथा—

"ग्रन्थयस्तत्त्वसंख्याताः षडध्वकलनावशात्!
यद्वा व्याससमासाभ्यां चित्राः सद्गन्धपूरिताः।।"
(तं० आ० 28, 137)

~ तद्धारकाङ्गानि : — जानुनी, नाभिः कण्ठः, मूर्धा इति चत्वारि। यथा—

"गुर्वात्मनोर्जानुनाभिकण्ठमूर्धान्तगं च वा।"
(तं० आ० 28, 139)

~ तद्धारणकालः — **निर्दिष्टः सविस्तरं तन्त्रालोकेऽष्टाविंश आह्निके 121-130 कारिकासु।**

~ तद्धारणपरम्परा— **कश्मीरपरम्परायां पवित्र-धारणं द्विप्रकारकम् :- (1) सर्वेषु शास्त्रीयेषु धर्मसम्बन्धिषु कर्मसु यजमानेन साधकेन पूजकेन वा दक्षिणहस्तस्यानामिकायां दर्भनिर्मितं वा, रजतनिर्मितं वा पवित्रकमङ्गुलीयकवद्धार्यते।**

(2) केचन नित्यपूजनपरा ब्राह्मणाः यज्ञोपवीते निबद्धं कार्पासतन्तुस्तोमनिर्मितं नागाकारं पवित्रकं नित्यमेव धारयन्ति। वैष्णवपरम्पराप्रभावतश्च तदनन्तोऽयमिति वदन्ति। तद्धारणोत्सवदिनं चानन्तचतुर्दशी (भाद्रशुक्लचतुर्दशी)।

~ तन्निर्माणविधिः — **निरूपितः सविस्तरं तन्त्रालोकेऽष्टाविंश आह्निके 130-137 कारिकासु।**

पवित्रकविधिः — तन्तुनिर्मितनागप्रतिमापूजनधारणादिविधिर्हि पवित्रकविधिः। सर्वेषां विहितानां द्रव्याणामलाभे सति क्रियाविधौ या न्यूनता समापतति, तस्या निवारणं पवित्रकविधिना विधीयते इति प्रतिभाति प्रकरणसंगत्या। यथा—

"तत्परिपूरणायैव सर्वद्रव्यालाभात् संवत्सरमध्ये चतुस्त्रिर्द्विः सकृद्वा पवित्रकविधिरुक्तः।
'क्रियायाः पूरणार्थाय यागाज्ञापूरणाय च।
चतुःसकृद्वा यः कुर्यान्न पवित्रं स निष्फलः।।" इति।
उद्ध० :— (प० त्री० वि०, पृ०, 236)

पशुः — (1) मलेन भोगलोलिकया च पाशितः प्रमाता पशुः। किञ्च क्लेशकर्मविपाकाशैः क्लिश्यमानो मायया मोहितो भावांश्च भेददृष्ट्या पश्यन् प्रमाता तु नितरां पशुरेव। स च मुख्यतया सकलः। प्रलयाकलोऽपि पशुरेव। विज्ञानाकलः पशुकोट्युत्तीर्णः पतिकोटिमसमाविष्टश्च मध्यम दशाभाक्। मन्त्राख्यस्तु नैव पशुः। स पुनर्भूयसांऽशेन पतिरेव। यथा—

"मायातो भेदिषु क्लेशकर्मादिकलुषः पशुः।"
(ई० प्र० 3, 2, 3)

एतेन पशुलक्षणरूपौ द्वौ विशेषौ : — एकस्तावद् भावेषु भेददृष्टिः, द्वितीयश्च क्लेशादिवशवर्तित्वम्। विद्येश्वराणां क्लेशादयो न भवन्ति, ततस्ते पतयः। परं तेषां भेददृष्टिर्न निवर्तते ततो नैव ते पूर्णतया पतयः। अतः पतिप्रायाः। विज्ञानाकलाश्च पशुभावनैकट्यभाजः प्रमातारः। तत एव शैवसिद्धान्तिनस्तान् पशुकोटौ गणयन्ति। परमिह ते तुर्यदशाया निम्नतमं सोपानं भजमानाः सम्मताः। अतस्ते पतिभावोन्मुखाः निवर्तमानपशुभावाः इति वेदितव्यम्।

प्रलयकलास्तु पशव एव। सकलाश्च स्फुटमेव पशवः। यथोक्तम्—

"मध्योर्ध्वगाम्युदानाख्यस्तुर्यगो हुतभुङ्मयः।
विज्ञानाकलमन्त्रेशः .....।।"
(ई० प्र० 3-2-20)

"यदा तु मायाशक्त्या कृतभेदांस्तान् मिमीते, तत एव क्लेशैरविद्यादिभिः कर्मभिः शुभाशुभैरादिपदात् वासनाभिः कर्मविपाकरूपैश्च भोगैरुक्तकञ्चुकप्रपञ्चितैः कलुषोऽपहस्तितैकरसस्वातन्त्र्यः; तदा तैरेव पाशैः पाशितत्वात् पशुः।"
(ई० प्र० वि० वि०, खं० 3, पृ०, 311)

"मायाशक्तिकृतभेदान् व्यतिरिक्तानेव सतो यदा मिमीते तदा तैरेव मेयैः पाशरूपैः पाशितः, इति पशुरुक्तः।"
(ई० प्र० वि०, खं० 2, पृ०, 220)

"पाश्यत्वात् पशुरित्युच्यते इत्यर्थः।"
(तं० आ० वि०, खं० 6, पृ०, 113)

एतेन स्पष्टमिदं यत् पाशबद्धत्वेनैव बद्धो जीवः पशुः इति व्यपदिश्यते इति। तच्च पाशबद्धत्वं बहुधाः– क्लेशकृतं, कर्मकृतं, फलभोगकृतं, वासनाकृतं, मलमायदिकृतं चेति। न च विद्येश्वराः पाशबद्धाः। मन्त्रेश्वरादयस्तु पतय एव, स्फुटभेददृष्टिपरिमुक्तत्वात्।

(2) पुमान्, पुरुषो, जीवः, मायीयः प्रमाता, संकुचितः प्रमाता इत्येवमादिनामकः संसरणशीलः प्राणी। स च कञ्चुकपञ्चकेन मायया चावेष्टितोऽहमिति संविद्रूपः। यथा—

"इदमेव किञ्चिदधुना जानन् : — अभिष्वक्तः करोमि, इत्येवं रूपा संविद्देहपुर्यष्टकादिगता पशुरित्युच्यते।"
(तं० सा०, पृ०, 82-83)

(3) घोरघोरतरादिशक्तिव्रातभोग्यतां यातः प्रमाता, कलादिभिर्लुप्तवैभवः, परामृतरसविरहितः, परतन्त्रः, स्थूल-सूक्ष्म-सूक्ष्मतर-शरीर-त्रय-परिवेष्टितः क्षुद्रभोगभुक् संसरणशीलः प्राणी पशुः। यथा—

"शब्दराशिसमुत्थस्य शक्तिवर्गस्य भोग्यताम्।
कलाविलुप्तविभवो गतः सन् स पशुः स्मृतः।।
परामृतरसापायस्तस्य यः प्रत्ययोद्भवः।
तेनास्वतन्त्रतामेति स च तन्मात्रगोचरः।।
स्वरूपावरणे चास्य शक्तयः सततोत्थिताः।
यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः।।
.....।।
.....।
तन्मात्रोदयरूपेण मनोऽहंबुद्धिवृत्तिना।
पुर्यष्टकेन संरुद्धस्तदुत्थं प्रत्ययोद्भवम्।।
भुङ्क्ते परवशो भोगं तद्भावात्संसरेदतः।"
(स्पं० का० 45-47, 49-50)

द्र०:- प० सा० 16; प० सा० वि०; पृ०, 28-30, 46; तं० व० धा० , 1, 22-23, स्पं० नि०, पृ०, 68-69, ष० तं० सं० वि०; पृ०, 9।

द्र० च : – 'अणुः' इति।

~ अप्रमेयः — **यथा नीलसुखादयो भावाः प्रमेयतया**

भान्ति न तथा पशुप्रमाता। नीलादय इदन्तया भान्ति पशुः पुनरहन्तया। ततो यद्यपि देहादिरूपतया जडो, यद्यपि च संविदपेक्षया तत्त्वभेदनप्रक्रियां च मन्त्र तदीश्वराद्यपेक्षया वेद्यस्तथापि न ज्ञानसुखादिवदिन्तया वेद्यः। इदम्भावोचितः सन्नपि न तथावभासते, व्यवहारे ह्यसौ प्रमात्रीकृत एव विलसति। यथा—

"कालादयस्तु प्रमेया अपि प्रमातर्येव लग्नाः, इति प्रमातृशक्तिस्वभावत्वान्न प्रमेयत्वेनेहावसरे मायाप्रमातृव्यतिरिक्तप्रमेयप्रस्तावात्मनि गणिताः। वस्तुतो ह्यत्र योऽयं प्रमातापि प्रमेय एव; स तु प्रमात्रीक्रियमाण आच्छादितप्रमेयताकः।"

(ई० प्र० वि०, खं० 2, पृ०, 211)

~ शिवात्मकः — **वस्तुतत्त्वदृष्टया हि मायाप्रमातापि शिव एव स्वेच्छया तथा तथावभासमानः। यथा—**

"कुम्भकारस्यापि घटकरणे सर्वशक्तिशिवात्मता तदपरिज्ञानात्तु कुम्भकारतेत्यर्थः।"

(शि० दृ० वृ०, पृ०, 19)

~ स्वभावतः — **पशुः स्वभावत एव सविकल्पदर्शनप्रधानः प्रमाता। यथा—**

"एतद्विकल्पप्रधान एव च सदा पशुरिति।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 370)

पशुज्ञानम् — संकुचितदृष्टिकं भेदनिष्ठं वैष्णवादीनां ज्ञानम्। यथा—

"सङ्कोचतारतम्येन पाशवं ज्ञानमीरितम्।"

(तं० आ० 4, 253)

द्र० :- 'पशुशास्त्रम्' इति।

पशुपानम् — रहस्यचर्यात्मकं कौलयागं विनापि भोगार्थं मद्यपानम्। तच्च नरकपातादिफलदम्। यथा—

"अयष्ट्वा भैरवं देवमकृत्वा मन्त्रतर्पणम्।
पशुपानविधौ पीत्वा वीरोऽपि नरकं व्रजेत्।।"

उद्धः – (तं० आ० वि०, खं० 11/2, पृ०, 11)

पशुबलिः — (1) शैवेषु यागेषु, विशेषतः, पुत्रकदीक्षाविधौ पशुबलिर्विहितो, न च दोषावहः। बलिपशोरपि तत्रोपयोगतः आध्यात्मिकी प्रगतिर्यतः। यथा—

"श्रीमन्मृत्युञ्जये प्रोक्तं पाशच्छेदे कृते पशोः।।
मलत्रयवियोगेन शरीरं न प्ररोहति।
धर्माधर्मौघविच्छेदाच्छरीरं च्यवते किल।।
तेनैतन्मारणं नोक्तं दीक्षेयं चित्ररूपिणी।
रूढपाशस्य यः प्राणैर्वियोगो मारणं हि तत्।।
इयं तु योजनैव स्यात्पशोर्देवाय तर्पणे।
तस्माद् देवोक्तिमाश्रित्य पशून् दद्याद् बहूनिति।।"

(तं० आ० 16, 59-62)

(2) पुत्रकदीक्षायां बलिरूपतया दास्यमानं पशुं गुरुर्भावनया संसृतिबीजहीनं विधायैव तच्छरीरं देवतर्पणार्थमुपयुंक्ते।

तदेतद् **द्रष्टव्यं विस्तरतस्तन्त्रालोके षोडशाह्निके कारिकाः 32-51 इति। यथा —**

"पशूँश्च जीवतो निवेदयेत्। तेऽपि ह्येवमनुगृहीता भवन्ति, इति कारुणिकतया पशुविधौ न विचिकित्सेत्।"

(तं० सा०, पृ०, 157)

~ उद्धारकृत् — **यागे उपयुज्यमानायां पशूनां बीजानामपि न निर्वाणमेव भवति। ततो नात्र कारुणिकत्वेन हिंसाशङ्कातङ्को मनागपि मनसि निधेयः। यथा—**

"एकोपायेन देवेशो विश्वानुग्रहणात्मकः।।
यागेनैवानुगृह्णाति किं किं यन्न चराचरम्।
तेनावीरोऽपि शङ्कादियुक्तः कारुणिकोऽपि च।।
न हिंसाबुद्धिमादध्यात् पशुकर्मणि जातुचित्।
पशोर्महोपकारोऽयं तदात्वेऽप्यप्रियं भवेत्।।
व्याधिच्छेदौषधतपो योजनात्र निदर्शनम्।"

(तं० आ० 16, 56-59)

तेषामनुग्रहार्थाय पशूनां तु वरानने।
मोचयन्ति हि पापेभ्यः पापौघांश्छेदयन्ति तान्।।
पशूनामुपयुक्तानां नित्यमूर्ध्वगतिर्भवेत्।"

(ने० तं० 20, 8-9)

उद्धः— (तं० आ० वि०, खं० 10, पृ०, 23)

पशुमातरः — कादिवर्गेष्वधिष्ठात्र्यो ब्राह्मीमाहेश्वरीप्रभृतयः शिवशक्तयः पशुमातर इत्युच्यन्ते। अष्टसु मातृकावर्गेश्वष्टौ मातरः, ताः एव पशूनां स्वरूपस्याच्छादिकाः घोरघोरतररूपतया विविधविकल्पोल्लासनतो भवन्ति। पशून् स्वाधिकारनियन्त्रितान् कुर्वन्त्यस्ताः पशुमातरः। यथा—

"मातृकायाः कादिशान्तेष्वष्टसु वर्गेषु माहेश्वरर्याद्या मातरोऽधिष्ठात्र्यो भवन्ति। ताश्च प्रत्येकमघोरघोरतरनामसु त्रिषु गणेष्ववस्थिताः सत्यो विविधैर्विकल्पात्मकैर्ज्ञानैः पशूनां वास्तविकस्य संविदात्मकस्य स्वरूपस्य स्वातन्त्र्यात्मकस्य च स्वभावस्यावरणं कुर्वन्ति प्रायः।"

(शि० सू० विवृ०, 3, 19)

"कवर्गादिषु माहेश्वर्याद्याः पशुमातरः।"

(शि० सू०, 3, 19)

"प्राप्ततत्त्वोऽपि प्रमाद्यन् माहेश्यादिभिः पशुजनाधिष्ठातृभूताभिरपि शब्दानुवेधनद्वारेण मोह्यते।"

(शि० सू० वि०, 3, 19)

पशुमारणपापम् — यागाद् विहायान्यत्र पशुमारणं पापम्। यथा—

"न विवाहे पशुं हन्यान्न चात्मार्थे कदाचन।
यागकाले महादेवि नेष्टबन्धुसमागमे।।
क्रीडार्थे न पशुं हन्याद्विना यागाद्वरानने।
यागकाले ददेद् यो हि मातृणां तर्पणाय च।।
एकैके तु सकृद्दत्ते पूर्वोक्तेन विधानतः।
जपकोटिसहस्रस्य पूजायुतशतस्य च।।

तत् फलं प्राप्नुयात् सद्यः पशुयागे कृते सति।"

उद्ध० : — (तं० आ० वि०, खं० 10, पृ०, 22-23)

पशुशास्त्रम् — द्वैतपरं, स्वात्मपरमेश्वरतासाक्षात्कारहीनं बौद्धार्हतसांख्यवेदान्तादिशास्त्रजातम्। सूचितमेतद्यथा—

"लोकाध्यात्मातिमार्गादि कर्मयोगविधानतः।।
सम्बोधोत्कर्षबाहुल्यात् क्रमोत्कृष्टान् विभावयेत्।।"

(तं० आ० 13, 346-347)

नरर्षिदेवद्रुहिणविष्णुरुद्राद्युदीरितम्।
उत्तरोत्तरवैशिष्ट्यात् पूर्वपूर्वप्रबाधकम्।।"

(तदेव, 4; 248-249)

द्र० : - **'पशुज्ञानम्'** इति।

पश्चात् — ~ दिग्विचारतः — किञ्चित् प्रकाशरूपतयां यद्वस्तु प्रकाशस्य पराङ्मुखं तत् पश्चादिति, पश्चिम- स्थमिति। यथा—

"पराङ्मुखं तु तत् पश्चात्।"

(तं० आ० 15, 199)

पश्चिमम्— किमपि कौलमतस्य पुस्तकम्। यथा—

"यथा च श्रीपश्चिमे :—
"पूजा होमः क्रमश्चर्या व्रतं शास्त्रनिषेवणम्।
तपो ध्यानं जपः शौचं तत्त्वहीनस्य निष्फलम्।।"

(म० मं० प०, पृ०, 108)

पश्यन्ती : — ~ वाक् :— (1) भेदाभेदमयी स्वात्मविमर्शनात्मिका वाणी। समुन्मिषितस्थापीदं भागस्याहं भागान्तर्निमग्नतयेव विमर्शो यस्यामसौ विमर्शात्मिका वाक् पश्यन्ती। यथा—

"उल्लिखितमपीदं–भागमहं–भावग्रस्ततया प्ररोहरहितमासूत्रयन्ती पश्यन्ती अहमिदमिति।"

(ई० प्र० वि० वि०, खं० 1, पृ०, 105)

(2) यस्मिन् स्वात्मविमर्शे ग्राह्यग्राहकभेदोऽभिधानाभिधेयभेदश्च समुन्मिषितावपि सन्तौ क्रमराहित्येनैव विमृश्येतेऽसौ विमर्शः पश्यतन्ती वाक्। यथा—

".....अक्रमतां प्राप्तं यन्निःशेषं समस्तमभिधानानां शब्दानामभिधेयं विमृश्यमानं रूपं ग्राह्यग्राहकात्मकमुभयं, तेन गर्भिणी, तत्सर्वं क्रोडीकृत्यावतिष्ठमाना, न तु शक्तिमद्रूपपरमशिवदशेव अनुन्मिषितग्राह्यग्राहकादिवैचित्र्या.....।"

(ई० प्र० वि० वि०, खं० 2, पृ०, 190)

"प्रतिसंहृतक्रमाप्यन्तः सत्यप्यभेदे समाविष्टक्रमशक्तिः पश्यन्ती इति। ततो न सा पूर्णा पर्यन्तदशा।"

(शि० दृ० वृ०, पृ०, 39)

"तथा तच्च पश्यन्तीरूपं ग्राह्यग्राहकविभागक्रमरहितम्।"

(तदेव०, पृ०, 4-5)

"पश्यन्त्यादीनां स्वरूपं तत्रभवता भर्तृहरिणा उक्तम्। यथा—

"अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी।।"

उद्ध०— (स्त० चि० वि०, पृ०, 5)

(3) अभीष्टप्रयोजनानुकूल्येन समुद्भिद्यमानभेदावमर्शमय्यपि वाच्यवाचकविभागशून्या शुद्धविद्यात्मिका विमर्शमयी वाक्। यथा—

"पश्यन्तीयद्यदभीप्सितं तत्तदेव समुचितकारणनियमप्रबोधितं बोधसूत्रमात्रेण विमृशति।....., यत्र वाच्यवाचकविशेषयोरभेदः।"

(प० त्री० वि०, पृ०, 4-5)

(4) विकल्पात्मकाध्यवसायशून्या शुद्धा विमर्शमयी भेदाभेदपरावाक्। यथा—

"ननु पश्यन्तीभूमौ कीदृगध्यवसायः, न कश्चित्तत्रेति निरूपयति।"

(ई० प्र० वि० वि०, खं० 2, पृ०, 267)

"आद्यं तु यद् 'अहम्' इति 'अहमिदम्' इति च रूपद्वयं, तत्र केवलं शुद्धैव विमर्शरूपता, न तु विकल्पात्मकत्वम्।"

(तदेव, खं० 2, पृ०, 226)

द्र०:- प० त्री० वि०, पृ०; 6, स्पं० वि०, पृ०, 149; भा० वि०, पृ०, 23; स्वा० द०, 3, 34; पू० प्र० 1, 379-388; म० न० प्र०, पृ०, 3।

(5) चिद्रूपे स्वात्मन्येव स्वात्मनः सकाशाद् भिन्नतया प्रमेयजातस्य यद्विमर्शनं सैव भेदाभेदविमर्शमयी वाक् पश्यन्तीति। यथा—

"भेदिताऽन्तःकृताखण्डभावावेक्षा परापरा।
कर्तृता सैव पश्यन्ती.....।।"

(प० पं०; 43)

~ त्रिप्रकारा :— पश्यन्त्यां वेद्यं वेदकांशे निमग्नमिव तदभेदेन विमृश्यं भवति। यत्रासौ वेदकान्तनिर्विष्टो वेद्यभागोऽल्पशरीरः सा पश्यन्ती, यत्र च सुमहान् असौ महापश्यन्ती। तदेतद्ध्वनितं यथा—

द्रष्टव्यमग्रे (ई० प्र० वि० वि०, खं० 2, पृ०, 195) इति।

गृहाद् यन्निःसरणं तत्सङ्कल्पाभिन्नोऽहमिति विमर्शः पश्यन्ती, ग्रामगमनसंकल्पाभिन्नश्च महापश्यन्ती, पूर्वस्य विमर्शस्याल्पकालिकत्वादपरस्य च दीर्घकालिकत्वात्। भगवतः सदाशिवस्य यो विमर्शो "अहमिदम्" इति स तु दीर्घदीर्घतरकालश्लेषी इत्यसौ परममहापश्यन्ती" इति। यथा—

"एवं ग्रामं गच्छामीति महापश्यन्ती, गृहान्निःसरामीति पश्यन्तीमपेक्ष्य तावद् यावत् सदाशिवेश्वरदशा परममहापश्यन्ती मायाप्रमातृवर्त्यशेषपश्यन्त्यपेक्षयेति मन्तव्यम्।"

(ई० प्र० वि० वि०, खं० 2, पृ०, 195)

~ वैयाकरणमते— सर्वथा संहृतक्रमा, प्रतिलब्धसमाधाना, विशुद्धा, प्रशान्तप्रत्यवभासा, संहृतक्रमापि

समाविष्टक्रमशक्तिः, अनादिनिधना, अक्षरा, या शब्दरूपा पश्यन्ती नाम्नी वाक् सैव स्वयं परा वाणी; सैवात्मा सर्वदेहेषु, अन्तर्मुखा चिद्रूपता, अनन्तस्य विश्वस्य विमर्शात्मकं रूपं पश्यन्ती सती सैव परं ब्रह्म। पश्यन्त्येव हि परावाक्, न तत उत्तीर्णेति। यथा—

"इत्याहुस्ते परं ब्रह्म यदनादि तथाक्षयम्।
तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक्।।
स एवात्मा सर्वदेहव्यापकत्वेन वर्तते।
अन्तःपश्यदवस्थैव चिद्रूपत्वमरूपकम्।।
तावद्यावत्परा काष्ठा यावत्पश्यत्यनन्तकम्।
अक्षादिवृत्तिभिर्हीनं देशकालादिशून्यकम्।।
सर्वतः क्रमसंहारमात्रमाकारवर्जितम्।
ब्रह्मतत्त्वं परा काष्ठा परमार्थस्तदेव सः।।"

(शि० दृ०, 2, 2-5)

"तदाह तत्रभवान् भर्तृहरि : — प्रतिसंहृतक्रमान्तः सत्यप्यभेदे समाविष्टक्रमशक्तिः पश्यन्ती। साऽचला च चला प्रतिलब्धसमाधाना च, संविन्निष्ठज्ञेयाकारा प्रतिलीनाकारा निराकारा च, परिच्छिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यभासा च सर्वार्थप्रत्यवभासा प्रथान्तप्रत्यवभासा च, इति। अनेन हि परिमाणभेदत्वेन अहन्तेदन्तयोर्विचित्रतोक्ता। ..... उत्तरोत्तरापेक्षया च पूर्वपूर्वस्य संवर्तितशब्दभावना रूपत्वादविकल्पत्वमुच्यते सत्यपि विमर्शविशेषात्मक-विकल्परूपत्वे। आद्यं तु यद् 'अहमिति' 'अहमिदमिति' च रूपद्वयं तत्र केवलं शुद्धैव विमर्शरूपता, न तु विकल्पात्मकत्वम्।"

(ई० प्र० वि० वि०, खं० 2, पृ०, 226)

द्र०:— शि० दृ० वृ०, पृ०, 38-39 इति।

~ शास्त्रावतारदृष्टया — असौ भेदाभेदविमर्शमयी वाग् यस्यां सर्वं शास्त्रतत्त्वं वाच्यवाचकभावराहित्येन, सङ्केताद्यसहायतया "अहमिदम्" इति सामान्यविमर्शरूपतया विजृम्भमाणं तिष्ठति। यथा—

"पश्यन्ती दशायां वाच्यवाचकाविभागस्वभावत्वेन असाधारणतया अहं प्रत्यवमर्शात्मा अन्तरुदेति।"

(तं० आ० वि०, खं० 1, पृ०, 36)

~ शैवदृष्टौ— (1) शैवदृष्टया परमेश्वरस्य परा शक्तिरेव किञ्चिन्मात्रबहिर्मुखस्पन्दनतः पश्यन्तीति भवति। न च वैयाकरणास्तथा मन्यन्ते। तेषां मते पश्यन्त्येव परा। यथा—

"पश्यन्ती च नेश्वरप्रत्यभिज्ञोक्तन्यायेन शब्दनात्मिका परमेश्वरशक्तिरिष्यते भवद्भिर् **(वैयाकरणैः)** ईश्वरोपगम-प्रसङ्गात्, अपितु सूक्ष्मो वाच्यभेदेन स्थितो वाचकः शब्द इत्येवं शब्दात्मासौ।"

(शि० दृ० वृ०, पृ०, 58)

(2) वैयाकरणाः पश्यन्तीमेव परावाग्रूपां प्रतिपादयन्ति। परं शैवदृष्टौ परा परैव, पश्यन्ती च परस्या बहिर्मुखोन्मेष-रूपाऽधरा भूमिः। परा तावच्छाक्तीभूः परिपूर्णा भेदात्मक-शुद्धचिद्विमर्शमयी "अहम्" इत्येव। पश्यन्ती पुनः- "अहमिदम्" इति विमर्शमयी शुद्धविद्या भूमिरेव परापरा; न पुनः परा शाक्ती भूः। शुद्धविद्यायामपि वस्तुत एषा ईश्वरतत्त्वदशारूपा क्रियाशक्तिरेव, परं तथापि पश्यन्तीति पदाङ्गभूतस्य दृश् धातोर्ज्ञानार्थत्वेन लक्षणया ज्ञानशक्ति-रूपतामारोप्य सदाशिवदशामयीत्यङ्गीक्रियते। परा वाक् तु तस्याः सकाशान्नितरां समुत्तीर्णा, ऊर्ध्वतरा, पश्यन्ती बीजभूता च पारमेश्वरी भूः। पश्यन्तीति पदमेव स्रष्टव्यं भेदांशं प्रकटयति। ततो भेदाभेदभूमिरेषा नैव पराऽभेद-भूमिरिति शैवानामक्षोभ्यः सिद्धान्तः। यथा—

"पश्यन्ती यद्यपि नादरूपतया विश्वमामृशन्ती क्रियाशक्तिरूपतया समन्विता, तथापि पश्यन्तीति दर्शन-प्राधान्यादुपचरितज्ञानशक्तिरूपत्वेऽप्याश्रीयमाणेऽपि परमशिवरूपताया अत्यन्तदूरवर्तिनी, न तु, पर्यन्तदशासौ ज्ञानशक्तेः सदा-शिवरूपत्वात्।"

(शि० दृ० वृ०, पृ०, 37)

(3) वैयाकरणानां दृष्टौ पश्यन्त्यां यत्क्रमस्यासूत्रणं तन्न तस्याः स्वीयेनैश्वर्येण, अपि त्वविद्यावशत एवेति तावदपरं महदन्तरं शैववैयाकरणदृष्ट्योः। यथा—

"सादाख्येश्वरदशयोरपि न पश्यन्त्या समानता; सर्वमहमित्येवमात्माविभेदेनात्मविश्रान्ताति सत्यान्येव वस्तूनि तथा पश्यति प्रमाता। पश्यन्त्यां तु सुषुप्तावस्थायामिव भिन्नान्येव संसारदशोचितानि बीजभावेनासते सुषुप्तोत्तीर्णेऽपि पश्यन्त्या अविद्यामयान्येव तद्दर्शन इति शेषः।"

(शि० दृ० वृ, पृ०, 136)

(4) वैयाकरणमते कर्मोन्मुखा द्रष्टुर्दृशिक्रिया हि पश्यन्ती। न च परायाः कर्मोन्मुखता कापि। यथा—

"वर्तमानसमारूढा क्रिया पश्यन्त्युदाहृता।।
दृशिः सकर्मको धातुः किं पश्यन्तीति कथ्यताम्।"

(शि० दृ० 2, 20-21)

सकर्मकत्वेनास्याः सर्वथाऽभेदात्मकपरिपूर्णचिद्विमर्शात् शिवरूपाद् ब्रह्मरूपाद्वा स्फुटमधस्तनत्वमेव न ततः सैव परेति विज्ञेयं सुधीभिः।

(5) परस्याः हि भोक्तृत्वं पश्यन्त्याः पुनस्तस्या भोग्यता। ततो न पश्यन्त्येव परा। यथा—

"सा चैषा **(परावाङ्)** न विमर्शात्मस्वरूपमति वर्तते।
विमर्शोऽस्याः परो भोगः पूर्णः पश्यन्त्युदाहृता।।
परापरा सैव देवी मानमित्यवधार्यताम्।
यत्रापरांशगं मेयं तादात्म्याद् व्यवतिष्ठते।।"

(मा० वि० वा० 1, 428-429)

(6) पश्यन्त्या अधिपतिर्भगवान् सदाशिवः न परं ब्रह्म। यथा—

"तदेतत्परं पश्यन्त्याख्यं ज्ञानशक्तेरेव पर्यन्तधाम नादाख्यरूपमतिक्रमणीयत्वेनैव स्थितम्। यथोक्तं शिवदृष्टौ :-
'अथास्माकं ज्ञानशक्तिर्या सदाशिवरूपता।

वैयाकरणसाधूनां सा पश्यन्ती परा स्थितिः।।' इति।"

(प० त्री० वि०, पृ०, 129)

~ स्थूला — षड्जादिस्वररूपा नादरूपा ध्वनिः स्थूला पश्यन्ती वाक्। वर्णादिप्रविभागराहित्येन संहृतक्रमा। तदेवास्या माधुर्यं यद्वशादत्रजनानामासक्तिः। यथा—

"तत्र या स्वरसन्दर्भसुभगा नादरूपिणी।।
सा स्थूला खलु पश्यन्ती वर्णाद्यप्रविभागतः।"

(तं० आ० 3, 237-238)

"षड्जाद्येकतमत्वे नियतोऽनुद्भिन्नवर्णादिविभाग आलापः, तेन सुभगा माधुर्यातिशयादाह्लादरूपा, अत एव, प्राथमिकनादमात्रस्वभावा या वाक् सा खलु स्थूला पश्यन्ती।"

(तं० आ० वि०, खं० 2, पृ०, 226)

पश्वणवः — मलत्रयेण बद्धाः पशुप्रमातारः। यथा—

"पश्वणून् इति पश्वणुतामात्रम्।"

(ई० प्र० वि० वि०, खं० 2, पृ०, 325)

अत्र मुक्ताणवः पश्वणवश्चेति द्विप्रकराणामणूनामुल्लेखो वर्तते। एतेन ज्ञायते यत् प्रत्यभिज्ञातात्मास्वरूपाः जीवन्मुक्ता एवात्र मुक्ताणव इत्युक्ता इति। तेषां मुक्तत्वेऽपि प्रारब्धकर्मान्तमणुत्वसंस्काराणां प्रवाहरूपतया प्रसरणं भवत्येव। प्रारब्धान्ते त्यक्ते शरीरे तेषां सत्यं स्वात्मज्ञानमभिव्यक्तं भवति। तच्च ज्ञानं पारमैश्वर्य-शक्त्येकघन-परशिवत्वप्रथनं स्वात्मनः।

पश्वालम्भनमन्त्रः – ह् स् व्यूं इति। यथा—

"बिन्दुप्राणामृतजलं मरुत्षष्ठस्वरान्वितम्।।
एतेन शाक्त्युच्चारस्थ-बीजेनालभ्यते पशुः।"

(तं० आ० 30, 91-92)

बिन्दुः—शून्यं, प्राणो-ह, अमृतं-स, जलं-व, मरुत्-य षष्ठ स्वर = ऊ।

एवं ह्सव्यूं।

पाचनम् — कर्मफलभोगपरम्परया क्रमेण मलानां प्रक्षालनयोग्यतापादनं यन्मलपाक इति परिभाष्यते। यथा—

"पाचनं कर्मणां कर्मिणः प्रतिफलदानौन्मुख्यजननम्।"

(तं० आ० वि० खं० 1, पृ०, 147)

स च मलपाकः फलदानपरम्परयैव क्रमेण जायत इति वेद्यं सुधीभिः।

पाञ्चदशीधारणा—

द्र०: — 'तत्त्वभेदनम्':— ~'पञ्चदशात्मकम्' इति।

पाञ्चदश्यक्षेत्रम् — यद्-यत् तत्त्वं सकलेन प्रमात्रा वेद्यं तत्र-तत्र पाञ्चदश्यधारणा कर्तुं शक्या, यतस्तत् सर्वं पञ्चदशात्मकं सप्तभिः प्रमातृभिः सप्तप्रकारकशक्तिसाहाय्येन वेद्यं सत् स्वरूपतः पञ्चदशम्। ततो धरादिमूलप्रकृत्यन्तं तत् क्षेत्रम्। यथा—

"एवं पञ्चदशात्मेयं धरा तद्वज्जलादयः।।
अव्यक्तानां यतोऽस्त्येषां सकलं प्रतिवेद्यता।"

(तं० आ० 10, 97-98)

द्र०: — 'तत्त्वभेदनम्:' — ~ 'पञ्चदशात्मकम्'।

पाञ्चदश्यम्: — तत्त्वभेदनप्रक्रियायां पञ्चदशधा विधीयमाना तत्त्वाध्वधारणा।

द्र०— तत्त्वभेदनम्— ~ पञ्चदशात्मकम्- इति।

~ अवस्थाभेदभिन्नम्— भावनया पाञ्चदश्यादावप्यवस्थापञ्चकं भावनीयं भवति। यथा—

"जाग्रत्स्वप्नादिभेदेन सर्वावेशक्रमो बुधैः।
पञ्चभिस्तु परिज्ञेयः स्वव्यापारात् पृथक् पृथक्।।

(मा० वि० तं० 2,26)

द्र०:- 'अवस्थाभेदविस्तरः' इति।

~ न्याय्यम्— परमेश्वरो हि जगद्भावपरिपूर्णः। स एव निजैश्वर्यमाहात्म्येनांशांशिककल्पनासाहचर्येणापि यतः प्रकाशते ततो पाञ्चदश्यादिकल्पनापूर्वकं तदैश्वर्यदर्शनमपि न्याय्यमेव। यतो हि परमेश्वरः परिपूर्णचिन्मात्रतयापि प्रकाशते, प्रमातृप्रमेयतत्त्वात्मकतया प्रमातृशक्तिवैचित्र्यात्मतयापि च प्रकाशते एव। तस्यैव परमेश्वरताया इदं सर्वं माहात्म्यम्। ततो वैचित्र्येणानेन सम्भिन्नोऽपि साक्षात्क्रियते योगिभिः यथा—

"उच्यते परिपूर्णं चेद्भावीयं रूपमुच्यते।
तद्विभुर्भैरवो देवो भगवानेव भण्यते।।
अथ तन्निजमाहात्म्यकल्पितोऽशांशिकाक्रमः।
सह्यते किं कृतं तर्हि प्रोक्तकल्पनयानया।।"

(तं० आ० 10,80-81)

"एवं विधं हि भावानां रूपं पूर्णमपूर्णं च, तत्र पूर्णरूपत्वे स्वप्रकाशः पर एव प्रकाशस्तथोज्जृम्भते इति को नाम भावार्थः, अपूर्णं च रूपं धर्मधर्म्यादिरूपतया पारमेश्वर्या स्वातन्त्र्यशक्त्यैव तथा कल्पितमिति भेदानुप्राणितः समग्र एवायं व्यवहारः सोढव्य इति किमनया पाञ्चदश्यादिक्रम कल्पनयाऽपराद्धं यदेवमस्याः (स्यै) प्रद्वेषः यथा—

(तं० आ० वि०, खं०, 7, पृ०, 64-65)

"चैत्रेण वेद्यं जानामि द्वाभ्यां बहुभिरप्यथ।
मन्त्रेण तन्महेशेन शिवेनोद्रिक्तशक्तिना।।
अन्यादृशेन वेत्येवं भावो भाति यथा तथा।
अर्थक्रियादिवैचित्र्यमभ्येत्यपरिसंख्यया।।

(तं० आ० 10,83-84)

मन्त्रेणेति— मन्त्राख्येन प्रमात्रेति।

द्र०:- तत्त्वभेदनं – ~ 'दर्शनसिद्धान्तत' इति।

~ प्रकारान्तरत— **पृथिव्यादीनि प्रधानान्तानि तत्त्वानि सप्तभिः प्रमातृभिर्वेद्यानि। तेषां प्रकृतिः सप्तविधा तद्यथा—सकले मलः स्थूलः प्रभावशाली च, प्रलयाकले आवरणमात्ररूपः, विज्ञानाकलेऽप्यावर्णात्मकः परमेक प्रकार एवाणवः। मन्त्रे भेददृष्टि कारणात् संङ्कोचमात्रम्, मन्त्रेश्वरे**

सङ्कोचलेशमात्रम्, मन्त्रमहेश्वरे सङ्कोचविपरीतो (अन्यः) विकासः शिवे परिपूर्णा व्याप्तृता। सप्तानामपि स्वरूपमनुद्रिक्तशक्तिकं स्थिरम् उद्रिक्तशक्तिकं च कम्प्रम्। तैश्चतुर्दशभिर्वेद्यत्वेन धरादेश्चतुर्दशविधत्वम्। स्वरूपसहितस्य पाञ्चदश्यम्। पीतादिवर्णता ध्यानधारणार्थमेषाम्।

यथा—

"स्थूलावृतादिसङ्कोचतदन्यव्याप्तृताजुषः।
पीताद्याः स्थिरकम्प्रत्वाच्चतुर्दश धरादिषु।।
स्वरूपीभूतजडताः प्राणदेहपथे ततः।
प्रमातृताजुषः प्रोक्ता धारणा विजयोत्तरे।।"

(तं० आ० 10,103-104)

विजयोत्तरे इति मालिनीविजयोत्तरतन्त्रे।

पाञ्चदश्यादिधारणा : — ताश्च तत्त्वभेदने :— पञ्चदशधा, त्रयोदशधा, एकादशधा इत्यादिरूपाः।

द्र०:- 'तत्त्वभेदनम्' — 'पञ्चदशात्मकम्'

'त्रयोदशात्मकम', 'एकादशात्मकम्', इत्यादौ

~ तत्फलवैचित्र्यम्— **विविधप्रकारस्तत्तत्तत्त्वैश्वर्य-लाभस्तत्फलम्। यथा—**

एवं मन्त्रमहेश्वरादिवेद्यत्वेनापि नियततत्तत्त्वावाप्तिः स्यादित्यपरिसंख्येयमत्रार्थक्रियावैचित्र्यम्।

(तं० आ० वि०, खं०, 7, पृ०, 70)

'पातकच्युतिः' ~ 'लिङ्गोद्धारे'—

द्र०— लिङ्गोद्धारः ~ पाचकच्युतितः इति।

द्र०— (तं० आ० 22,23—27)

पातञ्जलोयोगः — यमनियमाद्यष्टाङ्गयुतः तत्तत्सिद्धिप्रदः सविकल्पनिर्विकल्पसमाधिसाधनभूतः शारीरप्राणीयमानसक्रियामयोऽभ्यासः।

~ परस्वरूपाप्रकाशकः — **न खलु यमनियमादीनां पातञ्जलयोगाङ्गानां परतत्त्वसाक्षात्कारं प्रत्युपायतोपपद्यते। परस्य तत्त्वस्य ध्यातुमशक्यत्वेन तद्विषये ध्यानधारणा-समाधयोऽपि नैव सम्भवन्ति, तस्य शुद्धप्रमातृत्व-मात्ररूपत्वादप्रमेयत्वाच्च। यथा—**

"तपः प्रभृतेः नियमवर्गस्य, अहिंसादेश्च यमप्रकारस्य, पूरकादेः प्राणायामवर्गस्य वेद्यमात्रनिष्ठत्वेन क इव संविदि व्यापारः। प्रत्याहारोऽपि करणभूमिमेव सातिशयां कुर्यात्। ध्यान-धारणासमाधयोऽपि यथोत्तरमभ्यासक्रमेण निर्वर्त्यमाना ध्येय-वस्तुतादात्म्यं ध्यातुः वितरेयुः। अभ्यासश्च परे तत्त्वे शिवात्मनि स्वस्वभावे न सम्भवत्येव।"

(तं० सा० पृ०, 23-24)

पादुकोदयः — महेश्वरानन्दकृतः कश्चन शैव-दर्शनग्रन्थः। यथा—

"तदुक्तं मयैव श्री पादुकोदये–
'अतो विश्वात्मको नाथः' इत्यारभ्य..... महार्थिकमनीषिणाम्' इत्यन्तम्।"

(म० मं० प०, पृ०, 11)

द्र०: — (म० मं० प० पृ०, 86, 87, 95, 96, 99, 101, 108, 114, 143, 170)

पारतन्त्र्यम्— पराधीनप्रकाशत्वं परेण प्रकाशनीयत्वं पारतन्त्र्यम्। यथा—

"प्रकाश्यतैव हि पारतन्त्र्यम्। प्रकाश्यता च प्रकाशान्तरापेक्षितैव।"

(तं० सा०, पृ०, 6)

~ तत्फलम्— **आध्यात्मिकादिरूपस्य त्रिविधि-दुःखस्य मूलकारणं हि तत् यथा—**

"योनिर्दुःखस्य पारतन्त्र्यं हि"।

(स्वा० द० 2,1)

~ व्यावहारिकम्— **शारीरिकमानसिकार्थिकराजनैतिक-व्यावसायिकादिरूपतया पराधीनत्वम्। यथा—**

"दुःखमूलं पारतन्त्र्यं.....।"

(आ० वि० 3, 2)

पारमार्थिकप्रमातृता— सर्वं नीलसुखादिप्रमेयजातं वास्तविक्या चित्स्वरूपतया पश्यन्ती सत्या ज्ञानदृष्टिः। यथा रत्नज्ञस्य दृष्टिर्विविधेषु स्वर्णालङ्कारेषु तेषां स्वर्णतामेवानायासं स्वस्वभावत एव विवेचयन्ती तान् पश्यति, तथैव ज्ञानिनः साधकस्य दृष्टिः सर्वं प्रमेयजातं शुद्धस्वतन्त्र-पारमेश्वर-चित्-स्वरूपतयैव विवेचयति। एवं दर्शनमपि ज्ञानोपायत्वेनाङ्गीकृतम्। यथा—

"स्फुटतरभासमाननीलसुखादिप्रमान्वेषणद्वारेणैव पारमार्थिकप्रमातृलाभ इहोपदिश्यते।

(ई० प्र० वि०, खं० 1, पृ०, 18)

पारमेश्वरः— ~ तत्त्वम् – ईश्वरतत्त्वस्यैवेदं नामान्तरम्। यथा—

"किन्त्वान्तरदशोद्रेकात् सादाख्यं तत्त्वमादितः।
बहिर्भावपरत्वे तु परतः पारमेश्वरम्।।"

(ई० प्र०, 3.1.2)

"बहिर्भावस्य क्रियाशक्तिमयस्य परत्वे उद्रेकाभासे सति पारमेश्वरं परमेश्वरशब्दवाच्यमीश्वरतत्त्वम्।"

(ई० प्र० वि०, खं० 2, पृ०, 191-192)

पारमेश्वरम्— स्वातन्त्र्यम्— तत् परिपूर्णं स्वान्तत्र्यम् यत्र चिद्रूपतया सदा विद्यमानमेव सर्वमक्रममेव वर्तते। यथा—

"अक्रमं यदेतत् परं पारमेश्वरं विचित्रं गर्भीकृतानन्तवैचित्र्यं स्वातन्त्र्यं त्रिकार्थरूपं तदेवैतत्।"

(प० त्री० वि०, पृ०, 127)

पारमेश्वरः— ~ आगमः — दाक्षिणात्येष्वागमेषु कश्चन यः समुद्धृतपङ्क्तिरभिनवगुप्तेन। यथा—

"यथोक्तं पारमेश्वरे – इत्यादि।"

(तं० सा०, पृ०, 22)

श्रीमन्मतङ्गपारमेश्वरागमोऽयं भवितुमर्हति। तन्त्रा-

लोकादावेवंविधपङ्क्त्युद्धरणेनैतज्ज्ञायते यच्छैवरौद्रभैरवागमानां भूयस्येकवाक्यता दर्शनसिद्धान्तविषये योगप्रक्रिया विषये च। केवलमियान् भेदो यत् सिद्धान्तिनः मन्त्रप्रमात्रुचितायां भेदभूमावेव प्रतिष्ठिता भवन्ति, रौद्रागमोपासकाः भेदाभेदमयीं मन्त्रेश्वरतां मन्त्रमहेश्वरतां वाऽऽसादयन्ति, भैरवागमशरणाः पुनरभेदमयीं शिवप्रमातृतामारोहन्तीति।

पारमेश्वरतन्त्रम्— **स एव रौद्र आगमो यस्य नाम मतङ्गतन्त्रमिति प्रसिद्धम्। मतङ्गपारमेश्वरमित्यप्युच्यते तत्। श्रीकण्ठीसंहितायां पारमेश्वरमित्येवास्य नामोक्तम्।**

द्र० — **'मतङ्गतन्त्रम्' इति।**

पारमेश्वरमूः — शास्त्रम् – **मतङ्गपारमेश्वरतन्त्रम्। यथा—**

"तथा च तत्र तत्रोक्तं लक्षणे पारमेश्वरे।।"

(तं० आ० 27,17)

पारमेश्वरीः — ~ क्रिया – **परमेश्वरस्य जगद्रूपतयाभासनं प्रति तस्य स्वभावभूतेच्छैव तस्य क्रिया। सैव जगदाभासस्य हेतुः। यथा—**

"इत्थं तथा घटपटाद्याभासजगदात्मना।
तिष्ठासोरेवमिच्छैव हेतुता कर्तृता क्रिया।।"

(ई० प्र०, 2-4-21)

~ अक्रमा— **यथोक्ता** —

"या तु प्रभोः सम्बधिनी तदव्यतिरिक्ता क्रियाशक्तिः शाश्वती कालेनास्पृष्टा तस्याः सक्रमत्वमस्तीति सम्भावनापि नास्ति। यथा प्रभोः सक्रमत्वसम्भाव्यं तथा तस्या अपि।"

(ई० प्र० वि०, खं० 2, पृ०, 7)

~ विद्या— (तृतीया) – **"ह्रीं परे ब्रह्मे चतुर्विधे योगधारिणि आत्मे परमात्मे रुद्रशक्ति रुद्रदयिते मे पापं दह दह सौम्ये सदाशिवे हूं फट् स्वाहा" इति तृतीयेयं विद्यात्रये। यथा—**

"मायार्णं, च परे ब्रह्मे चतुर्विद्ये पदत्रयम्।
अष्टार्णमथ पञ्चार्णं योगधारिणिसंज्ञितम्।।
आत्मान्तरात्मपरमात्मरूपं च पदत्रयम्।
एकारान्तं बोधनस्थं दशार्णं परिकीर्तितम्।।
रुद्रशक्तीति वेदार्णं स्याद्रुद्रदयितेऽथ मे।
पापं दह दहेत्येषा द्वादशार्णा चतुष्पदी।।
सौम्ये सदाशिवे युग्मं षट्कं बिन्द्विषुसावहा।
सार्धवर्णचतुष्कं तदित्येषा समयापहा।।
विद्या सार्धार्णखशरसंख्या सा पारमेश्वरी।"

(तं० आ० 30,116-120)

सावहा = स्वहा इति।

पारमैश्वर्यचतुष्ट्वम् — **तच्च (1) विश्वोत्तीर्णं शिवत्वम्, (2) ऐश्वर्याभिव्यञ्जनं प्रतीच्छाशक्तिसमावेशरूपं बिन्दुत्वम्, (3) सदाशिवपदे ऐश्वर्योपभोगः, (4) ईश्वरपदे प्रशासनम् इति। यथा—**

"लये च शिवतत्त्वाख्यं व्यक्तौ बिन्द्वाह्वयं पदम्।
भोगः सदाशिवस्थाने ईश्वराख्ये च शासनम्।।"

(म० तं०, 1-7-33)

उद्ध०: - (तं० आ० वि०, खं० 5, पृ०, 249)

पारमैश्वर्यम्– **(1) असम्भवस्यापि सम्भवताकरं यत् परमेश्वरस्य सर्वोत्तीर्णं परिपूर्णं स्वातन्त्र्यं, यच्च तस्य परमेश्वरत्वम्। यथा—**

"अतिदुर्घटकारित्वमस्यानुत्तरमेव यत्।
एतदेव स्वतन्त्रत्वमैश्वर्यं बोधरूपता।।"

(बो० पं० द०, 7)

(2) स्वयमेव स्वस्मिन् प्रतिबिम्बन्यायेन विश्वव्यवहारावभासनस्वभावत्वं, तत्समर्थत्वं च परमेश्वरस्य स्पन्दस्फुरत्तादिपदैरभिव्यंग्यम्। यथा—

"एतदेव हि परमेश्वरस्य तत् पारमैश्वर्यं यदन्तर्बहिश्च ज्ञानक्रियाप्रतिबिम्बनानुप्राणिताशेषविश्वविलासत्वम्। तच्च स्वातन्त्र्यस्पन्दस्फुरत्तोद्यमादिशब्दैरागमेषूद्घोष्यते।"

(म० मं० प०, पृ०, 5)

~ स्वाभाविकम्— **पारमैश्वर्यं हि परस्य तत्त्वस्य निजस्वभावभूतमेव, न पुनरुपाधिसंपर्केणावभासमानं प्रातिभासिकम्। यथा—**

(क) "यदा तु तस्य चिद्धर्मविभवामोदजृम्भया।।
विचित्ररचनानानाकार्यसृष्टिप्रवर्तने।
भक्त्युन्मुखिता चित्ता सेच्छायाः प्रथमा तुटिः।।"

(शि० दृ० 1,7-8)

(ख) "चिद्रूपस्य शिवभट्टारकस्य धर्मः स्वभावो
यो विभवः पञ्चविधकृत्यनिर्वृत्तियोग्यता।।"

(शि० दृ० वृ०, पृ०, 10)

पारिभाषिकीः — ~ संज्ञा — **शास्त्रविशेषकृतसंकेताश्रया संज्ञा।**

द्र०: - **'संज्ञाप्रकाराः' इति।**

पार्थिवाण्डम्— **स्थूलप्रपञ्चरूपं यज्जगत् तत् पार्थिवमण्डमिति परिभाषितम्।**

~ तदधिष्ठाता— **स च ब्रह्मदेवः। यथा—**

"पार्थिवमण्डं विचित्र-सृष्टिप्रधानं ब्रह्मणाधिष्ठितम्।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 366)

पार्श्ववर्तना— **पार्श्वभागलेखनं मण्डलस्य। यथा–**

"ब्रह्मणः पार्श्वयोर्जीवाच्चतुर्थात् पूर्वतस्तथा।"

(तं० आ० 31,64)

पार्श्वशृङ्गवर्तना— **रेखाविन्यासविशेषः। न स्पष्टीकृतं पदमेतज्जयरथेन। कोणात्कोणं यावद्विन्यस्ता रेखा स्यादेषा कदाचित्?**

पालनम्— **नियतिनियमानुसारं संसारस्य प्रवहद्रूपतया सततगत्या प्रवाहणं सुचिरं कालं यावत् स्थितिकृत्येन। यथा–**

"पालनं यथास्थितस्य विश्ववैचित्र्यस्य नियतिनियन्त्रणया तथैव स्थापनात्मकं संरक्षणम्।"

(तं० आ० वि० खं० 1, पृ०, 147)

पारमेश्वरीः —~शक्तिः — (अण्डरूपा) **असौ सृष्ट्यादिक्रियोन्मुखता परमेश्वरस्य या सर्वस्य वास्तविकं संविन्मयं स्वरूपं निगूह्य सर्वं तत्तत्तत्त्वभुवनादिरूपतया-ऽऽभासयति। यथा—**

"विश्वस्य प्रमातृप्रमेयरूपस्य पराहन्ताचमत्कारसारस्यापि स्वस्वरूपापोहनात्माख्यातिमयी निषेधव्यापाररूपा या पारमेश्वरी 'शक्तिः।' सैव आच्छादकत्वेन बन्धकतया शक्त्यण्डम्। इत्युच्यते।"

(प० सा० वि०, पृ०, 10)

पाशः — ~ सामान्यतः – **(1) परमशिवभावादन्यत् सर्वमपि पाश एव। यथा—**

"यत्किञ्चित् परमाद्वैतसंवित्स्वातन्त्र्यसुन्दरात्।
पराच्छिवादुक्तरूपादन्यत् तत् पाश उच्यते।।"

(तं० आ० 8,292)

~ विशेषतः — **भेददृष्टिः पाशः। पाशबद्धः प्राणी माययान्धीकृतः सन् ज्ञेयमात्मनो भिन्नं जानन् यत्पश्यत्यसौ पाशस्तस्य। यथा—**

"माययान्धीकृतो भिन्नवेद्यं पश्यंस्तु पाशितः।
स्वात्मनो भिन्नवेद्यानां दर्शनं पाश उच्यते।।"

(पू० प्र०, 2,479)

पाशमुद्रा— गुरुमुखादेव स्पष्टतया ज्ञेया। यथा—

"तर्जनीं वर्तुलां कृत्वा मूलेऽङ्गुष्ठस्य योजयेत्।
पाशस्तु कथितो ह्येष दुष्टजालनिबन्धकः।"

(स्व० तं० 14,7)

"(वामपाणिना)। अङ्गुष्ठस्येति तत्स्थाने मुष्ट्याकृतिवाम-सम्बन्धिनः। ..... अस्यापि तत्रैव (श्री भैरवानुकरणस्तोत्रे) तत्त्वं प्रदर्शितम्—

'निजशक्तिपाशवलितश्चिद्भस्मना कल्यते महाकालः।
इति पाशधारणवशात्प्रथमानः कालकालस्त्वम्।।' इति

उद्धः०: — (स्व० तं० उ०, प०, 14, पृ०, 113)

अन्यत्र शास्त्रेष्वेषा ज्ञानमुद्रेति प्रसिद्धा।

पाशवीसृष्टिः — **मायीयप्रमातुर्या विकल्पज्ञान-परम्परादिमयी सृष्टिरसौ पाशवी प्रत्ययसृष्टिः। सैवात्र बन्धरूपा। नैषा साक्षादीश्वरभट्टारककृता, नापि वा ब्रह्मदेव-कृता, अपि तु पशुप्रमातृकृतैव। यथा—**

"अनेनैश्वरस्य सर्गस्य पाशवात् सर्गाद्वैलक्षण्यं दर्शितम्। यत एवं, तदिति तस्मादीश्वरसृष्टिर्न बन्धहेतुः, अपि तु तत्पृष्ठे या पाशवी सा अपि न ब्रह्माधिष्ठिता, भेदोदयमात्रसारा, मायीयाणवमलमात्रोल्लासरूपा, अपि तु कार्ममलाप्यायिका प्रत्ययसृष्टिरेव।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 388)

पाशस्तोभः — **पाशजालविधूननम्। यथा—**

"एवं स्तोभितपाशस्य योजितस्यात्मनः शिवे।"

(तं० आ० 29,209)

"एवमस्य स्तोभितपाशतया शिवे एव योजनिका।"

(तं० आ० वि०, खं 11/2, पृ०, 135)

"पाशस्तोभाद्यस्तु सद्य उच्चिक्रमिषुरस्य तम्।।
प्राणैर्वियोजकं मूर्ध्नि क्षिपेत् संपूज्य तद्बहिः।
अनेन शिवहस्तेन समयी भवति स्फुटम्।।"

उद्धः०: – (देवीयामलात्)

(तं० आ० 15,462-463)

"पाशस्तोभात्समयी भवेत्।"

(तं० आ० वि०, खं० 9, पृ०, 233)

पाशाः — **आणव - मायीय - कार्मरूपाः मलाः बन्धनहेतवः। यथा—**

"पाशास्तु त्रिविधा भाव्या मायीयाणवकर्मजाः।
चैतन्यरोधकास्त्वेते कार्यकारणरूपिणः।।"

(स्व० तं० 3,175)

~ तत्फलम्ः –

पाशस्तोमेन सद्यो निर्वाणदा दीक्षा पूर्णा भवित, सद्यश्च मुक्तिर्लभ्यते। यथाः –

"यः पुनरुत्क्रान्त (क्कमितु) मिच्छुस्तं नहिः डारणीचिते क्षेत्रादो संतूज्य अस्य तमेव शिवहस्तंडाणिार्वियोजकं मूर्हिन क्षिवेत् तत्संस्वशहिब अस्य सद्यो निर्वाणदीक्षा भवेदित्यर्थः।"

(तं० आ० वि० खं० 9, पृ० 233)

पाशुपतव्रतम्ः — ~ त्रिके – **अत्र बाह्यश्मशानवासादिकं विनैव शिवयोगिनः पाशुपतव्रतमनायासत एव सिद्धयति। यथा—**

"सर्वं समया दृष्ट्या यत्पश्यति यच्च संविदं मनुते।
विश्वश्मशाननिरतां विग्रहखट्वाङ्गकल्पनाकलिताम्।।
विश्वरसासवपूर्णं निजकरगं वेद्यखण्डककपालम्।
रसयति च यत्तदेतद् व्रतमस्य सुदुर्लभं च सुलभं च।।"

(प० सा० 79-80)

"शरीरवृत्तिव्रतम्"। (शि० सू० 3,26)

"शरीरमेव कङ्कालं कपालं कङ्करस्थितम्।
पृष्ठदण्डं दण्डमत्र करपादगलस्थिताः।।
अस्थिखण्डाः पञ्च मुद्रा भस्म दीप्तिः परा स्मृता।
गुणत्रयं चोपवीतं ध्वजिका स्यान्महापथम्।।
भूषणानीन्द्रियाण्यत्र विहृतिर्विषयेष्वलम्।
हृच्छ्मशाने सदासक्तिः कायवाक्चेतसा स्फुरन्।।
यो यश्चेष्टापरिस्पन्दो वीरेशस्योत्सवः सदा।
महाव्रतमिदं ज्ञेयं निरर्गलनिजस्थितिः।।"

(शि० सू० वा०, भा०, पृ०, 67)

पाशुपतमुक्तिः — **ईश्वरदशाप्राप्तिः। यथा—**

"व्रते पाशुपते प्रोक्तमैश्वरं परमं पदम्।"

उद्धः०: – (तं० आ० वि०, खं० 1, पृ०, 70)

"व्रतं पाशुपतं दिव्यं ये चरन्ति जितेन्द्रियाः"
भस्मनिष्ठा जपध्यानास्ते व्रजन्त्यैश्वरं पदम्।।"

(स्व० तं० 10, 1169)

पाषाणलिङ्गम्— पाषाणनिर्मितं शिवलिङ्गं यत् सर्वजनकृतायां स्थिरपूजायामुपयोगि। यथा–

"न तु पाषाणजमिति तद्धि स्थिरप्रतिष्ठायां योग्यमित्याकूतम्"
(तं० आ० वि०, खं० 10, पृ०, 364)

व्यक्तिगतोत्कृष्टपूजायां त्वात्मलिङ्गमेवोपास्यमित्यभिप्रायो जयरथस्य।

पिचुतन्त्रपंक्तयः — ~ प्रायश्चित्तविषयाः – **समुद्धृता अर्थतस्तन्त्रालोके। यथा—**

"श्रीपिचौ च स्मृतेरेव पापघ्नत्वे कथं विभो।।
प्रायश्चित्तविधिः प्रोक्त इति देव्या प्रचोदिते।
सत्यं स्मरणमेवेह सकृज्जप्तं विमोचयेत्।।
सर्वस्मात् कर्मणो जालात्स्मृतितत्त्वकलाविदः।
तथापि स्थितिरक्षार्थं कर्तव्यश्चोदितो विधिः।"
(तं० आ० 28, 40911)

पिचुमतम्— पिचुतन्त्रमतम्। यथा—

"श्रीमत् पिचुमते चोक्तम्।"
(तं० आ० 28,383)

पिचुवक्त्रम्— योगिनीवक्त्रं, मुख्यमानन्दचक्रं मानवमिथुनदेहद्वये। यथा—

"महेश्वरेण पिचुवक्त्राद्यपरपर्यायं योगिनीवक्त्रमेव मुख्यचक्रमुक्तम्।"
(तं० आ० वि०, खं० 11/2, पृ०, 89)

पिचुशास्त्रम्— आगमशास्त्रं किमपि यन्मतं तन्त्रालोके समुद्धृतम्। यथा—

"तल्लक्षणं ब्रुवे श्रीमत्पिचुशास्त्रे निरूपितम्।"
(तं० आ० 26,21)

".....पिचुप्रोक्तं.....।"
(तदेव, 27-24)

पिण्डः — शिवस्य स्वातन्त्र्यशक्तेः कौलिकमभिधानान्तरम्। यथा—

"कुलं च परमेशस्य शक्तिः सामर्थ्यमूर्ध्वता।
स्वातन्त्र्यमोजो वीर्यं च पिण्डः संविच्छरीरकम्।"
(तं० आ० 29,4)

"पिण्ड इति विश्वस्यात्र सामरस्येनावस्थानात्।"
(तं० आ०, वि०, खं० 11/2, पृ०, 3)

पिण्डनाथः — पञ्चवर्णात्मकं कूटरूपं रहस्यात्मकं बीजमुपयोगि शाक्तोपाये। बीजपिण्डविशेषः। यथा—

"एवं संवित्क्रमेण श्री पराबीजस्योदयमभिधायैतत्समानस्कन्धताभिधित्सया श्रीपिण्डनाथस्याप्युदयमभिधत्ते।"
(तं० आ० वि०, खं० 3, पृ०, 220)

"तत्सदेव बहीरूपं प्राग्बोधाग्निविलापितम्।।
अन्तर्नदत्परामर्शशेषीभूतं ततोऽप्यलम्।।
खात्मत्वमेव सम्प्राप्तं शक्तित्रितयगोचरात्।।
वेदनात्मकतामेत्य संहारात्मनि लीयते।।
(तं० आ० 4,189-191)

जयरथकृतविवेकानुसारं च "र् क्ष् खैं" इत्येवं रूपोऽयं बीजमन्त्रः।

द्र०: — (तं० आ० वि०, खं० 3, पृ०, 220-221)

अन्यथाप्यस्य स्वरूपं संसूचितम्। यथा—

"अन्यत्र पुनरस्य–
शिवनभसि विगलिताक्षः कौण्डिल्युन्मेषविकसितानन्दः।
प्रज्वलितसकलरन्ध्रः कामिन्या हृदयकुहरमधिरूढः।।
योगी शून्य इवास्ते तस्य स्वयमेव योगिनीहृदयम्।
हृदयनभोमण्डलगं समुच्चरत्यनलकोटिशतदीप्तम्।।
इत्यादिना भङ्ग्यन्तरेणोदय उक्तः"

उद्ध०: — (तं० आ० वि०, खं० 3, पृ०, 222-223)

पिण्डमन्त्रः — ऊँकार एव। पिण्डे शरीरे "सोऽहम्" इति रूपेण व्याप्य तिष्ठन्, प्रतिक्षणं च समुच्चरन् सकारहकारराहित्येन ओमित्येवावशिष्यते। तत एव पिण्डस्थो मन्त्रः पिण्डमन्त्र इति। यथा—

"तद्रूपो यो मन्त्रः प्रणवाख्यः सोऽहं रूपो वा, सोऽहमित्यत्र सकारहकाररूपहलो लोपे ओमित्यवशिष्यते। यतोऽयं नाभ्यादिद्वादशान्तं यावत् पिण्डे विभक्तः, अतः पिण्डमन्त्रः ओंकारः, सोऽहमित्यजपागर्भितः हृदयविषयेऽत्यर्थं ध्वनति।"
(वि० भै० उ०, पृ०, 37)

पिण्डवेधः — वेधदीक्षाविधौ वेधक्रियाविशेषः। यथा—

"पिण्डः परः कलात्मा सूक्ष्मः पुर्यष्टको बहिः स्थूलः।
छायात्मा स पराङ्मुख आदर्शादौ च संमुखो ज्ञेयः।।
इति यः पिण्डविभेदस्तं रत्नसादुत्तरोत्तरे शमयेत्।
तत्तद्गलने क्रमशः परमपदं पिण्डवेधेन।"
(तं० आ० 29,265-266)

लययोगनीत्यायं पिण्डवेधः। तदनुसारं गुरुः शिष्यस्य स्थूलं शरीरं सूक्ष्मे शरीरे तच्चकारणशरीरे, कलादिपञ्चकवेष्टिते पुरुषतत्त्वे इति, तच्चापि परस्यां संविदि लयीकरोतीति पिण्डवेधोऽयम्।

पिण्डशिवाः — क्रियाशक्त्यभिव्यक्तिप्रधानाः रुद्राः। ते च ईश्वरभट्टारकाः, मन्त्रेश्वरास्तच्छक्तिसाक्षात्कारिणश्च तदवस्थाभाजो योगिनः। यथा—

"निजशक्तिसमाविष्टेरायान्ति शिवसम्पदः।।
क्रियाशक्तिपरात्मत्वे क्वचित् पिण्डशिवात्मता।"
(शि० दृ० 7,29-30)

पिण्डस्थः — जाग्रदवस्थाभाक् प्रमाता। स्थूलदेहात्मकं पिण्डमेवात्मेति मन्यमानः प्रमाता। यथा—

तथा पिण्डे भौतिके देहे तिष्ठति 'अहं देही' इति स्थितिमनुबध्नाति इति पिण्डस्थः, यतः पिण्डे बद्धाहन्तः, प्रथमपुर्यष्टकस्थो, देहकञ्चुकी, बुद्धिकर्माक्षवृत्तिवलितः कर्मात्मा पिण्डस्थ उच्यते, तस्य नादशक्तिर्निदानभूता।"
(म० प्र० वि०, पृ०, 14)

पिण्डस्थताः — पिण्डं तावन् मितं वस्तु, तच्च धरादि प्रमेयम्। आणवयोगेन तदेव परिपूर्णपरशिवरूपतया भाव्यते। तेन च योगिनस्तद्रूपपरशिवसमापत्तिर्भवतीति पिण्डस्थत्वं तस्य। ततो जाग्रदाकारप्रमेयात्मकपिण्डसमापत्त्या योगिभिरस्य जाग्रत्प्रपञ्चस्य पिण्डस्थमिति नाम व्यवह्रियते यत्तदेव मालिन्यादिशास्त्रे कथितं तथा। यथा—

"अधिष्ठेयसमापत्तिमध्यासीनस्य योगिनः।
तादात्म्यं किल पिण्डस्थं मितं पिण्डं हि पिण्डितम्।।"

(तं० आ० 10,243)

पिण्डमिति गर्भीकृततत्तदर्थजातम्। आणवसमावेशाश्रितेयं संज्ञा पिण्डस्थमिति। पिण्ड एवात्र विश्वात्मकस्वात्मतया साक्षत्क्रियते इति। यथाः –

"अधिष्ठेयेन धरादिना या समापत्तिस्तादात्म्यमयः
समाधिविशेषः.....पिण्डस्थमुच्यते।"

(तं० आ० वि०, खं० 7, पृ०, 165-166)

पिण्डस्थम्ः – (1) यदेव लोके जाग्रदिति व्यवह्रियते तस्यैव संज्ञा योगिपरम्परासु पिण्डस्थमिति। यथा–

"लौकिकी जाग्रदित्येषा संज्ञा पिण्डस्थमित्यपि।
योगिनां योगसिद्ध्यर्थं संज्ञेयं परिभाष्यते।।"

(तं० आ० 10,242)

"पिण्डस्थः सर्वतोभद्रो जाग्रन्नाथमद्वयं मतम्।"

उद्धः० — (मा० वि० तं० 2,36)

(2) पिण्डं शरीरं, तस्यैव प्राधान्येन स्थितं व्यवहारजातं पिण्डस्थं जाग्रदितिनामकम्। यथा—

"पिण्डं शरीरमित्युक्तम्.....।"

(मा० वि० तं०, 20,2)

~ भिन्नभिन्नप्रकारकम्— (1) पिण्डस्थं चतुर्विधम्। तद्यथा– अबुद्धं, बुद्धं प्रबुद्धं, सुप्रबुद्धं चेति। यथा—

"चतुर्विधं तु पिण्डस्थमबुद्धं बुद्धमेव च।
प्रबुद्धं सुप्रबुद्धं च.....।।"

(मा० वि० तं० 2,43)

(2) जाग्रदवस्थाभाजः प्राणिनो यतश्चतुष्प्रकारास्तत एव हि पिण्डस्थं चतुर्विधम्। बुद्धं, प्रबुद्धम्, इत्यादि पदानि द्रष्टव्यान्यत्रैव कोषे।

(3) प्रमेयताप्रधाना दशा मूलतः पिण्डस्थसंज्ञा। लौकिकी जाग्रदपि जडं पिण्डमेव प्राधान्येन गृह्णती पिण्डस्थमिति भण्यते। योगिपरम्परासु प्रसिद्धेयं संज्ञा। यथा—

"भूततत्त्वाभिधानानां योंऽशोऽधिष्ठेय उच्यते।
पिण्डस्थमिति तं प्राहुरिति श्रीमालिनीमते।।"

(तं० आ० 10,241)

पिण्डस्थाद्याः — दशाः – पिण्डस्थं = जाग्रत्, पदस्थं = स्वप्नः, रूपस्थं = सुषुप्तिः, रूपातीतं = तुर्या। एतायोगभूम्युत्थाः संज्ञाः। यथा—

"अत्रैव योगभूम्युत्थाः संज्ञा पिण्डस्थतादयः।"

(मा० वि० वा०, 1,1010)

"एतदेवावस्थाचतुष्टयं पिण्डस्थ-पदस्थ-रूपस्थ-रूपातीत-शब्दैर्योगिनो व्यवहरन्ति।"

(तं० सा०, पृ०, 106-107)

पिण्डाकृष्टिः — वशीकरणपूर्वकमप्सरःप्रभृतिसुन्दरीणामाकर्षणविधिराणवोपासनाविशेषस्य फलमित्येकोनविंशेऽधिकारे मालिन्यां द्रष्टव्यमेतत्। यथा—

"उर्वशीमप्यनायासादानयेत् किमु मानुषीम्।
अनेनैव विधानेन वायुवह्निपुरान्तगाम्।।
पिण्डाकृष्टिकरी ज्ञेया योजनानां शतैरपि।।"

(मा० वि० तं० 19,64-65)

पिधानकृत्यम्— (1) प्राणिनां बन्धनस्य दृढीकरणात्मकं विलयकृत्यम्, निग्रहकृत्यम्, तिरोधानकृत्यम्। तद्वशादेव लब्धशिवदीक्षाणामपि जनानां कदाचिद् गुरुषु, शास्त्रेषु, साधनोपायेषु च श्रद्धा ह्रीयते। तत्फलतया ते गुरुशास्त्रादिनिन्दामन्तः कुर्वन्तो यथोचितसमयादिपालने मन्दादराः सम्भवन्ति, आपाततः दाम्भिकत्वेन साधनक्रियाः कुर्वन्तोऽपि मनसा तास्वनाश्वस्ताः सम्भवन्ति। तत्फलतया च गाढगाढेषु बन्धनगर्त्तेषु पतन्ति, कदाचित्, तिर्यग्योनिषु संसरन्ति, नरकेऽपि वा पतन्ति।

द्रः० — 'तिरोधानकृत्यम्' इति।

द्रः० — 'निग्रहकृत्यम्' इति।

द्रः० — 'विलयकृत्यम्' इति।

(2) शैवदर्शनदीक्षिताश्चेद् वैष्णवाद्यधरदर्शनोपासनायां रज्येरंस्तर्हि वेद्यमेतद् यत्ते शिवकृत्यस्य पिधानकृत्यस्य पात्रतां याताः इति। पिधानकृत्यप्रभावादेवोत्तरं शास्त्रं विहायाधरे शास्त्रे रुचिर्जायते यतः। यथा—

"ये पुनः प्राप्तविज्ञानविवेका मरणान्तिके।
अधरायतनेष्वास्थां श्रितास्तेऽत्र तिरोहितः।।"

(तं० आ० 28,278)

(3) अनेन कृत्येन शिवः प्राणिनोऽधोऽधोऽज्ञानगर्त्तेषु निक्षिपति। परमेश्वरस्य घोरतराख्याः शक्तयः पिधानकृत्यपात्रभूतान् प्राणिनः दुष्कर्मजातं प्रति क्षुद्रांश्च भोगान् प्रति प्रेरयन्त्यास्तान् बन्धनस्य गम्भीरेषु गर्त्तेषु पातयन्ति। परमेश्वरस्य वामाख्या या शक्तिरसावेवमेव प्राणिनां बन्धनस्य लीलामद्भुताद्भुतैः प्रकारैः प्रसारयति घोरतरशक्तिव्रातद्वारा।

द्रः० — 'घोरतराः' 'शिवशक्तयः' इति।

द्रः० — 'वामाशक्तिः' इति च।

पिनाकमुद्रा— गुरूपदेशत एव सम्यग् विज्ञेया। शरप्रहाराभिनयात्मिकेयं स्याद्धस्तद्वयमुद्रा। यथा—

"मुष्टिं बद्ध्वा प्रसार्येत तर्जन्यङ्गुष्ठकं प्रिये।
अग्रे निकुञ्चयेत्किञ्चित्पिनाकं परिकीर्तितम्।।"

(स्व० तं० 14,9)

"अस्यापि सतत्त्वमुक्तं **(श्रीभैरवानुकरणस्तोत्रे)** कोदण्डारूढशरप्रदर्शनाद्ब्रह्माविष्णुरुद्रेशान्।

ससदाशिवकारणहरिणाच्छक्त्या भिनत्सि युगपत्त्वम्।। इति।"

उद्धः — (स्वं० तं० उ०, 14, पृ०, 114)

पिवन्यादि— न स्पष्टीकृतं तन्त्रालोके, तद्विवेकेऽपि वा। यथा—

"ईशान्ते च पिवन्यादि।"

(तं० आ० 17, 117)

"योजयेच्चेश्वरादूर्ध्वं पिवन्यादिकमष्टकम्।"

उद्धः — (मा० वि० तं० 9,73)

(तं० आ० वि० खं० 10, पृ०, 174)

पिवन्यादिनामभाजोदेव्यो भवेयुरिमाः।

पिशाचटीका— कश्चन दर्शनग्रन्थविशेषः। यथा—

"एतच्च पिशाचटीकायां (1-7-11) वितत्य विचारितम्।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 241)

पिशाचा — निकृष्टाः सूक्ष्मदेहाः प्राणिनः। यथा—

"पिशाचा अशुचिस्थानादिवासिन उल्कामुखाः।"

(ने० तं० उ०, खं० 2, पृ०, 115)

पीठम्— (1) उपासना परम्परा, शिष्यप्रशिष्यसमूहरूपा। यथा—

"श्रीमदानन्दशास्त्रादौ प्रोक्तं भगवता किल।
समूहः पीठमेतच्च द्विधा दक्षिणवामतः।।"

उद्धः — (तं० आ० 37,18)

~ दक्षिणम्— शिवोपासनाप्रधाना परम्परा साधकानाम्। यथा—

"दक्षिणवामत इति शिवशक्तिरूपतयेत्यर्थः।"

(तं० आ० वि०, खं० 12, पृ०, 398)

~ वामम्—शाक्तोपासनाप्रधाना परम्परा साधकानाम्।

द्रः — 'दक्षिणम्' इति।

2. देवतास्थानं यत्र साधनासाफल्यमचिरेणैव कालेन जायते। विशेषतश्च कौलिकसाधनाकेन्द्रभूतं देवतास्थानम्। यथा—

"सृष्टिसंस्थितिसंहारानामक्रमचतुष्टयम्।
पीठश्मशानसहितं पूजयेद्भोगमोक्षयोः।।"

(तं० आ० 29,57)

"सृष्टिक्रमं तु प्रथममवतारं द्वितीयकम्।
संहारं तु तृतीयं स्यादनाख्येयं चतुर्थकम्।।"

उद्धः – (तं० आ० वि०, खं० 11/2, पृ०, 41)

सृष्टि-संस्थिति-संहाराअनाख्य-क्रमचतुष्टयमिति।

पीठम्— (2) उपासनाभ्यासक्षेत्रम्। यथा—

"पीठस्थानं सदायागयोग्यं शास्त्रेषु भण्यते।"

(तं० आ० 15,82)

~ तत्त्रयम् (मुख्यम्)—तच्चकामरूपम्, पूर्णगिरिः, ओडियानं चेति, तत्र कामरूपं पूर्वपीठं यदत्र्यमित्युक्तमागमे। पूर्णगिरिपीठं दक्षिणं यद् दक्षमित्युक्तम्। ओडियान पीठमुत्तरम्। यथा—

"तस्येच्छापीठमाधारो यत्रस्थं सचराचरम्।
अग्र्यं तत् कामरूपं स्याद् बिन्दुनादद्वयं, ततः।।
नादपीठं पूर्णगिरिर्दक्षिणे वामतः पुनः।
पीठमुड्डयनं बिन्दुर्मुख्यं पीठत्रयं त्विदम्।।"

(तं० आ० 15,84-85)

कामरूपं बिन्दुनादद्वयात्मकम्। पूर्णगिरिर्नादपीठम्। ओडियानपीठं च बिन्दुपीठम्। नैष विषयः सम्यक् स्पष्टतां नीतस्तन्त्रालोके वा, तद्विवेकेऽपि वा। श्री निशासञ्चारवाक्येष्वपि स्पष्टतां नैव नीतः। तद्यथा–

"ततः पीठद्वयं जातं बिन्दुनादमयं प्रिये।
वामे बिन्दुर्विनिर्दिष्टो दक्षिणे नाद उच्यते।।
अग्रपीठं तु पूर्वोक्तं शाक्तं तु परमेश्वरि।
एवं पीठत्रयं जातं कामरूपादि यत्स्मृतम्।
अग्र्यं तत् कामरूपं स्याद्दक्षे पूर्णगिरिः स्मृतः।
उड्डियानाभिधानं तु उत्तरे तु तृतीयकम्।।"

उद्धः — (तं० आ० वि०, खं० 9 पृ०, 48)

नह्यत्र जालन्धरपीठस्य कोऽप्युल्लेखः। कथमिवैतदिति शाक्तोपासनारहस्यविदेव कोऽपि स्पष्टतां नयेदत्रत्यं रहस्यम्।

~ द्विविधम् — तच्च बाह्यमान्तरं चेति। तत्रान्तरं साधकदेहस्थं, बाह्यं च कामरूपादिकं प्रसिद्धं शाक्तोपासना-क्षेत्रजातम्।

यथा—

"पर्वताग्रनदीतीरैकलिङ्गादि यदुच्यते।।
तद् बाह्यमिह तत् सिद्धिविशेषाय न मुक्तये।
आभ्यन्तरं नगाग्रादिदेहान्तः प्राणयोजनम्।।
साधकानामुपायः स्यात् सिद्धये न तु मुक्तये।
पीठस्थानं सदा यागयोग्यं शास्त्रेषु भण्यते।।
तच्च बाह्यान्तराद्रूपाद् द्वहिर्देहे च सुस्फुटम्।"

(तं० आ० 15,80-83)

नैष विषयः स्फुटतां याति सम्यक्।

पीठचतुष्टयम्— उपासना-क्रमाश्चत्वारः। ते चः- मन्त्रप्रधानं, विद्याप्रधानं, मुद्राप्रधानं, मण्डलप्रधानं चेति। यथा—

"एवमन्योन्यसम्भेदवृत्तिपीठचतुष्टयम्।।"

(तं० आ० 37,21)

"मन्त्रो हि शिवस्वभावः, विद्या च शक्तिस्वभावेति।"

(तं० आ० वि०, खं० 12, पृ०, 398)

"मन्त्रप्रतिकृतिर्मुद्रा तदाप्यायनकारकम्।

मण्डलं सारमुक्तं हि मण्डश्रुत्या शिवाह्वयम्।।"
(तं० आ० 37,20-21)

~ उत्तरोत्तरोत्कर्षतः — मण्डलादुत्कृष्टा मुद्रा, तस्या उत्कृष्टो मन्त्रो, मन्त्रादुत्कृष्टा विद्या। यथा—

".....मण्डलं मुद्रिका तथा।।
मन्त्रो विद्येति च पीठमुत्कृष्टं चोत्तरोत्तरम्।"
(तं० आ० 37,23-24)

"उत्तरोत्तरमुत्कृष्टमिति, तेन मण्डलपीठान्मुद्रापीठं, ततो मन्त्रपीठं, ततोऽपि विद्यापीठं चेति।"
(तं० आ० वि०, खं०-12, पृ०, 399)

~ सूक्ष्मम्— शिवशक्तिधामरूपेषु, पीठेष्वभ्यस्यमानं सत् परस्परसम्मिश्रं साधनाचतुष्टयम्, पीठस्य सारभूतं तत्त्वम्। तच्च मन्त्रः, विद्या, मुद्रा, मण्डलं चेति।

यथा—

"एवमन्योन्यसंभेदवृत्तिपीठचतुष्टयम्।
यतस्तस्माद्भवेत् सर्वं पीठे पीठेऽपि वस्तुतः।।"
(तं० आ० 37,21-22)

पीठादि —पीठपर्वतनदीस्रोतः- प्रभृति-स्थानं यत्रोपास्यदेवतासान्निध्यतः साधनासाफल्यं सुलभं भवति, विशेषतः कौलसाधनासु।

~ ज्ञानयोगानुकूलम्— यथा म्लेच्छदेशे स्वभावत एवाधर्मपरे भ्राम्यति पुरुषेऽप्यधर्मविचारप्रभावो जायते तथैव पीठे गतस्य साधकस्यापि ज्ञानयोगयोः रुचिर्वर्धते।

यथा—

"यथा स्वभावतो म्लेच्छा अधर्मपथवर्तिनः।।
तत्र देशे नियत्येत्थं ज्ञानयोगौ स्थितौ क्वचित्।"

(क्वचिदिति पीठोपपीठादौ)

"यथाचातन्मयोऽप्येति पापितां तैः समागमात्।।
तथा पीठस्थितोऽप्येति ज्ञानयोगादिपात्रताम्।"
(तं० आ० 15,99-100)

~ प्रधानं— (कौले) — कामाख्या पूर्णगिरिजालन्धरौड्डीयाननामसु चतुर्ष्वपि जालन्धरपीठस्यैव प्राधान्येन पूज्यत्वं कौलयागे, कौलसम्प्रदायस्य तत्पीठादेव यतोऽवतारो गुरुक्रमतः। यथा—

"पीठमिति जालन्धरं यतस्ततु सिद्धयोगिनीक्रमेणास्य दर्शनस्यावतारः।"
(तं० आ० वि०, खं० 11/2, पृ०, 23)

शम्भुनाथाख्यपीठाधीशमहिम्ना सिद्धयोगिनीक्रमस्यावतारो जालन्धरपीठादेवाभूदैशवीयदशमशताब्दीतः इत्यनुमीयतेऽनेनोनेद्धरणेन। पूर्वं तु कौलोपासनाया मुख्यं केन्द्रं कामाख्यापीठमेवासीदिति प्रसिद्धिः।

~ माहात्म्यतः— साधनाभ्यासक्षेत्रत्वेन पीठपर्वताग्रादिस्थानेषु परमेश्वरशक्त्याविष्टानां सिद्धानां देहधारणादेकान्तत्वादिना च माहात्म्यम्। यथा—

"तेषु तेषु पीठादिस्थानेषु परमेशनियत्या परमेश्वराविष्टानां शक्तीनां देहग्रहणात्।"
(तं० सा०, पृ०, 133)

"पर्वताग्रादेश्चैकान्तत्वेन विक्षेपपरिहारादैकाग्र्यप्रदत्वम् इति।"
(तदेव)

~ श्रेष्ठम्— तच्च शरीरान्तः सञ्चारी प्राणः, ततोऽपि च श्रेष्ठं तत्प्रतिष्ठास्थानभूता संवित्। यथा—

"मुख्यत्वेन शरीरेऽन्तः प्राणे संविदि पश्यतः।।
विश्वमेतत्किमन्यैः स्याद्बहिर्भ्रमणाडम्बरैः।"
(तं० आ० 15,100-101)

पीठानि— बाह्याभ्यन्तरादीनि बहूनि।

~ आभ्यन्तराणि— देहप्राणाद्यन्तर्वर्तमानानि। तानि चेच्छानादबिन्दुप्रभृतीनि। यथा—

"आभ्यन्तरं नगाग्रादि देहान्तः-प्राणयोजनम्।"
(तं० आ० 15,81)

"किं वातिबहुना सर्वं संवित्तौ प्राणगं ततः।।
ततो देहस्थितं तस्माद्देहायतनगो भवेत्।"
(तं० आ० 15,96-97)

~ बाह्यानि— यागस्थानानि पर्वताग्रादीनि। यथा—

"पर्वताग्रनदीतीरैकलिङ्गादि यदुच्यते।।
तद्बाह्यमिह तत्सिद्धिविशेषाय न मुक्तये।"
(तं० आ० 15,80-81)

पुंस्तत्त्वम् — मायापरिगृहीतः कुञ्चकैः संङ्कोचितशक्तिको भेददर्शी जडमेव वस्तु स्वात्मत्वेनाभिमन्वानः पशुप्रमाता, पुरुषो, जीवः, अणुः इति बहुनामकः।

यथा—

"मायागृहीतसंकोचः शिवः पुंस्तत्त्वमुच्यते।
अयमेव हि संसारी जीवो भोक्तैव दृश्यते।।"
(अ० प्र० पं०, 22)

"भेदे त्वेकरसे भातेऽहन्तयानात्मनीक्षिते।
शून्ये बुद्धौ शरीरे वा माया शक्तिर्विजृम्भते।।
यश्च प्रमाता शून्यादिः प्रमेये व्यतिरेकिणि।
माता स मेयः सन् कालादिकपञ्चकवेष्टितः।।"
(ई० प्र०, 3-1-89)

"माया परिग्रहवशाद् बोधो मलिनः पुमान् पशुर्भवति।"
(प० सा०, 16)

पुत्रकः — (1) विशेषानुग्रहपात्रतां यातः पुत्रकदीक्षया च दीक्षितः शैवाचार्यस्य प्रियः शिष्यः। असौ त्वरितया गत्या शिवभावगामी भवति गुरुकृपया। यथा—

"कश्चिच्छुद्धाध्वबन्धः सन् पुत्रकः शीघ्रमक्रमात्।।"
(तं० आ० 13,297)

(2) गुरोरनुग्रहशक्तिपातेन छिन्नपाशजालः शिष्यः पुत्रकः। असौ विशेषज्ञानयोगादि विनैव केवलं गुरुकृपयैव मुक्तो भवति। दीक्षाबलेनैव गुरुः पुत्रकं सत्वरं मोचयति स्वरूपसाक्षात्कारं च स्वशक्त्या तस्य कारयति।

यथा —

"तस्यैव भाविविधिवत्तत्त्वपाशवियोजने।"

पुत्रकत्वं .....।।

(तं० आ० 15,464)

"पौत्रिकी सा पुनश्चर्यामात्रेण प्रायणे यया।।

परं शिवत्वमभ्येति विनापि ज्ञानयोगतः।"

(तं० व० धा०, 3,23-24)

~ तद्गतिः — **मायायां विलीनायां सत्यां भोगेषु च भुक्तेषु सत्सु पुत्रको गुरुकृतयोजनिका क्रियाबलान्निष्कले सकले वा शिवे नियोजितः सन् क्रमेण शिवीभवति। यथा—**

"ततो मायालये भुक्तसमस्तसुखभोगकः।।

निष्कले सकले वैति लयं योजनिकाबलात्।"

(तं० आ० 16,310-311)

पुत्रकदीक्षा— (1) असौ अनुग्रहपूर्णा सामर्थ्यशालिनी दीक्षा यया शिष्यस्य प्रारब्धं कर्म वर्जयित्वा शेषं सर्वमपि कर्मजालकं शोध्यते, येनासौ जीवन्मुक्ततामेति। एतस्या विधानं संक्षेपतस्तन्त्रसारे पृ०, 156 तः पृ०, 161 यावन्निरूपितं वर्तते, विस्तरतश्च तन्त्रालोके षोडश आह्निके अनया दीक्षया गुरुः शिष्यस्य स्वात्मनाऽभेदमापादयति, स्वयं पुत्रकदीक्षाकृदेतादृशो गुरुः शिवादभिन्नः, शरीरधारी शिव एवेति पुत्रकमपि शिवभावं नयति। यथा—

"इत्येषा पुत्रकदीक्षा। यत्र वर्तमानमेकं वर्जयित्वा भूतं भविष्यच्च कर्म शुध्यति।

अन्तः समस्ताध्वमयीं स्वसत्तां

बहिश्च संधाय विभेदशून्यः।

शिष्यस्य धीप्राणतनूर्निजासु

तास्वेकतां संगमयेत्प्रबुद्धः।।

शिष्यैकभावं झटिति प्रपद्य तस्मिन्महानन्दविबोधपूर्णे।

यावत्स विश्राम्यति तावदेव शिवात्मभावं पशुरभ्युपैति।।"

(तं० सा०, पृ०, 160)

अत्र प्रथमे पद्ये निजासु धीप्राणतनुष्विति।

(2) अनया दीक्षितः शिष्यो गुरुणा स्वपुत्रत्वपदवीमारोप्यते। तस्य भोगमोक्षसिद्धये तदनुसारमेव कर्मशोधनं विधीयते गुरुणा। यथा—

"भोगेच्छोः शुभं न शोधयेत्, मुमुक्षोस्तु, शुभाशुभमुभयमपि।

निर्बीजायां तु समयपाशानपि शोधयेत्।।"

(तं० सा०, पृ०, 158)

"इत्येषा समस्तपाशवियोजिका दीक्षा।"

(तं० सा०, पृ०, 159)

~ तत्फलम्– **(1) एषाऽक्रमत एव त्वरितगत्या शिवत्वापादनकरी। यथा—**

"कश्चिच्छुद्धाध्वबन्धः सन् पुत्रकः शीघ्रमक्रमात्।"

(तं० आ० 13,297)

(2) कदाचिद् भुक्तिरपि फलं भवत्यस्याः। परं तत्रापि पर्यन्ते मुक्तिरेव। यथा—

"देहपाते पुनः प्रेप्सेद् यदि तत्त्वेषु कुत्रचित्।

भोगान् समस्तव्यस्तत्वभेदैरन्ते परं पदम्।।"

(तं० आ० 17,92)

सत्यां भोगवासनायां पुत्रको दिव्यभोगभुक्तये उत्तरेषु भुवनेषु योजनिकया उत्क्राम्यते, तत्रत्यान् भोगान् भुक्त्वा च शिवभावमापाद्यते गुरुकृपया।

~ तन्नियमा— **पुत्रकदीक्षा तु वित्तशाठ्यं विहाय करणीया भवति। पशुबलिप्रदानेऽपि न विचिकित्सितव्यं भवति तस्यां कारुणिकतया। एतद् द्वयाभावे सति पुत्रकदीक्षायागविधिर्नैवानुष्ठातव्यः। ज्ञानदीक्षयैव शिष्य उद्धरणीयः। यथा :—**

"तर्पणनैवेद्यपरिपूर्णं वित्तशाठ्यविरहितो यागस्थानं कुर्यात्। असति वित्ते तु महामण्डलयागो न कर्तव्य एव। पशूंश्च जीवतो निवेद्येत्। तेऽपि हि एवमनुगृहीता भवन्ति। इति कारुणिकतया पशुविधौ न विचिकित्सेत। ..... तदग्रेऽन्यं पशुं वपाहोमार्थं कुर्यात्। देवताचक्रं तद्वपया तर्पयेत्।"

(तं० सा०, पृ०, 157-158)

पुद्गलः – (1) शिव एवाणुतया भासमानः स्वविलासत एव। पुथा – हिंसया क्लेशेन गलतीति। क्षेत्रज्ञः। पशुः अणुः। जीवः। यथा—

"अणवो नाम नैवान्यत् प्रकाशात्मा महेश्वरः।

चिदचिद्रूपताभासी पुद्गलः क्षेत्रवित् पशुः।।"

(तं० आ० 9,144-145)

"पुथ हिंसा संक्लेशनयो": — इत्यस्य क्विपि कृते, पुथा-हिंसया परताबुद्ध्या क्लेशेन च गलतीति पुद्गलः, कर्मबीजप्ररोहावहं क्षेत्रं शरीरमेवात्मत्वेन जानानः।"

(तं० आ० वि०, खं० 6, पृ०, 113)

(2) शङ्कातङ्ककलङ्कैर्हतो मायीयः प्रमाता। यथा—

"पुथा अन्तःशङ्कातङ्कसंस्कारोत्थापनात्मना हिंसया गिलनं भोग्यलक्षणं यस्य स पुद्गलो माया प्रमाता।"

(स्व० तं०, उ०, 10, पृ०, 460)

किमपि नैरूक्तमिवैतन्निर्वचनं प्रतिभाति।

पुनर्भवः— पुनर्जन्म।

~ तत्कारणम्— **देहादावात्मभावाभिमान एव स्वर्गनरकगतिर्पुनर्भवादिकारणम्। यथा—**

"पुनर्भवश्च देहादौ वेद्ये स्वात्मत्वनिश्चयात्।।

अहं सुकृतकारीति स्वर्गादौ भोक्तृता मम।

इत्यादि देहतादात्म्यात् स्वर्गा वीच्यादिषूद्भवः।।"

(तं० व० धा०, 1-2-3)

पुनर्भूः — ~ शिष्यः **पूर्वमधरदर्शनदीक्षितः पश्चाल्लिङ्गोद्धारपूर्वकं कृतशिवदीक्षः शिष्यः। यथा—**

"पुनर्भूश्चान्यलिङ्गो यः पुनः शैवे प्रतिष्ठितः।"

(तं० आ० 23,10)

~ गुरुत्वानधिकारी — **लिङ्गोद्धारपूर्वकं प्राप्तशैवशास्त्रदीक्षः साधको मोक्षमार्गगोऽप्याचार्यपदस्य नाधिकारी।**

यथा—

"प्राग्लिङ्गिनां मोक्षदीक्षा साधिकारविवर्जिता।।
साधकाचार्यतामार्गे न योग्यास्ते पुनर्भुवः।"
(तं० आ० 22,28-29)

~ मतान्तरतः — **ईशानशिवगुरुमते ज्ञानेच्छः सन् पुनर्भूरप्याचार्यपदार्हो भवति, येनासौ मोक्षदो गुरुः। किञ्चोपायानुष्ठानबलाद् भोगमपि दातुं समर्थतामेतीति। यथा—**

"पुनर्भुवोऽपि ज्ञानेच्छा भवन्ति गुरुतास्पदम्।।
मोक्षायैव न भोगाय भोगायाप्यभ्युपायतः।
इत्युक्तवान् स्वपद्धत्यामीशानशिवदैशिकः।।"
(तं० आ० 22,29-30)

परं ज्ञानेच्छा एव तथाऽधिकारिणो नान्ये।

पुमान्— मायाशक्त्या संकोचं प्रापितः कञ्चुक-परिवेष्टितः स्वरूपतिरोधानयुक्तश्च प्रमाता। यथा—

"स तया परिमितमूर्तिः संकुचितसमस्तशक्तिरेष पुमान्।
रविरिव संध्यारक्तः संहृतशक्तिः स्वभासनेऽप्यपटुः।।"
(ष० त्रिं० तं० स०, 6)

तया = मायाशक्त्येति।

पुरः — किञ्चित् प्रकाशात्मतायां यद्यद्वस्तु प्रकाशस्य सम्मुखतया तिष्ठति तत् पुरस्तादिति व्यवह्रियते। यथा—

"किञ्चित् प्रकाशयोग्यस्य सम्मुखं प्रसरत् पुरः।
(तं० आ० 15,198)

पुराणप्रमाता— सर्वादिभूतः परिपूर्णः परमेश्वरः। सर्वप्रमाव्यापारावभासनस्वातन्त्र्यं तस्य प्रमातृत्वम्। ततः प्रमेयाभासाभावेऽपि प्रमातृत्वं तस्याखण्डितम्। तृप्रत्ययस्य कर्त्रर्थत्वात् कर्तुश्च स्वतन्त्रत्वात्। यथा—

"विश्ववैचित्र्यचित्रस्य समभित्तितलोपमे।
विरुद्धाभावसंस्पर्शे परमार्थसतीश्वरे।।
प्रमातरि पुराणे तु सर्वद्यभातविग्रहे।
किं प्रमाणं नवाभासः सर्वप्रमितिभागिनि।।"
(ई० प्र० 2-3-15-16)

~ अप्रमेयः — **न लौकिकप्रमाणसिद्धः, अपि तु स्वप्रकाशः स्वयंसिद्धः। यथा—**

"प्रमातुश्चादिसिद्धस्य किं लग्ना सिद्धिरस्तु।"
(ई० प्र०, वि०, खं० 2, पृ०, 122)

"प्रमितीः स्वात्मन्यन्तर्मुखरूपे भजते। तत् तस्मिन् कथमभिनव आभासस्तत्प्रमितिश्च कुत्र विश्राम्यतु। तस्मात् देहप्राणपुर्यष्टकशून्यप्राय एव प्रमातरि प्रमाणमुच्यताम्। तत्रापि च वेद्यांशे यदि नाम, न तु कथञ्चित् संविदंशे।"
(ई० प्र० वि०, खं०2, पृ०, 125)

पुरुषः — (1) पञ्चकञ्चुकपरिवेष्टिता, मायाहत-पारमैश्वर्या देहादावधिष्ठिता परिमिता चिद्रूपा संवित् पुरुषः। सङ्कुचितः प्रमाता। जीवः क्षेत्रज्ञः। अणुः। पशुः इत्यादीन्यस्य नामान्तराणि। अस्य देहे मुख्यं स्थानं हृदयम्। यथा—

".....पुरुषः पद्ममध्ये व्यवस्थितः।
चित्स्वरूपश्च सर्वेषु देहमापूर्य संस्थितः।।
स जीव इति विख्यातो येन जीवति तत्पुरम्।
निर्गतेन मृता येन अचेताः शीर्यते तनुः।।
बध्यते मुच्यतेऽसौ वै सुखदुःखानि वेत्ति च।
न तस्य रूपं वर्णो वा प्रमाणं दृश्यते क्वचित्।।
न शक्यः कथितुं वापि सूक्ष्मश्चानन्तविग्रहः।
वालाग्रशतभागस्य शतधा कल्पितस्य तु।।
तस्य सूक्ष्मतरो जीवः सचानन्त्याय कल्पते।
आदित्यवर्णं रुक्माभमब्बिन्दुमिव पुष्करे।।
पश्यन्ति तारकमिव योगिनो दिव्यचक्षुषा।
रागविद्याकलोपेतः कालबद्धो हि रूपवान्।।"
(स्व० तं०, 12,105-110)

(2) परमेश्वर एव स्वरूपतिरोधानेन सङ्कुचितशक्तितया मायीयशरीरादितया चाभासमानः जीव इति। यथा—

"यदा तु परमेश्वरः पारमेश्वर्या मायाशक्त्या स्वरूपं गूहयित्वा संकुचितग्राहकतामश्नुते तदा पुरुषसंज्ञः।"
(प० प्रा०, पृ०, 7)

(3) शक्तिदारिद्र्यपीडितः प्रमाता। यथा—

"अविकार्यस्यापि तस्य चिदात्मनः स्वशक्तीनां संकोचनपुरःसरं शक्तिदारिद्र्यमापन्नस्य अण्वपरपर्याया पुरुषसंज्ञा, संहृतशक्तित्वेन परिमितात्मा स स्वात्मैश्वर्यमपि प्रत्यभिज्ञातुमपटुः संचरति विचित्रयोनिषु।"
(ष० त्रिं० तं० सं० वि०, पृ०, 5)

~ तत्सृष्टिः — **प्रकृतितत्त्वं पुस्तत्त्वं च शैवे सृष्टेष्वेव तत्त्वेषु गण्येते, नानादि तया। यतो हि मायातत्त्वादुभयस्य सृष्टिः प्रतिपादिता। यथा—**

"परस्या एव संविदश्चोक्तयुक्त्या मायावशादाभासरूपतया पुंस्त्वं जातम् इति। तत एवास्य पुंस्तत्त्वस्य श्री स्वच्छन्दशास्त्रादौ तत्र तत्रागमे जन्मोक्तम्।"
(तं० आ० वि०, खं० 6, पृ०, 165)

~ निर्वचनतः — **(1) पुरे बुद्धिप्राणशरीराख्ये पुरत्रये वसतीति मायीयः प्रमाता पुरुषः।**

(2) पुरत्रयमोषति दहतीति त्रिपुरदाहकः शिवः परः पुरुषः। यथा—

"यदनयोः पुरे वसतीति पुरुषः पुरमोषति दहतीति पुरुष इति स्वभावभेदः।

बुद्धिप्राणशरीराख्ये यदेतस्मिन् पुरत्रये।
अहङ्काराद् वसत्यात्मा तेनायं पुरुषः स्मृतः।।
एतत् पुरत्रयं दग्धं येन स त्रिपुरान्तकः।
स एव पुरुषः प्रोक्तः स्मरारिरपि स स्मृतः।।"
(म० मं० प०, पृ०, 54-55)

(3) पुरं देहादि पोषयतीति पुरुषः। यथा—

"पुरं प्रधानमित्युक्तं प्रपञ्चानेकसंकुलम्।

तत्पुरं पोषयेद्यस्मात्तस्माद्वै पुरुषः स्मृतः।।"

(स्व० तं० प० 11,101)

~ मातृकाक्रमे— **मकारः**

"आत्मना पुरुषवाचिना मकारेण।"

(ने० तं० उ०, खं० 2, पृ०, 67)

~ हंसः — **सौषुम्नमार्गेणोर्ध्वगामि जीवचैतन्यम्। सहस्रारपथगामी पुरुषः। यथा—**

"पुरुषः क्षेत्रज्ञोऽनेनैव मध्योर्ध्वमार्गारोहणात्मना योगेन सर्वजन्तुषु हृत्कण्ठभ्रूमध्यललाटमार्गेण प्रसरन्नधरभूमिहानोर्ध्व-पदसमानरूपो हंस उच्यते।"

(स्व० तं० उ०, प० 4, पृ०, 165)

पुरुषकलाविवेकः — तन्निश्चयात्मकं विज्ञानं येन साधकः स्वात्मानं कलायाः सकाशात् तत् परिणामभूतानां च देहेन्द्रियादीनां सकाशात् सर्वथा भिन्नं विविक्तं च जानाति दृढतरेण निश्चयेनेति।

~ तत्फलम्— **पुरुषकलयोः पारस्परिकस्यान्तरस्य ज्ञाने सति यस्तयोः परस्परं विवेकस्तेन प्रमाता मायापुंविवेकतः सर्वकर्मक्षयाद्विज्ञानाकलतामुपैति। मायाधश्च नैव ततः संसरति। यथा—**

"अलक्ष्यान्तरयोरित्थं यदा पुंस्कलयोर्भवेत्।
मायागर्भेशशक्त्यादेरन्तरज्ञानमान्तरम्।।
तदा मायापुंविवेकः सर्वकर्मक्षयाद् भवेत्।
विज्ञानाकलता मायाधस्तान्नो यात्यधः पुमान्।।"

(तं० आ० 9,184-185)

"कलापुंसोर्विवेके तु मायाधो नैव गच्छति।।"

(तदेव 9,187)

मायागर्भेशोऽनन्तो भगवान्। अन्तरज्ञानं परस्परं विवेकः, अन्तरस्य ज्ञानमिति।

पुरुषतत्त्वम् — मलेन सङ्कुचितं प्रमातृतत्त्वं हि पुरुषतत्त्वम्। अणुर्जीवः, पशुः, पुद्गलः, पुंस्तत्त्वमित्यादीन्यस्य नामान्तराणि। यथा—

"इदमेव च पंचविंशं पुंस्तत्त्वमित्युच्यते, यत् श्रीपूर्वशास्त्रेषु पुमानिति, अणुरिति, पुद्गलमिति चोक्तम्।"

(तं० आ० वि०, खं० 6, पृ०, 165)

~ जडाजडस्वरूपम्— **षट्कञ्चुकाविष्टा संवित् पुरुषः। स च संविद्रूपत्वेन प्रकाशात्माकञ्चुकाविष्टत्वेन जडात्मा। तेन जडाजडस्वरूपत्वं तस्य। असौ किञ्चिदेव जानाति किञ्चिदेव करोति। एतदस्य परिमितं चैतन्यम्। जडं शून्यादिकं संङ्कुचितं पदार्थमात्मत्वेन मनुते। एतदस्य जडत्वम्। यथा—**

"सोऽप्रकाशप्रकाशात्मा षट्कञ्चुकपरिष्कृतः।
किञ्चित्करोति जानाति तच्चेदं शक्तिमानिह।।"

(तं० व० धा० 3,13)

~ तद्विशेषता— **कालादिकञ्चुकैर्वेष्टिततत्त्वरूपा एव तस्य विशेषाः। यथा—**

"रागेणरञ्जितात्मासौ कालेन कलितः प्रिये।
नियत्या यमितो भूयः पुंभावेनोपबृंहितः।।
कलोद्वलितचैतन्यो विद्यादर्शितगोचरः।"

उद्धः — (ई० प्र० वि० वि०, खं० 2, पृ०, 289)

~ तत्सृष्टिक्रमः— **भगवाननन्तनाथः समकालमेव कलातत्त्वात् परिमितं भोक्तारं तस्य च भोग्यं तत्त्वं सृजति। भोक्ता च कञ्चुकपरिवेष्टितः परिमितोऽहमिति संवित्। स एव हि पुरुषतत्त्वम्। भोग्यं च सुखदुःखमोहसामान्याकारं मूलप्रकृतितत्त्वम्। यथा—**

"इति भोक्तृभोग्ययुगलस्य सममेव कलातत्त्वायत्ता सृष्टिः।"

(तं० सा०, पृ०, 83-84)

पुरुषत्रयम्— प्रथमः पुरुषो नरतत्त्वात्मक एव सर्वथाऽनहंरूपो जडः। मध्यमः पुरुषोऽहंरूपेण चैतन्येन समाच्छादितजडभावः शक्तितत्त्वस्थानीयः। उत्तमपुरुषश्चाहमिति चित्प्रधानतया शिवतत्त्वस्थानीयः। तदिदं पुरुषत्रयं नरशक्तिशिवात्मकत्वेन त्रिकरूपम्। परमेश्वरस्य त्रिकरूपत्वेन सकलमपि तस्मादुद्भूतं त्रिकात्मकमेव तेन तेन भिन्नभिन्नप्रकारेण। यथा—

"नरशक्तिशिवात्मकं हीदं सर्वं त्रिकरूपमेव। तत्र यत् केवलं स्वात्मन्यवस्थितं तत् केवलं जडरूपयोगि मुख्यतया नरात्मकम्, घटः तिष्ठतीतिवत्। एष एव प्रथमपुरुषविषयः शेषः, यत् पुनरिदमित्यपि भासमानम्। यदामन्त्र्यमाणतया आमन्त्रकाहम्भावसमाच्छादिततद्भिन्नेदं भावं युष्मच्छब्दव्यपदेश्यं तच्छाक्तं रूपम्। त्वं तिष्ठसीत्यत्र ह्येष एव युष्मच्छब्दार्थः, आमन्त्रणतत्त्वं च। तथाहि – 'यथाहं तिष्ठामि तथैवायमपीति' तस्याप्यस्मद्रूपावच्छिन्नाहम्भावचमत्कारस्वातन्त्र्यमविच्छिन्नाहम्भाव-चमत्कारेणैवाभिमन्वान आमन्त्रयते, यथार्थेन मध्यमपुरुषेण व्यपदिशति; सेयं हि भगवती परापरा। सर्वथा पुनरविच्छिन्नचमत्कार-निरपेक्षस्वातन्त्र्याहंविमर्शेऽहं तिष्ठामीति', पराभट्टारिकोदयो, यत्रोत्तमत्वं पुरुषस्य।"

(प० त्री० वि०, पृ०, 73,5)

पुरुषप्रतिबिम्बम् — सांख्या वदन्ति यद्बुद्धिः स्वच्छा सती पुरुषस्य प्रतिबिम्बं गृह्णाति। तेन च पौरुषस्य चैतन्यस्य प्रतिबिम्बेन चेतनायमाना सती चेतनवदेव ज्ञानक्रियादिव्यवहारान् करोतीति।

शैवदृष्टौ संविदेव पुरुषरूपतयाऽऽत्मानमवभासयन्ती बुद्धिमाविश्य तामपि चेतनायमानतया ज्ञानक्रियादौ प्रवर्तयति। ततो बुद्धौ पुरुषचैतन्यं समाविष्टं सद्व्यवहारकलापान् सम्पादयति। तदेवेन्द्रियाणि देहावयवांश्च तथा समाविशति यथा जडात्मकं तत् सर्वं व्यवहारे चेतनायते।

~ अकिञ्चित्करम् – **सांख्यप्रतिपादिते पुरुषप्रतिबिम्बग्रहणे कृतेऽपि बुद्धिर्जडैव, ततो न चेतनोचितकार्यकरणे क्षमा। प्रतिबिम्बमपि जडमेव। ततो न तद्बलेन ज्ञानक्रिये कलां विद्यां च विना सम्भवतः। ततः पुरुष-प्रकाश एव विषयप्रकाशको भवति विद्यया करणभूतया; न पुनर्बुद्धिस्तत्प्रकाशिका।**

यथा —

".....मैवं तत् प्रतिबिम्बनम्।।
जडमेव हि मुख्योऽथ पुंस्प्रकाशोऽस्य भासनम्।"

(तं० आ० 9,196-197)

"येनायं पुमान् इन्द्रियप्रणालिकया बुद्धौ प्रतिसंक्रान्तं सुखदुःखाद्यात्मकं विषयं विद्यया परस्परवैविक्त्येन जानाति।"

(तं० आ० वि०, खं० 6, पृ०, 156)

"चैतन्यप्रतिबिम्बयोगे यदि तावत् तत् प्रतिबिम्बकमपि मुख्यं प्रकाशरूपमेव न भवति, तेनापि न किञ्चित् कृतं स्यात्। न हि प्रतिबिम्बत्तवह्निपुञ्ज आदर्शो दाह्यं दहेत्।"

(ई० प्र० वि०, खं० 1, पृ०, 78)

पुर्यष्टकम् — (1) सूक्ष्मं शरीरं पुर्यष्टकम्। मुख्यमत्र मतद्वयम्। तद्यथा–प्राणादीनि पञ्च, बुद्धीन्द्रियवर्गः एकः, कर्मेन्द्रियगणः एकः, बुद्धिरेका इति 5+1+1+1 = 8 इत्यष्टकम्। अपरेषां मते तन्मात्राणि पञ्च, अन्तः-करणानि च त्रीणि 5+3 = 8 इत्यष्टकम्। यथा—

"प्राणश्च पुर्यष्टकशब्दवाच्यः, प्राणादिपञ्चकं बुद्धीन्द्रियवर्गः, कर्मेन्द्रियगणो निश्चयात्मिका च यतो धीर्व्यज्यते। तन्मात्रपञ्चकं, मनोऽहंबुद्धय इत्यन्ये।"

(ई० प्र० वि०, खं० 2, पृ०, 237)

(2) लिङ्गशरीरम्, तच्च प्राणादिपञ्चकं, अन्तःकरणं, बुद्धीन्द्रियवर्गः, कर्मेन्द्रियगणः इति 5+1+1+1 = 8 यथा—

"पुर्यष्टकशब्दवाच्यो यतोऽत्र प्राणादिपञ्चकमिन्द्रियवर्गौ द्वौ निश्चयात्मिका च तृतीया स्वीकृतान्तःकरणान्तरा धीर्व्यज्यते।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 334)

~ अपरमते— **तन्मात्रपञ्चकं, गुणत्रयं चेति पुर्यष्टकम्। यथा—**

"पुर्यां सूक्ष्मे शरीरे तन्मात्रपञ्चकं गुणत्रयम् इति स्थूलशरीरकारणभूतमष्टकम् यत् संनिविष्टं, तन्मुखं पुर्यष्टकम्।"

(स्पं० वि०, पृ०, 155-156)

~ अभिनवगुप्तमते— **प्राणनशक्त्या प्रेर्यः प्राणा-पानादिवर्गः, प्रेरकः इन्द्रियवर्गउभयाधिष्ठात्री च परिमिताऽहन्ता, देहात्मकयन्त्रवाहकमान्तरं च शक्तिपञ्चकम् इति 1+1+1+5 = 8 पुर्यष्टकम्। यथा—**

"इन्द्रियाणां सर्वेषां यः प्राणादिपञ्चकोत्थापकस्तद्द्वारेण नागादिविकारान्तरकारणत्वतो विकृताविकृतान्तरप्राणचक्रद्वारेण च रोमकूपपर्यन्तनाडीचक्रानुचक्रमयदेहमययन्त्रवाहक आन्तरः साधारणः शक्तिवर्गः पञ्चकः, स प्रेर्यं प्राणादिवर्गं प्रेरकं चेन्द्रियवर्गमधिष्ठात्रीं च शून्याहन्तामाक्षिप्य वर्तमानः पुर्यष्टकः इत्युक्तः।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 335)

"सा शून्येऽहन्ता प्राणादिप्रेरिकाक्षवृत्तिरूपा पुर्यष्टकात्मिकेति।

(तदेव, पृ०, 336)

~ द्विरूपम्—

"पुर्यष्टकस्य किल द्वे रूपे स्तः। एकं सूक्ष्ममंतिवाहिकाख्यं तन्मात्रमभिलापात्मकम्। द्वितीयं स्थूलं भौतिकं भोगाख्यम्।"

(स्पं० प्र०, पृ०, 52)

एतन्मतं शैवानां वा वैष्णवानां वेति विचारणीयम्। स्पन्द-प्रदीपिकाकारस्य मूलतो वैष्णवत्वात् पाञ्चरात्रमार्गगामित्वाच्चेति, स्पन्दकारिकायाः पुनः शैवशास्त्रत्वात्।

~ स्पन्दे— **केचनाचार्यास्तन्मात्रपञ्चकमन्तःकरणत्रयं च पुर्यष्टकमाहुः। परिभाषाभेदोऽयं सर्वो न सिद्धान्तभेदः। यथा—**

"यतस्तन्मात्रपञ्चकमन्तःकरणं चेति केचन पुर्यष्टकमाहुः स्पर्शतन्मात्रेण प्राणादिस्वीकारात्। तत एवात्र पक्षवैचित्र्ये वस्तुनो न वैचित्र्यमिति।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 336)

"तन्मात्रोदयरूपेण मनोऽहंबुद्धिवर्तिना
पुर्यष्टकेन संरुद्धः .....।"

(स्पन्द० का०, 49)

पुष्पदन्तः— कोऽप्याचार्यविशेषः। यथा—

"यथाह भगवान् पुष्पदन्तः–
'रश्रुतिसामान्याद्वा सिद्धम्' इति।"

(प० त्री० वि०, पृ०, 173)

सम्भवतो महिम्नस्तोत्रकाराद् भिन्नः। यतस्तान्त्रिकोऽयं गुरुर्न पौराणिकः।

पुष्पपातः — न स्पष्टीकृतमिदं पदं मूले नापि विवेके। यथा–

"साधकस्य बुभुक्षोस्तु साधकीभाविनोऽपि वा।
पुष्पपातवशात्सिद्धो मन्त्रोऽर्प्यः साध्यसिद्धये।।"

(तं० आ० 26,18)

एवं प्रतीयते यद्दीक्षाविशेषविधौ गुरोः हस्तात् शिष्यशरीरेऽनायासमेव चेत् स्वत एव पुष्पं पतेत् तदा शिष्यो मन्त्रदीक्षायोग्यं पात्रमिति परीक्ष्यते पुष्पपातविधिनेति।

पुस्तकाधीतमन्त्राः — केनापि गुरुणाऽदत्ता, स्वयमेव पुस्तकादुद्धृताः मन्त्राः।

~ निर्वीयाः — **स्वयमेव पुस्तकादुद्धृतेषु मन्त्रेषु नैव**

भुक्तिमुक्तिफलदं वीर्यं भवति प्रायशः। यथा—

"यद्वक्ष्यति—

'लिपिस्थितस्तु यो मन्त्रो निर्वीर्यः सोऽत्र कल्पितः।
संकेतबलतो नास्य पुस्तकात्प्रथते महः।।"

(तं० आ० वि०, खं० 3, पृ०, 72)

~ सवीर्या (कदाचित्) – **शास्त्राभ्यासिन उपासकाः कदाचिदन्यप्रसङ्गेन केनापि मन्त्रवीर्यज्ञानं लभन्ते। तेषां कृते पुस्तकाधीतमन्त्रा अपि वीर्यवन्तः। यथा—**

"ये तु पुस्तकलब्धेऽपि मन्त्रे वीर्यं प्रजानते।
ते भैरवीयसंस्काराः प्रोक्ताः सांसिद्धिका इति।"

उद्धः — (तं० आ० वि०, खं० 3, पृ०, 73)

पुस्तम्— लेपादिनिर्मिता देवताकृतिः।

"पुस्तं लेपादिनिर्मिताऽऽकृतिः।"

(तं० आ० वि०, खं० 4/1, पृ०, 3)

अस्मन्मते पत्रादौ लिखितं किमपि यन्त्रं वा, मन्त्रो वा, देवताकृतिरपि वेति, पुस्तपदस्य पत्रभूर्जादिवाचकत्वात्।

पूजनम् — सर्वं प्रमेयजातं स्वात्मतया विमृशन् योगी स्वात्मसंविदात्मकाय परमेश्वराय देवाय तत् सर्वं तथा विमर्शनेनैव यत् समर्पयति तत् तत्कृतं पूजनम्। यथा—

"तत्र च परमात्ममहाभैरवशिवदेवतां स्वशक्तियुताम्।
आत्मामर्शनविमलद्रव्यैः परिपूजयन्नास्ते।।"

(प० सा०, 75)

~ तद्विधिः — उक्तो यथा—

"पूजकः परतत्त्वात्मा पूज्यं तत्त्वं परापरम्।
सृष्टत्वादपरं तत्त्वजालमासनतास्पदम्।।"

(तं० आ० 15,318)

पूजा— शैव्युपासना।

~ अनायासा— **ध्यानाद्यायासेन विनैवैवमेव सर्वत्र स्वात्मशिवभावदर्शनम्। यथा —**

"ध्यानायासतिरस्कारसिद्धस्त्वत्स्पर्शनोत्सवः।
पूजाविधिरिति ख्यातो भक्तानां स सदास्तु मे।"

(शि० स्तो० 17,4)

~ अभेदभावनामयी— **अभेदभावनैव परा पूजा। अभेदभावनोद्भावनार्थमेव हि न्यासादिक्रियाः। यथा—**

"यष्टृयाज्यतदाधारकरणादानसम्प्रदाः।
न्यासक्रमेण शिवता-तादात्म्यमधिशेरते।।"

(तं० आ० 15,159)

~ आलम्बनभेदतः — **काम्यकर्मफलानां बहुविधत्वात् पूजालम्बनान्यपि बहुविधानि। यथा शान्तिप्रयोजनानां कर्मणामालम्बनानि शान्तस्वभावानि, शत्रुसंहारादिप्रयोजनानां चास्त्राणि देवानामिति। यथा—**

"यथाप्सु शान्तये मन्त्रास्तद्वदस्त्रादिषु ध्रुवम्।
शत्रुच्छेदादिकर्तारः काम्योऽतः सङ्करोज्झितः।।"

(तं० आ० 27,47)

~ आलम्बनानि (कौले)— **परिगणितानि कानिचित्। यथा—**

"श्रीभैरवकुलेऽप्युक्तं कुलपर्वप्रपूजने।
स्थण्डिलेऽग्नौ पटे लिङ्गे पात्रे पद्मेऽथ मण्डले।।
मूर्तौ घटेऽस्त्रसंघाते घटे (तूरे) सूत्रेऽथ पूजयेत्।
स्वेनस्वेनोपचारेण सङ्घ वर्जयेदिति।।"

(तं० आ० 27,45-46)

'घटे' इति पदं न द्विवारं प्रयोगमर्हति। तत एव द्वितीये स्थाने 'तूरे' इति स्याच्छुद्धः पाठः।

~ उपकरणानि (कौले)— **(1) आनन्दोद्बोधकानि द्रव्याणि मद्यादीनि। यथा—**

"नन्दहेतुफलैर्द्रव्यैरर्घपात्रं प्रपूरयेत्।"

(तं० आ० 29,22)

~ त्रिके—**(1) संविदः परमानन्दस्वभावत्वेन संविद्रूपस्वात्मशिवसाक्षात्कारार्थमानन्दोद्बोधकान्येव पूजोपकरणानि शस्तानि, सद्य आनन्दभूमिकाप्रवेशकत्वात्तेषाम्। यथा—**

"चितः स्वातन्त्र्यसारत्वात् तस्यानन्दघनत्वतः।"

(तं० आ० 26,60-61)

(2) हृदये आनन्दविकासप्रदं यद्यत्तत्तदेव पूजासाधनं प्रशस्तम्। यथा—

"यद्यदेवास्य मनसि विकासित्वं प्रयच्छति।।
तेनैव कुर्यात् पूजां स इति शम्भोर्विनिश्चयः।"

(तं० आ० 26,54-55)

'यत्किंचिन्मानसाह्लादि यत्र क्वापीन्द्रियस्थितौ।।
योज्यते ब्रह्मसद्धाम्नि पूजोपकरणं हि तत्।"

(तं० आ० 4,120-121)

~ तत्तत्त्वं— सारभूतम्– **समस्तस्यापि कारकव्रातस्य शिवमयीभावापादनं हि पूजादिक्रियाया आन्तरं सारभूतं तत्त्वम्। यथा—**

"तदेवं तन्मयीभावदायिन्यर्चाक्रिया यतः।।
समस्तकारकैकात्म्यं तेनास्याः परमं वपुः।।"

(तं० आ० 15,157)

~ तद्विधिः— **(1) शिवरसेन तर्पितसकलशरीराङ्गो योगी बाह्यालम्बनानि साक्षाद्भैरवत्वेन पश्यति। यथा—**

"तथा पूर्णस्वरश्म्योघः प्रोच्छलद्वृत्तितावशात्।
बहिस्तादृशमात्मानं दिदृक्षुर्बहिरर्चयेत्।।"

(तं० आ० 29,24)

"विकसितेन्द्रियवृत्तिर्बहिरपि पूर्णमेवात्मानं दिदृक्षुर्बहीरूपतयापि बिम्बप्रतिबिम्बन्यायेन परैव संविदवभासत इत्यनुसन्धत्ते।"

(तं० आ० वि०, खं० 11/2, पृ०, 21)

(2) अष्टानां पूज्यानां पूजनम्। समयदीक्षायां समयविशेषः। यथा—

"गुरुं शास्त्रं देववह्नी ज्ञानवृद्धांस्त्रियो व्रतम्।।
गुरुवर्गं यथाशक्त्या पूजयेदष्टकं त्विदम्।"
उद्ध० — 'देवी यामलात्'

(तं० आ० 15,526-527)

~ परा— भावौघस्य चिदेकीकार एव वास्तविकी परा च शैवी पूजा। यथा—

"पूजा नाम विभिन्नस्य भावौघस्यापि संगतिः।।
स्वतन्त्रविमलानन्तभैरवीयचिदात्मना।।

(तं० आ० 4,121-122)

"तव च काचन न स्तुतिरम्बिके सकलशब्दमयी किल ते तनुः।
सकलमूर्त्तिषु मे भवदन्वयो मनसिजासु बहिः प्रसरासु च।।
इति विचिन्त्य शिवे शमिताशिवे जगति जातमयत्नवशादिदम्।
स्तुतिजयार्चनचिन्तनवर्जिता न खलु काचन कालकलास्ति मे।।"
उद्ध०— 'शिवशक्त्यविनाभावस्तोत्रात्'

(भ० गी० सं०, पृ०, 156)

~ शाक्तोपाये — (1) पूजनान्मम तुष्टिर्नास्ति, अपूजनान्मम खेदो नास्ति, सर्वे पूजका मद्रूपा एव; अतः मे पूजा सदैव प्रचलतीति विमर्शनमेव शाक्तोपायमयी पूजा। यथा—

"पूजनान्नास्ति मे तुष्टिर्नास्ति खेदो ह्यपूजनात्।
पूजकैरविभेदेन सदापूजेति पूजनम्।।"

(शि० दृ० 7,92-93)

(2) पूजक-पूजन-पूज्यान् सर्वानपि शिवरूपतया पश्यतः शिवयोगिनः बाह्यसाधननिष्ठां लिङ्गपूजामारभ्यान्तः पूजामयीं भगवत् सदाशिवपूजां यावत् सर्वत्र स्वात्मशिवस्यैव पूजां क्रियमाणां विमृशतः तथाभूतः पूजाविमर्श एव पूजा भवति। यथा—

"अत्राकारे च मे पूजा या स्यात् सादाशिवात्मनि।।
लिङ्गादिके पूजितोऽस्मि सदा पूजेति वा स्थिता।
पूजकः पूजनं पूज्यमिति सर्वं शिवः स्थितः।।
किमेतेनात्मभावेन तृप्त्या वा परपूजनम्।"

(शि० दृ० 7,93-95)

~ शाम्भवोपाये— निर्विकल्पे संविदात्मके परे शिव-शून्ये एव चित्तस्य स्थिरतया स्थापनं, तत्रैव तस्य स्वस्य च लयीकरणं पूजनं शाम्भवयोगोचितम्। यथा—

"पूजा नाम न पुष्पाद्यैर्या मतिः क्रियते दृढा।
निर्विकल्पे परे व्योम्नि सा पूजा ह्यादराल्लयः।।

(वि० भै०, 147)

~ साधनविशेषतः — विमर्शसौरभपरिमण्डितैश्चित्त-चषकार्पितैर्वेद्यकुसुमैरसावेव स्वात्मपरमशिवः करणदेवीचक्र सहितः तर्पणीयोऽर्चनीयः। यथा—

"सो तंत्थ अच्चणिज्जो विमरिसपुष्पाहिवाससुरहीहिं।
चित्तचसअअपिहिं वेज्ज सुहावीरपाणबत्थूहिं।।

(म० म०-35)

स तत्रार्चनीयो विमर्शपुष्पाधिवाससुरभिभिः।
चित्तचषकार्पितैर्वेद्यसुधावीरपानवस्तुभिः।।

(म० मं० 35, पृ०, 81)

पूजारहस्यम्— किमपि शैवशास्त्रपुस्तकम्।

द्र०— (म० मं० प०, पृ०, 40)

पूज्यपंक्तिः —~ कौले (क) कौलमार्गप्रर्वतकाश्चत्वारो गुरवो यैश्चतुर्षु युगेष्वस्य साधनाक्रमस्य प्रवर्तनमभिनवतया कृतम्। ते च कृतादियुगक्रमेण—

1. खगेन्द्रनाथः, 2. कूर्मनाथः, 3. मेषनाथः 4. मत्स्येन्द्रनाथश्चेति।

(ख) तेषां चतस्रः शक्तयः क्रमेणः– 1. विज्जाम्बा 2. मङ्गलाम्बा 3. काममङ्गलाम्बा, 4. कुङ्कुणाम्बा चेति।

(ग) तत्र खगेन्द्रनाथस्य पुत्रौः 1. वक्तष्टिः 2. विमलः। तयोः शक्ती च० 1. इल्लाई अम्बा 2. मेखलाम्बा चेति।

कूर्मनाथस्य पुत्रौः 1. जैत्रः 2. अविजितः इति,

तयोः शक्ती क्रमेणः 1. इल्लाईअम्बा 2. आनन्दमेखला चेति। मेषनाथस्य सुतौः 1. विन्ध्यः 2. अजितः इति। तयो शक्ती क्रमेणः —1 कुल्लाई अम्बा 2. अजराम्बा (अजरमेखलापरपर्याया) चेति। मच्छन्दस्य (मत्स्येन्द्रस्य) पुनः षट् पुत्राः। ते चः 1. अमरः 2. वरदेवः 3. चित्रः 4. अलिः 5. विन्ध्यो 6. गुडिकानाथश्चेति (संशयितमिवैतन्नामविश्लेषणम्) तेषां षट् शक्तयस्तु स्पष्टम्ः 1. सिल्लाई, 2. एरुणा, 3. कुमारी, 4. बोधाई, 5. महालच्छी 6. अपरमेखला चेति।

सर्व एवैते सिद्धा एताश्चयोगिन्यः पूज्यपंक्तौ गण्यन्ते यथा—

" खगेन्द्रः सहविज्जाम्ब इल्लाई अम्बया सह।।
वक्तष्टिर्विमलोऽनन्तमेखलाम्बायुतः पुरा।
शक्त्या मङ्गलया कूर्म, इल्लाई-अम्बया सह।।
जैत्रो याम्ये ह्यविजितस्तथा सानन्दमेखलः।
काममङ्गलया मेषः कुल्लाईअम्बया सह।
विन्ध्योऽजितोऽप्यजरया सह मेखलया परे।
मच्छन्दः कुङ्कुणाम्बा च षड्युग्मं साधिकारकम्।।
सौम्ये मरुत्त ईशान्तं द्वितीया पंक्तिरीदृशी।
अमरवरदेवचित्रालिविन्ध्यगुडिका इति क्रमाषडमी।।
सिल्लाई एरुणया तथा कुमारी च बोधाई।
समहालच्छी चापरमेखलया शक्तयः षडिमाः।।"

(तं० आ० 29,29-34)

अत्र "इल्लाई" इति नाम शक्तिद्वयस्योक्तम्।

पूतना— लोकपालमन्त्रः प्रथमः। न स्पष्टीकृतो जयरथेन।

द्र०— 'दिक्पालमन्त्रः' इति।

पूरणम्– साधकोऽवभातमर्थं कंचित् कालं स्वात्मनि स्थापयति। तस्य तथा स्थापनमेव पूरणम्। यथा—

"पूरयेत्– तथात्वेनैव कञ्चित्कालं स्थापयेत्।"

(तं० आ० वि०, खं० 3, पृ०, 368)

पूर्णः — सर्वथापि परितः पूर्णोऽष्टात्रिंशत्तत्त्वात्मकः परमशिवः। यथा—

"एवं चैष प्रकाशात्मा सप्तत्रिंशात्मकात् परः।"

(मा० वि० वा० 1,99)

यद्यपि सप्तत्रिंश एव पूर्णस्तथापि शिष्योपदेशावसरे तत्साक्षित्वेनाष्टात्रिंशस्य कल्पना। अष्टात्रिंशस्योपदेशे सप्तत्रिंश एव साक्षी। उभयोरेकस्वभावत्वात्। यथा—

"सर्वावच्छेदशून्यं शिवतत्त्वं षट्त्रिंशम्। तद्यदोपदिश्यते भाव्यते वा यत् तत्प्रतिष्ठापदम्, तत् सप्तत्रिंशम्, तस्मिन्नपि भाव्यमानेऽष्टात्रिंशम्, न चानवस्था तस्यभाव्यमानस्यानवच्छिन्नस्वातन्त्र्ययोगिनो वेद्यीकरणे सप्तत्रिंश एव पर्यवसानात्। षट्त्रिंशं तु सर्वतत्त्वोत्तीर्णतया सम्भाव्यावच्छेदम्।"

(तं० सा०, 111)

न च सप्तत्रिंशाष्टत्रिंशयोः परस्परमवच्छेदः सम्भावयितुमपि शक्या इति तयोरविशेषः परस्परं, न च तथा षट्त्रिंशसप्तत्रिंशयोरिति तात्पर्यमत्र।

~ अवस्थाभेदतः — परिपूर्णे परिशिवे तु क्रियाशक्त्यावेशो जाग्रद्दशा, ज्ञानशक्तिस्फारो स्वप्नः, इच्छाशक्तिपरता सुषुप्तिरानन्दोद्रेकस्तुर्या चिद्रूपता च तुर्यातीतम्। यथा—

"एकत्रापि प्रभौ पूर्णे चित्तुर्यातीतमुच्यते।
आनन्दस्तुर्यमिच्छैव बीजभूमिः सुषुप्तता।।
ज्ञानं तु स्वप्नवृत्तित्वं क्रिया जाग्रदिति स्मृता।"

(मा० वि० वा०, 1009-1010)

पूर्णकर्तृता— सर्वत्र यदपि कर्तृत्वमाभासते तद्विषये स्वेच्छया चालकत्वेन स्थितस्य सर्वकर्तुः परमेश्वरस्य सर्वकर्तृता परमेश्वरता। यथा—

"तस्माद् वस्तुत ईश्वर एव सर्वत्र कर्ता, अहं च स एवेति न परिमिते कर्ता अपि तु सर्वत्र कर्ता इत्येतावति सर्वथा हृदयेनावधातव्यम्।"

(ई० प्र० वि०, खं० 2, पृ०, 149-150)

पूर्णकर्तृत्वम्— परमेश्वरस्य तत् स्वातन्त्र्यं सततपरिस्फुरद्रूपत्वं च यद्वशादापेक्षिकयोः परिमितयोश्च कर्तृत्वाकर्तृत्वयोरवभासो भवति तस्य लीलाविलासतोऽत्र जगदाभासक्रीडायाम्। यथा—

"यस्य कल्पनया भातः कर्तृताऽकर्तृते उभे।
निराबाधा कल्पकस्य न सा किं पूर्णकर्तृता।।"

(आ० वि० 6,18)

पूर्णकृशा— (1) एकैव भगवती पराशक्तिर्ज्ञानरूपतोद्रेकतो विश्वं स्वात्मनि संहरन्ती सती कृशेत्युच्यते क्रियारूपतोद्रेकतश्च विश्वं बहिर्वमन्ती सती पूर्णेति भण्यते। यथा—

"अन्तःशून्यो बहिरपि घटः शून्य एवाम्बरान्तः।
अन्तःपूर्णो बहिरपि तथा पूर्ण एवार्णवेऽस्ति।
एवं मातः त्वमसि सततं शून्यपूर्णस्वभावा।
तत्त्वोत्तीर्णाऽप्यहमनुभवा तत्त्वरूपा त्वमेव।।"

(मं० स्तो, 65)

द्र०: — 'कृशादेवी' इति।

(2) सैव पराशक्तिर्विश्वोत्तीर्णताविचारेण कृशासुसूक्ष्मतमसंविन्मात्रशरीरा, विश्वात्मताविचारेण च पूर्णानन्तब्रह्माण्डकदम्बकशरीरा समुपास्यते, भाव्यते, दृश्यते च सिद्धैरिति।

द्र०: — 'पूर्णा' – शाक्तपरिभाषया इति

द्र०: — 'कृशा' – देवी इति।

पूर्णकृशौ— अपानचन्द्रः = पूर्णः, प्राणसूर्यः = कृशः। यथा—

"आयातनिद्रः शिष्योऽसौ निर्मलौ शशिभास्करौ।।
हृच्चक्रे प्रतिसंधत्ते बलात्पूर्णकृशात्मकौ।

(तं० आ० 15,478-479)

पूर्णज्ञानी— सर्वथापि सर्वं जानानः सर्वं च कर्तुं समर्थः परिपूर्णज्ञानविज्ञानवान् गुरुः। यथा—

~ दुर्लभः —

"धन्यस्तु पूर्णविज्ञानं ज्ञानार्थी लभते गुरुम्।"

(तं० आ० 13,342)

पूर्णचन्द्रः —

द्र०: — 'पूर्णेन्दुः' इति।

पूर्णताप्रत्यभिज्ञा— आचार्यरामेश्वरझा-विनिर्मितोऽभिनवोऽद्वैतशैवदर्शनग्रन्थः कारिकाबद्धः। तन्त्रालोकाद्यनुसारं विरचितोऽयं ग्रन्थः। मूलमात्ररूपेण सानुवादेन च रूपेण संस्करणद्वयमस्य मुद्रितं वर्तते।

पूर्णनैर्मल्यम्— परस्य तत्त्वस्य तत् पूर्णं स्वाभाविकं स्वतन्त्रं च नैर्मल्यं यद्वशाद् यदन्तरेवापेक्षिकाणां मलानां परिमितानां च नैर्मल्यानामाभासो भवति पारमेश्वरस्वभावभूतलीलाविलासाङ्गतया। यथा—

"मालिन्यमन्यथा ज्ञानं संसारोल्लासकारणम्।
ज्ञानं यथार्थं नैर्मल्यं संसारोच्छेदकारणम्।।
उभाभ्यामप्यतीतं यत् पूर्णं नैर्मल्यमेव तु।
स्वात्माऽभिन्नं महाविद्यास्वरूपं तद्विराजते।।"

(आ० वि० 5,21-22)

पूर्णस्वातन्त्र्यम्: — परमेश्वरस्य तत् परमेश्वरत्वं यद्वशाज्जगल्लीलाविलासेऽत्रासावापेक्षिकं स्वातन्त्र्यं तदपेक्षं च पारतन्त्र्यमाभासयन् निजस्य पारमैश्वर्यस्यानन्दचमत्कारं सततं रसयन्नास्ते। यथा—

"आब्रह्मस्तम्बपर्यन्तं यद्विलासवशानुगम्।
स्वप्रकाशः स भगवान् स्वतन्त्रः परमार्थतः।।"
(आ० वि० 3,3)

"स्वतन्त्रतैव शिवता जीवता परतन्त्रता।
शिवः पशुपतिः प्रोक्तो जीवः पशुरितीर्यते।।"
(तदेव 3,5)

पूर्णाः — ~ख्यातिः —

द्र०— **'ख्याति':** — पूर्णा इति।

~ देवी— (1) इकारेण ईकारेण च द्योत्या पूर्णा सोमरूपा इच्छात्मिका पारमेश्वरी शक्तिः। अस्यामिच्छायामन्तरेवेष्टव्यं सर्वं सर्वथाऽभेदेनास्ते। इयमेव सहोमया वर्तत इति सोमरूपेति गीयते। सोमात्मिकाऽसाविच्छाशक्तिः। यत इच्छायामेषणीयमन्तर्भूतमिति सा पूर्णा प्रमेयपूरितेति। यथा—

"प्रथमा स्वरूपपरिपूरणारूपत्वात् पूर्णा चान्द्रमसीशक्त्यव्यतिरेकाच्च सहोमया वर्तत इति सोमरूपा स्वानन्दविश्रान्तिभावा इच्छाख्या कलना महासृष्टिव्यपदेश्या, यद्वक्ष्यते– "तत्र सृष्टिं यजेदिति"।
(प० त्री० वि०, पृ०, 169)

(2) विश्वमात्मनि संहरन्ती तेन पूरितेव भान्ती पराशक्तिः पूर्णेति भाव्यते। यथा—

"एषैव (शक्तिः) विश्वगतसृष्टिसंहारोपचारात् कृशपूर्णोभयरूपापि एकैव सर्वरहस्यनयेषु गीयते।"
(प० सा० वि०, पृ०, 42)

भावनाप्रकारभेदमाश्रित्य द्विप्रकारतयाऽस्याः परिभाषायाः प्रयोगः कृतो गुरुभिरित्यनुमातुं शक्यतेऽनेन योगराजकृतेन व्याख्यानेनेति वेद्यम्। यतोऽभिनवगुप्तमहोदयैरन्यथा निरूपितोऽयं विषयः।

~शाक्तपरिभाषया— महानयप्रकाशे कृशाया शक्तेर्यद् व्याख्यानं तद्विपरीतं पूर्णाया इति तर्क्यते सुधीभिः। तदनुसारं पराशक्तेर्यद् विश्वात्मकत्वं तदेवास्याः विश्वपूर्णत्वम्। उभयथा रिक्तपूर्णत्वाभ्यां भाव्यतेऽसौ साधकैः। यथा

द्र० — **'कृशा'** ~ देवी इति।

कविराजश्रीगोपीनाथमहाभागा अपि शक्तिं विश्वोत्तीर्णसंविन्मात्ररूपतायां कृशां विश्वाकारप्रतिबिम्बधारणेन च तामेव विश्वात्मिकां सतीं पूर्णां कथयन्ति।

द्र०— (तां० वा० - शा० दृ० उपो०, पृ०, 6)

तत्र तैः प्रमाणवाक्यमपि कुतश्चिदुद्धृत्य प्रदत्तम्। यथा—

"सृष्टिस्थितिसंहारमेलनरूपेयं तुरीया संविद्भट्टारिका तत्तत्सृष्ट्यादिभेदानुद्वमन्ती संहरन्ती च सदा पूर्णा च कृशा चोभयरूपा चानुभयरूपा चाक्रममेव स्फुरन्ती स्थिता।"
(तदेव, पृ०, 6)

पूर्णाशक्तिः —

द्र०— **'सृष्टिः'** — ~ 'तद्रूपा शक्तिः' इति।

पूर्णेन्दुः– वर्तुलाकारा रेखा मण्डलविधौ।

पूर्णेश्वरप्रत्यभिज्ञा — वृत्तिसहिता विवृत्तियुता चेश्वर प्रत्यभिज्ञा पूर्णेति निर्दिष्टा गुरुणा। ततोऽनुमीयते यद् वृत्तिं विवृत्तिञ्चापि गुरवः ईश्वरप्रत्यभिज्ञाङ्गतया गणयन्ति स्म। अत एव शिवदृष्टिवृत्तौ विवृत्तिमेवोद्दिश्य बहुधा निर्दिष्टमुत्पलदेवपादैः "उक्तमेतदीश्वरप्रत्यभिज्ञायमिति"। तथा च विवृत्तिविमर्शिन्यामाचार्याभिनवगुप्तोक्तिः। यथा :—

"जगति विहितबोधामीश्वरप्रत्यभिज्ञां
व्यवृणुत परिपूर्णां प्रेरितः शम्भुपादैः।। इति"
(ई० प्र० वि० वि०, खं० 3, पृ०, 407)

पूर्वपक्षः — ~शैवदर्शने – बौद्धदर्शनमेव विशेषतः पूर्वपक्षतया गृहीतं शैवशास्त्रे। चार्वाकमतं तु नैव दर्शनम्। न्यायसांख्यवेदान्तादिदर्शनान्यात्मसत्तामङ्गीकुर्वन्ति, ततः समानतन्त्राणी वेति स्वपक्षान्येव। केवलं बौद्धदर्शनमेव दर्शनं सदप्यात्मसत्तानिषेधकम्। ततस्तदेव प्राधान्येन न पूर्वपक्षतया गृहीतम्। यथा—

(1) "लोकायतिकाः स्वपक्षस्थापनाविहीनाः.....सौगता एव हि पूर्वपक्षवादिनः। ये ह्यात्मानमुपयन्ति अनेकमीश्वरं च एकं वा छन्नैश्वर्यं, ते तावन्न अत्यन्ताय इह दूरं स्फुटिताः।"
(ई० प्र० वि० वि०, खं० 1, पृ०, 112)

एकं वा छन्नैश्वर्यमिति वेदान्तिनः प्रति निर्देशः। न ते पूर्वपक्षतयात्र प्रस्तुता इति तात्पर्यम्।

पूर्वपञ्चिका — मालिन्याः पूर्वभागमधिकृत्य विरचितः कश्चन ग्रन्थोऽभिनवगुप्ताचार्यस्य योऽद्यत्वे नैव क्वापि लभ्यः। यथा—

"तदेतच्छ्रीपूर्वपञ्चिकायां मयैव विस्तरतो निर्णीतम्।"
(प० त्री० वि०, पृ०, 24)

"निर्णीतं चैतन्मयैव श्रीपूर्वपञ्चिकायाम्।"
(तदेव, पृ०, 57)

निर्णीतं च मयैव श्रीपूर्वप्रभृतिपञ्चिकासु।"
(तदेव, पृ०, 146)

चरमेण वाक्येन ज्ञायते यत् पञ्चकेति नाम्ना कतिपयव्याख्याग्रन्थाः निर्मिता आचार्यवर्येणेति; न च तेषां मध्ये कोऽपि लभ्यत इदानीम्।

पूर्ववार्तिकम् — कोऽपि दर्शनग्रन्थः। यथा—

"तदुक्तं श्री भगवता कात्येन श्री पूर्ववार्त्तिके सिद्धे व्याप्तृत्वे भेदविरोधात् तदभेदो विश्वस्य।" इति।
(ने० तं० उ०, खं० 2, पृ०, 274)

पृथिव्यण्डम् — (1) **कालाग्निरुद्रलोकादारभ्य नरकादिलोकानां भूर्भुवस्वरादिलोकानाञ्च समूहो ब्रह्मलोकपर्यन्तो मूर्त्तिवैचित्र्यमयोध्वा सकलोऽपि पृथ्वीतत्त्वम्। तदेव हि पृथिव्यण्डम् यथा–**

"तत्र, पृथ्वीतत्त्वं शतकोटिप्रविस्तीर्णं ब्रह्माण्डगोलकरूपम्।"

(तं० सा०, पृ०, 64)

(2) स्थूलस्य प्रपञ्चस्य शरीर-करणाधिष्ठान-भोग्यवस्तुजात-पार्थिवग्रहनक्षत्रादिप्रमेयात्मकस्य कोशात्मकमण्डं पार्थिवम्। तच्च ब्रह्मदेवेनाधिष्ठितम्। यथा—

"मनुष्यस्थावरान्तानां प्रमातॄणां प्रतिप्रकाररूपतया स्थूलकञ्चुकमयी बन्धयित्रीति कृत्वा पृथ्व्यण्डमित्युच्यते। तत्रापि चतुर्दशविधे भूतसर्गे प्रधानतया अण्डाधिपो भगवान् ब्रह्मेति।" यथा—

(प० सा० वि०, पृ०, 11-12)

"ब्रह्मैव चतुर्दशप्रकारकप्राणिवर्गशरीरादिस्रष्टा यतः।"

पृथ्वी– ~ बीजम्– लकारः

"पृथ्वी ल इति।"

(तं० आ० वि०, खं० 12, पृ०, 178)

पृथ्वीतत्त्वम् — ~ परिमाणतः — **कालाग्निरुद्र-पुराद्वीरभद्रपुरं यावद् यद्धृतिकाठिन्यादिमदनुगतं वस्तु तत् पृथ्वीतत्त्वम्। यथा—**

"तथाहि कालसदनाद्वीरभद्रपुरान्तगम्।
धृतिकाठिन्यगरिमाद्यवभासाद्धरात्मता।।"

(तं० आ० 9,3)

पृथ्वीधरः — **भुवनेश्वरीस्तोत्रस्य निर्माता। स च शाङ्करपरम्परायां प्रकटीभूतात् पृथ्वीधरादन्यः। यतः शाङ्करशाखीयः पृथ्वीधरोऽति पुरातनः। अयं पुनरेकादशशताब्दीकः; यतोऽयं स्वात्मानं श्री सिद्धनाथापरपर्यायस्य-श्री शम्भुनाथस्य शिष्यं व्यनक्ति। यथा—**

"श्री शम्भुनाथ करुणाकर सिद्धनाथ।
श्री सिद्धनाथ करुणाकर शम्भुनाथ।"

(भु० स्तो०, 40)

द्र०: — 'शम्भुनाथः' इति।

द्र०: — सिद्धनाथः।

पौत्रिकीः — ~ **दीक्षा**— **तीव्रानुग्रहप्रधाना चर्यासंहृता दीक्षा, यया सत्वरं ज्ञानयोगाद्यभ्यासं विनैव शिष्यस्य शिवभावसाक्षात्कारः। यथा—**

"गुरुणानुग्रहधिया शिष्ये यदवलोकनम्।
पौत्रिकी सा पुनश्चर्यामात्रेण प्रायणे यया।।
परं शिवत्वमभ्येति विनापि ज्ञानयोगतः।
सा च क्रमात्क्रमं शिष्यचितेः शिवनियोजनम्।।"

(तं० व० धा० 3,23-24)

पौरुषं ज्ञानम्— **निर्विकल्पः स्वात्मसाक्षात्कारनिष्ठः स्वस्वरूपस्वस्वभावविमर्शः।**

द्र०: — **'ज्ञानम्'** — ~ 'पौरुषम्' इति।

~ तत् स्फुटता — **यद्यपि पौरुषमज्ञानं दीक्षादिना निर्मूलतामापद्यते तथापि यत् संस्कारो देहावसानपर्य्यन्तं तिष्ठति। पतित एव प्रारब्धदेहे तज्ज्ञानं स्फुटतयाभिव्यक्तं भवति, न ततः प्राक्। यथा—**

"तथापि तच्छरीरान्ते तज्ज्ञानं व्यज्यते स्फुटम्।"

(तं० आ० 1,43)

~ तत्फलम्— **पौरुषेण ज्ञानेन मलप्रक्षालनं भवति बौद्धेन च जीवन्मुक्तिलाभः। यथा—**

"पौरुषे पुनरज्ञाने दीक्षादिना निवृत्ते सति यदि बौद्धज्ञानमुदियात् तदा तस्य वक्ष्यमाणनीत्या जीवन्मुक्तिं प्रत्यपि कारणत्वं भवेत्।"

(तं० आ० वि०, खं० 1, पृ०, 57)

पौरुषबौद्धेः — ~ अज्ञाने – **आणवमलावृतत्वं पौरुषमज्ञानम्; तदनुसारमुदयन्नशुद्धः स्वात्मविमर्शो बौद्धमज्ञानम्।**

द्र० — 'अज्ञानम्' ~ **'पौरुषम्'** इति

'अज्ञानम्': — ~ **'बौद्धम्'** इति च।

~ ज्ञाने – **गुरुकृतादनुग्रहान्मलत्रये प्रक्षालिते सति यन्निर्विकल्पकं स्वात्मज्ञानं समुदेति स्वयमेव तत् पौरुषम्। पौरुषज्ञानानुसारं यः प्रमातुर्बुद्धौ विकल्पात्मकः यथार्थः स्वात्मविमर्शः प्रसरति तद्बौद्धं ज्ञानम्।**

द्र०: — **'ज्ञानम्'** ~ **'पौरुषम्'** इति।

'ज्ञानम्' — **'बौद्धम्'** इति च।

~ **पोष्टृ**-पोष्ये (परस्परम्) **अपूर्णतायां बौद्धेन ज्ञानेन पौरुषस्य ज्ञानस्य वृद्धिः, पौरुषेण च बौद्धस्येति परस्परमनयोः परिपोषकत्वम्। यथा—**

"तद्बौद्धं यस्य तत्पौंस्नं प्राग्वत्पोष्यं च पोष्टृ च।"

(तं० आ० 1,42)

एवमेव बौद्धेनाज्ञानेन पौरुषस्य तेन च बौद्धस्य तस्य परिपुष्टिः। यथा—

".....तस्य तत् पौंस्नं पोषणीयं च पोष्टृ च।।"

(तदेव-1,40)

पौरुषमज्ञानम् — (1) **सङ्कुचितमविकल्पं स्वसंवेदनम्। शून्यादिनिष्ठं संङ्कुचितम् "अहम्" इति निर्विकल्पं स्वात्मसंवेदनम्। यथा—**

"अज्ञानमपि सङ्कुचिताविकल्पसंवेदनरूपं पुरुषनिष्ठम्।"

(ई० प्र० वि० वि०, खं० 1, पृ०, 23)

द्र० ~ 'अज्ञानम्': — ~ 'पौरुषम्' **इति।**

(2) शिवेच्छयोद्भूतम् आणवादि-मलात्मकमज्ञानं पौरुषम्, तत्तु पुरुषस्यान्तरङ्गत्वेन स्थितम्, मलसम्पृक्तस्यैव चैतन्यस्य

पुरुषत्वात्। पशुत्वापादकमेतत्। तस्या न च बुद्धि-विकल्परूपमपितु निर्विकल्पतया पशोरङ्गभूतम्।

यथा–

"तत्र पुंसो यदज्ञानं मलाख्यं तज्जमप्यथ।
स्वपूर्णचित्क्रियारूपशिवतावरणात्मकम्।।
सङ्कोचिदृक्क्रियारूपं तत्पशोरविकल्पितम्।"

(तं० आ० 1,37-38)

~ तदुद्भवबीजम्— **परमेश्वर एव स्वस्वाच्छन्द्य-महिम्ना पौरुषाख्यमज्ञानं मलात्मकमाभासयति। तदाभासेन चात्मानं वेष्टयन्नेव पुरुषतया प्रकटीभवति।**

यथा—

"परमेश्वर एव हि स्वस्वातन्त्र्यात् पूर्णज्ञत्व-कर्तृत्वाद्यपहस्तनेनाख्यात्यात्मकाणवमलाविर्भावेन स्वात्मान-मावृणुयात्।"

(तं० आ० वि०, खं० ,1 पृ०, 74)

"तेन स्वरूपस्वातन्त्र्यमात्रं मलविजृम्भितम्।"

(तं० आ० वि०, खं० 1, पृ०, 75)

~ कञ्चुकभित्तिभूतम्— **पौरुषाज्ञानाश्रित एव पञ्चकञ्चुकाभासः।**

यथा—

"परमेश्वर एव हि सर्वज्ञताद्यपहस्तनेन अणुतां प्रापितस्य स्वात्मनः पुनरपि कलादियोगं कृतवान्, येनास्य नियतं ज्ञत्व-कर्तृत्वाद्यपि युक्तम्। यथाः —

तदुक्तमः —

"असूत सा कलातत्त्वं यद्योगादभवत्पुमान्।
जातकर्तृत्वसामर्थ्यो विद्यारागौ ततोऽसृजत्।।
विद्या विवेचयत्यस्य कर्म तत्कार्यकारणे।
रागोऽपि रञ्जयत्येनं स्वभोगेष्वशुचिष्वपि।।
नियतिर्योजयत्येनं स्वके कर्मणि पुद्गलम्।
कालोऽपि कलयत्येनं तुट्यादिभिरवस्थितः।।"

(तं० आ० वि०, खं० 1, पृ०, 75)

पौष्करा — आगमिकी संहिता। पुष्कराख्य उपागमः।

यथा—

"श्रीमत् पौष्करायामप्युक्तम्–
क्षित्यन्तानां च तत्त्वानां देवत्वेन व्यवस्थितः।
मन्त्रज्ञो भगवद्भक्तः श्रद्दधानः सदास्तिकः।।
यत्र यत्राश्रमे चैव निवसेत्संयतेन्द्रियः
स्वदेहस्थं स्मरेन्नित्यं स्वमन्त्रं न्यस्तविग्रहः।।
देहसंन्यासकाले तु विश्रान्तो यत्रकुत्रचित्।
प्रयाति पदमाद्यं वै समुत्क्रान्तः स्वविग्रहम्।।"

(ज० म० वि०, पृ०, 21)

प्रकाशः — (1) भानात्मकं चितः स्वं रूपम्। संविदस्तन्निजं रूपं येनासौ सततं स्वयं प्रकाशते स्वस्वातन्त्र्योद्भावितं च विश्वं प्रकाश रूपतावे-शपूर्वकमवभासयति। स्वयमेव हि तत्तद्भावरूपतयावभासते।

यथा—

"यः प्रकाशः स एवायं प्रतिभाति तथा तथा।
नैव चान्यस्य कस्यापि स तु भात्येव केवलम्।।"

(मा० वि० वा०1,86)

"तस्मात् स्वसंविदेवैषा स्वप्रकाशतया स्थिता।।
मातृमानप्रमेयादिप्रपञ्चैः सावभासते।"

(तदेव 1,605-606)

(2) स्वयं सततं प्रकाशमानो जगत् प्रकाशकश्च परमः शिवः। यथा—

"तस्मात् प्रकाश एवासौ गीतो यः परमः शिवः।
स एवाचिन्त्यमहिमा स्वातन्त्र्योद्दामघूर्णितः।।
प्रकाशते तथा तैस्तैः स्वभावैरच्युतस्थितिः।"

(मा० वि० वा०1,69-70)

(3) परस्याश्चितो ज्ञानात्मकतस्यासौ प्रकाशरूपता ययासौ सततं स्वात्मना प्रकाशते परिपूर्णोऽहमिति। सर्वथा शुद्धा ज्ञानरूपतैव हि मूलतः परः प्रकाशः।

यथा—

"विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः।।"

(ई० प्र०1-8-11)

"देवस्य क्रीडादिमयस्य शुद्धे पारमार्थिक्यौ ज्ञानक्रियेः प्रकाशरूपता ज्ञानं, तत्रैव स्वातन्त्र्यात्माविमर्शः क्रिया।"

(ई० प्र० वि० खं०, 1, पृ०, 338)

(4) स्वातन्त्र्योल्लासघूर्णिता सततं स्वयं प्रकटा चिद्रूपता परस्य तत्त्वस्य।

यथा—

"प्रकाशोऽनन्यतो भावः स्वातन्त्र्योल्लासकेवलः।"

(अ० प्र० प०, 9)

~ अखण्डैकरूपः — **नीलप्रकाशः, पीतप्रकाशः इति न प्रकाशविशेषाः वास्तवाः। तत्र नीलपीतादेर्विशेषता-धायकस्यापि स्वयं प्रकाशैकरूपत्वमेव। अन्यथा नासावंशः प्रकाशेत। इत्यखण्ड एक एव प्रकाशः स्वयमेव स्वेनैवैश्वर्येण तत्तन्नीलादिरूपतां स्वात्मनि प्रतिबिम्बन्यायेन भासयन् सर्वत्र जृम्भमाणः प्रकाशते तथा-तथा।**

तद्यथा—

"एकस्यैवाखण्डस्य प्रकाशस्य तत्तदाभासात्मना स्फुरणात्. नीलादयो हि प्रकाशात्वात् प्रकाशात्मका एवेति किं तेन भेद्यम्।"

(तं० आ० वि०, आ०2, 21)

~ अद्वैतरूपः — **एकः प्रकाश एवास्ति। स एव सर्वात्मत्वेन भासते। चेदसौ न तथा भासेत तर्हि जडानि प्रमेयाण्यप्रकाशरूपाणि नैव कदापि भासेरन्। भासन्ते चामूनीति स्वीकर्त्तव्या तेषां प्रकाशात्मकता। ततोऽनायासमेव सिद्ध्यति प्रकाशात्मनः सर्वप्रकाशकस्यैकस्य चित्प्रकाशस्य स्थितिः। यथा—**

"अतः प्रकाशाधीना चेत् सत्तास्मिन् सार्वकालिकी।
नूनं प्रकाश एवास्ति योऽवच्छेदविवर्जितः।"

(तं० व० धा०1,19)

~ अप्रमेयः — **प्रकाशमाहात्म्येनैव प्रत्यक्षादीनां प्रमाणानां प्रमाणता सिद्ध्यति, तेनैव तस्याः प्रकाशमानत्वात्। ततोऽसौ प्रमाणता न कथमपि प्रकाशं विषयीकर्तुमलम्। तत् प्रकाशः स्वयमेव स्वमहिम्नैव सदा प्रकाशते, न कमपि प्रकाशकं हेतुमपेक्षते। यथा—**

"प्रकाशो नाम यश्चायं सर्वत्रैव प्रकाशते।
अनपह्नवनीयत्वात् किं तस्मिन् मानकल्पनैः।।"

(तं० आ०1,54)

~ अर्थसारभूतः — **सर्वस्यापि भावाभावात्मकस्यार्थस्य वास्तविकं स्वरूपं प्रकाश एव। स एव यतस्तत्तद्भावाभावरूपतया स्वयं प्रकाशते सर्वत्र। तदप्रकाशनेऽन्धमूकबधिरप्रायत्वं भवेत् सर्वस्य। यथा—**

"तस्मादर्थस्य प्रकाशमानता नामात्मा-परमार्थरूपं, न तु भिन्नः कश्चिदर्थः। अर्थस्य च प्रकाशमानता अनुभवरूपता आत्मा, न तु प्रकाशमानताया अर्थात्मता।"

(ई० प्र० वि० वि०, खं०2, पृ०, 69)

~ उपादेयतमः — **आत्मनः शुद्धप्रकाशरूपत्वमेव हि सर्वोत्कृष्टतयोपादयेत्वं भजते।**

द्र०: — **'प्रकाशः'**— ~ 'भावस्वभाव' **इति।**

~ भावस्वभावः — **सर्वेषां भावानां वास्तविकः स्वभावः प्रकाश एव। स एव यतस्तैस्तैराकारैः स्वयं स्वमहिम्नैव स्वलीलाविलासत एव चाभासते तथा-तथा। यथा—**

"अतः प्रकाशाधीना चेत् सत्तास्मिन् सार्वकालिकी।
नूनं प्रकाश एवास्ति योऽवच्छेदविवर्जितः।।"

(तं० व० धा०1,19)

"प्रकाश एव भावानां स्वभावः सर्वसम्मतः।
स एव शिवशास्त्रेऽस्मिन्नुपादेयः परो मतः।।"

(पू० प्र० 1,20)

~ विमर्शात्मकः — **निर्विमर्शस्यावभासस्य दर्पणस्थमुखावभासवज्जडत्वमेव। ततः प्रकाशस्य प्रकाशत्वप्रयोजकं तस्य विमर्शात्मकत्वमेव। यथा—**

"स्वभावमवभासस्य विमर्शं विदुरन्यथा।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः।।"

(ई० प्र०, 1-5-11)

"भानं चेत् स्यान्निर्विमर्शं न तत्त-
च्चेत् तद्रूपं तर्हि भेदो न योऽत्र।
भारूपायाऽहंविमर्शात्मकाय
जीवायास्मै मे नमो वा शिवाय।।"

(शि० जी० द०, 10)

~ विश्वात्मा — **स्वातन्त्र्यलीलाविलासतः संवित्प्रकाश एव स्वयं विश्वात्मकतया सर्वत्राभासते विचित्रशक्तिसुनिर्भरत्वमहिम्ना। यथा—**

"तस्मात् प्रकाश एवायं चित्तशक्तिसुनिर्भरः।
स्वयं विचित्ररूपेण भाति विश्वत्र विश्वतः।।"

(मा० वि० वा०1,607)

द्र०: — (प० सा० वि०, पृ०, 39,111)

(प्र० ह०, पृ०, 15)

~ सर्वात्मकः — **सर्वाकारनिराकारस्वभावो हि प्रकाशः। यथा—**

"इति सर्वत्र एवैकः प्रकाशः परमार्थतः।
सर्वाकारनिराकार-स्वभावः स विराजते।।"

(पू० प्र०, 36)

प्रकीर्णकविवरणम्— **किमपि शास्त्रान्तरपुस्तकमभिनवगुप्तकृतं यदधुना न लभ्यम्, परं यत् प्रति सङ्केतमात्रं लभ्यते। यथा—**

"इत्थं जडेन सम्बन्धे न मुख्या ण्यर्थसङ्गतिः।
आस्तामन्यत्र विततमेतद्विस्तरतो मया।।"

(तं० आ० 10,44)

"अन्यत्रेति प्रकीर्णकविवरणादौ।"

(तं० आ० वि०, खं०7, पृ०, 33)

प्रकृतिः — **तत् तत्त्वं यत् ततः सृज्यमानजडतत्त्वव्राततयाऽऽभासते सृष्टिक्रमे, तथा च मूलप्रकृत्याख्यं प्रधानतत्त्वं प्रकृतिस्त्रयोविंशतितत्त्वानाम्। महत्तत्त्वं चाहङ्कारादीनां षोडशतत्त्वानां प्रकृतिः, एवमेव तन्मात्राणि पञ्चभूतानाम्। सृज्यमानानि च तत्त्वानि तत्प्रकृत्यपेक्षया विकृतिरित्युच्यन्ते।**

द्र०: —(प० प्रा० पृ०, 9-10; अ०प्र.पं०26; ष०त्रिं०तं०सं०, 14, प०सा०वि०, पृ०, 51)

~ अपरा— **जडानां तत्त्वानां प्रकृतिभूतं प्रधानतत्त्वम्। समनापेक्षयाऽस्या अपरत्वं वेद्यम्, सैव यतः परा प्रकृतिर्मतेह शास्त्रे।**

द्र०: — 'विनाशोत्पत्तिमान्' ~ 'प्रपञ्चः' **इति।**

~ तत्त्वम् — **(1) प्रधानतत्त्वम्, सांख्यशास्त्रीयम्। किञ्चित् करोति जानातीति चात्र यत् तत् किञ्चिद्रूपं ज्ञेयं कार्यं चाणोस्तत् प्रकृतितत्त्वम्। सङ्कुचितसंविद्रूपस्याहमात्मकस्याणु-प्रमातुर्भिन्नमिदमात्मकं प्रमेयं सामान्याकारमेतत्। अव्यक्ततत्त्वं प्रधानतत्त्वं, मूलप्रकृतिरिति चाप्यस्य नामानि। कलातः एवास्याः सृष्टिः। स्रष्टा च भगवाननन्तनाथः। गुणत्रयसाम्यरूपं सुखदुःखमोहैकमयमिदं तत्त्वम्। यथा—**

"इदानीं विशेषणभागो यः किञ्चिदित्युक्तो ज्ञेयः कार्यश्च तं यावत् सा कला स्वात्मनः पृथक् कुरुते तावदेष एव सुखदुःखमोहात्मकभोग्यविशेषानुस्यूतस्य सामान्यमात्रस्य तद्गुणसाम्या-

परनाम्नः प्रकृतितत्त्वस्य सर्गः।"

(तं० सा०, पृ०, 83)

द्र०: — (तं० आ०, 9,213-14)

(2) अहमिदं करोमि जानामीत्याभासे अहमात्मकस्याणोर्भोक्तृत्वं पुरुषतत्त्वरूपत्वमिदमात्मकस्य चांशस्य भोग्यत्वं प्रकृतितत्त्वरूपत्वम्। यथा—

"सममेव हि भोग्यं च भोक्तारं च प्रसूयते।
कला भेदाभिसन्धानादवियुक्तं परस्परम् ।।"

(तं० आ० 9,215)

~ तत्प्रक्षोभकारी— **न हि जडायाः प्रकृतेः भिन्नभिन्नान्पुरुषानधिकृत्य स्वत एव सुविचित्रतया क्षोभः सम्भवति, तस्या जडत्वेन तथाविधपरिणामानुकूलविवेकाभावात्। अयं पुरुषो विवेकी इमे चाविवेका इति विमर्शं कर्तुं नासावलम्। अतो जडा सती विशेषविशेषपरिणामसिद्धये चेतनप्रेरणामपेक्षते। तदर्थञ्च गुणतत्त्वमवतीर्णो भगवानीश्वरभट्टारक एव श्रीकण्ठनाथो यः प्रकृतिं सुविचित्रतया प्रक्षोभयति। यथा—**

"स च क्षोभः प्रकृतेस्तत्त्वेशाधिष्ठानादेव, नान्यथा नियतं पुरुषं प्रतीति सिद्धयेत।"

(तं० सा०, पृ०, 85)

~ परा— **समना एव परा प्रकृतिः। तस्या एव सकाशात् सदाशिवादितत्त्वानामाविर्भावस्तस्यामेव च तेषां तिरोभावः। तत एव हि तानि तत्त्वानि प्राकृतानीति परिभाषितान्यागमे।**

द्र०: — 'विनाशोत्पत्तिमयः' ~ 'प्रपञ्च' इति।

द्र०: — **'प्राकृतम्' इति।**

~ मूलभूता— **(परा)—सा च समनैव। आसदाशिवपर्यन्तानि तत्त्वानि यतस्तस्या एव सकाशाद् विकासमुपगतानि। यथा—**

"यत् सदाशिवपर्यन्तं पार्थिवाद्यं च शासने।
तत् सर्वं प्राकृतं प्रोक्तं विनाशोत्पत्ति संयुतम्।।"

(तं० आ०, 8,405-406)

"सदाशिवोऽत्रानाश्रितः, प्रकृतिश्च समना। तस्या एव मूल (भूत) प्रकृतित्वात्।"

(तं० आ० वि०, खं०, 5, पृ०, 264)

~ सृष्टिक्रमतः — **कलैव यदा ज्ञेयभूतं कार्यभूतं च इदमिति प्रमेयभूतमंशं स्वात्मनः सकाशात् पृथक् कुरुते तदासावंशः सुखदुःखमोहसामरस्यात्मकः पृथगिदमित्यवभासमानः प्रकृतितत्त्वम्। इत्थं कलाया एव प्रकृतिसृष्टिः स्रष्टा च भगवाननन्तनाथः। यथा—**

"इदानीं विशेषणभागो यः किञ्चिदित्युक्तो ज्ञेयः कार्यश्च तं यावत्सा कला स्वात्मनः पृथक् कुरुते तावदेष एव सुखदुःखमोहात्मकभोग्यविशेषानुस्यूतस्य सामान्यमात्रस्य तद्गुणसामान्यापरनाम्नः प्रकृतितत्त्वस्य सर्गः।"

(तं० सा०, पृ०, 83)

"विशेषणतया योऽत्र किञ्चिद्भागस्तदोत्थितम्।
वेद्यमात्रं स्फुटं भिन्नं प्रधानं सूयते कला।।"

(तं० आ०, 9,214)

~ स्वरूपतः — **गुणसाम्यमयं सामान्याकारमिदमिति पुरुषात् पृथगवभासमानं मूलभूतं प्रमेयतत्त्वम्। यतो ह्यग्रिमेषुपरिणामेषु प्रकृतितत्त्वमेव सुखदुःखमोहात्मकतया भोग्यतां याति ततस्तस्मात् परिणामात् प्रागपि सुखदुःखमोहसाम्यत्वमस्याः अङ्गीक्रियते। तदेवास्या गुणसाम्यात्मकं स्वरूपं यद् भोग्यमणोः। यथा—**

"एवं संवेद्यमात्रं यत् सुखदुःखविमोहतः।।
भोत्स्यते यत्ततः प्रोक्तं तत् साम्यात्मकमादितः।"

(तं० आ०, 9,220-221)

प्रकृतिपरिणामः — प्रकृतिरेव क्रमेण गुणवैषम्यतो महदादितत्त्वत्रयोविंशकरूपेण परिणमते इत्येष तस्या बहिर्मुखः परिणामः। ततः पूर्वं तस्यामेव तत्त्वान्येतानि गुणत्रयसाम्यदशां गतानि तद्रूपतयैव तिष्ठन्ति। अन्तर्मुखपरिणामतः पुनरेतानि तत्त्वानि क्रमेण मूलप्रकृतिरूपतामेव प्रविशन्ति गुणत्रयसाम्यताम्। स एष उभयतो मुखः प्रकृतिपरिणामः। स च क्वचित् सरूपः परिणामो यत्र पूर्वं रूपं न लुप्तं भवति यथा स्वर्णस्य कुण्डलादिरूपतया परिणामे, क्वचिच्च विरूपो यथा दुग्धस्य दधिरूपतयावस्थाने।

~ तद्वादः — **प्रकृति परिणामवादः। स चैषो यत् सांख्यमतानुसारं पुरुषाणां कर्मफलभोगयस्य कैवल्यस्य च सिद्धये प्रकृतिः स्वयमेव स्वत एव विना कस्यापि प्रेरणया सृष्ट्याद्यनुकूलं परिणामं प्रति प्रवर्तते। सोऽस्याः। यथा—**

"स्वार्थ इव परार्थ आरम्भः" (सा० का०, 56)

नेश्वरकृतां प्रेरणामपेक्षते कथमपि।

~ ईश्वरापेक्ष एव— **जडायाः प्रकृतेश्चेत स्वत एव सृष्ट्युन्मुखा प्रवृत्तिः स्यात् तर्हि तत्फलत्वेन सूक्ष्मतरायाः प्रकृतेः क्रमेण स्थूलस्थूलतरादिरूपतापत्तिमात्रं स्यान्न पुनर्नियमेन निरुपमकलामयी सुविचित्रार्थक्रियोपयोगिनी जगद्भावतोत्पत्तिः स्यात्। एतादृशभातोत्पादनकारणत्वेन तत्तत् प्रयोजनविशेषानुसन्धानेनावश्यं भवितव्यम्। न च जडतत्त्वं तथाविधानुसन्धाने समर्थम्। इति तथाविधानुसन्धातुरीश्वरस्य प्रेरणामसावश्यमपेक्षते। यथाः —**

"विचित्रे बुद्धिमानेव घटादिष्विव लक्ष्यते।
कर्ता विज्ञो विचित्रैतदुपयोगाभिसंधिमान्।।"

(ई० सि०, ०5)

"लोकयात्रानुसन्धानवर्ती प्रज्ञां विना न हि।।
तथा चिकीर्षां च विना विचित्ररचनोद्भवः।
स्थूलतामात्रमेव स्यान्न तु लोकोपयोगिनी।।
रचना नियमेन स्याद्विचित्रा जातिरूपिणी।"

(तदेव,31-33)

प्रकृतिस्कन्धः — ~ अहङ्कारस्य— **अहङ्कारतत्त्वस्य तत् स्वरूपं येन स्वरूपेण तत् करणकार्यतत्त्वरूपतया**

परिणमते। यथा—

"एषोऽस्याहङ्कारस्य करणस्कन्धः, प्रकृतिस्कन्धस्तु तस्यैव त्रिविधः सत्त्वादि भेदात्।" इत्यादि।

(तं० सा०, पृ०, 86)

द्र०: — 'अहङ्कारः' ~ प्रकृतिस्कन्धतः' इति।

प्रकृत्यण्डम्— त्रिगुणात्मकं सकलकरणकार्याख्य-विकृतितत्त्वव्यापकमण्डं प्रकृत्यण्डं त्रयोविंशतितत्त्वानां कोशकल्पम्। यथा—

"सत्त्वरजस्तमोमयी प्रकृतिः कार्यकरणात्मना परिणता सती पशुप्रमातृणां भोग्यरूपा सुखदुःखमोहरूपतया बन्धयित्री प्रकृत्यमिधानमण्डलम्।"

(प० सा० वि०, पृ०, 11)

"ततो धरातत्त्वात् दशगुणं जलतत्त्वम्। तत उत्तरोत्तरं दशगुणमहंकारान्तम् तद्यथा जलं तेजो वायुर्नभस्तन्मात्रपञ्चकाक्षैकादशगर्भोऽहंकारश्चेति। अहंकाराच्छतगुणं बुद्धितत्त्वम्। ततः सहस्रधा प्रकृतितत्त्वम्, एतावत्प्रकृत्यण्डम्।"

(तं० सा०, पृ०, 64)

~ असंख्यम्— प्रतिपुरुषं प्रकृतितत्त्वस्य भिन्नत्वादसंख्यं प्राकृतमण्डम्। यथा—

"तच्च ब्रह्माण्डवदसंख्यम्।"

(तं० सा०, पृ०, 64)

एतेन ज्ञायते यत् प्रतिपुरुषभिन्नत्वपक्ष एवाभिप्रेतोऽभिनवगुप्तस्य ब्रह्माण्डानामसंख्यत्वकथने। आभासवाददृष्ट्येदं मतमाचार्याणाम्।

~ तदधिपः — अत्र प्रकृतितत्त्वे भगवान् विष्णुरधिष्ठाताऽण्डाधिपतिः। यथा—

"अत्र महाविभूतिः श्री भगवान् विष्णुर्भेदप्रधानोऽण्डाधिपतिः।"

(प० सा० वि०, पृ०, 11)

परं प्रक्षोभकस्तु प्रकृतेर्भगवाञ्छीकण्ठनाथ एवेति न विस्मरणीयम्।

प्रक्रियाज्ञानम्— षट्त्रिंशत्तत्त्वविषये शास्त्रतत्त्वसिद्धान्तानां ज्ञानम्।

~ आवश्यकम्— शास्त्रप्रक्रियायाः सम्यग् ज्ञानं विना साधकः। कदाचित् कामपि मध्यविश्रान्तिभूमिमासाद्य तामेव परभूमितया मन्यमानस्तत्रैव निबद्धो भवन् नोपर्यारोहेत्। ततः शास्त्रप्रक्रियाज्ञानमावश्यकं येन न क्वापि निबद्धः सन् साधकः परिपूर्णं शिवपदमाप्नुयात्। यथा—

"अपरथा वेद्यभागमेव कञ्चित् परत्वेन गृह्णीयात् मायागर्भाधिकारिणं विष्णुब्रह्मादिकं वा। तस्मादवश्यं प्रक्रियाज्ञानपरेण भवितव्यम्।"

(तं० सा०, पृ०, 63-64)

एतेन ज्ञायते यद् बौद्धं ज्ञानमप्यावश्यकं न च केवलेन पौरुषज्ञानेन सर्वेषां परमुक्तिलाभ इति च।

प्रख्या — (1) प्रतिपाद्यवस्तुनो विषये स्वबुद्धौ कृतः स्फुटोऽध्यवसायः सुनिश्चितः। यथा—

"तथापि तदेव तथाविधं रूपं प्रख्योपाख्याक्रमेण स्वात्मपरावभासविषयभावजिगमिषया .....।।"

(ई० प्र० वि०, खं० 1, पृ०, 8)

(2) स्वात्मनावबोधः। तदुक्तम्:–

"आत्मनि संवेदनं प्रख्याप्रमुखं पार्यन्तिको पाख्यालक्षणाध्यवसायरूपम्।"

(ई० प्र० वि० वि०, खं०1, पृ०, 250)

प्रचण्डभैरवः — किमपि शैवशास्त्रपुस्तकम्। यथा—

प्रचण्डभैरवेऽप्युक्तम्: –

"तनुवित्ताश्च ये मर्त्या गुरुमन्त्रपरायणाः।
विशेषेण महायागपूजनं प्रति न क्षमाः।।
सिद्धिलिङ्गं तदा तेषां पित्रर्थं पूजयेद्बुधः
उचितं पूजनं तत्र देवानामपि दुर्लभम्।।
कुलान्युद्धरते तत्र दशपूर्वापराण्यपि।"

(ज० म० वि०, पृ०, 23)

प्रचयः — तुर्यादशां ज्ञानिनः 'प्रचयः' इति परिभाषन्ते। तां दशां भजमानो ज्ञानी परिपूर्णतौन्मुख्यत्वेन विश्वात्मकत्वेन स्वात्मानं द्रष्टुमारभते। ततः सकलप्रमाणप्रमेयादिप्रचयदर्शनादेषावस्था ज्ञानिभिः 'प्रचय' इति परिभाष्यते। यथा—

"पूर्णतौन्मुख्ययोगित्वाद्विश्वं पश्यति तन्मयः।।
प्रसंख्याता प्रचयतस्तेनेयं प्रचयो मता।"

(तं० आ० 10,274-275)

~ तत्प्रकाराः — मनोन्मनम्, अनन्तं, सर्वार्थं, सततोदितम् इति भेदचतुष्टयं प्रचयस्य। यथा—

"मनोन्मनमनन्तं च सर्वार्थं सततोदितम्।
प्रचये तत्र संज्ञेयम् .....।।"

(मा० वि० तं०2,45-46)

रूपातीतस्यामी प्रकाराः। रूपातीतपदस्य स्थाने प्रचयपदस्य प्रयोगः समानार्थकतया, तान्त्रिकशैल्या समीचीन एव।

द्र०: — 'अवस्थाभेदविस्तरः' इति।

प्रज्ञाकरगुप्तः — बौद्धाचार्यविशेषः।

द्र०: — 'आर्यप्रज्ञाकरगुप्तः' इति।

प्रज्ञालङ्कारः — (1) कारिकाबद्धं किमपिबौद्धविज्ञानवादपुस्तकं, गद्यात्मकव्याख्यासहितम्। यथा—

"निजधर्माप्रहाणेन पररूपानुकारिता।
प्रतिबिम्बात्मता सोक्ता खड्गादर्शतलादिवत्।।
इति प्रज्ञालङ्कारकारिकार्थगर्भीकारेण लक्षणमाह।"

(तं० आ० वि०, खं०, 2, पृ०, 62)

(2) परमाणुवादनिरासक आचार्यशङ्करनन्दनकृतो ग्रन्थः। इदानीं दुरवापः। यथा—

"विस्तरेण च प्रज्ञालङ्कारे दर्शितमाचार्यशङ्करनन्दनेन।"
(ई० प्र० वि०, खं०, 1, पृ०, 181)

द्र०— (ई० प्र० वि० खं०1, पृ०, 234)
(तं० आ० वि०, खं०, 2, पृ०, 54,64)

"अभ्युच्चयबाधकं चेदम्, इति नात्रास्माभिर्भरः कृतः। विस्तरेण च प्रज्ञालङ्कारे दर्शितमाचार्यशङ्करनन्दनेन।"
(ई० प्र० वि०, खं०, 1, पृ०, 181)

प्रणवः — (1) अभेदपरामर्शसाधनभूतो मन्त्रः। स च मुख्यतया वैदिकः, शाक्तः, शैवश्चेति त्रिविधः। यथा—

"प्रकर्षेण नूयते स्तूयते अभेदपरमार्थतया विमृश्यते अशेषविश्वनिर्भरं पारमेश्वरं स्वरूपं येन स प्रणवो निष्कलनाथः, तदभिन्नव्याप्तिकः ओंकारोऽपि।"
(स्व० तं० उ०, प०, 6, पृ०, 103)

द्र०:– (ने० तं० वि०, खं० 2, पृ०, 294)

(2) उपासनाक्रमेण सूक्ष्मसूक्ष्मतरार्थाभिव्यञ्जको मन्त्रः ओङ्काररूपः, पर्यन्ते च विश्वोत्तीर्णपरशिवतासाक्षात्कारप्रदः। मुख्यस्तु वैदिक एव ओङ्कारः।

~ तत्कलाः — **ताश्च अकाराद्याः उन्मनन्ताः। तद्यथा—**

"अकारश्च उकारश्च मकारो बिन्दुरेव च।
अर्धचन्द्रो निरोधी च नादो नादान्त एव च।।
शक्तिश्च व्यापिनी चैव समनैकादशी स्मृता।
उन्मना च ततोऽतीता तदतीतं निरामयम्।।"
(स्व० तं० 4,255-256)

"अकार[1]श्च उका[2]रश्च म[3]कारो बि[4]न्दुरेव च।
अर्धच[5]न्द्रो निरो[6]धी च नादो[7] नादा[8]न्त एव च।।
कौण्ड[9]ली व्यापि[10]नीशक्तिः स[11]मनाश्चेति सामयाः।
निष्कलं चात्मतत्त्वं च शक्तिश्चैव तथोन्म[12]ना।।"
(ने०तं०22,21-22)

~ मायीयः — **शाक्तः एव प्रणवो मायाप्रणवः। स च ह्रींकारः। यथा—**

"मायाप्रणवः ह्रींकारः।"
(वि० भै० उ०, पृ०, 33)

~ वैदिकः — **ऊँकारः। यथा—**

"वेदप्रणव ऊँकारः .....।"
(वि० भै० उ० पृ०, 33)

~ शाक्तः — **ह्रींकारः।**

द्र०— **'प्रणवः'** — ~ 'मायीयः' **इति।**

~ शैवः — **हूंकारः। यथा—**

"शिवप्रणवः हूँकारः .....।"
(वि.भ.उ.पृ., 33)

प्रणवकलाः — द्वादशप्रसिद्धा आगमेषु।

द्र०— 'प्रणवः' ~ 'तत्कलाः' **इति।**

प्रणवोच्चारः — कस्यापि प्रणवस्य क्रमेण ह्रस्वदीर्घप्लुत-प्लुततरादिरूपतया दीर्घदीर्घतरस्योच्चारणस्याभ्यासोऽन्ते शून्यत्वभावनया शिवसमावेशप्रदः। यथा—

"प्रणवादिसमुच्चारात् प्लुतान्ते शून्यभावनात्।
शून्यया परया शक्त्या शून्यतामेति भैरवि।।"
(वि० भै०, 39)

"शून्यपात्रध्वनिवद् दीर्घकालमुच्चरितो यः प्लुतो मात्रत्रयपरिमितो वर्णः, एवंविधप्लुतान्ते ..... शून्यभावनात् .....।"
(वि० भै० उ०, पृ०, 33)

नावश्यकमेवात्र त्रिमात्रिकत्वमेवाभिप्रेतम्। अपितु चतुरादिमात्राकृतं नितरां प्लुतप्लुततरत्वम्।

प्रतिबिम्बन्यायः — स न्यायो येन न्यायेन शैवदर्शने जगतः सृष्टिसंहाराद्याः सम्मताः। एष न्यायः आरम्भपरिणाम-विवर्तवासनाभासादिन्यायेभ्यो विलक्षण-स्तर्कदोषरहितः शङ्कातङ्कपरिमुक्तः परयोगिनामनु भूत्यनुकूलश्च। एतदनुसारं शिवस्य शक्तय एव प्रतिबिम्बन्यायेनैव चित्प्रकाश एव बहिर्मुखतया तत्त्वव्रातरूपतयाऽऽभासन्ते। यथा—

"अन्तर्विभाति सकलं जगदात्मनीह
यद्वद्विचित्र रचना मुकुरान्तराले।
बोधः पुनर्निजविमर्श रसानुवृत्त्या
विश्वं परामृशति नो मुकुरस्तथा तु।।"
(तं० सा०, पृ०, 19)

(2) न खलु जगत् सत्यं शिवशक्तिप्रतिबिम्बरूपमपि तु केवलं प्रतिबिम्बकल्पं प्रतिबिम्बन्यायेनावभासमानमिति वेदितव्यम्। वास्तविके प्रतिबिम्बने बिम्बस्य, प्रतिबिम्बस्य, प्रतिबिम्बग्राहकस्य च स्पष्टो भेदः। परं शिवस्य स्वातन्त्र्यलीलया तस्य शक्तयः प्रतिबिम्बन्यायेन जगद्रूपतयावभासन्ते इति वेदितव्यम्। सूचित मिदं यथा—

"अत एव प्रतिबिम्बत्वेनेति नोक्तमपि तु प्रतिबिम्बन्यायेनेति।"
(ई० प्र० वि० वि०, खं०3, पृ०, 238)

प्रतिबिम्बम् — (1) निजस्वरूपापहानिराहित्येनैव पररूपतयापि योऽवभासोऽसौ प्रतिबिम्बपदेनोच्यते, दर्पणान्तर्यथा मुखावभासः। सर्वं हि जगत् परमेश्वरस्य शक्तीनां प्रतिबिम्बभूतमेव। यथा—

"स्वरूपानपहानेन पररूपसदृक्षताम्।
प्रतिबिम्बात्मतामाहुः खड्गादर्शतलादिवत्।।"
(तं० आ०3,54)

"यद्भेदेन भासितयशक्तमन्यव्यामिश्रत्वेनैव भाति तत्प्रतिबिम्बम्, मुखरूपमिव दर्पणे, रस इव दन्तोदके, गन्ध इव घ्राणे मिथुनस्पर्श इव आनन्देन्द्रिये, शूलकुन्तादिस्पर्शो वा अन्तः स्पर्शनेन्द्रिये, प्रतिश्रुत्केव व्योम्नि।"
(तं० सा०, पृ०, 10-11)

~ नावस्तुभूतम् — **प्रतिबिम्बात्मकमपि जगदिदं न बन्ध्यासुतवदवस्तुभूतम्। यथा—**

(क) "तत्र तावदेतत् प्रतिबिम्बं वस्तु भवति– प्रतिभासमानत्वात्,। न च भातमभातं भवतीति हि सर्वेषामेवात्राविवादः।"

(तं० आ० वि० खं० 2, पृ०, 27)

(ख) "न चावस्तुत्वं स्यात् .....।"

(तं० आ०, 3,23)

~ प्रतीपं (बिम्बतः) — **(2) अन्याश्रितत्वेन भासनं; तथाभूतस्वाश्रयभेदेनानवभास्यं बिम्बविपरीतत्वेन प्रकाशमानत्वं, प्रतिबिम्बत्वम्। यथा—**

"नन्वित्थं प्रतिबिम्बस्य लक्षणं किं, तदुच्यतेः-
'अन्यव्यामिश्रणायोगात्तद्भेदाशक्यभासनम्।
प्रतिबिम्बमिति प्राहुर्दर्पणे वदनं यथा'।।"

(तं० आ०3,56)

"अनेन चास्य बिम्बवैपरीत्यं दर्शितम्। तद्ध्यन्यामिश्रं स्वतन्त्रञ्चेत्युक्तम्।"

(तं० आ० वि०, खं०2, पृ०, 65)

पूर्वाभिमुखस्य बिम्बभूतस्य मुखस्य प्रतिबिम्बं पश्चिमाभिमुखमेव। बिम्बे यद्वामं तत् प्रतिबिम्बे दक्षिणम्, दक्षिणञ्चैवमेव वामम्, इत्येषा प्रतीपता प्रतिबिम्बस्य प्रतीइत्यनेन द्योत्या। सर्वं हि जगद् वस्तुतोऽहमात्मकं शुद्धसंविन्मयम्, परं तद्विपरीततयेदमात्मकजडरूपतयावभासते। इत्येषाऽस्य प्रतीपता।

~ बाह्यबिम्बकारणकम् — **कदाचिद् बाह्यं बिम्बमेव निजं प्रतिबिम्बं स्वच्छे द्रव्येऽर्पयति, यथा दर्पणे मुखम्। यथा—**

"प्रतिबिम्बं च बिम्बेन बाह्यस्थेन समर्प्यते।"

(तं० आ०3,49)

~ वस्त्ववस्तुविलक्षणम्— **प्रतिबिम्बात्मकं जगन्न परमेश्वरवत् ससारं वस्तुनापि शशविषाणवदभावात्मकम्। अपितु वस्त्ववस्तुविलक्षणमाभासात्मकम्-शिवस्य शक्तेर्महिम्नाभासते। यथा —**

"स्वच्छस्य दर्पणादेरेवैष प्रभावो यद्वस्त्वस्तुविलक्षण-माभासमात्रं प्रतिबिम्बं नामेदं प्रतिभासते।"

(तं० आ० वि०, खं०2, पृ०,29)

"न चावस्तुत्वं स्यान्न च किमपि सारं निजमिति।"

(तं० आ०3,23)

~ शक्तिकारणकम्— **बाह्यबिम्बसहकारं विनैव परमेश्वरः स्वशक्तिप्रतिबिम्बमयं विश्वं स्वात्मभित्तावव- भासयतीति। यथा —**

"इत्थं विश्वमिदं नाथे भैरवीयचिदम्बरे।
प्रतिबिम्बमलं स्वच्छे न खल्वन्यप्रसादतः।।"

(तं० आ०3,65)

व्यवहारेऽपि बिम्बसाहाय्यं विनापि प्रतिबिम्बाभासः। यथा —

"अत एव पुरोवर्तिन्यालोके स्मरणादिना।
निमित्तेन घनेनास्तु सङ्क्रान्ता दयिताकृतिः।।"

(तं० आ०3,62)

~ स्वभावविशेषतः — **सदृशे पदार्थे सदृशमेव वस्तु प्रतिभातीति प्रतिबिम्बतत्त्वम्। रूपवति दर्पणे रूपमेव प्रतिबिम्बितं सत् प्रकाशते न स्पर्शादि। कर्णशष्कुल्याकाशे शब्द एव प्रतिबिम्बति न रूपादि। यथा —**

"सदृशं भाति नयनदर्पणाम्बरवारिषु।
तथा हि निर्मले रूपे रूपमेवावभासते।।
प्रच्छन्नरागिणी कान्तप्रतिबिम्बितसुन्दरम्।
दर्पणं कुचकुम्भाभ्यां स्पृशन्त्यपि न तृप्यति।।"

(तं० आ०3,5-6)

प्रतिबिम्बवादः— (1) प्रतिबिम्बन्यायाश्रितो जगत्सृष्ट्यादि-सिद्धान्तः परमेश्वरस्य निजे चित्प्रकाशे षडप्यध्वानः प्रतिबिम्बतया तदन्तरमेव भान्ति, न बहिरिति प्रतिबिम्बन्यायेन जगत् सृष्ट्यभिमता शैवानाम्। तेन च परिणामित्वविकारित्वा-द्याशङ्काः निरस्ताः परमशिवस्य विषये। यथा —

"तत्र सर्वं विभात्येतत्परमेशितरि ध्रुवे।
प्रतिबिम्बस्वरूपेण न तु बाह्यतया यतः।।"

(मा० वि० वा०1,1037)

इदं रूपतया बाह्यत्वेन भासमानमपि हि विश्वं चित् प्रकाशस्यान्तरमेवाभासते इति तात्पर्यम्।

(2) शिवस्य शक्तय एव शिवे एव प्रतिबिम्बिताः सत्यो विश्वात्मकतया भान्ति। स एष प्रतिबिम्बवाद एवाश्रयः शाम्भवोपायस्य। तत्र विश्वं स्वात्मप्रकाशे प्रतिबिम्बवदवभासमानं साक्षाद् दृश्यते। यथा —

"एतदेव विश्वप्रतिबिम्बनक्षमत्वं परमेश्वरस्य तदतिशयितं स्वातन्त्र्यमुच्यते यदन्तर्विद्भिरालोचनीयम्। विश्वस्य च प्रकाशस्वरूपे परमेश्वरे परिस्फुरतः प्रतिबिम्बप्रक्रियामेनामन्तरेण नान्या रीतिरौचित्यमनुभवति।"

(म० मं० प०, पृ०,149)

आलोचनीयम् = विग्रष्टव्यमिति।

"पारमेश्वरी हि प्रतिबिम्बभङ्गिरलौकिकत्वादनवद्यामेव कक्ष्यामधिरोहति। यदमुष्यामुपन्यस्तया नीत्या बिम्बव्यपेक्षा नोत्पद्यते।"

(म० मं० प०, पृ०,150-1)

"बिम्बव्यतिरिक्तः प्रतिबिम्बयोगो न क्वचिद्प्युपलभ्यत इति चेत्, सत्यम्। किं क्रियताम्। अत एव ह्येतत् पारमेश्वरं स्वातन्त्र्यमित्यसकृदाचक्ष्महे।"

(तदेव,पृ०,151)

(3) यथा मुखादिर्दर्पणादौ प्रतिबिम्बरूपतयाऽऽभासते तथैव विश्वं पारमेश्वरे प्रकाशे प्रकाशते। ततो विश्वावभासे सत्यपि न परमेश्वरस्य दर्पणस्येव स्वरूपे कश्चन विकारः परिणामो वा शङ्कनीयः यथा —

"एवं यथैतत् (मुखादि) प्रतिबिम्बितं भाति तथैव विश्वं परमेश्वरप्रकाशे।"

(तं० सा०, पृ०,11)

प्रतिबिम्बसिद्धान्तः — **पारमेश्वरे प्रकाश एव सर्वं जगत् प्रतिबिम्बवत् प्रकाशते इति केचनाद्वैतवेदान्तिनोऽपि स्वीकुर्वन्ति, परं तेऽस्य प्रतिबिम्बात्मकस्य जगदाभासस्य कारणमविद्यां मन्यन्ते, तां च ब्रह्मणोऽतिरिक्तां तुच्छस्वभावां च प्रतिपादयन्ति। तुच्छस्वभावेनाविद्यात्मना वस्त्वन्तरेण कथमर्थक्रियाकारिणोऽतुच्छस्य सुविचित्रस्यास्य जगत आभास इति तैर्न विचारितम्। शैवाः पुनः परमेश्वरस्य लीलास्वभावं स्वातन्त्र्यमस्याभासस्य कारणं साक्षात् पश्यन्तस्तथैव प्रतिपादयन्ति, येन सर्वं निर्बाधतयोपपद्यते। यथा :—**

"प्रतिबिम्बवादे च स्वच्छतामात्रं संवेदनस्य, न स्वातन्त्र्यमिति तत् समर्पकवस्त्वन्तरपर्येषणा कर्त्तव्या (वैदान्तिके मते)। अविद्या च (कारणतया कल्पिता तैः) अनिर्वाच्या वैचित्र्यं चाधत्ते इति व्याहतम्। पारमेश्वरी शक्तिरेवेयमिति तु हृदयावर्जकः क्रमः।"

(ई० प्र० वि० वि०, खं०1, पृ०,9)

द्र०:- (ई० प्र० वि० वि०, खं०3, पृ०,239)

"संविन्मयं हि विश्वं चैतन्यस्य व्यक्तिस्थानमिति। तदेव हि विश्वमत्र प्रतीपमिति प्रतिबिम्बधारित्वमस्य।"

(तं० सा०, पृ०,12)

~ स्वातन्त्र्यनिष्ठः— **बाह्यो दर्पणादिर्बाह्यवस्तूनां प्रतिबिम्बं धारयति, परं पारमेश्वरः प्रकाशदर्पणः स्वशक्तीनामेव विमर्शरूपाणां प्रतिबिम्बजातं प्रकाशयन् विश्वरूपतयाऽऽभासते। यथा : —**

"नन्वत्र बिम्बं किं स्यात्। माभूत् किञ्चित्। ननु किमकारणकं तत्? हन्त तर्हि हेतुप्रश्नः। तत् किं बिम्बवाचोयुक्त्या, हेतुश्च परमेश्वरशक्तिरेव स्वातन्त्र्यापरपर्याया भविष्यति। विश्वप्रतिबिम्बधारित्वाच्च विश्वात्मकत्वं भगवतः।"

(तं० सा०, पृ०,11)

प्रतिबिम्बितम्— **भेदाभेदरूपतया दृश्यमानमाभासरूपं वस्तुबिम्बतुल्यं सदपि बिम्बाद् भिन्नमपि प्रतीयमानं भवति। तदेव हि प्रतिबिम्बितमित्युच्यते; नत्वभेदभावेन सदा प्रकाशमानम् तत्त्वम्। ततो न शिवः प्रतिबिम्बात्मकः तस्याभेदभावेन सदाप्रकाशमानत्वात्। यथा : —**

"यच्च रूपं सदा बिम्बे प्रतिबिम्बे चैकतापारमार्थं मुखपरामर्शमात्रमिव न तत्प्रतिबिम्बितमुच्यतेतन्मात्रसतत्त्वादेव, यत्तु तत्रान्यथा तथा च भाति, मुखाकार इव पूर्वापरवामदक्षिणतादिविपर्ययाद् एतदेवापि तदेवापि तदेव प्रतिबिम्बितमुच्यते। तच्च तत्समानधर्मैव भवति न तु विजातीयम्।"

(प० त्री० वि०, पृ०,144-45)

प्रतिभा— **(1) विना गुरूपदेशं विना दीक्षाप्रयोगं, विना शास्त्राध्ययनं, विना च साधनाभ्यासमेवमेव स्वात्मशिवतायाः साक्षात्कारस्योद्बोधो मुख्या प्रतिभा। यद्वशात् प्रातिभं तत्त्वज्ञानं प्रकाशते, पारमेश्वरस्य मध्यतीव्रानुग्रहस्य पात्रतां गतस्य महानुभावस्य। यथा : —**

"मध्यतीव्रात्पुनः सर्वमज्ञानं विनिवर्तते।।
स्वयमेव यतो वेत्ति बन्धमोक्षतयात्मताम्।
तत्प्रातिभं महाज्ञानं शास्त्राचार्यानपेक्षि यत्।।"

(तं० आ०13,131-132)

"न चास्य समयित्वादिक्रमो नाप्यभिषेचनम्।
न सन्तानादि नो विद्याव्रतं प्रातिभवर्त्मनः।।
आदिविद्वान्महादेवस्तेनैषोऽधिष्ठितो यतः।
संस्कारास्तदधिष्ठानसिद्ध्यै तत्तस्य तु स्वतः।।"

(तं० आ०13,140-141)

"अदृष्टमण्डलोऽप्येवं यः कश्चिद्वेति तत्त्वतः।
स सिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः।।"

(प० त्री०,18)

"अविधिज्ञो विधानज्ञो जायते यजनं प्रति।"

(तदेव, 20)

(2) पराशक्तेरपि नामान्तरं प्रतिभेति।

द्र०:- 'काली' इति।

द्र० च (तं० सा०, पृ०,105) **इति।**

(3) परिपूर्णाहं विमर्शमयी परा संवित्। यथा : —

"परामृशत च प्रथमां प्रतिभाभिधानां सङ्कोचकलङ्ककालुष्यलेशशून्यां भगवतीं संविदम्।"

(प० त्री० वि०, पृ०,102)

(4) एको विकल्पोऽस्तं गच्छत्यपरश्चोदेति। तयोर्द्वयोर्मध्ये स्थितम्, उभयस्य परस्परयोजकं यत् संवित्तत्त्वं तत् 'प्रतिभा' इति वा 'उन्मेष' इति वा कथ्यते। यथा : —

"भवति चेदमस्तमितोदेष्यदुभयविकल्पज्ञानान्तरालवर्ति उन्मेषप्रतिभादिशब्दागमगीतं निर्विकल्पकम् .....
.....उभयोश्च ज्ञानयोरन्तरालमनपह्नवनीयं, ज्ञानयोर्भेदादेव। तच्च संविदात्मकमेव।"

(प० त्री० वि०, पृ०,106)

पारमेश्वरी विमर्शरूपतैव वस्तुतः प्रतिभा। सैव कदाचित् पारमेश्वरादनुग्रहाद् योगिहृदयेऽप्युदेति। येन तस्य स्वात्मज्ञानं प्रातिभमित्युच्यते। यथाः —

"एकैव सा पारमेश्वरी प्रतिभा अस्मदुक्तिमाहात्म्यकल्पिता एवं विधा अपरिच्छिन्नस्वभावापि सर्वात्मैव।"

(तदेव,पृ०,108)

~ अनेकविधा— **पारमेश्वरस्य मध्यतीव्रस्यानुग्रहस्य वशात् स्वतः स्वरूपसाक्षात्करोद्भाविनी या प्रतिभाऽसावपि तस्यानुग्रहस्य बलवत्तायास्तारतम्येनानेकविधा भवति। तेन तदुद्भयावितं ज्ञानं निःशङ्कं वा सशङ्कं वा भवति, स्थिरं वा भवति कम्प्रं वा। ततस्तथाविधानुग्रहपात्रभूता केचन महानुभावाः गुरोः शास्त्रस्य च साहय्यं मनागपेक्षन्त एव कदाचित्। यथा : —**

"तत्रापि तारतम्योत्थमानन्त्यं दार्ढ्यकम्प्रते।
युक्तिः शास्त्रं गुरुर्वादोऽभ्यास इत्याद्यपेक्षते।।"

(तं० आ०13,136)

~ अवरप्रकारा— **वस्तुतः एकैकोऽपि प्राणी प्रतिभावान्।**

परं कस्यचिद् व्यावहारिकी, कस्यचित् काव्यकलानुकूला, कस्यापि बालमूर्खोन्मत्तादेर्भविष्यद्दर्शिनी, तिर्यचां च हिताहितप्रबोधिनी इत्यादि प्रकारा। सर्वसामान्यासौ प्रतिभाऽनेकप्रकारा। यथा : —

"यन्मूलं शासनं तेन न रिक्तः कोऽपि जन्तुकः।।"

(तं० आ०13,135)

"व्यवहाराः प्रतायन्ते तिरश्चामपि यद्वशात्।"

उद्धः- तं० आ० वि०, खं०8, पृ०,89)

~ क्रमरहिता— अन्तर्मुखप्रकाशमात्रपरमार्था अभिन्ना परा संवित्। यथा—

"या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता।
अक्रमानन्तचिद्रूपः प्रमाता स महेश्वरः।।"

(ई० प्र०,1-8-1)

"सर्वस्य स्वप्रकाशरूपा परमार्थतश्चान्तर्मुखत्वेन प्रकाशमात्रपरमार्थतया भेदाभावादक्रमा।"

(ई० प्र० वि०, खं०1, पृ०,179)

पदार्थक्रमरुषितेति सक्रमा। वस्तुतोऽक्रमैव स्वयं स्वकीयैश्वर्यविलासतः क्रमारूषिततयावभासते इति। ततः क्रमावभासनमूलकारणभूताप्यक्रमैव सा स्वयम्।

~ परा— अक्रमा शिवात्मिका स्वप्रकाशा विश्वप्रकाशिनी च परा संवित्।

द्र०:- 'प्रतिभा ~ क्रमरहिता' इति।

~ सक्रमा— लोकव्यवहारे विषयावभासखचिता विषयावभासरूपतया प्रकाशमाना संविदेव।

द्र० 'प्रतिभा ~ **क्रमरहिता' इति।**

प्रतिभानम्— संविदः विषयावभासरूपतया मानम्। यथा—

"प्रतिभाति घट इति यद्यपि विषयोपश्लिष्टमेव प्रतिमानं भाति तथापि न तद्विषयस्य स्वकं वपुः, अपितु संवेदनमेव तत्तथा चकास्ति मां प्रति भातीति प्रमातृलग्नत्वात्।"

(ई० प्र० वि०, खं०1, पृ०,277)

प्रतिमीलनम्— परमेश्वरतायां प्रवेशः, संविदि लयः। यथा—

"सुचिरं जीवभावलीलाया सम्यगभिनयानन्तरं पुनः शिवयोगिनोऽस्य प्रतिमीलनं परमेश्वरतायां प्रवेशः परमेश्वरेणैकीभावः स्यात्।"

(शि० सू० विवृ०3,45)

"चैतन्यात्मनः स्वरूपादुदितस्यास्य विश्वस्य भूयः स्वात्मचैतन्य एव विलयो भवति तस्य परस्य शिवयोगिनो दृष्टौ।"

(शि० सू० विवृ०3,45)

प्रतिवारणा— मण्डलविधौ कमलदलपरिवेष्टनरेखा मण्डलाकारा। यथा—

"प्रतिवारणा-दलाग्रवर्तिनी वृत्तरेखा।"

(तं० आ० वि०, खं०12, पृ०,264)

प्रतिवारणी— प्रतिवारणैव। यथा—

"..... पद्मबाह्यस्तथा शुक्ला च प्रतिवारणी।।"

(तं० आ०31,94)

प्रतिष्ठा ~ कला— (1) जलतत्त्वादारभ्य मूलप्रकृतितत्त्वं यावद् व्याप्य तिष्ठन्ती, सर्वञ्च तत् तत्त्वव्रातं व्याप्नुवती कला प्रतिष्ठा, सर्वस्य ब्रह्माण्डस्य कारणत्वेनाधारभूतत्वात्। यथा—

"जलादिप्रधानान्ते वर्गे प्रतिष्ठा, कारणतयाप्यायन-पूरणकारित्वात्।"

(तं० सा०, पृ०,109)

"..... प्रतिष्ठाऽव्यक्तगोचरे।"

(तं० आ०11,8)

"प्रतितिष्ठते भोगहेतुतत्त्वजालं यत्रेति निरुक्त्या प्रतिष्ठा।"

(स्व० तं०, प०4, पृ०,108)

(2) भेदव्यवहारेण प्रकृत्यन्तानि तत्त्वानि कलयन्ती प्रतिष्ठा कला, जलादिप्रधानान्तव्यापिनी। यथा—

"अबादिमूलान्तं तत्त्वचतुर्विंशतेरपि भेदव्यवहार एव प्रतिष्ठानेन कलयित्री प्रतिष्ठाख्या शक्तिः।

(तं० आ० वि०, खं०7/2, पृ०,3)

~ तद्वर्णमन्त्रादीनि— अत्र वर्णाः त्रयोविंशतिः, मन्त्राः पञ्च, पदानि पञ्च, तत्त्वानि त्रयोविंशतिः, भुवनानि च षट्पञ्चाशत्। यथा—

"तत्त्वार्णमग्निनयनं रसशरपुरमस्त्रमन्त्रपदमन्या।।"

(तं० आ०11,51)

द्र० (तं० सा०, पृ०,112)

~ देहे — भावनाभ्यासे कलाहवप्रकरणे साधकदेहे भावनीया सती गुल्फान्तान्नाभ्यन्तं व्यापिनी कला। यथा—

"प्रतिष्ठाया गुल्फान्नाभ्यन्तं व्याप्तिः तत्र जलतत्त्वमारभ्य प्रकृतितत्त्वान्तं चतुर्विंशतितत्त्वस्थितिः तत्र विष्णोरधिकृतिः।"

(प० त्री० विवृ०, पृ०,11)

"गुल्फादारभ्य नाभ्यन्तं शिष्यदेहेऽध्वकल्पनम्।।
प्रतिष्ठाया भवेद्व्याप्तिश्चतुर्विंशतितत्त्विका।
षट्पञ्चाशद्भुवनिका त्रयोविंशतिवर्णिका।।
ज्ञेयैकविंशतिपदा त्रिमन्त्रा च विधीयते।"

(स्व० तं०4,156-158)

प्रतिष्ठानविधिः — लिङ्गप्रतिष्ठाविधिः। यथा—

"इत्येष स्वप्रतिष्ठानविधिः शिवनिरूपितः।"

(तं० आ०27,55)

विस्तरतस्तत्रैव द्रष्टव्यः।

प्रतीची ~ दिक्— किञ्चित् प्रकाशयोग्यस्य पराङ्मुखतायां प्रतीची। यथा—

"पराङ्मुखं तु तत् पश्चात् .....।"

(तं० आ०15,199)

"किञ्चिदप्रकाशसंस्पर्शात्तु तदेव विमुखमिव पराञ्चतीति पश्चादिति।"

(तं० आ० वि०, खं०9, पृ०,99)

प्रत्यक्षम् ~ प्रमाणम्— एकैकविषयाकारतरमरद्यायाभासमानः एकैकाभासरूपः स्वप्रकाद्वासंविदात्मकश्चित्प्रकाश इति। यथा—

"इयदेव हि प्रत्यक्षं यन्नीलं भातीति"।

(ई० प्र० वि०, खं०1, पृ०,187)

"तत्र च प्रत्यक्षं प्रत्यामासं प्रमाणयं भजते, विमर्शलक्षणस्य प्रमितिव्यापारस्यैकैक शब्दवाच्येऽर्थे विश्रान्तेः।"

(तदेव पृ०,188-189)

~ तत्त्वतः — स्वात्मरूपा संविदेव स्वशक्त्यभिव्यक्तिमयानि चक्षुरादीनि प्रेरयन्ती प्रत्यक्षव्यपदेशता भवति। यथा—

"तथाहि देवेदवांशास्तत्ममुन्मीलनं इशः।
प्राणस्पन्दस्तदैकातदैकाग्र्यभावस्तद्धर्मसंचयः।।
इत्यादि सर्वं यद्भाति तत्प्रत्यक्षमिति स्फुटम्।"

(मा० वि० वा०1,609-610)

~ प्रसिद्धितः — प्रसिद्ध्यनुसारमेव जन इन्द्रियव्यापोरषु प्रवृत्तः सन् सहकारि-कारणोपयोगतः प्रत्यक्षव्यापारमाचरति। यथा—

"प्रत्यक्षमपि नेत्रात्मदीपार्थादिविशेषजम्।।
अपेक्षते तत्र मूले प्रसिद्धिं तां तथात्मिकाम्।"

(तं० आ०35,3-4)

~ विश्रान्तितः — अहं-रूपे प्रकाशे विश्रान्तमेव प्रत्यक्षं प्रमाणतां भजते। "अहं घटं जानामि" इति, 'ज्ञातो मया घट' इति वा, नान्यथा। तत् संविद् एवोदितं स्वसंविद्येव विश्रान्तं च सत् प्रत्यक्षं प्रत्यक्षतां भजत इति। यथा—

"तस्मात्स एक एवासौ प्रकाशः परमेश्वरः।
प्रत्यक्षमिति तेनैव प्रकाशेनैव भासते।।
तत्र ता दृष्टयः सर्वा महानद्य इवाणवे।
विशन्त्यवश्यं नाविष्टाः प्रयान्ति कृतकृत्यताम्।।"

(मा० वि० वा०1,634-635)

~ विस्तरतः — तस्यैवाग्रे विस्तारो ह्यनुमानम्। प्रत्यक्षानुगतत्वेनैव तस्याभिधानमनुमानमिति। मानमनुगतमिति। मानब्ध मुख्यं प्रत्यक्षमिति। यथा—

"अत एव हि मुख्यस्य मानस्य सदृशत्वतः।।
अनुमानमिति प्रोक्तं व्यवहारप्रवर्तनम्।"

(मा० वि० वा०1,771-72)

प्रत्यक्षाद्वैतम्— प्रत्यक्षतः सर्वस्य जगतो यच्छिवात्मकतया दर्शनं तत् प्रत्याक्षाद्वैतं दर्शनम् रत्नज्ञस्य हि दृष्टिः स्वर्णरत्नादितत्त्वमेव प्रायशः पश्यति, नापाततोऽवभासमानं तेषामाकारप्रकारादि। तथोत्कृष्टो योगी विश्वत्र शिवमेव पश्यन् प्रत्यक्षाद्वैतदृष्ट्या पश्यति। यथा—

"इत्थं प्रत्यक्षभेवेदं निःसपत्नं विजृम्भते।।
ततो न भिद्यते चार्थः प्रत्यक्षाद्वैतमीदृशम्।
इदं सन्धानकलिका परिनिष्ठितबुद्धिना।।
आचार्यनरसिंहेन प्रत्यक्षाद्वयमुच्यते।"

(मा० वि० वा०17,762-764)

आ० नरसिंहगुप्तघटितेयं परिभाषेति।

प्रत्यगात्मा— (1) पुर्यष्टकात्मा सूक्ष्मशरीरयुतो मायीयः पशुरूपः प्रमाता। यथा—

"ननु प्रत्यगात्मनो मनोवृत्तिः सङ्कल्पो, बुद्धिवृत्तिरध्यवसायः।"

(ई० प्र० वि० वि०, खं०2, पृ०,218)

(2) देहादिपरिच्छिन्नः पशु प्रमाता। स च वस्तुतः शिव एव पशुरूपतया स्वयं स्थितः इति। यथा—

"न प्रत्यगात्मा नाम कश्चिदन्योऽहं, किन्तु ग्राह्यग्राहकप्रकाशधनः परमेश्वरो यः, स एवाहम्। स चाहमेव नान्यः कश्चित्। ततो विकल्पसृष्टिरपि मम स्वातन्त्र्यात्मा विभवः।

(ई० प्र० वि० वि०, खं०3, पृ०,393)

प्रत्यङ्गिरत्वम्— मन्त्रस्य प्रयोक्तारं प्रति विरूद्धफलत्वम्। यथा—

"प्रत्यङ्गिरत्वं भूतादिदमनप्रयुक्तस्य मन्त्रस्य प्रयोक्तारं प्रति विरूद्धकारित्वम्।"

(ने० तं० उ०, खं०2, पृ०,17)

प्रत्यङ्गिरा— अभिचारकारिणं प्रति प्रयुज्यमानाऽसौ विद्या यया ऽभिचारकार्येव स्वयमभिचारपात्रतां याति प्रत्यङ्गिराप्रयोगी चाभिचारस्पर्शादपि मुक्तो भवति। यथा—

"प्रत्यङ्गिराप्रयोगेण हन्ति दुष्टान्यनेकशः।।

(ने० तं०18,4)

"प्रतीपं गृणाति क्षुद्रसाद्यकं प्रत्येकक्षुद्रकर्मफलं सम्पाद्यत्वेन विमृशति या विद्या सा प्रत्यङ्गिरेति।"

(ने० तं० उ०, खं०2, पृ०,73)

प्रत्यभिज्ञा— (1) पूर्वं ज्ञातस्य ततो विस्मृतस्य पुनर्दर्शने वर्तमानदर्शनसमकालमेवोद्बोधं गच्छन्ती प्राक्तनसंस्कारजन्मा स्मृतिः। प्राच्यस्यानुभवस्य वर्तमानेनानुभवेन साकमेकीकरणमिव। सोऽयं देवदत्त इति। स इति प्रागनुभूतत्वम् अयमिति वर्तमाने ज्ञायमानत्वम्। उभयस्य चैकाकारतयावभासनम्। यथा—

"सोऽयमित्यनुबोधे प्रत्यभिज्ञा।"

(ई० प्र० वि० वि०, खं०1, पृ०,115)

(2) पूर्वं मातस्य मध्ये विस्मृतस्य च वस्तुनः पुनः स्वात्मसम्मुखीभावावसरे प्रतिसन्धानम् "अयमसौ चैतो यो बाल्ये मया दृष्टोऽभवदिति" वत्। यथा—

"लोकेऽपि ..... ज्ञातस्य पुनरभिमुखीभाववसरे प्रतिसंधितप्राणितमेव ज्ञानं प्रत्यभिज्ञा-इति व्यवह्रियते।"

(ई० प्र० वि०, खं०1, पृ०,20)

(3) पूर्वं ज्ञातस्य प्रतीपमात्माभिमुख्येन विमर्शे सति वर्तमाने काले पूर्वज्ञातत्वेन रूपेण पुनर्ज्ञानम्, स्मृत्यनुभवैक्यानुसन्धानात्मकम्। अहमसौ परशिव एव यः पारमेश्वरपञ्चकृत्यकारी सदा विलसतीति। यथा—

"प्रतीपमात्माभिमुख्येन ज्ञानं प्रकाशः प्रत्यभिज्ञा।"

(ई० प्र० वि०, खं०1, पृ०,19-20)

~ उपादेयो— **अप्रत्यभिज्ञातं निजं शिवस्वरूपं नैव पारमैश्वर्यसम्पच्चमत्कारचर्वणां जनयति। ततस्तत् फलप्राप्तयेऽवश्यं स्वं स्वरूपं प्रत्यभिज्ञेयम्। यथा—**

"तद्वदात्मनि गुरुवचनाज्ज्ञानक्रियालक्षणशक्त्य भिज्ञानादेर्वा यदा पारमेश्वर्योत्कर्षहृदयङ्गमीभावो जायते, तदा तत्क्षणमेव पूर्णतात्मिका जीवन्मुक्तिः, समावेशाभ्यासरसे तु विभूतिलाभ, इति तस्य प्रत्यभिज्ञैव परापरसिद्धिप्रदायिनी भवति।"

(ई० प्र० वि०, खं०2, पृ०,275)

~ कृतकृत्यताकरी— **स्वात्मनः परशिवात्मकं स्वभावं प्रत्यभिज्ञायैव साधकः पूर्णतया कृतकृत्यो भवति नान्यथा। यथा—**

"सकृज्ज्ञाते सुवर्णे किं भावना करणं व्रजेत्।
एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः।।
ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना।
करणेन नास्ति कृत्यं क्वापि भावनयापि वा।।

(शि० दृ०7,5-6)

~ तत्फलम्— **समस्तपारमैश्वर्यलक्षणस्य निजस्य वास्तविकस्य स्वभावस्य प्रथनं जीवन्मुक्तिलाभः पारमैश्वर्यां शचमत्कारास्वादश्चेति; न पुनः शान्तब्रह्माभावस्थितिमात्रम् विज्ञानाकलत्वप्रायम्। यथा—**

"तस्य प्रयोजनं प्रत्यभिज्ञानं, तस्यापि प्रयोजनं समस्त-सम्पल्लक्षणपारमैश्वर्यैकरूपप्रथनम्।"

(ई० प्र० वि०, खं०1, पृ०,24)

"प्रत्यभिज्ञानमात्रादानन्दलाभः, परिशीलनात्तु सम्भोगसहस्रप्राप्तिरिति।"

(ई० प्र० वि० वि०, खं०3, पृ०,403)

~ तत्सूत्राणि— **ईश्वरप्रत्यभिज्ञायाः कारिकाः एव सूत्राणीति कथ्यन्ते। तासामल्पाक्षरत्त्वाद् बह्वर्थत्वाच्चेति। यथा—**

"यद्यप्युक्तमादिसिद्धसूत्रे, स्वतः सिद्धसूत्रे च, तथापि - स्वातन्त्र्यामुक्त .....। इति भाविसूत्रारायेन 'वक्ष्यते' इत्युक्तम्।"

(ई० वि० वि०, खं०1, पृ०, 226)

~ तद्ग्रन्थः — **ईश्वरप्रत्यभिज्ञाख्यो ग्रन्थोऽनेन लघुनाम्नापि प्रसिद्धः कश्मीरेषु।**

~ तद्दर्शनम्— **माधवाचार्येण सर्वदर्शनसंग्रहे काश्मीरशैवदर्शनस्याभिधानं प्रत्यभिज्ञादर्शनमिति प्रयुक्तम्। ततोऽद्यत्वे विद्वांसोऽनेनैवाभिधानेनैतस्योल्लेखं कुर्वन्ति। परं वर्तमानकालिकशोधविदुषां प्रमादाद् विद्वांसः प्रत्यभिज्ञाशास्त्रं स्पन्दशास्त्रं च परस्परसहमतं शैवदर्शनशाखाद्वयं मन्यन्ते। तन्नैव समीचीनम्। स्वात्मनः। स्पन्दरूपत्वस्य साक्षाद्दर्शनेनैव स्वात्मप्रत्यभिज्ञा सम्पद्यते यतः। विवृतिविमर्शिन्यादिषूत्कृष्टेषु प्रत्यभिज्ञाग्रन्थेषु स्पन्दकारिका उपजीव्यत्वेनोद्धृताः भूरिशोऽभिनवगुप्तपादैः। तत एकस्यैव शास्त्रस्य विषयद्वयं स्पन्दः प्रत्यभिज्ञा चेति।**

~ तद्दृष्टिः — **प्रत्यभिज्ञातस्वात्मस्वरूपा योगिनः सर्वं स्वात्मतया पश्यन्तः सर्वत्र रमन्ते, न तेषां तापत्रयं क्वापि। सर्वत्रा ते स्वात्मारामाः सन्तः परचमत्कारपरवशास्तिष्ठन्ति। यथा—**

"तत्रानिशं निमज्जन्तस्तद्रसापानघूर्णिताः।
तद्रसीभूय तिष्ठामः शुद्धास्तापत्रयोज्झिताः।।"

(मा० वि० वा०2,238)

~ तन्माहात्म्यम्— **(1) परमेश्वरः स्वं शुद्धं संवित् स्वरूपं निजमैश्वर्यात्मकं च स्वभावं स्वेच्छया प्रगोप्य जीवरूपतया विचरन् यदा शिवयोगाद्यभ्यासतः पुनस्तत् प्रत्यभिजानाति तदैव कृतकृत्यतामिव यातीति सुमहन्माहात्म्यं प्रत्यभिज्ञायाः। यथा—**

"अहमित्यनेन सर्वप्रमातृजीवनरूपमेव सततं परामृश्यते, तच्च एवमभिहितस्वरूपोपदेशेन प्रत्यभिज्ञाय निजमीश्वरस्वरूपं परिपूर्णभावात्मिकां तृप्तिं विदन्ति।"

(प० त्री० वि०, पृ०,62)

~ वाञ्छनीया— **निजे स्वरूपे ज्ञाते सत्यज्ञातेऽपि सत्युभयथा तच्छिवरूपमेव। परमज्ञातं निजं शिवत्वं न शिवताचमत्कारफलदायि, ज्ञातं पुनः सुतरां तत् फलप्रदम्। गृहे विद्यमानो निधिरज्ञातः सन्नैव दारिद्र्यविनाशायालम्, ज्ञातमात्रः पुनः सद्यो दारिद्र्यविनाशि, उपयुक्तश्चासंख्यप्रकारकसुखदायि भवति स्वरूपप्रत्यभिज्ञावश्यमेव वाञ्छनीया भवति। यथा—**

"चिन्तामणिरविज्ञातो भवेच्चिन्तामणिः स्फुटम्।
तथापि कार्यभोगार्थं स ज्ञातः केन वार्यते।।"

(शि० दृ०7,4)

"वह्नि यद्यपि विज्ञातः प्रकाशादि करोत्यसौ।।
तथापि योजितो युक्त्या प्रकाशमधिकं गृहे।
दीपेनान्यतमेनापि न तथा वह्निराशिना।।"

(तदेव,7,10-11)

प्रत्यभिज्ञाकृत् — **ईश्वरप्रत्यभिज्ञाकार उत्पलदेवाचार्यः। यथा—**

यदुक्तं श्री प्रत्यभिज्ञाकृता —
'तत्र त्वर्णकादुपाधेस्तदाकारत्वं, चित्तत्त्वस्य तु निजैश्वर्यात्।'

(तं० आ० वि०, खं०2, पृ०,72)

प्रत्यभिज्ञानम् — **पूर्वं ज्ञातस्य मध्ये विस्मृतस्य पुनराभिमुख्ये सति स्मरणं "स एवायं देवदत्त" इति वत्, प्राक्कालिकया स्मृत्या साकमिदानीन्तनस्य प्रत्यक्षस्य मेलनात्मकोऽनुसन्धात्मा विमर्शः। यथा—**

"ज्ञातस्यापि मोहवशादज्ञातस्य इवाभिमुख्येन हृदयङ्गमीभावेन ज्ञानम्।"

(ई० प्र० वि०, वि० खं०1, पृ०,31)

"प्रतीपं ज्ञातस्यापि विस्मृतस्येव छादितस्येव पुनराभिमुख्येन न तु स्मर्यमाणतया, अपितु स्फुटत्वेन ज्ञानं प्रत्यभिज्ञानं स एवायमिति भातभासनानुसन्धाने स्थिरस्याधुनातनकालव्यापिनोऽपि ज्ञातत्वमेव।

.....। एवमात्मनि सततं मात्यपि मोहादावृत इव पुनराभिमुख्येन ज्ञानम्।"

(ई० प्र० वि० वि०, खं०1, पृ०,32)

प्रत्यभिज्ञायाम् — निर्देशोऽयमीश्वर प्रत्यभिज्ञाटीकां प्रति कदाचित्स्यात्। यथा—

"अत एव श्रीप्रत्यभिज्ञायाम्" —

'बुद्धिप्राणप्रसरेऽपि बाह्यदेशाद्युपादानानाहित- संकोचानां विश्वात्मस्वरूपलाभ एव।'

(शि० सू० वि०, पृ०,52)

विवृत्याख्यटीकायुतेश्वरप्रत्यभिज्ञा बहुधा प्रत्यभिज्ञेत्युक्ता गुरुभिः।

प्रत्यभिज्ञाहृदयम् — क्षेमराजेन प्रत्यभिज्ञाशास्त्रे प्रवेशार्थिनां कृते निर्मितः कश्चनातिगूढशैलिप्रधानो लघुर्ग्रन्थः सवृत्तिकः। यथा—

"समाप्तमिदं प्रत्यभिज्ञाहृदयम्।

कृतिस्तत्रभवन्महामाहेश्वराचार्यावर्यश्रीमदभिनवगुप्तपादपद्मोपजीविनः श्रीमतो राजानकक्षेमराजाचार्यस्य।"

(प्र० हृ०, पृ०,54)

"येषां वृत्तः शांकरः शक्तिपातो

येऽनभ्यासात्तीक्ष्णयुक्तिष्वयोग्याः।

शक्ता ज्ञातुं नेश्वर प्रत्यभिज्ञा-मुक्तस्तेषामेष तत्त्वोपदेशः।।"

(तदेव,पृ०,54)

प्रत्ययः — दीक्षासाफल्यविषये मूढजनविश्वासकरं प्रमाणम्। यथा—

"अथ दीक्षां ब्रुवे मूढजनाश्वासप्रदायिनीम्।।"

(तं० आ०20,1)

"निराचारेण दीक्षायां प्रत्ययस्तु न गद्यते।"

(तं० आ०20, 10)

प्रत्ययेन प्रमाणिता दीक्षा सप्रत्यया दीक्षेत्युच्यते।

प्रत्ययोद्भवः — पाश्वविकल्पपरम्परारूपः प्रत्ययसर्गः। यथा—

"अयमेवाचायो यः प्रत्ययसृष्टेरूद्भवो, यतस्तेनायं क्षेत्रज्ञतामस्वातन्त्र्यं प्रतिपद्यते। स प्रत्ययोद्भवः परमेश्वरसृष्टशब्दादिविषयपृष्ठ एव रागद्वेषाद्यात्मा उदेतीति। तदुक्तम्-

तेनास्वतन्त्रतामेति स च तन्मात्रगोचरः। इति"

(ई० प्र० वि० वि०, खं०, पृ०,3,388)

प्रत्यवमर्शः — (1) प्रकाशस्य जीवितकल्पो स्वविमर्शः। यथा—

"प्रकाशस्य प्रमातृरूपस्य प्रत्यवमर्श एव जीवितम् इति श्लोकचतुष्टयेन (11 14 यावत्)"

(ई० प्र० वि०, खं०1, पृ०,152)

स च प्रतीपम्-स्वात्माभिमुख्येन विमर्शः "अहम्" इति। यथा—

"प्रतीपम् आत्माभिमुख्येन ज्ञानं प्रकाशः प्रत्यभिज्ञा"

(ई० प्र० वि०, खं०1, पृ०,19-20)

(2) सङ्केतादिनिरपेक्ष आन्तरशब्दनस्वरूपः स्वात्मविमर्शः। यथा—

"प्रत्यवमर्शश्चान्तराभिलाषात्मकशब्दनस्वभावः

तच्च शब्दनं संकेतनिरपेक्षमेवाविच्छिन्नचमत्कारात्मकमन्तर्मुखशिरोनिर्देशप्रख्यम्, अकारादिमायीयसांकेतिकशब्दजीवितभूतं, नीलमिदं चैत्रोऽहमित्यादि-प्रत्यवमर्शान्तरभित्तिभूतत्वात्।"

(ई० प्र० वि०, खं०1, पृ०,205)

प्रत्यवमर्शात्मा : — ~ चितिः — चेतना। अहमिति चमत्कारात्मा स्वात्मविमर्शः चेतनस्य। यथा—

"चेतयतीत्यत्र या चितिः चितिक्रिया तस्याः प्रत्यवमर्शः स्वात्मचमत्कारलक्षण आत्मा स्वभावः। तथाहि घटेन स्वात्मनि न चमत्क्रियते, न परामृश्यते, न स्वात्मनि तेन प्रकाश्यतेनापरिच्छिन्नतया भास्यते, ततो न चेत्यते इत्युच्यते। चैत्रेण तु चवात्मन्यहमिति संरम्भोद्योगोल्लास विभूतियोगात् चमत्क्रियते, स्वात्मापरामृश्यते, स्वात्मन्येव प्रकाश्यते .... इत्यादि।"

(ई० प्र० वि०, खं०1, पृ०,204)

प्रत्याहारः ~ पातञ्जलः — **इन्द्रियाणां विषयौन्मुखताप्रवृत्तेर्बलान्नियमनम्। यथा—**

"स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः।"

(यो० सू०2,54)

~ अनुपयोगी — **पातञ्जलयोगे यः प्रत्यहारोऽसौ परित्याज्यानां विषयाणां प्रत्याहरणीयत्वविमर्शेन चित्ते तेषां स्थितिं स्थापयति तत्तद्विकल्पनबलात्। तेनासौ नोपयोगी स्वात्मसाक्षात्कारे। यथा—**

"प्रत्याहारश्च नामायमर्थेभ्योऽक्षधियां हि यः।

अनिबद्धस्य बन्धस्य तदन्तः किल कीलनम्।।"

(तं० आ०4,92)

~ शैवः — **शब्दादीन् विषयान् परित्यज्यान्तर्मुखेन चेतसा स्वात्म-संवित्तौ प्रवेशः। यथा—**

"शब्दादिगुणवृत्तिर्या चेतसा ह्यनुभूयते।।

त्यक्त्वा तां प्रविशेद् धाम परमं तत् स्वचेतसा।

प्रत्याहार इति प्रोक्तो भवपाश. निकृन्तकः।।"

(ने० तं०8,13-14)

प्रथमस्पन्दः — सृष्टेः प्राक् परमेश्वरस्य परः शाक्तः समुन्मेषः। यथा—

"सिसृक्षोः प्रथमस्पन्दः

शिवतत्त्वं विभोः स्मृतम्।"

(अ० प्र० पं०,18)

एष तावदन्तर्मुख एव स्पन्दःअस्यैव बहिर्मुखीभावः इच्छाशक्तिरूपः।

द्र० :- (प० प्रा०, पृ०,6-7)

"यदयमनुत्तरमूर्तिर्निजेच्छयाखिलमिदं जगत्स्रष्टुम्।
पस्पन्दे स स्पन्दः प्रथमः शिवतत्त्वमुच्यते तज्ज्ञैः।।"
(ष० त्रि० तं० सां०1)

प्रथमा — ~ तुटिः — **परतरस्यात्मस्वरूपसाक्षात्कारस्य तत् परतरं सोपानं यदनुत्तररूपत्वेन प्रकाशमानं सद् वर्णयितुं न शक्यते। पारमैश्वर्यस्य यद्बीजं तत्र निहितं, तस्य स्फुटाऽभिव्यक्तिर्द्वितीयस्यामेव तुटौ भवति। द्वितीय-तुटाववतरणमेव तुटिपात इति परिभाषितम्।**

~ इच्छायाः — **चिदानन्दावेशतः सृष्टिसम्पादनं प्रति यत् परमेश्वरस्यौन्मुख्यं तदिह विकासमप्राप्तेच्छेति मन्यते। ततः इच्छाया अविकसिताऽवस्था तस्याः प्रथमा तुटिरिति वा प्रथमो भाग इति वोच्यते। यथा—**

"यदा तु तस्य चिद्धर्मविभवामोदजृम्भया।।
विचित्ररचना-नानाकार्यसृष्टि प्रवर्तने।
भवत्युन्मुखिता चित्ता सेच्छायाः प्रथमा तुटिः।।"
(शि० दृ०1,7-8)

इच्छायाः अविकसिता प्रागवस्था इति।

"औन्मुख्यस्य य आभोगः स्थूलः सेच्छाव्यवस्थिता।।"
(तदेव,17)

प्रद्युम्नभट्टः —

द्र०:- 'भट्टप्रद्युम्नः' **इति।**

प्रधानतत्त्वम्— **(1) अणोर्यत्किञ्चिन्मात्रं ज्ञेयमिदमिति स्वात्मनः सकाशाद् भिन्नं सत् कलैव जनयति, तदेव हि प्रधानतत्त्वम्। यथा—**

"विशेषणतया योऽत्र सिञ्चिद्भागस्तदुत्थितम्
वेद्यमात्रं स्फुटं भिन्नं प्रधानं सूयते कला।।"
(तं० आ०9,214)

द्र०:- 'प्रकृतिः' ~ 'तत्त्वम्' **इति।**

~ असंख्यम् — **प्रतिपुरुषमिदमंशस्य भिन्नत्वात् प्रधानमसंख्यमेव, पुरुषाणामसंख्यत्वात्। या च प्रधानाविकारभूतानांधरादीनामखिलान् पुरुषान् प्रति सामान्यताऽसौ परमेश्वरस्य संयोजनवियोजन-स्वातन्त्र्यशक्तिविलासतः, शिविकोद्वहनादाविव। यथा—**

"तच्च (प्रधानं) भिन्नं प्रतिपुन्नियत्वादनेकमिति।"
(तं० आ० वि०, खं०6, पृ०,172)

आभासवाददृष्ट्यैतन्मतव्यम्।

~ गुणसामान्यात्मकम्— **अग्रिमायां सृष्टावणुस्तत्प्रमेयं यतो सुखात्मकतया, दुःखात्मकतया, मोहात्मकतया च पश्यति, ततो मूलेऽपि तत्तत्त्वं सुखदुःखमोहात्मकम्, त्रितयस्यास्य तत्र पृथक् पृथगवभासाभावात् तस्य तत् परं साम्यमित्यङ्गीक्रियते। सुखदुःखमोहानां सत्त्वरजस्तमोरूपगुण-त्रयात्मकत्वेन प्रसिद्धत्वात् प्रधानतत्त्वं गुणानां साम्यावस्थे-त्यङ्गीक्रियते। गुणानां यद्वैषम्येणाभिव्यज्यते तत्त्वजातं तत् करणतत्त्ववर्गः कार्यतत्त्ववर्गश्चेति। यथा—**

"एवं संवेद्यमात्रं यत् सुखदुःखविमोहतः।।
भोत्स्यते यत्ततः प्रोक्तं तत् साम्यात्मकमादितः।
सुखं सत्त्वं प्रकाशत्वात् प्रकाशो ह्लाद उच्यते।।
दुःख रजः क्रियात्मत्वात् क्रिया हि तदतत्क्रमः।
मोहस्तमो वरणकः प्रकाशाभावयोगतः।।"
(तं० आ०9,220-222)

~ प्रधानत्वं (तस्य) — **(1) सकलजडतत्त्वसृष्टिल-याधारत्वात् तत् प्रधानं तत्त्वम्। तत्रैव सर्वं प्रकर्षेणाधीयते, सृष्टौ च संहारे चेति व्युत्पत्तिरस्य पदस्य। यथा—**

"प्रधानत्वं प्रथमतो धीयते विश्वं सृष्टौ, यत्र च प्रलीनं सत् प्रलये .....
.....
सकलभेदानभिव्यक्तिरविभागरूपतेति।"
(ई० प्र० वि० वि० खं०3, पृ०302)

(2) गुणानां परा-उत्तरा स्थितिः प्रधानम्। यथा—

"गुणानां या पराकाष्ठा तत्प्रधानमिहोच्यते।।"
(स्व० तं०10,1068)

प्रधानादीनि— **प्रधानतत्त्वमारभ्य पृथ्वीतत्त्वं यावच्चतु-र्विंशतिसंख्याकानि भेददृष्ट्येदमितिरूपया विमृश्यानि जडतत्त्वानि एतानि सांख्यादावपि प्रसिद्धानि।**

~ कर्तृत्वहीनानि — **अचिद्रूपत्वान्नैषां कर्तृत्वम्। यथा—**

"अस्वतन्त्रस्य कर्तृत्वं न हि जातूपपद्यते।।"
(तं० आ०9,8)

~ प्रमेयाणि — **यद्यपि तन्मात्र-करण-प्रधानतत्त्वानि न केनापि पशुप्रमात्रा प्रमीयन्ते तथापि योगिज्ञानि प्रभृतिभिर्मीयमानत्वेनैतेषामपि प्रमेयत्वमङ्गीक्रियते। किञ्च प्रमेयत्वमनुमेयतयापि भवति शाब्दबोधतोऽपि चेति स्मर्तव्यम्। यथा —**

(क) "त्रयोविंशतिधा मेयं यत् कार्यकरणात्मकम्।"
(ई० प्र०,3-1-10)

(ख) "योगिमन्त्रतदीश्वरप्रभृतीनां हि भूततन्मात्रकरण-प्रधानवशीकारयोगित्वात् सर्वमेव प्रमेयम्। संसारिणामप्य-नुमानागमादिदिशा प्रमेयमेव, इतीयत् प्रमेयम्।"
(ई० प्र० वि०, खं०2, पृ०,211)

प्रपञ्चः — **(1) प्रकृष्टाः पञ्च यत्रासौ प्रपञ्चः शिवा-दिधरण्यन्तस्तत्त्वग्रामस्तदन्तवर्तिनश्च भुवनभावशरीराद्या असंख्याः पदार्थाः। पञ्च चात्र प्रकृष्टा अधिकारिणः सृष्ट्यादिपञ्चकृत्येषु नियुक्ताः पञ्चकारणानीति प्रसिद्धाः। ते च ब्रह्मा, विष्णू, रुद्रः, ईश्वरः सदाशिवश्चेति।**

(2) प्रकृष्टानि च पञ्चकृत्यानि सृष्टिस्थितिसंहार-पिधाना-अनुग्रहरूपाणि यत्र सततगत्या चलन्त्यसावेष एव प्रपञ्चः।

प्रपत्तिः — **शिवस्य सत्तायां निजसत्ताया विलयीकरणपूर्वकं स्वात्मनः शिवरूपतया यदपरोक्षसाक्षात्कारेण दर्शनं तदेव शैवदर्शने प्रपत्तिरिति परिभाव्यते। सा च समावेश इत्युच्यते। यथा—**

"प्रपद्ये शरीरादिकृत्रिमाहंकारगुणीकारेणैतादृशत्वमेव स्वात्मानं पराहन्ताचमत्कारस्वरूपं समाविशामि।"

(प० सा० वि०, पृ०,5)

वैष्णवी तु प्रपत्तिः परिपूर्णा शरणागतिरेव न तद्रूपतापत्तिः।

प्रबुद्धः — (1) स्वरूपसाक्षात्कारे सम्पन्नेऽपि मोहिकलासंस्कारवशात् साधकः कञ्चित् कालं लोकव्यवहारं कुर्वन् शिष्यानपि प्रबोधयति। शास्त्ररचनादि कार्याण्यपि करोति। अन्यथा हि वृत्ते स्वरूपसाक्षात्कारे, तत्कालमेव मुक्तः सन्नसौ यदि शरीरत्यागं विधाय सर्वथा शिवभावमासादयिष्यद्योगी तदा जिज्ञासूनां पथप्रदर्शनं कोऽकरिष्यत्।। स एष संसारे व्यवहारं कुर्वन्नपि विज्ञाततत्त्वो योगी प्रबुद्ध इति परिभाष्यते। यथा—

"व्यवहारसाधनप्रमाणप्रभावसमाश्वस्तहृदयस्तु मोहसङ्कल्पकलया परमेश्वरेणैव परोज्जिहीर्षादिकृत्य-निर्वाहणाय कंचित्कालं प्रयत्नसंधार्यमाणे देहादावहन्ताभिमाने प्रबुद्ध इत्यमिधीयते। विदितेन्द्रजालतत्त्व इव पश्यन्नपि तदभ्रान्त एव यतः। यस्य श्रुतचिन्ताभावना- तद्गाढताभिर्भेदउक्तः।"

(ई० प्र० वि० वि०, खं०3, पृ०,182-83)

अयमुत्कृष्टः प्रबुद्धः। यथा—

"प्रबुद्धः सर्वदा तिष्ठेज्ज्ञानेनालोच्य गोचरम्।
एकत्रारोपयेत् सर्वं ततोऽन्येन न पीड्यते।।"

(स्प० का०,44)

प्रबुद्धविषय एवोक्तमपरं कारिकाद्वयमपि। यथा—

"गुणादिस्पन्दनिष्यन्दाः सामान्यस्पन्दसंश्रयात्।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः।।
.....
.....
अतः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये।
जाग्रदेव निजं भावमचिरेणाधिगच्छति।।"

(तदेव० का०,19-21)

"प्रबुद्धस्य परशक्तिपातप्रभातालोक-विलुप्यमान-मायातमिस्रतया समुन्मिषद्विशदविवेकचक्षुषः क्षीयमाण- मोहवशात् अविजृम्भमाणमोहोत्साहसम्पदः...।"

(स्पं० वि०, पृ०,56)

"प्रबुद्धः पुनरीश्वरशक्तिपातप्रभावात् प्रकर्षेण लोकातिरिक्ताशयेन बुद्धः प्रत्युदितसम्यग्ज्ञानदृष्टिः।"

(तदेव,पृ०,79)

"ईश्वरशक्तिपातप्रबोधितानां तु सम्यगुपनतसद्गुरूपदेशक्रमेण अभ्यस्यतां प्रत्यासन्नस्वानुभवम्।"

(तदेव,पृ०,8-9)

द्र० 'साधकः ~ अवस्थाभेदभिन्नः इति।

(2) अवरोऽपि कश्चन प्रबुद्धकोटौ गणितस्तन्त्रे। स च समुद्भूतविवेकः संसारमसारं गणयन् मोक्षमार्गोन्मुख्यभाक्, परं न साक्षात्कृततत्त्वः अयं मोहनिद्रात एव बुद्धः। यथा—

"नित्यमुद्विग्नचित्तस्तु चिन्तयेद्वै पुनः पुनः।।
कथं मुक्तिर्भवेदस्मात्संसाराद् दुरतिक्रमात्।
एवं प्रबुद्धो देवेशि तल्लयस्तत्परायणः।।
सर्वारम्भविनिर्मुक्तः प्रमुक्तः प्रोच्यते तदा।
प्रबुद्धस्तु समाख्यातः .....।।"

(स्व० तं०11,119-121)

प्रबुद्ध एवोपाय परिशीलनैकतानः सन्नचिरेण स्वरूपमुपलभते नान्यः।"

(स्पं० वि०, पृ०,64)

(3) व्यापिन्यां शक्तौ प्रणवकलानुसन्धानपरः शिवयोगी। उदानाख्यस्य प्राणस्य चारे विशेषोऽयं शिवयोगिमात्रविषयः।

ऊर्ध्वगतौ व्यापिनीं शक्तिं प्राणात्मना रूपेण प्राप्तः सन् साधकः प्रबुद्ध इत्युच्यते इति तात्पर्यम्। यथा—

"व्यापिन्यंशे प्रबुद्धता।"

(स्व० तं०4,239)

~ सुखदुःखाद्यप्रभावितः — यथा जीवतः प्रबुद्धस्य योगिनः सुखदुःखेन बाधके, तथैव मरणावसरेऽपि ते अकिञ्चित्करे। यथा—

"अतो यथा प्रबुद्धस्य सुखदुःखविचित्रताः।
स्थितौ न घ्नन्ति मुक्तत्वं मरणेऽपि तथैव ताः।।"

(तं० आ०28,291)

प्रबुद्धाः ~ योगिनः — परापरायामवस्थायां भेदाभेदनिष्ठाः (महेश्वरानन्दस्य मतेन) यथा—

"भेदाभेदस्तु व्यवहारसर्वस्वं निर्वहन् विश्वस्य विश्वोत्तीर्णस्य च सम्बन्धस्वभावो विजृम्भते इति परापरावस्थाः। .... यासु क्रमात् सुप्रबुद्धः प्रबुद्धोऽप्रबुद्ध इति योगितारतम्यम्।"

(म० मं० प०, पृ०,47)

प्रबुद्धम् — सौषुप्तजाग्रत। जाग्रदवस्था भेदविशेषः। यथा—

"जाग्रज्जाग्रदबुद्धं तज्जाग्रत्स्वप्नस्तु बुद्धता।।
इत्यादि तुर्यातीतं तु सवर्गत्वात् पृथक् कुतः।
उक्तं च पिण्डगं जाग्रदबुद्धं बुद्धमेव च।।
प्रबुद्धं सुप्रबुद्धं च चतुर्विधमिदं स्मृतम्।"

(तं० आ०10,239-240)

"चतुर्विधं तु पिण्डस्थमबुद्धं बुद्धमेव च।
प्रबुद्धं सुप्रबुद्धं च .....।।"

(मा० वि० तं०2,43)

प्रबोधनाथः — नाथसम्प्रदायानुयायी कश्चन योगी। यथा—

"तदुक्तं तपस्विप्रबोधनाथेन : —
परतरतयापि रूपं यद्यत्कलयामि तत्तदधरं ते।
अधरतरापि न कलना सा काचिद्यत्र न स्थितास्यभितः।।
इति।"

(मा० वि०, पृ०,10)

प्रभाकौलम्— **कौलसम्प्रदायसम्बन्धि किमपि शास्त्रम्।**

द्र०:- (म० मं० प०, पृ०,68,107,118)

प्रमा— **(1) नवनवविषयोन्मुखस्य बोधात्मकस्य स्वात्मनो यस्तथाभूतोऽन्तर्विमर्शः तत्स्वभावेन नियतः स एव निजो बोधः प्रभा। यथा**—

"या तु तस्यैवान्तर्मुखात्म विमर्शरूपता प्रागुपपादिता तत्स्वभावेन केवलं विषयदशासङ्कुचितेन स एव बोधः फलं ..... यतो नीलप्रकाशस्ततो नीलभिदमिति।"

(ई० प्र० वि० खं०2, पृ०68-69)

द्र०:- 'प्रमाता' इति।

(2) प्रमाणफलरूपो बोधात्मा आभासः प्रमा। यथा—

"का खलु प्रमा-इति चेद् आह-स एव बोधात्मा आभासो मितिः प्रमाणस्य फलमिति सम्बन्धः।"

(ई० प्र० वि० वि०, खं०3, पृ०,72)

मितिरत्र प्रमितिः, सैव च प्रमेति।

(3) एकैकेन शब्देनाभिलपनीये देशकालाद्यभेदिनि विषये तथाभूत एव योऽन्तर्विमर्शो घटोऽयमस्तीत्यादिरूपः आभासभेदः, स एव प्रमेति, प्रमितिरिति चोच्यते। परमसौ प्रमितिस्तावत्कालमेव प्रमितिर्भवति यावदनया निश्चितेऽर्थे तत्स्वभावे वा बाधो न भवेत्। सति बाधे तस्याः प्रमितित्वं नास्ति। स प्राक्तनप्रमाणव्यापार- कालादेवोच्छिद्यते गतरात्रावपीदं रजतं नासीदितिवत्। यथा—

"सोऽन्तस्था विमर्शात्मा देशकालाद्यभेदिनि।
एकाभिधानविषये मितिर्वस्तुन्यबाधिता।।"

(ई० प्र०2-3-2)

प्रमाणम्— **प्रमायाः साधनं प्रमाणम्**

स च तथाभूतो नवनवः प्रमातुरा, आभासभेदो यस्य सामर्थ्यात् कस्याप्यन्यस्य भावाभावरूपस्याभासस्य सत्तायाः स्वभावस्य च व्यवस्था जायते। इदमस्ति, एवं लक्षणमेवंस्वभावं चास्तीति। यथा—

"इदमेतादृगित्येवं यद्वशाद् व्यवतिष्ठते।
वस्तु प्रमाणं तत् सोऽपि स्वाभासोऽभिनवोदयः।।"

(ई० प्र०2-3-1)

व्याख्यातमेतत्— "यस्य वशात्-सामर्थ्यात् वस्तु नीलसुखादिकं व्यवतिष्ठते-नियतां प्रकाशमर्यादां नातिवर्तते, इदमिति स्वरूपेण, एतादृगिति च विशेषणभूतनित्यानित्यत्वादिधर्मान्तरयोगेन, तल्लोके प्रमाणम्।"

(ई० प्र० वि०, खं०2, पृ०,64)

(2) मायाप्रमातृर्व्यतिरिक्तीकृत इव प्रमेयनिष्ठा नवनव आभासः प्रमाजनकत्वेन प्रमाणम्। यथा—

"देहाद्युपाधिसङ्कोचंवतोऽनन्तकालान्तर्मुखसंवेदन- लक्षणाद् मायाप्रमातुर्व्यतिरिक्तीकृत इव स आभासो बाह्यप्रमेयोन्मुखो यावद् वर्तते, तावत् प्रमेयगतदेशकालो- परक्ततया क्षणे क्षणे अन्यान्यरूपतया नवनवोदयः संस्तस्मिन्नेव स्वशब्दवाच्ये एकस्मिन्नेवानन्तकालव्यापि मायाप्रमातरि सम्बन्धितत्वेन निर्भासमानो मम नीलाद्यवभासो यस्यैव पीताद्यवभासः इत्यादिना रूपेण यः स प्रमाणमिति यतः स आभासः प्रमानिष्पत्तौ सव्यापारः।"

(ई० प्र० वि० वि०, खं०3, पृ०,72)

(3) अनधिगतार्थग्राही नवनवावभासो यद्वशादिदमिति एवं स्वभावमिति च निश्चयो जायते प्रमेयविषये। यथा—

"किञ्चानधिगतग्राहि मानं नवनवं यतः।"

(मा० वि० वा०1,638)

एतेनास्य शास्त्रस्य न्यायाद्यपेक्षया मीमांसामतपोषकत्वं प्रतीयते।

(4) अपवाद विशेषरूपतया कदाचिदधिगतोऽप्यर्थः प्रमातुः परिपूर्णाश्वाससिद्धये पुनः पुनः प्रमाणविषयतामापद्यते। यथा—

"दृष्ट्वा दृष्ट्वा समाश्लिष्य चिरं संचर्व्य चेतसा।
प्रियां यैः परितुष्येत किं ब्रूमः किल तान्प्रति।।"

(तं० आ०4,84)

"बहिः प्रमितेऽप्यर्थे प्रमातुराश्वासानुत्पादात् प्रमाणान्तराणामस्ति निर्बाध उपयोगः।"

(तं० आ० वि०, खं०3, पृ०,88)

"एकस्मिन्नेवार्थे प्रमातुरनैकैः प्रमाणैः प्रवृत्तैः सम्भूयापूर्वतया प्रकाशो ज़ायते- इत्येषां पूर्वापेक्षमुत्तरेषां प्रामाण्यम्, उत्तरापेक्षं च पूर्वेषाम्।"

(तं० आ० वि०, खं०3, पृ०,91)

"पूर्णेपं रूपेण धर्मिणमधिगम्य प्रमातुः पर्यन्ते समाश्वासो जायते।"

(तदेव,पृ०,92)

अनेनैव सिद्धान्तेन शाक्तोपायात्मकस्य शुद्धविकल्प-धाराप्रवाहाभ्यासस्य प्रामाण्यं स्वस्वरूपसाक्षात्कारे। न चाधिगतार्थविषयत्वेन मीमांसा शास्त्रेण विरोधो, यतस्तयुक्तं लक्षणं सर्व सामान्यलक्षणम्, एष पुनर्विषयोऽपवादरूप एव न सामान्यव्यवहाराधाररूपः इति।

~ कालीनये— **ज्ञानयोगात्मिकायां काल्युपासनायां प्रमातृप्रमेयापेक्षया- प्रमाणस्यैव व्यावहारिकं प्राधान्यम्। प्रमाता प्रमाणैरेव व्यवहरति। प्रमाणव्यापारमहिम्नैव च प्रमेयस्यावभासोऽपि भवति। ततः प्रमाणरूपतैव मुख्यतयोपास्या विमर्शशक्तेः। यथा**—

"प्रमाणं च प्रमातुरेव बहिर्मुखं रूपमिति तत्र प्रमाता तावदन्तर्भावमियात्। प्रमाणं नाम च ज्ञानम्। तच्चोपाश्रयशून्यं न क्वचिदपि सम्भवतीत्यवश्यमेव मेयाक्षेपेण वर्तते। इति तदप्यत्रान्तर्भूतमेव।"

(तं० आ० वि०, खं०3, पृ०,126)

~ तत्प्रवृत्ति-क्षेत्रम्— **प्रमेयजातमेव प्रमाणप्रवृत्तिक्षेत्रम् न प्रमातृ कदाचिद् देहादिरूपो जडः पदार्थः प्रमातृतयाभिमतः सन्नपि प्रमाणविषयतामुपगच्छति। परं न शुद्धः संविद्रूपः प्रमाता शिवः कथञ्चिदपि। उपदेशाद्यवसरे या तस्य प्रमेयताऽसौ केवलं तस्य स्वप्रकाशताया निरोधकारिण्या**

आवरणशक्तेरपनोदनायैव, न तस्य साधनाय, प्रकाशनाय वा। एवमेव तत् सिद्धिकारकाणि यान्यनुमानादीनि तेषामप्येषैव गतिः। यथा—

"विश्ववैचित्र्यचित्रस्य समभित्तितलोपमे।
विरूद्धाभावसंस्पर्शे परमार्थसतीश्वरे।।
प्रमातरि पुराणे तु सर्वदाऽऽमातविग्रहे।
किं प्रमाणं नवाभासः सर्वप्रमितिभागिनि।।
अप्रवर्तितपूर्वोऽत्र केवलं मूढतावशात्।
शक्तिप्रकाशेनेशादि व्यवहारः प्रवर्त्यते।।"

(ई० प्र०2-3-15-17)

"कर्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः।।"

(तदेव1,2)

"यथा यथा प्रमेयभूमिकापादनन्यक्कारकलङ्कपरिहारः शक्यस्तथा तथा यावद्गति यतितव्यम् इति भूतविभक्त्या निर्देशः कृतः उपदेशावसरे हि सर्वात्मना तावत् सा प्रमेयता अस्य परिहर्त्तुमशक्या।"

(ई० प्र० वि०, खं०1, पृ०,33)

~ नवनवोदयम्— मायाप्रमातुर्नवनवोदयः प्रमेयोन्मुखो निज एवाभासः प्रमाणम्। यथा—

"शून्यधीप्राणदेहाद्युपाध्याश्रयस्वीकारात्मक- संकोचपरिग्रह-संकुचितान्माया प्रमातुरनन्तकालान्त- र्मुखसंवेदनरूपात् स प्रमाणाभिमत आभासो यावत् प्रमेयान्मुखतास्वभावस्तावत् प्रमेयस्य देशकालाकारा- भाससम्भेदवत्त्वात् सोऽपि तथैव क्षणे क्षणे अन्यान्याभासरूपः स्रष्टव्यः ..... तेन नवनवोदय इत्युक्तं भवति। इत्येवं स्वत्वेनाभासमानो य आभासो नवनवप्रमेयौन्मुख्यान्नव- नवोदयः स प्रमाणं, यतः प्रमां विधत्ते।"

(ई० प्र० वि०, खं०2, पृ०,66-67)

"परिमितप्रमातृलग्नो नवनवाभासः प्रमेयोन्मुखः प्रमाणमित्युक्तम्।"

(ई० प्र० वि०, खं०2, पृ०,122)

द्र०:- (स्व० तं० उ०, प०2, पृ०,44)

"प्रमाणं नामाभिनवाभासरूपं प्रमातरि प्रमितिलक्षणां विश्रान्तिं विदधत् प्रमाणं भवति।"

(ई० प्र० वि०, खं०2, पृ०,125)

द्र०:- (ई० प्र० वि० वि०, खं०3, पृ०,161)

~ सावधिकम्— तावदेव प्रमाणस्य प्रमाण्यं यावत्तदीयस्य प्रमात्मकस्य फलस्य बाधकेन बलवत्तरेण प्रमाणान्तरेणोन्मूलनं न विधीयते। सत्युन्मूलने प्राक् कालादेवास्य प्रमाणता निवर्तते। तद्यथा शुक्तिरियमिति निश्चये जाते प्राक्तनं तद्विषयं रजतज्ञानं तत् कालादारभ्यैव बाधितं भवति पूर्वमपीदं रजतं नासीदिति। यथा—

"स हि संस्कारयोगादात्मानमभिमतप्रसिद्धार्थक्रिया-प्राप्तिपर्यन्तमनुवर्तयन् अनुन्मूलितवृत्तिः स्थिरः सन् तथा भवति। मध्ये पुनरुन्मूलनं चेत् सहते, न तर्ह्यसौ तथा विमर्शः। नायं विमर्शः पूर्वमपि। एकेनान्तर्मुखे न वपुषा पूर्वमेव तस्य निर्मूलनात्। स्वसंविदत्र च साक्षिणी। तदैव "नेदं रजतम्" इति वृत्तपूर्वस्यैव विमर्शस्या विमर्शीकरणं संवेद्यते।"

(ई० प्र० वि०, खं०2, पृ०,78)

"यद् यदबाधितस्थैर्यम् अत एवाप्रतिहवानुवृत्तिकं विमर्शफलं विद्यते, ततद्बोधरूपं बोध्यनिष्ठं प्रमातृस्वरूपविश्रान्तं प्रमाणमिति।"

(ई० प्र० वि०, खं०2, पृ०,78)

स्थैर्यस्य या बाधा सा प्रमाणस्य प्रमाणत्वं प्राक्कालादेव बाधते।

~ स्वाभासरूपम्—

द्र०:- 'नवनवोदयम्' इति।

प्रमाणता— प्रमातृणां शक्तेः प्रक्षोभः प्रमाणतां तेन प्रमातृशक्तिरेवास्या उद्गमस्थानम्। यथा—

"सप्तधेत्थं प्रमातृत्वं तत्क्षोभो मानता तथा।"

(तं० आ०10,181)

द्र० 'प्रमाता' इति।

(प०प्रा०पृ०,5 इति च)

प्रमाणदर्शनम्— यद्यच्च दर्शनं मुख्यतया प्रमाणाश्रितमेव, प्रमाणस्यैव च यत्र प्राधान्यं न प्रमेयस्य नापि प्रमातुस्तत्तत् प्रमाणदर्शनम्। सर्वं तावत् पाश्चात्य-दर्शनं प्रमाणदर्शनमेव। भारतेऽपि न्यायसांख्य बौद्धादिदर्शनजातं प्रमाणदर्शनवर्गीयमिति ह्यस्मद्गुरवः श्रीमदमृतवाग्भवाचार्य महोदयाः। तर्क-प्रधानमद्वैतवेदान्तदर्शनमपि तेषां विचारे प्रमाणदर्शनमेव। औपनिषदो वेदान्तश्च तदुत्तीर्णः सन् प्रमातृदर्शनमध्ये गणनार्हः। अद्वैतपरे शैवशाक्तदर्शने तु मुख्ये प्रमातृदर्शने।

प्रमाणप्रमेयतावैचित्र्यम्— माहामायाविद्यादीन्यूर्ध्वतत्त्वानि प्रमाणानि मायाप्रकृत्यादीनि च तत् प्रमेयजातानि। मायायामपि अन्तः करणानि प्रमाणानि तन्मात्रभूतादीनि तत् प्रमेयभूतानि। स्थूलायां सृष्टौ चक्षुरादीनि प्रमाणानि, रूपादीनि प्रमेयतत्त्वानि। इत्थमूर्ध्वोर्ध्वतत्त्वानां प्रमातृत्वमधराधराणां च प्रमेयत्वम्। मध्यस्थानां च प्रमाणत्वं सिद्ध्यति तत्र तत्र। यथा—

"ऊर्ध्वोर्ध्वतत्त्वव्रातस्य मानत्वे च निरूपिते।
अधराधरतत्त्वांशो मेयतामवलम्बते।।"

(मा० वि० वा०1,872)

प्रमाणविषय :— नियतदेशकालयोः स्वालक्षण्यार्पणप्रवणत्वात् तत्सङ्कोचरहिते सामान्यायमान एव घटादौ विकल्पात्मक-प्रमाणव्यापारः। यथा—

"ततो देशकालाभासयोः स्वलक्षणत्वार्पणप्रणवयोरना-मिश्रणात् सामान्यायमाने आभासे प्रमाणं प्रवर्तते।"

(ई० प्र० वि०, खं०2, पृ०,71)

प्रमाणव्यापारः — प्रमातृभित्तिलग्नः प्रमाणानामाऽऽभास-स्तद्भित्ति लग्नमेव तत्तन्नीलसुखादिप्रमेयमाभासयँस्तां तां प्रमां विधत्ते। यथा—

"पूर्वसिद्धे प्रमातरि सतितल्लग्न प्रकाशान्तर्भूत-विमर्शमयीमभूतपूर्वां प्रमेयस्य सिद्धिं वितरति प्रमाणम्।"
(ई० प्र० वि०, खं०2, पृ०,122)

~ आधारतः — **प्रकाशरूपमात्मतत्त्वमाश्रित्यैव प्रमाणानां प्रमाणता विजृम्भते नान्यथा। यथा—**

"प्रमाणान्यपि वस्तूनां जीवितं यानि तन्वते।
तेषामपि परो जीवः स एव परमेश्वरः।।"
(तं० आ०1,55)

~ रुच्यादितः — **प्रमातुरेव प्राधान्यात् तस्य रुचिं, योग्यतां, प्रयोजनं शाब्दव्युत्पत्तिमेवम्प्रायं चान्यदनुरुन्धानमेव प्रमाणं प्रमां तत्र तत्र विधत्ते। यथा—**

"यथारुचि यथार्थित्वं यथाव्युत्पत्तिमिद्यते।
आभासोऽप्यर्थ एकस्मिन्ननुसन्धानसाधिते।।"
(ई० प्र०2,2-3-3)

उक्तञ्च :— "किञ्चिदप्यत्र नास्तीति हृद्भङ्गमिवापद्यमानो घटं पश्यन् "अस्तीदम्" इति सत्वाभासमेव पश्यति। अपरान् आभासान् नाम्नापि तु नाद्रियते, तथा उदकाहरणार्थी घटाभासम्, स्वतन्त्रनयनानयनयोग्यवस्त्वर्थी द्रव्याभासम्, मूल्याद्यर्थी काञ्चनावभासम्, हृद्यतार्थी औज्ज्वल्याभासम्, आदिग्रहणाद् दृढतरभावार्थी दाढर्या- भासमिति द्रष्टव्यम्।"
(ई० प्र० वि०, खं०2, पृ०,91-92)

प्रमाणस्तुतिः — (1) विद्यागुरुनाम्नाचार्येण निर्मितं किमपि स्तोत्रम्। यथा—

"श्रीमान् विद्यागुरुस्त्वाह प्रमाणस्तुतिदर्शने।"
(तं० आ०10,115)

(2) विद्यापतिना निर्मितं किमपि स्तोत्रं समुद्धतपंक्ति तन्त्रालोके। यथा—

"श्रीविद्याधिपतिश्चाह मानस्तोत्रे तदीदृशम्।।"
(तं० आ०14,9)

श्री विद्यागुरुरेवात्र श्रीविद्याधिपतिरिति निर्दिष्टो वेदितव्यः। वस्तुतो विद्यापतिरित्येवास्याभिधानम्।

द्र०:- (तं० आ०13,128-29; 9,173)
(तं० आ० वि०, खं०6, पृ०,135)

प्रमाता— (1) प्रमाणोपयोगेन प्रमेयज्ञाने स्वतन्त्रः कर्ता।

(2) प्रमासमूहानां संयोजन-वियोजनादिकरणे समर्थः स्वतन्त्रोऽहम्प्रत्यवमर्शः। यथा—

"बहिर्मुखप्रकाशात्मकविज्ञानस्वभावस्य प्रमाणवर्गस्य योऽन्तः प्रत्याभासम् "इदमिदमिति" अनन्तो विकल्पमयो विमर्शात्मा प्रमासमूहः, तत्र संयोजनवियोजनविश्रमणाद्यनेक प्रकारस्वातन्त्र्य-परिपूर्णः शुद्धोऽहम्प्रत्यवमर्शमयः प्रमाता।"
(ई० प्र० वि०, खं०1, पृ०,279-80)

"सर्वसंविन्नदी भेदाभिन्नविश्रान्तिभूमये।
नमः प्रमातृवपुषे शिवचैतन्यसिन्धवे।।"
(उद्ध०:- मा० वि०, पृ०,12)

(3) प्रमाणां परस्परं संयोजनवियोजनादिवैचित्र्यकारी स्वतन्त्रः प्रमाकर्तृत्वेन प्रसिद्धः संवित्सारोऽहमिति। यथा—

"प्रमाता नाम प्रमाणादतिरिक्तः प्रमासु स्वतन्त्रः संयोजनवियोजनाद्याधारवशात् कर्ता दर्शितः।"
(ई० प्र० वि०, खं०1, पृ०,243)

~ अशुद्धः — **स च सकलः, प्रलयाकलश्चेति। विज्ञानाकलोऽशत एवाशुद्धः।**

द्र० 'अशुद्धाः ~ प्रमातारः इति।

~ एक एव— **(1) सप्तप्रमातृरूपतयावभासमानोऽपि वस्तुत एक एव शिवः सर्वत्र प्रमाता। यथा—**

"वस्तुतः पुनरेक एव चित्स्वातन्त्र्यानन्दविश्रान्तः प्रमाता।"
(तं० सा०, पृ०,94)

(2) "पूर्वापरकोटिमध्ये बहुधा प्रकाशामानोऽहमिति विमर्शमयः प्रमाता वस्तुत एक एव स्वकल्पितमायादिव-शादनेकतयावभासते। यथा—

"एकैव चानुसन्धानात् सा प्रोक्ता सर्वसंविदाम्।
स्वसंवेदनपर्यायमातृतत्त्वमनादि तत्।।"
(अ० प्र० सि०25)

~ प्रमाणाविषयः — **प्रमेयेष्वेव प्रमाणस्य गतिः, सापि प्रमातुः स्वातन्त्र्यशक्तेः। प्रमातरि तु न कथमपि प्रमाणस्यावकाशः, स हि स्वयमेव स्वत एव प्रकाशते ऽहमिति। यथा—**

"प्रमातृतास्पदे तत्र प्रमाणं नोपयुज्यते।।"
(म० मं० प०, पृ०,15)

"यत्प्रभावात् प्रमाणानां प्रमाणत्वव्यवस्थितिः।
तत्रैव तदपेक्षेति न किं व्यर्थं वचो भवेत्।।
.....
.....
.....
अगोचरः प्रमाणानामत आत्मा महेश्वरः।।"
(तदेव,पृ०,16)

"प्रमातरि पुराणे तु सर्वदाभातविग्रहे।
कि प्रमाणं नवाभासः सर्वप्रमितिभागिति।।"
(ई० प्र०,2-3-16)

श्री तन्त्रालोकेऽपि :—

"प्रमाणान्यपि वस्तूनां जीवितं यानि तन्वते।
तेषामपि परो जीवः स एवं परमेश्वरः।।"
(तं० आ०1,55)

स एष शिवप्रमातैव प्रमाणाविषयो, न पुनः सकलाद्याः। ते हि प्रमेयतोचिता अपि प्रमातृत्वेन केवलं गण्यन्ते तत उत्तरोत्तरैः प्रमातृवर्गैः प्रमेया एव, विशेषतस्तत्त्वभेदनक्रमे।

~ मायीयः — **स्वतन्त्रा संविदेव ज्ञेयभूतदेहादितादात्म्यकालुष्यो परागवशान्मायीयः प्रमाता। यथा—**

"संविदेव तु विज्ञेयतादात्म्यादनपेक्षिणी।।
स्वतन्त्रत्वात् प्रमातोक्ता विचित्रो ज्ञेयभेदतः।"
(तं० आ०3,123-24)

~ शुद्धः — शुद्धविद्यामारभ्य शिवान्तं ये मन्त्राः (विद्येश्वराः) मन्त्रेश्वराः, मन्त्रमहेश्वराः, शाक्ताः (अकलाः), शाम्भवाश्चाकलाः सर्वेऽपि प्रमातृवर्गाः शुद्धा, शुद्धेऽध्वनि विद्यमानाः। यथा—

"एषां सामान्यरूपाणां विशेषानुगतिविषयाः पञ्च तद्यथा- शाम्भवाः, शाक्ताः, मन्त्रमहेश्वराः, मन्त्रेश्वराः मन्त्राः इति शुद्धोऽध्वा।"

(तं० सा०, प०,74-75)

~ सप्तप्रकारः — तत्र शिवादिमन्त्रान्ताश्चत्वारः शुद्धाः, विज्ञानाकलः शुद्धाशुद्धः, प्रलयाकलः सकलश्चाशुद्धौ। सङ्कलनया सप्तवर्गभिन्नाः प्रमातरः।

प्रमातृतत्त्वम्— अनुभवविकल्पस्मृत्युत्पेक्षादिलोकव्यवहारे व्यापकत्वेन भित्तित्वेन च स्थितं विविधबाह्याभ्यन्तरविषयावभासरचितं स्वसंवेदनरूपं संवित्तत्त्वम्। यथा—

"यदेव स्मृतिस्वसंवेदनम् तदेवानुभवस्य स्वसंवेदनम्, न त्वपरं स्वसंवेदनव्यतिरिक्तं प्रत्यक्षमनुमानादिकं वा तत्र क्रमते। ततश्च तावत्कालव्यापि अविच्छिन्नमेकं यत् स्व-संवेदनं तदेव प्रमातृतत्त्वम् इति सिद्धम्।"

(ई० प्र० वि०, खं०1, पृ०,289)

प्रमातृता— व्याख्याता यथा—

"प्रमातृता संविद्रूपता यया चैत्रः प्रमाता मैत्रः प्रमातेतिव्यवहारः।"

(ई० प्र० वि० वि०, खं०1, पृ०,106)

द्र०:- 'प्रमातृत्वम्' इति।

प्रमातृत्वम्— प्रमाणात्मकेषु ज्ञानेषु तेषां विषयेषु च यथेच्छं संयोजनवियोजनकारित्वम्। एकेनैवानुभवेनानुभूताद् बहुतरात् विषयजातात् किञ्चिदेव विच्छिद्य स्मर्यते। अनेकैरनुभवैरनुभूता विषया एकदैव मिश्रतया स्मर्यन्ते। यथा—

"एतदेव वेदनाधिकं वेदितृत्वं वेदनेषु संयोजनवियोजनयोर्यथारुचि करणं, स्वातन्त्र्यं, कर्तृत्वं च एतदेवोच्यते।"

(ई० प्र० वि०, खं०1, पृ०,129)

प्रमातृदर्शनम्— अद्वैतशैवदर्शनम्। अत्र दर्शने प्रमातुरेव स्वभावस्य प्रतिपादनम्, योगसाधनापक्षे च प्रमातृस्वरूपस्यैवापरोक्षः साक्षात्कारः इति प्रमातृ-विषयं दर्शनमेतत् उभयत्रदर्शनम्। यथा—

"सांव्यवहारिके च प्रमाणे नास्मांक भरः प्रकृतं हि अस्माकमीश्वरस्वरूपं, तच्च स्वप्रकाशमेवान्यप्रमेयोपरोधेऽपि नोपरुध्यतइत्युक्तमसकृत्।"

(ई० प्र० वि०, खं०2, पृ०,157)

"कर्तरिज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः।।
किन्तु मोहवशादस्मिन् दृष्टेऽप्यनुपलक्षिते।
शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते।।"

(ई० प्र०1-1-2-3)

"ननु एवंभूतो यद्ययं प्रमाता, तत्रैव तर्हि प्रमाणोपन्यासे प्रयतनीयं न प्रमेये। यदाह- "प्रधाने हि यत्नः फलवान्" इति। ..... एवम्भूतं हि प्रमाणं तदेवम्भूते हि भगवति कथं क्रमतामिति।"

(ई० प्र० वि०, खं०2, पृ०,121)

प्राधान्येन प्रमातृतत्त्वस्य प्रमातृस्वभावस्य च प्रतिपादकं दर्शनं प्रमातृदर्शनमित्यस्मद्गुरवः श्री मदमृतवाग्भवाचार्यमहोदयाः। मुख्यं च प्रमातृदर्शनमद्वैतशैवशास्त्रं त्र्यम्बकादित्यप्रवर्तितं कश्मीरमण्डलं च विकासमुपगतम्। वेदान्तशास्त्रमपि प्रमातृदर्शनम्। परंशाङ्करं विवर्तवादपरमद्वैतदर्शनं प्रमातृदर्शनं सदपि प्रमाणदर्शनतोन्मुखम्, तत्र स्वसंवेदनापेक्षया तर्कस्य विशेषमहत्त्वदर्शनात्।

प्रमातृभेदबीजम्— (1) तत्तच्छक्तिसंभिन्नताकारणकः एव सप्तप्रमातृणां परस्परं भेदः। यथा—

"तदुपरागकृतश्च शक्तिमत्सु प्रमातृषु भेदः, करणभेदस्य कर्तृभेदपर्यवसानात्, शक्तेरेव चाव्यतिरिक्तायाः करणीकर्तुं शक्तत्वात्, नान्यस्य, अनवस्थाद्यापत्तेः।"

(तं० सा०, पृ०, 94)

(2) शैवदर्शनग्रन्थेषु सर्वेष्वपि सप्त एव वर्गाः प्रमातृणाम्। तत्र विद्येश्वरा एव मन्त्रा इत्यप्युच्यन्ते। अनाश्रितशिवाधिष्ठिताः प्रमातारो अकला इति समाख्याताः महार्थमञ्जरीपरिमलकारो महेश्वरानन्दः सर्वत्राभिनवगुप्ताचार्यमेवानुसरत्येवंविधेषु सिद्धान्तविषयेषु। ततो न निश्चेतुं शक्यते यत् परिमले ३२ तमे पृष्ठे कथमन्यथैव प्रमातृवर्गप्रतिपादनं कृतं वर्तते। तत्र तावद्विद्येश्वराः मन्त्राश्च पृथक् पृथग् गणिताः येन मन्त्रमहेश्वरं यावदेवसप्तसंख्या पूरिता। "तदुपक्रमे-मन्त्रेश्वरा" इत्यनन्तरं यद् "विद्येश्वराश्च" इति पदद्वयं तत्र तल्लेखकप्रमादेन प्रक्षिप्तमिति मन्तव्यम्, पूर्वं विद्येश्वराणामेकमलयुक्तत्वेन प्रतिपादित्वात्। यथा—

"विद्येश्वराणामपि मायीयमात्रानुबन्धादेकमलत्वमेव, मलक्षयोपलक्षिता मन्त्रादयः। तत्रापि तत्क्षयौन्मुख्यमात्रे मन्त्राः, तदुपक्रमे मन्त्रेश्वरा (विद्येश्वराश्च) येषामीश्वरोऽभिमन्ता। क्षीयमाणकलत्वे मन्त्रमहेश्वराः येषां च सदाशिवोऽधिष्ठाता। वासनामात्रोपरक्तमलतायामनाश्रितशिवतत्त्वम्। सर्वाकारानुत्पन्नमलोल्लासस्तु भगवान् परमशिवभट्टारक एवेति प्रमातृवैचित्र्यम्।"

(म० मं० प०, पृ०,32)

सूक्ष्मतरमिवैतद् विश्लेषणं प्रतिभाति। सूक्ष्मसूक्ष्मतरविश्लेषणेन प्रमेयतत्त्वानां प्रमातृतत्त्वानां च संख्यायां वृद्धेराचार्याभिनवगुप्तेनापि स्वीकृतत्वात्।

~ संख्यातः — यद्यपि मुख्यतया सप्तैव प्रमातारस्तथापि तद्गतानां मलांशानां विविधसांकर्यसम्भवात्तेषामनन्तप्रकारत्वेनानन्तप्रकारा एव प्रमातारः। परं प्रमातृतत्त्वाध्वधारणानुसारं सप्त एव। यथा—

"तत्राप्यश्वान्तरभेदेन गुणमुख्यताभेदेन विकल्पसमुच्चयतादिभेदेन चानन्तप्रकारत्वम्।"

(ई० प्र० वि०, खं०,299)

प्रमातृशक्तिः — **प्रमातुर्यः स्वव्यापारकलनानुकूलो विशिष्टः स्पन्दः स एव तस्य शक्तिः। यथा—**

"अस्यैव सप्तकस्य स्वस्वव्यापारप्रकल्पने।
प्रक्षोभो यस्तदेवोक्तं शक्तीनां सप्तकं स्फुटम्।।"
(तं० आ०10,178)

प्रमातृषट्कोल्लासः — **शुद्धाशुद्धरूपत्रिकद्वयात्मकः। तत्र मन्त्रमहेश्वराः मन्त्रेश्वराः, मन्त्रा इति त्रिकं शुद्धम्। विज्ञानाकलः प्रलयाकलः, सकलश्चेति त्रिकमशुद्धम्। यथा—**

"तच्छक्तिश्चेच्छाज्ञानक्रियात्मिका प्रस्फुरन्ती शुद्धाशुद्धरूपतया प्रमातृषट्कमुल्लासयति। तत्र मन्त्रमहेश्वरादेस्त्रयस्य ग्राह्याद्यनपेक्षणाच्छुद्धं ग्रहीतृत्वम्। विज्ञानाकलादेस्तु त्रयस्य ग्राह्याद्यपेक्षणादशुद्धं ग्रहीतृत्वम्।"
(तं० आ० वि०, खं०7, पृ०,124)

शिवप्रमाताऽत्र न गणितः।

प्रमाप्रमाणे— **एक एव विषयावभासो विषयोन्मुखप्रकाशरूपतायां प्रमाणं स्वात्मतोन्मुखविमर्शरूपतायां च प्रमा इति। स्पष्टीकृतमिदं यथा—**

"न च पर्यायता, यतो बाह्योन्मुखत्वेन प्रकाशरूपतया तत् प्रमाणम्, अन्तर्मुखात्मना विमर्शरूपेण केवलं विषयोपरागसङ्कुचितेन शब्दनात्मना फलम्।"
(ई० प्र० वि० वि०, खं०3, पृ०,72)

फलं च प्रमारूपत्वम्।

प्रमाप्राधान्यम्— **(1) प्रमेयप्रमाणद्वारा मायाप्रमात्रा प्रमीयमाणं सत् पर्यन्ते प्रमायामेव विश्राम्यति "पश्यामि" इत्यादि स्वरूपायाम्। ततः सैव यर्पन्तस्था तुरीयरूपा स्वात्मविश्रान्ता संवित्, न प्रमाणादित्रयम्, ततस्तस्या एव प्राधान्यम्, स्फुटं च तत् संवेद्यते योगिभिः। यथा—**

"रूपं दृशाऽहमित्यंशत्रयमुत्तीर्य वर्तते।
द्वारमात्राश्रितोपाया पश्यामीत्यनुपायिका।।
प्रमातृता स्वतन्त्रत्वरूपा सेयं प्रकाशते।
संवित्तुरीयरूपैवं प्रकाशात्मा स्वयं च सा।।"
(तं० आ०10,268-269)

"स्वातन्त्र्यमयी परप्रमातृता सेति वाक्यार्थः।"
(तं० आ० वि०, खं०7, पृ०,183)

(2) "दृष्टम्" इति स्वसंविद्विश्रान्तिः प्रमा। तस्य यः समावेशस्तेन यत्तादात्म्यं तत् तस्याः प्रमातृत्वम्। तस्य समावेशस्य य उपरागस्तेन प्रमाणतायाः आभासः। प्रमासमावेशनैकट्यमात्रतः प्रमेयता इति प्रमाश्रितमेवेतरत् त्रयम्। यथा—

"तत् समावेशतादात्म्ये मातृत्वं भवति स्फुटम्।
तत् समावेशोपरागान्मानत्वं मेयता पुनः।।
तत् समावेशनैकट्यात् त्रयं तत्तदनुग्रहात्।"
(तं० आ०10,270-271)

प्रमाविश्रान्तिः — **प्रमेयं प्रमाणे, प्रमाणं च प्रमातरि, स च प्रमायां यतो विश्राम्यति ततः सैव परिपूर्णा सर्वात्मिका च। यथा—**

"मेयं माने मातरि तत् सोऽपि तस्यां मितौ स्फुटम्।
विश्राम्यतीति सैवैषा देवी विश्वैकजीवितम्।।"
(तं० आ०10,267)

प्रमेयता— **पराधीनप्रकाशता। यथा—**

"..... ह्यन्याधीन प्रकाशता।
मेयता .....।।"
(तं० आ०10,113-114)

~ तद्विशेषाः — **न खलु प्रमेयं किमपि सर्वेण प्रमात्रैकाकारतया गृह्यते। अपि तु रूचिम्, प्रयोजनं, शाब्दं व्यवहारं चानुरूध्य सर्वस्य पृथक् पृथगाकाराः प्रमाः समुदयन्त एकस्मिन्नपि वस्तुनि। यथा—**

"यथारुचि यथार्थित्वं यथाव्युत्पत्ति भिद्यते।
आभासोऽप्यर्थ एकस्मिन्ननुसन्धानसाधिते।।"
(ई० प्र०,2-3-3)

"तथाहि स्वतन्त्रं वा विवेचनम्, अर्थित्वानुसारेण वा, पूर्वप्रसिद्ध्युपजीवनेन वा। तत्र त्रिधापि विवेचने क्रियमाणे पृथगेव भान्त्याभासाः।"
(ई० प्र० वि०, खं०2, पृ०,86)

प्रमेयदर्शनम्— **प्रमाणस्योपयोगेन मुख्यतया प्रमेयवस्तुन एव विवेचकं दर्शनं प्रमेयदर्शनम्। वैशेषिकं, मीमांसाशास्त्रम्, अर्हद्दर्शनं च स्फुटानि प्रमेयदर्शनानि।**

प्रमेय-प्रक्रियाः — **(1) पौत्रिके विधौ क्रियाऽम्बरविशेषः। यथा—**

"..... पौत्रिके विधौ।
प्रमेयप्रक्रिया .....।।"
(तं० आ०1,280-281)

(2) भैरवतादात्म्यदायिनी इति कर्तव्यता। यथा :—

"अथ भैरवतादात्म्यदायिनीं प्रक्रियां ब्रुवे।"
(तं० आ०17,1)

(3) पुत्रकदीक्षाशेषरूपं क्रियाजालकम्।

प्रमेयम् (मेयम्) — **मायाप्रमातृभित्तिलग्नेन प्रमाणेन तद्भित्तिलग्नमेव यद्विषयत्वेनाभास्यते तत् प्रमेयम्।**

द्र०:- 'प्रमाता' इति।

~ तत्प्रतिष्ठास्पदम्— **"इदमित्यस्य विच्छिन्न-विमर्शस्य कृतार्थता। यथा—**

या स्व स्वरूपे विश्रान्तिर्विमर्शः सोऽहमित्ययम्।।"
(अ० प्र० सि०,15)

एतेनैतदुक्तं भवति यच्चित्प्रकाशोऽहमित्यात्मरूपप्रमातृतया सततं प्रकाशमान एव जडानामिहमितिप्रकाशमानानां प्रतिष्ठास्पदम्। ततो क्षणिकाच्चित्तप्रवाहादतिरिक्तस्य चित्स्वरूपस्य नित्यस्यात्मनः सिद्धिः।

~ तदाधारः — **प्रमातृप्रकाश एव ह्याधारः प्रमाणतायाः तत्साचिव्येनैव च प्रमातृभित्तावेव प्रमेयस्याभासः। इत्थं प्रमात्रैवोभयोराधारः। यथा—**

"न हि मातृप्रकाशभित्तिं विना मानप्रकाशाच्छुरणं विना वा मेयप्रकाशः कश्चित् प्रमात्रैव हि चिद्रसाश्यानीभावात्ममेयमाभास्यते, आभास्यमानं च प्रमाणप्रकाशाच्छुरितमेव भवति।"

(स्व० तं० उ०, प०2, पृ०, 44)

~ प्रमात्रधीनम्— **प्रमातृसत्ताधीनैव प्रमेयप्रमाणसत्ता, प्रमातृसत्तैव केवलं स्वतन्त्रा। यथा—**

"यावन्न वेदका एते तावद्वेद्याः कथं प्रिये।"

उच्छुष्मभैरववाक्यम् उद्ध०:- (म० मं० प०, पृ०20)

प्रमेयसत्ता— मायादशायां यावद् वयं तिष्ठामस्तावत्कालमस्य प्रमेयजातस्य सत्यत्वमेव, अर्थक्रियाकारित्वात्। स्वप्नकालेऽपि स्वप्नदृष्टस्य प्रमेयस्य सत्यत्वमेव, कथमन्यथा हर्षशोकादिरूपार्थक्रिया सम्भवेत्। यथा—

"तच्च तस्य रूपं सत्यम्, अर्थक्रियाकारित्वात्।"

(तं० सा०, पृ०,96)

प्रयत्नः — (1) इच्छाशक्तिप्रयोगात्मक उद्यमः स्वस्वरूपसाक्षात्कारस्य साक्षादुपायभूतो यत्नः। यथा—

"इच्छाशक्तिप्रयोगात्मकप्रयत्नो मन्त्रवीर्यानुभवसाधकः।"

(शि० सू० विवृ०2,2)

(2) शुद्धविकल्प-संस्कारात्मकः शाक्तोपायः प्रयत्नः। यथा—

"शुद्धविकल्पसंस्काररूपः प्रयत्नो मन्त्रवीर्यानुभवसाधकः।"

(शि० सू० विवृ०2,2)

(3) चिच्छक्तिस्वभावाभिव्यक्तये योऽभ्यासः सोऽपि यत्नः। यथा—

"चिच्छक्ति स्वभावाभिव्यक्त्यात्मकस्य मन्त्रस्य नैरन्तर्येण मननस्याभ्यासोऽपि यत्नः।"

(शि० सू० विवृ०2,2)

(4) यत्नो द्विविधःस्वरूपस्पन्दतः स्वत एव स्फुरन्नकृतकः, क्रियायोगोपायकः शुद्धविद्योदयः कृतकः। यथा—

यत्नोऽत्राकृतकः। सच स्वरूपस्पन्दफलत्वेनाभिव्यज्यमानः। अन्यः क्रियायोगोपायकः शुद्धविद्योदयः कृतकः।

(शि० सू० विवृ०2,2)

प्ररोहः (शक्तितद्वतोः) — सृष्टौ शक्तेर्बहिः प्रसरः संहारे च तस्या अन्तः सङ्कोचः। ततः सृष्टिः शक्तेः प्ररोहः संहारश्च शक्तिमतः। स च तस्य शिवताया विकास इव। यथा—

"एवं सृष्टौ शक्तेः प्ररोहः संहारे च शक्तिमतः।"

(तं० आ० वि०, खं०3, पृ०,364)

प्रलयः — (1) गहनेशदिनान्ते मायायां यः प्रकृतिपुरुषयोः कञ्चुकानां च लयः स प्रलयः इति परिभाष्यते। मायाण्डे या रात्रि सोऽसौ प्रलयः। यथा—

"एवमव्यक्तकालं तु परार्धैर्दशभिर्जहि।
मायाधस्तावती रात्रिर्भवेत् प्रलय एष सः।।"

(तं० आ०6,156)

(2) स्वदिनस्यान्ते भगवाननन्तनाथः गहनेशः पुरुषतत्त्वं प्रकृतितत्त्वं कञ्चुकतत्त्वानि च पंच मायायां विलाययति स एव विलयस्तेषां प्रलय इति कथ्यते। यथा—

"तद् गहनेशस्य दिनम्। तावती क्षपा। तस्यां च समस्तमेव मायायां विलीयते। स एव प्रलयः।"

(तं० सा०, पृ०,55)

~ चतुर्भूमिकः — **एताश्च तद्भूमिकाः**

(1) पृथ्वी तत्त्वे भुवनानां लयः लय एव।

(2) मूलप्रकृतौ करणकार्याणां लयोऽवान्तरप्रलयः।

(3) मायायां सकञ्चुकयोः प्रकृतिपुरुयोर्लयः प्रलयः।

(4) समनायां सदाशिवादीनामपि लयो महा-प्रलयः।

इत्येते चत्वारः प्रलयाः। यथा—

"चत्वार एते प्रलया मुख्याः सर्गाश्च तत्कलाः।
भूमूलनैशशक्तिस्थास्तदेवाण्डचतुष्टयम्।।"

(तं० आ०6,170)

प्रलयकेवलाः — प्रलयाकला नाम प्रमातारः प्रमेयावभासशून्याः। यथा—

"मायायां शून्यप्रमातृणां प्रलयकेवलिनां स्वोचितं प्रलीनकल्पं प्रमेयम्।"

(प्र० हृ०, पृ०,7-8)

कार्यकरणप्रलयेन केवलतां नीताः प्रमातारः।

प्रलयकेवली—

द्र० 'प्रलयाकलाः' **इति।**

प्रलयाकलाः — (1) सवेद्यापवेद्य-सुषुप्तिपदनिष्ठा आणवमलपरिभूताः प्राणिनः। तेषां कार्मो मलः कञ्चित् कालं प्रभावरहितस्तिष्ठति। यथा—

"केचन शून्याद्यंशसङ्कुचितसंविन्मया अपवेद्यसुषुप्तपदभाजः, अन्ये बुद्ध्यादिभागावरुद्धचिन्मयाः सुखादिशेषसामान्यवेद्ययोगात् सवेद्यसुषुप्तपदजुषः। स्थूलकार्यकरण- वियोगात्मकत्वं तु प्रलयाकललक्षणमेषामेकमेवेति।"

(ई० प्र० वि० वि०, खं०3, पृ०,324)

(2) येषां प्राणिनां स्वात्मनः कर्तृत्वशक्तिं प्रत्यस्त्यभिमानः परं तथापि ये अबोधरूपं शून्यमेव वा प्राणमेव वा बुद्धिमेव वा स्वात्मतया पश्यन्ति ते प्रलयाकलाः इत्युच्यन्ते। शरीरपातानन्तरं तेषां करणानि मूलप्रकृतौ विलीयन्ते। स च तेषां करणप्रलयः। करणप्रलयानन्तरं ते शून्यप्रायायामवस्थायामवान्तरप्रलयकालान्तं यावत्तिष्ठन्ति। तदन्ते यदा भगवान् श्रीकण्ठनाथः मूलप्रकृतावभिनवां करणकार्यसृष्टिं प्रति क्षोभमुत्पादयति, तदा सुप्तप्रबुद्धा इवैते

पुनरप्यन्तर्बहिष्करणयुक्ताः सम्भवन्ति। इत्थं प्रलयावधि तेऽकलास्तिष्ठन्ति, प्रलयेन च तेऽकलतामापद्यन्ते। यदा खल त्रयोविंशतितत्त्वानि मूलप्रकृतौ प्रलीयन्ते, तदा तेनावान्तरप्रलयेन सर्वेऽपि बद्धाः प्राणिनः कार्यकरण-विरहिताः सम्पाद्यमानाः सुषुप्ता भवन्त्यभिनवसृष्टिं यावच्च तथैव तिष्ठन्ति। ततस्ते प्रलयेनैवाकलतां नीयन्ते। इत्थं तत्र प्रलये सर्वेऽपि पशुप्राणिनः प्रलयेनाकलतां नीयमानाः सन्तः प्रलयाकलपद एव तिष्ठन्ति। ततस्ते प्रलयाकलाः। सर्वेऽपि सौषुप्तपदभाजः प्राणिनः प्रलयाकलाः। नैयायिकसम्मतमपवर्गपदं, सांख्यसम्मतं कैवल्यपदं, बौद्धसम्मतं च निर्वाणपदं भजमानाः प्रायशः सर्वेऽपि प्राणिनः प्रलयाकलाः। केचिदेव हि तेषु चिद्रूपतां स्फुटां पश्यन्तो विज्ञानाकलतामाप्नुवन्ति। प्रलयाकलानां कार्मो मलः कञ्चित् कालं फलदानाक्षमोऽपि तेषु स्थिरं तिष्ठत्येव। प्राणप्रलयाकलेषु मायामलस्य संस्कारो फलदो भवत्येव। शून्यप्रलयाकलानां मायामलो फलदानाक्षमस्तिष्ठति। यथा—

"शून्याद्यबोधरूपास्तु कर्तारः प्रलयाकलाः।
तेषां कार्मो मलोऽप्यस्ति मायीयस्तु विकल्पितः।।"

(ई० प्र०,3-2-8)

"बुद्धौ वा येषामहमिति चमत्कारयोगात् कर्तृत्वं, ते प्रलयेन कृताः अकलाः, कलातत्त्वोपलक्षितकरण- - कार्यतत्त्वरहिता, अबोधरूपाः कर्तारश्च। प्रलयावधि हि ते तथाभूता उत्तरकालं तु कार्यकरणसम्बद्धा एव भवन्ति, यतस्तेषां न केवलमुक्तरूप आणव एव मलो, यावत् कार्मोऽपि वासनासंस्काररूपो धर्माधर्मात्मास्त्येव। यद्येवं भिन्नवेद्यप्रथाप्येषां स्यात्। सत्यं सवेद्यरूपे सुषुप्तपदे, अपवेद्ये तु न भवति। तेन मायीयो मल एषां विकल्पितो व्यवस्थितविषयत्वेन।"

(ई० प्र० वि०, खं०2, पृ०,225)

(3) न्यग्भूतकञ्चुकाः मायातत्त्वे निविष्टाः प्रमातारः प्रलयाकलाः। यथा—

"न्यग्भूतकञ्चुको माता यतस्तत्र लयाकलः।
मायानिविष्टो .....।।"

(तं० आ०10,107)

"मायानिविष्टेऽप्यकले तथेत्येकादशात्मता।।"

(तदेव,109)

(4) तथा प्रसुप्तभुजगवज्ज्ञानक्रियाव्यापारशून्याः प्रमातारः। यथा—

"प्रलयाकलाविज्ञानाकलौ हि प्रसुप्तभुजगशून्यसमाधि-स्थयोगिप्रायत्वान्न किञ्चिज्जानीतः।"

(तं० आ० वि०, खं०7, पृ०,95)

द्र० (प० सा० वि०, पृ०,55)

~ क्रममुक्तिभाजः — **भावनादियोगाभ्यासिनः पारमैश्वर्य-सिद्धान्तनिष्ठा- वैष्णवद्वैतशैवादिपरायणा अपि साधका अभिनवायाः प्राकृतसृष्टेरारम्भे प्रलयाकलदशातः प्रबुद्धाः सन्तो भगवच्छ्रीकण्ठानुग्रहान्मन्त्रत्वादिदशामासादयन्ति, क्रमेण च शिवभावं प्रविशन्ति। यथा—**

द्र० '~ प्रबोधद्वैविध्याः' इति।

~ दशाभेदभाजः — **प्रलयाकलस्य स्वं स्वरूपं जाग्रत्, तत्संस्कारोद्भास्य- मानमवस्थान्तरं स्वप्नः, तत्संस्कारशेषता सुषुप्तिः वास्तविकस्वरूपप्रकाशस्तुर्यं, सर्वथाऽभिन्न-चिदानन्दघनास्थितिस्तुर्यातीतम्। यथा—**

"लयाकले तु स्वं रूपं जाग्रत्तत्पूर्ववृत्ति तु।
स्वप्नादीति .....।।"

(तं० आ०10,298)

तत्त्वभेदनक्रमदृष्टयोक्तमेतत्।

~ परस्परमवेदकाः— **प्रलयाकलाः सवेद्यापवेद्यसुषुप्ति-दशास्थितत्वेन द्विविधाः। तत्र शून्यप्रलयाकलो न किमपि चेतयते, प्राणप्रलयाकलोऽपि सुखदुःखादि विहायापरं न किमपि चेतयेते। ततो न प्रलयाकलानां परस्परवेद्यतापि। यथा—**

"लयाकले तु संस्कारमात्रात्सत्यप्यसौ भिदा।।
अकले न विशेषाय सकलस्यैव युज्यते।।"

(तं० आ०10,129-130)

"सुखमहमस्वाप्समिति सवेद्यत्वेऽपि यत्र बाह्यर्थवेदनमपि नास्ति तत्र का वार्ता प्रमात्रन्तरवेदने येन त्रायोदश्यं स्यात्।"

(तं० आ० वि०, खं०7, पृ०,93)

~ पुनर्जन्मभाजः — **(1) स्वातन्त्र्यवर्जिताः ये प्रलयेनाकलतां प्रापितास्ते पुनः संसृत्यावर्तेष्वावर्तन्ते। यथा—**

द्र०:- ~ 'प्रबोधद्वैविध्याः' इति।

(2) कार्ममलेन साकमेव सुषुप्तिदशामासादितवन्तः प्रलयाकलाः अवान्तरप्रलयकालान्तपर्यन्तं सुषुप्तास्तिष्ठन्ति। अभिनवसृष्टयारम्भे यदा प्रकृतिर्गुणवैषम्यायक्षुब्धा भवति तदा ते पुनः प्रबुद्धाः सन्तः पूर्वकल्पकृतकर्मानुसारं संसर्तुमारभन्ते। यथा—

"एतत्कार्ममलं प्रोक्तं येन साकं लयाकलाः।
स्युर्गुहागाहनान्तः स्थाः सुप्ता इव सरीसृपाः।।
ततः प्रबुद्धसंस्कारास्ते यथोचितभागिनः।
ब्रह्मादिरथावरान्तेऽकस्मिन् संसरन्ति पुनः।।"

(तं० आ० 2,138-139)

~ प्रबोधद्वैविध्याः — **भगवाञ्छ्रीकण्ठनाथः स्वदिवसारम्भे सुप्रसुप्तानपि प्रलयाकलान् प्रबोधयति। बोधश्च तेषां द्विविधः। ये प्रलयेन प्रलयाकलतां प्रापितास्ते प्रबुद्धाः सन्तो बाह्यान्तःकरणैर्युज्यन्ते, प्राक् कल्पकृतकर्मानुसारं च पुनः संसृतिपरम्परासु प्रवर्तन्ते। वैष्णवादिसम्मतस्य योगभक्त्या-देरभ्यासतः यथाधिकारं प्रलयाकलतां प्राप्ताः प्राणिनः श्रीकण्ठानुग्रहवशात् मन्त्रत्वादिप्राप्तये प्रबुध्यन्ते। तेषां प्रबोधो मन्त्रत्वस्य मन्त्रेश्वरत्वस्य मन्त्रमहेश्वरत्वस्य वाप्तये**

भवति यथा—

"द्विविधश्च प्रबोधोऽस्य मन्त्रत्वाय भवाय च।
भावनादिबलादन्यवैष्णवादिनयोदितात्।।
यथास्वमाधरौत्तर्यविचित्रात्संस्कृतस्तथा।
लीनः प्रबुद्धो मन्त्रत्वं तदीशत्वमथैति वा।।
स्वातन्त्र्यवर्जिता ये तु बलान्मोहवशीकृताः।
लयाकलात्स्वसंस्कारात्प्रबुद्ध्यन्ते भवाय ते।।"

(तं० आ०10,135-137)

द्र०:- ~ 'मुक्त्युन्मुखाः' इति च।

~ प्रमातारः — **सुषुप्तस्य तस्य भावियोग्यतावशादेव प्रमातृत्वं न तात्कालिकम्। यथा—**

"तथाहि गाढनिद्रेऽपि प्रियेऽनाशङ्कितागताम्।।
मां द्रक्ष्यतीति नाङ्गेषु स्वेषु मात्यभिसारिका।"

(तं० आ०10,141-142)

भाविनं पत्युः प्रमातृत्वमेवाभिसारिका प्रत्यक्षमिव पश्यति भावनाबलेन।

~ भोक्तारः — **आणवकार्ममलसम्बन्धात् प्रलयाकलस्य स्वाप्नकल्पो भोगो भवति, परं मायीयतत्त्वानामन्तःकरणादीनामभावात् मायीयमलकृतभेददर्शनाभावाच्च नासौ भोगः स्फुटतात्मकं प्ररोहमेति। यथा—**

"लयाकलस्य भोगोऽसौ मलकर्मवशान्न तु।।
स्थिरीभवेन्निशाऽभावात् .....।"

(तं० आ०10,290-91)

"प्रलयाकलसंज्ञो यस्तस्य कार्ममलस्थितेः।
स भोगो जायते मायाऽभावात् स्थैर्यं न गच्छति।।"

उद्ध०:- (तं० आ० वि०, खं०7, पृ०,196)

"लयाकलोऽत्र भोक्तैव .....
मायीयमलाभावान्न प्ररोहमियाच्छरीरादेराश्रयस्यासंपत्तेः।"

(तं० आ० वि०, खं०7, पृ०,196)

"गाढनिद्राविमूढोऽपि कान्तालिङ्गितविग्रहः।।
भोक्तैव भण्यते सोऽपि मनुते भोक्तृतां पुरा।"

(तं० आ०10,145-146)

~ मुक्त्युन्मुखाः — **ये पुनः साधकाः कर्मसंस्कारहानये भावनाभ्यासं कुर्वन्तोऽपि पूर्णं साफल्यमनवाप्यैव म्रियन्ते, ते मरणानन्तरं कार्ममलसंस्कारसंस्कृता एव प्रलयाकलतामवाप्यावान्तरप्रलयकालान्तं सुषुप्तास्तिष्ठन्ति। परं यदा भगवांच्छ्रीकण्ठनाथोऽभिनवसृष्ट्यर्थं मूलप्रकृतिं प्रक्षोभयति तदेदृशाः प्रलयाकलास्तस्यानुग्रहेण भावनापूर्तिं विधाय मन्त्रदशामारोहन्ति। ततश्च क्रमेण शिवतामुपयान्ति यथाकालम्, परमेवम्भूता गतिः परमेश्वरतावादं प्रपन्नानामेव नानीश्वरवादाभ्यासिनां बौद्धादीनाम्। यथा—**

"ये पुनः कर्मसंस्कारहान्यै प्रारब्धभावनाः।
भावनापरिनिष्पत्तिमप्राप्य प्रलयं गताः।।
महान्तं ते तथान्तः स्थभावनापाकसौष्ठवात्।
मन्त्रत्वं प्रतिपद्यन्ते चित्राच्चित्रं च कर्मतः।।"

(तं० आ०9,140-141)

~ शक्ती (तेषाम्) — **अस्फुटे विद्याकले एव प्रलयाकलस्य करणस्थनीये शक्ती। तथाविधाभ्यां ताभ्यामेव यतस्तस्य निद्रविश्रमादिव्यापारः। यथा—**

"लयाकलस्य मानांशः स एव परमस्फुटः।।"

(तं०आ.10,13)

"प्रलयाकलस्य तु त एव निर्विषयत्वादस्फुटे।"

(तं० सा०, पृ०,93)

~ स्थितिक्षेत्रम् (तेषाम्) — **प्रलयाकला न्यग्भूतकञ्चुकाः सन्तो मायाक्षेत्रे विश्राम्यन्ति। सूचितमेतद्यथा—**

"मायातत्त्वे ज्ञेयरूपे कञ्चुकन्यग्भवोऽपि यः।
सोऽपि मेयः .....।।"

(तं० आ०10,108)

कञ्चुकानां न्यग्भवो यस्य स प्रलयाकलः प्रमाता।

प्रलयाकलादिसद्गतिः — शिवानुग्रहेणानुगृहीताः प्रलयाकला मन्त्रत्वं, विज्ञानाकलाश्च मन्त्रमहेशरत्वं, सकलाश्च मन्त्रेश्वरत्वमासादयन्ति काले। यथा—

"श्रीपूर्वशास्त्रे च मन्त्रमहेश्वराणां विज्ञानाकलाः, मन्त्रेश्वाराणां सकलाः उपादानत्वेनोक्ता, इति पारिशेष्यात् मन्त्राणां प्रलयाकलोपादानत्वं सिद्धम्।"

(तं० आ० वि०, खं०6, पृ०,111)

परमिदं सामान्यत उक्तं मन्तव्यम्। विशेषतो विवक्षयाऽधिकारतारतम्याद् विविधा गतिः प्रलयाकलानां विज्ञानाकलानां चापि। दिङ्मात्रं यथा—

"श्रूयतां संविदैकात्म्यतत्त्वेऽस्मिन् संव्यवस्थिते।।
जडेऽपि चितिरस्त्येव भोत्स्यमाने तु का कथा।
स्वबोधावसरे तावद् भोस्त्यते लयकेवली।।"

(तं० आ०10,133-134)

प्रवृत्तिः — प्रमेयविषये ज्ञानं क्रियां च प्रति प्रमातुरुन्मुखता। यथा—

"प्रवृत्तिः जिघृक्षितार्थोन्मुखतासमुन्मिषदवस्था।"

(स्पं० वि०, पृ०,34)

प्रशस्तिभूतिपादाः — कश्चनात्यभ्यर्हणीयः शाक्तोपासनपरः शैवाचार्यो यस्य नामोल्लेखः पंक्त्युद्धरणपूर्वकं कृतो जयरथेन। यथा—

अनेनैवाभिप्रायेण श्रीप्रशस्तिभूतिपादैरपि-
"ये ये भावा ह्लादिन इह दृश्याः सुभगसुन्दराकृतयः।
तेषामनुभवकाले स्वस्थितिपरिपोषणं सतामर्चा।।"
इत्याद्युक्तम्।"

(तं० आ० वि०, खं०2, पृ०,219)

प्रशान्तम्— द्र०:- 'विषुवत्' इति।

प्रशान्तः — मलादितरङ्गैरसङ्कुलः शिवः शिवयोगी वा। यथा—

"प्रशान्तः स्तिमितो ज्ञेयः स्तिमितो निश्चलः स्मृतः।।
निश्चलो निस्तरङ्गश्च स्थिरः पूर्णः समन्ततः।"

(स्व० तं०, प०,324-325)

प्रसङ्गः ~ व्याख्याविधौ— **परशास्त्रोपयोगोऽवसरप्राप्तः। यथा—**

"पशुपुरोडाशवत् परमध्यपातिनो निजतन्त्रनैरपेक्ष्येण परकीयेनैव मन्त्रेण सम्पादनं प्रसङ्गः।"

(तं० आ० वि०, खं०11, पृ०,172-173)

प्रसादः — **प्रसादस्तु प्रसन्नता, नैर्मल्यभावः।**

"प्रसादः-अम्भस इव स्वयमेव आबिलीभावशान्त्या नैर्मल्यगमनम्।"

(शि० स्तो० वि०, पृ०,77)

प्रसिद्धिः — **परम्पराप्राप्तो लोकविश्वासो यस्य प्रामाण्यं लोके सिद्धं सर्वत्र दृश्यते। ऐतिह्यं नामैतत् प्रमाणमुक्तमन्यत्र।** ~ तत् प्रामाण्यम्— **(1) दृढतरेण केनापि प्रमाणेनाबाधितायाः प्रसिद्धेः प्रामाण्यमेव यथा—**

"प्रसिद्धिरागमो लोके युक्तिमानथवेतरः।
विद्यायामप्यविद्यायां प्रमाणमविगानतः।।
प्रसिद्धिरवगीता हि सत्या वागैश्वरी मता।
तथा यत्र यथा सिद्धं तद् ग्राह्यमविशङ्कितैः।।"

(उद्धः- तं० आ० वि०, खं०1, पृ०,47)

(2) सांख्यादेः कपिलादिप्रोक्तत्त्वं, वेदानां विश्वामित्रवसिष्ठादिप्रोक्तत्वं वा, सर्वं सामर्थ्यात् सिद्धम्। ततः प्रसिद्धिरेवागमानां प्रामाण्ये बीजम्, ततश्च प्रसिद्धेः प्रामाण्यं सिद्धम्। अन्यथा कपिलादीनामपि प्रमाणत्वं नैव सिद्धम् एतत् सूचितं यथा—

"तेन कण्ठोक्तिवत् सुगतोक्तिस्तत्र, न तु तत्कृतं प्रामाण्यम्। तत्कृतत्वमेव हि प्रसिद्धिमन्तरेण किं प्रमाणकमिति प्रसिद्धिरेवैका प्रमाणम्।"

(ई० प्र० वि० वि०, खं०3, पृ०,98)

प्रसिद्धिरेव हि मूलतः आगमः।

प्रह्वः — **स्वसत्तायाः शिवसत्तायां निमज्जनेनोपायेन शिवेन साकमैक्यपरामर्शवान्। यथा—**

"प्रकर्षेणान्यतिरस्कारेण ह्वयति शब्दयति ताद्रूप्यं परामृशति तद्गुणानुप्रवेशस्पर्धावानिवेति प्रह्वः।"

(ई० प्र० वि० वि०, खं०1, पृ०,19)

प्रह्वता— **पारमेश्वरे स्वरूपे निजस्य मायीयस्य स्वरूपस्य भावनया निमज्जनं तदेकीभावापादनं च। यथा—**

"प्रह्वता चोक्तरूपा भगवत्स्वरूपोत्कर्षदर्शनेन ....शरीरादिगतप्रमातृताभिमानोद्रेकस्योपासनेन मायाप्रमात्रभिमानातिरेकन्यग्भावितसंविदात्मकस्वस्वरूपताया उन्मग्नतात्मकः समावेशः।"

(ई० प्र० वि० वि०, खं०1, पृ०,7)

प्राकृतत्रिंशिका— **वृन्दचक्रनिर्णयपरः कोऽपि ग्रन्थो य इदानीं नोपलभ्यते। यथा—**

"वृन्दचक्रनिर्णयस्तु बहुधा भट्टारककृतप्राकृतत्रिंशिकाविवरणे विचार्यः।"

(वि० भै० उ०, पृ०,69)

~ तद्विवरणम्— **केनापि भट्टारकनाम्ना विदुषा तस्य वृन्दचक्रग्रन्थस्य व्याख्या येदानीं नैव लभ्या क्वापि। किमपि शाक्तसम्प्रदायसम्बन्धि पुस्तकं विज्ञानभैरवोद्द्योते कृतसमुल्लेखम्। अस्य नामधेयत एतत् प्रतिभाति यत् परात्रीशिकाशास्त्रस्य देशभाषामयमिदं व्याख्यानं स्यादिति। यथा—**

"वृन्दचक्रनिर्णयस्तु बहुधा भट्टारककृतप्राकृती- त्रिंशकाविवरणे विचार्यः।"

(वि० भै० उ०, पृ०,69)

प्राकृतप्रपञ्चः — **समनातो विकासमायातः प्रपञ्चः सदाशिवादारभ्य पृथिवीं यावत्।**

द्र०:- 'विनाशोत्पत्तिमान्' ~ 'प्रपञ्चः' **इति।**

प्राकृतम्— **कृतकम् आगमेऽयं शब्दः न सर्वत्र प्रकृतिपरिणामभूते वस्तुन्येव प्रयुक्तो, यावत् सृष्टिसंहारभाजि शुद्धेऽपि तत्त्ववर्गे। यथा—**

"यत् सदाशिवपर्यन्तं पार्थिवाद्यं च शासने।।
तत् सर्वं प्राकृतं ज्ञेयं विनाशोत्पत्तिसंयुतम्।"

(तं० आ०8,405-406)

"सदाशिवोऽत्रानाश्रितः प्रकृतिश्च समना।"

(तं० आ० वि०, खं०5, पृ०,264)

"सकल-प्रलयाकलविज्ञानकेवलि-मन्त्र-तदीश-महेशानमपि ह्यीदम्भावांशेन पारिमित्यलक्षणेनानुवेधात् तदपेक्षयैप कृतकत्वमुच्यते, तद्वत् सदाशिवेश्वरयोरपि। तत एवोक्तं प्राकृतमिति।"

(ई० प्र० वि० वि०, खं०,377)

द्र० 'विनाशोत्पत्तिमान्' ~ 'प्रपञ्चः' **इति।**

प्राकृतमण्डम्— **जलादिमूलप्रकृत्यन्तस्तत्त्ववर्गः सभुवनः, प्रमातृप्रमेय- मन्त्रवर्णादिसहितः। प्रतिष्ठाकलात्मकमण्डम्।** ~ तदधिष्ठाता— **स हि भगवान् विष्णुः। यथा—**

"प्राकृतं स्फुटसंस्कारशेषतया स्थितिप्रधानं विष्णुना (अधिष्ठितम्)।"

(ई० प्र० वि० वि०, खं०3, पृ०,366)

प्राङ्मुखोपासनाफलम्— **प्राङ्मुखो हि साधकः सदाशिवस्य सद्योजातमुखं पश्यति यद्भोगदायि। यथा—**

"..... पाश्चात्यं ग्रहीतुं पूर्वतो मुखः।"

(तं० आ०15,232)

"प्रागाशास्थे भोगदायि पश्चाद्वक्त्रं तु सम्मुखम्।"

(उद्धः- तं० आ० वि०, खं०9, पृ०,115)

पश्चाद्वक्त्रं च सद्योजातमुखम् इति। पूर्वाभिमुखः साधकस्तदेव सम्मुखतया पश्यति।

प्राचदिक्— **किञ्चित् प्रकाशस्पर्शवतः साधकस्य सम्मुखे या दिक् सा तस्य प्राची। यथा—**

"किञ्चित् प्रकाशयोग्यस्य सम्मुखं प्रसरत् पुरः।।"

(तं० आ०15,198)

पुरः इति प्राची। यथा—

"किञ्चित् प्रकाशौन्मुख्ययोग्यतया प्रस्फुरद् विश्वं पुरः प्रमुखे अञ्चतीति प्राची।"

(तं० आ० वि०, खं०9, पृ०,99)

प्राणः — (1) प्राणनरूपो जीवनव्यापारः। येन जीवन्तः प्रमातारः प्राणिन इत्युच्यन्ते सर्वे सकलाद्यकलान्ताः। यथा—

"प्राण इति प्राणनरूपा जीवनस्वभावा येयं चिद्रूपस्य स्थितिः, सा तावत् सामान्यपरिस्पन्दरूपा, देहप्राणादेरचेतनस्य चेतनायमानतासम्पादनात्मिका, अहमिति स्वातन्त्र्यारोपसारा सती विकल्परूपपरामर्शमयी, सैव प्राणादिविशेषात्मना पञ्चरूपतां भजते।"

(ई० प्र० वि०, खं०2, पृ०,244)

(2) जडमपि देहादिकमजडतयावभासयन्ती जीवनक्रियैव वस्तुतः प्राणः। यथा—

"प्राण इति प्राणनाख्या याऽसावान्तरवायुसञ्चारिता चिद्वृत्तिर्जीवनमिति उक्ता। देहादेर्जडस्याजाड्यमेवापादयन्त्यहमितिस्वातन्त्र्यारोपत्वेन विकल्परूपपरामर्शमयी।"

(ई० प्र० वि० वि०, खं०3, पृ०,342)

"नित्यमापूरयन्नेव प्राणिनामुरसि स्थितिः।
प्राणनं कुरुते यस्मात्तस्मात्प्राणः प्रकीर्तितः।।"

(स्व० तं०7,25-26)

(3) संविदो बहिः प्रसरणक्रमे प्रथमा बहिर्मुखतामय्यवस्था। निकटतमेयमवस्था संविदः। यथा—

"प्राक् संवित् प्राणे परिणता इति।"

(उद्धः- तत्त्वार्थचिन्तामणिवाक्यम् तं०आ०वि०,खं०2,पृ०,142)

(प्र० हृ०, पृ०, 38)

(4) बुभुक्षापिपासादिकारी शरीरस्थः शक्तिविशेषः। यथा—

"बुभुक्षापिपासायोगयोग्यं प्राणमेवात्मानं केचन श्रुत्यन्तविदो मन्यन्ते।"

(ई० प्र० वि०, खं०1, पृ०,251)

(5) अहङ्कारस्य संरम्भात्मकं यदपरं स्वरूपं तदेव शरीरवायुप्रेरकं सत् प्राणिनां जीवनवृत्याधायकत्वेन 'प्राण' इत्युच्यते। स प्राण एव वृत्तिपञ्चकयुतः सन् प्राणापानादितया व्यवह्रियते। यदाऽहङ्कारः शारीरवायुवृत्तिप्रेरणं परित्यजति तदा प्राणिनो मृत्युर्भवति। यथा—

"बुद्धेरहङ्कृत् तादृक्षे प्रतिबिम्बितपुंस्कृतेः।
प्रकाशे वेद्यकलुषे यदहं मननात्मता।।
तया पञ्चविधश्चैष वायुः संरम्भरूपया।
प्रेरितो जीवनाय स्यादन्यथा मरणं पुनः।।"

(तं० आ०9,230-231)

"एवमहङ्कृतः सांरम्भात्मिकया वृत्त्या प्राणादीनां प्रेरणमप्रेरणं च कार्यं येन सर्वेषां जीवनं मरणं च स्यात्।"

(तं० आ० वि० खं०6, पृ०185)

~ आणवयोगविधिषु— **हृदयाद् बाह्यद्वादशान्तं यावदुद्गच्छन् षट्त्रिंशदङ्गुलपरिमाणः प्राणवायुस्तस्य च तथाविधश्चारः। यथा—**

"हृदयात् प्राणचारश्च नासिक्यद्वादशान्ततः।
षट्त्रिंशदङ्गुलोजन्तोः सर्वस्य स्वाङ्गुलक्रमात्।।"

(तं० आ०6,61)

~ उच्चारयोगे— **पञ्चसु प्राणवृत्तिष्वेका विशेषरूपा वृत्तिः असौ प्राणवृत्तिर्यस्यां प्राणी निःश्वासरूपया प्राणवायुगत्या वा, कायेन वा, चित्तेन वा वचसा वेन्द्रियान्तरैर्वा कमपि प्रागपानवृत्त्या गृहीतं विषयं परित्यजति। जाग्रत्स्वप्नयोरस्याः प्राणवृत्तेर्व्यापारः। यथा—**

"तत्र किञ्चिज्जहती क्वचित्पतन्ती च प्रश्वास निःश्वासरूपा क्रमेण प्राणत्वमपानत्वं च विशेषं दर्शयति। तदिदं विशेषद्वयं जाग्रति तावत् स्फुटमेव देहात् प्रसृत्य विषये विश्रान्तेः, ततोऽपि देहे, स्मृत्यादौ वाऽऽभ्यन्तरे वेद्ये विश्रान्तेः प्राणापानयोः सुस्पष्टत्वात्। स्वप्नेऽपितद् द्वयमस्त्येव, स्वपतोऽपि हि प्राणापानौ निर्गमप्रवेशात्मानौ स्फुटमेवापरेण लक्ष्येते। स्वयमेव च वेद्यसंवेदनात् त्यागोपादानरूपा स्थितिः संवेद्यत एव। तेन प्राणना प्राणापानविशेषद्वयमयी जाग्रति, तथा स्वप्ने।"

(ई० प्र० वि०, खं०2, पृ०,244-245)

उच्चायोगाभ्यासे एवम्प्रकारा सर्वात्मिका प्राणवृत्तिः 'प्राण' इत्युच्यते।

~ द्विविधः — **स च स्थूलः सूक्ष्मश्च। तत्र प्राणापानादिपञ्चवृत्त्यात्मक उच्चारात्मा स्थूलः, सकारहकारध्वनिविमर्शात्मा च वर्णशब्दवाच्यः सूक्ष्मः। यथा—**

"प्राणः स्थूलः सूक्ष्मश्च। आद्य उच्चारणात्मा, उच्चारणं च नाम पञ्च प्राणाद्या वृत्तयः। सूक्ष्मश्च वर्णशब्दवाच्यो वक्ष्यते।"

(तं० सा०, पृ०,35)

वर्णश्च प्राणचारे ऽभिव्यज्यमानो ध्वनिविमर्शविशेषः। यथा—

"उक्तो य एष उच्चारस्तत्र योऽसौ स्फुरन् स्थितः।
अव्यक्तानुकृतिप्रायो ध्वनिर्वर्णः स कथ्यते।।"

(तं० आ०5,131-132)

~ निर्वचनतः — **प्रकर्षेण जीवनव्यापारवर्ता प्राणन-क्रिया। यथा—**

"प्राणः प्रकर्षेण प्राधान्येन प्रगुणतया अन्यवायुवैलक्षण्येन अननात्प्राण इति।"

(म०प्र० वि०, पृ०,34)

~ बीजमन्त्रः — **हकारः।**

"उक्तो यथा-प्राणो ह।"

(तं० आ० वि०, खं०12, पृ०,197)

(ने० तं० उ०, खं०2,2 पृ०,52)

~ मूलतः — **क्रियाशक्तेर्बहिर्मुखो विकासः। यथा—**

"प्राणोऽपि प्राणनात्मा क्रियाशक्तेः (प्रसरः)"

(ई० प्र० वि० वि०, खं०2, पृ०,426)

~ व्यक्तिस्थानतः — **स्वारसिकः प्राणो मूलाधारात् प्रभृत्येवास्फुटतयाभिव्यक्तो भवति, संवेद्यते च योगिभिः। इच्छापूर्वः पुनः इच्छापूर्वं चारितस्य प्राणस्य स्फुटाभिव्यक्तिर्हृदयादेवारभ्य भवति न ततोऽधः। यथा—**

"संवेद्यजीवनाभिख्यप्रयत्नस्पन्दसुन्दरः।
प्राण कन्दात्प्रभृत्येव तथाप्यत्र न सुस्फुटः।।"

(तं० आ०6,49)

"स्वेच्छया हि चारितः प्राणस्तत्तत्सिद्धिनिमित्तं योगिनां स्यात् यदर्थमेवमुपदेशः तच्च हृदयात्प्रभृत्येव भवेत्।"

(तं० आ० वि०, खं०4/1, पृ०,44-45)

प्राणकुण्डलिका— प्राणकुण्डलिन्येव। यथा—

"..... पारमेशी बोधाख्या शक्तिर्विश्वं गर्भीकृत्य परा कुण्डलिका सती विमर्शरूपतया नादात्मवर्णकुण्डलिकात्मना स्फुरित्वान्तर्निमज्जितैतत्स्वरूपा प्राणकुण्डलिकात्मतया भातीत्याम्नायः।"

(स्व० तं० उ०, प०4, पृ०,161-162)

प्राणकुण्डलिनी— (1) असौ प्राणानात्मिका शक्तिर्यस्याः बलेन जडमपीदं देहकरणादि सर्वं चेतनवदाचरति। सैषा मूलाधारचक्रे प्रसुप्तभुजगाकारतया साक्षात्क्रियते योगिभिः।

योगाभ्यासे च सौषुम्नमार्गेण प्रसरन्ती षट्-चक्राणि भित्त्वा सहस्रारमुपयाति। षट्सु च चक्रेष्वारोहणावरोहणादि कुर्वन्ती साक्षादनुभूयते सानन्दसन्दोहं योगिभिः।

द्र० 'प्राणकुण्डलिका' इति।

(2) तत्त्वसृष्टेः प्राग् यासौ शिवस्य स्वभावभूता विसिसृक्षा, तस्या विकासस्य प्रान्तभूमाववभासमानाऽऽकारात्मक-द्वितीयवर्णव्यंग्या पारमैश्वर्य समोशमयीपरिपूर्णपरमेश्वरताख्या स्थितिः परस्य तत्त्वस्य। यथा—

"अत एव विसर्गस्य बहिर्भावौन्मुख्यात्मकादिकोटिरूपे प्रान्तदेशे प्राणकुण्डलिका "प्राक्संवित्प्राणे परिणता" इति नीत्या।"

(तं० आ० वि०, खं०2, पृ०,142)

बहिर्विसृष्ट्युन्मुखतां याता शिवस्य पारमेश्वरी शक्तिः। सा च मातृकाक्रमे विसर्जनीयं प्रतिप्रसरन्ती द्वितीयवर्णेन व्यंग्या भवति। इति।

प्राणचारः — हृदयादारभ्य बाह्यद्वादशान्तं यावत् प्राणवायोर्गतिः, बाह्यद्वादशान्ताच्च हृदयं यावदपानस्य गतिरित्युभयं प्राणचार इत्युच्यते। प्राणवायोश्चरणमेव प्राणचारः। यथा—

"प्राणचारो हृदयाच्छक्त्यन्तं षट्त्रिंशदंगुल उक्तः।"

(स्व० तं० उ०, प०4, पृ०,151)

~ तज्ज्ञानम्— **तुट्यादिभेदतः प्राणचारविशेषतानां सम्यग् विश्लेषणस्यावबोधः।**

~ अपेक्षणीयम्— **सृष्ट्यादिज्ञानं मोक्षाप्तयेऽपेक्ष्यते। सृष्ट्यादयश्च कालाधीनाः। कालश्च प्राणात्मकः। ततः प्राणचारज्ञानस्यापेक्षणीयता। यथा—**

"सृष्टयादयश्च ते सर्वे कालाधीना न संशयः।
स च प्राणात्मकस्तस्मादुच्चारः कथ्यते स्फुटः।।"

(तं० आ०6,60)

~ तत्त्वभेदने— **उत्तरोत्तरं प्रलयाकलादेः धारणालम्बन-स्वरूपत्वे तस्य तस्य च षडादिसंख्यकप्रमातृवेद्यत्वे षडादिभिश्च प्रमाणैर्वेदनसम्भवे क्रमेण त्रायोदश्यादिविधिः। परमत्र त्रायोदश्यां तुटिद्वयस्य स्वरूपे निक्षेपः शेषस्य च तुटि- द्वादशकस्यैव षट्प्रमातृतच्छक्तिरूपता। एवमेवाग्रेऽपि तुटीनां द्वयस्य द्वयस्य स्वरूपे निक्षेपः दशादिसंख्यानां तुटीनां पञ्चादि प्रमातृतच्छक्तिरूपता। एवं तुटिषोडशकं प्राणचारे सर्वत्राक्षुण्णम् अत्रेयं तालिका :—**

विधिः प्रमातृतुट्यः तच्छक्तितुट्यः स्वरूपेनिक्षिप्तास्तुट्यः सर्वाः

पाञ्चदश्यम्	**7**	**7**	**2**	**(16 सर्वाः)**
त्रायोदश्यम्	**6**	**6**	**4**	**(16 सर्वाः)**
ऐकादश्यम्	**5**	**5**	**6**	**(16 सर्वाः)**
नवधात्वम्	**4**	**4**	**8**	**(16 सर्वाः)**
सप्तधात्वम्	**3**	**3**	**10**	**(16 सर्वाः)**
पञ्धात्वम्	**2**	**2**	**12**	**(16 सर्वाः)**
त्रैधम्	**1**	**1**	**14**	**(16 सर्वाः)**

"क्रमात्तु भेदन्यूनत्वे न्यूनता स्यात्तुटिष्वपि।"

(तं० आ०10,200)

"तुटीनां द्वयस्य द्वयस्य स्वरूपपक्षे निक्षेपात् प्रमातृत्वेनास्थाशैथिल्यं नाम न्यूनत्वं, न तु स्वरूपविप्रलोप एव, षट्त्रिंशद्ङ्गुलात्मनि प्राणचारे तावत्तुटिसंख्या- कत्वस्यानपायहानेः।"

(तं० आ० वि०, खं०7, पृ०,137)

~ पाञ्चदश्ये— **तत्र :— (1) प्रथमः क्षणः शिवः (2) द्वितीयः शक्तिः (शिवस्यकरणस्थानीया), ग्राहकात्मा सा च शक्तिस्त्रिरूपा इच्छा-ज्ञान-क्रियात्मिका (3) तृतयमप्येतदुन्मेषवृत्या निमेषवृत्या च प्रत्येकं द्विप्रकार मिति षट्प्रकाराऽसौ। प्रथमे षट्के मन्त्रमहेश्वरमन्त्रेश्वरमन्त्रात्मकं प्रमातृत्रयं तच्छक्तित्रयं चेति तृतीयादारभ्याष्टम्यन्तास्ताः तुटयः। अत्र षटके प्रमेयोल्लासेऽपि शुद्धप्रमातृतास्फुटा। तदग्रे प्रमेयोल्लास-प्राधान्ये ता एव शक्तयो विज्ञानाकल-प्रलयाकल-सकलात्मना तुटयस्तिस्रः, तच्छक्त्यात्मना च तिस्रः इति नवमीमारभ्य चतुर्दशीं तुटिं यावत्तासां व्याप्तिः। पञ्चदशी तुटिर्ग्राहकः षोडशी च ग्राह्यमिति षोडशतुट्यात्मतयात्र योगे पाञ्चदश्य-धारणात्मतया भावनाभ्यासो विधीयते। एकैकात्र तुटिः सपादद्वयाङ्गुलायामा। यथा—**

"समस्तेऽर्थेऽत्र निर्ग्राह्ये तुटयः षोडश क्षणाः।।
षट्त्रिंशदङ्गुले चारे सांशद्वयङ्गुलकल्पिताः।
तत्राद्यः परमाद्वैतो निर्विभागरसात्मकः।। (शिवः इति)
द्वितीयो ग्राहकोल्लासरूपः प्रतिविभाव्यते। (शक्तिरिति)
अन्त्यस्तु ग्राह्यतादात्म्यात्स्वरूपीभावमागतः।।
प्रविभाव्यो न हि पृथगुपान्त्यो ग्राहकः क्षणः।

तृतीयं क्षणभारम्य क्षणषट्कं तु यत्स्थितम्।।
तन्निर्विकल्पं प्रोद्गच्छद्विकल्पाच्छादनात्मकम्।
तदेव शिवरूपं हि परशक्त्यात्मकं विदुः।।
द्वितीयं मध्यमं षट्कं परापरपदात्मकम्।
विकल्परूढिरप्येषा क्रमात्प्रस्फुटतां गता।।
षट्केऽत्र प्रथमे देव्यस्तिस्रः प्रोन्मेषवृत्तिताम्।
निमेषवृत्तितां चाशु स्पृशन्त्यः षट्कतां गताः।
एवं द्वितीयेषट्केऽपि किन्त्वत्र ग्राह्यवर्त्मना।।
उपरागपदं प्राप्य परापरतया स्थिताः।।
आद्येऽत्र षट्के ता देव्यः स्वातन्त्र्योल्लासमात्रतः
जिघृक्षितेऽप्युपाद्य स्युः पररूपादविच्युताः।।
अस्ति चातिशयः कश्चित्तासामप्युत्तरोत्तरम्।
यो विवेकधनैर्धीरैः स्फुटीकृत्यापि दर्श्यते।।"

(तं० आ०10,187-196)

अतीव रहस्यात्मकोऽयं साधनाभ्यासः। अभ्यसनप्रवीणैरेव स्फुटं वेद्यो न केवलविद्याबलशालिभिः।

~ नववर्गपक्षे— क्षकारस्य नवमवर्गतया गणने प्रतिवर्गसंक्रन्तौ प्राणचारसंख्या 2400 इति। यथा—

"नव वर्गांस्तु ये प्राहुस्तेषां प्राणशती रवीन् (विः)
सत्रिभागैव संक्रान्तिर्वर्गे प्रत्येकमुच्यते।।
अहर्निशं तदैक्ये तु शतानां श्रुतिचक्षुषी।"

(तं० आ० 6,244-245)

अत्र प्रथमद्वितीयपंक्त्योः तात्पर्ये संशयः।

~ परिमाणतः — हृदयादारभ्य बाह्यद्वादशान्तं प्राणश्चरति, बाह्यद्वादशान्ताद् हृदयं यावदपानस्य गतिः। उभयत्र स्वशरीरानुपातेन षट्त्रिंशदङ्गुलोऽयं प्राणापानमार्गः। यथा—

"हृदयात् प्राणचारश्च नासिक्यद्वादशान्ततः।
षट्त्रिंशदङ्गुलो जन्तोः सर्वस्य स्वाङ्गुलक्रमात्।।"

(तं० आ०6,61)

"तत्र हृदयाद् द्वादशान्तान्तं स्वाङ्गुलैः सर्वस्य षट्त्रिंशदङ्गुलः प्राणचारः निर्गमे प्रवेशे च स्वोचितबलयत्नदेहत्वात् सर्वस्य।"

(तं० सा०, पृ०,48)

~ मतान्तरेण— केचित् तावत् सप्तप्रमातृरूपतया तच्छक्तिसप्तकरूपतया च चतुर्दशतुटीः ग्रहीतृरूपतया पञ्चदशी, ग्राह्यरूपतया च षोडशीति प्राणचारे समुपदिशन्ति। यथा—

"केचित्त्वेकां तुटिं ग्राह्ये चैकामपि ग्रहीतरि।
तादात्म्येन विनिक्षिप्य सप्तकं सप्तकं विदुः।।"

(तं० आ०10,197)

प्रागुक्तं यन्मतं तच्छीशम्भुनाथोपदिष्टं ततस्तदेव निःसंशयं प्रमाणम्। यथा—

"तदस्यां सूक्ष्मसंवित्तौ कलनाय समुद्यताः।
संवेदयन्ते यद्रूपं तत्र किं वाग्विकत्थनैः।"

(तं० आ०10,198)

शम्भुनाथानुभूतेः पुरः वाग्जालप्रतानं विकत्थनमात्रम्। अतो व्यर्थमिति तात्पर्यम्।

~ यत्नजः — स्थानकल्पनायोगे याः प्राणधारणास्तासामालम्बनं हृदयाद् बाह्यद्वादशान्तमिच्छापूर्वकेण प्रयत्नेन प्रसरन् प्राण एव भवति, न पुनः स्वारसिकः प्राणः। यथा—

"वेद्ययत्नात्तु हृदयात् प्राणचारो विभज्यते।"

(तं० आ०6,51)

"स्वेच्छया हि चारितः प्राणस्तत्तत्सिद्धिनिमित्तं योगिनां स्यात्"

(तं० आ० वि०, खं०4/1, पृ०,44-45)

~ वर्णोदयक्रमे— वर्णोदय-सम्मिततया श्वासोच्छासानां गणना, तत्तद्वर्णवर्गानुसारम्।

एकैकस्य वर्णवर्गस्योदये प्राणचाराणां गणना 1350। अष्टवर्गाणां 10800 इति। दिवा तावती रात्रावपि तावतीति संकलनया 21600 इति प्राणचारसंख्या। यथा—

"प्राणत्रयोदशशती पञ्चाशदधिका च सा।।
अध्यर्धा किल संक्रान्तिर्वर्गे वर्गे दिवानिशोः।"

(तं० आ०6,242-243)

~ संख्यातः — अहोरात्रकाले तावदेकविंशतिसहस्राणि षट्शतानि च प्राणचारसंख्या। यथा—

(क) "यतोऽहोरात्रमध्येऽस्याश्चतुर्विंशतिधा गतिः।।
प्राणविक्षेपरन्ध्राख्यशतैश्चित्रफलप्रदा।"

(तं० आ०6,23-24)

रन्ध्राः = नव (शरीरस्य नवद्वारत्वात्) नवशतैश्चतुर्विंशतिगुणितैः 21600 इति संख्या सम्पद्यते) यथा—

"षट्-शतानि वरारोहे सहस्राण्येकविंशतिः।
अहोरात्रेण बाह्येन अध्यात्मं तु सुराधिपे।।"

(स्व० तं०,54-55)

~ प्रतिघटिकम्—

"प्राणचाराणां सषष्टिस्त्रिशती, इति सार्धेन घटिकाद्वयेन नवशतानि भवन्ति .....
.....सार्धं च घटिकाद्वयं चतुर्विंशतिधा गुणितं षष्टिर्घटिकाभवन्तीत्यहोरात्रमध्ये तत् संख्याकानामुदयः।"

(तं० आ०, वि०4/1, पृ०,24)

~ समावेश्यविस्तरतः — सर्वाणि नक्षत्रादीनि नागादयश्च देवयोन्यधिकारिणः सर्वे प्राणचारे भावनया निवेश्यन्ते कालाध्वयोगाभ्यासे। यथा—

"नक्षत्राणां तदन्येषामुदयो मध्यतः क्रमात्।
नागा लोकेशमूर्तीशा गणेशा जलतत्त्वतः।।
प्रधानान्तं नायकाश्च विद्यातत्त्वाधिनायकाः।
....." इत्यादि

(तं० आ०6,69-72)

प्राणना— **चिद्रूपस्य सामान्यस्पन्दनात्मिका स्थितिः। यथा**—

"चिद्रूपस्य स्थितिर्येयं सामान्यस्पन्दनात्मिका।
प्राणना सैव विज्ञेयाऽविकल्पामर्शरूपिणी।।"

(पू० प्र०,1,79)

~ पञ्चरूपा— **(1) प्राणना स्वातन्त्र्यारोपसारत्वात्-प्राणोऽपानः समान उदानोव्यान इति पञ्चभिर्भेदैः पञ्चरूपतामायाति। यथा**—

"स्वातन्त्र्यारोपसारत्वात्पुनः प्राणादिरूपताम्।
भाजयन्ती विशेषेण भजते पञ्चरूपताम्।।"

(पू० प्र०1,80)

(2) तत्र चेतसा वाचा कायेन प्राणवायुना च विषयोपादानमपानः विषयपरित्यागः प्राणः। द्वयोरपि विच्छेदः समानः। तस्मादेव प्राणापानयोरुदयस्तस्मिन्नेव च तयोर्लयः विकल्पदाहात्मिका प्राणवृत्तिरुदानः।

सौषुम्नमार्गेणोर्ध्वोर्ध्वगतौ तस्य स्फुटाभिव्यक्तिः। सार्वात्म्यविमर्शात्मिका प्राणवृत्तिर्व्यानः। असौ शिवभावमय्यवस्था। यथा—

"प्राणापानमयः प्राणः प्रत्येकं सुप्तजाग्रतोः।
तच्छेदात्मा समानाख्यः सौषुप्ते विषुवत्स्विव।।
मध्योर्ध्वगाम्युदानाख्यस्तुर्यगोहुतभुङ्मयः।
विज्ञानाकलमन्त्रेशो व्यानो विश्वात्मकः परः।।"

(ई० प्र०,3-2-19,20)

~ मतान्तरे— **महार्थमञ्जरीपरिमले प्राणादिपञ्चकस्य या स्वरूपव्याख्या कृता वर्तते साऽन्यादृशैव नैवेश्वरप्रत्यभिज्ञानुसारिणी। यथा**—

"उच्छ्वासनिश्वासादिप्रवर्तकः प्राणः ह्रानोपादानाद्यु- पयोगी व्यानः, शरीरादिपोषणः, समानः, धात्वाद्युन्नयन उदानः, विष्मूत्रादिविसर्जनोऽपानः इति।"

(म० मं०, पृ०,49)

महेश्वरानन्दस्य कौलसम्प्रदायानुसारित्वादेषा कल्पनापि तच्छास्त्रानुसारिणी भवेत्।

प्राणप्रमाता— **उच्छ्वास-निःश्वासादौ, बुभुक्षापिपासादौ, निद्राजागरादौ वा अहमित्यभिमानी प्राणवायुकल्पो जीवः। यथा**—

"उच्छ्वसनिःश्वसनादौ वा अहमुच्छ्वसिमि इति प्राणो वायुकल्पः, स्थावरजङ्गमजिघत्सामन्युप्रज्वलनादौ वा प्राण एव तेजः समुपबृंहितः।"

(ई० प्र० वि० खं०, पृ०,205)

द्र०:- (ई० प्र० वि० वि०, खं०3, पृ०,280) **इति।**

इन्द्रियगणप्रेरिका पञ्चप्राणव्यापारप्रवर्तिका या प्राणनक्रिया तस्यामेव स्वात्माभिमानी जीवः। यथा—

"यदि वेन्द्रियशक्तीनामेव यान्तरी साधारणप्राण नात्मिका प्राणशब्दवाच्या प्राणादिमारुतविशेषेप्रेरणामयी सैवाहमित्यधिशयाना जीवनं, तदा प्राण एव जीवः।"

(ई० प्र० वि०, खं०2, पृ०,236)

प्राणनप्ररेणा— **प्राणी येषु यत्नेषु क्वचित् प्रभुशक्तेः प्राधान्यं, यथा चक्षुःस्फुरणादौ, क्वचित् पुनरात्मशक्तेः प्राधान्यं यथाऽऽनन्देन्द्रियस्य रन्ध्रसंकोचविकासादिक्रिया- स मूत्रोत्सर्गनिरोधाद्यवसरे। प्राणशक्तेरेव क्वचित् प्राधान्यं यथा प्राणापानगतिसंचारे। क्वचिद् द्वयस्य मुख्यता, क्वचित् त्रयस्यापि या योगिभिः संवेद्यते। यथा**—

"प्रभुशक्तिः क्वचिन्मुख्या यथाङ्गमरूदीरणे।
आत्मशक्तिः क्वचित्कन्दसङ्कोचस्पन्दने यथा।
प्राणशक्तिः क्वचित्प्राणचारे हार्दे यथा स्फुटम्।
त्रयं द्वयं वा मुख्यं स्याद् योगिनामवधानिनाम्।।

(तं० आ०6,53-54)

"प्रभोः शिवस्य या शक्तिर्वामा ज्येष्ठाच रौद्रिका।
सतदन्यतमावात्मप्राणौ यत्नविधायिनौ।।"

(तं० आ०6,52)

अत्र स इति सहार्थे। तदन्यतमाभ्यां सहितावात्मप्राणाविति।

प्राणविषुवत् द्र०:- 'विषुवत्' **इति।**

प्राणवृत्तिः — **जीवनव्यापारात्मिका प्राणनस्वरूपा मुख्या वृत्तिः सा चान्तरोद्योगात्मकस्पन्दरूपा। सैषा प्राणनावृत्तिर्मुख्या प्राणवृत्तिः। प्राणापानाद्याः पञ्चवृत्तयोऽपराः। ता एवोच्चारयोगालम्बनतां यान्ति न मुख्येयं प्राणवृत्तिः। यथा**—

"आद्या तु प्राणनाभिख्याऽपरोच्चारात्मिका भवेत्।"

(तं० आ०5,18)

" 'प्राणानभिख्या' इत्यान्तरोद्योगरूपा जीवनापरपर्याया प्राणनामात्रस्वभावा।"

(तं० आ० वि०, खं०3, पृ०,328)

"इयं सा प्राणनाशक्तिरान्तरोद्योगदोहदा।
स्पन्दः स्फुरत्ता विश्रान्तिर्जीवो हृत्प्रतिभा मता।।
सा प्राणवृत्तिः प्राणाद्यैः रूपैः पञ्चभिरात्मसात्।
देहं यत्कुरुते संवित्पूर्णस्तेनैष भासते।।"

(तं० आ.6,13-14)

"सेयं सामान्यपरिस्पन्दात्मा प्राणवृत्तिः।"

(तं० आ० वि०, खं०4/1, पृ०,13)

~ पञ्चविधा— **जीवनक्रियायाः पञ्चधा यतः प्रसरणं तत एव प्राणवृत्तयः पञ्च; ताश्च प्राणोऽपानः समान उदानो व्यान इति मुख्याः गौणाश्च कृकलधनञ्जयाद्याः पञ्च नात्र शास्त्रे गणिताः। यथा**—

"सैव (सामान्या प्राणवृत्तिः) प्राणादिविशेषस्पन्दात्मना पञ्चधा भवति।"

(ई० प्र० वि० वि० खं०3, पृ०342)

प्राणवृत्तीनां प्रतिष्ठायाः स्थानमहङ्कारो यतोऽहङ्कारो ह्यहमिति संरम्भात्मकः। तस्य संरम्भरूपत्वेन पञ्चविधप्राणवायुवृत्तयः सततगत्या प्रचलन्ति, अन्यथा प्राणाभावान्मरणमेव स्यात्। ततोऽहङ्कारे प्राणस्य प्रतिष्ठा। अहंङ्कारसंरम्भत एव संवित् प्राणवृत्तिरूपतया प्रसरति। यथा—

"तया (अहमभिमननात्मतया) पञ्चविधश्चैष वायुः संरम्भरूपया।
प्रेरितो जीवनाय स्यादन्यथा मरणं पुनः।।"
(तं० आ०9,231)

~ स्थानभेदतः — प्राणापानसमानोदानव्यानानां सामान्यानिस्थानानि हृदयं, गुदः, नाभिः, कण्ठःसर्वसन्धयश्चेति। यथा—

"हृद्गुदे नाभिकण्ठे च सर्वसन्धौ तथैव च।
प्राणाद्याः संस्थिता ह्येते .....।।"
(उद्धः- स्व० तं०7,304)
(तं० आ० वि० खं०4/1, पृ०162)

प्राणसमः — ~ जपः— पिण्डमन्त्राणां जपः प्राणसम्मित एव कार्यः। तदैव सुतरां फलति। यथा—

" 'जपः प्राणसमः कार्यः' इति हि सर्वत्राविशेषेणोद्घोष्यत अत एवेह यत्नजत्वमुक्तम्।"
(तं० आ० वि०, खं०4/2, पृ०,9)

सावधानतया प्राणापानगत्योर्नियत-संख्याको जपो विधेयो मन्त्रस्य। जपाक्षराणि प्राणापानगतिश्च परस्परं सावधानतया मेलनीयानि येन जपसंख्योभयत्र समानतया नियतत-या च प्रचलेदिति तात्पर्यम्। यथा—

"इह खलु योगिना यत्र क्वापि कर्मणि यस्य कस्यचिन्मन्त्रस्यावश्यं प्राणसाम्येनोच्चारः कार्यः। अन्यथा हि न कार्यसिद्धिः स्यात्।
जपेत्तु प्राणसाम्येन ततः सिद्धिर्भवेद्ध्रुवम्।
नान्यथा सिद्धिमाप्नोति ह्यस्यमाप्नोति सुन्दरि।।"
(उद्धः- तं० आ० वि०, खं०4/2, पृ०,30)

उदाहरणतः— कस्यापि बीज-पिण्डात्मकस्य मन्त्रस्योचारणे चिन्तने वा (मानसजपविषये) एकैकवारं कृते जपे प्राणचारस्य नियतमङ्गुलपरिमाणं विमृश्यम्। यथा-चेत्षड्भिरङ्गुलैरेकदा मन्त्रस्योच्चारस्तर्हि प्राणगतौ षड्बारमपानगतौ च षड्बारं तस्य जपः कार्यो नियमेन सावधानतया, च येन मन्त्रः प्राणचारगतावङ्कित इव भवेदिति। 6x6=36।

प्राणस्पन्दः — **(1) अन्तःसंरम्भरूपिणीसा स्फुरत्ता, यद्वशात् प्राणनव्यापारः सञ्चलति। यथा—**

"इयं सा प्राणनाशक्तिरान्तरोद्योगदोहदा।
स्पन्दः स्फुरत्ता विश्रान्तिर्जीवोहत्र प्रतिभा मता।।"
(तं० आ०6,13)

द्रः- 'स्पन्दः' इति।

~ अष्टप्रकारकः — **प्राणो जीवनयत्नात्मा परिस्पन्दः। स द्विप्रकारः स्वारसिकः, इच्छापूर्वकश्चेति। तद्द्वयमपि प्रत्येकं द्विप्रकारकम्। संवेद्ययत्नरूपमसंवेद्ययत्नरूपञ्चेति। भेदचतुष्टयमपि स्फुटत्वा- स्फुटत्वाभ्यां द्विप्रकारमित्यष्टौ प्रकाराः प्राणस्पन्दस्य। यथा—**

"यत्नो जीवनमा(या)त्रात्मा तत्परश्च द्विधा मतः।।
संवेद्यश्चाप्यसंवेद्यो द्विधेत्थं भिद्यते पुनः।
स्फुटास्फुटत्वाद्वैविध्यं प्रत्येकं परिभावयेत्।।"
(तं० आ०6,47-48)

"यत्न इति प्राणीयः स्पन्दः।.....
(स च स्वरसवाहीति)
तत्परः इच्छापूर्वकः।"
स च वर्णमन्त्रादिसहकृतः इति
(तं० आ० वि०, खं०4/1, पृ०,42)

~ मूलतः — **प्राणप्रमातृतायाः बुद्धिप्रमातृभावस्य स्वीकरणं प्रति या स्फुरत्ता सैव प्राणस्पन्दः। ततो बौद्धः स्पन्दः प्राणस्पन्दस्य बीजम्। ततश्च परः पुनश्चित् स्पन्दस्तस्यापि मूलम्। यथा—**

"मेये समुच्छलत्त्वेन पतन् बहिर्मुखीभवन् प्राणादिशब्दव्यपदेश्यो भवे दित्यर्थः। .....
इत्युपचारात्तच्छब्दव्यपदेश्यो न तु स एवायं तस्य शून्यप्रमात्रुल्लासादप्यूर्ध्वं भावात्।"
(तं० आ० वि०, खं०4/1, पृ०,11)

प्राणहरणदीक्षा— मन्दतीव्रशक्तिपातपवित्रितस्य साधकस्य सद्यः प्राणविमोचिकां दीक्षां कदाचित् सद्गुरुर्विदधाति। तया च तस्य प्राणाः क्रमेण पादाङ्गुष्ठात् समुत्क्रमणं कुर्वन्ति, स्वल्पेनैव च कालेन ब्रह्मरन्ध्रं भित्त्वोद्गच्छन्ति। ततः सर्वाणि तत्त्वानि पारयित्वा शिवभावे प्रविशन्ति। ततो देहे सद्यः पतिते साधकः तत्कालमेव परिपूर्णेन निजेन परशिवभावेन प्रकाशते। सैषा प्राणोत्क्रमणदीक्षा। एतस्या रहस्यमया उपायाः, अभ्यासः, युक्तिः, सङ्क्रान्तिः, वेधनम्, घट्टनम्, रोधनम्, हवनम्, मन्त्रप्रयोगः, पाशच्छेदः इति। एषा हि सद्यो निर्वाणदा दीक्षा इति। यथा—

"अभ्यासयुक्तिसंक्रान्तिवेधघट्टनरोधतः।।
हुतेर्वा मन्त्रसामर्थ्यात् पाशच्छेदप्रयोगतः।
सद्यो निर्वाणदां कुर्यात् सद्यः प्राणवियोजिकाम्।।"
(तं० आ०13,234-235)

~ तत्कालः — **न खलु यदाकदाचिदेव विधेयाऽसौ, अपि तु योगबलेन शिष्यस्य मरणकालं विज्ञाय तत्काले एव मरणक्षानात् किञ्चित्प्राग विधेया, येन प्रारब्धकर्मनियमो न बाधितो भवेत्। यथा—**

"तत्र त्वेषोऽस्ति नियम आसन्ने मरणक्षणे।
तां कुर्यान्नान्यथारब्ध कर्म यस्मान्न शुद्ध्यति।।"
(तं० आ०13,236)

द्रः- 'प्राणोत्क्रमण-दीक्षा' इति।

प्राणात्मवादिनः — मीमांसकादयो वेदवादरतः। यथा—

"बुभुक्षापिपासायोगयोग्यं प्राणमेवात्मानं केचन श्रुत्यन्तविदो मन्यन्ते।"
(ई० प्र० वि०, खं०1, पृ०,251)

प्राणापानक्षेत्रम्— **सकलाख्येष्वेव प्राणिषु प्राणापानवृत्ती न प्रलययाकलादिषु। यथा—**

"सकल एव प्रसरणविश्रमणयोगात् प्राणापानरूपं द्वयम्।"

(ई० प्र० वि० वि०, खं०3, पृ०,349)

प्राणापानाद्याः — **मुख्यस्य प्राणस्पन्दस्यैव पञ्चवृत्तयः प्राणोऽपानः, समान, उदानो, व्यानश्चेति। यथा—**

"सा प्राणवृत्तिः प्राणाद्यैः रूपैः पञ्चभिरात्मसात्।
देहं यत्कुरुते संवित्पूर्णस्तेनैष भासते।।"

(तं० आ०6,14)

~ जागरादौ— **यद्यपि जागरादावपि समानोदानव्यानवृत्तयः प्रचलन्त्सेव, तथापि प्राणापानप्राधान्यं जाग्रति स्वप्ने च, समानस्य प्राधान्यं सौषुप्ते, उदानस्य तुर्यायां, व्यानस्य तुर्यातीते पदे इति विवेकः। यथा—**

"जागरादावपि न नास्ति समान इति वदन् सर्वत्र सर्वसम्भवेऽपि प्रधानताकृतो विभाग इति व्याचष्टे।"

(ई० प्र० वि० वि०, खं०3, पृ०,344)

प्राणापानौ ~ आणवे— **हृदयादुच्चरन् बाह्यद्वादशान्ते च विश्राम्यन् सगतिकः प्राणवायुः प्राणः इति। बाह्यद्वादशान्तात् प्रसरन् हृदये च विश्राम्यन् सगतिकः प्राणवायुरपान इति।**

~ उच्चारयोगे— **प्राणस्य व्यापारद्वयम्। तत्र प्राणो कायवाङ्मनःप्रभृतिभिर्वस्तूनां परित्यागः, अपानश्च तेषामुपादानम्।**

अत एव प्राणवायोर्बहिर्गतिः प्राणोऽन्तर्गतिश्चापानः। स्वप्नेऽपि प्रश्वासनिःश्वासगती तथैव च तत्रापि विषयाणामुपादान परित्यागपरम्परा। इत्थं प्राणनमपाननं च जाग्रति स्वप्ने चाभिव्यक्ते भवतः। यथा—

(क) "प्राणापानमयः प्राणः प्रत्येकं सुप्तजाग्रतोः।"

(ई० प्र०,3-2-19)

(ख) "तत्र किञ्चिज्जहती क्वचित्पतन्ती च प्रश्वासनिःश्वासरूपा क्रमेण प्राणत्वमपानत्वं च विशेषं दर्शयति। तदिदं विशेषद्वयं जाग्रति तावत् स्फुटमेव। देहात् प्रसृत्य विषये विश्रान्तेः, ततोऽपि देहे। स्मृत्यादौ वाभ्यन्तरे वेद्यविश्रान्तेः प्राणापानयोः सुस्पष्टत्वात्। स्वप्नेऽपि तद्द्वयमस्त्येव, स्वपतोऽपि हि प्राणापानौ निर्गमप्रवेशात्मानौ स्फुटमेवापरेण लक्ष्येते। स्वयमेव च वेद्यसंवेदनात् त्यागोपादानरूपा स्थितिः संवेद्यत एव।"

(ई० प्र० वि०, खं०2, पृ०,244-245)

द्र०:- 'उच्चास्योगः ~ प्राणापानतः' **इति।**

प्राणायामः — ~ पातञ्जलः — **पूरक रेचककुम्भकाभ्यासविशेषैः प्राणवायोर्नियन्त्रणा- भ्यासोऽनेक प्रकारकः।**

~ अनुपयोगी— **पातञ्जलस्य प्राणायामस्य न स्वशिवत्वसाक्षात्कारोपयोगित्वम्। यथा—**

"प्राणायामादिकं यत्र हेयमित्येव वर्ण्यते।
न हि तस्य परां वित्तिं प्रति काचिदुपायता।।"

(मा० वि० वा०,2-3)

"प्राणायामो न कर्तव्यः शरीरं येन पीड्यते।"

(तं० आ०4,91)

~ शैवे— **तथाविधस्यान्तरावधानस्याभ्यासो येन सूक्ष्मातिसूक्ष्मस्य परस्य स्पन्दस्य स्फुटः साक्षात्कारः सञ्जायते। ततो नात्र प्राणवायुगतेर्निरोधः प्रशस्यते। यथा—**

"प्राणादिस्थूलभावं तु त्यक्त्वा सूक्ष्ममथान्तरम्।
सूक्ष्मातीतं तु परमं स्पन्दनं लभ्यते यतः।।
प्राणायामः स उद्दिष्टो यस्मान्न च्यवते पुनः।"

(ने० तं०8,12-13)

प्राणिनः — **जीवन्तः प्रमातारः। प्राणवृत्तिमन्तः प्रमातारः। सप्तप्रकाराः सर्वेऽपि प्रमातारः प्राणिन इति गण्यन्ते।**

~ अज्ञानप्रधानाः — **यक्षाद्याः।**

"यक्षे चैव तदज्ञानं .....।"

(स्व० तं०, प०,11,160)

~ अत्यन्ततामसाः — **तरुगुल्माद्याः सरीसृपाद्याश्च क्षुद्रप्राणिनः। यथा—**

"अत्यन्ततमसाविष्टाः स्थावराश्च सरीसृपाः।"

(स्व० तं०,प०11,170)

~ अधर्मप्रधानाः — **ते हि गन्धर्वा। यथा—**

"..... गान्धर्वेऽधर्म एव च।"

(स्व० तं०, प०11,160)

~ अनैश्वर्यप्रधानाः — **ते च पिशाचाः। यथा—**

"अनैश्वर्यं हि पैशाचे .....।"

(स्व० तं०, प०11,159)

~ अवैराग्यप्रधानाः — **ते च राक्षसाः। यथा—**

"..... अवैराग्यं च राक्षसे।"

(स्व० तं०, प०11,159)

~ अशुद्धाः — **मायाक्षेत्रभाजस्त्रिमलजुषः सकलाख्याः प्राणिनोऽशुद्धाः, पशवः, जीवाः, अणवः इत्यादिसंज्ञाभिरुच्यमानाः। देहादिशून्यान्तमात्मत्वाभिमानवन्तः प्राणिनः। एवं प्रलयाकला अप्यशुद्धा एव। विज्ञानाकलेषु तावदशुद्धेः शैथिल्यम्। यथा—**

"शून्याद्यबोधरूपास्तु कर्तारः प्रलयाकलाः।
तेषां कार्मोमलोऽप्यस्ति मायीयस्तु विकल्पितः।।"

(ई० प्र०,3-2-8)

"देवादीनां च सर्वेषां भविनां त्रिविधं मलम्।"

(तदेव,3-2-10)

~ ऐश्वर्यप्रधानाः — **ब्रह्मलोकस्थाः प्राणिनः। यथा**

"..... ऐश्वर्यं ब्रह्मणि स्थितम्।"

(स्व० तं०, प०11,161)

~ ज्ञानप्रधानाः — **ते च सौम्यसृष्टिस्थाः प्राणिनः। यथा—**

"..... ज्ञानं सौम्ये प्रतिष्ठितम्।।"

(स्व० तं०11,160)

~ तमोगुण प्रधानाः — **यातुधानाः पिशाचाश्च। यथा—**

"यातुधानाः पिशाचाश्च तामसाः परिकीर्तिताः"
(स्व० तं०, प०11,168)

~ तमस्तारतम्यतः — **स्थावरेषु तमोगुणस्यात्यन्त-प्रबलता, सरीसृपेभ्य एकपादहीनं तामसत्वं पक्षिणाम्, तेभ्योऽपि मृगाणाम्, तेभ्योऽपि गृहपशूनाम्। यथा—**

"पादपादविहीनाश्च तामसाः परिकीर्तिताः।
सरीसृपाद्या विज्ञेयाः .....।।"
(स्व० तं०, प०11,170-71)

"सरीसृपेभ्यः पक्षिणां पादेन हीनं तामसत्वं, तेभ्योऽपि मृगाणां, तेभ्योऽपि पशूनाम्।"
(स्व० तं०, उ० खं०6, पृ०,96)

~ धर्मप्रधानाः — **ऐन्द्राः प्राणिनः। यथा—**

"धर्मं चैव तथैन्द्रे तु .....।"
(स्व० तं०, प०11,160)

~ रजः सत्त्वप्रधानाः — **तीव्रव्रता ऋषयः। यथा—**

"रजः सत्त्वोत्कटा ज्ञेया ऋषयः संशितव्रताः।"
(स्व० तं०, प०11,169)

~ रजोगुणप्रधानाः — **ते प्राणिनो ये गन्धर्वादिलोकेषु निवसन्ति। यथा—**

"गन्धर्वयक्षमनुजा दैत्याश्चैव तु राजसाः।"
(स्व० तं०, प०11,168)

~ वैराग्यप्रधानाः — **प्राजापत्याः प्राणिनः। यथा—**

"प्राजापत्ये तु वैराग्यम् .....।"
(स्व० तं०, प०11,161)

~ शुद्धाः — **शिव-शक्ति-सदाशिवेईश्वर-विद्या-तत्त्वेषु निवसन्तः प्राणिनः क्रमेण-शाम्भवाः, शाक्ताः (उभयेऽपि अकलाः) मन्त्रमहेश्वराः, मन्त्रेश्वराः, मन्त्रा (विद्येश्वरा-पराभिधानाः) इति। यथा—**

"शाम्भवाः शक्तिजा मन्त्रमहेशा मन्त्रनायकाः।।
मन्त्रा इति विशुद्धाः स्युरमी पञ्चगणाः क्रमात्।।"
(तं० आ०9,53-54)

~ शुद्धाध्वस्थाः — **मन्त्रादारभ्य शिवान्ताः प्राणिनः शुद्धाध्वनिस्थिताः। तेषां नैव स्वस्वरूपविषये स्वस्वभावविषये वा कोऽपि विपर्यासः। एते हि शुद्धमपरिमितं पारमैश्वर्ययुक्तं च चिन्मात्रं स्वात्मत्वेनाभिमन्वानाः प्राणिनः। यथा—**

"शाम्भवाः शाक्ताः, मन्त्रमहेश्वराः, मन्त्रेश्वराः, मन्त्राइति शुद्धोऽध्वा।"
(तं० सा०, पृ०,75)

~ शुद्धाशुद्धाः — **विज्ञानाकलानां शुद्धचिदात्मकत्वे सत्यपि यत आंशिकः स्वस्वभावविषये विपर्यासस्ततस्ते शुद्धाशुद्धा इति गण्यन्ते। ते हि स्वात्मानं शुद्धसंविदात्मकं पश्यन्तोऽपि क्रियास्वातन्त्र्यं निजं नैव पश्यन्ति ततस्तेऽशतः शुद्धा अंशतश्चाशुद्धाः। तेषामेकप्रकार आणवो मलः। यथा—**

"शुद्धबोधात्मकत्वे ऽपि येषां नोत्तमकर्तृता।
निर्मिताः स्वात्मनो भिन्ना भर्त्रा ते कर्तृतात्ययात्।।"
(ई० प्र०,3-2-6)

द्र०:- **'विज्ञानाकलाः' इति।**

~ सत्त्वप्रधानाः — **ब्रह्मलोकादिन्द्रलोकं यावन्निवासिनो देवाः सत्त्वगुणप्रधानाः। यथा—**

"सत्त्वेनाधिष्ठिता देवा ब्रह्माद्या मघवान्तकाः।।"
(स्व० तं०, प०11.167)

"ब्रह्माद्या मघवदन्ताश्चत्वारः सत्त्वप्रधानाः।"
(स्व० तं० उ०, खं०6, पृ०,94)

प्राणेन्ता— द्र०:- 'प्राणप्रमाता' **इति।**

प्राणोत्क्रमणदीक्षा— **सद्यःसमुत्क्रमणदीक्षा। सा दीक्षा यया मन्दतीव्रशिवशक्ति- पातपात्रतामुपयातस्य शिष्यस्य दीक्षाकाल एव प्राणोत्क्रान्तिर्मलशुद्धिः शिवभावस्थितिश्च जायते। तदानीमेव शरीरादुत्क्रम्यासौ शिवभावेऽवस्थितो भवति। क्षणं भोग्यमुपभोगं भुक्त्वैव वा शिवीभवति मुमूर्षुः। मरणक्षणं विज्ञायैव समर्थेन गुरुणा इच्छाशक्तिप्रयोगमात्रेण वा ब्रह्मविद्यमन्त्रोच्चारणेन वोभयथा वा अन्यैर्वा वेधाद्युपायैरेषा दीक्षा विधीयते शिष्यस्य पारमार्थिक-मोक्षसिद्धये वा शुद्धतत्त्वविशेष-योजनिकायै वा। यथा—**

"अथ सद्यः समुत्क्रान्तिप्रदा दीक्षा निरूप्यते।
तत्क्षणाच्चोपभोगाद्वा देहपाते शिवं व्रजेत्।।
इत्युक्त्या मालिनीशास्त्रे सूचितासौ महेशिना।
देहपाते समीपस्थे शक्तिपातस्फुटत्वतः।
आसाद्य शांकरीं दीक्षां तस्माद्दीक्षाक्षणात्परम्।।
शिवं व्रजेदित्यर्थोऽत्र पूर्वापरविवेचनात्।
व्याख्यातः श्रीमतास्माकं गुरुणा शम्भुमूर्तिना।।"
(तं० आ०19,1-3)

~ तत्कालः —

द्र०:- **'प्राणहरणदीक्षा** ~ तत्काल' **इति।**

~ तत्पात्रभूतः — **(1) मरणकालं यावदनवाप्तदीक्षः शिष्यः।**

(2) दीक्षितोऽपि शक्तिपातमान्द्यादनवाप्तभोगमोक्षः मरणकालं यावत्।

(3) बन्धुमित्रादिद्वारा प्रापितगुर्वनुग्रहः मरणकाले समीपागते।

(4) पूर्वं प्राप्त समयदीक्षोऽपि न पुत्रकादित्वमाप्तः।

(5) प्राप्तदीक्षोऽपि मोक्षमार्गगोऽपि विना कष्टं प्राणान् जिहासुः शिष्यः। यथा—

"यदा ह्यासन्नमरणे शक्तिपातः प्रजायते।
तत्र मन्देऽथ गुर्वादिसेवयायुः क्षणं व्रजेत्।।
अथवा बन्धमित्रादिद्वारा सास्य विभोः पतेत्।
पूर्वं वा समयी नैव परां दीक्षामवाप्तवान्।।
आप्तदीक्षोऽपि वा प्राणाञ्जिहासुः क्लेशवर्जितम्।

अन्त्यान्गुरुस्तदा कुर्यात्सद्य उत्क्रान्तिदीक्षणम्।।"

(तं० आ०19,4-6)

अन्त्यान् = अन्तेवासिनः शिष्यानेवम्प्रकारानिति।

~ तत्प्रकाराः — **ते च देहपातविधयः। उक्तस्ते यथा—**

अभ्यास-युक्ति-सङ्क्रान्ति-वेध-घट्टन-रोधतः।।
हुतेर्वा मन्त्रसामर्थ्यात् पाशच्छेद-प्रयोगतः।
सद्यो निर्वाणदां कुर्यात् सद्यः प्राणवियोजिकाम्।।

(तं० आ०13,234-235)

अभ्यासः पौनः पुन्येन प्राणचारामर्शनम्। युक्तिर्वक्ष्यमाण-जालप्रयोगादिरूपा। सङ्क्रान्तिः परपुरप्रवेशादिः। वेधो मन्त्रादिरूपतया वक्ष्यमाणः। घट्टनं प्राणविक्षेपः। रोधः प्राणस्य गतागतपरिहारेण मध्यधाम्न्यवस्थापनम् मन्त्रस्येति कालरात्र्यादेः। सद्य इति दीक्षासमकालम्।।

(तं० आ० वि०, खं०8, पृ०,146)

व्याख्यैषा पुनश्चिन्तनीया साधकोत्तमैर्विद्वत्तल्लजैश्च। न सम्यक् सन्तोषावहा प्रतिभाति तावदापाततः।

~ तदधिकारी— **समय्यादि-नियमपालनाक्षमः योगाद्यभ्यासेऽसमर्थः प्राप्ततीव्रशक्तिपातः शिष्योऽस्याधिकारी। यथा—**

"दृष्ट्वा शिष्यं जराग्रस्तं व्याधिना परिपीडितम्।
उत्क्रमय्य ततस्त्वेनं परतत्त्वे नियोजयेत्।।"

(तं० आ०19,8)

~ तदनधिकारी— **अनायातशक्तिपातो वा शेष्युर्वा शेषप्रारब्धकर्मा वा नाधिकारी प्राणोत्क्रमणदीक्षायाः। यथा—**

"न त्वपक्वमले नापि शेषकार्मिकविग्रहे।
कुर्यादुत्क्रमणं श्रीमद्गह्वरे च निरूपितम्।।"

(तं० आ०19,7)

श्रीमद्गह्वर इति कुलगह्वरागमे।

~ तद्विधिः — **उक्तो यथा—**

"विधिं पूर्वोदितं सर्वं कृत्वा समयशुद्धितः।
क्षुरिकामस्य विन्यस्योज्ज्वलन्तीं मर्मकर्तरीम्।।
कृत्वा पूर्वोदितं न्यासं कालानलसमप्रभम्।
संहृतिक्रमतः सार्धं सृक्छिन्दियुगलेन तु।।
आग्नेयीं धारणां कृत्वा सर्वमर्मप्रतापनीम्।
पूरयेद्वायुना देहमङ्गुष्ठान्मस्तकान्तकम्।।
तमुत्कृष्य ततोऽङ्गुष्ठादूर्ध्वान्तं वक्ष्यमाणया।
कृन्तेन्मर्माणि रन्ध्रान्तात् कालकरात्र्या विसर्जयेत्।।
अनेन क्रमयोगेन योजितो हुतिवर्जितः।
समय्यप्येति तां दीक्षामिति श्रीमालिनीमते।।"

(तं० वि०19,10-14)

द्र०:- (तं० आ०19,15-35 यावत् सर्वम्।)

द्र० च० 'ब्रह्मविद्या', 'प्राणहरणदीक्षा।'

'क्षुरिका', 'मर्मकृन्तनी', 'कालरात्रिः' इति मन्त्राश्च।

~ शम्भुनाथोक्तः — **एतस्याधिकारानधिकारता प्रयोजका विषयाः शम्भुनाथेनैव कथिताः व्याख्याताश्च। यथा—**

"विशेषणविशेष्यत्वे कामचारविधानतः।
पूर्वोक्तमर्थजातं श्रीशम्भुनात्र निरूपितम्।।"

(तं० आ०19,9)

~ श्राद्धवर्जितः — **तया दीक्षितस्य नैव श्राद्धादिक्रियाः।**

"न तस्य कुर्यात् संस्कारं कञ्चिदित्याह गह्वरे।
देवः किमस्य पूर्णस्य श्राद्धाद्यैरिति भावितः।।"

(तं० आ०19,20)

प्रातिभाज्ञानम्— (1) विनागुरूपदेशं, विना शास्त्राभ्यासं, विना च योगसाधनां यज्ज्ञानं स्वत एवोदेति तत् प्रातिभम्। यथा—

"तत् प्रातिभं महाज्ञानं शास्त्राचार्यानपेक्षि यत्।।"

(तं० आ०13,132)

"प्रातिभज्ञानोदयो, यदुदये बाह्यसंस्कारं विनैव भोगापवर्गदः प्रातिभो गुरुरित्युच्यते।"

(तं० सा०, पृ०,120)

(2) मध्यतीव्रादनुहग्रशक्तिपातात् साधके स्वयमेवोद्दीप्तं स्वात्मशिवभावविज्ञानं प्रातिभम्, स्वप्रतिभा सामर्थ्येनैवोद्दीपितं सत्। यथा—

"मध्यतीव्रात् पुनः सर्वमज्ञानं विनिवर्तते।।
स्वयमेव यतो वेत्ति बन्धमोक्षतयात्मताम्।
तत् प्रातिभं महाज्ञानं शास्त्राचार्यानपेक्षि यत्।।"

(तं० आ०13,132)

(3) प्रातिभेन ज्ञानेन पशु-पाश-पति-ज्ञानं स्वयमेव स्फुटतां याति। यथा—

"पशुपाशपतिज्ञानं स्वयं निर्भासते तदा।।"

(तं० आ०13,177)

~ उपायदृष्ट्या— **निजपारमेश्वरस्वरूपविषये स्पष्टा विवेकदृष्टिः स्वयमुदयं याताऽत्रोपायः। वस्तुतोऽसौ दृष्टिरेव प्रातिभं ज्ञानम्। इत्युपायोपेयता कल्पितैव, आगमेऽप्युपचारत एवोक्ता वेदितव्या। यथा—**

"अनिर्देश्यः शिवस्तत्र कोऽभ्युपायो निरूप्यताम्।
इति प्रश्ने कृते देव्या श्रीमाञ्छम्भुर्न्यरूपयत्।
उपायोऽत्र विवेकैकः स हि हेयं विहापयन्।।
ददात्यस्य च सुश्रोणि प्रातिभं ज्ञानमुत्तमम्।"

(तं० आ०13,164-166)

यद्यपि प्रातिभं ज्ञानमनुपायमेव, तथापि तत् सुस्फुटं वा किञ्चित् स्फुटं वा ऽस्फुटमपि वा भवत्यनुग्रहवैचित्र्यप्रभावतः। ततस्तस्य स्फुटीकरणाय दीक्षादेरप्युपयोगो हिताय भवति। बाह्योपायकृतैः संस्कारैः प्रातिभं ज्ञानमपूर्वं परिपूर्णतां तीव्रां प्रदीप्तिं चोपयातीत्यभयमुपादेयमेव। उभये सति प्रातिभो गुरुः परेषामुद्धतये क्षमो भवति। यथा—

"यस्तु प्रातिभबाह्यात्म-संस्कारद्वयसुन्दरः।
उक्तोऽनन्योपकार्यत्वात्स साक्षाद्वरदो गुरुः।।"

(तं० आ०13,158)

~ कम्प्रम्— **कदाचित् प्रातिभे ज्ञाने समुदितेऽपि तस्य याथार्थ्ये साधकस्य न दृढ आश्वासो भवति। तस्य तत्तथाविधं प्रातिभं ज्ञानं कम्प्रमित्युच्यते।**

द्र०:- **'प्रातिभज्ञानम्'** — 'द्विप्रकारम्' इति।

कम्प्रमस्थिरमदृढं प्रातिभं ज्ञानं कस्यापि स्वयमेव दृढतामेति, कस्यचित् पुनरुपायान्तरैरिति भेदः। यथा—

"कम्पमानं हि विज्ञानं स्वयमेव पुनर्व्रजेत्।
कस्यापि दार्ढ्यमन्यस्य युक्त्याद्यैः केवलेतरैः।।"
(तं० आ०13,137)

~ तद्दार्ढ्य-साधनानि—

"दृढताकम्प्रताभेदैः सोऽपि स्वयमथ व्रतात्।।
तपोजपादेर्गुरुतः स्वसंस्कारं प्रकल्पयेत्।"
(तं० आ०13,142-43)

कम्प्रस्य दृढतायै इति।

~ दीक्षापूर्वकम्— **कदाचिद्बालवालिशयोषिदादीनां पाशच्छेदार्थं गुरुस्तेषां दीक्षामप्यनुतिष्ठति। परं ततस्तेषां त्वरितमुक्तये पश्चात् स्वानुग्रहेण तेषु प्रातिभं ज्ञानमप्युद्बोधयति। यथा—**

"ऊचेऽज्ञाना हि दीक्षायां बालवालिशयोषितः।
पाशच्छेदाद्विमुच्यन्ते प्रबुद्ध्यन्ते शिवाध्वरे।।
.....
दीक्षया पाशमोक्षे तु शुद्धभावाद्विवेकजम्।।"
(तं० आ०13,194-195)

दीक्षायां सत्यामप्यलब्धस्वात्मसाक्षात्कारा ये तेऽज्ञाना इति। विवेकजातं प्रातिभज्ञानम्।

~ दृढम्— **कदाचित् समुदिते प्रातिभे ज्ञाने साधकस्य स्वत एव दृढो विश्वासो भवति। तथाविधं प्रातिभं ज्ञानं दृढमित्युच्यते।**

द्र० 'प्रातिभं ~ द्विप्रकारकम्' इति।

~ द्विप्रकारकम्— **कस्यचित् प्रातिभं ज्ञानं सुदृढं भवति। न तत्र शास्त्रगुरुसाहाय्यमपेक्ष्यम्। परं कस्यचित् कम्प्रम्। तस्य शास्त्राभ्यासेन वा, गुरूपदेशेन वा, वादविवादाभ्यां वा, योगाभ्यासाद्वा कारणान्तराद्वेदृशाद् दृढतामेति। इति। भेदास्तस्य। यथा—**

"तत्रापि तारतम्योत्थमानन्त्यं दार्ढ्यकम्प्रते।
युक्तिः शास्त्रं गुरुर्वादोभ्यास इत्याद्यपेक्षते।।"
(तं० आ०13,136)

प्रकृतः शिष्टस्तत्तप्रक्षते इत्यन्वयः।

~ नादीक्षम्— **ननु दीक्षां विना शैवे योगे ज्ञाने वा नाधिकारः। तत् कथं प्रातिभस्य तद्विनैव स्वरूपलाभः। इत्यत्र सिद्धान्तोऽयं शैवानां यद्योगिन्य एवैनमन्तः प्रेरणयैव दीक्षयन्तीति तेन योगिनीदीक्षितोऽसौ ज्ञानपात्रतां याति प्रातिभः साधकः। यथा—**

"देवीभिर्दीक्षितस्तेन सभक्तिः शिवशासने।"
(तं० आ०13,142)

शिवशासने सभक्तित्वेनैवास्य योगिनीभिर्दीक्षितत्वं सिद्ध्यति। अन्यथा शिवभक्तिः कथमुदियात्।

~ प्रकारान्तरकम् — **प्रातिभस्यापि ज्ञानस्य क्वचित् क्वचित् शास्त्राद्यपेक्षा भवति, पारमेश्वराल्लीलावैचित्र्याद् इच्छावैचित्र्याच्च। इति तस्य निर्भित्ति-सभित्त्यादि-भेदाः। यथा—**

"अत्रापि तारतम्यसद्भावः, इच्छावैचित्र्यादिति।
सत्यपि प्रातिभत्वे शास्त्राद्यपेक्षा संवादाय स्यादपि। इति निर्भित्तिसभित्त्यादिबहुभेदत्वम् आचार्यस्य प्रातिभस्यागमेषूक्तम्। सर्वथा प्रतिभांशो कलीयान्।"
(तं० आ० पृ०,121-122)

~ फलदृष्ट्या— **(1) प्रातिभज्ञानवान् स्वयं मुक्तो भवति परांश्चापि मोचयितुं समर्थो भवति। यथा—**

"यदा प्रतिभया युक्तस्तदा मुक्तश्च मोचयेत्।।"
(तं० आ०13,166)

(2) प्रातिभेन ज्ञानेन योगी न केवलं स्वात्मानं शुद्धसंविन्मात्रं प्रत्यभिजानीते, यावत् स्वस्यनरशक्तिशिवात्मतावभासनस्वरूपं स्वभावमपि गुरूपदिष्टं हृदयंगमं करोति, येनासौ विश्वमपि स्वविलासरूपतया पश्यति। यथा—

"शिवादितत्त्वत्रितयं तदागमवशाद्गुरोः।।
अधरोत्तरगैर्वाक्यैः सिद्धं प्रातिभतां व्रजेत्।"
(तं० आ०13,173-174)

"यन्नाम हि नरशक्तिशिवात्मकं तत्त्वत्रयं तद्रोरागमाच्च प्रश्नप्रतिवचनरूपैर्वाक्यैः सिद्धं यथायथं तात्त्विकेन रूपेण प्ररोहमुपगतं प्रातिभतां व्रजेत्।"
(तं० आ० वि०, खं०8, पृ०,110)

~ मतान्तरे— **आगमव्याख्यातारः केचनैवं मन्यन्ते स्म, यन्निष्कामस्यैव मुमुक्षामात्राविष्टस्य प्रातिभं ज्ञानमुदेति। बुभुक्षोः सिद्धिकामस्य पुनः गुरुशास्त्रदीक्षाद्युपयोग एवावश्यकः। यथा—**

"अन्ये त्वाहु कामस्य प्रातिभो गुरूरीदृशः।
सामग्रीजन्यता काम्ये तेनास्मिन्संस्कृतो गुरुः।।
नियतेर्महिमा नैव फले साध्ये निवर्तते।
अभिषिक्तश्चीर्णविद्याव्रतस्तेन फलप्रदः।।"
(तं० आ०13,147-148)

परं तर्कमात्राश्रितमेतन्मतं नैव साधु। यतः समुत्कृष्टतरस्वात्मसाक्षात्कारभाजः श्रीसोमानन्दप्रभृतयस्तन्मतं न स्वीचक्रुः। यथा—

"असदेतदिति प्राहुर्गुरवस्तत्त्वदर्शिनः।
श्रीसोमानन्दकल्याणभवभूतिपुरोगमाः।।
तथाहि त्रीशिकाशास्त्रविवृतौ तोऽभ्यधुर्बुधाः।
सांसिद्धिकं यद्विज्ञानं तच्चिन्तारत्नमुच्यते।।
तदभावे तदर्थं तदाहृतं ज्ञानमादृतम्।"
(तं० आ०13, 149-151)

एतेन ज्ञायते यदन्येऽपि केचन व्याख्यातारोऽभूवन् मालिनीतन्त्रस्य ये विद्याबलमात्रमाश्रिता न स्वात्मसाक्षात्कार-बलमिति। परं श्रीसोमानन्द-कल्याण-भवभूतिप्रभृतयस्तत्वदर्शिनो गुरवस्तु स्वात्मसाक्षात्कारवन्त इति त एव प्रमाणमत्र विषये।

प्रातिभो ~ गुरुः — **समुदितप्रातिभज्ञानो योगी यः शिष्याणामप्यन्तः प्रातिभज्ञानोद्दीपने समर्थो भवति। मुक्तः सन् मोचकोऽप्यसौ। यथा—**

"प्रतिभाचन्द्रिकाशान्तध्वान्तश्चाचार्यचन्द्रमाः।
तमस्तापौ हन्ति दृशं विस्फार्यानन्दनिर्भराम्।।"
(तं० आ०13,133)

शिष्यस्य तमस्तापौ हन्तीति। यथा—

"तमस्तापाविति शैष्यौ।"
(तं० आ० वि०, खं०8, पृ०,87)

"न चास्य समयित्वादिक्रमो नाप्यभिषेचनम्।
न सन्तानादि नो विद्याव्रतं प्रातिभवर्त्मनः।।
आदिविद्वान् महादेवस्तेनैषोऽधिष्ठितो यतः।
संस्कारास्तदधिष्ठानसिद्ध्यै तत्तस्य तु स्वतः।।"
(तं० आ०13,140-141)

"अविधिज्ञो विधानज्ञो जायते यजनं प्रति।"
(प० त्री०,20)

"एवं यो वेत्ति तत्त्वेन तस्य निर्वाणगामिनी।
दीक्षा भवत्यसंदिग्धा तिलाज्याहुतिवर्जिता।।"
(तदेव, 25)

~ अभेदनिष्ठः — **प्रातिभज्ञानवान् योगी मनोबुद्धीन्द्रियैर्ज्ञान-क्रियाव्यवहारान् कुर्वन्नप्यभेदान्न च्यवते, यतोऽसौ मनोबुद्ध्याद्यपि स्वशक्तितयैव पश्यति परतत्त्वभावनादार्ढ्यात्। यथा—**

"नमनोबुद्धिहीनस्तु ज्ञानस्याधिगमः प्रिये।
परभावात्तु तत् सूक्ष्मं शक्तितत्त्वं निगद्यते।।"
(तं० आ०13,191)

"मनोबुद्धी प्रोक्तयुक्त्या स्वस्वरूपनिमज्जनेन सूक्ष्मं शाक्तं रूपमधिकृत्यैतज्ज्ञानं जनयत इत्युक्तम्।"
(तं० आ० वि०, खं०8, पृ०,122)

~ उत्तमोत्तमः — **यः पूर्वं गुरुणा दीक्षितः सन्नुनन्तरं प्रातिभज्ञानोदयेन दीपितः स उत्तमोत्तमः प्रातिभो गुरुः। तस्य दीक्षितत्वेनोपदेशप्रावीण्यं प्रातिभत्वेनानुग्रहस्वातन्त्र्यम्। यथा—**

"अन्यतः शिक्षितानन्तज्ञानोऽपि प्रतिभाबलात्।
यद्वेत्ति तत्र तत्रास्य शिवता ज्यायसी च सा।।"
(तं० आ०13,139)

अस्मिन् विषये प्रोक्तं श्र्थेऽप्याह्निके—

"यो यथाक्रमयोगेन कस्मिंश्चिच्छास्त्रवस्तुनि।
आकस्मिकं व्रजेद्बोधं कल्पिताकल्पितो हि सः।।
तस्य योऽकल्पितो भागः स तु श्रेष्ठतमः स्मृतः।"
(तं० आ०4,72-73)

~ जीवन्मुक्तः —

"परभावनदार्ढ्यात्तु जीवन्मुक्तो निगद्यते।"
(तं० आ०13,184)

"यस्य पुनः परप्रत्ययानपेक्षत्वेन परतत्त्व एव भावनादार्ढ्यं स जीवन्नेव मुक्तः।"
(तं० आ० वि० खं०8, पृ०117)

~ दीक्षापेक्षः — **कस्यचित् प्रातिभस्य गुरोः पूर्णे ज्ञानविज्ञाने भस्मच्छन्नाग्निवन्न स्फुटे भवतः। तत् स्फुटीकरणाय गुरुकृताया दीक्षायाः कश्चनोपयोगः। यथा—**

"भस्मच्छन्नाग्निवत्स्फौट्यं प्रातिभे गौरवागमात्।।
बीजं कालोप्तसंसिक्तं यथा वर्धेत तत्तया।
योगयागजपैरुक्तैर्गुरुणा प्रातिभं स्फुटेत्।।"
(तं० आ०13,175-176)

~ महामहिमपण्डितः — **गुरुशास्त्राद्युपायैरपि ज्ञानमुदेति सत्यम्, परं प्रातिभं ज्ञानं सर्वकामफलप्रदत्वेन श्रेष्ठम्। यथा—**

"गुरुशास्त्रप्रमाणादेरप्युपायत्वमंजसा।
प्रतिभा परमेवैषा सर्वकामदुधा यत्।।"
(तं० आ०13,156)

~ मुक्तिदः — **प्रातिभो गुरुः न केवलं स्वयमेव मुक्तोऽपि त्वपरानपि मोचयितुं समर्थः। यथा—**

"यदा प्रतिभया युक्तस्तदा मुक्तश्च मोचयेत्।।
परशक्तिनिपातेन ध्वस्तमायामलः पुमान्।"
(तं० आ०13,166-167)

~ विविधसामर्थ्यः — **यस्य प्रातिभं ज्ञानं स्वयमेव दृढतामेति स श्रेष्ठः प्रातिभो गुरूः, यस्य पुनरुपायेन सोऽवरः यस्य चाल्पोपायेन सोऽवरेषु श्रेयान्, यस्य बहुतरोपायेन सोऽधरतरः इति बहुविचित्रं तारतम्यम्। यथा—**

"यथा यथा परापेक्षतानवं प्रातिभे भवेत्।
तथा तथा गुरुरसौ श्रेष्ठो विज्ञानपारगः।।"
(तं० आ०13,138)

~ विश्वमोचकः — **कश्चित् स्वयं मुक्तः सन्नपरान्न मोचपितुं क्षमः। कश्चित् पुनर्विश्वविमोचने समर्थः। यथा—**

"स्वमुक्तिमात्रे कस्यापि यावद्विश्वविमोचने।
प्रतिभोदेति खद्योतरत्नतारेन्दुसूर्यवत्।।"
(तं० आ०13,159)

"जयताज्जगदुद्धृतिक्षमोऽसौ
भगवत्या सह शम्भुनाथ एकः।
यदुदीरितशासनांशुभिर्मे
प्रकटोऽयं गहनोऽपि शास्त्रमार्गः।।"
(तदेव1,13)

~ शापानुग्रहक्षमः — **यद्यपि विरक्तस्तथापि शापवरदानादि सामर्थ्यवान्। यथा—**

"शापानुग्रहकार्येषु तथाभ्यासेन शक्तता
तेषूदासीनतायां तु मुच्यते मोचयेत् परान्।।"
(तं० आ०13,185)

~ सिद्धिमान्— व्यावहारिक्योऽपि सिद्धयोऽस्मिन्नुदयन्ते कदाचित्। यथा—

"प्रादुर्भूतविवेकस्य स्याच्चिदिन्द्रियगोचरे।।
दूराच्छ्रुत्यादि- वेधादि-वृद्धिक्रीडाविचित्रिता।"
(तं० आ०13,179-180)

विचित्रिता तस्य चिदिति पूर्वेणान्वयः। यथा—

"प्रादुर्भूतविवेकस्य लक्षणं यत्प्रवर्तते।
तथा ते कथयिष्यामि येन येनेन्द्रियेण तु।।
साध्यं यत्तस्य तस्यैवं पाटवं जायते भृशम्।
दूराच्छ्रवणविज्ञानं मननं चावलोकनम्।। इति
क्रीडाकर्माण्यथोक्तानि सर्वतन्त्रोदितानि तु।
क्षणेनानुभवेत्तानि शक्तिज्ञानोपबृंहितः।।
षट्चक्रं षोडशाधारं कुलं जानाति सुव्रते।
मन्त्रवेधादि कुरुते स्वस्थावेशादिकानि तु।
क्षणादन्यानि विशते पुराणि नगनन्दिनि।।"

उद्धः- नन्दिशिखातन्त्रात् (तं०आ०वि०,खं०8,पृ०,114)

"सिद्धिजालं हि कथितं परप्रत्ययकारणम्
इहैव सिद्धाः कायान्ते मुच्येरन्निति भावनात्।।"
(तं० आ०13,183)

शिष्याणामाश्वासनायैव सिद्धिप्रदर्शनं करोति न लोकैषणयेति।

~ स्वभावतः — प्रातिभज्ञानवान् योगी स्वभावतो नैव सिद्धिप्रयोगे रुचिमान् भवति अपितु सततं बहिरन्तश्च शिवदर्शनरस एव रमते प्रायशः। यथा—

"सर्वभावविवेकात्तु सर्वभावपराङ्मुखः।।
क्रीडासु सुविरक्तात्मा शिवभावैकभावितः।
माहात्म्यमेतत्सुश्रोणि प्रातिभस्य विधीयते।।
स्वच्छाया दर्शवत् पश्येद् बहिरन्तर्गतं शिवम्।"
(तं० आ०13,180-182)

प्रातिभस्तर्कः — स्वयमेवोदयन् सांसिद्धिकः सत्तर्कः। यथा—

"स तावत्कस्यचित्तर्कः स्वयमेव प्रवर्तते।
स च सांसिद्धिकः शास्त्रे प्रोक्तः स्वप्रत्ययात्मकः।।"
(तं० आ०4,40)

द्रः- (उद्धः तं० आ० वि०, खं०8, पृ०,88)

प्राप्तयोगः ~ योगी — गुरुपरम्पर्येण यो दीक्षाक्रमेण योगोपदेशं तत् प्रशिक्षणं च लभतेऽसौ सम्प्राप्तयोगः साधकपदस्थो योगी। यथा—

"तत्र प्राप्तोपदेशस्तु पारम्पर्यक्रमेण यः।।
प्राप्तयोगः स विज्ञेयः .....।"
(मा० वि० तं०4,34-35)

प्रायश्चित्तम्— दोषदुष्कलनिवारकं कर्म।

~ अवश्यकर्त्तव्यम्— अविकल्पबुद्धोऽपि सुप्रतिबुद्धोऽपि सन् लोकसंग्रहार्थं प्रायश्चितं कुर्यादेवं यथा—

"अविकल्पमतेर्न स्युः प्रायश्चित्तानि यद्यपि।।
तथाप्यतत्त्वविद्वर्गानुग्रहाय तथा चरेत्।"
(तं० आ०28,408-409)

~ निमित्ताधीनम्— विशेषतो यथा-अनधिकारिभिः साकं यात्रादौ संकरे सति प्रायश्चितं विधेयम्। यथा—

"अतत्त्ववेदिनो ये हि चर्यामात्रैकनिष्ठिताः।
तेषां दोलायिते चित्ते ज्ञानहानिः प्रजायते।।
तस्माद्विकल्परहितः संवृत्त्युपरतो यदि।
शास्त्रचर्यासदायत्तैः सङ्करं तद्विवर्जयेत्
सङ्करं वा समन्विच्छेत् प्रायश्चितं समाचरेत्।
यथा तेषां न शास्त्रार्थे दोलारूढा मतिर्भवेत्।"
(तं० आ०28,412-414)

प्रारब्धकर्म— वर्तमानदेहारम्भकं जात्यायुर्भोगविशेषफलं तत् कर्मजातं यदायुषोऽन्त एव परिक्षीणं भवति पूर्णतया।

~ न शोध्यम्— गुरुदीक्षया सञ्चितं क्रियमाणञ्च कर्म शोधयति शिष्यस्य, न पुनः प्रारब्धम्। प्रारब्धशोधने सद्यो देहपातः स्यात्। अतस्तद्देहावसानकाले एव स्वयं क्षीयते। न ततः पूर्वम् शोध्यम् इत्येषा नीतिः शिवगुरूणाम्। यथा—

"अभावं भावयेत् सम्यक् कर्मणां प्राच्यभाविनाम्
मुमुक्षोर्निरपेक्षस्य प्रारब्धेकं न शोधयेत्।।"
(तं० आ०15,27)

"किन्तु देहवियोगार्थं प्रारब्धं कर्म देहिनः।।
शैवसाधनसाध्येन सन्धाय परिपालयेत्।"

उद्धः- मृगेन्द्रागमात् (तं० आ० वि०, खं०,19)

"आरब्धकार्यं देहेऽस्मिन् यत्पुनः कर्म तत् कथम्।।
उच्छिद्यतामन्त्यदशं निरोद्धुं न हि शक्यते।"
(तं० आ०9,130-131)

प्रारब्धभोगः ~ ज्ञानिनः — ज्ञानवानपि प्रारब्ध-कर्मक्षयान्तं कर्मफलानि भुञ्जानो जीवत्येव। यथा—

"करणगणसंप्रमोषः स्मृतिनाशः श्वासकलिलताच्छेदः।
मर्मसु रुजाविशेषाः शरीरसंस्कारजो भोगः।।
स कथं विग्रहयोगे सति न भवेत्तेन मोहयोगेऽपि।
मरणावसरे ज्ञानी न च्यवते स्वात्मपरमार्थात्।।"
(प० सा०,94-95)

प्रियमेलकः — द्रः- 'प्रियमेलापः' इति।

प्रियमेलापः — प्रेम्णा भक्त्याचाराधिताभिर्दिव्ययोगिनीभिः सह समागमः। तेन समागमेन निर्विघ्नतया रहस्योपायज्ञानं लभ्यते ताभ्यः। तदुपायतश्च बहुप्रकारो भुक्तिलाभो मुक्तिलाभश्च भवति। अन्यो मेलापो हठमेलाप इति यः सविघ्नः।

द्रः 'हठमेलाप' इति।

~ तन्मन्त्राः — प्रेम्णा योगिनी-मेलापसाधनभूतो मन्त्रः। स च "ह्रीं क्लीं ब्लें क्लें" इत्येतद्रूपः। अस्य रूपान्तराणि

च स्वरान्तरयुतानि सर्वाणि द्वादशषष्ठवर्जम्। न च सम्यक् स्पष्टतां नीतानि तानि। यथा—

"ह्रीं क्लीं ब्लें क्लें एभिर्वर्णैर्द्वादशस्वरभूषितैः।।
प्रियमेलापनं नाम हृदयं सम्पुटं जपेत्।
प्रत्येकमथवा द्वाभ्यां सर्वैर्वा विधिरुत्तमः।।"

(तं० आ०30,97-98)

प्लुतिः — (1) प्राणोच्चारयोगस्याभ्यासे कदाचिदचिरद्युतिवत् क्षणसाक्षात्कृते देहोत्तीर्णे शुद्धे संवित्स्वरूपे तत्क्षणं तत्र समावेशात् स्थूलदेहस्य न्यग्भावे जातेऽसौ देहोऽन्तरान्तरा उत्प्लवेत् क्षणम् क्षणम्। सैषा प्लुतिरुद्भवेतिनामकं योगसिद्धेर्बाह्ययं चिह्नम्। यथा—

"ततोऽपि विद्युदापानसदृशे देहवर्जिते।
धाम्नि क्षणं समावेशादुद्भवः प्रस्फुटं प्लुतिः।।"

(तं० आ०5,101)

"उद्भवो लघुभावेन देहग्रहतिरोहिते।"

(तदेव 20,14)

(2) प्रणवाद्युच्चारणाभ्यासे स्वरस्य दीर्घदीर्घतरता। यथाः—

"प्रणवादि समुच्चारात् प्लुतान्ते शून्यभावनात्।
शून्यया परया शक्त्या शून्यतामेति भैरवि।।"

(वि० भै०,39)

फ

फ— (1) अहङ्कारतत्त्वस्य यद्वास्तविकं स्वरूपं तदभिव्यञ्जको मातृकावर्णः।

(2) मालिनीक्रमे च फकारोधरातत्त्वरहस्यस्याभिव्यञ्जकः। यथा—

"फे धरातत्त्वमुद्दिष्टम्।"

(मा० वि० तं०4,15)

फकारः — द्र०:- 'षट्त्रिंशत्तत्त्वदीक्षा (13)' इति।

फणभृत्— ढकारः।

"फणभृत् -ढ।"

(तं० आ० वि०, खं०11/2, पृ०,137)

फुल्लबीजम्— पवर्गस्य द्वितीयो वर्णः फकारः।

"ओष्ठ्यं फुल्लं स्वमूर्धनि"

(तं० आ.5,146)

"फुल्लं फकारः।"

(तं० आ० वि०, खं०3, पृ०,460)

ब

ब— महत्तत्त्वस्य यद्वास्तविकं स्वरूपं शिवशक्तिविशेषस्य प्रतिबिम्बरूपत्वं तस्याभिव्यञ्जको वर्णो मातृकाक्रमे।

बकारः— द्र०:- 'षट्त्रिंशत्तत्त्वदीक्षा' इति।

बद्धः —~ आत्मा : — स्वस्य शक्तिमच्छिवरूपत्वमजानानो मायीयः प्रमाता। जीवः- अणुः। पशुः। यथा—

"यदा तु परमा शक्तिः सर्वज्ञादिगुणान्विता।
आपादादिविकासिन्या न विकास्येत निर्मला।।
तावन्नः निर्मलो ह्यात्मा बद्धः शैवे तदुच्यते।"

(ने० तं०8,31-32)

पादादिमस्तकान्तं विकासिन्या प्राणशक्त्येति।

(2) त्रिभिर्गुणैर्बाह्यान्तःकरणैस्तन्मात्रपञ्चकेन च वेष्टितः संसरणशीलः पशुप्रमाता। यथा—

"बद्धस्त्रिगुणबन्धेन बुद्ध्या वैकारिकेण तु।
तन्मात्रेन्द्रियबन्धेन दृढं भूतैश्च वेष्टितः।।
बद्धः संचरति ह्येवं मायाद्यवनिगोचरे।
संसारी प्रोच्यते तस्मात्संसरेद्यत्पुनः पुनः।।"

(स्व० तं०11,103-104)

(3) स्वस्य यत् परिपूर्णत्वं तस्याज्ञानेनापूर्णं किमपि जडं वस्तु स्वात्मत्वेनाभिमन्वानोऽणुः प्रमाता इति। यथा—

"सत्यं, परमार्थतो न कश्चिद्बन्धः केवलं स्वस्मादनुतरात् स्वातन्त्र्याद् यदा स्वात्मानं संकुचितमवभासयति स एव, तदा स्वस्य पूर्णस्य रूपस्य यदपरिज्ञानं भासमानत्वेऽप्यपरामर्शरूपं, तदेव कारणत्वेन प्रकृतं यस्य स पूर्णत्वाख्यातिमात्रतत्त्वः 'पुरुष' इत्युच्यते।"

(ई० प्र० वि०, खं०2, पृ०,253)

बद्धमुक्तौ— माययाच्छादितवास्तविकस्वभावः प्रमाता बद्धः, विद्यया चाभिव्यञ्जितनिजैश्वर्यस्वभावो मुक्तः। एतेनैतद् विज्ञेयं यज्ज्ञानमेव मुक्तिरज्ञानमेव च बन्धः। इत्थं तादात्म्यं मोक्षेण ज्ञानस्य बन्धेन चाज्ञानस्य। या त्वनयोः हेतुफलभाव- कल्पनाश्रिता प्रसिद्धिरसौ लाक्षणिकी मन्तव्या। यथा—

"एष प्रमाता मायान्धः संसारी कर्मबन्धनः।
विद्याभिज्ञापितैश्वर्यश्चिद्धनो मुक्त उच्यते।।"

(ई० प्र०,3-2-2)

बन्धः — (1) सर्वो हि प्रपञ्च आत्मैव। परं तत्र जनानां नात्मताभिमानः अपि तु प्रमेयात्मकविषयाभिमानः। इत्येवमात्मन्यनात्मताभिमान एव मूलतो बन्धः। तदुपरि रूढो द्वितीयो बन्धः, स च जडे शरीरादावेवात्मताभिमानः। तदयमनात्मन्यात्मताभिमानोऽपरो बन्धः। यथा—

"आत्मन्यनात्माभिमतौ सत्यामेव ह्यनात्मनि।।
आत्माभिमानो देहादौ बन्धो मुक्तिस्तु तल्लयः।"

(तं० आ०5,105-106)

द्र०:- (स्व० तं० उ०, प०5, पृ०,79)

तथा (व० रा० वा०, पृ०3)

(2) पारमेश्वरमायाशक्त्युत्थापितोऽपूर्णम्मन्यतात्मक आणवो मलो मूलतो बन्धः। यथा—

"शिवाभेदाख्यात्यात्मकाज्ञानस्वभावोऽपूर्णम्मन्यतात्मकाणवमलसतत्त्वसङ्कुचितज्ञानात्मा बन्धः।"

(शि० सू० वि०, पृ०,5)

आणवो मल एव हि मूलतो बन्धः। स च शिवस्य निजया तिरोधानशक्त्या कलित आभास एव।

(3) भेददर्शनात्मको मायीयो मलोऽपि बन्धः। यथा—

"सर्वो ग्राहको विश्वशरीरः शिवभट्टारक एव।..... .....इत्यादिना शिवजीवयोरभेद एव उक्तः।..... एतत्तत्त्वापरिज्ञानमेव च बन्धः।"

(प्र० ह०, पृ०,10-11)

(4) कञ्चुकषट्ककृतमावरणमेव पुनः परिपूर्णो बन्धः। यथा—

"कलाविद्यारागकालनियतिर्बन्ध उच्यते।
मायापूर्वो यकारादिवकारान्ताक्षरात्मकः।।"

(अ० प्र० प०, 16)

यादिवर्णैर्मातृकाक्रमेऽयमभिव्यक्ततामेति।

~ तत्त्वतः — **शिवस्य अवरोहलीलैव बन्धः। यतस्तयैवात्मानं बद्धं मनुते जनः। यथा—**

"बन्धोऽवरोहलीला ..... शम्भोः।।"

(स्वा० द०4,3)

बन्धकरनम् — **मूलतः शिवस्य स्वातन्त्र्यमेव हि बन्धकारणम्। स्वतन्त्रः परमेश्वरो निजयाऽऽनन्दमय्या स्वातन्त्र्यलीलया स्वं स्वरूपं स्वभावं च तिरोधत्ते। तथा कुर्वंश्च बद्धजीवरूपतयाऽऽभासमानः सन् सुचिरं संसृतिचक्रेषु भ्राम्यतीति तस्य स्वातन्त्र्यलीलैव बन्धनस्य मूलकारणम्। यथा—**

"इत्थं भ्रान्तिविषावेशमूर्च्छानिर्मोकदायिनीम्।
श्रीशम्भुवदनोद्गीर्णां वच्म्यागममहौषधीम्।।
देवः स्वतन्त्रश्चिद्रूपः प्रकाशात्मा स्वभावतः।
रूपप्रच्छादनक्रीडायोगादणुरनेककः।।
स स्वयं कल्पिताकारविकल्पात्मककर्मभिः।
बध्नात्यात्मानमेवेह स्वातन्त्र्यादिति वर्णितम्।।"

(तं० आ०13,102-104)

बन्धनम्— **संसृतिसागरे पुनः पुनर्जननमरणे बन्धनम्। यथा—**

"अज्ञानं बन्धने हेतुर्बन्धनञ्च पुनर्भवः।।"

(तं० व० धा०1,2)

बन्धमोक्षकारणम्— **उभयमेतन्मूलतो भगवद्विलासरूपं, नानयोरविद्याविद्यादिकं मूलकारणम्। यथा—**

"यश्चायं मोहस्तदपसारणं च यत् तदुभयमपि भगवत एव विजृम्भामात्रं, न त्वधिकं किञ्चित् (अविद्यावासनादिकं तदतिरिक्तम्)।"

(ई० प्र० वि०, खं०1, पृ०,38)

बन्धमोक्षतत्त्वम्— **तत्त्वतस्तु पारमेश्वरी विलासलीलैव बन्धरूपतया मोक्षरूपतया चावभासते। तत एकमेव हि तत्त्वमुभयरूपतया भासते इति पराद्वैतसिद्धान्तः शैवानाम्। यथा—**

"एतौ बन्धविमोक्षौ च परमेशस्वरूपतः।
न भिद्येते न भेदो हि तत्त्वतः परमेश्वरे।।"

(बो० प० द०,14)

बन्धमोक्षलीला— **उक्तमेतद्विषये :** —

"धर्माधर्मात्मकैर्भावैरनेकैर्वेष्टयेत्स्वयम्।
असन्देहं स्वमात्मानमवीच्यादिशिवान्तके।।
तद्वच्छक्तिसमूहेन स एव तु विवेष्टयेत्।
स्वयं बध्नाति देवेशः स्वयं चैव विमुञ्चति।।
स्वयं भोक्ता स्वयं ज्ञाता स्वयं चैवोपलक्ष्यते।
स्वयं भुक्तिश्च मुक्तिश्च स्वयं देवी स्वयं प्रभुः।।
स्वयमेकाक्षरा चैव यथोष्मा कृष्णवर्त्मनः।"

(तं० आ०13,122-125)

एतानि पद्यानि सारशास्त्रादुद्धृतानीत्युक्तं तन्त्रालोके। सारशास्त्रं च मालिनीविजयोत्तरम्। परं तत्रैताः पंक्तयो नैव क्वापि लभ्यन्ते मुद्रिते ग्रन्थे। इत्येतद्विषयेऽन्वेषणं कुर्वन्तु विद्वांसः। आर्थमुद्धरणं कदाचित् स्यादिदम्। यथा—

"श्री सारशास्त्रे भगवान्वस्त्वेतत् समभाषत।।"

(तं० आ०13,121)

~ क्रियाशक्तिविलासतः — **क्रियाशक्तिरेवाग्निहोत्रहिंसादिकर्मरूपत्वमाप्ता सती बन्धो, सुखदुःखादिभोगप्रदत्वात्; सैव स्वविलासमयस्पन्दरूपतया चित्तदेहादिहनष्ठा सती वाञ्छितभुक्तिमुक्तिसिद्धिप्रदा। इति बन्धमोक्षवैचित्र्यं क्रियाशक्तिविलासमयमेव। यथा—**

"उक्तं सेयं क्रियाशक्तिः शिवस्य पशुवर्तिनी।
बन्धयित्रीति तत् कर्म कथ्यते रूपलोपकृत्।।
ज्ञाता सा च क्रियाशक्तिः सद्यः सिद्ध्युपपादिका।"

(तं० आ०13,266-267)

~ पारमेश्वरस्वभावतः — **न च वाच्यं केन कारणेन किमर्थं दुःखभूयसीमिमां जीवलोकसरणिमाभासयति परमेश्वर उन्मत्त इव कश्चिज्जन इति। एवं लीला-विलसनं तु परमेश्वरस्य स्वभावः। न च स्वभावविषये कथं किमर्थम् इत्यादि प्रश्नानां कोऽप्यवकाशः। अग्निः कथमुष्णः किमर्थं भास्वरः इत्यादिरूपाः प्रश्नाः निरवकाशाः। यथा—**

"देव एव तथासौ चेत् स्वरूपं चास्य तादृशम्।
तादृक्प्रथास्वभावस्य स्वभावे कानुयोज्यता।।
आह्यस्मत्परमेष्ठी च शिवदृष्टौ गुरूत्तमः।
पञ्चप्रकारकृत्योक्ति-शिवत्वान्निजकर्मणे।।
प्रवृत्तस्य निमित्तानामपरेषां क्व मार्गणम्।"

(तं० आ०13,107-109)

~ शिवरूपा—

"बन्धो मोक्षः सुखं स्वर्गो दुःखं जडमयी स्थितिः।
संविदेव स्वतन्त्रेत्थं शिवरूपा विराजते।।"

(मा० वि० वा०1,1112-113)

बन्धमोक्षौ— (1) बद्धतायाः दृढोऽभिमान एव हि बन्धः। एवं स्वात्मपरमेश्वरताभिमननं यत् सुविश्वस्तं तदेव मोक्षः। यथा—

"अभिमानमात्रसारौ परिमितप्रमात्रपेक्षया बन्धमोक्षौ, न पुनः परमार्थे संवित्तत्त्वे एवं किंचित् संभवति इति।"

(प० सा० वि०, पृ०,118)

(2) वस्तुतः शिव एव सर्वजीवरूपतया तथा तथा प्रकाशते स्वयम्। परं मायाकृत-मोहवशात् तथा नाभिमन्यते जीवैः। तथानभिमननमेव हि बन्धनाभासः, तथाभिमननमेव च मोक्षावभासः। उभयं भगवत्क्रीडाङ्गभूतम्। यथा—

"येदतस्यापरिज्ञानं तत् स्वातन्त्र्यं हि वर्णितम्।
स एव खलु संसारो जडानां यो विभीषिका।।
ततप्रसादवशादेव गुर्वागमत एव वा।
शास्त्राद्वा परमेशस्य यस्मात् कस्मादुपायतः।।
यत् तत्त्वस्य परिज्ञानं स मोक्षः परमेशता।
तत् पूर्णत्वं प्रबुद्धानां जीवन्मुक्तिश्च सा स्मृता।।"

(बो० प० द०11-13)

द्र०:- (ई०प्र०वि०वि०,खं०3, पृ०,182) **इति।**

यो निश्चयः पशुजनस्य जडोऽस्मि कर्मसम्पाशितोऽस्मि मलिनोऽस्मि परेरितोऽस्मि।

इत्येतदन्यदृढनिश्चयलाभयुक्त्या
सद्यः पतिर्भवति विश्ववपुश्चिदात्मा।।"

(तं० सा०, पृ०,32)

"प्रकाशमान एव **(स्वे पारमेश्वरे स्वभावे)** यद् "न प्रकाशते" इत्यभिमननं तदपसार्यते (शास्त्रेण) तदपसरणमेव हि परमेश्वरतालाभो मुक्तिः, तदनपसरणमेव संसारः। अभिमननमात्रसारं ह्येतद् द्वयम्। उभयं चेदं भगवद्विजृम्भितमेव।"

(ई० प्र० वि०, खं०2, पृ०,119-130)

द्र०:- (स्पं० प्र०, पृ०,8) **इति।**

बलं ~ योगिनः — समयी पुत्रको वा विज्ञानयोगाद्यभ्यासेनाध्यात्मिकं बलमासाद्य भोगे मोक्षे वा यथेच्छं साफल्यं लभते। बलं न केवलं दीक्षयाऽऽसाद्यते, अपि तु ज्ञानयोगाद्यभ्यासतोऽपि। यथा—

"तेन विज्ञानयोगादिबली प्राक् समयी भवन्।।
पुत्रको वा न तावान्स्यादपि तु स्वबलोचितः।।"

(तं० आ०16,297-298)

~ तत् प्रयोजनम्— यस्तावदन्तर्यागविधौ न कुशलः, स बहिर्यागस्यानुष्ठानेन केनापि कालेन समावेशमाप्नोति। यथा—

"योऽपि तथा समावेशभाग् न भवति, तस्य मुख्यो बहिर्यागः। तदभ्यासात् समावेशलाभो यतस्तस्यापि तु पशुतातिरोधानायान्तर्यागः। तदरूढावपि तत्सङ्कल्पबलस्य शुद्धिप्रदत्वात्।

(तं० सा०, पृ०,143)

बहिष्करणम्— कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि च बाह्यविषयग्राहीणि। यथा—

"वाक्पाणिपादं पायुं च उपस्थं च तथा विदुः।।
श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चेति कीर्तितम्।
बहिष्करणकं देवि दशधा संव्यवस्थितम्।।"

(स्व० तं०11,131-132)

बहुरूपः — स्वच्छन्दनाथस्य तच्छरीरं यन्मुखेनासौ भैरवाष्टकाख्याना गमानुपदिष्टवान्। यथा—

"एते स्वच्छन्दरूपास्तु बहुरूपेण भाषिताः।।"

श्री०कं०सं० **उद्धः०:-** (तं०आ०वि०,खं०1, पृ०,42)

बाधः — असक्तप्रतिषेधः। यथा—

"चमसगोदोहनादिवदसक्तप्रतिषेधो बाधः।"

(तं० आ० वि०, खं०11, पृ०,172)

बाह्यचर्या— यागादिरूपा क्रियाऽम्बरमय्युपासना।

~ आवश्यकी— कौलिके विधौ बाह्यचर्यां विना नैव भुक्तिमुक्तिफलप्राप्तिः। परं नैष नियमस्त्रिके। यथा—

"नित्योदिता परा शक्तिर्यद्यप्येषा तथापि तु।
बाह्यचर्याविहीनस्य दुष्प्रापः कौलिको विधिः।।"

उद्धः०:- (तं० आ० वि०, खं०11/2, पृ०,63)

"कर्तव्या सर्वतो दूतिर्दूतिहीनो न सिद्धिभाक्।"

उद्धः०:- (तदेव)

"ब्राह्मणस्य यथा पत्नी तया सह यजेन्मखे।
एवं दूतिः कुलाचार्ये ज्ञेया नित्योदिता कुले।।"

उद्धः०:- (तत्रैव पृ०,64)

त्रिकविषये तु नायं नियमः। तत्र चर्यां विनापि भुक्तिमुक्ती सिद्ध्यतः। यथा—

"अदृष्ट-मण्डलोऽप्येवं यः कश्चिद् वेत्ति तत्त्वतः।
स सिद्धिभाग् भवेन्नित्यं स योगी स च दीक्षितः।।"

(प० त्री०,18)

बाह्यता : — इदन्ता-परामर्शः। प्रमात्रपेक्षया भेदेन परामर्शः, न केवलं पुनर्देशकृतं बाह्यत्वं गृहाद् बाह्य इव। यथा—

"प्रमात्रैकात्म्यमान्तर्यं ततो भेदो हि बाह्यता।"

(ई० प्र०,1-8-8)

"अहमित्युचिते परामर्शे योऽयम् इदन्तापरामर्शः सैव बाह्यता।"

(ई० प्र० वि०, खं०1, पृ०,192-193)

बाह्यत्वम्:— ~ दार्शनिकम्— प्रमात्रपेक्षया भावनाभिन्नत्वम्। तच्च जीवानां दृष्टौ भवति मायापदे। यथा—

द्र०:- 'आन्तरत्वम्' इति
'बाह्यता' इति।

~ व्यावहारिकम्— अन्तर्बहिरिन्द्रियवेद्यतयावभासमानता। यथा—

"अन्तर्बहिष्करणद्वयवेद्यतया घटादेरपि बाह्यत्वम्।"

(तं० आ० वि०, खं०6, पृ०,10)

मुख्यं तु बाह्यत्वं प्रमात्रपेक्षया भिन्नत्वं व्यावहारिकं पुनरुभयेन्द्रियवेद्यत्वम्।

बाह्यपशुः — यज्ञमण्डपाद्बहिरेव हन्यमाने यागे उपयुज्यमानशरीरो बाह्यपशुः। यथा—

"यस्त्वन्यत्रापि निहतः सामस्त्येनांशतोऽपि वा।।
देवाय विनिवेद्येत स वै बाह्यपशुर्मतः।"

(तं० आ०16,53-54)

बाह्यपीठानि— साधकापेक्षया भिन्नानि पूजादिपात्र-भूतानि पीठानि। मुख्यानि तु पीठानि साधकस्यान्तःशरीरे एव विद्यन्ते।

~ पीठत्वं (तेषाम्)— **अन्तः प्राणे वर्तमानाश्शक्तय एव यदा लोकानुग्रहं कर्तुं बाह्येऽप्यालम्बने स्वात्मानं संस्थाप्य तत्राभिव्यञ्जयन्ति स्वं तदा तानि बाह्यस्थानान्यपि पीठत्वं लभन्ते। यथा—**

"बाह्ये तु तादृशान्तःस्थ-योगमार्गविशारदाः।।
देव्यः स्वभावाज्जायन्ते पीठं तद्बाह्यमुच्यते।"

(तं० आ०15,97-98)

"बहिरनुग्रहनिमित्तमभिव्यक्तिमासादयन्तीति पीठं बाह्यमुच्यते।"

(तं० आ० वि०, खं०9, पृ०,51)

बाह्ययागः — स्थण्डिलाद्यालम्बनीकृत्य क्रियमाणः कुलयागो बाह्ययागः। यथा—

"तत्र बाह्यं स्थण्डिलम्, आनन्द (द्रव्य) पूर्णं वीरपात्रम्, अरुणः पटः, पूर्वोक्तमपि लिङ्गादि।.....इत्यादि।"

(तं० सा०, पृ०,198-199)

बाह्ययोगः — (1) स्वशरीराद् बहिर्यौ देशकालौ तावेवालम्बनीकृत्य विधीयमानो स्वात्मपरिपूर्णताया भावनाभ्यासः। स एव हि षडध्वयोग इति वा, स्थानकल्पनयोग इति वा कथ्यते।

(2) कलातत्त्वभुवनानां भावनया स्वशरीरान्तर्गतत्वेन विकल्पनस्याभ्यासः। यथा—

"प्राकृतं पार्थिवं नैशं शाक्तं चाण्डचतुष्टयम्।
विचित्रदेशभुवनतत्त्वात्मकमिदं स्फुरत्।।
ममैवान्तरतः सर्वदेशकालात्मिकां भिदाम्।
अन्तः कृत्याहमेवैक इति ज्ञानाद्विमुक्तता।।"

(तं० वा० घा०,6-7)

नैशमिति मायीयम्।

~ प्राणचारालम्बनः — **षडध्वात्मकस्य सर्वस्य बाह्यप्रपञ्चस्य भावनया निजस्य प्राणाचारस्यान्तरेव दर्शनस्याभ्यासो भावनया। यथा—**

"अध्वा समस्त एवायं षड्विधोप्यतिविस्तृतः।
यो वक्ष्यते स एकत्र प्राणे तावत् प्रतिष्ठितः।।"

(तं० आ०6,5)

बाह्यविधिः — स्थानकल्पनयोगः। षडध्वधारणा। यथा—

"अथ बाह्यविधिः। स एव स्थानकल्पनशब्देनोक्तः।"

(तं० सा०, पृ०,45)

बाह्यसृष्टिः — इदंरूपतयावभसमाना सदाशिवादिधरान्ता तत्त्वसृष्टिः। यथा—

"पुनरपि च पञ्चशक्तिप्रसरणक्रमेण बहिरपि तत्।
अण्डत्रयं विचित्रं सृष्टं बहिरात्मलाभेन।।"

(प० सा०,46)

बाह्यात्मा— स्थूलशरीरधारी परिमितः प्रमाता। यथा—

"बुद्धिकर्मेन्द्रियैर्युक्तो महाभूतैः समावृतः।।
बाह्यात्मा तु तदा देवि भुङ्क्तेऽसौ विषयान्सदा।।
(स्थूलदेहवान्)। "

(स्व० तं०11,86-87)

बाह्यार्थसत्ता — बाह्यार्थवादिनां बौद्धानां मते विज्ञानाद् बहिरस्ति खल्वर्थो यो विज्ञाने स्वं प्रतिबिम्बमर्पयति; तत एव च विज्ञानं नीलपीतादिरूपतया सुखदुःखादिरूपतया चाभासते। तदभावे सति कथमविचित्रस्य चिन्मात्ररूपस्य विज्ञानस्य विचित्राकारतयावभासः सम्भवेत्।

यथा—

"तत्तदाकस्मिकाभासो बाह्यं चेदनुमापयेत्।
न ह्यभिन्नस्य बोधस्य विचित्राभासहेतुता।।"

(ई० प्र०,1-5-4)

~ तद्बाधः — **प्रकाशमध्ये स्वं प्रतिबिम्बमर्पयतः बाह्यार्थवादिबौद्धाभिमतस्य प्रकाशबाह्यस्यार्थस्य नैव वस्तुतः कापि सत्ता।**

क्वापि कथञ्चिदपि। तदेवास्ति यत् प्रकाशते। यच्च प्रकाशते तत् प्रकाशात्मकमेव सत् प्रकाशते। अप्रकाशस्य प्रकाशितुमशक्तत्वात्। ततो बाह्याभिमतमपि वस्तु मूलतः प्रकाशात्मकमेव न ततो बाह्यम्, यतः प्रकाशते व्यवहारे। प्रकाशबाह्यत्वेऽप्रकाशरूपतायां सत्यां कथं प्रकाशते।

यथा—

"किं बाह्येन यत्र साधकं च नास्ति प्रमाणम्। बाधकं च प्रकाशाद् भेदे अनुमेयतयापि प्रकाशनाभाव इति तावन्मुख्यम्। अभ्युच्चयबाधकास्तु अवयविनो वृत्त्यनुपपत्तिः, समवायासिद्धिः, कम्पाकम्पावरणानावरणरक्तारक्तदिग्भागभेदादिविरुद्धधर्मयोगः।"

(ई० प्र० वि०, खं०1, पृ०,178-79)

एतेऽभ्युच्चयबाधका अवयविरूपस्य बाह्यस्य विषये।

बाह्या — ~ स्थितिः — (1) सृष्ट्यनन्तरं मायाप्रमातृदृष्ट्या भावनां प्रमात्रपेक्षया बाह्यत्वेन भिन्नत्वेन स्थितिर्या तथाऽवभासमाना वर्तते सर्ववेद्या।

~ आन्तरत्वाविरोधिनी— **परिमितप्रमात्रपेक्षया बाह्यत्वेनापि स्थितानां भावानामपरिमितस्य प्रमातुरन्तर्या स्थितिर्नासौ तेन बाह्यत्वेन बाध्यते।**

यथा—

"यदा तु मायाशक्त्या विच्छेदनावभासनस्वातन्त्र्यरूपतया बाह्यत्वमेषामाभास्यते तदा तदवलम्ब्यावभासमानानामसौ स्थितिर्बहिरपि अन्तरपि। नायमन्तराभासो बाह्यत्वस्य विरोधी।"

बोधपञ्चदशिका— सुकुमारमतीनां शिष्याणां सम्बोधार्थमाचार्याभिनवगुप्तेन निर्मितो लघुकायो ग्रन्थः। अत्र ग्रन्थे शैवदर्शनस्य मूलसिद्धान्ताः प्रतिपादिताः सरलया भाषया सरलेन च प्रकारेण। अत्र प्रतिपादिताः विषयाः —

(1) परमेश्वरः।
(2) तस्य परमेश्वरता।
(3) शिवशक्त्योरभेदः।
(4) सृष्ट्यादिवैचित्र्यम्।
(5) सर्वस्य शिवरूपत्वम्।
(6) बन्धस्य स्वरूपम्।
(7) मुक्तेः स्वरूपम्।
(8) मुक्त्युपायाः।
(9) बन्धमोक्षवैचित्र्येऽप्यभेदः।
(10) शक्तित्रयस्यात्र प्राधान्यम्।

उक्तमस्य ग्रन्थस्य विषये :—
"सुकुमारमतीन् शिष्यान्
प्रबोधयितुमञ्जसा।
इमेऽभिनवगुप्तेन
श्लोकाः पञ्चदशोदिताः।।"

(बो० पं० द०,16)

बोधभैरवः— (1) कौलिके विधौ प्रधानत्वेन पूज्यो देवाधिदेवः। प्रकाशात्मा स्वात्मशिवरूपः प्रमाता। यथा—

"स्वविमर्शविकचकानन—
समुन्मिषद्विषयकुसुमसंतत्या।
करणेश्वरीभिरभितः
समर्चितो बोधभैरवो जयति।।"

(भा० वि०, पृ०,1)

(2) विश्वसृष्ट्यादिकरो भट्टारकः परमशिवः। यथा

"स्वस्वरूपात्मशक्त्यैव स्वाभिन्नं संसृजञ्जगत्। संहरंश्च जयत्येकः स्वच्छन्दो बोधभैरवः।।"

(स्व० तं०, उ०11, पृ०,1)

बोधमध्यम्— समस्तोऽश्यमध्वा बोधरूवे स्वात्मन्येव प्रकाशते इति बोधमध्यमिदम्। यथा—

"समस्ततत्त्वभावोऽयं स्वात्मन्येवाविभागकः।।
बोधमध्यं भवेत् किञ्चिदाधाराधेयलक्षणम्।

(तं० आ०8,13-14)

बोधमूलम्— परां कोटिं प्राप्तं बोधस्य स्थौल्यम्। यथा—

"तच्च बोधगं मूलं बोधस्य परां कोटिं प्राप्तं स्थौल्यमुच्यते।"

(तं० आ० वि०, खं०5, पृ०,10)

संशयितमिवेदं निवर्चनं जयरथकृतम्। यथाः—

"अव्याहतविभागोऽस्मिभावो मूलं तु बोधगम्।"

(तं० आ०8,13)

चैत्रोऽहमस्मीति विकल्पात्मकविभागो बोधनिष्ठः तद्बोध एवास्य मूलमिति शास्त्राभिप्रायः।

बोधवह्निः — मायीयप्रमातृतत्त्वम्। सङ्कुचितम् "अहम्" इति। यथा—

"बोधवह्नौ-परिमिते प्रमातरि।"

(तं० आ० वि०, खं०3, पृ०,370)

बोधाग्रम्— स्वात्मन्येवावस्थानं यतः पर्यन्ते सर्वस्य, ततः सर्वमग्रे प्रमादशायां बोधरूपमेव सद्बोधाग्रम्। यथा—

"तत्त्वभेदविभागेन स्वभावस्थितिलक्षणम्।।
बोधाग्रं तत्तु चिद्बोधं निस्तरङ्गं बृहत्सुखम्।"

(तं० आ०8,14-15)

बोधिनी— विद्या कला। यथा—

"तत्त्वानि सप्त बोधिन्या तच्चतुर्धा पुराणि च।
तृतीये सप्तवर्णाः स्युः पदमन्त्रद्वयं द्वयम्।।"

(मा० वि० तं०2,54)

बोधिन्या व्याप्तानीति शेषः। तच्चतुर्धेति 7×4=28-धा इति। भुवनानि 28 इति तात्पर्यम्।

बौद्धं ज्ञानम्—

द्र०:- 'ज्ञानम्':— ~ 'बौद्धम्' इति।

~ आवश्यकम्— दीक्षया गलितेऽपि पौरुषेऽज्ञाने बुद्धिगतस्य तस्यानिवृत्तौ न जीवन्मुक्तिलाभोऽपि तु विकल्पपङ्कमज्जमानतैव। यथा—

"दीक्षया गलितेप्यन्तरज्ञाने पौरुषात्मनि।
धीगतस्यानिवृत्तत्वाद्विकल्पोऽपि हि सम्भवेत्।।"

(तं० आ०1,48)

"दीक्षापि बौद्धविज्ञानपूर्वा सत्यं विमोचिका।
तेन तत्रापि बौद्धस्य ज्ञानस्यास्ति प्रधानता।।"

(तदेव1,45)

"शिवशास्त्रविधानज्ञं ज्ञानज्ञेयविशारदम्। इति गुरुलक्षणम्"

उद्धः:- (तत्रैव, पृ०,83)

"शास्त्रहीने न सिद्धिः स्याद्दीक्षायां वीरवन्दिते।"

उद्धः:- (तत्रैव, पृ०,83)

"तत्राध्यवसायात्मकं बुद्धिनिष्ठमेव ज्ञानं प्रधानम्, तदेवाभ्यस्यमानं पौरुषमप्यज्ञानं निहन्ति। विकल्पसंविदभ्यासस्य अविकल्पान्ततापर्यवसानात्।"

(तं० सा०, पृ०,3)

"पौंस्नज्ञानाभिव्यञ्जने दीक्षा तावन्न प्रभवेद् यावदस्य बौद्धं ज्ञानं पूर्वभावि न स्यात्, येनास्य ततोऽपि प्राधान्यम्।"

(तं० आ० वि०, खं०1, पृ०,86)

~ मोक्षप्रदम्— निश्चयेन मोक्षप्राप्तये बौद्धमपि ज्ञानमावश्यकमेव। यतो बुद्धावेवाहन्ताभिमानपरम्परायाः प्राबल्यात् कदाचिद् देहान्तेऽपि पौरुषाज्ञानशान्तौ सत्यामपि पुनर्विकल्पकलंकपङ्कनिमज्जमानतैवापद्येत, न च ततो मोक्षः सम्भवेत्।

यथा—

(2) तेन शिवाद्भिन्नत्वेनावभासमानमपि सर्वं जगत् तस्यान्तः शुद्धसंविद्रूपतया सततं विद्यमानमेव तिष्ठतीति वेद्यम्। लोकव्यवहारेऽपि जगत् प्रकाशात्मकत्वेन वस्तुतः शिवात्मकमेव सत् सदा प्रकाशते, यद्यपि मायाकृतादावरणात् तथा नावभासते।

(ई० प्र० वि०, खं०1, पृ०,331-32)

बाह्यालम्बनम्— स्वशरीरराद्बहिरवस्थितं पूजालम्बनम्, तच्च मण्डलस्थण्डिलादिरूपमेकादशविधम्। यथा—

"एकादशविधं बाह्यं मण्डलस्थण्डिलादिकम्।
प्रतिमामूर्तिपुस्तादितूरलिङ्गाक्षसूत्रकम्।।
पुस्तकञ्च पटः पात्रं स्थितं स्थानं विभेदतः।"

(पू० प्र०1,106-107)

दशानामपि लक्षणानि स्वे स्वे स्थाने द्रष्टव्यानि।

बाह्योपायः — स्थानकल्पनायोगः। देशकालालम्बनको योगः। यथा—

"स्थानाप्रकल्पाख्यतया स्फुटस्तु
बाह्योऽभ्युपायः प्रविविच्यतेऽथ।।"

(तं० आ०6,1)

~ आनन्दाद्युपलक्षितः — **न केवलमुच्चाराद्युत्कृष्टतर एव योगाभ्यासे आनन्दादिपञ्चलक्षणाभिव्यक्तिर्यावद् बाह्ययोगधारणास्वपि। यथा—**

"तावदालोचयेद् वस्तु यावत् पदमनामयम्।।
.....
.....
मुहूर्त्तं तिष्ठते यावत् तावत् कम्पः प्रजायते।
भ्रमणोद्भवनिद्राश्च किञ्चिदानन्द इत्यपि।"

(मा० वि० तं०20,7-10)

बाह्ययोगविषय उक्तमेतत् तन्त्रे।

~ विस्तरतः — **बाह्यं योगस्यालम्बनजातं मुख्यतो देशमाकात्मं षऽध्वसंज्ञकम्। विस्तारस्तु बाह्यस्य मण्डलादिमूर्त्यन्तो बहुधा, संगृहीतोऽसौ पुनरेकादशधा।**

द्र०:- 'बाह्यालम्बनम्' इति।

बिन्दुः — ~ अवरे योगे— (भ्रूमध्ये धारणायां स्फुरन् कदम्बगोलकाकारस्स्फुरंस्तरकसन्निभः शुक्लादिविविधवर्णः तेजोमयो भावविशेषः। स च दशविधः। यथा—

"..... दशधा बिन्दुरिष्यते।।
कदम्बगोलकाकारः स्फुरत्तारकसन्निभः।
शुक्लादिभेदभेदेन एकोऽपि दशधा मतः।।"

(मा० वि० तं०12,10-11)

(2) देहे बहुषु स्थानेषु ध्यानदृशा द्रष्टव्यः सर्वतस्तेजःकिरणैरावृतो बिन्दुरूपः प्रकाशः। यथा—

"बिन्दुः भ्रूमध्यादौ प्रदेशेध्यानाभ्यासप्रकर्षप्रवर्धमानोत्तरप्रसादस्तेजोविशेषो, यो बिन्दुभेदाभ्यासात् धरातत्त्वध्यायिनामभिव्यज्यते।"

(स्पं० वि०, पृ०,108)

~ त्रैशिरसे— **क्षेपः इति तत्रास्य संज्ञा। सा हि बहिरुल्लिलसिषाचितः। असावीश्वरतत्त्वस्थितिरेव। यथा—**

"बिन्दोः ..... वहिरुल्लसनमेव सतत्त्वम्।"

(तं० आ० वि०, खं०12, पृ०,179)

~ प्रणवकलासु— **ईश्वरतत्त्वम्। यथा—**

"नादस्वरूपस्य प्रकाशैकवपुषः सदाशिवभट्टारकस्य नान्तरीयको विमर्शः ईश्वरो बिन्दुः।"

(म० प्र० वि०, पृ०,26)

द्र०:- (वि० भै० उ०, पृ०,5) **इति।**

"नादाद्बिन्दुः समुत्पन्नः सूर्यकोटिसमप्रभः।"

(स्व० तं०11,9)

"क्रियाशक्त्यात्मा प्रकाशो बिन्दुः समस्तवेद्याविभिन्नप्रथत्वादेव सूर्यकोटिसमप्रभः।"

(स्व० तं० उ०11, पृ०,10)

द्र०:- (तदेव, प०1, पृ०,56)
(तदेव, प०15, पृ०,141)
(ने० तं०, खं०2, पृ०,290)
(स्व० तं०, पं०4, पृ०,264)

"असंख्यातास्तु कोट्यो वै मन्त्राणां तत्र संस्थिताः।।
लभन्ते तत्प्रविष्टा वै स बिन्दुश्चेश्वरः स्मृतः।"

(ने० तं०21,65-66)

~ बीजमन्त्रः — **हूँ इति। यथा—**

"बिन्दुः हूँ।"

(तं० आ० वि०, खं०12, पृ०,220)

~ शाम्भवोपाये— **विन्दुस्तावद् हृदि, कण्ठे, ललाटे, नासान्ते, बाह्ये च द्वादशान्ते क्रमेण शरीरे साक्षात्क्रियते। यथा—**

"अत एव शरीरेऽपि हृदयान्मूर्धान्तं हृत्कण्ठललाटशक्त्यन्तद्वादशान्तेषु अर्थादवस्थितः।"

(तं० आ० वि०, खं०2, पृ०,210)

अत्रासौ विन्दुरित्येव न बिन्दुः। यतो हि बिन्दुरीश्वरः। विन्दुश्चेच्छाशक्त्याविष्टः शिव इति न विस्मर्तव्यं सुधीभिः।

~ स्थानकल्पने— **देशाध्वधारणायामुत्कृष्टं लयस्थानम्। यथा—**

"..... लयाख्यं तत्त्वमुत्तमम्।
पारिभाषिकमित्येतन्नाम्ना बिन्दुरिहोच्यते।।"

(तं० आ०8,379)

"यन्नाम सर्वकर्तृत्वादिगुणयोगादुत्तमं लयाख्यं तत्त्वं तदेवैतद्बहिरभिव्यक्तं सदिह स्वशास्त्रपरिभाषया बिन्दुरूच्यते।"

(तं० आ० वि०, खं०5, पृ०,247)

बिन्दुवेधः — वेधदीक्षाया नवसु प्रकारेष्वेकः प्रकारः। यथा—

"बिन्दुस्थागतं चित्तं भ्रूमध्यपथसंस्थितम्।।
हृल्लक्ष्ये वा महेशानि बिन्दुं ज्वालाकुलप्रभम्।
तेन सम्बोधयेत् साध्यं बिन्द्वाख्योऽयं प्रकीर्तितः।।"

(तं० आ०29,244-245)

"भ्रूमध्ये हृदये वाथ कन्दे वा बिन्दुभावनात्।
आविश्य शिष्यचित्तं तु बिन्दुभेदेन वेधयेत्।।"
उद्ध० तं० (आ० वि०, खं०11/2, पृ०,152)

द्र०:- **'वेधदीक्षा'** इति।

बिन्द्वाद्या — ~ प्रणवकलासु— **ते च बिन्दुः, अर्धचन्द्रः, निरोधी चेति।**

~ तदुच्चारकालः — **बिन्दोरर्धमात्रा कालः, मात्राचतुर्थांशोऽर्धचन्द्रस्य, मात्राष्टमांशो निरोधिकायाः। यथा—**

"अर्धमात्रः स्मृतो बिन्दुर्व्योमरूपी चतुष्कलः।
तदर्धमर्धचन्द्रस्तदष्टांशेन निरोधिका।।"
(तं० आ०8,385)

बिन्द्वावरणम्ः — अकारादारभ्य सर्वा अपि प्रणवकलाः परस्य निष्कलस्य तत्त्वस्यावरणरूपा गण्यन्ते। ततो बिन्दुप्येकमावरम्।

~ तद्विस्तारः — बिन्दोरारभ्य निरोधिन्यन्तं बिन्द्वावृतेरेव विस्तारः। यथा—

"इत्यर्धेन्दुनिरोध्यन्त-बिन्द्वावृत्यूर्ध्वतो महान्।।
नादः .....।"
(तं० आ०8,387-388)

बिम्बप्रतिबिम्बवादः — शिवस्य शक्तय एव हि बिम्बस्थानीयाः, परं नैव बिम्बरूपाः। शिवस्य चित्प्रकाशस्य मध्ये तासां बहिर्मुखतया यत् प्रतिफलनं तदेव सदाशिवादिधरान्तानां तत्त्वानामाभासमयी सृष्टिः। जगत्सृष्टिविषये एवंविधः शैवदर्शनसिद्धान्तो बिम्बप्रतिबिम्बवादः। तदनुसारं शिवशक्तीनां प्रतिबिम्बरूपतया यद् बाह्यत्वेनाभासनं सैवतत्त्व-सृष्टिः। यथा—

"अन्तर्विभाति सकलं जगदात्मनीह।
यद्वद्विचित्ररचना मुकुरान्तराले।
बोधः परं निजविमर्शरसानुवृत्त्या
विश्वं परामृशति नो मुकुरस्तथा तु।।
(तं० सा०, पृ०,19)

~ अभेदमयः — **लोके नगरग्रामादि बिम्बजातं दर्पणे स्वं प्रतिबिम्बं समर्पयद् दर्पणादवश्यं भिन्नत्वेन पृथग् भासतं एव। परं शुद्धे संविद्दर्पणे न किमपि भिन्नं बिम्बस्थानीयं पदार्थजातं प्रतिबिम्बसमर्पकम्। परमेश्वरस्य निजशक्तिप्रतिबिम्बधारित्वेन विश्वावभासकत्वात्। ततो बिम्बस्थानीयत्वेन कलितमपि वस्तु तस्य स्वात्मैव। तच्च वस्तुतस्तस्य शक्तिरेव, यतः स्वशक्तिमहिम्नैव शिवो विश्वरूपतया स्वयमाभासते। यथा—**

"आदर्शकुक्षौ प्रतिबिम्बकारि-
समर्पकं स्याद् यदि मानभिन्नम्।
सुस्वच्छ-संविन्मुकटान्तराले
भावेषु हेत्वन्तरमस्ति नान्यत्।।"
(प० च०,5)

बिम्बम्— स्वच्छन्दम्, अनन्यानुस्यूतं स्वयमेव यज्जगति भासते तल्लोके बिम्बमुच्यते। यथा—

"..... बिम्बं किल किमुच्यते।
अन्यामिश्रं स्वतन्त्रं सद् भासमानं मुखं यथा।।"
(तं० आ०3,53)

"स्वतन्त्रमन्यामिश्रं सद्भासते स्वयमेव यत्।
बिम्बं तदुच्यते लोके .....।।"
(पू० प्र०1,336)

दर्पणाद्यमिश्रं स्वतन्त्रतयाऽऽभासमानमित्यर्थः।

बिम्बस्थानीयंः — ~ तत्त्वम्— **पारमेश्वरी परावाग्रूपा शक्तिरेवात्मनो विविधानां सामर्थ्यानामन्तरकारादिविमर्शात्मकतया स्पन्दमानानां ततो कादिवर्णात्मकतया बहिर्विभ्रम्यमाणानां प्रतिबिम्बं बहिर्मुखमर्पयति मुकुरस्थानीयायां पश्यन्त्याम्। ततः परमेश्वरस्य शक्तय एव बिम्बस्थानीयास्तासामेव प्रतिबिम्बजातं धारादिशक्त्यन्तं तत्त्वजातं, कादिक्षान्तं च योनिवर्णजातमूविपरीत क्रमेणा भासमानम्। यथा—**

"एवं च पश्यन्तीसतत्त्वपरापराविमलमुकुरिकायां तत्तत्तथाविधोक्तक्रममपूर्णपृथिव्यादितत्त्वसामग्रीनिर्भरम् अन्तस्तथाविधसहजाकृत्रिमपारमार्थिकानपायिकादिपरामर्शक्रोडीकारेणैव वर्तमानमपि श्रीपराभट्टारिकावपुः प्रतिबिम्बमर्पयत् स्वरूपान्यथात्वसहिष्णुकादिपरामर्शान्यथाभावेनैव तत्परैकरूपं परामृश्यं धरण्यम्भः प्रभृति तथोल्लसद्भेदसूत्रणतया सजातीयायां विमलायां च यावत्प्रतिबिम्बयति तावद्धरादितत्त्वानां विपर्यास एवोपजायते यत् परसंविदि शक्तितत्त्वं तदेव परापरात्मनि पृथिवीतत्त्वं, यत्तु धारातत्त्वं तच्छक्तितत्त्वम् इति क्षकारात् प्रभृतिधरादीनां स्थितिः।"
(प० त्री० वि०, पृ०,145-146)

प्रथमस्य ककारस्य धरारूपता अन्तिमस्य च क्षकारस्य शक्तितत्त्वरूपतेति बिम्बस्थानीयात् प्रतीपता प्रतिबिम्बस्येति वेद्यम्।

बीजपिण्डकाः — अनेकवर्णसमुदायात्मकानि बीजमन्त्राणि, विशेषतोऽनेकव्यञ्जनसंयोगयुतानि। **यथा— ह् र् क्ष् म् ल् व् य् ऊँ इति नवार्णो बीजपिण्डः।**

~ अभिव्यञ्जकाः — **न हि बीजण्डिानां कोऽपि वाच्योऽर्थः। ततोऽर्थबोधने न तेषां संकेतस्मृतिसहायत्वम्। अपि तु सर्वथा स्वार्थाभिव्यञ्जने स्वतन्त्रत्वम्। यथा हि मधुराद्या वर्णरचनाप्रभृतयो माधुर्यं गुणं स्वत एव स्वस्यैव सामर्थ्यादभिव्यञ्जयन्ति, तथैते बीजपिण्डाः अभ्यस्यमानाः स्वप्रकाशसंविदभिव्यञ्जकाः सन्तः साधकस्य स्वात्मपरमेश्वतामपरोक्षतया साक्षात्कारयन्ति। यथा—**

"किं पुनः समयापेक्षां विना ये बीजपिण्डकाः।
संविदं स्पन्दयन्त्येते नेयुः संविदुपायताम्।।
वाच्याभावादुदासीनसंवित्स्पन्दात्स्वधामतः।
प्राणोल्लासनिरोधाभ्यां बीजपिण्डेषु पूर्णता।।"
(तं० आ०5,140-141)

प्राणोल्लासोऽत्र प्रमेयोन्मुखं प्रसरणं प्रमाणात्मकस्य प्राणस्य। निरोधश्चान्तर्मुखो विश्रमः। यथा—

"प्रमाणात्मनः प्राणस्योल्लासात् प्रमेयोन्मुखं प्रसरणात्, तथा निरोधात् अन्तर्मुखरूपे विश्रमात्।"

(तं० आ० वि०, खं०3, पृ०,455)

बीजभावः — (1) सुषुप्तेर्नामान्तरम्। यथा—

"..... सुषुप्तं मन्वते बुधाः।।
बीजभावोऽथाग्रहणं .....।"

(तं० आ०10,259-260)

(2) सावस्था यत्र विविधभेदभिन्ना भावा एकरूपतयावभासन्ते। असौ रौद्री संहारदशा वा, प्रलयाकलविज्ञानाकलदशा वा, प्रगाढा निद्रामयी वा दशा, मितयोगिनां समाधिदशा वा। यथा—

"आद्यत्वे भगवद्रुद्रप्रमात्रपेक्षया, परनिरोधसमवस्थित-सुषुप्तिभूमिकारूढयोगिप्रमात्रपेक्षया प्रलयाकलविज्ञानाकलप्रमात्रपेक्षया गाढसुषुप्तापन्नजीवद्पेक्षया च बीजभाव एव भावानां भाति।"

(ई० प्र० वि० वि०, खं०3, पृ०,26)

बीजम्— (1) सर्वस्य शिवशक्त्यात्मकतायां परस्पन्दरूपतायां यत् स्वरूपं तद्बीजमिति, तत एव तत्तदवस्थाजातस्य प्ररोहात्। यथा—

"तस्य सर्वेषु करणव्यापारेषु बीजे परशिवशक्त्यात्मक-चिदानन्दघने परे स्पन्दतत्त्वे एवावधानम्।"

(शि० सू० विवृ०3,15)

(2) परः शाक्तः स्पन्द एव बीजम्, तद्वशादेव सर्वस्यावभासमानत्वात्, तदुदितत्वाच्च सर्वस्य। यथा—

"तस्य सार्वत्रिकस्य स्वातन्त्र्यस्य सिद्धये तेन बीजभूते परे शाक्ते स्पन्दे अवधानं, तद्विषयकं विमर्शनं भावनया कर्त्तव्यमिति।"

(शि० सू० विवृ०3,15)

(3) जगतो मूलकारणभूता पारमेश्वरी शक्तिरेव सर्वस्य बीजम्। यथा—

"बीजे परशक्त्यात्मनि विश्वकारणे अवधानम्।"

(शि० सू० वृ०3,15)

~ मातृकाक्रमे— मातृकाक्रमे स्वराणां बीजानीति संज्ञा। यथा—

"एवं षोडशकं परामर्शानां बीजस्वरूपमुच्यते।"

(तं० सा०, पृ०,15)

बीजमन्त्राः — (1) संकेतादिरहिताः एकाक्षराः एकव्यञ्जनगर्भा वाऽनेकव्यञ्जनपिण्डात्मका वा रहस्यार्था-भिव्यञ्जकाः मन्त्राः। यथा ऐं, क्लीं, सौः इत्याद्या मन्त्राः।

(2) अकारयुक्ता वा व्यञ्जनवर्णाः, स्वरा अपि वा केवलाः।

~ उच्चारयोगे— उच्चारयोगेऽपि रहस्यात्मकबीजमन्त्रप्रयोगो विधीयते। तेन चान्तः संविद्विकासो जायते, सर्वं च प्रमाणप्रमेयादि संविदेकमयं प्रकाशते।

यथा—

"अर्थक्रियार्थितादैन्यं त्यक्त्वा बाह्यान्तरात्मनि।
स्वरूपे निर्वृतिं प्राप्य फुल्लां नाददशां श्रयेत्।।
वक्त्रमन्त्रस्तया सम्यक् संविदः प्रविकासयेत्।
संविदक्षमरुच्चक्रं ज्ञेयाभिन्नं ततो भवेत्।।"

(तं० आ०5,75-76)

अत्र जयरथटीकायां "पिण्डनाथसम्बन्ध्याद्यवर्णद्वयम्" इत्यत्राद्यशब्दो विचारणीयः "स्वरूपे" इति "फुल्लाम्" इति च पदाभ्यां कथं संगच्छेद् इति।

~ तत्फलम्— रहस्यात्मकानां बीजमन्त्राणां गुरुप्रदर्शितेन विधिना सनियमं कृतेन जपाभ्यासेनानुत्तरे निजेधाम्नि प्रविशेदचिरादेव योगी, परमनधिकारी तज्जपोद्भावितानां शक्तीनां दुरुपयोगं कुर्यादिति रहस्यमय्या शैल्योपदिष्टा बीजमन्त्राः ग्रन्थेषु, न च स्पष्टमुक्तास्तदुपासनविधयः। यथा—

"इत्यनया बुधो युक्त्या वर्णप्यपरायणः।
अनुत्तरं परं धाम प्रविशेदचिरात् सुधीः।।"

(तं० आ०5,147)

सुधीरेव न कुधीरिति।

~ तन्माहात्म्यम्— यदा सांकेतिकशब्दमयाः सविकल्प-विमर्शयुक्ताश्चापि मन्त्राः परमेश्वरतां समभिव्यञ्जयन्ति मन्त्राभ्यासिने तदा का वार्ता निर्विकल्पविमर्शपराणां बीजमन्त्राणामसाङ्केतिकार्थव्यञ्जकानाम्। ते तु नितरां सत्वरं च शिवतामारोपयन्ति साधकम्। यथा—

"किं पुनः समयापेक्षां विना ये बीजपिण्डकाः।
संविदं स्पन्दयन्त्येते नेयुः संविदुपायताम्।।"

(तं० आ०5,140)

~ वीर्यवन्तः — अहमिति पारमेश्वरस्वात्मपरामर्श एव सर्वेषां महामन्त्राणां पिण्डनाथादीनां सारभूतं वीर्यम् तद्विना तेषामकिञ्चित्करत्वम्। यथा—

"एतद्रूपपरामर्शमकृत्रिममनाविलम्।
अहमित्याहुरेषैव प्रकाशस्य प्रकाशता
एतद्वीर्यं हि सर्वेषां मन्त्रायणां हृदयात्मकम्।
विनानेन जडास्ते स्युर्जीवा इव विना हृदा।"

(तं० आ०4,192-193)

~ शाक्तोपाये— (1) यद्यपि शाक्तोपायः शुद्धविकल्प-ज्ञानाभ्यासमयस्तथापि तत्र शुद्धविद्यात्मकानां बीजमन्त्राणामुपयोगो भवत्येव, यथा पराबीजस्य, पिण्डनाथबीजस्य वा। तच्च तन्त्रालोके ध्वनितं तद्विवेके किञ्चिन्मात्रं स्पष्टीकृतं जयरथेन। विशेषस्पष्टीकरणस्यानौचित्यान्न तथाकृतं केनापि ग्रन्थकृता वा व्याख्यात्रा वा। यथा—

"अनेन संविल्क्रमानतिवर्तितामभिद्योतयितुं श्रीपराबीजस्यापि उभयथा व्याप्तिगर्भीकारेणोदय उक्तः। तथाहि .... "भैरवीये चिदात्मनि" इत्येनेन व्याप्तिः। यदुक्तम्।—

"सार्णेनाण्डत्रयं व्याप्तं त्रिशूलेन चतुर्थकम्।
सर्वातीतं विसर्गेण पराया व्याप्तिरिष्यते।।"

उद्धः:- (तं० आ० वि०, खं०3, पृ०,218-219)

एवमत्र "सौः" इति बीजपिण्डोऽभिव्यक्तः शिवेन।

(2) पराबीजपिण्डनाथमन्त्रोद्धारसंकेतस्य शाक्तोपायप्रकरणे विद्यमानत्वेनैतत् प्रतीयते यच्छाक्तोपायेऽपि केनापि रहस्यात्मकेन प्रकारेण मन्त्राणामुपयोगो भवत्येव। यथा—

"श्रीपराबीजस्योदयमभिधाय एतत् समानस्कन्धताभिधित्सया श्रीपिण्डनाथस्युदयमभिधत्ते।"

(तं० आ० वि०, खं०3, पृ०,220)

बीजयोनीः— मातृकाक्रमे हि बीजात्मकाः स्वराः वाचका इति व्यपदिश्यन्ते योन्यात्मकानि च व्यञ्जनानि वाच्यानीति। यथा—

"बीजात्मनां स्वराणां वाचकत्वं योनिरूपाणां च व्यञ्जनानां वाच्यत्वं क्रमेण शिवशक्त्यात्मकत्वात्।"

(प० त्री० वि०, पृ०,148)

तयोश्च बीजानामेव योन्यपेक्षया प्राधान्यं स्वीकृतम्। यथा—

"बीजेन व्यज्यते योनिः स्वतन्त्रा नैव विद्यते।
बीजसंलग्नतैवास्या योनित्वं परिभण्यते।।"

(पू० प्र०1,450)

बीजाक्षरकोषः — ~ तन्त्रालोकविवेकानुसारी— प्रमाणवाक्यानि स्वे स्वे स्थाने द्रष्टव्यानि।

अ	=	प्रथमा प्रणवकला=ब्रह्मा
अग्निः	=	र
अग्निदयिता	=	स्वाहा
अधोवक्त्रः	=	अर्द्धचन्द्रः-इतिशारदालिप्यां, नागर लिप्यां च इति।
अङ्कुशः	=	ऊकारमात्रा
अनङ्गद्वयम्	=	विसर्गः
अनच्कः	=	नादः (प्रणवकला)
अनलः	=	र
अन्तकः	=	म
अमृतम्	=	स
अम्बु	=	व
अर्धार्णम्	=	ट
अश्वः	=	ण
असुः	=	ह
अस्त्रम्	=	फट्
आकाशबीजम्	=	ह
आधारशक्तिः	=	ह्रीं
इच्छा	=	विसर्गः (तं०आ०वि०,खं०12, पृ०,10)
इन्दुः	=	स
इन्द्रः	=	ल
इषुः	=	फट्
उ	=	प्रणवकला द्वितीया
उदधीशः	=	व
उर्ध्वबाहुः	=	झ
कण्ठः	=	ब
कवचबीजम्	=	हुं
कलाशेषः	=	ट
कालः	=	म
कालरुद्रः	=	ऊ
कालाग्निः	=	र
कालानलः	=	र
कूटम्	=	क्ष
ख	=	आकाशबीजम् ह (तं०आ०वि०,खं०12,पृ०,197)
ख	=	विन्दुः (तदेव, पृ०,200)
गुह्यम्	=	श
गुह्यशक्तिः	=	ई
चतुष्कलः	=	हूँ
छेदकम्	=	क
छेत्ता	=	क
जलम्	=	म
जीवः	=	स
ज्ञानशक्तिः	=	'सूँ' इति बीजमन्त्रः
डाकिनी मर्म	=	ड
तरङ्गः	=	ण
तारः	=	ॐ
त्रिकूटः	=	क्ष
त्रिशूलम्	=	औ (तं०आ०वि०,खं०12,पृ०,202)
त्रिशूलम्	=	ज (तदेव,पृ०,202)
त्र्यस्रम्	=	ए
दक्षजानु	=	ए
दक्षाङ्गुलिः	=	झ (तं०आ०वि०,खं०12,पृ०,202)
दक्षाङ्गुलिः	=	भ (तं०आ०वि०खं०12,पृ०202)
दण्डः	=	र
दारणा	=	आ
दीर्घाः	=	आ,ई,ऊ,ऐ,औ,अः इति षडेव
द्विजः	=	कवर्गः
द्विजिह्वः	=	ज
नभः	=	क्ष
नाभिः	=	क्ष
नासा	=	शक्तिः (कुण्डलिनी)
नितम्बः	=	म

निरोधिका = 1 इत्येवम्भूता रेखा
निरोधी = 1 इत्येवम्भूता रेखा
पवनः = य
पृथ्वी = ल
प्रणवकला = 1 = अ; ब्रह्मा
प्रणवकला = 2 = उ; विष्णुः
प्रणवकला = 3 = म; रुद्रः
प्रणवकला = 4 = ं; ईश्वरः (बिन्दुः)
प्राणः = ह
फणभृत् = ढ
बिन्दुः = शून्यम्
(तं०आ०वि०,खं०12,पृ०,212)
बिन्दुः = हूं (तदेव, पृ०,220)
ब्रह्मा = प्रणवकला-1 मा,अ
भुवनेशः = औ
म = प्रणवकला द्वितीया रुद्रः
मन्दः = ड
मरुत् = य
मातृतारः = फ्रें
माया = ह्रीं
योनिः = ए
रुद्रः = ऊ
रुद्रः प्रणवकला = म, तृतीया कला
लक्ष्मी = श
वामकर्णाभरणम् = ऊ
वामजङ्घा = औ
वामभूषणम् = ऊ
वायुः = य
वामस्कन्धः = य
वामस्तनः = ल
वामाङ्घ्रिः = फ
विष्णुः (प्रणवकला) = उ
विसर्ग ब्रह्म = स
वेदकलः = हूँ
शिरोमाला = ऋ, ॠ, लृ, ॡ, इति
(तं०आ०वि०,खं०12,पृ०,203)
शून्यम् = बिन्दुः
शून्यद्वयम् = विसर्गः
शूलम् = औ.
(तं०आ०वि०,खं०12,पृ०,212)
शूलम् = ज
(तं०आ०वि०,खं०12,पृ०,203)
शूलारः = जूं
संहारः = क्ष
संहृतिः = क्ष
समीरणः = य
सर्वगतः = ह
सार्धार्णम् = ट
सावित्रिका = औ
सुधा = स
सोमः = स
शृङ्गाटकम् = ए
हंसः = ह
ह्रस्वाः = अ,इ,उ,ए,ओ,=पञ्च

बीजाक्षरकोषोऽयं (तं० आ० वि०, खं० 12, आ०,30) इत्येतदनुसारं, सङ्गृहीतोऽस्ति। अधस्तनानां पदानां विषये प्रमाणता तावदन्वेष्टव्या। कुतश्चित् सङ्गृहीताः इमाः परिभाषाः। परं कुतः इति विस्मृतम्।

अमृतम् = बिन्दुः
कन्दलम् = अर्धचन्द्रः
ज्योतिः = निरोधिका
ध्वनिः = नादः
पराशक्तिः = स्पष्टरेखा
माया = ईकारः

बीजादिमुक्तिः — ~ दीक्षाकर्माणि— शिवहस्तप्रयोगादौ दीक्षाकर्माणि प्रयुक्तानां यवतिलादिबीजानामपि पुनर्जन्मदा बीजरूपता नश्यति, का वार्ता शिष्यस्य पुनर्जन्मदानां कर्मणां दाहस्य। यथा—

"बीजस्याप्यत्र कार्या च योजना कृपया गुरोः।
यतो दीक्षा सुदीप्तत्वात्स्थावराण्यपि मोचयेत्।।"
(तं० आ०20,7)

"ऋक्षपक्षितरक्ष्वादीन् स्थावराण्यपि मोचयेत्।।"
उद्धः:- (तं० आ० वि०, खं०10, पृ०,208)

बीजानि— अकारादारभ्य विसर्गान्ताः मातृकावर्णाः। स्वरः। यथा—

"..... बीजं स्वराः मताः।"
(मा०वि०तं०3,10)

बीजान्तराणि— ~ वर्णयोगे— कादिसान्ताः व्यञ्जनवर्णा अपि सस्वरा वा निःस्वरा अपि वा प्राणापानगतावभ्यस्यमानाः तांतां भुक्तिमुक्तिरूपां सिद्धिं वितरन्ति। यथा—

"तथा ह्यनच्के साच्के वाकादौ सान्ते पुनःपुनः।
स्मृते प्रोच्चारिते वापि सासा संवित् प्रसूयते।।"
(तं० आ०5,133-134)

बीजावस्थापनम् — संस्कारात्मकतया विषयस्यान्तः संस्थापनम्। जीवस्य कृत्यविशेषः। यथा—

"याश्च विचित्रा एव सृष्टिसंहारलीला : आभासनरक्ति-विमर्शन-बीजावस्थापन-विलापनात्मपञ्च विधकृत्यानि प्रख्यापयति।"
(स्पं० सं० टिप्प०, पृ०,1)

जीवोऽपि निजे ज्ञानव्यापारे पञ्चकृत्यभावनाभ्यासं कर्तुं शक्नोतीति तात्पर्यत इदमुक्तं वेदितव्यम्।

बुद्धम्— **जाग्रत्स्वप्नः। जाग्रदवस्थायाः भेदविशेषः। यथा—**

"..... जाग्रत् स्वप्नस्तु बुद्धता।"

(तं० आ०10,338)

द्र०:- 'अवस्था-भेद-विस्तरः' इति।

बुद्धावहन्ता—

द्र०:- 'बुद्धिप्रमाता' इति।

बुद्धिः— **(1) अध्यवसायात्मकज्ञानसाधनं जीवस्य मुख्यं करणम्। यथा—**

"बुद्धिरध्यवसायस्य कारणं निश्चयात्मनः।"

(अ० प्र०, प०,27)

महत्तत्त्वमेव प्रतिपुरुषमन्तःकरणभावेन स्थितं सद्बुद्धिः। वैयक्तिकं महत्तत्त्वं हि बुद्धिः, समष्ट्यात्मकं च महत्।

(2) विकल्पात्मकनिश्चयनक्रियासाधनभूतं प्रमातृसामर्थ्य-विशेषमयं तस्यान्तःकरणम्। यथा—

"निश्चेत्रीं च धियं तत्र .....।"

(मा० वि० वा०1,875)

द्र०:- (स्पं० वि०, पृ०,137)

(प० प्रा०, पृ०,10)

(ष० त्रिं० त० सं०,15)

(ष० त्रिं० त० सं० वि०, पृ०,10)

"तत्र येन विषयं निश्चिनोति तत्प्रकाशप्रधानं बुद्ध्याख्यं करणम्।"

(स्पं० वि०, पृ०, 137)

(3) करणतत्त्वविशेषः।

एकतः पुरुषकृतावेशात्मकं तत्प्रतिबिम्बमपरतश्च विषयप्रतिबिम्बं यत्तत्त्वं गृह्णाति तदेव तत्त्वं सामान्येन बुद्धितत्त्वम्, महत्तत्त्वमिति वोच्यते। तत्रैकैकपुरुषाधिष्ठितं तत्त्वं बुद्धिः समस्तप्राणिव्रातसम्बन्धि च तन्महत्तत्वमिति व्यवह्रियते। यथा—

"ततो गुणतत्त्वाद् बुद्धितत्त्वं यत्र पुंप्रकाशो विषयश्च प्रतिबिम्बमर्पयतः।"

(तं० सा० पृ०85-86)

एतत् सामान्यतोऽभ्युपगमनीत्या गण्यते। विशेषतश्चाग्रे-द्रष्टव्यम् 'पुरुषाविष्टा' इत्यत्र।

(4) धर्माद्यष्टकात्मकस्य पुरुषवैभवस्याधारभूतं स्थानम्। यथा—

"बुद्धितत्त्वं तु (धर्मादीनां) विभवस्थानम्।"

(ई० प्र० वि०, वि० खं०1, पृ०,25)

~ पुरुषाविष्टा— **बुद्ध्यपेक्षया पुरुषो निर्मलतरः। ततः स एव बुद्धिमाविश्य तां चेतनोचितकार्थकारिणीं सम्पादयति। न पुनर्बुद्धिस्तस्य प्रतिबिम्बं गृहीत्वा स्वयं चेतनायते। तस्याः तदपेक्षया मलिनत्वाज्जडत्वाच्च।**

यथा—

"एतदेव तावदनुचितं यत् प्रकाशात्मा पुमान् बुद्धौ प्रतिबिम्बमर्पयति। समानगुणे बिम्बकापेक्षया च विमले प्रतिबिम्बसङ्क्रान्तिदर्शनात्।"

(ई० प्र० वि०, खं०1, पृ०,76)

यच्च क्वापि पुरुषप्रतिबिम्बवती बुद्धिरिति कथितं शैवदर्शने तदभ्युपगमन्यायत एवेति वेद्यं सुधीभिः। अथवा पुरुषेणाविष्टत्वं यत् बुद्धेस्तदेवानया वाग्युक्त्या वक्तुमिष्टमिति तात्पर्यं तथा निर्देशस्य।

~ मूलत :— **ज्ञानशक्तेर्बहिर्मुखो विकासो बुद्धिः। यथा—**

"ननु बुद्धिर्निश्चयनलक्षणा ज्ञानशक्तेः प्रसरः।"

(ई० प्र० वि० वि०, खं०2, पृ०,426)

बुद्धिधर्माष्टकम् :— **धर्मो, ज्ञानमैश्वर्यं, वैराग्यम्, अधर्मो, अज्ञानमनैश्वर्यमवैराग्यमित्यष्टौ बुद्धिधर्माः। लिङ्गदेहे स्थिता एते धर्माः। तत्र च देहे बुद्धेरेव प्राधान्यम्। यथा—**

"धर्मो ज्ञानं च वैराग्यमैश्वर्यं च चतुर्थकम्।
अधर्मं च तथाज्ञानमवैराग्यमनैश्वरम्।।
अष्टावेते समाख्याता बुद्धेर्धर्मादयो गुणाः।"

(स्व० तं० प०11,137-38)

"ज्ञानं च सात्त्विकं प्रोक्तं त्रयोऽन्ये राजसाः स्मृताः।
तामसाश्चाप्यधर्माद्याश्चत्वारो वै वरानने।।"

(तदेव,11,142)

बुद्धिध्यानम् :— ~ आणवे— **बुद्धिवृत्त्यालम्बनको भावनामयो योग आणवः। बुद्धियोगः। ध्यानयोग आणवः। सर्वेष्वाणवोपायेषूच्चतम उपायः। यथा—**

"तत्र ध्यानमयं तावदनुत्तरमिहोच्यते।।"

(तं० आ०5,19)

~ तत्प्रक्रिया— **(1) तत्र सोपानं प्रथमम् परस्परमोत-प्रोतभावेन स्थितानां भूततन्मात्रादिमयानां दलानां सम्पुटाकारं कदलीपुष्पमिव हृदयमण्डलं प्रथमं भावनया परप्रमात्रेकरूपं ध्येयं बुद्धिध्यानारम्भे। यथा—**

"कदलीसम्पुटाकारं सबाह्याभ्यन्तरान्तरम्।
ईक्षते हृदयान्तःस्थं तत् पुष्पमिव तत्त्ववित्।।"

(तं० आ०5,21)

"कदल्या योऽसौ सम्पुटः परस्परतन्मर्बहीरूपतया मिलितानां दलानां सन्निवेशः, तद्वदोतप्रोतत्वेनावस्थितैर्भूततन्मात्रेन्द्रिया-दिभिस्तत्त्वैः संवलित आकारो यस्य तत्।"

(तं० आ० वि०, खं०3, पृ०,331)

"परप्रमात्रेकरूपम् — इत्यर्थः।"

(तदेव,पृ०,332)

(2) तत्र सोपानं द्वितीयम्— हृदये सावधानो योगी तत्र प्रमेयप्रमाणप्रमातृरूपाणां सोम-सूर्य-वह्नीनां संघट्टं ध्यायेत्।

यथा—

"सोमसूर्याग्निसंघट्टं तत्र ध्यायेदनन्यधीः।"

(तं० आ०5,22)

अत्र जयरथकृता व्याख्या चिन्तनीया। उक्तं हि तेन यथा—

"तत्र हृदये सावधानो योगी प्राणापानोदानात्मनां सोमसूर्याग्नीनां संघट्टं ध्यायेत्।"

(तं० आ० वि०, खं०3, पृ०,332)

प्रमाणप्रमेयप्रमातार एव सोमसूर्याग्नयः शैवसाधन-ग्रन्थेषु सुप्रसिद्धा यतः।

(3) तत्र सोपानं तृतीयम्— संघट्टभावनानन्तरं त्रयमपि प्रमात्राद्येकरूपतया भावयेदिति तृतीयं सोपानं बुद्धि-ध्यानप्रक्रियायाः। यथा—

"तस्य शक्तिमतः स्फीतशक्तेर्भैरवतेजसः।।
मातृमानप्रमेयाख्यं धामाभेदेन भावयेत्।
वह्न्यर्कसोमशक्तीनां तदेव त्रितयं भवेत्।।"

(तं० आ०5,23-24)

अत्र तृतीये सोपाने उपास्यभूतस्य भैरवाग्नेर्यत्प्रमात्रादि-त्रितयमयं तेजः तत् त्रितयमेकमात्रात्मतयैव भावनीयं भवति।

(4) तत्र सोपानं चतुर्थम्— द्वादशशक्तिचक्रवेष्टितः संविदग्निश्चक्षुरादिद्वारेभ्यो निर्गच्छन् रूपादिविषयेषु प्रपतन् भावनीयो भवति। रूपादिविषयसंवेदनविकल्पनादिव्यापारैस्तेषां विषयाणां सृष्टिस्थितिसंहारादिभावना विधीयते पुनःपुनः। एवमेव शरीरस्यान्येभ्योऽपि द्वारेभ्यो निगर्च्छतो भैरवाग्नेर्विषय-जातसृष्ट्यादिकर्तृत्वं क्रमेण भाव्यते। एवं विधानां भावनानामभ्यासो निरन्तरं कंचित् कालं सनियमं नियतेषु कालेषु विधीयते बुद्धिध्यानस्य तुर्ये सोपाने तेन च तत्तद्विषयजातमपि प्रमातृप्रमाणप्रमेयैकरूपसंघट्टात्मतामापद्यते। यथा—

"एतदानुत्तरं चक्रं हृदयाच्चक्षुरादिभिः।।
व्योमभिर्निःसरत्येव तत्तद्विषयगोचरे।
तच्चक्रभाभिस्तत्रार्थे सृष्टिस्थितिलयक्रमात्।।
सोमसूर्याग्निभासात्मरूपं समवतिष्ठते।
एवं शब्दादिविषये श्रोत्रादिव्योमवर्त्मना।।
चक्रेणानेन पतता तादात्म्यं परिभावयेत्।"

(तं० आ०5,27-30)

(5) तत्र सोपानं पञ्चमंविश्वस्मिन् भावजाते संविच्छक्तिचक्रमध्ये विलापिते सति विषयजातसंस्काराणामपि लयो विधीयतेऽभ्यासवशतः। तदनन्तरं शक्तिचक्रं स्वात्मोच्छलत्तया भाव्यते निरन्तरम्। तदनन्तरं विश्वस्मिन् भावजातसंस्कारेऽपि सम्यग् विलीने सति चक्रं प्रथमं शान्तरूपतामापद्यमानं ततः सुप्रशान्तं सद्भाव्यते। ततः स्पन्दमाना तस्यासौ परमा शान्तिरेव भाव्यते।

यथा—

"ततः संस्कारमात्रेण विश्वस्यापि परिक्षये।।
स्वात्मोच्छलत्तया भ्राम्यच्चक्रं संचिन्तयेन्महत्।
ततस्तद्बाह्यविलयात् तत्संस्कारपरिक्षयात्।।
प्रशाम्यद्भावयेच्चक्रं ततः शान्तं ततः शमम्।"

(तं० आ०5,32-34)

~ तत्फलम्— **प्रथममंप्रमातृ-प्रमाण-प्रमेयसंघट्टध्यानेन हृदये ध्यानवातसमिद्धाकारो भैरवाग्निः प्रज्वलितः सन्नभिन्नाकारो नितरां प्रकाशते। यथा—**

"तद्ध्यानारणिसंक्षोभान्महाभैरवहव्यभुक्।
हृदयाख्ये महाकुण्डे जाज्वलन् स्फीततां व्रजेत्।।"

(तं० आ०5,22-23)

स्फीतता चात्मनः पूर्णप्रमातृरूपतया साक्षात्कारः।

"स्फीततां व्रजेत् पूर्णप्रमातृरूपतया स्वात्मसाक्षात्कारो भवेदित्यर्थः।"

(तं०आ०वि०,खं०3,पृ०,333)

~ द्वितीयम् — **बुद्धिध्यानाभ्यासेन सर्वमपीन्द्रियविषयतामा-पद्यमानं वस्तुजातं शक्तिचक्रैकतामापद्मते। लीयते च सर्वं चक्र एव। सर्वं च सर्वसर्वात्मकतयाऽनुभूयते। यथा—**

"इत्थं विश्वाध्वपटलमयत्नेनैव लीयते।।
भैरवीयमहाचक्रे संवित्तिपरिवारिते।"

(तं० आ०5,31-32)

~ पार्यन्तिकम्— **बुद्धिध्यानयोगेन विश्वं शक्तिचक्रे विलीयते, शक्तिचक्रं संविदि विलीनं भवति। ततः संवित् सर्वभावपरिपूर्णा सती संविन्मात्ररूपतया च प्रकाशमाना सती विमृश्यतेऽहमिति। संविदश्च सृष्टिसंहारादिकर्तृत्वं साक्षादनु-भूयते। तेन निजः पारमेश्वरः स्वभावो दृढतया निश्चीयते। तेन स्वस्य भैरवरूपतायाः साक्षात्कारो भवति। यथा—**

"अनेन ध्यानयोगेन विश्वं चक्रे विलीयते।।
तत्संविदि ततः संविद्विलीनार्थैव भासते।
चित्स्वाभाव्यात् ततो भूयः सृष्टिर्यच्चिन्महेश्वरी।।
एवं प्रतिक्षणं विश्वं स्वसंविदि विलापयन्।
विसृजंश्च ततो भूयः शश्वद्भैरवतां व्रजेत्।।"

(तं० आ०5,34-36)

~ तदालम्बनम्— **हृदयस्थाने मुख्यतया स्पन्दमाना बुद्धिवृत्तिपरिवेष्टिता चितिरालम्बनं बुद्धिध्यानयोगप्रक्रियासु। यथा—**

"यः प्रकाशः स्वतन्त्रोऽयं चित्स्वभावो हृदि स्थितः।
सर्वतत्त्वमयः प्रोक्तमेतच्च त्रिशिरोमते।।"

(तं० आ०5,20)

~ तदुपदेशकः— **बुद्धिध्यानप्रक्रियाफलादीनां निरूपणं यत्तन्त्रालोकेऽभिनवगुप्ताचार्यैः कृतं तच्छ्रीशम्भुनाथोपदेशानुसारमेव कृतम्। श्रीशम्भुनाथोऽप्येतद्विषये साक्षाल्लब्धोपदेशः श्रीसुमतिनाथात्।**

यथा—

"इत्येतत् प्रथमोपायरूपं ध्यानं न्यरूपयत्।
श्रीशम्भुनाथो मे तुष्टस्तस्मै श्रीसुमतिप्रभुः।।"

(तं० आ०5,41)

एतेन शम्भुनाथस्य साक्षात्सुमतिनाथशिष्यत्वं सिद्ध्यति। मध्ये श्रीसोमदेवस्य या कल्पनाऽसौ कल्पनैव केषांचन सुधियाम्।

बुद्धिपुरुषविवेकः — **पुरुषरूपोऽहमन्यो बुद्धिश्चान्या, ज्ञानाद्यष्टकं बुद्धेरेव न पुरुषस्य मे इत्येवम्प्रायोऽध्यवसायात्मको निश्चयः कस्यापि सत्साधकस्य। सांख्ययोगशास्त्रयोरस्य माहात्म्यं कैवल्यप्रदत्वं च गीयते।**

~ तत्फलम्— **बुद्धिपुरुषयोः पारस्परिकस्यान्तरस्य ज्ञानात् प्रकृतिपुरुषविवेको जायते तेन साधकः प्रधानादधो न संसरति। ततः प्रलयाकलतायां तिष्ठति। यथा—**

"धीपुंविवेके विज्ञाते प्रधानपुरुषान्तरे।
अपि न क्षीणकर्मा स्यात् कलायां तद्धि सम्भवेत्।।
अतः सांख्यदृशा सिद्धः प्रधानाधो न संसरेत्।"

(तं० आ०9,186-187)

बुद्धिप्रमाता— (1) ज्ञानसुखदुःखमोहाद्यभिमानवान् प्रमाता ज्ञानाद्याधारभूतां बुद्धिमेवात्मत्वेन मन्यते। बुद्धावहन्तायाः स्फुरत्त्वेनायं बुद्धिप्रमाता, यः स्वप्नसंकल्पविकल्पादौ प्रमातृत्वेन परिस्फुरति। यथा—

"अन्तरहं वेद्मि, सुखी, दुःखी, मूढोऽहम्, इत्याद्यवस्थासु स्वच्छसलिलाशयसदृशी बुद्धिः (आत्मत्वेनाभिनिविश्यते)।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 280)

(2) वेद्यप्रतिबिम्बनसमर्थायां बुद्धौ तत्कृते वाध्यवसाये बुद्धिधर्माष्टके वाऽभिमननवान् जीवो बुद्धिप्रमाता। यथा—

"स्वच्छोदकाशयकल्पा वेद्यप्रतिबिम्बनवती वा बुद्धिरभिनिविश्यते। अन्तरहं वेद्मि, दुःख्यहमिति चिन्ताद्यवस्थासु।"

(ई० प्र० वि०, खं०2, पृ०,205)

~ अन्तर्मुखत्वे— **बुद्धिप्रमाताऽन्तर्मुखतायां प्राणप्रमातृस्थितिं याति। प्राणप्रमातृभाव एव बहिर्मुखे विकासे यतो बुद्धिप्रमातृभावस्थितिं गृह्णाति। तेन प्राणो बुद्ध्यपेक्षया सूक्ष्मः। परं सामान्यप्राणनवृत्तिरूपः जीवनस्वभावः, सुषुप्ताद्यवस्थासु प्रकाशमान एव प्राणो बुद्ध्यपेक्षया सूक्ष्मः, न पुनरुच्छ्वासनिःश्वासात्मको वायुरित्यवधातव्यम्। यथा—**

"स एव खात्मा मेयेऽस्मिन् भेदिते स्वीक्रियोन्मुखः।
पतन् समुच्छलत्त्वेन प्राणस्पन्दोर्मिसंज्ञितः।।"

(तं० आ० 6,11)

बुद्धियोगः — **अनुसन्धानात्मको ध्यानयोगः, भावनामयः। बुद्धिध्यानमिति प्रसिद्धस्त्रिके। यथा—**

"बुद्धिर्ध्यानमयी .....।"

(तं० आ०5,17)

"ध्यानमयी इत्यनुसन्धानप्राधान्यात्।"

(तं० आ० वि०, खं०3, पृ०,327)

द्र०:- 'बुद्धिध्यानम्' इति।

बुधः — **(1) पुरुषः; क्षेत्रज्ञः; जीवः; भोक्ता; संसारी; सकलाख्यः; प्रमाता; विशेषतस्तत्र मानवदेवतादिशरीरभाक्। यथा—**

"..... बुधं चैव निबोध मे।
परिपाकगते कर्मणीश्वरेच्छाकरोद्धृते।।
प्रकाशं नायनं यद्वदनुगृह्णाति भास्करः।
करणान्यनुगृह्णाति तद्वदीश्वर आत्मनाम्।।
कलोन्मीलितचैतन्यो विद्यादर्शितगोचरः।
रागोऽस्य रञ्जकत्वेन विषयानन्दलक्षणः।।
कालो वै कलयत्येनं तुट्यादिप्रलयावधिः।
नियतिर्निश्चितं नित्यं योजयेच्च शुभाशुभे।।
परमाणुसहस्रांशान्न च न्यूनं न चाधिकम्।
पुंभावं समनुप्राप्य तत्त्वे च पुरुषाह्वये।।
पुरं प्रधानमित्युक्तं प्रपञ्चानेकसंकुलम्।
तत्पुरं पोषयेद्यस्मात्तस्माद्वै पुरुषः स्मृतः।।
यतः श्रीकण्ठनाथस्तु नियत्या कर्मतः पशुम्।
प्रधानपाशजालेन वेष्टयेदसमञ्जसम्।।
बद्धस्त्रिगुणबन्धेन बुद्ध्या वैकारिकेण तु।
तन्मात्रेन्द्रियबन्धेन दृढं भूतैश्च वेष्टितः।।
बद्धः संचरति ह्येवं मायाद्यवनिगोचरे।
संसारी प्रोच्यते तस्मात्संसरेद्यत्पुनःपुनः।।
शब्दादिविषया यस्माद्विद्यन्ते विषयी ततः।
विषयाः परमित्याह नानाभेदैर्विसर्पिताः।।
नानाकर्मविपाकैश्च भुङ्क्ते तद्भावभावितः।
एवं भुङ्क्ते तु वै यस्मात्तस्माद्भोक्ता स उच्यते।।
तस्मिंस्तज्ज्ञो वरारोहे क्षेत्रे वै कार्षको यथा।
महाभिलाषमालोक्य कृषेद्वै लोभलाङ्गलैः।।
वपेच्च मोहभावेन मनोवाक्कायिकं सदा।
धर्माधर्मयम बीजं प्रविकीर्य समन्ततः।
तस्माद्वै अङ्कुरोत्पत्तिः सुखदुःखफलोदया।
वर्धते कामक्रोधेन सिक्ता रागाम्बुना भृशम्।।
यस्मिन्देशे च काले च वयसा यादृशेन च।
उप्तं शुभाशुभं कर्म तत्काले लभते फलम्।।
भुङ्क्ते तु विविधाकारं पूर्वकर्मवशाद्बुधः।
यस्मादेवं विजानाति तस्मात्क्षेत्रज्ञ उच्यते।।
विषयान्बुध्यते यस्माद्बुधस्तस्मात्प्रकीर्तितः।"

(स्व० तं०11,96-112)

"इत्थमयं बुधः पुरुषः संसारी विषयी भोक्ता क्षेत्रज्ञः इति च तत्तदर्थानुगताभिः संज्ञाभिरुच्यते।"

(स्व० तं० उ०11, पृ०,75)

(2) स्वात्मनः शैवीं शक्तिं हस्तगतां कृतवान् साधको बुधः इत्युच्यते। ज्ञानवान् प्राणी बुध इति। यथा—

"शक्त्या चाधो यदा गच्छेदबुधस्तु तदा भवेत्।
हृद्गतः पुनरुत्तिष्ठेद्बुध्यमानः स उच्यते।।
शक्तिं प्राप्य बुधो ज्ञेयः .....।"

(स्व० तं०4,238-239)

~ प्रणवकलाभ्यासे— **प्राणात्मना रूपेण हृदयादूर्ध्वं प्रसरन् कौण्डलीं शक्तिमासाद्य साधको बुध इति कथ्यते। यथा—**

शक्तिं प्राप्य बुधो ज्ञेयः .....।"

(स्व० तं० 4,239)

उदानाख्यस्य प्राणस्य चारे विशेषोऽयं शिवयोगिमात्रगम्यः।

बुध्यमानः — शिवशक्तेरनुग्रहेण प्राप्तसद्गुरूपदेशो मोक्षोपायाभ्यासतः समुपजातसद्विवेकः समुद्बुध्यमानस्वात्मज्ञानः साधको बुध्यमानः इति।

यथा—

"तदेवानिष्टरूपेण यदा भावयते पुमान्।।
बुध्यमानस्तु स तदा अधुना कथयामि ते।
यदा जुगुप्सते भोगाञ्शुभांश्चैवाशुभांस्तथा।।
कृत्रिमानेव मन्येत परं वैराग्यमाश्रितः।
मायाद्यवनिपर्यन्तमिन्द्रजालं तु बुध्यते।।
पुत्रमित्रकलत्राणि सुहृत्स्वजनबान्धवाः।
यदर्जितं मया द्रव्यं शुभेनाप्यशुभेन वा।।
तद्भोक्ष्यन्ते त्विमे सर्वे निरातङ्का निराकुलाः।
एकाकी चाहमेवैष यास्यामि यमसादनम्।।
तस्माच्च न शुभा ह्येते वैरिणोऽनर्थकारिणः।
स्वात्मीयमप्ययं देहं नित्यमेव जुगुप्सते।।
शुक्रशोणितसंभूतं विषयोरगदूषितम्।
नानाव्याधिसमाकीर्णं जरामृत्युभयाकुलम्।।
सोऽहमस्मि मलाकीर्णे कथमत्र रमाम्यहम्।"

(स्व० तं०11,112-119)

श्रमणोचितोऽयमुपदेशः स्वच्छन्दनाथस्येतिवेद्यम्।

~ प्रणवकलोपास्तौ— प्रणवकलाभ्यासक्रमे शक्तिपदारोहाय यत्नवान् साधको बुध्यमानः। स च हृदयस्थानादूर्ध्वं जिगमिषुः प्राणात्मकेन रूपेण। यथा—

"हृद्गतः पुनरुत्तिष्ठेद् बुध्यमानः स उच्यते।"

(स्व० तं० 4, 238)

शक्तिरत्र कौण्डली नाम ज्ञेया या प्रणवकलासु गणिता।

द्र०:- 'साधकः'— ~ 'अवस्थाभेदतः' इति।

बुद्ध्यात्मवादिनः — वैशेषिकादयः। यथा—

"ज्ञानसुखाद्याश्रयभूतां बुद्धिमेव काणादप्रभृतय आत्मानमाहुः।"

(ई० प्र० वि०, खं०1, पृ०, 251-252)

बृहट्टीका— राजानकभुल्लकेन विरचिता स्वच्छन्दतन्त्रस्य कापि विस्तृता टीका येदानीं न लभ्यते क्वापि यथा—

"यत्तु-बृहट्टीकाकारराजानकभुल्लकेन.....।

(स्व० तं० उ०, प०10, पृ०,211)

द्र०:- 'भुल्लकराजानकः' इति।

बृहत्प्रत्यभिज्ञा— अनेनाभिधानेनेश्वरप्रत्यभिज्ञाविवृत्ति-विमर्शिनी प्रसिद्धा कश्मीरेषु।

बृहती विमर्शिनी— ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिनी अनेनाभिधानेन कश्मीरेषु प्रसिद्धा।

बृहस्पतिः — कोऽपि मान्यः शैवशास्त्रगुरुर्यः शिवतनुशास्त्रं वा तद्व्याख्यां वा निर्मितवान्। आचार्याभिनवगुप्तस्यासावपि गुरुः। यथा—

"एतच्च बृहस्पतिपादैरेवं स्वग्रन्थे व्याकृतमित्याह।"

(तं० आ० वि० खं०5, पृ०, 160)

"उक्तं च शिवतनाविदमधिकारपदस्थितेन गुरुणा नः।"

(तं० आ०8,230)

"इति निर्वचनैः शिवतनुशास्त्रे गुरुभिः स्मृतो देवः।"

(तं० आ०1,104)

"गुरुभिरिति - बृहस्पतिपादैः।"

(तं० आ० वि०, खं०1, पृ०,146)

"श्रीबृहस्पतिपादैः शिवतनावन्वर्थव्याख्यात.....।"

(स्व० तं० उ०, प०1, पृ०,4)

"परं विमृशतीति णिचि क्विपि परं विमृशन्ती चिदस्य, इति बृहस्पतिपादाः।"

(ई० प्र० वि० वि०, खं०1, पृ०,14)

बोधः — (1) अवबोधनम्, विषयज्ञानावाप्तौ परमोपकारकं ज्ञानशक्तिस्वरूपम्। यथा—

"बोधः - ज्ञानशक्तिः।"

(स्त० चिं० वि०, पृ०,6)

(2) शुद्धश्चित्प्रकाशः। यथा—

"परिच्छिन्नप्रकाशत्वं जडस्य किल लक्षणम्।
जडाद्विलक्षणो बोधो यतो न परिमीयते।।"

(बो० पं० द०,8)

"तस्माद् बोधस्य रूपं न प्रकाशादतिरिच्यते किञ्चित्।"

(ई० प्र० वि०, वि० खं०2, पृ०,85)

(3) चित्प्रकाश एव बुद्धिमाविश्य तत्र प्रतिबिम्बतं नीलसुखादिरूपं विषयमपि प्रकाशयति। स एष तथा सम्पद्यमानो विषयप्रकाशोऽपि बोधः इत्युच्यते।

~ तत्प्रक्रिया— इन्द्रियद्वारा वा, कल्पनया वा बुद्धिर्विषयाणां प्रतिबिम्बं धारयति। सा विषयप्रतिबिम्बवती बुद्धिरात्मनः प्रकाशस्य विषयतामापद्यते वस्तुश्चित्प्रकाश एव बुद्धिं तद्वतं च विषयप्रतिबिम्बमाविश्य स्वयं तथा-तथाऽऽभासते। ततो विषयप्रकाशरूपो बोधः समुदेति। बुद्धिवृत्तिरूपो बोधोऽपि प्रमातृप्रकाशविषयतामुपागच्छन्नेव प्रकाशते। यथा—

"विषयप्रतिबिम्बं च तस्यामक्षकृतं बहिः।
अतद्द्वारं समुत्प्रेक्षाप्रतिभादिषु तादृशी।।
वृत्तिर्बोधो भवेद्बुद्धेः सा चाप्यालम्बनं ध्रुवम्।
आत्मसंवित्प्रकाशस्य बोधोऽसौ तज्जडोऽप्यलम्।।"

(तं० आ० 9,228-229)

बोधनम्— मन्त्रोच्चारे "नमः" इति पदस्य प्रयोगेण मन्त्रस्य बोधनं नाम प्रयोगविषयेऽनुष्ठानविशेषः। यथा—

"तदुक्तं श्रीमदुच्छुष्मतन्त्रे
बोधने तु नमस्कारः .....।।"

(ने० तं० उ०, प० खं०2, पृ०,75)

"बोधनं नमः शब्देन।"

(तदेव)

"देहसद्भावपर्य्यन्तमात्मभावो यतो धियि।
देहान्तेऽपि न मोक्षः स्यात्पौरुषाज्ञानहानितः।।"
(तं० आ०1,49)

~ विशेषफलदम्— **दीक्षादिना समुदिते पौरुषे ज्ञाने यदि बौद्धमपि ज्ञानं समुदेति शास्त्राद्यभ्यासवशतस्तदा तत्कालमेव जीवन्मुक्तिलाभः। यथा—**

"बौद्धाज्ञाननिवृत्तौ तु विकल्पोन्मूलनाद् ध्रुवम्।
तदैव मोक्ष इत्युक्तं धात्रा श्रीमन्निशाटने।।"
(तं० आ०1,50)

बौद्धम्ः— ~ अज्ञानम्—

द्र०:- **'अज्ञानं'** ~ 'बौद्धम्' इति।

बौद्धवादाः — (1) क्षणिका बाह्यार्थाः परम्परयाऽग्रे सरन्ति प्रवाहवत्; क्षणिकानि च चित्तानि तथैव प्रवहणशीलानि। उभयोः सम्बन्धरूपोऽयं संसारः। इति बाह्यार्थवादोऽयम्।

(2) क्षणिकविज्ञानरूपाणां चित्तानामेव परम्पराः सत्यभूताः बाह्यपदार्थरूपता तु तासामेवाकारविशेषता, स्वप्नस्थबाह्यपदार्थ-परम्परावत्। एष विज्ञानवादः।

(3) मोक्षदशायां चित्तपरम्परात्मिकाः विज्ञानपरम्परा अपि समुच्छेदं यान्ति, पर्यन्ते च प्रमेयप्रमाणशून्यतैवावशिष्यते निर्वाणदशायाम्। एष शून्यवादः।

एते मुख्यास्त्रयो बौद्धवादाः।

~ आत्मसत्ताव्यञ्जकाः — **प्रमात्रादिनिषेधपरो बौद्धः स्वात्मानमाधारतयाऽधिष्ठायैव प्रमेयप्रमात्रादि निषेधं कर्तुमलं भवेत्। साक्षिणोऽपि निषेधे किं साध्येत किं वा निषिध्येत। तेन तन्मतेऽपि सिद्धैवात्मनः सत्ता चेत्ते तथा न मन्येरन्नपि। यथा—**

"आत्मादेर्निराकरणे साधने वापि अवश्यमेव साधयिता पूर्वकोटावाक्षिप्तः सिद्धः। न हि साधयितारमन्तरेणार्थानां साध्यतैव स्यात्। स च स्वतः सिद्धः प्रकाशात्मा परमार्थरूपः परमेश्वरः शिव एव।"
(तं० आ० वि०, खं०1, पृ०,96)

~ ईश्वरत्वव्यञ्जकाः — **अभिनवगुप्तादीनां विचारानुसारं विज्ञानवादिनो बौद्धा अपि मूलतः सूक्ष्मतरविचारिणः सन्तः आत्मवादिनां समीपस्थां भूमिमधिशेरते वस्तुतः। परं विज्ञानवादव्याख्यातृभिरसौ वादो बलाद्वैनाशिकत्वपदवीमारोपितः। यथा—**

"तथा च विवेककुशलैरालयविज्ञानमेवमेवोपगतम्।"
(प० त्री० वि०, पृ०,108)

अत्र तात्पर्यमेतत् — पारमेश्वर्याः प्रतिभाया एव स्थाने विज्ञानवादिभिरालयविज्ञानं सुस्थापितं सकललोकव्यवहाराधारतयेति। यथा—

"तदनुसारिणैव सुगतेनोक्तम्:— "चित्तमात्रमिदं यदुत त्रैधातुकम्" इति। तदत्र विवरणकारैर्दुरभिनिवेशवशेन विप्रतारितो जनः।"
(ई० प्र० वि० वि०, खं०3, पृ०,405)

बौद्धवादानुपपत्तिः — बौद्धाः क्षणिकं विज्ञानं विज्ञानान्तरसंस्पर्शरहितमेव मन्यन्ते। विकल्पावभासश्च पूर्वस्पन्दसम्बद्धस्पन्दान्तरोदयाश्रित एव। ततो बौद्धदर्शने तदनुपपत्तिः। अनेकक्षणव्यापकस्य तदाधारभूतस्य च कस्यापि स्थिरस्य तत्त्वस्याभावात्। यथा—

"स्पन्दान्तरं न यावत्तदुदितं तावदेव सः।।
तावानेको विकल्पः स्याद्विविधं वस्तु कल्पयन्।
ये त्वित्थं न विदुस्तेषां विकल्पो नोपपद्यते।।
स ह्येको न भवेत्कश्चित् त्रिजगत्यपि जातुचित्।"
(तं० आ०7,31-33)

"ये इति बौद्धाः, इत्थमिति स्पन्दान्तरोदय एव विकल्पान्तराणामुदयो, न त्वेकस्मिन्नेव स्पन्दे इत्यर्थः।"
(तं० आ० वि०, खं०4/2, पृ०,25)

बौद्धागमप्रामाण्यम्— न हि केनापि बुद्धनाम्ना व्यक्तिनोक्तत्वेन बौद्धागमानां प्रामाण्यम्। अपि तु बुद्धपदवीप्राप्ताः साधका बुद्धाः, तेषां पुरातनो बुद्धः पूर्वबुद्धः, तस्यापि गुरुपरम्परायां पर्यन्ते शिव एव मूलभूतो गुरुः। ततः शिवोक्तत्वमेव बौद्धाद्यागमानामपि, तत एव च मायीयक्षेत्रमध्ये तेषां प्रामाण्यम्। यथा—

"न हि बुद्धो नाम नियतः कश्चित्, अपि तु भावनाबलप्रतिलब्धक्षणिकादिदृढविमर्शः। तस्य क्षणिकादिभावनोपदेशी गुरुः पूर्वबुद्धः, तस्याप्यन्यः इति क्रमेणानियतवक्तृकत्वात् पारमेश्वरविमर्शमयतैव वस्तुतः।"
(ई० प्र० वि० वि०, खं०3, पृ०,97)

द्र०:- **'प्रसिद्धिः'**:— ~ 'तत्प्रामाण्यम्' इति।

बौद्धादीनां गतिः— सांख्यबौद्धादयो मध्यभूमावेव विश्रम्य तदेव च परं पदं मन्यमाना न वास्तविकं परं पदं लभन्ते प्रायशः। यथा—

"बुद्धितत्त्वे स्थिता बौद्धा गुणेष्वप्यार्हताः स्थिताः।
स्थिता वेदविदः पुंसि त्वव्यक्ते पाञ्चरात्रिकाः।।"
उद्धः तं०आ०वि०,खं०4/1, पृ०,131)

ब्रह्म — सर्वव्यापकं शुद्धचिन्मयं तत्त्वम्। तच्च तत्त्वं परमेश्वर एव, यः स्वभावभूतस्य स्वकीयस्य पारमैश्वर्यचमत्कारस्योच्छलनेन जगत्सृष्ट्यादिलीलावभासको विश्वबृंहकः, परिपूर्णपारमैश्वर्यशक्तिमयः स्वयं सृष्ट्यादिपञ्चकृत्यलीलाविलसनपरः सततम्, न पुनरविद्यात्मकोपाधिवशेन बलादिव जगदाकारतयावभास्यमानं शुद्धचिन्मात्ररूपमक्रियं शून्यकल्पं वैदान्तिकं परं तत्त्वम्। ब्रह्मणो हि सर्वव्यापकत्वेन बृहत्त्वाद्विश्वबृंहणस्वभावत्वाच्च ब्रह्मता। न च विश्वबृंहकत्वं वैदान्तिके ब्रह्मणि वेदान्तपाठकैरङ्गीक्रियते।

यथा—

"अन्तर्गतविश्ववीर्यसमुच्छलत्तात्मकविसर्गविश्लेषानन्दशक्त्येकघनं ब्रह्म बृहद् व्यापकं बृंहितं च, न तु वेदान्तपाठकाङ्गीकृतकेवलशून्यवादाविदूरवर्त्तिब्रह्मदर्शन इव।"
(प० त्री० वि०, पृ०,221)

"एवंब्रह्मणो बृंहत्त्वेन व्यापकस्य बृंहकत्वेन विश्वसृष्ट्याप्यायनविधायिनः प्रकाशरूपस्य।"

(ई० प्र० वि० वि०, खं०1,पृ०,44)

"शिवो नाम निखिलतत्त्वबृंहणाद् ब्रह्मेत्युच्यते।"

(तं० आ० वि०, खं०7, पृ०,117)

(2) सर्वसर्वात्मकतया बाह्यमपि वस्तु विश्वात्मकतया बृंहितं सद् ब्रह्मैव। यथा—

"सकलमिदं तत्त्वजालं भैरवात्मतयोच्छलद्, अत एव बहिर्विसृज्यमानं बृंहितं ब्रह्म विसर्गात्मकं बहिः स्थितं च भैरवात्मतयैकीभूतं भेदात्मकव्यवच्छेददारिद्र्यापसारणेन सर्वसर्वात्मकपदप्राप्त्या बृंहितम् इति विसर्गपदम्।"

(प० त्री० वि०, पृ०,320)

"ब्रह्मणो बृंहत्त्वात् बृंहकत्वात् विश्वात्मनः शक्तिमूर्तेः।"

(स्व० तं० उ०, प०1, पृ०,41)

(3) परमात्मा, परमेश्वरः, परमः शिवः परा संवित्; सर्वस्य वास्तविकः स्वभाव इति। यथा—

"आत्मा ब्रह्म परः शिवोऽथ परमा संवित् स्वभावोऽथवा"

(आ० वि०1,24)

(4) पञ्चमन्त्रात्मका ईशानाद्या अधिकारिणोऽपि ब्रह्मपदेनोच्यन्ते। यथा—

"सद्यो जातश्च यद्रुद्रः पुरुषश्चेश्वरात्मकः।।
श्रीमान्सदाशिवो देव ईशानश्चेति गीयते।
विष्णुर्वामः कजोऽघोर इति चैतद्भविष्यति।।
अन्तःस्थसर्वशक्तित्वे-नैकैकस्यापि बृंहणात्।
ब्रह्माण्येतानि कथ्यन्ते बृंहत्त्वाद्विश्वबृंहणात्।।"

(मा० वि० वा०1,251-253)

~ कर्तृत्वमण्डितम्— **ब्रह्म हि चिद्रूपत्वेन स्वात्मानं स्वं च वास्तविकं स्वभावं जानात्येव, न च न जानातीति वक्तुं शक्यम्। तत्तस्य स्वात्मज्ञानमेव क्रिया यतस्तिङा प्रतिपाद्यते। ततोऽकर्तृत्वं यद्वेदान्तिभिस्तस्योद्घुष्टं तदविचारितकथनमेवेति। न च तत् कर्तृत्वं पापपुण्यादिरूपं परिमितम्, अपि तु पूर्णं सर्वकर्तृत्वमेवेति ज्ञेयम्। यथा—**

"समञ्जसमिदं सर्वं किन्तु तस्यात्मनः प्रभोः।
अविमृष्टत्वपर्यायमकर्तृत्वं न युज्यते।।
सा चास्य कर्तृताशक्तिः स्वभावानतिलङ्घिनी।
जानातेश्च करोतेश्च साधारण्येन वर्तते।।"

उद्धः:- (म० मं० प०, पृ०,130)

~ तृतीयम्— **(1) मातृकासु सकारः; शकारषकारापेक्षयाऽस्य तृतीयत्वम्। यथा—**

"..... तृतीयं ब्रह्म सकारः।"

(तं० आ० वि०, खं०2, पृ०,166)

"चतुर्दशयुतं भद्रे तिथीशान्तसमन्वितम्।।
तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः।"

(प० त्री०9,10)

अत्र "सौः" इति बीजपिण्डोद्धारस्य निर्देशः। तत्र चतुर्दश औकारः तिथीशोऽनुस्वारस्तदन्ते स्थितो विसर्गः, तृतीयं च ब्रह्म सकारः इति।

(2) ईशानादिषु रहस्यमन्त्रात्मकेषु शरीरेषु तृतीयोऽघोराख्यो मन्त्रः। स च व्याख्याकारमते "अहम्" इत्येव। यथा—

"तृतीयं ब्रह्म अघोराख्यं, यत् चतुर्दशस्वरेषु युतं संबद्धं स अकारः, तिथिः पञ्चदशः स्वरः अंकारः, तेन युतश्चासौ शान्तः शवर्गान्तो हः, तेन अहमिति यो विमर्शः।"

(प० त्री० ल० विवृ०, पृ०,7)

"तृतीयं ब्रह्म अघोरमन्त्रः चित्परामर्शयुतो भैरवात्मनः स्वच्छन्दभैरवस्य हृदयं सारभूतो महामन्त्रः।"

(तदेव, पृ०,8)

कियन्मात्रा विश्वसनीयताऽस्य लक्ष्मीरामकृतस्य व्याख्यानस्येति विचार्यं सुधीभिः।

(3) मन्त्रप्रमात्राधिष्ठातृषु पञ्चमन्त्रेषु तृतीयोऽघोराख्यः।

~ लयः (तत्र)— **अशरीरमुक्तौ साधकस्य कल्पितो जीवभावसंस्कारोऽपि यदा विलीयते तदैकमात्रशिवभावतयासौ प्रकाशते। सोऽस्य ब्रह्मणि लयः। यथा—**

"इत्थं द्वैतविकल्पे गलिते प्रविलङ्घ्य मोहिनीं मायाम्।
सलिले सलिलं क्षीरे क्षीरमिव ब्रह्मणि लयी स्यात्।।"

(प० सा०,51)

~ संहारक्रमे— **यत्तत्साम्यं सामनस्याख्यं यस्मिननाश्रितशिवोऽपि लीयते तद्ब्रह्म इति परिभाष्यते। यथा—**

"यत्तत्सामनस्यं साम्यं तद्ब्रह्म।"

(तं० सा०, पृ०,56)

ब्रह्मचारी — ~ कौले— **साधिकारो वीरसाधकः कुलयागे मकारत्रयसेवी। यथा—**

"आनन्दो ब्रह्म परमं तच्च देहे त्रिधा स्थितम्।।
उपकारि द्वयं तत्र फलमन्यत्तदात्मकम्।
ओष्ठ्यान्त्यत्रितयासेवी ब्रह्मचारी स उच्यते।।"

(तं० आ०29,97-98)

द्वयं तत्र खाद्यपेयात्मकमन्त्यं संघट्टानन्दमयम्।

ब्रह्मदेवः — **लोकलोकान्तरसृष्टिकर्त्ता, पञ्चसु कारणेष्वेको ब्रह्मदेवः, कमलासनश्चतुर्मुखो देवाधिदेवः। यथा—**

"निशाक्षये पुनः सृष्टिं कुरुते तामसादितः।"

(तं० आ०6,145)

"प्रथमं तामसीं सृष्टिं करोति तमसोत्कटाम्।"

(स्व० तं०11,247)

"तमोरजः समावेशान्मानवान्संसृजेत्पुनः।
रजःसत्त्वसमाविष्टः सृजेन्मुनिवरेश्वरान्।।
गतनिद्रः प्रबुद्धः स सत्त्वाविष्टो जगत्पतिः।
सृजेद्देवान् सलोकांश्च पूर्वयैव व्यवस्थया।।"

(तदेव, 11,248-249)

~ तत्स्थानम् (देहे)— **योगाभ्यासप्रक्रियासु देहमध्ये तस्य स्थानं हृदयकमलमेव। यथा—**

"हृदयाब्जगतत्वादेव कमलासनः।"

(ई० प्र० वि० वि०, खं०3, पृ०,308)

"हृदये हि प्रथमपश्यन्तीप्रसरात्मनि प्रतिभारूपत्वेन प्राथमकल्पिकी सृष्टिः।

'यथेच्छाभ्यर्थितो धाता जाग्रतोऽर्थान्.....'

(स्पं० का०33) इति स्थित्या।"

(ई० प्र० वि० वि०, खं०3, पृ०,308-309)

~ तदधिकारक्षेत्रम्—

द्र०:- **'पार्थिवाण्डम्'** ~ तदधिष्ठाता' इति।

~ तदायुः — **चतुर्दशमन्वन्तरमितं ब्रह्मदेवस्य दिनं, तावती च तस्य रात्रिः। तेनाहोरात्रपरिमाणेन वर्षशतं तस्य स्थूलसृष्टिकर्तुर्ब्रह्मदेवस्यायुः। परं ब्रह्म तु कालपरिच्छेदातीतम्। ततस्तद्विषये दिनरात्रिवर्षादिकलना न कापि। यथा—**

"मन्वन्तरैश्चतुर्दशभिर्ब्राह्मं दिनम् (तावती च रात्रिः)। अनेन परिमाणेन वर्षशतं ब्रह्मायुः।"

(तं० सा०, पृ०,54)

"स्वकवर्षशतान्तेऽस्य क्षयस्तद्वैष्णवं दिनम्।"

(तं० आ०6,145)

~ तद्गतिः — **बुद्धितत्त्वे प्रलीने सति तदधिष्ठाता ब्रह्मदेवो यदि शिवानुग्रहपूतस्तर्हि सोऽवान्तरप्रलयवेलायां शिवीभवति। न चेदनुग्रहपूतोऽकृतस्वात्मशिवभावसाक्षात्कारस्तर्हि मूलप्रकृतितत्त्वे विलीनस्तिष्ठत्यभिनवश्चैकण्ठसृष्टिकालं यावत्। यथा—**

"यद्यसावावृत्तपरशक्तिपातस्तद्बुद्ध्यधोनिवृत्तकर्मतया भोगाभवात्तत्र भोक्ता न भवेत्, इत्यत्रैवास्ते, अन्यथा पुनर्यदि ज्ञानी साक्षात्कृतात्मतत्त्वः स्याद् अधिकारनिवृत्त्यनन्तरं स शिवीभवेत् तदैक्यात्म्येनैव प्रस्फुरेत्।"

(तं० आ० वि०, खं०4/1, पृ०,131)

~ तल्लोकः — **सत्यलोकः। तपोलोकादूर्ध्वं षोडशकोटियोजन-परिमिते स्थाने स्थितः। यथा—**

"ब्रह्मालयस्तु तपसः सत्यः षोडशकोटयः।"

(तं० आ०8,153)

ब्रह्मदेवद्वयम्— एको ब्रह्माऽवरो यः सत्यलोकोपरि निवसन् काले काले त्रिगुणमयीं सृष्टिं करोति। विष्णुदिनान्ते एतस्य संहारः। अपरो ब्रह्मदेवोऽसौ यो बुद्धितत्त्व-मधितिष्ठति। तस्य संहारः शतरुद्रदिनान्ते भवति। यथा—

"स्वकवर्षशतान्तेऽस्य क्षयस्तद्वैष्णवं दिनम्।"

(तं० आ०6,145)

"ब्रह्मणः प्रलयोल्लाससहस्त्रैस्तु रसाग्निभिः।
अव्यक्तस्थेषु रुद्रेषु दिनं रात्रिश्च तावती।।"

(तं० आ०6,148)

"ब्रह्मण इति बुद्धितत्त्वस्थस्य न तु सत्यलोकस्थस्य,न हि तदायुष्यकलनयैतत्कलयितुमेव शक्यमिति भावः। तेन बुद्धितत्त्वस्थस्य ब्रह्मणो गुणतत्त्वशतरुद्रदिनान्ते संहारस्तद्दिनारम्भे च सृष्टिः।"

(तं० आ० वि०, खं०4/1, पृ०,128)

"ब्रह्मा तत्राधिपत्वेन बुद्धितत्त्वे व्यवस्थितः।
सर्वज्ञं च तमेवाहुर्बौद्धानां परमं पदम्।।"

(तं० आ० वि०, खं०1, पृ०69)

ब्रह्मपञ्चकम्— (1) त्रिकाचारोपाससनायां मातृकाक्रमे शादिक्षान्तविमर्शनीयानि विद्याद्यनाश्रितान्तानि तत्त्वानि ब्रह्मपञ्चकतयोक्तानि। तदनुसारं:— (1) महामायायां भगवाननन्तनाथः, (2,3) शुद्धविद्यायाम् ईश्वरसदाशिवभट्टारकौ, (4) तदुपरि भगवती शक्तिः, (5) तदूर्ध्वे भगवाननाश्रितः शिव इत्येतेषां ब्रह्मपञ्चकेत्यभिधानम्। पञ्चानामपि व्यापकत्वेन बृहत्त्वं सृष्ट्यादिकृत्यसम्पादनैश्वर्येण च विश्वबृंहकत्वम् इत्युभयथा ब्रह्मत्वं बोध्यम्। यथा—

"तदूर्ध्वं शादि विख्यातं पुरस्ताद् ब्रह्मपञ्चकम्।"

(प० त्री०,7)

"अत्र मते विद्याद्यनाश्रितशिवान्तं ब्रह्मपञ्चकं..... ..... एषां च तत्त्वानां बृहत्त्वं बृंहकत्वं च प्रायो भेदसमुत्तीर्णत्वात् संसारसृतिकर्तृत्वाच्च।"

(प० त्री० वि०, पृ०,119)

उपासनाक्रमविशेषे मतमेतदतीवगहनं च अत्र लब्धरहस्यदीक्षाणामेव साधकोत्तमानां गतिरिति वेद्यं सुधीभिः। तदेतच्चिन्त्यं सुधीभिः।

(2) सद्यो जाताद्याः पञ्चमन्त्राख्या अधिकारिणो मतान्तरेण। यथा—

"सद्यो जातवामदेवाअघोरतत्पुरुषेशानरूपं ब्रह्मपञ्च-कशब्देनाख्यातमिति।"

(प० त्री० ल० वृ०, पृ०,7)

सद्योजातादीनामस्ति ब्रह्मपञ्चकमिति संज्ञा। परमत्र परात्रीशिकावाक्ये न तेऽभिप्रेताः। तत्र एतन्मतं स्वीकार्यं न वेति संशय एव। न चेयं लघुवृत्तिर्वस्तुतोऽभिनव- गुप्तकृता। अपि तु केनाप्यर्वाचीनेन पण्डितेन लिखिता, प्रामाण्यस्थापनार्थं च निर्मातुर्नामाभिनवगुप्ताचार्य इति निर्दिष्टमिति प्रतिभाति। तदेतच्चिन्त्यं सुधीभिः यच्च सद्यो जातादीनां ब्रह्मपञ्चकमित्यभि-धानं नैव तन्मातृकोपासनाक्रमेऽपि तु भुवनाध्वापोसनादौ तद्विषये मालिनीविजयवार्तिकपंक्तिभिः प्रतारितोऽसौ लघुवृत्तिकारः पण्डितः कोऽपि उक्तं च तद्वार्तिके यथा—

"सद्यो जातश्च यद्रुद्रः पुरुषश्चेश्वरात्मकः।।
श्रीमान् सदाशिवो देव ईशानश्चेति गीयते।
विष्णुर्वामः कजोऽघोर इति चैतद्भविष्यति।।
अन्तःस्थ सर्वशक्तित्वेनैकैस्यापि बृंहणात्।
ब्रह्माण्येतानि कथ्यन्ते बृहत्त्वाद् विश्वबृंहणत्।।"

(मा० वि० वा०1,251-253)

ब्रह्मबिलम्— नाद एवोर्ध्वशक्त्या विश्वं भित्त्वा सुषुम्नाया उपरि संक्रम्य यत्र विश्राम्यति तत् स्थानं ब्रह्मबिलं ब्रह्म-रन्ध्रमिति। यथा—

"नादः सुषुम्नाख्यां मध्यनाडीमधितिष्ठन्नधः शक्त्योत्थाय मूलाधारात् प्रबोधमासाद्य प्राणात्मिकयोर्ध्वशक्त्या निखिलमिदं

जगत् तत्तत्कारणोल्लङ्घनक्रमेण भित्त्वा तस्या एव सुषुम्नाख्याया नाड्या उर्ध्वत उपरिष्टान्निर्गच्छेत्, येनासौ ब्रह्मबिले विश्रन्तः .....।"

(तं० आ० वि०, खं०5, पृ०,254)

ब्रह्मयामलम्— भैरवागमानां मध्ये यामलाष्टके परिगणितोऽभेददृष्टिप्रधानः शैवागमविशेषः, समुद्धृतपंक्तिस्तन्त्रालोके उपजीव्यत्वेन च स्वीकृतस्तत्र। यथा—

"श्रीब्रह्मयामले चोक्तं ..... इत्यादि।"

(तं० आ०5,97)

"प्रायश्चित्तं प्रकर्तव्यमिति श्रीब्रह्मयामले।"

(तं० आ०28,419)

द्र०:- तं० आ०4:- 57,58,60 62,67-68,
" " 5- 97 100,13-145,
" " 15- 43-44;
तं० आ० 18-9;
" " 23- 43-44
" " 27- 29;
" " 28- 420 423;
" " 29- 11 इति।

ब्रह्मरेखा— मण्डले पद्ममध्यस्था कापि रेखा। यथा—

"शूलं कृष्णेन रजसा ब्रह्मरेखा सिता पुनः।"

(तं० आ०31,95)

ब्रह्मलोकः — द्र०:- 'ब्रह्मदेवः'— ~ 'तल्लोकः' इति।

ब्रह्मवादः — ऐश्वर्यहीनस्य शुद्धस्य चिन्मात्रस्य तत्त्वस्यैव केवलस्य वास्तविकी सत्तेति, जगदवभासश्चानादिरूपायाः-ब्रह्मण्युपाधिरूपतया संलग्नायाः, प्रातिभासिकसत्ताभागिन्या अनिर्वाच्याया अविद्याया एव प्रभावात् स्वप्नावभासदसत्यः भ्रमात्मकश्चेति वादोऽद्वैतवेदान्तिनाम्।

~ तर्कदोषभाक्— **(1) तुच्छभूताया अविद्याया अकिञ्चित्करत्वे, ब्रह्मणः सततशुद्धरूपत्वे, तदतिरिक्तस्य च जीवस्याविद्यमानत्वे, न कथमपि जगदवभासोपपत्तिः। इतिमुख्यो दोषस्तर्क दृष्ट्या ब्रह्मवादस्य।**

यथा—

"चिद्रूपस्यैकत्वं यदि वास्तवं भेदः पुनरयमविद्योपप्लवात् इत्युच्यते कस्यायमविद्योपप्लवः, इति न संगच्छते। ब्रह्मणो हि विद्यैकरूपस्य कथमविद्यारूपता, न चान्यः कश्चिदस्ति वस्तुतो जीवादिर्यस्याविद्या भवेत्।"

(ई० प्र० वि०, खं०2, पृ०,179)

(2) ब्रह्मणः क्रियाशक्तिरहिततायां नैव जगदाभासोपपत्तिः काचनापि तर्कस्याग्रे स्थातुमलम्, अविद्यादेर्ब्रतत्त्वं प्रत्यकिञ्चित्करत्वात् ततो ब्रह्म परमेश्वरः स च शक्तिमान् सृष्ट्यादिकर्त्ता चेत्यभ्युपेयम्।

यथा—

"तस्माद्वास्तवं चिदेकत्वमभ्युपगम्यापि तस्य कर्तृत्वलक्षणाभिन्नरूपसमावेशात्मिका क्रिया नोपपद्यते; परामर्शलक्षणं तु स्वातन्त्र्यं यदि भवति तदोपपद्यते सर्वम्"

(ई० प्र० वि०, खं०2, पृ०,180-81)

~ दोषापहारतः — **अद्वैतवैदान्तिके ब्रह्मवादे अविद्यां मायायैकीकृत्यमायां च परब्रह्मशक्तितया तदभिन्नतया च स्वीकृत्योपासमानः साधकः पराद्वैतसिद्धिरूपां परिपूर्णां परमेश्वरतां प्रवेष्टुमलं भवत्येव। परं नाग्रहिला ब्रह्मावादिनस्तथेच्छन्ति।**

यथा—

"ब्रह्मवादेऽविद्यां मायाशक्तीकृत्य ..... सिद्ध्यत्येव जनः।"

(ई० प्र० वि० वि०, खं०3, पृ०,405)

ब्रह्मविद्या— ब्राह्मीविद्या मन्त्रादिमयी। सद्यः समुत्क्रमणदीक्षायां योगाभ्यासे स्वयं प्रवीणस्य अप्रवीणस्यापि वा शिष्यस्य दीक्षयापि सम्बोधार्थं सद्यो मुक्तये च प्राणोत्क्रमणक्रमेण कर्णे पठ्यमाना मन्त्रश्लोकरूपा मिश्रा कापि विद्या या विस्तरेण तन्त्रालोके सन्निवेशिताऽऽचार्येण। समयी शिष्योऽपि एनां पठितुमधिकारी।

यथा—

"ब्रह्मविद्यां वा कर्णे पठेत्। सा हि परामर्शस्वभावा सद्यः प्रबुद्धपशुचैतन्ये प्रबुद्धविमर्शं करोति। समय्यादेरपि च एतत् पाठेऽधिकारः।"

(तं० सा० पृ०,163)

द्र०:- **'ब्राह्मी विद्या'** इति।

~ तत् पाठः — द्र०:- **'(1) 'ब्राह्मी विद्या'** ~ 'निष्कला' इति।

'(2) 'ब्रह्मी विद्या'— ~ 'सकला' **इति च।**

~ तदधिकारी— **न केवलं स्वभ्यस्तज्ञानवान् योग्येव गुरुर्भवन्ब्रह्मविद्याप्रयोगेऽधिकारी, अपि तु कस्यापि मरणावसरे कोऽपि समयी वा पुत्रकोऽपि वा तत्प्रयोगं कर्तुमलं मुमूर्षोः कल्याणाय। पाठप्रयोगश्च तथा विधीयते यथा मुमूर्षुरेतां शृणुयात्।**

यथा—

"समयी पुत्रको वापि पठेद्विद्यामिमां तथा।।
तत्पाठात्तु समय्युक्तां रुद्रांशापत्तिमश्नुते।"

(तं० आ०19,31-32)

"तथेति यथा मुमूर्षुरिमां शृणुयादित्यर्थः।"

(तं० आ० वि० खं०10, पृ०,194)

~ तन्मन्त्रः — **ब्राह्मी विद्यैव।**

द्र०:- **'ब्राह्मी विद्या'** ~ 'निष्कला' **इति।**

'ब्राह्मी विद्या' ~ 'सकला' **इति च।**

ब्रह्मविवर्त्तवादः — शुद्धचिन्मात्रमेकमेव ब्रह्माख्यं तत्त्वमस्ति वस्तुतः। परमनाद्यविद्याबलप्रभावात्तदेवैकं तत्त्वं जीवरूपतया, जगद्रूपतया, ईश्वररूपतया च पश्यन्त्यज्ञानोपहतदृशः प्राणिनो भ्रमात्मकज्ञानसाहाय्येन;

यथाऽन्धकारो-पहतदृष्टिर्जनो रज्जुं सर्परूपत्वेन जानाति। स एषोऽज्ञानवशाद् ब्रह्मणोऽन्यथाऽन्यथा जगदाकारतयाऽवभासमानात्मको विवर्त्तवादनिष्ठः वैदान्तिकः सिद्धान्त एव हि ब्रह्मविवर्त्तवादः।

~ अनुपपन्नः — **न युक्त्योपपद्यतेऽसौ।**

यथा—

"एकपदेन ब्रह्मविवर्त्तवादोऽपि नान्यः सिद्ध इति ध्वनति।"

(ई० प्र० वि० वि०, खं०1, पृ०,176)

द्र०:- **'ब्रह्मवादः'** ~ 'तर्कदोषभाक्' **इति।**

ब्रह्म-विष्णु-रुद्राः — स्थूलस्य जगतः सृष्टिस्थितिसंहारकारकाः देवाधिदेवाः। ब्राह्मी, वैष्णवी, रौद्री चेति तेषां शक्तयः क्रमेण।

~ ईश्वरावताराः— **मायादशामवतीर्ण ईश्वरभट्टारक एव ब्रह्मविष्णुरुद्रात्मकत्रिकरूपतया स्थितोऽस्ति।**

यथा—

"तत्र हीति मायापदे ईश्वर एव ब्रह्मादिरूपेण स्थितः।"

(ई० प्र० वि० वि०, खं०3, पृ०,25-26)

~ तदायुः — **चतुर्दशभिर्मन्वन्तरैर्ब्राह्मं दिनं, तावती तस्य रात्रिः। स्वकीययेनाहोरात्रपरिमाणेन ब्रह्मणो वर्षशतमायुः। तद्विष्णोर्दिनम् तावती तस्य रात्रिः। तस्यापि निजाहोरात्रपरिमाणेन वर्षशतमायुः। तद्रुद्रस्य दिनम्, तावती निशा। तस्यापि तयैव नीत्या वर्षशतमायुः। तत्तावत् शतरुद्रदिनम् तावती च निशा। तेषामपि तथैव निजमायुः।**

यथा—

"चतुर्युगैकसप्तत्या मन्वन्तस्ते चतुर्दश।।
ब्रह्मणोऽहस्तत्र चेन्द्रः क्रमाद्यान्ति चतुर्दश।"

(तं० आ०6,139-140)

"स्वकवर्षशतान्तेऽस्य क्षयस्तद्वैष्णवं दिनम्।।
रात्रिश्च तावतीत्येवं विष्णुरुद्रशताभिधाः।
क्रमात्स्वस्वशतान्तेषु नश्यन्त्यत्राण्डलोपतः।।"

(तदेव 6,145-146)

~ सृष्टिभाजः — **ब्रह्मादिषु स्वात्मप्रत्यभिज्ञाबलेन शिवभावं प्रविष्टेषु सत्स्वभिनवसृष्टिकाले परमेश्वरोऽभिनवान् ब्रह्मादीन् सृजति। ब्राह्मी वैष्णवीत्याद्यास्तस्यैव शक्तयः। ताः यस्मिन् यस्मिन् प्रमातरि पातयेत्, स स प्रमाता ब्रह्मा विष्णुः रुद्र इति सद्यः सञ्जायते।**

यथाः—

"ब्राह्मी नाम परस्यैव शक्तिस्तां यत्र पातयेत्।।
स ब्रह्मा विष्णुरुद्राद्या वैष्णव्यादेरतः क्रमात्।"

(तं० आ० 6,177-78)

"ब्राह्मी च वैष्णवी शक्तिरधिकारपदं गता।
यं चाधिष्ठित्यात्मानं तत्संज्ञां स प्रपद्यते।।
तदाधिकारं कुरुते इच्छया परमात्मनः।"

(स्व० तं०11,267-268)

उद्धः:- (तं० आ० वि०, खं 4/1, पृ०,150)

ब्रह्मसूत्रम्— मण्डलनिर्माणोपयोगी सूत्रविशेषो नैव सम्यक् स्पष्टीकृतो जयरथेन।

यथा—

"एकार्धेन्दूर्ध्वकोटिस्थं ब्रह्मसूत्राग्रसङ्गतम्।।"

(तं० आ०31,68)

ब्रह्मा ~ देवदेवः — **भेदात्मकस्य जगतः स्रष्टा। प्रमातुः सकाशाद् भिन्नस्य प्रमेयस्योल्लासनेऽधिष्ठातृत्वं भजमानो देवाधिदेवः।**

यथा—

"भिन्नस्य तु प्रमेयस्य प्रसरे-सम्पादनेऽधिष्ठातृदेवतात्वं भजन् ब्रह्मा।"

(ई० प्र० वि०, खं०2, पृ०,217)

द्र०:- **'ब्रह्मदेवः'** इति।

~ बीजमन्त्रः (प्रणवकलासु)— **अकारः। यथा—**

"ब्रह्मा-तद्वाचित्वादवर्णः।"

(ने० तं० उ०, खं०1, पृ०,51)

ब्रह्माण्डम्— कालाग्निभुवनादारभ्य सत्यलोकस्योपरितने भागे स्थितं ब्रह्मलोकं यावत् सर्वमेतज्जगद् ब्रह्माण्डमिति।

यथा—

"तत्र पृथ्वीतत्त्वं शतकोटिप्रविस्तीर्णं ब्रह्माण्डगोलकरूपम्। तस्यान्तः कालाग्निर्नरकाः पातालानि, पृथिवी, स्वर्गो यावद् ब्रह्मलोक इति।"

(तं० सा०, पृ०,64)

एतेन ज्ञायते यत् पृथिव्यण्डमेव **ब्रह्माण्डम् इति।**

~ तत्संख्या— **असंख्यानि हि ब्रह्माण्डानि। न तेषां संख्या विद्यते। तत्र दृष्टिद्वयम् :—**

(1) यथा समुद्रे बुद्बुदानां गणना न सम्भवत्येवमेव मायाम्बुधौ विलुठतां ब्रह्माण्डानाम्।

(2) यथा प्रतिपुरुषं प्रकृतितत्त्वं भिन्नं सद् असंख्यम्, एवमेवासंख्यप्रमातृवेद्यतया प्रतिप्रमातृभिन्नानि ततोऽसंख्यातानि ब्रह्माण्डानि। आभासवाददृष्ट्येदमुक्तं शास्त्रे।

यथा—

"न च ब्रह्माण्डानां संख्या विद्यते।"

(तं० सा०, पृ०,64)

~ तदधोभागः — **देशाध्वधारणायां ब्रह्माण्डस्याधस्तेन भागे कालाग्निभुवनम्। तदुपरि नरकाः ते चावीचिकुम्भीपाकाद्याः तदुपरि कूष्माण्डभुवनं ततः पातालाष्टकम्। यथा—**

"कालाग्नेर्भुवनं चोर्ध्वे ..... इत्यादि।"

(तं० आ०8,22)

"तदूर्ध्वे नरकाधीशाः ..... इत्यादि।"

(तदेव 8,25)

"पातालाष्टकमेकैकमष्टमे हाटकः प्रभुः।"

(तदेव 8,31)

~ तद्धारकाः — **ब्रह्माण्डाद् बहिर्दशसु दिक्षु स्थिता ब्रह्माण्डधारकाः शतसंख्याका रुद्राः। यथा—**

"प्रतिदिक्कं दश दशेत्येवं रुद्रशतं बहिः।।
ब्रह्माण्डधारकं तच्च स्वप्रभावेण सर्वतः।"
(तं० आ०8,167-168)

~ तल्लयः — **शतरुद्राणामायुषोऽन्ते यदा ते परं तत्त्वं प्रविशन्ति तदा ब्रह्माण्डस्यापि प्रलयो भवति। यथा—**

"शतरुद्राश्च देवेशि स्वाब्दानां तु शतक्षये।
ते प्रयान्ति परं तत्त्वं ततोऽण्डं च विनश्यति।।"
(स्व०तं०11,275-76)

ब्रह्माणी-पीठम्— श्रीशैलम्। यथा—

"वैरिञ्चीमिति ब्रह्माणीं, श्रीशैलाख्यं तु तत् पीठमित्यर्थः। तदुक्तं श्रीकुलक्रमोदये
श्रीशैले संस्थिता ब्राह्मी .....।"
उद्ध०:- (तं० आ० वि०, खं०11/2, पृ०,44)

ब्रह्मानन्दः — षट्स्वानन्दभूमिकासु चतुर्थी भूमिका ब्रह्मानन्दाख्या। तत्र समानाख्यप्राणवृत्तौ विश्रान्त्या यस्य स्वरूपात्मकस्यानन्दस्याभिव्यक्तिरसौ ब्रह्मानन्द इत्युच्यते। तस्यां समानवृत्तौ प्रस्फुरदनन्तप्रमेयसंघट्टात्मकेन विमर्शेन विशिष्टस्यात्मानन्दस्याभिव्यक्तिः। यथा—

"ततोऽनन्तस्फुरन्मेयसंघट्टैकान्तनिर्वृतः।।
समानभूमिमागत्य ब्रह्मानन्दमयो भवेत्।"
(तं० आ०5,46-47)

"सममेव समग्रमेयस्वीकारात् समानभूमिमासाद्य मेयेन सम्भूय कृतत्वाद्बृंहितेन ब्रह्मरूपो योऽसावानन्दस्तन्मयो भवेत्।"
(तं० आ० वि०, खं०3, पृ०,351)

~ तदभिव्यक्तिस्थानम्— **हृदयमेवास्याभिव्यक्तिस्थानम्। यथा—**

"ततोऽपि हृदये कुम्भकवृत्त्या क्षणं विश्रम्य तेषां ....ब्रह्मरूपो योऽसावानन्दस्तन्मयो भवेत्।"
(तं० आ० वि०, खं०3, पृ०,351)

ब्रह्मासनम्— सत्यलोकस्योपरिस्थितं पुरम्। यथा—

"आनन्दनिष्ठास्तत्रोर्ध्वे कोटिर्वैरिञ्चिमासनम्।"
(तं० आ०8,155)

ब्राह्मं दिनम्— चतुर्दशभिर्मन्वन्तरैर्ब्राह्ममहः। यथा—

"..... मन्वन्तस्ते चतुर्दश।।
ब्रह्मणोऽहः .....।"
(तं० आ०6,139-140)

~ देवेन्द्रगतिः (तत्र)— **एकैकस्मिन् ब्राह्मेऽहनि चतुर्दश इन्द्राः क्रमश उत्पत्तिं लयं च यान्ति तच्च तस्य दिनं मन्वन्तरनाम्ना प्रसिद्धम्। यथा—**

"ब्रह्मणोऽहस्त्र चेन्द्राः क्रमाद् यान्ति चतुर्दश।"
(तं० आ०6,140)

"प्रतिमन्वन्तरमेकैक इन्द्रः संहारं याति।"
(तं० आ० वि०, खं०4/1, पृ०,121)

ब्राह्मीनिशा— यावत्-परिमाणं दिनं ब्रह्मणस्तावत्-परिमाणा तस्य निशा, सर्वत्र दिननिशाकालयोस्तुल्यत्वप्रतिपादनात्। तेन चतुर्दशमन्वन्तरपरिमिता ब्रह्मणो निशेति।

~ जीवगतिः (तत्र)— **ब्रह्मणो रात्र्यागमे सर्वेऽपि पशुप्रमातारः पुर्यष्टकदेहभाजो जनलोके प्रलयाकलीभूय तिष्ठन्ति। यथा—**

"तस्मिन्निशावधौ सर्वे पुद्गलाः सूक्ष्मदेहगाः।।
अग्निवेगेरिता लोके जने स्युर्लयकेवलाः।"
(तं० आ०6,143-144)

~ तदन्ते सृष्टि : — **ब्रह्मणोऽभिनवे दिनारम्भे पुनर्जीवानां लोकानां च सृष्टिः। यथा—**

"निशाक्षये पुनः सृष्टिं कुरुते तामसादितः।"
(तं० आ०6,145)

~ प्रबुद्धस्थितिः (तत्र)— **प्रबुद्धाः कूष्माण्डहाटकेशाद्याः प्राणिनः ब्रह्मनिशायां महो लोके क्रीडन्ति। यथा—**

"कूष्माण्डहाटकाद्यास्तु क्रीडन्ति महदालये।"
(तं० आ०6,144)

ब्राह्मी-विद्या— ब्रह्मविद्या। मन्त्ररूपिण्यसौ विद्या यां सिद्धयोगी वा, पुत्रको वा, समयी वापि कश्चन मुमूर्षुं शिष्यं कर्णयोः सम्यक् श्रावयति, यस्याश्चार्थमसौ मुमूर्षुश्चेतसा भावयति, यया च श्रावितया मन्त्रध्वनिसामर्थ्यादेव मुमूर्षुः शरीरपातादनन्तरमेव संसृतेर्मुक्तो, भवन्नुत्तरं लोकं वासादयति कमपि विशेषभुक्तये सर्वथा वा मुक्तो भवन् शिवभावं प्रविशति। यथा—

"अथोच्यते ब्रह्मविद्या सद्यः प्रत्ययदायिनी।।
शिवः श्रीभूतिराजो यामस्मभ्यं प्रत्यपादयत्।
सर्वेषामेव भूतानां मरणे समुपस्थिते।।
यया पठितयोत्क्रम्य जीवो याति निरञ्जनम्।
या ज्ञानिनोऽपि सम्पूर्णकृत्यस्यापि श्रुता सती।।
प्राणादिच्छेदजां मृत्युव्यथां सद्यो व्यपोहति।
यामाकर्ण्य महामोहविवशोऽपि क्रमाद् गतः।।
प्रबोधं वक्तृसाम्मुख्यमभ्येति रभसात्स्वयम्।"
(तं० आ०30,62-66)

~ तत्पाठः — **द्र०:- 'ब्रह्मीविद्या' ~ 'सकला' इति। 'ब्राह्मीविद्या** ~ निष्कला' **इति च।**

~ तत् प्रयोगः — **मरणकाले कर्णे श्राव्यते ब्राह्मीविद्या, तया च श्रुत्या शिष्यो मुक्तो भवति यथा—**

"विनापि क्रियया भाविब्रह्मविद्याबलाद्गुरुः।।
कर्णजापप्रयोगेण तत्त्वकञ्चुकजालतः।
निःसारयन् यथाभीष्टे सकले निष्कले द्वये।।
तत्त्वे वा यत्र कुत्रापि योजयेत् पुद्गलं क्रमात्।"
(तं० आ०19,29-31)

एतेन ज्ञायते यत् प्राणोत्क्रमणदीक्षया सद्योऽपि वा शिवभावावाप्तिः, शुद्धे वा क्वापि तत्त्वे योजनिकेति।

~ तत्फलम् (अप्रबुद्धस्य)— **श्रूयमाणा सती भुक्तिमुक्तिप्रदा भवति। यथा—**

"यामाकर्ण्य महामोहविवशोऽपि क्रमाद्गतः।।
प्रबोधं वक्तृसाम्मुख्यमभ्येति रभसात् स्वयम्।"
(तं० आ०30,65-66)

~ सुप्रबुद्धस्य— **स्वयमेव मुक्तस्य सुप्रबुद्धस्य मरणवेदनापहारं करोति श्रूयमाणा ब्राह्मीविद्या। यथा—**

"या ज्ञानिनोऽपि सम्पूर्णकृत्यस्यापि श्रुता सती।
प्राणादिच्छेदजां मृत्युव्यथां सद्यो व्यपोहति।।"
(तं० आ०30,64-65)

~ तत्स्वरूपम् — **पञ्चदशवाक्यमयं सुविस्तरमार्याद्वादशकात्मकम्। प्रतिवाक्यमाद्यन्तयोः पञ्चपिण्डमन्त्रोच्चारणमन्त्रप्रयोग विधावुक्तम्। यथा—**

"सकलेयं ब्रह्मविद्या स्यात्पञ्चदशभिः स्फुटैः।
वाक्यैः पञ्चाक्षरैस्त्वस्या निष्कला परिकीर्त्यते।।
प्रतिवाक्यं यथाद्यन्तयोजिता परिपठ्यते।"
(तं० आ०30,89-90)

वाक्यान्यत्र कानिचिदेकपंक्तीनि कानिचिच्च द्विपंक्तीनि। एवं द्वादशस्वार्यासु पञ्चदशवाक्यानि।

~ निष्कला— **शः सा चैवम् — ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊं — इति यथा—**

तारो माया वेदकलो मातृतारो नवात्मकः।

हूँ इत्यस्य हकारः अकारोऽर्धचन्द्रो बिन्दुश्चेति चतस्रः कलाः। इत्थं चतुष्कलमिदं बीजं वेदकलम्।

~ पाठान्तरतः — **(1) चतुर्थे वाक्ये** "शुभाशुभापेक्षी" **इति पदस्य स्थाने निःश्वासागमे** "शुभाशुभोपेक्षी" - **इति पाठः। यथा—**

"निःश्वासे त्वपशब्दस्य स्थानेऽस्त्युप इति ध्वनिः।"
(तं० आ०30,73)

द्र०:- **'ब्राह्मीविद्या'** ~ 'सकला' **इति।**

(2) सप्तमे वाक्ये निःश्वासागमे "उत्क्रम हे देहेश्वर निरञ्जनस्त्वं" **इत्यस्य स्थाने** "उत्क्रम हे देहेश प्रभञ्जनस्त्वं" **इति पाठान्तरम्। यथा—**

"प्रभञ्जनस्त्वमित्येवं पाठो निःश्वासशासने।।"
(तं० आ०30,77)

द्र०:- **'ब्राह्मीविद्या'** ~ 'सकला' **इति।**

(3) नवमे वाक्ये निःश्वासमुकुटोत्तराद्यागमेषु।

"अग्नीषोमसनातन मृत्पिण्डं जहिहि हे महाकाश"

इत्यस्य स्थाने—

"अग्नीषोमसनात्म त्रिपिण्डं जहिहि हे महाकोशम्"

इति पाठान्तरम्।

यथा—

"सनात्म त्रिपिण्डमिति महाकोशमिति स्थितम्।
पदत्रयं तु निःश्वासमुकुटोत्तरकादिषु।।"
(तं० आ०30,81)

द्र०:- **'ब्रह्मीविद्या'** ~ 'सकला' **इति।**

(4) दशमे वाक्ये

"अङ्गुष्ठमात्रममलावरणं जहिहि हे महासूक्ष्म"

इत्यस्य स्थाने—

"अंगुष्ठमात्रमलमलमावरणं जहिहि हे महासूक्ष्मम्"

इति पाठान्तरं मुकुटोत्तरागमे।

यथा—

"अलं द्विरिति सूक्ष्मं चेत्येवं श्रीमुकुटोत्तरे।"
(तं० आ०30,83)

द्र०:- **'ब्राह्मीविद्या'** ~ 'सकला' **इति।**

~ मन्त्रः द्र० 'ब्राह्मी विद्या निष्कला'

'ब्राह्मीविद्या' ~ 'सकला' इति च।

~ श्रवणफलतः — **मुमूर्षुर्यदि समयिनोऽपि वा पुत्रकस्यापि वा मुखाद् ब्राह्मीं विद्यां शृणोति मृत्युकाले तदाऽसौ विद्या तस्य त्राणं करोति जन्मान्तरसङ्कटतः। तद्भावनया च तस्यान्तर्बोधः समुत्पद्यते येनासौ नोत्तरं देहं धारयति। यथा—**

"स तु वस्तुस्वभावेन गलिताक्षोऽपि बुध्यते।।
अक्षानपेक्षयैवान्तश्चिच्छक्त्या स्वप्रकाशया।
प्राग्देहं किल तित्यक्षुर्नोत्तरं चाधितष्ठिवान्।।
मध्ये प्रबोधकबलात् प्रतिबुध्येत पुद्गलः।
मन्त्राः शब्दमयाः शुद्धविमर्शात्मतया स्वयम्।।
अर्थात्मना चावभान्तस्तदर्थप्रतिबोधकाः।
"तेनास्य गलिताक्षस्य प्रबोधो जायते स्वयम्।।
स्वचित्समानजातीयमन्त्रामर्शनसन्निधेः।"
(तं० आ०19,40,44)

~ सकला— **पञ्चदशवाक्यमयी द्वादशार्यात्मिका भूतिराजोपदिष्टा विद्या। तत्र प्रथमे वाक्ये आदौ निष्कला यथा—**

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ"

ततः श्लोको वाक्यात्मको यथा—

"परमपदात् त्वमिहागाः सनातनस्त्वं जहीहि देहान्तम्
पादाङ्गुष्ठादि विभो निबन्धनं बन्धनं ह्युग्रम्।।"

प्रथम वाक्यान्ते निष्कला ॐ ह्रीं इत्यादिरूपा। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ"

पुनर्द्वितीयवाक्यादौ निष्कला यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ"

ततोऽपरं वाक्यम् द्वितीयम् यथा—

"गुल्फान्ते जानुगतं जत्रुस्थं बन्धनं तथा मेढ्रे।
जहि हि पुरमग्र्यमध्यं हृत्पद्मातुं त्वं समुत्तिष्ठ।।"

द्वितीयान्ते मध्ये निष्कला पुनर्निष्कला तृतीयादौ। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

ततस्तृतीयं वाक्यम्, यथा—

"हंस हयग्रीव विभो सदाशिवस्त्वं परोऽसि जीवाख्यः
रविसोम वह्निसङ्घट्टबिन्दुदेहो हहह समुत्क्राम।।"

तृतीयवाक्यान्ते—ॐ ह्रीं इत्यादिरूपा निष्कला। पुनर्निष्कला चतुर्थादौ - यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

ततश्चतुर्थं वाक्यं यथा—

"हंस महामन्त्रमयः सनातनस्त्वं शुभाशुभापेक्षी।
मण्डल-मध्यनिविष्टः शक्तिमहासेतुकारणमहार्थः।।
कमलोभयविनिविष्टः प्रबोधमायाहि देवतादेह।"

मध्ये निष्कला चतुर्थवाक्यान्ते। पुनः ॐ ह्रीं इत्यादि निष्कला पञ्चमादौ। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् प् ऊ ः।"

ततः पञ्चमं वाक्यं यथा—

"अज्ञानात् त्वं बद्धः प्रबोधितो तिष्ठ देवादे।।"

मध्ये निष्कला पञ्चमवाक्यान्ते। पुनः ॐ ह्रीं इत्यादि निष्कला षष्ठादौ। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

ततो वाक्यान्तरं षष्ठम्- यथा—

"व्रजतालुसाह्वयान्तं ह्यौडम्बरघट्टितं महाद्वारम्।।
प्राप्य प्रयाहि हंहो हंहो वा वामदेवपदम्।"

मध्ये निष्कला। पुनः ॐ ह्रीं इत्यादि निष्कला सप्तमादौ

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

ततो वाक्यान्तरं सप्तमं यथा—

"ग्रन्थीश्वर परमात्मन् शान्तमहातालुरन्ध्रमासाद्य।
उत्क्रम हे देहेश्वर निरञ्जनं शिवपदं प्रयाह्याशु।।"

मध्ये निष्कला सप्तमवाक्यान्ते। पुनः ॐ ह्रीं इत्यादि निष्कलाऽष्टमादौ। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

ततोऽष्टमं वाक्यं यथा—

"आक्रम्य मध्यमार्गं प्राणापानौ समाहृत्य।
धर्माधर्मौ त्यक्त्वा नारायण याहि शान्तान्तम्।।"

मध्ये निष्कला अष्टमवाक्यान्ते। पुनः ॐ ह्रीं इत्यादि निष्कला नवमादौ।

यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

ततो वाक्यान्तरं नवमम्-

यथा—

"हे ब्रह्मन्! हे विष्णो हे! रुद्र शिवोऽसि वासुदेवस्त्वम्।।
अग्नीषोम-सनातन मृत्पिण्डं जहिहि हे महाकाश।"

मध्ये निष्कला नवमवाक्यान्ते पुनः ॐ ह्रीं इत्यादि निष्कला दशमादौ। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

पुर्नवाक्यान्तरं दशमं यथा—

"अगुष्ठमात्रममलमावरणं जहिहि हे महासूक्ष्म।

मध्ये निष्कला दशमवाक्यान्ते। पुनः ॐ ह्रीं इत्यादि निष्कला एकादशादौ। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

पुनरपरमेकादशं वाक्यं यथा—

"पुरुषस्त्वं प्रकृतिमयैर्बद्धोऽहङ्कारतन्तुना बन्धैः।।
अभवाभव नित्योदितपरमात्मंस्त्यज सरागमध्वानम्।"

मध्ये निष्कला एकादशवाक्यान्ते। पुनः ॐ ह्रीं इत्यादि निष्कला द्वादशादौ च। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

पुर्नवाक्यम् द्वादशं यथा—

ह्रीं हूं मन्त्रशरीरमविलम्बमाशु त्वमेहि देहान्तम्।

मध्ये निष्कला द्वादशवाक्यान्ते। पुनः ॐ ह्रीं इत्यादि निष्कला त्रयोदशादौ। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

पुर्नवाक्यान्तरं त्रयोदशम्। यथा—

"तदिदं गुणभूतमयं त्यजस्व षाट्कोशिकं पिण्डम्।"

मध्ये निष्कला त्रयोदशवाक्यान्ते पुनः ॐ ह्रीं इत्यादि निष्कला चतुर्दशादौ। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

चतुर्दशं वाक्यान्तरं यथा—

"मा देहं भूतमयं प्रगृह्यतां शाश्वतं महादेहम्।"

मध्ये निश्कला चतुर्दशवाक्यान्ते। पुनः ॐ ह्रीं इत्यादि निष्कला पञ्चदशादौ। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

पुर्नवाक्यान्तरं पञ्चदशं यथा—

"मण्डलममलमनन्तं त्रिधा स्थितं गच्छ भित्त्वैतत्।"

अन्ते निष्कला पञ्चदशान्ते। पुनः ॐ ह्रीं इत्यादि निष्कला उपसंहारवाक्यादौ च। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।
ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ः।"

उपसंहारवाक्यं यथा—

"सकलेयं ब्रह्मविद्या स्यात् पञ्चदशभिः स्फुटैः।
वाक्यैः .....।।"

(तं० आ०30,60,89)

पञ्चदशवाक्यानां मध्ये मध्येऽत्र प्रयोगविधिपराणि पद्यानि। किञ्च प्रतिवाक्यमाद्यन्तयोर्निष्कलाया ब्रह्मविद्यायाः प्रयोगः। यथा—

"ॐ ह्रीं हूँ फ्रें ह् र् क्ष् म् ल् व् य् ऊ ॰।"
परमदात्त्वमिहागाः सनातनस्त्वं जहि देहान्तम्।
पादाङ्गुष्ठादि विभो निबन्धनं बन्धनं ह्युग्रम्।।
ॐ ह्रीं हूं फ्रें ह् र् क्ष् म् ल् व् य् ऊ ॰। इति।
एवं प्रतिवाक्यमाद्यन्तयोर्योजना निष्कलायाः।
निष्कलया ब्रह्मविद्यया सम्पुटीकारः पञ्चदशवाक्यानामिति **बोध्यम्।**

~ साफल्यरहस्यम्— मरणक्षणे ब्रह्मविद्याश्रवणं कुर्वंस्तदर्थं भावयन्नेवानुग्राह्यः शिष्यो मुच्यते बन्धनात्, नान्यथा। यथा—

"तेन स्थितमिदं यद्यद्भाव्यते तत्तदेव हि।।
देहान्ते बुध्यते नो चेत् स्यादन्यादृक्प्रबोधनम्।"
(तं० आ०28,360-361)
"अन्यादृगिति अनियतमेवेत्यर्थः।।
भावनापेक्षामेव उपोद्बलयति।"
(तं० आ० वि०, खं०11, पृ०,151)
"तथा ह्यन्त्यक्षणे ब्रह्मविद्याकर्णनसंस्कृतः।।
मुच्यते जन्तुरित्युक्तं प्राक्संस्कारबलत्वतः।"
(तं० अ०28,361-362)

भ

भ— शाम्भवोपायाङ्गभूते मातृकोपासनक्रमे स्वात्मसंवित्प्रकाशे स्वशक्तिप्रतिबिम्बरूपतया प्रकृतितत्त्वस्य या स्थितिस्तस्या अभिव्यञ्जको मातृकावर्णः। प्रतिबिम्बात्मकप्रकृतितत्त्वचितं स्वात्मानं साक्षात् कुरुते साधको भकारमालम्बनीकृत्य साक्षात् स्वरूपदर्शने।

भकारः —

द्र०:- **'षट्त्रिंशत्तत्त्वदीक्षा'** इति।

भक्तिः— (1) तादात्म्यमयी प्रह्वता। यथा—

"भक्त्या— तादात्म्यानुप्रवेशप्रह्वतात्मना।"
(प० त्री० वि०, पृ०,266)

(2) नवधाभक्तिर्या प्रसिद्धा वैष्णवेषु शास्त्रेशु सा शैवदर्शनेऽवरा भक्तिरिति गण्यते। अत्र तु तस्यामवरायामपि भक्तौ शिवाद्वैतदृष्ट्यनुसारमुपास्योपासकयोः परस्परमभेदभावो मुख्यतया विमर्शनीयो भवति। परस्यां तु भक्तौ केवलं तथविधविमर्शनाभ्यास एव मुख्यः। तत् शैवी भक्तिरुपास्योपासकयोरभेदविमर्शनाभ्यासमयी वेदितव्या। यथा—

"न पादपतनं भक्तिर्व्यापिनः परमेशितुः।
भक्तिर्भावस्वभावानां तदेकीभावभावनम्।।"
उद्धः:- (वि० भै० उ०, पृ०,103)

~ परा— "भक्तिरेव परां काष्ठां प्राप्ता मोक्षोऽभिधीयते।"
(तं० आ० वि०, खं०8, पृ०,136)

उपास्योपासकयोः सर्वथाऽभेदरूपतया प्रकाशनविमर्शने एव परा भक्तिः। सैव ज्ञानं, सैव जीवन्मुक्तिरिति तात्पर्यम्।

~ पराकाष्ठागताः — परां काष्ठां गता परा भक्तिरेव हि ज्ञानस्योच्चतमा भूमिर्योगस्य च सर्वोच्चावस्थेति। यथा—

"ज्ञानस्य परमा भूमिर्योगस्य परमा दशा।
त्वद्भक्तिर्या विभो कर्हि पूर्णा मे स्यात्तदर्थिता।।"
(शि० स्तो०9,9)

~ प्रकृष्टा — निष्कामा प्रेमरूपिणी परमेश्वरतादात्म्य-विमर्शनरूपाभक्तिः। यथा—

"प्रकृष्टा भक्तिः फलभिसन्धिवन्ध्या .....
.....।
यत एवंभूता परमेश्वरापत्तिरूपा भक्तिः प्रकृष्टा।"
(ई० प्र० वि० वि०, खं०1, पृ०,28)

द्र०:- शि० स्तो० 1,1,7,9,11,15,18,26;
78, 1619;20,11,14

भक्तिमदः — शिवसमावेशात्मकभक्तिजनितो हर्षप्रकर्षः भक्तिमदः कथ्यते। यथा—

"भक्तिमदजनितबिभ्रमवशेन पश्येयमविकलं करणैः।
शिवमयमखिलं लोके क्रियाश्च पूजामयीः सकलाः।।"
(शि० स्तो०7,8)

भक्तिरसः — मनसा, वाचा, कर्मणा शिवसमाराधनजन्यः समावेशात्मकश्चमत्कारो भक्तिरसः। यथा—

"वाचि मनोमतिषु तथा शरीरचेष्टासु करणरचितासु।
सर्वत्र सर्वदा मे पुरःसरो भवतु भक्तिरसः।।"
(शि० स्तो०5,22)
"भक्तिरसः–समावेशचमत्कारः।"
(शि० स्तो० वि०, पृ०,84)

भक्त्यनुग्रहौ— व्यवहारे परस्पराश्रितत्वमनयोः प्रतिभाति। अनुग्रहप्रकर्षात् भक्तिप्रकर्षो भक्तिप्रकर्षाच्चानुग्रहवृद्धिः। परं मूलतः शिवानुग्रहत एव भक्तेराविर्भावो जनस्य चेतसि। अग्रे च परस्पराश्रयतस्तयोर्वृद्धिः। यथा—

"त्वं भक्त्या प्रीयसे भक्तिः
प्रीते त्वयि च नाथ यत्।
तदन्योन्याश्रयं युक्तं
यथा वेत्थ त्वमेव तत्।।"
(शि० स्तो०16,21)
"तस्यैव हि प्रसादेन भक्तिरुत्पद्यते नृणाम्।
यया यान्ति परां सिद्धिं तद्भावगतमानसाः।।"
(मा० वि० वा०1,697)
"अनिमित्तस्तथा चायं शक्तिपातो महेशितुः।"
(तदेव1,688)
"यः प्रसादलव ईश्वरस्थितो, या च भक्तिरिव मामुपेयुषी।
तौ परस्परसमन्वितौ कदा तादृशे वपुषि रूढिमेष्यतः।।"
(तदेव 8,1)

एतत् परस्परोपकारकत्वमनुग्रहभक्त्योः।

नैतदन्योन्याश्रयत्वम्, उभयोः पारमेश्वरस्वातन्त्र्य-विलासरूपत्वात्।

भक्ष्याभक्ष्यादि नियमाः — मक्ष्याभक्ष्यादि विषये ये विधिनिषेधात्मका नियमास्ते साधारणजनताविषय एव न ते उत्कृष्टतरशाक्तशाम्भवादियोगिनां कृते ऽवश्यपालनीयत्वेन स्थिताः, यद्यपि ते लोकसंग्रहार्थं प्रायः पालयन्त्येव तान्। यथा—

"एवं विधे यागादौ योगान्ते च पञ्चके प्रत्येकं बहुप्रकारं निरूढिः यथा यथा भवति, तथैवाचरेत्। न तु भक्ष्याभक्ष्यशुद्ध्यशुद्ध्यादिविवेचनया वस्तुधर्मोज्झितया कल्पनामात्रसारया स्वात्मा खेदनीय इत्युक्तं श्रीपूर्वादौ।"

(तं० सा०, पृ०,31)

भगवती : — कौलगुरोः शम्भुनाथस्य दूती। यथा—

"जयताज्जगदुद्धतिक्षमोऽसौ, भगवत्या सह शम्भुनाथ एकः
यदुदीरितशासनांशुभिर्मे, प्रकटोऽयं गहनोऽपि शास्त्रमार्गः।।"

(तं. आ. १,१३)

"भगवत्याख्याऽस्य दूती।"

(तं० आ० वि०, खं०1, पृ०,32)

भगवद्गुणाः — परमेश्वरोचितानि सामर्थ्यानि। यथा—

"अत्र च सर्वज्ञता, तृप्तिः, अनादिबोधः, स्वतन्त्रता, अविलुप्तशक्तिः, अनन्तशक्तिः, इति भगवद्गुणाः।"

(स्व० तं० उ०, प०1, पृ०,53)

भगवान्— सृष्टि-स्थिति-संहार-विलयाअनुग्रहाख्य-कृत्यपञ्चकक्रीडनपरः परमेश्वरः। यथा—

"इति कृत्यपञ्चकप्रपञ्चनशक्तिसारो भगवानिति तात्पर्यार्थः।

(ई० प्र० वि० वि०, खं०3, पृ०,27)

भगिन्यः — ब्राह्मयदीनां मातृणामंशतः समुद्भूता देव्याः। यथा—

"ब्राह्माद्यंशकोत्थाभगिन्यः।"

(ने० तं० उ०, खं०1, पृ०,47)

भट्टकल्लटः — वसुगुप्तस्य शिष्यः स्पन्दकारिकायाः स्पन्दवृत्तेश्च निर्माता। यथा—

"व्याकरोत् त्रिकमेतेभ्यः स्पन्दसूत्रैः स्वकैस्तथा।
तत्त्वार्थचिन्तामण्याख्य-व्याख्यया खण्डमन्तिमम्।।"

(शि० सू० वा० भा०, पृ०,3)

"वन्दे विचित्रार्थपदां चित्रां तां गुरुभारतीम्।।"

(स्पं० का०,52)

"गुरोर्वसुगुप्ताभिधानस्य.....भारतीं वाचं स्तौमि।"

(स्पं० वि०, पृ०,165)

रामकण्ठीय-विवृत्यनुसारं पद्यमेतत् स्पन्दकारिकायाः। क्षेमराजस्याप्येतदेव मतं, तथोत्पल वैष्णवस्य।

कारिकाकारोऽनेन निजगुरोर्भारतीं स्तौति। असौ गुरुर्वसुगुप्तः। ततो वसुगुप्तः कारिकाकृतो गुरुर्न स्वयं कारिकानिर्माता। स च तस्य शिष्यो भट्टकल्लट इति स्पष्टम्।

प्रमाणान्तरं चापि तत्र। यथा—

"अयमत्र किलाम्नायः सिद्धमुखेनागतं रहस्यं यत्।
तद् भट्टकल्लटेन्दुर्वसुगुप्तगुरोरवाप्य शिष्याणाम्।।
अवबोधार्थमनुष्टुप्पञ्चाशिकयाऽत्र सङ्ग्रहं कृतवान्।
यदपि तदर्थो व्याख्याज्योत्स्ना-प्रकटीकृतोऽस्ति तेनेषत्।।"

(स्पं० प्र०, पृ०,1)

"वसुगुप्तादवाप्येदं गुरोस्तत्त्वार्थदर्शिनः।
रहस्यं श्लोकयामास सम्यक् श्रीभट्टकल्लटः।।"

(तदेव,पृ०,54)

~ कौलमार्गोपासकः — **कौलसाधनोचितदूतीमाहात्म्यविषये भट्टकल्लटवाक्यमुद्धृतं तन्त्रालोके। एतेन ज्ञायते यद् भट्टकल्लटोऽपि कौलमार्गगुरुरिति। यथा—**

"स्वशरीराधिकसद्भावभावितामिति ततः प्राह।।
श्रीमत्कल्लटनाथः प्रोक्तसमस्तार्थलब्धये वाक्यम्।"

(तं० आ०29,123-124)

"सता भावेन भावितां संस्कृतां शक्तिं गुरुः कुर्यादिति वाक्यं प्राहेति।"

(तं० आ० वि०, खं०11/2, पृ०,88)

~ तद्गुरवः — **दत्तात्रेयवद् बहुभ्यस्तेन बहुतरं शिक्षितमिति गुरुबहुत्वं तेन स्वस्य स्वयं कथितम्। यथा—**

"आ तपनान्मोटकान्तं यस्य मे गुरुसंततिः।
तस्य मे सर्वशिष्यस्य नोपदेशदरिद्रता।।"

(स्पं० वृ०, पृ०,40)

तपनः = सूर्यः, वसुगुप्तं प्रति निर्देशोऽयं स्यात् कदाचित् मोटकश्च मशकः। बृहत्तमाल्लघुतमं यावदिति तात्पर्यम्।

~ मुख्यस्तेषु — **स च वसुगुप्ताभिधानः सिद्धः। यथा—**

"निजगुरुसरस्वतीवनद्वारेणाह-
अगाधसंशयाम्भोधिसमुत्तरणतारिणीम्।
वन्दे विचित्रार्थपदां चित्रां तां गुरुभारतीम्।
..... 'गुरुभारतीं वन्दे' गुरोः
वसुगुप्ताभिधानस्य.....भारतीं.....।"

(स्पं० वि०, पृ०,165)

~ तद्ग्रन्थाः — **(क) (1) प्रसिद्धाः स्पन्दकारिका (2) स्पन्दसर्वस्वापरनाम्नी स्पन्दवृत्तिः (3) मधुवाहिनी (4) तत्त्वार्थाचिन्तामणिः। स्वयं च यत् तेन स्पन्दवृत्तावुक्तम् यथा : —**

दृब्धं महादेवगिरौ महेशस्वप्नोपदिष्टात् शिवसूत्रसिन्धोः।
स्पन्दामृतं यद् वसुगुप्तपादैः श्रीकल्लटस्तत् प्रकटीचकार।। इति

(स्पं० वृ०, पृ०,40)

एतेन तदनन्तरभाविनः आचार्यास्स्पन्दामृतं दृब्धमिति पदसन्दर्भेण स्पन्दकारिकाख्यो ग्रन्थो लिखित इत्यवगच्छन्तो वसुगुप्तमेव स्पन्दकारिकाकारं मन्यन्ते स्म। न च सुचिरं

केनाप्यत्र विषये कापि विचिकित्सा समुत्थापिता। ततो रामकण्ठकृतममुं निर्देशं प्रति नैव सावधानं विचारः कृतोऽभिनवगुप्तपादैरपि येन निर्देशेनासौ वसुगुप्तं स्पन्दनिर्मातुर्गुरुं कथितवान्, न पुनस्तन्निर्मातारम्। रामकण्ठस्य नवमशताब्दी-मध्य एव विद्यमानत्वेन तन्निर्देशस्य प्रामाण्यं स्वीकार्यं सर्वैः। क्षेमराजस्य काले पारस्परिकस्पर्धावशादेषा विचिकित्सा समस्यात्मकतामुपयाता। नाभिनवगुप्तमहोदयानां काले। तत एव तथाविधैर्विद्वद्भिरस्य प्रश्नस्य विषये नैव दत्तमवधानम्। परमद्यत्वे समुपलभ्यमानान् रामकण्ठ- भट्टभास्करोत्पलवैष्णव-सदृशानां विदुषां गुरूणां सुविश्वस्तान् विश्वासार्हांश्च निर्देशाननुसृत्य स्पन्दकारिकायाः कर्तृत्वेनास्माभिर्भट्टकल्लट एव स्वीकार्यः। वसुगुप्तेन केवलं स्पन्दतत्त्वरहस्यमेव दृब्धं, प्रदत्तं च भट्टकल्लटादिभ्यः। तेन स्पन्दसिद्धान्तस्य सम्यगुपदेष्टृत्वं वसुगुप्तस्यैव। ततः प्राग् भगवता दुर्वाससा परशम्भुमहिम्नस्तवे स्पन्दसिद्धान्तं प्रति द्विवारं निर्देशमात्रमेव कृतम्। अस्य सिद्धान्तस्य दार्शनिकं स्पष्टीकरणं वसुगुप्तेनैव कृतम् स्पन्दात्मिकायाः चितः स्फुरत्तायाः साक्षात्कारकारिका योगप्रक्रियापि तेनैव सम्यक् प्रशिक्षणोपायेन प्रदत्ता भट्टकल्लटादिभ्यः। भट्टभास्करीयं यन्मतमत्र तदविच्छिन्नगुरु-परम्परातः प्राप्तं सदतीव प्रमाणम्, न पुनः क्षेमराजीयम्। यतस्तस्य लोकपरम्परामात्रमाधारः। तस्या परम्परायाः प्रमाणता रामकण्ठस्य भट्टभास्करस्य च निर्देशैर्बाधिता भवति। तत्त्वार्थचिन्तामणेरुल्लेखो बहुषु ग्रन्थेषु लभ्यते। मधुवाहिन्या उल्लेखः केवलमीश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यामेव कृतो वर्तते। कदाचित्स्पन्दकारिकाया एव नामान्तरं स्यान्मधुवाहिनीति।

द्र०: - 'तत्त्वार्थचिन्तामणिः' इति।

~ तद्वाक्यानि— भट्टकल्लटस्य कानिचिद् वाक्यानि समुद्धृतानि कैश्चनार्वाचीनैर्ग्रन्थकृद्भिः। तानि वाक्यानि नैव कारिकासु न चापि तद्वृत्तौ क्वापि लभ्यन्ते। तेन ग्रन्थान्तररचनापि तेन कृतेति सिद्ध्यति। उत्पलवैष्णवेन भट्टकल्लटकृतस्य तत्त्वविचाराख्यस्य स्वस्वभावसम्बोधनस्य च ग्रन्थस्योल्लेखः कृतो वर्तते। तौ तु ग्रन्थौ नेदानीं क्वापि लभ्येते। यथा —

"ग्रन्थकृताऽप्युक्तं तत्त्वविचारे—
शक्तिप्रसरसङ्कोचनिबद्धावुदयव्ययौ।
यस्यात्मा स शिवो ज्ञेयः सर्वभावप्रवर्तकः।। इति"
(स्पं० प्र०, पृ०,9)

"ग्रन्थकर्त्तुश्च स्वस्वभावसम्बोधने—
बन्धनं बन्धकृद् बध्यस्त्रिष्वप्येको न भिद्यते।
स्वविकल्पकृतैर्बन्धैर्बध्यते त्वनिशं जगत्।।"
(स्पं० प्र०, पृ०,7-8)

अन्यान्युद्धृतानि तस्य वाक्यानि यथा—

(क) "तथा सामानाधिकरण्यमेव व्याख्यातं भट्टश्रील्लटपादैः—
चैतन्यमात्मनो रूपम् .....। इति
(ई० प्र० वि० वि०, खं०2, पृ०,183)

(ख) "यन्नाम श्रीमत्कल्लटपादैः
देहनीलादीनां सर्वशरीरग्रहणम्।
इत्याद्युक्त्या शरीरत्वाविशेषेऽपि देह एव तथात्वनिबन्धनं
'प्राणाख्यनिमित्तदार्ढ्यम्।'
इत्याद्युक्त्या प्राणदार्ढ्यं निमित्तमुक्तं, तदनया समनन्तरोक्त्याः—
'प्राक्संवित्प्राणे परिणता।'
इत्यादिसूत्रितया सर्वाधिष्ठेयपूर्वत्वादिलक्षणया युक्त्या न्याय्यम्।"
(तं० आ० वि०, खं०11, पृ०,138)

(ग) "यदभिप्रायेणैव भट्टश्रीकल्लटादयोऽप्येवमूचुः, इत्याह-तेनाहुःकिल 'संवित्प्राक्प्राणे परिणता' तथा।
अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः।।"
(तं० आ०6,12)

आचार्याभिनवगुप्तादिभिस्तत्त्वार्थचिन्तामणेः सूत्राणि व्याख्याश्च भट्टकल्लटकृताः न पृथक्पृथग् निर्दिष्टाः क्वापि। अपि तु प्राय उभयमेकीकृत्य तत्त्वार्थ-चिन्तामणाविति निर्दिष्टं सामान्येन तत्र तत्र। यथा—

(घ) "यदाहुः श्रीकल्लटपादाः
तुटिपाते सर्वज्ञत्वसर्वकर्तृत्वलाभः। इति।"
(प० त्री०, पृ०,103)

(ङ) "रूपादिषु परिणामात् तत्सिद्धिः।'
इति भट्टश्रीकल्लटोक्तनीत्या।"
(प० सा० विवृ०, पृ०91)

~ विनष्टाः ग्रन्थाः — (1) तत्त्वविचारः, (2) स्वस्वभाव-सम्बोधनम्, (3) मधुवाहिनी, (4) तत्त्वार्थचिन्तामणिः। इति।

भट्टचन्द्रानन्दः — कोऽप्यज्ञातविशेषो ग्रन्थकारो यन्मतमुद्धृतं विवृतिविमर्शिन्याम्। यथा —

"अत एवोक्तं भट्टचन्द्रानन्देन—
पश्यतो रूपमालेखाद् भातो भानानुषङ्गि यत्।
स्वरूपभानं प्रतिभा भावनां .....।।"
(ई० प्र० वि० वि०, खं०2, पृ०,200)

भट्टदिवाकरवत्सः — द्र०:- 'दिवाकरवत्स (भट्टः)' इति।

भट्टधनेश्वरशर्मा— कोऽपि परात्रीशिकाव्याख्याता गुरुः। यथा—

"रोमाञ्चस्तोमोत्पतनवाष्पकम्पस्तम्भाद्यनुगृहीतदेहोऽभ्यासं कुर्यादिति भट्टधनेश्वरशर्मा।"
(प० त्री० वि०, पृ०,274)

भट्टनाथः — श्रीशम्भुनाथः। यथा —

"श्रीभट्टनाथचरणाब्जयुगात्तथा श्री-
भट्टारिकांघ्रियुगलाद् गुरुसन्ततिर्या।"
(तं० आ०1,16)

"श्रीभट्टनाथ इति श्रीशम्भुनाथः। श्रीभट्टारिका इति भगवत्याख्या अस्य दूती। यदुक्तमनेनैव—

भट्टं भट्टारिकानाथं श्रीकण्ठं दृष्टभैरवम्।
भूतिकलाश्रिया युक्तं नृसिंहवीरमुत्कटम्।।
नानाभिधानमाद्यन्तं वन्दे शम्भुं महागुरुम्।"

(उद्धः— (तं० आ० वि०, खं०10, पृ०,34)

भट्टनायकः — झल्लकीकरवामनाचार्येणोद्घोषितं यद् भट्टनायकः सांख्यमतानुयायी परमाचार्याभिनवगुप्तस्तं "मीमांसकाग्रणीः" इत्युक्तवान्। यथा—

"यदाह मीमांसकाग्रणीर्भट्टनायकः—

महान्ति पातकान्याहुर्यदाज्ञावशतः सुराः।
पावनानि नमस्तस्मै स्वच्छन्दाय हराय ते।।"

उद्धः- (ई० प्र० वि० वि०, खं०3, पृ०,96)

वस्तुतः सर्वेऽपि प्रसिद्धाः शैवदर्शनाचार्या मीमांसाशास्त्रे निष्णाता आसन्। तथाविध एव शैवो भट्टनायकः। तत्कृतात् स्तोत्रविशेषात् पद्यमेकमुद्धृतं क्षेमराजेन यदनुसारमस्य शैवत्वमेव सिद्ध्यति। यथा—

"यदुक्तं भट्टनायकस्तोत्रे—

नपुंसकं महादेव परं ब्रह्म फलेत् कियत्।
तत् पौरुषनियोक्त्री चेन्न स्यात् त्वच्छक्तिसुन्दरी।।" इति

(स्पं० नि०, पृ०,18)

भट्टनारायणः — स्तवचिन्तामणिनिर्माता प्राचीनः शैवदर्शनगुरुः। स च विशेषतया प्रशंसया विभूषित आचार्याभिनवगुप्तैः। यथा—

"तत एव संवित्सारमीमांसकेन भट्टनारायणेन स्तुतम्।"

(ई० प्र० वि० वि०, खं०2, पृ०,197)

अस्य स्तवचिन्तामणौ क्षेमराजकृता टीका विद्यते। यथा—

"स्तवचिन्तामणिं भूरिमनोरथफलप्रदम्।
भक्तिलक्ष्म्यालयं शंभोर्भट्टनारायणो व्यधात्।।"

(स्त० चिं०, 120)

"यदाह भट्टनारायणः—

नमस्ते भवसम्भ्रान्त.....।। इत्यादि"

(ई० प्र० वि०, खं०1, पृ०,51)

~ तत्सम्बन्धिनः — "स्तोत्रकारस्य पितामहः परमेश्वराख्यः, अपराजितः पिता, श्रीदयाख्या माता, शंकराभिधानो ज्येष्ठो भ्राता अभवत्।"

(स्त० चि० वि०, पृ०,10)

~ पूर्वगुरुः — **भट्टनारायणो हि तावदभिनवगुप्तपादैः पूर्वगुरुरिति निर्दिष्टः। तेनैतदनुमीयते यत्तस्य कालः सुतरां प्राक्तनो भट्टकल्लटयुगीन इति। रामकण्ठकृतायाः स्तवचिन्तामणेष्टीकायाः क्षेमराजकृतेनोल्लेखेनाप्येतदेव सिद्ध्यति, यद्रामकण्ठात् प्राक्तनोऽयं गुरुरिति। यथा—**

"यदाह पूर्वगुरुरिति :—

निरुपादानसम्भारमपभित्तावेव तन्वते।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने।।"

(ई० प्र० वि०, खं०2, पृ०,153)

"तेनार्थिप्रणयाद्दिनैस्त्रिचतुरैर्या क्षेमराजो व्यधात्।
क्षेत्रे श्रीविजयेश्वरस्य विमले सैषा शिवाराधनी।।"

(स्त० चिं० टी०, पृ०,130)

"श्रीरामेण कृतात्र सद्विवृतिरित्येषा किमर्थेति मा।
सन्तश्चेतसि कृध्वमस्ति विवृतौ कोऽपि प्रकर्षो महान्।"

(स्त० चिं० टी०, पृ०,130)

भट्टप्रद्युम्नः — (1) भट्टकल्लटस्य मातुलेयः शिष्यश्च। स च तत्त्वगर्भस्तोत्रस्य निर्माता। परमेश्वरस्य शाक्तं स्वरूपं प्रतिविशेषभक्तिमानप्ययं त्रिकात्मशैवाचारानुसारी शैवानां स्वयूथ्य एव न परयूथ्यः। यथा—

"एवं रहस्यमय्येष (भट्टकल्लटः) मातुलेयाय चावदत् श्रीमत्प्रद्युम्नभट्टाय.....।।"

(शि० सू० वा० भा०1,6)

"स्वयूथ्यानद्वयवादिनः प्रतीदानीमारम्भः। तथा च तैरुक्तम्—

यस्या निरुपधिज्योतीरूपायाः शिवसंज्ञया।
व्यपदेशः परां तां त्वामम्बां नित्यमुपास्महे।।"

(शि० दृ० वृ०, पृ०,94)

"यैः शक्तिवादिभिः—

यस्या निरुपधिज्योतीरूपायाः शिवसंज्ञया।
व्यपदेशः .....।।"

(तदेव,पृ०,101)

"यदाहुः—

..... यावन्नोन्मेषभागणुः।
न तावदर्थे वर्तेत स चोन्मेषः क्रिया मता।।
क्रिया च नानारूपैव .....।"

इत्युक्त्वा—

"स्वस्वभावस्थितिं मुक्त्वा तस्मान्नान्यास्ति सा दशा।
शिवे यस्या न वाग्रूपं सूक्ष्ममप्राप्तसंनिधि।।"

(तदेव,पृ०101-102)

(2) सोमानन्दात् प्राक्तनः समकालीनो वा आचार्यः। यतः शिवदृष्टौ तन्मतं प्रति सङ्केतो लभ्यते। यथा—

"किञ्चिदुच्छूनता सैव महद्भिः कैश्चिदुच्यते।"

(शि० दृ०1,16)

"यदेतदौन्मुख्यं सैव किञ्चिदुच्छूनता कथ्यते भट्टप्रद्युम्नेन तत्त्वगर्भे।"

(शि० दृ० वृ०, पृ०,16)

(3) सबहुमानमस्य नामोल्लेखः कृतोऽस्ति विवृत्तिविमर्शिन्याम्—

यथा —

"श्रीमद् भट्टप्रद्युम्नपादैः संविच्छक्तिप्रसरमात्रतां षट्त्रिंशत्तत्त्व्यामुपपाद्य ....."

(ई० प्र० वि० वि०, खं०2, पृ०,337)

~ तत्कालः — भट्टकल्लटस्य समकालिक एवायमासीदिति प्रतिभाति, सोमानन्दोत्पलदेवाभ्यां यतस्तस्योल्लेखः कृतः। तावुभौराज्ञोऽवन्तिवर्मणः कालेऽभूताम् उत्पलदेवस्य शिष्यो राजानकरामकण्ठो गीताभाष्ये मुक्ताकणं निजाग्रजं कथितवान्। मुक्ताकणश्च राजतरङ्गिण्यनुसारमवन्तिवर्मणः सभाकविरासीत्। ततो भट्टकल्लटादारभ्य रामकण्ठं यावत् सर्वेऽपि शैवदर्शनग्रन्थकाराः परस्परं यथायथं ज्यायांसः कनीयांसश्च प्रायश समकालिकाः एव। भट्टकल्लटस्तेषु ज्येष्ठो रामकण्ठश्च कनिष्ठः। तदुभयमध्ये भट्टप्रद्युम्नसोमानन्दोत्पलदेवपादाः।

द्र०—'तत्त्वगर्भस्तोत्रम्' इति।

"पश्यन्ती विचारानन्तरं स्वयूथ्यानद्वयवादिनः प्रतीदानीमारम्भः।"

(शि० दृ० वृ०, पृ०,94)

भट्टभास्करः — वसुगुप्तस्याविच्छिन्नशिष्यपरम्परायां तस्मात् सप्तमोऽयं स्पन्दशास्त्रगुरुः। अयमात्मानं दैवाकरिरिति निर्दिशति। ततो भट्टदिवाकरवत्सोऽयं भवेदिति विचारयन्ति केचित् परं भट्टदिवाकरवत्सोऽतीव पुरातनः। रामकण्ठेन तस्य कक्ष्यास्तोत्रस्थं "जाते देहप्रत्ययद्वीपभङ्गे" इत्यादिरूपं पद्यमेकमुद्धृतं स्पन्दविवृतौ (पृ०, 40)। ततो नवमशताब्धिमध्ये एवाभूद् भट्टदिवाकरवत्सः। अयं। पुनर्भास्करः वसुगुप्तात् सप्तमः सन् दशमशतकस्यान्ते सम्भाव्यते। आसीदभिनवगुप्तस्य कश्चन भास्काराख्यो गुरुः। अयमेवासौ सम्भाव्यते भट्टभास्करः।

शिवसूत्रस्य व्याख्यानं तावद् द्विपक्षकम्। एकं भास्करीयमपरं च क्षेमराजीयम्। भास्करस्य वसुगुप्तपरम्परायामेवाविर्भूतत्वेन तस्यैव मतं प्रमाणं न क्षेमराजस्य। तस्य स्वकल्पितार्थ बोधकतयाऽभिनव-प्रकारकव्याख्याकरणहेवाकित्वात्।

दीर्घदीर्घतरजीविनां सिद्धयोगिनां कृते पुनः किमपि सम्भावयितुं शक्यते। ततो नैव सप्रमाणं प्रतिपादयितुं शक्यमत्र किञ्चित्। यथा—

"श्रीमन्महादेवगिरौ वसुगुप्तगुरोः पुरा।
सिद्धादेशात्प्रादुरासन् शिवसूत्राणि तस्य हि।।
सरहस्यान्यतः सोऽपि प्रादाद्भट्टाय सूरये।
श्रीकल्लटाय .....।।
एव रहस्यमप्येष मातुलेयाय चावदत्।
श्रीमत्प्रद्युम्नभट्टाय सोऽपि स्वतनयाय च।।
श्रीमत्प्रज्ञार्जुनाख्याय प्रादात्सोऽप्येवमावदत्।
श्रीमहादेवभट्टाय स्वशिष्यायाप्यसौ पुनः।।
श्रीमच्छ्रीकण्ठभट्टाय प्रददौ स्वसुताय च।
तस्मात्प्राप्य करोम्येष सूत्रवार्तिकमादरात्।।
दैवाकरिर्भास्करोऽहमन्तेवासिगणेरितः।"

(शि० सू० वा० भा०1, पृ०2-3)

भट्टरम्यदेवः — द्र०—'रम्यदेवः (भट्ट)' इति

भट्टवामदेवः — योगेश्वराचार्यशिष्यो जन्ममरणविचाराख्यस्य ग्रन्थस्य कर्त्ता।

भट्टलोल्लटः — नाट्यशास्त्रव्याख्याता भट्टलोल्लटोऽपि शैवशास्त्राभ्यास्यभूत्। तत्कृतस्य स्पन्दकारिकाव्याख्यानस्योल्लेखो लभ्यते यतः। मीमांसाशास्त्रे तु सर्वेऽपि विद्वांसोऽभ्यासं कृतवन्तः पुरातनेषु युगेषु। यथा—

"भट्टलोल्लटेनापि तदाद्यन्त इत्येवमेव व्याख्यायि स्ववृत्तौ।"

(स्पं० नि०, पृ०,34)

द्र०:- (मा० वि० वा०१,७७८)

भट्टशङ्करनन्दनः — (1) विशेषतया प्रशस्तः कोऽप्याचार्यो यन्मतमुद्धृतं विवृतिविमर्शिन्याम्। यथा—

"प्राक्तनकुशलविपाकप्रवर्तितसंवित्परामर्शाभ्यासतपः-प्रभावप्रतिलब्धोन्मेषेण भट्टशङ्करनन्दनेनापि :—

"साक्षात्कारः स्वतः सिद्धाः सा स्फुरद्रूपतास्य हि।
इति निरूपितम्।"

(ई० प्र० वि० वि०, खं०2, पृ०,199)

प्रज्ञालङ्काराख्यस्य ग्रन्थस्य निर्माता।

द्र०:— 'प्रज्ञालङ्कार'. इति।

द्र०:— 'शङ्करनन्दनः' इति च।

(2) कोऽपि दर्शनशास्त्राचार्यः। यथा—

"तेन यदाह भट्टशङ्करनन्दनः —'अनुभवायन्ते विकल्पाः' इति धर्मोत्तरं दूषयितुं—

सिद्धं सिद्धतया वस्तु निरूप्यं न तथा ततः।"

(ई० प्र० वि० वि०, खं०2, पृ०,16)

भट्टश्रीभूतिराजः — अभिनवगुप्तस्य तत्पितुर्नरसिंहगुप्तस्य च गुरुः, भट्टेन्दुराजस्य भट्टहेलाराजस्य च पिता। श्रीनाथमठिकाया अधीशः। तेन किमपि शास्त्रमपि लिखितमभूद्यस्य पंक्तिर्महार्थमञ्जरीपरिमले समुद्धृता लभ्यते। यथा—

"भट्टश्रीभूतिराजेनाप्युक्तम्–'सर्वत्र क्रोडीकारेण स्थितत्वाद् देव्येव मन्त्रः' इति।"

(म० मं० प०, पृ०,122)

द्र०:— 'भूतिराजः' इति।

भट्टानन्दः — विज्ञानभैरवस्य प्राक्तनः टीकाकारो येन विज्ञानकौमुदी नाम टीका लिखिता। स च 1798 ई० वत्सरे विज्ञानकौमुदीं निर्मितवान्। तदुक्तं तेन पुष्पिकायाम्— यथा —

"वेदसप्तर्षिवेदान्त्ययुगाब्दमधुपक्षतौ।
विज्ञानकौमुदीमेतां भट्टानन्दो व्यकासयत्।।"

(वि० को०, पृ०,63)

अत्र दत्तः 4774 कलियुगवत्सरः 1798 ई० वर्षो भवति।

द्र०:— 'विज्ञानकौमुदी' इति।

भट्टारकश्रीश्रीकण्ठपादाः — भगवान् श्रीकण्ठनाथ एव श्रीकण्ठीसंहितोपदेष्टा। संहितात उद्धृताः पंक्तयः तत्र तत्र ग्रन्थेषु द्रष्टव्याः। यथा—

"भट्टारकश्रीश्रीकण्ठपादाः—

'मनोऽप्यन्यत्र निक्षिप्तं चक्षुरन्यत्र पातितम्।' इति।"
(प० त्री० वि०, पृ०,195)

भट्टारिकाः — भट्टनाथ इति नाम्नापि ख्यातस्य जालन्धरपीठवास्तव्यस्य श्रीशम्भुनाथस्य दूती खलु श्रीभट्टारिका। भगवतीति नाम्ना प्रसिद्धासावादरार्थं भट्टारिकाप्युच्यते स्म।

द्र०:— 'भट्टनाथः' इति

भट्टेन्दुराजः — (1) श्रीमन्महामाहेश्वराचार्यस्य श्रीभूतिराजस्य सुपुत्रः। अभिनवगुप्तस्य भगवद्गीताध्यापकः। यथा—

"भट्टेन्दुराजादाम्नाय विविच्य च चिरं धिया।
कृतोऽभिनवगुप्तेन सोऽयं गीतार्थसंग्रहः।।"
(गी० सं०, पृ०,2)

"श्रीमान् कात्यायनोऽभूद्वररुचिसदृशः प्रस्फुरद्-बोधतृप्तस्तद्वंशालङ्कृतो यः स्थिरमतिरभवत्सौशुकाख्योऽतिविद्वान्। विप्रः श्रीभूतिराजस्तदनु समभवत्तस्य सूनुर्महात्मा।
येनामी सर्वलोकास्तमसि निपतिताः प्रोद्धृता भानुनेव।।1।।
तच्चरणकमलमधुपो भगवद्गीतार्थसंग्रहं व्यदधात्।
अभिनवगुप्तः स द्विजलोटककृतचोदनावशतः।।2।।"
(तदेव, पृ०,186)

(2) अभूच्च स एव श्रीनाथसन्ततेर्गुरुरभिनवगुप्तस्य काले यथा—

"श्रीनाथसन्तति महाम्बरधर्मकान्तिः
श्रीभूतिराजतनयः स्वपितृप्रसादः।।"
(तं० आ०37,60)

भद्रकाली ~ कालीनये— **(1) रुद्रकालीत्यपरनामधेया सप्तमी काली।**

द्र० 'रुद्रकाली' इति।

~ क्रमसद्भावे— उभयतो मुखस्पन्दात्मकस्वभावं स्वात्मसात्कुर्वती संवित् कला यस्यां शक्तौ लीयते सा क्रमसद्भावे रुद्रकालीति कथिता प्रतिभाति। यथा—

"इदं सर्वमसर्वं यत्संहारान्तं तु नित्यशः।
कुटिलेक्षणरेखान्तग्रस्तमस्तमितं च यत्।।
ततो बोधरसाविष्टा स्पन्दमाना निराकुला।
दीधितीनां सहस्रं यद्वमेच्च पिबते भृशम्।।
सा कला लीयते यस्यां रुद्रकालीति सा स्मृता।"
(तं० आ० वि०, खं०3, पृ०,173)

~ क्रमस्तोत्रादौ— "विश्वं महाकल्पविरामकल्प-
भवान्तभीमभ्रुकुटिभ्रमन्त्या।
याश्नात्यनन्तप्रभवार्चिषा तां
ना मामि भद्रां शुभभद्रकालीम्।।"

उद्धः:— (तं० आ० वि०, खं०3, पृ०,173)

"इमां रुन्धे भूमिं भवभयभिदातङ्ककरणी—
मिमां बोधैकान्तद्रुतिरसमयीं चापि विदधे।
तदित्थं सम्बोधद्रुतिमथ विलुप्याशुभतती-
र्यथेष्टं चाचारं भजति लसतात् सा मम हृदि।।"
(अभिनवगुप्तीये क्रमस्तोत्रे,22)

~ चिद्गगनचन्द्रिकायाम्— "शाश्वतप्रसरया चिदर्चिषा
दीपिताखिलहृषीकमार्गया।
अर्थपञ्चकमिदं तमो **(त्वया)** जगद्
भद्रमम्ब गमितं तवान्तरम्।
(चि० ग० चं०,236)

~ तन्त्रालोकादौ— **प्रमाणे स्वात्मसात्कृतेऽपि या संविच्छक्तिस्तत्संस्काररूपेण रोधयति तथा रुद्धमपि च पुनर्द्रावयति सा रोधनद्रावणकलनात्मिका संविच्छक्तिः रुद्रकाली। प्रमाणगतसंहारकलनात्मिकेयं काली सप्तमी। यथा—**

(क) "तत उपसंहर्तृस्वभावकलने कस्यचिद्भावस्य वासनात्मना अवस्थितिं कस्यचित् तु संविन्मात्रावशेषतां कलयति।"
(तं० सा०, पृ०,29-30)

अत्र स्पष्टीकरणमपि देयं यदग्रे गुम्फितमस्ति।
(तं० आ० वि०, खं०3, पृ०,168)

(ख) "प्रमाणगतं स्थितिस्वरूपमभिधाय संहारस्वरूपमप्याह।"
तं०आ० वि०, खं०३, पृ०, 168

(ग) "विलापितेऽपि भावौघे कंचिद्भावं तदैव सा।
आश्यानयेद्य एवास्ते शङ्कासंस्काररूपकः।।
शुभाशुभतया सोऽयं सोष्यते फलसंपदम्।
पूर्वं हि भोगात्पश्चाद्वा शङ्केयं व्यवतिष्ठते।।
अन्यदाश्यानितमपि तदेव द्रावयेदियम्।
प्रायश्चित्तादिकर्मभ्यो ब्रह्महत्यादिकर्मवत्।।
रोधनाद्द्रावणाद्रूपमित्थं कलयते चितिः।
तदपि द्रावयेदेव तदप्याश्यानयेदथ।।"
(तं० आ०4,155-158)

(घ) "एवं संस्कारात्मनावस्थितस्यापि अर्थस्य रोधनाद् द्रावणाच्चेयं परा संविदुक्तेन प्रकारेण रूपं कलयन्ती श्रीक्रमसद्भावभट्टारके 'रुद्रकालीति' व्यपदिष्टेत्यर्थः।"
(तं० आ० वि०, खं०3, पृ०,172)

वासनात्मतया स्थापनं रोधनम्, संविच्छेषातापादनं च द्रावणम् ततो रुद्रनाम्नीतिः संविद्रूपतापादनमस्या माङ्गलिकत्वेन भद्रत्वमिति च विमृश्यं सुधीभिः।

~ देशाध्वधारणायाम्— **शतरुद्रोर्ध्वतो यस्य भुवनं सा देवी। तस्या भुवनं जयाख्यम्। निर्बीजदीक्षया मोक्षदायिनी देवी। यथा—**

"शतरुद्रोर्ध्वतो भद्रकाल्या नीलप्रभं जयम्।"
(तं० आ०8,193)

"निर्बीजदीक्षया मोक्षं ददाति परमेश्वरी।"
(तदेव,195)

~ पञ्चशतिके— **विज्ञानामृतात्मिकेयं संविच्छक्तिर्मायामल-रहितत्वेन सर्वलोककल्याणकारिणी सती भद्रकालीति कथ्यते। रुद्रसुखप्रदत्वेनेयं रुद्रकालीति, भेदस्य द्रावणाच्चेयं भद्रा,**

भद्रसिद्धिप्रदत्वाच्चापि भद्रकालीति कथिता पञ्चशतिके। यथा—

"गमागमसुगम्यस्था महाबोधावलोकिनी।
मायामलविनिर्मुक्ता विज्ञानामृतनन्दिनी।।
सर्वलोकस्य कल्याणी रुद्रा रुद्रसुखप्रदा।
यत्रैव शाम्यति कला रुद्रकालीति सा स्मृता।।
भेदस्य द्रावणाद्भद्रा भद्रसिद्धिकरीति या।"

(तं० आ० वि०, खं०3, पृ०,173)

भद्रम्— (1) द्रवद्रव्यपानोपयिका दक्षहस्तस्य विशेषा मुद्रा, चुलुककल्पा। यथा—

"दक्षहस्तेन भद्रं स्यात् .....।"

(तं० आ०28,94)

(2) पात्राकारीकृतो दक्षहस्तो भद्रम्। यथा—

"दक्षहस्तेन पात्राकारं भद्रम्।"

(तं० सा०, पृ०,185)

भरणतन्त्रम्— क्रियाप्रधानं किमप्यागमशास्त्रं यन्मतमुल्लिखितं तन्त्रालोके। यथा—

"श्रीमद्भरणतन्त्रे च तच्छिवेन निरूपितम्।"

(तं० आ०25,14)

भर्गशिखा— स्वच्छन्दनाथस्योर्ध्वमुखादपि यत् सर्वथाऽदृश्यमुत्तरादप्युत्तरं मुखं तस्मात् तावत् षडागमा विनिःसृताः। ते च सौरभर्गशिखाद्याः पराद्वैतदृष्टिप्रधाना उत्कृष्टोत्कृष्टतरा आगमाः। तेषामेव मध्यात् त्रयो मालिन्याद्या आगमाः पृथग् गण्यन्ते। अत एवैषां षडर्धेति तावदन्वर्था संज्ञेति। यथा—

"प्रकृतं ब्रूमहे देवीविसृष्टाश्चित्रसंविदः।
यावत्तावत्तदूर्ध्वोर्ध्वं स्रोतो यद्भेदवर्जितम्।।
सौरभर्गशिखादीनि ततः शास्त्राणि तेनिरे।
उक्तं भर्गशिखायां च देवेन परमेष्ठिना।।
उर्ध्वस्रोतोद्भवं ज्ञानमिदं तत्परमं प्रिये।
परमध्वनिनोर्ध्वोर्ध्वं संविद्रूपाभिधायिना।।
ईशानवक्त्रनिर्यातात्सिद्धान्ताद्भेदमादिशत्।
अत्रापि पूर्वभेदांशव्यामिश्रीभावचित्रिताः।।
.....
.....
इह यावत्तु मुख्येयं षडात्मा शास्त्रसन्ततिः।।
एतत्पूर्वार्धभागीनि त्रिकशास्त्राणि यानि तु।
षडर्धसंज्ञया तानि गुरुभिर्भाषितान्यलम्।।"

(मा० वि० वा०1,160-165)

ततो भर्गशिखागमोऽत्युत्कृष्टे आगमषट्के परिगण्यते। अस्य वाक्यनि बहुवारं शैवशास्त्रेषूद्धृतानि। द्रष्टव्यानि तत्र तत्र ग्रन्थेषु। तद्यथा—

प० त्री० वि० पृ०,235
तं० आ०2,28;4,255,12,20,15;280,
तं० आ० वि०, खं०3, पृ०,284
तं० आ० वि०, खं०7/2, पृ०,103
तं० आ० वि०, खं०9, पृ०,138,
शिव० सू० वि०, पृ०,9 शि० स्तो० वि०, पृ०,49, स्पं० सं०, पृ०,12 इति।

भर्त्ता— स्वस्यान्तर्विश्वमयानाभासान् बिभ्रद् भिन्नतया च तान् पुष्णन् बाह्यत्वेन प्रकाशयन् परमेश्वरः। यथा—

"स भर्तुरन्तराभासान् बिभ्रतो बहिः सृष्टिं च पुष्णतः ईश्वरस्यैव इच्छया .....।"

(ई० प्र० वि०, खं०1, पृ०,334)

भर्त्रीश्वराचार्यः — वचनवार्तिकानाम्नः व्याकरणशास्त्रग्रन्थस्य कर्त्ता। यथा—

"भर्त्रीश्वराचार्यस्तु वचनवार्तिके शेषषष्ठीसमासस्य न निषेध इति न्यरूपयत्।"

(ई० प्र० वि० वि०, खं०2, पृ०,6)

भवः — (1) जडः संसारो यत्र प्राणी पुनः पुनर्भवति तत्तद्देहधारित्वेन। अवरोहदृष्ट्या मायामारभ्यावीच्यन्तोऽशुद्धोऽध्वा भवो, यत्र पुनः पुनर्भूयते जनैः। यथा—

"मायादिरवीच्यन्तो भवः .....।"

(तं० आ०8,352)

आरोहदृष्ट्या पृथिव्या आरभ्य मायान्तोऽध्वा भवः इति। यथा—

"भूम्यादिसदाशिवपर्यन्तं भवाभवाति भवात्मकं विश्वम्।"

(स्प० सं० टिप्प०, पृ०,1)

(2) घटनीलादिसकलकार्याकारेण स्वेच्छानुसारं व्यक्तो भवन् परमेश्वरोऽपि तावदेवं भवतीति भव इत्युच्यते। यथा—

(क) "तस्मात् स्वयं स्वभावेन भावैर्भावी भवेद्भवः।"

(शि० दृ०4,51)

(ख) "तस्मादविरुद्धसर्वभावैकभावः स्वयं भव एव परमेश्वरस्तथावस्थानस्वभावेन नापरेण हेतुना कारणेन भावाभावैः संसारवर्त्तिभिर्भावी भवत्यभीक्ष्णं तत् स्वभावत्वात्।"

(शि० दृ० वृ०, पृ०,170)

भवदोषः — मलनामस्वेकं नाम। यथा—

"मलोऽमिलाषश्चाज्ञानमविद्या लैकिका प्रथा। भवदोषः.. .....।।"

(पू० प्र०2,446)

भवबीजम्— संसृतिमूलकारणभूतमाणवं मलमेव भवस्य पार्यन्तिकं कारणं सद् भवबीजमिति वदन्ति। तदेव मायीयस्य कार्मस्य च मलस्य बीजकल्पं वेदितव्यम्। यथा —

"मायीयकार्ममलमूलमुशन्ति तावद्
अज्ञाननाममलमाणवमेव भद्राः।
बीजं तदेव भवजीर्णतरोः परस्मिन्
संविन्निशातदहने दहते क्षणेन।।"

(प० त्री० वि०, पृ०,111)

भवभूतिः — अयं कोऽपि परात्रीशिकाशास्त्रव्याख्याकृत् पुरातनो गुरुस्तत्त्वदर्शी। यथा—

"असदेतदिति प्राहुर्गुरवस्तत्त्वदर्शिनः।
श्रीसोमानन्दकल्याणभवभूतिपुरोगमाः।।
तथाहि त्रीशिकाशास्त्रविवृत्तौ तेऽभ्यधुर्बुधाः।"
(तं० आ०13,149-150)

भस्मीकरणम्— मन्त्रबलेन पाशानां प्रशमनम्। यथा—

"भस्मीकरणं निःसंस्काराणां पाशानां शमनमस्त्रेणैव।"
(ने० तं० उ०, खं०1, पृ०,113)

भागेशमतम्— किमप्यागमिकं शास्त्रम्, समुद्धृतबहुपंक्तिकं जन्ममरणविचारे, यथा—

श्री भागेशमतेऽपि!
"विषसर्पाग्न्यपस्मार-क्षुधात्यशनबन्धनैः।
चाण्डालोदकनिर्घात-राजशासनतस्करैः।।
निदाघशीतशकटलूतोषितमहाव्रजैः।
ब्राह्मणम्लेच्छपाषण्डिनिर्मूलोड्डामरक्रमैः।
ये हताः पापकर्माणो मित्रद्रोहरताश्च ये।
स्वामिद्रोहकृतश्चान्ये ये तथात्मोपघातकाः।
गुर्विण्यो दुश्चरित्राश्च प्रसवेन हताश्च याः।।
तेषामुद्धरणोपायो नान्योऽस्ति वरवर्णिनि।
विना यागं विना होमं विना मूर्तिपरिग्रहम्।।
विना महाजालविधिप्रयोगाहतपुद्गलम्।
मृतोद्धरणसंज्ञां च दीक्षां सर्वाध्ववर्तिनीम्।।"
(ज० म० व०, पृ०,23)

भानुकाचार्यः — कालीनयस्य गुरुः। उज्जटोद्भटादिक्रमेणास्योपदेशोऽभिनवगुप्तं प्राप्तः। अयं श्रीमदनिकायाः शिष्यः। यथा —

".....श्रीभानुकाभिधानो द्वितीयः..... सममेवोपदेशं.....श्रीमदनिका श्रीकल्याणिकाभ्यः प्राप्तवन्तः। .....
.....
द्वितीयोऽप्येवमेवास्त, तस्यैव चैषा श्रीमदुज्जटोद्भटादिनानागुरुपरिपाटी सन्ततिः। यत्प्रसादासादितमहिम भिरस्माभिरेतत् प्रदर्शितम्।"

उद्धृतं क्रमकेलितः, (तं०आ०वि०,खं०3,पृ०,192-193)

केषामपि मते चक्रभानुरिति नाम्नापि प्रसिद्धोऽयम्। परं चक्रभानुरर्वाचीनः श्री भानुकाचार्यात्। द्रष्टव्यं यथा—

श्रीभूतिराजनामाप्याचार्यश्चक्रभानुशिष्यो, ऽन्यः।
(तं० आ० वि०, खं०3, पृ०,193)

नहि श्रीचक्रभानुना प्रायः कस्यचिदप्येवमुक्तम्।
(तदेव,पृ०,193)

श्रीकेयूरवतीतः प्रभृति श्रीचक्रभानुशिष्यान्तम्।
सन्ततयोऽतिनयस्ये प्रथिता इह षोडशैवेत्थम्।।
(तदेव,पृ०,195)

भानुकाचार्यस्तु, केयूरवत्याः साक्षच्छिष्यश्चक्रभानुः पुनः षोडशः।

भारतवर्षमहिमा— उक्तो यथा —

"भारते यत्कृतं कर्म क्षपितं वाप्यवीचितः।
शिवान्तं तेन मुक्तिर्वा कन्याख्ये तु विशेषतः।।
महाकालादिका रुद्रकोटिरत्रैव भारते।
गंगादिपञ्चशतिका जन्म तेनात्र दुर्लभम्।।
अन्यवर्षेषु पशुवद् भोगात् कर्मातिवाहनम्।
प्राप्यं मनोरथातीतमपि भारतजन्मनाम्।।"
(तं० आ०8, 88-90)

भावग्रहः — प्रकाशस्य विश्वात्मतास्वीकारः। यथा—

"भावग्रहस्य विश्वात्मतास्वीकारस्यादौ निर्मित्सावसरे ... .।"
(तं० आ० वि०, ख०,3, पृ०,213)

भावजातम्— षट्त्रिंशत्तत्त्वपरिणामभूतं सर्वमपि विद्यमानं जगत्।

~ आभासात्मकम्— **आदर्शे प्रतिबिम्बस्येव शिवप्रकाशे जगत आभासः। तत आभासरूपतैव जगद्भावस्थितिः। यथा—**

"यथादर्शे घटादीनां स्थितिर्मिश्रेतरात्मिका।
चिदात्मनि तथामीषां भावानां चित्ररूपिणी।।"
(तं० व० धा०,2,3)

~ चिदन्तःस्थम्— **चिद्रूपे शुद्धे पारमेश्वरे प्रकाशे सर्वमपि सदाशिवादिक्षित्यन्तं तत्त्वजातं तद्विकारभूतं च भुवनभावशरीरादिरूपं भावजातं सततं चिदात्मकतयाऽभेदेन च विद्यमानमेव वर्तते। तत एवास्य बहिर्भावतया प्रकाशनं प्रति परमेश्वरस्येच्छा परिस्पन्दते। यथा—**

"स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनम्।
अस्त्येव न विना तस्मादिच्छामर्शः प्रवर्तते।।"
(ई० प्र०1-5-10)

"बहीरूपतयाप्याभासनेऽन्तारूपता न त्रुट्यति।"
(ई० प्र० वि०, खं०1, पृ०192)

"न चासौ तत्र नास्त्येव, तत्र यन्नास्ति तत् कुतः।"
(मा० वि० वा०1,101)

~ प्रकाशनिष्ठम्— **भावा न स्वेन महिम्ना सन्ति वा प्रकाशन्ते वा। चित्-प्रकाश एव भावरूपतयाऽऽभासमानः सन् सर्वत्र प्रकाशते। ततो भावाः प्रकाशनिष्ठा एव, न स्वात्मनिष्ठाः। यथा—**

"दर्पणस्य लग्नत्वेन यथा प्रतिबिम्बानि भान्ति, नतु दर्पणाभेदमनादृत्य स्वात्मपरिनिष्ठितानि, तथामी घटादयस्तस्यैव प्रकाशस्य लग्नास्तदनुजीविता निर्भासन्ते; न स्वनिष्ठिता इति।"
(ई० प्र० वि० वि०, खं०,2, पृ०,81)

~ **सदासत्यम् —अवभासः प्रकाशः। प्रकाशः सत्यरूपः। ततो यद् यदवभासते तत्तत् सत्यमेवावभासात्मकप्रकाशरूपत्वात्।**

व्यवहारमात्रमेवेदं स्वप्नादिसंसारस्य यदसत्यत्वं जाग्रत्संसारापेक्षया कथ्यते लोके तस्य व्यवहारे यथा भीष्टार्थक्रियाऽकरणात्। वस्तुतस्तु भावाभावात्मकं सर्वं प्रकाशामानं प्रकाशत्मतया शिवरूपम् अतस्तद्रूपतया सर्वं सत्यमेव। यथा—

"नन्वित्थं तदसत्यं स्यात्कथं सत्यं तदेव हि।
तथावभासनादन्यत् क्व किं सत्यं निरूप्यताम्।।
नन्वेवं स्वप्नसंसारः किं सत्यं किंत्वसौ किल।
अभीष्टार्थक्रियावन्ध्योऽसत्यो व्यवहृतः परम्
(मा० वि० वा०1,204-205)

भावनम्— समयदीक्षासम्बन्धिनि यागविधौ गुरूपदेशानुसारमष्टधा भावनाभ्यासः। समयविशेषः समयदीक्षायाम्। यथा—

"शिवं शक्तिं तथात्मानं मुद्रां मन्त्रस्वरूपकम्।।
संसारभुक्तिमुक्तीश्च गुरुवक्त्रात्तु भावयेत्।"
उद्धः— देवीयामलात् (तं० आ०15,528-529)

भावना— (1) बुद्धिगताध्यवसायमय्यसौ कल्पनाश्रिता सत्यसिद्धान्त-विकल्पज्ञानपरम्परा यया वास्तविकं तत्त्वं मायया निगूहितं सदभावकक्षायामिव च क्षिप्तं सत् पुनर्भावात्मकतया स्थाप्यते। यथा—

"तथाविध-विकल्प-प्रबन्ध एव सत्तर्क इत्युक्तः। स एव च भावना भण्यते, अस्फुटत्वात् भूतमप्यर्थमभूतमिव स्फुटत्वापादानेन भावयते ययाइति"।
(तं० सा०, पृ०,23)

भावयते योगीति शेषः।

(2) शाक्तेनोपायेन विधीयमानः शुद्धविकल्पाभ्यास एव पराकाष्ठां प्राप्तः सन् भावनेत्युच्यते शैवशास्त्रे। यथा—

"तामेतां भावनामाहुः सर्वकामदुघां बुधाः।
स्फुटयेद्वस्तु याऽपेतं मनोरथपदादपि।।"
(तं० आ०4,14)

"तर्क एव परां काष्ठामुपगतो भावनेत्युच्यते।"
(तं० आ० वि०, खं०3, पृ०,13)

तर्कोऽत्र सत्तर्कः, स च शुद्धविकल्पात्मको योगाङ्गत्वेन वर्णितः।

"भावना शाक्तः।" (उपाय इति शेषः)
(तं० आ० वि०, खं०) 3, पृ०,469

~ तत्फलम् — भावनाभ्यासेन त्वरितमेव परापरसिद्ध्युदयो भवति योगिनः। यथा—

"मुहूर्त्तादेव तत्रस्थः समाधिं प्रतिपद्यते।
तत्रापि च सुनिष्पन्ने फलं प्राप्नोत्यभीप्सितम्।।"
(तं० आ० वि०, खं०,3, पृ०,14)

"पारमार्थिकं परप्रमात्रेकलक्षणं संविद्रूपं स्फुटयेत् अविकल्पवृत्त्या साक्षात्कुर्यात्।"
(तं० आ० खं०3, पृ०,14)

भावनाभ्याससिद्धौ पर्यन्ते निर्विकल्पः शाम्भवसमावेशोऽप्युदेतीति।

~ मरणकाले— भावनाभ्यासपरः प्राणी अन्त्ये क्षणे यं यं भावं स्मरञ्छ छरीरं त्यजति तत्तद्भावभावितोऽसौ तं तमेवैति परजीवनारम्भे। यथा—

"निपाताभ्यामन्तशब्दात्स्मरणाच्छतुरन्त्यतः।।
पादाच्च निखिलादर्धश्लोकाच्च समनन्तरात्।
लीनशब्दाच्च सर्वं तदुक्तमर्थसतत्त्वकम्।।"
(तं० आ०28,362-363)

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः।" इति गीतासु।

अत्र वापीति निपातद्वयम्; अन्ते इत्यन्तशब्दः, स्मरन्निति शत्रन्तः शब्दः, शेषः श्लोकः पादः श्लोकार्द्धं च। लीनशब्दस्तु—"तथा प्रलीनस्तमसि" इति स्मारयति।

भावनामयं ~ ज्ञानम्— स्वभ्यस्ते चिन्तामये ज्ञाने सुनिष्पन्ने सति तदेव भावनामयज्ञानस्वरूपतामापद्यते। भावनामयस्य ज्ञानस्याभ्यासेन साधकः स्वरूपप्रत्यभिज्ञात्मकं योगफलं लभते। यथा—

"सुनिष्पन्ने ततस्तस्मिञ्जायते भावनामयम्।।
यतो योगं समासाद्य योगी योगफलं लभेत्।"
(मा० वि० तं०4,31-32)

द्रः— 'ज्ञानम्' ~ भावनामयम्' इति।

भाव—सृष्टिः — स्वात्मन्यभेदेन विद्यमानस्य भावस्य स्वतो भिन्नतया बहिरात्मतया चावभासनम्। यथा—

"वर्तमानावभासानां भावानामवभासनम्।
अन्तः स्थितवतामेव घटते बहिरात्मना।।"
(ई० प्र०,1-5-1)

"चिदात्मैव हि देवोऽन्तः स्थितमिच्छावशाद् बहिः।
योगीव निरुपादानमर्थजातं प्रकाशयेत्।।"
(तदेव०,1-5-7)

~ जीवकृता— साधकः अर्थावभासं कुर्वंस्तमर्थं निजे प्रकाशे सृजति। ततो विषयावभासने सत्यात्मनः स्रष्टृत्वस्य भावना तेन विधीयते। यथा—

"नीलसुखादिना रूपेण भासयेत्—बहिः सृजेत्।"
(तं० आ० वि०, खं०3, पृ०,368)

भावनात्मकयोगाभ्यासप्रकारोऽयं यत्र स्वात्मन एव पञ्चकृत्यकारित्वं भाव्यते साधकेन।

भावतत्त्वम्— सर्वे भावाः परमेश्वरस्य या परमेश्वरतात्मिका शक्तिस्तदात्मका एव। ततः परमेश्वरात्मका एव यथा—

"भावजातं हि तस्यैव शक्तिरीश्वरतामयी।।"
(बो० पं० द०,2)

"विश्वे हि भावास्तस्यैव शक्तिरूपेण स्वरूपात्मत्वेन स्थिताः।"
(ई० प्र० वि०, खं०2, पृ०,136)

भावस्थः — ~ उच्चारयोगी— **लोकव्यवहारे व्यापृतोऽपि शुद्धस्वात्मपरभैरवस्वरूपनिष्ठो, व्युत्थानेऽपि समावेशभाग् भवति परो योगी। यथा—**

"भावस्थो-ग्राह्यग्राहकसंक्षोभेऽपि बाह्यान्तःकरणवर्गेणा-लुप्तसंवित्तिः स्वात्ममात्रपरिनिष्ठित एवेत्यर्थः।"

(तं० आ० वि०, खं०3, पृ०,403)

"ऊर्ध्वाधोगमविक्षेपरहितः करणेच्छया।
रूपं यस्य न हीयेत भावस्थो भावभासकः।।
स्वरूपप्रतिपन्नोऽसावन्तःकरणवर्जितः।
भावस्थं तं विजानीयाद् ग्राह्यग्राहकविप्लवे।।"

उद्धः— **त्रिशिरो भैरवात्,** (तं०आ०वि०,खं०3,पृ०,403)

भावस्वभावः — **सर्वेषां भावानां स्वो=निजो भावः = सत्ता, वास्तविकः स्वभावः। स च परभैरवात्मकः परमेश्वर एव। यथा—**

"स एव सर्वभावानां स्वभावः परमेश्वरः।।"

(बो० पं० द०,2)

"इत्थमिच्छाक्रियाज्ञान-
शक्तिशूलाम्बुजाश्रितः।
भैरवः सर्वभावानां
स्वभावः परिशील्यते।।"

(बो० पं० द०,15)

भावोपहारः — **आध्यात्मिकं स्तोत्रं किमपि श्रीचक्रपाणिनाथविरचितं कश्मीरेष्वतीवलोकप्रियमभूत्।**

भावोपहारविवरणम् —रम्यदेवेन श्रीचक्रपाणिनाथ-विरचिते भावोपहारस्तोत्रे रचिता व्याख्या।

भिन्नयोनिः — **मालिनी-व्युत्क्रमेणैव स्वरव्यञ्जनमिश्रा वर्णमाला, नादिफान्ता। मध्ये मध्ये बीजसमाख्यैः स्वरैर्विभिन्ना खण्डशो विभक्ता व्यञ्जनसमूहात्मिका योनिर्यत्र तथाभूता भिन्नक्रमा वर्णमाला। यथा—**

"यदुक्तं श्रीमज्जयद्रथराजानकैः — भिन्नयोनिस्तुमालिनी उत्यस्या व्याख्यानावसरे–भिन्ना स्वरैर्भेदिता योनिः कादिलक्षणा यस्याः।"

(प० त्री० वि० टिप्प०, पृ०,121)

भीमकाली ~ (त्रयोदशी)— **चिद्गगन-चन्द्रिकायाम् तत्रैव स्तोत्रे भीमकाली वर्णिता नान्यत्र क्रमस्तोत्रादौ। यथा—**

"सक्रमाक्रमविमिश्रभावतस्त्वत्क्रमस्त्रितयचारुवीक्षणः।
तुर्यरश्मिगुणविक्रमैकभूस्त्वं क्रमत्रिगुणभीमकाल्यसि।।"

(चि० ग० च०,250)

भुक्तिमुक्ती ~ कौले— **(1) भोक्त्र्याश्चिच्छक्ते र्भोग्येनालिपि-शितपुरन्ध्रीप्रभृतिना य एकीकारः स एव मोक्षो भोगसमकालमेवानुभूयते धीरैः. साधकवरैः। यथा—**

"तस्या भोक्त्र्याः स्वतन्त्राया भोग्यैकीकार एष यः।
स एव भोगः सा मुक्तिः स एव परमं पदम्।।"

इति श्रीप्रबोधपञ्चदशिकाप्रक्रियया भोगोऽपि मोक्षात्मा, मोक्षोऽपिभोगस्वभावः .....।"

(म० मं० प०, पृ०,129)

~ युगपत्— **(2) जगदानन्दानुभूतौ भोगोऽपि मोक्षायते। यथा—**

"यदीयसंविदाचारचर्याविस्रम्भभावितः।
भोगव्रातोऽपि धन्यानां निःश्रेयसपदायते।।"

(मा० वि० वा०1,45)

भुजङ्गवेधः — **वेधदीक्षायाः प्रकारविशेषो यत्र गुरुकृपया शिष्यस्योच्चरणशीलासौ प्राणशक्तिः पञ्चफणेव सर्पिणी 'स्वयमेवोपर्युपरितनेषु चक्रेषु प्रसरतीति। सोऽस्याः प्रसार एव भुजङ्गवेधः। यथा—**

"सा चैव परमा शक्तिरानन्दप्रविकासिनी।
जन्मस्थानात्परं याति फणपञ्चकभूषिता।।"

(तं० आ०29,248)

तदुक्तम्—
एवं पञ्चफणा देवी निर्गताधरमण्डलात्।
इत्युपक्रम्य
गता सा परमाकाशं परं निर्वाणमण्डलम्।।" इति

उद्धः— तं० आ० वि०, खं०11/2, पृ०,153)

"कलास्तत्त्वानि नन्दाद्या व्योमानि च कुलानि च।
ब्रह्मादिकारणान्यक्षाण्येव सा पञ्चकात्मिका।।
एवं पञ्चप्रकारा सा ब्रह्मस्थानविनिर्गता।
ब्रह्मस्थाने विशन्ती तु तडिल्लीना विराजते।।
प्रविष्टा वेधयेत्कायमात्मानं प्रतिभेदयेत्।
एवं भुजङ्गवेधस्तु कथितो भैरवागमे।।
तावद् भावयते चित्तं यावच्चित्तं क्षयं गतम्।
क्षीणे चित्ते सुरेशानि परानन्द उदाहृतः।।"

(तं० आ०29,249-252)

नन्दाद्यास्तिथयः। व्योमानि-नाभिहृद्-बिन्दुस्थानानि तान्यस्यास्तृतीया फणा। कुलान्येव महाकौलादीनि ब्रह्मादिसदाशिवान्तानि तानि चतुर्थी फणा। अक्षाणीन्द्रियाणि पञ्चमी फणा। ब्रह्मस्थानान्मूलाधारात्, ब्रह्मस्थाने ऊर्ध्व-द्वादशान्ते कुटिलगत्या विशन्ती तडिदिव शक्तिर्यत्रासौ भुजङ्गवेधः इति तात्पर्यम्। यथा—

"भुजङ्ग कुटिलाकारा अधोनाभेर्व्यवस्थिता।
प्रबुद्धा फणिवद् गच्छेत् फणापञ्चकभूषिता।।
पञ्चकात् पञ्चकं यावद् वेधं भुजङ्गसंज्ञितम्।"

उद्धः— आ० वि०, खं०11/2, पृ०,155)

भुल्लकः — **भुल्लकराजानक एव।**

भुल्लकराजानकः — **कोऽप्याचार्यो येन क्षेमराजात् प्रागेव स्वच्छन्दतन्त्रस्य काऽपि वृहट्टीकेति प्रसिद्धा सुविस्तृता व्याख्या लिखिताऽभूत्। न चासौ टीकेदानीं लभ्या। यथा—**

"यत्तु बृहट्टीकाकारराजानकभुल्लकेन .....।

(स्व० तं० उ०, प०10, पृ०,211)

द्र०:— 'बृहट्टीका' इति। स्व०तं०प०10,पृ०, 257,272, प०11,पृ०125,137 इति च।

यच्छ्रीभुल्लकः - सन्ध्याकोटित्रयं लक्षाणि चतुःसप्ततिरेव च।

इत्यादि पठितवान्, तदुपेक्ष्यम्।

(स्व० तं० उ०, प०11,पृ०,25)

द्र०:- (सव०तं०उ०प०10,पृ०257,272) **इति।**

द्र०:- (स्व०तं०उ०प०11,पृ०137) **इति च।**

भुवनवेधः — रहस्यक्रियाविधिः कोऽपि येन शिष्यः सद्यो भुक्तिमुक्तिपथगामी भवितुं समर्थो भवेत्। यथा—

"आधारान्निर्गतया शिखया ज्योत्स्नाऽवदातया रभसात्।
अङ्गुष्ठमूलपीठक्रमेण शिष्यस्य लीनया व्योम्नि।।
देहं स्वच्छीकृत्य क्षादीनान्तान् स्मरन्पुरोक्तपुर्योघान्।
निजमण्डलनिर्ध्यानात्प्रतिबिम्ब्यते भुवनवेधः।।"

(तां० आ०29,259-260)

व्योम्नीति द्वादशान्ते। क्षकार-दीन् नकारान्तानिति। निजमण्डलमत्र स्वशरीरम्। प्रतिबिम्ब्यते—शिष्यमपि तथाविधमेव कुर्यादिति (विवेकानुसारमेतत्)

भुवनाध्वा– (1) देशाध्वधारणासु तावदष्टादशोत्तरशत-संख्याक-भुवनरूपत्वेन स्थितः शिवो ध्यानादिनोपास्य-स्तत्तद्भुवनोचितसिद्धिलाभोत्सुकैः साधकैः। यथा—

"भुवनं चिन्तयेद्यस्तु वक्ष्यमाणैकरूपकम्।
भुवनेशत्वमाप्नोति .....।"

उद्ध०:- (तं० आ० वि०, खं०1, पृ०,102)

(2) स्वात्मनः शरीरस्य मध्ये पादाङ्गुष्ठादारभ्यो-र्ध्वद्वादशान्तं यावदष्टादशोत्तरशतभुवनानि भावनया द्रष्टव्यानि भवन्ति। तदभ्यासपरिपक्वतायां स्वात्मनो विश्वमयत्वस्य साक्षात्कारो भवति, आणवश्च शिवभाव समावेशोऽपि सिद्ध्यति। तथा—

"अध्वषट्कं यथा प्राणे संस्थितम् .....।।
आपादान्मूर्धपर्यन्तं चितेः संवेदनं हि यत्।
भुवनाध्वा स विज्ञेयः .....।।"

(स्व० तं०4,241-242)

~ क्रमकल्पनातः — या खलु भुवनाध्वधारणासु भुवन-क्रमकल्पना पृथ्वीमारभ्य साऽपि पृथिव्यां वर्तमानानामुपासका-नामेव कृते; तथा तथा भावनया हि तेषामभीष्ट-भोगमोक्षावाप्तिः। यथा—

"ततः प्रमातृसङ्कल्पनियमात् पार्थिवं विदुः।।
तत्त्वं सर्वान्तरालस्थं यत्सर्वावरणैर्वृतम्।"

(तं०आ०8,19-20)

अन्तरालस्थमिति तदधस्तदुपरि चापि भुवनक्रमः इति।

~ मानभेदतः — भुवनानां यत् परिमाणं तद्भिन्नभिन्नेष्वागमेषु भिन्नं भिन्नं दृश्यते। भावनाभ्यास-परासूपासनाप्रक्रियासु तथा तथा भिन्नभिन्न प्रकारतयाऽभ्यासो विधेय इत्येतदेवास्य प्रयोजनम्, न पुनः प्रमेयजगतः प्रमेयात्मिकया दृष्ट्या तत्त्वविवेचनम्। सर्वं प्रमेयजातं प्रमात्रन्तरेव भावनाभ्यासेन साक्षात्कार्यमित्येव हि षडध्वयोगनीतिः। ततो मानभिन्नत्वं न समस्यावहम्। यथा—

"क्रियादि भेदभेदेन तन्त्रभेदो यतः स्मृतः।
तस्माद् यत्र यदेवोक्तं तत् कार्यं नान्यतन्त्रतः।।"

उद्ध०:- (त० आ० वि०, खं०5, पृ०6)

इत्येवं तन्त्रबहुत्वं प्रक्रियाबहुत्वं चोभयं सिद्धम्।

~ संख्यातः — भिन्नभिन्नेषु तावदागमेषु भिन्नभिन्नप्रकाराः भुवनावल्यः प्रतिपादिताः। त्रिकशास्त्रगुरुभिरपि निजनिजपरम्परा-नुसारं भिन्नभिन्ना एव ताः समुपदिष्टाः। सर्वोऽपि भुवनावली प्रपञ्चस्तावद् भुवनाध्वोपासनाक्रमे भावनाविषयत्वेन भावनाभ्यासिनां कृते विश्वात्मकस्वस्वरूपप्रत्यभिज्ञाफलः। ततो नात्रवास्तविकतथ्यजिज्ञासायाः किमपि फलम्। यथापरम्परोपदेशं भावनीयाः भुवनावल्यो निजदेहे साधकैः, गुरुभिश्च निजबलेन मन्त्रादिप्रयोगसाचिव्येन ताः शोधनीयास्तथा यथा—शिष्यास्तद्बन्धनमुक्ताः सन्तः पारमेश्वरसंवित्स्वरूपतासाक्षात्कारं प्रत्यग्रेसरेयुः। विद्यमानायां च भोगवासनायां ते तत्तद्भुवनभोगं लभेरन्। द्रष्टव्यं विस्तरतः —

(1) तं० आ०8,406-427 इति)

स्वच्छन्दतन्त्रानुसारम्।

(2) तं०आ०8,428-435 इति मतङ्गागमानुसारम्।

(3) "श्रीभूतिराजमिश्रा गुरवः प्राहुः पुनर्बह्वी रुद्रशतम्।।"

(तं० आ०8,410)

(4) "अन्येऽपि बहुविकल्पाः स्वधियाचार्यैः समभ्यूह्याः।"

(तं० आ०8,436)

(5) (महार्थमञ्जरीपरिमले) स्थूले विश्लेषणेन यद्यपि भुवनसंख्या 118 इत्येव, तथाऽपि किञ्चित् सूक्ष्मेण विश्लेषणेन सा 224 इति। यथा—

"भुवनानि च कालाग्निरुद्रादीन्यनाश्रितान्तानीतिचतुर्विंशत्य-धिकं शतद्वयम्।"

(म० मं०प०, पृ०,69)

(6) मालिनीविजये : — तत्राष्टादशाधिकं शतं भुवनानामुपदिष्टम्। यथा—

"श्रीपूर्वशासने पुनरष्टादशाधिकशतं कथितम्।।
तदिह प्रधानमधिकं संक्षेपेणोच्यते शोध्यम्।"

(तं० आ०8,436-437)

न तु विस्तरादिति शब्दैरेवमभिव्यज्यते यदतोऽप्यधिका भुवनसंख्या सिद्ध्यति चेदसौ विस्तरेण विश्लिष्य प्रतिपाद्येत, इति।

(7) भूयसा विश्लेषणेन भुवनानां संख्या वर्धते,

संश्लेषणेन च ह्रासं याति। ततः साधनाप्रक्रियाभेदेषु भिन्नभिन्नैव भुवनानां संख्या स्वीकृता। सर्वञ्च तत् तत्तदुपासनक्रमानुसारं समीचीनमेव। प्रयोजनं यतः स्वात्मनः परिपूर्णत्वस्यानुभूतिस्तत्तद्भुवनभोगमुक्तिश्चेति।

भुवनानि : — **भिन्नभिन्नकोटिभाजां प्राणिनां तत्तन्निवास- स्थानानि तानि च परस्परमधरोत्तरतया स्थितानि निवृत्ति कलामारभ्य शान्तिकलां यावत्। शान्त्यतीता तु कलाऽभुवनैव,- तत्र सर्वथाऽभेदमयी यतः स्थितिः, न च तत्र यतो भोगः। यथा—**

"एवं तु सर्वतत्त्वेषु शतमष्टादशोत्तरम्।
भुवनानां परिज्ञेयं संक्षेपान्न तु विस्तरात्।।"

(मा० वि० तं०5,33)

भुवनेशः — ~ बीजम्— **औ। यथा—**

"भुवनेशः = औ"।

(तं० आ० वि०, खं०12, पृ०,197)

भुवनेश्वराः — **कालाग्निरुद्रादारभ्य सदाशिवतत्त्वस्थं भुवनेश्वरपञ्चकं यावत् परिगणिताः 118 देवाधिदेवाः। त्रिकप्रक्रियायां तेषां संख्या 118 इत्येव। प्रक्रियान्तरेष्वन्यान्यरूपापि। दृश्यतां तन्त्रसारे 66 पृष्ठादारभ्य 68 पृष्ठं यावत् सार्धद्वादशभिः पद्यैः कृतं नामोल्लेखपूर्वकं परिगणनं तेषाम्।**

~ अनुग्रहपरा— **सदाशिवतत्त्वादारभ्य पृथ्वीतत्त्वं यावत्तत्त्वानामन्तराले 118 भुवनानि। पृथ्वीतत्त्वस्थिताः मन्दशक्तिपातभाजः साधकाः स्थूलशरीरान्ते उत्तरेषु भुवनेषु देहान्तरैस्तिष्ठन्ति। तत्र तत्र ये अधिष्ठातारो देवदेवास्ते भुवनेश्वरा इति कथ्यन्ते। ते तत्र तत्र प्राप्तेभ्यः साधकेभ्यः शैवीं दीक्षां वितरन्ति, यया ते ततोऽप्युत्तरेषु तत्त्वेष्वारोहक्रमेणान्ते शिवैकीभावात्मकं परमं मोक्षं लभन्ते। यथा—**

"एतत्तत्त्वान्तरान्तर्वर्तीनि यानि भुवनानि तत्पतय एवात्र-पृथिव्यां स्थिता इति तेष्वायतनेषु ये म्रियन्ते तेषां—तत्र तत्र गतिं ते वितरन्ति। क्रमाच्च ऊर्ध्वोर्ध्वं प्रेरयन्ति दीक्षाक्रमेण।"

(तं० सा०, पृ०,65-66)

~ मुक्तशिवाः — **मायोर्ध्वे वा मायान्तरालेऽपि वा येऽधिकारिणो रुद्रा भुवनेश्वराद्यास्ते स्वाधिकारान्ते पारमेश्वरशक्ति-पातादेवानायासमेव च शिवत्वमापद्यन्ते। मायान्तराले वर्तमाना अपि रुद्रा न माया याऽऽक्रान्ता भवन्ति, ततो न ते कर्माद्यपेक्षन्ते। मुक्तशिवकल्पास्ते तिष्ठन्ति कमपि कालं तेषु तेषु भुवनेषु। यथा—**

"तेन मायान्तराले ये रुद्रा ये च तदूर्ध्वतः।।
स्वाधिकारक्षये तैस्तैर्भैरवीभूयते हठात्।
ये मायया ह्यनाक्रान्तास्ते कर्माद्यनपेक्षिणः।।
शक्तिपातवशादेव तां तां सिद्धिमुपाश्रिताः।"

(तं० आ०13,257-259)

भुवर्लोकः —**द्यावापृथिव्योर्मध्ये स्थितोऽन्तरिक्षलोको यत्र विविधानां मरुद्देवतानामाधिपत्यं विस्तरतस्तन्त्रालोकेऽष्टमाह्निके 121 तमां कारिकामारभ्य 143 तमां यावद् वर्णितोऽस्ति भुवर्लोकः। स्वच्छन्दतन्त्रे च दशमे पटले 422-491 यावत् तत्रैव द्रष्टव्योऽयं विषयः।**

~ तद्विस्तारः— **पृथिव्या उपर्यन्तरिक्षे आदित्यलोकं यावद्भुवर्लोकस्य विस्तारः। यथा—**

"दशमे वसवो रुद्रा आदित्याश्च मरुत्पथे।
नव योजनसाहस्रो विग्रहोऽर्कस्य मण्डलम्।।"

(तं० आ०8,142)

भूचर्यः — **पशुप्रमातारं प्रति भेदात्मकत्वेन प्रमेयजातस्यवभासस्य कारिण्यः शिवशक्तयः, पतिप्रमातरं च प्रति तस्य स्वाङ्गरूपतया तद्विमर्शकारिण्यस्ताः शक्तयो भूचर्यः। यथा—**

(1) "(चितिशक्तिरेव पशुभूमिकायां) सर्वतोव्यवच्छिन्नाभासस्वभावप्रमेयात्मना च भूचरीचक्रेण गोपित-सार्वात्म्यस्वरूपेण पशुहृदयव्यामोहिना भाति।"

(प्र० हृ०,पृ०,29)

(2) "पतिभूमिकायां तु .... स्वाङ्गकल्पाद्वयप्रथासारप्रमेयात्मना च भूचरीत्वेन पतिहृदयविकासिना स्फुरति।"

(तदेव,पृ०,30)

"भुवि विषयभूमौ चरणाद्भूचरीति।"

(मं० मं० प०, पृ०,86)

~ आन्तरा— **यथा— स्थूलसूक्ष्मशरीरान्तः सञ्चरणशीलाः अविवेकिनं लोकव्यवहारे प्रेरयन्त्यो विवेकिनं च परमार्थं प्रति। यथा—**

"भूः रूपादिपञ्चकात्मकं मेयपदं, तत्र चरन्ति तदा भोगमय्य आश्यानीभावेन तन्मयतामापन्ना भूचर्यः—प्रबुद्धानां चित्प्रकाशशरीरतया स्फुरन्त्यः, इतरेषां सर्वतो—व्यवच्छेदकतां दर्शयन्त्यः।"

(स्पं० सं०, पृ०,20-21)

~ बाह्याः — **भुवि सञ्चरणशीलाः सूक्ष्मशरीरधारिण्यो जगद्व्यवहारान् सञ्चालयन्त्यो देवताः। यथा—**

"भूचर्यस्तु स्वस्वभावतयैव कुङ्कुमनारिकेलादिवत् तत्तत्पीतादिभूमिजाताः पूर्णत्वापूर्णत्वादिनानाभेदितत्तद्देवतांशकोद्भूताः।"

(स्पं० सं०,पृ०,22)

भूतकञ्चकी— **स्थूलशरीरतया स्थितानि पञ्चभूतानि कञ्चुकवद्धारयन् जीवन्मुक्तो योगी। यथा—**

"भूतानि भौतिकानि शरीरादीनि कञ्चुकमावरणमस्येति। भौतिकात् कञ्चुकादविमुक्तः सन्नपि देहे तिष्ठन्नपि जीवभावाद् विमुक्तः सन् भूयः पुनरपि परः शिवसमः शुद्धः परिपूर्णश्च प्रमाता भवति।"

(शि० सू० वि०, वृ०,3,41)

भूतकैवल्यम्— **चित्तस्य बाह्यप्रपञ्चात् प्रत्याहरणम्। यथा—**

"पाञ्चभौतिकप्रपञ्चात्प्रत्याहरणं भूतकैवल्यम्।"

(शि० सू० विवृ०3,5)

भूतक्षोभशास्त्रम्— **तान्त्रिकं साधनाशास्त्रं किमपि यस्य मतं समुद्धृतं जयरथेन। यथा—**

"भूतक्षोभेऽपि :—

'मुद्रां कापालिनीं बद्ध्वा दक्षहस्तेन साधकः।
पात्रं तदुपरि स्थाप्यं मध्यमाङ्गुष्ठयोगतः।।
क्षिप्त्वैकं विप्रुषं वक्त्रे तर्पयेद्देवतागणम्।"

उद्ध०— (तं० आ० वि०, खं०9, पृ०,140)

भूतजयः — **(1) पाञ्चभौतिकेन वस्तुजातेनाप्रभावितत्वम्।**

(2) भूतानां स्वात्मसात्करणम्। यथा—

"स्वात्मनि भूतानां विलीनतापादनं भूतजयः। क्षुत्पिपासादिजयोऽपि भूतजयः।"

(शि० सू० विवृ०3,5)

भूतपञ्चकम्— **मातृकाक्रमे हि कादिङान्ताः वर्णाः। ते च वर्णाः अवधानविषयतां नीताः सन्तो धरादिनभोऽन्तानि तत्त्वानि स्वात्मप्रकाशे प्रतिबिम्बवदाभासमानानि प्रत्याययन्ति शाम्भवोपायाभ्यासे। यथा—**

"कादिङान्तं धारादिनभोऽन्तं भूतपञ्चकम्।"

(प० त्री० विवृ०, पृ०,44)

भूतपृथक्त्वम्— **भौतिकप्रपञ्चानुपरक्तत्वम्। यथा—**

(1) "भौतिक-प्रपञ्चानुपरक्तस्वच्छस्वच्छन्द- चिदात्मतानुसन्धानं भूतपृथक्त्वम्भूतेभ्यः पृथक्त्वमिति।"

('पृथक् पृथगेकैकस्य भूतस्य षट्त्रिंशत्तत्त्वविषयकं यत् सामर्थ्यं तस्य साक्षादनुभवनं षड्ध्वधारणानयेनेत्यपि भूतपृथक्त्वम्।"

(शि० सू० विवृ०3,5)

भूतसमावेशः — **पृथिव्यादिपञ्चभूतान्येकैकशः स्वात्मभित्तौ प्रतिबिम्बतानि पश्यतो योगिनः शाम्भवो भूतसमावेशो भवति, स च पञ्चप्रकारो, भूतानां पञ्चसंख्यत्वात्। प्रत्यक्षसिद्धत्वेनभूतानि पृथग्वर्गतया गण्यन्ते। तानि तत्त्वरूपाणि सन्त्यप्यत्र समावेश-संख्या-गणने विशेषवर्गरूपतया पृथग् गण्यन्ते तत्त्वविशेषत्वात्। यथा—**

"भूतान्यध्यक्षसिद्धानि कार्यहेत्वनुमेयतः।
तत्त्ववर्गात् पृथग्भूत-समाख्यान्यत एव हि।।"

(तं० आ०1,190)

"धरामेवाविकल्पेन स्वात्मनि प्रतिबिम्बिताम्।
पश्यन् भैरवतां याति जलादिष्वप्ययं विधिः।।"

(तं० आ०3,275)

भूतसृष्टिः — **तन्मात्राणि यदा परस्परं मिलित्वा प्रक्षोभमवाप्यस्थूलतां यान्ति तदा तान्येव पञ्चभूतरूपतामापद्यन्ते परिणामन्यायेन।**

~ मतद्वयतः — **तत्रैकं मतमेवं यदेकैकं तन्मात्रं क्षुभितं सदेकैकभूततत्त्वरूपतामापद्यते। अपरञ्च मतमेतद् यच्छब्दतन्मात्रादाकाशस्य शब्दस्पर्शतन्मात्राभ्यां वायोः, शब्द स्पर्शरूपतन्मात्रेभ्योऽग्नेः, रसयुक्तेभ्यश्च तेभ्यो जलस्य, गन्धसहितेभ्यश्च पञ्चभ्य एव पृथिव्याः सृष्टिः। यथा—**

(1) "शब्दतन्मात्रात् क्षुभितादवकाशदानव्यापारं नभः, शब्दस्य वाच्याध्यासावकाशसहत्वात्। स्पर्शतन्मात्रं, क्षुभितं वायुः। शब्दस्त्वस्य नभसा विरहाभावात्। रूपं क्षुभितं तेजः। पूर्वगुणौ तु पूर्ववत्। रसः क्षुभित आपः पूर्वे त्रयः पूर्ववत्। गन्धः क्षुभितो धरा। पूर्वे चत्वारः पूर्ववत्।"

(2) "अन्ये शब्दस्पर्शाभ्यां वायुः इत्यादिक्रमेण पञ्चभ्यो धरणी इति मन्यन्ते।"

(तं० सा०, पृ०90)

द्र० (तं० आ9,283तः288)

भूताः — **(1) देवयोनि-विशेषाः। यथा—**

"भूताः शून्यकूपैकवृक्षचत्वरादि स्थानस्थाः।"

(ने० तं०, खं०1, पृ०,47)

(2) सूक्ष्मदेहभाजः क्षेत्रपाभाद्याः देवाः। यथा—

"भूतास्तु अतिबलाः क्षेत्रपालाद्याः।"

(ने० तं उ०, खं०2, पृ०,115)

भूतादिः — ~ अहङ्कारः — **तमोगुण-प्रधानोऽहङ्कारः, तन्मात्रपञ्चकस्य प्रकृतिभूतः। तस्मादेव हि तन्मात्रानामाविर्भावः परिणामतः। यथा—**

"तन्मात्रास्तु गणो ध्वान्तप्रधानाया अहङ्कृतेः।"

(तं० आ०9,279)

"तन्मात्राणि पुनरत्र भूतादेस्तामसादेवाहङ्कारात्।"

(तं० आ० वि०, खं०6, पृ०,225)

द्र०:- अहङ्कारः — ~ भूतादिः **इति।**

~ बुद्धिमात्रग्राह्यः — **न स्थूलश्चक्षुर्ग्राह्योऽपितु विचारमात्रग्राह्यः यथा—**

"भूतादेः परिमाणं च भावग्राह्यं न चाक्षुषम्।।"

(स्व० तं०,10,14)

~ भुवनाध्वविषये — **भूतानां धरादीनामादि कारणमुत्पत्तिस्रोतः, तच्च तन्मात्रम् ततो भूतादिः = तन्मात्रतत्त्वमिति, अत्र तु प्रकरणे तन्मात्रतत्त्वस्थं भुवनजातमिति। यथा** —

"द्विपञ्चभागो महतो भूतादिः स्थूल उच्यते।"

(स्व० तं०10,14)

"एवम्भूतान्महतो द्विपञ्चभाग इति दशगुणः (दशम् भाग इति वक्तुमुचितम्।)

(स्व० तं० उ०, खं०5/1, पृ०,9)

भूतानि— **पृथ्वी, जलम्, अग्निः, वायुः, आकाशः इति पञ्चस्थूलतत्त्वानि पञ्चभूतानीति।**

~ तन्मात्रजानि— **योगिनो योगजशक्त्या धरादीन् युगपदेव गन्धादिगुणमयान् पश्यन्ति। तेन तेषां गन्धादिभ्य**

एवोत्पत्तिः। ततस्तन्मात्रेभ्य एव भूतसृष्टिः। यथा—

"यथा च विस्तृते वस्त्रे युगपद्भाति चित्रता।
तथैव योगिनां धर्मसामस्त्येनावभाति भूः।।"

(तं० आ०9,91)

~ तन्मात्रमयानि— पञ्चतन्मात्रमयान्येव पञ्चभूतानि। यथा—

"तेन धर्मातिरिक्तोऽत्र धर्मी नाम न कश्चन।"

(तं० आ०9,294)

तन्मात्राणां धर्मित्वं भूतानां च धर्मत्वम्।

भूतिः — ~ उच्चारयोगे— रवदशके पञ्चमं रवम्। विभूतिरैश्वर्यं स्वातन्त्र्यलक्षणम्। यथा—

"भूतिः स्वातन्त्र्यलक्षणमैश्वर्यम्।"

(तं० आ० वि०, खं०3, पृ०,404)

द्र०:— 'रव-दशकम्' इति।

भूतिराजः — (1) अभिनवगुप्तस्य गुरुष्वेकः। नरसिंहगुप्तस्यापि गुरुः। भूतिराजकृतो न कोऽपि ग्रन्थो लभ्यते ज्ञायते वाऽपि क्वचित्। परं वाक्यद्वयं तत्कृतमुद्धृतं सल्लभ्यते। तेन ज्ञायते यत्तेनाऽपि ग्रन्थरचना कृताऽभवत्। यथा—

(1) "यदाहुः श्रीभूतिराजगुरवः —क्षेपाज्ज्ञानाच्च काली कलनवशतयाऽथ .....। इति

(तं० सा०, पृ०,30)

(2) "भट्टश्रीभूतिराजेनाप्युक्तम्—
सर्वक्रोडीकारेण स्थितत्वाद् देव्येव मन्त्रः इति।"

(म० मं० प०, पृ०,122)

(3) "श्रीभूतिराजवदनोदितशम्भुशास्त्रः।

(ई० प्र० वि० वि०, खं०3, पृ०,405)

इति नरसिंहगुप्तविषये। यथा—

(4) "ततो गुरुतरः श्रीमान् भूतिराजो महामतिः।
जयताद् भक्तजनता-समुद्धरण-साहसः।।"

(मा० वि० वा०1,6)

(2) ब्रह्मविद्योपदेष्टाऽभिनवगुप्तस्य। यथा—

"अथोच्यते ब्रह्म—विद्या सद्यः प्रत्ययदायिनी।।
शिवः श्रीभूतिराजो यामस्मभ्यं प्रत्यपादयत्।"

(तं० आ०30,62-63)

(3) कात्यायनाख्यस्य विदुषो वंशजः। यथा—

"श्रीमान् कात्यायनोऽभूद्वररुचिसदृशः प्रस्फुरद्बोधतृप्तस्तद्वंशालङ्कृतो यः स्थिरमतिरभवत्सौशुकाख्योऽतिविद्वान्। विप्रः श्रीभूतिराजस्तदनुसमभवत्तस्य सूनुर्महात्मा।"

(गी० सं०, पृ०,186)

भृगुपातादिफलम् — भृगुपातेन धारातत्त्वैश्वर्यभोगः, गङ्गादिजले स्वस्यार्पणेन जलतत्त्वैश्वर्यभोगः, अग्निप्रवेशेनाग्नितत्त्वैश्वर्यभोगः, उपवासेन देहत्यागे सति वायुतत्त्वैश्वर्यभोगो न केनापि मुक्तिः। यथा—

"यथा धरादौ वाय्वन्ते भृग्वम्ब्वग्न्युपवासकैः।।
आत्मनो योजनं व्योम्नि तद्वदुत्क्रान्ति वर्तना।"

(तं० आ०14,35-36)

भेदनम् — (मन्त्राणाम्) तच्च साध्यसाम्मुख्यराहित्यम्। दोषविशेषोऽयं ज्ञेयः परिहार्यश्च। यथा—

"भेदनं साध्यसाम्मुख्यत्यागम्।"

(ने० तं० उ०, खं०2, पृ०,17)

तन्निरूपणप्रयोजनम्— भेदमयं सर्वं पृथक् पृथग् निर्भज्य प्रथमं निरूप्यते। अनन्तरं चैकैकशस्तत् परमशिवरूपतया विमृश्यते तावद् यावत् सर्वत्रैक परमशिवतैव साक्षादनुभूयते। तदैव कृतकृत्यताया अनुभवो जायते। यथा—

"अतः सम्भाव्य निखिलद्वैतशङ्काव्यपोहने।
गुरूणां च शिशूनां च यत्नः सर्वैर्विजृम्भते।।"

(मा० वि० वा०1,113-114)

"सर्वैर्विजृम्भते" इति पदद्वयस्य तात्पर्यं न स्पष्टतां याति।

भेदवादविदारणम— आचार्याभिनवगुप्तकृतो ग्रन्थ-विशेष इदानीमलभ्यः। यथा—

"कृतप्रतानश्चायं प्रकृत्यर्थण्यर्थविवेको मयैव 'भेदवादविदारणे।"

(ई० प्र० वि०, खं०1, पृ०,158)

भेदवादानुपपत्तिः — नहि वक्तव्यं यद् यथेश्वरोऽनादिसिद्धस्तथा मलोऽप्यनादिसिद्धः इति द्वैतमेवास्तु वस्तुतत्त्वम्। यतस्तदेव ह्यनादिसिद्धं तत्त्वं यदन्यस्यापेक्षां विनैव स्वेनैव महिम्ना प्रकाशते। तथाविधं च तत्त्वं केवलं पारमेश्वरं संवित्तत्त्वमेव नान्यत्। अतस्तदेवमलस्याभासस्य कारणम्। परमेश्वरस्य स्वात्मतिरोधानेच्छैव मलः, न स्वतन्त्रः कश्चन स्वतः सिद्धः पदार्थः। यथा—

"विशुद्धस्वप्रकाशात्म शिवरूपतया विना।।
न किञ्चिद्युज्यते तेन हेतुरत्र महेश्वरः।"

(तं० आ०13,112-113

भेदवैचित्र्यम्— तत्तदसंख्यप्रमातृप्रमाणप्रमेयवैचित्र्येणावभासकम। यथा—

"तथाहि यदि नामृष्टं द्वैतं तर्ह्येकमेव सत्।।
चिद्ब्रह्म तदलं तत्त्वसंख्या कल्पनानिर्णयैः।
पञ्चविंशतिता कस्मात्तत्त्वानां तन्निरूप्यते।।
तस्माद् द्वैतस्य भेदात्मस्थितेर्यावद्गतिग्रहम्।
कृत्वा यस्तत्प्रतिक्षेपस्तेन निःशङ्कता भवेत्।।"

(मां० वि० वा०1,115-117)

~ तद्बीजम्— अनुत्तरानन्दौ स्वयमविचित्रावपि स्वात्मरूपपरमेश्वरतात्मकशक्तेरुच्छलत्त्वेनैव भेदवैचित्रीं यातस्तेनैव च योनिरूपतामपि समासादयतो विश्वरूपतयाऽप्याभासेते। यथा—

"शृणु तावदयं सविन्नाथोऽपरिमितात्मकः।।
अनन्तशक्ति-वैचित्र्य-लयोदय-कलेश्वरः।"

(तं० आ०3,99-100)

ततो नाविद्यावासनादिकारणकं भेदवैचित्र्यम्। अपि तु परमेश्वरस्य शक्तेर्लीलैव कारणं भेदावभासस्य।

~ शिवात्मकम्— **आभासमानोऽपि भेदः संविदि प्रतिबिम्बितत्त्वेन भासमानः सन्नैव संवद्दर्पणाद् भिन्नः। संविन्मयः सन्नेव प्रकाशितो भवति। अन्यथा नैव प्रकाशेत कथञ्चिदपि। यतः प्रकाश एव प्रकाशितुमलं नान्यत्। यथा—**

"भेदः स चायं न ततो विभिन्नः
स्वच्छन्दसुस्वच्छतमैकधाम्नः।
प्रासादहस्त्यश्वपयोदसिन्धु-
र्गिर्यादियद्वन्मणिदर्पणादेः।।"

(प० च०,4)

भेदाभेदः— ~ व्यवहार—**भिन्न-प्रमातृवेद्यानां भिन्नत्वेन विमृश्यमानानां चावभासानां कदाचिदेकप्रत्यवमर्श-विषयतया एकावभासतासिद्धैव भवति, नियतिशक्त्युत्थापितविरोधराहित्ये सति तदित्थमाभासवादेऽप्यनेकेषामेकत्वमप्यव्याहतमेव तिष्ठति कदाचित्। यथा—**

"दूरान्तिकतयार्थानां परोक्षाध्यक्षतात्मना।
बाह्यान्तरतया दोषैर्व्यञ्जकस्यान्यथाऽपि वा।।
भिन्नावभासच्छायानामपि मुख्यावभासतः।
एकप्रत्यवमर्शाख्यादेकत्वमनिवारितम्।।"

(ई० प्र०2-3-10-11)

भेदाभेदोपायः — **शाक्तोपायस्याभिधानान्तरमेतत् तत्र स्वयं स्वात्मनः वास्तविकतया सत्यस्य स्वभावस्यैव भावनाया अभ्यासो विधीयते। तत्र भावकभाव्ययोरभेदविमर्शे सत्यपि भेदोऽवभासते एव मनाक्। यथा—**

"अभेदोपायमत्रोक्तं शाम्भवं शाक्तमुच्यते।
भेदाभेदात्मकोपायं भेदोपायं तदाणवम्।।"

(तं० आ०1,230)

भेदावभासः — **वस्तूनां संविदैक्येन भासनेऽपि बहुविधेन परस्परं संविदश्च भेदेनाप्यवभासनं यत्तद्भेदावभास इति। यथाऽहं पश्यामीत्यात्मनः एकत्वेऽपि देहेन्द्रिय-विषयादिकृतस्य भेदस्यावभासोऽस्त्येवेति। यथा—**

"उच्यते नाद्वयेऽमुष्मिन् द्वैतं नास्त्येव सर्वथा।
उक्तं हि भेदवन्ध्येऽपि विभौ भेदावभासनम्।।"

(मा० वि० वा०,108)

तस्य चिद्रूपतया सर्वत्र सदा प्रकाशमानत्वात् सकलप्रकाशकत्वाच्चेति। यथा—

"अत एव हि भेदोऽस्ति न कश्चिद्यो महेश्वरम्।
अद्वयं संप्रभिन्दीत प्रकाशानन्दसुन्दरम्।।

(मा० वि० वा०1,621)

~ तत्कारणम्— **परमेश्वरस्य यन्निजं यामलस्वरूपविमर्शनं तदेव भेदात्मिकायाः जगत्सृष्टेर्मूलकारणम्। यथा—**

"तस्य प्रत्यवमर्शो यः परिपूर्णोऽहमात्मकः।
स स्वात्मनि स्वतन्त्रत्वाद्विमागभवभासयेत्।।"

(तं० आ०3,235)

परमेश्वस्यैश्वर्यविमर्शनस्वरूपो योऽपरः स्पन्दस्तस्यैव बहिर्मुखप्रसारकारणत्वं योगिजनैः साक्षात्कृतमुपदिष्टं चेति तात्पर्यम्।

~ नासत्यः — **भासमानत्वेन भेदावभासः सत्य एव, तस्य चिरस्थिरत्वादर्थक्रियोपयोगित्वाच्चापि सत्यसिद्धा भवति। यथा—**

"इह्यानुवृत्तं व्यावृत्तञ्च चकासद्वस्तु कतरेण वपुषा न सत्यमुच्यताम्। उभयत्रापि बाधकाभावात् सत्यतो हि यदि बाधक एवैकतरस्य स्यात् तत्तदुदये स एव भागः पुनरुन्मज्जनसहिष्णुतारहितो विद्युद्विलायं विलीयेत। न चैवम्। ..... संवेदनविश्रान्तं तु द्वयमपि भाति, संवेदनस्य स्वातन्त्र्यात्।

..... स **(भेदः)** एकत्र प्रमातरि सकल-प्रमा-प्रमाणसंयोजन-वियोजनादिविचित्रासंख्यकृत्यप्रपञ्चो चित्स्वातन्त्र्ये भगवत्यस्मदीयहृदयैकान्तशायिनि शिवशब्दव्यपदेश्ये सत्युपपद्यते नान्यथा।"

(ई० प्र० वि०, खं०2,पृ०,117-119)

~ प्रतिबिम्बरूपः — **शिवो विश्वात्मतयात्मानमवभासयन्नपि न मनागपि विकारं परिणामं वाधिगच्छति। यतः सर्वोऽयमव-भासस्तस्मिन् प्रतिबिम्बन्यायेनैव भवति, तदिच्छानुसारम्। स्वशक्तिव्रातप्रतिबिम्बजातमवभासयन्सौ जगद्रूपतामाभासयति। यथा—**

"दर्पणबिम्बे यद्वन्नगरग्रामादि चित्रमविभागि।
भाति विभागेनैव च परस्परं दर्पणादपि च।।
विमलतमपरमभैरवबोधात्तद्वद् विभागशून्यमपि।
अन्योन्यं च ततोऽपि च विभक्तमाभाति जगदेतत्।।"

(प० सा,12-13)

~ बन्धकारणम्— **ईश्वरेच्छावशादुद्भूतमणुत्वं तदुत्थञ्च भेददर्शनाख्यमावरणं जनानां बन्धनस्य कारणम्। तदुत्थापकश्च वर्णराशिमयः शक्तिव्रातः, स एव प्रेरयति प्रमातॄन् बद्धजनोचिते लोकव्यवहारे। इति पारमेश्वरी शक्तिरेव मूलतो भेदावभासात्मकस्य बन्धनस्य कारणम्। यथा—**

"ईश्वरशक्तेरेव मायात्वं प्राप्ताया उत्थितः स्वरूपावरणकारिणीभिश्च वर्णदेवताभिर्विकल्परूपतां यतो नीतः, ततो बन्धरूपतां धत्तेऽयं भेदप्रतिभास इति।"

(ई० प्र० वि० वि०, खं०3, पृ०,385)

~ बीजभावतः — **पश्यन्त्यादिषु दशासु यो भेदावभासस्तस्य मूलकारणं शिवे विद्यमानाः इच्छाज्ञानक्रियाशक्तय एव। ताश्च शिवे एकमात्रशिवरूपतया परिपूर्णेनाभेदेनासते, परं विद्यायां भेदावभासस्तासामङ्कुरीभवन् मायायां स्फुटतरं प्रथते। यथा—**

"विभागाभासनायां च मुख्यास्तिस्रोऽत्र शक्तयः।"

(तं० आ०3,248)

मुख्याश्च ता इच्छा-ज्ञान-क्रिया इति।

~ स्वातन्त्र्यतः — पारमेश्वरात् स्वातन्त्र्यादेव हि भेदावभासो नोपाधिप्रभावतः। उपाधेरप्याभासस्य स्वातन्त्र्यमेव यतः कारणम्। यथा—

"तदुपाधिवशाद् भेदो भैरवे भावसम्भवात्।।
इति नास्मन्मनोभूमावुपारोढुमिहार्हति।
तूष्णीं विकारिणो भावाः सन्तीति ह्यतिसाहसम्।।
देवः स एव विश्वात्मा तथारूपेण भासते।
अनुपाधेरभिन्नस्य भिन्नं नोपाधिभासनम्।।"

(मा० वि० वा०1,201-203)

भेदोपायः — आणवोपायः। असावुपायो यत्र स्वस्माद् भिन्ने वा ग्राह्ये बाह्ये वा वस्तुनि भावनाया अभ्यासो विधीयते। तेन स्वतो भिन्नस्य पदार्थजातस्यापि या पारमार्थिकी शिवरूपता तस्या भावनैवाणवोपायः। यथा—

"..... भेदोपायं तदाणवम्।।"

(तं० आ०1,230)

द्र०:- 'उपायाः' — ~ मिथो वैचित्र्यतः' इति।

भैरवं ज्ञानम्— व्यावहारिकं ज्ञानमज्ञानमपि च वस्तुतो यन्मयं, विश्वाभासभरितं तदात्मचिद्विमर्शमयं ज्ञानं हि भैरवं ज्ञानम्। यथा—

"तदेव भैरवं ज्ञानमज्ञानमपि यन्मयम्।"

(प० पं०,3)

भैरवः— (1) पञ्चसु पारमेश्वरकृत्येषु सततं प्रसक्तः परमेश्वरः। यथा—

"सृष्टि-संहार-कर्तारं विलय-स्थितिकारकम्।
अनुग्रहकरं देवं प्रणतार्तिविनाशनम्।।
मुदितं भैरवम् .....।"

(स्व० तं०1,3-4)

(2) स्व-परिस्पन्दरूपेण सामर्थ्येन सर्वेभ्योऽपि जगद्भावेभ्यः सत्तादानेन तेषां भरणकर्त्ता, परिपूर्णाऽहं विमर्शात्मकमहामन्त्ररवणात्मकश्च परमः शिवः। यथा—

"भैरवो भरणात्मको महामन्त्ररवात्मकश्च।"

(प० त्री० वि०, पृ०,63)

द्र०:- (ने०तं०२१,७३-७४)

"तत्रापि स्वपरिस्पन्दस्फुरत्तायां स भैरवः।"

(शि० सू० वा० व०, पृ०,8)

"स एव भैरवो देवो जगद् भरणलक्षणः।
स्वात्मादर्शे समग्रं हि यच्छक्त्या प्रतिबिम्बितम्।।"

(बो० पं० द०,4)

"सर्वं भ्रियाद् धारयति पुष्णाति..... अखिले व्यापकः सकलजगत्क्रोडीकारेण भरितत्वात् पूर्णः।"

(तं० आ० वि०, खं०3, पृ०,448)

द्र०:- (शि० सू० वि०1,5)

(3) परमेश्वरो यो 1- विश्वस्य सत्तादानात्मकाद् भरणात्, 2- विमर्शात्मक—शब्दनरूपाद्रवणात्, 3- संसारे भीरुभ्योऽभयदानात्, 4- संसारभीतिजनितरवेणसमुद्बुद्धस्वात्मविमर्शरूपत्वात्, 5- शक्तिपातवशतो जनानांहृदि भवभीतिरावोद्भाव कत्वात्, 6- भचक्रप्रेरककालग्रासकारित्वात्, 7- जन्तुचक्रभयोत्पादकानां खेचर्यादिचक्राणां प्रेरकत्वात्, 8- महाभीमत्वाच्च 'भैरव' इत्युच्यते। यथा—

"विश्वं बिभर्ति पूरणा-
धारणायोगेन तेन च भ्रियते।
सविमर्शतया रवरूपतश्च
संसारभीरुहितकृच्च।।
संसारभीतिजनिता-
द्रवात्परामर्शतोऽपि हृदि जातः।
प्रकटीभूतं भवभय-
विमर्शनं शक्तिपाततो येन (यस्य)
नक्षत्रप्रेरककाल-
तत्त्वसंशोषकारिणो ये च।
कालग्राससमाधान-
रसिकमनःसु तेषु च प्रकटः।।
संकोचिपशुजनभिये
यासां रवणं स्वकरनं देवीनाम्।
अन्तर्बहिश्चतुर्विध-
खेचर्यादिकगणस्यापि।। (तस्य स्वामीति)
संसारवृत्तिविघटनमहाभीमः।
भैरव इति गुरुभिरमै-
रन्वर्थैः संस्तुतः शास्त्रे।।"

(तं० आ०1,96-100)

इमैरिति तान्त्रिकः शब्दप्रयोगः मालिनीविजयोत्तरे तथा प्रयोगदर्शनात्, ऐन्द्रचान्द्रकालापादिव्याकरणमध्ये केनापि व्याकरणेन वा साधुरिति वेदितव्यम्।

द्र०:- (स्व० तं० उद्० प०1, पृ०,3-4)

(4) स्वेच्छया सकलं षट्त्रिंशत्तत्त्वमयं विश्वं स्वभित्तौ धारयन् परिपूर्णः परमेश्वरः। यथा—

"तत्त्वे तत्त्वे स्वेच्छया देवदेवः
सर्वां सर्वां भूमिमालम्बमानः।
पूर्णैकात्मा पूर्णसंवित्स्वरूपः
श्रीमान्शास्त्रे भैरवोऽसौ निरुक्तः।"

(मा० वि० वा०1,658)

एतेनैतत् प्रतिपादितं यन्न केवलं परशिवरूपतायामेवासौ परिपूर्णो यावद् धारादिजडतत्त्वरूपतायामपि तथाविध एव परिपूर्णो जगद्भरणवमनरवणादिशीलः। परिपक्वज्ञाना हि सिद्धा घटादिकं जडमपि वस्तुपरिपूर्णपरशिवात्मकतयैव पश्यन्ति।

द्र०:- (तं० व० धा०1,33)

(शि० सू० वा० व०, पृ०,5)

(5) सततमिच्छाज्ञानक्रियाशक्तिप्रसरे प्रवृत्तः परमेश्वरः इच्छाज्ञानक्रियात्मकस्य त्रयस्यैकत्र योऽसौ संघट्टः, स एव हि भैरवः। स च पारमैश्वर्यसमाविष्टः शिवः। यथा—

"इच्छा कामो विषं ज्ञानं क्रिया देवी निरञ्जनम्।।
एतत्त्रयसमावेशः शिवो भैरव उच्यते।"

सदैव परिपूर्णे शांशतयापि विपर्यासरहितः शुद्धसंविदात्मकः परमशिवः। यथा—

(तं० आ० 3,172-173)

(7) भगवद्भैरवभट्टारकस्तु सदापूर्णोऽनन्तस्वतन्त्र एव न विपर्यस्यते जातुचिदपि, चिद्रूपातिरेकाद्यभावादित्युक्तं बहुशः।"

(प० त्री० वि०, पृ०,146)

(7) एकवीरत्वात् स्वरूपादारभ्य द्वादशारमहाचक्रनायकत्वमयं स्वरूपं यावत् सर्वत्र परमेश्वरतात्मकनिजवैभव-प्रकाशकः शिवः। यथा—

"एकवीरो यामलोऽथ त्रिशक्तिश्चतुरात्मकः।
पञ्चमूर्तिः षडात्माऽयं सप्तकोऽष्टकभूषितः।।
नवात्मा दशदिक्छक्तिरेकादशकलात्मकः।।
द्वादशार-महाचक्र-नायको भैरवस्त्विति।।"

(तं० आ०1,110-111)

एते सर्वेऽप्यधिकारिणो भैरवा इत्युच्यन्ते।

(8) सततमिच्छाज्ञानक्रियाशक्तिप्रसरप्रवृत्तः परमेश्वरः। यथा—

"इत्थमिच्छाकलाज्ञानशक्तिशूलाम्बुजाश्रितः।
भैरवः सर्वभावानां स्वभावः परिशील्यते।।"

(बो० पं० द०,15)

(9) द्वादशशक्तीनां चक्रस्य स्वामी परमेश्वरः। द्वादशकालीचक्रपतिः। यथा—

"एतावद् देवदेवस्य मुख्यं तच्छक्तिचक्रकम्।।
एतावता देवदेवः पूर्णशक्तिः स भैरवः।
इयत्ताकलनाज्ज्ञानात्ताः प्रोक्ताः कालिकाः क्वचित्।।"

(तं०आ० 3, 251-253)

यथा—

"आदिः षोडशभेदेन साक्षाद्वै भैरवः स्मृतः।"

(स्व० तं०1,32)

"आदिः प्रथमो वर्गः - अनुत्तरादेर्विसर्गान्तस्य विश्वाप्यायिनः षोडशकस्य स्वयं राजमानतया शब्दनस्वाभाव्येन भेदोपतापकारितया विश्वाक्षेपेण च स्वरशब्दवाच्यस्य गर्भीकृताशेषवाच्यवाचकादियोनिवर्णतत्त्वप्रसरसमाश्रयत्वात् तदुल्लासकत्वाच्च बीजव्यपदेशस्य परसंवित्स्फारसतत्त्वस्य भेदेन वैचित्र्येण साक्षाद् भैरवः अशेषविश्वमयत्वात् वाच्यवाचकयोरभेदाच्च।"

(स्व० तं० उ०, प०,1,पृ० 27-28)

(11) कालोऽपि भैरव इत्युच्यते कदाचित्। यथा—

"कालो भैरवः स च नादस्वभावः प्राणरूपः।"

(म० पं० वि०, पृ०,7)

भैरवकुलम्— **किमपि शैवागमशास्त्रम्। यथा—**

"उक्तं श्रीभैरवकुले पञ्चदीक्षासु संस्कृतः।
गुरुरुल्लङ्घिताऽधःस्थस्रोता वै त्रिकशास्त्रगः।"

(तं० आ०13,302)

द्र०:- (तं० आ०27,45; 28,143-88) **इति।**

भैरवमुद्रा— **(1) अभेद-भेदाभेद-भेददशोचिते सकले व्यवहर- जाते प्रचलत्यपि योगिनोऽन्तः स्वस्वरूपे यत् सततमवस्थानं सा भैरवमुद्रा। यथा—**

"अभेदभेदाभेदभेदात्मनि कक्ष्यात्रयेऽपि स्फुटतरं कृत्वा भेदवन्ध्योदयं निर्विशेषं यद्योगी तिष्ठति तदेव नाम भैरवमुद्रानुप्रवेशात्मतत्त्वं पारमार्थिकं रूपमाचीयताम्, ग्राह्यग्राहकाद्यात्मकबाह्यक्षोभमयत्वेऽपि तदासङ्गमपहाय स्वात्ममात्रनिष्ठा एवावतिष्ठतेत्यर्थः।"

(तं० आ० वि०, खं०3, पृ०,437)

द्र०:- **'भैरवीमुद्रा'** इति।

(2) बाह्यविषयाऽऽसङ्गेऽपि स्वस्वरूपपरामर्शपरत्वाभ्यासः। यथा—

"अन्तर्लक्ष्यो बहिर्दृष्टिः परमं पदमश्नुते।।"

(तं० आ०5,80)

"बाह्यविषयासङ्गेऽपि स्वरूपपरामर्शपरत्वात् भैरवमुद्रानुप्रविष्टो योगी परमं पदमश्नुते विमर्शदशामधिशेते।"

(तं० आ० वि०, खं०3, पृ०,390-391)

~ अनुप्रवेशक्रमतः — **उच्चारयोगे रवदशकानुप्रवेशयुक्तिः। यथा—**

"त्रिशिरोभैरवोक्त्या निरूपितस्वरूपं परतत्त्वलक्षणं तुर्यातीतपदं सम्यग्भैरवमुद्रानुप्रवेशक्रमेण विशेत् समावेशभाग्भवेदित्यर्थः।"

(तं० आ० वि०, खं०3, पृ०,402)

द्रष्टव्यं च खदशकानुप्रवेशप्रकरणम्

(तं० आ० वि०, खं०3, पृ०,400-407) इति।

भैरवयोगिनी— **पूर्णस्य परमेश्वरस्यान्तरङ्गाशक्तिरिच्छाख्या परमस्य भैरवस्य परशिवस्य योगिनी इत्युच्यते गुरुभिः। यथा—**

"या सा शक्तिर्जगद्धातुः कथिता समवायिनी।"

इत्याद्युक्तया 'भैरवयोगिनी' नित्यमेव परप्रमात्रवियुक्तत्वात् तदात्मभूताम्, अत एव-

"इच्छात्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते।"

(उद्ध०- तं० आ० वि०, खं०1, पृ०,16-17)

भैरवसद्भावः — **(1) अनाहतो नादः। यथा—**

"स तु भैरवसद्भावो मातृसद्भाव एष सः।
परा सैकाक्षरा देवी यत्र लीनं चराचरम्।।"

(तं० आ०6,218)

अयं ह्ययत्नजः परतमोऽनाहतध्वनिः।

द्र०:- **'वर्णोदयः'**— ~ **परतमः'** इति।

(2) ऊँ हं इति मन्त्रः। यथा—

"सैव मूर्तिरितिख्याता तारसद्बिन्दुहृत्मिका।"
(तं० आ०15,239)

"तारः प्रणवः, सद्बिन्दुहृत्मिकेति हमिति रूपेत्यर्थः।"
(त० आ० वि०, खं०9, पृ०,119)

भैरवसद्भावनवात्मरति शेखरप्रकरणे नवात्मन उल्लेखात् प्रागस्यैव मन्त्रस्योद्धारविधिर्दर्शितः।

ततोऽयमेव भैरवसद्भावमन्त्र इति तर्क्यते। न चात्र विषये सुनिश्चितत्वेन किमपि वक्तुं शक्यते।

भैरवसिद्धान्तः — सिद्धान्तपक्षः पूर्वपक्षश्चापि वस्तुतो यन्मयोऽसौ परिपूर्णत्वसिद्धान्त एव हि भैरव सिद्धान्तः। यथा—

"स हि भैरवसिद्धान्तः पूर्वपक्षोऽपि यन्मयः।
(प० प०,3)

एष एव हि पराद्वैतसिद्धान्तः कश्मीरशैवदर्शनस्य।

भैरवाः — (1) उत्तमेषु भुवनेष्वधिकारिणो रुद्राः इत्यप्युक्तास्तत्प्रकरणे।

(2) अत्रापि लोके ते ते क्षेत्राधिपतयो राष्ट्राधिपतयश्च देवदेवाः प्रायः श्मशानेषु वासिनः।

(3) एकैकस्या अपि हि योगिन्याः पतिः पृथक् पृथगात्मीयोभैरवो यथा राज्ञी देव्याः भूतेश्वरः, शारिकादेव्या वामदेवः इत्यादिः।

(4) अभेदागमानां प्रवक्तारः स्वच्छन्दादयः ते चाष्टकाष्टकात्मानश्चतुष्षष्टिः परिगणिताः श्रीकण्ठीसंहितापद्योद्धरणतस्तन्त्रालोकविवेके।

द्र०:- (तं० आ० वि०, खं०1, पृ०,41-42)

तेषामागमानामपि तान्येव नामानि यानि भैरवाणामिति ज्ञेयं सुधीभिः।

द्र०:- **'भैरवागमाः'** इति।

भैरवागमः — अष्टाष्टकात्मकाः चतुष्षष्टिरागमाः। यथा—

"अन्यत्संक्षेपतो वक्ष्ये गीतं यत्परमेष्ठिना।
तच्च भेदैः प्रवक्ष्यामि चतुष्षष्टिं विभागशः।।
भैरवं यामलं चैव मताख्यं मङ्गलं तथा।
चक्राष्टकं शिखाष्टकं बहुरूपञ्च सप्तमम्।।
वागीशं चाष्टमं प्रोक्तमित्यष्टौ वीरवन्दिते।
एतत्सादाशिवं चक्रं कथयामि समासतः।।
स्वच्छन्दो भैरवश्चण्डः क्रोध उन्मत्तभैरवः।
असिताङ्गो महोच्छुष्मः कपालीशस्तथैव च।।
एते स्वच्छन्दरूपास्तु बहुरूपेण भाषिताः।
ब्रह्मयामलमित्युक्तं विष्णुयामलकं तथा।।
स्वच्छन्दश्च रुरुश्चैव षष्ठं चाथर्वणं स्मृतम्।
सप्तमं रुद्रमित्युक्तं वेतालं चाष्टमं स्मृतम्।।
अतः परं महादेवि मतभेदाञ्छृणुष्व मे।
रक्ताख्यं लम्पटाख्यं च मतं लक्ष्म्यास्तथैव च।।
पञ्चमं चालिका चैव पिङ्गलाद्यं च षष्ठकम्।
उत्फुल्लकं मतं चान्यद्विश्वाद्यं चाष्टमं स्मृतम्।।
चण्डभेदाः स्मृता ह्येते भैरवे वीरवन्दिते।
(अत्र भैरवे इति पदं विवेच्यम्)
भैरवी प्रथमा प्रोक्ता पिचुतन्त्रसमुद्भवा।।
सा द्विधा भेदतः ख्याता तृतीया तत उच्यते।
ब्राह्मी कला चतुर्थी तु विजयाख्या च पञ्चमी।।
चन्द्राख्या चैव षष्ठी तु मङ्गला सर्वमङ्गला।
एष मङ्गलभेदोऽयं क्रोधेशेन तु भाषितः।।
प्रथमं मन्त्रचक्रं तु वर्णचक्रं द्वितीयकम्।
तृतीयं शक्तिचक्रं तु कलाचक्रं चतुर्थकम्।।
पञ्चमं बिन्दु चक्रं तु षष्ठं वै नादसंज्ञकम्।
सप्तमं गुह्यचक्रं च खचक्रं चाष्टमं स्मृतम्।।
एष वै चक्रभेदोऽयमसिताङ्गेन भाषितः।
अन्धकं रुरुभेदं च अजाख्यं मूलसंज्ञकम्।।
वर्णभण्ठं बिडङ्गं च ज्वालिनं मातृरोदनम्।
कीर्तिताः परमेशेन रुरुणा परमेश्वरि।।
भैरवी चित्रिका चैव हंसाख्या च कदम्बिका।
हल्लेखा चन्द्रलेखा च विद्युल्लेखा च विद्युमान्।।
एते वागीशभेदास्तु कपालीशेन भाषिताः।
भैरवी तु शिखा प्रोक्ता वीणा चैव द्वितीयिका।।
वीणामणिस्तृतीया तु संमोहं तु चतुर्थकम्।
पञ्चमं डामरं नाम षष्ठं चैवाप्यथर्वकम्।।
कबन्धं सप्तमं ख्यातं शिरश्छेदोऽष्टमः स्मृतः।
एते देवि शिखाभेदा उन्मत्तेन च भाषिताः।
एतत्सादाशिवं चक्रमष्टाष्टकविभेदतः।।"
(तं० आ० वि०, खं०1, पृ०,41-43)

~ उत्कृष्टतरा— **शिवरुद्रागमेभ्य उत्कृष्टतरा भैरवागमाः, अभेददृष्टिप्रधानत्वात् तेषाम्। यथा—**

"दशाष्टादशधा स्रोतःपञ्चकं यत्ततोऽप्यलम्।
उत्कृष्टं भैरवाभिख्यं चतुःषष्टिविभेदितम्।।"
(तं० आ०37,16)

~ चतुष्षष्टिः — **ईशानतत्पुरुषसद्यो जाताघोराश्चत्वारो यदा चतुरवस्थाभाजः सन्तः दाक्षिणेनाघोरेण मिश्रीभवन्ति तदा तेषां विज्ञानस्य षोडशविधता। तेषां च पुनर्मिश्रणं दक्ष-वैसर्गिक- हार्द-स्वतन्त्रैश्चतुर्भिः शिवरूपैर्यदा भवति तदा तेषां विज्ञानं चतुष्षष्टिभेदभिन्नतया विजृम्भते। ते च चतुष्षष्टिरागमास्तस्य बहुप्रकारस्य विज्ञानस्य बोधका धारकाश्च सन्तोऽष्टाष्टकरूपेण विभक्ताः वेदितव्याः। यथा—**

"तदत्र तिमिराकारे भैरवीये **(अघोरनाम्नि)** वपुष्यलम्।
अन्तर्लीनतया भाति यावद् वक्त्रचतुष्टयम्।।
उद्बुभूषु तथोद्भूतं तिरोधित्सु तिरोहितम्।
इत्थं युगपदेवैतद् भिदा षोडशकात्मकम्।।

दक्षे वैसर्गिके हार्दे स्वतन्त्रे च शिवे विशत्।
अष्टाष्टकात्मकं शास्त्रं युगद्भैरवाभिधम्।।"
(मा० वि० वा०1,388-390)

~ तत्स्रोतांसि—— द्र०:- 'रुद्रागमाः'—— ~ तत्स्रोतांसि' इति।

~ परस्परं भिन्नाः —— यच्च शिवस्य वक्त्र-चतुष्टयमागमिकपरिभाषासु दक्षिणं, हार्दं, लिङ्गं परमं हृच्चेति चतुर्भिरभिधानैः परिभाषितं तदेव चतुष्टयम्-उदबुभूषुतया उद्भूततया तिरोधित्सुतया तिरोहिततया च प्रत्येकं चतुःप्रकारमिति सङ्कलनया षोडशविधम्। षोडशकमपि तन्मूलभूते वक्त्र चतुष्टयेऽनुप्रविशच्चतुष्षष्टितामुपयाति। इत्येवं चतुष्षष्टि- भैरवागमभेदाः। ते चाष्टाष्टसंख्यया वर्गीकृताः सन्तोऽष्टाष्टकतया प्रसिद्धाः। यथा——

"यच्चान्ते दक्षिणे हार्दं लिङ्गं हृत्परमं मतम्।
तदप्यन्तःकृताशेषसृष्टभावसु निर्भरम्।।
सर्वसंहारकवेन कृष्णं तिमिररूपधृत्।
भेदभावकमायीयतेजोंऽश-ग्रसनात्मकम्।।
तत्रान्तर्लीनतां याति यावद्वक्त्रचतुष्टयम्।
उद्बुभूषु तथोद्भूतं तिरोधित्सु तिरोहितम्।।
इत्थं युगपदेवैतद् भेदषोडशकात्मकम्।
दक्षे वैसर्गिके हार्दे स्वतन्त्रेऽथ शिवे विशत्।।
अष्टाष्टकात्मतच्छास्त्रं युगपद्भैरवाभिधम्।।"

द्र०:- (मा० वि० वा० 1,383-390)

अत्र मालिनीविजयवार्त्तिके, श्रीकण्ठी संहिता वाक्यजाते च यत् परस्परं मतभेद इव प्रतिभाति, तदागमिका संज्ञा भेददपद्वार्यम्। एकस्यास्यागममस्या तेकाभि, संज्ञाभिर्यत उल्लेखो दृश्यते।

(तं० आ० वि०, खं०1, पृ०,41)

भैरवानुकरणस्तोत्रम्—— कापि क्षेमराजस्य कृतिर्येदानीं-मंशत एव लभ्या। यथा——

"यदुक्तं मयैव श्रीभैरवानुकरणस्तोत्रे——
'शाक्ताण्डखण्डमध्ये विश्वरसमेवमहं समाहरामि सदा।
व्यञ्जयसि करकपालगरुधिरमिषादेतदिव मेऽन्तः।।"
(स्व० तं० उ०, प०14, पृ०,110)

"निःशेषाहृतसारा मय्येव जगत्स्थितिस्तदेकमये।
इति खट्वाङ्गकरङ्कोद्वहनच्छलतो ददास्याज्ञाम्।।"
(तदेव,पृ०,111)

"अन्तःशक्तिकृपाणीं व्यनक्षि संसृतिविभेदिनीमसिना।
निजशक्तिमहिमस्वीकृतसमस्तविश्वा हि वीरवराः।।"
(तदेव,पृ,112)

"भवभयहर्ता सोऽहं स्फराख्योऽवस्थितोऽस्मि मा भैष्ट।
इत्यास्फोटितखेटकदर्शनतो दिशसि नः स्वामिन्।।
भेदमयमखिलमेतन्निजशक्त्यैवाक्षिपामि संहर्तुम्।
इत्यङ्कुशधारणतः स्फुटयति परभैरवोऽस्माकम्।।
निजशक्तिपाशवलितश्चिद्भस्मना कल्यते महाकालः।
इति पाशधारणवशात्प्रथयानः कालकालस्त्वम्।।
कोदण्डारूढशरप्रदर्शनाद्ब्रह्मविष्णुरुद्रेशान्।
स सदाशिवकारणहरिणाञ्छक्त्या भिनत्सि युगपत्त्वम्।।"
(तदेव,पृ०,112-114)

"अभयेन च भयान्युन्मूलयता प्रकाश्यते सततम्।
विश्वानुग्रहकरणस्वभावता तव करण तेन (करेण दक्षेण)।
वरदेन पाणिना त्वं विश्वविभूतिप्रदत्वमभिनयसि।
न खलु परतत्त्वनिष्ठो वित्तमलैः स्पृश्यते जातु।।
वीणाघण्टाडमरूनुड्डामरदर्शयन्निदं दिशसि।
वृत्तित्रिभेदभिन्नं नादामर्शं निभालयन्नन्तः।।
ज्वलदिच्छादिकृशक्तित्रितयां तां सुन्दरां परां शक्तिम्।
देवानुकरोषि बहिस्त्रिशूलधारणमिषेण नित्यमपि।।
जगदखिलं मच्छक्त्या दमितं सर्वा व्यवस्थितीर्धत्ते।
इति दण्डधारणवशाद् व्यनक्ति चिद्भैरवोऽस्माकम्।
(तदेव,पृ०,115-117)

"इच्छादिकनिजशक्तिप्रकाशिताऽधःस्थगोचरत्रितयाम्
स्वामेव परां शक्तिं वज्रमयीं वहसि षडरां त्वम्
मुद्गरपरशू विभ्रद्बैन्दवनादानुकाररूपौ त्वम्।
भेदविभेदनशकलनपरत्वमीशान निर्दिशसि।।"
(तदेव,पृ०,117-118)

अत्र स्तोत्रे शिवस्यास्त्राद्युपकरणवर्णनमिषेण कासामपि मुद्राणां रहस्यानि सङ्केतितानि क्षेमराजेन।

भैरवाष्टकम् ~ मन्त्राः —— कपालेशमन्त्रादारभ्य विद्याराजमन्त्रान्तं प्रतिपादिता अष्टौ बीजपिण्डाः। यथा——

"भैरवाष्टकमेतद्धि परिवारः प्रकीर्तितः।"
(स्व०तं०1,86)

भैरवी—— (1) स्वातन्त्र्यरसावेशचमत्कारैकस्वभावा परा परमेश्वरीशक्तिर्भैरवी, जगद्भरणवमनरमणशीला परमशिवस्य परमेश्वरता। यथा——

"स्वातन्त्र्यैकरसावेशचमत्कारैकलक्षणा।
परा भगवती नित्यं भासते भैरवी स्वयम्।।
तस्याः स्वभावयोगो यः सोऽनिरुद्धः सदोदितः।
सदाशिवधरातिर्यङ्नीलपीतसुखादिभिः।।
भासमानैः स्वस्वभावैः स्वयं प्रथनशालिभिः।
प्रथते संविदाकारः स्वसंवेदनसारकः।।"
उद्ध०:- (प० त्री० वि०, पृ०,212)

(2) मातृकाक्रमे कवर्गादिशवर्गान्तैरक्षरैरभिव्यज्यमाना भिन्नभिन्नतत्त्वात्मकतया च प्रतिबिम्बिता सती तथा तथाऽऽभासमाना शिवस्य शक्तिः। यथा——

"कवर्गश्चटवर्गौ च तपया शस्तथैव च।।
संहारेण समोपेतौ योनिर्वै भैरवी स्मृता।"
(स्व० तं०1,32-3)

"कादीनां तु बीजश्यानीभावरूपत्वेन घनत्वात् बीजव्यङ्ग्यत्वेन व्यञ्जनशब्दव्यपदेश्यानामुक्तबीजसंसर्गेण जगत्कारणत्वात् योनिता, तथैव चेतिवर्गरूपतया संहारेण क्षकारेण, भैरवी।"

(स्व० तं० उ०, प०1, पृ०,28)

बीजरूपाणां स्वराणामाश्यानीभावः स्थूलतयावभासनम्, तद् एव घनत्वम्।

द्र०:- **'भैरवः'** इति।

~ मातृकासु— **कवर्गादयोव्यञ्जनवर्णवर्गाः भैरवीति संज्ञयोक्ता आगमे। संहार-पदेन क्षकारोऽभिप्रेतः। यथा—**

"संहारेण क्षकारेण"

(स्व० तं० उ०, प०1, पृ०,28)

द्र०:- **'भैरवी'**— (2) इति।

~ मेलापसिद्धानाम्– **स्वस्मिन् सर्वं संहरन्ती दृक्-शक्ति-प्रकाशस्थितिरूपा मुद्रा मेलापसिद्धानाम्। यथा—**

"भैरव्या-दृक्शक्त्या .....।"

(वि ०मै० उ०, पृ०,66)

"स्वस्मिन् या सर्वं संहरते सा भैरवी इति मेलापसिद्धानां मुद्रा।"

(तदेव,पृ०,67)

"स्वरूपसंहरणात् भैरवी .....।"

(तदेव,पृ०,67)

भैरवीभावः — **पराद्वैतभावे स्थितिः। यथा—**

"भैरवीभावेन भगवदद्वयज्ञानापत्त्या.....।"

(तं० आ० वि०, खं०1/2, पृ०,33)

भैरवीमुद्रा— (1) **उन्मिषितनेत्रोऽपि साधको यदा बहिरनिमेषां दृष्टिं सततगत्या पातयन्नपि न बाह्यं किमपि पश्यति, तस्यावधानदृष्टेः स्वात्मस्वरूपदर्शनपरत्वात्, तदासौ स्थितिरेव भैरवीमुद्रेति परिभाष्यते। यथा—**

"अन्तर्लक्ष्यो बहिर्दृष्टिर्निमेषोन्मेषवर्जितः।
इयं सा भैरवी मुद्रा सर्वतन्त्रेषु गोपिता।।'
इत्याम्नातभगवद्भैरवमुद्रा .....।"

(स्पं० नि०, पृ०,25)
(वि० भै०, पृ०,25)
(भा० वि०, पृ०,31)

"अन्तर्बहिर्भावयोगपद्येन पूर्णसंवित्स्वभावा भैरवी।"

(म० मं० प०, पृ०,90)

द्र०:- **'भैरवी'** ~ **'मेलापसिद्धानाम्'** इति।

भैरवीयमुद्रा —

द्र०:- **'भैरवीमुद्रा'** इति।

भैरवीसत्ता —

सत्तात्मकमसत्तात्मकमपि च विश्वं व्यावहारिकं जगद्वस्तुतो यन्मयमसौ पारमार्थिकी सत्तैव भैरवी सत्ता। यथा

"सैवासौ भैरवी सत्ता असत्तापि च यन्मयी।"

(प० पं०, 2)

भैरवीस्थितिः — **षण्णामप्यध्वनां यासौ परिपूर्णा चिदानन्दघना स्थितिर्यस्यामिच्छाज्ञानक्रिया अपि चिदानन्दात्मकतयैव स्थिताः, सैव ह्यनिर्वाच्या स्थितिर्भैरवी स्थितिः। तस्यां स्थितावस्थानमेव हि सर्वेषां सच्छास्त्राणां पार्यन्तिकं फलम्। यथा—**

"एकत्वमध्वनां षण्णां यत्र सा भैरवीस्थितिः।
पर्यन्ते सर्वतन्त्राणामवाच्या परमा गतिः।।
सा चिदानन्दमात्रात्ममग्रेच्छाज्ञानसत्क्रिया।
हृदयं देवदेवस्य भैरवस्याविभागभूः।"

(प० पं०4,5)

भैरवीदेवः — **यन्मयाः हि सर्वेऽपि देवा असौ परमेश्वरो भैरवो देवः। यथा—**

"स एव भैरवो देवस्सर्वे देवाश्च यन्मयाः।"

(प०पं०,2)

भोक्ता— **भोग्यचमत्कर्ता। स चाभेदपदे शिवः शक्तेश्चमत्कर्ता। भेददशायां च पशुप्रमाता प्राकृतविषयचमत्कर्ता। यथा—**

"एवं कलाख्यतत्त्वस्य किञ्चित् कर्तृत्वलक्षणे।
विशेषभागे कर्तृत्वं चर्चितं भोक्तृपूर्वकम्।।"

(तं० आ०9,213)

~ मायापदे— **सकलाख्यः प्रमातासंसृतौ कर्मफलभोगभाक् प्राणी।**

द्र०:- **'बुधः'** इति।

भोक्तृभोग्ये ~ परे पद—**शक्तिमान् भोक्ता, शक्तिश्च भोग्या तत एवानुत्तरानन्दयोर्भोक्तृत्वम्, इच्छादीनां च भोग्यत्वम्। यथा—**

"अनुत्तरानन्दमयो देवो भोक्तैव कथ्यते।
इच्छादिकं भोग्यमेव तत एवास्य शक्तिता।।"

(तं० आ०3,190-191)

"भोग्यत्वमेव हि शक्तित्वम्.....।"

(तं० आ० वि०, खं०2, पृ०,185)

~ तत्सृष्टिः — **भोक्तृभोग्ययोः परस्परसापेक्षत्वात् कलैव पुरुषतत्त्वं प्रकृतितत्त्वं च सममेव सूते। पुरुषो भोक्ता प्रकृतिश्चभोग्या। यथा—**

"सममेव हि भोग्यं च भोक्तारं च प्रसूयते।
कलाभेदाभिसन्धानादवियुक्तं परस्परम्।।
भोक्तृभोग्यात्मता न स्याद्वियोगाच्च परस्परम्।"

(तं० आ० 9, 215-216)

~ **मायापदे**— **तत्र भोक्ता पशुप्रमाता, भोग्या च प्राकृती सृष्टिः। यथा—**

"भोक्ता च तत्र देही शिवः गृहीतपशुभावः।"

(प० सा०, 5)

~ स्वरवर्णेषु— (1) **अनुत्तरानन्दयोर्भोक्तृत्वम्, तदपेक्षया इच्छादिचतुष्टयस्य भोग्यत्वम्। यथा—**

"यद्यपीच्छादीनां स्वापेक्षया भोक्तृत्वमस्ति, तथाप्यनुत्तरापेक्षयैषां भोग्यता विश्रान्तिमेति।"

(तं० आ० वि०, खं०2, पृ०,184)

(२) **इच्छोन्मेषयोर्यद् भोक्तृत्वम्, ईषणोनतयोश्च यद् भोग्यत्वं न तन्मुख्यम्। यथा।**

"यत् पुनरेषणाद्यपेक्षया भोक्तृत्वमुक्तं तन्न पारमार्थिकम्। भोगस्यैव सतः तथात्वेन कल्पनात्।"

(तं० आ० वि०, खं० 2, पृ०,185)

भोगः — (1) पूर्णस्य परमेश्वरस्य पूर्णतामयी पराशक्तिरेव भोगः इत्युच्यते अनयैव यतोऽसौ पञ्चकृत्यचमत्कारानन्दरसं भुङ्क्ते।

द्र०:- 'ऊर्मिः' इति।

" 'काली' इति।

(2) चमत्कारविशेषः प्रमातुः।

(3) शिवस्य परमेश्वरताया अभिव्यक्तिरेव तस्य भोगः, असावेव तस्य शक्तिः। तेन शक्तिरागमेषु भोग इत्युक्ता।

द्र०:- (तं० सा०, पृ०,27)

~ अवरः— **(1) भिन्नविषये भोक्तृत्वाभिमानः पशुप्रमातुः। यथा—**

"स्वविषयमात्रभोक्तृत्वाभिमानरूपस्य प्रत्ययस्य उत्पाद एव भोगः।

(स्पं० वि०, पृ०, 156)

" 'भोगं' मायावभासितानादिनिजकर्मोपचितवासनानुगुणसुखादि- संवेदनात्मकतया पर्यवसितं स्वविषयमात्रम्।"

(तदेव,पृ०,156)

(2) अहमस्य विषयस्य चमत्कर्तेति विकल्पज्ञानमूलोऽभिमानो जीवस्य। यथा—

"..... विकल्पो भोग उच्यते।।"

(ने० तं०19,147)

~ अस्फुटः — **(1) अनवधानोपहताविषयानुभूतिः।**

(2) गाढनिद्रोपहता वा। यथा—

"मार्गगमनादावविमृष्टदृष्टतृणशर्करावत् स्मर्तुमयोग्य इत्यर्थः।"

(तं० आ० वि०, खं०7, पृ०,103)

"गाढनिद्राविमूढोऽपि कान्तालिङ्गितविग्रहः।।
भोक्तैव भण्यते सोऽपि मनुते भोक्तृतां पुरा।"

(तं० आ०10,145-146)

असावस्ति भोगः, परं न स्फुटतयाऽभिमानविषयः।

~ जीवनफलम्— **विद्यमानायां भोगवासनायां भोगप्रवृत्तिर्निरोद्धव्या। निरुद्धा सत्यसौ बहुनिपातकारिणीं प्रतिक्रियां करोति। शैवेन मार्गेण शिवभक्त्या भोगाः प्राप्याः, भोक्तव्याश्च। क्रमेणैव भोगवासना शाम्यति। ततश्च मोक्षो लभ्यः साधारणैरधिकारिभिः तत एव भुक्तिमुक्ती उभे अपि शैवशास्त्रफलत्वेन जीवनफलत्वेन च स्वीकृते। अवराणां विषयाणां भोगेन यश्चमत्कारस्तदार्थमेव हि शिवेन स्वस्वातन्त्र्येणैव गृहीतः पशुभावः। अतः पशुभावे भोगा न सर्वथा हेयाः। लोकधर्ममर्यादानुसारं भोक्तव्या एव तावद् यावन्मोक्षमार्गे जनो न साफल्येन प्रवर्तेत शिवस्य प्रेरणया, यावच्च भोगवासनाप्रशमो न जायते। यथा—**

"स्वं पन्थानं हयस्येव मनसो ये निरुन्धते।।
तेषां तत्खण्डनायोगाद् धावत्युत्पथकोटिभिः।"

(म० वि० वा०2,109-110)

"अनादरविरक्त्यैव गलन्तीन्द्रियवृत्तयः।
यावत्तु विनियम्यन्ते तावत्तावद्विकुर्वते।।"

(मा० वि० वा०2,112)

"परभैरवसंविदात्मनः स्वयमेवोच्छलिता हि भोक्तृता।।"

(तदेव,155)

शिवादेव हि भोक्तृताया अप्युद्गमः सकलसृष्टपदार्थोद्गमध्ये।

~ तारतम्यतः — **उत्कृष्टभुवनेषु लभ्ये परापरेऽपि भोगे बहुधा तारतम्यं वर्तते, न केवलमपरे लौकिक एव। यथा—**

"सायुज्ये हि भोगानां सामस्त्यं, सालोक्यादौ तु व्यस्तत्वम्।"

(तं० आ० वि०, खं०10, पृ०,166)

~ परः — **परमेश्वरस्य स्वभावभूता पारमेश्वरी क्रिया यासौ निजस्य परमेश्वरत्वस्यानन्दं चमत्कुरुते, सृष्ट्यादिकरणेन च कृतकृत्यतां रसयति, साऽस्य भोक्तृतैव भोगः। यथा—**

"पूर्णतैवास्य शक्तिः .....
भोगः .....इत्यादि"

(तं० सा०, पृ०,27)

~ परापरः — **उत्कृष्टेषु भुवनेषु तत्रत्यस्यैश्वर्यस्य चमत्कारो, यदर्थं शिष्याय योजनिकाख्या दीक्षा विधीयते। स च भोगः शिवस्यापरिमिताद् भोगादवरः पशोश्च क्षुद्रतराद् भोगादुत्तरः।**

~ बन्ध एव— **सादाशिवोऽपि भोगः सूक्ष्मदृष्ट्या दृष्टः सन् बन्ध एव, का वार्ता स्वर्लोकादिभोगस्यैहिकस्य वा विषयभोगस्य। तेन प्रायशो भोगो नैव मोक्षः। कौलादिसाधनाक्रमेषु भोगमोक्षौ समकालमेव सिद्ध्यतः। परं तत्रापि भोगो भोग एव मोक्षश्च मोक्ष एव। यथा—**

"सादाशिवोऽपि यो भोगो बन्धः सोऽप्युचितात्मनाम्।"

(तं० आ०14,26)

केवलं शिवस्य योऽपरिमितो निजैश्वर्यभोगः स एव हि परमो मोक्षः। तदर्थमेवोत्सुका भवन्त्युत्कृष्टा भक्तजना ये सादाशिवं भोगमपि हेयमेव मन्यन्ते।

~ योग्यतानुसारी— **यस्यैव यं कश्चिद् भोगविशेषं प्रति योग्यता स एव हि तच्चमत्कारं रसयितुमलं भवति नान्यः। यथा—**

"उत्प्रेक्षामात्रहीनोऽपि काञ्चिद् कुलबधूं पुरः।
सम्भोक्ष्यमाणां दृष्ट्वैव रभसाद्याति सम्मदम्।।

तामेव दृष्ट्वा च तदा समानाशयभागपि।
अन्यस्तथा न संवित्ते कमत्रोयलभामहे।।
लोके रूढमिदं दृष्टिरस्मिन्कारणमन्तरा।
प्रसीदतीव मग्नेव निर्वातीवेति वादिनि।।"

(तं० आ०10,146-149)

"अमूढदशायामपि योग्यतया भोक्तृभोग्यभावदर्शनाल्लयाकलादीनामपि तथाभावोपपत्तेः सिद्धः पाञ्चदश्यादिभेदः।"

(तं० आ० वि०, खं०7, पृ०,105)

भोगकारिकाः — शैवसिद्धान्तशास्त्रस्य ग्रन्थविशेषो यस्य पङ्क्तयो जयरथेनोद्धृताः। यथा—

"यद् भोगकारिकाः—
वसुधादिकलाप्रान्ता भोगसाधनसंहतिः।
नियता प्रति भोक्तारं परिज्ञेया मनीषिभिः।।
अन्यथा हि सुखादीनां दृष्टो भेदो न युज्यते।
योक्ष्यते कर्मणो भेदान्न भेदे यदि योक्ष्यते।।
सम्बद्धा युगपत् सा तु कुर्वती कर्मकर्तृभिः।
कथं भिन्नानि कर्माणि कर्तृभेदात् करिष्यति।। इति।"

उद्धः:- (तं० आ० वि०, खं०6, पृ०,132)

भोग-मोक्ष प्रदीपिका — उत्पलवैष्णवविरचितः कोऽपि दर्शनग्रन्थ -आगमशास्त्रानुसारी। यथा—

"मयाऽप्युक्तं भोगमोक्षप्रदीपिकायाम्—
"कामाख्ये विषतत्त्वे निरञ्जनाहे क्रमाच्च सिद्धिः स्यात्।
सूर्ये सोमे ह्युदयात्तयोः शमाच्चेति शास्त्रसर्वस्वम्।। इति।"

(स्पं० प्र०, पृ०32,49)

भोगमोक्षौ— विषयरसस्य ऐश्वर्यस्य च चमत्कारो भोगः, स्वात्मपरमेश्वरताविमर्शरसचमत्कारो मोक्षः। उभौ जीवनफलतया शास्त्रप्रयोजनतया च स्वीकार्यौ। शैवसाधनासु विशेषतः कौलमार्गे साफल्यप्राप्तौ भुक्तिमुक्तिलाभौ सममेव भवतः। यथा—

"एतदेव ह्यस्य दर्शनान्तरेभ्यो वैशिष्ट्यं यद् भोगमोक्षद्वितीयानुभूतिः सामरस्यं नाम।"

(म० मं०, पृ०, 132)

शिवभावे स्थितिरप्यत्र शास्त्रे भोग एव सम्मतः। परमसौ भोगोऽनवच्छिन्नः सन् सर्वथापि परिपूर्णः। स एव च सर्वोत्कृष्टो मोक्षः। इति सा स्थितिर्भोगमोक्षोभयाभिधानेति विद्वद्भिर्न विस्मरणीयम्। परिमिततायामेव हि "अयं भोगोऽयं च मोक्षः" इति पृथक्ताव्यवहारः।

~योग्यताश्रयौ— शिष्यस्य वासनाः परीक्ष्य गुरुणा भोगवासनानुविद्धः शिष्यो भोगप्राप्तिमार्गे प्रेरणीयस्तद्रहितश्च मोक्षप्राप्तिमार्गे, उभयवासनावाँश्च क्रममोक्षमार्गे वा कौलमार्गे वेति शिवाज्ञा। यथा—

"योग्यतावशसञ्जाता यस्य यत्रैव वासना।
स तत्रैव नियोक्तव्यो दीक्षाकाले विचक्षणैः।।"

(मा० वि० तं०12,40)

परं शिवोक्ते भोगमार्गे प्रवृत्तोऽपि साधकोऽन्ततो गत्वा मुच्यत एव शिवानुग्रहाद्वा, भुवनेश्वरानुग्रहाद्वा। शिवशासनस्य पर्यन्ते मोक्षफलत्वमेव यतो निश्चितम्। यथा—

यो यत्र योजितस्तत्त्वे स तस्मान्न निवर्तते।
तत् फलं सर्वमासाद्य शिवयुक्तोऽपवृज्यते।।
अयुक्तोऽप्यूर्ध्वसंशुद्धिसम्प्राप्तभुवनेशतः।
शुद्धाच्छिवत्वमायाति दग्धसंसारबन्धनः।।"

(मा० वि० तं०12,41-42)

~ सामरस्यतः — ये खलु व्यवहारभूमावनुभूयमानाः सुखलवास्तेऽपि वस्तुतोऽनवच्छिन्नजगदानन्दरूपा एव, यद्यपि जनैस्तथा न चेत्यन्ते, शर्कराकणोऽपि रसमयः, तत्पण्डोऽपि तत्पर्वतोऽपि वा तथा। माधुर्यरसरूपत्वे न कोऽपि भेदः। भेदः परिमाणकृत एव। कणः क्षणचमत्कारीपिण्डो बहुतरक्षणव्रातं यावच्चमत्कर्तुमलम्, पर्वतश्च सुदीर्घदीर्घकालं चमत्कारदः। चमत्कारश्च वस्तुतः संविदानन्दाभिव्यक्तिमय एव, चेत्तथा जनैर्न विमृश्यते। सावधानाः पुनः साधकाः क्षणिकादिभोगद्वाराऽपि जगदानन्दपदवीं प्रविशन्त्यनायासमेव। यथा—

"यदि तु तत्रापि (सुखवृत्तिबुद्धौ) अन्तस्तमामनुप्रविश्यते तत् तद्द्वारेणैव तन्मूलवर्तिनि परमानन्दधाम्नि भवेदेव सततमुदयः, अत एव, 'महस्य' सर्वतोऽखण्डितपरिपूर्णानर्गल निरपेक्षस्वातन्त्र्यजगदानन्दमयस्य आ ईषद् भागाः सुखलक्षणा अंशा यतः।"

(प० त्री० वि०, पृ०,68)

भोजराजः — (1) श्रीदेवीपञ्चशतिकाशास्त्रव्याख्याता कोऽपि क्रमनयसाधनागुरुः, काल्युपासकः। यथा—

(क) "श्रीभोजराजनाम्नः षष्ठस्यापि सम्भवात्।"

(तं० आ० वि०, खं०3, पृ०,196)

(ख) "वन्दे श्रीभोजराजं गुरुवरमहितं पूज्यमर्हद्भिरन्तः।"

(तदेव,पृ०,131)

(2) **स एव मन्त्रशास्त्रगुरुत्वेनोक्तः देवीपञ्चशतिकाया व्याख्याकारः। यथा –**

"अत्र च श्रीमदते (द्भोज) राजस्य पाठव्यत्ययान्मतान्तरमिति तद्गुरव एव प्रमाणम्।"

(तं० आ० वि०, खं० पृ०, 154)

श्रीमदोजराजस्येति पाठोऽपपाठ एव प्रतिभाति। श्रीमद्भोजराजस्येत्येव पाठः साधीयान् प्रतीयते

भ्रमरवेधः— शाक्तवेध एव। यथा—

"एवं भ्रमरवेधेन शाक्तवेध उदाहृतः।"

(तं० आ०29,247)

भ्रान्तिः — अयथार्थं वस्तुनो ज्ञानम्, रज्जौ सर्पज्ञानमिवेति।

~ द्विविधा— जडे प्रमेयभूते स्थूलशरीरादावेवात्मताभिमान एका भ्रान्तिः—अनात्मन्यात्मताभिमानः। इयमेकप्रकाराभ्रान्तिः।

सर्वं वस्तुत आत्मैव, परं तथा नाभिमन्यते पशुभिः।

तदिदमात्मरूपे नीलसुखादाविदमित्यनात्मताभिमानो द्वितीयप्रकारा भ्रान्तिः। आत्मन्यनात्मताभिमानः। यथा—

"यदनात्मन्यपि तद्रूपाभासनं तत्पुरा निराकृत्य।
आत्मन्यनात्मरूपां भ्रान्तिं विदलयति परमात्मा।।"

(प० सा०, का०,39)

योगसिद्धौ सत्यां साधकः प्रथमं शुद्धां संविदमेवात्मतयाभिमनुते। ततो विश्वमपि प्रपञ्चमात्मतयैव पश्यति।

~ लक्षणतः — **स्वात्मनः परिपूर्णत्वस्याख्यातिर्भ्रान्तिः। यथा—**

"विश्वमोहिनी पूर्णत्वाख्यातिरूपा भ्रान्तिः।"

(प० सा० वि०, पृ०,65)

तेनान्यत्र शास्त्रेष्वभ्रान्तितया सम्मतं रज्जौ रज्जुज्ञानमपि शैवे भ्रान्तिरेव। सर्वम् "अहम्" इत्येव यज्ज्ञानं तदेवाभ्रान्तिरत्र।

~ व्यावहारिकी— कदाचित् पूर्वं तथात्वेन विमृष्टस्यानन्तरमतथात्वेन दर्शने सति प्राग्विमर्शस्यानुवृत्तिविच्छेदो, यथा शुक्तौ रजतविमर्शस्योच्छेदोऽपरस्मिन् काले। मूलभूता भ्रान्तिस्तु मायाप्रभावतोऽवास्तविकं दर्शनम्। यथा—

"तत्रापि तु स्वप्ने स्वप्न इव गण्डे स्फोट इव अपरेयं भ्रान्तिरुच्यते, अनुवृत्त्युचितस्यापि विमर्शस्यास्थैर्यात्।"

(ई० प्र० वि०, खं०2, पृ०,114)

भ्रान्तिवादः — जगदाभासोऽविद्याकृता भ्रान्तिरेवेति। नासौ सम्मतः शैवानाम्, यतः शिवशक्तिविलासकृत एवाविद्याया अप्याभासः। यथा—

"न चाप्यत्र भेदेष्वसत्येषु सत्यबुद्ध्या भ्रान्तिरूपा खण्डनाऽस्ति, वेदोक्तवत्।"

~ व्यावहारिकः — स

(शि० दृ० वृ०, पृ०, 127)

~ व्यावहारिकः —

च शुक्तौ रजतमिति, रज्जौ वा सर्प इति रूपो लोकव्यवहारे प्रसिद्धः।

मः- शाम्भवोपायात्मके मातृकाक्रमे स्वशक्तिविशेषं स्वात्मचित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं सत्तत्र पुरुषतत्त्वरूपतया आभासमानं, तदाभासखचितसुन्दरं च स्वात्मानं साक्षात्कारयन् वर्णविशेषः।।

मकारः —

द्र०:- 'षट्त्रिंशत्तत्त्वदीक्षा'

(10) 'विद्याराजस्य वर्णाः' इति।

~ प्रणवकलासु— **सा हि स्वात्मनो रुद्रत्वस्य साक्षात्कारिणीकला। यथा—**

"मकारो रुद्रवाचकः।"

(स्व० तं०4,264)

"संहारः सर्वभूतानां सृष्टिकारणमेव च।।
मकारो ह्यत्र वै रुद्रो वर्णसंघट्ट उत्तमः।"

(नं० तं०21,67-68)

~ रहस्यचर्यासु— **मांस-मत्स्य-मदिरा-मुद्रा-मैथुनानि विशेषतः कौलोपासना साधनानि। एतन्मकारपञ्चकम्।**

मकारत्रयम्— तच्च मद्यं, मांसं, मैथुनञ्चेति। एतत्त्रयस्यैव मुख्यत्वमावश्यकत्वञ्च कौले। इतरस्य द्वयस्य गौणत्वम् त्रयमेतत् स्वात्मानन्दोद्दीपकत्वेन प्रयोज्यं भवति। उद्दीप्ते स्वात्मानन्दे तत्रैवावधानसन्निवेशतः स्वरूपप्रत्यभिज्ञा सञ्जायतेऽभ्यासेन।

~ उपयोगनियमतः — **मकारत्रयं विना कौलिको विधिर्निष्फलः। तं विधिं विहायेन्द्रियलौल्यात् तत्र मकारत्रये प्रवर्तनं नरकायैवेति। यथा—**

"आनन्दकृत्त्रिमाहारास्तद्वर्जं चक्रयाजकाः।।
द्वयेऽपि निरये यान्ति रौरवे भीषणे त्विति।"

(तं० आ०29,99-100)

"विना गुरुं विना देवं मूढवत्परमेश्वरि।
मद्यमांसाशिनो नित्यं पशवस्ते न संशयः।।"

(ता० आ० वि०, खं०11/2,पृ,67)

"एवमेतत् कुलमार्गानुप्रविष्टेन सर्वथा स्वात्मानन्दव्यञ्जकतामात्रपरतया सेव्यं न तु तद्गर्धेन।"

(तदेव,पृ०,67)

मकारपञ्चकम्— मांसं, मत्स्याः, मदिरा, मुद्रा, मैथुनञ्चकौलिकसाधनोपयोगि। तत्र मुद्राऽपूपाद्याश्चणकवटकाद्याश्च पौष्टिकभोज्यपदार्थाः।

द्र०:- 'पञ्च मकाराः' इति।

मकाराः ~ कौले— **मांसं, मत्स्याः, मद्यं, मुद्राः, (अन्नात्मकखाद्यविशेषः), मैथुनं चेति मकारपञ्चकं कौलिकसाधनायामुपयोगि। विजितेन्द्रियाः वीरसाधका एव मकारसेसेऽधिकारिणो, न चपलेन्द्रियाः विषयलम्पटा इति ये मकारान् सवनेवमाना अपि स्वात्मसंविच्चमत्कार एव सततं सावधानास्तिष्ठन्तो न मनागपि ततश्चलन्ति, त एव मकारोपायायां कौलसाधनायाममीष्टं साफल्यं लभन्त इत्यवधातव्यमत्र विषये सुधीभिः।**

त्रिकोपासनायां मकारसेवनं भवतु वा मा वा भवतु, उभयथा तत्र विधिनिषेधाभावः। विनापि मकारसेवनं तत्र शाम्भवादियोगाभ्यासतो भुक्तिमुक्ती सिद्ध्येते। मकारसेवने सत्यपि न तत्र कोऽपि विघ्नो वा प्रायश्चित्तादि वा किमपि। सर्वशिवतादर्शने किं विधीयेत किम्बा निषिध्येत।

यथा—

"नात्र शुद्धिर्न चा शुद्धिर्न भक्ष्यादिविचारणम्।"

(मा० वि० तं०18,74)

"नास्मिन् विधीयते किञ्चिन्न चापि प्रतिषिध्यते।।"

(तदेव18,77)

"तत्त्वे निश्चलचित्तस्तु भुञ्जानो विषयानपि।
न संस्पृश्येत दोषैः स पद्मपत्रमिवाम्भसा।।"

(तदेव18,80)

"अदृष्टमण्डलोऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः।
स सिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः।।"
(प०त्री,18)

मङ्गलाशास्त्रम्— सर्वमङ्गलाख्यः आगमः। तन्नामोल्लेखो यथा—

"आगमे इति श्रीमङ्गलाशास्त्रे।"
(ई० प्र० वि० वि०, खं०3, पृ०,363)

मच्छन्दः — (1) मत्स्येन्द्रनाथः। कौलमार्गस्य प्रवर्तकः कलियुगे। देशभाषायां प्रसिद्धमस्यामिधानं 'मच्छन्द' इति। यथा—

"रागारुणं ग्रन्थिबिलावकीर्णं
यो जालमातानवितानवृत्तिः।
कलोम्भितं बाह्यपथे चकार
स्तान्मे स मच्छन्दविभुः प्रसन्नः।"
(तं० आ०1,7)

"कुलप्रक्रियायाः प्रक्रियान्तरेभ्यः प्राधान्यात् .....
.....
.....तदवतारकं तुर्यनाथमेव तावत् प्रथमं कीर्त्तयति।"
(तं० आ० वि०, खं०1, पृ०,24)

तुर्यनाथस्तुर्ययुगे कौलमार्गप्रवर्तको गुरुर्मत्स्येन्द्रनाथः।

(2) कलियुगे कुलप्रक्रियायाः पुनः प्रवर्तकः सिद्धः। 'मत्स्येन्द्रनाथ' इति चापि ख्यातः। भगवत्याः परभैरवीरूपायाः पराशक्तेरयं शिष्यः। कामरूपपीठाधीश्वरः (स्वकाले)। 'मीननाथ' इत्यप्युक्तोऽसावागमेषु यथा—

"भैरव्या भैरवात् प्राप्तं योगं व्याप्य तदा प्रिये
तत्सकाशात्तु सिद्धेन मीनाख्येन वरानने।।
कामरूपे महापीठे मच्छन्देन महात्मना।"
उद्धः- (तं० आ० वि०, खं०1, पृ०,24)

(3) मच्छानां पाशानां छेदको मच्छन्दः, स च कामाख्यापीठाधीश्वरो मत्स्येन्द्रनाथः। यथा—

"सकलकुलशास्त्रावतारकतया प्रसिद्धः।
मच्छाः पाशाः समाख्याताश्चपलाश्चित्तवृत्तयः। छेदितास्तु यदा तेन मच्छन्दस्तेन कीर्तितः।।
इत्याद्युक्त्या पाशखण्डनस्वभावो मच्छन्दः"
(तं० आ० वि०, खं०1, पृ०,25)

मठिकाः — कलिकाले प्रोच्छिन्न-शिक्षाक्रमस्य शैवदर्शनस्य सिद्धान्तपक्षे प्रयोगपक्षे चाभिनवानां गुरुशिष्यपरम्पराणां क्रमाः। ताश्च चतस्रो मठिकाः। दुर्वाससो मानसपुत्रेण त्र्यम्बकादित्येनैका मठिका स्वकीयमानसपुत्रद्वारा उत्तमाधिकारिणां हिताय प्रवर्तिता पराद्वैतदृष्टिमालम्ब्य, सा मठिका त्र्यम्बकमठिकेति प्रसिद्धा। तस्यामेव परम्परायां कश्मीरशैवदर्शनाचार्याः वसुगुप्तकल्लटसोमानन्दोत्पलदेवाभिनवगुप्तादयो गुरवः प्रकटीभूताः। अस्याश्च मठिकाया मुख्यः साधनप्रक्रियाक्रमस्त्रिकाचार इति प्रसिद्धः।

त्र्यम्बकादित्येनाऽपराऽपि परम्परा प्रवर्तिता दुहितृद्वारा। साप्यद्वैतदृष्टिप्रधानैव। तस्याः प्रसिद्धमभिधानम् 'अर्धत्र्यम्बकमठिकेति'। अनुमातुं शक्यते यदेतस्याः शिष्यसन्तानो न तथा विस्तारमायातो, यथा त्र्यम्बकमठिकायाः। तत एव तदपेक्षयेयं मठिकाऽर्द्धेति विशेषणेन विशिष्टतामुपयाता।

त्र्यम्बकादित्यो भगवतः श्रीकण्ठनाथस्यादेशमनुसृत्यैव पराद्वैतदृष्ट्या शैवशास्त्रप्रचारार्थं भूमिमवतीर्णः। अत्रावतीर्ण एव भगवता दुर्वाससा रहस्यशास्त्रप्रक्रियायाः सङ्क्रामणेनानुगृहीतः। एतस्याः अर्द्धत्र्यम्बकमठिकायाः एकः प्रसिद्धो गुरुरासीत् शम्भुनाथो, यदनुग्रहेणैवाचार्याभिनवगुप्तस्य ज्ञानविज्ञाने परिपूर्णतामायाते। तस्य शम्भुनाथस्य मठिका काङ्गडायां वज्रेश्वर्याः पीठे प्रतिष्ठिताऽभवत्। असौ "त्रिकार्थाम्भोधिचन्द्रमाः" सन्नपि विशेषतया कौलाचारप्रक्रियासु रुचिमानभूत्।

भगवतः श्रीकण्ठनाथस्यैवादेशेन मध्यमाधिकारिणामुपकृतयेऽपरः सिद्धः श्रीनाथाख्योऽपि भुवमवतीर्णः कलौ युगे। स च द्वैताद्वैतदृष्टिमालम्ब्य शैवशास्त्ररहस्यान्युपदिदेश। तस्य मठिका तावत् श्रीनाथमठिकेति प्रसिद्धा अद्यतनाः शोधविद्वांसः श्रीनाथमिमम् अग्रे च वर्णयिष्यमाणम मर्दकनाथमपि दुर्वासस एव शिष्यद्वयं समुद्बोषयन्तः सर्वत्र दरीदृश्यन्ते। परमस्माभिरद्यावधि तयोर्भगवद्दुर्वाससः शिष्यत्वस्य साधकं किमपि लिखितं प्रमाणं क्वापि शैवशास्त्रेषूपलब्धम्। ततस्तत्संशयितमेव। उभयोरपि तयोः मठिकयोर्गुरवोऽभिनवगुप्तस्य काले कश्मीरकावेवाभूताम् तेन च कश्मीरेष्वेव ते मठिके विकासमुपयाते इति तर्क्यते अभिनवगुप्तस्यकालेश्रीनाथमठिकायागुरुर्भूतिराजतनयो भट्टेन्दुराजोऽभवत्।

भगवतः श्रीकण्ठनाथस्यैव प्रेरणयाऽवरकोटिभाजामधिकारिणां हिताय सिद्धोऽमर्दको भुवमवततार, यो द्वैतदृष्टिमालम्ब्य शैवशास्त्ररहस्यप्रक्रियाः उपदिदर्श। अभिनवगुप्तकालेऽमर्दकमठिकागुरुरेकनाथपुत्रः श्रीवामनाथः कश्मीरानलञ्चकार।

अस्ति दक्षिणदेशे दन्तकथापरम्परा यदमर्दकस्यैव शिष्यसन्ताने केऽपि सिद्धा गोदावरीतीरे मन्त्रकालीदेवीपीठे मन्त्रकालेश्वरं नाम शिवमन्दिरं शैवं च मठं स्थापयामासुः। चोलवंशीयो राजराजो नाम नृपतिस्तस्मादेव मठात् कानपि शैवान् सिद्धान् तमिलदेशं नीतवान्। त एव तत्र शैवसिद्धान्तशास्त्रस्य विशेषं प्रचारं कृतवन्त इति।

इदानीं कश्मीरेषु तावदेकैव त्र्यम्बकमठिकापरम्परा चलति। अपरं मठिकात्रयं न क्वापि दृश्यते कश्मीरेषु वा कांगडायामपि वा। उक्तमेता मठिका अधिकृत्य—

"श्रीसन्ततिस्त्र्यम्बकाख्या तदर्धामर्दसंज्ञिताः।
इत्थमर्द्धचतस्रोऽत्र मठिकाः शङ्करे क्रमे।।" इति
(तं० आ०4,266)

मठिकाचतुष्टयस्यापि विषये विस्तरतो यदुक्तं तत् स्वे-स्वे स्थाने द्रष्टव्यं सुधीभिः।

मण्डलम् : — (1) शिशुरक्षाकरो रेखाविन्यासविशेषोऽपि मण्डलसंज्ञः। यथा—

"भस्मना रोचनाद्यैश्च अस्त्रप्राकारचिन्तनम्।"

(तं० आ०, वि०, खं०10, पृ०,222)

(2) शरीरस्थनाडीचक्राणि चापि मण्डलानि। कुण्डलिनीयोगेन साक्षात्कार्याणि तानि। यथा—

"मण्डलानि शरीरनाडीचक्रानुचक्ररूपाणि।"

(प० त्री० वि०, पृ०,251)

(3) विविधवर्णाभिः समविषम-मण्डल-द्विचन्द्राद्याकाराभी रेखाभिरलङ्कृतं यागस्थानं तान्त्रिके यागविधौ। यथा—

"मण्डलं त्रित्रिशूलाब्जचक्रं..... इत्यादि।"

(तं० आ०,21,19)

(4) देवताधिष्ठानभूतं चक्रं तत् पूजनाद् देवतास्तुष्यन्ति। यथा—

"मण्डलं-देवताचक्रम्।"

(प० त्री० वि०, पृ०,251)

(5) मुद्राया आप्यायनकरः साधनांशः। यथा—

".....मुद्रा तदाप्यायनकारकम्।।
मण्डलं सारमुक्तं हि .....।"

(तं० आ०,37,20-21)

(6) यागमण्डपमध्ये तान्त्रिक-देवतानां पूजनाय विविधवर्णैः पिष्टैर्लिख्यमाना हृदयहारिणी कापि रेखा-अर्धमण्डलकमलदलादिरचना यां दृष्ट्वैव देव्यस्तुष्यन्ति साधकाश्चतन्मयतां लभन्ते। भुक्तिमुक्तिभाजोऽपि सम्भवन्त्यनायासम्। तन्त्रालोके एक त्रिंश आह्निके सविस्तरं प्रतिपादितोऽपि मण्डलविधिर्न स्पष्टतां याति, मण्डलचित्राणामभावात्। यथा—

"दृष्ट्वैतन्मण्डलं देव्यः सर्वा नृत्यन्ति सर्वदा।।
अनर्चितेऽप्यदीक्षेण दृष्टे दीक्ष्येत मातृभिः।"

(तं.आ.31,41-42)

द्र० ~ 'तदुपासनाफलम्' इति।

~ असंख्यभेदम्— ..... **असंख्यातानि मण्डलानि तान्त्रिकेषु यागेषु। यथा—**

"तद्भेदान्मण्डलानां स्यादसंख्यो भेदविस्तरः।"

(तं० आ०31,36)

~ तज्ज्ञः— **मण्डलोपासनाया रहस्यं जानानः साधकः।**

~ तत्त्रयम् (मुख्यम्)— **रेखाविन्यासादिसाध्यम्-तच्च मध्यशूलं, त्रित्रिशूलं, नवशूलं चेति। यथा—**

"यत्तन्मध्यगतं मुख्यं मण्डलानां त्रयं स्मृतम्।।
मध्यशूलं त्रित्रिशूलं नवशूलमिति स्फुटम्।।"

(तं० आ०31,8-9)

~ तत् पीठम्— **शिवाभिधसारग्राही रेखाविन्यासविशेषो मण्डलम्। मण्डलोपासनाप्रधानो गुरुशिरुष्यपरम्परासमूहो मण्डलपीठम्। यथा—**

"मण्डलं सारमुक्तं हि मण्ड-श्रुत्या शिवाह्वयम्।"

(तं० आ०37,21)

"मण्डं शिवाह्वयं सारं लातीत्यर्थः।"

(तं० आ० वि०, खं०12, पृ०,399)

~ तदुपासनाफलम्— **वर्णितं यथा—**

"तस्मादेनं महायागं महाविभवविस्तरैः।।
पूजयेद् भूतिकामो वा मोक्षकामोऽपि वा बुधः।
अस्य दर्शनमात्रेण भूतवेतालगुह्यकाः।।
पलायन्ते दशदिशः शिवः साक्षात् प्रसीदति।
मन्दशक्तिबलाविद्धोऽप्येतन्मण्डलपूजनात्।।
सततं मासषट्केन त्रिकज्ञानं समश्नुते।
यत्प्राप्य हेयोपादेयं स्वयमेव विचार्य सः।।
देहान्ते स्याद् भैरवात्मा सिद्धिकामोऽथ सिद्ध्यति।"

(तं० आ०31,46-50)

~ तद्यागरहस्यम्— **मण्डलसन्निवेशे जगच्चक्रभावना, तदङ्गेषु तत्तद्देवता भावना, सम्पूर्णे च मण्डले शिवात्मिकायाः पराशक्तेर्भावना विधीयते साधकैः। तया च मलप्रक्षालनपूर्वकं तेषां शिवतायाः समावेशः समुन्मिषति। यथा—**

"समस्तमन्त्रचक्राद्यैरेवमादि-प्रयत्नतः।
षट्-त्रिंशत्तत्त्व-रचितं त्रिशूलं परिभावयेत्।।
विषुवत्स्थेन विन्यासो मन्त्राणां मण्डलोत्तमे।
कार्योऽस्मिन् पूजिते यत्र सर्वेश्वरपदं भजेत्।।"

(तं० आ०31,129त:131)

~ तन्महिमा (क्रियापक्षे)— **"मण्डलस्यास्य यो व्याप्तिं देवतान्यासमेव च।**

वर्तनां च विजानाति स गुरुस्त्रिकशासने
तस्य पादरजो मूर्ध्नि धार्यं शिव-समीहिना।।"

(तं० आ०31,50-51)

~ तन्माहात्म्यम् (फलतः)— **मण्डलदर्शनादेव देव्यस्तुष्यन्ति, अदीक्षितोऽपिमण्डलदर्शने सति मातृकाभिर्दीक्ष्येत।**

द्र० **'मण्डलम्' 4 इति।**

द्र० ~ तदुपासनाफलम्' **इति च।**

~ प्रकारभेदभिन्नम्— **प्रतिशास्त्रमनेकप्रकारक एव हि मण्डलनिर्माणविधिः।**

यथा—

"प्रतिशास्त्रमनेकानि मण्डलानि सन्ति।"

(तं० आ० वि० खं०12, पृ०226)

~ बहुप्रकारकम्— **एकशतं मण्डलानां सिद्धातन्त्रे प्रतिपादितम्। यथा—**

"एकस्मात् प्रभृति प्रोक्तं शतान्तं मण्डलं यतः।।
सिद्धातन्त्रे मण्डलानां शतं तत्पीठ उच्यते।"

(तं० आ०31,7-8)

"अधुना मण्डलं पीठं कथ्यमानं शृणु प्रिये।
मण्डलानां शतं प्रोक्तं सिद्धातन्त्रे वरानने।।
तेषां नामानि वक्ष्यामि शृणुष्वैकाग्रमानसा।
मण्डलानां वरारोहे शतं यावदनुक्रमात्।।
इत्युपक्रम्य—
'हाहारावं घनं रुद्धं सामयं चित्रकण्टकम्'।
इत्यादि
'मध्यशूलं त्रित्रिशूलं नवशूलं तथैव च।'
इति मध्यम्
'अश्वमेधसमायुक्तं मण्डलानां शतं मतम्'।
इत्यन्तम्।"
(उद्ध० सिद्धातन्त्रतः तं० आ० वि० खं02, पृ0228)

मतङ्गतन्त्रम्— (1) यच्छ्रीकण्ठीसंहितायां पारमेश्वरं तन्त्र परिगणितं रौद्रागममध्ये तदेव मतङ्गतन्त्रमिति मातङ्गतन्त्रमिति चोच्यते। क्वचिद्विस्तरतो मतङ्गपारमेश्वर-तन्त्रमिति नामोल्लेखोऽपि लभ्यतेऽस्य। यथा—

"श्रीमन्मतङ्गशास्त्रे च .....।'
(तं० आ०8,379)

"श्रीमतङ्गपारमेश्वरेऽस्य तथा समयः कृतः।"
(तं० आ० वि० खं०5, पृ०247)

द्र० तं० आ०-1-46; 1-202तः204,225; 8-320;379; 9:6, 15-9; 23-89; 25-24

तं०आ०वि०खं०1, पृ०85; खं०1, पृ०244; खं०5,पृ० 217-18; खं०5,पृ०247; खं०6पृ०6; खं०10,पृ०324;तः327; स्पं०प्र०,पृ०28; स्व०तं०उ०प०1,पृ०40; प०5,पृ०50; प०10, पृ०452, 470तः71,पृ०498

मतदेवः — कौलसम्प्रदायसम्बन्धी कोऽपि ग्रन्थः।

द्र0 (म0मं0प0,पृ,129)

"यदुक्तं श्रीमतदेवे-
यस्येच्छातः सतां देविजीवन्मुक्तिः क्षणाद् भवेत्।
तस्याहं वच्मि दिव्यौघं जीवन्मुक्तिप्रवृद्धये।। इति"
(म0मं0प0,पृ0129)

मतरहस्यतिलकम्— मतशास्त्रस्य किमपि पुस्तकं भवेत्। यथा—

श्रीमतरहस्यतिलकेऽपि उत्तमनयाधिकारिणां संवृत-निजसदाचाराणां लोकप्रसिद्धिरक्षायै तदाचारापरित्यागोऽपि आम्नातः, तथाहि—

'लोकाचारस्य विच्छेदो न कर्त्तव्यः कदाचन।
गुह्यं गुह्यतरं कार्यं बाह्यं बाह्यान्तरं तथा।।"
(ज0 म0 वि0, पृ022)

मतशास्त्रम्— मताष्टकमध्ये परिगणितं शास्त्रं भैरवागमात्मकम्। उद्धृतं मतशास्त्रं तन्त्रालोके। यथा—

"उक्तं च श्रीमते शास्त्रे"
(तं0 आ022,45)

"श्रीमन्मतमहाशास्त्रे तदुक्तं विभुना स्वयम् इत्यादि।"
(तदेव 26,74)

मतशास्त्रं च कुलशास्त्रादप्युत्तमं परं त्रिकादवरमेव। यथा—

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम्।।"
(उद्ध0 प0 त्री0 वि0, पृ092)

द्र0 **'मताचारः' इति।**

मताचारः — कुलाचार सदृक्षो मताष्टकसमाख्येषु भैरवागमेषूपदिष्टः कश्चनोत्कृष्टतरो विधिनिषेधतिरस्कारी स्वात्मशिवोपासनपद्धतिप्रकारः। अस्याचारस्य ग्रन्था इदानीं नैव लभ्यन्ते क्वापि। यथा—

"समयाचारसद्भावः पाल्यत्वेनोपदिश्यते।।
भेदप्राणतया तत्त त्यागा तत्त्वविशुद्धये।
समयादिनिषेधस्तु मतशास्त्रेषु कथ्यते।
निर्मर्यादं स्वसम्बोधं सम्पूर्णं बुद्ध्यतामिति।"
(तं0 आ04,261-263)

द्र०:- **'मतशास्त्रम्' इति।**

मत्तगन्धः — गुदस्थानम्, मूलाधारचक्रम्। यथा—

"इह खलु योगी मत्तगन्ध-सङ्कोचादि क्रमेण प्राणस्य तिर्यक्प्रवाहनिरोधात् .....।"
(तं0 आ0 वि0 खं03, पृ0358)

"हृदयान्मत्तगन्धपर्यन्तं प्रसरणेऽस्यैवं प्राधान्यमित्येवमुक्तम्। तदुक्तम्—

'अपानस्यापि संचारे सर्पितेयं सुविस्तृता।
गुदं यावत्ततो वायुरधस्तादुपयाति हि।।"
(उद्ध० तं० आ० वि० खं०4/1, पृ0155)

"मूलमिति मत्तगन्धात्मकम्।"
(तं0 आ0 वि0 खं012, पृ0284)

मत्स्यः — मण्डलांशरूपाभी रेखाभिर्निर्मीयमाणा पद्मदलाकारा मत्स्याकृतिर्मण्डले। यथा—

"..... तावता दद्यात् सूत्रेण भ्रमयुग्मकम्।
मत्स्यसन्धिद्वयं त्वेवं दक्षिणोत्तरयोर्भवेत्।।"
(तं० आ० 31,3)

मत्स्योदरदशा— स्पन्दनात्मिका दशा। यथा—

"मत्स्योदरदशाजुषि इत्यनेन सर्वदैवायं स्पन्द-दशाधिशायी।"
(तं० आ० वि० खं०3, पृ०, 362)

मत्स्योदरी— जलादुद्धृतस्य मत्स्यस्योदरं यद्वत् परिस्पन्दते सततगत्या, तद्वत् पारमेश्वरी शक्तिरपि विश्वोत्तीर्णतां विश्वमयतां च क्षणे क्षणे विमृशन्ती तथा स्पन्दमाना सती 'मत्स्योदरी'त्युच्यते।

द्र० **'स्पन्द' इति।**

मदनिका— कालीनये शिवानन्दनाथस्य द्वितीया शिष्या,

उत्तरपीठे पीठेश्वरी, श्रीभानुकाचार्यस्य चक्रभानोः गुरुः। यथा—

".....श्री भानुकाभिधानो द्वितीयः .....सममेवोपदेशं पीठेश्वरीभ्यः ..... श्री.....मदनिका .... भ्यः प्राप्तवन्तः।"

(क्र०के०उद्ध० तं०आ०वि०खं०3, पृ०,192)

मद्यम्— कौलिकोपासनोपयोगी मादकं पेयम्।

~चतुष्प्रकारम्— **(1) वारुणी, मदिरा, कादम्बरी, जगलश्चेति चत्वारो भेदा मद्यस्य। यथा—**

"प्रसन्ना वारुणी ज्ञेया परिस्रुन्मदिरा तथा।
कादम्बरी घनसुरा तदधो जगलः स्मृतः।।"

(उद्ध० तं० आ० वि० खं०9, पृ०, 39)

(2) पैष्टी, गौडी, माध्वी, त्रिविधा तु कृत्रिमासुरा। तत उत्कृष्टस्तु मार्द्वीकः। स च द्राक्षा रसोद्भवः। यथा—

"पैष्टी गौडी तथा माध्वी कृत्रिमा तु सुरा स्मृता।
स्त्री-पुनंपुंसकतया साधके भोगदायिका।।"

(उद्ध० तं० आ० वि० खं० 11/2, पृ०, 9)

"मार्द्वीकः सहजस्त्वेकस्तत्तेजो भैरवात्मकम्।
न स्त्री नपुंसकं वापि न पुमान् परमो विभुः।"

(तदेव,पृ010)

"गौडी माध्वी तथा पैष्टी ऊर्ध्वे आनन्दभैरवः।"

(तदेव,पृ०,10)

~ निषिद्धम्— **मायाक्षेत्रे पतितानां पशुप्रमातृणां कृते लोकस्थितिरक्षणार्थं भेदमयेष्वेव धर्मादिशास्त्रेषु प्रायशो मद्यादिनिषेधः। परं क्वापि सौत्रामण्यादौ विधिरपि। यथा—**

"लोकस्थितिं रचयितुं मद्यादेः पशुशासने।।
प्रोक्ता ह्यशुद्धिस्तत्रैव तस्य क्वापि विशुद्धता।"

(तं० आ०15,170-71)

तत्र मद्यस्थाने ब्राह्मणादिभिः क्रमेण चन्दनरसः कुङ्कुमद्रवः, कर्पूरजलं मद्यमेव च क्रमेणोपयोज्यम्। यथा—

"मलयेन तु विप्राणां क्षत्राणां कुङ्कुमेन च।
कर्पूरवारि वैश्यानां शूद्राणामलिना प्रिये।।"

(उद्ध0 तं0 आ0 वि0 खं011/2, पृ011)

~ विहितम् (अपवादतया) —

"दीक्षा-काले तु विप्रस्य क्षत्रियस्य रणारुहे।
वैश्यस्य क्षितिमाङ्गल्ये शूद्रस्यान्त्येष्टिकर्मणि।।"

(उद्ध० तदेव, पृ०, 11)

"सौत्रामण्यां ब्राह्मणानां पानार्थं स्मृतमध्वरे।
रणाध्वरे क्षत्रियाणां वैश्यानां क्षितिकर्मणि।।
महोत्सवे तु बन्धूनां मित्राणां च समागमे।
श्मशानान्ते च शूद्राणां विवाहे पुत्रजन्मनि।।
पानभेदमिमं भद्रे जन्तूनां मूढचेतसाम्।"

(उद्ध० तदेव, पृ०,12)

~ विहितं (विशेषतः)— **शिवशक्तिरूपाणामिन्द्रियदेवीनां कृते आनन्ददायकत्वेन रहस्यप्रक्रियया चानन्दचमत्काररसमार्गेण शिवदशावाप्तिद्वार-भूतत्वेन च मद्यं शिवमयं गण्यते रहस्यागमोक्ते चर्याक्रमे। यथा—**

"शिवशक्त्योर्न भेदोऽस्ति शक्त्युत्थास्तु मरीचयः।
तासामानन्दजनकं मद्यं शिवमयं ततः।।
प्रबुद्धे संविदः पूर्णे रूपेऽधिकृतिभाजनम्।"

(तं0 आ015,74-75)

सद्यः आनन्दातिरेकोद्दीपकत्वेनादियागोचितविशेष-सामर्थ्योद्बोधनेन च परिपूर्ण-चिदानन्दप्रवेशात्मकाय प्रयोजनाया-तीव हितं मद्यं, तत एव प्रशस्तमागमेषु। परं दीक्षिता वीरसाधका एवात्राधिकारिणो, न सम्प्रदायबाह्या, अदीक्षिता, विषयलम्पटा वा अजितेन्द्रियशक्तयः स्वात्मचिदानन्दानुभूतिहीनाः पशुजना इति स्मर्तव्यं सुधीभिः।

मधु— द्राक्षासमुद्भवं मद्यम् यथा—

"मार्द्वीकं मधु विज्ञेयम्
(उद्ध० आयुर्वेद ग्रन्थात् कुतोऽपि)

(तं० आ० वि० खं० 9, पृ०, 39)

मरपाकक्रमः — मातृकायोगभ्याससाहाय्येनोपाधिरूपाणां मायादितत्त्वा- नामेकैकशः स्वात्मसंविच्छक्तिप्रतिबिम्बरूपता-दर्शनेन शनैः शनैः प्रशमनस्य प्रकारः यथा—

द्र० **'उपाधिप्रशमः'** ~शान्त्या' इति।

मधुराजः — गुरुनाथपरामर्श-काव्यकृत् कोऽपि दाक्षिणात्यो यतिः। दक्षिणे मदुरायी नगर वास्तव्योऽयम्। यथा—

"कक्षारोपितभिक्षः भिक्षातत्परकन्था कमण्डलुर्दण्डी।
रक्षावगुण्ठिततनुर्व्याख्यायतनेषु माधुरश्चरति।"

(गु० ना० प० 42)

केचिद् विद्वांस एनं केरलदेशीयं मन्यन्ते, तत्रैव शाक्त-साधनाक्रमविशेषस्य विकासात्। परमयं स्वात्मानं माधुरं कथयति, येन मदुरायिनगर वास्तव्यत्वमस्य तर्क्यते।

~ कश्मीरेषु— **मधुराजः स्वायुषः सप्ततितमे वर्षे कश्मीरानाजगाम, अष्ट सप्ततितमे च वर्षे पुनः स्वदेशं प्रयातः। यथा—**

"चतुरधिकसप्ततितमे वर्षे मम वर्तमानेऽस्मिन्।
पितुरधिगतमपि बाल्येऽप्यभिनवमिव भाति गुप्तमद्यापि।"

(गु० ना० प०,38)

"अद्याष्टसप्ततितमे वयसीह वर्ते।"

(गु० ना० प०,39)

कश्मीरेष्वसावभिनवगुप्तस्याश्रमे कतिपयवर्षाण्युवास। तत एव तेनाश्रमस्य तत्पतेश्च वर्णनं कृतं गुरुनाथपरामर्शे। वरदराजोऽस्य सुतः।

मधुवाहिनी— शिवसूत्रेषु भट्टकल्लटेन निर्मिता काऽपि व्याख्या येदानीं न लभ्यते। केवलमुल्लेखोऽस्याः

कृतोऽभिनवगुप्ताचार्येण। यथा—

"तदुक्तमिति-शिवसूत्रवृत्त्योर्मधुवाहिनीतत्त्वार्थचिन्तामण्या-भट्टकल्लटपादैः।"

(ई० प्र० वि० वि० खं० 2, पृ०, 30)

अथवेदमपि सम्भवति यत् स्पन्दकारिकाया एव नामान्तरं भवेन्मधुवाहिनीति। यतः शिवसूत्रागमस्य प्रथमे खण्डत्रये यद्विज्ञानमुपदिष्टं तदेव स्पन्दकारिकाभिर्व्याख्यातं वर्तते।

द्र० (शि० सू० वा० भा०, पृ०3) **इति।**

मध्यः ~ शक्तिपातः — **स्वल्पेन वा दीर्घेण वा क्रमेण भुक्तिपूर्वकं मुक्तेः प्रदाता शक्तिपातः, न सद्यः परमोक्षदः। यथा—**

द्र० **'शक्तिपातः'** ~ मध्यः' **इति।**

~ तत्तारतम्यम्— **त्रयः प्रकारा मध्यशक्तिपातस्य तीव्रमध्यः, मध्यमध्यः, मन्दमध्यश्चेति। त्रिष्वपि मध्यशक्तिपातेषु चिरशीघ्रादिकृतं, भोगबाहुल्याल्पत्वादिकृतं च भूयो वैचित्र्यं भवति। यथा—**

"तत्रापि तारतम्यस्य सम्भवाच्चिरशीघ्रता।।
बह्वल्पभोगयोगश्च देहभूमाल्पताक्रमः।"

(तं० आ०13,244-45)

~ तत्फलम्— **मध्य शक्तिपातपात्रतां यातो योगी ऊर्ध्वेषु लोकेषु भोगान् क्रमेण भुक्त्वैवान्ते परिपूर्णं शिवभावं प्रविशति। यथा—**

"सर्वोत्तीर्णं रूपं सोपानपदक्रमेण संश्रयतः।
परतत्त्वरूढिलाभे पर्यन्ते शिवमयीभावः।।"

(प० सा० का० ,97)

मध्यतीव्रः ~ शक्तिपातः — **प्राणी तु वस्तुतः परमेश्वर एव। परं मलकृतात् संकोचात् स शिवत्वं निजं न संवेत्ति, न च प्रकाशते शिवत्वेन ततः परमेश्वर एव तस्मिन्ननुग्रहशक्तिपातं कुरुते, तस्य स्वात्मशिवभाव-प्रत्यभिज्ञार्थम्। स च बहुप्रकारः शक्तिपातः। तत्र मध्यतीव्राच्छक्तिपातात् परमेश्वराभिन्न- सद्गुरुकृतादनुग्रहाद्, यस्य शिष्यस्य मलकृतः सङ्कोचो निवर्तते, स देहे तिष्ठन्नपि शिवतया प्रकाशते स्वात्मानं च तथैव विमृशति। इति सद्यस्तस्य जीवन्मुक्तताऽऽविर्भवति। किञ्च रुद्रशक्ति-समावेशस्य पञ्च चिह्नान्यपि तस्मिन्नाविर्भवन्ति। यथा—**

"अज्ञानरूपता पुंसिबोधः सङ्कोचिते हृदि।
सङ्कोचे विनिवृत्ते तु स्वस्वभावः प्रकाशते।।
रुद्रशक्तिसमाविष्टः इत्यनेनास्य वर्ण्यते।
चिह्नवर्गो य उक्तोऽत्र .....।।"

(तं० आ०13,213-14)

बोध इति सङ्कोच-सम्भिन्न-पशुत्वबोधः स एव हि पुंसोऽज्ञानरूपता।

~ तारतम्यतः — **मध्यतीव्राच्छक्तिपातात् समुदित-स्वस्वरूप-साक्षात्कारवतां योगिनां मध्ये कश्चित् स्वमुक्तिमात्रे प्रभवति कश्चिदपरानपि मोचयितुं शक्तो भवति, कश्चिदल्पमलान् कश्चिद्गाढमलानपीति बहुविधं तारतम्यमत्र योगिनां सति मध्यतीव्रे शिवशक्तिपाते। यथा—**

"स्वमुक्तिमात्रे कस्यापि यावद्विश्वविमोचने।
प्रतिभोदेति खद्योतरत्नतारेन्दुसूर्यवत्।।"

(तं० आ०13,159)

खद्योताद्या अत्र प्रकाशतारतम्यदृष्टान्ततयोक्ताः, न तेषां स्वात्मप्रकाशोऽपि तु जड आलोकसमाख्यः प्रकाशः।

~ मालिनीमते—

"..... भाषते पुनः।
अज्ञानेन सहैकत्वं कस्यचिद्विनिवर्तते।।
रुद्रशक्तिसमाविष्टः स .....।"

(तं० आ०13,201-202)

शिवाभिन्नस्य गुरोरनुग्रहेण अज्ञानं सद्यो विगलति, स्वस्वरूपस्य प्रातिभं ज्ञानमकस्मादुद्द्योतते, सर्वं चाज्ञानं विनाशयति। रुद्रशक्तिसमावेशस्य पञ्चलक्षणानि तस्मिन्नाविर्भवन्ति। ततो योगी जीवन्मुक्तो भवति प्रारब्धकर्मान्तं जीवन् शिष्यान् मोचयति संसारबन्धनात्।

मध्यदेशगः— **प्राणापानयोर्यत्र विच्छेदः, यदाश्रित्य च तयोः परस्परं सम्बन्धोऽसौ चिदेव मध्यम्। तस्या अभिव्यक्तिस्थानं मध्यनाड्या अपि मध्ये यच्छून्यरूपं सुचिरं भावनादावनुभूयमानमसौ मध्यदेशः। तत्र भावनाभ्यासेनावस्थितो योगी मध्यदेशगः इति। यथा**

"मध्यदेशगः मध्यनाडिकाया अपि यन्मध्यं तत्रस्थाया बिससूत्राकारा शक्तिस्तस्याः देशः, अन्तर्व्योमरूप एकदेशस्तं गच्छति जानाति यः सतदेकतानतया तन्निष्ठः।"

(तं० आ० वि० खं०1, पृ०, 130)

मध्यमध्यः ~ शक्तिपातः — **अनेन शक्तिपातेन विद्धः साधकः शिवत्वलाभोत्सुकः सन्नपि किञ्चिद् बुभुक्षावशोऽपि भवति। स च गुरोरनुग्रहाल्लब्धया योगसिद्धया लोकान्तर-भोग्यमप्यैश्वर्यसुखमत्रैव जन्मन्यनेनैव देहेन भुक्त्वा देहान्ते शिवीभवति। यथा—**

"मध्यमध्ये शक्तिपाते शिवलाभोत्सुकोऽपि सन्।।
बुभुक्षुर्यत्र युक्तस्तद्भुक्त्वा देहक्षये शिवः।"

(तं०आ०13,242-43)

~ तदुचिता दीक्षा— **एतेन शक्तिपातेन विद्धाः साधकाः समयादि दीक्षापात्रतामाप्नुवन्ति। यथा—**

"शिष्टं तु प्रकारद्वयं शिवधर्मिसाधक-विषयम्।"

(तं० आ० वि० खं०8, पृ०, 151)

मध्यमन्दः ~ शक्तिपातः — **अनेन शक्तिपातेन विद्धस्याधिकारिणः शिवभावासादनेच्छापेक्षया या प्रबला भोगवासना, तस्याः प्राबल्यं मध्यमबलं भवति। असौ**

लोकधर्मी साधकोऽत्रत्यस्य गुरोर्दीक्षाया बलेन कमप्युत्कृष्टं लोकमवाप्य तत्राणिमादिसिद्धिभोगान् भुक्त्वानन्तरं तत्रत्यभुवनेश्वरेण पुनर्दीक्षितः सँस्तदनुग्रहेण शिवभावापत्तिं प्रत्यग्रे सरति। यथा—

"मध्यमन्दशक्तिपातवान् क्वचन भुवनादौ कञ्चित्कालं भोगान् भुक्त्वा, तदीश्वरदीक्षितः पर्यन्ते शिवतां गच्छेत्।"

(तं० आ० वि० खं० 8, पृ० 152)

~ तदुचिता दीक्षा— **असावपि समयादिदीक्षामवाप्य शिवधर्मी साधकः सञ्जायते।**

द्र० **'मध्यमध्यः'** ~ शक्तिपातः' **इति।**

मध्यमावाक्— (1) अन्तःकरण भूमिकायां प्रकाशमाना क्रमिकवाच्य- वाचकभेदमयी सङ्केतादिसहाया शास्त्रसिद्धान्तादिविचारमयी अस्फुटा वाक्। यथा—

"मध्यमाभूमिकायामन्तरेव वेद्यवेदकप्रपञ्चोदयाद्भिन्न-वाच्यवाचकस्वभावतया उल्लसति।"

(तं० आ० वि० खं० 1, पृ० 36)

(2) वाच्यवाचकभेदविमर्शप्राणा तयोः सामानाधिकरण्येन विमर्शमुद्भावयन्ती वाक्। यथा—

मध्यमा पुनः तयोरेव वाच्यवाचकयोः भेदमादर्श्य सामानाधिकरण्येन विमर्शव्यापारा।

(प० त्री० वि०, पृ० 5)

(3) पुर्यष्टकात्मिकायां मध्यभूमौ या अन्तःकरणत्रयं प्रेरयति सा विमर्शरूपा वाङ् मध्यमा। यथा—

"अन्तःकरणं = मनोबुद्ध्यहङ्कारलक्षणं, मध्यभूमौ = पुर्यष्टकात्मनि प्राणाधारे विश्रान्तं या विमर्श शक्तिः प्रेरयति सा मध्यमा वाक्।"

(ई० प्र० वि० वि० खं० 2, पृ० 188)

(4) प्राणवृत्तिमतिक्रम्य क्रमरूपानुपातिनी बुद्ध्युपादाना मध्यमा वाक्। यथा—

"पश्यन्त्यादीनां स्वरूपं तत्रभवता भर्तृहरिणा उक्तम् यथा
"केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते।।"

(स्त० चि० वृ०, पृ० 5)

(5) स्वात्मनः सकाशाद् भिन्नां प्रमेयतां प्रकटयन्ती वाणी। यथा—

"तमेव (इदं भागम्) **अहम्भावादाकर्षयन्ती मध्यमा अहमिदं जानामि करोमीति।"**

(ई० प्र० वि० वि० खं० 1, पृ० 105)

द्र० म०न०प्र०पृ०3; भा० वि० पृ०23त:24, स्वा०द०3-34; पू०प्र०1-392,93

(6) अन्तःकरणनिष्ठा बौद्धविकल्पात्मिका शाब्दार्थोभयक्रमावभासयुता प्राणवृत्तिसम्बद्धा भेदात्मकविमर्शमयी-वाङ् मध्यमा। यथा—

"मध्यमा सक्रमा स्थूला अन्तःकरणवर्तिनी।
विकल्पनाभिन्नवाच्या प्राणवृत्तिविभेदिता।।

(प०पं०,44)

~ ईश्वरतत्त्वे— **ईश्वरतत्त्वे मध्यमायाः स्थितिः भेदाभेदमयविमर्शरूपा सा। तस्यां वाच्यवाचकयोः परस्परमध्यासः। तस्याः अपि वास्तविकं स्वरूपं परारूपं सत् पूर्णमेव। अन्यथा कथं परस्पराच्छादकत्वेनाध्यासः सम्भवेत्। परस्पराच्छादनं द्वयोः समतायामेव भवति, सा च पूर्णताद्योतिका। यथा—**

"मध्यमा तावत् स्वाधिकारपदे क्रियाशक्त्यात्मन्यैश्वरे पदे स्फुटवेद्यप्रच्छादकवेदनरूपा वाच्ये वाचकं तत्रापि वाच्यमध्यस्यते, विश्वत्र वाच्ये विश्वात्मनि वाचकमपि यदि विश्वात्मैव तदेवं परम्पराच्छादनमिश्रीभावात्मनि निर्वहेद् अध्यासः, न त्वन्यथा। न हि त्रिचतुरङ्गुल- न्यूनतामात्रेऽपि पटः पटान्तराच्छादकः स्यात्।"

(प० त्री० वि०, पृ० 148)

~ तदधिपः — **मध्यमाया अधिपतिर्भगवान् विष्णुः। प्रतिष्ठा चास्याः क्रिया शक्त्यात्मनीश्वरपदे। यथा—**

"मनोऽहङ्कारयोर्ब्रह्मविष्णुदेवतयोः वैखरीमध्यमा पदे पत्योरीशसदाशिवक्रियाशक्तिपदमेव परा प्रतिष्ठाभूः।"

(प० त्री० वि०, पृ० 130)

~ भेदमयी— **मध्यमायां भेदावभासः। यथा—**

"यत्र च मध्यमायां भेदावभासः।"

(प.त्री.वि.,पृ.6)

~ सूक्ष्मा— **बुद्धिगता विकल्पात्मकानुसन्धानरूपा विमर्शात्मिका वाणी सूक्ष्मा मध्यमा। यथा—**

"अस्मिन् स्थूलत्रये यत्तदनुसन्धानमादिवत्।।
पृथक् पृथक् तत् त्रितयं सूक्ष्ममित्यभिशब्द्यते।
षड्जं करोमि मधुरं वादयामि ब्रुवे वचः।।
पृथगेवानुसन्धानत्रयं संवेद्यते किल।"

(तं० आ०3,245-47)

षड्जं करोमीति सूक्ष्मा पश्यन्ती, मधुरं मृदङ्गादिवादयामीति सूक्ष्मा मध्यमा, वचो ब्रुवे इति सूक्ष्मा वैखरी। अनुसन्धानात्मिका विमर्शमय्य इमा वाचः।

~ स्थूला– मृदङ्गपटहादिध्वनिः स्थूला मध्यमा। यथा—

"यत्तु चर्मावनद्धादि किञ्चित्तत्रैष यो ध्वनिः।।
स स्फुटास्फुटरूपत्वान्मध्यमा स्थूलरूपिणी।"

(तं० आ० 3,241-42)

~ (तन्मयीभावदा)— **विभागरहितैकाकारस्वरमयीयं स्थूलामध्यमापि तन्मयीभावोपायभूता। यथा—**

"मध्यायाश्चाविभागांश-सद्भाव इति रक्तता।।
अविभागस्वरमयी यत्र स्यात् तत् सुरञ्जकम्।"

(तं०आ० 3,242-43)

मध्यशून्यम्— सौषुम्नमार्गेऽनुभूयमाना मध्यमा प्रमाणादि-प्रपञ्चशून्यता। यथा—

"मध्यशून्यं तु क्रमेणाधस्तनप्रमेयप्रशमात्मकं कण्ठतालु-भ्रूमध्य-ललाटमूर्धरन्ध्रात्मकम्।"

(स्व० तं० उ० प० 4, पृ० 185)

द्र० **'शून्यं'** ~ मध्यम्' इति।

मध्योदयः ~ चक्रोदये— **प्राणेन मन्त्रादेरैकात्म्यम्। यथा—**

"ऐकात्म्यलक्षणो मध्योदय एव .....।"

(तं० आ० वि० खं० 4/2, पृ० 43)

~ तन्माहात्म्य— **सनिश्चयं सिद्धिप्रदो भवति। यथा—**

"आद्यन्तोदयनिर्मुक्ता मध्यमोदयसंयुताः।
मन्त्रविद्याचक्रगणाः सिद्धिभाजो भवन्ति हि।।"

(तं० आ० 7,55)

चक्रोदयस्यातीवरहस्यभूतत्वान्नैतादृशा विषयाः स्पष्टं व्याख्याताः केनापि ग्रन्थकृतेति विचार्यमत्र सुधीभिः।

मनः — **(1) दशेन्द्रियाधिपम्, सङ्कल्पविकल्पसाधनम्, निश्चयरहितं सन्देहसहकृतं धर्माधर्मनिबन्धकं साधारणैर्जनैर्न जेतुं शक्यमिन्द्रियं मनः। यथा—**

"सङ्कल्पे च विकल्पे च दशधाक्षेषु धावति।
अनिवारितसन्देहमजय्यं सर्वदेहिनाम्।।
मनश्च कथितं ह्येतद्धर्माधर्मनिबन्धकम्।।"

(स्व० तं० 12,31-32)

"..... मनः संकल्प उच्यते।"

(स्व०तं० 4,394)

(2) सङ्कल्पनक्रियासाधनभूतं प्रमातृसामर्थ्यविशेषमयं तस्यान्तःकरणमेकम्। यथा—

"सङ्कल्पर्थं मनः प्राहुर् .....।"

(मा० वि० वा०1,875)

द्र० अ०प्र०पं०27, स्पं०वि०पृ०-137, प०प्रा०पृ०10, ष०त०सं०15,

(3) सुखदुःखाद्युपलब्धिसाधनमिन्द्रियं ज्ञानेन्द्रिय-कर्मेन्द्रियरूपेण उभयात्मकम्, उभयविधेभ्यः, इन्द्रियेभ्यः सूक्ष्मतरं चलञ्च। यथा—

"तेभ्यस्तथाविधेभ्यः सूक्ष्मेभ्यः 'इन्द्रियेभ्यो मनः' तत्प्रवृत्तिनिवृत्तिकारणं सूक्ष्मतरम्। यथा इन्द्रियाणि कथञ्चिद् गम्यन्ते, न तथा अति चंचलं मनः।"

(भ० गी० टी० रा० कं०, पृ०90)

~ उभयात्मकम्— **ज्ञानेन्द्रियं कर्मेन्द्रियं चापि ज्ञानकर्मोभय-साधनभूतत्वात्। यथा—**

"उभयात्मकं मनः प्रोक्तं व्याप्तृसर्वेन्द्रियाणि तु।।"

(स्व० तं०11,81)

~ तत्सृष्टिः — **अविशेषेण सकलतन्मात्रहेतुभूताद-हङ्कारान्मनो जायते। तत एव सकलानां शब्दादीनां ग्राहकं कारणं मनः। यथा—**

"अहङ्कारस्य मनसि जन्ये हि अविशेषेण तन्मात्र-कर्तृत्ववैशिष्टयं प्रयोजकं बुद्धीन्द्रियवर्गे तु नैयत्येन; येनैषां नियतविषयत्वं भवेत्।"

(तं० आ० वि० खं० 6, पृ० 193)

"मनसि जन्ये सर्वतन्मात्रजनसामर्थ्ययुक्तः स जनकः श्रोत्रे तु शब्दजननसामर्थ्यविशिष्ट इति, यावद् घ्राणे गन्धजननयोग्यतायुक्तः।

(तं० सा०, पृ० 87)

~ तत्स्वरूपम्— **मनः प्रभातृशक्तिविशेषात्मकं न हि स्वतन्त्रं द्रव्यं; यथा न्यायवैशेषिके उक्तं न चापि तज्जडायाः प्रकृतेर् विकारमात्रं, यथा सांख्याः मन्यन्ते। अपि तु संविद्रूपस्यात्मनः शक्तिविशेष एव मनः। आत्मनोमनन सामर्थ्यं सङ्कल्पनसामर्थ्यं च मनः। तेनात्मनोऽभिन्नं मनः। शक्तिशक्तिमंतोरभेदात्। यथा—**

"इत्थं मनो न युक्त्यंशैर्मानसावर्जनाय नः।।
यादृग्वाद्यान्तरैरिष्टं द्वैतव्यामूढदृष्टिभिः।
चिदात्मनः प्रकाशस्य तथाभासनभागिनी।।
या शक्तिस्तन्मनस्त्वस्तु स्वस्वातन्त्र्योपकल्पितम्।"

(मा० वि० वा० 1,483-485)

~ द्विरूपम्— **ग्राह्यविषयजातसङ्कल्पकत्वेन मनस इन्द्रियत्वम्, अन्तर्मुखस्वात्मविमर्शकत्वेन च तस्य मननत्राणधर्मित्वेन मन्त्रत्वम्। यथा—**

"मनसो वहिर्मुखतायां परामर्शनं सङ्कल्पः, अन्तर्मुखतायां तु स्वात्ममननात्मको मन्त्रः।"

(शि० सू० वा० भा० टि० पृ० 42)

"मनः पर्यायमाख्यातं चित्तं सर्वत्र शासने।
इन्द्रियत्वात् स सङ्कल्पः स्यात्तु मन्त्रस्तदुच्यते।।
आत्मैव चित्तं विज्ञेयं वागादिरहितं यदा।
तदा मन्त्रः स विज्ञेयः सङ्कल्पानुविधायकः।।"

(शि० सू० वा० भा० पृ० 42)

~ मातृकाक्रमे— **पकारो मनस्तत्त्वस्य वास्तविकं स्वरूपं व्यनक्ति मातृकाभ्यासतः। यथा—**

"पादिमान्तं मनोऽहङ्कारबुद्धिप्रकृतिपुरुषाख्यपञ्चकम्।"

(प० त्री० विवृ०, पृ० 4)

मनस्कारः — **नीलादिविज्ञानस्य बोधरूपतापादनम्। यथा—**

"तत्र सविषयता तावन्नीलेन कृता मनस्कारेण बोधता, सुखरूपता तु केनेति चिन्त्यम्।"

(ई० प्र० वि० वि० खं०2, पृ० 235)

मनोनिरोधः — **बलात्कारेण मनसो नियमनम्, विषयेषु तस्य स्वाभाविक्याः प्रवृत्तेर्निरोधनम्।**

~ न हितः — **बलात्कारेण विषयेभ्यो निरुद्धं मनः पुनः पुनरनार्यजुष्टैर्मार्गैर्विषयान् प्रति प्रधावेतेति तस्य बलात्कारेण निरोधो भयावहो, यतोऽवाञ्छनीयप्रतिक्रियाकरः। यथा—**

"स्वपन्थानं ह्यस्येव मनसो ये निरुन्धते।।
तेषां तत्खण्डनायोगाद्धावत्युन्मार्गकोटिभिः।
किं स्विदेतदिति प्रायो दुःखेऽप्युत्कण्ठते मनः।।
सुखादपि विरज्येत ज्ञानादेतदिदं त्विति।"
(मा० वि० वा० 2,109 तः 111)

"यथा हि तत्र तत्राश्वः समनिम्नोन्नतादिषु।
चित्रे देशे वाह्यमानो यातीच्छामात्रकल्पिताम्।।
तथा संविद्विचित्राभिः शान्तघोरतरादिभिः।
भङ्गीभिरभितो द्वैतं त्याजिता भैरवायते।।"
(तं० आ० 4,205-206)

संविदो विषये उक्तमेतन्मनो विषयेऽपि तथैव घटते व्यवहारे हि मनः संवलितैव संवित् सर्वत्र प्रसरति।

मनोऽनुशासनस्तोत्रम्— महेश्वरानन्दस्य गुरुणा महाप्रकाशेन निर्मितं किमपि स्तोत्रम्। यथा—

तदुक्तमस्मद्गुरुभिर्मनोऽनुशासनस्तोत्रे-
हंसाः पतन्ति गगने प्रविसार्य पक्षौ
.....।" इत्यादि।
(म० मं० प०, पृ०12)

द्र० च (तदेव,पृ० 44-91) **इति।**

मनोन्मनम्— योगिपरम्परासु तुर्याया भेदविशेषस्य पारिभाषिकं नाम। जागरावस्थायां योगाभ्यासतो मनसो मननव्यापारपरित्याजनेन समुदेति तुर्या। ततोऽस्याः पारिभाषिकं नाम योगिजनप्रदत्तं मनोन्मनमिति। तत्र मनस उन्मनीभावः सञ्जायते यतः। यथा—

"मनोन्मनमिति जागरायामविकल्पकप्राधान्यान्मनसो मननरूपस्वव्यापारोत्क्रमणेन वृत्तेः।"
(तं० आ० वि० खं० 7, पृ० 187-188)

"त्रितयानुग्रहाज् सेयं तेनोक्ता त्रिकशासने।
मनोन्मनमनन्तं च सर्वार्थमिति भेदतः"
(तं०आ० 10,277)

द्र० 'अवस्थाभेदविस्तरः' इति।

मनोरथगुप्तः — अभिनवगुप्तस्यानुजः प्रियशिष्यश्च। यथा—

"निजानुजमनोरथप्रथितसत्पथाभ्यर्थना-
वशोऽभिनवगुप्तसत्पदनिवेशितस्वात्मकः।"
(ई० प्र० वि० वि० खं०1, पृ० 1)

"भ्राता ममैव शिवशासनरूढचित्तः
प्रेप्सुः परात्मनि मनोरथगुप्तनामा।
यः शास्त्रतन्त्रमखिलं प्रविवेक्तुकामः
प्राप्तुं परं शिवपदं भवभेदनाय।।"
(प० त्री० वि०, पृ० 280)

"सोऽनुग्रहीतुमथ शाम्भवभक्ति भाजं, स्वं भ्रातरमखिलशास्त्र-विमर्शपूर्णम्।
यावन् मनः प्रणिदधाति मनोरथाख्यं तावज्जनः कतिपयस्तमुपाससाद।।
(तं०आ० 37,64)

मन्त्रः — (1) जपादावुपयोगी तथाविधः शब्दसमूहो वा वर्णाक्षरसमूहो वा यो मननेन साधकस्य त्राणं करोति। सामान्यतो हि मन्त्रत्वमेतदेव।

(2) मननमयस्त्राणमयश्च मन्त्रः। तत्र स्वविभवमननम् "अहं परिपूर्णो महेश्वरः" इति विमर्शनं तस्य मननमयत्वम्। एवं विध विमर्शनाभ्यासेन जीवभावोचितस्य सङ्कोचस्य क्षयो भवति। इत्थं मन्त्रो, सङ्कोचात् त्राणकारी भवति। यथा—

"मननमयी निजविभवे निजसङ्कोचे भये च त्राणमयी।
कवलितविश्वविकल्पा अनुभूतिः कापि मन्त्रशब्दार्थः।।"
(म० मं० प० 49, पृ० 121)

एतद्धि साधकोत्तमानां कृते मन्त्रस्य लक्षणम्।

(3) शिवस्वभावभूतः, साधनांशः। स च मनने कृते सत्युपासकस्य त्राणकारी। तत एव मन्त्र इति। यथा—

"मन्त्रो हि शिवस्वभावः।"
(तं० आ० वि० खं० 12, पृ० 398)

"मननत्राणदं यत्तु मन्त्राख्यं .....।"
(तं०आ० 37,19)

स्वात्मशिवताविमर्शो ह्यत्र मन्त्रः सम्मतः शैवसिद्धानाम्। यथा—

"मन्त्रोऽपि अन्तर्गुप्तभाषणात्मकपरपरामर्शसतत्त्वेन मननत्राणधर्मा परतत्त्वप्राप्त्युपायः परमेशात्मैव।"
(स्व० तं० उ० प० 11, पृ० 15)

एतत् सामान्यसाधकानां कृत उपदिष्टं मन्त्रलक्षणम्।

तदुक्तं श्री सर्ववीरभट्टारके—

.....
मन्त्रा वर्णात्मकाः सर्वे सर्वे वर्णाः शिवात्मकाः।।" इति
(प्र० हृ०, पृ० 26-7)

(4) शिवस्वभावभूता पराशक्तिः। यथा—

"शिवशक्तिमया मन्त्राः .....।"
(स्व० तं० 2, 63)

शिवस्य शक्तिरेव मन्त्ररूपतया प्रकाशमाना साधकानां त्राणं करोति। तन्मया एव हि यतो मन्त्राः। एतन्मन्त्रस्वरूप-रहस्यप्रतिपादकं तल्लक्षणम्।

~ अरिः — **यः न कथमपि सिद्ध्यति, मूलमेव च निकृन्तति सिद्धेः।**

द्र० **'मन्त्रपरीक्षा'** ~ चक्रविधिना' **इति।**

~ असिद्धः — **साध्य एवासिद्ध इत्युच्यते। यः सिद्ध्येद्वानैव वा सिद्ध्येदिति संशय-दोलारूढो मन्त्रः।**

द्र० **'मन्त्रपरीक्षा' इति।**

~ उदयावनितः — **स्वात्मसंविदो निरावरण चिद्रूपं यद् बलं तत एव मन्त्रवीर्यस्योदयः। यथा—**

"तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः।
प्रवर्तन्तेऽधिकाराय करणानीव देहिनाम्।
तत्रैव संप्रलीयन्ते शान्तरूपा निरञ्जनाः।

सहाराधकचित्तेन तेन ते शिवधर्मिणः।।"

(स्प० का०, 26-27)

~ उपदेशलब्धः — **गुरूपदेशेनैव लब्धो मन्त्रस्तत्तत्फलदो भवति न पुस्तकाधीतः। गुरोरनुग्रहस्य साहाय्यं यतस्तत्र साफल्यकारणम्।**

द्र०:- **'मन्त्रः'** — ~ 'निषिद्ध-लेखनः' **इति।**

~ गुप्तः— **न प्रकटनीयः— कस्यापि पुरः।**

द्र०:- **'मन्त्रगुप्तिः'**— **इति।**

~ चतुर्विधः — **(1) सिद्ध, (2) असिद्धः साध्यो वा, (3) सुसिद्धः, (4) अरिः इति।**

द्र०:- **'मन्त्रपरीक्षा':- इति।**

~ तच्चक्रम्—

द्र०:- **'मन्त्रपरीक्षा':-** ~ 'चक्रविधिना' **इति।**

~ तत्तर्पणम्— **मन्त्रलिङ्गविशेषः।**

द्र०:- **'मन्त्रः':-** ~ 'तल्लिङ्गानि' **इति।**

~ तत्ताडनम्— **मन्त्रलिङ्गविशेषः**

द्र०:- **'मन्त्रः':-** ~ 'तल्लिङ्गानि' **इति।**

~ तत्परीक्षा—

द्र०:- **'मन्त्रपरीक्षा' इति।**

~ तत्साधनातत्त्वम्— **सविकल्पसांकेतिक- शब्दात्मका अपि ये मन्त्रास्तेऽपितत्तदर्थजातस्य पुनः पुनः स्मरणपरम्परयान्ते तदर्थरूपतामापादयन्ति साधकस्य। यथा—**

"बाह्यार्थसमयापेक्षा घटाद्या ध्वनयोऽपि ये।।
तेऽप्यर्थ भावनां कुर्युर्मनोराज्यवदात्मनि।"

(तं०आ० 5,134-135)

"तदुक्तं परमेशेन भैरवो व्यापकोऽखिले।।
इति भैरवशब्दस्य सन्ततोच्चारणाच्छिवः।"

(तं० आ० 5,135-136)

~ तदभिषेचनम्— **मन्त्रलिङ्गविशेषः।**

द्र०:- **'मन्त्रः':-** ~ 'तल्लिङ्गानि' **इति।**

~ तदिन्धननिवेशनम्— **मन्त्रलिङ्गविशेषः।**

द्र०:- **'मन्त्रः':-** ~ 'तल्लिङ्गानि' **इति।**

~ तदुपास्तिफलम्— **मन्त्ररहस्यवेत्ता परिपूर्णं मन्त्रोपासनाफलं लभते। परं तद्रहस्यमविदन्नपि यः श्रद्धया मन्त्रजपादिकं कुरुते सोऽपि किमपि तत्फलमवाप्नोत्येवेति न जपादिक्रिया निष्फलाः। यथा—**

"रहस्यप्रणवादिमन्त्रबीजार्थमविद्वानपि तदनुचिन्तनात् तत्फलमासादयति।"

(ई० प्र० वि० वि०, खं० 1, पृ,० 22)

"निकटस्था यथा राज्ञामन्येषां साधयन्त्यलम्।
सिद्धिं राजोपगां शीघ्रमेवं मन्त्रादयः पराम्।।"

(तं० आ० 16,287)

~ पार्यन्तिकम् —

"प्रतिबुद्धा हि ते मन्त्रा विमर्शैकस्वभावकाः।
स्वतन्त्रस्यैव चिद्धाम्नः स्वातन्त्र्यात् कर्तृतामयाः।।
यमाविशन्ति चाचार्यं तं तादात्म्यनिरूढितः।
स्वतन्त्रीकुर्वते यान्ति करणान्यपि कर्तृताम्।।"

(तं०आ० 30,2-3)

"मन्त्रा हि कर्तृतां यान्त्यपि करणानि अजहत्कर्तृभावां करणतामधिशेरते इत्यर्थः।"

(तं० आ० वि०, खं० 12, पृ०, 174)

रहस्यमिवैतत् किमपि।

~ तद्गुप्तिः — **मन्त्रो गुप्त एव सिद्धिदः, ततो न कस्यापि पुरः प्रकटनीयः। यथा—**

"गुप्तः सुसिद्धो देवि प्रकटः सिद्धिहा भवेत्।।
तस्मात् सुगुप्तः कर्तव्यः सम्प्रदायो मुखागमः।"

(ने०तं० 14,11-12)

मुखागम इति मौखिकेनोपदेशेन समवाप्तः इति।

~ तद्गुप्तिभावः — **मन्त्रलिङ्गविशेषः।**

द्र०:- ~ 'तद्गुप्तिः' **इति।**

द्र०:- **'मन्त्रः'** ~ 'तल्लिङ्गानि' **इति।**

~ तद्दर्शनम्— **सामर्थ्यवान् गुरुर्दीक्षायां शिष्यस्य तथा शास्त्रतत्त्वदृष्टिमुद्दीपयति यथा तस्यापि स्वत एव मन्त्रदर्शनं भवति। यथा—**

"यथा हि रक्तहृदयस्ताँस्तान् कान्तागुणान् स्वयम्।।
पश्यत्येवं शक्तिपातसंस्कृतो मन्त्रसन्निधिम्।"

(तं०आ० 15,452-453)

~ तद्दीक्षा— **गुरुः शिष्यं यागादिक्रियाबाहुल्यपूर्वकं मन्त्रोपदेशं यत् कुरुते तत्र सा सर्वा क्रिया मन्त्रदीक्षा। यथा—**

"तत्र कृतदीक्षा कस्य शिष्यस्य प्रधानं मन्त्रं सवीर्यकं संवित्तिस्फुरणसारम् अलिखितं वक्त्रागमेनैवार्पयेत्।"

(तं० सा०, पृ०, 179)

~ क्रियाडम्बररहिता— **वित्तहीनानां सामर्थ्यहीनानां च कृते विनापि यागादिकं केवलं स्वानुग्रहबलेनैव गुरुणा मन्त्रदीक्षा विधीयते, या भोगमोक्षप्रदा भवति। सा च सन्ततिक्रमोक्ता दीक्षा। यथा—**

"अथ वित्तविहीनानां प्रपन्नानां च तत्त्वतः।
देशकालादिदोषेण न तथाध्यवसायिनाम्
प्रकर्तव्या यथा दीक्षा श्रीसन्तत्यागमोदिता
कथ्यते ह्याटकेशानपातालाधिपचोदिता।।"

(तं०आ० 30,100-101)

~ तद्दीपनम्— **मन्त्रलिङ्गविशेषः।**

द्र०:- **'मन्त्र':-** ~ 'तल्लिङ्गानि' **इति।**

~ तद्ध्वनिप्रभावः— **मन्त्रस्यार्थं जानान एव जापको तदर्थभावनापूर्वकमभ्यस्यन् मन्त्रजपफलं सम्यगवाप्नोति। परं रहस्यभूतबीजमन्त्राणां न कोऽपि सांकेतिकोऽर्थः। ततस्तेषां ध्वनेरेवाभ्यासेन जापकस्तज्जपफलं लभते। यथा—**

"रहस्यप्रणवादि मन्त्रबीजार्थमविद्वानपि तदनुचिन्तनात् तत्फलमासादयति।"

(ई० प्र० वि० वि० खं० 1, पृ०, 22)

यथा हि मधुराद्यक्षरध्वनयः श्रवणगोचरतां याताः सन्तो माधुर्यादीन् गुणानभिव्यञ्जयन्ति श्रृङ्गारादीश्च रसान् पोषयन्ति, तथैव बीजपिण्डात्मका मन्त्रा उच्चारिताः सन्तस्तत्तत्फलप्रदा भवन्तीति ज्ञेयं सुधीभिः।

~ तद्बोधनम्— **मन्त्रलिङ्गविशेषः।**

द्र०:- **'मन्त्रः'** ~ 'तल्लिङ्गानि' **इति।**

~ तद्भूमिः— **परं तत्त्वं यत् सर्वेषां मन्त्राणां मूलभूतमुत्पत्तिस्थानम्। यथा—**

"मन्त्रभूम्यामिति परतत्त्वान्तः।"

(तं० आ० वि०, खं० 3, पृ०, 395)

~ तत्प्रवेशः— **पूर्णायाः स्वात्मस्वरूपवृत्तेरासादनम्। यथा—**

"महाप्रकाशमनुभूय पुरं विशेत् मन्त्रभूमिरूपां पूर्णां स्वात्मवृत्तिमासादयेत्।"

(तं० आ० वि०, खं० 3, पृ०, 398)

~ तत्प्रवेशविधिः— **स्वसंविदं प्राणापानमार्गेभ्य आकृष्य सौषुम्नमार्गे प्रवेश्य संविदन्तःप्रवेशो विधीयते। यथा—**

"मध्यनाड्या उदानवाहक्रमेण ऊर्ध्वं गमनं तन्मन्त्रभूम्यां प्रवेशनमुच्यते।"

(तं० आ० वि०, खं० 3, पृ०, 396)

~ तद्रहस्यम्— **(1) रहस्यमन्त्राभ्यासेन क्रमशः पूर्णाहन्ताविमर्शसिद्धिर्भवतीति मन्त्रोपासनारहस्यम्। यथा—**

"तावद्विमर्शनारूढधियां तत् सिद्धये क्रमात्।।"

(तं० आ० 30,1)

"तावान्-पूर्णः। तत् सिद्धये इति पूर्णाहंविमर्शारोहसंपत्त्यर्थमित्यर्थः।"

(तं० आ० वि०, खं० 12, पृ०, 1)

"अशेषविश्वाभेदमयपूर्णाहंविमर्शात्मा स्फुरत्ता सा मन्त्राणां रहस्यम्।"

(शि० सू० वृ०, 2, 3)

"स्वप्रकाश-विकासात्मिकायाः परमाद्वैतरूपायाः सहजविद्यायाः शरीरस्य स्वरूपस्य सत्ता स्थितिः, अशेषविश्वाभेदमयपूर्णाहन्ताविमर्शात्मा स्फुरत्ता या सैव मन्त्राणां रहस्यम्।"

(शि० सू० विवृ० 2, 3)

(2) को मन्त्रः कस्य सफलो विफलो वा भवेदिति विषये ज्ञानम्।

द्र०:- **'मन्त्रपरीक्षा'** ~ 'चक्रविधिना' **इति।**

~ तद्वादः — **मन्त्रप्रयोग विषयेऽवश्यपालनीयो विधिः। स च नवप्रकारः। स एव हि मन्त्रलिङ्गेति परिभाषयोक्तः आगमे।**

द्र०:- **'मन्त्रः'** ~ 'तल्लिङ्गानि' **इति।**

दीपनादिनाम्नां तेषां नवानां लिङ्गानां स्वरूपं तत्रैव द्रष्टव्यम्।

~ तद्विमलीकरणम्— **मन्त्रलिङ्गविशेषः।**

द्र०:- **'मन्त्रः'**:- ~ 'तल्लिङ्गानि' **इति।**

~ तद्वेधः — **वेधदीक्षाविशेषः।**

द्र०:- **'मन्त्रवेधः'**:- **इति।**

~ तन्न्यासः — **मन्त्रपदानां वा मन्त्रगतानामक्षराणां वैकैकशः समुच्चारणं कुर्वता साधकेन प्रत्यक्षरं प्रतिपदं वा स्वशरीराङ्गस्पर्शनं यद् विधीयते हस्ताभ्यामसौ मन्त्रन्यासः।**

~ अध्वशोधने— **मन्त्राक्षरन्यासं कुर्वन् गुरुः शिष्यस्य षडध्वशोधनमपि विदधाति। यथा—**

"एवं शोधकमन्त्रस्य न्यासे तद्रश्मियोगतः।
पाशजालं विलीयेत तद्ध्यानबलतो गुरोः।।"

(तं० आ० 16,238)

~ तद्रहस्यम्— **अङ्गेषु मन्त्राक्षरन्यासेन स्वशरीरेण साकं मन्त्रस्याभेदो भावनीयो भवति। आराध्यदैवतेनापि साकं तथैव भावना विधीयते। तेन मन्त्रन्यासेनाराधकाराध्यमन्त्राणां त्रयाणामपि परस्परमभेदो भाव्यमानः सन् मन्त्रजपसाफल्यं विदधाति। यथा—**

"अत एव मन्त्रस्य प्राप्ततदैकात्म्यस्य प्राणस्यात्मनश्च मन्त्रयितुर्न कञ्चिदपि भेदमनुसन्दध्यादित्याह।"

(तं० आ० वि०, खं० 11/2, पृ०, 61)

"अन्यः सोऽन्योऽहमित्येवं विकल्पं नाचरेद् यतः।।
यो विकल्पयते तस्य सिद्धिमुक्ती सुदूरतः।"

(तं० आ० 29,90-91)

द्र० **जपः** :- ~ 'प्राणचारसम्मितः' **इति।**

~ तल्लिङ्गानि— **मन्त्रप्रयोगे अनुष्ठेयाः क्रिया विशेषा नियमपालनविशेषाश्चेति तासां क्रियाणां तान्त्रिक्यः संज्ञाः दीपनाद्याः। यथा—**

"दीपनं बोधनं चैव ताडनं चाभिषेचनम्।।
विमलीकरणं चैव तथेन्धननिवेशनम्।।
सन्तर्पणं गुप्तिभाव आप्यायो नवमस्तथा।।
एवं नवप्रकारेण मन्त्रवादमशेषतः।
यो जानाति स जानाति मन्त्रसाधनसाधनम्।।"

(ने० तं० 18,68)

दीपनादीनां लक्षणान्यग्रेऽत्रैव द्रष्टव्यानि।

तत्र (1) दीपनं = प्रणवोच्चारणेन, (2) बोधनम् = नमः शब्दोच्चारणेन, (3) ताडनम् = फट्कार प्रयोगः, (4) अभिषेचनम् = वौषट्कार प्रयोगः, (5) विमलीकरणम् = स्वाहाशब्दोच्चारणम्, (6) इन्धननिवेशनम् = हुङ्कारेण सम्पुटीकरणम्, (7) तर्पणम् = प्रतिवर्णं लाङ्कारेण सम्पुटीकरणम्, (8) गुप्तिभावः = रक्षणम्, मृत्युजित्-सम्पुटीकारेणायुतजपानुष्ठानम्, (9) आप्यायनम् = वांकारेण प्रतिवर्णं सम्पुटीकारेण जपः। यथा—

दीपनं मन्त्रस्य प्रणवेन। बोधनं नमश शब्देन। ताडनं फट्कारेण। अभिषेचनं वौषट्कारेण। विमलीकरणं स्वाहाशब्देन। इन्धननिवेशनम् दाह्यपाशविषादिदहने विनियोजनम् हुङ्करेण सम्पुटीकरणम्। ....तर्पणं बलवत्ताधानम् ,तच्च प्रतिवर्णं लाङ्कारेण सम्पुटीकरणम्। गुप्तिभावो रक्षणं, तच्च नेत्रनाथ सम्पुटीकृतस्यायुतजपाद् भवति। ....आप्यायनम् पुनर्जातबलस्य पृष्ट्याधानं, तच्च वांकारेण प्रतिवर्णं सम्पुटीकारात्।"

(ने० तं० खं० 2, पृ०, 75)

~ निषिद्धलेखनः — **लिखित्वा मन्त्रस्य प्रदानं निषिद्धम्। यथा—**

"तत्रैष नियमो यद्यन्मान्त्रं रूपं न तद्गुरुः।
लिखित्वा प्रथयेच्छिष्ये विशेषादूर्ध्वशासने।।"

(तं० आ० 26,20)

~ प्राणचारसम्मितः — **मानसो मन्त्रजपः प्राणापानगतिमार्गे षट्त्रिंशदङ्गुलसम्मिते मीयमानः सन्नेव त्वरितफलदो भवति। उदाहरणतः षडक्षरो मन्त्रः प्राणगतौ षड्वारमपानगतौ च षड्वारं जप्तुं शक्यते। तत्रैकाऽऽवृत्तिर्मन्त्रस्य षड्भिरङ्गुलैः प्राणचारीयैर्विधेया। एवं क्रियमाणे जपे जापकस्य प्राणशक्तेः साकं मन्त्राक्षराणां मन्त्रदेवतायाश्चैकीभावः सत्वरं सिद्धयति। तस्मिन सिद्धे मन्त्रफलं पूर्णतया सत्वरं च लभ्यते। यथा—**

"जपः प्राणसमः कार्यः इति हि सर्वत्राविशेषेणोद्घोष्यत। अत एवेह यत्नजत्वमुक्तम्।"

(तं० आ० वि०, 4/2, पृ०, 9)

"इह खलु योगिना यत्र क्वापि कर्मणि यस्य कस्य चिन्मन्त्रस्यावश्यं प्राणसाम्येनोच्चारः कार्यः। अन्यथा हि न कार्यसिद्धिः स्यात्।

जपेत्तु प्राणसाम्येन ततः सिद्धिर्भवेद् ध्रुवम्।
नान्यथा सिद्धिमाप्नोति ह्यस्यमाप्नोति सुन्दरि।।"

(उद्ध० तं० आ० वि०, खं० 4/2, पृ०, 30)

~ बहुप्रकारः — **एकस्मिन्नपि शास्त्रे भिन्नभिन्नेषूपासनविधिषु प्रयुज्यमानानां वर्णानां विन्यासे वैचित्र्यं भवति। न तद्विरोधावहम्। यथा—**

"मन्त्राणामक्षरमात्रान्यथाभावेऽपि तेषामेव शास्त्रेष्वाणवशाक्तशाम्भवादिविभागेनान्यथात्वम्।"

(प० त्री० वि०, पृ० ,156)

~ बह्वक्षरः — **अति विस्तृतो यो मालामन्त्रादिरूपो वाऽति दीर्घवाक्यात्मको वा मन्त्रो नाऽसौ प्राणचारैः साकं योजयितुं शक्यते चक्रोदयविधिना। ततो नाऽसौ शक्तिस्थः कार्यः। यथा—**

"बह्वक्षरस्तु यो मन्त्रो विद्या वा चक्रमेव वा।।
शक्तिस्थं नैव तं तत्र .....।"

(तं० आ० 7,58-59)

"तमारुरुक्षुर्योगी तावतः प्राणनिरोधस्याशक्यत्वात् शक्तिस्थं नैव कुर्यात् "

(तं० आ० वि०, खं० 4/2, पृ०, 45)

~ भुक्तिप्रदः — **सामर्थ्यवान् गुरुः मन्त्रप्रयोगबलेनोत्कृष्टेषु भुवनेषु तत्र भोगभुक्त्यै योजनिकां दीक्षां तथा करोति यथा शिष्यः शरीरान्तेऽभीष्टं लोकमवाप्य तत्रत्यैर्भोगैः सन्तोषमवाप्यग्रे क्रमेणैव मुक्तो भवति। यथा—**

"तेन मन्त्रज्ञानयोगबलाद् यद्यत् प्रसाधयेत्।।
तत् स्यादस्यान्यतत्त्वेऽपि युक्तस्य गुरुणा शिशोः।"

(तं० आ० 16,295-296)

~ मुक्तिप्रदः — **उक्तमत्र विषये—**

"..... योगी तत्त्वैक्यसिद्धये।।
मन्त्रमेवाश्रयेन्मूलं निर्विकल्पान्तमादृतः।
मन्त्राभ्यासेन भोगं वा मोक्षं वापि प्रसाधयन्।।
तत्राधिकारितालब्ध्यै दीक्षां गृह्णीत दैशिकात्।"

(मा० वि० तं० 6,8) (उद्ध०:- तं० आ० 16,293-295)

एतच्च दीक्षया मुक्तिलाभस्य विषये उक्तं मन्तव्यम्। शैवीषु प्रक्रियासु योगाद्यभ्यासं विनैव दीक्षयाऽपि भुक्तिमुक्तिलाभो निश्चितश्चेद्दीक्षकः सामर्थ्यवान् भवेत्।

~ रिपुः — **यो नैव सिद्ध्यति, मूलनाशकारी च यः।**

द्र०:- **'मन्त्रपरीक्षा'** इति।

~ शक्तिस्थः — **प्राणचारैः साकं सम्मिततया योजितो मन्त्रः चक्रभेदनीत्या प्राणशक्तावेव स्थितः सन् शक्तिस्थ इत्युच्यते। यथा—**

शक्तिस्थिताः प्राणसाम्येनोदिता सर्वकालं जपादौ योज्याः येन यथोचिता योगिनां सिद्धिः स्यात्।

(तं० आ० वि०, खं० 4/2, पृ०, 34)

~ शाम्भवोपाये— **(1) शाम्भवयोगनिष्ठस्य सर्वमपि शब्दजातं मन्त्र एव। सर्वस्यापि तस्य अहमात्मकादिमान्त्यनिष्ठत्वात्। यथा—**

"तस्माद्विदंस्तथा सर्वं मन्त्रत्वेनैव पश्यति।।"

(तं० आ० 3,225)

उक्तं हि सिद्धातन्त्रेऽपिः-

"श्लोकगाथा तथा वृत्तं गीतकं वचनं तथा।
स्तुतिर्वै दण्डकं चैव आदिमान्त्ययुता यदा।।
तेऽपि मन्त्रा भवन्त्येव किं पुनस्तद्ग्रहस्य तु।"

(उद्ध०:- (तं० आ० वि०, खं० 2, पृ०, 214)

"शब्दः कश्चन यो मुखादुदयते मन्त्रः स लोकोत्तरः।"

(अनु० नि० स्तो० ,4)

अयं विश्वात्मकत्वविमर्शमयो मन्त्रो निर्विकल्पस्वभावो "अहम्" इति शुद्धः संविद्विमर्शः।

(2) उच्चारणविरहित एव "अहम्" इति स्वात्म-

संविद्विमर्शो निर्विकल्पस्वभावः शाम्भवयोगे मन्त्रः। यथा—

"मन्त्रः स प्रतिभाति वर्णरचना यस्मिन्नसंलक्ष्यते।"

(तदेव,3)

अयं विश्वोत्तीर्णताविमर्शमयो मन्त्रो "अहम्" इति शुद्धो विमर्शः संविन्मयः।

~ समुत्कृष्टतरः — **योगिनः समाविष्टं चित्तमेव मननकारित्वेन त्राणकारित्वेन च परो मन्त्रः इति शाम्भवयोगाभ्यासफले चित्स्वरूपप्रकाशे देदीप्यमाने सति योगिनो या स्वीया ज्ञानदृष्टिः सैव समुत्कृष्टतरो मन्त्रः। यथा—**

"चित्तमेव शिवो ज्ञेयः प्रमाता निरुपाधिकः।
सर्वज्ञतादिगुणवान् दिक्कालकलनोज्झितः।।
स्वात्मानुभवधर्मित्वात्स मन्त्र इति गीयते।"

(शि० सू० वा० भा०, पृ०, 30)

"चिच्छक्तेः स्वस्वभावो यः स मन्त्रः परिगीयते।
यन्नैरन्तर्यमननाद् योगी रूढशिवावनिः।"

(तदेव०, पृ०, 31)

"यद्वशात्परमार्थज्ञा योगिनो योगचिन्तकाः"

(तदेव, पृ०, 31)

समुत्कृष्टतरयोगिजनविषये लक्षणमेतन्मन्त्रस्येति वेद्यम्।

~ साध्यः — **यः सिद्ध्येद्वा न वा सिद्ध्येद् इति संशयारूढ एव।**

द्र०:- **'मन्त्रपरीक्षा'**:- ~ 'चक्रविधिना' इति।

~ सिद्धः— **यः कालेन सिद्ध्यति न पुनः सद्यः।**

द्र०:- **'मन्त्रपरीक्षा'**:- ~ 'चक्रविधिना' इति।

~ सुसिद्धः — **यः झटिति सुतरां सिद्ध्यति।**

द्र०:- **'मन्त्रपरीक्षा'**:- ~ 'चक्रविधिना' इति।

मन्त्रगुप्तिः — **मन्त्रो गुप्त एव सिद्धिदः, ततो न कस्यापि पुरः प्रकटनीयः। यथा—**

"गुप्तः सुसिद्धिदो देवि प्रकटः सिद्धिहा भवेत्।।
तस्मात् सुगुप्तः कर्त्तव्यः सम्प्रदायो मुखागमः।"

(ने० तं० 14,11-12)

मुखागम इति मौखिकेनोपदेशेन समवाप्तः इति।

मन्त्रदेहः — **जगत्कारणभूता या चिच्छक्तिः सैव सुषुम्ना नाड्यां स्फुरन्ती सती योगिनाऽहमिति विमृश्यमाना सती मन्त्रदेह इत्युच्यते। यथा—**

"अथवा गच्छतस्तस्य स्वप्नवृत्त्या विचक्षणः।।
निरोधं मध्यमे स्थाने कुर्वीत क्षणमात्रकम्।
पश्यते तत्र चिच्छक्तिं तुटिमात्रामखण्डिताम्।।
तदेव परमं तत्त्वं तस्माज्जातमिदं जगत्।
स एव मन्त्रदेहस्तु सिद्ध्योगीश्वरीमते।।"

(मा० वि० तं० 18,36 -38)

मन्त्रपरीक्षा— प्रयोगात् प्राक् मन्त्रः परीक्षणीयो भवति। यतो मन्त्राश्चतुर्वर्गका भवन्ति। (1) केचित् सिद्धा इत्युच्यन्ते; ते च यथाकालं सिद्ध्यन्ति। (2) अन्ये साध्या इति कथ्यन्ते; ते सिद्ध्यन्ति वा न वा सिद्ध्यन्तीति संशयदोलारूढा भवन्ति। (3) अपरे सुसिद्धा इति परिभाषिताः। ते एव त्वरितफलदा। भवन्ति। (4) अन्ये पुनररिसंज्ञयाप्रसिद्धाः। न ते कदापि सिद्ध्यन्ति, यतस्ते मूलनिकृन्तना इति कथिताः। परीक्षण-विधिरग्रे द्रष्टव्या।

~ अङ्गुलिपर्वविधिना— **एकैकस्यां कराङ्गुलौ पर्वचतुष्टयम्। तच्च क्रमेणैकैकेन वर्णमालावर्णेनाधिष्ठितं ज्ञेयम्। षण्ठवर्णवर्जाः क्षकारत्रकारज्ञकारयुक्ताः वर्णाः = 48। स्वराः = 12, स्पर्शाः = 25, अन्तस्थाः = 4, ऊष्माणः = 4, कूट वर्णाः = 3, (क्ष,त्र,ज्ञ इति) त्रिवारमावर्तनेन सर्वे वर्णा अङ्गुलिपर्वसु सम्मान्ति। तत्र स्वनाम्न-आद्यक्षरान्मन्त्रस्याद्यमक्षरं यावद् गणना कार्या। यदि नामाक्षरान्मन्त्राक्षरमेकसंख्ये पर्वणि पतेत् तर्हि मन्त्रः सिद्धः, चेद् द्विसंख्ये पर्वणि तदा साध्यः; चेत् त्रिसंख्ये तदा सुसिद्धः, यदि चतुःसंख्ये तदाऽरिरिति। यथा—**

"नामाक्षरान्मन्त्राक्षरं मातृकाक्रमेणाङ्गुलिपर्वचतुष्टये पुनः पुनरावर्तनया गण्यमानं यदि प्रथमं पर्व स्पृशति, तदा सिद्धं भवति। यदि द्वितीयं पर्व स्पृशति तदाऽसिद्धं साध्यं तदुच्यते। यदि तृतीयं पर्व स्पृशति, तदा सुसिद्धं भवति। अथ चतुर्थं पर्व स्पृशति, तदाऽस्य विरुध्यते।"

(ने० तं०, प० 8, पृ०, 209)

"रेखाङ्गुलिगतं तं च कथयामि समासतः।
पर्वणि प्रथमे सिद्धः साध्यश्चैव द्वितीयके।।
तृतीये तु सुसिद्धः स्यादरिर्ज्ञेयश्चतुर्थके।"

(स्व० तं० 8,22-23)

"असिद्धा रिपवो ये च सर्वांशकविवर्जिताः।"

(ने० तं० 8,61)

~ चक्रविधिना— **अत्र सौकर्यार्थं यन्त्रमेकमुपदिष्टमस्मद्-गुरुवर्यैःश्री काकारामशास्त्रिमहोदयैः। तच्च चक्राकारं राशि-चक्रमिव। तदेवाकडमचक्रमेतद् द्रष्टव्यम्—**



~ प्रयोगोदाहरणतः — **यथा ह्रीं इत्याद्यक्षरं यस्य मन्त्रस्य तस्य प्रथमो वर्णो हकारः। यदि देवीदत्तनामा सज्जनस्तस्य मन्त्रस्योपासनां कुर्यात् तदा द इति वर्णात् ह इति वर्णः चतुर्थे कोष्ठे पतति। तेन तस्मै निष्फलोऽसौ मन्त्रो भवेत्। यदि धन्वन्तरिर्नामोपासकस्तं मन्त्रमुपासीत तदा तस्य नामाद्याक्षरात् तृतीये कोष्ठे पतति हकारः। तेन तस्मै मन्त्रोऽसौ सद्यः फलप्रदो भवेत्।**

एवमेवोपास्यदेवताभिधानोपासनाक्षेत्रादिपरीक्षा अपि विधातुं शक्यन्तेऽनेन विधिना। यथा—

"सिद्धः सिद्ध्यति कालेन साध्यः सिद्ध्यति वा न वा।
सुसिद्धस्त्वरितं फलदोऽरिर्मूलनिकृन्तनः।।" इति।

मन्त्रपदाध्वानौ— तत्राक्षुब्धोऽध्वा मन्त्रात्मा क्षुब्धश्च पदात्मा। मन्त्रात्मता प्रमातृत्वं, पदात्मता च प्रमाणत्वम्। यथा—

"द्विविधं हि संविदः परिस्फुरणम्, क्षुब्धमक्षुब्धं च। तत्राक्षुब्धतायामस्याः प्रमातृत्वे मन्त्राध्वत्वम्, अन्यथा पुनः प्रमाणत्वे पदाध्वत्वम्।"

(तं० आ० वि०, खं० 7/2, पृ०, 47)

~ भिन्नौ परस्परम्— **उभयोः शाब्दाकारे सत्यपि मन्त्रः प्रक्षोभरहितः पदञ्च प्रक्षुब्धमिति भेदोऽनयोः परस्परम्। यथा—**

"पदानां मन्त्राणाञ्चैकमेव रूपमुक्तम्। किन्त्वयमेवानयोर्विशेषो यन्मानं क्षुब्धं माता पुनरक्षुब्धः।"

(तं० आ० वि०, खं० 7/2, पृ०, 39)

मन्त्रा अत्र बीजपिण्डा ज्ञेयाः।

मन्त्रपीठम्— मननत्राणप्रदा बीजपिण्डात्मकमन्त्रोपासनापरम्परा। यथा—

"मननत्राणदं यत्तु मन्त्राख्यं .....।"

(तं० आ० 37,19)

मन्त्रमहेश्वराः — (1) सदाशिवतत्त्वस्थाः प्रमातारो मन्त्रमहेश्वरा इत्युच्यन्ते। ते पारमैश्वर्यात्मकस्वातन्त्र्यमण्डिते शुद्धे संविन्मात्र एव गृहीतात्मभावाः सन्तः स्वात्मनि शुद्धसंविदात्मकेऽहम्भावे ध्यामलप्रायां। प्रमेयतत्त्वस्येदन्तात्मिकां छायां पश्यन्तोऽहमिदमिति विमृशन्तोऽपि सततं शुद्धचिदानन्दमयस्य स्वस्य साक्षात्कारात्मकस्य चमत्कारस्य रसे निमग्ना इव तिष्ठन्ति यथेच्छम्। सृष्ट्यादिकृत्येषु न ते तथा रुचिमन्तो भवन्ति यथा स्वात्मानन्दचमत्कारे भगवान् सदाशिवभट्टारकस्तेषामधिष्ठाता।

द्र०:- **'सदाशिवतत्त्वम्'** इति।

(2) उद्भूतपूर्णबोधाः प्रमातारः। यथा—

"उद्भूतपूर्णरूपोऽसौ माता मन्त्रमहेश्वरः।।"

(तं० आ० 10,112)

(3) ध्वस्तमलाः प्रमातारः। यथा—

"दिध्वंसिषुध्वंसमानध्वस्ताख्यासु तिसृष्वथ।
दशास्वन्तः कृतावस्थान्तरासु स्वक्रमस्थितेः।
विज्ञानाकलमन्त्रेशतदीशादित्वकल्पना।।"

(तं० आ० 9,95-96)

ध्वस्तो हि मलोऽत्र द्विधा वेद्यः— सर्वथा ध्वस्तः किञ्चिद् ध्वस्तः इति। मन्त्रेश इति मन्त्रश्च ईशश्चेति मन्त्रेशौ। तदीशेति मन्त्रेशानामपीशो मन्त्रमहेश इति बोध्यमत्र। सर्वथाध्वस्त प्रायो हि मलो मन्त्रमहेश्वराणाम्, मन्त्रेश्वराणां किञ्चिद् ध्वस्तो, मन्त्राणाञ्च ध्वंसमानः। विज्ञानाकलानामसौ ध्वंसोन्मुखः इति दिध्वंसिषुरिति कथितः।

~ तच्छक्तिः — **विद्याकलयोः संस्कारेण हीना, प्रबुद्धा, इच्छा, शक्तिरूपतां च जिघृक्षन्ती शुद्धविद्या मन्त्रमहेश्वराणां शक्तिः। यथा—**

"सैव इच्छा शक्तिरूपतां स्वातन्त्र्यस्वभावां जिघृक्षन्ती मन्त्रमहेश्वरस्य।"

(तं० सा०, पृ०, 94)

"प्रबुद्धा शुद्धविद्या तु .....।।
..... तत्संस्कारविवर्जिता।
मानं मन्त्रमहेशानां करणं शक्तिरुच्यते।।"

(तं० आ० 10,15-16)

~ तत्करणम्— **विद्याकलयोर्यो ध्वंसस्तस्य यः संस्कारस्तेनापि शून्या या शुद्धविद्याऽसौ मन्त्रमहेश्वराणां करणस्थानीयं तत्त्वम्। यथा**

.....तत्संस्कारविवर्जिता।
मानं मन्त्रमहेशानां करणं शक्तिरुच्यते।।

(त० आ० 10-16)

असौ शुद्धविद्यैव तेषां शक्तिः।

~ विशिष्टः (तेषु)— **अघोरभट्टारकः। यथा—**

"अशुद्धे पुनरध्वनि परमेश्वर एव स्वात्मप्रच्छादनक्रीडया अघोरभट्टारकभूमिं मन्त्रमहेश्वररूपां गृहीत्वा दुर्घटसम्पादनसामर्थ्येन मायाशक्त्या स्वतोऽन्योन्यतश्च भिन्नम् अणूनां भोगसिद्धये कलादिक्षित्यन्तं जगज्जडवर्गं क्रमतोऽक्रमतोऽपि अवभासयति।"

(ष० त्रि० तं० स० वि०, पृ०, 5)

मन्त्रमूर्तिः — मन्त्रा मूर्ति विग्रहो यस्य सः। अथवा अकारादिहकारान्तानां समेषां वर्णानां समुदायादेव जायन्ते सर्वे मन्त्राः। ततो अकारादिवर्णसमुदाय एव यः शिवस्य विग्रहस्स एव मन्त्राणां मूर्तिः, शरीरम्। मन्त्रमूर्तिर्महेश्वरः। शिव एव हि यतः पञ्चाशद्वर्णरूपतां धत्ते स्वविलासतः। यथा—

"सर्वसाधारणो देवः सर्वसिद्धिफलप्रदः।
सर्वेषामेव मन्त्राणां जीवभूतो यतः स्मृतः।।"

(ने० तं० 13,44)

"महादेवाय रुद्राय शङ्कराय शिवाय ते।
महेश्वरायापि नमः कस्मैचिन्मन्त्रमूर्त्तये।।"

(शि० स्तो० 2,4)

मन्त्रराजः — अघोरमन्त्रः। स चैवम् "ॐ अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यश्च, सर्वतः शर्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्यो नमः" इति। यथा—

"ओङ्कारमुच्चरेत्पूर्वमघोरेभ्योऽनन्तरम्।
अथघोरेभ्यो समालिख्य ततोऽन्यत्तु समालिखेत्।।
घोरघोरतरेभ्यश्च सर्वतः शर्व उच्चरेत्।
सर्वेभ्यः पदमन्यच्च नमस्ते रुद्र एव च।।
रूपेभ्यश्च समालिख्य नमस्कारावसानकम्।
मन्त्रराजः समाख्यातः अघोरः सुरपूजितः।।"

(स्व० तं०, 1-41-43)

मन्त्रलक्षणम्— यदुपायकेन मननेन साधकस्य भवमुक्तिरूप मनिष्टनिवारणात्मकं वा त्राणं भवति स मन्त्रः, येन वोपायेन सर्वविषयकं मननं ज्ञातं भवति सोऽपि मन्त्रः। यथा—

"मननं सर्ववेत्तृत्वं त्राणं संसार्यनुग्रहः।"

(उद्ध०:- तं० आ० वि०, खं० 2, पृ०, 214)

मन्त्रविद्याभेदः — चक्रभेदननीत्या विचारणे मन्त्रो भिन्नो विद्या च भिन्ना। तत्र विद्या वर्णपिण्डात्मिका, मन्त्रश्च पदसमूहात्मकः। बीजपिण्डो विद्या, पदसन्दर्भमयो मन्त्र इत्यनयोः परस्परं भेदः सूचितश्चक्रोदयप्रकरणे तन्त्रालोके। यथा—

"इति शक्तिस्थिता मन्त्राः विद्या वा चक्रनायकाः।।
पदपिण्डस्वरूपेण ज्ञात्वा योज्याः सदा प्रिये।"

(उद्ध०:- तं० आ० 7,42-43)

"चक्रप्रधाना मन्त्रा विद्या वा पदपिण्डस्वरूपेण समनन्तरोक्तपदपिण्डादिगत्या शक्तिस्थिताः प्राणसाम्येनोदिताः सर्वकालं जपादौ योज्याः।"

(तं० आ० वि०, खं० 4/2, पृ०, 34)

"मन्त्रा विद्या वेत्यनेनानुजोद्देशोद्दिष्टो मन्त्राविद्याभेदोऽप्यासूत्रितः।"

(तदेव,पृ०, 35)

द्र०:- **'प्राणसमो'** ~ 'जपः' इति।

मन्त्रवीर्यम्— आदि-क्षान्तानां वर्णानां विषये यः पारमेश्वरशक्तिमयो विमर्शः, स एव तेषां वीर्यम्। एतेन शाक्तविमर्शेन सहकृता यदा जपादौ विमृश्यन्ते वर्णरूपतया वा बीजमन्त्र (बीजाक्षर) रूपतया वा बीजपिण्डरूपतया वा सुप्तिङन्तशब्दात्मकतयाऽपि वा, तदा ते मन्त्राः सवीर्याः भवन्तस्तत्तत्फलप्रदा भवन्ति, अन्यथा किञ्चिन्मात्रफलप्रदा एव। यथा—

"मायायां पुनः स्फुटीभूतभेदविभागा मायीयवर्णतां भजन्ते, ये पश्यन्ती मध्यमा वैखरीषु व्यावहारिकत्वमासाद्य बहीरूपतत्त्वस्वभावतापत्तिपर्यन्ताः। ते च मायीया अपि शरीरकल्पत्वेन यदा दृश्यन्ते, यदा च तेषामुक्तनयैरेतैः जीवितस्थानीयैः शुद्धैः परामर्शैः प्रत्युज्जीवनं क्रियते, तदा ते सवीर्याः भवन्ति, ते च तादृशा भोगमोक्षप्रदाः।"

(तं० सा०, पृ०, 18)

द्र०:- **च** (स्पं० वि०, पृ०, 80) **इति।**

~ कौले— कौल यथो— शिवशक्तिसङ्घट्टे या मणितादि ध्वनिपरम्परासङ्घट्टानन्दसन्दोहोद्भूता परमाद्वयविमर्शसम्भिन्ना सुविचित्रतरानन्दसन्दोहप्रदाऽसावेव तत्र मन्त्रवीर्यम्। अनवच्छिन्नानन्दसन्दोहोद्बोधकत्वाभावे निर्वीर्यत्वं कौलिक-विधेर्मणितादिध्वनीनां च। यथा—

"एतत् खेचरमुद्रावेशेऽन्योन्यस्य शक्तिशक्तिमतोः।।
पानोपभोगलीलाहासादिषु यो भवेद्विमर्शमयः।
अव्यक्तध्वनिरावस्फोटश्रुतिनादनादान्तैः।।
अव्युच्छिन्नानाहतरूपैस्तन्मन्त्रवीर्यं स्यात्।"

(तं० आ० 29,154-155) (तं० सा० पृ०, 205)

अतीवरहस्यात्मकोऽयं विषयो नात्यन्तं स्पष्टीकृतो गुरुभिः।

~ वर्णेषु— **अमायीयवर्णपरामर्श एव हि मायीयवर्णमन्त्रादीनां वीर्यम्, तद्विना न ते फलदाः। यथा—**

"तेन गुप्तेन गुप्तास्ते शेषा वर्णास्त्विति स्फुटम्।"

(तं० आ० 11,82)

"मायीयवर्णानां परामर्शमात्रसारा एते वर्णा वीर्यत्वेनावश्यमुपगन्तव्याः, अन्यथा हि ते लिपिसन्निवेशकल्पा न काञ्चन सिद्धिं विदध्युः।"

(तं० आ० वि० खं० 7/2, पृ०, 64)

"तेनेति संवित्परामर्शमात्ररूपेण वीर्येणेति।"

(तदेव०, पृ०, 64)

~ शाक्तोपाये— **शाक्तोपायमयकालीपूजा विधौ परिपूर्णशुद्धस्वात्मविमर्शरूपो यो "अहम्" इति परावाग्रूपोध्वनिः, स एव मन्त्रः, शुद्धस्वात्मविमर्शनं च यत् तदेव मन्त्रवीर्यम्। यथा—**

"परामर्शस्वभावत्वादेतस्या यः स्वयं ध्वनिः।।
सदोदितः स एवोक्तः परमं हृदयं महत्।"

(तं० आ० 4,181-182)

"यः खलु परावाग्रूपः स्वरसोदितोध्वनिः—अहं परामर्शात्मा नादः ..... यस्मादैश्वर्यात्माऽहं परामर्श एवास्याः स्वभावो यन्माहात्म्याद्विश्वात्मनेयं परिस्फुरेत्।"

(तं० आ० वि०, खं० 3, पृ०, 211-212)

मन्त्रवेधः — वेधदीक्षाप्रकारविशेषः। गुरुणा मन्त्रशक्त्या विधीयमानः शिष्यस्य षट्चक्रवेधः। वेधश्च वेधनं, भेदनमिति। तेन वेधेन कुण्डलिनी निराबाधा षट्चक्रभेदनपूर्वकमूर्ध्वाधोगतिशीला सञ्जायते। यथा कुलगहरानुसारम्:-

(1) "ज्वालाकुलं स्वशास्त्रोक्तं चक्रमष्टारकादिकम्।।
ध्यात्वा तेनास्य हृच्चक्रवेधनान्मन्त्रवेधनम्।"

(उद्ध०:- (तं० आ० 29,240-241)

(2) "ज्वालाकुलं ततो ध्यात्वा अष्टारं चक्रमुत्तमम्।
द्वादशारमथो वापि स्वशास्त्रविधियोगतः।।
परचित्तं वेधनीयं मन्त्रवेध उदाहृतः।"
(उद्धः- (तं० आ० वि०, खं० 11/2, पृ०, 150)

एतदेव क्रमान्तरेणाप्याह दीक्षोत्तरागमानुसारम्।

(3) "आकारं नवधा देहे न्यस्य संक्रमयेत्ततः।।
न्यासयोगेन शिष्याय दीप्यमानं महार्चिषम्।
पाशस्तोभात्ततस्तस्य परतत्त्वे तु योजनम्।।
इति दीक्षोत्तरे दृष्टो विधिर्मे शम्भुनोदितः।"
(तं० आ० 29,241 - 243)

शम्भुनाथोक्तत्वेनैतदेवेह प्रमाणम्।

अन्यमते यथा—

"माया गर्भाग्निवर्णौघयुक्ते त्र्यश्रिणिमण्डले।।
ध्यात्वा ज्वालाकरालेन तेन ग्रन्थीन् विभेदयेत्।
पुष्पैर्हन्याद् योजयेच्च परे मन्त्राभिधो विधिः।।"
(तदेव 29,255-256)

"माया। मायाबीजम्। अग्निवर्णाः रेफाः। त्र्यश्रिणीति अर्था दूर्ध्वमुखे।
(तं० आ० वि०, खं० 11/2, पृ०, 160)

रहस्योपायोऽयं स्वभ्यस्तयोगस्य गुरोरेव कृपया सम्यग् वेद्यः।

मन्त्रशक्तिः — (1) दृढतरशिवतापरमर्शस्वभावा संवित्। यथा—

"परामर्शस्वभावेत्थं मन्त्रशक्तिरुदाहृता।"
(तं० आ० 16,253)

(2) मानवबुद्ध्या ज्ञातुमशक्याऽऽगममात्रतः संवेद्या। यथा—

"अचिन्त्या मन्त्रशक्तिर्वै परमेशमुखोद्भवा।"
(स्व० तं० 4,151)

मन्त्रसन्धानम्— आगमिकी रहस्यात्मिका मन्त्रोपासना काऽपि। यथा—

"मूलमन्त्रमनुस्मृत्य हृत्कण्ठतालुमध्यगम्।
भ्रूमध्यं शब्दकूटं तत्तुर्यस्थानं विभेदयेत्।।
वामदक्षिणमध्ये तु विषुवत्स्थेन भेदयेत्।
द्वादशान्तं परं नीत्वा करस्थो मन्त्रविग्रहः।।"
(स्व० तं० 3,50-51)

रहस्यात्मकः कश्चनायं विधिर्न स्पष्टं व्याख्यातस्तत्र।

मन्त्रसन्निधिः — परोक्षदीक्षार्थं मन्त्ररूपेणैव या शिष्यस्य मण्डले उपस्थितिः सात्र मन्त्रसन्निधिः, मन्त्ररूपतयैव सन्निधिर्न शरीरेणेति।

~ तद्धेतवः — **क्रियाद्या एकादश। येषां प्रभावतो मन्त्ररूपतया शिष्यस्य मण्डले उपस्थितिस्ते तदुपस्थितेर्हेतवः। यथा—**

"क्रियोपकरणस्थानमण्डलाकृतिमन्त्रतः।
ध्यानयोगैकतद्भक्तिज्ञानतन्मयभावतः।।
तत्प्रविष्टस्य कस्यापि शिष्याणां च गुरोस्तथा।
एकादशैते कथिताः सन्निधानाय हेतवः।।
उत्तरोत्तरमुत्कृष्टास्तथा व्यामिश्रणावशात्।"
(तं० आ० 21,16 - 18)

"क्रियादि ध्यानादि चावलम्ब्य एकादश एते सन्निधानाय हेतवः कथिता इति सम्बन्धः।"
(तं० आ० वि०, खं० 10, पृ०, 223)

"एते च समुदिता अप्युत्कृष्टा इत्याह।"
(तदेव)

मन्त्रसमावेशः— मन्त्रसमावेशः एव विद्यासमावेश इति परिभाष्यते। ताश्च विद्या प्रणवस्य द्वादश कलाः। तास्वपि प्रथममकारोकारामकारा एकतया गण्यन्ते वर्णसमावेश इति। शेषाः कला नव, मिलित्वा दश। ततो विद्या समावेशा मन्त्रसमावेशापरपर्यायाः दश एव। यथा—

"विद्याकाष्ठाभिः।वर्ण बिन्द्वर्धचन्द्रनिरोधिनीनादनादान्तशक्तिव्यापिनी समनोन्मनात्मभिर्दशभिर्भेदैर्भिन्ना।"
(तं० आ० वि०, खं० 1, पृ०, 216)

"एतत् तत्त्वान्तरे यत् पुंविद्याशक्त्यात्मकं त्रयम्।।
अम्भोधिकाष्ठाज्वलनसंख्यैर्भेदैर्यतः क्रमात्।"
(तं० आ० 1,187-188)

समावेशस्य पञ्चाशद्विधताप्रकरणे तन्त्रालोके विद्यापदेन, समुद्धृते चागमवाक्ये मन्त्रपदेन दश समावेशप्रकारा गणिताः।

मन्त्रसिद्धाः- ~ मुद्रा— क्रोधनी मुद्रा। यथा—

"मन्त्रसिद्धा ग्रासकी क्रोधनीति।"
(म० प्र० वि०, पृ०, 87)

प्रयोगात्मकत्वेन विशेषतोऽनुभूतिनिष्ठाद् गुरोरेवोपदेशाज्ज्ञेया।

मन्त्रसिद्धिभेदाः — सिद्धान्त-वाम-दक्षिण-कौल-मत-त्रिकाचारभेदेषु प्रयुक्ताः मन्त्रा भिन्नभिन्नप्रकारकसिद्धिप्रदाः यथा—

"अत एव च ते मन्त्राः शोधकाश्चित्ररूपिणः।
सिद्धान्तवामदक्षादौ चित्रां शुद्धिं वितन्वते।।"
(तं० आ० 11,87)

मन्त्राः :- ~ उपायाङ्गाः — मननेन त्राणकारिणोऽक्षरपदाद्यात्मकाः शाब्दशरीराः भुक्तिमुक्त्युपायाः।

~ अवाचकाः — **ये तावद्वर्णरूपा ये चापि बीजपिण्डात्मका मन्त्राः, न तेषां कोऽपि साङ्केतिकोऽर्थः। ते हि संवित्स्वभावभूतशक्तिविशेषाभिव्यञ्जका भवन्ति, न वाचकाः कस्याप्यर्थविशेषस्य।**

यथा—

"न च साङ्केतिकमिदं, येन पुरुषेच्छा वशोपकल्पितेन रूपेण चान्यथान्यथा निरूप्यमाणमिह सङ्गतं भवेत्।"
(प० त्री० वि०, पृ०,125)

पदवाक्यात्मका मालामन्त्राश्च भवन्ति सङ्केतितार्थवाचकाः।

~ गुरूपदिष्टाः — **गुरुसंविदभिन्नो हि विमर्शात्मको मन्त्रः, ततो गुरुणानुग्रहपूर्वमुपदिष्टाः सन्त एव मन्त्रा वीर्यवन्तः सफलाश्च भवन्ति। यथा—**

"मन्त्रा वर्णात्मकास्ते च परामर्शात्मकाः स च।
गुरुसंविदभिन्नश्चेत् संक्रामेत् सा ततः शिशौ।।"
(तं० आ० 26,21)

"एवमुक्तेन विधिना मन्त्राः सर्वे त्रितत्त्वजाः।
शिवाख्याः शक्तिरूपाश्च तथैवात्मस्वरूपकाः।।"
(ने० तं० 21,57)

~ त्रिस्तरकाः — **(1) शिवात्मकाः, (2)शक्त्यात्मकाः, (3) नरात्मकाश्चेति त्रिकोटिकाः। यथा—**

"शिवात्मकाः शक्तिरूपा ज्ञेया मन्त्रास्तथाणवाः।
तत्त्वत्रयविभागेन वर्तन्ते ह्यमितौजसः।।"
(ने० तं० 21,19)

"एवमुक्तेन विधिना मन्त्राः सर्वे त्रितत्त्वजाः।
शिवाख्याः शक्तिरूपाश्च तथैवात्मस्वरूपकाः।।
त्रिस्वभावाः समुद्दिष्टाः सर्वत्र बलशालिनः।
भवन्ति सर्वदा सर्वे सर्वगाः सर्वरूपिणः।।"
(ने० तं० 21,57-58)

~ निर्मलाः — **शिवोद्भूताः, शिवे स्थिता एवं हि मन्त्राः सुनिर्मला भुक्तिमुक्तिफलदाश्च। यथा—**

"यावन्न निर्मला मन्त्रास्तावत्सिद्धिः कथं भवेत्।।
निर्मलः स भवेच्चेत्तत्तत्स्था मन्त्राः सुनिर्मलाः।
तदुद्भूतास्तत्समाश्च भवेयुः सर्वसिद्धिदाः।।"
(ने० तं० 16,44-45)

~ निर्वीर्याः — **केवलं लिपिस्थाः, न च सामर्थ्यशालिना गुरुणोपदिष्टाः।**

द्र०:- **'लिपिस्थाः'** इति।

~ प्रामाणिकाः — **दृढतरविश्वासभाजि जने मन्त्राः साफल्यभाजो भवन्तः प्रमाणपदवीमारोहन्ति। दृढविश्वासरहितेन जनेन प्रयुक्ताः सन्तोऽपि निष्फला एव भवन्तोऽप्रमाणतामापद्यन्ते। यथा—**

"मन्त्रा अपि हि शुद्धसंविद्रूपपरमेश्वरसम्बन्धिपुराणतमसिद्धैकरूपविशिष्टविमर्शस्वभावा यस्यैव प्रमातुर्विमर्शमात्मनाऽभिव्याप्नुवन्ति, तस्यैव तथारूपतां बलादेवोल्लासयन्तस्तथाविधविशिष्टफलदाः। तत एवोक्तं- 'सहाराधकचित्तेन" इति।
(स्पं० का०,27)

द्र०:- च (ई० प्र० वि० वि० खं० 3, पृ०,93) **इति।**

~ भिन्नप्रकाराः — **प्रतिशास्त्रं मन्त्रेषु भिन्नभिन्नप्रकार एव पदानामक्षराणां वर्णानां च सन्निवेशस्तत्तच्छास्त्रोपदिष्टोपासनानुकूलविमर्शानुसारं कृतोऽस्ति। ते च मन्त्रास्तथैवोपास्यमानास्तत्तत्फलदा भवन्ति। तेनात्र विषये नैव शङ्कावकाशः कश्चनापि। यथा—**

"काचिदेव समुद्भूय भावना मन्त्रन्यासहोमादिगतिर्वा काञ्चिदेव सिद्धिं वितरेत्। अत्रापि यावन्नियतिव्यापारानतिक्रमात्। तथा हिप्रतिशास्त्रमन्यथा चान्यथा च वर्णनिवेशपुरःसरं निजनिजविज्ञानसमुचिततत्तद्वर्णभट्टारकप्राधान्येन तत्तद्वर्णप्राथम्यानुसारायातनियतपरिपाटीपिण्डितवर्ण समूहरूपः प्रस्तारो निरूपितः। तत एव च मन्त्रोद्धारो निरूपितस्तामेव मातृकारूपां तथाविधवीर्यदानोपबृंहितमन्त्रस्फुरत्तादायिनीं दर्शयितुम्।।"
(प० त्री० वि० पृ०,155)

~ भुक्तिमुक्तिप्रदाः — **भुक्तिमुक्तिफलसाधनभूताः। यथा—**

"मन्त्राः करणभूतास्तु पशुकार्यस्य साधने।
आचार्यः कारणं प्रोक्तः शिवरूपो यतः स्मृतः।।"
(स्व० तं० 3,160)

~ महामहिमानः — **यद्यपि मन्त्रा अपि शब्दमयाः सन्तो विषयरूपास्तथापि विमर्शरूपतयान्तःपरिवर्तमानाः पर्यन्तेऽनाहतशब्दवाच्यतामाप्नुवन्ति। नैवं देह प्राणाद्याः नीलसुखाद्या वा। एतत् सङ्केतितं यथा—**

"इदन्तैव शरीरबुद्धिप्राणादिषु प्रधानभूता। न ह्येते (शरीर प्राणाद्याः) शब्दनरूपवत् संवेदनगामिनः, इति संविदं सङ्कोचयन्तो निबिडतममावृण्वते ननु। एवं शब्दनशरीरो मन्त्रात्मा हृदयाकाशे विमर्शरूपतया विपरिवर्तमानः, अत एवानाहतशब्दवाच्यो नित्योदितो मन्त्रः।"
(ई० प्र० वि० वि०, खं०3, पृ०,283)

~ लिपिस्थाः — **न गुरुमुखादुपदेशेन लब्धा अपि तु पुस्तकादधीताः। निर्वीर्यास्ते। यथा—**

"लिपिस्थितस्तु यो मन्त्रोनिर्वीर्यः सोऽत्र कल्पितः।
संकेतबलतो नास्य पुस्तकात्प्रथते महः।।"
(तं० आ० 26,22)

~ शिवसमाः — **यथा—**

"शिवशक्तिनियोगाच्च मन्त्राणामुदयः परः।
सर्वत्र फलदा मन्त्रा यतस्तेऽतः शिवाः स्मृताः।।
तस्माच्छिवसमाः सर्वे नित्यानुग्रहकारिणः।
शिवश्चाचार्यरूपेण तेनैते फलदाः स्मृताः।।"
(ने० तं० 16,46-47)

~ शिवोद्भवाः — **शिवेनैव प्रथमत उपदिष्टाः सन्मन्त्राः। यथा—**

"सर्वेषां मन्त्रराजानां बृंहकः परमेश्वरः।।
अनेन ग्रथिता मन्त्राः सूत्रे मणिगणा इव।
अस्य गर्भे स्थिता मन्त्राः जायन्ते मोक्षसिद्धिदाः।।"
(ने० तं० 18,16-17)

~ सप्रयोजनाः — **भवदुःखान्मुक्तिः शिवदशायां च योजना मन्त्राणां प्रयोजने मुख्ये। यथा—**

"एवमाद्याः स्मृता मन्त्राः सर्वे ह्यमिततेजसः।।
अधिकारं प्रकुर्वन्ति सर्वस्य जगतः प्रिये।
मोचयन्ति च संसाराद्योजयन्ति परे शिवे।
मननत्राणधर्मित्वात्तेन मन्त्रा इति स्मृताः।"
(ने० तं० 21,74-76)

~ ससामर्थ्याः — **प्राणहरणदीक्षायां, परोक्षदीक्षायां, सप्रत्ययायां निर्बीजायां वा दीक्षायां तुलादीक्षायां वा जीवाकर्षणादौ वा सामर्थ्यशालिना गुरुणा प्रयुक्तैर्मन्त्रैरेव शिष्यस्य संसृतिबीजभूतानां मलादीनां तेषां बीजत्वसामर्थ्यस्य च संशोधनं विधीयते। यथा—**

"मर्म कर्तनविधौ लघुभावे
बीजभावविलये यदि मन्त्रः।
तत्तथोचितपथेन नियुक्त-
स्तत्तदाशु कुरुते परमेशः।।"
(तं० सा०, पृ०, 164-165)

मन्त्रा ~ प्रमातारः — **(1) विद्येश्वराः। उत्कृष्टायां महामायाभूमौ स्थितः प्रमातृवर्गो मन्त्राख्यः। स एव विद्येश्वराभिधोऽपि। एते प्रमातारः स्वात्मानं शुद्धसंविन्मयं पश्यन्ति स्वात्मनश्च स्वाभावभूतां परमेश्वरताख्यां स्वातन्त्र्यशक्तिं संविदन्ति। ततो नैषां स्वात्मनो विषये कोऽपि विपर्यासः। परं तथाऽप्येते वेद्यं स्वात्मनो भिन्नमेव पश्यन्तस्तदिदमित्येव विमृशन्ति, नाहमिति। सैषा भेददृष्टिरेतेषां मायीयो मलः। आणवेन कार्मेण च मलेन रहिता एते प्रमातारः एकमलाः। आत्मनो यथार्थस्य स्वरूपस्य विमर्शनात्मकं यन्मननं यच्चाणवात् कार्माच्च मलात् तत्फलभूतायाश्च संसृतेस्त्राणमेतेषां सैवैषां मन्त्रता, शुद्धविद्यायां यदेतेषां प्रभुत्वं सैषां विद्येश्वरतेति वेद्यं सुधीभिः।**

भगवानन्तनाथ एतेषामधिपतिः। ईशानाद्याः पञ्चशिवविग्रहा अपि मन्त्रोचितसंविन्मयाः; तत एव शिवः पञ्चमन्त्रतनुरिति प्रसिद्धः आगमेषु।

द्र०:- **'विद्यातत्त्वम्'** इति।

द्र०:- **'विद्येश्वराः'** इति।

(2) परिपूर्णप्रबोधोन्मुखीभूताः प्रमातारो मन्त्राः। यथा—

"उद्बुभूषु प्रबोधानां मन्त्राणामेव मातृता।।"
(तं० आ० 10,110)

(3) ध्वंसमान मलाः प्रमातारो मन्त्राः।

द्र०:- **'मन्त्रमहेश्वराः'** इति।

~ अवान्तरभेदतः — **मन्त्रप्राणिनोऽपि साञ्जननिरञ्जनादितया भिन्नभिन्नप्रकारा भवन्ति। यथा—**

"मन्त्रत्वं प्रतिपद्यन्ते चित्राच्चित्रं च कर्मतः।।"
(तं० आ० 9,141)

"अत एव मन्त्रत्वमपि साञ्जननिरञ्जनादिभेदात् चित्रमित्युक्तम्।"
(तं० आ० वि०, खं० 6, पृ०,111)

~ तच्छक्तिः — **तत्त्वभेदनदृशा विद्याकलयोर्ध्वंसस्य संस्कारेण युक्ता प्रबुद्ध्यमाना शुद्धविद्या मन्त्राणां शक्तिः। यथा—**

"तत्संस्कारसचिवा प्रबुद्ध्यमाना शुद्धविद्या मन्त्रस्य"
(तं० सा०, पृ०, 94)

~ तत्करणम्— **तत्त्वभेदनदृशा विद्याकलयोर्ध्वंसस्य संस्कारशेषेण सहिता प्रबोधोन्मुखी शुद्धविद्या मन्त्रप्राणिनां करणस्थानीया शक्तिः। यथा—**

"अशुद्धविद्याकलनाध्वंससंस्कारसङ्गता।।
प्रबुभुत्सुः शुद्धविद्या मन्त्राणां करणं भवेत्।"
(तं० आ० 10,14-15)

~ मलस्थितितः — **मन्त्रप्रमातृषु मलो ध्वंसमानः।**

द्र०:- **'मलः'** — ~ 'तारतम्यतः' **इति।**

मन्त्रादिगुप्तिः — मन्त्रो वाऽक्षसूत्रं वा नैव प्रकटनीयं कस्याप्यग्रे यथा—

"स्वमन्त्रमक्षसूत्रं च गुरोरपि न दर्शयेत्।"
(उद्धृ०:- (तं० आ० वि०, खं० 11, पृ०, 179)

मन्त्राद्युपासना-रहस्यम्— साधकः सङ्कल्पित-प्रयोजनानुसारं तदनुकूलप्रतिक्रियोत्पादकान् वर्णध्वनीन् बीजमन्त्रतयोच्चारयति, चिन्तयति च। ततस्तदनुकूलेनैव द्रव्यजातेन तर्पयति देवताः। तत् प्रयोजनोचितप्रार्थनानुकूलान् विकल्पात्मकानपि वाक्यरूपान् मन्त्रानुच्चारयति वा चिन्तयति वा तत्तत् फलाकाङ्क्षी साधकः। दृष्टान्तार्थं पुष्ट्यर्थी तावदमृतवर्णरूपानाप्यान् वर्णान् तद्वर्णकूटमयांश्च बीजपिण्डान् प्रयुञ्जानः पुष्टिकराणि क्षीरघृतप्रभृतीनि द्रव्याण्यर्पयन् तत्तत्फलप्रदानानुकूलाकारायै देवतायै विकल्पात्मकानपि प्रार्थनादिरूपान् मन्त्रानुच्चारयति जपति च। एवं क्रियमाणा मन्त्राद्युपासना सफला भवति। यथा—

"अस्य स्यात् पुष्टिरित्येषा संविद्देवी तथोदितात्।
ध्यानात्सञ्जल्पसम्मिश्राद् व्यापाराच्चापि बाह्यतः।।
स्फुटीभूता सती भाति तस्य तादृक् फलप्रदा।
पुष्टिः शुष्कस्य सरसीभावो जलमतः सितम्।।
अनुगम्य ततो ध्यानं तत्प्रधानं प्रतन्यते।
ये च स्वभावतो वर्णा रसनिःष्यन्दिनो यथा
दन्त्यौष्ठ्यदन्त्यप्रायास्ते कैश्चिद्वर्णः कृताः सह।
तं बीजभावमागत्य संविदं स्फुटयन्ति ताम्।।
पुष्टिं कुरु रसेनैनमाप्याययतरामिति।
सञ्जल्पोऽपि विकल्पात्मा किं तामेव न पूरयेत्।।
अमृतेयमिदं क्षीरमिदं सर्पिर्बलावहम्।
तेनास्य बीजं पुष्णीयामित्येनां पूरयेत्क्रियाम्।।"
(तं० आ०1,117-122)

मन्त्राध्वा — (1) प्रमाणदशा हि प्रमेयव्रातप्रसरणशीला। तत् प्रसरणविरता संविद्रूपा प्रमातृमात्रता मन्त्राध्वनः स्वरूपम्। बहिर्मुखता विरामात् स्वात्ममननरूपतया,

स्वात्ममात्रविश्रान्त्या च त्राणरूपतया स्थितोऽयमध्वा यथा—

"तथाहि चिद्विमर्शेन ग्रस्ता वाच्यदशा यदा।।
शिवज्ञानक्रियायत्तमननत्राणतत्परा।
अशेषशक्तिपटलीलालाम्पट्यपाटवात्।।
च्युता मानमयाद्रूपात् संविन्मन्त्राध्वतां गता।"

(तं० आ० 11,55 - 57)

प्रमाताऽत्र सङ्कुचितो मायीयः प्रमाता। लीलालाम्पट्यपाटवं प्रमाणरूपता ततश्च्युता तदुत्तीर्णा। यथा—

"बहिरौन्मुख्यविरमात्तदेकविश्रान्ता सङ्कुचितप्रमातृरूपा संविन्मन्त्राध्वतां गता।"

(तं० आ० वि०, खं० 7/2, पृ०, 47)

रहस्यात्मकमिवेदं दीक्षितसाधकमात्रगम्यम्।

(2) प्रमातृभागगः प्रमात्रंशप्रधान औदासीन्यस्वभावो-विकल्पात्मकप्रक्षोभरहितः शाब्द अएव स्वात्मविमर्शः मन्त्राध्वा। यथा—

"तदेव च पदं मन्त्रः प्रक्षोभात् प्रच्युतं यदा।
गुप्तभाषी यतो माता तूष्णीं भूतो व्यवस्थितः।।"

(तं० आ०11,45)

"यदा च तदेव पदं प्रमाणात्मकाद्रूपात्प्रच्युतमन्तर्मुखत्वादक्षुब्धं रूपमाप्तं तदा प्रमात्रात्मा मन्त्रः। .... 'गुप्तभाषी' अन्तःपरामर्शात्मकः।"

(तं० आ० वि०, खं० 7/2, पृ०, 37-38)

(3) अकारात् क्षकारान्तानां वर्णानां मातृकासंज्ञा। तद्रूपधरो मन्त्राध्वा, अयं प्रमाणतां गच्छन् पदाध्वतां प्राप्नोति। यथा—

"मन्त्राध्वा मातृरूपधृक् ,'अयं प्रमाणतां
गच्छन् प्राप्नोत्येव पदाध्वताम्'।"

(पू० प्र० खं०2,46)

~ प्राणस्थः— स च प्रणवकलाद्वादशकात्मको ज्ञेयः। यथा—

"अध्वषट्कं यथा प्राणे संस्थितं कथयामि ते।।
.....
..... मन्त्राध्वानं निबोध मे।।
मन्त्रैकादशिका या तु सा च हंसे व्यवस्थिता।
पदैकादशिका सा च प्राणे चरति नित्यशः।।
अकारश्च उकारश्च मकारो बिन्दुरेव च।
अर्धचन्द्रो निरोधी च नादो नादान्त एव च।।
शक्तिश्च व्यापिनी चैव समनैकादशी स्मृता।
उन्मना च ततोऽतीता तदतीतं निरामयम्।।
मन्त्रा एवं स्थिताः प्राणे .....।"

(स्व० तं० 4,241; 253-7)

अभ्यासविशेषतः प्राणचारे एतेषां साक्षात्कारो भवतीति।

~ शाब्दः — मन्त्राध्वन्यपि विमर्शात्मकः शब्दोल्लास इति सोऽपि शाब्द एव। यथा—

"तथापि न विमर्शात्मरूपं त्यजति तेन सः।
प्रमाणात्मविमर्शात्मा मानवत् क्षोभभाङ् न तु।।"

(तं० आ० 11,46)

शब्दनमत्रविमर्शनं, विमर्शनस्यैव मूलभूतवाग्रूपत्वात्। मन्त्रार्था— बीजमन्त्रा नैव कमपि साङ्केतिकमर्थं बोधयन्ति। संकेतस्य विकल्पप्रधानेष्वेव वाग्विमर्शेष्ववसरः। बीजमन्त्राः पुनरविकल्पेन विमर्शेन स्वमर्थं बोधयन्ति। तेन स्वयं स्वानुभूत्यैव साक्षात्करणीया अर्था बीजमन्त्राणाम्। यथा—

"न च साङ्केतिकमिदं - येन पुरुषेच्छावशोपकल्पितेन रूपेण च अन्यथा अन्यथा निरूप्यमाणमिह सङ्गतं भवेत्।"

(प० त्री० वि०, पृ०,125)

मन्त्रेश्वराः — (1) ईश्वरतत्त्वेऽवस्थिताः प्राणिनो मन्त्रेश्वरा इत्युच्यन्ते। ते शुद्धसंविदात्मके स्वातन्त्र्य- शक्ति सुमण्डिते शुद्धेऽहं स्वरूपे प्रमातरि स्वात्मनि सामान्याकारं प्रमेयतत्त्वं स्फुटयेदन्तया "इदमहमिति" विमृशन्तः स्वस्यैश्वर्यं च स्फुटयन्तः सृष्ट्यादिकृत्येषु रुचिमन्तस्तिष्ठन्ति। तेषामधिष्ठाता भगवानीश्वरभट्टारकः।

द्र०:- **'ईश्वरतत्त्वम्'** इति।

(2) मन्त्रेश्वरेषु मलः किञ्चिद्ध्वस्तो न सर्वथा ध्वस्तः। ततः किञ्चिद्ध्वंसमानः इति।

द्र०:- **'मन्त्रमहेश्वराः'** इति।

(3) उद्भवत् पूर्णबोधः प्रमाता मन्त्रेश्वरः। यथा—

"..... तदा माता तदीश्वरः।
स ह्युद्भवत्पूर्णबोधः .....।।"

(तं० आ० 10,111)

स इति मन्त्रेश्वरः। उद्भवन् पूर्णबोधो यस्य स इति।

~ तच्छक्तिः — **ध्वंसमान-विद्या-कला-संस्कार-शेषा प्रबुद्धा शुद्धविद्या मन्त्रेश्वरस्य शक्तिः। यथा—**

"तत् संस्कारहीना सैव प्रबुद्धा मन्त्रेशस्य।"

(तं० सा०, पृ०, 94)

"अत्र तत् संस्काराहीना" इत्येव शुद्धः पाठः प्रतिभाति।

प्रबुद्धा शुद्धविद्या तु तत्संस्कारेण संगता।।
मानं मन्त्रेश्वराणां स्यात् .....।"

(तं० आ० 10,15-16)

अत्र तत्संस्कारपदेनाशुद्धविद्याकलयोर्ध्वंसस्तस्य संस्कारोऽभिप्रेतो वेदितव्यः सुधीभिः।

~ तत्करणम्— नश्यदवस्थयोर्विद्याकलयोर्ध्वंसस्य संस्कारेण युक्ता प्रबुद्धा शुद्धविद्या मन्त्रेश्वराणां करणस्थानीया शक्तिः। यथा—

~ विशिष्टस्तेषु— **स तावदीश्वरभट्टारको यस्तेषामुपास्यः। शतरुद्राद्या अपि मन्त्रेश्वरविशेषाः। यथा—**

"मन्त्रेशा इति तत्तन्मन्त्रवाच्याः शतरुद्राद्याः।"

(तं० आ० वि०, खं०7, पृ०,118)

मन्त्रोदयः :- ~ यत्नजः — **यथा ह्यरघट्टयन्त्रं चालयञ्जनो यन्त्रस्यैकमेवाङ्गं सावधानतया भ्रामयन् सर्वमपि यन्त्रं तत्तत्क्रियासु योजयति, तथैव यत्नजमन्त्रोदयाभ्यासे साधकः प्राणचारे भावनात्मकेन यत्नेन केवलं मन्त्रानेव क्रमेणोद्भावयन् तद्विमर्शने सावधानस्तिष्ठन्नेव परापरसिद्धीरवाप्नोति, शिवभाव साक्षात्कारं चापि क्रमेण लभते, मन्त्रदेवतासाक्षात्कारेण च विविधमैश्वर्यमवाप्नोति। स एष भावनात्मकेन यत्नेन प्राणचारेषु विविधानां मन्त्राणामुद्भावनेन भुक्तिमुक्तिप्रदः प्राणाभ्यासो यत्नजो मन्त्रोदयः। अत्राभ्यासे उदीयमाना मन्त्राः श्रूयन्ते तद्रहस्यं च साक्षात्क्रियते। अहोरात्रं ये 21600 प्राणचारास्ते विविधमन्त्रसंख्यानुसारं विभज्यन्तेऽत्र योगे। सर्वथा रहस्यभूतोऽयं विधिः। यथा—**

"बीजपिण्डात्मकं सर्वं संविदः स्पन्दनात्मताम्।।
विदधत् पर संवित्तावुपाय इति वर्णितम्।
यथारघट्टचक्राग्रघटीयन्त्रौघवाहनम्।।
एकानुसन्धियत्नेन चित्रं मन्त्रोदयं भजेत्।
एकानुसन्धानबलाज्जाते मन्त्रोदयेऽनिशम्।।
तन्मन्त्रदेवताऽयत्नात्तादात्म्येन प्रसीदति।

(तं०आ०7,2-5)

"इहारघट्टवाहकस्य यन्त्रमात्रवाहनक्रिया विषयत्वादेकेनैवानुसन्धानेनारघट्टचक्राग्रगतघटी सम्बन्धिना यन्त्रौघेन नैरन्तर्येण वाहनं यथा चित्रं यन्त्रोदयं भजते ऊर्ध्वाधोमुखरिक्तपूर्णघटीचक्रात्मना वैचित्र्येण निष्पत्तिमियात्, तथा साधकस्यानिशं मन्त्रोदयविषयेणैकेनैवानुसन्धानेन न केवलमेतदुदय एव सिद्ध्येद् यावत्तत्तन्नान्तरीयकतया प्रयत्नान्तरमन्तरेणै- तन्मन्त्रदेवतापि तादात्म्येन प्रसीदति।

इदमत्र तात्पर्यम्—

यथा हि यन्त्रं वाहयन्न रघट्टवाहकस्तत्र वैचित्र्यान्त- रमपि प्रयत्नान्तरनिरपेक्षमासादयेद्, एवं साधकोऽपि मन्त्रोदय एव प्रयतमानः परसंविदैकात्म्यमिति।"

(तं० आ० वि०, खं०4/2, पृ०,4)

"यत्नजस्तु मन्त्रोदयोऽरघट्टघटीयन्त्रवाहनवदेकानुसन्धिबलाच्चित्रं मन्त्रोदयं दिवानिशमनुसन्दधद् मन्त्रदेवतया सह तादात्म्यमेति।"

(तं० सा०, पृ०,59)

~ तत्फलम्— **उक्तं स्पष्टं यथा—**

"इति क्रमेण स्थूलसूक्ष्मे चारस्वरूपे विश्रान्तस्य प्राणचारे क्षीणे, कालग्रासे वृत्ते सम्पूर्णमेकमेवेदं संवेदनं चित्रशक्तिनिर्भरं भासते। कालभेद एव संवेदनभेदको न वेद्यभेदः, शिखरस्थज्ञानवत्।"

(तं० सा०, पृ०,60)

"एवं प्रयत्नसंरुद्धप्राणचारस्य योगिनः।।
क्रमेण प्राणचारस्य ग्रास एवोपजायते।
प्राणग्रासक्रमावाप्तकालसङ्घर्षणस्थितिः।।
संविदेकैव पूर्णा स्याज्ज्ञानभेदव्यपोहनात्।
तथा हि प्राणचारस्य नवस्यानुदये सति।।
न कालभेदजनितो ज्ञानभेदः प्रकल्पते।"

(तं० आ०7,21-24)

अत्रापि किमपि रहस्यं यदनुभवेनैव साक्षात्कार्यम्।

मन्थानभैरवः— (1) स्वशक्तिनिर्मथनपूर्वकं सृष्ट्यादिकर्ता भगवान् परः शिवः। यथा—

"यश्चायमेवंविधार्थमथनप्रगल्भो भगवान्, अत एव सर्वपर्यन्तप्रतिष्ठानरूपो यः कुलेश्वरः, स एव यतः स्वशक्तिं निर्मथ्य सृष्ट्यादिकारी, अत एवं विधं श्रीमन्थानभैरवं नमामीति सम्बन्धः इति श्रीक्रमकेलिक्लृप्त्या स्वेच्छामात्रविजृम्भित-विश्वक्षोभतयानुभूयते। तस्य कौलिकेषु तन्त्रेषु भैरव इति प्रायो व्या पदेशो भवति।"

(म० मं० प०, पृ०,172)

उद्धः-क्रमकेलितः — यथा—

द्र०:- (पू० प्र०1,196) **इति च।**

(2) शक्तिचक्रेश्वरः। यथा—

"एता हि द्वादश देव्यः श्रीमन्मन्थानभैरवं चक्रेश्वरमालिङ्ग्य सर्व दैव जगत्सर्गादिक्रीडां सम्पादयन्तीत्याम्नायः।"

(स्पं० नि०, पृ०,6)

मन्दः :- ~ बीजमन्त्रः — **'डकारः'। यथा—**

मन्दो डकारः।

(तं० आ० वि०, खं०11/2, पृ०,137)

मन्दः :- ~ शक्तिपातः — **येन शक्तिपातेन विद्धः साधकः सुचिरं भोगान् भुञ्जान एव क्रमेणैव पर्यन्ते शिवभावमासादयत्यसौ शक्तिपातो मन्दः।**

त्रिप्रकारेण मन्दशक्तिपातेन विद्धाः साधकाः लोकधर्मदीक्षामेव लभन्ते, न शिवधर्मदीक्षामिति जयरथस्य विचारः। यथा—

"इदानीं तु लोकधर्मिविषयमवशिष्टं शक्तिपातं निरूपयति।"

(तं० आ० वि०, खं०8, पृ०,151)

~ तत्त्रैविध्यम्— **भोगोत्सुकताया नातितीव्रतायां तीव्रमन्दः तस्या मध्यतायां मध्यमन्दः तस्या अति तीव्रतायां मन्दमन्दः शक्तिपातः। इत्थं मन्दस्त्रिधा। यथा—**

"तत्रापि तारतम्यात् त्रैविध्यम्।"

(तं० सा०, पृ०,124)

~ तत्पात्राणि— **येषां भोगवासना शिवभावेच्छापेक्षया प्रबला भवति ते मन्देन शक्तिपातेनान्तराविद्धा इति मन्तव्याः। शक्तिपातं विना शिवभावासादनेच्छैव नोदेति। शक्तिपातस्य मन्दत्वेनैव भोगवासनायाः प्राबल्यम्। परं बुभुक्षुरपि भोगान् भुक्त्वाऽन्ते शिवभावमापद्यत एव शैवशक्तिपातमहिम्ना। ततोऽत्र शैवे मार्गे भुक्तिरपि पर्यन्ते मुक्तावेव पर्यवस्यति। सैषाऽस्य शक्तिपातरूपता।**

यथा—

"तीव्रमन्दे मध्यमन्दे मन्दमन्दे बुभुक्षुता।।
क्रमान् मुख्यातिमात्रेण विधिनैत्यन्ततः शिवम्।"
(तं० आ०13,245-246)

~ तत्फलम्— **मन्दमन्दतरशक्तिपातपात्रतां प्राप्तो योगी उत्तरेषु भुवनेषु भोगान् भुक्त्वा भुवनेश्वरैश्च कृतदीक्षः पुनर्योगाभ्यासं विधाय मुक्तिं लभते चिरेण। यथा—**

"तस्य तु परमार्थमयीं धारामगतस्य मध्यविश्रान्तेः।
तत्पदलाभोत्सुकचेतसोऽपि मरणं कदाचित् स्यात्।।
योगभ्रष्टः शास्त्रे कथितोऽसौ चित्रभोगभुवनपतिः।
विश्रान्तिस्थानवशाद् भूत्वा जन्मान्तरे शिवीभवति।।"
(प० सा० ,98-99)

~ शक्तिपातता (तस्य)— **अस्य मन्दस्य शक्तिपातस्य भोगप्रदत्वेऽप्यनुग्रहरूपत्वमेव। यतः पर्यन्तेऽस्य मोक्षपर्यवसायित्वम्। यथा—**

"पारमेश्वरमन्त्रयोगोपायतया यतस्तत्रौत्सुक्यम्। पारमेशमन्त्रयोगादेश्च यतो मोक्षपर्यन्तत्वम्, अतः शक्तिपातरूपता।"
(तं० सा०, पृ०,123-124)

मन्दतीव्रः :- ~ शक्तिपातः — **मन्दतीव्रशक्तिपातवशाच्छिष्यस्य हृदि गुरुमन्वेष्टुमिच्छा समुत्पद्यते। स गुरुं परीक्षते। तदनुग्रहेण शाङ्करीं ज्ञानदीक्षामासाद्य सद्यो वा मुक्तिं लभते देहपातपूर्वकम्, प्रारब्धकर्म भोगान्ते वा शिवीभवति। यथा—**

"मन्दतीव्राच्छक्तिबलाद् यियासास्योपजायते।
शिवेच्छावशयोगेन सद्गुरुं प्रति .....।।
.....
.....
तस्माद्दीक्षां स लभते सद्य एव शिवप्रदाम्।।
ज्ञानरूपां यथा वेत्ति सर्वमेव यथार्थतः।
.....
.....
तदा च देहसंस्थोऽपि स मुक्त इति भण्यते।।
.....
सद्यो निर्वाणदां कुर्यात् सद्यः प्राणवियोजिकाम्।।"
.....
.....
(तं० आ०13,218-235)

~ तद्दीक्षा प्रकाराः — **अनेन शक्तिपातेन पूते शिष्ये सद्गुरुः सत्यं स्वात्मपरशिवत्वज्ञानमुद्बोधयति। ततो मुख्यतो ज्ञानदीक्षेयम्। अस्या उपाया व्याख्यान-संस्पर्शन-कृपादर्शन-शास्त्रोपदेशज्ञानसङ्क्रमण-समत्वदृष्ट्युन्मेषण-चर्यादर्शन- चरुप्रदानमन्त्रोच्चारण-मुद्राप्रदर्शनादयः। यथा—**

"अस्यां (दीक्षायां) भेदो हि कथनात् सङ्गमादवलोकनात्।।
शास्त्रात्सङ्क्रमणात् साम्यचर्यासन्दर्शनाच्चरोः।
मन्त्रमुद्रादिमाहात्म्यात् समस्तव्यस्तभेदतः।।
क्रियया वान्तराकाररूपप्राणप्रवेशतः।"
(तं० आ०13,227-229)

~ मालिनीमते— **मन्दतीव्रात् शक्तिपातात् साधकस्य सद्गुरुणा सम्पर्को जायते। लब्धदीक्षोऽसौ तत्क्षणादेव जीवन्मुक्तो भवति। प्राणहरणदीक्षया वा सद्यो देहं त्यक्त्वा विदेहमुक्तिं लभते, प्रारब्धकर्मान्तं वा जीवति, ततो विदेहमुक्तिभाग्भवति। यथा—**

"..... यियासुः शिवेच्छया।
भुक्तिमुक्तिप्रसिद्ध्यर्थं नीयते सद्गुरुं प्रति।।
तमाराध्य ततस्तुष्टादीक्षामासाद्य शाङ्करीम्।
तत्क्षणाद्वोपभोगाद्वा देहपाताच्छिवं व्रजेत्।।"
(तं० आ०13,202-203)

मन्दमध्यः :- ~ शक्तिपातः — **अनेन शक्तिपातेन कृतार्थीकृतः साधकः मोक्षलाभोत्सुकः सन् बुभुक्षुरपि भवति। ततो गुरुस्तं योजनिकाख्यया दीक्षाङ्गभूतया क्रियया मानवदेहान्ते तं लोकं प्रापयति यत्र तस्य भोगवासना सफला भवेत्। मुक्ते च तत्रत्ये विशिष्टे भोगे तत्रत्यजीवनसमाप्तौ तत्रत्यस्य देहस्याप्यन्ते सति पश्चाच्छिवभावमापद्यते परिपूर्णम्। यथा—**

"मन्दमध्ये तु तत्रैव तत्त्वे क्वापि नियोजितः।।
देहान्ते तत्त्वगं भोगं भुक्त्वा पश्चाच्छिवं व्रजेत्।"
(तं० आ०13,243-244)

मन्दमन्दः :- ~ शक्तिपातः — **अनेन शक्तिपातेन विद्धः साधकोऽत्रत्यस्य गुरोर्दीक्षायाः प्रभावेण केनापि भुवनेश्वरेण साकं प्रथमं सालोक्यं, ततः समीप्यं, ततः सायुज्यमासाद्य सुचिरं क्रमेणोत्कृष्टोत्कृष्टतरान् भोगान् भुक्त्वा, तदनन्तरं तत्रत्यभुवनपतेः सकाशाद् दीक्षामासाद्य सुचिरेण कालेन क्रमेण शिवभावं प्रत्यग्रे सरति। यथा—**

"मन्दमन्दशक्तिपातवान् पुनस्तत्रैव सालोक्यसामीप्य-सायुज्यासादनक्रमेण चिरतरं कालं भोगान् भुक्त्वा तत एव दीक्षामासाद्य शिवतामियात्।"
(तं० आ० वि०, खं०8,152-153)

मन्दाक्रान्तास्तोत्रम्— **भगवत्याः पराशक्तेरतिमनोहरं शास्त्रतत्त्वगर्भं मन्त्रोपासनारहस्याभिव्यञ्जकमतीवसुन्दरं स्तोत्रकाव्यं मन्दाक्रान्ताछन्दोबद्धम् अस्य संस्करणद्वयं राष्ट्रभाषानुवादादिसहितं प्रकाशितं वर्तते। एतत् स्तोत्रमाचार्यामृतवाग्भवप्रणीतम्।**

मन्मथः :— ~ **बीजपिण्डः**

स च "ह् वौं (ह् व् ऊ औं) इति यथा—

"सान्तःशाद्येन संयुक्तः षष्ठस्वरयुतोऽप्यधः।।
चतुर्दशस्वराक्रान्तो बिन्दुनादान्तभूषितः।
मन्मथः कथितो ह्येष सुरसिद्धनमस्कृतः।।
येनेदं तु जितं सर्वं जगत्स्थावरजङ्गमम्।"
(स्व० तं०1,80-82)

सान्तः = ह्, शकारस्य तालव्यस्याद्यः व्, षष्ठः ऊ, चतुर्दशस्वर औ, एतदक्षरसंघातात्मायं मन्त्रो बिन्दुवादियुक्तः।

मन्वन्तरम्— चतुर्युगैकसप्तत्या मन्वन्तरमेकम्। यथा—
"चतुर्युगैकसप्तत्या मन्वन्तः .....।"
(तं० आ०6,139)

मयः — कश्चन धर्मविषयको ग्रन्थो य इदानीमलभ्यः, स च श्रीमयः इति मयसंग्रहो वा इत्युल्लिखितः। यथा—
'वृषो धर्मः स देवस्य गुणो ज्ञानक्रियात्मकः।
धत्ते स चिदचिद्यस्माद्धर्मस्तेनोच्यते बुधैः।'
इति श्रीमन्मयसंग्रहोक्तसतत्त्वः।"
(स्व० तं०, प०10, पृ०, 205)

अयमेव ग्रन्थोऽन्यत्र मयतन्त्रमित्युक्तः स्यात्।

मयतन्त्रम्— किमप्यागमशास्त्रं यन्मतमुद्धृतं तन्त्रालोके पाशदाहप्रकरणे पुत्रकदीक्षाविधौ। यथा—
"मयतन्त्रे तथा चोक्तम् .....।।"
(तं० आ०16,108)

इदमेव तन्त्रमन्यत्र मय इत्युक्तं स्यात्।

मयसंग्रहः — मय इत्येव।

मयूराण्डरसन्यायः — मयूरस्य पक्षाणां विविधाः सुविचित्राः वर्णा यथा तस्याण्डस्य रसे एकरूपतया सम्मिलिताः सन्तस्तत्र पृथक् पृथक् न प्रकाशन्ते, तथा षट्त्रिंशत्तत्त्वात्मकं सुविचित्रं जगदिदं पारमेश्वरे शुद्धे संवित्तत्त्वे सर्वं विद्यमानमपि सन्न तेन तेन निजेन रूपेण कथञ्चिदपि प्रकाशते। स एषो मयूराण्डरसन्यायेन संविदेकरूपतया प्रकाशते परस्यामवस्थायाम्।

मरणदिनं :— ~ पर्व— योगिनो निजं यन्मरणदिनं तदन्येषां कृते नैमित्तिकं पर्व नात्मनः कृते। तद्दिने गुरुः शिवभावं यतः प्रविष्टस्ततस्तद्दिनं पर्व यथा—
"स्वकं मृतिदिनं यत्तु तदन्येषां भविष्यति।
नैमित्तिकं मृतो यस्माच्छिवाभिन्नस्तदा भवेत्।।"
(तं० आ०28,216)

मरणम्— शरीराद् वियोगः। यथा—
"दृढप्ररूढपाशस्य बद्धस्य पुरुषस्य यः।
वियोगस्तु शरीरेण मरणं तद्विदुर्बुधाः।।"
(ने० तं०20,21)

मरीचयः — इन्द्रियदेवता, इन्द्रियवृत्तयश्च। यथा—
"महामरीचयस्तत्तदिन्द्रियदेवताः।"
(तं० आ० वि०, खं०1, पृ०,22)
"यत्र यत्र मिलिता मरीचयस्तत्र तत्र विभुरेव जृम्भते।"
(तं० आ० वि०, खं०1, पृ०,29)

मरुत्— यकारः। यथा—
"मरुत् यः।"
(तं० आ० वि०, खं०12, पृ०,202)

मरुतो :- ~ देवताः — भूलोकादुपरि भुवर्लोकस्थाः प्राचेतसादिनामानो देवताः।
द्र०:- (तं० आ०8,121-128) इति।

मरुद्वर्णः — यकारः। यथा—
"मरुद् यकारः।"
(तं० आ० वि०, खं०3, पृ०,463)

मर्मकृन्तनी :- ~ विद्या— रहस्यमन्त्रविशेषः। स च 'स्कृक्' इति। यथा—
क्षुरिकामस्य विन्यस्येज्ज्वलन्तीं मर्मकर्तरीम्।
(तं० आ०19,10)
द्र०:- **'प्राणोत्क्रमणदीक्षा'** इति।

मलः — (1) प्राणिनो वास्तविकस्य स्वरूपस्य स्वातन्त्र्य शक्तेश्चावरकः पदार्थो मलः, तिरोधानमित्युक्त आगमेषु। स च शिवस्य स्वात्मप्रच्छादनलीलात्मकः।
द्र०:- **'मलः'** ~ **'स्वरूपतः'** इति।

(2) स्वरूपसङ्कोचात्मकमज्ञानमेव मलम्। तस्य प्रभावेण प्राणी सर्वज्ञानक्रियादिशक्तिपरिपूर्णमसीममपि स्वात्मानं संकुचित-चिदात्मकं जीवदशोचिताहं स्वरूपं मनुते। स एष ज्ञानसङ्कोच एव तस्याज्ञानमाणवमलाख्यम्। यथा—
"मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम्।"
(मा० वि० तं०1,23)

(3) स्वात्मविषये अणुताविमर्शः।
द्र०:- **'लोलिका'** इति।

~ अनादिः — कालकल्पनाया प्राक्तनत्वं ततोऽतीतत्वं ह्यनादित्वम्। कालश्च मायाप्रसाररूपः। मायाया उपर्येव हि शिवस्य स्वस्वरूपतिरोधित्सारूपो विलासः। तेनैव च मलस्याभासमात्रम्। ततो मलस्य कालकलनातीतत्वेनैवानादित्वं न नित्यत्वविवक्षयेति वेद्यम्। यथा—
"ईश्वरस्य च या स्वात्मतिरोधित्सा निमित्तताम्।।
साम्येति कर्ममलयोरतोऽनादिव्यवस्थितिः।"
(तं० आ०13,110-111)

पारमेश्वर्याः तिरोधित्साया अनादित्वादेव हि मलोऽनादिः।

~ कर्मसहकारी— मलस्य सहकारितयैव हि कर्म संसृतिजनकं भवति नान्यथा। यथा—
"इति स्वकार्यप्रसवे सहकारित्वमाश्रयन्।।
सामर्थ्यव्यञ्जकत्वेन कर्मणः कारणं मलः।"
(तं० आ०9,101)

~ किञ्चिद्ध्वंसमानः— मन्त्रप्राणिषु मलस्य ध्वंसमानता समारभते सामान्यरूपतया।
द्र०:- (तं० आ०9,95) इति।
द्र०:- **'मलः'** :- ~ तारतम्यतः' इति च।

~ किञ्चिद्-ध्वस्तः — किञ्चिद्ध्वस्तो मलो हि मन्त्रेश्वरेषु लक्ष्यते।
द्र० **'मलः'** :- ~ 'तारतम्यतः' इति।

~ तन्मूलम्— परमेश्वरस्य लीलाविलासत एव या स्वस्वरूपस्वस्वभावयोस्तिरोधित्सा सैव ह्यपूर्णताख्यस्य मलस्याभासं सूते। ततः पारमेश्वरी लीला विलासमयीच्छैव मलस्य मूलम्।
द्र०:- ~ 'अनादिः' इति।

~ तारतम्यतः — **मलो विज्ञानाकले दिध्वंसिषुः मन्त्रप्रमातरि किञ्चिद् ध्वंसमानः, मन्त्रेश्वरे विशेषतो ध्वंसमानः, किञ्चिद् ध्वस्तोऽपि च, मन्त्रमहेश्वरे सर्वथा-ध्वस्तप्राय एव। शिवश्च सर्वथा निर्मल एव। यथा—**

"दिध्वंसिषुध्वंसमानध्वस्ताख्यासु तिसृष्वथ।।
दशास्वन्तः कृतावस्थान्तरासु स्वक्रमस्थितेः।
विज्ञानाकलमन्त्रेशतदीशादित्वकल्पना।।"
(तं० आ० 9,95-96)

~ दिध्वंसिषुः— **विज्ञानाकले मलो दिध्वंसिषुर्भवति। यथा—**

"मैवं, स हि मलो ज्ञानाकले दिध्वंसिषुः कथम्।
हेतुः स्यात् .....।।"
(तं० आ० 9,94)

नासौ स्वयं दिध्वंसिषुः सन् कर्मणः सहकारी भवितुं शक्नोति। ततो न विज्ञानाकलानां संसृतिः इति तात्पर्यम्।

द्र०:- ~ 'तारतम्यतः' **इति।**

~ध्वंसमानः — **मन्त्रप्रमातृषु मलो ध्वंसमानः सन् नैव कर्मणो सहकारित्वमायाति। तेन न मन्त्राणां संसृतिः।**

द्र०:- ~ 'अत्रैव तारतम्यतः' **इति।**

~ध्वस्तः (सर्वथा)— **शिवप्रमातृषु शाक्तशाम्भवेषु मलः सर्वथा संस्कारसहितो ध्वस्तो भवति। अतस्ते पूर्णतया निर्मलाः।**

द्र०:- ~ 'तारतम्यतः' **इति।**

~ध्वस्त प्रायः — **मन्त्रमहेश्वरेषु मलो ध्वस्त एव, केवलं संस्कारशेषतयावस्थितः, इति ध्वस्तप्रायोऽसौ।**

द्र०:- ~ 'तारतम्यतः' **इति।**

~ नामान्तरतः — **मलो, अभिलाषः, अज्ञानम्, अविद्या, लोलिका, प्रथा, भवदोषो, अनुप्लवः, ग्लानिः, शोषो, विमूढता, अहम्ममात्मता आतङ्कः, मायाशक्तिः, आवृतिः, दोषबीजम्, पशुत्वम्, संसाराङ्कुरकारणम्, इत्यादीनि मलस्य नामान्तराणि। यथा—**

"मलोऽभिलाषश्चाज्ञानमविद्या लोलिकाऽप्रथा।।
भवदोषोऽनुप्लवश्च ग्लानिः शोषो विमूढता।
अहम्ममात्मतातङ्को मायाशक्तिरथावृतिः।।
दोषबीजं पशुत्वं च संसाराङ्कुरकारणम्।
इत्याद्यन्वर्थसंज्ञाभिस्तत्र तत्रैष भण्यते।।"
(तं० आ० 9,84-86)

द्र०:- (पू० प्र०2,446-447) **इति।**

~ प्रकारतः — **प्रथमं द्विप्रकारः आणवस्ततो मायीयस्ततश्च कार्म इति यथा—**

"स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता।
द्विधाणवं मलमिदं स्वस्वरूपापहानितः।।
भिन्नवेद्यप्रथात्रैव मायाख्यं जन्मभोगदम्।
कर्तर्यबोधे कार्मं तु मायाशक्त्यैव तत्त्रयम्।"
(ई० प्र०3-4-5)

"किन्त्वाणवस्तथा कार्मो मायीयस्त्रिविधो मलः।।
तत्सम्बन्धात्स मलिनो ह्यस्वतन्त्रोऽप्यशक्तिमान्।"
(ने० तं० 19,145-146)

"धर्माधर्मात्मकं कर्म सुखदुःखादिलक्षणम्।"
(मा० वि० तं०1,24)

~ मूलतः — **न वैदान्तिकाभिमताविद्यावत् स्वतन्त्रोऽनादिर्वा कोऽपि भिन्नः पदार्थः अपि तु शिवस्य स्वरूपतिरोधानेच्छैव स्वतन्त्रा स्वयमेव मलत्वमाप्नोति। तेन च मलेनावृतः शिव एवाणुतयाऽवभासते। यथा—**

"स्वतन्त्रस्य शिवस्येच्छा घटरूपो यथा घटः।।
स्वात्मप्रच्छादनेच्छैव वस्तुभूतस्तथा मलः।"
(तं० आ० 9,65-66)

ततः पारमैश्वर्यया लीलयैव परमेश्वरस्य स्वस्वभावतिरोधानस्यावभासो यस्य एव मलो, न स्वतन्त्रः कोऽपि पदार्थः। अनादित्वं चास्य शिवेच्छाविलासरूपत्वं कालिकव्यवहारविषयत्वाभाव एव च न पुनः शिववत् सततप्रकाशमानता। यथा—

"अथानादिर्मलः पुंसां पशुत्वं परिकीर्तितम्।
तुषकम्बुकवज्ज्ञेयं मायाजमङ्कुरस्य तु।।
इति श्रीस्वायम्भुवसूत्रे .....।"
(स्व० तं०, प० 5, पृ०,84)

~ विशेषतो ध्वंसमानः — **मन्त्रेश्वरेषु मलस्य ध्वंसमानता विशेषरूपतामाधत्ते।**

द्र०: — ~ 'तारतम्यतः' **इति।**

~ स्वरूपतः — **(1) वस्तुत ईश्वरस्य स्वतन्त्रेच्छैव मलम्, सैव यतो मलरूपतयावभासते। यथा—**

"तेन स्वरूपस्वातन्त्र्यमात्रं मलविजृम्भितम्।।"
(तं० आ० 9,83)

(2) परमेश्वरस्य स्वस्वभावभूत पारमैश्वर्यात्मकप्रच्छादनक्रीडामात्रमेव हि मलम्। ततो न तद्द्रव्यभूतं सिद्धान्तशास्त्रेषु प्रतिपादितं। यथा—

"स्वात्मप्रच्छादनक्रीडामात्रमेव मलं विदुः।
स्वतन्त्रो हि विभुः किञ्चित्कि त्रस्वात्मनि भासयेत्।।"
(मा० वि० वा० 2,186)

मलकञ्चुकस्थितिः — **यथा धान्यतण्डुलस्योपर्यन्तरङ्गत्वेन स्वात्मसंलग्नतया स्थितं कम्बुकं भवति, यथा च बहिरङ्गतया पृथक्तया च सन्तौ तुषदलौ तमावृणुतस्तथैवाणोरन्तरङ्गतया स्थितो मलो, बहिरङ्गवेष्टनतया च स्थितानि कञ्चुकानि। यथा—**

"एतेन मलः कथितः कम्बुकवदणोः कलादिकं तुषवत्।"
(तं० आ० 9,212)

मलकर्मणी — **आणवो मलः, सङ्कुचितः कर्मकर्तृत्वाभिमानश्चोभौ मिलित्वा प्राणिनः संसृतेः कारणतामुपगच्छतः। तदिमे सहभावेनैव संसृतिहेतू।**

~ अनादिरूपे— **अनादेः परमेश्वरस्य याऽनादिरूपा स्वस्वरूपतिरोधानेच्छा सैव मलरूपतां कर्मरूपतां चाधत्ते, तस्या इच्छाया अनादित्वेन हेतुना मलमप्यनादिकर्म चापि तथा गण्येते। यथा—**

"ईश्वरस्य च या स्वात्मतिरोधित्सा निमित्तताम्।।
साध्येति कर्ममलयोरतोऽनादिव्यवस्थितिः।"
(तं० आ०13,110-111)

अनयोरनादित्वव्यवस्थापि न शिवस्येव कूटस्थनित्यता प्रागभावस्येव वाऽनारब्धता, अपि त्वनयोरारम्भस्य कालिक-व्यवहाराविषयतैव। कालसृष्टेः प्रागेव हि यतो मलसृष्टिः।

मलकर्ममाया — **जगदुत्पत्तिलीलायां मलो वस्तूनां स्वरूपस्य तिरोधानकरः माया जगतः उपादानकारणम् कर्म च सहकारिकारणं सर्वस्य जगद्व्यवहारस्य, विशेषतः संसृतेः। यथा—**

"मलश्चावारको माया भावोपादानकारणम्।
कर्म स्यात् सहकार्येव सुखदुःखोद्भवं प्रति।।"
(तं० आ०9,180)

मलत्रयम्— अपूर्णताभिमानात्मक आणवो मलः, भिन्नेन विषयेण स्वस्य पूरणार्थमुपयोगिनी भेददृष्टिर्मायीयो मलः शुभाशुभकर्मवासनाख्यश्च कार्मो मलः। यथा—

"अपूर्णाभिमानेन स्वात्मनि अणुत्वापादनात् आणवमलस्य, तदपूर्णरूपपरिपूरणाकाङ्क्षायां भेददर्शनात् मायाख्यस्य मलस्य, तच्छुभाशुभवासनाग्रहेण कार्ममलस्य चोल्लासात्।"
(प० त्री० वि०, पृ०,41)

"अपूर्णताख्यातिरूपमाणवम्, वेद्यभेदप्रथास्वरूपं मायीयम्, शुभाशुभानुष्ठानात्मकं कार्मणं च मलम्।"
(म० मं० प०, पृ०,24)

मलपाक :— ~ शैवसिद्धान्ते — **मलस्य या रोधा-शक्तिस्तस्याः प्रतिबन्धः। तस्मिञ्जाते सति मलः प्राणिनं नैव रुणद्धि संसृतिचक्रमध्ये। उक्तमेतत् पूर्वपक्षतया यथा—**

"अथास्य पाको नामैष स्वशक्तिप्रतिबद्धता।"
(तं० आ०13,59)

~ असम्भाव्यः — **मलस्याज्ञानरूपस्य कः पाकः सम्भवेत्। पाकस्तु द्रव्यभूतस्यैव वस्तुनः सम्भवति। यथा—**

"मलस्य ध्वान्तरूपस्य न च पाकोऽस्ति कश्चन।"
(मा० वि० वा०2, 183)

मलम् — ~ शैवसिद्धान्तमते —

"तेनैकं वस्तु सन्नित्यं नित्यसम्बद्धमात्मभिः।
जडं मलं तदज्ञानं संसाराङ्कुरकारणम्।।"
(तं० आ०13,49)

भेददृष्टिप्रधानमेतन्मतं दाक्षिणात्यानां शैवसिद्धान्तिनाम्, न च स्वीकृतं पराद्वैतनिष्ठैः काश्मीरकैः शैवैः।

~ रोधीशक्तिः (तस्य) — **असौ मलस्य शक्तिर्या प्रमातुरपरिमिते ज्ञानक्रियासामर्थ्ये रुणद्धि, तेन च ते नैव स्वकीयमोजो विजृम्भयितुं शक्ते भवतः। यदाऽसौ रोधी शक्तिः शिवशक्तिपातवशादुदासीनतां याति, तदा प्राणिनोऽपरिमिते ज्ञानक्रियेऽभिव्यक्ततां गच्छतः इति मतं शैवसिद्धान्तिनाम्। यथा—**

"तस्य रोधी यदा शक्तिरुदास्ते शिवरश्मिभिः।
तदाणुः स्पृश्यते स्पृष्टः स्वके ज्ञानक्रिये स्फुटे।।
समाविशेदयं सूर्यकान्तोऽर्केणेव चोदितः।"
(तं० आ०13,50-51)

~ नोपपन्नाः — **मलस्य रोधी काऽपि शक्तिरस्तीति ये प्रतिपद्यन्ते तेऽतत्त्वज्ञा तत्त्वविचारस्य। मलो जडः, ततोऽशक्तः। इति न तस्य काऽपि शक्तिः। यस्य शक्तयः स शिव एव। ततः शिवस्यैव स्वातन्त्र्यमय्या शक्त्या मलस्याभासमात्रम्। तदाभासराहित्येन संविदः सङ्कुचितत्त्वावभासमात्रम्। तदेव मलम्। यथा—**

"रोधी शक्तिर्मलस्यास्ति सा च क्वापि निवर्तते।
क्वापि प्रवर्तते चेति धिगिदं मूढभाषितम्।।
जडानां कोऽनुसन्धिः स्यात्तं विनैतत् कथं भवेत्।"
(म० वि० वा०2, 180-181)

मलयः — **आगमविशेषः। यथा—**

"उक्तं च श्रीमलयेः— .....
सर्वत्र त्रिगुणो नाहः .....।"
(स्व० तं०, प०10, पृ०,112)

मलावृतत्वम् : — **मलयुक्तत्वम्। संविदात्म-कमात्मानं स्वप्रकाशं मलः कथमावृणुयात्। ततो मलसाहित्यमेव मलावृतत्वेन ज्ञेयम्। यथा—**

"आत्मनश्चाधिकार्यत्वान्मलः किञ्चित्करो न चेत्।
कथमावरणायैष शक्तो ननु च भोः किमु।।
मलसद्भावमात्रं हि तस्यावरणमुच्यते।
मलेन सद्वितीयोऽणुरावृतः परिभाष्यते।।"
(मा० वि० वा० 2,169-170)

महत्तत्त्वम् :— मूलप्रकृतेः प्रथमो बहिर्मुखः परिणामः सत्त्वगुणप्रधानः। स एव प्रतिपुरुषं बुद्धितत्त्वात्मकतया स्थितः। तस्यैव परिणामोऽहङ्कारो योऽग्रे षोडशतत्त्वरूपतया परिणमते। तदेतत् तत्त्वं समष्ट्यात्मकबुद्धितत्त्वमिति वेदितव्यम्। तत एव महद् बुद्धिश्चेति न तत्त्वद्वयमपि त्वेकमेव तत्त्वम्। व्यष्टिगतं महत्तत्त्वमेवान्तःकरणरूपा बुद्धिः।

द्र०:— (ई०प्र०वि०वि०,खं०1, पृ०,138)

द्र०:— ~ 'तत्स्कन्धद्वयम्' इति।

~ तत्स्कन्धद्वयम् — **महत्तत्त्वस्यैकः कारणस्कन्धो यः प्रथममहङ्कारतत्त्वतया परिणमते। पश्चाच्च तद्रूपतया स्थितस्तत्त्वषोडशकतया परिणामशीलतामुपैति। अपरस्तस्य करणस्कन्धो यः प्रतिपुरुषं बुद्धितत्त्वतया च का समानः पुरुषकृतावेशबलेन चेतनवद् भासते ज्ञानादिव्यवहारजाततया च परिणममान आभासते। यथा—**

"प्रधानस्य यः प्रथमो विकारो महानिति, तस्य कारणस्कन्धादन्यो यो बुद्धिशब्दवाच्यः करणस्कन्धः, स प्रधानविकारत्वाज्जडोऽपि चिदात्मकपुरुषप्रतिबिम्बयोगाच्चेतनवद् भासमान उपचरितबोधस्वभावोऽस्येव पारमर्षदर्शने।"

(ई० प्र० वि० वि०, खं०1, पृ०,138)

पारमर्षदर्शनं कापिलं सांख्यदर्शनम्। ततः पुरुष-प्रतिबिम्बग्राहित्वं यद् बुद्धेरुक्तं तदपि सांख्यदृष्ट्यैव, न शैवदृष्ट्या, यस्यां पुरुषो बुद्ध्यपेक्षयाधिकनिर्मलः सन् कथं तत्र प्रतिबिम्बितो भवेदिति विमृश्यं सुधीभिः। उक्तमपि यथा—

"स्वच्छमपि ह्यधिकस्वच्छमपेक्ष्यास्वच्छं नाधिकस्वच्छस्य प्रतिबिम्बं स्वीकरोति। सितदुगूलमिव स्फटिकमणेः। तथा च बुद्धितत्त्वं पुरुषापेक्षया।"

(ई० प्र० वि० वि०, खं०1, पृ०,158)

"तस्य च समानगुणे स्वच्छे च निर्भासनं दृष्टमिति स्वच्छत्वसमानगुणत्वलक्षणं कारणं प्रतिबिम्बस्वीकरणे वस्तूनामिति सिद्धम्। तद्विरुद्धं च बुद्धेरात्मापेक्षयाऽसमानगुणत्वम्।"

(तदेव, पृ०,169)

द्र०:— 'स्वच्छता' इति।

महाकालः— ~ कालीनयेः — **भेदात्मकाशेषविश्वकल-नाचतुरः पूर्णाहं विमर्शमयोऽसीमितः सदाशिवदशोचितः प्रमाताः। यथा—**

"भैरवरूपी कालः सृजति जगत्कारणादि कीटान्तम्।।"

उद्ध०:— (तं० आ० वि०, खं०3, पृ०,182)

"इत्याद्युक्तस्वरूपे महाकाले लीयते-परस्मिन्नकल्पिते पूर्णाहं विमर्शमये प्रमातरि विश्रान्तो भवेदिति।"

(तदेव,पृ०,182)

महाकालकाली — ~ कालीनये— **(1) तन्त्रालोकादौ महाकालसंज्ञस्य परिपूर्णाहं विमर्शमयस्य प्रमातुरपि परेणाकुलेन शुद्धाहं विमर्शमयेन साकमेकीकारकलनात्मिका संविच्छक्तिः। यथा—**

(क) "सङ्कोचत्यागोन्मुखविकासग्रहणरसिकमपि प्रमातारं कलयति।"

(तं० सा०, पृ०,30)

(ख) "एतस्यां स्वात्मसंवित्ताविदं सर्वमहं विभुः।
इति प्रविकसद्रूपा संवित्तिरवभासते।।
ततोऽन्तःस्थितसर्वात्मभावभोगोपरागिणी।
परिपूर्णापि संवित्तिरकुले धाम्नि लीयते।।"

(तं० आ०4,169-170)

(ग) "परप्रमातुर्महाकालस्यापि स्वविमर्शविश्रान्त्यात्मना ग्रासेन भवितव्यम्।"

(तं० आ० वि०, खं०3, पृ०,184)

(घ) "एवं महाकालस्य कलनान्महाकालकालीति।"

(तदेव,पृ०,185)

क्रमस्तोत्रयोः — **यथा—**

(ङ) "नक्तं महाभूतलये श्मशाने
दिक्खेचरीचक्रगणेन साकम्।
कालीं महाकालमलं ग्रसन्तीं
वन्दे ह्यचिन्त्यामनिलानलाभाम्।।"

उद्ध०:— (क्र०स्तो०(सि०ना०) (तं०आ०वि०,खं०3, पृ०,185)

(च) "प्रकाशाख्या संवित् क्रमविरहिता शून्यपदतो।
बहिर्लीनात्यन्तं प्रसरति समाच्छादकतया।
ततोऽप्यन्तःसारे गलितरभसादक्रमतया
महाकाली सेयं मम कलयतां कालमखिलम्।।"

(क्र० स्तो०(अभि०),26)

चिद्गगनचन्द्रिकायाम्—

(छ) "यः श्मशान इह भूतघस्मरे रज्यतेऽम्ब करवीरनामनि।
ग्राहकं ग्रसति तं श्रुतं महाकालमप्यसुहृताशदुर्ग्रहा।।"

(चि० ग० चं०,247)

पञ्चशतिके — **महाकालकलनोद्यता कला यत्र लीयतेऽसौ संविदः शक्तिर्महाकालकालीति। यथा—**

(ज) "ऋतोज्ज्वला महादीप्ता सूर्यकोटिसमप्रभा।
कलाकलङ्करहिता कालस्य कलनोद्यता।।
यत्र सा लयमाप्नोति कालकालीति सा स्मृता।"

उद्ध०:— पंचशतिकतः —

(तं० आ० वि०, खं०3, पृ०,186)

महाकुलम् — **किमपि कौलमतप्रधानं शैवशास्त्रम्। यथा—**

"श्रीमहाकुले —
'आसूत्रिते भागलुप्ते यथेष्टरजसान्विते।
अपि मन्त्रमनाहूय मण्डले विधिचोदिते।।
सन्निधानं प्रकुर्वन्ति मन्त्राणां सप्तकोटयः।
किं पुनः कौलिकाम्नायस्तत्राहूय प्रपूजितः।।
समुद्दिश्य पितॄन् भद्रे! तदानन्त्याय कल्पते'।।"

(ज० म० वि०, पृ०,23)

महाजालप्रयोगः — **परलोकस्थस्य जन्मान्तरस्थितस्य वा शिष्यस्य परोक्षदीक्षाविधौ जीवाकर्षणप्रयोगः। उक्तमेतद्विषये यथा—**

"मूलाधारादुदेत्य प्रसृतसुवितानन्तनाड्यध्वदण्डं वीर्येणाक्रम्य नासागगनपरिगतं विक्षिपन् व्याप्तुमीष्टे।
यावद्धूमाभिरामप्रचिततरशिखाजालकेनाध्वचक्रं संछाद्याभीष्ट-जीवानयनमिति महाजालनामा प्रयोगः।।"

(तं० आ०21,25)

द्र०:— 'परोक्षदीक्षा': — ~ परलोकगतस्य' **इति।**

~ तत्क्षेत्राणि — **महाजालप्रयोगः स्वर्लोकाद् यमसदनात् निरयात् तिर्यग्योनितः अन्यस्मादपीदृशात् क्षेत्राज्जीवमाकृष्य यागमण्डलमानयति। यथा—**

"महाजालसमाकृष्टो जीवो विज्ञानशालिना।

स्वःप्रेततिर्यङ्निरयांस्तदैवैष विमुञ्चति।।"

(तं० आ०21,28)

स च जीवः स्वर्निरयादिशरीराणि तदैव त्यजति।

द्र०:— 'परोक्षदीक्षा': — ~ 'परलोकगतस्य' इति।

~ तद्विधानम् :— सामर्थ्यवान् गुरुर्मन्त्रादिप्रयोगतो यदा जालं प्रसारयति तदा प्रथमं तेन विश्वमाच्छाद्य तत् स्वसाम्मुख्यमानयति, ततस्तन्मध्यान्मत्स्यमिव धीवरोऽभीष्टमेव जनमाकृष्य पुरस्तादानीय गोमयदर्भादिकृते शरीरे प्रवेशयति ततस्तस्य भुक्तिमुक्तिप्रदां दीक्षां विधत्ते। एतेन जालप्रयोगेण जीवानामाकर्षणमुद्धरणं च भवति, अगृहीतदेहान्तरस्य मृतस्यापि शिष्यस्याकर्षणमनेन सम्भवति। ततः परोक्षदीक्षा तस्यानुष्ठीयते, यया भुक्तिमुक्तिलाभस्तस्य भवति। यथा—

"उक्तमेतत्:-

"एतेनाच्छादनीयं व्रजति परवशं सम्मुखीनत्वमादौ पश्चादानीयते चेत् सकलमथ ततोऽप्यध्वमध्याद् यथेष्टम्। आकृष्टावुद्धृतौ वा मृतजनविषये कर्षणीयेऽथ जीवे योगः श्रीशम्भुनाथागमपरिगमितो जालनामा मयोक्तः।।'

(तं० आ०21,26)

महाडामरयागः — शैवागम-विशेषे प्रतिपादितो यागविशेषः। यथा—

"..... कथिता कालकर्षिणी।
महाडामरके यागे .....।।"

(तं० आ०3,70)

"महाडामरके यागे इति देवीयामलशास्त्रसमानाधिकरण्येन योज्यम्। तेन तत्प्रतिपादके प्राथमिके ग्रन्थैकदेशइत्यर्थः।

तदुक्तं तत्र :—
तन्मध्ये तु परा देवी दक्षिणे च परापरा।
अपरा वामशृङ्गे तु मध्यशृङ्गोर्ध्वतः शृणु।।
या सा संकर्षिणी देवी परातीता व्यवस्थिता।।"

उद्ध०:— (तं० आ० वि०, खं०2, पृ०,82)

महादेवः — (1) सततक्रीडापरः पूर्णस्वातन्त्र्यस्वभावः स्वतन्त्रलीलाविलासपरः परमेश्वरः। यथा—

"इह परमेश्वरः प्रकाशात्मा महादेवः शब्दराशिपरमार्थपूर्णाहन्तापरमर्शसारत्वात् सदैवानन्दघनस्फुरत्तात्मकोभयविसर्गारणिपराशक्त्यात्मकपूर्णस्वातन्त्र्यस्वरूपः....।"

(स्पं० नि०, पृ०,3)

(2) भगवानुमापतिनाथोऽपि वा महादेव इत्युच्यते। यथा—

"महादेवाय रुद्राय शङ्कराय शिवाय ते।
महेश्वरायापि नमः कस्मैचिन्मन्त्रमूर्त्तये।।"

(शि० स्तो०2,4)

महान् — ~ सम्बन्धः — असौ शास्त्रावतरणक्रमो यत्र शिवो गुरुः सदाशिवश्च शिष्यः।

द्र०:- 'सम्बन्धः' — ~ 'पञ्चविधः' इति।

महानन्दः — समस्तविकल्पजालदाहके उदासीनवृत्तिरूपे चिद्वह्नौ विश्रान्त्या मध्यमार्गेणोत्क्रमणशीलो मानमेयादिप्रपञ्चकलनाग्रसनतत्परो योगी विकल्पान् भस्मसात् कुर्वन्नुत्कृष्टतरां यामानन्दभूमिकां समासादयति सैव 'महानन्द' इति। यथा—

"ततोऽपि मानमेयौघकलनाग्रासतत्परः।।
उदानवह्नौ विश्रान्तो महानन्दं विभावयेत्।"

(तं० आ०5,47-48)

"मध्यमार्गेणोर्ध्वगामिनि उदानवह्नौ.....
..... विश्रान्तो.....
उत्कृष्टं प्रमातृसम्मतमानन्दं विभावयेत्।"

(तं० आ० वि०, खं०3, पृ०,352)

~ तदभिव्यक्तिस्थानम् :— सौषुम्नमार्गेणोद्गच्छन्ती प्राणवृत्तिर्यच्छुद्धसंविदात्मकं प्रमातृतत्त्वं समुद्भासयति तदेव तत्त्वं महानन्दस्याभिव्यक्तिस्थानम्। यथा—

"उत्कृष्टं प्रमातृसम्मतमानन्दं विभावयेत्, स्वात्ममात्रविश्रान्तिरूपतया विमृशेत्।"

(तं० आ० वि०, खं०3, पृ०,352)

"तत्र विश्रान्तिमभ्येत्य शाम्यत्यस्मिन्महार्चिषि।।"

(तं० आ०5,48)

"महार्चिषि प्रमात्रात्मन्युदानवह्नौ।"

(तं० आ० वि०, खं०3, पृ०,353)

महानयपद्धतिः — कश्चन शाक्तसम्प्रदायग्रन्थः।

द्र०:— (म० मं० प०, पृ०, 108)

महानयप्रकाशः — (1) किमपि कौलाचारपरमागमिकं संस्कृतभाषामयं शास्त्रम्। यथा—

"महानयप्रकाशे—
'प्रायो हि मैथुने मद्ये मांसे स परिदृश्यते।
आसक्तिः सर्वजन्तूनां विशेषात् कस्यचित् क्वचित्।।
यदि तत्त्यागसंरम्भपूर्वं तेषां विधीयते।
उपदेशो न स मनागपि चित्ते प्ररोहति।।
इत्यारभ्य—अनेनैवाशयेनात्र परब्रह्मोपलब्धये।
ललनामद्यमांसानि पूजाग्र्याणि विशेषतः।।'

(म० मं० प०, पृ०,116-117)

द्र०:— (म० मं० प०, पृ०,81,84,85) **इति।**

(2) उपर्युक्तस्य बृहत्कायस्य संस्कृत भाषामयस्यागमग्रन्थस्य संक्षिप्तं सारं यच्छितिकण्ठाचार्येण देशभाषामयीभिर्गाथाभिर्विरचितं संस्कृतभाषामयेन च व्याख्यानेन स्पष्टीकृतम्। कौलिकोपासनाप्रतिपादकमेतत् पुस्तकं काश्मीरग्रन्थावलौ प्रकाशितम्। भाषाशास्त्रे शोधकरेभ्य उपयोगीदं पुस्तकम्। पैशाची प्राकृतोद्भवाऽपभ्रंशात्मिका कश्मीरेषु प्रचलिता पुरातनी देशभाषाऽस्य भाषा।

महानुभवशक्तिस्तवः — परमेश्वरस्य चिदानन्देच्छाज्ञानक्रियाणां पञ्चानामन्तरङ्गशक्तीनां स्वरूपरहस्यं प्रति सङ्केतकरं लघुकायं स्तोत्रं यस्य निर्माणमाचार्यामृतवाग्भवैः कृतम्।

अस्य सटीकं संस्करणद्वयं प्रकाशितं वर्तते।

महापातकिन :— मनुनोक्ता ब्रह्महत्यादिपापकर्मचारिणः। यथा—

"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह।।"
(म० स्मृ०11,54)

~ तत्प्रायश्चित्तम् :— **स्पष्टमुक्तं यथा—**

"यदा तस्य न कर्त्तव्या दीक्षास्मिन्नकृते विधौ। इत्यारभ्य परयोजनपर्यन्तं कुर्यात्तत्त्वविशोधनम्।। इत्यन्तम्"
(तं० आ०21,53-56)

एष विधिः परोक्षदीक्षाविषयः।

(2) प्रत्यक्षदीक्षाविधौ—यदेव परोक्षदीक्षाकाले प्रायश्चित्तीयं कर्म तेषां तदेवापरोक्षदीक्षाकालेऽपति न्यायात्। यथा—

"प्रत्यक्षेऽपि स्थितस्याणोः पापिनो भगवन्मयीम्
शक्तिं प्राप्तवतो ज्येष्ठामेवमेव विधिं चरेत्।"
(तं० आ०21,56-57)

"अमुमेव विधिं सन्निहितस्य जीवतोऽप्यतिदिशति।"
(तं० आ० वि०, खं० 10, पृ० ,241)

(3) विध्यन्तरम् यथा—

"यदि वा दैशिकः सम्यङ् न दीप्तस्तस्य तत्पुरा।।
प्रायश्चित्तैस्तथा दानैः प्राणायामैश्च शोधनम्।
कृत्वा विधिमिमां चापि दीक्षां कुर्यादशङ्कितः।।"
(तं० आ०21,57-58)

~ तल्लक्षणानि : — **दीक्षाकाले यागविधौ स्पष्टं ज्ञायमानानि यथा—**

"परोक्षदीक्षणे सम्यक् पूर्णाहुतिविधौ यदि।।
अग्निश्चिटिचिटाशब्दं सधूमं प्रतिमुञ्चति।
धत्ते नीलाम्बुदच्छायां मुहुर्ज्वलति शाम्यति।।
विस्तरो घोररूपश्च महीं धावति चाप्यधः।
ध्वांक्षाद्यश्रव्यशब्दो वा तदा तं लक्षयेद्गुरुः।।
ब्रह्महत्यादिभिः पापैस्तत्सङ्गैश्चोपपातकैः।"
(तं० आ०21,50-53)

महाप्रचयः — ज्ञानिपरम्परासु प्रसिद्धं तुर्यातीतपदस्य पारिभाषिकं नाम। अनुत्तरत्वेन पूर्णत्वेन चास्येदं नाम। यथा—

"प्रसंख्यानबलात्त्वेतद्रूपं पूर्णत्वयोगतः।।
अनुत्तरादिह प्रोक्तं महाप्रचयसंज्ञितम्।"
(तं० आ० 10,280-281)

प्रचयस्य पूर्णत्वोन्मुखत्वमस्य पुनर्वस्तुतः पूर्णत्वमिति महाप्रचयत्वमस्य।

जयरथीया व्याख्याऽत्र चिन्त्या, तुर्यात्मकानां मन्त्रेश्वरमन्त्रमहेश्वराणामपि विश्वात्मकत्वात्।

"महाप्रचयमिच्छन्ति तुर्यातीतं विचक्षणाः।"

उद्धः— (मा०वि०तं०2,38) (तं०आ०वि०,खं०7,पृ०,190)

~ तद्भेदराहित्यम् — **यथा जाग्रदादीनां प्रत्येकं भेदचतुष्टयम् न तथा महाप्रचयाख्यस्य तुर्यातीतस्य। तस्य सर्वथाऽभिन्नत्वात्। यथा—**

"..... एकं तन्महति स्थितम्।।"
(मा० वि० तं०2,46)

महतीति महाप्रचयाख्ये तुर्यातीते।

महाप्रलयः — (1) सादाशिवी रात्रिः।

(2) असौ तत्त्वविलयो यस्मिन् मायादीनीश्वरान्तानि तत्त्वान्युत्तरोत्तरस्मिंस्तत्त्वे विलयं गच्छन्त्यन्ते सादाशिवे तत्त्वे विलीयन्ते। यथा—

"मायाकालः परार्धशतेन गुणितः ऐश्वरतत्त्वे दिनम्। अत्र प्राणो जगत् सृजति। तावती रात्रिः, यत्र प्राणप्रशमः, प्राणे च ब्रह्मबिलधाम्नि शान्तेऽपि या संवित्, तत्राप्यस्ति क्रमः। ऐश्वरे काले परार्धशतगुणिते या संख्या तत् सादाशिवं दिनम्, तावती निशा स एव महाप्रलयः"।
(तं० सा० पृ०,55-56)

"गुणयित्वैश्वरं कालं परार्धानां शतेन तु।
सादाशिवं दिनं रात्रिर्महाप्रलय एव च।।"
(तं० आ० 6,160)

द्र०:— 'सदाशिवः'— ~ 'तत्कालमानम्' **इति।**

~ प्राणिनः (तत्र) :— **महाप्रलये सम्पन्ने सर्वेऽपि बद्धाः प्राणिनः समनायां तिष्ठन्ति, ततो न तेषां शिवभावसमापत्तिः। अभिनवासु सृष्टिषु पुनस्तेषां प्राग्वत् संसरणम्। यथा—**

"न हि शक्त्यन्तं महाप्रलयेप्येषां शिवतत्त्व एवावस्थानं, समनायामेवमभिधानात्—समनान्तं वरारोहे पाशजालमनन्तकम्।"
उद्धः- (तं० आ० वि०, खं०4/1, पृ०,142)

महाप्रेतः — दीक्षायागविधौ स्वे देहे विश्वात्मक-परमेश्वरत्वभावनायां क्रियमाणायां लम्बिकाब्रह्मरन्ध्रयोर्मध्ये शुद्धविद्यात्मकं पद्मं भावनीयं भवति। पद्मपत्रेषु वामादिदेव्यो भावनीयाः। केसरेषु सूर्यादयो ग्रहाः, ब्रह्मादयश्च त्रयः; तदूर्ध्वे ईश्वरस्तदूर्ध्वे च सदाशिवः। स एव महाप्रेतः। समस्ताधस्तनतत्त्वव्रातरूपत्वं तस्य महत्त्वम्, प्रकर्षेण तत्त्वव्रातव्यापकत्वं च 'इतत्वम्' ततो महा+प्र+इतः=महाप्रेतः। यथा—

"रुद्रोर्ध्वे चेश्वरं देवं तदूर्ध्वे च सदाशिवम्।
न्यसेत् स च महाप्रेत इति शास्त्रेषु भण्यते।।
समस्ततत्त्वव्याप्तृत्वान् महाप्रेतः प्रबोधतः।
प्रकर्षगमनाच्चैष लीनो यन्नाधरं व्रजेत्।।"
(तं० आ०15,309-310)

"महाप्रेतं न्यसेत् पश्चात् प्रहसन्तं सचेतनम्।।".
(स्व० तं०, प०2,81)

प्रकर्षेण इतः स्फुरेदन्ता निमज्जनेनाहन्ता प्रधानां स्थितिमनुप्रविष्टः। तां महतीं स्थितिं प्रकर्षेण इतो गत इति महाप्रेतो भगवान् सदाशिवः। यथा—

"प्रकर्षेण च इतं गतं सम्बद्धं विश्वं यस्येति व्युत्पत्त्या प्रेत इह सदाशिवः, स च महदिति पदेन अनाश्रितशिवरूपः।"

(स्व० तं०, प०2, पृ०,47)

"परमशिव एव च भगवानेकश्चिद्रूपस्तदधररूपवर्ती,- इत्यनाश्रितादिस्तदेकजीवितः, स्वयं तु प्रेत इव प्रेतः, स चापरया व्याप्त्या स्थूलः सदाशिवः, मध्यमया स एव नादरूपः, परया त्वनाश्रितः।"

(तदेव,पृ०,47-48)

~ उपमानीत्या — **स्पष्टीकृतो यथा—**

"अतः सदाशिवो नित्यमूर्ध्वदृग्भास्वरात्मकः।
कृशो मेयत्वदौर्बल्यात्प्रेतोऽट्टहसनादितः।।"

(तं० आ०15,312)

द्र०:— 'शवः' इति।

महाबलः — उत्पलवैष्णवस्य कोऽपि विद्वान् पूर्वजः। यथा—

"अतश्चाऽस्मत्पितुर्मातामहाचार्येण महाबलेन 'यथार्थनाम्नः क्रोधे'। इत्यादिनोक्तो विभवोदयो रहस्यस्तोत्रे।"

(स्पं० प्र०, पृ०,3)

महाभैरवः — परमशिवः। यथा—

"आ कालाग्नेः शिवपुरपरो योऽयमध्वा
स सर्वो मूर्च्याभासा स्फुरति लहरी यस्य
यश्चाखिलं तम् मेयत्वेन प्रथयति परां मातृतां
भक्तिभाजां व्यक्तुं देवो जयति स महाभैरवः श्रीस्वतन्त्रः।।"

उद्ध०:- (स्व० तं०, प०10, पृ०,1)

महाभैरवचण्डोग्रघोरकालीः — द्वादशी काली।

~ (1) क्रमस्तोत्रयोः।

यथा—

"क्रमत्रयत्वाष्ट्रमरीचिचक्र-
सञ्चारचातुर्यतुरीय सत्ताम्।
वन्दे महाभैरवघोरचण्ड-
कालीं कलाकाशशशाङ्ककान्तिम्।।"

उद्ध०:- (तं० आ० वि०, खं०3, पृ०,188)

(क्र० स्तो० सि० ना०)

"ततो देव्या यस्यां परमपरिपूर्णस्थितिजुषि
क्रमं विच्छिद्याशु स्थितिमातिरसात् संविदधति।
प्रमाणं मातारं मितमथ समग्रं जगदिदं
स्थितां क्रोडीकृत्य श्रयति ममचित्तं चितिमिमाम्।।"

(क्र० स्तो० अभि०,27)

~ (2) चिद्गनचन्द्रिकायाम् :—

"अम्ब कार्यकरणे नियच्छतः पूर्णचित्पदमहोत्सवत्विषः।
जृम्भितस्य हृदये स्वशङ्कया त्वं यमस्य वपुषासि भीषणा।।"

(चि० ग० चं०,233)

~ (3) तन्त्रालोकादौ : — **प्रमातृप्रमाणप्रमाप्रमेयौघानां सर्वेषामपि चिन्मात्रेणैकीकरणकलनात्मिका संविच्छक्तिर्महाभैरव-चण्डोग्रघोरकाली। यथा—**

(क) ततो विकसितमपि रूपं कलयति।"

(तं० सा०, पृ०,30)

(ख) "प्रमातृवर्गो मानौघः प्रमाश्च बहुधा स्थिताः।
मेयौघ इति यत् सर्वमत्र चिन्मात्रमेव तत्।।
इयर्ती रूपवैचित्रीमाश्रयन्त्याः स्वसंविदः।
स्वाच्छन्द्यमनपेक्षं यत् सा परा परमेश्वरी।।
इमाः प्रागुक्तकलनास्तद्विजृम्भोच्यते यतः।"

(तं० आ० 4,171-173)

(ग) "प्रमातृपदेन महाभैरवशब्दस्य, मेयपदेन चण्डशब्दस्य, प्रमापदेनोग्रशब्दस्य, मानपदेन घोरशब्दस्य चाक्षेपान्महाभैरव-चण्डोग्रघोरकाली,याऽस्मद्दर्शने पूर्णतया परा इति परमेश्वरर्युक्ता।"

(तं० आ० वि०, खं०3, पृ०,187)

~ (4) पञ्चशतिके : — **यथा—**

(घ) "दशसप्तविसर्गस्था महाभैरवभीषणा।
संहरेद्भैरवान्सर्वान्विश्वं च सुरपूजित।।
सान्तः शाम्यति यस्यां च सा स्याद्भरितभैरवी।
महाभैरवचण्डोग्रघोरकाली परा च सा।।"

उद्ध०:- पञ्चशतिकातः- (तं०आ०वि०,खं०3, पृ०,187)

महामन्त्रः — (1) परिपूर्णः परोऽहं विमर्शः। यथा—

"महामन्त्रस्य अहमित्येवं लक्षणस्य अघोरमन्त्रस्य।"

(प० त्री० विवृ०, पृ०,8)

द्र०:- 'हृदयम्' इति।

महामन्त्रमयी शक्तिः — स्वरूपगोपानक्रीडामयी, अनुग्रहरूपा, आकाङ्क्षारहिता, सदोदिता, अनुत्तरस्वरूपा शक्तिः। यथा—

"विद्यास्वरूपसंवित्तिरनुग्रहमयी शिवा।
स्वरूपगोपनक्रीडामयी माया विलासिनी।।
अनुत्तरस्वरूपैव निराकाङ्क्षा सदोदिता।
महामन्त्रमयी शक्तिः शब्दार्थोभयगर्भिणी।।"

(पू० प्र०1,126-127)

महामातरः — ब्राह्म्याद्यंशोद्भूता योगिन्यः। यथा—

"मातरो ब्राह्म्याद्यंशकोद्भूताः। महामातृस्ततस्वा मिनीर्ब्राह्म्याद्याः।"

(ने० तं० खं०2, पृ०,144-145)

महमाया — (1) अणूनां मायादशाया उपरि विद्येश्वरादीनां च विद्यादशाया अधो मध्ये त्रिकाचारोपासनाक्रमेऽवस्थान्तरस्य महामायानाम्नः परिकल्पना कृता वर्तते। तदपि तत्त्वं शोधनीयेषु तत्त्वेषु परिगणितम्।

ईश्वरप्रत्यभिज्ञादिषु तर्कप्रधानेषु दर्शनग्रन्थेषु स्वात्मनः स्वरूपस्य स्वस्वभावस्य च विषये विपर्यासराहित्येऽपि भेददर्शनकारिणी महामाया प्रतिपादिता। परमसौ तत्त्वाध्वक्रमे शुद्धविद्यायामेव परिगणिता। एषा तावत् परा

महामाया। अपरा या महामाया तत्र कल्पिताऽस्ति सा खलु विज्ञानाकलानामधिष्ठानभूः। सकलाः प्रलयाकलाश्च प्राणिनो मायायां स्थिताः, विद्येश्वराद्याः शुद्धाशुद्धाः प्राणिनो विद्यायाम्। मध्ये ये विज्ञानाकला उन्मिषितमात्रतुर्यादशाभाजस्तेषामधिष्ठानभूतं यदवस्थान्तरं तदेव त्रिकशास्त्रे महामायासंज्ञया बुद्ध्यते। ते हि विज्ञानाकलाः स्वात्मानं शुद्धप्रकाशरूपतयाभिमन्वाना अपि निजं स्वातन्त्र्याख्यमैश्वर्यं नैव रसयन्ति; साङ्ख्यपुरुषवत्ते शून्यप्रायस्वभावाः। सैषाऽवरा महामाया। यथा—

"मायातत्त्वस्योपरि विद्यातत्त्वस्याधश्चावश्यं तत्त्वान्तरेण भवितव्यम्, यत्र विज्ञानाकलानां स्थितिः। यथोक्तम् 'मायोर्ध्वे शुद्धविद्याधः सन्ति विज्ञानकेवलाः।।" इति।

तथाहि महामायाऽभावे मायापदे प्रलयकेवलानामवस्थितिः, विद्यापदे च विद्येश्वरादीनामिति किमिव तद् विज्ञानकेवलास्पदं स्यात्। .....अज्ञानात्मकाणवमलावलम्बित्वं श्रीपूर्वशास्त्रे कथितम्।"

(प०त्री०वि० पृ०, 117-118)

(2) विज्ञानाकलाधिष्ठानरूपाऽवरा महामाया यत्र यत्र शास्त्रेषु पृथक् तत्त्वरूपतया न परिगणिता तत्र तत्र क्वचित् क्वचित् तस्या अन्तर्भावो मायायां क्वचित् क्वचिच्च विद्यायां कृतो वर्तते। तदसावुत्कृष्टा मायेति वा निकृष्टा विद्येति वा मता तत्र तत्र। यथा—

"केषुचिच्च शास्त्रेषु सा महामायाभेदमलाभावोपचाराद् विद्यातत्त्वशेषतयैव निर्णीयते, क्वचित् पुनरज्ञानमलसद्भावोपरोधात् मायातत्त्वपुच्छतया।"

(प० त्री० वि०, पृ०,119)

(3) मन्त्रप्रमातृणां वेद्यं प्रति या भेददृष्टिरसौ केषाञ्चित् परिभाषानुसारं महामायेति। यथा—

"अन्ये चैनां विद्यां भेदोल्लासान् महामायामिच्छन्ति।"

(शि० दृ० वृ०, पृ०,25)

एषा हि परम्परा तर्कप्रधानेषु शिवदृष्टीश्वरप्रत्यभिज्ञादिषु प्रसिद्धा। उक्तं यथा—

"अन्ये तु मन्यन्ते,—योऽसाविदंभाग आच्छादनीयस्तस्य यदवभासनं तत्प्रधाना शुद्धविद्या। अन्यथा हि स इदमंशः केन भास्यतां; मायायास्तत्राभावात्, भावे वा प्ररोहप्रसङ्गात् ; अत एवेयं प्ररोहासहिष्णुं यत इदन्तां भासयति ततः शुद्धाभासनाच्च विद्येति। तत एवाप्ररूढमायाकल्पत्वात् महामायेयं श्रीरौरवादिगुरुभिरुपदिष्टा। तदेतदाह—भेदधीरेव भावेषु कर्तुर्बोधात्मनोऽपि या।

मायाशक्त्येव सा विद्येत्यन्ये विद्येश्वरा यथा।।"

(ई० प्र० वि०, खं०, पृ०,199-200)

अयमभिप्रायः मन्त्रापरनामानो — विद्येश्वरा हि स्वात्मानं शुद्धप्रकाशविमर्शाकारमैश्वर्यमण्डितं च पश्यन्ति। ततः स्वात्मविषये नैषां कश्चन विपर्यासः। परं तथापि ते प्रमेयमात्मनो भिन्नतया पश्यन्तो भेददृष्टिमयस्य मायीयमलस्य पात्रतां यान्ति। तदेवं विधा अंशतो विपर्यासयुक्ता तेषां दृष्टिरेव महामायेत्युच्यते रौरवाद्यागमेषु। त्रिकशास्त्रे पुनः सा शुद्धविद्यायामेवान्तर्भाव्यते। विद्याया एवाधस्तनस्तररूपाऽसौ मन्यते। तत एव तदधिकारिणो मन्त्रा विद्येश्वरा इति समाख्यायन्ते। ते ह्यवरकोटिगताया विद्याया ईश्वराः। उच्चतरकोटिगतायामीश्वरत्वं पुनर्मन्त्रेश्वरमन्त्रमहेश्वराख्यानां शुद्धानां प्रमातृणाम्। यथोक्तम्—

"येन प्रकारेण विद्येश्वरा भगवन्तोऽनन्ताद्या वर्तन्ते। ते हि शुद्धचिन्मात्रगृहीताहंभावाः स्वतस्तु भिन्नं वेद्यं पश्यन्ति, यथा द्वैतवादिनामीश्वरः। एवं ग्राहकेंऽशतश्चैतन्यरूपात् परमार्थरूपे ग्राह्यविपर्यासनशक्तिः शुद्धविद्या विद्येश्वराणाम्।"

(ई० प्र० वि०, खं०2, पृ०,201)

(4) विद्येश्वरत्वदशावभासिनी परमेश्वरस्य शक्तिः। यथा—

"यस्यासम्भाव्यं भेदनं प्रकाशैकपरमार्थत्वात्, सोऽपि भिन्न इतीश्वरस्य परमेतत् दुर्घटकारित्वमागमे महामायेति विद्येति व्यवहृतमिति दर्शयितुं द्वितीयोऽपि।"

(ई० प्र० वि० वि०, खं०3, पृ०,246)

(5) नूतनशैवदर्शनस्य प्रवर्तकस्य विचारे आपेक्षिकयोर्विद्याऽविद्ययोरवभासनशीला आत्मविलासरूपिणी पराशक्तिरेव महामाया, महाविद्या, परिपूर्णा,सर्वोत्कृष्टा च। यथा—

"स्वविलासस्वरूपा सा विद्याऽविद्याप्रकाशिनी।
महाविद्या महामाया परिपूर्णा जयत्यसौ।।"

(आ० वि०4,1)

महामुद्रा :— अतिरहस्यभूतत्वान्न स्पष्टीकृता ग्रन्थकृता वा टीका कृतापि वा। शुद्धैव संविन्महामुद्रेति प्रतीयते। परं शरीराङ्गसंबंधोऽप्यस्या भावनार्थं प्रतिपादितः। ततः शुद्धसंविद्रूपताया भावनाऽस्याः सारः। यथा—

"नासां नेत्रद्वयं चापि हृत्स्तनद्वयमेव च।।
वृषणद्वयलिङ्गं च प्राप्य कायं गता त्वियम्।
भवस्थानाभवस्थानमुच्चारेणावधारयेत्।।
मानसीयमितस्त्वन्याः पद्माद्या अष्टमुद्रिकाः।
मातृव्यूहकुले ताः स्युरस्यास्तु परिवारगाः।।
शरीरं तु समस्तं यत् कूटाक्षरसमाकृति।
एषा मुद्रा महामुद्रा भैरवस्येति गह्वरे।।"

(तं० आ०32,50-53)

"महामुद्रया अज्ञातया शाम्भवमुद्रया .....।"

(स्पं० सं० टिप्प०, पृ०,2)

महामूलम् — (1) एकीकृतसमस्तजडतत्त्वजातोपादानभूतं मायाख्यं तत्त्वम्। यथा—

"महामूलं परमकारणत्वान्माया।"

(तं० आ० वि०, खं०3, पृ०,364)

(2) विश्वप्रतिष्ठानभूतो मातृकावर्णः = सकारः। यथा—

"तत एव सकारेऽस्मिन् स्फुटं विश्वं प्रकाशते।"

उद्धः- (तं० आ०3,165)

"इत्याद्युक्त्या विश्वप्रतिष्ठास्थानत्वात् सकारश्च।"

(तं० आ० वि०, खं०3, पृ०,365)

महामोहः — स्वशरीराद् बाह्ये पुत्रादावात्मताभिमानो महामोहः। यथा—

"महामोहस्तु बाह्यस्य पुत्रादेरात्मरूपता।"

(शि० सू० वा० भा०, पृ०,75)

महायज्ञः — ~ कौलाचारे: — गन्धाद्यैर्विषयैर्निः-शङ्कतयेन्द्रियदेवतातर्पणातोषणाद्येव हि कौलाचारे महायज्ञः। यथा—

"इन्द्रियद्वारसंग्राह्यैर्गन्धाद्यैरात्मदेवताः।
स्वभावेन समाराध्या ज्ञातुः सोऽयं महामखः।।"

उद्धः- (म० मं० प०, पृ०,64)

महाराज्ञी : — चतुष्षष्टियोगिनीनां समष्टिरूपा रौद्रेश्वरी भगवती, तासां सामरस्यभूः। यथा—

"ताश्चतुष्षष्टियोगिन्योऽभेदेन यत्र वर्तन्ते सा रौद्रेश्वरीभूमिगता पञ्चषष्टितमा सर्वमङ्गलमङ्गला राज्ञी भगवती। सैव परधाराधिरूढा सामरस्यभूः।"

(वि० भै० उ०, पृ०,68)

श्रीनगरादुत्तरपश्चिमदिशि गान्धर्वबलपत्तनसमीपे एतस्या देव्या स्थानं वर्तते यत्र सहस्रशो भक्तजना भगवत्या उपासनादि कुर्वन्ति। तूलमूल इति तस्य ग्रामस्य नाम यत्र स्वच्छे जलकुण्डे कदाचिद् बुद्बुदास्तथोद्गच्छन्ति यथा जलोपरि देव्याश्चक्रमाविर्भवति। साधारणतस्तत्र जलरूपिण्येव महाराज्ञी पूज्यते। जलकुण्डमध्यस्थे मन्दिरे या देव्याः प्रतिमाऽसौ वर्तमान एव युगे निर्मितास्ति। विविधवर्णपरिवर्तनशीलसलिलरूपिणी तु प्रतिमा पुरातनी।

महार्थमञ्जरी : — (1) महाराष्ट्रापभ्रंशभाषायां निर्मितः कौलोपासनाप्रधानो दर्शन ग्रन्थः। ग्रन्थकारो महेश्वरानन्दो ग्रन्थमिमं तन्त्रमिति वदति। यथा—

"महार्थमञ्जर्याह्वयं महत्तत्त्वम्।"

(मं० मं० प०, पृ०,2)

(2) स्फुटाभिः कौलिकपरिभाषाभिरप्रतिपाद्यमानमपि वस्तुतः कौलसम्प्रदायशास्त्रम्। कौला अपि पराद्वैतिनस्त्रिका अपि। इत्यतः काश्मीरशैवदर्शनानुसारि शास्त्रमिदम्। यथा—

"अस्यामर्थस्थितिः सैव या सर्वत्र कुलागमे।
किन्तु शब्दस्य शय्याऽन्या नात्यन्तं सा विभिद्यते।।"

उद्धः- (म० मं० प०, पृ०,192)

~ तत्परिमलः — **महेश्वरानन्देन स्वयं निर्मिता महार्थमञ्जर्याः कारिकाणां वैदुष्यपूर्णा सुविस्तृता संस्कृतभाषामयी व्याख्या।**

महार्थोदय : — कोऽपि शाक्तसम्प्रदायग्रन्थो महेश्वरानन्द- कृतः।

द्रः— (म० मं० प०, पृ०, 104, 127)

महावनमुनिः — कोऽपि कौलयोगी। यथा—

तदुक्तं श्री महावनमुनिना :—

"अलिपिशितपुरन्ध्रीभोगपर्याकुलोऽहं
बहुविधकुलयोगारम्भसंभावितोऽहम्।
पशुजनविमुखोऽहं भैरवीसंश्रितोऽहं
गुरुचरणपरोऽहं भैरवोऽहं शिवोऽहम्।।"

उद्धः- (मं० मं० प०, पृ०,163-164)

महाविद्या :— (1) पारमेश्वरस्य स्वातन्त्र्यस्यासौ विशेषता यद्वशाज्जगल्लीलाभिनयेऽत्र परिमिताया आपेक्षिकायाश्चाविद्याया आभासो भवत्येकतोऽपरतश्चापेक्षिकाया यथार्थज्ञानरूपाया विद्यायाः। ततो विद्याविद्योभयावभासकारिणी परमेश्वरस्य स्वतन्त्रतैव सिद्धैर्महाविद्येति जेगीयते। यथा—

"अस्मन्मते त्वविद्या वा विद्या वा नाऽस्ति तत्त्वतः।
महाविद्या स्वात्मरूपा समुल्लसति सर्वतः।।"

(आ० वि० 4,21)

(2) शुद्धविद्या। वागीशी। यथा—

"..... महाविद्या सर्वविद्याभवोद्भवा।।
जगतः प्रलयोत्पत्तिविभूतिनिधिरव्यया।
सा एव परमा देवी वागीशीति निगद्यते।।
अष्टवर्गभिन्ना च विद्या सा मातृकैव तु।"

(स्व० तं०, प० 10,1142-1144)

~ उपासनाक्रमे : — **मायाशक्तिरेवोपासनाक्रमे महामाया। यथा—**

"महामायोर्ध्वतः शुद्धा महाविद्याऽथ मातृका।।"

(तं० आ० 8,337)

अत्र माया शक्तेर्वर्णनान्तरमेवैतदुक्तम्। ततो मायाशक्तिरेवात्र महामायापदेनाभिप्रेता।

महाव्याप्तिः — (1) ज्ञानिनां परम्परासु प्रसिद्धा सुषुप्तेः संज्ञा। न ह्यस्यां भूमौ संविदो वेद्यरूपभावसम्भेदकृतः कोऽपि सङ्कोचः तद्राहित्यतो महाव्याप्तिरुच्यते। यथा—

"प्रसंख्यानवतः कापि वेद्यसङ्कोचनात्र यत्।
नास्ति तेन महाव्याप्तिरियं तदनुसारतः।।"

(तं० आ०10,262)

ज्ञानिनः सिद्धाः सुषुप्तिं व्याप्तिरिति परिभाषन्ते, यतोऽत्रवेद्यच्छायाकृतस्य सङ्कोचस्याभावः, तेन च व्याप्तिरियमिति। यथा—

"अत्र हि प्रमातृरूपसमापत्त्या रूपिणां भावनामौदासीन्यमनुद्रेको न तु तुर्यदशायामिव सर्वतो विगलनं येनाविशेषः स्यात्।"

(तं० आ० वि०, खं०7, पृ०,178)

"रूपस्थं तु महाव्याप्तिः सुषुप्तस्यापि तद्द्वयम्।"

उद्धः- (मा० वि० तं० 2, 37,)

(तं०आ०वि०,खं०7, पृ०,178)

(2) उच्चारयोगाभ्यासस्य परस्मिन् सोपाने साधकस्य संविदि प्रतिष्ठायामानन्दचमत्कारस्य शिरोघूर्णनरूपं बाह्यं चिह्नम्। यथा—

"ततः सत्यपदे रूढो विश्वात्मत्वेन संविदम्।।
संविदन् घूर्णते घूर्णिर्महाव्याप्तिर्यतः स्मृता।"
(तं० आ०5,104-105)

अवरेष्वप्याणवयोगेष्वेषां योगसाफल्यचिह्नानामाविर्भावो भवति, न केवलमुच्चारयोग एव।

~ उच्चार योगे : — **(3) घूर्णिनामकं देहयोगसिद्धिलक्षणम्। विश्वात्मके स्वात्मनि योऽनात्मताभिमानस्तस्य गलनेन विश्वात्मतासाक्षात्कारः स्वात्मनो महाव्याप्तिः। यथा—**

"आदावनात्मन्यात्मत्वे लीने लब्धे निजात्मनि।।
आत्मन्यनात्मतानाशे महाव्याप्तिः प्रवर्तते।"
(तं० आ०5,106-107)

द्र०:— (पू० प्र०,114-118) **इति।**

महाव्रतम् : — एकादशविधानुशासनपरिपालनं महाव्रतं शैवानां, विशेषतः पाशुपतानां कापालकालमुखादीनाम् त्रिकमार्गनिष्ठानान्त्वन्यदेवानुशासनैकादशकम्। तद्यथा :— (1) स्थूलशरीरमेव कङ्कालम्, (2) स्वशिर एव कपालम्, (3) पृष्ठदण्ड एव दण्डः, (4) करपादाद्यस्थिखण्डा एव पञ्चमुद्राः, (5) दीप्तिरेव भस्म, (6) गुणत्रयमेवोपवीतम्, (7) सौषुम्नमार्ग एव ध्वजः, (8) इन्द्रियाण्येव भूषणानि, (9) स्वच्छन्दं विषयेषु प्रसर एव विहृतिः, (10) हृदयमेव श्मशानम्, हृदयेऽवधानबन्धनमेव श्मशानवासः, (11) कायवाक् चेतसां चेष्टा एवोत्सवाः। इत्येतदेव ह्येकादशाङ्गं महाव्रतं त्रिकयोगिनः। यथा—

"शरीरमेव कङ्कालं कपालं कङ्करस्थितम्।
पृष्ठदण्डं दण्डमत्र करपादगलस्थिताः।।
अस्थिखण्डाः पञ्च मुद्रा भस्म दीप्तिः परा स्मृता।
गुणत्रयं चोपवीतं ध्वजिका स्यान्महापथम्।।
भूषणानीन्द्रियाण्यत्र विहृतिर्विषयेष्वलम्।
हृच्छ्मशाने सदासक्तिः कायवाक्चेतसा स्फुरन्।।
यो यश्चेष्टापरिस्पन्दो वीरेशस्योत्सवः सदा।
महाव्रतमिदं ज्ञेयं निरर्गलनिजस्थितेः।।"
(शि० सू० वा० भा०, पृ०,67)

महाशक्तिः — सर्वशक्त्येकघना परशिवतैव महाशक्तिः शिवशक्त्योरभेदात्। यथा—

"शिवस्यैका महाशक्तिः शिवश्चैको ह्यनादिमान्।
सा शक्तिर्भिद्यते देवि भेदैरानन्त्यसम्भवैः।।"
(स्व० तं०11,271)

महाशब्दः — अष्टानां घोषादीनां नादानां व्यापको मूलभूतोऽसौ नवमो नादो यः सततं प्राणिनामन्तर्नदति। स चाहं विमर्शात्मको नादः। यथा—

"नवमस्तु महाशब्दः सर्वेषां व्यापकः स्मृतः।
नदत्यसौ सदा यस्मात्सर्वभूतेष्ववस्थितः।।"
(स्व० तं०, प०11, पृ०,9)

"नादाख्यं यत्परं बीजं सर्वभूतेष्वस्थितम्।।"
(स्व० तं० प०11, पृ०,10)

"शक्तिमध्यगतो नादो वंशनादान्तसन्निभः।"

इति यो नादः प्रतिपादितः, स महाशब्दः सर्वेष्वन्तः संज्ञबहिःसंज्ञेषु स्थावरादिदेवयोन्यन्तेषु भूतेष्ववस्थितः।"
(स्व० तं० प०11, पृ०,10)

महाशून्यम् : — (1) प्रमाणप्रमेयप्रपञ्चरहिता शुद्धा संविन्मयतेह महाशून्यमित्युच्यते शैवनये। यथा—

"समनात्मनो भावस्यापरं व्यापिनीरूपं शून्यमशेषभावासूत्रणरूपं महाशून्यम्।"
(स्व० तं० , प०4, पृ०,172)

व्यापिन्या एषा महाशून्यरूपा संज्ञा साधनाप्रक्रियायां प्रवृत्ता भवेत् क्वचित्।

(2) सकलसूक्ष्मसूक्ष्मतरादिवेद्यजातस्पर्शरहितं पर्यन्ततः सर्वसाक्षिकं चित्तत्त्वमेव महाशून्यमित्युच्यते।

द्र०:— 'शून्यता' 'प्रपञ्चः' इति।

महासत्ता : — सतामसताञ्चापि पदार्थानामाभासकारिणी पारमेश्वरी शक्तिमयी विशेषता या सदा स्वयं भवति। भावयति च विश्वम्, स्वयमेव च या विश्वं भवति। ततो परमेश्वरस्य सर्वविषयकभवन प्रपञ्चः क्रियाकर्तृता महासत्ता। यथा—

"सत्ता च भवनकर्तृता, सर्वक्रियासु स्वातन्त्र्यम्। सा च खपुष्पादिकमपि व्याप्नोतीति महती।"
(ई० प्र० वि०, खं०1, पृ०,209-210)

महासाहसयोगः — चकितमुद्राभ्यासः। स च प्रत्यावृत्तबहिरिन्द्रियवृत्तेर्योगिनोऽकिञ्चिच्चिन्तनेनाहं परामर्शस्फुटावबोधाभ्यास इति। यथा—

"महासाहससंयोगविलीनाखिलवृत्तिकः।
पूञ्जीभूते स्वरश्म्योघे निर्भरीभूय तिष्ठति।।
अकिञ्चिच्चिन्तकस्तत्र स्पष्टदृग्याति संविदम्।
यद्विस्फुलिङ्गाः संसारभस्मदाहैकहेतवः।।"
(तं० आ० 5,84-85)

"महासाहसशब्दाभिधेयचकितमुद्रानुप्रवेशेन।"
(तं० आ० वि०, खं०3, पृ०, 394)

महासृष्टिः — (1) शाक्ताण्डसृष्टिर्महासृष्टिः यतस्तस्यां सृष्टावसंख्याताः सृष्टिप्रलयाः अघोरेशश्रीकण्ठादिभिः क्रियन्ते। यथा—

"तत्सृष्टौ सृष्टिसंहारा निःसंख्या जगतां यतः।
अन्तर्भूतास्ततः शाक्ती महासृष्टिरुदाहृता।।"
(तं० आ० 6,173)

(2) सदाशिवादिमायान्ता परमेश्वरस्य शाक्ती सृष्टिः।

(3) परमेश्वरस्यासौ सततगतिशीला परमा सृष्टिर्यस्यामसंख्याताः सृष्टिप्रलया अवान्तरवर्तिनोऽवभासन्ते यथाकालम्। आद्या सृष्टिरिति नैवमसौ वक्तुमुचिता, यतः कालकलनाहीनेपदे विजृम्भमाणाया अस्याः किमपेक्ष्याद्यत्वं परिकल्प्येत। यथा—

"पूर्णेयं परमेशस्य महासृष्टिरिह स्थिता।।
यस्यां संहारसृष्ट्यंशां विश्वे ते मध्यवर्तिनः।
सा चाद्या सृष्टिरित्येवं नैव वक्तुं भवेत्क्षमा।।
अदेशकाले तत्त्वे हि कथमाद्यादिसम्भवः।"

(मा० वि० वा०1,366-368)

(4) स्थूलायाः जगत्सृष्टेः प्राग् या तस्या मूलभूता प्रमातृप्रमेयभेदावभासमयी सृष्टिरसावेव महासृष्टिरित्युक्ता। यथा—

"महासृष्टिशब्दवाच्या सृष्टिर्नाम या उच्यते; सोक्तस्य ज्ञातृज्ञेयविभागस्य यदवभासनं तदात्मिकैव। .....महासृष्ट्यन्तर्भूतं सृष्ट्यादित्रयम्.....।"

(ई० प्र० वि० वि०, खं०3, पृ०,26)

चतुःप्रकारमेतद् व्याख्यानं महासृष्टेर्वास्तविकस्य स्वरूपस्य मन्तव्यमिति न मतभेदस्य वा विरोधस्य वा शङ्कात्र विधेया।

~ नियतिनिरपेक्षा : — **शाक्तमहासृष्टिसंहारादौ परमेश्वरो नियतिनिरपेक्षमेव स्वेच्छया स्वातन्त्र्येण सृष्टिसंहारादि विधत्ते। यथा—**

"महासर्गे पुनः सृष्टिसंहारानन्त्यशालिनि।।
एकः स देवो विश्वात्मा नियतित्यागतः प्रभुः।"

(तं०आ०14,3-4)

महाहंसः — परमेश्वरः। यथा—

"महत्त्वं तु सर्वक्षेत्रज्ञरुद्रापेक्षया, सर्व एव हि प्रमातारः स्वोचितसर्गसंहाररूपहानसमादानधर्मत्वात् हंसाः, शम्भुस्तु तेषामपि सर्गसंहारकृदिति महाहंसः।"

(स्त० चि० वि०, पृ०,66-67)

महेश्वरः — (1) सर्वथापि स्वतन्त्रोऽसीमप्रकाशानन्दसारः समस्तैश्वर्यसारमण्डितो ब्रह्मविष्णुप्रभृतिभ्य ईश्वरसदाशिवादिभ्योऽपि वा स्वकीयैश्वर्यविप्रुप्रदानेन तानीश्वरीकुर्वन्ननवच्छिन्नैश्वर्यमण्डितः परिपूर्णः परमेश्वरः। यथा—

"सम्भवन्ति हि मायागर्भाधिकारिणो विष्णुविरिञ्चयाद्यास्तदुत्तीर्णा अपि महामायाधिकृताः शुद्धाशुद्धा मन्त्रतदीशतन्महेशात्मानः; शुद्धा अपि श्रीसदाशिवप्रभृतयः। ते तु यदीयैश्वर्यविप्रुड्भिरीश्वरीभूताः स भगवाननवच्छिन्नप्रकाशानन्दस्वातन्त्र्यपरमार्थो महेश्वरः।"

(ई० प्र० वि०, खं०1, पृ०,13-14)

(2) विश्वात्मतया स्वात्मानं स्वलीलयावभासयन् परमशिव एव परमेश्वर इति महेश्वर इति च कथ्यते। यथा—

"सिद्ध एव अनेकस्वभावोऽपि एक एव महेश्वरः चिन्मूर्त्तिः भेदधर्मे पुनः विरुद्धधर्माध्यासो दुरुद्धर एव।"

(प० सा० वि०, पृ०,20)

आधुनिके युगे प्रारम्भिकशोधविद्वद्भिर्यदीश्वरतत्त्वाधिपतेरीश्वरभट्टारकस्यैव महेश्वरसंज्ञत्वं प्रख्यापितं तदविचारितमेव, दाक्षिणात्यशैवसिद्धान्तानुसारितयैव च तथोक्तमिति ज्ञेयं सुधीभिः।

(3) सृष्टिसंहारयोः सोपानत्रये तत्तत्प्रशासकरूपतया स्थितः परमेश्वरात्मकः परमः शिव एव महेश्वरः। यथा—

"अशेषभुवनाधारमण्डमप्सु प्रलीयते।।
ततः कालाग्निरुद्रश्च कालतत्त्वे लयं व्रजेत्।
अप्तत्त्वात्तु समारभ्य यावन्मायान्तगोचरम्।।
तत्सर्वं संहारेत्कालः स्वयमेव चराचरम्।
तदूर्ध्वे शुद्धमध्वानं यावच्छक्त्यन्तगोचरम्
तत्सर्वं संहरेद्घोरमघोरो घोर नाशनः।
त्रिष्वेवं संस्थितो रुद्रः कालरूपी महेश्वरः।।

(स्व० तं०11,279-282)

(4) ज्ञानस्मृत्यपोहनशक्तित्रयसंयोजनवियोजनादिलीलासु स्वतन्त्रः परमशिवः। यथा—

"स च तच्छक्तिसंयोजनवियोजनविश्रमणतिरस्करणप्रथनादिस्वाच्छन्द्यसारतया महेश्वररूपो, न तु दहनपचनास्वेदनादिशक्त्याश्रयजडप्रायहुतवह स्थानीयः।"

(ई० प्र० वि० वि०, खं०2, पृ०,338)

द्र०:— (प० प्रा०, पृ०,4-5)

(5) भुक्तिमुक्तिप्रदः परमशिवः। यथा—

"योऽसौ सर्वगतो देवः सर्वेष्वन्तर्गतो विभुः।
सिद्धिमुक्तिप्रदातासौ न वर्णाः परमार्थतः।।
यस्मात्तस्मात्सदा देवि यष्टव्यो भावभेदतः।"

(ने० तं०16,25-26)

~ आचार्यविशेषः — **अभिनवगुप्तस्य गुरुविशेषो येन तस्मै क्षोभ्यक्षोभकभावस्य योनिबीजवर्णवर्गगतस्य रहस्यं प्रकाशितम्। यथा—**

"क्षोभ्यक्षोभकभावस्य सतत्त्वं दर्शितं मया।
श्रीमन्महेश्वरेणोक्तं गुरुणा यत्प्रसादतः।।"

(तं० आ०3,90)

जयरथीयविचारानुसारं महेश्वराख्यो गुरुः श्रीनाथसन्ततेरर्धत्र्यम्बकसन्ततेरपि च गुरुरभवत्। यथा—

"महेश्वर इति यः श्रीसन्तत्यर्धत्रेयम्बकाख्यमठिकयोर्गुरुतया अनेनान्यत्रोक्तः परमेश इति ईश इति च यदाह—

'भट्टारिकादिभूत्यन्तः श्रीमान्सिद्धोदयक्रमः।
भट्टादिपरमेशान्तः श्रीसन्तानोदयक्रमः।।
श्रीमान्भट्टादिरीशान्तः परमोऽथ गुरुक्रमः।
त्रिकरूपस्त्रिकार्थे मे धियं वर्धयतां तराम्।।"

उद्ध०:- (तं० आ० वि०, खं०1, पृ०,28-29)

महेश्वरभावः — **शुद्धः परिपूर्णश्च संविन्निष्ठोऽहमिति स्वात्मनो विमर्शः। यथा—**

"पूर्णः पराहन्ताविश्रान्तिलक्षणो "महेश्वरभावः"।"

(प० सा० वि०, पृ०,114)

महेश्वरानन्दः — **गोरक्षापरपर्यायो महेश्वरानन्दो महार्थमञ्जर्यास्तत्परिमलस्य च कर्ता। गोरक्ष इत्यस्य गृहजनकृतं नाम महेश्वरानन्द इति च दीक्षानाम। महाप्रकाशोऽस्य गुरुः। शिवानन्दश्च परमगुरुः। स च ऋजुविमर्शिनीकारः ई० त्रयोदशशताब्द्या आचार्यः। क्रमनयगुरुर्यः शिवानन्दनाथः स त्वष्टमशताब्द्यामुत्तरपीठस्य पीठाधिपः सोमानन्दस्य गुरोरपि परमगुरुः। एष महेश्वरानन्दश्चोलदेश उवास "चोलास्ते सततोत्सवाः जनपदाः" इत्युक्तं तेन परिमलोपसंहारप्रकरणे। अनेन पञ्चभ्यो निजग्रन्थेभ्यः पङ्क्तयः समुद्धृताः परिमले। द्वयोश्च ग्रन्थयोः केवलं नामोल्लेखः कृतः। तौ च कुण्डलाभरणम्, नखप्रलापश्चेति। महार्थमञ्जरीपरिमले उपोद्घाते पृ० 'च' इत्यत्र व्रजवल्लभद्विवेदकृते। तदनुसारं चोलानामुत्कर्षकालः चतुर्दशशताब्दी। स एव कालो महेश्वरानन्दस्य। यथा—**

"स्फूर्त्तये विश्वशिल्पस्य श्रीशिवानन्दमूर्त्तये।
नित्योन्मेषनिमेषाय निस्तुषायै नमस्त्विषे।।
नमो निखिलमालिन्यविलापनपटीयसे।
महाप्रकाशपादाब्जपरागपरमाणवे।।
गोरक्षो लोकधिया देशिकदृष्ट्या महेश्वरानन्दः।
उन्मीलयामि परिमलमन्तर्ग्राह्यं महार्थमञ्जर्याम्।।"

(म० मं० प०, पृ०,1)

"णमिऊण णिच्च सुद्धे गुलुणे चलने महप्प आसस्स।
गट्ठइ महत्थमंजरि मिमिणं सुरहिं महेसराणंदो।।
(नत्वा नित्यशुद्धौ गुरोश्चरणौ महाप्रकाशस्य
ग्रथ्नाति महार्थमञ्जरीमिमां सुरभिं महेश्वरानन्दः।।")

(म० मं० प०, पृ०,3)

~ तदितिहासः — **गोरक्षापरपर्यायो महेश्वरानन्दः चोलदेशवास्तव्यः। यथा—**

"चोलास्ते सततोत्सवा जनपदाः.....।"

(म० मं० प०, पृ०,195)

अस्य पिता माधवः। यथा—

"..... श्लाघ्यो गुणैर्माधवः।
रेतोधाः .....।।"

(म० मं० प०, पृ०,195)

अस्य गुरुर्महाप्रकाशः। यथा—

".....स्फटिकावदातहृदयो नाथः प्रकाशो महान्।"

(तदेव)

आचार्याभिनवगुप्तस्य ग्रन्थानामृणी। यथा—

"सत्संवित्समयमहाब्धिकल्पवृक्षानाचार्यानभिनवगुप्तनाथपादान्।
आमूलादमलमतीनुपघ्नयन्त्या वाग्वल्ल्याः प्रचुरफलो ननु प्ररोहः।।
साहित्याब्धौ कर्णधारोऽहमासं काव्यालोकं लोचनं चानुशील्य।
तद्वत् स्वच्छं लब्धवानस्मि बोधं पान्थो भूत्वा प्रत्यभिज्ञापदव्याम्।।"

(तदेव)

~ तद्ग्रन्थाः — **(1) महार्थमञ्जरी, परिमलसहिता।**
(2) पादुकोदयः।
(3) कोमलवल्लीस्तवः।
(4) परास्तोत्रम्।
(5) संविदुल्लासः। यथा—

"पादुकोदयमहार्थमञ्जरी कोमलास्तव परास्तुतिक्रमैः।
स्फारयन् भुवि महार्थसंविदं देशिको विजयते महेश्वरः।।"

(म० मं० प०, पृ०,196)

महोलोकः — **स्वर्लोकाद् योजनानां कोटिद्वयं पञ्चाशीतिलक्षाणि चोपरि महोलोकः। यथा—**

"द्वे कोटी पञ्चचाशीतिर्लक्षाणि स्वर्गतो महान्।।"

(तं० आ०8,149)

~ तदधिकारिण :— **मार्कण्डेयाद्या मुनयः ऋषयः सिद्धाश्च तथा निवृत्ताधिकारा देवा महोलोके (महल्लोके) निवसन्ति। यथा—**

"मार्कण्डेयाद्या ऋषिमुनिसिद्धास्तत्र प्रतिष्ठिताः
निवर्तिताधिकाराश्च देवा महति संस्थिताः।।"

(तं० आ०8,150)

माङ्गलशास्त्रम् :— सर्वमङ्गलागमशास्त्रं यस्यैकमेव पद्यं शैवाचार्यैर्बहुशः समुद्धृतं स्वग्रन्थेषु। नामनिर्देशपूर्वकमुक्तं तद्विषये तन्त्रालोके। यथा—

"शक्तयोऽस्य जगत् कृत्स्नं शक्तिमांस्तु महेश्वरः।
इति माङ्गलशास्त्रे तु श्रीश्रीकण्ठो न्यरूपयत्।।"

(तं० आ०5,40)

यदुक्तं श्री सर्वमङ्गलाशास्त्रे :—
"शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते।
शक्तयोऽस्य जगत् सर्वं शक्तिमांस्तु महेश्वरः।।" इति

(प० सा० वि०, पृ०,10)

मातङ्गपारमेश्वरम्— रुद्रागमविशेषो यन्मतमुल्लिखितं तन्त्रालोके। यथा—

"इत्येष क्रम उद्दिष्टो मातङ्गे पारमेश्वरे।"

(तं० आ० 9,48)

मतङ्गतन्त्रम्, मातङ्गतन्त्रम्, पारमेश्वरं तन्त्रम्, पारमेश्वरः आगमः इत्येतैर्नामभिरुल्लिखितोऽयं ग्रन्थो बहुभिराचार्यैः।

मातङ्गीस्तोत्रम् :— महेश्वरानन्दस्य गुरुणा महाप्रकाशेन निर्मितं देवीस्तोत्रम्।

द्र०:— (म० मं० प०, पृ०,42)

मातरः — **(1) सर्वस्य जगतः प्राणिनां व्यापारान् प्रचालयन्त्यः परमेश्वरस्य शक्तिव्राताः। तासु च मुख्या ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, चामुण्डा, वाराही, माहेन्द्री इति सप्त। तासामधिष्ठात्री च दुर्गाऽष्टमी क्वचिदेषाष्टमी योगीशीति नाम्ना व्यवह्रियते। ताः प्रत्येकं त्रिधा कर्मरताः— तत्र ज्येष्ठा जीवेभ्यो मोक्षप्रदा, रौद्री भोगप्रदा, वामा बन्धकारिणी। समष्टिरूपा चासामम्बा। तासु ज्येष्ठा अघोराख्यशक्तिव्रातरूपेण स्थिता मुक्तिप्रदा, वामा पुनर्घोरतरशक्तिव्रातरूपेण स्थिता प्राणिनोऽधोऽधः संसारचक्रे पातयति। अतत्त्वदर्शिनः प्राणिन एताभिर्भुज्यन्ते, यतस्ताः क्रीडनकानिव तान् जीवांस्तत्र तत्र प्रवर्तयन्त्यः क्रीडासुखं भुञ्जते। तत्त्वदर्शिनस्त्वेतास्त्रिप्रकारा अपि शक्तीः स्वदासीरिव पश्यन्तः नैतासामधीनाः। अपि तु स्वामिन एतासाम्। एता अपि सर्वथा तदिष्टमेव साधयन्ति। सूचिता एते अर्थाः सङ्केततस्तत्र तत्रागमेषु दर्शनग्रन्थेषु च।**

यथा—

"वर्गाष्टकमिह ज्ञेयमघोराद्यमनुक्रमात्।
तदेव शक्तिभेदेन माहेश्वर्यादि चाष्टकम्।।
माहेशी ब्राह्मणी चैव कौमारी वैष्णवी तथा।
ऐन्द्री याम्या च चामुण्डा योगीशी चेति ता मताः।।"
(मा० वि० तं०3,13-14)

"योनिवर्गः कलाशरीरम्"
(शि० सू०1,3)

"ज्ञानाधिष्ठानं मातृका" (तदेव,1,4)

"कवर्गादिषु माहेश्वर्याद्याः पशुमातरः"
(तदेव, 3,20)

"शब्दराशिसमुत्थस्य शक्तिवर्गस्य भोग्यताम्।
कलाविलुप्तविभवो गतः सन् स पशुः स्मृतः।।"
(स्पं० का०,45)

"स्वरूपावरणे चास्य शक्तयः सततोत्थिताः।
यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः।।"
(तदेव,47)

"सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका।।"
(तदेव,48)

द्र०:- 'अम्बा', ज्येष्ठाशक्तिः', 'वामा', 'अघोरा शक्तिः', 'घोरा' ~ 'मातरः', ~ 'घोरतराः' ~ शिवशक्तयः', **इति।**

"माहेश्वर्याद्या मातरः पशून् स्वात्मविमुखान् विषयासक्त्याऽधः पातयन्ति, पतिभ्यस्तु, स्वात्मविकासरसं तथा तथा चमत्करणपूर्वं समर्पयन्त्यो नैव भेदप्रथनमुत्पादयन्ति इत्यर्थः।।"
(शि० सू० वा० भा० टि०, पृ०,61)

~ उत्कृष्टाः — **(1) उत्कृष्टास्तु स्वयं ब्राह्माद्याः सप्त मातरः यासामेवाधिष्ठात्री दुर्गाऽष्टमी यथा** —

"ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः।।"
(ने० तं०19,56)

"प्रधानाः सर्वमातृणामेताः सप्तप्रकीर्तिताः।"
(तदेव,19,59)

(2) अघोराद्याः शक्तयो वर्णात्मकतयावस्थाय शब्दात्मकतया विकल्पज्ञानं पशोरुल्लासयन्ति। ताश्चाष्टौ ब्राह्माद्या एव। ताः शक्तिव्राततयाऽवस्थाय प्रतिपुरुषमधितिष्ठन्ति। शक्तिव्राताश्चाघोरघोरघोरतराख्याः क्रमेण ज्येष्ठा रौद्री वामाधिष्ठिताः। समष्टिरूपा च तासामम्बा। यथा—

"ज्येष्ठाद्यास्तिस्रः क्रमेणाघोर-घोर-घोरतराख्यशक्तिव्रातरूपेण तिष्ठन्त्यः सर्वस्मिन्नपि जगति बन्धमोक्षादिव्यवहारजातं चालयन्त्यः सर्वप्रकारकां पारमेश्वरीं लीलां निभालयन्ति। तदित्थं ज्येष्ठादीनां योनीनामघोराद्याः शक्तिव्राताः वर्गा इत्युक्ताः सूत्रे। ते शक्तिवर्गा एव अकारादि-क्षकारान्त-वर्णरूपतया स्थिताः कलाः इत्युच्यन्त आगमेषु। मातरः, शक्तयो, देव्यो, रश्मय इत्यादीन्यपि तासामागमिकानि नामान्तराणि। ता एव शब्दानुवेधेन विकल्पज्ञानोद्भासिकाः सत्यः पशूनां बन्धत्वेन समस्तमज्ञान- मवभासयन्ति प्रतिबिम्बकल्पतयैव न तु परिणामनीत्या। पशवस्तासां शक्तीनां भोग्यतां यान्ति। पतयः पुनस्तासां भोक्तारः सन्तो मोक्षलक्ष्मीरसास्वादततपरास्तिष्ठन्ति।"
(शि० सू० विवृ०1-3)

"योनयः शक्तयो ज्ञेयाश्चतस्त्रः सर्वकारणम्।
अम्बा ज्येष्ठाभिधा रौद्री वामा च शिवमूर्त्तयः।।
तासां वर्गः समूहः स्यात्तच्छरीरं कलासु च।
अकारादिक्षपर्यन्ता कलास्ताः शब्दकारणम्।।
मातरः शक्तयो देव्यो रश्मयश्च कलाः स्मृताः।
एताः शब्दानुवेधेन प्रत्ययोद्भासिकाः पशोः।।
तेनासौ भोग्यतां याति तासां, स्वविभवं यतः।
तस्य लुप्तं तदुत्थेन ज्ञानाभासेन सर्वदा।।"
(शि० सू० वा० भा०, पृ०,6-7)

"सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका।।"
(स्पं० का०,48)

~ निकृष्टाः — **ब्राह्मयादीनां मुख्यानां मातृणामंशैरुद्भूताः सत्यः प्राणिनां कष्टकर्यो रक्षःस्वभावा देवयोनिभाजः स्त्रियः। यथा**—

"मातरो ब्राह्मद्यंशकोद्भूताः महामातृस्ततत्स्वामिन्यो ब्राह्मयाद्याः तथा च श्री तन्त्रसद्भावे—

शाकिनी दूषिका चैव चुम्बिका पत्रलेखिका।
उच्छुष्मा नक्रदूषी च ऊर्ध्वनिःश्वासिका तथा।।
अधोनिःश्वासिका चैव आसां कर्म शृणु प्रिये।
शाकिन्यश्चोत्तमास्तासां शेषा घोरतराः स्मृताः।।
अजस्रं दूषते या तु रक्तं वै सार्ववर्णिकम्।

गच्छन्ती वाथ तिष्ठन्ती तेन सा दूषिका स्मृता।।
पुत्रमित्रपितृभ्रातृबालानास्वादयन्ति च।
चुम्बन्त्यश्चास्त्रमश्नन्ति विज्ञेयाश्चुम्बिकास्तु ताः।।
पत्रेण मुखमासाद्य पिबन्ती चामृतं सदा।
पत्रलेखी स्मृता सा तु दुर्निवारा महाबला।।
रात्रौ भूत्वा विवस्त्रा या मूत्रयित्वा प्रदक्षिणम्।
कृत्वा तु प्राशयेद्रक्तं मुक्तकेशी तु कर्षयेत्।।
उच्छुष्मिका तु सा ज्ञेया साधकैर्वीरनायिका।
नासाग्रं वीक्षमाणा तु स्वादयन्त्यमृतं सदा।।
नक्रदूषी तु सा ज्ञेया ऊर्ध्वनिःश्वासिका तु सा।
नग्ना भूत्वा तु गच्छेद्या रात्रौ परगृहं सदा।।
वस्त्रेणाच्छाद्य वक्त्रं तु भूत्वा चैवमधोमुखी।
पिबते शोणितं नित्यमधोनिःश्वासिका तु सा।
इति। शाकिनीभ्यो भिन्ना दूषिकाद्याः सप्त मातरो लक्षिताः,

तत्रैव तासां ब्राह्मयाद्यंशोद्भूतत्वम्—

अधःश्वासा तु ब्राह्मयंशा नक्रदूषी महेश्वरी।
दूषिका तु विशाख्यंशा वैष्णव्यंशा तु पार्वती।।
पत्रलेखी समाख्याता चामुण्डांशा तु चुम्बिका।
ऊर्ध्वनिःश्वासिका ज्ञेया माहेन्द्र्यंशा वरानने।।
वाराह्यंशा तथोच्छुष्मा कथिता वीरवन्दिते।'
इति उक्तम्। एताश्चानन्ता इति तत्रैव दर्शितम्।।
'चुम्बिकायास्त्रयो भेदाः .....।'
इत्यादिना ग्रन्थेन।"

(ने० तं०, खं०2, पृ०,145-146)

यज्ञादिकर्मप्रारम्भे एताविधानां विघ्नकारिणीनां देवीनां निवारणक्रिया कार्या भवति। तत्सम्बन्धेनैतासां निरूपणं कृतमागमेषु। एतास्तु विघ्नकारिण्योऽपि देव्यो ब्राह्माद्यंशोद्भूता इति प्रोक्तमेव।

~ *सर्वोत्कृष्टा (तासु)* — **विन्ध्यवासिनी दुर्गादेवी परिपूर्णैवोमा, उमापतेः परिपूर्णा शक्तिः। इतरा० मातरस्तस्या अंशावताराः। इयं परिपूर्णावतारभूता दुर्गादेवी विन्ध्यमूर्ध्निस्थिता मातृकासूत्कृष्टतमा। यथा—**

"कात्यायनीति दुर्गेति विविधैर्नामपर्ययैः।
मानुषाणां तु भक्तानां वरदा भक्तवत्सला।।
पूर्वमेवावतीर्णासि विन्ध्यपर्वतमूर्धनि (मूर्धनि)।"

(स्व० तं०10,1004)

उद्धः— (तं० आ० वि०, खं०5, पृ०,166)

माता— (1) अकारादि-क्षकारान्ता मातृकैव पशुभिर्यार्थार्थ्येनाज्ञाता सती तेषां कृतेऽखिलशाब्दविकल्पजननी सर्वस्य मातेति। यथा—

"पशुभिः ..... स्वेनरूपेणाज्ञाता माता इत्यर्थः।"

(तं० आ० वि०, खं०2, पृ०,222)

(2) भावव्रातनिर्माणसमर्था पारमेश्वरी शक्तिर्या शिवयोगी स्वशक्तितया प्रत्यभिजानीते। यथा—

"स्वतन्त्रा ज्ञत्वकर्तृत्वलक्षणा पर शिवशक्तिरेव विश्वनिर्मात्री सती मातेत्युच्यते। तया मात्राऽनिरुद्धया निर्माणशक्त्या यथेष्टभावनिर्माणमापादयति स सहजविद्योदयसमुत्कर्षितः शिवयोगी।"

(शि० सू० विवृ०3,17)

मातृका— (1) शाम्भवोपायोपयोगिनी आदिक्षान्ता वर्णमाला। तदुपायतः शिवयोगी स्वात्मानं स्वविलासत एव प्रतिबिम्बितषट्त्रिंशत्तत्त्वं, तत्तत्प्रतिबिम्बखचितसुन्दरं च निजसंवित्प्रकाशं निर्विकल्पसंवेदनेनैव साक्षात्करोति। तत्त्वानि च स्वात्मन एव शक्तीनां प्रतिबिम्बरूपाणि पश्यति। मातृकावर्णेषु स्वरान् अकारादिविसर्गान्तान् स्वान्तरवधानदृष्ट्या पश्यंस्तदभ्यासेन स्वात्मानमेव विविधतत्तच्छक्तिसमाविष्टं शिवं साक्षात्करोति। व्यञ्जनवर्णेषु निहितावधानस्तान् स्वारत्मिकानां स्वशक्तीनामेव बहिर्मुखप्रतिबिम्बात्मकतया संवेत्ति। स्वात्मानं च तत्तच्छक्तिप्रतिबिम्बात्मकतत्तत्त्वखचितसुन्दरं शुद्धसंविदात्मकं साक्षात् संवेत्ति। एवं च संविदन् स्वात्मसंविदानन्दानुभूतिचमत्काररसं रसयन् विजयते। ततः स्वराः शक्तिविशेषविशिष्टस्य स्वात्मनः शिवभावस्य व्यञ्जकाः, व्यञ्जनानि च स्वशक्तिप्रतिबिम्बरूपाणि धरादिशक्त्यन्तानि तत्त्वानि स्वात्मप्रकाशमध्ये व्यञ्जयन्ति स्वात्मानं च तत्तत्प्रतिबिम्बखचितसुन्दरं प्रत्याययन्ति शाम्भवोपायविशेषाभ्यासे।

(2) शब्दराशिरकारादिः क्षकारान्तः। स एव हि सर्वस्य स्थूलशब्दजालस्याविभक्तं कारणं मातृकेत्युच्यते। सा च अक्षुब्धा सती, स्वरव्यञ्जनवर्गाष्टकमय्येव मातृकेति व्यपदेशभागिनी। विश्वोत्तीर्णमिदं वर्णराशेः स्वरूपम्, शिवतत्त्वस्यान्तरेव साक्षात्कार्यं शिवयोगिभिः। यथा—

(क) *"पदवाक्याद्यात्मना विभक्तानां स्थूलानां शब्दानामविभागस्वभावः कारणात्मा राशिः।"*

(तं० आ० वि०, खं०2, पृ०,222)

(ख) "शब्दराशिः स एवोक्तो मातृका सा च कीर्तिता।"

(तं० आ०3,232)

(3) शब्दराशिस्वरूपस्य भैरवस्य सूक्ष्मतरा पराशक्तिर्या स्थूलस्य शब्दराशिरूपस्य जननी। सा तज्जननीत्वेनैव मातृकेत्युच्यते। यथा—

"शब्दराशेर्भैरवस्य यानुच्छूनतयान्तरी।।
सा मातेव भविष्यत्त्वात्तेनासौ मातृकोदिता।"

(तं० आ०15,130-131)

"अज्ञाता माता मातृका अशेषमन्त्रादिजननी।।"

(ने० तं०, खं०1, पृ०,49)

"मातृकां-पशूनामज्ञानां विश्वमातरं सर्वमन्त्रतन्त्रजननीम्।"

(स्व० तं०, प०1, पृ०,26)

(4) शिवस्य स्वतन्त्रा क्रियाशक्तिरेव मातृकारूपतया प्रकाशते। यथा—

"यदा स्वतन्त्रालुप्ता सा क्रिया करणरूपिणी।।
वर्णरूपाष्टभेदेन स्फोटादिध्वनिरूपिणी।
मातृका सा विनिर्दिष्टा क्रियाशक्तिर्महेश्वरी।।
क्रियाख्या परमा सा तु सर्ववाङ्मयरूपिणी।"

(ने० तं०21, 37-39)

~ असाङ्केतिका— **शाम्भवोपायस्तावच्छुद्धस्वस्वरूपविमर्शस्य विकल्पकलङ्कस्पर्शरहितोऽभ्यासः। स्वरूपं च संवित्। संवित्प्रकाशो नैव निर्विमर्शः। तथात्वे तस्य संवित्त्वमेव हतं स्यात्। ततोऽस्ति तत्राभ्यासे स्वात्मनो विमर्शः। परं नाऽसौ विकल्पात्मकः साङ्केतिकः। ततो निर्विकल्प एव। न च विमर्शः शब्दना हीनः। वाग्रूपतोत्क्रमणे तस्याप्रकाशतापत्तेः। ततोऽसाङ्केतिकैर्वर्णध्वनिभिस्तस्य निर्विकल्प एव विमर्शः। ते वर्णध्वनयः एवाकारादि-क्षकारान्ता मातृका या स्वात्मनो विशेषशक्तीनां तत्प्रतिबिम्बानां च निर्विकल्पविमर्शात्मकोपायभूता शाम्भवोपायाभ्यासमयी। तत्र शक्तिचक्रैराविष्टायाः शिवताया विमर्शः आदिविसर्गान्तैः स्वरैः, शिवशक्तीनां प्रतिबिम्बभूतानां धरादिशक्त्यन्ततत्त्वानां विमर्शः कादिक्षान्तैर्व्यञ्जनवर्णैरितिविशेषः। यथा—**

"परमेश्वरस्य स्वरूपं नानामृष्टं भवति, चित्स्वभावस्य-स्वरूपानामर्शनानुपपत्तेः, स्वरूपानामर्शने हि वस्तुतो जडतैव स्यात्। आमर्शश्चायं न साङ्केतिकः, अपि तु चित्स्वभावता-मात्रनान्तरीयकः परनादगर्भ उक्तः।"

(तं० सा०, पृ०,12)

~ आदिक्षान्ता— **अकारादि-क्षकारान्ता, शिवशक्त्यात्मकानां षट्त्रिंशत्तत्त्वानां निर्विकल्पविमर्शात्मिका संवित्। यथा—**

"अकारादि-क्षकारान्तं मातृकारूपम्।
.....
.....
न प्रकाशः प्रकाशते सा हि प्रत्यवमर्शिनी।।"

(शि० सू० वृ०1,4)

~ नववर्गका— **नववर्गा मातृकायाः। ते च :— अवर्गः = एकः, कादि वर्गाः = पञ्चेति षट्ः, यवर्गः, शवर्गश्चेत्यष्टौ, केचन क्षकारं नवमं वर्गमपि गणयन्ति।**

~ पञ्चरूपा— **(कादिवर्गेषु)– अनुत्तरादिशक्तिभ्यः कादिवर्गाणां सृष्टिः। तत्रैकैकस्या अपि शक्तेः पञ्चशक्त्यात्मकता। ततोऽनुत्तरादिभ्यः स्वरवर्णेभ्यो या व्यञ्जनसृष्टिरसौ प्रत्येकं पञ्चकरूपिणी। तत्रानुत्तरात् कवर्गस्य, इच्छायाः चवर्गस्य इत्येवमादिरूपास्पर्शात्मकपंचविंशतिव्यञ्जनसृष्टिः। यथा—**

"अनुत्तरात् कवर्गस्य सृतिः पञ्चात्मनः स्फुटम्।।
पञ्चशक्त्यात्मतावेश एकैकत्र यथा स्फुटः।"

(तं० आ०3, 149-150)

~ परावाग्रूपा— **पश्यन्त्याद्यवस्थानां विकासनं प्रत्युन्मिषन्ती भगवती परिपूर्णाहं विमर्शात्मिका परावाग्देव्येव आदिक्षान्त-रूपामातृका सा। च स्वात्मनिदर्पणतुल्येऽनन्तसृष्टिसंहार-वैचित्र्यप्रतिबिम्बावभासनोन्मुखी शिवयोगिभिः साक्षात्क्रियते। यथा—**

"तदेवं भगवती परावाग्भूमिः .....
.....
स्वात्मविमलदर्पणनिर्भासितानन्तसृष्टिस्थितिसंहारैक्य-मयमहासृष्टिशक्तिरादि-क्षान्तरूपा।"

(प० त्री० वि०, पृ०,112-113)

"मध्यमाप्राधान्येन मातृकासृष्टिमाह :—
'ततोऽष्टविधभेदेन पञ्चाशद्वर्णरूपिणी।
ज्ञानशक्तिः परा सूक्ष्मा मातृकां तां विदुर्बुधाः'।।"

(ने० तं०21,71)

"एवमपि समग्रवाच्यवाचकक्रोडीकारात् परापूर्णा-वैखरीजन्मश्रोत्रग्राह्यवर्णवैलक्षण्यात् सूक्ष्मा विश्ववाच्यवाचकसूति-हेतुत्वादज्ञाता माता मातृका। .....
सा अभेदप्रधानतया परावाग्रूपा सती .....
..... (ने० तं०, खं०2, पृ०,295-296)

"सा योनिः सर्वमन्त्राणां सर्वत्रारणिवत्स्थिता।"

(ने० तं०21,72)

~ प्रतिबिम्बन-व्यवस्थातः — **एतस्यां तत्त्वप्रतिबिम्बन-व्यवस्थैषा संक्षेपतः अकाराद्विसर्गं यावत् षोडश विशेषताः शिवतत्त्वस्यैव प्रकाशन्ते। अग्रे शिवशक्त्यः तस्य प्रकाशे प्रतिबिम्बिताः सत्यस्तत्तद् व्यञ्जनवर्णरूपतया तत्त-त्तत्त्वाविकल्पविमर्शात्मकतया प्रकाशन्ते। तथा हि—कवर्ग वर्णाः भूतपञ्चकस्य, चवर्गस्थाः तन्मात्रपञ्चकस्य, टवर्गस्थाः कर्मेन्द्रियपञ्चकस्य, तवर्गस्थाः ज्ञानेन्द्रियपञ्चकस्य, पफबाः अन्तःकरणत्रयस्य भकारमकारी प्रकृतितुरूषयोः अन्तः स्थाः, रागकलाविद्यामायानामूष्माणश्च शुद्धतत्त्ववर्गस्य विमर्शकाः। नियतिकालौ मायायामेवान्तर्भूतौ । नियतिकालौमायामेव गणितौ। यथा—**

"अकारादिविसर्गान्तं शिवतत्त्वं, कादिङान्तं धरादिनभोऽन्तं भूतपञ्चकम्, चादिञान्तं गन्धादिशब्दान्तं तन्मात्रपञ्चकं, टादिणान्तं पादादिवागन्तं कर्मेक्षपञ्चकं, तादिनान्तं घ्राणादिश्रोत्रान्तं बुद्धिकरणपञ्चकं, पादिमान्तं मनोऽहंकार-बुद्धि-प्रकृति-पुरुषाख्यं पञ्चकं, वाखादिशब्दवाच्या यादयो वकारान्ता रागविद्याकलामायाख्यानि तत्तवानि।"

(प० त्री० वि०, पृ०,113)

"यथा वाइहैव श्रीत्रिकागमेषु नियतिकालौ न पृथग् निरूपितौ।"

(तदेव, पृ०,119)

~ बीजयोन्यात्मभेदा— **बीजयोन्यात्मकस्वरव्यञ्जनसमूह-रूपा आदि क्षान्ता नववर्गमयी वर्णमाला। स्वरास्तत्र शिवात्मकाः बीजरूपाः व्यञ्जनानि च शक्तिमयानि योनिरूपाणि यथा—**

"तत्र तावत्समापन्ना मातृभावं विभिद्यते।।
द्विधा च नवधा चैव पञ्चाशद्धा च मालिनी।
बीजयोन्यात्मकाद्भेदाद् द्विधा बीजस्वरा मताः।।
कादिभिश्च स्मृता योनिर्नवधा वर्गभेदतः।
प्रतिवर्णविभेदेन शतार्धकिरणोज्ज्वला।।
बीजमत्र शिवः शक्तिर्योनिरित्यभिधीयते।"

(मा० वि० तं०3, 9-12)

मातृकाचक्रविवेकः — स्वतन्त्रानन्दनाथेन सिद्धेन विरचितः कोऽप्यत्युत्तमः सैद्ध-दर्शन-ग्रन्थः। तत्रागमिक-पराद्वैतसिद्धान्त स्योत्कृष्टस्यागमिकस्य योगस्य, श्रीचक्रोपासनारहयस्य चापि किञ्चिद्रहस्यात्मिकया शैल्या निरूपणमतिमनोहरैः पद्यैः कृतमस्ति। तत्र प्रतिपादिता दार्शनिकसिद्धान्ताः, योगसाधानाश्च काश्मीरशैवदर्शन-समानतन्त्राः, यद्यपि निरूपणशैली किञ्चिद् भिन्नैव।

मातृकाज्ञानभेदः — किमपि दर्शनशास्त्रपुस्तकं यस्य नामोल्लेखोऽभिनवगुप्तेन विहितः। यथा—

"मातृकाज्ञानभेदे विस्तरतो निरूपितमेतत्"।

(प० त्री० वि०, पृ०,192)

मातृकादेवी— (1) पारमेश्वरी शक्तिः। यथा—

"स आत्मा मातृका देवी।"

(तं० आ० 29,90)

"मातृकादेवी = पारमेश्वरी शक्तिः।

(तं० आ० वि०, खं०11/2, पृ०,61)

(2) असौ हि अकारादिक्षकारान्ता वर्णमालैवोपास्यतया देवीपदेनोक्ता। यथा—

"द्विधेयं मातृकादेवी बीजयोन्यात्मना स्थिता।"

(अ० प्र० पं०,40)

मातृकान्यासः — दृश्यतां विस्तरतः —

(तं० आ० 15, 116-120)

(तं० आ० वि०, खं० 9, पृ०,61)

क्रियात्मिकासु साधनास्वयमुपयोगी।

मातृकामालिन्यौ— एक एवानुत्तरः परमेशः शक्तिशक्ति-मद्रूपत्वावबिभासयिषया मातृकामालिनीरूपतया प्रकाशते। मातृकाया अक्षुब्धत्वात् शक्तिमद्रूपता मालिन्याश्च प्रक्षु-ब्धरूपत्वात् शक्तिरूपता।

यथा—

"तयोरेव विभागे तु शक्तितद्वत्प्रकल्पने।
शब्दराशिर्मालिनी च क्षोभात्मवपुरीदृशम्।।"

(तं० आ०33,21)

शक्तिशक्तिमतोर्वास्तविकेऽभेदे विद्यमाने एव क्वचिच्छक्तिपक्षोद्रेके शिवताया न्यग्भाव इव क्वच्चेतरथा, इत्येवं मातृकायां शक्तिमत्प्रधानता मालिन्याञ्च शक्ति-प्रधानतेति वेद्यं सुधीभिः।

~ संकेतोत्तीर्णे— निर्विकल्पवाग्रूपत्वान् मातृकामालिनी चापि संकेतं विनैव परमार्थविमर्शं सम्पादयतः। यथा—

"अतः सङ्केतरहितं स्वस्वरूपविमर्शनम्।।"

(प० त्री० वि०, पृ०,213)

मातृकावर्णाः — ते तावदकारादिक्षकारान्ताः पञ्चाशत्। ते चातिरहस्यभूतत्वेन शास्त्रेषु नात्यन्तं स्पष्टीकृताः पृथक्- पृथक्। अत्र पुनः कोषे तेषां स्वरूपं पृथक्-पृथक् प्रकाश्यते। यथा—

~ अकारः — मातृकाक्रमेऽसौ वर्णो यदालम्ब्यान्तरवहितः साधकः स्वात्मनोऽनुत्तरपरशिवरूपतां निर्विकल्पेन स्वसंवेदनेन साक्षात्कुरुते, स्वात्मानं च विश्वोत्तीर्णचिन्मात्ररूपतया विमृशञ्जीवन्मुक्ततामापद्यते। ततोऽकारोऽनुत्तरः।

~ अनुत्तरः — अकार एव।

द्र०:— 'अ' इति।

~ अमृतवर्णाः — ऋ, ॠ, ऌ, ॡ, इति वर्णचतुष्टयं मातृकास्वमृतवर्णचतुष्टयमित्युच्यते। तथाभिधानं च तेषां स्वात्मन्येव विश्रान्तिकारणात्। यथा—

"आत्मन्येव च विश्रान्त्या तत्प्रोक्तममृतात्मकम्।"

(तं० आ०3, 92)

व्यञ्जनसृष्टावप्रवृत्तिरत्र स्वात्मनि विश्रान्तिः। नैतेभ्यो वर्णेभ्योः कस्यापि व्यञ्जनवर्गस्य सृष्टिः। रकारलकारयोर्या सृष्टिरसावत्र वर्णचतुष्टयव्यापकादादिवर्णादेव रल्-श्रुतिमात्रसम्भिन्नात्।

द्र०:— 'षण्ठवर्णाः' इति।

~ अवर्गः — अनुत्तरादिविसर्गान्तशक्तिसमाविष्टः शिव एव। यथा—

"अकारादिविसर्गान्तं शिवतत्त्वम्।"

(प० त्री० वि०, पृ०,113)

~ आकारः — मातृकोपासस्तावसौ वर्णो यस्मिन्नन्तर-वधानाभ्यासतः साधकः स्वात्मानं परिपूर्णया शिवोचित-याऽऽनन्दशक्त्याविष्टं शिवमेव शाम्भवोपायसरण्या साक्षान्निर्विकल्पतया संविदन् विशेषतः कृतकृत्यो भवति, आनन्दस्याभीष्टतमत्वात्।

एष एव हि परो विसर्गः। विसिसृक्षां प्रति यतः प्रथमोऽयमुन्मेषः। अस्य वर्णस्याभ्यासेनासौ परा विसर्गमयता स्वस्य साक्षात्कर्तुं शक्यते; सा च विश्वविसर्गोन्मुखतैव।

~ आनन्दः — आकार एव।

द्र०:— 'आ' इति।

~ इकारः — मातृकोपासनाक्रमेऽसौ वर्णो यस्मिन्नन्तर-वधानशक्त्या विमृष्टे सति साधकः स्वात्मानं विश्वसिसृक्षादिरूपया परमेश्वरस्य स्वभावभूतया परयेच्छाशक्त्याऽऽविष्टं शिवमेव साक्षात् संवेत्ति विकल्पराहित्येनैव शाम्भवोपायसरण्या।

द्र०:— 'इ' इति।

~ इच्छा— इकार एव।

~ ईकारः — मातृकोपासनाक्रमेऽसौ वर्णो यस्मिन्नन्तरवहितः शिवयोगी स्वात्मानं विश्वसिसृक्षादिरूपया शिवोचितया स्रष्टव्यजगद्विषयिण्या ईशनाशक्त्याऽऽविष्टं स्वात्मनः शिवरूपत्वं साक्षात्कुरुते शाम्भवोपायसरण्या।

द्र०:— 'ई' इति।

~ ईशना— ईकार एव।

~ उकारः — मातृकाक्रमेऽसौ वर्णो यदालम्ब्य स्वान्तरवहितः शिवयोगी स्वात्मानमुन्मेषशक्त्याविष्टं शिवं निर्विकल्पेन स्वसंवेदनेन साक्षात्कुरुते। उन्मेषश्च शिवस्य जगत्सृष्टिं प्रति तस्येच्छायाः प्रथमो बहिर्मुखः परिस्पन्दः। तत्परिस्पन्दयुक्ताद्दीच्छैवोन्मेष इति।

द्र०:— 'उ' इति।

~ उन्मेषः — उकार एव।

~ ऊकारः — जगतः स्रष्टव्यत्वेन यो विमर्शस्तत्र तत् स्रष्टुः स्वात्मनस्तत्सकाशात् तत्कालं ध्यामलतया कल्पिताया विविक्तताया इव इदं मया स्रष्टव्यमिति योऽन्तर्विमर्शस्तेन विमर्शेन स्वात्मनः स्रष्टुर्या स्रष्टव्यसकाशात् पृथक्तेव मनागाभासते, तया स्रष्टुः स्वरूपे किञ्चिदूनत्वस्यापि मनाग् विमर्शो जायते। असौ तथाविधायाः ऊनताया विमर्श एव ऊकारेणाभिव्यज्यते मातृकोपासनक्रमे। तेन च विमर्शेन सृष्टिक्रियायां क्षणं विलम्ब इव जायते, ऊनताविमर्शपरत्वेन। असावूनतैवाग्रे ऋ ॠ ऌ ॡ इति षण्ठवर्णचतुष्टय-परामर्शरूपतया प्रसरति।

द्र०:— 'ऊ' इति।

~ ऊनता : — ऊकार एव।

~ ऋकारः — मातृकोपासनक्रमेऽसौ षण्ठवर्णो यस्मिन्नवहितः साधकः स्वात्मानं तथाभूतयेच्छाशक्त्याऽऽविष्टं शिवमविकल्पतया साक्षात्कुरुते शाम्भवयोगदृष्ट्या या स्वान्तः स्फुरन्तं चलमेष्टव्यमपि धारयति विमर्शनतः। ऊनताविमर्श प्रसूतोऽयं मनाङ् निरुद्धाया इवेच्छाया विमर्शविशेषः।

द्र०:— 'ऋ' इति।

~ ॠकारः — मातृकोपासनक्रमेऽसौ षष्ठवर्णो यस्मिन्निर्विकल्पेनावधानेनावहितः शिवयोगी शाम्भवोपायोचितया दृष्ट्या स्वात्मानं तथाभूतयेशनाशक्त्या समाविष्टं शिवमेव साक्षात्पश्यति या शक्तिः स्वान्तःस्फुरन्तं चलरूपमेषणीयमपि विमर्शेन धारयति।

द्र०:— 'ॠ' इति।

~ ऌकारः — मातृकोपासनाक्रमेऽसौ षष्ठवर्णो यस्मिन्निर्विकल्पेनावधानेनावहितः शिवयोगी शाम्भवोपायोचितया-ऽविकल्पया दृष्ट्या स्वात्मानं तथाविधयेच्छाशक्त्या समाविष्टं साक्षात्कुरुते या स्थिररूपतया स्वात्ममध्ये सामान्याकार-मेष्टव्यमपि धारयति विमर्शनतः।

द्र०:— 'ऌ' इति।

~ ॡकारः — मातृकोपास्तिक्रमेऽसौ षष्ठवर्णो यस्मिन्नन्तरवधानविषयतामविकल्पतयैव नीते सति शिवयोगी स्वात्मानं तथाभूतयेषणाशक्त्या समाविष्टं निर्विकल्पकेन संवेदनेन शाम्भवोपायोचितया दृशा साक्षात्कुरुते या स्वात्मनोऽन्तःस्थिररूपतया स्थितमेषणीयमपि धारयति विग्रष्टव्यत्वेन।

द्र०:— 'ॡ' इति।

~ एकारः — अनुत्तरः परमशिवः आनन्दरूपश्च शिवः यदेच्छां प्रति वेशनां प्रति वोन्मुखः सन् सृष्ट्यादिक्रियाशक्त्या सम्यगाविष्टो भवति, तदावेशविशिष्टतायाः प्रथमा स्थितिरेकारेणाभिव्यज्यते। ततोऽयं क्रियाशक्तेः स्फुटां बहिरभिव्यक्तिं प्रति परमेश्वरस्य प्रथमः परिस्पन्दः। सन्ध्ययक्षरमेतत् प्रथमम्।

द्र०:— 'ए' इति।

~ ऐकारः — अनुत्तरः परमशिवः आनन्दरूपश्च शिवो यदा एकारेणाभिव्यंग्यां स्थितिं प्रति पुनरुन्मुखतां यातस्तदैकारेणाभिव्यङ्ग्यायाः स्थितेरभिव्यक्तिर्भवति। सा च क्रियाशक्तेः स्फुटां बहिरभिव्यक्तिं प्रति परमेश्वरस्य द्वितीयः परिस्पन्दः, क्रियाशक्तेर्बहिर्मुखस्य विकासस्य च द्वितीयं सोपानम्। सन्ध्यक्षरमेतद् द्वितीयम्।

द्र०:— 'ऐ' इति।

~ ओकारः — अनुत्तरः परमशिवः आनन्दशक्त्याविष्टश्च शिवः यदोन्मेषरूपां स्थितिं प्रत्यूनतां प्रति वोन्मुखीभूतौ सन्तौ सृष्ट्यादि-क्रियाया आवेशस्य तृतीयं सोपानमवतरतः तदावेशस्य तृतीयसोपानकल्पा दशेयमोकारेणाभिव्यज्यते मातृकोपासनाक्रमे।

द्र०:— 'ओ' इति।

~ औकारः — अनुत्तरः परमशिवः आनन्दशक्तिघनः शिवो वा यदा तावदोकाराभिव्यंग्यां स्थितिं प्रति पुनरुन्मुखतां गच्छतस्तदौकारेणाभिव्यंग्यायाः स्थितेरभिव्यक्तिः सञ्जायते। सैव च क्रियाशक्तेः पुष्टतमं स्वरूपमभिव्यनक्ति। बहिर्मुखत्वेन तद्विकासस्य चतुर्थं चरमं च महदिदं स्थानम्।

द्र०:— 'औ' इति।

~ अं (वर्णः) — सर्वमपि स्रष्टव्यं जगत् तथात्वेन रूपेण स्वात्मशिवे तिष्ठत् सद् युगपदेव स्रष्टव्यत्वेन यद् विमृश्यते भगवता, ततस्तद्विमर्शकारिणः शिवस्यान्तरेव तथा विग्रष्टव्यत्वेन स्थितं भवति जगत्। तथाविधायाः जगद्भावस्थितेरभि-व्यञ्जकोऽयमनुस्वाराख्यो वर्णः। स्वान्तः स्थितस्रष्टव्यजातं स्वात्मपरमेश्वरमभिव्यनक्त्यनुस्वारनामाऽयं मातृकावर्णः। शाम्भवोपायमय्या दृष्ट्या।

द्र०:— 'अ' इति।

~ अः(वर्णः) — सृष्ट्यादिकृत्यविशेषविषयत्वेन विमृष्टस्य विश्वस्य या सृष्ट्यादिक्रिया तां प्रत्यौन्मुख्येन पूर्णतया समाविष्टस्य परमशिवस्य तथात्वेनाभिव्यञ्जकोऽयं वर्णो विसर्गाख्यः। अत्रैव परस्य तत्त्वस्य परमेश्वरत्वं पूर्णतया प्रकाशते। अयमेव वर्णो यदा मातृकाक्रमे आलम्बनतां नीयते तदा स्वात्मनः परिपूर्णस्य पारमैश्वर्यस्य चमत्कारः सम्यगनुभूयते निर्विकल्पेन साक्षात्कारेण।

द्र०:— 'अः' इति।

एष तावत् परापरो विसर्गः। परस्तु विसर्गः 'आ' इत्येव।

~ ककारः — मातृकोपासनक्रमेऽसौ वर्णो यदालम्ब्यान्तरवहितः साधकः स्वात्मन एव शक्तिविशेषं स्वस्मिन्नेव चित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं सन्तं ककारात्मवर्णध्वनिरूपतया पृथ्वीतत्त्वाकारतया च सममेवाभासमानं निर्विकल्पेनैव संवेदनेन साक्षात्कुरुते, स्वात्मानं च स्वविलासलीलात एव तदवभासखचितं साक्षात् संवेत्ति शाम्भवोपायाभ्यासनीत्या। तथा च संविदन्नानन्द-चमत्काररसिकतामाप्नोति।

द्र०:— 'क' इति।

~ कवर्गः — पञ्चभूतानां वास्तविकं स्वरूपं साक्षात्कारयन् मातृकावर्णवर्गविशेषः। यथा—

"कादिङान्तं धरादिनभोऽन्तं भूतपञ्चकम्।"

(प० त्री० वि०, पृ०,113)

~ क्रियाशक्तिः — सन्ध्यक्षरचतुष्टयं मातृकाक्रमे।

~ स्फुटा— औकार इति।

~ क्षवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तर-वधानविषयतां नीते सति साधकस्तदभ्यासेन स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं सन्तं तत्र च शक्तितत्त्वतयावभासमानं सत्, स्वात्मानं च स्वकीयया स्वातन्त्र्यविलासमय्या लीलयैव तदवभासखचितसुन्दरं पश्यन् स्वात्मानन्दचमत्काररसे निमग्न इव तिष्ठति।

अयं वर्णो योनिसंयोगज एव, व्यञ्जनद्वयसंयोगजत्वात्। यथा—

"योनिसंयोगजः क्षकारः।"

(तं० सा०, पृ०,16)

"योनिरूपेण तस्यापि योगे क्षोभान्तरं व्रजेत्।।
तन्निदर्शनयोगेन पञ्चाशत्तमवर्णता।"

(तं० आ० 3, 180-181)

क्वचित् शक्तेः पारिपूर्ण्याभिव्यञ्जकोऽयं वर्ण इति वेद्यम्।

~ खकारः — मातृकोपासनक्रमेऽसौ वर्णो यदा दायाऽन्तरवहितः साधकः स्वात्मन एव शक्तिविशेषं स्वस्मिन्नेव चित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं सन्तं खवर्णध्वनिरूपतया जलतत्त्वाकारतया च निर्विकल्पेनैव संवेदनेन साक्षात्कुरुते; स्वात्मानं च सममेव स्वविलासत एव तत् प्रतिबिम्बखचितं साक्षात् सानन्दं संवेत्ति शाम्भवोपायनीत्या।

द्र०:— 'ख' इति।

~ गकारः — मातृकोपासनक्रमेऽसौ वर्णो यदालम्ब्याऽन्तरवहितः साधकः स्वात्मन एव शक्तिविशेषं स्वस्मिन्नेव चित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं सन्तं गवर्णध्वनिरूपतया तेजस्तत्त्वाकारतया च निर्विकल्पेनैव संवेदनेन साक्षात् संवेत्ति, स्वात्मानं च स्वविलासत एव तत्प्रतिबिम्बखचितं साक्षात् सानन्दचमत्कारं संवेत्ति शाम्भवोपायनीत्या।

द्र०:— 'ग' इति।

~ घकारः — मातृकोपासनक्रमेऽसौ वर्णो यदालम्ब्याऽन्तरवहितः साधकः स्वात्मन एव शक्तिविशेषं स्वस्मिन्नेव चित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं सन्तं घवर्णध्वनिरूपतया वायुतत्त्वाकारतया च सममेव साक्षात्कुरुते; स्वात्मानं च स्वविलासत एव तत्प्रतिबिम्बखचितं साक्षात् सानन्दचमत्कारं संवेत्ति शाम्भवोपायनीत्या।

द्र०:— 'घ' इति।

~ ङ वर्णः — मातृकोपासनक्रमेऽसौ वर्णो यदालम्ब्यावहितः साधकः स्वात्मन एव शक्तिविशेषं स्वस्मिन्नेव चित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं सन्तं ङवर्णध्वनिरूपतया वायुतत्त्वाकारतया च सममेव साक्षात्कुरुते, स्वात्मानं च स्वविलासत एव प्रतिबिम्बखचितं साक्षात् सानन्दचमत्कारसं संवेत्ति शाम्भवोपायनीत्या।

द्र०:— 'ङ' इति।

~ च वर्गः — पञ्चगन्धादीनि तन्मात्रतत्त्वानि मातृकाक्रमे। यथा—

"चादिञान्तं गन्धादिशब्दान्तं तन्मात्रपञ्चकम्।"

(प० त्री० वि०, पृ०,113)

~ च वर्णः — मातृकोपासनक्रमेऽसौ वर्णो यदालम्ब्यान्तरवहितः साधकः स्वात्मन एव शक्तिविशेषं स्वस्मिन्नेव चित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं सन्तं चकारात्मकवर्णध्वनिरूपतया गन्धतन्मात्रतत्त्वाकारतया च सममेव प्रकाशमानं निर्विकल्पेनैव संवेदनेन साक्षात्कुरुते, स्वात्मानं च स्वविलासलीलयैव तदवभासखचितं साक्षात् संवेत्ति शाम्भवोपायाभ्यासनीत्या।

द्र०:— 'च' इति।

~ छवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यदालम्ब्या-ऽन्तरवहितः साधकः स्वात्मन एव शक्तिविशेषं स्वस्मिन्नेव चित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं सन्तं छकारात्मकवर्ण-ध्वनिरूपतया रसतन्मात्रतत्त्वरूपतया च सममेवाभासमानं निर्विकल्पेनैव संवेदनेन साक्षात्कुरुते; स्वात्मानं च

स्वविलासलीलयैव तदवभासखचितं साक्षात् संवेत्ति शाम्भवोपायाभ्यासनीत्या।

द्र०:- 'छ' इति।

~ ज वर्णः — मातृकोपासनक्रमेऽसौ वर्णो यदालम्ब्यान्तरवहितः साधकः स्वात्मन एव शक्तिविशेषं स्वस्मिन्ने वचित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं जकारवर्ण-ध्वनिरूपतया रूपतन्मात्रतत्त्वाकारतया च सममेवाभासमानं निर्विकल्पेनैव संवेदनेन साक्षात्कुरुते; स्वात्मानं च स्वविलासलीलयैव तदवभासखचितं साक्षात् संवेत्ति शाम्भवोपायाभ्यासनीत्या।

द्र०:- 'ज' इति।

~ ज्ञानशक्ति— उकार ऊकारश्चेति मातृकाक्रमे।

~ झवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यदालम्ब्याऽनतरवहितः साधकः स्वात्मन एव शक्तिविशेषं स्वस्मिन्नेव चित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं झकारवर्ण-ध्वनिरूपतया स्पर्शतन्मात्रतत्त्वाकारतया च सममेवाभासमानं निर्विकल्पेनैव संवेदनेन साक्षात्कुरुते; स्वात्मानं च स्वविलासलीलयैव तदवभासखचितं साक्षात् संवेत्ति शाम्भवोपायाभ्यासनीत्या।

द्र०:- 'झ' इति।

~ ञ वर्णः — मातृकाक्रमोपासनायामसौ वर्णो यदालम्ब्याऽन्तरवहितः साधकः स्वात्मन एव शक्तिविशेषं स्वस्मिन्नेव चित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितत्वेन ञकार-ध्वनिरूपतया शब्दतन्मात्रतत्त्वाकारतया च सममेवाभासमानं सन्तं निर्विकल्पेनैव संवेदनेन साक्षात्कुरुते; स्वात्मानं च स्वविलासलीलयैव तथाविधाभासखचितं साक्षात् संवेत्ति शाम्भवोपायाभ्यासनीत्या।

द्र०:- 'ञ' इति।

~ ट वर्गः — कर्मेन्द्रियपञ्चकं मातृकाक्रमे। यथा—

"टादिनान्तं पादादि वागन्तं कर्माक्षपञ्चकम्।"

(पं० त्री० वि०, पृ०,113)

~ ट वर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्त-रवधानविषयतां नीते सति तदवधानाभ्यासतः साधकः स्वात्मन एव कमपि शक्तिविशेषं स्वात्मसंवित्प्रकाशे बहिर्मुखप्रतिबिम्बन्यायेन प्रकाशमानं तत्र चोपस्थतत्त्वरूपतया-वभासमानं; स्वात्मानं, च स्वलीलयैव तदवभासखचितं निर्विकल्पतयैव सचमत्काररसं साक्षात्कुरुते शाम्भवोपायनीत्या।

द्र०:- 'ट' इति।

~ ठ वर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरव-धानविषयतां नीते सति तदवधानाभ्यासतः साधकः स्वात्मन एव कमपि शक्तिविशेषं स्वात्मसंवित्प्रकाशमध्ये बहिर्मुखतया प्रतिबिम्बितं, तत्र च तथा प्रकाशमानं पायुतत्त्वरूपत-याऽवभासमानं, स्वात्मानं च स्वलीलयैव तदवभासखचितं निर्विकल्पतयैव सानन्दचमत्कारं साक्षात्कुरुते शाम्भवोपायनीत्या।

द्र०:- 'ठ' इति।

~ डवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तर-वधानविषयतां नीते सति तदवधानाभ्यासतः साधकः स्वात्मन एव कमपि शक्तिविशेषं स्वात्मसंवित्प्रकाशे बहिर्मुख-प्रतिबिम्बन्यायेन प्रकाशमानं, तत्र च पादतत्त्वरूपतयावभासमानं, स्वात्मानं च स्वलीलाविलासत एव तदवभासखचितं निर्विकल्पतयैव सचमत्काररसं साक्षात्कुरुते शाम्भवोपायनीत्या।

द्र०:- 'ड' इति।

~ ढवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरव-धानविषयतां नीते सति तदवधानाभ्यासतः साधकः स्वात्मन एव कमपि शक्तिविशेषं स्वात्मसंवित्प्रकाशे बहिर्मुख-प्रतिबिम्बन्यायेन प्रकाशमानं, सन्तं तत्र च पाणितत्वरूप-तयावभासमानं, स्वमात्मानं च स्वलीलयैव तदवभासखचितं निर्विकल्पतयैव सचमत्काररसं साक्षात्कुरुते शाम्भवोपायनीत्या।

द्र०:- 'ढ' इति।

~ णवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तर-वधानविषयतां नीते सति तदवधानाभ्यासेन साधकः स्वात्मन एव शक्ते कमपि विशेषं स्वात्मसंवित्-प्रकाशे बहिर्मुखप्रतिबिम्बन्यायेन प्रकाशमानं सन्तं तत्र च वाक्तत्त्वरूप-तयाऽवभासमानं, स्वात्मानं च स्वलीलयैव तदवभासखचितं निर्विकल्पतयैव सचमत्काररसं साक्षात्कुरुते शाम्भवोपायनीत्या।

द्र०:- 'ण' इति।

~ तवर्गः — ज्ञानेन्द्रियपञ्चकं घ्राणादिरूपं मातृकासु। यथा—

"तादिनान्तं घ्राणादिश्रोत्रान्तं बुद्धिकरणपञ्चकम्।"

(प० त्री० वि०, पृ०,113)

~ तवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तर-वधानविषयतां नीते सति तदवधानाभ्यासेन साधकः स्वात्मन एव शक्तेः कमपि विशेषं स्वात्मसंवित्प्रकाशे बहिर्मुख-प्रतिबिम्बन्यायेन प्रकाशमानं सन्तं तत्र च घ्राणतत्त्व-रूपतयाऽवभासमानं, स्वात्मानं च स्वलीलयैव तदवभासखचितं निर्विकल्पतयैव सचमत्काररसं साक्षात्कुरुते शाम्भवोपायनीत्या।

द्र०:- 'त' इति।

~ त्रिकोणम्— एकारस्य 'त्रिकोणम्' इत्यपि रहस्यात्मकमभिधानं मातृकासु। यथा—

"अनुत्तरानन्दचिती इच्छाशक्तौ नियोजिते।।
त्रिकोणमेति तत्राहुर्विसर्गामोदसुन्दरम्।।"

(तं० आ०3, 94-95)

"त्रिकोणमेकादशमं वह्निगेहं च योनिकम्।
शृङ्गारं चैव एकारं नामभिः परिकीर्त्तितम्।।"

उद्ध० (तं० आ० वि० खं०2, पृ०,103)

~ थ वर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानविषयतां नीते सति तदवधानाभ्यासेन साधकः स्वात्मन एव शक्तेः कमपि विशेषं स्वात्मसंवित्प्रकाशे बहिर्मुखप्रतिबिम्बन्यायेन प्रकाशमानं, तत्र च रसनातत्त्वरूपतयाऽवभासमानं स्वात्मानं च स्वलीलयैव तदवभासखचितं निर्विकल्पतयैव सचमत्कारं साक्षात्कुरुते शाम्भवोपायनीत्या।

द्र०:- 'थ' इति।

~ दकारः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानविषयतां नीते सति तदवधानाभ्यासेन साधकः स्वात्मन एव शक्तेः कमपि विशेषं स्वात्मसंवित्प्रकाशे बहिर्मुखप्रतिबिम्बनीत्या प्रतिबिम्बनीत्या प्रकाशमानं, तत्र चाक्षितत्त्वरूपतयाऽवभासमानं, स्वात्मानं च तदवभासखचितं निर्विकल्पतयैव सचमत्काररसं साक्षात्कुरुते शाम्भवोपायनीत्या।

द्र०:- 'द' इति।

~ धवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानाभ्यासेन साधकः स्वात्मन एव शक्तिविशेषं स्वात्मसंवित्प्रकाशे बहिर्मुखतया प्रतिबिम्बनीत्याऽऽभासमानं, तत्र च त्वक् तत्त्वरूपतयावभासमानं, सन्तं स्वात्मानं च तदवभासखचितं निर्विकल्पतयैव सानन्दं साक्षात्कुरुते शाम्भवोपायनीत्या।

द्र०:- 'ध' इति।

~ न वर्णः — मातृकोपासनक्रमेणऽसौ वर्णो यस्मिन्नन्तरवधानस्याभ्यासेन साधकः स्वात्मन एव शक्तिविशेषं स्वात्मसंवित्प्रकाशे प्रतिबिम्बनीत्या प्रकाशमानं, तत्र च श्रोत्रतत्त्वरूपतयावभासमानं, स्वात्मानं च तदवभासखचितं निर्विकल्पतयैव साक्षात्कारोति शाम्भवोपायनीत्या।

द्र०:- 'न' इति।

~ नियतिकालौ - (मातृकासु)— मातृकाक्रमे नियतिः कालश्च मायायामेवान्तर्भूततया कल्पितौ न पृथक् तत्त्वतया। अत एव न कावपि पृथङ्मातृकावर्णौ तयोर्विमर्शकौ। यथा—

"इहैव श्रीत्रिकागमेषु नियतिकालौ न पृथङ्निरूपितौ।"
(प० त्री० वि०, पृ०,119)

~ पवर्गः — अन्तःकरणत्रयं प्रकृतिपुरुषौ चेति मालिनीक्रमे। यथा—

"पादि-मान्तं मनोऽहङ्कार-बुद्धि-प्रकृति-पुरुषाख्यं पञ्चकम्।"
(प० त्री० वि०, पृ०,113)

~ पवर्णः — मातृकाक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानविषयतां नीते सति तदवधानाभ्यासेन साधकः स्वात्मन एव शक्तिविशेषं स्वात्मसंवित्प्रकाश एव प्रतिबिम्बात्मकतया प्रकाशमानं, तत्र च मनस्तत्त्वरूपतयाऽवभासमानं साक्षात्कुर्वन् स्वात्मानं च स्वविलासतो निर्विकल्पतयैव तत्प्रतिबिम्बखचितं साक्षात्कुर्वन् स्वानन्दचमत्काररसं रसयति शाम्भवोपायनीत्या।

द्र०:- 'प' इति।

~ फवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानाभ्यासेन साधकः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाशे प्रतिबिम्बात्मकतया प्रकाशमानं तत्र चाहङ्कारतत्त्वतयावभासमानं साक्षात्कुर्वन् स्वात्मानं च तत्प्रतिबिम्बखचितं सन्निर्विकल्पेन साक्षात्कारेण साक्षात्करोति शाम्भवोपायनीत्या।

द्र०:- 'फ' इति।

~ बवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानाभ्यासेन साधकः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाश एव प्रतिबिम्बितं, सन्तं तत्र महत्तत्त्वरूपतयाऽऽभासमानं च सत् स्वात्माभेदेनैवानुभवँस्ततखचितमात्मानं साक्षादनुभवति शाम्भव्या योगप्रक्रियया सर्वथा विकल्पशून्यया।

द्र०:- 'ब' इति।

~ भवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नरवधानाभ्यासेन साधकः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाशे एव प्रतिबिम्बितं सन्तं तत्र मूलप्रकृतितत्त्वरूपतयाऽऽभासमानं च सत् स्वात्माभेदेनैव साक्षादनुभवति स्वानन्दचमत्काररस चर्वणासहितं शाम्भवोपायसरण्या।

द्र०:- 'भ' इति।

~ मवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानाभ्यासेन साधकः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाश एव प्रतिबिम्बितं सन्तं तत्र पुंस्तत्त्वरूपतयाऽऽभासमानं च सत् स्वात्माभेदेनैव साक्षादनुभवति शाम्भवोपायतः।

द्र०:- 'म' इति।

"आत्मना पुरुषवाचिना मकारेण।"
(ने० तं० उ० खं०2, पृ०,67)

~ अनुस्वारादन्यः — मकारस्तु स्फुटो व्यञ्जनवर्णः पुरुषतत्त्वाभिव्यञ्जकः। अनुस्वारे तु मकारश्रुतिमात्रं, यथा षण्ठवर्णेषु र-ल-श्रुतिः हकारे च विसर्गश्रुतिः। ततो भिन्न एव वर्णोऽनुस्वारः। यथा—

"मकारादन्य एवायं तच्छायामात्रधृद्यथा।
रलहाः षण्ठवैसर्ग-वर्णरूपत्वसंस्थिताः।"
(तं० आ०3, 134-135)

~ यवर्गः — राग-विद्या-कला-मायाख्यं तत्त्वचतुष्टयम्। नियतिकालावत्र मायायामन्तर्भूतौ मन्तव्यौ। इति न तयोः पृथग् व्यञ्जको मातृकावर्णः। यथा—

"वाग्वादिशब्दवाच्या यादयो वकारान्ता राग-विद्या-कला-मायाख्यानि तत्त्वानि।"
(प० त्री० वि०, पृ०113)

द्र०:- 'य' इति।

~ यवर्णः — (1) राग तत्त्वस्य वास्तविकायाः

स्थितेरभिव्यञ्जको मातृकावर्णः। यथा—

"यादयो वकारान्ता राग-विद्या-कला- मायाख्यानि तत्त्वानि।"

(प० त्री० वि०, पृ०,113)

(2) मातृकोपासनाक्रमेऽसौ वर्णो यस्मिन्नन्तरवाधनाभ्यासेन साधकः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाश एव प्रतिबिम्बितं सन्तं तत्र रागतत्त्वरूपतयावभासमानं च सन्तं स्वात्माभेदेनैव साक्षादनुभवति, स्वात्मानं च स्वलीलयैव तदवभासखचितं निर्विकल्पतया संविदन् स्वात्मानन्दचमत्काररसे निमज्जति शाम्भवोपायसरण्या।

द्र०:- 'य' इति।

~ योनिः — एकारो मातृकासु।

द्र०:- 'त्रिकोणम्' इति।

~ रवर्णः — (1) अशुद्धविद्यातत्त्वस्य वास्तविकायाः स्थितेरभिव्यञ्जको मातृकावर्णः। यथा—

"यादयो वकारान्ता राग-विद्या-कला-मायाख्यानितत्त्वानि।"

(प० त्री० वि०, पृ०,113)

द्र०:- 'र' इति।

(2) मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानविषयतां नीते सति यदभ्यासेन साधकः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाश एव बहिर्मुखतया प्रतिबिम्बितं सन्तं तत्राशुद्धविद्यातत्त्वरूपतयावभासमानं च स्वात्माभेदेनैव साक्षादनुभवति, स्वात्मानं च स्वलीलयैव तदवभासखचितं निर्विकल्पतया पश्यन् स्वानन्दचमत्काररसचर्वणानिमग्नो भवति शाम्भवोपायसरण्या।

~ लवर्णः — (1) कलातत्त्वस्यावभासस्य या वास्तविकी स्थितिस्तस्या अभिव्यञ्जकोऽयं मातृकावर्णः। यथा—

"यादयोवकारान्ता राग-विद्या-कला-मायाख्यानि तत्त्वानि।"

(प० त्री० वि०, पृ०,113)

द्र०:- 'ल' इति।

(2) मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानविषयतां नीते सति साधकस्तदभ्यासेन स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाश एव बहिर्मुखतया प्रतिबिम्बितं सन्तं तत्र कलातत्त्वात्मकतयावभासमानं च सन्तं स्वात्माभेदेनैव साक्षादनुभवति, स्वात्मानं च स्वलीलयैव तदवभासखचितं निर्विकल्पतयैव संविदन् स्वानन्दचमत्काररसचर्वणापरो भवति शाम्भवोपायसरण्या।

~ ववर्णः — (1) मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानविषयतां नीते सति तदभ्यासेन साधकः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाश एव बहिर्मुखतया प्रतिबिम्बितं सन्तं तत्र मायातत्त्वरूपतयाऽवभासमानं च स्वात्माभेदेनैव साक्षादनुभवति, स्वात्मानं च स्वलीलयैव तदवभासखचितं निर्विकल्पतयैव पश्यन् स्वानन्दरसचमत्कारचर्वणापरो भवति शाम्भवोपायसरण्या। नियतिकालावत्र मायान्तर्गतावेवावभासन्ते न पृथक्।

~ वह्निगेहम्— एकारो मातृकासु।

द्र०:- 'त्रिकोणम्' इति।

~ शवर्गः — शुद्धविद्येश्वरसदाशिवशक्तिसमाख्यस्य तत्त्वचतुष्टस्य स्थितेरभिव्यञ्जकानां मातृकावर्णानां वर्गः। केषुचित् साधनाक्रमेषु क्षवर्ण एव शक्तितत्त्वेन समन्वितो मन्यते। तदनुसारं शादिपञ्चकं महामायाशुद्धविद्येश्वरसदाशिवशक्तितत्त्वानां स्थितेरभिव्यञ्जकम्। यथा—

"शादिक्षान्तं महामायाविद्येश्वरसदाशिवशक्त्याख्यं तत्त्वपञ्चकम्।

(प० त्री० वि०, पृ०,117)

~ शवर्णः — मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानविषयतां नीते सति यदभ्यासेन साधकः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाश एव बहिर्मुखतया प्रतिबिम्बितं सन्तं तत्र महामायातत्त्वात्मकतयाऽवभासमानं च स्वात्माभेदेनैव साक्षात्कुरुते स्वात्मानं च स्वेच्छाविलासत एव तत्प्रतिबिम्बखचितं साक्षात्संविदंश्चिदानन्दचमत्कारनिर्भरो भवति।

द्र०:- 'श' इति।

कासुचित् परम्परासु शकारो शुद्धविद्यातत्त्वस्थानीयः।

~ शादयः — मातृकायामूष्माणः क्षकारयुक्ताः पञ्च महामाय शुद्धविद्या, ईश्वरः, सदाशिवः, शक्तिश्चेति पञ्चानां तत्त्वानां विमर्शकारिणः। यथा—

"शादि-क्षान्तं महामायाविद्येश्वरसदाशिवशक्त्याख्यं तत्त्वपञ्चकम्।"

(प० त्री० वि०, पृ०,117)

~ शृङ्गारम् — एकारो मातृकासु।

द्र०:- ~ 'त्रिकोणम्' इति।

~ षवर्णः — मातृकोपासनाक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानविषयतां नीते सति यदभ्यासेन साधकः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाश एव बहिर्मुखतया प्रतिबिम्बितं सन्तं तत्र च शुद्धविद्यातत्त्वरूपतयाऽवभासमानं स्वात्माभेदेनैव साक्षादनुभवति शाम्भवोपायतः, स्वात्मानं च स्वेच्छाविलासमात्रत एव तत्प्रतिबिम्बखचितं साक्षात्कुर्वन् स्वं चिदानन्दरसचमत्कारमनुभवति।

द्र०:- 'ष' इति।

कासुचित् परम्परासु षकार ईश्वरतत्त्वस्वरूपाभिव्यञ्जकः।

~ षष्ठवर्णः — मातृकोपासनक्रमेऽसौ ऋ, ॠ, ऌ, ॡ इति वर्णचतुष्टयम्। षष्ठाख्यम्। सृष्ट्याद्यैश्वर्यस्य बहिर्भावेन प्रकटने कश्चनविलम्ब इव कतिपयक्षणस्थायी प्रवृत्त्यभाव इव च द्योत्यते षष्ठवर्णचतुष्टयेन। न चैतेभ्यो वर्णेभ्यः कस्य च नापि व्यञ्जनवर्गस्य सृष्टिः। ततोऽपि षष्ठा इमे वर्णाः।

एतद्वर्णचतुष्टये इकारस्य ईकारस्य च मध्ये रकारलकारयोः प्रवेशः। तत्र इकार ईकारश्च स्वरत्वेन बीजात्मकत्वेन च पुंरूपौ। रकारस्य लकारस्य चांशौ व्यञ्जनत्वेन योनिरूपत्वेन च स्त्रीरूपौ। ततः पुरुषतायाः स्त्रीरूपतायाश्च परस्परं मेलनेन षष्ठवर्णा एते :—अंशतयैव पुंरूपा अंशतयैव च स्त्रीरूपा इति षष्ठत्वमेषाम्। रकारलकारयोः सृष्टिः पुंभागत एव इकाररूपाद् ईकाररूपाच्येति। यथा—

"इच्छाशक्तिश्च या द्वेधा क्षुभिताऽक्षुभितत्त्वतः।
सा विजातीयशक्त्यंशप्रोन्मुखी याति यात्मताम्।।
सैव शीघ्रेतरोपात्त-ज्ञेय कालुष्यरूषिता।
विजातीयोन्मुखत्वेन रत्वं लत्वं च गच्छति।।"

(तं० आ०3, 154-155)

~ सवर्णः — **मातृकोपासनक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानविषयतां नीते सति यदभ्यासेन साधकः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाश एव बहिर्मुखतया प्रतिबिम्बितं सन्तं तत्रेश्वरतत्त्वरूपतयावभासमानं, स्वात्मानं च स्वेच्छास्वातन्त्र्येणैव तदवभासखचितं साक्षात् कुर्वन्नात्मनश्चिदानन्दरसे निमज्जमानस्तिष्ठति शाम्भवोपायतः।**

द्र०:- 'स' इति।

कासुचित् परम्परासु सकारः सदाशिवस्वरूपाभिव्यञ्जकः।

~ स्वरवर्णषट्कम्— **तत्र अकारो = अनुत्तरः, इकारः = इच्छा, उकारः = उन्मेषः। आकारः = आनन्दः, ईकारः = ईशना, ऊकारः = ऊर्मिः, अ आ अचिदानन्दशक्ती, इ-ई = इच्छाशक्तिः। उ-ऊ = ज्ञानशक्तिः। यथा—**

"तत्र मुख्यास्तिस्र एव परमेश्वरस्य शक्तयः। अनुत्तरः, इच्छा, उन्मेष इति। तदेव परामर्शत्रयम् अ, इ, उ, इति। एतस्मादेव त्रितयात् सर्वः शक्तिप्रपञ्चः चर्च्यते। अनुत्तर एव विश्रान्तिरानन्दः, इच्छायामेव विश्रान्तिरीशनम्,:— उन्मेष एव हि विश्रान्तिरूर्मिः, यः क्रियाशक्तेः प्रारम्भः। तदेव परामर्शत्रयम् "आ, ई, ऊ, इति।"

(तं० सा०, पृ०, 12-13)

~ स्वरूपतः — **असंकेतितं प्रकाशविमर्शोभयसामरस्यात्मकं परिपूर्णम् अहमिति मातृकायाः स्वरूपं परविमर्शात्मकवाङ्मयम्। यथा—**

"परिपूर्णं स्वतः सर्वं सर्वाकारविलक्षणम्।।
स्वाभाविकमहासंवित्सत्संस्कारैकलक्षणम्।
शुद्धविद्यात्मकं रूपमहमित्युभयात्मकम्।।
तदेव मातृकारूपं धरादीनां निजं वपुः।"

(प० त्री० वि०, पृ०,213)

~ हवर्णः — **मातृकोपासनाक्रमेऽसौ वर्णो यस्मिन्नन्तरवधानविषयतां नीते सति यदभ्यासेन साधकः स्वात्मनः शक्तिविशेषं स्वात्मसंवित्प्रकाशे बहिर्मुखतया प्रतिबिम्बितं सन्तं तत्र सदाशिवतत्त्वरूपतयाऽवभासमानं, स्वात्मानं च स्वेच्छाविलासत एव तदवभासखचितं साक्षात्कुर्वन्नात्मानन्दरसचमत्कारमध्ये निमज्जमान आस्ते शाम्भवोपायतः।**

अपरोऽयं विसर्ग इत्युच्यते।

कासुचित् परम्परासु हवर्णः शक्तितत्त्वस्थानीयः।

मातृतारः — "फ्रें" इति बीजपिण्डात्मको मन्त्रः। यथा—

"मातृतारः फ्रेंकारः।"

(तं० आ० वि०, खं०12, पृ०,212)

मातृमानादिमूलम् — संविदेव हि स्वयं स्वेच्छया प्रमातृप्रमाणप्रमेयाकार तयाऽऽत्मानं प्रकटयन्ती स्वस्वातन्त्र्येण तथा भाति। ततः न प्रमाणादिकं बाह्यात् कारणात्, अपितु संविदः एव तद्रूपता। यथा—

"तस्मात्स्वसंविदेवैषा स्वप्रकाशतया स्थिता।।
मातृमानप्रमेयादिप्रपञ्चैः सावभासते।"

(मा० वि० वा०1, 605)

मातृसद्भावः — (1) यतः सकलादिसदाशिवान्तानां प्रमातृणां क्रियाज्ञानेच्छास्वेव शक्तिषु सद्भावस्ततस्तासां शक्तीनां समष्टिस्वरूपा पराशक्तिः प्रमातृसद्भावस्य कलनकर्त्री सती देवी महाकाली मातृसद्भाव इत्युच्यते।

द्र०:- 'अग्रे' (3) **इति।**

(2) भगवती काली एव मातृसद्भावनाम्नाप्युच्यते यतस्तस्याः एव इच्छाज्ञानक्रियात्मकेषु स्वरूपेषु प्रमातृप्रमेयप्रमाणरूपस्य मातृत्वसम्बन्धिनस्त्रिकस्य सद्भावः। यथा—

"..... मातृष्वेतेषु सद्भावः।।
तत्त्वं सत्ता प्राप्तिर्मातृषु मेयोऽनया संश्च।
विश्वजननीषु शक्तिषु परमार्थो हि स्वतन्त्रतामात्रम्।।"

(तं० आ०15, 348)

एतेषु सकलादिप्रमातृषु यः सद्भावोऽसौ पराशक्तिरेव वस्तुतः। प्रमेयजातमप्येतासु क्रियाज्ञानेच्छास्वेवेति।

(3) प्रमाणप्रमेयादिव्यापारकलनसामर्थ्यरूपायाः काल्या आगमिकं नामान्तरं मातृसद्भाव इति, द्वादशावस्थासु पूर्णतामुपगच्छन् प्रमातृव्यापार एतास्वेव यत् स्थितः। यथा—

"मातृसद्भावसंज्ञास्यास्तेनोक्ता यत्प्रमातृषु।
एतावदन्तसंवित्तौ प्रमातृत्वं स्फुटीभवेत्।।"

(तं० आ०4, 177)

"सद्भावः परमो ह्येष मातृणां परिपठ्यते।"

उद्ध०:- (तं० आ० वि०, खं०3, पृ०,206)

(4) प्रमातृप्रमाणप्रमेयोल्लासं सर्वमपि धारणविमर्शनप्रकाशनात्मकं, अहमिति क्रोडीकारेण स्वात्मसात्कुर्वती भगवती कालकर्षिण्याख्या पारमेश्वरी पराशक्तिर्मातृसद्भाव इत्युच्यते। यथा—

"ययेदं शिवादिधरण्यन्तम् अविकल्प्यसंविन्मात्ररूपतया

बिभर्ति च पश्यति च भासयति च परमेश्वरः साऽस्य श्री पराशक्तिः .....
.....
.....
.....

एतत् त्रिविधं यया धारणमात्मन्येव क्रोडीकारेणानुसन्धानात्मना ग्रसते साऽस्य भगवती श्रीपरैव श्रीमन्मातृसद्भावकालकर्षिण्यादिशब्दान्तरनिरुक्ता।।"

(तं० सा०, पृ०,28)

द्र०:- **'कालकर्षिणी'** इति।

(5) कालीति समाख्या पारमेश्वरी पराशक्तिस्तुटिपाते साक्षात्करणीया। यथा—

"सैव भगवती श्रीमत्काली मातृसद्भावो, भैरवः, प्रतिभा, इत्यलं रहस्यारहस्यनेन।

(तं० सा०, पृ०,104)

द्र०:- **'काली'** इति।

(6) आकारात्मकः परो विसर्गोऽपि शिवशक्तिसंघट्टरूपः मातृसद्भाव इति परिभाषितो मालिनीविजयोत्तरे। यथा—

"श्रीपूर्वशास्त्रे सा मातृसद्भावत्वेन वर्णिता।"

(तं० आ०3, 71)

(7) परतमोऽनाहतोयत्नजो ध्वनिरपि मातृसद्भावसंज्ञः।

द्र०:- **'वर्णोदयः'** ~ 'परतमः' इति।

(8) अनाहतो नादः। यथा—

"एको नादात्मको वर्णः सर्ववर्णाविभागवान्।
सोऽनस्तमितरूपत्वादनाहत इहोदितः।।
स तु भैरवसद्भावो मातृसद्भाव एष सः।
परा सैकाक्षरा देवी यत्र लीनं चराचरम्।।"

(तं० आ०6, 217-218)

"अनेन प्राणिताः सर्वे ददते वाञ्छितं फलम्।।
सद्भावः परमो ह्येष मातृणां भैरवस्य च।
तस्मादेनं जपेन्मन्त्री य इच्छेत्सिद्धिमुत्तमाम्।।"

(तं० आ०30, 47-49)

"जीवः स प्राणयोर्हकारयोः पुटम्। कालानलो र। वामाङ्घ्रिः फ। अतिदीप्तोऽधोवर्तिना रेफेण। दक्षजानुरे। स्वरेति ह्रस्वदीर्घभेदेन।"

(तं० आ० वि०, खं०12, पृ०,203)

मातृसद्भावमन्त्रः — "ख् फ्रें" इति बीजपिण्डः।

द्र०:- **'पञ्च-पिण्डनाथः'** इति।

~ गुप्ततरः — **नासौ सुस्पष्टतां नीतो ग्रन्थे वा टीकायां वा।**

~ सिद्धिविशेषदः — **असावपरप्रकारको यथा—**

ह् स् ह् फ्रें इति। यथा—

"जीवः प्राणपुटान्तस्थः कालानलसमद्युतिः।
अतिदीप्तस्तु वामांघ्रिर्भूषितो मूर्ध्नि बिन्दुना।।
दक्षजानु गतश्चायं सर्वमातृगणार्चितः।

मातृसद्भावविद्या — मातृसद्भावमन्त्रः एव।

मात्रापरिच्छद — व्रतसाधनानि शिवयोगिनः। यथा—

"मात्रापरिच्छद इति व्रतोचिताक्षसूत्रयोगदण्डादिपरिकरः इति यावत्।"

(तं० आ० वि०, खं०11, पृ०,180)

मात्राविहीनत्वम्ः — मन्त्रदोषेषु परिगणितो दोषविशेषः। यथा—

"भावहीनास्तु ये मन्त्राः
शक्तिहीनास्तु कीलिताः।
वर्णमात्राविहीनास्तु
गुर्वागमविवर्जिताः।।"

(ने० तं०8, 59-60)

माधवकुलम् — कौलागमविशेषः। यथा—

"यथा श्रीमाधवकुले परमेशेन भाषितम्।।"

(तं० आ०29, 56)

स च तन्त्रराजतन्त्रस्यैको भागः। यथा—

"श्री माधवकुले इति श्रीतन्त्रराजभट्टारकग्रन्थैकदेशभूते इत्यर्थः"

(तं० आ० वि०, खं०11/2, पृ०,40)

द्र०:- (तं० आ०15-533, 571, 24-22,)

(तं० आ० वि०, खं०11/2, पृ०, 49)

माधुरः — मधुराजो यो दक्षिणे देशे मधुरायीपुरे पुराऽवसत्। पश्चाद्यतिर्भूत्वा बभ्राम। कश्मीरेषु कतिपयवर्षाण्यभिनवगुप्ताचार्याणामाश्रमेऽप्यवसत्, निर्मितश्च तेन गुरुनाथपरामर्शो यत्राश्रमस्य तस्य गुरोश्च वर्णनं चित्रितं वर्तते। यथा—

"वाचा सुधारसमुचा सह माधुरोऽहम्।"

(गु० ना० प०,39)

मधुराजवरदराजयोस्तन्त्रशास्त्रोपासकत्वं सुस्पष्टमेव। दक्षिणदेशे तन्त्रशास्त्रप्रचारः केरलदेशेऽभवत्। अस्ति हि केरलीया विशेषा तान्त्रिकी पद्धतिः सुप्रसिद्धा। ततो मधुराजं वरदराजं च तन्त्रशास्त्ररसिका विद्वांसः केरलदेशीयत्वेनैव स्वीकुर्वन्ति। नास्ति दृढतरं किमपि प्रमाणं येन तयोस्तमिलदेशीयत्वं वा केरलदेशीयत्वं वा निःसंशयं प्रतिपाद्यते। ततोऽत्र विषये सुधीभिर्विचारणीयम्। यतोऽभूवन्नग्रे तमिल देशेऽपि भासुरानन्दनाथसदृशास्तन्त्रशास्त्रोपासकाः।

द्र०:- **'मधुराजः'** इति।

मानसजपः — मनः सङ्कल्पमात्रेण क्रियमाणः स्वात्मनापि न श्रव्यो जपः मन्त्राक्षरचिन्तनमात्रात्मकः।

यथा—

"आत्मा न शृणुते यं तु मानसोऽसौ प्रकीर्तितः।"

(स्व० तं०2, 146)

माया — (1) संकोचाभासिका, भेदावभासकारिणी, जगतो जीवानां च वास्तविकस्य स्वरूपस्य तिरोधायिका परमेश्वरस्य शक्तिः। यथा—

"आमृशन्तीमन्यमातृसाधारण्यावभासिकाम्।
ग्राह्यमण्डलतद्ग्राहि नानारूपावमर्शिनीम्।।
मायां पूर्णत्वसम्भोगप्रच्युतिक्षोभकारिणीम्।"

(मा० वि० वा०1, 877-878)

(2) जीवानां विमोहकारिणी पशुप्रमातॄणां बन्धनभूतानां पाशानां जन्मभूः। यथा—

"माया हि सर्वेषां पाशानामुत्पत्तिभूः। तैस्त्वनन्तप्रयुक्तै र्विशिष्टदेवतात्मभिः सूक्ष्मरूपैर्वामशक्त्याधिष्ठिता अणवो बध्यन्ते।"

(स्व० तं०, उ०10, पृ०,475)

द्र०:- (ष० त्रिं० त० सं०5)

(प० प्रा०— पृ०7)

~ अण्डम् — (1) पुरुषतत्त्वादारभ्य मायातत्त्वान्तं व्यापकं मायाण्डम्। यथा—

"प्रकृतितत्त्वात्पुरुषतत्त्वञ्च दशसहस्रधा।
पुरुषान्नियतिर्लक्षधा। नियतेरुत्तरोत्तरं दशलक्षधा कलातत्त्वान्तम्। तद्यथा नियतिः, रागः, अशुद्धविद्या, कालः, कला चेति। कलातत्त्वात् कोटिधा माया एतावन्मायाण्डम्।"

(तं० सा०, पृ०,65)

(2) मायातत्त्वं पञ्चकञ्चुकतत्त्वानि, पुरुषतत्त्वं चेति सर्वेषामेतेषां तत्त्वानामाधारभूतं कोशकल्पमण्डं मायाण्डम्। यथा—

"मलत्रयस्वभावं मोहमयं भेदैकप्रवणतया सर्वप्रमातॄणां बन्धरूपं पुंस्तत्त्वपर्यन्तदलं मायाख्यमण्डमित्युच्यते। .....
.....। अण्डाधिपतिश्चात्र गहनाभिधानो रुद्रः।"

(प० सा० वि०, पृ०,11)

गहनाभिधानश्च देवोऽनन्तनाथो यो मायां प्रक्षोभ्य कञ्चुकादितत्त्वानां सृष्टिं सहारं च कुरुते यथा कालम्। 'गहनेश' इत्यस्य नामान्तरम्।

~ (तदधीशः) — स हि भगवान् रुद्रः। यथा—

"मायाण्डं तु लीनसंस्काररूपतोन्मेषकलेति प्रत्यय-प्रधानं संहारपदमिति रुद्रेण (अधिष्ठितम्)।"

(ई० प्र० वि० वि०, खं०3, पृ०,366)

ग्रन्थेऽत्र नीलसंस्कारेत्ययं पाठः।

स च गहनाभिधान एव रुद्रः। कालाग्निरुद्रा-दारभ्योत्तरोत्तरा अधिकारिणो रुद्राभिधाः प्रमातारस्त-दधश्च क्षेत्रज्ञा इति स्मर्त्तव्यम्।

~ अपरा — प्राणिनामावरणकारिणी तिरो-धान-रूपिणी माया। ऐषैव मायातत्त्वमित्युच्यते। परा चासौ मायाशक्तिरिति या शिवादभिन्ना।

द्र०:- 'मायातत्त्वम्'।

~ आवरणम् — शिवः स्वयमेव स्वलीलया दुर्घटसम्पादनसमर्थया यया स्वशक्त्या स्वात्मनः शिवरूपतामावृत्य स्वात्मानं जीवरूपतया जडजगद्रूपतया चावभासयति सा तस्य शक्तिरेव तस्यावरणतयावभासते। ततो माया स्वेच्छाप्रकल्पितं शिवस्यावरणम्। यथा—

"परमं यत् स्वातन्त्र्यं दुर्घटसम्पादनं महेशस्य।
देवी मायाशक्तिः स्वात्मावरणं शिवस्यैतत्।।"

(प० सा०,15)

~ उपादानतया — कलादिकञ्चुकानां, प्रकृतिपुरुषयोश्च साक्षादुपादानकारणं मायातत्त्वम्। परम्परया धरान्तं सर्वमपि विश्वं मायाविकाररूपमेवेति।

द्र०:- 'मायातत्त्वम्' इति।

~ एका — यद्यपि कलादीनि तत्त्वानि प्रतिपुरुषं भिन्नानि सन्त्यसंख्यानि। तथापि तेषामुत्पत्त्यवनिभूता माया तावदेकैव सर्वपुरुषसाधारणा। यथा—

"तेन कलादिधरान्तं यदुक्तमावरणजालमाखिलं तत्।
निःसंख्यं च विचित्रं मायैवैका त्वभिन्नेयम्।।"

(तं० आ०8, 324)

~ कञ्चुकम् — प्राणिनं शिवतावरणात्मकमिदमेव मुख्यं कञ्चुकतत्त्वम्। कलादीनि पञ्चकञ्चुकान्यस्यैव कञ्चुकस्य बहिर्मुखविस्तारकल्पानि। यथा—

"एतन्मायादिकञ्चुकम् अणोः तण्डुलस्थानीयस्यान्तरङ्गत्वात् कम्बुकस्थानीयं व्यतिरिक्तमपि, अव्यतिरिक्ततया पूर्णसंवित्स्वरूपम्, आच्छाद्य स्थितम्— इति।"

(प० सा० वि०, पृ०,49)

~ गुहा — मायाग्रन्थिरित्यागमेषूक्ता, यस्याः भगसंज्ञेभ्यो बिलाख्येभ्यो विवरकल्पेभ्यो निर्गममार्गेभ्योऽसंख्याताः अव्यक्ताद्या उत्पद्यन्ते यदा भगवाननन्तनाथस्तां संघट्टविमर्शेन कामयते। यथा—

"मायाबिलमिदमुक्तं परस्तु गुहा जगद्योनिः।"

(तं० आ०8, 308)

"परतो गुहा भगवती जगतामुत्पत्तिकारणं माया।
यस्यां स्थितिमनुभूय प्रविलीयन्ते पुनर्लोकाः।।"

उद्ध०:- (तं० आ० वि०, खं०5, पृ०,211)

~ ग्रन्थिः — भुवनाध्वक्रमे अनन्तनाथेन भगवताधिष्ठिता भगमालिनी निः, संख्याशुद्धतत्त्वव्रातयोनिः पारमेश्वर-माया-शक्तिकार्यभूता सती महागुहा या सैव मायाग्रन्थिरित्यभिधीयते। अनन्तानि स्रष्टव्यान्यस्यां ग्रथितानि तिष्ठन्ति यतः। यथा—

"ग्रन्थ्याख्यामिदं तत्त्वं माया कार्यं ततो माया।"

(तं० आ०8, 321)

एषैव मायागुहा।

~ (तदधिष्ठातारः) — **ते चानन्ताद्याः षट् गोपत्याद्याः षड्विग्रहेशाद्याश्चाष्टाविति विंशतिरुद्राः। यथा—**

"ऊर्ध्वकपालेऽवस्थितैः षड्भिरनन्ताद्यैः रुद्रैरधश्च गोपत्यादिभिर्मध्ये च विग्रहेशाद्यैरष्टभिरिति विंशत्या रुद्राणां मायाग्रन्थिरधिष्ठितः।"

(तं० आ० वि०, खं०5, पृ०,217)

मायातत्त्वस्य स्थूलं रूपं मायाग्रन्थिः। माया कार्यत्वाद् ग्रन्थिरपि मायैव।

~ (तद्बिलानि)— **मायाग्रन्थौ सर्वतो यानि भगसंज्ञानि प्रवेशनिर्गमद्वाराणि तान्येव मायाबिलानि। तैरेव मार्गैरसंख्यातानामव्यक्तादितत्त्वानां लयोदयौ भवतो यदा भगवानन्तनाथस्तां तथा तथा कामयते तथा तथानुसन्धानं विधत्ते संघट्टदृष्ट्या। यथा—**

"आक्रान्ता सा भगबिलैः प्रोक्तं शैव्यां तनौ पुनः।"

(तं० आ०8, 299)

"मायाबिलमिदमुक्तं परतस्तु गुहा जगद्योनिः।"

(तं० आ०8 308)

"अववरकाण्येकस्मिन्यद्वत्साले बहूनि बद्धानि।
योनिबिलान्येकस्मिंस्तद्वन्मायाशिरःसाले।।"

(तं० आ०8, 311)

~ (तद्भगाः): — **मायाग्रन्थौ तच्छरीरं परितो यानि बिलाख्यानि तथाभूतानि विवराणि येभ्योऽसंख्यातान्यव्यक्तादीनि तत्त्वानि पुरुषैः पृथक् पृथगुपयोज्यानि तदैव जायन्ते यदा मायाधिपतिर्भगवाननन्तनाथस्तां तथा संघट्टात्मकेन विमर्शेनानुसन्दधानस्तथा तां कामयते। यथा—**

"योनिविवरेषु नानाकामसमृद्धेषु भगसंज्ञा।
कामयते पतिरेनामिच्छानुविधायिनीं यदा देवीम्।।
प्रतिभगमव्यक्ताद्याः प्रजास्तदास्याः प्रजायन्ते।
तेषामतिसूक्ष्माणामेतावत्त्वं न वर्ण्यते विधिषु।।"

(तं० आ०8, 309-310)

~ तत्क्षोभकः — **मायाऽचेतना सती नैव स्वतो न चाप्यर्थक्रियानुकूलतया क्षुभ्येत्। ततस्तत्क्षोभकः कश्चनैश्वर्यवान् चेतन आत्मा। स च भगवाननन्तनाथोऽघोरेशापरशरीरो मायायाः क्षोभकः। यथा—**

"कलादिधरणीप्रान्तं जाड्यात्सा सूतयेऽक्षमा।।
तेनेशः क्षोभयेदेनां क्षोभोऽस्याः सूतियोग्यता।"

(तं० आ०13, 5-6)

ईशोऽत्रानन्तभट्टारको मायाधीश इति वेद्यम्।

~ तत्तत्त्वम्— **द्र०:- 'मायातत्त्वम्' इति।**

~ तत्प्रणवः — **ह्रींकारो मायाप्रणवः। स एव शाक्तः प्रणवः।**

द्र०:- 'प्रणवः' ~ 'शाक्तः' **इति।**

~ तत्फलम् : — **कलादिक्षित्यन्तानां जडानामेव तत्त्वानां स्थूलदेहत्वमापन्नानां विषये यो मायाप्रमातुरात्मत्वाभिमानः सोऽपि मायाफलरूपत्वेन मायेत्युच्यते। यथा—**

"किञ्चित्कर्तृत्वादिरूपं कलादिक्षित्यन्तानां तत्त्वानां कञ्चुकपुर्यष्टकस्थूलदेहत्वेनावस्थितानां योऽयमविवेकःपृथक्त्वाभिमतानामेव पृथक्त्वात्मत्वेन प्रतिपत्तिः, सा माया, तत्त्वाख्यातिमयो माया प्रपञ्चः।"

(शि० सू० वृ०3,3)

~ तद्भूमिः — **भेदात्मकावभासभूमिः। मायातत्त्वमारभ्य धरातत्त्वान्तं विस्तृता भूमिका मायायाः। यथा—**

"अनुपपन्नमवभासनं माया .....।
ततश्च भिन्नं प्रकाशात् सर्वमवभासजातं माया।"

(ई० प्र० वि०, खं०1, पृ०,223)

~ तद्वर्णः — **ईकारः। यथा—**

"माया ईकार":।

(ने० तं० उ०, खं०1, पृ०,51)

~ त्रिपुटिका : — **एकाऽपि माया त्रिधा विचार्यते, तद्यथा ग्रन्थिरूपतया, तत्त्वरूपतया, शक्तिरूपतया चेति। ततस्त्रिपुटिकेयं शैवदर्शने गण्यते। यथा—**

"इदानीं ग्रन्थितत्त्वशक्त्यात्मना त्रिप्रकारं मायायाः स्वरूपं निरूपयति।"

(तं० आ० वि०, खं०5, पृ०,205)

"ततो माया त्रिपुटिका मुख्यतोऽनन्तकोटिभिः।।
आक्रान्ता सा भगबिलैः प्रोक्तं शैव्यां तनौ पुनः।"

(तं० आ० 8, 298-299)

~ द्विरूपा : — **ग्रन्थिसंज्ञकावरणरूपा तत्त्वविशेषरूपा चेति। यथा—**

"यथा मायाया ग्रन्थितत्त्वात्मना द्वैविध्यं तथा प्रकृतेरपि क्षुब्धाक्षुब्धरूपतयेत्यवगन्तव्यम्।"

(तं० आ० वि०, खं०5, पृ०]79)

~ निर्वचनतः — **मीयते परिच्छिद्यते विश्वमनयेति माया, मात्यस्यां विश्वमिति वा माया।**

द्र०:- 'माया तत्त्वम्' इति।

द्र०:- 'मायाशक्तिः' इति च।

~ निशाः — **अभेदस्य प्रथमो यस्तिरोभावो भेददृष्टेश्चोदयः स मायाकृत एव। अनया दृष्ट्या मायाया अज्ञानरूपत्वेन निशा इत्येषाऽपि संज्ञा। यथा—**

"आद्यो भेदावभासो यो विभागमनुपेयिवान्।।
गर्भीकृतानन्तभाविविभासा सा परा निशा।"

(तं० आ०9, 150-151)

~ परा : — **परमेश्वरस्य परमेश्वरता- प्रयोजिका पराशक्तिः।**

~ बीजम् — **ह्रीं इति। यथा—**

"मायार्णं ह्रीं।"

(तं० आ० वि०, खं०12, पृ०,220)

~ मलः — **भेददृष्टिमयो मलः। वस्तुतो हि जगद्भावाः स्वात्ममयाः, परं मायीयस्य मलस्य प्रभावात् प्रमातारस्तान् भिन्नतया वेद्यैकरूपतया पश्यन्ति जानन्ति च। यथा—**

"वेद्यीकरणमर्थानां मलो मायाख्य उच्यते।

.....।।"

उद्धः- (तं० ई० प्र० वि० वि०, खं०2, पृ०,60)

~ मलम् — **प्रमातुर्भेददृष्टिस्तस्य मायाख्यं मलम्। मायीयमित्यप्यस्य संज्ञा।**

द्रः- 'मायीयं' ~ 'मलम्' **इति।**

~ मोहकरी — **प्राणिनामज्ञानात्मकस्य मोहस्य न किञ्चिद- विद्यादिकं स्वात्मनोऽतिरिक्तं वस्तु कारणम्, अपि तु स्वात्मपरमेश्वरस्य मायैव मोहकरी। यथा—**

"इत्थं द्वैतविकल्पे गलिते प्रविलङ्घ्य मोहनीं मायाम्।"

(प० सा०,51)

मायातत्त्वम् — (1) सृष्टिक्रमे प्रथमो भेदावभासो हि मायातत्त्वम्। तच्च सकलस्य जडस्य तत्त्वव्रातस्योपादानकारणम् कालकलनोत्तीर्णत्वादनादि, यतः कालोऽपि मायविकार एव। तस्यारम्भस्याज्ञेयत्वादप्यनादि तत्। परमेश्वरेण स्वेच्छयाव भासितत्त्वेन तदिच्छामयं, तत एव नित्यं, सकलजडजग दुपादानतया व्यापकम्, मायाख्यं प्रथममशुद्धं तत्त्वम्। तच्चैकमेव प्रतिपुरुषसाधारणम्, सर्वेषामपि पुरुषाणां भेददृष्ट्युपहतत्वात्। यथा—

"आद्यो भेदावभासो यो विभागमनुपेयिवान्।।
गर्भीकृतानन्तभाविविभासा (गा) सा परा निशा।
सा जडा भेदरूपत्वात् कार्यं चास्या जडं यतः।।
व्यापिनी विश्वहेतुत्वात् सूक्ष्मा कार्यैककल्पनात्।
शिवशक्त्यविनाभावान्नित्यैका मूलकारणम्।।"

(तं० आ०9, 150-152)

"तस्य च सृजतः परमेश्वरस्येच्छामयं तत एव च नित्यं स्रक्ष्यमाणवस्तुगतस्य रूपस्य जडतयाभासयिष्यमाणत्वात् जडं, सकलकार्यव्यापनादिरूपत्वाच्च व्यापकं, मायाख्यं तत्त्वमुपादानकारणम्।"

(तं० सा०, पृ०,77)

(2) अशुद्धाध्वोपादानभूतं विभु, जडं गहनं च तत्तत्त्वं यत्र सर्वोऽप्यशुद्धोऽध्वा लयं याति प्रलयकाले। यथा—

"मायातत्त्वं विभु किल गहनमरूपं समस्तविलयपदम्।"

(तं० आ०8, 322)

"मायातत्त्वं जगद्बीजं नित्यं विभुतयाव्ययम्।"

(स्व० तं०11, 59)

द्रः- (अ० त्रिं० प्र०, पं०, 21)

द्रः- (ष० त्रिं० त० सं० वि०, पृ०,5)

~ एकमेव — **इहहि शैवैर्मायातत्त्वमुपादानकारणं निर्दिष्टं, तदेव परप्रकृतिरूपेणोक्तम्; माया तु परमेश्वरशक्तिरुक्ता। अत एव पार्थिवाण्डानामिव प्राकृताण्डानां यदसंख्यत्वमुक्तम्**

"पृथग्द्वयसंख्यातम् .....
....."।

(मा० वि०2, 50) इति,

"तत्र गुणतत्त्ववैचित्र्यभेदो जीवितम्, मायातत्त्वं शक्तिश्चेति तु एकमेवेति न तत्राण्डविभाग आगमेषु दर्शितः। तदुक्तं - "पृथग्द्वयमसंख्यातमेकमेकं पृथग् द्वयम्" यथा—

(मा० वि० तं०2, 50) इति,

"अत्र च प्रतिपुंस्तत्त्वं न भेदोऽस्ति, धर इत्यभिदधता तदधरवर्तिनां तत्त्वानां सोऽस्तीति सूचितम्।"

(ई० प्र० वि० वि०, खं०3, पृ०,303)

प्रतिपुरुषं यथा गुणवैचित्र्यमसंख्यातं न तथा भेददृष्टिवैचित्र्ये वा, स्वरूपतिरोधाने वा वैचित्र्यम्। अत एव गुणतत्त्वमसंख्यातं मायातत्त्वं चैकमेवेति तात्पर्यम्।

~ क्रियाशक्तिस्फाररूपम् — **परमेश्वरस्य क्रियाशक्तिरेव बहिर्मुखे प्रसरे मायातत्त्वरूपतामाधत्ते। यथा—**

"क्रियाशक्तेः स्फुटः स्फारः मायात्वं प्रतिपद्यते।।"

(मा० वि० वा०1, 173)

~ धर्माद्यायतनम् — **धर्माद्यष्टकस्य मूलाधारः। यथा—**

"मायातत्त्वं हि धर्मादीनामायतनम्।"

(ई० प्र० वि० वि०, खं०1, पृ०,25)

~ स्वातन्त्र्य-प्रतिघातिः — **मायैव प्राणिनां स्वातन्त्र्यमुपहन्ति। येन ते पशुत्वमुपयान्ति। यथा—**

"भिन्नभिन्नप्रथात्मक-मायीयमलेन स्वाङ्गकल्पेष्वपि जडवेद्यवर्गेषु विभिन्नतया बुद्धिरेव मायाख्यं तत्त्वं, येन तस्य (परमेश्वरस्य) निरर्गलं स्वातन्त्र्यं प्रतिहन्यते।"

(ष० त्रि० तं० सं०, वि०, पृ०,5)

माया प्रमाता : — (1) चित्तप्रधानः प्रमाता। स च अणुः, पशुः, जीवः पुद्गलः इत्यादि नामकोऽशुद्धः प्रमाता। यथा—

"तन्मयो मायाप्रमाता।।"

(प्र० हृ०,6)

"चित्तमेव तु मायाप्रमातुः स्वरूपम् .....
। देहप्राणपदं तावत् चित्तप्रधानमेव; शून्यभूमिरपि चित्तसंस्कारवत्येव, अन्यथा ततो व्युत्थितस्य स्वकर्त्तव्यानुधावनाभावः स्यात्—इति चित्तमय एव मायीयः प्रमाता।"

(तदेव, पृ०,13-14)

(2) मायादिष्वशुद्धासु भूमिकासु विचरन्तः

सङ्कुचितस्वरूपाः सङ्कुचितशक्तयश्च ब्रह्मादिस्तम्बपर्यन्ताः पशुभूमिकाभाजः प्रमातारो माया प्रमातार इति वा मायीयाः प्रमातार इति वोच्यन्ते।

मायावैभवागमः — **इदानीमलभ्यः कश्चनागमग्रन्थः। यथा—**

"श्रीमायावैभवागमे :—

"एकैव मामिका माया स्थिताष्टाष्टकभेदिनी।"

(ई० प्र० वि० वि०, खं०3, पृ०,384)

मायाशक्तिः — **(1) वस्तुतश्चिन्मात्रमेव सर्वं जगज्जडतयावभासयन्ती, जडतयावभासिते च तत्र देहादौ पुनरहमिति चिद्रूपतामभिनिवेशयन्ती तावदसम्भवमपि वस्तु सम्भवत्वेनाव भासयन्ती परमेश्वरस्याति दुर्घटकारिणी शक्तिः। यथा—**

"सर्वं चैवेदं शून्यादि वस्तुतश्चिन्मात्रसारमेव। माययैव तावदचिद्रूपतयाऽऽभासितम्। तथाविधमेव तु सद् अहमिति संविद्रूपताभिनिवेशस्थानं सम्पादितमप्रशान्तजडभावमेव—इति दुष्करतमवस्तुसम्पादनाप्रतीघातरूपा परमेश्वरस्य मायाशक्तिः।"

(ई० प्र० वि०, खं० 2, पृ० 205-206)

द्र०:- (ई० प्र० वि० वि०, खं० 3, पृ०,280)

(2) शिवस्यैव शक्तिर्माया, न तद्भिन्ना तस्योपाधिः। यथा—

"मीयते-परिच्छिद्यते धरान्तः प्रमातृप्रमेयप्रपञ्चो यया सा माया; विश्वमोहकतया वा माया। एषा देवस्य .... क्रीडाशीलस्य सम्बन्धिनी—इति कृत्वा 'देवी' न पुनः ब्रह्मवादिनामिव व्यतिरिक्ता काचित् माया उपपद्यते।"

(प० सा० वि०, पृ०,44)

(3) लौकिककार्यकारणभावनियमस्यावस्थापिका पारमेश्वरी शक्तिः। यथा—

"मायातत्त्वं देहे नोपादानकारणमात्रत्वेन पृथक्त्वेन सम्मतम्, अपि तु परमेश्वरशक्तितया। तथा हि—मृदादिः पदार्थः परमेश्वर-शक्तिरूप एव संस्तदिच्छावशाद् घटकारणतयापि नियतौ निर्भासमानः पृथक् कारणमुच्यते।"

(ई० प्र० वि० वि०, खं०3, पृ०,270)

(4) असौ शिवस्य शक्तिर्ययासौ भावमण्डलं प्रमेयतया मिमीते, यस्यां च भावमण्डलं मातीति।

यथा—

"मात्यस्यां विश्वमिति स्वात्माभिन्नमपि भावमण्डलं शिवो यया मिमीते भिदा व्यवस्थापयति इति च।"

(तं० आ० वि०, खं०6, पृ०,119)

(5) ग्राह्यग्राहकोभयविपर्यासकरी पशुप्रमातृषु विजृम्भमाणा शिवस्य शक्तिर्माया। यथा—

"ग्राह्यग्राहकविपर्यासे पशुप्रमातृषु मायाशक्तिः।"

(ई० प्र० वि० वि०, खं०3, पृ०,277)

(6) असम्भवस्यापि सम्भवत्वसम्पादिका पारमेश्वरी शक्तिर्माया। स्वस्वरूपगोपनकारिणी च पारमेश्वरी शक्तिः। यथा—

"परमं यत्स्वातन्त्र्यं दुर्घट-सम्पादनं महेशस्य।
देवी मायाशक्तिः स्वात्मावरणं शिवस्यैतत्।।"

(प० सा०,15)

"इतश्च किमतिदुष्करं भविष्यति,—यत्प्रकाशात्मनि अखण्डितताद्रूप्ये एव प्रकाशमाने प्रकाशननिषेधावभासः प्रकाशमानः। तस्मात् परमेश्वरस्येदं तत्परं स्वातन्त्र्यं यत् तथावभासनं पशुरूपतावभासनं नाम ग्राहकांशसमुत्थापनम्, तद्द्वारेण ग्राह्योल्लासनमपि। सैषा भगवतो मायाशक्तिरुच्यते।"

(ई० प्र० वि०, खं०2, पृ०,128)

(7) परमेश्वरस्य भेदावभासनस्वातन्त्र्यं स्वभावभूतम्। यथा—

"माया च नाम देवस्य शक्तिरव्यतिरेकिणी।।
भेदावभासस्वातन्त्र्यं तथाहि स तया कृतः।"

(तं० आ०9, 149-150)

स इति भेदावभासः। यथा—

"अपूर्णताप्रथनेन मीनाति हिनस्तीति माया।"

(तं० आ० वि०, खं०6, पृ०,116)

(8) मायातत्त्वावभासकारिणी पारमेश्वरी शक्तिरपि मायाख्या। यथा—

"तदवभासकारिणी च परमेश्वरस्य माया नाम शक्तिस्ततोऽन्यैव।"

(तं० सा०, पृ०, 77-78)

तदवभासकारिणीति मायातत्त्वाभासकारिणी।

(9) परमेश्वरस्य जीवजातमोहकः शक्तिविशेषः। यथा—

"माया च परमेश्वरस्यैव शक्तिः। .... मोहयतीति मोहः ईश्वरः, तस्य वशः सामर्थ्यं मायाशक्तिस्ततः।"

(ई० प्र० वि० वि०, खं०1, पृ०,80)

(10) दुष्करावभासकारिणी पारमेश्वरी शक्तिः। वस्तुतः प्रकाशात्मके एव देहप्राणादौ विषयजाते च तथा प्रकाशमानेऽपि तद्विषये ऽप्रकाशरूपताभिमानोऽयं यया शक्त्या समुद्भाव्यतेऽसौ विमोहिनी प्रभुशक्तिर्माया। यथा—

"इतश्च किमितरद् दुष्करम्—यत् प्रकाशात्मन्येव प्रकाशमाने एव प्रकाशनिषेधोऽप्रकाशमानताभिमान एव। एवं भूतं यत् स्वातन्त्र्यं तदेव ग्राहकोल्लासनं, तद् द्वारेण च ग्राह्योल्लासनमपि। सैषा मायाशक्तिर्विमोहिनीत्युक्ता।"

(ई०प्र०वि०वि०,खं०3, पृ०,181)

द्र०:- स्पं०वि०, पृ०6, 133; स्व० तं०उ०,प०-7, पृ०172, 173, पू० प्र०1,141; प्र०ह० पृ०9;10, ष० त्रिं० त०सं०वि०, पृ०,50), इति।

~ अव्यतिरिक्ता : — **परमेश्वरस्यात्मभूताऽव्यतिरिक्तेयं शक्तिर्माया, या सदाशिवेश्वरपदे इदन्ताया अवभासं करोति। नैषा ततो बाह्या वैदान्तिकी वा विद्या। यथा—**

"स्वरूपाव्यतिरेकिणि विश्वत्र भगवतः प्रकाशविमर्शौ ज्ञानक्रियाशक्ती, क्रियाशक्तेरेव विजृम्भात्मिका सदाशिवेशपदे आच्छादनीयेदन्तोन्मेषदायिनी मायाशक्तिः। ता एता नैसर्गिक्यो भगवतो दृष्टाः।"

(ई० प्र० वि० वि०, खं०3, पृ०,361)

~ क्रियाप्रसररूपा : — **ज्ञानक्रिये भगवतः सदैव स्वाभाविक्यौ, मायाशक्तेः पुनः क्रियाशक्तिविजृम्भात्मकत्वमेव। यथा—**

"भगवति विशुद्धचिदात्मनि क्रियाशक्तिरेव स्वातन्त्र्यात्मिका विमर्शमयी, न तु मायात्वं तत्र किञ्चित्; निर्मातव्यभेदापेक्षया तु तदिति पशुरूपतानुलग्नैव माया। तत एव ज्ञानक्रियामायानां सूत्रे समकक्ष्यतया नोपादानमिति।"

(ई० प्र० वि० वि०, खं०3, पृ०,361)

ज्ञानक्रिययोरुत्कृष्टत्वं मायायाश्च ताभ्यामवरत्वमिति वेद्यम्। यथा—

"मायातृतीये त एव पशोः सत्त्वं रजस्तमः"

(ई० प्र०4-1-4)

इति सूत्रं प्रति सङ्केतोऽत्र।

~ जन्तुविमोहिनी : — **मायैव हि विश्वविमोहिनी पारमेश्वरी शक्तिः। यथा—**

"अतः परं स्थिता माया देवी जन्तुविमोहिनी।।
देवदेवस्य सा शक्तिरतिदुर्घटकारिता।
निर्वैरपरिपन्थिन्या तथा भ्रमितबुद्धयः।।
इदं तत्त्वमिदं नेति विवदन्तीह वादिनः।
गुरुदेवाग्निशास्त्रेषु ये न भक्ता नराधमाः।।
सत्पथं तान्परित्याज्य सोत्पथं नयति ध्रुवम्।
असद्युक्तिविचारज्ञाञ्छुष्कतर्कावलम्बिनः।।
भ्रमयत्येव हि तान्माया ह्यमोक्षे मोक्षलिप्सया।।"

(तं० आ०8, 332-336)

~ रुद्रस्यः — **प्रमातृप्रमेयभावनिषेधनरूपा नेति प्रत्ययात्मिका संहरणक्रियाशक्तिरूपा माया-शक्तिस्तावद् रुद्रस्य। अपरेयं मायाशक्तिः। यथा—**

"तस्य भगवतो (रुद्रस्य) या क्रियाशक्तिः संहरणरूपा अवभासनप्रधानाया ज्ञानशक्तेरन्या, सा नेत्येवं प्रमातृप्रमेयाणां परस्परव्यवच्छेदात्मकशून्यताप्रधाना मायाशक्तिरित्युच्यते।"

(ई० प्र० वि० वि०, खं०3, पृ०,366)

~ सूक्ष्मतरा — **अहन्ता निषेधनरूपाया मायाशक्तेः सूक्ष्मरूपतयावस्थानं तावच्छुद्धविद्यायां सदाशिवेश्वरभुवि विद्यते। यथा—**

"सा च निषेधरूपा रुद्राधिष्ठिता शक्तिरपरदशासमासूत्रणरूपा सदाशिवेश्वरदशायामप्यस्ति। तत्र ह्यहमित्यमुना रूपेणाच्छादनीय इदं भावोऽपरस्वभावः। स तया रुद्रसम्बन्धिन्या शक्त्या समुत्थापनीयः। संहरणरूपतया च शक्तेश्चिद्रूपतोचिता तस्यां दशायां परभागेऽपि न नोचिता।"

(ई० प्र० वि० वि०, खं०3, पृ०,366)

मायिकमलम् : —

द्र०:- 'मायीयम्' ~ 'मलम्' इति।

मायीयम् : — मायाविकारभूतं पदार्थजातम्।

~ आवरणम् : — **मायाविकारभूतं कलादिरूपं कञ्चुक-पञ्चकं मायासहितं मायीयमावावरणं प्राणिनाम्। यथा—**

"मायादि-विद्यान्तं कञ्चुकषट्कं "सूक्ष्मम्" आत्मन आवरणम्, तण्डुलस्य कम्बुकमिवारणं पृष्ठपातित्वेनास्ते, येन भेदमयी ज्ञत्व-कर्तृत्वादि प्रथाप्रथते; इत्येष मायीयो मलः।"

(प० सा० वि०, पृ०,56)

~ क्रियाजातम् : — **यदेकस्यापि पदार्थस्यानेकरूपत्वमनेकावस्था क्रमाधारत्वं च, असावेकस्यानेकाकारेणावभास एव हि मायायाः क्रियेति। सा च नासत्या, अपि तु सत्यैव। यथा—**

"तत्तद्देशकालाकारभिन्नस्तत्र चैत्र देहोऽनेकस्वभावोऽपि 'स एवायम्' इत्येकरूपतामपरित्यजन्नेव निर्भासते। स एव चैकानेकरूपोऽर्थः क्रिया। तथैव प्रतिभासनाच्च पारमार्थिकी।"

(ई० प्र० वि०, खं०2, पृ०,30)

~ प्रपञ्चकम् : — **मायातः क्रमेण जातः कञ्चुकादि-धरान्तः सर्वोऽपि जडस्तत्त्वव्रातस्तत्रत्यश्च भुवनसमूहस्त-दन्तर्विद्यमानश्च प्रमातृप्रमाणप्रमेयविस्तरो मायीयः प्रपञ्चः।**

~ (कार्यकारणतायुतम्) : — **अस्ति तावत् प्रधाना-दि धरान्तानां परस्परमपि पौर्वापर्यं कारणकार्यत्वमपि च तथा-तथा। यथा—**

"सा माया क्षोभमापन्ना विश्वं सूते समन्ततः।।
दण्डाहतेवामलकी फलानि किल यद्यपि।
तथापि तु तथा चित्रपौर्वापर्यावभासनात्।।
मायाकार्येऽपि तत्त्वौघे कार्यकारणता मिथः।"

(तं० आ०9, 164-166)

~ (सुविस्तरम्) : —

"शरीरभुवनाकारा मायीयाः परिकीर्तिताः।"

(स्व० तं०, प०4, 105)

"भुवनैर्भावभूतादि लक्ष्यते, तेन, यत् किञ्चिद्वेद्यतया भाति स मायीयो मलः।"

(स्व० तं० उ० प०4, पृ०,60)

मलः प्रपञ्चात्मक एव।

~ (स्रष्टारस्तस्य) : — मायातो या कञ्चुकानां पुरुषप्रकृत्योश्च सृष्टिस्तां भगवाननन्तनाथो विदधाति। प्राकृतानां पुनस्त्रयोविंशतितत्त्वानां स्रष्टा भगवाञ्छ्रीकण्ठनाथः। यथा—

"मायाबिलमिदमुक्तं परतस्तु गुह्या जगद्योनिः।।
.....।
.....।।
योनिविवरेषु नानाकामसमृद्धेषु भगसंज्ञा।
कामयते पतिरेनामिच्छानुविधायिनीं यदा देवीम्।।
प्रतिभगमव्यक्ताद्याः प्रजास्तदास्याः प्रजायन्ते।
तेषामतिसूक्ष्माणामेतावत्त्वं न वर्ण्यते विधिषु।।"

(तं० आ०8, 308-310)

वस्तुतोऽत्र मायाविकारभूतत्वेन शरीरभुवनादेर्मायीयत्वमुक्तं वेदितव्यं सुधीभिः। नेदं मायीयमललक्षणं यथाऽद्यत्वे शोधविद्वांसः समुद्घोषयन्ति भ्रान्तबुद्धित्वात्।

द्र०:- (स्पं० नि०, पृ०,22,23, म०मं०प०,पृ०,31, प्र०ह०, 21, स्व०तं०उ०खं०3, पृ०,233; पू० प्र०2;473; ष०त०सं०वि० पृ०,5; आ०वि०सु० पृ०,148)

~ मलम् : — **आणवे मले सत्यसति वा वेद्यस्य यत स्वस्माद् भिन्नतया प्रथनं तदेव मायीयं मलं, भेददृष्टिरूपम्। तच्च सकलाख्येषु प्राणिषु स्पष्टं गाढञ्च। प्राणप्रलयाकलेष्वपि किञ्चिन्मात्रम्। विद्येश्वराख्येषु शुद्धेष्वपि प्राणिषु स्पष्टम्, यतस्ते सैश्वर्ये चिन्मात्रे स्वात्मत्वाभिमानवन्तोऽपि वेद्यं स्वतो भिन्नमेव पश्यन्ति। यथा—**

(क) "भिन्नवेद्यप्रथात्रैव मायाख्यम् .....।"

(ई० प्र०, 3-2-5)

(ख) "बोधानामपि कर्तृत्वजुषां कार्ममलक्षतौ।
भिन्नवेद्यजुषां मायामलो विद्येश्वराश्चते।।"

(ई० प्र०, 3-2-9)

मायीयमिति चास्य मलस्यागमिकी संज्ञा। ततो नात्र मायाकृतत्वेन मायीयत्वमस्य मन्तव्यम्। यतो हि मायाकृततत्वं मलत्रयस्यापि। यथा—

"तस्य मायीयमिति संज्ञामात्रम्। मायाकृत्वेन मायीयता मलत्रयस्यापि"

(ई० प्र० वि०, खं०2, पृ०,221)

यश्च शरीरभुवनाकारो मायीयः प्रपञ्चोऽसौ मायाकार्यत्वेन मायीय इत्युच्यते, न पुनर्मलपरिभाषाभेददृष्ट्येति वेद्यं सुधीभिर्न चात्र भ्रमितव्यं यथाऽद्यत्वे शोधविद्वांसोऽत्र विषये भ्रान्ता भवन्ति प्रायशः। यथा—

"भेदप्रथात्मकमायीयमलगर्भीकृतत्वाच्च .....
.....।"

(तं० आ० वि०, खं०6, पृ०,114)

द्र०:- आ०वि०सु०, पृ०,147,148, ष०त्रिं०त०सं०वि०,पृ०,5; पू०प्र०2,473, स्व०तं०उ०खं०1, पृ०,233)

स्पं०नि०पृ०,22, 23; प्र०ह०, पृ०,21, म०मं०प०, पृ०,31) इति।

~ (अमिश्रम्): — **तच्च विद्येश्वराणाम्। ते हि जगत् स्वात्मनो भिन्नतया पश्यन्तीति भेददृष्टिरूपस्तेषां मायीयो मलः केवलो न खल्वसावाणवेन कार्मेण वा मिश्रितः।**

द्र०:- (ई०प्र०,3-2-9 उपरि समुद्धृतम्।)

~ (आंशिकम्) : — **शुद्धास्तावत् प्राणिनो मन्त्र-मन्त्रेश्वर- मन्त्रमहेश्वराः। तेषु मन्त्राणां भेददृष्टिरूपः स्फुटो मायीयो मलः केवलः। मन्त्रेश्वरा मन्त्रमहेश्वराश्च यद्यपि निर्मला इति गण्यन्ते, तथापि मायीयस्य मलस्याङ्कुरीभावस्तेष्वपि विद्यते एव येन तेषु सूक्ष्मस्येदं भावस्याभासश्चकास्त्येव। ततस्तेष्वपि मायीयो मलः सूक्ष्मतरांशतः स्वीकार्य एव। ध्वनितमेतद्रहस्यं विवृतिविमर्शिन्यां यथा—**

"मायामलयुक्ता विद्यामन्त्रेश्वरादयः"

(ई० प्र० वि० वि०, खं०3, पृ०,324) इति।

पदसन्दर्भेण।

द्र०:- 'विद्येश्वराः' इति।

द्र०:- 'मलः' ~ 'तारतम्यतः' इति।

~ (मिश्रम्) : — **सकलाख्येषु प्राणिषु सवेद्यसौषुप्तपदस्थेषु च प्रलयाकलेषु या भेददृष्टिरसावाणवादिमलमिश्रा यथायथम्। यथा—**

"द्विप्रकारे सत्याणवे मले, वृत्ते स्वरूपसङ्कोचे, भिन्नस्य यत् प्रथनं तत् मायाख्यं मायया आख्या यस्य तन्मायीयं मलं संज्ञामात्रेणेति, मायाकृतत्वं तु मलत्रयस्यापि।"

(ई० प्र० वि० वि०, खं०3, पृ०,317)

~ सृष्टिजातम् : — **मायातो जातानि पञ्चकञ्चुकानि, पुरुषः, प्रकृतिश्चेति। सा चानन्तरूपा। त्रयोविंशतिकरणकार्यतत्त्वानि मायीयानि सन्त्यपि प्राकृतसृष्टौ गण्यन्ते।**

मारणादिनिषेधः — मारणमोहनोच्चाटनवशीकरणादि घोरं कर्मतन्त्रसाधनया नैव कार्यं सज्जनेन। यथा—

"तामसाः परहिंसादि वश्यादि च चरन्त्यलम्।
न च तत्त्वं विदुस्तेन दोषभाज इति स्फुटम्।।"

(तं० आ०4,68)

मार्तण्डकाली : — ~ क्रमस्तोत्रयोः — यथा—

"मार्तण्डमापीतपतङ्गचक्रं पतङ्गवत् कालकलेन्धनाय।
करोति या विश्वरसान्तकां तां मार्तण्डकालीं सततंप्रणौमि।।"

उद्धृ०:- (क्र०स्तो०) (तं०आ०वि०,खं०3, पृ०,178)

"क्रियाबुद्ध्यक्षादेः परिमितपदे मानपदवी-
मवाप्तस्य स्फारं निजनिजरुचा संहरति या।
इयं मार्तण्डस्य स्थितिपदयुजः सारमखिलं
हठादाकर्षन्ती कृषतु मम भेदं भवभयात्।।"

(क्र० स्तो० अभि०,23)

~ चिद्गगनचन्द्रिकायाम् : — **यथा—**

"यो मृताण्डनिभमर्थपञ्चकं प्राणिनः स्फुरति भामयो रविः।

संहृतार्थमनुमन्तराहृतं तं बहिः सृजति चार्थपञ्चकम्।।"
(चि० ग० चं०,241)

~ तन्त्रालोकादौ : — **द्वादशकरणानामहङ्कारेण सहैकीकरणस्य कलनारूपा संविच्छक्तिः प्रमाणसंज्ञस्य चित्सूर्यस्य द्वादशरूपत्वेन मार्तण्डकालीति व्यपदिश्यते कालीनये। मनसो बुद्धेश्च करणेषु गणनेन तेषां द्वादशता। यथा—**

"ततः स्वरूपकलनानान्तरीयकत्वेनैव करणचक्रं कलयति।"
(तं० सा०, पृ०,30)

"इत्थं भोग्येऽपि सम्भुक्ते सति तत् करणान्यपि।
संहरन्ती कलयते द्वादशैवाहमात्मनि।।
कर्मबुद्ध्यक्षवर्गो हि बुद्ध्यन्तो द्वादशात्मकः।
प्रकाशकत्वात् सूर्यात्मा भिन्ने वस्तुनि जृम्भते।।
.....
.....
.....
संविद्देवी स्वतन्त्रत्वात् कल्पितेऽहङ्कृतात्मनि।।"
(तं० आ०4, 159-163)

"प्रमाणगतं संहारस्वरूपं निरूप्यानाख्यस्वरूपमपि निरूपयितुमाह"—
(तं० आ० वि०, खं०3, पृ०,174)

"द्वादशापि करणानि संहरन्ती संविदहमात्मन्यहङ्कारे कलयते, तत्रैव लीनतां नयेदित्यर्थः।"
(तदेव, पृ०,175)

"द्वादशविधोऽपि करणवर्गस्तत्राहङ्कारे लीयते तदेकविश्रान्तो—भवेदित्यर्थः।"
(तदेव, पृ०,176)

~ पञ्चशतिके : — **यथा—**

"शब्दब्रह्मपदातीता षट्त्रिंशान्तनवान्तगा।
ब्रह्माण्डखण्डादुत्तीर्णा मार्तण्डी मूर्तिख्यया।।
सा कला लीयते यस्यां मार्तण्डी कालिकोच्यते।"
उद्धः- (तं० आ० वि०, खं०3, पृ०,178)

मारुतः — ~ बीजम्— **यकारः। यथा—**

"मारुतो य इति।" (तं०आ०वि०,खं०12, पृ०,178)
"वाटवग्निसलिलेन्द्राणां धारणानां चतुष्टयम्।"
(प० त्री०,7)

अन्तःस्थानधिकृत्योक्तमेतत्।

मालम् : — **मालिनीविजयाख्यं तन्त्रम्। यथा—**

"तत्र प्राधान्यतः श्रीमन्मालोक्तो विधिरुच्यते।"
(तं० आ०28, 113)

मालिनी : — **(1) यदा स्वरवर्णा व्यञ्जनवर्णैः सहाक्रमेण मिश्रीभूताः सन्तो वर्णराशिं प्रक्षोभयन्ति तदा तथाविधा प्रक्षुब्धा सती वर्णराशिरेव मालिनी। विश्वमयमेतद् वर्णराशेः स्वरूपम्। यथा—**

"क्षुब्धायाः पुरर्व्यपदेशान्तरमस्ति ..... ततो भिन्ना बीजैर्भेदिता योनयो व्यञ्जनानि यस्याः सा तथाविधा सती, मालिनी—मलते विश्वं स्वरूपं धत्ते इति विश्वरूपिणी।"
(तं० आ० वि०, खं०2, पृ०,222)

"क्षोभ्य-क्षोभकतावेशान्मालिनीं तां प्रचक्षते।।"
(तं० आ०3, 232)

"बीजयोनिसमापत्तिविसर्गोदयसुन्दरा।
मालिनी हि परा शक्तिर्निर्णीता विश्वरूपिणी।।
बीजयोन्योर्या समापत्तिः परस्परसंघट्टात्मसामरस्यं, तया योऽयं विसर्गोदयः.....तेन सुन्दरा, निरतिशया"।
(तं० आ० वि०, खं०2, पृ०,223)

अत्र रहस्यचर्यां प्रति सङ्केतोऽपि भवेत्।

(2) क्षोभमापन्ना अनियतक्रमं च स्थिताः वर्णमालायाः पञ्चाशद्वर्णाः मालिनीति संज्ञा लभन्ते। मालिन्यां स्वराः व्यञ्जनैः सह प्रक्षुब्धत्वेन मिश्रिताः सन्तः स्थिताः। स्वराणां व्यञ्जनानां चापि नात्र नियतः क्रमः। इयं शाम्भवोपायसाधनभूता सती सद्यो भुक्तिमुक्तिफलप्रदा।

मालिनीवर्णा नकारादारभ्य फकारे परिसमाप्ता भवन्ति। अन्ये सर्वेऽपि वर्णाः क्षुभितेन क्रमेण मध्ये स्थिताः। एष तेषां क्रम—

न ऋ ॠ ऌ ॡ थ च ध ई ण उ ऊ ब क ख ग घ ङ इ अ व भ य ड ढ ठ झ ञ ज र ट प छ ल आ स अः ह ष क्ष म श अं त ए ऐ ओ औ द फ — इति।

तदुक्तमस्या न्यासविधौ—

"विशेषविधिहीनेषु न्यासकर्मसु मन्त्रवित्।
न्यसेच्छाक्तशरीरार्थं भिन्नयोनिं तु मालिनीम्।।
न शिखा ऋ ॠ ऌ ॡ च शिरोमालाऽथ मस्तकम्।
नेत्राणि च ध वै नासा ई समुद्रे णु णू श्रुती।।
ब क वर्ग इ आ वक्रदन्तजिह्वासु वाचि च।
व भयाः कण्ठदक्षादिस्कन्धयोर्भुजयोर्डढौ।।
ठो हस्तयोर्झत्रौ शाखा ज्रटौ शूलकपालके।
पहच्छलौ स्तनौ क्षीरमा स जीवो विसर्गयुक्।।
तत्परः कथितः प्राणः षक्षावुदरनाभिगौ।
मशंताः कटिगुह्योरुयुग्मगा जानुनी तथा।।
ए ऐ कारौ तथा जङ्घे तत्परौ चरणौ दफौ।"
(मा० वि० तं०, 36-41)

अत्र ण + उ + ण + ऊ = णु णू, ण उ ऊ इति त्रयः। ब + क वर्ग + इ + अ = इति द्वन्द्वे ब कवर्ग इ आः। ज + र + ट = ज्रटौ (ज्रटा वा)। तस्माद्विसर्गात् परो विसर्गो हकार रूप इति। तत्परः। म + श + अं + त = मशंताः। ताभ्याम् एकारैकाराभ्यां परौ ओकारौकारौ।

(3) मलते विश्वमात्मसात्कुरुते इति मालिनी। ककारादिक्षकारान्तं विश्वमत्र बीजवर्णैरात्मसाद् विधीयते। तत इयं मालिनी। विश्वं मलते इति। यथा—

"मलते विश्वं स्वरूपे धत्ते, मालयति-अन्तःकरोति कृत्स्नमिति च मालिनी .....।"

(तं० आ० वि०, खं०2, पृ०,192)

विश्वं खल्वस्यां माला इव तिष्ठतीति मालिन्येषा। विश्वात्मकं परमेश्वरस्य स्वरूपमभिव्यनक्तीयमुपासिता सती।

(4) रुद्रैर्मालिता सिद्धिमोक्षौ मलते धारयतीति। संहारक्रमेण स्थितत्वात् संहारिणीमारिणी सत्येव मालिनी; रलयोरभेदात्; सकलभोगमोक्षादिफलदायिनी। यथा—

"मालिनी मालिता रुद्रैर्धारिका सिद्धिमोक्षयोः।।
फलेषु पुष्पिता पूज्या संहारध्वनिषट्पदी।
संहारदानादानादिशक्तियुक्ता यतो रलौ।।
एकत्वेन स्मरन्तीति शम्भुनाथो निरूचिवान्।"

(तं० आ० 15, 131-133)

द्र०:- (तं० आ० वि० खं०9, पृ० 69-70) **इति।**

~ आकारादिपञ्चकमयी : — **ते हि पञ्च ज्ञानेन्द्रियस्थानीया वर्णाः — आ, ल, छ, प, ट इति।**

~ इकारादित्रयमयी : — **तद्धि- इ, ङ, घ इति, क्रमेण च शुद्धविद्येश्वरसदाशिवाख्यतत्त्वत्रयस्थानीयम्।**

~ एकारादिपञ्चमयी : — **ते हि, ए, त, अं, श, म इति। पञ्चतन्मात्रतत्त्वस्थानीया : वर्णाः।**

~ क्षादिपञ्चमयी : — **ते हि क्ष, ष, ह, अः, स, इति पञ्चकर्मेन्द्रियस्थानीयाः।**

~ गादिषोडशमयी : — **ते हि : — ग, ख, क, ब, ऊ, उ, ण, ई, ध, च, थ, लृ, लृ, ॠ, ऋ न एते वर्णाः। तत्तच्छक्तिविशेषा वेशयुतं शिवतत्त्वमेवाभिव्यञ्जयन्ति। शक्तिशिवयोरभिन्नत्वेन शक्तितत्त्वमत्र न पृथगुपास्यम्। इति नैव पृथग्गणितम्।**

~ ठादिसप्तकमयी : — **ते, द्धिः — ठ, ढ, ड, य, भ, व, अ, इति। तत्र ठ इति पुरुषस्थानीयो वर्णः। शेषं च वर्णषट्कं कञ्चुकस्थानीयम्। तत्र ढ इति माया, ड इति कला, य इति अशुद्धविद्या, भ इति रागः, व इति नियतिः, अ इति कालः।**

~ तत्त्वक्रमतः — **मालिनीक्रमे संहारक्रमेण फादिनान्तं धरादिशिवान्तानि तत्त्वानि। यथा—**

"फादिनान्तां स्मरेद्देवीं पृथिव्यादिशिवान्तगाम्।"

(तं० आ०15, 374)

~ तत्त्वक्रमान्तरतः — **नादिफान्तरूपवर्णसमुदायरूपा मालिनी। तस्यां यस्तत्त्वानां विनिवेशोऽसौ विमर्शभेदेनानेकधा निरूपितोऽस्ति। यतो विमर्शानुकूलमनेके वर्णा अनेकधा प्रकाशनशीलाः, सर्वसर्वात्मकत्वात्। साधनाप्रक्रियासु यथा विमर्शमेव प्रकाशमानास्तत्तत्फलप्रदा भवन्तीति नात्रैवंविधेषूपासना रहस्यभूतेषु विषयेषु काऽपि शङ्का विधेया। यथा—**

"पराभट्टारिकैव हि प्रोक्तनयेन पश्यन्त्यां प्रतिबिम्बं स्वकमर्पयमाणा तत्समकालमेव स्वात्मतादात्म्यव्यवस्थितमध्यमधाम्नि भिन्नयोनितामश्नुवाना तत्तद्योनि बीजपरस्परसम्भेदवैचित्र्यस्य आनन्त्यादसंख्येनैव प्रकारेण तत्तत्कुलपुरुषादिभेदेनापरिगणनभेदभागिनी मालिन्येव। यथोक्तम् :—

"अनन्तैः कुलदेहैस्तु कुलशक्तिभिरेव च।
मालिनीं तु यजेद्देवीं परिवारितविग्रहाम्।। इति।"

उद्धृ०:- (प० त्री० वि०, पृ०,154)

~ तत्त्वसमन्वयतः — **आरोह क्रमानुसारम्—**

(क) फ = पृथ्वी तत्त्वम् इति - 1 यथा—

"फे धरातत्त्वमुद्दिष्टम्। "(मा० वि० तं० 4, 15)

(ख) द तः झं यावत् = जलादिप्रधानान्तानि तत्त्वानि = 23। यथा—

"..... दादि झान्तेऽनुपूर्वशः।
त्रयोविंशत्यबादीनि .....।।"

(तदेव 4, 15)

(ग) ठ तः अ इति=पुरुषतत्त्वं, पञ्च कञ्चुकानि, माया चेति 7 यथा—

"ठादौ च सप्तके सप्त पुरुषादीनि पूर्ववत्"

(तदेव 4, 16)

(घ) इ ङ घ इति=विद्या, ईश्वरतत्त्वं, सदाशिवतत्त्वं चेति 3 यथा—

"इ-ङ-घेषु त्रयं विद्यात् विद्यातः सकलावधिः"

(तदेव 4, 16)

सकलपदेनात्र सदाशिवतत्त्वमभिप्रेतम्

द्र०:- (तदेव 5, 32)

द्र०:- 'सकलम्' इति।

(ङ) ग तः न इति षोडशवर्णा अनुत्तरं शिवमेव तत्तदानन्दादिशक्तिविशेषसमाविष्टं सन्तमभिव्यञ्जयन्ति मालिनीक्रमोपास्तिमये शाम्भवोपाये। एते वर्णा = 16। यथा—

"शिवतत्त्वे गकारादिनान्तान् षोडश लक्षयेत्"

(तदेव 4, 17)

अयमस्य विषयस्य सार—

(क) पृथिव्यादिपञ्चभूतानि नग्नोऽन्तानि - फ, द, औ, ओ, ऐ, इति आरोहक्रमेण = 5।

(ख) गन्धादिशब्दान्तानि तन्मात्रतत्त्वानि - ए, त, अं, श, म, इति " " = 5।

(ग) पादाद्युपस्थान्तानि - क्ष, ष, ह, अः, स, इति आरोहक्रमेण = 5 कर्मेन्द्रियाणि

(घ) घ्राणादिश्रोत्रान्तानि - आ, ल, घ, छ, ट, इति " = 5 ज्ञानेन्द्रियाणि

(ङ) अन्तःकरणत्रयम् = र, ज, ञ, इति " = 3।

(च) प्रकृतिपुरुषौ = झ, ठ, इति " = 2।

(छ) कञ्चुकानि पञ्च = ढ, ड, य, भ, व, इति " = 5।

(ज) माया शुद्धविद्या च = अ, इ, इति " = 2।

(झ) ईश्वर-सदाशिवौ = ङ, ध, इति " = 2।

(ञ) तत्तच्छक्तिसमावेश वाञ्छिवः = ग, ख, क, ब, ऊ, उ, ण, ई, ध, च, थ, लृ, लृ, ॠ, ऋ, न इति 16।

~ तन्न्यासतः —

द्र०:- 'मालिनी' (2) इति।

~ देवी : — **शिवेन क्षोभिता पराशक्तिरेव मालिनी। ततः इयं परमार्थतया शक्तिः सती भोगमोक्षात्मकं सर्वमभीष्टं प्रसूते साधकस्य। यथा—**

"इत्येषा मालिनी देवी शक्तिमत्क्षोभिता यतः।।
कृत्यावेशात्ततः शाक्ती तनुः सा परमार्थतः।
अन्योन्यं बीजयोनीनां क्षोभाद्वैसर्गिकोदयात्।।
कां कां सिद्धिं न वितरेत्किं वा न्यूनं न पूरयेत्।"

(तं० आ०15, 125-127)

~ फादिपञ्चमयी : — **ते च फ, द, औ, ओ, ऐ, इति। स्वात्मनः शक्तिविशेषाणां बहिर्मुखप्रतिबिम्बमयं स्वात्मसंवित्प्रकाश एव प्रकाशमानं सत् तत्र च क्रमेण भूतपञ्चकरूपतयावभासमानं साक्षत्क्रियते मालिनी क्रमेण शाम्भवोपायाभ्यासिभिः। तत्र साधकः स्वात्मानं स्वविलासत एव तत्तत्त्ववर्णोभयावभासखचितं साक्षात्कुरुते सानन्दसन्दोहम्। स चाभ्यासस्तत्तद्वर्णध्वनीनामन्तरवधान- मात्रविषयतया-ऽभ्यस्यते। विनापि भावनात्मक- विकल्पज्ञानसाहाय्यमित्यन्तर-वधानचणैर्योगिवर्यैरेव स्फुटतया गृह्यतेऽयं विषयः।**

~ भेदोल्लासतः — **मध्यमात्मिका मालिनी साधकानां स्थूलस्य मलस्य शोधिका सती मलवैचित्र्यात् वर्णपद-मन्त्रभेदैर्भिन्नभिन्नाकारतामाप्नोति। यथा—**

"तत्रापि ..... वर्णपद-मन्त्रात्मकत्वम्, एतच्च शोधनकरणभावनेति मन्तव्यम्। .... उदितोदित-विजृम्भामयशाक्तप्रसरे तु मध्यमापदे शोधनकरणतैवान्तर्लीनपट-मलापसारणे बाह्यस्थूलमलस्येव तत्।"

(प० त्री० वि०, पृ०,158)

एतेन ज्ञायते यद् वर्णमन्त्रभेदोऽपि भेदत्वादेव मलात्मकतया व्याप्तः। तत् कथं मलमेव मलस्य शोधकमित्यत्र दृष्टान्तीकृताः कतकक्षारसावुनाद्या मलाः पटान्तर्लीनस्थूलतर मलशोधकाः। इति। पश्यन्त्यां मलाः सूक्ष्मास्तत एव मातृकायां न भेदावभासः स्फुटः कोऽपि मन्त्रपदकृतः।

~ महिममण्डिताः — **(1) समुच्छिन्नेऽप्युपासनाक्रमे क्वापि क्रमान्तरादुपात्तस्य मन्त्रोत्करस्य यदा मालिन्या न्यासो विधीयते तदा तदुपात्तमन्यशास्त्रीयमपि मन्त्रादि परिपूर्णफलदायि भवति। यथा—**

"तेन भ्रष्टे विधौ वीर्ये स्वरूपे वानया परम्।।
मन्त्रा न्यस्ताः पुनर्न्यासात्पूर्यन्ते तत्फलप्रदाः।"

(तं० आ० 15, 134-135)

(2) स्वल्पवीर्याः केवलभोगप्रदा अपि गारुडाद्या मन्त्रा मालिनीन्यासेन महावीर्यवन्तो भवन्तो भोगमोक्षोभयसिद्धये प्रभवन्ति। यथा—

"तस्मात्फलेप्सुरप्यन्यमन्त्रं न्यास्यात्र मालिनीम्।।
न्यसेज्जप्त्वापि च जपेदयत्नादपवृक्तये।"

(तं० आ०15, 138-139)

(3) परमेश्वरस्य मुख्यं यच्छाक्तं स्वरूपं तदभिव्यञ्जिका हि मालिनी। यथा—

"मालिनी हि भगवती मुख्यं शाक्तं रूपं बीजयोनिसंघट्टेन समस्तकामदुघम्। अन्वर्थं चैतन्नाम रुद्रशक्तिमालाभिर्युक्ता फलेषु पुष्पिता, संसारशिशिरसंहारनादभ्रमरी, सिद्धिमोक्ष-धारिणी, दानादानशक्तियुक्ता इति रलयोरेकत्वस्मृतेः।"

(तं० सा०,पृ०, 135)

अयमाशयः = मालिनी शक्तिमालायुक्ता,
मारिणी = संसारशैत्यनाशिनी इति।

द्र०:- अत्रैव - अं० 4 इति।

~ रादिचतुष्टयमयी : — **तद्वि तत्र मनोऽहङ्कारो, बुद्धिः (महत्तत्त्वम्) मूलप्रकृतिश्चेति तत्त्वचतुष्टयस्य स्वरूपमभिव्यनक्ति। तच्च र, ज, ञ, झ, इति।**

~ वस्तुतः — **(1) शिवशक्तिसङ्घट्टात्मकमुख्यमध्य-मधामस्वरूपा मालिनी भगवत्येव परं शाक्तं धाम। यथा—**

"एवं भगवती मालिन्येव मुख्यपारमार्थिकमध्यमधाम-शक्तिसतत्त्वम्।"

(प० त्री० वि०, पृ०,150-151)

(2) पराभट्टारिका-रूपायाः परावाचः प्रतिबिम्बनं यन्मध्यमावाचि तदेव मालिनीरूपम्। प्रतिबिम्बग्राहकाणां परस्परं वैचित्र्यात् प्रतिबिम्बेष्वपि वैचित्र्यम्। तत एव पश्यन्त्यां मातृका आदिक्षान्ता, मध्यमायां च मालिनी नादिफान्ता इति। यथा—

"तदेवं भगवती पराभट्टारिका पदभेदशालिनी मध्यमया मुख्यया वृत्त्या भगवन्मालिनीरूपैव अनन्ता परिगणनप्रदर्शितवैश्व-रूप्यस्वस्वरूपापीति, तत्रापि, च तथैव स्वात्मनि सर्वात्मकत्वेनां-शत्रयोद्रेकाद् वर्णपदमन्त्रात्मकत्वम्।"

(प० त्री० वि०, पृ०,158)

~ विशेषमाहात्म्यतः — **मातृकायां बीजानि पृथग् वर्गे योनयश्च पृथग् वर्गेषु। परं मालिन्यां बीजयोन्योः परस्पर- मिश्रीभावेन सद्योभोगापवर्गफलसिद्धिरयत्नत एव। यथा—**

"स्वरात्मकबीजव्यामिश्रीभावश्वेद्योनेस्तत्समस्तफलप्रसवो हन्त निर्यत्नः—इत्यपवर्गभोगावकृष्टपच्यावेव भवतः।"

(प० त्री०, वि० पृ०,149)

~ संवित्तिभेदतः — अस्ति तावन्मालिन्युपासनापद्धतौ कश्मीरपरम्परानुसारं दृष्टिद्वयं यत् साधकैरवलम्ब्यते। तच्च परसंवित्तिदृष्टिरपरसंवित्तिदृष्टिचेति। तत्र परसंवित्तिस्तावत् पराद्वैतमयी चिद्विमर्शमयी च दृष्टिः। तदनुसारमेकैकस्य वर्णस्यैकैकेन तत्त्वेन समन्वयो य उपरि वर्णवर्गाणां क्रमेण सविस्तरं प्रदर्शित एव। अपरसंविद्दृष्टिर्विश्वसिसृक्षादिलीला-विलाससम्भिन्ना चिद्विमर्शदृष्टिरित्यस्ति कश्मीरेषु गुरुपरम्परोप-देशनिष्ठा मतिः। तत्रापरसंवित्तिदृशा विमृष्टानि तत्त्वानि सर्वसर्वात्मकतास्वभावत्वेन परस्परं भेदे सत्यभिन्नानि। तं तेषां स्वभावमालम्ब्य मालिनीवर्णानामनियतेनैव क्रमेण द्वयस्य द्वयस्य सङ्करं समालम्ब्य तस्य स्वात्मचिद्विमर्शमयतास्वभावस्य साक्षान्निर्विकल्पं दर्शनमभ्यस्यते, शाम्भवसमावेशोद्दीपनार्थम्। तदत्रापरसंवित्तिदृशा मालिनीवर्णानां यस्तत्तत्त्वद्वयविशेषेण समन्वयोऽसौ त्रीशिकाविवरणे प्रदर्शितो विस्तरेण। तत्र नकारादारभ्य गकारं यावत् समन्वयस्तत्तच्छक्त्याविष्टेन शिवेनैव। कस्तत्र सङ्करस्यावकाशः। अग्रे यकारादेवासौ सङ्कीर्णः समन्वयः। तस्य तालिका या मुद्रिते ग्रन्थे लभ्यते, नासौ सन्तोषावहा। तस्यां लेखकसम्पादकानां प्रमादानां यतो महानवसरः। हस्तलिखितासु परात्रीशिकामातृकास्वपि भिन्नभिन्ना एव पाठाः, विरामचिह्नरहिताश्च। न च विशेषसा-धनारहस्यवित् कोऽपि लभ्योऽद्यत्वे। ततो विषयोऽयमव्याख्यात एव तिष्ठतु, यतो बहुतरसंशयग्रस्ताद् व्याख्यानादव्याख्यानमेव वरम्। आविर्भविष्यति कोऽपि सुप्रबुद्धो माहेश्वरो य एवंविध ानि साधनारहस्यानि स्पष्टतां नेष्यतीति मे मतिः।

~ सारतः — (क) पृथिव्यादिपञ्चभूतानि : — फ, र, औ, ओ, रे, इति। (आरोहक्रमेण)।

(ख) गन्धादिशब्दान्तानि तन्मात्रतत्त्वानिः — र, त, अं, श, म, इति। (आरोहक्रमेण)

(ग) ठ तः अ इति = पुरुषतत्त्वं पञ्चकञ्चुकानि, माया चेति 7। यथा—

"ठादौ च सप्तके सप्त पुरुषादीनि पूर्ववत्।"

(तदेव 4, 16)

(घ) इ ङ घ इति = विद्या, ईश्वरतत्त्वं सदाशिवतत्त्वं चेति 3। यथा—

"इङ्घेषु त्रयं विद्याद्विद्यातः सकलावधि।।"

(तदेव 4, 16)

द्र०:- (तदेव 5, 32)

सकलपदेनात्र सदाशिवतत्त्वमभिप्रेतम्।

द्र०:- 'सकलम्' इति।

(ङ) ग तः न इतिषोडशवर्णा अनुत्तरंशिवमेव तत्तदानन्दादिशक्तिविशेषसमाविष्टं सन्तमभिव्यञ्जयन्ति मालिनी क्रमोपास्तिमये शाम्भवोपाये। एवे वर्णाः = 16। यथा—

शिवतत्त्वे गकारादिनान्तान् षोडश लक्षयेत्।

(तदेव 4, 17)

मालिनीकल्पोत्तरम् : — किमप्यागमिकसाधनापरं पुस्तकं विज्ञानकौमुद्यां सोद्धरणमुल्लिखितम्। एतदेवोक्तम् यथा—

"अध्वषट्कादि सन्त्यज्य जित्वा चेन्द्रियमण्डलम्।
कारणैः कृतकृत्योऽसौ राजते सूर्यवद् भुवि।।
इत्यादिना मालिनीकल्पोत्तरेऽप्यादिष्टम्।"

(वि० कौ०, पृ०,24)

मालिनीतन्त्रम् : — बृहच्छरीरं किमपि पूर्वोत्तरभागभिन्नं त्रिकागमशास्त्रम्। अस्यैवोत्तरभाग इदानीं मालिनी विजयोत्तर-संज्ञया प्रसिद्धः। सिद्धयोगीश्वरीतन्त्रमित्यप्यस्य मानान्तरम्। वस्तुतः सिद्धयोगीश्वरीमतप्रतिपादकमिदं तन्त्रम्। अन्यानि च सिद्धातन्त्रादीनि तत्प्रतिपादकानि। सिद्धयोगीश्वरीमतमेव त्रिकशास्त्रम्। तत्र मुख्यता मालिनी विजयोत्तरस्यैव। यथा—

"सिद्धयोगीश्वरीतन्त्रं नवकोटिप्रविस्तरम्।।
यत्त्वया कथितं पूर्वं भेदत्रयविसर्पितम्।
मालिनीविजये तन्त्रे कोटित्रितयलक्षिते।।"

(मा० वि० तं०1, 8-9)

सम्पूर्णं मालिनीतन्त्रमिदानीं नैव क्वापि लभ्यम्।

मालिनीविजयवार्त्तिकम् : — मालिनीविजयोत्तरतन्त्रस्य सारमादाय निर्मितो वार्त्तिकग्रन्थः। अस्य ग्रन्थस्य निर्माता-चार्याभिनवगुप्तः। ग्रन्थस्य भागद्वयम्, तच्च काण्डद्वयमित्युक्तम्। प्रथमे तावत् काण्डे 1135 वार्तिकानि द्वितीये पुनः 335।

"मालिनी विजयोत्तरवार्त्तिके" इति काण्डद्वयपुष्पिकयेद-मनुमातुं शक्यते यन्मालिनीविजयतन्त्रस्य पूर्वभागोऽप्यासीत् कश्चनय इदानीं नैव लभ्यः। यथोक्तम् : —

"मालिन्यादिमवाक्ये वार्तिकमेतद्रचयति स्म।।"

(मा० वि० वा०2, 335)

अनेन वाक्येन विद्वांसः एवमनुमिन्वन्ति यन्मालिनी-विजयोत्तरतन्त्रस्य प्रथमं वाक्यमेवादाय निर्मितोऽयं वार्तिक-ग्रन्थ आचार्येणेति। यथा—

"इत्येक एव श्लोकोऽयं चिदात्मा भैरवः स्वयम्।
समस्तभावसन्दर्भनिर्भरो व्याकृतः स्फुटम्।।"

(मा० वि० वा०2, 243)

अनेन च पद्येनोपरितनमनुमानं पुष्टिं याति। परमत्र वार्तिके मालिनीविजयोत्तरस्य बहूनां प्रकरणानामाशयमादाय बहूनां च तत्रत्यानां पद्यानां सङ्केतमात्रेण निर्देशं विधाय बहुतरमुक्तमस्ति तत्र तत्र। तथा हि मालिनीतन्त्रपद्यसङ्केतो यथा—

(1) "तथा च वक्ष्यते तत्त्वमभिन्नमपि पञ्चधा।।
सव्यापाराधिपत्वेन तद्धीनप्रेरकत्वतः।
इच्छानिवृत्तेः स्वच्छत्वादित्याद्यैर्वाक्यसञ्चयैः।।

(मा० वि० वा०1, 50-51)

तच्च वाक्यविस्तरम् यथा—

"सव्यापारादिभेदेन सर्वत्रापि विचक्षणः।"

(मा० वि० त० 13, 25)

"इच्छानिवृत्तेः स्वस्थत्वादभिन्नमपि पञ्चधा।
इति पञ्चात्मके भेदे विज्ञेयं वस्तु कीर्तितम्।।"

(तदेव 2, 35)

(2) "वक्ष्यते च जगद्धातुः कथितेत्यादितः परम्।
सैकापि सत्यनेकत्वं गच्छतीति महेशिना।।

(मा० वि० वा० 1, 94)

तद्वाक्यं यथा—

"या सा शक्तिर्जगद्धातुः कथिता समवायिनी।
इच्छात्वं तस्य सा देवी सिसृक्षोः प्रतिपद्यते।।
सैकापि सत्यनेकत्वं यथा गच्छति तच्छृणु।"

(मा० वि० तं० 3, 5-6)

(3) "यो हि यस्माद् गुणोत्कृष्ट इति चोर्ध्वे भविष्यति।"

(मा० वि० वा० 1, 213)

तन्त्रे प्रोक्तं यथा—

"यो हि यस्माद् गुणोत्कृष्टः स तस्मादूर्ध्व उच्यते।।"

(मा० वि० तं०, 1, 60)

"यो हि यस्माद् गुणोत्कृष्ट इत्यतः परमेश्वरः।
अभाषत .....।।"

(मा० वि० वा० 1, 995)

(4) "अष्टादशे तत्पटले तत्त्वं सम्यग्विभाव्यते।।
प्राणायामादिकं यत्र हेयमित्येव वर्ण्यते।"

(मा० वि० वा० 2, 2-3)

उक्तं तद्यथा—

"प्राणायामादिकैर्लिङ्गैर्योगाः स्युः कृत्रिमा मताः।
तेन तेऽकृतकस्यास्य कलां नार्हन्ति षोडशीम्।।"

(मा० वि० तं० 18, 19)

"एतदष्टादशे तत्त्वमधिकारे भविष्यति।"

(मा० वि० वा० 1, 632)

इत्येवंविधानां भूयसां मालिनीविजयोत्तरवाक्यानां तात्पर्यं प्रति एते निर्देशा मालिनीविजयवार्त्तिके। ततो नैव कथमप्येकमेवागमवाक्यमत्र ग्रन्थे निरूपितमिति विदाङ्कुर्वन्तु विद्वांसः। अथवा मालिनीविजयोत्तरे तन्त्रे यदादिवाक्यं तेन वक्तुमिष्टो यो दर्शनसिद्धान्तः स एव सुविस्तारितोऽत्र वार्त्तिके। यतो मालिनीविजयोत्तरस्यादिमे वाक्ये "ज्ञानचन्द्रमरीचयः" इति समस्तपदेन वर्णितं शास्त्रप्रतिपाद्यं सारभूतं वस्तु; वार्तिकस्यान्तिमासु पङ्क्तिषु चापि ज्ञानचन्द्रेति पदमुपात्तमुपसंहारावसरे। अन्तिमे च श्लोके स्पष्टमेवोक्तं यदिदं वार्त्तिकं मालिनीतन्त्रस्यादिमं वाक्यमधिकृत्यैव निर्मितमिति।

तदत्र विमृश्या शास्त्रपंक्तिरेषा :—

"जयन्ति जगदानन्दविपक्षक्षपणक्षमाः।
परमेशमुखोद्भूतज्ञानचन्द्रमरीचयः।।"

(मा० वि० वा० 1, 14)

(मा० वि० तं० 2, 1)

तदयं विषयः संशयित एव। कदाचित् पाठभेदोऽत्र स्यात्। किञ्च :—

मालिनीविजयोत्तरस्य प्रथमः श्लोक उपोद्घातकल्पः। उपोद्घाते सर्वस्य शास्त्रस्य सारं बीजरूपतया निहितं तिष्ठति, विशेषतः महागुरुभिः कृतेषु शास्त्रेषु। तदेतदीश्वरप्रत्यभिज्ञाविमर्शिन्या उपोद्घाते स्पष्टं प्रतिपादितमाचार्याभिनवगुप्तेन तदिदं मालिनीविजयवार्तिकं मालिनीविजयोत्तरस्य सारं स्पष्टं व्याकरोति, तच्च सारं बीजरूपतया जयन्ति जगदानन्दे त्याद्युपोद्घातश्लोके पिण्डीकृत्य निहितम्। ततो वार्त्तिकमेतत्तस्य शास्त्रस्य वृहदुपोद्घतकल्पं सत् प्रथमे पद्ये एव बीजरूपतया निवेशितानां दर्शनसिद्धान्तानां प्रकाशकं सत् तस्यैव सुविस्तृतं व्याख्यानमित्येवमपि चरमं पद्यं व्याख्यातुं शक्यते। यद्यदुपोद्घत पद्ये बीजरूपतया निहितं, तत्तदेव बहुष्वधिकारेषु विकासितं, वार्त्तिके च स्पष्टीकृतम्। निर्णीतन्तावत् पराद्वैतं त्रिकशास्त्रसम्मतमत्र वार्त्तिके सुविस्तरतः। अत्रागमिकसिद्धान्ता अपि प्रासङ्गिकत्वेन विस्तरेण प्रतिपादिताः।

केषाञ्चिच्छास्त्रकाराणां माहेश्वरत्वं ध्वनितम्। तांश्च लोके तत्त्वमेतदजानन्तो विद्वांसः शास्त्रान्तरतान् मन्यन्ते। तद्यथा 1-777, 78 इत्यत्र भट्टलोल्लटस्य माहेश्वरत्वं ध्वनितम्। वय्याभिधानस्य 1-844 श्रीमद्भवतीत्यस्य च गुरोः 1-835 इत्यत्र कीर्तनं कृतम्। ततो न भट्टलोल्लटो मीमांसाशास्त्र-मात्रे रतः। तज्झल्लकीकरवामनाचार्येणैतत्तत्त्वमजानता तथा निर्दिष्टमिति मन्तव्यम्।

तथाविधानां त्रिकसाधनारहस्यानां विषयेऽत्र प्रकाशः प्रसारितः ये सिद्धान्ताः सामान्यमतिभिर्नैवावबोद्धुं शक्याः, पारमेश्वरानुग्रहपात्रैरेव च ये सम्यगवबोध्याः। अत एवान्ते प्रोक्तं यदिदं ज्ञानं समयग्रहीतुं न कश्चनाधिकारी दृश्यत इति। यथा—

"ये सम्यक् प्रविचारिणो ननु शिवाः कस्तान् प्रति प्रोद्यमः
किं तैर्ये प्रविमर्शदूरशिखरारोहक्रमे पङ्गवः।
पाषाणायितवृत्तयः पुनरमी ये शास्त्रवन्ध्या नराः
संरम्भः प्रलयाम्बुधेरिव ततः स्वात्मन्ययं घूर्णते।।"इति

(मा० वि० वा० 2, 333)

अत्र वार्त्तिके नैव केनापि विदुषा टीका कृता। सम्पादनमपि नैव सम्यक् सन्तोषावहम्। तथापि प्रकाशितं सदेतत् प्रकाशयति विदुषां बुद्धीरिति नास्त्यत्र विषये संशयावकाशः। यथा—

"इत्थं य एष शास्त्रार्थः स्थितः शक्तिप्रभावतः।।
अन्तःकृताशेषतत्त्ववर्णादिभरनिर्भरः
सर्वाभिधो भैरवात्मा सोऽयमेव स्वरूपभाक्।।
शास्त्रेऽस्मिन् परमेशेन ज्ञानचन्द्राख्यया कृतः"

(मा० वि० वा०2, 330-32)

"तद् व्याख्यातमिदं प्रसन्नगहनं वाक्यं मया स्वागमप्रामाण्यप्रतिपादनक्रमवशात्तत्तत्प्रसङ्गादपि।"

(तदेव 2, 332)

अस्य ग्रन्थस्योल्लेखस्तन्त्रालोके "मालिनीश्लोकवार्त्तिकम्" **इति नाम्ना कृत आचार्येणः। यथा—**

"मयैतत् स्रोतसां रूपमनुत्तरपदाद् ध्रुवात्।
आरभ्य विस्तरेणोक्तं मालिनीश्लोकवार्त्तिके।।"
(तं० आ० 37, 30)

"अन्वर्थं चात्र दर्शितं तन्त्रालोकेश्लोकवार्तिके च।"
(तं० सा०, पृ०,107)

तन्त्रालोकोऽप्याचार्याभिनवगुप्तेन 'वार्त्तिकम्' इति नाम्नोल्लिखितमेकस्मिन् स्थले बृहत्यां प्रत्यभिज्ञायाम्। यथा—

"मया च वार्तिक एतद् व्याख्यातम्-
स्वचित्ते वासना .....
इत्यारम्य .....
.... ज्ञानमेवेह सा ततः।"

इत्यन्तमुद्धृतास्तन्त्रालोकपंक्तयः (तं.आ. 1- 151 155) द्रष्टव्याः

(ई० प्र० वि० वि०, खं०3, पृ०,259)

~ तद्विषयसूचिः (नवमे काण्डे)—

विषयाः	कारिकाः
(1) मङ्गलादिकम्।	1-13
(2) परशिव एव सर्वेषां शास्त्राणां प्रथमं परिस्पन्दनम् इति। प्रसङ्गतश्च परशिवस्य यः पराद्वैताख्यः स्वभावस्तस्य किञ्चित् प्रकाशनम्।	14-159
(3) त्रिकशास्त्राणां समुन्मेषस्य स्रोतः।	160-167
(4) पञ्चस्रोतसां संक्षिप्तः परिचयः।	168-171
(5) ईशानमुखस्य विस्तरतः प्रतिपादनं प्रासङ्गिकं च प्रमेयजातम्।	171-205
(6) तत्पुरुषमुखस्य प्रतिपादनं सप्रासङ्गिकविषयम्।	206-248
(7) सद्योजातमुखस्य प्रतिपादनं सप्रासङ्गिक-विषयम्।	249-270
(8) वामदेवमुखस्य प्रतिपादनं सप्रासङ्गिकविषयम्।	271-292
(9) क्रियाशक्तिस्वरूपनिरूपणम्।	292-346
(10) अधरदिङ्मुखस्य प्रतिपादनं सप्रासङ्गिकविषयम्।	347-369
(11) दशाष्टादशाद्यागमानामवतरण-सिद्धान्तः।	369-373
(12) शिवरुद्रभैरवाख्यानामागम-शास्त्राणामुद्गमस्य प्रकारः।	392-394
(13) त्रिकशास्त्राणामाविर्भावः।	393-399
(14) सुशिवावरणस्य प्रतिपादनम्।	400-410
(15) परशिवे परावाग्रूपतया स्पन्दमानस्य शास्त्रजातस्य पश्यन्त्यादिभूमिकासु प्रसरणम्।	410-426
(16) संविद एव स्वतः प्रामाण्यं, तस्य एव व्यावहारिकमातृमेयमानतया प्रसरणम्।	427-435
(17) न्यायवैशेषिकसम्मतस्य प्रत्यक्ष-प्रमाणस्य परीक्षणम्।	436-462
(18) मनःप्रभृतीनां ज्ञानकरणानां विषये परमतपरीक्षणम्।	463-522
(19) कर्मेन्द्रियणानां विषये परमतपरीक्षणम्।	523-551
(20) सन्निकर्षाणां सिद्धान्तस्य परीक्षणम्।	552-560
(21) नैयायिकाभिमतस्यानुमानस्य प्रामाण्य-परीक्षणम्।	561-581
(22) न्यायशास्त्रसम्मतो योऽनुमानशब्दाभ्यां प्रत्यक्षस्य विशेषस्तस्य परीक्षणम्।	582-604
(23) अद्वैतदृष्ट्या मातृमानमेयस्थितिः।	605-645
(24) सांख्यदृष्टिमाश्रित्याप्यग्रे शैवदृष्टेरा-लम्बनस्यैव परपुरुषार्थसाधकत्वम्।	646-650
(25) परशिवस्यैव बद्धमुक्तादिपदपरिग्रहः।	650-658
(26) बन्धमोक्षयोः पारमेश्वरलीलाधीनत्वम्।	659-666
(27) व्यवहारेऽपि पारमेश्वरप्रकाशांशमाहात्म्यम्।	667-683
(28) निग्रहानुग्रहस्वातन्त्र्यलीला परमेश्वरस्य शक्तिपातनिरूपणं च प्रासङ्गिकम्।	684-703
(29) स्वमतेन प्रत्यक्षप्रामायणविचारः प्रासङ्गिकञ्चप्रत्यक्षाद्वैतम्।	703-764
(30) स्वमतेनानुमानप्रामाण्यविचारः।	764-789
(31) कञ्चुकादिप्रामाण्यविचारः।	789-839
(32) प्रकृतिप्रामाण्यविचारः।	839-844
(33) अन्तर्बाह्यकरणप्रामाण्यविचारः।	844-852
(34) प्रमेयप्रामाण्यविचारः।	853-858
(35) उत्तराधराणां तत्त्वानां क्रमाक्रमादिविचित्रे पूर्णपूर्णतरादिरूपे परस्परं प्रामाण्यप्रमेयते षोडशप्रकारे।	859-882
(36) मातृकावर्णरूपतया षोडशधा स्थितिः शिवतायाः।	883-889
(37) विसर्गस्य जगदानन्दरूपता चर्याक्रमोपयोगश्च प्रासङ्गिकः।	889-901
(38) योन्यात्मकमातृकावर्णनिरूपणम्।	901-908
(39) पराद्वैतसिद्धान्तप्रतिपादनम्	908-929
(40) द्वादशकालीनिरूपणम्।	930-950
(41) मण्डलादिविधेस्तत्त्वम्।	951-953
(42) पाञ्चदश्यादिधारणाप्रतिपादनं प्रसङ्गतश्च-प्रमातृवर्गाणां परापरादिरूपताप्रदर्शनम्।	954-981
(43) सूक्ष्मतरतुटिकलनाप्रकारः।	981-995
(44) समावेशप्रकाराः।	996-998
(45) जाग्रदादिदशानां वैचित्र्य सविस्तरम्।	999-1012
(46) अध्वभेदरहस्यचर्चा।	1013-1036

(47) परमेश्वरस्यैव सर्वाकारतया प्रकाशनम्। 1037-1061
(48) कर्मकर्तृत्वाभिमानस्य प्रभावः शिवानलस्य च कर्मफलप्लोषकत्वम्। 1061-1098
(49) संविदेव सर्वं परमार्थतः। 1098-1120
(50) दीक्षाया उपयोगिता। 1121-1135

(द्वितीये काण्डे)

(51) स्वसंविदोऽबाध्यं प्रामाण्यम्। 1-18
(52) पराद्वैतसिद्धान्तसाक्षात्कारः स्वसंवेदनात्मक-शाम्भवोपायतः। 18-25
(53) उच्चारात्मकाणवधारणासाहाय्येन शाक्तोपायेनानन्दभूमिकाचमत्कारप्रकारः। 26-56
(54) देहकम्पनिद्रात्मकं चिह्नद्वयमुच्चार-योगसाफल्यस्य। 57-56
(55) लिङ्गत्रयनिरूपणम्। 61-69
(56) अयत्न एव भैरवात्मकनिज-स्वरूपप्रवेशः। 69-76
(57) बाह्यं प्रमेयमालम्ब्य स्वरूपप्रवेशविधिः। 77-85
(58) हठतः स्वरूपप्रवेशविधिः। 86-92
(59) योगिनीदीक्षया स्वरूपसाक्षात्कारः। 93-99
(60) स्वकीयेनोद्यमेन स्वस्वरूपप्रवेशः। 100-105
(61) अनुपाया स्वस्वरूपस्थितिः। 105-108
(62) बलात्कारेण क्रियमाणेन मनो-निरोधेन हानिः। 108-113
(63) अनुपाया स्वरूपस्थितिर्व्युत्थानेऽपि। 114-120
(64) उपायानामप्युपयोगिता। 121-126
(65) स्वरूपनिष्ठस्य योगिनो लोकव्यवहारोऽपि योगसाधनैव। 127-134
(66) फलार्थिनां ध्यानादनायासध्यानस्य विशेषः। 135-138
(67) कुलयोगिनो विशेषः। 139-143
(68) वेदसांख्यार्हद्वादादिमार्गेभ्यः शैवमार्गस्य विशेषः। 144-151
(69) विधिनिषेधानामत्रानुपयुक्तता। 152-156
(70) मलस्योपरोधिकाशक्तिरनियतकारण-कश्च पाक इत्युभयमसमञ्जसम्। 157-186
(71) कर्मणां सृष्ट्यादिकारणत्वेऽसमञ्जसत्वम्। 187-205
(72) परमेश्वरस्यैव बन्धमोक्षलीलाभासकत्वम्। 206-224
(73) दीक्षादौ मन्त्राद्युपयोगस्योपपत्तिः। 225-234
(74) पराद्वैतसिद्धान्तप्रतिपादनम्। 234-242
(75) स्वसंविद एव विश्वाकारतया स्थितिः। 243-268
(76) प्रकृतस्य शास्त्रस्य तद्वर्गीयाणां च शास्त्रान्तराणामुद्गमः। 269-276
(77) शिष्यस्य गुरोश्चाधिकारानधिकार-प्रयोजका विशेषाः। 276-331
(78) शास्त्रोपसंहारः। 332-335

~ तन्निर्माण क्रिक्रमः

मालिनीविजयोत्तरम् : — (1) त्रिष्वपि त्रिकागमेषु प्रधान आगमः। इदानीं सम्पूर्णोऽसौ नैव क्वापि लभ्यः। केवलमस्योत्तरभाग एव लभ्यते "मालिनीविजयोत्तरम्" इति नाम्ना प्रसिद्धः। तन्त्रालोकादेरेतज्ज्ञायते यत्तत्र तन्त्रे प्रकरणविभागः पटलसंज्ञया कृत आसीत्। परं लभ्यमाने मालिनीविजयोत्तरेऽसावधिकारसंज्ञया कृतोऽस्ति। तन्त्रालोके, तट्टीकायां च जयरथविरचितायां केऽपि श्लोका मालिनीविजयात् केचिच्च मालिनीविजयोत्तरादुद्धृताः सन्ति। परं ते श्लोकाः लभ्यमाने मालिनीविजयोत्तरे नैव विद्यन्ते। तेनासौ ग्रन्थोऽपि मूलभूतस्य तन्त्रस्य संक्षेप एव भवेत् कदाचित्। ते च श्लोका एते।

"मालिन्यां सूचितं चैतत् पटलेऽष्टादशे स्फुटम्।
न चैतदप्रसन्नेन शङ्करेणेति वाक्यतः।।
इत्यनेनैव पाठेन मालिनीविजयोत्तरे।"

(तं० आ०1, 244-245)

अत्र मालिन्यामिति मानिनी विजयोत्तरे इति च नामद्वयं निर्दिष्टम्।

"तत्र हि :—
'अनायासमनारम्भनुपायं महाफलम्।
श्रोतुमिच्छामि योगेश योगं योगविदांवरं।।'
इति देव्या पृष्टेः—
'शृणु देवि प्रवक्ष्यामि योगामृतमनुत्तमम्।
यत्प्राप्य शिवतां मर्त्या लभन्त्यायासवर्जिताः।।
न चैतदप्रसन्नेन शङ्करेणोपदिश्यते।
कथञ्चिदुपलब्धेऽपि वासना न प्रजायते।।'
इत्याद्युपक्रम्य :—
'तस्मात्तदभ्यसेन्नित्यमविरक्तेन चेतसा।
स विसर्गो महादेवि यत्र विश्रान्तिमर्हति।।
गुरुवक्त्रं तदेवोक्तं शक्तिचक्रं तदुच्यते
तदेव सर्वमन्त्राणामुत्पत्तिस्थानमुत्तमम्।।'

(तं० आ० वि०, खं०1, पृ०, 257)

इत्याद्युक्तम्।
अन्यत्रापि .....।
.....।।
.....
वासनामात्र लाभेऽपि योऽप्रमत्तो न जायते।
तमनित्येषु भोगेषु योजयन्ति विनायकाः।।"

(शि० सू० वि०, पृ०, 34)

उत्तरार्द्धमस्य श्लोकस्य जयरथेनाप्युद्धृतम्

(तं० आ० वि०, खं० 1, पृ०, 53)

(2) एते श्लोकाः सर्वे बृहत्तरस्य मालिनीविजयतन्त्रस्येति प्रतीयन्ते। मालिनीविजयवार्तिकस्य द्विखण्डत्वेनाप्येतदेव प्रतीयते

यन्मूलभूतं मालिनीविजयतन्त्रमपि द्विखण्डमभूदिति। सिद्धयोगीश्वरीमतमेव त्रिकागमशास्त्रम्। तत्र प्रधान आगमो मालिनीविजयोत्तराख्य एव। उपलभ्यमानश्चागमस्ततो भिन्नो वा, तत् संक्षेपभूतो वेत्यनुमातुं शक्यते। विशेषतोऽस्य पटलपदस्थानेऽधिकारपदप्रयोगात्। इदानीं लभ्यमाने तन्त्रेऽपि बृहत्तन्त्रोल्लेखो विद्यते यथा—

"मालिनीविजये तन्त्रे कोटित्रितयलक्षिते।।
योगमार्गस्त्वया प्रोक्तः सुविस्तीर्णो महेश्वर।
भूयस्तस्योपसंहारः प्रोक्तो द्वादशभिस्तथा।।
सहस्रैः सोऽपि विस्तीर्णो गृह्यते नाल्पबुद्धिभिः।"

(मा० वि० तं० 1, 9-11)

(3) क्रियाज्ञानोभयप्रधानमिदं मुख्यं त्रिकागमशास्त्रम्। अस्माद् बहुधा समुद्धृतानि वाक्यानि तन्त्रालोकादावुपलभ्यन्ते। अस्योत्तरभागः सर्वश्रेष्ठशास्त्रत्वेन प्रतिपादितोऽभिनवगुप्ताचार्येण तन्त्रालोके तद्विवेके च जयरथेन। यथा—

"तत्र क्रियाप्रधानं सिद्धातन्त्रं, ज्ञानप्रधानं ना (वा) मकतन्त्र तदुभयमयं मालिनीमतम्।"

(तं० आ० वि०, खं० 1, पृ०, 49)

'प्रत्येकं तच्चतुर्धैवं मण्डलं मुद्रिका तथा।।
मन्त्रो विधेति च पीठमुत्कृष्टं चोत्तरोत्तरम्।
विद्यापीठप्रधानं च सिद्धयोगीश्वरीमतम्।।
तस्यापि परमं सारं मालिनीविजयोत्तरम्।"

(तं० आ० 37, 23-25)

~ तत्पद्यद्वयम् : — **उद्धृतं स्पन्दप्रदीपिकायाम्। यथा—**

(1) "मालिनी विजयेऽपि : —
'यत्राधारविनिर्मुक्तो जीवो लयमवाप्स्यति।।
तत्स्थानं सर्वमन्त्राणामुत्पत्तिक्षेत्रमिष्यते। इति।'

(स्पं० प्र०, पृ०, 32)

एतत् पद्यं तावन् मुद्रिते पुस्तके लभ्यते।

(मा० वि० तं० 18,34-35)

(2) "धर्माधर्मान्तरे चित्तं निरुद्धं यत्तदा तु सः।
यद्वक्ति स भवेन्मन्त्रः किं पुनर्मातृकोत्थितः।। इति।"

(स्पं० प्र०, पृ०, 32)

एतत् पद्यं न लभ्यते मुद्रिते पुस्तके।

~ तदायातिक्रमः — **इदं तन्त्रमघोरेश उमापतिनाथं, स भगवतीमुमामसौ कार्तिकेयमसौ च सनत्कुमारादीनृषीनुपदिदेश। यथा—**

"जगदर्णवमग्नानां तारकं तारकान्तकम्।
सनत्कुमारसनकसनातनसनन्दनाः।।"

(मा० वि० तं० 1,2)

"भुक्तिमुक्तिप्रदातारमुमेशममरार्चितम्।।
स्वस्थानस्थमुमादेवी प्रणिपत्येदमब्रवीत्।"

(तदेव, 1, 7-8)

"शृणु देवि प्रवक्ष्यामि सिद्धयोगीश्वरीमतम्।
यन्न कस्यचिदाख्यातं मालिनीविजयोत्तरम्।।
मयाप्येतत्पुरा प्राप्तमघोरात्परमात्मनः।"

(तदेव 1, 13-14)

अघोरश्च भगवाननन्तनाथो यो मायाया अधिपतिः।

~ तद्विषय-सूचिः—

विषयाः	अधिकाराः	कारिकाः
(1) उपोद्घातः।	1	1-14
(2) सृष्टिवर्णनम्।	1	14-35
(3) अनुग्रहलीलावर्णनम्।	1	36-41
(4) शक्तिपातोपदेशः।	1	42-50
(5) प्रमातृभेदः।	2	1-8
(6) गुरुनिरूपणम्।	2	9-16
(7) आणवसमावेशप्रकाराः।	2	17-20
(8) उपायत्रयलक्षणानि	2	21-25
(9) पाञ्चदश्यादिधारणाः।	2	26-35
(10) जाग्रदादीनां विशेषाः।	2	36-42
(11) अण्डपुरादिधारणाः।	2	48-60
(12) भगवच्छक्तेरभिव्यक्तिभेदाः।	3	1-9
(13) मातृकानिरूपणम्।	3	9-14
(14) मातृकाधिष्ठातृदेवगणाः।	3	15-29
(15) अघोरदिशक्तिव्रात-निरूपणम्।	3	30-34
(16) मालिन्यावर्णनम्।	3	35-41
(17) रहस्यमन्त्राणां मातृकायाश्चोद्धारस्य विधिः मन्त्रन्यासश्च।	3	41-51
(18) परायाः रुद्रशक्तेर्मन्त्राः।	3	52-58
(19) रहस्यमन्त्रान्तराणि।	3	59-68
(20) योगे दीक्षायां च मन्त्राणामुपयोगिता।	4	1-8
(21) मालिनीवर्णतत्त्ववर्णनम् (एकैकशः)।	4	9-18
(22) मालिन्यां रहस्यमन्त्राः।	4	19-26
(23) ज्ञानिनिरूपणम्।	4	27-32
(24) योगिनिरूपणम्।	4	33-41
(25) भुवनाध्वनिरूपणम्।	5	1-36
(26) तत्त्वदीनां शरीराङ्गेषु न्यासः।	6	1-30
(27) मुद्रानिरूपणम्।	7	1-36
(28) भावनाप्रधानो यागविधिः (समयदीक्षायाम्)।	8	1-35
(29) क्रियादीक्षाविधिः।	9	1-83
(30) दीक्षायामभिषेकादिविधिः।	10	1-38
(31) सद्योभुक्तिमुक्तिप्रदा दीक्षा।	11	1-47
(32) व्यावहारिक-सिद्धिप्रदाः। पार्थिवाद्याः भुक्ति-मुक्तिप्रदाः		

योगधारणाः।	12	1-42
(33) भूतजयादिकारिण्यो वारुण्याद्याः भुक्तिमुक्तिप्रदाः योगधारणाः।	13	1-42
(34) बहुविधसिद्धिप्रदः तन्मात्रधारणाविधिः।	14	1-44
(35) अक्षगणधारणाविधिः व्यावहारिकैश्वर्यप्रदः।	15	1-47
(36) विविधसिद्धिप्रदा अहङ्कार-बुद्धिगुणाद्यालम्बनाःधारणाः।	16	1-68
(37) प्राणायामा अन्याश्च काश्चन धारणाः।	17	1-40
(38) आध्यात्मिकलिङ्गोपासना पराद्वैतदृष्ट्या।	18	1-16
(39) पराद्वैतनिष्ठा उत्कृष्टतरा धारणा।	18	17-56
(40) ज्ञानाहरणविधिस्तत्-प्रतीकारश्च।	18	56-71
(41) दुर्वृत्तं गुरुं प्रति शिष्यस्य व्यवहारः।	18	71-73
(42) पराद्वैतनिष्ठस्य साधकस्य विधिनिषेधोत्तीर्णता।	18	74-81
(43) कुलचक्रोपासनाविस्तारः तत्फलञ्च।	19	1-27
(44) तत्रैव मातृकावर्णोपयोगतो-विशेषफलम्।	19	28-30
(45) तत्रैव पिण्डस्थादीनां भेदा विशेषप्रकाराः।	19	31-48
(46) मातृकावर्णानाश्रित्य बहुतर-फलप्रदा उपासनाः कौलिक्यः।	19	49-60
(47) आप्यायनवशीकरणादि-सिद्धिप्रदाः कौलिक्यो मातृकोपासनाः।	19	60-88
(48) सूचर्यादिदेवताकर्षणविधिः कौलिकस्तत्फलञ्च।	19	88-101
(49) आणवमुपायमाश्रित्य शाक्तेन विधिना विशेष-प्रकारकाणां पिण्डस्थादीनां प्राप्तिः कम्पोद्भवादीनां चानुभूतिः।	20	1-26
(50) विशेषप्रकारेण करणयोगेन रुद्रशक्तिसमावेशस्तत्-फलानि च।	20	26-35
(51) तेनैव विधिना मन्त्रसाहाय्येन विविधानामागमिकानां देवानामुपासना-क्रमस्तत्फलञ्च।	20	36-62
(52) विविधाग्राह्यालम्बनाः करणयोगमय्यो चन्द्रा-कृष्ट्यादिधारणा-स्तासां फलानि च।	21	1-36
(53) तथाविधाः सूर्याकृष्ट्यादि-धारणाः।	22	1-25
(54) खगेश्वरीमुद्रा, तत्फलञ्च।	22	26-34
(55) अनाहतनादधारणा।	23	1-7
(56) छायापुरुषधारणा।	23	8-12
(57) विविधमन्त्रोपासनाः पीठोपासनाश्च।	23	13-31
(58) स्वप्नज्ञानविधिः।	23	32-37
(59) शास्त्रस्योपसंहारः।	23	37-44

~ सर्वोत्कृष्टम् : — मालिनीविजयोत्तरस्य तन्त्रस्य सर्वश्रेष्ठत्वमुक्तं मन्त्रालोके। यथा—

न तदस्तीह यन्न श्रीमालिनीविजयोत्तरे
देवदेवेन निर्दिष्टं स्वशब्देनाथ लिङ्गतः।।

~ तन्निर्माणक्रियाक्रमः — तन्त्रालोकात् पूर्वमेतस्य निर्माणं कृतमाचार्यवर्यैः। यतस्तन्त्रालोके एतस्योल्लेखः "मालिनीश्लोकवार्त्तिके" इत्येवं कृतो वर्तते। यथा—

"मयैतत् स्रोतसां रूपमनुत्तरपदाद् ध्रुवात्।
आरभ्य विस्तरेणोक्तं मालिनीश्लोकवार्तिके।।"
(तं० आ० 37, 30)

दशाष्टादशवस्वष्टभिन्नं यच्छासनं विभोः।
तत्सारं त्रिकशास्त्रं हि तत्सारं मालिनीमतम्।।"
(तं० आ० 1, 17-18)

मालिनीसारः — मालिनीविजयंतन्त्रसारभूतः कश्चनागमिको ग्रन्थो य इदानीं नैव क्वापि लभ्यः। यथा—

तथाहि मालिनीसारे : —
"हृदये यः स्थितो ग्रन्थिरधऊर्ध्व नियामकः।'
इत्युपक्रम्य उक्तम् : —
'कदलीगर्भदलवन्मोदकादिरसादिवत्।
कदम्बगोलवच्चित्रात् क्रमात् कञ्चुकसम्भवः'।।"
उद्धः:- (ई० प्र० वि० वि०, खं० 3, पृ०, 293)

माहेश्वरशास्त्रम् : — दशाष्टादश चतुष्षष्टि त्रिकादिशास्त्र जातं माहेश्वरं, महेश्वरोपदिष्टमिति।

~ सत्यमेव : — परिपूर्णविज्ञानघनेन महेश्वरेणोक्तं शास्त्रं महेश्वररूपमेव सर्वथा च सत्यं, न केनाप्यंशेन मिथ्या प्रशंसादिपरम्। यथा—

"अनवच्छिन्नविज्ञानवैश्वरूप्यसुनिर्भरः।
शास्त्रात्मना स्थितो देवो मिथ्यात्वं क्वापि नार्हति।।"
(तं० आ०4, 234)

माहेश्वरागमाः — दशाष्टादशादय आगमाः।

~ श्रेष्ठाः — सर्वेष्वागमेषूत्कृष्टतमाः। यथा—

"यं प्राप्य सर्वागमसिन्धुसंघः
पूर्णत्वमभ्येति कृतार्थतां च।
तं नौम्यहं शाम्भवतत्त्वचिन्ता-
रत्नौघसारं परमागमाब्धिम्।।"
(ई० प्र० वि,० खं०2, पृ०,185)

माहेश्वर्याद्या ~ मातृकाः — कादिवर्गाष्टकाधिष्ठातृ-देवताः माहेश्वर्याद्याः। यथा—

"वर्गाष्टकमिह ज्ञेयमघोराद्यामनुक्रमात्।
तदेव शक्तिभेदेन माहेश्वर्यादि चाष्टकम्।।
माहेशी ब्राह्मणी चैव कौमारी वैष्णवी तथा।
ऐन्द्री याम्या च चामुण्डा योगीशी चेति ता मताः।।"
(मा० वि० तं०, 3, 13-14)

द्र०:- 'मातरः' इति

माहैश्वर्यम् — (1) परमेश्वरस्य स्वेच्छया ज्ञातृत्व कर्तृत्व-धारोपारोहः। यथा—

"एतदेव माहेश्वर्यं यदनवच्छिन्न-प्रकाशत्वेन ज्ञातृकर्तृत्व-धारोपारोहः।"
(ई० प्र० वि०, खं०1, पृ०, 34)

(2) आनन्दघनत्वेन सततं स्वशक्तिविमर्शनशीलत्वं-स्वातन्त्र्यं च भगवतः। यथा—

"विमृशद्रूपत्वमनवच्छिन्नविमर्शताऽनन्योन्मुखत्वमानन्दैक-घनत्वमेवास्य माहेश्वर्यम्।"
(ई० प्र० वि०, खं०1, पृ०, 338)

(3) स्वभावभूतं परमेश्वरस्य जगद्वैचित्र्यावभासन-सामर्थ्यम्। यथा—

"तत एव च परिनिष्ठितैकरूपजडभाववैलक्षण्यात् ज्ञानादिशक्तियुक्ततामाहेश्वर्यमुपसम्प्राप्तः। एतदनुपगमे न किञ्चिदिदं भासेत।"
(ई० प्र० वि०, खं०1, पृ०, 112)

मिश्रः ~ सम्बन्धः — दिव्यादिव्यस्य गुरुशिष्यसम्ब-न्धस्य संज्ञान्तरं मिश्र इति। यथा—

"महानवान्तरो दिव्यो मिश्रोऽन्योऽन्यस्तु पञ्चमः।"
(तं० आ० 1, 274)

"सम्बन्धः परमेशानि सर्वः परकलामयः।
महानवान्तरो दिव्यो मिश्रोऽदिव्यश्च तत्परः।।"
(तं० आ० वि०, खं०1, पृ०,284)

द्र०:- 'सम्बन्धः' ~ 'दिव्यादिव्यः' — इति।

अत्र प्रष्टा लौकिकदेहधारी वक्ता च दिव्यशरीरः।

मीनकुलम् : — अयमागमशास्त्रस्य ग्रन्थविशेष : उदाहरणमात्रशेषतां गतः। यथा—

"अत्र च—
'मत्स्यवलनसंयोगाद्गलके मीनमाश्रिता।'
इति श्रीमीनकुलोक्तदृशा।"
(ने० तं० वि०, खं०2, पृ०, 293)

मुकुटशास्त्रम् : — दशसु शिवागमेष्वागमविशेषो यन्मतमुद्धृतं तन्त्रालोके पङ्क्तयश्चोद्धृतास्तद्विवेके। यथा—

"मुकुटादिषु शास्त्रेषु देवेनापि निरूपितम्।"
(तं० आ० 15, 514)

"शिवधर्मानुयायी च श्रद्दधानः शिवात्मकः। इत्यारभ्य किं तत्र कारणं जातिर्धर्माधर्मेषु शस्यते।" इत्यन्तम्।
(तं० आ० वि०, खं०9, पृ०, 255)

मुकुटसंहिता : — भेददृष्टिप्रधानः शिवागमविशेषो यन्मतमुद्धृतं विवृत्तिविमर्शिन्यादौ। यथा—

"उक्तं परमेश्वरेणैव श्रीमुकुटसंहितायाम्-
'संविद्व्यापार एवैका युक्तिः सर्वत्र साधनी।
भोगेवाप्यथवा मोक्षे तेनास्यामादृतो भवेत्।।"
(ई० प्र० विं० वि०, खं०2, पृ०, 365)

"..... मुकुटसंहितायां विस्तरतो निर्णीतम्।"
(प० त्री० वि०, पृ०, 237)

यथा—
"ब्राह्मण्यं बीजशुद्ध्या स्यात् सा च स्त्रीषु व्यवस्थिता।
तासां तु चपलं चित्तं चण्डालेष्वपि धावति।।
इति मुकुटसंहितोक्तः .....।"
(स्व० तं० उ० प०4, पृ०,30)

मुक्तः — यस्य स्फुटेन शुद्धविद्योन्मेषेण स्वस्वरूपं प्रत्यभिज्ञापदं प्राप्तमसौ देहे तिष्ठन्नपि मुक्त एव। जीवन्मुक्त इति तस्यैव समाख्या। पतिते तु देहे सर्वथा मुक्त एव। यथा—

"विद्यया तु स्वरूपप्रकाशनशक्त्या प्रत्यभिज्ञापदं प्रापितमैश्वर्यं यस्य, अत एव शरीराद्यपि विश्वमपि संवेदनमेवाभिमन्यमानो, अत एव चिदेव घना अन्याचिद्रूपव्यामिश्रणशून्या यस्य रूपं, स पुनर्जन्मबन्धविरहाद् देहेऽपि स्थिते 'मुक्त' इति व्यपदेशयोग्यः। पतिते तु शिव एकघनः। इति कः कुतो मुक्तः। भूतपूर्वगत्या तु प्रमात्रन्तरापेक्षया मुक्त शिवः—इति व्यवहार।"
(ई० प्र० वि०, ख० 2, पृ०, 219-220)

द्र०:- (ई० प्र० वि०, वि० खं०3, पृ०,310)

~ तद्दृष्टिः — स्पष्टीकृता। यथा—

"श्रीमत्सादाख्यपदात् प्रभृति आक्रिमि यो मातृवर्गस्त-दधिष्ठातृ यदहमितिरूपं, तदेव आत्मतया मुक्तोऽभिनिविशते। ततश्च विश्वस्य यत् प्रमेयं, तन्ममापि, यन्मम, तदन्यस्यापि। मेयं चेदं ममैवाङ्गभूतं, मेयान्तरमपि तथा,—इत्येवं मेयं परस्परतो

मातृवर्गाच्चाव्यावृत्तमित्येकरसाभेदविश्रान्तितत्त्वमस्य सर्वं परामर्शपदमभ्येति।"

(ई० प्र० वि० वि०, खं०3, पृ०,394)

मुक्तशिवः — **कश्चिज्जीवन्मुक्तः प्राणी देहत्यागानन्तरं सद्यः शिवीभवति, कश्चित् पुनः कमप्यधिकारं निभालयन् वैयक्तिकेन स्वरूपेण कमपि कालं तिष्ठत्येव मोक्षलक्ष्मी-रसास्वादं च भुङ्क्ते। असौ मुक्त शिव इत्युच्यते। शिवतुल्योऽसौ वस्तुतः शिव एव।**

द्र०:- **'मुक्तः'** इति।

मुक्ताकणः — **राजानकरामकण्ठस्याग्रजः। यथा—**

"यो नारायण इत्यभूच्छ्रुतनिधिः श्रीकान्यकुब्जे
द्विजस्तद्वंशे स्वगुणप्रकर्षखचितो मुक्ताकणाख्योऽभवत्।
तस्यैषा सदृशानुजेन रचिता रामेण
विद्वज्जनश्लाघ्यत्वात्सफलश्रमेण भगवद्गीता- पदार्थप्रथा।।"

(भ० गी० स० म०, पृ०, 405)

मुक्ताणवः — **(1) ते प्राणिनो यैरात्मनः शुद्धसंविद्रूपत्वं साक्षात्कृतं, स्वकीया स्वाभाविकी परमेश्वरता चापि हृदयङ्गमतां नीता। परं तथापि ध्वंसमानादिमलसंस्कार-वशान्मन्त्र-मन्त्रेश्वर-मन्त्रमहेश्वर-पदेषु तिष्ठन्तो निग्रहानुग्रह-लीलाविलासं शिवेच्छानुसारं निभालयन्ति। तास्ववस्थासु विचरन्तस्ते मुक्ताणव इत्युच्यन्ते। साक्षात्कृतस्वस्वरूपस्वभावतस्ते मुक्ताः, मलसंस्कारशेषत्वेनाणव इति यथा—**

"मुक्ताणूनाम् इति संसारोत्तीर्णानां मन्त्रमहेशादीनामित्यर्थः।"

(ई० प्र० वि० वि०, खं०3, पृ०, 318)

(2) घोराद् बन्धनाद् मुक्ता अपि भेददशाभाजः पाशुपताद्याः सिद्धा अमर्दकमठिकानुयायिनश्च।

यथा—

"मुक्ताणूनां च मोक्षावस्थायामपि परमशिवादनादि-शिवतामयान्मलनिर्हाराभिव्यक्तशिवत्वानां भेद इति।"

"अनेनांशेन द्वैतपक्षे मुक्ताणवो भिन्ना एव, तेषाञ्च शिवत्वेन सार्वरयादविच्छिन्नमेवावभासनं; त्रैकालिकत्वावभासस्तु एषां मायीयप्रमातृनिष्ठितं निर्भासनमपेक्ष्य, तदपि तेषां सार्वज्ञ्याद् न न स्फुरति:"

(ई० प्र० वि०, खं०2, पृ०, 325)

मुक्तिः — **(1) जडेऽनात्मनि देहादावेव या आत्मता-भिमानस्तस्मिन् गलिते सति, संविद्रूपतायामात्मताभिमाने स्थिते सति सर्वः प्रपञ्च एव संविद्विलासात्मकतया स्वात्मत्वेनाभिमन्यते। एवंविधमुभयप्रकारकमभिमननमेव मुक्तिः। तथाविधेऽभिमाने समुदिते सति देहे सत्यपि साधको मुक्त एव। यथा—**

"आदावनात्मन्यात्मत्वे लीने लब्धे निजात्मनि।।
आत्मन्यनात्मनानाशे महाव्याप्तिः प्रवर्तते।"

(तं० आ० 5, 106-107)

"सर्वथाविगलितसंकोचचिदेकाघनविश्वैकात्म्यमयशिवत्वाभिव्य-क्तिरेव मुक्तिः।"

(स्व० तं० उ० प०5, पृ०, 80)

द्र०:- (बो० प० द० 12-13; प० सा० 60;
प्र० हृ० पृ० 10-11,16;
स्व० तं० उ० प० 5, पृ०79)

(2) पराया भक्तेः पराकाष्ठागताऽसौ पुष्टिर्यस्यां सर्वं स्वात्मशिवरूपमेव प्रथते। यथा—

"मुक्तिसंज्ञा विपक्वाया भक्तेरेव त्वयि प्रभो।"

(शि० स्तो०16, 19)

~ अपूर्णा — **सा च कुतश्चिन्मुक्तिः, न सर्वस्माद् बन्धनादिति। तद्यथा बौद्धार्हन्नैयायिकसांख्ययोगवेदान्तादि-शास्त्राभ्यासेन लभ्या सुषुप्तिप्राया वा प्रलयाकलता, अपवर्गकैवल्यनिर्वाणाद्यन्वर्थाभिधाना स्थितिः, ऐश्वर्यहीना वा तुर्यासुन्मेषमात्रात्मिका विज्ञानाकलदशा, शून्यब्रह्मवादिभिर्लभ्या। सर्वास्वप्यासु दशास्वाणवमलस्य विद्यमानत्वान्न तस्मान्मुक्तिरत आंशिक्येषा मुक्तिः। मायया भ्रमितबुद्धयस्ते ते तत्तच्छास्त्राभ्यासिनोऽपूर्णा तो ताममोक्षरूपामेव स्थितिं मोक्षं मन्वानास्तत्रैव तिष्ठन्ति सुचिरम्। यथा—**

"निर्वैरपरिपन्थिन्या तया भ्रमितबुद्धयः।
इदं तत्त्वमिदं नेति विवदन्तीह वादिनः।।
सत्पथं तु परित्यज्य नयति द्रुतमुत्पथम्।
गुरुदेवाग्निशास्त्रस्य येन भक्ता नराधमाः।।
असद्युक्तिविचारज्ञाः शुष्कतर्कावलम्बिनः।
भ्रमयत्येव तान्माया ह्यमोक्षे मोक्षलिप्सया।।"

(स्व० तं० प० 10, 1139-1141)

~ आंशिकी — **असौ विद्येश्वराणाम्। ते हि स्वात्मानं चिदेकमयं शुद्धसंविद्रूपं पश्यन्तोऽपि स्वात्मनश्च स्वातन्त्र्यशक्तिं संविदन्तोऽपि भावानात्मनः सकाशाद् भिन्नानेव पश्यन्ति। ततस्तेषां कार्माणवमलाभ्यां मुक्तौ विद्यमानायामपि नैव मायीयान् मलान्मुक्तिरित्यांशिक्यसौ, न परिपूर्णेति। यथा—**

"भेदधीरेव भावेषु कर्तुर्बोधात्मनोऽपि या।
मायाशक्त्येव सा विद्येत्यन्ये विद्येश्वरा यथा।।"

(ई० प्र०3-1-6)

"बोधानामपि कर्तृत्वजुषां कार्ममलक्षतौ।
भिन्नवेद्यजुषां मायामलं विद्येश्वराश्च ते।"

(ई० प्र०3-2-9)

~ ऐश्वर्यमयी — **संवृत्तस्वस्वरूपसाक्षात्कारः साधको जीवन्नेव मुक्तो भवति। परं तस्य शिवत्वं नैव सम्यगभिव्यक्तं भवति शरीरपातात् प्राक्। शिवसमावेशा-भ्यासपरस्तु न केवलं मुक्तो भवत्यपि तु जीवन्नेव निजं सृष्ट्यादिपञ्चकृत्यविषयमैश्वर्यमनुभवति, इत्यनयोर्विशेषः। शरीरपाते तूभावप्येकघनां शिवरूपतां विन्दतः। यथा—**

"ईश्वररूपमात्मानं तस्य च स्वाव्यतिरिक्ते स्वातन्त्र्यमात्ररूपे

ज्ञानक्रिये जानन् एवम्भूतोऽयमात्मा, न तु काणादादिदर्शितः, इत्थं च ज्ञानक्रिये न तु तस्य व्यतिरेक्ते केचन,- इति परामृशन् यद्यदिच्छति तत्तज्जानाति करोति च समावेशाभ्यासपरोऽनेनैव शरीरेण; अतत्परस्तु सति देहे जीवन्मुक्तस्तत्पाते परमेश्वर एवेति।"

(ई० प्र० वि०, खं०2, पृ०,269)

जीवन्मुक्तिरेषा सैश्वर्या अनैश्वर्यापि भवति सा केषांचित् समावेशरसाभ्यासरहितानाम्।

~ जीवतः — **(1) प्रारब्धकर्मान्तं शरीरे जीवत्यपि कर्मफलेषु च प्रवहद्रूपतया भुज्यमानेष्वपि, शरीरयात्रार्थं च व्यवहारजाते चलत्यपि प्रत्यभिज्ञातात्मस्वरूपस्य योगिनो न व्यामोहः। सैषा तस्य जीवत एव मुक्तिः।**

द्र०:- **'जीवन्मुक्तिः'** इति।

(2) सा च क्षीणविकल्पस्य भवति साधकस्य यथा

"विकल्पक्षीणचित्तस्तु आत्मानं शिवमव्ययम्।
पश्यते भावशुद्ध्या यो जीवन्मुक्तो न संशयः।।"

उद्धः:- (तं० आ० वि०, खं०8, पृ०, 238)

विकल्पक्षयपदेन मात्रनिर्विकल्पस्य स्वात्मसाक्षात्कारस्य हृदयङ्गमीभावोऽभिप्रेतः।

~ तन्मूलकारणम् : — **पारमेश्वरः शक्तिपात एव मोक्षस्य प्रधानं मूलभूतं च कारणम्। साधकस्य केवलो निजो यत्नस्तु मायीयत्वेन मोक्षदो नैव भवितुमर्हति। स तु बन्धनस्यैव शैथिल्यमात्रकरणे कमपि साहाय्यं विधातुं क्षमः। यथा—**

"यद्यप्यायातदृढेश्वरशक्तिपातस्य स्वयमेवेयमियती परमशिवभूमिरभ्येति हृदयगोचरम्, न त्वत्र स्वात्मीयः पुरुषकारः कोऽपि निर्वहति, सर्वस्य तस्य मायामयत्वेनान्धतमसप्रख्यस्यामायीयं शुद्धप्रकाशं स्वप्रतिद्वन्द्विनं प्रति उपायतानुपपत्तेः।"

(ई० प्र० वि०, खं०1, पृ०, 7)

~ शरीरान्ते : — **विकल्पयुक्तचित्तस्य गुर्वनुग्रह-पात्रभूतस्य साधकस्य मुक्तिः, प्रारब्धकर्मक्षये जाते पतिते च शरीरे भवति, न ततः प्राक्। यथा—**

द्र०:- **अत्रैव अंक (2)** इति।

~ सर्वथा : — **सर्वावच्छेदमुक्तो यस्तस्यैव मुक्तिः सर्वथा मुक्तिः। यथा—**

"..... मुक्तस्तु सर्वावच्छेदवर्जितः।"

(तं०आ० 1, 34)

सा च तथाविधा मुक्तिः पराद्वैतनिष्ठानां शैवानामेव भवति। यथा—

"सर्वाध्वनो विनिष्क्रान्तं शैवानान्तु परं पदम्।"

इति। तथा :—

"शैवः सिद्धो भाति मूर्ध्नीतरेषां मुक्तः सृष्टौ पुनरभ्येति नाथः।"

उद्धः:- (तं० आ० वि०, खं०1, पृ०, 72)

मुखागमः — गुरूपदेशः। यथा—

"मुखागमेति .....
परतत्त्वप्रवेशोपायत्वाद्गुरुस्तस्यागमो वचनमित्यर्थः।"

(तं० आ० वि०, खं०4/1, पृ०, 203)

मुख्यदीक्षा — शिष्यस्यात्मनः सृष्ट्यादिपञ्चकृत्य स्वातन्त्र्यावबोधनात्मिका ज्ञानदीक्षैव मुख्या। तया शरीरस्थ-स्यापि मोक्षः। यथा—

"एवं सृष्ट्यादिकर्तव्यस्वस्वातन्त्र्योपदेशनम्।।
यत्सैव मुख्यदीक्षा स्याच्छिष्यस्य शिवदायिनी।"

(तं० आ० 14, 42-43)

अनुग्रहशक्तिपातसहकृतैवैषा तथा फलदा भवति।

मुख्यस्नानम् — यद् वीरपात्रगतमानन्दद्रव्यं तस्य शिवत्वदृष्ट्या निरीक्षणेन तच्छिवमयीकृत्य तत्रैव मन्त्रचक्र-पूजनम्, तेनैव च देहप्राणाश्रितदेवताचक्रतर्पणमिति। यथा—

"विशेषस्तु — आनन्दद्रव्यं वीराधारगतं निरीक्षणेन शिवमयीकृत्य तत्रैव मन्त्रचक्रपूजनं ततस्तेनैव देहप्राणो भयाश्रितदेवताचक्रतर्पणम् इति मुख्यं स्नानम्।"

(तं० सा०, पृ०, 131)

मुख्यागमः —

द्र०:- **'आगमः'** इति।

मुद्गरमुद्राः — करयोरवस्थानविशेषः। यथा—

"मुद्गरं तु प्रवक्ष्यामि हस्तौ द्वौ संप्रसारयेत्।
मुद्गरः कथितो ह्येष .....।।"

(स्व० तं०, 14,17)

"अस्यापि ..... तत्रैव **(श्री भैरवानुकरणस्तोत्रे)**

तत्त्वं दर्शितं —

मुद्गरपरशू बिभ्रद्वैन्दवनादानुकाररूपौ त्वम्।
भेदविभेदनशकलनपरत्वमीशान निर्दिशसि। इति"

(स्व० तं० उ०, प० 14, पृ०,118)

स्वभ्यस्तस्य गुरोः सकाशादेव शिक्षणीयैषा मुद्रा।

मुद्रा — (1) मुदं स्वात्मशिवतानन्दं रातीति मुद्रा। करवाक्कायचित्तानां यथायथं स्थितिविशेषः। क्रियाविशेषश्चेति। असौ शिवस्वरूपं मुद्रयति, शिवावेशेन मोदयति, द्रावयति च पाशान्। परशिव प्रतिबिम्बकल्पाऽसौ। यथा—

"मुदं स्वरूपलाभाख्यं देहद्वारेण चात्मनाम्।
रात्यर्पयति यत्तेन मुद्रा शास्त्रेषु वर्णिता।।"

(तं० आ०32, 3)

द्र०:- ~ **'चतुरङ्ग'** इति।

"मुदं हर्षं राति ददाति; परभैरवचैतन्यद्रविणं मुद्रयति परावेशेन मोदयति भक्तान्; द्रावयति पाशान् इति वा निरुक्त परस्वरूपप्रतिबिम्बरूपां मुद्राम्।"

(स्व० तं० उ०, प०2, पृ०, 6(

"मुदो हर्षस्य वितरणात्, परमानन्दस्वरूपत्वात्, पाशद्रावणात् विश्वस्य अन्तःतुरीयसत्तायां मुद्रणात् च मुद्रात्मा।"

द्र०:- (प्र०ह०, पृ०, 47-48)

द्र०:- (ने० तं० उ० खं० 1, पृ० 166)

(2) स्वरूपानन्दाभिव्यक्तिकारिणी कायवाक्चित्त-चेष्टास्थितिः। यथा—

"मुदं कृतकृत्यतात्मकं परं हर्षं राति ददातीति तथा-विधा शिवभावसमावेशात्मिका अवस्था।"

(शि० सू० विवृ० 2,5)

"स्फुरत्ता सैव सम्पूर्णस्वानन्दोच्छलनात्मिकाम्।"

(शि० सू० वा०, पृ०,16)

(3) वस्तुतत्त्वप्रतिबिम्बकल्पना मुद्रा, तथाविधा च देहेन्द्रियादिसंस्थानरचना यस्यां परमेश्वरभावः प्रतिबिम्बित इव दृश्येत भावनया। यथा—

"मुद्रा च प्रतिबिम्बात्मा श्रीमद्देव्याख्ययामले।
उक्ता बिम्बोदयश्रुत्या वाच्यद्वयविवेचनात्।।
बिम्बात्समुदयो यस्या इत्युक्ता प्रतिबिम्बता।
बिम्बस्य यस्या उदय इत्युक्ता तदुपायता।।"

(तं० आ० 32, 1-2)

द्र०:- (स्व० तं० उ० प० 11, पृ०,15)

द्र०:- (पू० प्र० 1,96-97)

(4) मन्त्रार्थानुकृतिः। यथा—

"मन्त्रप्रतिकृतिर्मुद्रा .....।"

(तं० आ०37, 20)

(5) करणयोगप्रकारविशेषा मुद्राः। यथा—

"करणं तु मुद्राप्रकाशने वक्ष्यामः।"

(तं० सा०, पृ०,43)

(6) मु=पाशजालमोचिका, द्रा=बन्धनसंस्कारान् द्रावयते; मन्त्रं, योगं, क्रियां चर्यां च मुद्रयतीति वा। यथा—

"इत्याशयेन मुद्रा मोचयते पाशजालतोऽशेषात्।
कायीयान्पुर्यष्टकसंस्कारान्द्रावयेत्तथा मन्त्रम्।।
योगं क्रियां च चर्यां मुद्रयति तदेकरूपतया।"

उद्ध०:- (तं० आ० वि०, खं०12, पृ०,305)

"मोचयति पाशजालाद्द्रावयति भिदं मुदं राति।
मुद्रयति विघ्नतस्करलुण्ठनतो मन्त्रसिद्धिसङ्घातम्।।
तत्तत्संवित्स्फाराननुकृतिरूपान् व्यनक्ति या शम्भोः।
आकृतिरूपा मुद्रा जयति विभोरर्चनादिनिर्वर्त्या।।"

(स्व० तं० उ० प०, 14, पृ०,109)

(7) कुलगह्वागमे प्रोक्तं यथा भवात्संसारान् मुक्त्वा पाशान् द्रावयन्तीति मुद्राः। यथा—

"भवान्मुक्त्वा द्रावयन्ति पाशान्मुद्रा हि शक्तयः।
मुख्याऽऽसां खेचरी सा च त्रिधोच्चारेण वाचिकी।।"

(तं० आ०32, 49)

"मोचयन्ति महाघोरात् संसारमकराकरात्।
द्रावयन्ति पशोः पाशांस्तेन मुद्रा हि शक्तयः।।"

उद्ध०:- (तं० आ० वि०, खं०12, पृ०, 327)

~ करजाः — **अङ्गुलीनां न्यासविशेषः। यथा—**

"अङ्गुलीन्यासभेदेन करजा बहुमार्गगा।"

उद्ध०:- तं० आ० वि०, खं०12, पृ०, 308)

~ कायिकी — **सततगत्यैकसंस्थानविशेषाभ्यासः शारीरिकः। यथा—**

"सर्वावस्थास्वेकरूपा वृत्तिर्मुद्रा च कायिकी।।"

उद्ध०:- (तं० आ० वि०, खं०12, पृ०,308)

~ कालशी — **कलशमुद्रा—**

न स्पष्टीकृताऽद्यावधि।

~ क्रमाख्याः — **द्र०:- 'क्रममुद्रा'** इति।

~ खेचरीप्रकाराः — **त्रिशूलिनीप्रभृतयो मुद्राः खेचर्या एव सकलाया भेदप्रभेदाः। यथा—**

"..... साकल्येन त्रिशूलिनी।।
करङ्किणी क्रोधना च भैरवी लेलिह्यानिका।
महाप्रेता योगमुद्रा ज्वालिनी क्षोभिणी ध्रुवा।।
इत्येवं बहुभेदेयं श्रीखेचर्येव गीयते।"

(तं० आ०32, 4-6,)

~ चतुरङ्गाः — **(1) कायाङ्गसन्निवेशविशेषाः (2) कराङ्गुलिन्यासविशेषाः, (3) वाचा मन्त्रतन्मयताः (4) चित्तेनभावनाविशेषाः इति चातुर्विध्यं मुद्राभ्यासस्य। यथा—**

"मुद्रा चतुर्विधा कायकरवाक्चित्तभेदतः।
यदुक्तं—
करकाय विलापान्तःकरणानुप्रवेशतः।
मुद्रा चतुर्विधा ज्ञेया .....।।
इत्युपक्रम्य अङ्गुलीन्यासभेदेन करजा बहुमार्गगा।
सर्वावस्थास्वेकरूपा वृत्तिर्मुद्रा च कायिकी।।
पञ्चमुद्राधरं चैतद्व्रतं सिद्धनिषेवितम्।
मन्त्रतन्मयता मुद्रा विलापाख्या प्रकीर्तिता।
ध्येयतन्मयता मुद्रा मानसी परिकीर्तिता।।"

उद्ध०:- (तं० आ० वि०, खं०12, पृ०, 308)

पञ्चमुद्राधरत्वमत्र न स्पष्टीकृतम्। यथा—

"मुद्रां प्रदर्शयेत् पश्चान्मनसा वाऽपि योगतः।
वचसा मन्त्रयोगेन वपुषा सन्निवेशतः।।"

(तं० आ०26, 67)

~ तत्प्रयोजनम् : — **उक्तं यथा—**

"बोधावेशः सन्निधिरैक्येन विसर्जनं स्वरूपगतिः।
शङ्कादलनं चक्रोदयदीप्तिरिति क्रमात्कृत्यम्।।"

(तं० आ०32, 67)

न स्पष्टीकृतेयं कारिका जयरथेन। अत्र बोधावेशस्तु परस्वरूपसमावेशः। स्वरूपगतिः=स्वस्वरूपसाक्षात्कृतिः।

शङ्कादलनं शङ्कोच्छेदः। चक्रोदयस्य = संविच्चक्रोदयस्य दीप्तिः। इति।

~ तत्प्रयोजनमूषट्कम् : —

"पञ्चावस्था जाग्रदाद्याः षष्ट्यनुत्तरनामिका।।
षट्कारणषडात्मत्वात्षट्त्रिंशत्तत्त्वयोजनम्।
एवं षोढा महान्यासे कृते विश्वमिदं हठात्।।
देहे तादात्म्यमापन्नं शुद्धां सृष्टिं प्रकाशयेत्।"

(तं० आ०15, 259-261)

षोढान्यासस्य फलमेतत् सर्वमिति।

~ तदवसराः — **उक्ता यथा—**

"यागादौ तन्मध्ये तदवसितौ ज्ञानयोगपरिमर्शे।
विघ्नप्रशमे पाशच्छेदे मुद्राविधेः समयः।।"

(तं० आ०32, 66)

~ तद्भेदफलम् : — **तत्तत्काम्यफलसिद्धिः। यथा—**

"काम्ये कर्मणि ताश्च स्युर्मुख्याः कस्यापि जातुचित्।"

(तं० आ०32, 8)

"कस्यापीति साधकस्यैव, न तु पुत्रकादेः।
जातुचिदिति न तु नित्यवत् सर्वकालम्।"

(तं० आ० वि०, खं०12, पृ०, 307)

~ त्रिप्रकाराः — **यथा—**

"मुद्राप्रदर्शनं पश्चात्कायेन मनसा गिरा।"

(तं० आ०15, 259)

मुदं स्वस्य स्वदेवतायाश्च रातीति मुद्रा। यथा—

"मनोजा गुरुवक्त्रस्था वाग्भवा मन्त्रसम्भवा।
देहोद्भवाङ्गविक्षेपैर्मुद्रेयं त्रिविधा स्मृता।।"

उद्धः- (तं० आ० वि०, खं०9, पृ०, 128)

गुरुवक्त्रस्थेति गुरूपदेशगम्या विशेषभावनामयीति। कराङ्गुलिसन्निवेशोऽत्र कायमुद्रायामेव गणितः।

~ दश-संख्याः — **मुख्यास्तु दश एव। ताश्च त्रिशूलिनी प्रभृतयः परिगणिताः। यथा—**

"..... साकल्येन त्रिशूलिनी।
करङ्किणी क्रोधना च भैरवी लेलिहानिका।
महाप्रेता योगमुद्रा ज्वालिनी क्षोभिणी ध्रुवा।।"

(तं० आ० 32, 4-5)

~ निष्कला : — **मुख्या खेचर्येव निष्कला। यथा—**

"तत्र प्रधानभूता श्री खेचरी देवतात्मिका।
निष्कलत्वेन विख्याता .....।।"

(तं० आ०32, 4)

~ बहुभेदाः — **पद्माद्या हि बहुप्रकाराः मुद्राः। ताश्च सर्वाः न प्रतिपादितास्तन्त्रालोके, विशेषोपयोगाभावात्। यथा—**

"अन्यास्तदङ्गभूतास्तु पद्माद्या मालिनीमते।
तासां बहुत्वामुख्यत्वयोगाभ्यां नेह वर्णनम्।।"

(तं० आ०32, 6-7)

~ भैरवी : — **द्रः- 'भैरवीमुद्रा' इति।**

~ मानसी : — **ध्येयेन तत्त्वेन साकं तन्मयीभावस्याभ्यासः। यथा—**

"ध्येयतन्मयता मुद्रा मानसी परिकीर्तिता।"

उद्धः- (तं० आ० वि०, खं०12, पृ०,308)

~ मान्त्री : — **मन्त्रार्थेन साकं तन्मयताभ्यासः। द्रः- 'विलापाख्या' इति।**

~ विलापाख्या : — **मन्त्रार्थेन वा ध्येयेन वा तत्त्वेन साकं मन्मयीभावाभ्यासः। यथा—**

"मन्त्रतन्मयता मुद्रा विलापाख्या प्रकीर्तिता।।
ध्येयतन्मयता मुद्रा .....।"

उद्धः- (तं० आ० वि०, खं०12, पृ०,308)

~ शाक्तोपाये : —**शुद्धपरिपूर्णस्वात्मपरमेश्वरस्वरूपविमर्शिन्यु उपयोगिनी या काचिदपि शारीरिकी स्थितिर्मुद्रैव सा। यथा—**

"कुले योगिन उद्रिक्तभैरवीयपरासवात्।
घूर्णितस्य स्थितिर्देहे मुद्रा या काचिदेव सा।"

(तं० आ०4, 200)

"संस्थानं सुखदुःखजन्मवपुषो यत् काऽपि मुद्रैव सा।"

(अ० नि० स्तो०,4)

~ शाम्भवी : — **द्रः- 'शाम्भवी मुद्रा' इति।**

~ सारभूता : — **खेचरीचक्ररूढौ यत् परशिवात्मकं रूपं समुल्लासं याति तदेव सारभूतं खेचर्यादिमुद्राणाम्। तद्विना मुद्राप्रकाशनं न फलदम्। यथा—**

"तदेवं खेचरीचक्ररूढौ यद्रूपमुल्लसेत्।
तदेव मुद्रा मन्तव्या शेषः स्याद्देहविक्रिया।।"

(तं० आ०32, 65)

मुद्रापीठम् : — मन्त्राभिव्यंग्यरहस्यार्थाभिव्यञ्जन, परोऽङ्गुल्यादिभिः प्रदर्श्यमानोऽङ्गसंस्थानप्रकारविशेषो मुद्रा। तदुपासनाप्रधानो गुरुशिष्यपरम्परासमूहो मुद्रापीठम्। यथा—

"मन्त्रप्रतिकृतिर्मुद्रा तदाप्यायनकारकम्।"

(तं० आ०37,20)

"उपोद्बलनमाप्यायः इति यत् सूत्रितम्—
'विद्याशरीरसत्ता मन्त्ररहस्यम्।' इति वेद्यार्थभासिनीति शक्तिरूपत्वात्।"

(तं० आ० वि०, खं०12, पृ०,399)

मुमुक्षुः — मोक्षाकांक्षी साधकः। यथा—

"मुमुक्षुर्द्विविधः प्रोक्तो निर्बीजो बीजवान्पुनः।"

(स्व० तं०4, 87)

~ तदनुशासनम् : — **बुभुक्षुणा विध्यनुसारमेवाचरणीयं पूजादिकम्, मुमुक्षुर्यदि तत्त्ववित्तर्हि निरर्गलोऽपि प्रचलेद् यथेच्छम्। यथा—**

"साधकानां बुभुक्षूणां विधिर्नियतियन्त्रितः।।
मुमुक्षूणां तत्त्वविदां स एव तु निरर्गलः।"

(तं० आ०26, 55-56)

~ तद्गतिः — **कौलिके विधौ ये साधका विशेषतः शान्तोदितस्वरूपद्वयमूलभूतां परामेव सत्तामनुसन्दधते तेऽनवच्छिन्ने पदे रूढा भवन्ति विदेहमुक्तिप्राये। यथा—**

"अथ सृष्टे द्वितयेऽस्मिन्
शान्तोदितधाम्नि येऽनुसंदधते।।
प्राच्यां विसर्गसत्ता-
मनवच्छिदि ते पदे रूढाः।"

(तं० आ०29, 126-127)

"एतदवस्थाद्वयोदयहेतुभूतां तत्संघट्टमयीं विसर्गसत्तामनुसन्दध्तत्स्फारसारमेवेदं सर्वमित्यामृशन्ति, ते अनवच्छिन्ने पदे रूढाः पूर्णे पदे विश्रान्ता इत्यर्थः।"

(तं० आ० वि०, खं०11/2, पृ०,90)

~ भोगविरक्तः — **गुरुसंविदा योजनिकायां कृतायामपि चेच्छिष्यस्यस्वसंविद् भोगवासनाहीनैव भवेत् तदा योजनिकाऽपि तस्मै निष्फला भवति। नासावुत्तरे भुवने क्वापि भोगेच्छुर्भवति, न वा भोगासक्तो भवति। इति मुमुक्षुरेव न बमुक्षुः। यथा—**

"उक्तं हि स्वान्यसंवित्त्योः स्वसंविद्बलवत्तरा।
बाधकत्वे बाधिकाऽसौ सौम्यौदासीन्ययोस्तथा।।"

(तं० आ०21, 49)

"बलवत्तरेति एवं हि कृतायामपि गुरुणा भुक्तियो-जनिकायामस्य मुक्तिरेव भवेदिति भावः।"

(तं० आ० वि०, खं०10, पृ०,239)

बुभुक्षोरेव कृते भुक्तिप्रयोजना योजनिका सफलेति, न मुमुक्षोः कृते।

~ भोगाभिलाषी : — **मुमुक्षुरपि कदाचिदंशतो भोगाभिलाषी भवति। परमेश्वरो निजस्वातन्त्र्येण शक्तिपातं कुर्वन्पि स्वलीलाविलासवैचित्र्यात् क्वचिद् भोगोत्सुकत्वमप्युद्भावयति येन शक्तिपातस्य मध्यता, मन्दता वा भवति। यथा—**

"चित्राकारप्रकाशोऽयं स्वतन्त्रः परमेश्वरः।
स्वातन्त्र्यात्तु तिरोभावबन्धो भोगेऽस्य भोक्तृताम्।
पुष्णन् स्वं रूपमेव स्यान्मलकर्मादिवर्जितम्।।"

(तं० आ० 13, 264-265)

मूर्तिः — ~ मन्त्रमयी — **प्रणवतत्त्वानुसन्धानविधौ बिन्दुमारभ्योन्मनान्ताः पदार्थाः येऽनुसन्धातव्याः। यथोक्तं त्रिशिरःशास्त्रे—**

"क्षेपमाक्रमणं चैव चिदुद्बोधं च दीपनम्।
स्थापनं चैव संवित्तिस्तदापत्तिस्तथैव च।।
कारणक्रमयोगेन शास्त्रेऽस्मिन् सुरसुन्दरि।
आधाराधेयभावेन मूर्तिः सप्तविधा स्मृता।।
क्षेपस्तु कथितो बिन्दुराक्रान्तिर्नाद उच्यते।
चिदुद्बोधः परावस्था दीपनं शक्तिरुच्यते।।
स्थापनं व्यापिनी प्रोक्ता संवित्तिः समना स्मृता।
उन्मना च तदापत्तिरित्येषा मूर्तिरुच्यते।।"

उद्धः:- (तं० आ० वि०, खं०12, पृ०,180)

क्षेपादीनां स्वरूपं स्वे स्वे स्थानेऽत्र कोषे द्रष्टव्यम्।

मूर्तिन्यासः — **षोढान्यासे प्रथम्। नवात्मन्यासः। यथा—**

"मूर्तिः साङ्गवक्त्रो नवात्मा शाक्तन्यासे यदुपरि साङ्गवक्त्रा परापरा।"

(तं० आ० वि०, खं०9, पृ०,123)

न सुतरां स्पष्टीकृतोऽयं विषयो ग्रन्थकृता।

मूर्तियागः — **(1) चक्रयागः कौलिकः। यथा—**

"तत्रानुयागसिद्ध्यर्थं चक्रयागो निरूप्यते।
मूर्तियाग इति प्रोक्तो यः श्रीयोगीश्वरीमते।।"

(तं० आ०28, 60-61)

शक्तेः शरीरमेवात्र यागे पूज्यते इति मूर्तियागोऽयं कौलिकः।

(2) पर्वसु क्रियमाणो विधिविशेषः। अनुयागः, चक्रयागः इति द्वे यस्यापरे नाम्नी।

द्र०:- 'अनुयागः' इति।

~ केवलः — **गुरुभिः केवलैरेव क्रियमाणः। यथा—**

"केवलः केवलैरेव गुरुभिः .....।"

(तं० आ० 28, 79)

~ चक्रयुक् : — **मातङ्ग्यादीनां स्त्रीणां चक्रेण साकं गुरुभिः साधकैश्च मिलित्वा क्रियमाणो मूर्तियागः। एवं विधो मूर्तियाग एव चक्रयागः। यथा—**

"चक्रिण्याद्याश्च वक्ष्यन्ते शक्तियोगाद् यथोचिताः।
तत्संयोगाच्चक्रयुक्तो यागः सर्वफलप्रदः।।"

(तं.आ. 28, 81)

"मातङ्गकृष्णसौनिककान्दुकचार्मिक-विकोशिधातुविभे **(भि)** दाः।
मात्सिकचाक्रिकसहितास्तेषां पत्न्यो नवात्र नवयागे।।"

उद्धः:- (तं० आ० वि०, खं०11/1, पृ०,37)

~ पञ्चविधः — **(1) केवलो, (2) यामलः, (3) मिश्रः, (4) चक्रयागः, (5) वीरसङ्कर इति। यथा—**

"..... मूर्तियागः स पञ्चधा।।
केवलो यामलो मिश्रश्चक्रयुग् वीरसङ्करः।"

उद्धः:- (तं० आ० 28, 78-79)

~ पूज्यतमः — (तत्र) **मूर्तियागे तत्त्वदर्शी गुरुरेव पूज्येषु मुख्यो भवति। यथा—**

"तस्मात् प्राधान्यतः कृत्वा गुरुं ज्ञानविशारदम्।।
मूर्तियागं चरेत्तस्य विधिर्योगीश्वरीमते।"

(तं० आ०28, 75-76)

~ तत्फलम् : — **स्पष्टमुक्तं यथा—**

(क) "अदृष्टमण्डलोऽपि मूर्तियागेन पर्वदिनानि पूजयन्

वर्षादेव पुत्रकोक्तं फलमेति विना सन्ध्यानुष्ठानादिभिः। इति वृद्धानां स्त्रीणां विधिरयम् शक्तिपाते सत्युपदेष्टव्यो गुरुणा।"
(तं० सा०, पृ०,186)

(ख) "प्रथमे मूर्तियागे तु वेश्म जानन्ति साधके।
द्वितीये तस्य सामर्थ्यं तृतीये तु बलाबलम्।।
चतुर्थे विस्मयं यान्ति देवि ता मातरः स्वयम्।
पञ्चमे तस्य गत्वा तु विशन्ति गृहमध्यतः।।
षष्ठे तु प्रीतिमायान्ति सप्तमे तु वरप्रदाः।
वाञ्छितं तस्य दास्यन्ति आयुरारोग्यसम्पदः।।"
(तं० आ० वि०, खं०11, पृ०,46)

~ मिश्रितः — **साधकाद्यैर्गुरुभिश्च मिलित्वा सम्पाद्यमानः। मूर्तियागः। यथा—**

"..... गुरुभिर्मिश्रितः पुनः।।
साधकाद्यैः .....।"
(तं० आ०28, 79-80)

~ मृतविधौ : — **स्पष्टमुक्तो यथा—**

"सर्वत्र चात्र श्राद्धादिविधौ मूर्तियागः प्रधानम् इति श्रीसिद्धामतम्। तद्विधिश्च वक्ष्यते नैमित्तिकप्रकाशने।"
(तं० सा०, पृ०,177)

~ यामलः — **सपत्नीकैर्वा सवेश्याजनैर्वा गुरुभिः साधकैश्च सममेव विधीयमानः। यथा—**

**"साधकाद्यैः सपत्नीकैर्यामलः स द्विधा पुनः।
पत्नीयोगात् क्रयानीतवेश्यासंयोगतोऽथवा।।"**
(तं० आ० 28, 80)

प्रायोऽयं गुरुणा, गुरुपत्न्या, शिष्येण, शिष्यपत्न्या, चेति चतुर्भिर्मिलित्वा समनुष्ठीते। यथा—

"सपत्नीकैरिति-अर्थात् गुर्वादिभिश्चतुर्भिरपि।"
(तं० आ० वि०, खं०11, पृ०,36)

~ वीरसङ्करः — **मातङ्ग्यादिचक्रेण सर्वेणापि सममेव सर्वैरपि सनिजशक्तिकैर्गुरुभिः साधकैश्च सम्मिलितैरेव क्रियमाणो मूर्तियागः। यथा—**

"सर्वैस्तु सहितो यागो वीरसङ्कर उच्यते।"
(तं० आ० 28, 82)

"सर्वैरिति एवमुक्तैः पुंस्त्रीरूपैः।"
(तं० आ० वि०, खं०11, पृ०,36-37)

मूर्तिशक्तिः — **क्रियाशक्तिः।**

द्र०:- 'शक्तिपञ्चकम्' इति।

मूर्त्यङ्गन्यासः — **षोढान्यासे प्रथमो नवात्मन्यासः। यथा—**

"मूर्त्यङ्गेतिमूर्तेर्नवात्मनोऽङ्गानि यदुपरि विद्यापञ्चकम्।"
(तं० आ० वि०, खं०9, पृ०,123)

न सम्यक् स्पष्टतां नीतोऽयं न्यासः।

मूलतत्त्वम् : — **सततं प्रकाशमानं तदद्वैतं तत्त्वं यन्माहात्म्येन सर्वेषां तेजसां तमसा च (ज्ञानमयानामज्ञानमयानाञ्च) पदार्थानामाभासो भवति, यस्य चान्तः सर्वे तेऽवभासन्ते, यच्च सर्वेष्वपि तेषु व्याप्य स्थितम्। यथा—**

"अनस्तमितभारूपस्तेजसां तमसामपि।
स एकोऽन्तर्यदन्तश्च तेजांसि च तमांसि च।।"
(बो० प० द०,1)

मूलप्रकृतिः — **त्रयोविंशतिसंख्यानां करणकार्यतत्त्वानामुपादानरूपा प्रकृतिः, प्रधानतत्त्वम्।**

द्र०:- 'प्रकृतिः' इति।

मूलमन्त्रः — **न स्पष्टीकृतः। यथा—**

"मूलमन्त्रः श्रीचतुष्कलः।"
(स्व० तं०, उ० 9, पृ०,72)

स च "हूँ" इत्येष बीजपिण्डो भवेत् कदाचित्।

मृगीः — ~ मुद्राः — **हस्तमुद्राविशेषो ययाग्नितर्पणं विधेयं यागे। यथा—**

"मृगीं कृत्वेति। यदुक्तम्-
अङ्गुष्ठासमासक्ते मध्यानामे महेश्वरि।
तर्जनी च कनिष्ठा च प्रोच्छ्रिते विरले कृते।।
मृगी नाम महामुद्रा .....।"
(तं० आ० वि०, खं०9, पृ०, 212)

मृतदीक्षाविधिः — परलोकस्थस्य शिष्यस्य विषये न तु तत्कालमृतस्यैष विधिः। असौ तु मृतोद्धारदीक्षेत्युच्यते। यथा—

"कृत्वा मण्डलमभ्यर्च्य तत्र देवं कुशैरथ।।
गोमयेनाकृतिं कुर्याच्छिष्यवत्तां निधापयेत्।
ततस्तस्यां शोध्यमेकमध्वानं व्याप्तिभावनात्।।
प्रकृत्यन्तं विनिक्षिप्य पुनरेनं विधिं चरेत्।
महाजालप्रयोगेण सर्वस्मादध्वमध्यतः।।
चित्तमाकृष्य तत्रस्थं कुर्यात्तद्विधिरुच्यते।"
(तं० आ०21, 22-25)

मृतस्य शिष्यस्य सूक्ष्मं शरीरं परलोकान्मन्त्रबलेनाकृष्यगोमयादिनिर्मिते तच्छरीरे सङ्क्राम्यते गुरुणा। ततस्तत्र सर्वोऽपि दीक्षाविधिर्विधीयते।

मृतिपरीक्षणम् : — **योगिनो मरणकाले वर्तमानायाः स्थितेः परीक्षणं येनास्य भविष्यद्गतिविषयो ज्ञातुं शक्यः। प्रस्तुतमेतद्विषये—**

"अनुजोद्देशोद्दिष्टमृतिपरीक्षणमप्युपक्रान्तम्।"
(तं० आ० वि०, खं०11, पृ०, 85)

मृतोद्धारदीक्षा : — **मृतस्य क्रियमाणा परोक्षदीक्षा। यथा—**

"गुरुर्दीक्षां मृतोद्धारीं कुर्वीत शिवदायिनीम्।"
(तं० आ०21,11)

शवशरीरमधिकृत्यैष दीक्षाविधिः।

~ तद्विधिः — **जीवाकर्षणरहितः सर्वोऽपि परोक्षदीक्षाविधिरत्र प्रयोज्यो भवति। यथा—**

"विना महाजालविधिप्रयोगाहतपुद्गलम्।
मृतोद्धरणसंज्ञां च दीक्षां सर्वाध्ववर्तिनीम्।।"

(ज० म० वि०, पृ०,23)

"मृतेषूद्धरणार्थाय दीक्षार्थं परमेश्वरः।।
यष्टव्यः पूर्ववद्देवो विशेषात्तत्र चाकृतिः।
कर्तव्या रजसावश्यं सदृशी द्वादशाङ्गुला।।
कार्या वा गोमयाद्देवि कुशैर्वा स्नानशोधिता।
दीक्षैव तत्र संस्कारो व्याप्त्या यवस्थमानयेत्।।
अणूंश्च योजयेत्तस्यां पूर्णाहुत्या सह क्षिपेत्।
योजन्या शिवतत्त्वे तु ततः सायुज्यभाग्भवेत्।।
श्राद्धे सूंपूजयेद्देवमन्त्येष्टावथवा यजेत्।
प्रतिष्ठाप्यं तथा देवि दग्धपिण्डे श्मशानके।।
पूर्वोक्तैर्द्रव्यसम्भारैर्गुरुणा प्राग्विधानतः।
पूर्वोक्तं भीषणं रूपं शक्तिद्वयसमन्वितम्।।
चतस्रोऽष्टावथो देवि पूर्वध्यानावलोकिताः
पूर्वोक्तफलमाप्नोति इत्याज्ञा पारमेश्वरी।।"

(ने० तं० 18, 115-121)

'यवस्थम्' **इति पदस्यात्र कोऽर्थ, इति न स्पष्टी भवति।**

मृत्युः — ~ कालीनये : — **प्रमेयग्रसनशीलं प्रमाणमत्र मृत्युरिति। यथा—**

"प्रमाणमय्या निखिलार्थसंहर्तृत्वात् मृत्युरूपायाः .....
....."

(तं० आ० वि०, खं०3, पृ०, 168)

मृत्युकाली : — (1) प्रमेयग्रासकारिण्यः, प्रमाणस्यापि शुद्धे वैयक्तिकसंविद्रूपे प्रमातरि तदेकसात्करणस्य, याः कलनास्तत्स्वरूपा संविच्छक्तिर्मृत्युकाली। यथा—

"तत उपसंहर्तृत्वं ममेदं रूपमित्यपि स्वभावमेव कलयति।"

(तं० सा०, पृ०,29)

"एवं प्रमाणगतं सृष्टिस्वरूपमभिधाय, स्थितिस्वरूपमप्यभिधातुमाह—"

(तं० आ० वि०, खं०3, पृ०, 168)

"संहार्योपाधिरेतस्याः स्वस्वभावो हि संविदः।
निरुपाधिनि संशुद्धे संविद्रूपेऽस्तमीयते।।"

(तं० आ०4, 154)

संहार्यरूपेणोपाधिना रूषितमस्याः स्वरूपं निरुपाधिनि शुद्धे स्वरूपे विलीयत इत्यर्थः। यथा—

"प्रमेयमिव प्रमाणे (प्रमाणमपि), निरुपाधिनि—तत्तदर्थानारूषिते, अत एव संशुद्धे—प्रमात्रात्मनि, संविद्रूपेऽस्तमीयते।"

(तं० आ० वि०, खं०3, पृ०, 168)

~ क्रमस्तोत्रयोः —

"ममेत्यहङ्कारकलाकलापविस्फारहर्षोद्धतगर्वमृत्युः।
ग्रस्तो यया घस्मारसंविदं तां नमाम्यकालोदितमृत्युकालीम्।।"

उद्धः- (तं० आ० वि०, खं०3, पृ०, 169)

"तदित्थं देवीभिः सपदि दलिते भेदविभवे विकल्पप्राणासौ प्रविलसति मातृस्थितिरलम्।

अतः संसारांशं निजहृदि विमृश्य स्थितिमयी प्रसन्ना स्यान्मृत्युप्रलयकरणी मे भगवती।।"

(क्र० स्तो०, अभि०, 20)

~ चिद्गगनचन्द्रिकायाम् : — **यथा—**

"वित्तदारमुखभोग्यगामिनी या ममेत्यभिमतिर्मदोद्धता।
याप्यहङ्कृतिरनात्मनि स्थिता मृत्युरूपमुभयं तवाशनम्।।"

(चि० ग० चं०, 234)

~ तन्त्रालोकादौ : — **द्रः-** **'मृत्युकाली' (1) इति।**

~ पञ्चशतिके : — **प्रमात्मकस्वात्मसात्करणरूपा कला यस्याः शरीरे विलीयतेऽसौ संवित्कला मृत्युकाली। यथा—**

"ओमित्येषा कुलेशानी मृत्युकालान्तपातिनी।
मृत्युकालकला यस्याः प्रविशेद्विग्रहं शिव।।
तदा सा मृत्युकालीति ज्ञेया गिरिसुताधव।"

उद्धः- (तं० आ० वि०, खं०3, पृ०,169)

मृत्युजित् : — कोऽपि शैवागमग्रन्थः। मृत्युजिद्भट्टारकः इति नाम्नाप्युक्तः। यथा—

"यावन्न वेत्ति वै व्याप्तिं कुण्डस्यैवात्मनोऽपि वा।
साध्यस्यैव पशोश्चैव पाशानां च षडध्वनः।।
बालवत् क्रीडते तावत्कार्यं तस्य कथं भवेत्।
इति मृत्युजित्युक्तत्तवात्।"

(स्व० तं० उ०, प०4, पृ०, 53)

द्रः- (शि० सू० वि०, पृ०, 3, 40, 41, 45, 46, 48, 50, 66; स्त० चि० वि०, पृ०, 121; स्व० तं० उ०, प०2, पृ०,4)

क्षेमराजेन शिवसूत्रविमर्शिन्यां नेत्रतन्त्रस्य अष्टमाधिकारे विद्यमानमष्टाविंशतितमं पद्यं—मुत्युजिद्भट्टारकीयं वाक्यमिति निर्दिष्टम्। तेनैतदनुमातुं शक्यं यन्नेत्रतन्त्रस्यैव नामान्तरं स्यान् 'मृत्युजिद्भट्टारक' इति। यथा—

"तदुक्तं मृत्युजिद्भट्टारके :—
परमात्मस्वरूपं तु सर्वोपाधिविवर्जितम्।
चैतन्यमात्मनो रूपं सर्वशास्त्रेषु पठ्यते।।"

(शि० सू० वि०, पृ०,3)

मृत्युञ्जयशास्त्रम् : — आगमशास्त्रं मृत्युजिद्भट्टारकापराभिधानम्। यथा—

"श्रीमन्मृत्युञ्जयादौ च कथितं परमेष्ठिना।"

(तं० आ०16, 224)

द्रः- (तदेव—16,59)

द्रः- **'मृत्युजित्'** इति।

मृत्युजिद्भट्टारकः — **(1) सुप्रसिद्धस्य नेत्रतन्त्रस्येदमपरं नामधेयम्। यथा—**

"तदेतन्निष्कलं ज्ञानं विशुद्धं नेत्रमुत्तमम्।
मृत्युजित्तेन चाख्यातं सर्वेषां मोक्षदायकम्।
(ने० तं०, पृ०,34)

(2) इदं हि मन्त्रयोगप्रतिपादकमागमशास्त्रम्। अस्य शास्त्रस्य मन्त्रयोगप्रतिपादकत्वं भगवतो नेत्रनाथस्य (शिवस्यैवेदं नामधेयम्) स्वेनैव वाक्येन सिद्ध्यति यथा—

"तवाद्य कथयिष्यामि त्रिप्रकारं परं ध्रुवम्।
मन्त्रयोगज्ञानगम्यं मोक्षदं सिद्धिदं ध्रुवम्।।"
(ने० तं०, प०2, 11)

(3) अस्य शास्त्रस्य 'मृत्युञ्जयभट्टारक' इत्यप्यपरं नामधेयं शिवसूत्रविमर्शिन्यादिषु टीकासु लभ्यते यथा—

"तदुक्तं श्री मृत्युञ्जयभट्टारके ....."
(शि० सू० वि०, पृ०, 18)

अस्य शास्त्रस्य ज्ञानयोगपरकाणि वाक्यानि बहुषु शैवग्रन्थेषु उपजीव्यत्वेन समुद्धृतानि वर्तन्ते।।

मेघनादः —

द्र०:- **'मेघनादेश्वरः'** इति।

मेघनादेश्वरः — ~ मन्त्रः — **ह् र् यूं (ह् यूं) इति। यथा—**

"हररादि समायुक्तः ऊकाराधः सबिन्दुकः।।
मेघनादेश्वरो ह्येष भैरवः सम्प्रकीर्तितः।"
(स्व० तं०1, 82-83)

रादिः = यकारः।

"अकारस्योच्चारणार्थत्वात् ह् र् "
(स्व० तं० उ०, खं०1, पृ०,65)

मेयम् : —

द्र०:- **'प्रमाता'** इति।
(स्व० तं० उ०, प०2, पृ०,44)

मेलकः — **योगिनीभिः साकं मेलापः।**

द्र०:- **'मेलापः'** इति।

मेलकम् : — **मेलाप एव। यथा—**

"तीव्रशक्तिपातवशात् समासादिते मेलके तत्तत्त्वसाक्षात्कारमार्गं साधकेन्द्रस्य देव्यो दर्शयन्ति।"
(स्व० तं० उ० पं०,15, पृ०, 140)

द्र०:- **'मेलाप'** इति।

मेलकयोगः — **मेलापमन्त्रो रहस्यभूतः। यथा—**

"तुलामेलकयोगः श्रीतन्त्रसद्भावसाधने।
य उक्तः शम्भुनाथेन स मया दर्शितः क्रमात्।"
(तं० आ०30, 99)

शम्भुनाथोऽत्र शिवो न सिद्धगुरुः। मेलापमन्त्रस्य यद्दिग्दर्शनं तन्त्रालोके तद्विवेके चापि कृतं वर्तते तेन मन्त्रस्य स्वरूपं स्वरूपविस्तारश्च नैव सम्यक् स्पष्टतां यातः। तत्र मन्त्रस्वरूपविषये उक्तं यथा—

"ह्रीं क्लीं ब्लें क्लें एभिर्वर्णैर्द्वादशस्वरविभूषितैः।।
प्रियमेलापनं नाम हृदयं सम्पुटं जपेत्।"
(तं० आ०30, 97-98)

तत्स्वरूपविस्तारविषये उक्तं यथा—

"प्रत्येकमथवा द्वाभ्यां सर्वैर्वा विधिरुत्तमः।।"
(तदेव 30, 98)

व्याख्यातं यथा—

"एभिवर्णैरिति मायाबीजकामरूपाभ्यां **(ह्रीं क्लीं इति तद्बीजद्वयेन)** वामस्तनदक्षजानुबिन्दुसंभिन्नाभ्यां कण्ठादिदन्ताभ्यां चेत्येवं रूपैः। प्रत्येकमिति—यथा—क्लं ब्लं क्लं ह्रीं क्लं बलं क्लं इति। द्वाभ्यामिति—यथा :—क्लां क्लां ह्रीं क्लीं ब्लां क्लां इति; ह्रिं क्लिं ब्लिं क्लिं ह्रीं क्लीं ब्लें क्लें क्लिं ब्लिं ह्रिं इति। एवं स्वरान्तरमूषितत्वेऽपि ज्ञेयम्।"
(तं० आ० वि०, खं०12, पृ०, 213)

मूलतः सर्वसंहारकारक एव मन्त्रो मेलापे शाकिनीवशीकरणमन्त्रः इति। स च "ह्क्ष्लौं" इति यथा—

"षष्ठप्राणत्रिकूटोर्ध्वबाहुशूलाख्यबिन्दुभिः।।
अनच्कनासाधोवक्त्रचन्द्रखण्डैश्च मण्डितम्।
हृदयं भैरवाख्यं तु सर्वसंहारकारकम्।।
अग्निमण्डलमध्यस्थभैरवानलतापिताः।
वशमायान्ति शाकिन्यः स्थानमेतेन चेद्दहेत्।।
विसर्जयेत्ताः प्रथममन्यथाच्छिद्रयन्ति ताः।"
(तं० आ०30, 94-97)

वशमायान्तीति हठेन मेलापं कुर्वन्तीत्यर्थः। प्रथममिति मेलापसामनन्तर्येणेत्यर्थः।

मेलनम् : — ~ आभासानाम् : — **ये आभासा नियतिकृतनियमानुसारं परस्परमविरुद्धास्तेषामेव मेलनं भवति नाग्निशैत्ययोः।**

मेलापः — **योगिनीभिः साकं समागमः। असौ समागमो रहस्यसाधनाप्रकाशको भवति। तेन च विविधप्रकारभुक्तिलाभो मुक्तिलाभश्च भवति। स च द्विप्रकारकः। हठमेलापः प्रियमेलापश्च क्रमेण मन्त्रशक्त्या भक्त्यादिना च लभ्य इति।**

~ प्रियः — द्र०:- **'प्रियमेलापः'** इति।

~ हठतः — द्र०:- **'हठमेलापः'** इति।

मेलापसिद्धाः — **योगिनीमेलकेन लब्धयोगरहस्याः सिद्धजनाः। यथा—**

"स्वस्मिन् या सर्वं संहरते सा भैरवी इति मेलापसिद्धानां मुद्रा।"
(वि० भै० उ०, पृ०, 67)

~ तन्मुद्रा : — यथा—

"मेलापसिद्धाभूचरी भैरवीति।"

(म० प्र० वि०, पृ०,87)

मोक्षः — संसृत्यादिदुःखेभ्य आणवादिमलेभ्यश्च विमुक्तिः।

~ अनेकस्तरकः — **योगाचारमाध्यमिकसांख्यादीनां मोक्षः उत्तरोत्तरमुत्कृष्टतरस्तरीयो वेदितव्यः। यथा—**

"रागाद्यकलुषोस्म्यन्तः शून्योऽहं कर्तृतोज्झितः।
इत्थं समासव्यासाभ्यां ज्ञानं मुञ्चति तावतः।"

(तं० आ०1, 33)

चित्तस्य रागाद्यकलुषितता विज्ञानवादिनां, अन्तः-शून्यता माध्यमिकानां, कर्तृत्वादिराहित्यं सांख्यानां मते इति वेदितव्यम्।

~ आत्माभिन्नः — **यथार्थमात्मज्ञानमेव मोक्षः। तदात्मज्ञानञ्च नात्मनोऽन्यत्। ततो मोक्षोऽप्यात्मनो न भिन्नः कोऽपि पदार्थः। यथा—**

"स्वतन्त्रात्मातिरिक्तस्तु तुच्छोऽतुच्छोऽपि कश्चन।
न मोक्षो नाम तन्नास्य पृथङ्नामापि गृह्यते।।"

(तं० आ०1, 31)

तुच्छस्तावदपवर्गकैवल्यनिर्वाणात्मकः अतुच्छो मन्त्र-मन्त्रेश्वर-मन्त्रमहेश्वर-शिवतास्वरूप ऐश्वर्यचमत्कारनिर्भरः इति। यथा—

"यदि तुच्छस्तत्पूर्वोक्तनीत्या बन्ध एव स्यात्।
अतुच्छश्चेत् पारमार्थिकत्वान्नास्य स्वतन्त्रात्मातिरेकः।...
.....
आत्मज्ञानं मोक्ष इत्यविवादः, अतो यदेवात्मनो लक्षणं तदेव मोक्षस्य।"

(तं० आ० वि०, खं०1, पृ०, 62)

~ इहैव : — **मोक्षे सति नैव वैकुण्ठगोलोकरुद्रलोकादि-गमनम्। अज्ञानग्रन्थेश्छेदे सति स्वरूपसाक्षात्कारेणात्रैव लोके जीवतो योगिनो मुक्तिः। यथा—**

"मोक्षस्य नैव किंचिद् धामास्ति न चाऽपि गमनमन्यत्र।
अज्ञानग्रन्थिभिदा स्वशक्त्यभिव्यक्तता मोक्षः।।"

(प० सा०, 60)

~ एकभविकः — **साक्षात्कृतस्वात्मशिवभावस्य परि-धूतावण त्रयस्य शिवयोगिनो नैव पुनर्जन्म। एतज्जन्मान्त एव यस्तस्य मोक्षः स एवैकभविकः अस्मिन्नेव जन्मनि सम्भविष्णुरिति नानेकजन्मभिः साध्यः। यथा—**

"तुषकम्बुकसुपृथक्कृततण्डुलकणतुषदलान्तरक्षेपः।
तण्डुलकणस्य कुरुते न पुनस्तद्रूपतादात्म्यम्।।
तद्वत् कञ्चुकपटलीपृथक्कृता संविदत्र संस्कारात्।
तिष्ठन्त्यपि मुक्तात्मा तत्स्पर्शविवर्जिता भवति।।"

(प० सा०, 85-86)

~ ज्ञानाभिन्नः — **ज्ञानान्मोक्ष इति प्रयोगे या पञ्चमी विभक्तिरसौ राहोश्शिर इति प्रयोगवल्लाक्षणिकी। वस्तुतो हि स्वात्मज्ञानमेव मोक्षः। इत्यभेद एव ज्ञानमोक्षयोः, न कार्य-कारणभावः। यथा—**

"यतो ज्ञानेन मोक्षस्य या हेतुफलतोदिता।
न सा मुख्या .....।।"

(तं० आ०1, 162)

द्र०:- (तं० आ० वि०, खं०1, पृ०, 193)

~ तत्तत्कारणम् : — **आत्ममलविवेकतो या शिवत्वावाप्तिस्तत्र शिवस्यैवानुग्रहः कारणम्। स्वात्ममायाविवेकतो विज्ञानाकलताप्राप्तौ पुरुषप्रकृतिविवेके च प्रलयाकलता-प्राप्तावुभयत्र तावदनन्तनाथकृतोऽनुग्रहः कारणम्। यथा—**

"सर्वत्र चैश्वरः शक्तिपातोऽत्र सहकारणम्।।
मायागर्भाधिकारीयो (अनुग्रहः) द्वयोरन्त्ये तु निर्मलः।"

(तं० आ०9, 188-189)

द्वयोः= प्रधानमायाविवेकयोः, अन्त्ये = आत्म-मलविवेके इति।

~ तदुपायः — **सकलविश्वपूर्णस्य सकलविश्वपूरकस्य च स्वात्मपरमेश्वरतत्त्वस्य यः स्फुटः साक्षात्कारः स एव मोक्षः, स एव च मोक्षोपायः, मोक्षस्यात्मानतिरिक्तत्वात्। यथा—**

"येनैकेन जगत्सर्वमप्रमेयेन (ण) पूरितम्।।
तज्ज्ञात्वा मुच्यते क्षिप्रं घोरात्संसारबन्धनात्।"

(ने० तं०8, 25-26)

~ तन्मूलकारणम् : — **(1) मोक्षप्राप्तेर्मूलकारणं परमेश्वरस्यानुग्रह एव। तदनुग्रहत एव गुरुणा सह सम्बन्धो घटते, शास्त्राभ्यासे भक्तौ, योगे च प्रवृत्तिर्भवति। तेन क्रमेण वाऽक्रमेण वा यत्तत्त्वज्ञानमुदेति, तत्तत्त्वज्ञानमेव मोक्षः। यथा—**

"तत्प्रसादरसादेव गुर्वागमत एव वा।
शास्त्राद्वा परमेशस्य यस्मात्कस्मादुपागतम्।
यत्तत्त्वस्य परिज्ञानं स मोक्षः परमेशता।।"

(बो० पं० द०, 12-13)

(2) अनुग्रहोऽपि शिवस्य स्वातन्त्र्येणैव भवति। परमेश्वरः स्वेच्छास्वातन्त्र्येण स्वयमेवानुग्रहशक्तिपातेन जीवं शैवं साधनामार्गं प्रति प्रेरयति। जीवश्च तथा प्रेरितः शिवगुरोर्दीक्षामवाप्य शैवयोगाभ्यासेन भक्तिपूर्वकमभ्यस्तेन स्वात्मानं परमेश्वरं प्रत्यभिजानाति पर्यन्ते। इत्थं शिव एव निजस्वातन्त्र्यलीलया जीवरूपतयावभासमानं स्वात्मानमेव मुक्तिमार्गोन्मुखं विधाय पर्यन्ते बन्धनान्मोचयति। यथा—

"स्वातन्त्र्यमहिमैवायं देवस्य यदसौ पुनः।
स्वं रूपं परिशुद्धं सत्स्पृशत्यप्यणुतामयः।।"

(तं० आ०13, 105)

अणुतामयो जीवरूपतया स्थितोऽपि स्वं शिवरूपत्वं स्पृशतीति। यथा—

"अस्मद्रूपसमाविष्टः स्वात्मनात्मनिवारणे।
शिवः करोतु निजया नमःशक्त्या ततात्मने।।
(शि० दृ० 1,1)

अत्र मन्त्र्या सूचितमिदं शास्त्रतत्त्वम्।

~ त्रिस्तरीयः — **(1) पुरुषप्रकृतिविवेकः, (2) प्रमातृमायाविवेकः, (3) आत्ममलविवेक इत्युत्तरोत्तरस्तरीय उत्कृष्टोत्कृष्टतरो मोक्षः। विस्तरतो विचारणे विवेकः पुनरनेकस्तरीयः, तद्यथा—प्रकृतेः, नियतेः, कलायाः, मायायाश्च सकाशाद्।**

~ पातञ्जलेः — **पातञ्जलामोक्षदशायां नियतितत्त्वेऽवतिष्ठन्ते। ततः सांख्येभ्य उत्कृष्टाः। प्रलयाकलतास्थितिस्तेषां मोक्षः सुषुप्तिदशाप्रकारविशेषः। यथा—**

"पातञ्जलानामीश्वरप्रणिधानात् तद्विशिष्यते, इति तेषां पुंस्तत्त्वोर्ध्ववर्तिनियतितत्त्वप्राप्तिरुक्ता। 'षड्विंशकन्तु देवेशि योगशास्त्रे परं पदम्।।"

उद्धः- (तं०आ०वि०,खं०1, पृ०, 70)

~ पाशुपतेः — **पाशुपतव्रतस्थानां मोक्षदशा तावदीश्वरतत्त्वप्राप्तिः। ते हि मोक्षदशायां प्राणिनां शिवतुल्यतां वदन्ति। तुल्यत्वमेतद्वस्तुतः स्वातन्त्र्यात्मकैश्वर्ययुक्तत्वम्। यथा—**

"व्रते पाशुपते प्रोक्तमैश्वरं परमं पदम्।"

उद्धः- (तं० आ० वि०, खं०1, पृ०, 70)

~ प्रत्यभिज्ञानये : — **बौद्धवेदान्तसांख्ययोगन्यायादिशास्त्रेषु मोक्षदशायां जीवस्य पारमैश्वर्यशक्तिचमत्कारविहीने स्वे परिमिते स्वरूपेऽवस्थानां प्रतिपादितम्। परमभेददृष्टिप्रधाने शैवदर्शने मोक्षदशायां पारमैश्वर्यचमत्कारचर्वणाऽप्यङ्गीक्रियते, सैव चानवच्छिन्नस्वात्मानन्दतया शास्त्रेषु चर्च्यते। यथा—**

"परमेश्वरतालाभे हि समस्ताः सम्पदस्तन्निःष्यन्दमय्यः सम्पन्ना एव। रोहणलाभे रत्नसम्पद इव।"

(ई० प्र० वि०, खं०1, पृ०,17)

~ (अनेकस्तरीयः) — **मलहानिरेव मोक्ष इति शैवदर्शनसिद्धान्तः। यावद्यावन्मात्रा मलहानिः साधकस्य जायते तावत्तावन्मात्रं मोक्षमसौ लभते। ततः साधकाः यथायथं प्राकृतात् कलासम्बन्धिनो मायीयाद्वा बन्धनान्मुच्यन्ते-वा, सर्वथा पूर्णत्वं वा लभन्ते। यथा—**

"मायागर्भाधिकारिणस्तु कस्यचिदीश्वरस्य प्रसादात् सर्वकर्मक्षये मायापुरुषविवेको भवति, येन मायोर्ध्वे विज्ञानाकल आस्ते। न जातुचित् मायाधः, कलापुंविवेको वा येन कलोर्ध्वे तिष्ठति। प्रकृतिपुरुषविवेको वा येन प्रधानाधो न संसरेत्। मलपुरुषविवेके तु शिवसमानत्वम्। पुरुषपूर्णतादृष्टौ तु शिवत्वमेवेति।"

(तं० सा०, पृ०, 80-81)

~ बौद्धदर्शने : — **बौद्धा मुक्त्यवस्थायां बुद्धितत्त्वे एव तिष्ठन्ति न तत ऊर्ध्वं संक्रमन्ते। यथा—**

बुद्धितत्त्वप्राप्तिरेवैषां मोक्षः। तदुक्तम् :—
'ब्रह्मा तत्राधिपत्येन बुद्धितत्त्वे व्यवस्थितः।
सर्वज्ञञ्च तमेवाहुर्बौद्धानां परमं पदम्।' **(उद्ध०)**
अत एवैषां बुद्धितत्त्वाधोवर्तिनः —
संसारान्मुक्तिः।"

(तं० आ० वि०, खं०1, पृ०,69)

~ माध्यमिके : — **चित्तक्षणपरम्पराप्रवाहस्योच्छेदरूपं शून्यमेव मोक्ष इति माध्यमिकानां मतम्। यथा—**

"अन्तःसंविद्रूपतायामपि शून्योऽहं भवामीति ज्ञानं माध्यमिकानाम्। ते खलुसर्वभावनैः स्वाभाव्यवादिनः संविदोऽपि नैः स्वाभाव्यान् मिथ्यात्वमभिदधतस्तच्छून्यतायामेव मोक्षमाचक्षीरन्। यदाहुः-

'चित्तमात्रमिदं विश्वमिति या देशना मुनेः।
तत्त्रासपरिहारार्थं बलानां सा न तत्त्वतः।।
सापि ध्वस्ता महाभागैश्चित्तमात्रव्यवस्थितिः। इति।"

(तं० आ० वि०, खं०1, पृ०, 66)

~ मौसुलकारुकयोः — **मौसुलकारुकसम्प्रदायभाजां मोक्षो मायातत्त्वेऽवस्थानम्। यथा—**

"मौसुले कारुके चैव मायातत्त्वं प्रकीर्तितम्"

उद्धः- (तं० आ० वि०, खं०1, पृ०, 70)

~ योगाचारमते : — **शुद्धस्य विज्ञानस्य रागादिकालुष्यरहितत्त्वेनावस्थानं योगाचाराणां मोक्षः। यथा—**

" 'रागाद्यकलुषोऽहं भवामि' इति ज्ञानं योगाचाराणाम्।
यदाहु :—
'रागादिकलुषं चित्तं संसारस्तद्विमुक्तता।
संक्षेपात्कथितो मोक्षः प्रहीनावरणैर्जिनैः।।' इति
तथा—'प्रभास्वरमिदं चित्तं प्रकृत्यागन्तवो मलाः।
तेषामपाये सर्वार्थं तज्ज्योतिरविनश्वरम्।।'

उद्धः- (तं० आ० वि०, खं०1, पृ०, 64)

~ वैष्णवादे : — **वैष्णवाद्या मायागृहीतत्वात् सवेद्यमपवेद्यं वा सौषुप्तमेव पदं मोक्षं मन्यन्ते। नैतेषां दृष्टिस्तुर्यदशां प्रति तुर्यातीतं वा पदं प्रति समुन्मिषति। यथा—**

"मोक्षोऽपि वैष्णवादेर्यः स्वसङ्कल्पेन भावितः।
परप्रकृतिसायुज्यं यद्वाप्यानन्दरूपता।।
विशुद्धचित्तमात्रं वा दीपवत् सन्ततिक्षयः।
स सवेद्यापवेद्यात्मप्रलयाकलतामयः।।"

(तं० आ०4, 29-30)

~ शैवे : — **(1) शिवस्यारोहलीला मोक्षः। सकलाख्यबद्धजीवदशातः शुद्धविद्यादशां ततोऽपि वा परिपूर्णशिवतां प्रत्यारोहलीलैव तत्तत्स्तरीयो मोक्षः। यथा—**

"मोक्षश्चारोहखेनं शम्भोः।।"

(स्वा० द०4,2)

(2) वस्तुतत्त्वपरिज्ञानमेव मोक्षः। यदैव प्राणी विजानाति सम्यग् दृढतरविश्वासपूर्वकं यत् सर्वं वस्तुतः शिवमयमहमेव तदैवासौ बन्धाद् विमुक्तो भवति। यथा—

"यत्तत्त्वस्य परिज्ञानं स मोक्षः परमेशता।।"

(बो० पं० द०, 13)

सर्वज्ञभैरवे च : —

नान्यत्र गमनं स्थानं मोक्षोऽस्ति सुरसुन्दरि।
अज्ञानग्रन्थिभेदो यः स मोक्ष इति कथ्यते।। इति।"

उद्ध०:- (स्पं० प्र०, पृ०,7)

द्र०:- (प० सा०, 60) **इति।**

(3) स्वात्मनो वास्तविकस्य स्वभावस्य यो विमर्शस्तस्य रूढिर्मोक्षः स च जीवतोऽपि सम्भवति। यथा—

"मोक्षस्य स्व-परामर्शाख्यचिदानन्दलाभरूपस्य .....
.....।"

(म० मं० प०, पृ०, 131)

~ सांख्यवादे : — सांख्या मोक्षदशायां पुरुषतत्त्वेऽवतिष्ठन्ते, न तत ऊर्ध्वं गन्तुमलम्। यथा—

"सांख्याश्च सुखदुःखाद्यात्मकप्रकृतिपृथग्भावेन पुंस एव स्वरूपेणावस्थानं तत्त्वं प्रतिपन्ना इति पुंस्तत्त्वप्राप्तिरेवैषां मोक्षः। नैरात्म्यदृष्टेश्चात्मदृष्टिर्विशिष्यते। इति सांख्यानां बौद्धेभ्यः पूर्णप्रथात्मकं ज्ञानम् इत्येषां बुद्धितत्त्वोर्ध्ववर्तिपुंस्तत्त्वप्राप्तिः।"

(तं० आ० वि० वि०, खं०1, पृ०, 69)

"अकर्ताऽहं भवामीति ज्ञानं सांख्यानाम्।"

(तदेव, खं०1, पृ०, 68)

~ स्तरभेदतः — भिन्नभिन्नेषु शास्त्रेषु यो मोक्षः प्रतिपादितोऽसौ कुतश्चिद् बन्धनान्मुक्तिर्न सर्वस्मात्। तत्र तेषां शास्त्राणां मोक्षसिद्धान्तेषु तावदधरोत्तरत्वकृतं तारतम्यमप्यस्ति यन्मोक्षसोपानक्रमत्वेन ज्ञेयं सुधीभिः। यथा—

"यत्तु ज्ञेय-सतत्त्वस्य पूर्णपूर्णप्रथात्मकम्।
तदुत्तरोत्तरं ज्ञानं तत्तत्संसार-शान्तिदम्।।"

(तं० आ०1, 32)

यच्च तदुत्तरोत्तरं ज्ञानं तदेव ह्युत्तरोत्तरो मोक्षः। इत्थं भिन्नभिन्नस्तरको मोक्षस्तत्तच्छास्त्रेषु प्रतिपन्नः।

मोक्षज्ञानदः — ~ गुरुः — यस्य ज्ञानमपि परिपूर्णं, यस्य च ज्ञानाभ्यासोऽपि परिपक्वः, स एव गुरुर्मोक्षं ज्ञाने चेत्युभयं दातुं समर्थः। यथा—

"मोक्षज्ञानपरः कुर्याद् गुरुं स्वभ्यस्तवेदनम्।"

(तं० आ० 13, 334)

मोक्षणम् : —

विशिष्टा योगिन्यो बलिपशोरपि पाशान् त्रोटयन्ति, स्वशक्तिप्रभावेण। ततो निहते शरीरे पशुरपि मुक्तो भवति। तदेतत्तस्य मोक्षणमेव न मारणम्। यथा—

"व्यापकेन स्वरूपेण स्वशक्तिविभवेन च।।
त्रोटयन्ति पशोः पाशाञ्छरीरं येन नश्यति।
शरीरेण प्रनष्टेन मोक्षणं नहि मारणम्।"

(ने० तं० 20, 19-20)

पशोः वर्तमाने शरीरे बलिरूपतयोपहृते सति शरीरान्तरग्रहणस्याभावः, संसृतेश्चेत्थं तस्य मोक्ष एव मोक्षणं पशोरपि, का पुनर्वार्ता साधकस्य।

मोक्षदाः — ~ विद्या (प्रथमा): — मन्त्रविशेषः "ॐ ह्रीं हूं शब्दब्रह्मस्वरूपिणी सिद्धसाधनि समस्तबन्धनिकृन्तनि बोधनि शिवसद्भावजननि स्वाहा।" इति। विद्यात्रये प्रथमेयम्। द्वितीया दीक्षा विद्या, तृतीया च समयापहा विद्येति। यथा—

"प्रणवो माया बिन्दुर्वर्णत्रयमादितः कुर्यात्।
पदपञ्चकस्य सम्बोधनयुक्तस्याग्निदयितान्ते।।
सिद्धसाधनि तत्पूर्वं शब्दब्रह्मस्वरूपिणि।
समस्तबन्धशब्देन सहितं च निकृन्तनि।।
बोधनि शिवसद्भावजनन्यामन्त्रितं च तत्।
पञ्चाष्टरन्ध्रयाष्टार्णक्रमेण पदपञ्चकम्।।
रव-पञ्चार्णा परब्रह्मविद्येयं मोक्षदा शिवा।

(तं० आ०30, 107-110)

मोक्षदो : — ~ गुरुः — स्वभ्यस्तज्ञानवानेव गुरुः शिष्याणां मोचको भवति; न केवलं श्रुतचिन्तामयज्ञानवान्। यथा—

"ज्ञानिनां योगिनां चैव सिद्धो योगविदुत्तमः।।
यतोऽस्य ज्ञानमप्यस्ति पूर्वो योगफलोज्झितः।
यतश्च मोक्षदः प्रोक्तः स्वभ्यस्तज्ञानवान् बुधैः।।"

(मा० वि० तं०4, 39-40)

पूर्वः = **केवलज्ञानीति।**

मोक्षशास्त्रम् : — ~ परम् : — मोक्षो द्विविधः, परिमितोऽपरिमितश्च। कुतश्चिन्मुक्तिः परिमिता, सर्वतो बन्धनान्मुक्तिरपरिमिता। शैवशास्त्राणि सर्वतो बन्धनान्मोक्षप्रदानि अपराणि बौद्धजैनवैष्णवादीनि च कुतश्चिदेव मुक्तिप्रदानि, न सर्वतो बन्धनात्। यथा—

"शास्त्रं च परमेश्वरभाषितमेव प्रमाणम्। अपरशास्त्रोक्तानामर्थानां तत्र वैविक्त्येनाभ्युपगमात्, तदर्थातिरिक्तयुक्तिसिद्धनिरूपणाच्च, तेनापरागमोक्तं ज्ञानं तावत एव बन्धाद्विमोचकं न सर्वस्मात्। सर्वस्मात्तु विमोचकं परमेश्वरशास्त्रम्।"

(तं० सा०, पृ०, 4)

~ सर्वोत्तमम् : — शैवं शास्त्रं शास्त्रान्तरेभ्य उत्कृष्टम्। तेष्वपि शैवशास्त्रेषु त्रिकशास्त्राणि सर्वोत्तमानि। तेष्वपि त्रिकशास्त्रेषु मालिनीविजयाख्यं तन्त्रं सर्वोत्तमम्। यथा—

"सर्वस्मात्तु विमोचकं परमेश्वरशास्त्रं पञ्चस्रोतोमयं दशाष्टादशवस्वष्टभेदभिन्नम्। ततोऽपि सर्वस्मात्सारं षडर्धशास्त्राणि। तेभ्योऽपि मालिनीविजयम्।"

(तं० सा०, पृ०, 4)

मोक्षाभासः — **(1) कुतश्चिन्मुक्तिर्न। सर्वतो मुक्तिः।**

(2) सांख्य-वैष्णव-वेद-वादादिप्रतिपादिताः सौषुप्तदशा-प्रकारविशेषभूता मोक्षावस्थाः, वस्तुतो नैव मोक्षत्वेन स्वीकर्तुं शक्यन्ते। तासु दशासु कुतश्चिदेव बन्धान्मुक्तिः, न सर्वस्मात्। ततस्ताः दशा मोक्षाभासरूपाः।

मायाशक्तिवशान्मोहितास्ते ते शास्त्रकृतस्ता एव दशाः परममोक्षतया मन्यन्तेऽज्ञानवशात्। यथा—

"भ्रमयत्वेव तान् माया ह्यमोक्षे मोक्षलिप्सया
इत्याद्युक्त्या तदभ्युपगतो मोक्षो मोक्ष एव न भवति।"

(तं० आ० वि०, खं० 1, पृ०, 54)

मोक्षोपायः — **कश्चन दर्शनशास्त्रग्रन्थः। यथा—**

मोक्षोपाये च : —

"स्वपरामर्शमात्रोऽयमपराधः कियानसौ।
तावन्मात्रेण तज्जातं यद्वक्तुं नैव पार्यते।।"

(म० मं० प०, पृ०, 27)

मोहः — **स्थूले देहादौ स्वात्माभिमानो मोहः। यथा—**

"मोहो देहात्मता मतः।"

(शि० सू० वा०, 3)

मोहनम् : — **(1) समयाचारदीक्षाभाजा शिष्येण पालनीयः समयविशेषः प्राणिविशेषाणां स्वशक्त्या यन्मोहनं तद्रूपः। यथा—**

"पशुमार्गस्थितान् क्रूरान् द्वेषिणः पिशुनान् जडान्।।
राज्ञश्चानुचरान् पापान् विघ्नकर्तॄंश्च मोहयेत्।"

उद्धः:- देवीयामलात् (तं० आ० 15, 530-531)

(2) अन्यप्रयुक्तानां मन्त्राणां निर्वीयतासम्पादनम्। यथा—

"मोहनं निर्वीर्यीकरणम्।"

(ने० तं० खं०3, पृ०,17)

मौकुटम् : — **मुकुटागमः। तस्य मतमुद्धृतं तन्त्रालोके। यथा—**

"श्रीमौकुटे तथा चोक्तं .....।"

(तं० आ० 25, 17)

मौसुलसिद्धान्तः — **इदानीमलभ्यं भेदवादनिष्ठं किमपि शैवदर्शनमिदम्। एतद्दर्शनोपायतो विद्येश्वरपदवी-लाभो महामायायां विश्रान्त्या। यथा—**

"मौसुले कारुके चैव मायातत्त्वं प्रकीर्तितम्।"

उद्धः:- आग० (तं० आ० वि०, खं० 1, पृ०, 70)

मायात्वत्र महामाया ज्ञेया।

मौसुलाः — **मौसुलसिद्धान्तानुसारिणः साधका इदानीमलभ्योऽसौ सिद्धान्तः।**

द्र०:- **'मौसुलसिद्धान्तः'** इति।

य ~ मातृकाक्रमे : — मातृकोपासनक्रमे साधकः स्वमेव शक्तिविशेषं स्वे एव चित्प्रकाशे बहिर्मुखतया प्रतिफलितं सन्तं तत्र च रागतत्वात्मकतयावभासमानं सन्तं साक्षात्कुर्वन् स्वात्मानं च तत् प्रतिबिम्बखचितं साक्षात्कुर्वन् शाम्भवसमावेश- विशेषमाप्नोति।

द्र०:- **'मातृका' ~ 'य वर्णः'** इति।

~बीजमन्त्रः — शोषकं वायुबीजं वेगवत्त्वात्। यथा—

"यरलानामपि शोषकारित्वं दाहकत्वं स्तम्भकत्वं च क्रमेणावगन्तव्यम्।।

(तं० आ० वि०, खं० 2, पृ०, 157)

"इच्छेवानुत्तरानन्दयाता शीघ्रत्वयोगतः।
वायुरित्युच्यते .....।।"

(तं० आ० 3, 157)

"वाय्वादिशब्दवाच्या यादयोवकारान्ताः .....।"

(प० त्री० वि० पृ० 113)

"वाय्वग्निसलिलेन्द्राणां धारणानां चतुष्टयम्।"

(प० त्री०, 7)

पारिभाषिका इमे निर्देशा इतिवेद्यम्। मातृकाक्रमे यर्णानां तत्त्वैः सह समन्वयोऽसौ शाम्भवोपायाङ्गभूतः। ततो नात्र विरोधः शङ्कनीयः।

यकारः—

द्र० **'षट्त्रिंशत्तत्त्वदीक्षा, (9)'** इति।

द्र० **'विद्याराजः ~ तद्वर्णाः'** इति च।

यक्षपङ्कः — **श्यामलवर्णो मधुरगन्धः औषधिविशेष-निर्मितोऽनुलेपद्रव्यविशेषः। यथाऽमरकोषे—**

कर्पूरागरुकस्तूरीकक्कोलैर्यक्ष कर्दमः।

(अ० को० 2-6-133)

कपूर, गुग्गुल, कस्तुरी, कोश फल (कबाब चीनी) बराबर बराबर मिलाकर बनाया गया सुगन्धित लेप (अनुवादः) रक्ताङ्गो यक्षपङ्कोल्लसितगलो लम्बमुक्तोपवीतः।

(गु० ना० प०,5)

यक्षाः — **सूक्ष्मशरीर भाजः प्राणि विशेषाः। यथा—**

"यक्षा बलिनः सत्त्वविशेषाः।"

(ने० तं० उ० खं०1, पृ० 47)

यक्षिण्यः —

द्र०:- **'यक्षाः'** इति।

यज्ञाङ्गानि : — **याजकः, तस्य सङ्कल्पः, होमकुण्डं, वह्निः पात्रादीनि द्रव्याणि च, होमादिसाधनादीनि, सर्वाणि यज्ञाङ्गानि,**

~ तत्संस्क्रियाः — **मुख्या शिवत्वभावना अमुख्याश्च न्यासमार्जनाभिमन्त्रणादिक्रियाः। यथा—**

"शिवस्यं या क्रियाशक्तिस्तत्कुण्डमिति भावनात्।।
परमः खलु संस्कारो विनाप्यन्यैः क्रियाक्रमैः।
एवं देहे स्थण्डिले वा लिङ्गे पात्रे जलेऽनले।।
पुष्पादिषु, शिशौ मुख्यः संस्कारः शिवतादृशे।"

(तं० आ०15, 389 तः 391)

~(तत् प्रयोजनम्): — **ये तावत् पारमेश्वरीं शक्तिमेव सर्वव्यापारसञ्चालनकर्त्रीं न पश्यन्ति तेषां कृते पारमेश्वर-शक्त्यभेदभावनापूर्वं यागाङ्गानां संस्साकारप्रयोजकस्तद्रूपता-मर्शनविधिश्चरितार्थो भवति। तेषां योग्यतानुसारं स्वल्पा वा भूयसी वाऽसौ यज्ञाङ्गसंस्कारक्रिया विहिता। यथा—**

"तादृशीं ये तु नो रूढां संवित्तिमधिशेरते।
अक्रमात्तत्प्रसिद्ध्यर्थं क्रमिको विधिरुच्यते।।
अहं शिवो मन्त्रमयः सङ्कल्पा मे तदात्मकाः।
तज्जं च कुण्डवह्न्यादि शिवात्मेति स्फुटं स्मरेत्।।
अत एव हि तत्रापि दाढर्यादाढर्यावलोकनात्।
क्रियमाणे कृते वापि संस्क्रियाल्पेतरापि वा।।"

(तं० आ०15, 394-396)

यत्नजः ~ उदयः — **प्राणचारे साधकेच्छानुसारं बौद्धेन यत्नेन यः शाब्द उदयः स यत्नजः, स च पदानां मन्त्राणां च। यथा—**

"द्वितीयस्तु पदानां मन्त्राणां च। ते हि वर्णवदपरिगणितत्वा-दनियताः। इति योगीच्छानिबन्धन एवैषामुदयः। यो हि यस्याभिप्रेतो मन्त्रादिः स तस्योदयं कारयेत्। अतश्च परेच्छाधीनत्वादेषां प्रायत्निक एवोदयः।"

(तं० आ० वि० खं०4/1, पृ० 177)

द्र०:- 'मन्त्रोदयः' इति।

~ तत्फलम् : — **प्राणचारे कल्पनया मन्त्रचक्रोदयाभ्यास-परस्य योगिनः परसंविदुदयोऽपि। यथा—**

"बीजपिण्डात्मकं सर्वं संविदः स्पन्दनात्मताम्।।
विदधत् परसंवित्तावुपाय इति वर्णितम्।"

(तं० आ० 7, 2-3)

"प्राणान्तरुदयद् (मन्त्रजातं) संविदः स्पन्दनात्मतां शाक्तस्वरूपावेशं विदधत् परसंवित्तावुपायः पारम्पर्येण शाम्भवमपि रूपमाविशेत्।"

(तं० आ० वि० खं०4/2, पृ० 2)

यत्नजम् ~ मन्त्रचक्रम् : — **साधकस्येच्छात्मकेन कल्पनात्मकेन च यत्नेन प्राणचारे उदीयमानं बीजमन्त्रचक्रं यत्नजं, न वर्णोदयवत् स्वारसिकम्।**

यथा—

"इत्ययत्नजमाख्यातं यत्नजं तु निगद्यते।"

(तं० आ०7, 2)

यन्त्रम् : — **मारणमोहनाद्युपायभूतो रेखादिनिवेशविशेषः। यथा—**

"यन्त्रं भूर्जपत्रादौ मारणानुगुणो मन्त्रसन्निवेशः।"

(तं० आ० वि० खं०10, पृ०217)

यमकाली : — 4 र्थी ~ क्रमस्तोत्रादौ— **यथा—**

(ङ) "सर्वार्थसङ्घर्षणसंयमस्य
यमस्य यन्तुर्जगतो यमाय।
वपुर्महाग्रास विलास रागात्
सङ्घर्षयन्तीं प्रणमामि कालीम्।।"

(उद्ध० क्र०स्तो० सि० ना० तं०आ०वि०खं०3, पृ० 165)

(च) "जगत्संहारेण प्रशमयितु कामः स्वरभसात्
स्वशङ्कातङ्काख्यं विधिमथ निषेधं प्रथयसि।
इमं सृष्टेत्थं त्वं पुनरपि च शङ्कां विदलयन्
महादेवी सेयं मम भवभयं संदलयताम्।।"

(क्र० स्तो० अभि० 18)

~चिद्गगनचन्द्रिकायाम्: — **यथा—**

"एतदम्ब सदिदन्तु नेति नः शङ्कया हृदि विकल्पलक्षणः।
यो यमः स खलु काल्यते त्वया भूत संयम-नकेलिकोविदः।"

(चि० ग० च०, 232)

~तन्त्रालोकादौ : — **प्रमासरण्याऽऽत्मसात्करणविषये कार्यत्वाकार्यत्वविकल्पोत्थापनकलनाकरी सङ्कोचविकास-दोलारोपणकरी च या संविदः शक्तिरसौ यमकाली यमाख्यं ग्राह्यत्वाग्राह्यत्वविकल्पोत्थानं कुर्वती चतुर्थी द्वादशकाली-क्रमे। यथा—**

(क) "ततश्च तदुपसंहारविघ्नभूतां शङ्कां निर्मिणोति, ग्रसते च।"

(तं० सा० पृ० 29)

(ख) "ततोऽपि संहाररसे पूर्णे विघ्नकरीं स्वयम्।
शङ्का यमात्मिकां भागे सूते संहरतेऽपि च।।"

(तं० आ० 4, 151)

(ग) "बहिरौन्मुख्यात्मन्येकस्मिन् भागे यमयति 'इदं कार्यमिदं न' इति नियतावस्थापयति इति यमो- विकल्पः तदनुप्राणिता येयं शङ्का ..... स्वस्वरूपानुप्रवेशे विघ्नकारी, तां सूते ..... संहरते विगलितनियति-संकोचविधिनिषेधाविषय परसंविदात्मना स्वेनैव विकस्वरेण रूपेण परिस्फुरति।"

(तं० आ० वि० खं०3, पृ० 164)

~पञ्चशतिके : — **नियतिदृष्ट्या शङ्कोत्थापन-विलापनपूर्वकं या स्वस्वरूपारोहणकलना सा यस्याः संविच्छक्त्या सकाशाद् उदेति यस्यां च लीयतेऽसौ संविच्छक्तिर्यमकालीति। यथा—**

"यमरूप-स्वरूपस्था रूपातीतस्वरूपगा।
सा कला लीयते यस्यां यमकाली तु सा स्मृता।।"

उद्ध०:- (तं० आ० वि० खं०3, पृ० 165)

यमः — **इन्द्रियाणां संयमनं यमः कथ्यते येन संसारान्मानवो मुच्यते।**

यथा—

संसाराद्विरतिर्नित्यं यमः पर उदाहृतः।।"

(ने० तं० पृ० 181)

यमाद्याः शैवशास्त्रेऽपि स्वीकृताः, परं शाम्भव-शाक्ताणवाद्युपायापेक्षयाऽत्यन्तमवरत्वमेषामत्र शास्त्रे।

द्र० (मा० वि० तं०18, 74,79) **इति।**

द्र० (तं० आ०4, 87,109) **इति च।**

यमाद्याः — **यमनियम प्रत्याहारध्यानाद्याः पातञ्जल-योगाङ्गभूता अभ्यासविशेषाः।**

~योगाङ्गभूताः — **सत्तर्कोदयोपायभूततयैव यमादेः समाध्यन्तस्याभ्यासस्य वास्तविकी योगाङ्गता। यथा—**

"योगाङ्गता यमादेस्तु समाध्यन्तस्य वर्ण्यते
स्वपूर्वपूर्वोपायत्वादन्त्यतर्कोपयोगतः।।"

(तं० आ०4, 96)

"सर्वत्रतर्कस्यैवाङ्गान्तराण्युपायः स च स्वसंवित् - साक्षात्कारस्य।"

(तं० आ० वि० खं०3, पृ० 103)

तर्कोऽत्र शुद्धविद्यानुकूलस्य विमर्शस्याभ्यासो न न्याय-दर्शनीयः इति वेद्यं सुधीभिः।

यवर्ग-देवताः — **इन्द्राणी, यथा—**

"ऐन्द्री चैव यवर्गस्था .....।"

(स्व० तं०1, 36)

यागः — **मण्डलान्तरुत्कृष्टतराणां देवतानां पूजनार्चन-तर्पणहोमादिक्रियाकलापः।**

~अभेदमयः — **शैवयोगाभ्यासाल्लभ्यमाना तुष्टिरेव शैवयोगे यागः। शाक्तोपाये तु यागो विशेषप्रकारकभावनामयः। तुष्टिरूपो यागस्तु सर्वोपायफलम्। यथा—**

"यागोऽत्र परमेशानि तुष्टिरानन्दलक्षणा।"

(वि० भै० 150)

~कौलसाधनायाम् : — **शिवशक्तितयैव समस्तविषयाव-लोकनम्। यथा—**

"तथात्वेन समस्तानि भावजातानि पश्यतः।
ध्वस्तशङ्कासमूहस्य यागस्तादृश एव सः।।"

(तं० आ० 29, 5)

~तदनुष्ठानविधिः (कौले): — **शक्तिशक्तिमतोः प्राणे शरीरे वा स्थिताः निखिलाः देवतास्तर्प्यन्ते। उत्तमोऽयं विधिर्यत् संविदि स्थिता एव सर्वाः देवताः आनन्दरसेन तर्पणीयाः। शरीरमेव तत्र पीठम्, तत्रास्था संविदेव पूज्या कौलिके यागविधौ। तथा यागं विधायैव शिष्या दीक्षणीया दौतविधिना। शक्तिमानत्र कौलगुरुः। शक्तिस्तस्य दूती। यथा—**

"अथवा प्राणवृत्तिस्थं समस्तं देवतागणम्।
पश्येत् पूर्वोक्तयुक्त्यैव तत्रैवाभ्यर्चयेद् गुरुः।।
प्राणाश्रितानां देवीनां ब्रह्मनासादिभेदिभिः।
करन्ध्रैर्विंशतापानचान्द्रचक्रेण तर्पणम्।।"

(तं० आ०29, 178-79)

रहस्यमयत्वेन न स्पष्टं व्याख्याता इमाः पंक्तयो जयरथेन।

"यत्र सर्वे लयं यान्ति दह्यन्ते तत्त्वसञ्चयाः।
तां चितिं पश्य कायस्थां कालानलसमप्रभाम्।।"

(तं० आ०29, 182)

"शून्यरूपे श्मशानेऽस्मिन् योगिनीसिद्धसेविते।
क्रीडास्थाने महारौद्रे सर्वास्तमितविग्रहे।।
.....
.....
.....
असंख्य चितिसम्पूर्णे श्मशाने चितिभीषणे।
समस्त-देवताधारे प्रविष्टः को न सिद्ध्यति।।"

(तदेव, 29, 183-85)

~परः — **यथा—**

"सर्वाभेदधनतुर्यातीतवृत्ति विश्रान्त्यां तस्यां यत् विश्रमणं विसर्गः, स एव यागः।"

(प० त्री० ल० बृ० पृ०21-22)

~ शाक्तोपाये : — **(1) कल्पनात्मिकया भावनया परमेश्वरे एव सर्वभावार्पणं यागः। तेनैतस्य सत्यस्य सुनिश्चिता प्रख्यातिर्भवति यत्सर्वस्य परमेश्वर एव स्थितिरिति। यथा—**

"भावानां सर्वेषां परमेश्वर एव स्थितिः। नान्यद् व्यतिरिक्तमस्ति। इति विकल्परुढिसिद्धये परमेश्वर एव सर्व भावार्पणं यागः।"

(तं० सा० पृ० 25)

~सन्ततः — **जीवनिकायैर्भुज्यमानेषु भोग्येषु पदार्थेषु सत्सु सर्वत्र स्वस्य तर्पणं पश्यतः, याजक-यजनीय-यागाँश्च सर्वान् शिवत्वेनैव विमृशतः शिवयोगिनोऽनायासमेव सर्वदा यागः प्रचलित, सर्वैः क्रियमाणान् यागान् स्वेनैव क्रियमाणान् पश्यतोऽपि तस्यानायासमेव यागविधिः प्रचलत्येव। यथा—**

"सर्वाकारेषु भोग्येन यजनं मम वर्तते।।
भुञ्जेऽहं यत्र तत्रापि भोगलग्नः प्रतीतितः।
शिवोऽस्मि साधनाविष्टः शिवोऽहं याजकोऽप्यहम्।।
शिव एवानया स्थित्या सत्यया याग उत्तमः।
येन येन यत्र यत्र यैर्यैर्यदिह चेज्यते।।
स मया क्रियते यागः शिवत्वाद्याग उत्तमः।"

(शि० दृ०7, 95 तः 98)

यागधाम ~कौले : — **(1) स्थण्डिलादिरूपा भूः, (2) वस्त्रं सुचित्रितदेवता यन्त्राद्याकृतियुतं, (3) कायपीठं (शिरः) इति।**

उत्तरोत्तरमुत्कृष्टतरमत्र। यथा—

"भूवस्त्रकाय पीठाख्यं धाम चोत्कर्षभाक् क्रमात्।।"
(तं० आ० 29, 15)

यागरहस्यम् ~दीक्षासु : — **स्वशरीरशिवभाव भावनाभ्यासेन स्वस्य शिवभावलाभो यागः। यथा—**

"एवमानन्दसम्पूर्णं सर्वौन्मुख्यविवर्जितम्।।
यागेन देहं निष्पाद्य भावयेत शिवात्मकम्।
गलिते विषयौन्मुख्ये पारिमित्ये विलापिते।।
देहे किमवशिष्येत शिवानन्दरसादृते।
शिवानन्दरसापूर्णं षट्त्रिंशत्तत्त्वनिर्भरम्।।
देहं दिवानिशं पश्यन्नर्चयन्स्याच्छिवात्मकः।"
(तं० आ०15, 283 तः 286)

यागस्थानम् : — (1) यत्र स्थाने चित्तं सुप्रसन्नं सत् परमेश्वरसमावेश-योग्यं भवेत् तदेव यागस्थानम्। यथा—

"प्रसन्नहृदयो यागस्थानं यायात्। तच्च यत्रैव हृदयं प्रसादयुक्तं परमेश्वरसमावेशयोग्यं भवति तदेव। न त्वस्यान्यल्लक्षणम्।"
(तं० सा० पृ० 133)

तद्यथा—

(क) "यत्र यत्र हृदम्भोजं विकासं प्रतिपद्यते।।
तत्रैव धाम्नि बाह्येऽन्तर्यागश्रीः प्रतितिष्ठति।"
(तं० आ०15, 107-108)

(ख) "तत्रादौ यागसदनं शुभक्षेत्रे मनोरमम्।।"
(ग) "एकान्ते विजने रम्ये .....।"
(घ) "..... यत्र वा रमते मनः।"
(उद्ध० तं० आ० वि० खं०9, पृ०57)

"गुरवस्तु विमुक्तौ वा सिद्धौ वा विमला मतिः।।
हेतुरित्युभयत्रापि यागौको यन्मनोरमम्।"
(तं० आ०15, 109-110)

~गौणम् : — मुख्यता तु संविद्विकासस्य। स यत्रैव भवेत्तदेव यागस्थानं मुख्यमन्यत्तु सर्वं गौणमेव। यथा—

"नान्यत्र गत्या मोक्षोऽस्ति सोऽज्ञानग्रन्थिकर्तनात्।।
तच्च संविद्-विकासेन श्रीमद्वीरावलीपदे।"
(तं० आ०15, 108-109)

यागौकः — यागकरणार्थं सुशोधितायां भूमौ निर्मितः सुसंस्कृतः सुपरिष्कृतश्च मण्डपविशेषः, यागौकः परिभाष्यते। यथा—

"सन्तर्प्य तीर्थं सङ्गृह्य यागौको विधिना विशेत्।' सर्वमन्त्रान् सन्तर्प्य, शिवतीर्थं मन्त्रग्रहणेन भावनया स्वात्मलीनं कृत्वायागगृहं भाविविधिना विशेत्।"
(ने० तं० उ० खं०3, पृ०65)

याथार्थ्यवादः — क्रियासम्बन्धसामान्यादयो व्यावहारिकाः पदार्था नैव वैयक्तिक-चित्तसंस्कारमात्रकल्पिताः, अपितु सत्या एव लोकव्यवहारे। तथैव शास्त्रीयेऽपि व्यवहारे तेषां सत्यत्वमेव मन्तव्यं नाविद्यावासनादिकल्पितत्वं, न चापि स्वप्नसंसारकल्पत्वं, नापि वा वन्ध्यासुतकल्पत्वम्, एषामर्थक्रियाकरणादिति। यथा—

"क्रिया सम्बन्धसामान्यद्रव्यदिक्कालबुद्धयः।
सत्याः स्थैर्योपयोगाभ्याम् .....।।"
(ई० प्र०2-2-1)

इदं व्यवहारिकाणां पदार्थानां सत्यत्वप्रतिपादनमेव याथार्थ्यवादः।

यामलः ~ शिवः — शिवशक्तिसंघट्टात्मा। स च मृत्युजिद्- भट्टारकोक्ते प्रथमध्यान एव। यथा—

"एकवीरो यामलोऽथ त्रिशक्तिश्चतुरात्मकः।"
(तं० आ०1, 110)

"यामलः- (तत्रैव मृत्युजिति प्रथमध्याने)"
(तं० आ० वि० खं०1, पृ० 153)

यामलम् : — (1) शिवशक्तिसंघट्टात्मकं पारमेश्वरं स्वरूपम्। शक्तिशक्तिमतोः सामरस्यात्मकमभिन्नं स्वरूपम्। यथा—

" 'तयोर्यद्यामलं रूपं स संघट्ट इति स्मृतः' इति वक्ष्यमाणनीत्या शक्तिशक्तिमत्सामरस्यात्मा संघट्टः।"
(तं० आ० वि० खं०1, पृ०4)

(2) औवधिक-शक्तिशक्तिमद्भेदावभासनपूर्वकं यदभेदमय-शिवशक्ति-विमर्शनं तदेव तयोर्यामलत्वम्। यथा—

"शक्तिमद्भेदयोगेन यामलत्वं प्रपद्यते।।"
(तं० आ०3, 234)

"प्रकाशविमर्शलक्षणमौपाधिकं भेदमवभासस्य यामलतामेति, येन शक्तिरिति शक्तिमानिति च व्यपदिश्यते। वस्तुतो हि न प्रकाशाद् विमर्शः स वा तस्मादतिरिच्यते।"
(तं० आ० वि० खं०2, पृ०224)

अन्यथा हि सर्वथाऽभेदे एव सततं प्रकाशमाने सति किं कथं वा यामलत्वम्।

~ पूज्यम् : — **चिद्भैरवसंघट्टानन्दोल्लासमयी पराशक्तिश्चक्रयागे पूज्या। एकवीरक्रमादन्योऽयं यामलक्रमः, सम्प्राप्त-भैरवसंघट्टतया। यथा—**

"नन्वेकवीर-क्रमाद् यामलक्रमेण पूजायां को विशेष इत्याशङ्क्याह-

'प्रसरेच्छक्तिरुच्छूना सोल्लासो भैरवः पुनः।
संघट्टानन्दविश्रान्त्या युग्ममित्थं प्रपूजयेत्।।"
(तं० आ०29, 49)

~ शास्त्रम् : — यस्मिंच्छास्त्रे शक्तित्रयस्य परस्परं गुण-प्रधानभावेन स्थितिः, न पुनस्त्रिकशास्त्रवत् शक्तित्रयस्याप्येक-रूपतया मुख्यत्वम्। यथा—

"अत्र शक्तित्रयं मुख्यं सम्पूर्णस्थिति कल्पते।
अनन्योन्योपरोधेन पूर्णं पूर्णाचिदात्मकम्।।
ततः परं तु त्रितयं कस्याञ्चिद् गुणताजुषि।

अन्यस्यां गुणताऽभाजि यामलं परिभाष्यते।।"

(मा० वि० वा०1, 167-168)

त्रिके तावदिच्छाया ज्ञानक्रियात्मकत्वेन पूर्णत्वम्, एवं ज्ञानस्येच्छाक्रियात्मकत्वेन, क्रियायाश्चापीच्छाज्ञानमयत्वेन पूर्णत्वमिति तात्पर्यम्।

यामलो ~ न्यासः — **सुस्पष्टं नोक्तः।**

(तं० आ०15, 252 तः 255)

यियासा — **सद्गुरुं प्रति साधकस्यगन्तुमिच्छा, सद्गुरुप्राप्तयेऽभिलाषः, तदङ्गभूता च सद्गुरुविषया जिज्ञासा सर्वमेतच्छक्तिपातवशत एव भवति। यथा—**

"किं तत्त्वं तत्त्ववेदी क इत्यामर्शन-योगतः।।
प्रतिभानात् सुहृत्सङ्गाद् गुरौ जिगमिषुर्भवेत्।
एवं जिगमिषायोगादाचार्यः प्राप्यते .....।।"

(तं० आ०13, 222-23)

युक्तिः — **(1) प्रत्यक्षादि-प्रमाण-योजनात्मकं सम्यक् प्रतिपादनमेवयुक्तिः, नानुमानमात्रम्। यथा—**

"युक्तिरिति तावदनुमानमेवेति सांख्यादयः।
प्रमाणयोजनात्मकं प्रमातृस्वातन्त्र्यमेव युक्तिरितिप्रत्यभिज्ञातत्त्वंवित्।"

लोकेऽपि चोपाययोजनमेव स्वातन्त्र्योत्थापितं युक्तिरिति प्रसिद्धम्। युक्त्या कुरु, युक्त्या सङ्कटादुत्तीर्णोऽस्मीति। तत् तत्रैवावधेयं सुमतिभिरिति अत्रास्माभिर्निबन्धः कृतो, न तु आहोपुरुषिकयेत्यलम्।"

(ई० प्र० वि० वि० खं०3, पृ० 209)

(2) अनुभवानुसरिणी तर्कात्मिका विचारणा। यथा—

"अनुभवानुसारी तर्को युक्तिः इति।"

(शि० दृ० वृ० टि०2, पृ० 4)

युक्तिविदर्भणम् — **क्रियासाधनाङ्गविशेषः। यथा—**

"पश्चान्न्यस्तमन्त्रस्य नाम्नश्चतुर्निवेशो युक्तिविदर्भणम्। यदुक्तम्-
'मन्त्रादावभिधेयं च त्रिधा योजितसम्पुटम्।
युक्त्या विदर्भणं .....।। इति।"

(ने० तं० उ० खं०2, पृ० 79)

युगपत् — **सकृद्विभातत्वम्। क्रमराहित्येनैकदैव सदातनत्वेनेति। क्रिया-विशेषणमिदम्। यथा—**

"युगपत् स हि संविदात्मकः
स्वातन्त्र्याद् बहुधा प्रकाशते।।
क्रमकालविवर्जनाशयं
युगपच्छब्दममुं प्रयुञ्जते।"

(मा० वि० वा०1, 126-127)

~ भुक्तिमुक्तिः —

द्र०:- 'भुक्तिमुक्ति' ~ 'युगपत्' **इति।**

युग्मयागः — **यामलयागः। यथा—**

"युग्मयागो यामलम्।"

(तं० आ० वि० खं०12, पृ० 197)

योगः — **(1) शिवेन सह जीवस्यैकत्वम्। प्रत्यभिज्ञाते स्वस्वरूपे साधकः, स्वात्मानं शिवरूपतयैव विमृशन् शिवैक्यमापद्यत एव देहान्ते। तदैक्यमेव जीवशिवयोर्योगः। 'युजिर' योगे इति धातोर्योगपदव्युत्पत्तिः। यथा—**

"योगमेकत्वमिच्छन्ति वस्तुनोऽन्येन वस्तुना।"

(मा० वि० तं०4, 4)

वस्तुनः = पशुप्रमातुः, अन्येन वस्तुना-परमेश्वरेणेति। अत्र वस्तुत्वकथनं लोकव्यवहारमात्रम्।

(2) चिदात्मकतासमापत्तिः। यथा—

"योगश्चिदात्मसमापत्तिः।"

(प० त्री० विवृ० पृ० 8)

(3) कर्मफलभुक्तये योजनिकाख्यं दीक्षाङ्गमपि कदाचिद् योग इत्युच्यते। यथा—

"अनुद्धृते कथं योगः यावत् कर्म न भुज्यते।
तस्मात्तु योगशब्देन तत्तत्कर्मैकचिन्तना।।
निर्वर्त्यते महादेवि .....।"

(स्व० जं०10, 418-19)

"यतश्चायं कर्मफलमवश्यं भोजनीयस्ततो योजनमस्य तत्तत्कर्मवासनैकतानतामयमाचार्येण भावनया क्रियते।।"

(स्व० तं० उ० प०10, पृ० 177)

~ शाक्तोपाये : — **(क) इन्द्रियव्यापारे प्रतिक्षणं चलत्यपि सर्वभावानां शिवरूपतया दर्शनं योगः। यथा—**

"यस्मिन्नर्थे सदात्यागो गच्छतस्तिष्ठतोऽपि वा।
धावतः खादतो वापि स योगः परयोगिनः।।"

(शि० दृ०7, 81)

(ख) अहं शिव एव, मत्त एव मदिच्छानुसारमिदं सर्वं प्रवर्तते, अतः शिव एव सर्वमिदमिति विमर्शनं योगः। यथा—

"शिवोऽस्मीति मदिच्छातः सर्वभावप्रवर्तनम्।।
अत एव शिवः सर्वमिति योगोऽथ चेतसि।"

(शि० दृ०7, 83-84)

(ग) परतत्त्वस्याविकल्प्यस्य स्वयं प्रकाशस्य च स्वरूपस्य ख्यातये तस्य पुनः पुनर्विमर्शनं योगः। यथा—

"शुद्धविद्यांशरूपैर्विकल्पैर्यदनपेक्षितविकल्पनं स्वाभाविकं परमार्थतत्त्वं प्रकाशते तस्यैव सनातन-तथाविध-प्रकाशमात्रता-रूढये तत्स्वरूपानुसन्धानात्मा।"

(तं० सा० पृ० 27)

~ सर्वोत्तमः — **अकिञ्चिच्चिन्तनात्मक उत्कृष्टतरः शाम्भवयोग एव सर्वश्रेष्ठो योगः। तस्य स्वरूपं मालिनीविजयेऽष्टादशेऽपि पटले पुनरुपदिष्टम्। यथा—**

"उपविष्ट ऋजुर्योगी न किञ्चिदपि चिन्तयेत्।"

(मा० वि० तं०18, 20)

~ स्वतः सिद्धः — **स्वात्मानं पञ्चकृत्य-स्वतन्त्रमभिमन्यमानस्य योगिनोऽर्चाजपध्यानादयोऽनायासमेव स्वत एव चलन्ति। यथा—**

"पञ्चकृत्यस्वतन्त्रत्वसम्पूर्णस्वात्ममानिनः।
योगिनोऽर्चाजपध्यानयोगाः संस्युः सदोदिताः।।"

(तं० आ०14, 25)

योगचारः — योगसंचाराख्यं शास्त्रम्। यथा—

"उक्तं च श्रीयोगचारे मोक्षः सर्वप्रकाशनात्।"

(तं० आ०6, 58)

योगपद्धतिः — धर्मशिवाचार्येण रचितः कश्चन योग-साधनग्रन्थो य इदानीं नैव लभ्यः, परं यस्य श्लोकाः क्षेमराजेनोद्धृताः स्वच्छन्दतन्त्रोद्योते। यथा—

"एते स धर्मशिवाचार्येण स्वपद्धतौ- 'एतेषां लक्षणं वच्मो गुरुपारम्परागतम्।' इत्युपक्रम्य
'तुङ्गमेधध्वनिनिभः सोऽष्टमो ध्वङ्कृतः स्मृतः।" इत्यन्तम्।

(स्व० तं० उ० प०11, पृ० 8-9)

योगपर्वः — मूर्तियागोपयोगी तिथिभिः साकं भग्रहयोगविशिष्टः कालः प्रतिपादितस्तन्त्रालोके विस्तरतः।

द्र०:- (तं० आ०28, 106- तः 110)

यथा—

"योगपर्वणि कर्तव्यो मूर्तियागस्तु सर्वथा।"

(तं० आ०28, 110)

~ तत्फलम् : — **तथाविधे पर्वणि सम्पादितो मूर्तियागः मण्डलयागं विनापि समयित्वे प्रतिष्ठापयति। यथा—**

"यः सर्वान् योगपर्वाख्यान् वासरान् पूजयेत् सुधीः।।
मूर्तियागेन सोऽपि स्यात् समयी मण्डलं विना।"

(तं० आ०28, 110-11)

योगप्रक्रियाः — अभ्यास प्रकारा अनेक-विधाः, विज्ञानभैरव- मालिनी-विजयोत्तरादौ विस्तरतः प्रतिपादिताः।

~ उपादेयतमाः — **शैवयोगे योगप्रक्रियाणां तत् क्रमस्य वा विषये नैवनियमः। यया खलुप्रक्रियया यस्य साधकस्य चित्तं तत्त्वे निश्चलतां यायात् तामेव प्रक्रियामसावुपादातुं स्वतन्त्रः, नात्र कश्चन निर्बन्धः। यथा—**

"किंत्वेतदत्र देवेशि नियमेन विधीयते।।
तत्त्वे चेतः स्थिरीकार्यं सुप्रयत्नेन योगिना।
तच्च यस्य तथैव स्यात् स तथैव समाचरेत्।।"

(मा० वि० तं०18, 78-79)

योगभ्रष्टः — पूर्णां योगसिद्धिमनवाप्यैव साधकस्य कदाचित् मृत्युर्भवेत् तस्य योगाभ्यासोऽपूर्णः। स तूर्ध्वे क्वापि भुवने भोगान् भुक्त्वा पुनरत्र भूलोके जन्म लभते। पूर्वसंस्कारवशाच्छक्तिपातवशाच्च पुनर्दीक्षामवाप्य योगमभ्यस्य चिरेण मुक्तिं लभते।

स च द्विप्रकारः परोऽवरश्चेति।

~ अवरः — **यस्त्विह जन्मनि पूर्णं योगफलमनवाप्यैव म्रियते, स उत्तरेषु भुवनेषु भोगान् भुक्त्वा पुनरत्रैव लोके जन्म लभते। प्राक्तन-संस्कारवशादसौ योगे प्रवर्तते तत्फलत्वेन च जीवन्मुक्तिं वा, शरीरपातानन्तरभाविनीं वा परां मुक्तिं, क्रममोक्षगतिं वा लभते। यथा—**

"परमार्थमार्गमेनं ह्यभ्यस्याप्राप्य योगमपि नाम।
सुरलोकभोगभागी मुदितमना मोदते सुचिरम्।।
विषयेषु सार्वभौमः सर्वजनैः पूज्यते यथा राजा।
भुवनेषु सर्वदेवैर्योगभ्रष्टस्तथा पूज्यः।।
महता कालेन पुनर्मानुष्यं प्राप्य योगमभ्यस्य।
प्राप्नोति दिव्यममृतं यस्मादावर्तते न पुनः।।"

(प० सा०100 तः 102)

~ परः — **य इहैव जन्मनि पूर्णं परशिवभावं न रसयितुं समर्थोऽसावुत्कृष्टेषु भुवनेषु दिव्यभोगान् भुञ्जानस्तत्रत्य एव जन्मनि पुनर्योगमभ्यस्य परशिवभावमासादयति। नासौ पुनर्मर्त्यलोके जन्म लभते। यथा—**

"तस्य तु परमार्थमयीं धारामगतस्य मध्यविश्रान्तेः।
तत्पदलाभोत्सुकचेतसोऽपि मरणं कदाचित् स्यात्।।
योगभ्रष्टः शास्त्रे कथितोऽसौ चित्रभोगभुवनपतिः।
विश्रान्तिस्थानवशाद् भूत्वा जन्मान्तरे शिवीभवति।।"

(प० सा० 98-99)

जन्मान्तरे-इत्युत्कृष्टलोकस्थे जन्मनि।

योगराजः — क्षेमराजस्यासौ शिष्यो यः परमार्थसारस्य वैदुष्यपूर्णां बृहट्टीकां निर्मितवान्। विस्तस्तापुरीनिवास्ययभभूत्। यथा—

"श्रीमतः क्षेमराजस्य सद्गुर्वाम्नायशालिनः।
साक्षात्कृतमहेशस्य तस्यान्तेवासिना मया।।
श्री वितस्तापुरी-धाम्ना विरक्तेन तपस्विना।
विवृतिर्योगनाम्नेयं पूर्णाद्वयमयीकृता।।"

(प० सा० वि० पृ० 199)

योगविघ्नः — सांसारिकविषय सम्बद्धा रूढा वासनात्र महान् विघ्नो योगमार्गे। यथा—

"यद्यहं परमशिवः सर्वज्ञसर्वकर्तृत्वात्, तर्हि किमिति न शत्रून् सर्वान् सपदि ग्रसे, इत्यादिर्मायीये देहादावभ्यासेन विभवेच्छामयो हि परमो विघ्नः। स एतच्छास्त्रार्थपरिशीलनेन निवर्तते।"

(ई० प्र० वि० वि० खं०3, पृ० 402)

योगशक्तिः — योगाभ्यासोद्भूता विशेषा शक्तिः। यथा—

"योगशक्तिर्ज्ञानशक्तिः सर्वशास्त्रेषु गीयते।।
सा शक्तिः परमेशस्य शिवस्याशिवहारिणी।
बन्धमोक्षकरी पुंसां न स्वतन्त्रा स्वभावतः।।
अनेनैवानुसारेण शिवः सर्वप्रदः शुभः।"

(ने० तं०16, 79-81)

योगसञ्चरः — **(1) कौलिकं किमपि शास्त्रं समुद्धृतं यन्मतं तन्त्रालोके। यथा—**

"श्रीयोगसञ्चरेऽपि च मुद्रेयं योगिनीप्रिया परमा।।"

(तं० आ०29, 150)

(2) कोऽप्यागमिको ग्रन्थः, कालीनयप्रतिपादकः। यथा—

"शुद्धसंविन्मयी प्राच्ये ज्ञाने शब्दनरूपिणी।
करणे ग्रहणाकारा यतः श्रीयोगसञ्चरे।।"

(तं० आ०4, 126)

द्र० तं० सा०, पृ०198; तं० आ० 15, 65; 391 तः 393; 28, 10, 29, 82, 150, 32, 31, **इति।**

योगसिद्धाः — **योगाभ्यासतो लब्धसिद्धयः। यथा—**

"योग सिद्धास्तु योगवशप्राप्तसिद्धिनिष्ठाः।"

(ने० तं० उ० खं०2, पृ०115)

योगसिद्धिः ~ अपरा : — **(1) आप्यायनादिना परेषां परिपोषणसामर्थ्यम्, व्याध्यादीनामुपशमनपूर्वकं शरीरात् पृथक् करणाख्यमपाकरणम्, विप्रकृष्टाणां च विषयाणां साक्षाद्दर्शनादीत्येवं प्रकाराणि सामर्थ्यानि योगिनामाविर्भवन्ति। यथा—**

"भूतानां शरीरप्राणादीनामाप्यायनादौ सन्धानं परिपोषणं व्याध्याद्युपशमादौ तत्सकाशात् पृथक्त्वं शरीरादेर्विश्लेषणं देशकालादिविप्रकृष्टस्य च विश्वस्य संघट्टो ज्ञानविषयीकार्यत्वमस्य पूर्वोक्तशक्तिसन्धाने सति जायते।"

(शि० सू० वृ०1, 20)

~ पराः — **यदा शिवयोगी स्वात्मानं शक्तिचक्रेशत्वेनानुसन्धत्तेऽभ्यासेन तदा तस्मिञ्छक्तिचक्रेशता प्रदीप्ता भवति। यथा—**

"विश्वात्मप्रथावाञ्छया यदा शक्तिं सन्धत्ते, तदाऽहमेव सर्वमिति विश्वात्मकशुद्धविद्योदयात् स्वशक्तिचक्रेशत्वरूपं माहेश्वर्यमस्य सिद्ध्यति।"

(शि० सू० वृ०1, 21)

~ (तच्चिह्नानि): —

द्र०:- **'आनन्दादिपञ्चकम्'** इति।

योगाङ्गम् ~ उत्तमम् : — **अवरेषु योगाङ्गेषु सत्तर्क एव सर्वोत्कृष्टं योगाङ्गम्। धारणादीनां हि तत्रैव पर्यवसानम्। धारणादय उपायास्सत्तर्कस्तदपेक्षयोपेयः। यथा—**

"श्रीपूर्वशास्त्रे तत् प्रोक्तं तर्को योगाङ्गमुत्तमम्।।"

(तं० आ०4, 15)

"योगाङ्गत्वे समानेऽपि तर्को योगाङ्गमुत्तमम्।"

(मा० वि० तं०17, 18)

योगाङ्गवैयर्थ्यम् — **यमनियमादीनि पातञ्जलयोगस्याङ्गानि त्रिकेऽकिञ्चित्कराणि नोपयोगीनि। यथा—**

"अहिंसा सत्यमस्तेयब्रह्मचर्यापरिग्रहाः।
इति पञ्च यमाः साक्षात् संवित्तौ नोपयोगिनः।।
तपः प्रभृतयो ये च नियमा यत्तथासनम्।
प्राणायामाश्च ये सर्वमेतद् बाह्यविजृम्भितम्।।"

(तं० आ० 4, 87-88)

योगाङ्गानि ~ षट् : — **उक्तानि यथा—**

"प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा।
तर्कश्चैव समाधिश्च षडङ्गोयोग उच्यते।।"

(उद्धृतं० आ० वि० खं०3, पृ० 15)

तर्कोऽत्र पराद्वैतसिद्धान्तप्रतिपादकः सत्तर्क एव न पुनर्न्यायबौद्धार्हतादिमतः शुष्कस्तर्कः। योगाङ्गानीमान्यवरस्याणवादेरङ्गानि वेद्यानि, न तु कथञ्चिदपि शाम्भवस्य न च तस्य तेषु गणना तस्य सर्वोत्कृष्टत्वात् परत्वाच्च।

योगिनाथः — **चिच्छक्ति-संस्तुतिनामकस्य ग्रन्थस्य निर्माता। कदाचित् क्रमस्तोत्रनिर्माता सिद्धनाथ एव स्यादयं योगिनाथः। यथा—**

द्र०:- **'चिच्छक्तिसंस्तुतिः'** इति।

उक्तं च योगिनाथेन ह्येतच्चिच्छक्तिसंस्तुतौ—

.....

(स्पं० प्र० पृ० 5,6)

योगिनाथेन चोक्तम्—

**तस्मात्सर्वस्य सिद्ध्यर्थं भारती कारणं परे।
परेष्टव्या तदा रूपान्वेषणेनार्थनिश्चयात्।।
तस्या औन्मुख्यवृत्त्यैव सद्भाव परिकल्पनात्।
न हि तामन्तरेणेषा लभेताऽऽत्मानमम्बिके।।
सा च तस्यामवस्थायां स्वरूपत्योतिरिष्यते।
निर्विभागक्रमापेक्षा योगिगम्यानुरूपिणी।।
तत औन्मुख्यतश्चिन्तामयी भवतिवाक् शिवे।
विशिष्टशब्दविषयविवक्षा स्फुरणात्मिका।।
ततः शब्दात्मकत्वेन विवृत्तार्थमयी भवेत्।
तदात्मतामन्तरेण यस्मान्नार्थावधारणम्।।" इति।**

(स्प० प्र० पृ० 37)

योगिनीकौलम् — **किमप्यागमशास्त्रं समुद्धृतं तन्त्रालोके। यथा—**

"उक्तं च योगिनी कौले तदेतत् परमेशिना।।
पदमन्त्राक्षरे चक्रे विभागं शक्तितत्त्वगम्।
पदेषु कृत्वा मन्त्रज्ञो जपादौ फलभाग्भवेत्।।"

(तं० आ०7, 40-41)

द्र० **तं० आ०7, 42-44**

तं० आ० वि० खं०4/2, पृ० 11; 39; 41इति।

योगिनीजातः — **यथा—**

"देहाहंभावन्यक्कारेण चित्प्राधान्येन यच्चोपलभते स योगिनी जातो रुद्रांशश्च प्रत्यासन्नभैरवीभावः .....।"

(प० त्री० विवृ० पृ०8)

द्र०:- **'योगिनीभूः'** इति।

योगिनीदीक्षितः — **दीक्षां विना न योगज्ञानसिद्धिः। ततः प्रातिभज्ञानवान् स एव भवति या योगिनीभिर्दीक्षितः स्वशक्त्या, विनैव बाह्योपचारम्। ताभिरेव तस्य मलशोधने कृते सति प्रातिभस्य ज्ञानस्योदयस्तस्मिन्। यथा—**

"देवीभिर्दीक्षितस्तेन सभक्तिः शिवशासने।"

(तं० आ० 13, 142)

तस्य शैवशास्त्रभक्तिरपि योगिनीदीक्षाया एव फलम्।

"यस्य स्वतोऽयं सत्तर्कः सर्वत्रैवाधिकारवान्।।
अभिषिक्तः स्व संवित्ति-देवीभिर्दीक्षितश्च सः।"

(तं० आ०4, 42-43)

"तत्रातिदृढशक्तिपाताविद्धस्य स्वयमेव सांसिद्धिकतया सत्तर्क उदेति, योऽसौ देवीभिर्दीक्षित इत्युच्यते।"

(तं० सा० पृ० २३)

योगिनीभूः — **कौलिकसंघट्टकाले यो गर्भे कृतपदो भवति स शिशुर्योगिनीभूरित्युच्यते। प्रातिभज्ञानवानसौ भवत्यग्रे। यथा—**

"तादृङ्-मेलककलिका-कलित-तनुः कोऽपि यो भवेद गर्भे।।
उक्तः स योगिनीभूः स्वयमेव ज्ञानभाजनं रुद्रः।
श्रीवीरावलिशास्त्रे बालोऽपि च गर्भगो हि शिवरूपः।।"

(तं० आ०29, 162-163)

यच्चाभिनवगुप्तस्य विषये जयरथेन योगिनीभूरसाविति प्रतिपादितं तदसमञ्जसमिव प्रतिभाति। यतः कौलिक्यामेव प्रक्रियायामेवं भवति। न चाभिनवगुप्तस्य पिता नरसिंहगुप्तः कुलाचारानुयायी। तस्यामर्दकमठिकागुरोर्भट्टभूतिराजस्य शिष्यत्वात्, परमविरक्तत्वाच्चेति विमृश्यं सुधीभिः। उक्तं हि तस्य विषये—

"तारुण्यसागरतरङ्गभरानपोह्य
वैराग्यपोतमधिरुह्य दृढं हठेन।
यो भक्तिरोहणमवाप्य महेशचिन्ता-
रत्नैरलं दलयति स्म भवापदस्ताः।।"

(तं० आ०37, 55)

श्रीभूतिराजवदनोदितशम्भुशास्त्र-तत्त्वांशुशातितसमस्तभ- वान्धकारः।।"

(ई० प्र० वि० वि० खं०3, पृ० 405)

न च तथाविधाः अतिविरक्ताः साधकाः कौलिके विधौ रुचिमन्तो भवन्ति।

योगिनी-मेलकः — **असौ दिव्ययोगिनीसमागमो यत्र साधको योगिनीभ्यो रहस्ययोगदीक्षां लभते। एषा दीक्षा सद्यः फलप्रदा भवति। यथा—**

"तस्य किञ्चित् समासाद्य नगरादिकमादरात्।
स्वदिग्वर्गस्थितो भूत्वा चक्रं योज्य निजोदये।।"

इत्यारभ्य—

"योगिनीमेलकं प्राप्य षण्मासेनैव सिद्ध्यति।
दुष्करोऽयं विधिर्देवि सत्त्वहीनैर्नराधमैः।।" **इत्यन्तमग्रेऽपि च।**

(मा० वि० तं०19, 14, तः 21)

~ द्विप्रकारकः — **तत्रैको भक्तिश्रद्धास्तुतिनुतिप्रभृतिभिरुपायैः प्राप्तः प्रियमेलापः। अपरश्च मन्त्रप्रयोगप्रभावतो बलात् स्वायत्तीकृतो हठमेलापः। प्रथमो निर्विघ्नो द्वितीयश्च बहुधा सविघ्नः। यथा—**

"योगिनीमेलको द्वेधा हठतः प्रियतस्तथा।
प्राच्ये च्छिद्राणि संरक्षेत्कामचारित्वमुत्तरे।।"

(तं० आ०28, 371)

"योगिनीमेलकाच्चैषोऽवश्यं ज्ञानं प्रपद्यते।।
तेन तत्पर्व तद्वच्च स्वसन्तानादिमेलनम्।"

(तं० आ०28, 372-373)

"संवित् सर्वात्मिका देहभेदाद्या सङ्कुचेत्तुसा।।
मेलकेऽन्योन्यसंघट्ट-प्रतिबिम्बाद् विकस्वरा।"

(तं० आ०28, 373-374)

~ पर्वदिनत्वेन : — **यस्मिन् दिने दिव्यसिद्धयोगिनीनामेकत्रोपस्थानं वा स्याद् दिव्ययोगिनी समागमोऽपि वा साधकस्य स्यात् तद्दिनमुभयं तस्य कृते पर्वदिनम्। अन्यान्यपि बहूनि पर्वदिनानि भवन्तीति न विस्मर्तव्यम्।**

योगिनीमेलापः —

द्र०:- 'योगिनीमेलकः' इति।

योगिनीवक्त्रम् — **मुख्यतयोपास्यं नाडीचक्रं कौलिकोपासना- विषये यदानन्दचक्रमित्युच्यते मिथुनदेहद्वये। यथा—**

"तन्मुख्यचक्रमुक्तं महेशिना योगिनीवक्त्रम्।"

(तं० आ०29, 124)

योगिनी सिद्धमेलकः ~ कौलेः — **दिव्यदेहानां योगिनीनां सिद्धानाञ्च तथा सफलीभूतसाधनानां, साधकानां साधिकानाञ्च परस्परमुत्सवादौ मेलापकः।**

~ तत्फलम् : — **तत्र परस्परसंघट्टे सति शुद्धाशुद्धयोः संविदोः परस्परं मिश्रतायां जातायामशुद्धापि संविच्छुद्धा सञ्जायते। रहस्यसाधनाफलमेतत्। यथा—**

"संवित् सर्वात्मिका देहभेदाद्या सङ्कुचेत्तु सा।।
मेलकेऽन्योन्यसंघट्टप्रतिबिम्बाद्विकस्वरा।
उच्छलन्निजरश्म्योघः संवित्सु प्रतिबिम्बितः।
बहुदर्पणवद्दीप्तः सर्वायेताप्ययत्नतः।
अत एव गीत गीत (नृत्त) प्रभृतौ बहुपर्षदि।।
यः सर्वतन्मयीभावे ह्लादो नत्वेककस्य सः।
आनन्दनिर्भरा संवित् प्रत्येकं सा तथैकताम्।।
नृत्तादौ विषये प्राप्ता पूर्णानन्दत्वमश्नुते।
ईर्ष्यासूयादि-सङ्कोचकारणाभावतोऽत्र सा।।

विकस्वरा निष्प्रतिघं संविदानन्दयोगिनी।"

(तं० आ०28, 373 तः 378)

"सर्वायेत-सर्वाकारतां यायादिति"

(तं० आ० वि० खं०11, पृ०159)

योगिनीहृदयदीपिका — **अमृतानन्दनाथविरचिता योगिनी- हृदयाख्यस्यागमग्रन्थस्य सुविस्तृता व्याख्या। अस्यां व्याख्यायामगमान्तराणामपि विषये परिचयो लभ्यते भूरिश उद्धृतेभ्यो वाक्येभ्यः।**

योगिनीहृदयप्रवेशः — **अनुत्तरे परशिवात्मके सर्वान्तरे तत्त्वे (हृदये) प्रवेश एव योगिनीहृदय प्रवेशः। यथा—**

द्र०:- **'हृदयप्रवेशः'** इति।

द्र०:- **'लिङ्गम्'** ~ 'त्रिविधम्' इति।

~ तत्फलम् : — **योगिनीहृदयरूपेऽनुत्तरे संवित्तत्त्वे प्रविष्टः सन् हानादानवृत्तिशून्यः सन्नभेददृष्टितः विश्वं शिवमयमेव पश्यति प्रत्यक्षाद्वैतन्यायेन। यथा—**

"हानादानतिरस्कारवृत्तौ रूढिमुपागतः।
अभेदवृत्तितः पश्येद् विश्वं चितिचमत्कृतेः।।"

(तं० आ०5, 74)

योगिनीहृदयम् ~ परिभाषा : — **अव्यक्तलिङ्गम्।**

द्र०:- **'लिङ्गम्'** ~ 'त्रिविधम्' इति।

~ शास्त्रम् — **शाक्तसाधनाप्रधानः सुप्रसिद्ध आगमग्रन्थः।**

योगिनीहृदयसेतुबन्धः — **भास्करायकृता योगिनी-हृदयाख्यस्यागमग्रन्थस्य सुविस्तृता टीका। अस्यामपि टीकायां ग्रन्थान्तरवाक्यानि बहूनि समुद्धृतानि यानि शास्त्रस्येतिहासस्य विषये कान्यपि तथ्यानि प्रकटयन्ति।**

योगिन्यः — **(1) योगसाधना पराः प्राप्तयोगसिद्धिप्रपञ्चाः स्त्रियो मानव-देहस्था वा दिव्यदेहा वा। यथा—**

"योगिन्यो योगाभ्यासासादितप्रभावाः।"

(ने० तं० उ० खं०2, पृ० 115)

(2) साधिकाराः स्त्रीलिङ्गाः देवता विशेषाः। चतुष्षष्टिसंख्याकाः देव्यः। यथा—

"पीठजा देव्यो यागिन्यः।"

(ने० तं० उ० खं०1, पृ० 47)

"योगिनीनां चतुःषष्टिं कलानां षोडशीं तथा।
चतुष्टयीमवस्थानां प्रकाशे विमृशाम्यहम्।।"

(सि० म० र०3, 7)

योगी — **(1) शाम्भवादि योगसिद्धस्त्रिकसाधना परोऽसावभ्यासीयेन निजः परिमितः प्रमातृभावः परमशिवस्यापरिमिते पूर्णे च प्रमातृभावे निमग्नतां नीतः, ततश्च येन स्वात्मनोऽपरिमित एव प्रमातृभावः स्वेच्छं साक्षात् क्रियते विमृश्यते च। यथा—**

"परमार्थ-प्रमातृतत्त्व-निमग्नमायाप्रमातृताभागोयोगमेकत्वमिच्छन्ति .....।"

(मा० वि०4,4)

"इत्यागमे निरूप्यते योगी।"

(ई प्र० वि० वि० खं०2, पृ०23)

(2) सुचिरं कृतसमावेशरसाभ्यासः सर्वज्ञत्वसर्वकर्तृत्वादिसिद्धिभाक् साधकः। यथा—

"समावेशलक्षणं सत्यस्वरूपे सम्यगासमन्तात् प्रवेशलक्षणं ज्ञानं, यल्लाभेन ज्ञानी यदभ्यासेन च देहप्राणादावनन्तसंविद्धर्मात्मकविभवसमासादनाद् योगी भवति।"

(ई० प्र० वि० वि० खं०3, पृ० 327)

(3) सिद्धयोगः। देहे तिष्ठन्नपि योगबलादुद्बोधितस्वात्मपरमेश्वरभावो घटादिकमपि परमेश्वरतयैव विजानन् समावेशरसाभ्यासेन च शिवभावमास्वादयन् मानसिद्धः। यथा—

"शिवशासनोपदिष्टविधिपूर्वकोपायेन भावनाभ्यासदार्ढ्येन तु तत्रैव देहे प्राणादौ घटादावपि वा सञ्चारितपारमेश्वरधर्मप्रबन्धः सिद्धिभाजनं योगीत्यभिधीयते, यस्यागमे सम्प्राप्तघटमानसिद्धसिद्धतमभेदोऽन्वर्थरूपे निरूपितः।"

(ई० प्र० वि० वि० खं०3, पृ० 183)

उत्तरोत्तरमुत्कृष्टोत्कृष्टतरोऽयं त्रिधालक्षितः।

~ गुरुः — **कश्चिद् गुरुः केवलं ज्ञानवान्, कश्चिच्च योगसिद्धिमान्। तत्रात्मसाक्षात्कारी समस्तयोगसिद्धिप्रदानसमर्थो गुरुर्योगी।**

~ घटमानः — **योगाभ्यासमात्र-निष्ठः साधकः। यथा—**

"घटमानश्च तदभ्यासमात्रनिष्ठः।"

(तं० आ० वि० खं०8, 198)

~ चतुर्विधः — **योगी तावच्चतुर्विधो भवति। तद्यथा-प्राप्त-योगः, घटमानः, सिद्धः, सुसिद्धश्चेति। यथा—**

"सम्प्राप्तो घटमानश्च सिद्धः सिद्धतमोऽन्यथा।
योगी चतुर्विधो देवि यथावत्प्रतिपद्यते।।"

(मा० वि० तं०4, 33)

"योगी चतुर्विधः-सम्प्राप्तो, घटमानः, सिद्धयोगः, सुसिद्धश्चेति।"

(तं० आ० वि० खं०8, पृ० 198)

~ तदैश्वर्यम्ः — **शिवयोगी स्वेच्छानुसारं सृष्टिसंहारादिकरणेऽपि समर्थो भवति। यथा—**

"योगिन इच्छा परैव पारमेश्वरी स्वातन्त्र्यरूपा शक्तिः। कुमारी विश्वसर्गसंहारक्रीडापरा।"

(शि० सू० वृ०1, 13)

~ तङ्गतिः — **(1) मरणकाले स्थितायाः भावनाया अनुसारमेव तत्तदुत्कृष्टलोकादिगतिर्योगिनामपि। यथा—**

"ये पुनर्योगिनस्तेऽपि यस्मिँस्तत्त्वे सुभाविताः।
चित्तं निवेशयन्त्येव तत्तत्त्वं यान्त्यशङ्किताः।।"

(तं० आ०28, 292)

~ (विचित्रा) : — **बुभूक्षूणां योगिनां तत्र-तत्र तत्त्वभुवनादौ योजनिकावशाद् विचित्रैव गतिर्भवति। यथा—**

"दीक्षाप्यूर्ध्वाधरानेकभेदयोजनिकावशात्।
भिद्यमाना योगिनां स्याद्विचित्रफलदायिनी।।"

(तं० आ०28, 302)

~ तत्स्थितिः — **व्याख्याताऽभिनवगुप्ताचार्येण स्पष्टम्। तद्यथा—**

"यस्य तु योगिनो दृढः संस्कारः क्षीणः, न तु सर्वात्मना नष्टः, नाशे हि तस्य संस्कारस्येश्वर एव, स तु ईश्वरायते, नाशोन्मुखे तु तस्मिन् सर्वप्रकारवति दृढे संस्कारे शरीराद्यहमिति पश्यन्नपि तन्मध्य एव विश्वमहमिति पश्यति। तदस्य चक्रवर्तिन इव विश्वमनुशासतोऽपि स्वदेहादिकमधिष्ठानराजधानीकल्पम्।"

(ई० प्र० वि० वि० खं०2, पृ० 51)

~ तत्स्वरूपलक्षणम् : — **त्रिकयोगी योगसिद्धौ स्वात्मानं विश्वात्मकमनुभवतीति विश्वोत्तीर्णमपि च। यथा—**

"बाह्याभ्यन्तरं वायद् दृश्यं तत् सर्वमस्याहमिदमिति स्वाङ्गकल्पं स्फुरति न भेदेन।

(शि० सू० वृ० 1, 14)

~ सम्प्राप्तः — **येन योगोपदेशः प्राप्तमात्र एवासौ सम्प्राप्तः। यथा—**

तत्र सम्प्राप्तः प्राप्तयोगोपदेशमात्रः।

(तं० आ० वि० खं०8, पृ०198)

~ सिद्धयोगः — **यस्य योगसिद्धिर्जाता स योगसिद्धः। तस्यज्ञानाभ्यासोऽपि वर्तत एव येनासौ योजनिकां विधातुं मोक्तुं च समर्थः। न च ज्ञानेन विना परा योगसिद्धिः सम्भवेत्। यथा—**

"सिद्धयोगस्य पुनः स्वभ्यस्तज्ञानमप्यस्ति। इति तत् प्रयोजकीकारेणैवायं मोचकः।"

(तं० आ० वि० खं०8, पृ०198)

~ सुसिद्धः — **समस्ताध्वसिद्धिसम्पन्नः। यथा—**

"यस्तूत्पन्नसमस्ताध्वसिद्धिः स हि सदाशिवः।"

(तं० आ०13, 331)

योगीश्वरीमतम् — **(1) सिद्धयोगीश्वरीमतं, त्रिकाख्यं शास्त्रम्।**

(2) सिद्धातन्त्रम्, त्रिकतन्त्रत्रये एकम्। यथा—

"मूर्तियाग इति प्रोक्तो यः श्रीयोगीश्वरीमते।"

(तं० आ०28, 61)

योगेश्वराः — **परसिद्धिरसिका अभ्यासिनः। यथा—**

"योगेश्वरा योगेन परतत्त्वैक्येन ये ईश्वरा न तु मितसिद्धिरसिकाः।"

(ने० तं० उ० खं०2, पृ०115)

योगेश्वर्यः — **स्त्रीलिङ्गाः देवताविशेषाः, जगद्व्यवहारनियमनकर्मणि नियुक्ताः शिवेन। यथा—**

"योगेश्वर्यो बाह्याः खेचर्याद्याः।"

(ने० तं० उ० खं०1, पृ०9)

योजनिका — **(1) भोगवासनावासितस्य शिष्यस्य भोगसिद्धये रुद्रादिलोकान् प्रति गत्यर्थं दीक्षाङ्गभूतं कर्म। यथा—**

"एवं स्तोभितपाशस्य योजितस्यात्मनः शिवे।
शेषभोगाय कुर्वीत सृष्टिं संशुद्धतत्त्वगाम्।।"

(तं० आ०29, 209)

(2) पुत्रकदीक्षायाः दीक्षान्तराणां चापि कासाञ्चिदसावंशो यया बुभुक्षुः शिष्यस्तत्रैव तत्त्वे भुवने च योज्यते यत्रास्य भोगेच्छा स्यात्। यथा—

"ततो यदि भोगेच्छुः स्यात् ततो यत्रैव तत्त्वे भागेच्छा अस्य भवति तत्रैव समस्तव्यस्ततया योजयेत्।"

(तं० सा० पृ० 159)

"ततो योजनिकोक्तक्रमेण पूर्णाहुतिः। भोगेच्छोर्भोगस्थाने योजनिकार्थमपरा।"

(तं० सा० पृ० 160)

योजनिकैषा शिष्यं शरीरत्यागादनन्तरं तमेवभुवनविशेषं प्रापयति यत्रास्य भोगवासनातुष्टिः सम्भवेत्। क्वचिच्छास्त्रेष्वेषा स्वतन्त्रदीक्षाविशेषतयाऽपि गण्यते। परमत्र त्रिके दीक्षाङ्गमात्रतयैवेति बोद्धव्यम्। यथा—

"तन्त्रे योजनिका स्मृता।"

(उद्धतं० आ० वि० खं०8, पृ०182)

"बुभुक्षोस्तु द्वितीया पूर्णाहुतिर्भोगस्थाने योजनाय।"

(तं० सा० पृ०163)

"तादृशेऽपि तस्किन् पूर्ववत् प्रोक्षणादिसंस्कारःपूर्णाहुतियोजनिकान्तः।"

(तदेव, पृ० 168)

~ तारतम्यतः — **सामर्थ्यवान् गुरुः शिष्यमुत्तरेषु तत्त्वेषु योजयति तेन च ते शरीरपातानन्तरं तत्तत्त्वं प्राप्नुवन्ति। तत्राचार्यः परमे पदे, साधकः शिवपदे, पुत्रकः सदाशिवपदे, समयी पुनरीश्वरपदे नियुज्यते।**

यथा—

"अधिकारार्थमाचार्ये परापरपदे स्थितिः।
शिवत्वे साधकानां तु विद्याद्दीक्षां सदाशिवे।।
पुत्रके परमे तत्त्वे समयिन्यैश्वरे तथा।"

(तं० आ० वि० खं०9, पृ० 236)

~ निष्फलाः — **भोगवासनाहीनस्य शिष्यस्य कृते गुरुणा कृतापि योजनिका निष्फलैव, न तत्तल्लोकलभ्यं भोगमस्मै ददाति।**

~ प्रयोजनतः — **अस्याः प्रयोजनत्वेनोक्तमस्ति यद्भोगवासना- युक्तः शिष्योऽवश्यमेव तत्तद्भोगयुक्तियोग्ये भुवने योजनीय इति यतो नासौ सद्योमुक्तियोग्यः। असन्तोषिता भोगवासना तं पातयेत् कदाचित्। यथा—**

"योग्यतावशसञ्जाता यस्य यत्रैव वासना।
स तत्रैव नियोक्तव्यः पुरेशाच्चोर्ध्वशुद्धिभाक्।।
.....
.....
यो यत्राभिलषेद् भोगान् स तत्रैव नियोजितः।।
सिद्धिभाङ् मन्त्रसामर्थ्यादित्याद्यन्यत्र वर्णितम्।"

(तं० आ०28, 262-64)

~ फलान्तरतः (कौले) : — **कौलिकः साधको योजनिकां सम्प्राप्य तदनन्तरं स्वात्मानं क्रमेणोर्ध्वोर्ध्वतत्त्वस्थेषु लोकेषु विहरन्तं पश्यति यावच्छिवतत्त्वमवाप्य तत्र मितं स्वात्मानं नैव पश्यति, तस्य शिवेनैकीभावसम्पत्तेः। यथा—**

"आत्मानं प्रेक्षते देवि तत्त्वे तत्त्वे नियोजितः
यावत् प्राप्तः परं तत्त्वं तदा त्वेष न पश्यति।।"

(तं० आ०29, 217)

सर्वशास्त्रार्थवेत्तृत्त्वमस्य सम्भवति। यथा—

"अथवा सर्वशास्त्राण्यप्युद्ग्राहयति तत् क्षणात्।।"

(तदेव, 218)

~ मोक्षदाः — **गुरुणोपरितने क्वापि शुद्धे तत्त्वे योजनिकया योजितः पुत्रकः पर्यन्ते मोक्षभाग्भवत्येवेति न विस्मर्तव्यम्। यथा—**

"एवं युक्तः परे तत्त्वे गुरुणा शिवमूर्तिना।
न भूयः पशुतामेति दग्धमायानिबन्धनः।।"

(तं० आ०17, 91)

योनयः ~ देव्यः — **जगद्व्यवहारमूलस्रोतोभूता देव्योऽम्बा, ज्येष्ठा, रौद्री वामा चेति चतस्रः। यथा—**

"योनयः शक्तयो ज्ञेयाश्चतस्रः सर्वकारणम्।
अम्बा, ज्येष्ठाभिधा रौद्री वामा च शिवमूर्त्तयः।।"

(शि० सू० वा०1, 19)

एतासां विशेषताः स्वे स्वे स्थाने द्रष्टव्याः।

~ वर्णाः — **कादिक्षान्ताः व्यञ्जनवर्णा मातृकायाम्।** यथा—

"कादिभिश्च स्मृता योनिः .....।"

(मा० वि० तं०3, 11)

योनिः — **(1) परामायाशक्तिर्यया संघट्टमासाद्य परमेश्वरो जगत् सृजति। संघट्टश्चात्र स्वात्मतया विमर्शनम्। तच्च पारस्परिक आवेश इति। यथा—**

"परम्परावेशलक्षणं संयोगमासाद्य योनिः माया .....
.....।

(तं० आ० वि० खं०3, पृ० 141)

(2) सैव हि कञ्चुककरणकार्यवर्गात्मकस्य प्रपञ्चस्य प्रसवभूः। यथा—

"योनेर्विश्वकारणस्य मायायाः .....।"

(शि० सू० वि० पृ०6)

(3) ग्राह्यग्रहणगृहीतृरूपकोणत्रयात्मकं शक्तिविकासद्योतकं शाक्तबीजं विश्वप्रसूतिस्थानतया योनिरित्यभिधीयते। शारदालिप्याकारतयाऽपि त्रिकोणं सद्योनिरित्युपचर्यते। यथा—

"तथा च तत् कुसुममेव त्रिकोणतया योनिरूपं तत् स्फुटीभूत-विभक्तग्राह्यादिरूपसोम-सूर्याग्नि-सृष्टि-स्थिति-संहृतीडापिङ्गला-सुषुम्नाधर्माधर्मशबलादि-कोणत्रितया-पारमेश्वरी भैरवी भट्टारिका मुद्रा तद्रूपयोन्याधारतया योनिरिति निर्दिष्टा।"

(प० त्री० वि० पृ०183-184)

(4) बीजात्मकः स्वरवर्ग एव व्यञ्जनरूपतयाऽवस्थितो योनिवर्गः। यथा—

"स्वराः शिवबीजात्मकाः शाक्तरूपे कुसुमतया तिष्ठन्तः कादयः क्षान्ता योनिरित्यभिधीयते।"

(प० त्री० विवृ० पृ०6)

"तदुत्थं व्यञ्जनात्मकं योनिरूपम्।"

(तं० सा० पृ०15)

(5) कादिहान्तानां मातृकावर्णानां योनिरित्यभिधानम्। एतेषां क्षोभाधारत्वात्, प्राणिनां योनिवत्। यथा—

"कादिहान्तमिदं प्राहुः क्षोभाधारतया बुधाः।

(तं० आ०3, 180)

"क्षोभाधारतयेति योनितयेत्यर्थः। यदुक्तं
"कादिभिश्च स्मृता योनिः .....।"

(तं० आ० वि० खं०2, पृ०177)

योनिवर्गः — **जगदाभासोत्पत्तिकारणभूताः शिवस्य शक्तयो योनयस्ताश्च प्राधान्येन चतस्रोऽम्बा, ज्येष्ठा, रौद्री, वामा चेति, ता एवानन्तैः रूपैः प्रकटीभूय वृहद्वर्गे रूपतां प्राप्ताअत्रलोके। अतस्तासां प्रपञ्चा एव योनिवर्गाः। यथा—**

"योनयः शक्तयो ज्ञेयाश्चतस्रः सर्वकारणम्।
अम्बा ज्येष्ठाऽभिधा रौद्री वामा च शिवमूर्तयः।।
तासां वर्गः समूहः स्यात्।"

(शि० सू० वा०1, 19,20)

योनिवर्णोत्पत्तिः —

अ इ उ ऋ लृ इत्येतेभ्यः स्वरेभ्य एव व्यञ्जनानामुत्पत्तिः। तद्यथा-कवर्गस्य अकारात् चवर्गस्य इकारात्, टवर्गस्य ऋकारात्, तवर्गस्य लृकारात्, पवर्गस्य उकारात्, यकारशकारौ चवर्गमध्ये, रकारषकारौ टवर्गमध्ये, लकारसकारौ तवर्गमध्ये, गण्यन्ते। वकारस्तपवर्गयोः

घनतात्मकः। यथा—

"यथा अकारस्यैव घनता कवर्गः कण्ठ्यत्वात् इकारस्य चवर्गः तालव्यत्वात्, उकारस्य पवर्गः औष्ठ्यत्वात्, लृकारस्य तवर्गो-दन्त्यत्वात्, यशौ चवर्गस्यान्तः, रषौ टवर्गस्य, लसौ तवर्गस्य, वकारोऽपि तपवर्गयोर्घनता।"

(प० त्री० वि० पृ० 182-83)

अत्र ऋकार लृकाराभ्यां या सृष्टिरुक्ताऽसौ तयोरिकारात्मकस्वशंशतो वेद्या न रकारलकारात्मक-व्यञ्जनांशतः। इति न षण्ठत्व कथनमेतेषां विरोधावहमनेन प्रतिपादनेनेति स्मर्तव्यं सुधीभिः। यथा—

"नन्वत्र षण्ठवर्णेभ्यो जन्मोक्तं तेन षण्ठता।
कथं स्यादिति चेद् ब्रूमो नात्र षण्ठस्य सोतृता।।
तथाहि तत्रगा यासाविच्छाशक्तिरुदीरिता।
सैव सूते स्वकर्तव्यमन्तःस्थं स्वेष्ठरूपकम्।।
यत्त्वत्र रूषणाहेतुरेषितव्यं स्थितं ततः।
भागान्न प्रसवस्तज्जं कालुष्यं तद्वपुश्च तत्।।"

(तं० आ०3, 175 तः 177)

योन्याधारा — परस्याः खेचर्याः नामान्तरम्। यथा—

"यदियं परा खेचरी योन्याधारेति विख्याता।"

(तं० आ० वि० खं०12, पृ० 322)

द्र०:- 'खेचरी' ~ 'परा' इति।

र

र— दाहकमग्निबीजमाभासकत्वात्। यथा—

द्र०:- 'य' ~ बीजमन्त्रः इति।

~ मातृकासु — **मातृकोपास्तौ साधकः स्वमेव शक्तिविशेषं स्व एव चित् प्रकाशे बहिर्मुखतया प्रतिबिम्बितं सन्तं तत्र चाशुद्धविद्यातत्त्वरूपतयावभासमानं साक्षात् पश्यन् तत् प्रतिबिम्बखचितमात्मानं सरसतया साक्षात्कुर्वन् शाम्भवसमावेशचमत्कारं रसयति।**

~ वर्णः — **अग्निवर्णः। यथा—**

"वाप्यग्निसलिलेन्द्राणां धारणानां चतुष्टयम्"

(प० त्री०7)

"वाय्वादिशब्दवाच्या यादयो वकारान्ताः।"

(प० त्री० वि० पृ० 113)

रकारः —

द्र०:- 'षट्त्रिंशत्तत्त्वदीक्षा, (8) विद्याराजः ~ तद्वर्णाः' इति।

रक्तकाली (२ या) ~ क्रमस्तोत्रादौ — **(1) उपासनायां ध्यानोपयोगी वर्णनं स्तोत्रयोः यथा—**

"महाविनोदार्पितमातृचक्र-
वीरेन्द्रकासृग्रसपानसक्ताम्।
रक्ती कृतां च प्रलयात्यये ताम्
नमामि विश्वाकृतिरक्तकालीम्।।"

(क्र० स्तो०सि०ना०-
(उद्ध० तं० आ० वि० खं०3, पृ० 160-61)

"विसृष्टे भावांशे बहिरतिशयास्वादविरसे
यदा तत्रैव त्वं भजसि रभसाद् रक्तिमयताम्।
तदा रक्ता देवी तव सकल भावेषु ननु माम्
क्रियाद्रक्तापान-क्रम-घटित-गोष्ठीगतघृणम्।।"

(क्र० स्तो० अभि० 16)

(2) प्रमेयस्थितिरूपताकलनकारिणी शक्तिरेषा। यथा—

"एवं प्रमेयगतं सृष्टिस्वरूपमभिधाय स्थितिस्वरूपमप्य-भिधातुमाह।"

(तं० आ० वि० खं०3, पृ० 159)

~ चिद्-गगन-चन्द्रिकायाम् — **यथा—**

"भक्षयन्त्यखिलमक्षजैः शिवे, शक्तिरश्मिभिरिमाश्च मातृभिः।
ताश्च संस्मृतिमहालये परे, रज्यती हरसि विश्वविग्रहम्।।"

(चि० ग० चं०- 230)

~ तन्त्रालोकादौ — **द्वादशसु द्वितीयेयं काली। रूपादिकं बाह्यं विषयं निर्विकल्पसाक्षात्कारेणात्मसात्कुर्वती संविदः कलनशक्तिः।**

भावस्य स्थितिकारिणी कलनेयम्। यथा—

(क) "ततो बहिरपि स्फुटतया कलयति।"

(तं० सा० पृ० 29)

इदं रूपतया स्फुटं प्रमिणोतीति तात्पर्यम्। बाह्यार्थप्रमा-रूपतया तथा कलयतीति। यथा—

(ख) "तथाभासितवस्त्वंशरञ्जनां सा बहिर्मुखी।
स्ववृत्तिचक्रेण समं ततोऽपि कलयन्त्यलम्।।
स्थितिरेषैव भावस्य .....।"

(तं० आ०4, 149-50)

(ग) "रूपाद्या अंशास्तत् कर्तृकां रञ्जनामलमत्यर्थम् आत्मविषयतयापि कलयन्ती अविकल्पवृत्त्या जानाना सती.... .....।
अवभासनात्मिका व्यक्तिरित्यर्थः।"

(तं० आ० वि० खं०3, पृ० 159-60)

~ पञ्चशतिके — **प्रमेयस्य स्थितिं विदधती तत्र च रक्ततामभिव्यञ्जयन्ती कलनशक्तिः संविदो यस्यां शक्तावन्तर्भवति सा शक्तिरत्र रक्तकालीत्युच्यते। यथा—**

(घ) "न चैषा चक्षुषा ग्राह्या न च सर्वेन्द्रियस्थिता।
निर्गुणा निरहङ्कारा रञ्जयेद् विश्वमण्डलम्।।
सा कला तु यदुत्पन्ना सा ज्ञेया रक्तकालिका।"

(उद्ध० तं० आ० वि० खं०3, पृ० 160)

रक्ता ~ देवी — **श्री चण्डिका। यथा—**

"श्रीमद्रक्तायाः श्रीचण्डिकायाः।"

(तं० आ० वि० खं०3, पृ० 70)

रक्तिः — **स्थितिकृत्यप्रतिबिम्बरूपा पशुजनोचिता प्रमेयोन्मुखा काऽपि क्रिया, या भावना विषयतां नीयते साधकेन। यथा—**

"याश्च विचित्रा एव सृष्टिसंहारलीला आभासनरक्ति-विमर्शन-बीजावस्थापन-विलापनात्मपञ्चविधकृत्यानि प्रख्यापयति।"
(स्प० सं०, टिप्प० पृ०1)

रजः ~ गुणः — **(1) स्वसत्तानन्दप्रकाश-मयं तदप्रकाशमयञ्च यन्मिश्रं सत्त्वतमसोः सङ्कररूपत्वं तदेव रजः। अत्रांशतः सत्तानन्दप्रकाशोंऽशतश्च तदभावो युगपदेवावभासेते। इति मिश्ररूपत्वमस्य यत्तदेव चाञ्चल्यं येन दुःखमयत्वमस्य। यथा—**

"द्वयस्यात्मा व्यामिश्र स्वभावश्चित्रपतङ्गगतनीलानीलन्याये-नैकपरामर्शबलाद् वर्तमानः, अत एव श्लिष्टे परस्परमिश्रे सत्त्वतमसी प्रकृते रूपं यस्य तत् प्रकाशाप्रकाशरूपं दुःखात्मकं रजः। एकघनत्वे हि प्रकाशाप्रकाशयोः सुखमोहमात्रता, पुत्रस्य तु व्याधितस्य प्रकाशः कल्याणस्याप्रकाश इत्येतद् दुःखम्। इयमेव च पौर्वापर्येण चञ्चलरूपा (चाञ्चल्यरूपा) क्रिया।"
(ई० प्र० वि० वि० खं०3, पृ० 363)

(2) प्रवृत्तिजनको गुणः। यथा—

"..... प्रवृत्तिजनकं रजः।"
(स्व० तं०11, 65)

~ तन्मूलम् — **परमेश्वरस्य या स्वतन्त्रा क्रियाशक्तिरसावेपशु- प्रमातर्यवस्थिता सती तस्य रजो गुणः। यथा—**

"स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
माया तृतीये ते एव पशोः सत्त्वं रजस्तमः।।
भेदस्थितेः शक्तिमतः शक्तित्वं नापदिश्यते।
एषां गुणानां करण-कार्यत्वपरिणामिनाम्।।"
(ई० प्र०4-1-4, 5)

~ मण्डलविधौ — **रेखाविन्यासे मण्डलस्थपद्मादिरञ्जने चोपयुक्तं सिन्दूरादिपिष्टम् विविधिवर्णम्। यथा—**

अत्र रजो नियममाह-
"कार्णिका पीतवर्णेन मूलमध्याग्रभेदतः।
सितं रक्तं तथा पीतं कार्यं केसरजालकम्।।
दलानि शुक्लवर्णानि प्रतिवारणया सह। इत्यादि"
(तं० आ०31, 79-80)

सितं रजः परादेव्याः स्थाने, रक्तं परापरायाः, कृष्णं चापरस्याः स्थाने प्रकिरणीयं मण्डले। यथा—

उत्तमानि रजांसीह देवतात्रययोगतः।
परा चन्द्रसमप्रख्या रक्ता देवी परापरा।।
अपरा सा परा काली भीषणा चण्डयोगिनी।
(तं० आ०31, 40-41)

रजः प्रधानाः ~ प्राणिनः —

द्र०:- **'प्राणिनः'** ~ 'रजोगुणप्रधानाः' **इति।**

रजः सत्त्व-प्रधानाः ~ प्राणिनः —

द्र०:- **'प्राणिनः'** ~ 'रजः सत्त्वप्रधानाः' **इति।**

रजांसि — **रक्तपीतश्वेतकृष्णादिवर्णानि सिन्दूर-सितादिचूर्णानि मण्डलरेखानिर्माणोपयोगीनि मण्डलस्य पद्मादिशोभाधायकानि च। यथा—**

"ततो रजांसि देयानि यथा शोभानुसारतः।
सिन्दूरं राजवर्तं च खटिका च सितोत्तमा।।"
(तं० आ०31, 39)

रतिः ~ उच्चारयोगे — **खदशके सप्तमं रवम्। आसक्तिः। यथा—**

"रतिरासक्तिः।"
(तं० आ० वि० खं०3, पृ० 404)

रतिशेखरमन्त्रः — **रूं यूं लूं वूं इति। यथा—**

"अग्निमारुतपृथिव्यम्बुसषष्ठस्वरबिन्दुकम्।।
रतिशेखरमन्त्रोऽस्य वक्त्राङ्गं ह्रस्वदीर्घकैः।"
(तं० आ०30, 10-11)

"अग्निः = रेफः, मारुतो = यः, पृथ्वी = लः, अम्बु = वः, षष्ठः स्वरः ऊकारः।"
(तं० आ० वि० खं०12, पृ०178)

यच्च—

"वाय्वग्निसलिलेन्द्राणां धारणानां चतुष्टयम्।"
(प० त्री०7)

इत्यत्र वकारस्य संज्ञा "इन्द्र" इति प्रोक्ता लकारस्य च सलिलमिति, तत्कृता नात्र शङ्का कापि कार्या। वकारस्य 'इन्द्र' इति, 'अम्बु' इति च तथा लकारस्य सलिलमिति पृथ्वीति च पारिभाषिकं संज्ञान्तरमपि सिद्धपरम्परासु प्रवृत्तम्। तदनुसारमेष रहस्यमन्त्रनिर्देश इति वेदितव्यम्।

द्र०:- **'बीजाक्षरकोषः'** इति।

रतिशेखरविद्या — **रतिशेखरो मन्त्रः एव।**

रत्नदेवः — **कश्चन कौलसम्प्रदायग्रन्थः।**

द्र० (म० मं० प० पृ० 132) **इति।**

रत्नमाला — **किमपि कौलसम्प्रदाय-सम्बन्ध्यागमिकं पुस्तकं यस्य पूर्णं नाम कुलरत्नमालेति। बहुधा समुद्धृतान्यस्या वाक्यानि तन्त्रालोके। यथा—**

"यथोक्तं रत्नमालायाम्।"
(तं० आ०1, 274)

"रत्नमालायामिति श्रीकुलरत्नमालायाम्।"
(तं० आ० वि० खं०1, पृ० 281)

द्र०:- तं० आ०1, 274,13,230,28,112,128, 256,308,310,29,55,192,283,37,25, तं० आ० वि० खं०1, पृ०281;282; 11; पृ०179, पृ० 183,म० मं०प० पृ०166

एवं प्रतिभाति यच्छिवसूत्रविमर्शिन्यां (पृ० 66 नव० संस्क०) अयमेवागमः "कुलरत्नमाला" इत्यनेनाभिधानेनोल्लिखित इति।

द्र०:- 'कुलरत्नमाला' इति।

रम्यदेवः ~ (भट्टः) : — श्रीभट्टज्योग्देवेत्मजः कुलकौलत्रिंशिकायाः निर्माता, भावोपहारटीकाकृत्। यथा—

"श्रीचक्रपाणिनाथविरचिते भावोपहारस्तोत्रे विवरणं समाप्तम्। कृतिस्तत्रभवद्भट्टज्योग्देवात्मज-भट्टश्री श्रम्यदेवस्य।।"

(भा० वि० पृ०44)

रसः — योगजानुमतौ मुखेऽमृतास्वादो, जलतत्त्वधारणापरैरनुभूयमानः। यथा—

"रसो अऽमृतास्वादो मुखे"

(स्प० वृ०, पृ०34)

"रसो रसवद्वस्तुविरहेऽपि अमृतास्वादो मुखे, लोलाग्रलम्बिकादिधारणानिरतैरप्तत्त्वध्यायिभिर्य उपलभ्यते।"

(स्प० वि०, पृ० 119)

रसतन्मात्रम् : — मधुरत्वाम्लत्वादि-विशेषप्रविभागरहितो रसत्वावच्छिन्नः सामान्याकाररसमात्रात्मकः सूक्ष्मतरो रसनाग्राह्योऽप्रक्षुब्धो विषयः। स च तमः प्रधानादहङ्कारादुद्भूतः सन् क्षुब्धो भवन् रसविशेषरूपतामुपयाति, नितरां च प्रक्षोभं प्राप्तः सन् स्थूलजलात्मकद्रव्यरूपतामापद्यते सृष्टिक्रमे। यथा—

"एवं रसादिशब्दान्ततन्मात्रेष्वपि योजना।"

(तं० आ०9, 282)

द्र०:- 'गन्धतन्मात्रम्' इति।

द्र०:- 'तन्मात्रम्' इति च।

रसान्वयः — कश्चनाद्वैतशैवशास्त्रग्रन्थः। यथा—

तदुक्तं श्रीरसान्वये—

"या चित् सत्तैव सा प्रोक्ता सा सत्तैव चिदुच्यते।
यत्र चित्सत्तयोर्व्याप्तिस्तत्रानन्दो विराजते।।
यत्रानन्दो भवेद् भावे तत्र चित्सत्तयोः स्थितिः।" इति

(म० मं० प० पृ० 34)

रहस्यचर्या — असौ पञ्चममकारचर्या, यां प्रति निर्देशः सङ्केततस्तन्त्रालोके वैसर्गिक्या भुवः (जगत्सृष्टिकारणभूतायाः) आसादनस्योपायत्वेन कृतोऽस्ति। यथा—

"आनन्दनाडी युगलस्पन्दनावहितौ स्थितः।
एनां विसर्गनिःष्यन्द-सौधभूमिं प्रपद्यते।।"

(तं० आ०5, 70)

अवहितौ = आनन्दोद्भवे सावधानतया स्थिताविति।

द्र०:- 'दूतीयागः' इति।

~ तत्प्रयोजनम् — अवधानधनाः परयोगिनः कामसुखावसरेऽयत्नत एव तन्मार्गेणैव जगदानन्दभूमिकामासादयन्ति, जगदानन्दरत्यानन्दयोर्मूलत एकस्वरूपत्वात्। ततः सुखोपाया सद्यः सिद्धिः रहस्य चर्यासेवनेन परयोगिनामेव नावराणाम्। यथा—

"इह खलु सर्वेषां ग्राम्यधर्म-सेवनं तावदनुक्तसिद्धम्। तत्रैच युक्तिलेशमाश्रित्यावधानमात्रमेव चेत् कृतं तदयत्नेनैव विसर्गभूः समासादिता भवेत्।।"

(तं० आ० वि० खं०3, पृ० 377)

~ तत्संकेतः — या रहस्यचर्याङ्गावलम्बिका त्रिकोणपूजा तद् विषये संकेतो वर्तते उच्चारयोगप्रकरणे तन्त्रालोकस्य। यथा—

"अत्र प्रयासविरहात्सर्वोऽसौ देवतागणः।
आनन्दपूर्णे धाम्न्यास्ते नित्योदितचिदात्मकः।।"

(तं० आ०5, 122)

"त्रिकोणे देवताः सर्वा ब्रह्म-विष्णु-महेश्वराः।"

(उद्ध० तं० आ० वि० खं०3, पृ० 431)

आनन्दपूर्णं धाम खल्वत्र परेण स्पन्दनेन स्वभावतः स्पन्दमानं परं योगिनीहृदयाख्यं लिङ्गमपि, रहस्यचर्याक्रमोपयोग्यानन्देन्द्रियत्रिकोणमपि।

~ तत्सङ्केतान्तरम् — असावुच्चारोपायनिरूपणान्तरे सङ्केति - तस्तन्त्रालोके किञ्चिदुन्मीलितस्तद्विवेके। यथा—

"योगिनीहृदयं लिङ्गमिदमानन्द-सुन्दरम्।
बीजयोनिसमापत्त्या सूते कामपि संविदम्।।"

(तं० आ०5, 121)

"अथ च चर्याक्रमेणाप्येवं परसंविदनुप्रवेशो भवेदित्यपि कटाक्षितम्।"

(तं० आ० वि० खं०3, पृ० 430)

"त्रिकोणमण्डलं पूज्यं शक्तित्रयसमन्वितम्।
तन्मध्ये चेतनं चिन्त्यं लिङ्गं वैपश्चिमामुखम्।।"

(उद्ध० तदेव, पृ० 430)

"आनन्दस्यन्दि यद्गीतं सर्वप्रसवकारणम्।
उपस्थाख्येयमेतत्तु सौषुम्नं रूपमुच्यते।।"

(उद्ध० तदेव, पृ० 430)

रहस्यमन्त्राः — ते च बीजपिण्डात्मकास्तान्त्रिका मन्त्राः।

~ गोपनीयाः — यथा—

"तस्माद्रहस्यशास्त्रेषु ये मन्त्रास्तान्बुधो बहिः।
न प्रतिष्ठापयेज्जातु विशेषाद् व्यक्तरूपिणः।।"

(तं० आ०27, 7)

रहस्यमन्त्रागमः — रहस्यभूतानां तुलाशुद्ध्यादि प्रियमेलापान्तानां मन्त्राणामुपदेशकं भगवच्छिवनाथोक्तं तन्त्रसद्भावशास्त्रम्। यथा—

तुलामेलकयोगः श्रीतन्त्रसद्भावशासने।

य उक्तः शम्भुनाथेन स मया दर्शितः क्रमात्।।

(तं० आ० 30, 99)

अत्र शम्भुनाथपदेन शिवखभिप्रेतो न जालन्धरपीठाधिपो गुरुः।

रहस्यमुद्रा — (1) काचन त्रिकाचारमयी रहस्यात्मिका योगप्रक्रिया यस्याः स्पष्टं निरूपणं कृतमभूद् भट्टकल्लटेन तत्त्वार्थचिन्तामणौ। यथा—

"यथा कुतूहलदिदृक्षुर्विकासवृत्त्यास्ते एवं यः सर्वभावोन्मुख्यरूपोद्यन्त्रितः स्वरूपे तिष्ठति स स्वभावं सर्वज्ञतादिगुणास्पदं स्वयमाप्नोति। यतः प्रागुक्तम्- 'अतः सततमुद्युक्तः' इत्यादि। या चैषा स्थितिः सैव तत्त्वार्थचिन्तामणौ रहस्यमुद्रेत्युक्ता।"

(स्पं० प्र०, पृ० 49)

(2) स्पन्दकारिकाग्रन्थेऽपि मनाग् वर्णितेयं मुद्रा। यथा—

"दिदृक्षयेव सर्वार्थान् यदा व्याप्यावतिष्ठते।
तदा किं बहुनोक्तेन स्वयमेवावभोत्स्यते।।
प्रबुद्धः सर्वदा तिष्ठेज्ज्ञानेनालोच्य गोचरम्।
एकत्रारोपयेत्सर्वं ततोऽन्येन न पीड्यते।।"

(स्पं० का० 43, 44)

रहस्यविधिः — कौलयागविधिः। कुलाचारसम्बन्धी सामाना विधिः। स च मकार प्रयोगबहुलत्वेन रहस्यात्मकः। न खलु साधारणाः साधकास्तदधिकारिणः। पारमेश्वरानुग्रहपवित्रिता अतरलेन्द्रिया एव विरल-विरलाः प्रबुद्धाः साधका अस्याधिकारिणः।

यथा—

".....।

अथ समुचिताधिकारिण उद्दिश्य रहस्य उच्यतेऽत्र विधिः।

अर्थसर्वाप्युपासेयं कुलप्रक्रिययोच्यते।।

(तं० आ०29, 1)

"रहस्य इति कुलप्रक्रियायाम्। विधिरिति यागः। कुलप्रक्रियया उपासेति कुलयाग इत्यर्थः।"

(तं० आ० वि० खं०11/2, पृ० 1,2)

रहस्यसाधनागोपनम् — यानि रहस्यमयानि साधनानि तानि निरूपणीयानि वाऽत्यन्तं वा गोपनीयानीत्यत्र विषये अभिनवगुप्तगुरोः श्री शम्भुनाथस्येयं नीतिर्यदतिरहस्यभूतं साधनातत्त्वं नैवाऽत्यन्तं गोपनीयं न चाऽपि स्फुटतयैकस्मिन्नेव प्रकरणे क्वापि ख्याप्यम्। ततः प्रकरणान्तरेषु ग्रन्थान्तरेषु वांऽशमात्रतस्तत्र तत्र तथा निर्देष्टव्यम् यथा लब्धदीक्षस्य साधकस्य हितं स्यात्। लब्धदीक्षः साधकोऽशानपि रहस्ययोगस्य संग्रहीतुमलं भवेदेव। अदीक्षितस्य कृतेऽप्रकाशनमेव वरम्। प्रकाशने सति दुरुपयोगोऽपि कदाचित् स्याद्रहस्ययोगस्येति। यथा—

"नाति रहस्यमेकत्र ख्याप्यं न च सर्वथा गोप्यमिति-ह्यस्मद्गुरवः।"

(तं० सा० पृ० 31)

रहस्यस्तोत्रम्— किमपि स्तोत्रमुत्पलवैष्णवस्य पूर्वजविशेषेण कृतम्। यथा—

"अतश्चाऽस्मत्पितुर्मातामहाचार्येण महाबलेन 'यथार्थनाम्नः क्रोधे'। इत्यादिनोक्तो विभवोदयो रहस्यस्तोत्रे।"

(स्प० प्र०, पृ०3)

उक्तञ्च रहस्यस्तोत्रे—

विस्मृतार्थमभियुज्य धीर्यथा त्वामशेषविदमाशु शंसति।
यद्यदित्थमनयाऽर्थ्यते रसात् स्वप्नगोऽपि न विलङ्घयिष्यति।।"

(स्पं० प्र०, पृ० 43)

द्र०:- (तदेव, पृ० 31, 32) **इति च।**

रागः ~ चमत्कारात्मकः —

द्र०:- **'चमत्कारात्मकः'** ~ 'रागात्मकः' **इति।**

रागतत्त्वम् — (1) वस्तुषु गुणारोपणमयः सङ्कुचितयोर्ज्ञानक्रिययोर्विषयविशेषेष्वेव रुचिविशेषाधानतया घनतरसङ्कोचनप्रवणः कञ्चुकविशेषः। एष पशोरन्तरङ्गो विशेषः। यस्तु बुद्धिधर्माख्यो रागः, स त्वस्मादवरो भिन्नश्च। न चायं वैराग्याभावरूपो बुद्धिधर्मः। यतः कश्चिद् वैराग्येऽपि रागवान् भवति। सुयोग्यमिदं वस्त्विति यो गुणारोपणमयो विश्वासो जीवस्य यद्वशात्तस्य विद्याकलयोर्व्यापारो नान्यत्रेति विषय क्षेत्रसङ्कोचकमिदं कञ्चुकम्। तेन रागः पशोः स्वाभाविकोऽभिष्वङ्गो विषयविशेषेषु। यथा—

"अत्र चांशे तुल्ये किञ्चित्त्वे कस्मादिदमेव किञ्चिदित्यत्रार्थेऽभिष्वङ्गरूपः प्रमातरि देहादौ प्रमेये च गुणारोपणमय इव रागो व्याप्रियते। न च तद्बुद्धिगतमवैराग्यमेव, तद्धि स्थूलं वृद्धस्य प्रमदायां न भवेदपि, रागस्तु भवत्येव। बुद्धिधर्माष्टकेऽपि च दृष्टोऽभिष्वङ्गः।

(ई० प्र० वि० खं०2, पृ०209)

(2) प्रमेयविशेषानुद्दिश्य प्रमातरि रुचिविशेषोत्थापकं रञ्जकं कञ्चुकतत्त्वम्। अनेन तत्त्वेन वेष्टितः परिमितः प्रमाता क्वचिदेव विशेषे प्रमेयेऽनुरक्तो भवति न तदवसरलब्धे सर्वस्मिन्नपि परिमिते विषये। एतेन रागेण मायाप्रमातुः पूर्णता तिरोधीयते। यथा—

"तत्रैव रञ्जकं रागं .....।

(मा० वि० वा०1, 876)

"रागतत्त्वमिति प्रोक्तं यत्तत्रैवोपरञ्जकम्।"

(तं० आ०9, 200)

"रागोऽस्य रञ्जकत्वेन विषयानन्दलक्षणः।।"

(स्व० तं०11, 98)

"सामान्यविषयाभिष्वङ्गात्मा रागः अस्य पुंसो रञ्जकत्वेन स्थितः।"

(स्व० तं० उ०11, पृ० 68)

द्र० तं०सा०पृ०-82, स्पं०वि०पृ०-136, ष०तं०स०वि०पृ० 7,810,प्र०प्रा०पृ०-9, तं०आ०वि०खं०6, पृ०158, शि०सू०वा०भा०प०44 इति प०सा०वि०पृ०48, मा०वि०तं०1, 28

परं परमार्थसारटीकायां (पृ० 48) इत्यत्र योगराजेन केवलं पशोरपूर्णम्मन्यतात्मकः स्वभाव एव रागतत्त्वतया गणितः। पूर्वाचार्यैः पुनरन्यथापि विस्तरेण प्रतिपादितं रागतत्त्वं रञ्जकत्वेनेति विचार्यं सुधीभिः।

~ उपादानतः — **तस्योपादानकारणं तु कलैव।**

द्र०:- **'विद्या-कञ्चुकम्'** ~ 'तदुपादानम्' इति।

~ कलाविद्यानियामकम् : — **कलाया विद्यायाश्च क्षेत्रयोः सङ्कोचकं हि रागतत्त्वम्। यथा—**

"यदेव हि रागास्पदं तदेव कलाविद्ययोर्विषयो विपर्ययो वा।"

(ई० प्र० वि० वि० खं०3, पृ० 312)

राजपुत्रषट्कम् — कौलगुरोः मच्छन्दनाथस्य षट्पुत्राः- (1) अमरः, (2) वरदः, (3) चित्रः, (4) अलिः, (5) विन्ध्यः, (6) गुडिकश्चेति।

द्र० (तं० आ० वि० खं०11/2, पृ० 29)

राजभैरवसूत्रम् — ग्रन्थः कोऽपि।

(द्र० म० मं० प० पृ० 146)

राजराजभट्टारकः — रहस्यसाधनाप्रतिपादको ग्रन्थ-विशेषः।

(द्र० म० मं० प०, पृ० 122)

राजवर्तः — श्यामरक्तसङ्करजो वर्णविशेषः। तदुल्लेखो मण्डलप्रकरणे रजोविशेषरूपतया कृतस्तन्त्रालोके। यथा—

"त्रिशूलं दण्डपर्यन्तं राजवर्तेन पूरयेत्।"

(तं० आ० 31, 117)

देशभाषा विशेषे यो "लाजवर्द।" इत्युच्यते, स एव वर्णः। स च श्यामरक्तो वर्णः। यथा—

"उद्यद्गौराङ्कुरविकसितैः श्यामरक्तैः पलाशैरन्तर्गाढारुणरुचिलसत्केसरालीविचित्रैः।
आकीर्णा भूः प्रतिपदमसौ यत्र काश्मीरपुष्पैः सम्यग्देवीत्रितययजनोद्यानमाविष्करोति।।"

(तं० आ० 37, 45)

अत्र राजवर्तपदस्य स्थाने श्यामरक्तपदमुपयुक्तमाचार्याभिनवगुप्तमहोदयैः प्रयुक्तम्।

राजसिकः — रजोगुणप्रधानः प्राणी।

यथा—

"..... रजो धर्मांश्च मे शृणु।
निस्त्रिंशश्चातिलोभी च विद्वेषी क्रोधनस्तथा।।
कामी हर्ष-समाविष्टो दुःखार्तः पर्यटेत्सदा।
मानी दम्भसमायुक्तोऽप्यहङ्कारे व्यवस्थितः।।
नित्यं युद्धरतः शूरः राजसं गुणलक्षणम्।"

(स्व० तं० 12, 68-70)

राजिका — किमपि कौलशास्त्रपुस्तकम्। यथा—

तथा च श्रीराजिकायाम्—

"भुक्त्वा विश्वमशेषं तृप्तिं न यदा गतः कुलेशानः।
देव्या तदा स्वदेहश्चरुरत्र निवेदितः कुलाधिपतेः।।" इति।

(म० प्र० वि०, पृ०55)

रात्रिकुलम् — कौलाम्नायशास्त्रं किमपि यन्मतं निःशङ्कभाव- प्रशंसायामुद्धृतं तन्त्रालोके। यथा—

"श्रीमद्रात्रिकुले चोक्तं मोक्षः शङ्कापहानितः।" इत्यादि।

(तं० आ०15, 593)

रामः — (1) जगदुल्लासनविलसन-क्रियया रमणशीलः परमेश्वरः। यथा—

"रमते तत्तज्जडाजडात्मना विश्ववैचित्र्यात्मना क्रीडतीति रामः। परमात्मा।"

(तं० आ० वि० खं०1, पृ०131)

द्र०:- **'रामस्थ'** इति।

अनन्तवैचित्र्यमयः सर्वोऽपि विश्वव्यापारो यस्य लीलायत्तो, यश्च सर्वत्र तत्र तत्र व्यापारे रमतेऽसौ परमेश्वरो राम इत्युच्यते। यथा—

"गीतःस्थानं स्वप्नजाग्रदुन्मेषणनिमेषणे।
धावनं प्लवनञ्चैव आयासः शक्तिवेदनम्।।
बुद्धिभेदास्तथा भावा, संज्ञाः कर्माण्यनेकशः।
एष रामो व्यापकोऽत्र शिवः परमकारणम्।।"

(तं० आ०1, 87-88)

"यच्चैतद् गत्यादि एष रामः सकलविश्वावभासनक्रीडापरः परमात्मा परमेश्वरः।"

(तं० आ० वि० खं०1, पृ०133)

रामकण्ठः — आचार्योत्पलदेवस्य शिष्यः, स्पन्दकारिकाया विवरणस्य भगवद्गीताभाष्यस्य च रचयिता। स्तवचिन्तामणावनेन निर्मिता वृत्तिरिदानीं नैव लभ्यते। अनेन केषामपि स्तोत्राणामपि निर्माणं कृतमभूत्। अयं मुक्ताकणस्यानुजोऽवन्तिवर्मणः काले ऽभूत्। मातङ्गतन्त्रवृत्तेर्निर्मातृ रामकण्ठादयं भिन्नोऽतीव प्राक्तनश्चाचार्यः। तन्त्रव्याख्याता रामकण्ठो नारायणकण्ठस्य पुत्रः। नारायणकण्ठश्चातीवार्वाक्तनो रामकण्ठात्प्रथमात्। भगवद्गीता रूवनेन निर्मिता सर्वतो भद्राख्या टीकाऽपि लभ्यते। अस्य पूर्वजाः कान्यकुब्जीया ब्राह्मणा अभूवन्। अयं राजानकवंशीयत्वेन कश्मीरे षुख्यातः। अनेन केषामपि।

द्र० (स्त० चि० वि० पृ०-130, स्पं० वि० पृ०-135, 164, प्र० ह.० पृ०-68)

भास्करकण्ठवैडूर्यकण्ठरत्नकण्ठादयः कण्ठोपाह्वाः विद्वांसः ये च कश्मीरेष्वद्यापि "कण्ठ" इति वंशनामभाजो मुसलिमा; जनास्तेऽस्य रामकण्ठस्यैव वंशीया भवेयुरिति सम्भाव्यते।

एतस्मात् प्राक्तनः कण्ठोपनामको नैवान्यः कोऽप्याचार्यो ज्ञायते। यथा—

"यो नारायण इत्यमूच्छुतनिधिः श्रीकान्यकुब्जे द्विजस्
तद्वंशे स्वगुणप्रकर्षखचितो मुक्ताकणाख्योऽभवत्।
तस्यैषा सदृशानुजेन रचिता रामेण विद्वज्जन
श्लाघ्यत्वात्सफलश्रमेण् भगवद्गीतापदार्थप्रथा।।"

(भ० गी० रा० पृ०405)

"श्रीरामेणकृताऽत्र सद्विवृतिरित्येषा किमर्थेति मा
सन्तश्चेतसि कृध्वमस्ति विवृतौ कोऽपि प्रकर्षो महान्।"

(स्त० चि० वि०, पृ०130)

स्तुतिद्वारेण राजानकरामो दृब्धवान् यथा—

"नित्योद्दामसमुद्यमाहृतजगद्भावोपहारार्पणयग्राभिस्तव
तैजसी प्रभृतिभिर्यच्छक्तिभिस्तर्प्यते।
तन्मांसास्रवसास्थि कूटकलिले काये श्मशानालये
रूपं दर्शय भैरवं भवनिशासंचारवीरस्य मे।।

(प० सा० वि० पृ०145)

"सम्पूर्णा इयं वृत्त्यनुसारिणी स्पन्दविवृतिः। कृतिस्तत्रभवतोमहामाहेश्वराचार्य- शिरोमणि-राजानक- श्रीमदुत्पलदेवपादपद्मानुजीविनो राजानक- श्रीरामकण्ठस्य इति शिवम्।"

(स्पं० वि० पृ०168)

~ (स्तोत्रकारः) : — **यथा—**

स्वस्तोत्रे प्रतिपादितोऽस्माभिः —

"चित्रालोक विकल्प कल्पितनवाकल्पाङ्कनानाकृतिं
नृत्यन्तीं बहुधा बहिः स्ववपुषोऽप्यन्तर्न भिन्नां पुनः।
नित्यं नूतन-कौतुकः प्रियतमां स्वां शक्तिमालोकयन्
अच्छिन्ना प्रतिमप्रमोदमहिमा शम्भुर्जयत्येककः।।"

(स्पं० वि० पृ० 164)

~ द्वितीयः — **(2) द्वैत-शैव-दर्शनशास्त्रस्य मतङ्गतन्त्रस्य वृत्तिकर्ता काश्मीराभिजनो विद्वान्। राजानकश्री रामकण्ठात् सर्वतोभद्रटीकाकर्तुः भिन्नः। यथा—**

"श्रीमद्-विद्यापादे नारायणकण्ठ-सूनुना रचिता।
वृत्तिरियं मातङ्गे काश्मीरिक-रामकण्ठेन।।"

(भ० गी० रा० पृ० 11)

रामस्थः — प्राणापानयोर्मध्ये यच्छुद्धं चित्स्वरूपं तदपि रामपदवाच्यम्। तस्मिन्नेव चित्स्वरूपे स्थिरतयावस्थानस्याभ्यासी शाम्भवयोगभाक् साधको रामस्थः। यथा—

"ऊर्ध्वं त्यक्त्वाधो विशेत्स रामस्थो मध्यदेशगः।"

(तं० आ०1, 86)

"ऊर्ध्ववाहित्वात्प्राणम्
अधोवाहित्वादपानम्"

(तं० आ० वि० खं०1, पृ० 1, 130)

द्र०:- **'रामः' इति।**

रावः — कांस्यस्वननिभो रूक्षश्रुतिर्द्वितीयो नादो नादयोगाभ्यासे श्रूयमाणः। यथा—

"तदन्तेऽनुभवो यस्य ईषन्मर्मविसर्पिणः।
भिन्नकांस्यनिभो रूक्षः स रावः स्यात् .....।।"

(उद्ध० स्व० तं० उ० प०11, पृ०9)

~ दशधा : — **रावस्तावदनाहतो नादः। नादश्च वाग्रूपः। वाग्विमर्शात्मिका। विमर्शस्यानेकरूपत्वाद् वागनेकरूपा। मूलतोऽसौ परतराहंविमर्श-रूपिणी तावदेका परैव वाक्। बहिर्मुखाविकासे सा पश्यन्ती-मध्यमा-वैखरीति त्रैविध्यमाप्ता। तिसृष्वेकैकस्या अपि स्थूल-सूक्ष्मपरत्वेन-त्रैविध्यम्। इति नवधा वाक् परया सह दशधा। इत्येवं दश नादा उच्चार-योगे साक्षात्कर्तुं शक्यन्ते। तदेतदभिप्रेत्योक्तम्—**

"इहास्य परावाग्रूपस्याहंविमर्शात्मनो रावस्य प्रथमं तावद् हृदादि-भवत्वात् पश्यन्ती-मध्यमा-वैखरीरूपतया त्रैविध्यं, प्रत्येकं च स्थूल-सूक्ष्म-परत्वेन त्रैविध्ये नवधात्वम्, एषां नवानामपि भित्तिभूतः परावागात्मा दशमः, स एव हि स्वस्वातन्त्र्यादेवभवभासयेत्।"

(तं० आ० वि० खं०3, पृ०408)

"तस्य प्रत्यवमर्शो यः परिपूर्णोऽहमात्मकः।
स स्वात्मनि स्वतन्त्रत्वाद्विभागमवभासयेत्।।
विभागाभासने चास्य त्रिधा वपुरुदाहृतम्।
पश्यन्ती मध्यमा स्थूला वैखरीत्यभिशब्दितम्।
तासामपि त्रिधारूपं स्थूलसूक्ष्मपरत्वतः।"

(तं० आ०5, पृ०409)

राहुः ~ कालाध्वनिः — **प्रमाणप्रमेयात्मकयोः सूर्यसोमयोः स्वात्मसात्करणेन ग्रासकृन्मायीयः प्रमाता। यथा—**

"अर्कः प्रमाणं सोमस्तु मेयं ज्ञानक्रियात्मकौ।
राहुर्माया-प्रमाता स्यात्तदाच्छादनकोविदः।।"

(तं० आ०6, 102)

रिपुमन्त्रः —

द्र०:- 'अरिः ~ मन्त्रः' इति।

रुद्रः — **(1) करणकार्यतत्त्वानां पुरुषतत्त्वात्मके स्वात्मनि संहारकर्ता रुद्रः। स च वस्तुतः शिव एव तस्यां दशायामवतीर्णः संस्तथा स्थितः। पञ्चसु कारणेष्वेकः कारणाधिकारी भगवान्।**

(2) प्रमेयजातस्य प्रमातृतत्त्वे लयीकरणेन या प्रमेयशून्या केवला प्रमातृतादशाऽवशिष्यते, तस्यामधितिष्ठन् देवाधिदेवो भगवान् रुद्रः। यथा—

"तत्रैतन्मातृतामात्रस्थितौ रुद्रोऽधिदैवतम्।"

(ई० प्र०3-2-1)

यदेतत् कालादिपञ्चकवेष्टितं प्रमातृतारूपं, तदेव यस्यां शुद्धमुपसंहृतप्रमेयजातं भवति दशायां संहाराख्यायां, तस्यामधिष्ठातृ-देवतात्वं तद्दशा-सम्पादनेन स्वोपासकलोकस्य तद्दशा-ध्यानावेश-समापन्नस्य स्वाभिमुख्यसम्पादनेन च भजमानो भट्टारक ईश्वर एव रुद्रो भगवान्।

(ई० प्र० वि० खं०2, पृ० 216-217)

द्र० (ई० प्र० वि० वि० खं०3, पृ०305) **इति।**

(3) मलानां रोधकः पाशानां च द्रावकः शुद्धविद्याक्षेत्रस्थः प्रमाता। यथा—

"रुद्रो रोधको द्रावकश्च पाशानाम्।"

(प० त्री० वि०, पृ०243)

अशुद्धाः पशुप्रमातारः क्षेत्रज्ञाः, शुद्धाशुद्धाः शुद्धाश्च रुद्रा इति व्यवक्रियन्ते सामान्यतः शास्त्रीये व्यवहारे इति स्मर्त्तव्यं सुधीभिः।

(4) ऊकारो नाम बीजमन्त्रः। यथा—

"रुद्रः ऊ।"

(तं० आ० वि० खं०12, पृ० 202)

~ उपासनाक्रमे — **अनुग्रहपरो महेशः, संविदि मनसो रोधनाद् अशेषपाशद्रावणाच्च रुद्रः।**

यथा—

"यथा-हे परमेश्वर रुद्र परचैतन्यस्फारानुप्रवेशान्मनो-रोधनस्याशेषपाशद्रावणस्य च हेतोः।"

(स्व० तं० उ० प०1, पृ०36)

~तत्पदम् — **भुवनाधिपस्य रुद्रस्य पदं रुद्रलोक इति प्रसिद्धं तच्च विष्णुलोकादुपरि ब्रह्माण्डाधिकारिणो रुद्रस्य पुरम्। यथा—**

"वैष्णवात् सप्तकोटीभिर्भुवनं परमेशितुः।।
रुद्रस्य सृष्टिसंहारकर्तुर्ब्रह्माण्डवर्त्मनि।"

(तं० आ०8, 156-57)

~ तत्पारिषदः — **पुष्पदन्ताद्याः। यथा—**

"अत्रासौ भगवान्रुद्रो ब्रह्मविष्णिवन्द्रपूजितः।
गङ्गया स्नपितो नित्यं दिव्यवस्त्राम्बरच्छदः।।"

(स्व० तं० प०10, 590)

"पुष्पदन्तगणेशाद्यैरासनं तस्य संवृतम्।
कपिलः कर्कटश्चैव विमर्दः कङ्कटस्तथा।।
विक्रमश्च दृढश्चैव निष्कम्पो निष्कलस्तथा।
अष्टौ ते हरयः प्रोक्तास्त्रिनेत्रा भूरिविक्रमाः।।
सिंहरूपाः सुतेजस्काः सटाविकटभास्वराः।
शक्तिरूपधरैर्मन्त्रैर्योगैश्वर्यसमन्वितैः।।
आसनं विवृतं तैस्तु महोत्साहैर्बलोत्कटैः।
तत्र भद्रासने रुद्रः स्थितश्चन्द्रार्धशेखरः।।
सर्वलक्षणसम्पूर्णः सर्वाभरणभूषितः
त्र्यक्षो दशभुजो देवो जटामुकुटमण्डितः।।
.....
सर्वलक्षणसम्पूर्णा सर्वाभरणभूषिता।
योगसिद्धिप्रदा नित्यं मोक्षाभ्युदयदायिका।।
देवस्याभिमुखी नित्यमुमा तु ललितेक्षणा।
शक्तिश्चापररूपेण शक्तिमांश्च हरस्तथा।।
ब्रह्माण्डे सृष्टिसंहारौ करोति च शिवेच्छया।"

(स्व० तं०10, 593-608)

~ तत्स्थानं (देहे) — **ताल्वादि। यथोक्तम्—**

"रुद्रावस्था तु समस्तवादोपसंहाररूपानाहतपरवाक् तत्त्वानुप्रवेशप्रारम्भभुवि तालुनि सर्वोपसंहारात्मकसुषुप्तिलक्षणेऽपि कण्ठदेशेऽपि निरूपिते तदूर्ध्वपदगामित्वादेव लभ्यत इति "तालुनि" इति नोक्तं विवृतिकृता।"

(ई० प्र० वि० वि० खं०3, पृ०309)

~ तदायुःपरिमाणम् — **यद्विष्णोरायुस्तद्रुद्रलोकाधीशस्य रुद्रस्य दिनम्। तावती तस्य रात्रिः। तेन परिमाणेन वर्षशतं तस्यायुः। आयुषोऽन्ते रुद्रस्य शिवत्वगतिः, न पुनरावर्तनम्। यथा—**

"तस्यापि (विष्णोः) शतमायुः। तद् दिनं तदूर्ध्वे रुद्रलोकप्रभो रुद्रस्य, तावती रात्रिः। प्राग्वद्वर्षम् तच्छतमपि चावधिः। तत्र रुद्रस्य तदवसितौ शिवत्वगतिः।"

(तं० सा० पृ०54)

~ तमःप्रधानः — **वस्तुतस्तु भगवान् रुद्रो न तमोगुणयुतः। परं संहारतमः प्रधानं यन्मायापदं तदधिष्ठातृत्वेनैव तस्य तमःप्रधानत्वं क्वचित् क्वचिच्छास्त्रेषु वर्णितम्।दार्शनिकदृष्ट्या तु तमःशैथिल्याधायकं स्थितिकृत्यकारणमिति तदधिष्ठातृत्वं भगवतो विष्णोः। अत एव तस्य श्यामवर्णत्वं, रुद्रस्य च शुभ्रवर्णत्वं सत्त्व-प्राधान्यव्यञ्जकम्। संसूचितमेतद् यथा—**

"भेदवादिनामिव संवित्तत्त्वं समस्ताद्विश्वराशेः सङ्कुचितमिव नित्यम्। सङ्कोचादेव शून्यशब्दवाच्यं विश्वानवभासं संहारतमः-प्रधानेन मायायाः पदे रुद्रनाथेनाधिष्ठितम्।"

(ई० प्र० वि० वि० खं०3, पृ०374)

~ तमोगुणोद्रेचकः — **सौषुप्ते पदे विषयज्ञानाभावरूपस्य तमोगुणस्य प्रथयिता भगवान् रुद्रः।**

यथा—

"तस्य (आणवस्य मलविशेषस्य) अतिस्फुटतां संवेदन-भागे कुर्वन् बुद्धौ तमोगुणमुद्रेचयति, भिन्नाभास-योगं संहरति 'तस्य' इत्यादिना। "अत्र च" इति सर्वसंहारात्मनि प्रमातृमात्रे।"

(ई० प्र० वि० वि० खं०3, पृ०307)

~ तल्लोकः — **द्र०:- 'तत्पदम्' इति।**

~ तल्लोकभाजः — **लिङ्गपूजामात्ररताः शैवा रुद्रलोकं यान्ति। यथा—**

"दीक्षाज्ञान-विहीना ये लिङ्गराधनतत्पराः।
ते यान्त्यण्डान्तरे रौद्रं पुरं नाधः कदाचन।"

(तं० आ०8, 157-58)

~ तल्लोकस्थाः — **रुद्रभुवने सूक्ष्मशरीरभाजो रुद्राः निवसन्ति। ते च तत्रत्यान् दिव्यातिदिव्यान् भोगान् भुक्त्वा भगवता श्रीकण्ठनाथेन दीक्षिताः सन्तोऽधिकारान्ते क्रमेण शिवभावमेव यान्ति, नाधस्तनेषु लोकेषु पुनर्जायन्ते। यथा—**

"तत्स्थाः सर्वे शिवं यान्ति रुद्राः श्रीकण्ठदीक्षिताः।।

अधिकारक्षये साकं रुद्र-कन्या-गणेन ते।"
(तं० आ०8, 158-59)

"रुद्राश्चैवंविधाकारा ज्ञानयोगबलोत्कटाः।।
.....
.....
न तत्र मृत्युर्नजरा न शोकोऽस्ति वियोगजः।।
क्रीडन्ति सार्धं कन्याभिः संसारभयवर्जिताः।
अधिकारक्षये रुद्रा रुद्रकन्या समावृताः।।
श्रीकण्ठस्येच्छया सर्वे शिवं यान्ति तनुक्षये
गत्वा भूयो न जायन्ते कल्पकोटिशतैरपि।।"
(स्व० तं०10, 565-71)

~ त्रिनेत्रः — **व्याख्यातो यथा—**

"स्वोपासकवर्गस्य तद्दशादानेन तदवस्थाध्यानसमापन्नस्य स्वाभिमुख्यसम्पादनेन च भगवान् परमशिव एवेश्वरतां भजमानः सन् रुद्रत्वेनाधिष्ठाता। तत एवासौ मायापदेऽपि प्राणापानात्मक-धर्माधर्मसूर्येन्दुदिननिशामृतकसूतकादि-विभाग-विरहित-तद्विभाग-निबन्धनभूतमध्यमज्योतीरूपप्रमातृभागाधिकस्वरूप-संस्पर्शा दुन्मीलित-तृतीयनेत्रः।"
(ई० प्र० वि० वि० खं०3, पृ० 305-6)

द्वैतभावतिरोधानपूर्वकमद्वैत-भावोन्मज्जनं यद्रुद्रेणक्रियते तदेव कृत्यमस्य तृतीयनेत्रस्थानीयमितिभावः।

निमज्जित-प्रमाणप्रमेयद्वैतकथासमुन्मिषिताद्वैतप्रथारूपा च या रुद्रस्य विलक्षणा दृष्टिरसावेव भक्तजनैस्तस्य तृतीय-नेत्रतया विलोक्यते वर्ण्यते च। यथा—

"यो मायापदेऽपि प्राणापानात्मकधर्माधर्म-सूर्येन्दुदिन-निशादि मुक्तमध्यमज्योतीरूप प्रमातृस्वरूपस्पर्शादुन्मी-लिततृतीयनेत्रः।"
(ई० प्र० वि० खं०2, पृ०217)

एतेन ज्ञायते यत् केवलं प्रमातृभावनिष्ठतैव रुद्रस्याभेददृष्टिरूपतृतीयनेत्रसमुन्मीलनमिति।

~ परापरदशाभाक् — **उक्तो यथा—**

"ततश्च रुद्रपदे तावदुभयं प्रकाशाप्रकाशलक्षणं मेलयन्ती ज्ञानशक्तिभेदन व्यवस्थाप्यत इति सम्भाव्यमेतत्। तस्यां हि सत्यामिदन्तानिर्देश्यता भवत्यपररूपा, तदभिन्ना चाहमिति पूर्णा पराऽप्यस्ति संवित्, अत सव परापररूपा क्रियाशक्ति-प्रधानागमेष्वीश्वरावस्थोक्ता।"
(ई० प्र० वि० वि० खं०3, पृ० 366)

~ पशुपतिः — **रुद्रलोकाधिपतित्वे पशूनां बद्धानां जीवानामनुग्रहशक्तिपातेन पालयिता। यथा—**

"पशुपतिस्तु रुद्रलोकेऽधिपतिरित्यर्थसिद्धम्।"
(तं० आ० वि० खं०5, पृ० 117)

~ प्रणवमलासुः — **मकारः। यथा—**

"रुद्रस्तद्वाचित्वान्मकारः"
(ने० तं० उ० खं०1, पृ०51)

~ भुवनविशेषाधिपः — **विष्णुलोकादुपरि यो लोकस्तस्या धिपतिः।**

द्र०:- 'तत्पदम्' इति।

~ 'तत्पारिषदः' **इति च।**

रुद्रकाली ~ 7मीः — **संविदः सा स्थितिः ययासौ निजस्योपसंहर्तृत्वरूपस्य स्वभावस्य कलने कञ्चिद्भावं सर्वथा संविन्मात्ररुपतरमापादयति, कञ्चित् पुनः संस्कारात्कतयैव स्वात्मन्यवस्थापयति। उपसंहरणशीलाशक्तिः। यथा—**

"तत उपसंहर्तृस्वभावकलने कस्यचिद्भावस्य वासनात्मनाऽवस्थितिं कस्याचित्तु संविन्मात्रावशेषतां कलयति।"
(तं० सा० पृ०29)

द्र०:- 'भद्रकाली । 7मी' इति।

~ क्रमसद्भावभट्टारके — **यथा—**

"रोधनाद् द्रावणाच्चेयं परा संविदुक्तेन प्रकारेण रूपं कलयन्ती श्रीक्रमसद्भावभट्टारके रुद्रकालीति व्यपदिष्टा"
(तं० आ० वि० खं०3, पृ०172)

"इदं सर्वमसर्वं यत् संहारान्तं तु नित्यशः।
कुटिलेक्षणरेखान्तग्रस्तमस्तमितं च यत्।।
ततो बोधरसाविष्टा स्पन्दमाना निराकुला।
दीधितीनां सहस्रं यद् व मेच्च पिबते मृशम्।।
सा कला लीयते यस्यां रुद्रकालीति सा स्मृता।"
(उद्ध० तं० आ० वि० खं०3, पृ०173)

~ क्रमस्तोत्रे — **यथा—**

"विश्वं महाकल्पविरामकल्पं
भवान्तभीमभ्रुकुटिभ्रमन्त्या।
याश्नात्यनन्तप्रभवार्चिषा तां
नमामि भद्रां शुभभद्रकालीम्।"
(क्र० स्तो० सि० ना०)
(उद्ध० तं० आ० वि० खं०3, पृ०173)

तत्र स्तोत्रे रुद्रकाल्येव भद्रकालीति वर्णिता।

~ चिद्गगनचन्द्रिकायाम् — **यथा—**

"कालपालकमुखं शिवान्तकं विश्वमब्धिपतितोदबिन्दुवत्।
पूर्णतां वहति यत्र दीप्तिचिद्-घस्मरी स्मृतिमहालये परे।।"
(चि० ग० चं० 231)

~तन्त्रालोके : — **यथा—**

"विलापितेऽपि भावौघे कञ्चिद् भावं तदैव सा।
आश्यानयेद् य एवास्ते शङ्कासंस्काररूपकः।।
शुभाशुभतया सोऽयं सोष्यते फलसम्पदम्।"
(तं० आ०4, 155-56)

"अन्यदाश्यानितमपि तदैव द्रावयेदियम्।
प्रायश्चित्तादिकर्मभ्यो ब्रह्महत्यादिकर्मवत्।।
रोधनाद् द्रावणाद्रूपमित्थं कलयते चितिः।
(तदेव 4, 157-58)

~ पञ्चशतिके : — **यथा**—

"श्रीपञ्चशतिकादौ पुनरियं भद्रकालीत्युक्ता, इति नाम्निभेदेऽपि वस्तुनि न कश्चिद्भेदो यद् रुद्धं वाऽर्थं द्रावयेद्भिन्नं वा, इत्युभयथाऽप्यर्थानुगम इति।"

(तं० आ० वि० खं०3, पृ० 163)

"गमागमसुगम्यस्था महाबोधावलोकिनी।
मायामलविनिर्मुक्ता विज्ञानामृतनन्दिनी।।
सर्वलोकस्य कल्याणी रुद्रा रुद्रसुखप्रदा।
यत्रैव शाम्यति कला रुद्रकालीति सा स्मृता।।
भेदस्य द्रावणाद् भद्रा भद्रसिद्धिकरीति या।।"

(उद्ध० तं० आ० वि० खं०3, पृ० 173)

रुद्रदशा — यथा—

"सा च रुद्रदशा शिवतत्त्वस्यापरावस्था।"

(ई० प्र० वि० वि० खं०3, पृ०374)

अत एव रुद्रात् परमशिवान्तं सर्वेऽप्यधिकारिशिवाः रुद्रा इत्युच्यन्ते, शिवरूपतयैव च पूज्यन्ते। यथा—

"ईश्वरस्य वा परापरदशात्मनो द्वितीयमपरदशात्मकं स्वरूपं स नञर्थः, पररूपनिमग्नतैव चास्य।"

(ई० प्र० वि० वि० खं०3, पृ०374)

ईश्वरभट्टारक एव मायायामवतीर्णः सन् रुद्र इत्यस्य पदसन्दर्भस्य तात्पर्यम्। यथा—

"महासंहाररूपा रौद्री दशा।"

(तदेव पृ०375)

~ सुषुप्तिमयी : — **तुर्याया अध एव सौषुप्ती या स्थितिरसौ रुद्रदशा। यथा—**

"ननु समस्त वेद्यक्षयश्चेद् वृत्तः, तदेव परमपदमिति का खल्वन्या तुर्यदशा सुषुप्तातिरिक्ता स्यादिति। अत आह "तत्र च" इति क्षीणेऽपि वेद्यान्तरे वेदकतत्त्वस्य सर्वोत्तीर्णसर्वमय सर्वेश्वरतादि-धर्मभाजनस्याद्यापि वेद्य एव शून्यादौ समुपहितसंवित्संकोचयोगात्परमार्थ-प्रकाशो नास्तीति तत् प्रकाश-सारायास्तुर्यदशाया युक्तमेव वैलक्षण्यम्।"

(ई० प्र० वि० वि० खं०3, पृ० 307-308)

रुद्रप्रमातारः — (1) मन्त्रमहेश्वराः, मन्त्रेश्वराः मन्त्रा, रुद्रदशाभाश्च प्रमातारः।

द्र०:- **'सदाशिवेश्वरौ** ~ शिवरुपौ' **इति।**

(2) द्विविधाः हि प्राणिनः, रुद्राः क्षेत्रज्ञाश्चेति। तत्र क्षेत्रज्ञा बद्धाः पशुप्रमातारः आकीटगुल्मादिभ्य महेन्द्रान्तमसङ्ख्यप्रकाराः। रुद्राश्च प्रत्यभिज्ञातात्मस्वरूपाः जीवन्मुक्तिभाजः प्राणिनः। पारमेश्वरे प्रशासने उत्तरोत्त-रेष्वधिकारपदेषु तिष्ठन्तः प्राणिनोऽपि रुद्रा इत्युच्यन्ते। पृथ्वीतत्त्वादारभ्योत्तरोत्तरतत्त्वेष्ववरावरतत्त्वानां संहारका अपि रुद्रा इत्युच्यन्ते। केचिद्रुद्राः श्रीकण्ठनाथादधोवर्तिनः। परं केचत् कञ्चुकतत्त्वाधिकारिणस्तदूर्ध्वमपि स्थिता अधिकारिणो रुद्राः। ब्रह्माण्डान्तरधिकारभाजो ब्रह्माण्डाद् बहिरवस्थिताश्चापि बहुविधा अधिकारिणो रुद्रा इत्युच्यन्ते। यथा—

"रुद्रप्रमातृणां निरतिशयानि सर्वज्ञत्वादिगुणगणयुक्तानि, तैः किल सर्वमिदमेकस्मिन् क्षणे युगपद् ज्ञायते सम्पाद्यते च।"

(प० सा० वि०, पृ०13)

~ (तदधिकारपदानि) —

द्र०:- **'सदाशिवेश्वरौ** ~ शिवरूपौ' **इति।**

~ पञ्चाशत् — **पञ्चाशन्मातृकावर्णवाच्याञ्च रुद्राः पञ्चाशत् तेषां नाम्नोल्लेखाद्येकीकाराह्निके तन्त्रालोके द्रष्टव्यं। यथा—**

एतद्वाच्याश्च पञ्चाशद्रुद्रा एकीकाराह्निके वक्ष्यन्ते।

(तं० आ० वि० खं०9, पृ० 61)

रुद्रभट्टारकः — स्थूलायाः सृष्टेः संहरणेऽधिकृतः कारणषट्कमध्ये गणितः। ब्रह्मविष्ण्वपेक्षयोत्कृष्टं बुद्धि-धर्मोत्तीर्णं रुद्रभट्टारकस्यैश्वर्यं शुद्धम्। ब्रह्मविष्ण्वोस्तु बुद्धि-धर्म-विशेषमयमिति विशेषः। यथा—

"एवकारेण शुद्धैश्वर्यस्पर्शोऽपि तयोर्नास्ति, रुद्रभट्टारकस्य तु शुद्धमैश्वर्यं ज्ञानं च स्पृशत एव बुद्धिगुणाभ्यामैश्वर्यज्ञानाभ्यां योग इति दर्शयति। तदेतत् स्फुटेनागमिकेनाभिज्ञानेन दर्शयति 'अत एव' इति। प्रपञ्चविगलने यदीशनमैश्वर्यं, ततः किल बुद्धिगुणस्यैश्वर्यस्य प्रत्यस्तमयः सत एव न्यक्करणं, न त्वत्यन्तमभावः।"

(ई० प्र० वि० वि० खं०3, 309-310)

रुद्रमातरः — ब्राह्मयाद्या अष्टौ मातर एव। यथा—

"ब्राह्मयाद्यास्तु रुद्रमातरः।"

(ने० तं० उ० खं०1, पृ० 47)

रुद्रयामलम् — (1) शिवशक्तिसंघट्टस्थितिविमर्शः। यथा—

"यावज्जडपाषाणादौ स्वयं संकोचविकासलक्षणो विसर्गः स्वातन्त्र्यात्मा भगवतोऽनुत्तरस्य शक्तिः। तेन भैरवसंघट्ट-विश्रमणोदय-परमार्थ-शिवशक्तिस्वरूपं रूद्रयामलमुच्यते।"

(प० त्री० ल० वृ० पृ०5)

(2) अकारहकारव्यंग्य-प्रकाशविमर्शसामरस्यं शिवशक्ति-संघट्टरूपं रुद्रयामलं तत्त्वम्। यथा—

"नित्योदितोद्योगस्वभावं शिवशक्तिमेलापरूपं रुद्रयामल-माख्यायते।"

(म० मं० प०, पृ०164)

(3) यामलाष्टकमध्ये परिगणितो भैरवागमविशेषः।

द्र०:- **'भैरवागमाः' इति।**

रूद्रयामलसारः — ग्रन्थस्य कस्यापि नाम एवेदमिति प्रतिभाति। यथा—

"माया विमोहिनी नाम कलायाः कलनं स्थितम्।
इति हि श्रीरुद्रयामलसारवाक्यम्।"

(ई० प्र० वि० वि० खं०3, पृ०285)

रुद्रवर्णः — ऊकारः। यथा—

रुद्रेणै (णो) कारेण।

(तं० आ० वि० खं०3, पृ०463)

रुद्रशक्तिः — संहारकारिणी प्रभोः शक्तिः। यथा—

"संहारं रुद्रशक्त्या तु .....।"

(ने० तं० खं०2, 21/44)

रुद्रशक्ति-समावेशः — मध्यतीव्रशक्तिपातपवित्रिते साधके रुद्रशक्तिसमावेशो भवति। तेनासौ शरीरस्थोऽपि निजं पारमैश्वर्यमनुभवति सचमत्कारसन्दोहम्, ईश्वरोचितानि च कृत्यानि कर्तुं समर्थो भवति। यथा—

"रुद्रशक्तिसमावेशस्तत्र नित्यं प्रतिष्ठितः।
सति तस्मिश्च चिह्नानि तस्यैतानि विलक्षयेत्।।
तत्रैतत् प्रथमं चिह्न रुद्रे भक्तिः सुनिश्चला।
द्वितीयं मन्त्रसिद्धिः स्यात् सद्यः प्रत्ययकारिका।।
सर्वसत्त्ववशित्वं च तृतीयं लक्षणं स्मृतम्।
प्रारब्धकार्य-निष्पत्तिश्चिह्नमाहुश्चतुर्थकम्।।
कवित्वं पञ्चमं ज्ञेयं सालङ्कारं मनोहरम्।
सर्वशास्त्रार्थवेत्तृत्वमकस्माच्चास्य जायते।।"

(मा० वि० तं०2, 13 त:16)

~ तच्चिह्नानि — रुद्रे भक्तिः सुनिश्चलेत्यादिनोक्तान्यत्रैव पञ्च।

तारतम्यतः

कस्मिँश्चित् समस्तानि क्वापि व्यस्तानि क्वचिन्मुक्तिपराणि क्वचिच्च भुक्तिपूर्वकत्वेन तथेति बहुविधेन तारतम्येन युक्तानि तानि चिह्नानि रुद्रशक्तिसमावेशस्य। यथा—

"स्वतारतम्ययोगात् स्यादेषां व्यस्तसमस्तता।
तत्रापि भुक्तौ मुक्तौ च प्राधान्यं चर्चयेद् बुधः।।"

(तं० आ०13, 216)

रुद्रांशः —

द्र०:- 'योगिनीजातः' इति।

रुद्राः — मुक्तशिवाः।

द्र०:- 'सुशिवावरणे ~ प्रमातारः' इति।

यथा—

"कालाग्निः कूष्माण्डो हाटक इति ब्रह्माण्डान्तरधोभागगतास्त्रयः। मध्ये भूलोकाधिपतिः शिवः, तदुपरिसत्य लोकान्तमधिष्ठाता ब्रह्मा, तदुपरि विष्णुरुद्रौ स्वलोकयोरित्यन्तः सप्त, बहिरस्य दशसु दिक्षु स्थितं रुद्रशतं तदुपरि सर्वेषां स्वामी वीरभद्रः, इत्येतदष्टोत्तरं शतम्।"

(स्व० तं० उ० प०4, पृ०57)

परं तन्त्रालोके ब्रह्मलोकादुपरि श्रीकण्ठनाथस्य शिवस्य पदं वर्णितं भुवनाध्वप्रकरणे। ततः क्षेमराजीयं व्याख्यानमेतच्चिन्त्यमेव, यतोऽत्र शिवस्य पदं सत्यलोकादधो निर्दिष्टम्।

~ एकादशः — शतरुद्राणामधिपतय एकादश। यथा—

"इत्थमुक्तविरिञ्चाण्डभृतो रुद्राः शतं हि यत्।
तेषां स्वे पतयो रुद्रा एकादश महार्चिषः।"

(तं० आ०8, 179-80)

ते च- अनन्तः, कपाली, अग्निः, यमः, नैर्ऋतकः, बलः, शीघ्रो, निधीशः, विद्येशः, शम्भुः, वीरभद्र इति। यथा—

"अनन्तोऽथ कपाल्यग्निर्यमनैर्ऋतकौ बलः।
शीघ्रो निधीशो विद्येशः शम्भुः सवीरभद्रकः।।"

(तं० आ०8, 180-81)

द्र०:- (स्व० तं० प०10, 657-659)

~ कञ्चुकवासिनः — पृथ्वीजलादितत्त्वेश्वरा ये रुद्राः तेभ्यः उत्कृष्टतरो भगवान् श्रीकण्ठनाथः यतोऽसौ मूलप्रकृतौ प्रशासनं करोति, सृजति संहरति चावर रुद्राधिष्ठितानि भुवनानि। परं तस्याधिकारस्योपरि कञ्चुकासिनां रुद्राणां वर्ततेऽधिकारः। ततस्थाविधा रुद्राः श्रीकण्ठनाथादप्यधिकतराधिकाराः, ते च नियति-काल-रागाशुद्धविद्याकलाद्यधिकारिणः। यथा—

श्रीकण्ठनाथस्य यदायुस्तत् कञ्चुकवासिनां रुद्राणां दिनम्, तावती रजनी।"

(तं० सा० पृ०55)

~ तदायुः — (1) जलतत्त्वादारभ्य मूलप्रकृतितत्त्वं यावत् सृष्टिसंहारकर्तारो रुद्राः। तत्र निम्नतरस्य रुद्रस्य यदायुस्तदुत्तरस्य रुद्रस्य दिनं तावती रात्रिः, शतं वर्षाण्यायुः। यथा—

"एवं जलतत्त्वादव्यक्तान्तमेतदेव क्रमेण रुद्राणामायुः। पूर्वस्यायुरुत्तरस्य दिनमिति।"

(तं० सा० पृ०54)

(2) अव्यक्त-तत्त्वस्य यदायुक्तद् दशभिः परार्द्धैर्गुणितं सद् गहनेशस्य दिनं, तावती रात्रिः। तेन मानेन तस्यापि वर्षशतमायुः। यथा—

"तेषां यदायुस्तद्गहनेशस्य दिनम्। तावत्येव क्षपा।"

(तं० सा० पृ० 55)

"एवं योऽव्यक्तकालस्तं दशभिः परार्धैर्गुणयित्वा मायादिनं कथयेत्।"

(तं० सा० पृ०55)

तत्र गहनेशस्य यद्दिनं तत् कञ्चुकवासिनां रुद्राणामायुः। कञ्चुकानि मायातत्त्वे विलापयन् गहनेशस्तत्रत्यान् रुद्रानपि शिवभावेऽवस्थापयति स्वानुग्रहशक्तिबलात्।

~शतसंख्याकाः — ब्रह्माण्डस्य दशसु दिक्षु बहिः प्रतिदिशं दश दश रुद्राः रक्षाकराः। त एव मिलित्वा शतरुद्राः। नामानि तेषां परिगणितानि स्वच्छन्दे।

द्र०:- (स्व० तं०10, 622-644) इति।

"शतरुद्रा इति ख्याता ब्रह्माण्डं व्याप्य संस्थिताः।।"
(तदेव10, 645)

~सप्तलोकेश्वराः — शर्वः, रुद्रो, भीमो। भवः, उग्रो, महान् ईशानः इति स्पष्टमुक्ताः यथा—

"शर्वरुद्रो भीमभवावुग्रो देवो महानथ।
ईशान इति भूर्लोकात् सप्तलोकेश्वराः शिवाः।।"
(तं० आ०8, 161)

रुद्रागमाः — भेदाभेददृष्टिप्रधाना अष्टादशागमाः विजयनिःश्वासाद्याः परिगणिताः श्रीकण्ठीसंहितायाम्। यथा—

"..... रुद्रभेदांस्त्विमाञ्छृणु।
विजयं चैव निःश्वासं मद्रीतं पारमेश्वरम्।
मुखबिम्बं च सिद्धं च सन्तानं नारसिंहकम्।
चन्द्रांशुं वीरभद्रं च आग्नेयं च स्वयम्भुवम्।
विसरं रौरवाः पञ्च विमलं किरणं तथा।।
ललितं सौरभेयं च तन्त्राण्याहुर्महेश्वरि।"
(उद्ध० तं० आ० वि० खं०1, पृ०40)

~तत्स्रोतांसिः — योगाद्यभ्यासवशाद् ये ये साधका यदा यदा यस्य यस्य दिव्याधिकारिणः स्थितिमवाप्नुवन्ति तदा तदा तेषां स्वानुभूतिसमाश्रिता उपदेशाः तस्याधिकारि-देवस्यैवोपदेशा इति गण्यन्ते साधकपरम्परासु। लोकव्यवहारप्रशासनकर्ता-योऽधिकारी मुख्योऽसौ भगवानुमापतिनाथः शिवः। तस्यैवैकं शरीरं पञ्चवक्त्रम्। तच्च स्वच्छन्दनाथाभिधम्। स्वच्छन्दनाथस्य पञ्चमुखानि पञ्चानां मन्त्रसमाख्यानामधिकारिणां प्रतीकभूतानि। ते च पञ्च मन्त्राख्याः शिवाः ईशानः, तत्पुरुषः, सद्यो जातो, वामदेवो, अघोरश्चेति। तेषां तेषां मन्त्राख्यानामधिकारिणा-मेकैकनिष्ठया दृष्ट्या द्वयोर्द्वयोर्वा मिश्रितया दृष्ट्या, त्रयाणां, चतुर्णां, पञ्चानामपि वा मिश्रितया दृष्ट्या सिद्धजनैर्येषामागमानामुपदेशः कृतस्ते आगमा एव पञ्चस्रोतः-समाख्याः शैवागमाः सिद्धान्तशैवाधारभूताः। इति तेषां त्रयो वर्णाः। भेदप्रधानया दृष्ट्योपदिष्टाः दशं शिवागमाः, भेदाभेद-दृष्टि-प्रधाना अष्टादश रुद्रागमाः, अभेद-दृष्टि-प्रधानाश्च चतुष्षष्टिर्भैरवागमाः, येषां स्रोतांसि ईशानादीनि स्वच्छन्दनाथस्य मुखानि। यथा—

"यदा त्रयाणां वक्त्राणां वामदक्षिणसङ्गतिः।
तदा सप्तद्विकभेदा अष्टौ चैव त्रिकात्मकाः।।
चतुष्काश्चापि चत्वारः पञ्चकस्त्वेकरूपकः।
इति विंशति-मध्यात्तु नराजातावसङ्गतिम्।।
वामाघोरद्वये यातः स्वातन्त्र्यात् पूर्वपश्चिमौ।
ज्ञानं भजेते नैवेति भेदषोडशकं स्थितम्।।
तत्रापि वामदेवीयमेकं तदुपरि स्थितम्।
स्वरूपं भैरवीयं च तेनाष्टादशधा स्थितिः।।
रुद्रभेदस्य शास्त्रेषु शिवेनैवं निरूपिता।"
(उद्ध० तं० आ० वि० खं०1, पृ०39)

द्र०:- (मा० वि० वा०1, 374 तः377) **इति।**

~तद्भेदाः — ईशान-तत्पुरुष-सद्योजात-वामदेव-अघोरस्थितीनांपृथक् पृथक् स्थितौ द्विशो मेलनस्थितौ, पञ्चक स्थितौ च क्रमेण एकैकभेदाः, द्विकभेदाः, त्रिकभेदाः, चतुष्क भेदाः, पञ्चकभेदश्चेति ज्ञेयम्। तदग्रेस्फुटतां यास्यति तत्तद्भेदव्याख्यानावसरे।

~तद्भेदाद्विसंख्याः — (1) एकैकभेदौ = (2), द्विकभेदाः = 3

त्रिकभेदाः = 8, चतुष्कभेदाः = 4

पञ्चकभेदः = 1, सर्वे = 18

इत्थमष्टादश-संख्याः रुद्रागमाः।

~(एकैकभेदौ) : — वामदेवाघोरस्थितौ = भेदत्रयस्य शिवागमेषु गणितत्वेन द्वावेव भेदाव शिष्टौ यथा—

"ईशानादेर्वक्त्रत्रयस्य शिवभेदेषूक्तत्वात्।"
(तं० आ० वि० खं०1, पृ०37)

~ (द्विकभेदाः) :— ते च त्रयः

ईशानवामदेव स्थितौ, ईशानाघोरस्थितौ

अघोरवामदेव-स्थितौ = ३ यथा

"तेन पञ्चानां त्र्यात्मकत्वेन **(द्वयात्मकत्वेन)** भेदयस्यस्य शिवभेदेषूक्तत्वात् तत् पुरुषसद्योजातयोस्त्वेवं स्वाभावाभावात् ताभ्यां सहासङ्गतेर्भेदचतुष्टया भावादीशवामौ, ईशाघोरौ, अघोरवामाविति द्व्यात्मकं भदेत्रयमेवावशिष्यते। इति त्रयो द्विकभेदाः।"
(तं० आ० वि० खं०1, पृ० 37-38)

(2) ईशतत्पुरुष सद्यो जातघोरस्थितौ = 1

(3) ईश सद्यो जातवामदेवाघोरस्थितौ = 1

(4) तत्पुरुष-सद्यो जातवामदेवाघोरस्थितौ = 1

इति भेदचतुष्टयम्। यथा—

"पञ्चानामप्येषां चतुरात्मकत्वेन सम्मीलनायां पञ्चविधत्वेऽपिनराजात वामाघोराणामुक्तयुक्त्या सङ्गत्यभावा-च्चत्वारश्चतुर्भेदाः।"
(तं० आ० वि० खं०1, पृ०39)

~(चतुष्कभेदाः) :— तेच चत्वारो यथा—

(1) ईश-तत्पुरुष-सद्योजात-वामदेवस्थितौ - 1

(2) ईश-तत्पुरुष-सद्योजाताअघोरस्थितौ - 1

(3) ईश-सद्योजात-वामदेवाअघोरस्थितौ - 1

(4) तत्पुरुष-सद्योजात-वामदेवाअघोरस्थितौ - 1

यथा—

पञ्चानामप्येषां चतुरात्मकत्वेन सम्मीलनायां पञ्च-विधत्वेऽपि नराजातवामदेवाघोराणामुक्तयुक्त्या सङ्गत्यभावाच्चत्वारश्च तुर्भेदाः।
(तं० आ० वि० खं०1, पृ०39)

~(त्रिकभेदाः) :— ते तावदष्टौ गणनीयाः। तत्र

ईशान-तत्पुरुष सद्योजातस्थितौ - 1
ईशान-तत्पुरुष-वामदेवस्थितौ = 1
ईशान-तत्पुरुषाअघोर-स्थितौ = 1
ईशान-सद्योजात-वामदेव-स्थितौ = 1
ईशान-वामदेवाअघोर-स्थितौ = 1
ईशान-सद्योजाताअघोर-स्थितौ = 1
तत्पुरुष-सद्योजात-वामदेव-स्थितौ = 1
तत्पुरुष-सद्योजाताअघोर-स्थितौ = 1
तत्पुरुष-वामदेताअघोर-स्थितौ = 1
सद्योजात-वामदेवाअघोर-स्थितौ = 1

अत्र गणनायां प्रथमस्य भेदस्य शिवभेदेषु गणितत्वेनैकस्य च व्यापारान्तरेण नियुज्यमानत्वेनात्र नैव परिगणनम्। ततो न दशसंख्याका भेदाः। यथा—

"पञ्चानामीशतत्पुरुषाजात **(सद्यो जात)** वामदेवाघोराणां त्र्यात्मकत्वेन सम्मीलनायामीशानस्य क्रमेणतरवक्त्रसम्भेदे षट् तत्पुरुषस्य त्रयः, तथा सद्यो जातस्य तदवशिष्टवक्त्रसम्भेदेऽप्येक-एव, इति दशविधत्वेऽपि ईशतत्पुरुष-सद्यो जातात्मनः प्रथमत्रिकस्य शिवभेदेषूक्तत्वाद् ईशवामाघोरात्मनः शिष्टस्य त्रिकस्य व्यापारान्तरेण नियोक्ष्यमाणत्वाच्च त्र्यात्मकभेदाष्टकमेवावशिष्यते।"

(तं० आ० वि० खं०1, पृ०38)

~(पञ्चकभेदः) :— स चैक एव। यथा—

"सर्वेषामप्येषां सम्मीलनायां पञ्चकभेदः एक एव।"

(तं० आ० वि० खं०1, पृ०39)

रुरुः — रौरवाख्यमागमशास्त्रं समुद्धृतपङ्क्तिकं तन्त्रालोके। यथा—

"सूक्ष्मैरिति गुरुश्चैव रुरौ सम्यङ्न्यरूपयत्।।"

(तं० आ०8, 162)

"अण्डस्वरूपं गुरुभिश्चोक्तं श्रीरौरवादिषु।।"

(तदेव,168)

रुरुतन्त्रम् :— रौरवाख्यं रौद्रागमशास्त्रं समुल्लिखितं प्रमाणतया तन्त्रालोके। यथा—

"ज्ञानाज्ञानगतं चैतद् द्वित्वं स्वायम्भुवे रुरौ।"

(तं० आ०1, 46)

रुरुवृत्तिः — रौरवागमोपरि रचिता वृत्तिर्यद्वाक्यमुद्धृतं तन्त्रालोकविवेके। यथा—

"यद्रुरुवृत्तिः—
'कलादिभिरेव शुद्धैस्तत् शुद्धं द्रष्टव्यम्'
इत्यभिप्रायतोऽनभिधानं नाभावात्।।"

(तं० आ० वि० खं०6, पृ०170)

रुरुशासनम् :— तन्नामकमागमशास्त्रम्। रौरवागम इति। यथा—

"द्वीपोपद्वीपगाः प्रायो म्लेच्छा नानाविधा जनाः।
मुक्ताकाञ्चनरत्नाढ्या इति श्रीरुरुशासने।।"

(तं० आ०8, 87)

रुरुसङ्ग्रहः — रौरवागमोक्त-सिद्धान्त-सङ्ग्रहग्रन्थः। यथा—

रुरुसंग्रहे
"क्रोधेशश्चण्डसंवर्तो ज्योतिःपिङ्गलसूरकौ।
पञ्चान्तकैकवीरौ च शिखी देशहितेश्वराः।। इति।"

(स्व० तं० उ०10, पृ०402)

रूप-तन्मात्रम्ः— शुक्लत्वनीलत्वादि-विशेष प्रविभागरहितो रूपत्वावच्छिन्नः सामान्याकाररूपमात्रात्मकः सूक्ष्मतरश्चक्षुर्ग्राह्योप्रक्षुब्धो विषयः। स च तमः-प्रधानादहङ्कारादुद्भूतः सन् प्रक्षोभमधिगम्य रूपविशेषात्मकतां धत्ते, विशेषतश्चप्रक्षुब्धः सन् वह्निरूपतामाधत्ते सृष्टिक्रमे। यथा—

"एवं रसादिशब्दान्ततन्मात्रेस्वपि योजना।"

(तं० आ०9, 282)

द्र०:- 'गन्धतन्मात्रम्' इति।
'तन्मात्राणि' इति च।

रूपम् :— (1) योगजानुभूतिविषयः कश्चन। यथा—

"रूपं सन्तमसाद्यावरणेऽपि सति तत्तद्दृश्यवस्त्वाकारदर्शनं यत्तेजस्तत्त्वन्यक्षनिक्षिप्तमतयो निरीक्षन्ते।"

(स्प० तं० वि० पृ०118-19)

न्यक्षेण = कार्त्स्न्येनेति।

(2) योगसिद्धिविशेषः यथा—

"रूपमन्धकारे दर्शनम्।"

(स्प० वृ० पृ०34)

रूपवेधः — वेधदीक्षाविशेषः। तद्विधिर्यथा

"भ्रूमध्योदितबैन्दवधामान्तःकाञ्चिदाकृतिं रुचिराम्।
तादात्म्येन ध्यायेच्छिष्यं पश्चाच्च तन्मयीकुर्यात्।।
इति रूपवेध उक्तः सा चेहाकृतिरुपैति दृश्यत्वम्।
अन्ते तत्सायुज्यं शिष्यश्चायाति तन्मयीभूतः।।"

(तं० आ०29, 261-62)

काञ्चिदाकृतिमिति यथेष्ट-देवतारूपाम्। तद्देवतासायुज्यफलोऽयं रूपवेधः।

द्र०:- 'वेधदीक्षा' इति।

रूपशिवः — साक्षात्कृतनिजेच्छाशक्तिमाहैश्वर्यो शिवयोगी भगवाननाश्रितश्चेति। यथा—

इच्छा मात्रे रूपशिवः .....।

(शि० दृ०7, 31)

रूपस्थंः — (1) योगिषु प्रसिद्धं सुषुप्तावस्थायाः संज्ञान्तरम् सङ्कोचात्मकजीवरूपतान्वितस्य चिदात्मक-संविद्रूपस्य-शिवस्य जीवचैतन्यात्मतां प्राप्तस्य शून्यरूपस्य प्रमातृतत्त्वस्य यावगतिस्तत्प्रधाना दशा रूपमित्युच्यते। उदयलयभागिदमात्मनो विनश्वरं रूपम्। तदवस्थास्थितस्य-साधकस्य स्थिती रूपस्थ-संज्ञका, या सुषुप्तिरिति प्रसिद्धा लोके। यथा—

"..... अवगतिर्यतः।
तस्मात् सञ्जायते नित्यं नित्यमेव शिवात्मनोः।।
तदेव रूपमित्युक्तमात्मनश्च विनश्वरम्।"
(मा० वि० तं०20, 5-6)

~तत्प्रकाराः — योगिपरम्परासु उदितं, विपुलं, शान्तं सुप्रसन्नमिति चत्वारः प्रकाराः रूपस्थस्य। यथा—

"चतुर्धा रूपसंज्ञं तु ज्ञातव्यं योगचिन्तकैः।।
उदितं विपुलं शान्तं सुप्रसन्नमथापरम्।"
(मा० वि० तं०2, 44-45)

तै च - सौषुप्तं जाग्रत्, सौषुप्तः स्वप्नः सौषुप्ता सुषुप्तिः सौषुप्तं च तुर्यम्।

~तन्निर्वचनम् : — रूपयति प्रमाणप्रमेयात्मकं व्यवहारमिति रूपं प्रमाता प्रमातृप्रकाशमात्रे स्थितं सौषुप्तं रूपस्थम्। यथा—

"रूपकत्वाच्च रूपं तत्तादात्म्यं योगिनः पुनः।
रूपस्थं तत्समापत्त्यौदासीन्यं रूपिणां विदुः।।"
(तं० आ० 10, 261)

"रूपयति तत्तदर्थजातं स्वात्मसात्कारेण रूपवत्करोतीति रूपं प्रमाता, तदैकात्म्यं नाम योगिषु रूपस्थं विदुः।"
(तं० आ० वि० खं०7, पृ० 177-178)

मायाप्रमातृस्वरूपभूतमिदं सौषुप्तं जीवनम्।

~ प्राणी : — उक्तो यथा—

तैजसत्वात् रूपेन्द्रियगोचरः कलातत्त्वभुवनाध्वगर्भो बिन्दुतत्त्वभूत उच्चरितज्वलच्छक्तिविस्फारो रूपस्थः तृतीयपुर्यष्टकरूपः।
(म० प्र० वि० पृ०15)

मन्त्राः, मन्त्रेश्वराः, मन्त्रमहेश्वराः इति। एतच्च तत्त्वभेदनदृशेतिवेद्यं सामान्यतस्तु मन्त्राद्याः रूपातीतदशाभाज एव। यथा—

"मन्त्रास्तत्पतयः सेशा रूपस्थमिति कीर्त्यते।"
(तं० आ०10, 285)

रूपातीतः — (1) परिमिताज्जीवस्वरूपादुत्तीर्णतया सम्यक् स्पन्दमानो वास्तविकस्वस्वरूपविमर्शबहुलो जीवन-व्यापारो मन्त्र-महेश्वरादिषु स्फुटं परिस्फुरन् तुर्याख्यदशामयः।

(2) योगिषु प्रसिद्धं तुर्यदशायाः संज्ञान्तरम्। सकलकरणाविषयं परं स्वरूपमात्मतत्त्वस्य रूपातीतसंज्ञम्। तदेव लोके तुर्यमिति वा तुर्यातीतमिति वोच्यते। यथा—

"रूपातीतं तदेवाहुर्यतोऽक्षाविषयं परम्।"
(मा० वि० तं०20, 6)

(3) प्रमाणप्रमेयनिरूपकं रूपस्थं सौषुप्तम्। तदुत्तीर्णेयं तुर्यादशा रूपातीतेति परिभाष्यते योगिभिर्यतस्तेषां रूपातीतपद्समापत्ति र्जायतेऽत्र। यथा—

"रूपकत्वादुदासीनाच्चुतेयं पूर्णतोन्मुखी।।
दशा तस्यां समापत्ती रूपातीतं तु योगिनः।"
(तं० आ०10, 273-74)

रूपातीतः — शुद्धसंविन्मय आत्मा। यथा—

"रूपातीतः परिपूर्णस्वपरामर्शरूपः तुर्यदशामयः शुद्धात्मरूपः।"
(म० प्र० वि० पृ०15)

रूपातिशिवाः — आनन्दतरङ्गसाक्षात्कारिणो योगिनः। यथा—

"..... तरङ्गे तदतीतता।"
(शि० दृ०7, 31)

मुक्तशिवविशेषा इमे।

रूपावरणम् : — धर्मज्ञानवैराग्यैश्वर्यभुवन सतुष्टयमीश्वरतत्त्वे स्थितं रूपावरणसंज्ञम्। यथा—

"धर्मज्ञान विरागैश्यचतुष्टयपुरं तु यत्।।
रूपावरण संज्ञं तत्तत्त्वेऽस्मिन्नैश्वरे विदुः।"
(तं० आ०8, 355, 56)

रोधनम् : — विलयकृत्येन पशुप्रमातृणां संसारचक्रे एवावस्थापनम्। यथा—

"रोधनं संसारिणां विलयशक्त्याऽऽघ्रातत्वातत्तत्रैवावस्थापनम्।"
(तं० आ० वि० खं०1, पृ०147)

रौद्रागमाः —

द्र०:- रुद्रागमा इति।

रौद्रीशक्तिः — जिज्ञासुषु साधकेषु जृम्भमाणा, सांसारिककष्टनिवारणकरी, सुखसङ्गेन च बद्धा संसृतावेन पशूँश्चिरं स्थापयन्ती शिवस्य शक्तिः। यथा—

"..... बुभुत्सूनां च रौद्रिका।"
(तं० आ०6, 56)

"द्रावयित्री रुजां रौद्री रोद्धी चाखिलकर्मणाम्।"
(तदेव, 6, 57)

"रौद्री सांसारिकानन्दं कदाचिद्वितरेदपि।।"
(तं० आ० वि० खं०4/1, पृ० 50)

द्र० स्व० तं० उ० प० 10, पृ० 484 इति।

रौरवम् :— रौरवागमः। तन्मतमुद्धृतं तन्त्रालोके वाक्यं च तद्विवेकेऽपि च। यथा—

"निरयेभ्यः पुरा कालवह्नेर्व्यक्तिर्यतस्ततः।।
विभुरधःस्थितोऽपीश इति श्रीरौरवं मतम्।"
(तं० आ०6,141-42)

तदुक्तं तत्र—

"नरकाणामधःपूर्वं व्यक्तिरस्योपजायते।
सर्वस्थानोऽपि संस्तस्मादधःस्थ इव लक्ष्यते।।"
(तं० आ० वि० खं०-4/1, पृ०123)

रौरववार्तिकम् :— रौरवागमोपरि लिखितं वार्तिकं समुल्लिखितं तन्त्रालोके कृतसमुद्धरणं तद्विवेके।

यथा—

"पुसां सितासितान्यत्र कुर्वतां किल सिद्ध्यतः।
परापरौ स्वर्निरयाविति रौरववार्तिके।।"
(तं० आ०8, 92)

पुसां सितानि कर्माणि कुर्वतामसितानि च।
सिद्ध्यतः स्वर्गनिरयावत्र क्षिप्रं परापरौ।।"
(तं० आ० वि० खं०5, पृ०70)

द्र० (तदेव, पृ० 132) **इति च।**

रौरववृत्तिः — रौरवागमे रचिता वृत्तिः, समुल्लिखिता तन्त्रालोके।

यथा—

"उक्तं च गुरुभिः श्रीमद्रौरवाभि स्ववृत्तिषु।।"
(तं० आ०6, 134)

रौरवशासनम् :— रौरववागमः। अस्य पङ्क्तयः समुद्धृतास्तन्त्रालोकविवेके। यथा—

"सिद्धीर्ददात्यसावेवं श्रीमद्रौरवशासने।"
(तं० आ०8, 32)

द्र०:- (तदेव 8, 101)

तथा तं० आ० वि० खं० 5, पृ० 66 **इति च।**

रौरवसंग्रहः — रौरवागमाश्रितं तत् संक्षेपात्मकं किमपि शैवशास्त्रपुस्तकं समुद्धृतं यत्तन्त्रालोकविवेके।

यथा—

"रौरव संग्रह इति बृहत्तन्त्रापेक्षया, यदुक्तं तत्र 'ततोऽधिष्ठाय विद्येशो ..... इत्यारभ्य गुणांश्चाप्यसृजत्प्रभुः।।" इत्यन्तम्
(तं० आ० वि० खं०6, पृ०41)

रौरवसूत्रसंग्रहः — कोऽप्यागमिको ग्रन्थविशेषः।

यथा—

"श्री रौरवसूत्रसङ्ग्रहे—
अथात्म-मल-मायाख्य-बन्धनत्रयनिवृत्तये। इति निरूप्य व्यक्तये तु शिवत्वस्य शिवज्ञानं प्रवर्तते। इति शिवत्वव्यक्तिः प्रयोजनान्तरत्वेनोक्ता।।"
(ई० प्र० वि० वि० खं०2, पृ०305)

रौरवागम :— शैवागमविशेषः समुद्धृतस्तन्त्रालोकादौ।

यथा—

"तदुक्तं श्रीरुरौ .....।
'क्रोधेशचण्डसंवर्त ..... इत्यादि।"
(तं० आ० वि० खं०5, पृ०186)

द्र०:- (तं० आ०8, 168तः 70) द्र० (स्व० तं० उ० प० 2, पृ० 49) **इति।**

ल

ल— (1) स्तम्भकं धराबीजं स्थैर्यतः।

द्र०:- 'य' इति।

(2) सलिलवर्णः। मन्त्रकोषानुसारम्। यथा—

"वाय्वग्निसलिलेन्द्राणां धारणानां चतुष्टयम्।"
(प० त्री०7)

"वाय्वादि शब्दवाच्या यादयो वकारान्ताः।"
(प० त्री० वि० पृ०113)

~मातृकाक्रमे :— शाम्भवोपायाङ्गभूते मातृकोपासनक्रमे लकारः साधनालम्बनतां नीतः सन् कलातत्त्वात्मकेन शक्तिप्रतिबिम्बेन खचितं स्वं चित्प्रकाशं साक्षात्कारयति। ततो लकारः कलातत्त्वस्य यन्मूलभूतं स्वरूपं तस्याभिव्यञ्जको मातृकावर्णः। यथा—

"यादयो वकारान्ता राग-विद्या-कला मायाख्यानि तत्त्वानि।"
(प० त्री० वि० पृ०113)

लकारः —

द्र० 'षट्त्रिंशत्तत्त्वदीक्षा (7)';

'विद्याराजः ~ तद्वर्णाः' इति।

लकुलस्वच्छन्दः — आगमविशेषः। यथा—

"यथा परमेश्वरो लकुलेशाय ज्ञानं भेदेन प्रकाशितवानिति श्री लकुलस्वच्छन्दप्रदर्शितस्थित्या।"
(स्व० तं० उ० प०10, पृ०474)

सम्भवतोऽयमेवागमः कश्मीरेषु स्तोत्रपाठप्रसङ्गेषु ललितस्वच्छन्द इति प्रसिद्धिमगात् लोकपरम्परायाम्।

द्र०:- बहुरूपगर्भस्तोत्रस्य पुष्पिका।

लक्ष्मणगुप्तः — प्रत्यभिज्ञाशास्त्रेऽभिनवगुप्तस्य गुरुः। अनुमातुं शक्यते यदयमाचार्योऽप्यत्रिगुप्तस्यैव कुले जात इति। अन्यस्य गुप्ताह्वयस्य कस्यापि वंशस्य कश्मीरेष्वदर्शनात्।

यथा—

"श्रीमल्लक्ष्मणगुप्तदर्शितपथः श्रीप्रत्यभिज्ञाविधौ।"
(ई० प्र० वि० वि० खं०1, पृ०1)

~तत्कृतिः — यद्यपि लक्ष्मणगुप्तकृतो न कोऽपि मूलग्रन्थो वा टीकाग्रन्थो वोपलभ्यते तथापि तत्कृताः व्याख्याः प्रति निर्देशः कृतोऽभिनवगुप्तपादैर्जयरथेन च।

तद्यथा—

(क) " वासी चन्दनकल्पानाम् .... इति वासीचन्दनकल्पा येषामिति गुरुणा व्याख्यातमिति श्रीलक्ष्मणगुप्तगुरुराह।"
(ई० प्र० वि० वि० खं०2, पृ०49)

(ख) "श्रीलक्ष्मणगुप्तमते ह्यन्यथा न्यासविधिरित्याशयः।"
(तं० आ० वि० खं०9, पृ०122)

(ग) "श्री लक्ष्मणगुप्तः पुनरेतदन्यथा व्याचख्या वित्याह।"
(तदेव)

एतैर्निर्देशैस्तस्य ग्रन्थकारता सिद्धयति।

लक्ष्मीकौलार्णवः — कोऽपि कौलिक आगमग्रन्थः। यथा—

"शशिमार्गेण शिष्याणां सूर्यस्थः प्रविशेद् हृदि'।
इति श्री लक्ष्मीकौलार्णवोक्तनीत्या।"
(स्व० तं० उ० प०4, पृ०64)

द्र० (तदेव प०2, पृ०53,54 तदेव प० 5 पृ०22,) शि० सू० वि० पृ० 38

लक्ष्मीबीजम् — शकारः। यथा—

"लक्ष्मीबीजं श।"
(तं० आ० वि० खं०12, पृ०202)

लक्ष्मीरामः — परात्रीशिकायाः कश्चनावरकोटिकः टीकाकारो येन परात्रीशिकाविवृतिर्निर्मिता। यथा—

"दृष्ट्वा दुर्घटनां शास्त्रे गुप्तपादैर्विनिर्मिते।
राजानलसकेनैषा त्रिंशिकाविवृतिः कृता।।"
(प० त्री० वि० पृ०20)

"इति श्रीराजानकलक्ष्मीरामकृता परत्रिंशिकालघुविवृत्तिः समाप्ता।"
(तदेव)

लघुप्रक्रिया — शैवशास्त्रस्य ग्रन्थ विशेषः, श्रीमदभिनवगुप्तपाद-विरचितः, साम्प्रतमुद्धरणमात्रशेषः। यथा—

"लघुप्रक्रियायां मयैवोक्तम्
ऊनाधिकमविज्ञातं पौर्वापर्यविवर्जितम्।।
यच्चावधानरहितं बुद्धेर्विस्खलितं च यत्।।
तत्सर्वं मम सर्वेश भक्तस्यार्तस्य दुर्मतेः।
क्षन्तव्यं कृपया शम्भो यतस्त्वं करुणापरः।।
अनेन स्तोत्रयोगेन तवात्मानं निवेदये।
पुनर्निष्कारणमहं दुःखानां नैमि पात्रताम्।।"
(भ० गी० सं० पृ०133)

लघुभट्टारकः — लघुस्तवनिर्माता धर्माचार्यो महेश्वरानन्देन लघुभट्टारक इति निर्दिष्टः।

द्र० (म० मं० प०, पृ०76)

लघ्वीप्रक्रिया — लघुप्रक्रिया इत्येव। अभिनवगुप्तकृतः कोऽपि त्रिकशास्त्रग्रन्थो य इदानीं नैव लभ्यते। यथा—

"तथा च मयैव लघ्व्यां प्रक्रियायाम्
'न भोग्यं व्यतिरिक्तं हि भोक्तुस्त्वत्तो विभाव्यते।
एष एव हि भोगो यत्तादात्म्यं भोक्तृभोग्ययोः।।' इति।"
(भ० गी० सं० पृ०53)

लघ्वीविमर्शिनी — ईश्वरप्रत्यभिज्ञाविमर्शिन्या लोक प्रसिद्धं नामान्तरम्।

द्र०:- 'लघ्वीवृत्तिः' इति।

लघ्वीवृत्तिः —ईश्वर प्रत्यभिज्ञाविमर्शिन्येवाचार्याभिनवगुप्तपादैः स्वयं लघ्वीवृत्तिरिति निर्दिष्टा ग्रन्थान्ते ग्रन्थादौ च। यथा—

"एषाभिनवगुप्तेन सूत्रार्थप्रविमर्शिनी।
रचिता प्रत्यभिज्ञायां लघ्वी वृत्तिरभङ्गुरा।।"
(ई० प्र० वि० खं०2, पृ०277)

"तत्प्रशिष्यः करोम्येतां तत् सूत्रविवृतिं लघुमिति।"
(ई० प्र० वि० खं०1, पृ०3)

लम्बिका — (1) जनस्य कण्ठान्तरेऽवलम्बमानमङ्गम्। चतुष्किकाम्बुजं चालम्बते सा। यथा—

"चतुष्किकाम्बुजालम्बि, लम्बिका सौधमाश्रयेत्।"
(तं० आ०5,55)

"ते—(चतुष्किकामम्बुजंच) आलम्बते ऊर्ध्वाधोवर्तितया स्वीकरोति ..... तच्छीला येयं लम्बिका।"
(तं० आ० वि० खं०3, पृ०359)

उच्चरयोगप्रकरणे उक्तमेतत्।

(2) तालुरन्ध्रम्। यथा—

"लम्बिकावधीति तालुरन्ध्रान्तम्।"
(तं० आ० वि० खं०9, पृ०150)

लयः — संहारः पृथिवीमारम्य महत्तत्त्वान्तं कार्यतत्त्वानां कारणतत्त्वेषु तत्तदुत्कृष्टोत्कृष्टतररुद्रकृतो विलयः। यथा—

"चतुर्युगैकसप्तत्या मन्वन्तरस्ते चतुर्दश।।
इत्यारभ्य
(तं० आ०6, 139)

क्रमात् स्वस्वशतान्तेषु नश्यन्त्यत्राण्डलोपतः। इत्यन्तम्।"
(तं० आ०6, 146)

"सहारं च पुनर्देवि शृणुष्व कथयामि ते। इत्यारभ्य
(स्व० तं०11, 231)

महाकल्पस्य पर्यन्ते ब्रह्मा याति परे लयम्। इत्यन्तम्।"
(स्व० तं०11, 264)

लयाकलः — प्रलयाकल एव। यथा—

"ततो लयाकले मेये प्रमाताऽस्ति लयाकलः।"
(तं० आ०10, 124)

ललितस्वच्छन्दतन्त्रम् : — अस्ति कश्मीरेषु लोकप्रियमेकं बहुरूपगर्भाख्यं शिवस्तोत्रम्। तत्पुष्पिकायां लिखितमस्ति- "इति श्रीललितस्वच्छन्दे बहुरूवगर्भस्तोत्रम्" इति। कदाचिल्लकुलस्वच्छन्द एवानेन नाम्नाऽपि पाठकपरम्परासु प्रसिद्धिं यात इति सम्भाव्यते।

द्र०:- 'लकुलस्वच्छन्दः' इति।

ललितास्तवरत्नम् — भगवद्दुर्वाससा विरचितो विस्तृतो देवीस्तवः। अत्र श्रीयन्त्रस्थचक्राद्यधिष्ठातृदेवतानां तत्तदधिकारक्षेत्रस्य च काव्यात्ममतीव मनोहरं वर्णनं

सुललितैः पदैर्भावैश्च कृतं सत् कस्य सहृदयस्य हृदयं नाह्लादयति। प्राक् काव्यमालाया दशमे गुच्छके प्रकाशितं सदिदानीं जम्मूनगरस्थेन श्रीरणवीरविद्यापीठेन पुनः सटीकं प्रकाशितं सुलभम्।

लवः — मानुषनेत्रनिमेषस्याष्टमोंऽशः क्षणः। तादृक् क्षणचतुष्टयात्मकः कालो लवः। क्षण चतुष्टयात्मा कालभागः। यथा—

"मानुषाक्षिनिमेषस्य अष्टमांशः क्षणः स्मृतः।
क्षणद्वयं तुटिर्ज्ञेया तद् द्वयं तु लवः स्मृतः।।"
(स्व० तं०11, 201)

लिङ्गपूजा ~ (बाह्यस्य) :— वस्त्रादौ निर्मिते वा, बाह्ये प्रस्तरादिलिङ्गे वा, बाणलिङ्गे वा, नदी प्रस्रवणोत्थे वा स्वयम्भू लिङ्गे षोडशोपचारादिपूजा या लोके प्रसिद्धा। यथा—

"सूत्रे पात्रे ध्वजे वस्त्रे स्वयम्भूबाणपूजिते।
नदी प्रस्रवणोत्थे च नाह्वानं नापि कल्पना।।"
(तं० आ०27, 18)

लिङ्गपूजा विधेरेते विशेषा आलम्बनसम्बन्धिनः।

~कौलिके विधौ — **स्वशरीर एव सकलाध्व-भावनाकरणात् कुलप्रक्रियायां बाह्यलिङ्गपूजानिषेधः। यथा—**

"यजेदाध्यात्मिकं लिङ्गं बाह्यं लिङ्गं न पूजयेत्।
इति— तथा
हृदयगुह्यागेहगतं सर्वज्ञं सर्वगं परित्यज्य।
प्रणमति मितमतिरशिवं शिवाशयाश्मादिमश्ला-घ्यम्।।"
(उद्ध० तं० आ० वि० खं०3, पृ०286)

~ त्रिके — **(1) पराद्वैतदृष्टिप्रधाने त्रिकशास्त्रे बाह्यलिङ्गपूजाया विधिनिषेधयोरभावः। नात्र लिङ्ग-पूजावश्यकर्त्तव्या, न चापि परिहार्या। तस्याः करणाकरणयोः स्वातन्त्र्यं त्रिकयोगिनः कृते। परं तथापि योगिनः पूर्वाभ्यासतो वा लोकसंग्रहार्थं वा तस्यां कामपि रूचिं प्रायो दर्शयन्त्येव, नावहेलनां तस्याः कुर्वन्ति कथमपि। यथा—**

"सिद्धान्ते लिङ्गपूजोक्ता विश्वाध्वमयताविदे।
कुलादिषु निषिद्धासौ देहे विश्वात्मताविदे।।
इह सर्वात्मके कस्मात् तद्विधिप्रतिषेधने।"
(तं० आ०4, 256-57)

स्वात्मशिवताया भोगस्य त्रिकाचारे प्राधान्यम्। ततः प्राधान्येन स्वात्मैवोपास्य इति सावधानं निजमा-ध्यात्मिकमेवलिङ्गमुपास्यं त्रिकसाधकेन बाह्यं तूपचारमात्रतया। यथा—

"स्ववीर्यानन्दमाहात्म्य-प्रवेशवशशालिनीम्।
ये सिद्धिं ददते तेषां बाह्यत्वं रूपविच्युतिः।।
किञ्च प्रोक्तं समावेशपूर्णो भोक्तात्मकः शिवः।
भोगलाम्पट्यभाग्भोगविच्छेदे निग्रहात्मकः।।"
(तं० आ०27, 3-4)

~रहस्यमयी : — **सा च चर्याक्रमानुसारं वीरसाधकैरेव विधेया। तया परलिङ्गोपासनया बीजयोन्यात्मक-मातृकावर्ण-संघट्टस्थितिरुदेति तया च शाम्भवः समावेशो विनायासं सञ्जायते। यथा—**

"इदं स्पन्दनात्मयोगिनी हृदयाभिधेयमानन्दमयं लिङ्गं बीजयोन्यात्मक-शिवशक्त्यैकात्म्येन 'कामपि संविदं सूते' परसंविदावेशमाविष्कुर्यात्।"
(तं० आ० वि० खं०3, पृ०430)

~सिद्धान्ते — **शैवसिद्धान्ते लिङ्गपूजाविधेरुपदेशोऽवश्य-कर्त्तव्यतया विद्यते। बाह्यलिङ्गे शिवभावस्य, पीठे शुद्धविद्याक्षेत्रस्य, आधार शिलायां माया क्षेत्रस्य भावनां विदधता शिवोपासकेन लिङ्गपूजा क्रियते तत्र मते। यथा—**

लिङ्गे परमशिवान्तां व्याप्तिं पीठे सदाशिवप्रान्ताम्।
ब्रह्मशिलायां मायापर्यन्तां भावयद्भिरमैः।।
इष्टेन शिवलिङ्गेन विश्वं सन्तर्पितं भवेत्।
(तं० आ० वि० खं०3, पृ०285-86)

'लिङ्गम्- ~ दार्शनिकम्' — (1) उच्चारयोगे जगतो लयोदयहेतुभूतः परमेश्वरः। यथा—

"लिङ्गं च 'लिङ्गशब्देन विद्वांसः सृष्टिसंहारकारणम्।
लयादागमनाच्चाहुर्भावानां पदमव्ययम्'।।
इत्याद्युक्त्या सृष्ट्यादिपञ्चविधकृत्यकारी परमेश्वरः।"
(तं० आ० वि० खं०3, पृ०141)

द्र०:- स्व० तं० उ० प०3, पृ० 168 इति।

स च तत्र योगे चित्स्पन्दात्मकतयाऽनुभूयतेऽनेकधा। तेन स्पन्द एव तत्र योगे लिङ्गम्, न मृच्छैलधातुरत्नादिनिर्मितं पूजालम्बनम्। यथा—

"लीनमनभिव्यक्ततया अन्तःस्थितं विश्वमस्येतिलिङ्गमशेष-विश्वाभेद-वेदनात्मकबिन्दुप्रकाशमयम्।"
(स्व० तं० उ० प०12, पृ०74)

"एकस्य स्पन्दनस्येयं त्रिधाभेदव्यवस्थितिः।।
एतल्लिङ्गज्ञानप्रवियुक्तहृदा वृथैव हि भजन्ते।
बाह्यस्थलिङ्गपूजां प्रयासमात्रं फलाय न हि तत् स्यात्।।"
(मा० वि० वा०2, 65-66)

~अनुन्मिषितवेद्यम् —

द्र०:- **'लिङ्गम्** ~ अव्यक्तम्' इति।

~अपरम् —

द्र०:- **'व्यक्तलिङ्गम्** ~ उच्चारयोगे' इति।

~अव्यक्तम् — **शिव-शक्ति-नर-तत्त्वाविभागवत्, परशिवात्मकं परं स्पन्दनम्। तदेव च गलिताशेषवेद्यमित्युक्तम्। परमुक्तिप्रदमेतल्लिङ्गम्। यथा—**

"एवमुच्चारविश्रान्तौ यत् परं स्पन्दनं गलिताशेषवेद्यम्।"
(तं० सा० पृ०40)

"एवं प्रदर्शितोच्चार-विश्रान्तिहृदयं परम्।।
यत्तदव्यक्तलिङ्गं नृशिवशक्त्यविभागवत्।
अत्र विश्वमिदं लीनमत्रान्तःस्थं च गम्यते।।"
(तं० आ०5, 112-13)

"एतदव्यक्तलिङ्गं तन्नरशक्तिशिवात्मकम्।
यत्र विश्वमिदं लीनं यदन्तःस्थं च गम्यते।।"
(मा० वि० वा०2, 61)

~आत्माख्यम् — **लिङ्गत्रये व्यक्तलिङ्गम् उच्चारयोगे। यथा—**

"आत्माख्यं यद् व्यक्तं नरलिङ्गं .....।"
(तं० आ०5, 118)

द्र०:- 'व्यक्तम्' इति।

~ आध्यात्मिकम् — **यदेतत् प्राणशक्तिस्पन्दनं तदेव हृदयादुत्थितं सद् ब्रह्मरन्ध्रान्तं देदीप्यमानं लिङ्गाकारतया धारणासु दृश्यमानमाध्यात्मिकं लिङ्गमुच्यते। तस्यैवोपासना परिपूर्णतया लिङ्गोपासना फलप्रदा, न मृच्छैलधातुरत्नादि-निर्मितस्य लिङ्गस्योपासना। असौ तु व्यावहारिक-तुच्छफलदा। प्राणलिङ्गमालम्ब्य पराद्वैतभावनया शिवैकीभावाभ्यास एव वास्तविकी लिङ्गोपासना। यथा—**

मृच्छैलधातुरत्नादिभवं लिङ्गं न पूजयेत्।।
यजेदाध्यात्मिकं लिङ्गं यत्र लीनं चराचरम्।
बहिर्लिङ्गस्य लिङ्गत्वमनेनाधिष्ठितं यतः।।
अतः प्रपूजयेदेतत् परमाद्वैतमाश्रितः।
.....
.....
यदेतत् स्पन्दनं नाम हृदये समवस्थितम्।।
तत्र चित्तं समाधाय कम्प उद्भव एव च।
तत्र प्रशान्तिमापन्ने मासेनैकेन योगवित्।।
हृदयादुत्थितं लिङ्गं ब्रह्मरन्ध्रान्तमीश्वरि।
स्वप्रभोद्द्योतिताशेष-देहान्तममलद्युति।।"
(मा० वि० तं०18, 2तः 7)

~उन्मिषद्वेद्यम् — **व्यक्ताव्यक्तं लिङ्गम्, शक्त्यात्मकं भोगमोक्षदम्।**

द्र०:- 'लिङ्गम् ~ व्यक्ताव्यक्तम्' इति।

~उन्मिषितवेद्यम् — **व्यक्तं लिङ्गं नरात्मकं भोगमात्रप्रदम्।**

द्र०:- 'लिङ्गम् ~ अव्यक्तम्' इति।

~उपासनक्रमत — **नरात्मके आत्मालिङ्गे विश्वमर्पयतः साधकस्य भेदाभेदमयविमर्शात्मके व्यक्ताव्यक्ते लिङ्गे स्थितिर्भवति, गलिते चेदमात्मके प्रमेयजाते अहमात्मकस्या व्यक्तलिङ्गस्योदयो भवति, तत्र तत्र च क्रमेण साधकः प्रतिष्ठितो भवति। यथा—**

"आत्माख्यं यद् व्यक्तं नरलिङ्गं तत्र विश्वमर्पयतः।
व्यक्ताव्यक्तं तस्माद् गलिते तस्मिँस्तव्यक्तम्।।"
(तं० आ०5, 118)

~गलित वेद्यम् — **अव्यक्तलिङ्गम्। परशिवात्मकं मोक्षमात्रप्रदम्।**

द्र०:- 'लिङ्गम् ~ अव्यक्तम्' इति।

~त्रिविधम् — **(1) अव्यक्तलिङ्गम्, (2) व्यक्ताव्यक्तम्, (3) व्यक्तं चेति। यथा—**

"त्रिविधं लिङ्गमुक्तम् - व्यक्तं व्यक्ताव्यक्तमव्यक्तं चेति।"
(तं० आ० वि० खं०3, पृ०423)

"एकस्य स्पन्दनस्येयं त्रिधा भेदव्यवस्थितिः।"
(मा० वि० वा०2, 65)

(2) उच्चारयोगाभ्यासे साक्षात्कार्यं नरशक्तिशिवात्मकं लिङ्गत्रयम्। लिङ्गत्वमस्य एतद्-जगतो लयोऽस्मिन् उदयश्चास्मादिति। यथा—

"एवमुच्चारविश्रान्तौ यत् परं स्पन्दनं, गलिताशेषवेद्यम्, यच्चोन्मिषद्वेद्यं यच्चोन्मिषितवेद्यं, तदेव लिङ्गत्रयम्।"
(तं० सा० पृ०40-41)

द्र०:- 'अव्यक्तलिङ्गम्, व्यक्ताव्यक्तलिङ्गम्, व्यक्तलिङ्गम्' **इति।**

~फलदान-दृष्ट्या — **अव्यक्तलिङ्गं-मोक्षैकफलं, व्यक्तं च भोगैकफलं, व्यक्ताव्यक्तं पुनर्भोगमोक्षोभयप्रदम्। यथा—**

"व्यक्तात् सिद्धिप्रसवो व्यक्ताव्यक्ताद् द्वयं विमोक्षश्च।
अव्यक्ताद् .....।।"
(तं० आ०5, 117)

~बलाबलदृष्ट्या — **अव्यक्तलिङ्ग, व्यक्ताव्यक्तस्य वीर्यं तच्च व्यक्तस्येति। यथा—**

"..... बलमाद्यम्
परस्य .....।"
(तं० आ०5, 117)

"बलमाद्यं परस्य' इति अव्यक्तं व्यक्ताव्यक्तस्यय, तद् व्यक्तस्य।"
(तं० आ० वि० खं०3, पृ०426)

~मूलतः — **अनुत्तरस्य परशिवतत्त्वस्यैव परः स्पन्दो लिङ्गत्रयात्मकतयावभासते। ततः पूजया तत्रैव विश्रान्तिः परमुपेयं साधकस्य। अवरयोर्लिङ्गयोः पर-विश्रान्तिस्थानत्वाभावात्। यथा—**

"एकस्य स्पन्दनस्यैषा त्रैधं भेदव्यवस्थितिः।"
(तं० आ०5, 120)

~लिङ्गत्वं (तस्य) — **यत्र विश्वं लीनं सद् यत्रान्तः स्थमेव गम्यते तल्लिङ्गम्। भैरवात्मकपरसंविदन्तर्लीनं सद्-विश्वं तत्रान्तःस्थमेव प्रकाशत इति परासंविल्लिङ्गम्। परं लिङ्गमिदं शिवप्रधानम्। यथा—**

"अत्र विश्वमिदं लीनं मत्रान्तस्थं च गम्यते।।
इदं तल्लक्षणं पूर्णशक्तिभैरवसंविदः।"
(तं० आ०5, 113-114)

~विश्रान्तिधामतः — **व्यक्तलिङ्गस्य व्यक्ताव्यक्ते, तस्य चावव्यक्तेलिङ्गे विश्रान्तिर्भवति। येन क्रमेण व्यक्तमप्यव्यक्ततामाश्रयति। परे तत्त्वे पुनरेवं विधारोहादिचर्चापि न काचित्। यथा—**

"तेनात्मलिङ्गमेतत्परमे शिवशक्त्यणुस्वभावमये।
अव्यक्ते विश्राम्यति नानुत्तरधामगा त्वियं चर्चा।।"
(तं० आ०5, 119)

~व्यक्तम् — **पराद्वैतात्मिका पराहान्ता यस्मिन् स्पन्दे गुणीकृता भवति, बहिर्मुखतया च प्रसरन् यः स्पन्दोऽसौ यत्र विशेषं विकासमुपयाति, असौ नरात्मकः विशेषस्पन्द एव हि व्यक्तं लिङ्गम्। इदं लिङ्गमुन्मिषितवेद्यं भवति। यथा—**

"..... यच्चोन्मिषितवेद्यम् .....
.....।"
(तं० सा० पृ०41)

"यन्न्यक्कृतशिवाहन्ता-समावेशं विभेदवत्।।
विशेषस्पन्दरूपं तद् व्यक्तं लिङ्गं चिदात्मकम्।"
(तं० आ०5, 116-17)

"व्यक्तलिङ्गं तदुक्तं तु यत् केवलनरात्मकम्।"
(मा० वि० वा०2, 65)

महानन्दानुभूतिभूमावस्याभिव्यक्तिः।

"देहाभेदमये बाह्ये विश्वस्मिन् भरिते सति।।
समुदेति महानन्दभूमौ लीनस्य योगिनः।"
(तदेव 67-68)

~व्यक्ताव्यक्तम् — **यच्च स्पन्दनमुन्मिषद्वेद्यं तदेव व्यक्ताव्यक्तलिङ्गम्। देहादावात्मताभिमाने सत्यपि यः पुनरपरिम्लानः परतत्त्वान्तः समावेशस्तदिदं व्यक्ताव्यक्तं लिङ्गम्, नरशक्त्यात्मकम्, इदमहमिति परामर्शसारं भुक्तिमुक्त्युभयफलप्रदम्। इदमुन्मिषद् वेद्यं लिङ्गम्। यथा—**

"यच्चोन्मिषद्वेद्यम् .....।"
(तं० सा० पृ०41)

"देहगाध्वसमुन्मेषे समावेशस्तु यः स्फुटः।।
अहन्ताच्छादितोन्मेषि-भावेदम्भावयुक् स च।
व्यक्ताव्यक्तमिदं लिङ्गं मन्त्रवीर्यं परापरम्।।
नरशक्तिसमुन्मेषि शिवरूपाद्विभेदितम्।
(तं० आ०5; 114-116)

"नरशक्तिमयमिदं तद् व्यक्ताव्यक्तं भवेल्लिङ्गम्।
सिद्धिफल-प्रसव-रस-प्रसूनमिति कथ्यते शास्त्रते।।"
(मा० वि० वा०2, 64)

"इदमहमिति प्रतीतिरूपः, इत्यर्थः। अत एवास्य विद्यादशावदहन्तेदन्तयोः सामानाधिकरण्याद् व्यक्ताव्यक्तत्वाम्।"
(तं० आ० वि० खं०3, पृ०424)

".....नरशक्तिभ्यां समुन्मेषणशीलं नरशक्तिरूपमिति यावत्।
एवमपि परापरं शक्तिप्रधानमित्यर्थः।"
(तदेव)

लिङ्गम्-2 ~ बाह्यपूजादौ — **मृच्छैलधातुरत्नादिमयं षोडशोपचारयागादि पूजार्थं निर्मितं पूजालम्बनं, लिङ्गाकारं वा, मूर्तिमयं वा, वस्त्र-पात्र-ध्वजादौ वा वर्णैः समुल्लिखित-चित्रात्मकं, वाऽनेकप्रकारकं यच्छिवत्वेन पूज्यं भवति बाह्यपूजाविधौ। यथा—**

सूत्रे पात्रे ध्वजे वस्त्रे स्वयम्भूबाणपूजिते।
नदीप्रस्रवणोत्थे च .....।।"
(तं० आ०27, 18)

~अकल्पितम् — **नदी प्रस्रवणादौ स्वयमेव लिङ्गाकारतामापन्नं प्रस्तरशकलादि। तच्च कल्पितादधिकं माहात्म्यशालि। यथा—**

"सर्वेष्वव्यक्तलिङ्गेषु प्रधानं स्यादकल्पितम्।
.....
नदी प्रस्रवणोत्थे च नाह्वानं नापि कल्पना।।
पीठप्रसारमन्त्रांश-वेलादिनियमो न च।"
(तं० आ०27, 17-19)

~अव्यक्तम् — **न मानवाकारमूर्तिचित्रादिरूपम्। अपितु लिङ्गस्थण्डिलयन्त्रादिरूपं शिवशक्त्यो रहस्यपूजालम्बनम्। विशेषतो बाणलिङ्गम्।**

द्र०:- **'बाह्यपूजादौ'** इति।

~उत्कर्षभेदतः — **बाह्यं पूजालम्बनं स्थूलं व्यक्तलिङ्गम्। तच्च बहुविधं गुरुदेहादारभ्य मुकुरं यावदपकर्षक्रमेणपरिगणितं। तन्त्रसारे। यथा—**

"तत्र गुरुदेहं, स्वदेहं, शक्तिदेहं, रहस्यशास्त्रपुस्तकं, वीरपात्रं, अक्षसूत्र, प्राहरणम् (आयुधं त्रिशूलादि) बीणीयं (नर्मदेश्वरलिङ्गम्), मौक्तिकम्, सौवर्णं, पुष्पगन्धद्रव्यादिहृद्यवस्तुकृतं, मकुरं वा लिङ्गमर्चयेत्। तत्रं चाधारबलादेव अधिकाधिक-मन्त्रसिद्धिर्भवति, इति पूर्वं पूर्वं प्रधानम्। .....
...। सर्वत्र परमेश्वराभेदभिमान एव पराः संस्कारः।"
(तं० सा० पृ०182)

~कल्पितम् — **कारुभर्घटितं श्लक्ष्णीकृतं च प्रस्तरादिमयं स्वर्ण रजतादिमयं वा।**

~(तूरे) :— **उत्कीर्णदेवतायन्त्रमण्डलचित्रादिरूपं पात्रमत्रतूरम्। तत्र विहिता शिवपूजा-विशेषफलदा प्रोक्ता पिचुतन्त्रे।**

यथा—

"पङ्क्तिचक्रकशूलाब्जविधिना तूरमाश्रयेत्।
तल्लक्षणं ब्रुवे श्रीमत् पिचुशास्त्रे निरूपितम्।।
तूरे योगः सदा शस्तः सिद्धिदो दोषवर्जिते।"
(तं० आ०27, 21-22)

"श्लक्ष्णया वज्रसूच्यात्र स्फुटं देवीगुणान्वितम्।।।
सर्वं समालिखेत् पूज्यं सर्ववयवसुन्दरम्।"
(तदेव27, 27-28)

~द्विविधम् — **स्थिरं चलं चेति। स्थिरं क्वापि शिवायतने स्थिरतया प्रतिष्ठापितम्। चलं च पूजकेन यत्र तत्राह्निकपूजार्थं मेयम्। तत्र लिङ्गे शिवप्रतिष्ठा गुरुणा विधीयते। तावत्कालमेव शिवस्य तत्र सन्निधिर्यावत्कालमसौ शिष्यो जीवेत्, अथवा केवलमभीष्टफलप्राप्त्यन्तमेव। यथा—**

"गुरुश्चात्र निरोधाख्ये काल इत्थं विभौ वदेत्।
जीवत्यस्मिन् फलान्तं त्वं तिष्ठेर्जीवावधीति वा।।"

(तं० आ०27, 11)

~प्रतिष्ठादिदृष्ट्या — **"अथ लिङ्गे तत्र न रहस्यमन्त्रैर्लिङ्गं प्रतिष्ठापयेद् विशेषाद् व्यक्तम्। इति पूर्वप्रतिष्ठापितेष्वावाहनविसर्जनक्रमेण पूजां कुर्यादाधारतया।"**

(तं० सा० पृ०181-82)

~(बहुभेदम्) — **पाषाणरत्नस्वर्णादिजमनेकविधं लिङ्गचक्रादिरूपमालम्बनं बहुप्रकारकं भवति। तेषूत्तरोत्तरापकर्षक्रमेणोक्तं तद्यथा—**

"लिङ्गं च वाणलिङ्गं वा रत्नजं वाऽथ मौक्तिकम्।
पौष्पमान्नमथो वास्त्रं गन्धद्रव्यकृतं च वा।।
न तु पाषाणजं लिङ्गं शिल्प्युत्थं परिकल्पयेत्।
धातूत्थं च सुवर्णोत्थ-वर्जमन्यद् विवर्जयेत्।।

(तं० आ०27, 12-13)

~व्यक्तम् — **स्फुटमूर्त्त्यात्मकानि, वा पात्रादावुत्कीर्णानि वा, शिवभैरवशक्तिप्रभृति चित्राणि, स्पष्टतत्तच्छरीरावयवानि, विशेषतो यागमण्डलादौ पूज्यानि शिवशक्तिपूजालम्बनानि। यथा—**

"आतन्मयत्वसंसिद्धेराचाभीष्टफलोदयात्।
पुत्रकः साधको व्यक्तमव्यक्तं वा समाश्रयेत्।।"

(तं० आ०27, 9)

"प्रतिमा चात्र पुत्रकादिभिः किं स्वयमेव कार्या न वा।"

(तं० आ० वि० खं०11, पृ०360)

व्यक्तं वा चित्रपुस्तादौ देवदारुसुवर्णजम्।
अथ दीक्षितसच्छिल्पिकृतं स्थापयते गुरुः।।"

(तं० आ०27, 19-20)

~सर्वश्रेष्ठम् —

"सर्वेष्वव्यक्तलिङ्गेषु प्रधानं स्यादकल्पितम्।"

(तं० आ०27, 17)

अव्यक्तं च नार्मदं नार्मदं वा गङ्गादिनदीप्रस्रवणोद्भूतं वा।

लिङ्गम्- 3~ सम्प्रदायचिह्नम् — **विशेष सम्प्रदायसम्बन्धिसाधकत्वचिह्नम्। तच्च दण्डधारणकाषायवस्त्रपरिधानादि, यन्त्रेण वा प्रणवध्वजच्छत्रचक्रा- दिमुद्राकीलनं स्वाङ्गेषु। एतेन साधका लिङ्गिन इत्युच्यन्ते। तेषामपिकृते लिङ्गोद्धारदीक्षा त्रिकाचारे प्रयुज्यते।**

~तद्धारणनिषेधः — **समयिना व्यक्तं न किमपि चिह्नं धारणीयम्। यथा—**

"तिष्ठेदव्यक्तलिङ्गश्च न लिङ्गं धारयेत् क्वचित्।
न लिङ्गिभिः समं कैश्चित्कुर्यादाचारमेलनम्।"

(तं० आ०15, 591-92)

लिङ्गिनः — बौद्धार्हतवेदान्तिप्रभृतयः भिक्षवः सन्न्यासिनो वैरागिप्रभृतयो वैष्णवाद्याश्च सर्वेऽपि तत्तलिङ्गधारिण उपासकाः लिङ्गिनः।

लिङ्गीः — साधकत्वस्य दीक्षितत्वस्य च प्रकटीकरणक्षमं बाह्यं वेषभूषात्रिपुण्ड्रादिरूपं चिह्नं यो धारयति स लिङ्गीत्युच्यते।

लिङ्गोद्धारः — (1) अधरशास्त्रवासनामलशोधकं कर्म समर्थेन पूर्णज्ञानवता त्रिकगुरुणा विधेयं, शिष्यस्य सत्संस्कार प्ररूढियोग्यताविकासार्थम्। अनेन कर्मणाऽ-धरशास्त्रदीक्षासंस्काराः प्रमार्ज्यन्ते शिष्यस्य। तस्मिन् सत्येवोत्तरशास्त्रदीक्षा सफलतां याति।

(2) ये तावद्वैष्णवबौद्धजैनादिदाक्षिणान्तेषु शास्त्रेषु दीक्षिताः सन्तः साधकास्ते नैवाद्वैतशैवशास्त्रेऽधिकारिणः। चेत्तेषां मध्ये कश्चन शिवानुग्रहेण शैवसाधनापात्रतामियादेव, तर्हि तस्य पूर्वं लिङ्गोद्धारनामकः संस्कारो विधीयते, तदनन्तरमेव तस्मै शैवी दीक्षा दीयते, न ततः प्राक्। यः शैवमार्गे दीक्षितोऽपि वैष्णवादिगुरुसेवापरः सञ्जायेत कदाचिद्, असावपि शैवमार्गे पुनर्गतये लिङ्गोद्धारसंस्कारमर्हति स एव संस्कारोऽधरशास्त्रगुरुसेवाकृतमलप्रक्षालकस्तत्तच्छास्त्रश्रद्धात्मको मलापहारी च भवति। यथा—

"वैष्णवादि-दक्षिणतन्त्रान्तेषु शासनेषु ये स्थिताः, तद्गृहीतव्रत वा, ये च उत्तमशासनस्था अपि अनधिकृताधरशासनगुरूसेविन ते यदा शक्तिपातेन पारमेश्वरेण उन्मुखीक्रियते तदा तेषामयं लिङ्गोद्धाराख्यो विधिः।"

(तं० सा० पृ०170

"अथ वैष्णवबौद्धादितन्त्रान्ताधरवर्तिनाम्।।
यदा शिवार्करश्म्योघैर्विकासि हृदयाम्बुजम्।
लिङ्गोद्धृतिस्तदा पूर्वं दीक्षा कर्म ततः परम्।।"

(तं० आ०22, 12-13

~अज्ञशैवदीक्षितस्य — **अज्ञेन गुरुणाऽद्वैतशैवेऽपि कृतदीक्षः शिष्यो गुर्वन्तरेण क्रियमाणं लिङ्गोद्धारं दीक्षणं चापेक्षते। यतो ज्ञानवतः एव गुरोर्मन्त्राः सवीर्या भवन्तः सफला भवन्ति शिष्य संस्कारकरणे नाज्ञस्य। यथा—**

"स्वतन्त्रस्थोऽपि गुर्वन्तो गुरुमज्ञमुपाश्रितः।
तत्र पश्चादनाश्वस्तस्तत्रापि विधिमाचरेत्।।
अज्ञाचार्यमुखायातं निर्वीर्यं मन्त्रमेष यत्।
जप्तवान् स गुरुश्चात्र नाधिकार्युक्तदूषणात्।।
ततोऽस्य शुद्धिं प्राक् कृत्वा ततो दीक्षां समाचरेत्।"

(तं० आ०22, 33-35)

'गुर्वन्तो' इति पदस्य सङ्गतिरत्र विचार्या सुधीभिः।

~अवरपदयोजितस्य — **न केवलमन्यशास्त्रदीक्षित एव शिष्यो लिङ्गोद्धारार्हो यावत् त्रिकशास्त्रसेवापरोऽपि गुरुणा क्वाप्यवरे तत्त्वे योजनिकया नियोजितः सन् लिङ्गोद्धारसंस्कारमर्हति। कृत एव लिङ्गोद्धारे ऊर्ध्वे तत्त्वे नियोजिकाया दीक्षायाः पात्रतामुपैति नान्यथा। यथा—**

"..... शिवतत्त्वाधरेष्वपि।।
तत्त्वेषु योजितास्यास्ति पुनरुद्धरणीयता।"
(तं० आ०22, 7-8)

~आर्हतादीनाम् — **चेत् कदाचित् कोऽपि वैष्णवादिरपि सत्यं शिवभक्तस्तर्हि शैवोगुरुस्तस्य लिङ्गोद्धारानुष्ठानं विधायैवदीक्षां करोतीति नियमः।**

द्र०:- 'लिङ्गोद्धारः ~ तन्नयाय्यत्वम्' इति।

~इतरतन्त्रगुरूणाम् — **वामदक्षिणकुलमतादितन्त्रदीक्षिता गुरवोऽपि त्रिकदीक्षायां करिष्यमाणायां लिङ्गोद्धारानुष्ठानमपेक्षन्ते। यथा—**

"गुर्वन्तरस्याप्यधोदृष्टिशायिनः संस्क्रियामिमाम्।।
कृत्वा रहस्यं कथयेन्नान्यथा कामिके किल।"
(तं० आ०22, 31-32)

~तत्फलम् — **यथा—**

"प्राग् लिङ्गान्तरसंस्थोऽपि दीक्षातः शिवतां व्रजेत्।"
(तं० आ०22, 14)

दीक्षातः इति लिङ्गोद्धारपूर्वकं प्राप्ताद्वैतशिवशास्त्रदीक्षाः। अद्वैतशैवदर्शनीया त्रिकाख्या या साधना- पद्धतिस्तद्दीक्षयासर्वोऽपि जनः पर्यन्ते शिवभावमासाद्य मुक्तो भवतीति वेद्यम्।

~तदनुज्ञानम् — **लिङ्गोद्धारार्थं प्रार्थितेन परमेश्वरेण दीयमानाया अनुज्ञाया भावनामयः कल्पनात्मको विधिः। यथा—**

"एवमस्त्वित्यथानुज्ञां च गृहीत्वा .....।"
(तं० आ०22, 17)

~तन्न्याय्यत्वम् — **वैष्णवादिदीक्षाभाजोऽपि लिङ्गिनश्चेच्छिवभक्तिसमन्विता जायेरन्, तदैतेषां प्राग्लिङ्गारदुद्धरणीयता न्याय्या। शिवानुग्रहेण विना न शिवे भक्तिस्ततोऽनुगृहीतास्ते शैवमार्गे दीक्षणीयाः। न च प्राग्लिङ्गोद्धारं विना शिवदीक्षा कार्योति तदर्थं लिङ्गोसमारोदितमलशोधेन विधेरावश्यकत्वम्, इति न्याय्या लिङ्गोद्धृतिस्तत्कृते। यथा—**

"..... दर्शनान्तरसंस्थितेः।।
प्रोक्तमुद्धरणीयत्वं शिवशक्तीरितस्य हि।"
(तं० आ०22, 11-12)

स्वातन्त्र्यात्तु महेशस्य तेऽपि चेच्छिवतोन्मुखाः।
द्विगुणा संस्क्रियास्त्येषां लिङ्गोद्धृत्याथ दीक्षया।।
दुष्टाधिवासविगमे पुष्पैः कुम्भोऽधिवास्यते।
द्विगुणोऽस्य स संस्कारो नेत्थं शुद्धे घटे विधिः।।
(तं० आ०13, 283)

घटे प्रथमं दुर्वासनायाः शोधनं तदनन्तरमेव पुष्पैरधिवासनं सफलं भवति। तथैव लिङ्गोद्धारेणाधरदर्शनवासनयारोपितस्य मलस्यापनयनं, ततो दीक्षया संस्करणम्।

~पातकच्युतौ — **प्राग् गृहीतस्य व्रतस्य त्यागे यत् पातकं तस्मान्मोक्षो विशेषक्रियाविधिना। यथा—**

"पूजितेनैव मन्त्रेण कृत्वा नामास्य संपुटम्।
प्रायश्चित्तं शोधयामि फट् स्वाहेत्यूहयोगतः।।
इत्यारभ्य .....
.....
.....
..... क्षमस्वेति विसर्जनम्।।"
इत्यन्तम्।
(तं० आ०22, 23तः 27)

लिङ्गोद्धारसजातीयमिदं कर्म।

~शङ्काच्छेदतः — **लिङ्गोद्धारादाववरगुरुत्यागपूर्वमुत्कृष्टगुरुसेवनविषये नैवकाऽपि शङ्का कार्या। उत्कृष्टसाधनाबलादेव तथा नैर्मल्यं जायते संविदो यथा नैव गुरुत्यागकृता शङ्का समुदेति। न चाऽपि गुरुभूयस्त्वे साधकः कथमपि शङ्केत। एष शङ्काच्छेद आवश्यकस्तस्य लिङ्गोद्धारणोद्धरणीयस्य शिष्यस्य कृते। यथा—**

"न तिरोभाव शङ्कात्र कर्तव्या बुद्धिशलिना।।
इत्यारभ्य .....
.....
तमेवाराधयेद्धीमांस्तत्तज्जिज्ञासनोन्मुखः।"
(तं० आ०22, 39-48)

~शोधनेन — **शिष्यस्य लिङ्गोद्धृत्यै परमेश्वरादनुज्ञामवाप्य गुरुर्विधिविशेषमाचरेद् येन प्राग् लिङ्गी शिष्यस्तल्लिङ्गकृतान्मालिन्याच्छुद्धो भवन् शिवयोग- दीक्षापात्रतां लभेतेति। यथा—**

"एवमस्त्वित्यथाज्ञां ते गृहीत्वा व्रतमस्य तत्।।
अपास्याम्भसि निक्षिप्य स्नपयेदनुरूपतः।
इत्यारम्य .....
.....
.....
.....
..... व्रतशुद्धिं समाचारेत्।"
इत्यन्तम्।
(तं० आ०22, 17 तः22)

~श्रावणविधिना — **लिङ्गोद्धारविधौ परमेश्वरः शिष्येऽनुग्रहार्थं यदा प्रार्थ्यते तदाऽसौ प्रार्थनावाक्यं श्राव्यते। एषैव तत्र श्रावणविधिः। यथा—**

"तत्रोपवास्य तं चान्यदिने साधारमन्त्रतः।।

स्थण्डिले पूजयित्वेशं श्रावयेत्तस्य वर्तनीम्।
एष प्रागभवल्लिङ्गी चोदितस्त्वधुना त्वया।।
प्रसन्नेन तदेतस्मै कुरु सम्यगनुग्रहम्।
स्वलिङ्गत्यागशङ्कोत्थं प्रायश्चित्तं च मास्य भूत्।।
अचिरात्त्वन्मयीभूय भोगं मोक्षं प्रपद्यताम्।"
(तं० आ०22, 14-17)

~सीमितफलदः — कृतलिङ्गोद्धाराणां मोक्षदीक्षैव विधीयते नाधिकारलाभदीक्षा, न च ते आचार्यपदं वा साधकपदं वारोप्यन्ते गुरुणा, केवलं बन्धनान्मोच्यन्ते। ततो न ते परदीक्षणे साधिकारा इति। यथा—

"प्राग्लिङ्गिनां मोक्षदीक्षा साधिकारविवर्जिता।।
साधकाचार्यतामाप्तै न योग्यास्ते पुनर्भुवः।"
(तं० आ०22, 28,29)

पुनर्भुवः इति पूर्वं शास्त्रान्तरदीक्षिताः सन्तोऽनन्तरं लिङ्गोद्धारपूर्वकं प्राप्तत्रिकाचारदीक्षाः।

द्र०:- 'पुनर्भूः' इति।

लीलासिद्धान्तः — परमेश्वरो नटवदेवानन्तानन्त-सृष्टि-संहार- प्रपञ्चान् प्रकटयति स्वेच्छम्। शिवयोग्यपि स्वात्मानं नटवद् विश्वाभिनयमाचरन्तं साक्षात्कुरुते। यथा—

"तत्तज्जागरादिनानाभूमिकाप्रपञ्चं स्वपरिस्पन्दलीलयैव स्वभित्तौ प्रकटयति, इति नर्तक आत्मा।"
(शि० सू० वृ०3,9)

लेलिहाना ~ मुद्रा — सर्वभोक्तृत्वं व्यञ्जयन्ती भावनया सर्वं ग्रसमानेव मुद्रा शाक्तसिद्धानाम्। यथा—

"अखिलास्वादचमत्कार-स्फुरणाभ्यामपि त्यागग्रहविग्रहा लेलिहाना।"
(भा० वि० पृ०31-2)

"लेलिहानया-भोक्तुमेकाग्रया .....।"
(वि० भै० उ० पृ०66)

"पूर्णत्वेन या सर्वं पुनः पुनरास्वदते सा लेलिहाना इति शाक्तसिद्धानां मुद्रा।"
(तदेव, पृ०67)

"वासनात्मकपुर्यष्टकविलापनाल्लेलिहाना।"
(तदेव, पृ०67)

"पुर्यष्टकादिवासना-सर्वस्वग्रास-लालसा लेलिहाना।"
(म० मं० प० पृ०91)

"अखिलास्वादचमत्कार-स्फुरणाभ्यामपि त्यागग्रहविग्रहा लेलिहाना।"
(भा० वि० पृ०31-32)

लोकत्रयलयः — ब्राह्मदिनान्ते कालाग्निज्वालाभिर्भूर्भुवः स्वर्लोकाः सपाताला भस्मसाद् भवन्ति। अन्यल्लोकत्रयं धूमप्रस्वापितप्राणिवर्गं तिष्ठति। यथा—

"ब्रह्माहोऽन्ते कालवह्नेर्ज्वालायोजनलक्षिणी।
दग्ध्वा लोकत्रयं धूमात् त्वन्यत् प्रस्वापयेत् त्रयम्।।"
(तं० आ०6, 140-141)

"लोकत्रयमिति-निरयेभ्यः प्रभृति भूर्भुवः स्वः पर्यन्तमित्यर्थः।"
(तं० आ० वि० खं०4/1, पृ०122)

द्र० (तं० सा० पृ०54)

लोकधर्मः — वर्णाश्रमादिधर्मः। श्रुतिस्मृत्यनुसारं लोके प्रवर्तमानः साधारणानां जनानां धर्मः। लोक धर्ममाचरन्नेव साधकः शिवधर्मपालनेन भुक्तिमुक्तिलाभं प्रत्यग्रेसरो भवति। लोकधर्मस्तेन लोकसंग्रहार्थं पालनीय एव भवति न परित्याज्यः। यथा—

"ये तु वर्णाश्रमाचाराः प्रायश्चित्ताश्च लौकिकाः।
सम्बन्धान् देशधर्मांश्च प्रसिद्धान्न विचालयेत्।।
गर्भाधानादितः कृत्वा यावदुद्वाहमेव च।
तावत्तु वैदिकं कर्म पश्चाच्छैवे ह्यनन्यभाक्।
न मुख्यवृत्त्या वै स्कन्दलोकधर्मान् समाचरेत्।"
(उद्ध० तं० आ० वि० खं०3, पृ० 277-78)

लोकधर्मिणी ~ दीक्षा — रहस्य-मन्त्रप्रयोग हीनाऽसौ दीक्षा यया गुरुः शिष्यस्याशुभान्येव कर्माणि शोधयेन्न शुभानि। इयं बुभुक्षवे लोकधर्मानुसारिणे साधकाय हिता भवति।

"अधर्मरूपिणामेव न शुभानां तु शोधनम्।
लोकधर्मिण्यसौ दीक्षा मन्त्राराधनवर्जिता।"
(तं० आ०15, 29)

"प्राक्तनागमिमकस्यापि अधर्मक्षयकारिणी।
लोकधर्मिण्यसौ ज्ञेया मन्त्राराधनवर्जिता।"
(स्व० तं०, 4/1, 43-4)

मन्त्रा अत्र रहस्यमन्त्रा एव तन्त्रालोकादौ सूचिताः (त्रिंश आह्निके)।

लोकधर्मी — श्रुतिस्मृत्यादिमार्गानुसारी बुभुक्षुः साधको यः स्वर्गादिभोगानन्तरं क्रमेण मोक्षलाभोत्सुको भवति। यथा—

"तत्र दीक्षा लोकधर्मिणः साधकस्य भोगे निर्बीजस्य च पुत्रकस्य मोक्षे स्वयमुपायः।"
(तं० आ० वि० खं०9, पृ०2)

द्र०:- 'साधकः ~ (द्विविधः)' इति।

"लोकधर्मी फलाकांक्षी शुभस्थश्चाशुभोज्झितः।"
(तं० आ०15, 24)

"द्वितीयो लोकमार्गस्थ इष्टापूर्त्तविधौ रतः।
कर्मकृत् फलमाकाङ्क्षञ्शुभैकस्थोऽशुभोज्झितः।।
तस्य कार्यं सदा मन्त्रैरशुभांशविनाशनम्।"
(स्व० तं० प०4, 85-86)
(उद्ध० तं० आ० वि० खं०9, पृ०17)

"तत्र बुभुक्षुः साधकः। स च द्विविधः। शिवधर्मी लोकधर्मी च।"
(तं० आ० वि० खं०9, पृ०16)

द्र० (स्व० तं० प० 4, 83 तः 90)

लोकपालमन्त्राः — **अष्टौ मन्त्रा येषामागमिकानि नामान्युक्तान्युद्धृते वाक्ये। न च ते मन्त्रा जयरथेन विवेकाख्ये तन्त्रालोकभाष्ये स्पष्टीकृताः केवलं नामभिर्निर्दिष्टोः यथा—**

"पूतना शूलदण्डस्तु कपालं नाभिरेव च।
शिखिनी वायुवेगा च परमा च नितम्बकः।।
विज्ञेयाश्च महादेवि दीर्घयुक्ताः सबिन्दुकाः।
मन्त्रास्तु लोकपालानां तदस्त्रा दीर्घवर्जिताः।।"

(तं० आ० वि० खं०12, पृ०201)

अन्यत्र - शूलम् = 'औ' वा 'ज' वा इति

(तं० आ० वि० खं०12, पृ०203-212)

नाभिः = 'क्ष' इति

(तं० आ० वि० खं०12, पृ०202)

नितम्बः = 'म' इति

(तं० आ० वि० खं०12, पृ०212)

~अस्त्राणि — **लोकपालमन्त्रा एव दीर्घस्वररहितास्तेषामस्त्राण्यष्टौ।**

लोकसंग्रहः — **लोकोपकारबुद्ध्या क्रियमाणो व्यवहारः। अत्यावश्यको हि लोकसंग्रहः। तत एव ज्ञानिनापि लोकमर्यादा नावहेलनीयाऽऽचरितव्यञ्च तदनुसारं सदा यथा शास्त्रमेव।**

~आवश्यकः — **दृष्टतत्त्वा मुनयोऽपि लोकसंग्रहार्थं शुद्ध्यशुद्धिविचारं कुर्युरिति काश्मीरशैवदर्शनस्य नीतिः। रहस्यसाधना च लोकसंग्रहार्थं गोप्यैव, मूढा लोका मानुकुर्युरिति। यथा—**

"लोकसंरक्षणार्थं तत्तत्त्वं तैः प्रगोपितम्।"

(तं० आ०4, 244)

~तन्नीतिः — **कौलाद्याचारपरिपालनपरेणापि साधकेन-वैदिको लोकाचारो न परित्याज्यः। यथा—**

"अत एव - अन्तः कौलो बहिः शैवो लोकाचारे तु वैदिकः।
सारमादाय तिष्ठेत नारिकेलफलं यथा।।
इत्याद्यन्यत्रोक्तम्।"

(तं० आ० वि० खं०3, पृ०278)

'तिष्ठेत' इति तान्त्रिकोऽयं प्रयोगः, ऐन्द्रचान्द्रादिव्याकरणानुसारी वा।

लोकाचारः — **श्रुतिस्मृतिपरम्परानुसारी आचारः।**

~पालनीयः — **ज्ञानिनापि शास्त्रविहितस्याचारस्य पालनं लोकमर्यादारक्षणाय कर्त्तव्यमेव।**

यथा—

"(चरुभोजनस्य) मार्जारमूषकश्वादिभक्षणे तु शङ्का जनिता निरयायेति ज्ञान्यपि लोकानुग्रहेच्छया न तादृक् कुर्यात्। लोकं वा परित्यज्य आसीत्।"

(तं० सा० पृ० 181)

लोकानन्दः — **व्याख्यातो**

यथा—

(१) "लोके प्रमाणप्रमेयात्कमे प्रपञ्चे तस्य च प्रपञ्चस्यासंख्यप्रकारे व्यवहारे जाते चलति सति यः प्रमात्रैकपदे विश्रान्त्याभिव्यज्यते आनन्दः स एव लोकानन्दः।

(शि० सू० विवृ०1, 19)

(२) लोकयति प्रकाशयतीति लोकश्चित्प्रकाशः। स च चित्प्रकाश एवानन्दः। आनन्दस्य चितः स्वभावभूतत्वात्।"

(शि० सू० विवृ० 1, 19)

लोटकः — **श्रीमन्महामाहेश्वराचार्यवर्यस्याभिनवगुप्तस्य कोऽपि बान्धवः शिष्यो गीतार्थसंग्रहाख्यटीकाया निर्माणाय प्रेरकः।**

यथा—

तच्चरणकमलमधुपो भगवद्गीतार्थसंग्रहं व्यदधात्।
अभिनवगुप्तः स द्विज - लोटककृतचोदनावशतः।।"

(गीतार्थ सं० पृ०186)

कृत्यमिदं बान्धवार्थं हि।

(तदेव पृ०186)

लोलिका — **(1) पूर्णत्वस्य तिरोधानमपूर्णता, तस्याश्च स्वतो भिन्नेन वस्तुना पूरणं प्रति या जीवस्य स्पृहात्मिका चञ्चलता सैव लोलिका, एषा लोलिकैव हि मलः। यथा—**

"तिरोधिः पूर्णरूपस्यापूर्णत्वं तच्च पूरणम्।।
प्रतिभिन्नेन भावेन स्पृहातो लोलिका मलः।"

(तं० आ०13, 1 11-12)

"..... अभिलाषो मलोऽत्र तु।"

(स्व० तं० प०4, 105)

(उद्ध० तं० आ० वि० खं०8, पृ०75)

"तत्र लोलिकाऽपूर्णम्मन्यतारूपः परिस्पन्दः अकर्मकमभिलाषमात्रमेव भविष्यदवच्छेदयोग्यता।"

(तं० सा० पृ०75)

(2) अभिलषणीयानुसन्धानरहितमभिलाषमात्रमणोः।

यथा—

"अणूनां लोलिकानाम निष्कर्मा याभिलाषिता।
अपूर्णम्मन्यताज्ञानं मलं सावच्छिदोज्झिता।।"

(तं० आ०9, 62)

"न चैतद्वस्तु किञ्चिदपितु पूर्णस्वरूपस्याख्यातिमात्रम्।"

(तं० आ० वि० खं०6, पृ०58)

"इश्वरेच्छा-वशादस्य भोगेच्छा संप्रजायते।
भोगसाधनसंसिद्धयै भोगेच्छोरस्य मन्त्रराट्।।
जगदुत्पादयामास मायामाविश्य शक्तिभिः।"

(उद्ध० तं० आ० वि० खं०6, पृ०56)

"मलोऽभिलाषश्चाज्ञानमविद्या लोलिकाऽप्रथा।।"

(पू० प्र० प्र० वि० श्लो 446)

व

व — (1) आप्यायकं वारुणं बीजम्। वारिबीजम् यथा—

"सृष्टिसारप्रवर्षकम्' इत्यनेनास्य वरुणबीजत्वादाप्यायकारित्वं दर्शितम्।"

(तं० आ० वि०, खं०2, पृ०, 157)

"वारुणेन वकारेण"।

(ने० तं०, उ० खं० 2, पृ०, 67)

(2) अमृतबीजम्। यथा—

"स्वा इत्यमृतवर्णेन .....।"

(तं० आ०15, 440)

"अमृतवर्णेनेति सवयोराप्यायकारित्वात्।"

(तं० आ० वि०, खं०9, पृ०, 223)

~मातृकाक्रमे :— शाम्भवोपाये मातृकाक्रमेणावधानविषयतां नीतोऽयं वर्णः स्वात्मनः शक्तिविशेषं स्वात्मन एव चित्प्रकाशे स्वेच्छाविलासतो बहिर्मुखतया प्रतिबिम्बितं सन्तं तत्र च मायातत्त्वरूपतयाऽवभासमानं साक्षात्कारयति। स्वात्मा च तत्प्रतिबिम्बखचितसुन्दरः सानन्दसन्दोहं साक्षात् शिवरूपतया दृश्यते साधकेनेति।

~वर्णः — इन्द्राख्यो मातृकावर्णः। यथा—

"वाय्वग्निसलिलेन्द्राणां धारणानां चतुष्टयम्।"

(पं० त्र०., 7)

"वाय्वादि शब्दवाच्याः यादयो वकारान्ता।"

(पं० त्री० वि०, पृ०, 113)

वकारः —

द्र०:- 'षट्त्रिंशत्तत्त्वदीक्षा' इति।

पददीक्षा' इति।

'विद्याराजः' — 'तद्वर्णा':- **इति च।**

वज्रमूः — रहस्यचर्याक्रमे पौस्नमानन्देन्द्रियम्। यथा—

"अथ च चर्याक्रमेणैतयोर्वज्रपद्मादिशब्दव्यपदेश्ययोर्लिङ्गयोः 'समापत्त्या' सम्भोगेन विसर्गरूपा येयमानन्दधारा ....।"

(तं० आ० वि०, खं०3, पृ०, 433)

वज्रमुद्रा :— हस्तमुद्राविशेषः। गुरूपदेशत एव सम्यग् वेद्येयम्। यथा—

"वामहस्तमधः कृत्वा उत्तानं तु समाहितः।।
दक्षं चाधोमुखं कृत्वा त्वङ्गुष्ठं च कनिष्ठिकाम्।
उभयोरपि सङ्घृष्य वज्रमुद्रां प्रदर्शयेत।।"

(स्व० तं०, प०14, 14-15)

"वीर्यं च तत्रैव **(श्रीभैरवानुकरणस्तोत्रे)** दर्शितम्:-
"इच्छादिकनिजशक्तिप्रकाशिताधःस्थगोचरत्रितयाम्।
स्वामेव परां शक्तिं वज्रमयीं वहसि षडरां त्वम्।।"

(स्व० तं, प०14, पृ०,117) इति।

वज्राख्या : — ~ नाडीः — मध्यनाडी।

"वज्राख्यां मध्यनाडीम्।"

(तं० आ० वि०, खं०12, पृ०, 321)

वरदराजः — क्षेमराजकृतविमर्शिन्यनुसारिणः शिवसूत्रवार्त्तिकस्य निर्माता। अस्य नाम कृष्णदास इति। दीक्षा नाम च वरदराज इति। मधुराजोऽस्य पिता। तस्यापि मधुराज इति दीक्षा नाम एव प्रतिभाति। गम्भीरराजादिसिद्धपरम्परासम्बन्धिन एते महानुभावाः प्रतिभान्ति। क्षेमराजकृतविमर्शिनीमेवानुसरतः क्षेमराजशिष्यत्वमस्य केचनानुमिन्वन्ति। परमेतद्विषये स्वयमनेन न किमपि लिखितम्। अस्य पित्रा मधुराजेन गुरुनाथपरामर्शे लिखितं यदसौ कतिपयवर्षाण्यभिनवगुप्तस्याश्रममध्युवास इति। तं चाचार्यं गुरुनाथ इति कथयति। एतौ दक्षिणदेशीयावाचार्यौ सम्भवतो मधुरायीपुरवास्तव्यौ। साधनाक्रम एतयोः केरलीयतन्त्रक्रम इति प्रतिभाति। "माधुरः" इति कथनान्मधुरायी वास्तव्यत्वं तमिलदेशीयत्वं च मधुराजस्य प्रतिभाति। मधुराजो कन्थाधारीपरिव्राजकः सन् कश्मीरानागच्छदिति तेन स्वयं कथितं गुरुनाथ परामर्शे। राजशब्दस्यापभ्रंशं एव राय शब्दः। एवं प्रतीयते यदग्रे भास्कररायोऽप्यस्यामेव परम्परायामाविर्भूतो भवेदिति। दक्षिणदेशे वरदराजस्यैव शिवसूत्रवार्त्तिकं ख्यातिमगान्न भट्टभास्करस्य। ततो योगिनीहृदयदीपिकादावस्यैव पङ्क्तीनामुद्धरणं कृतं लभ्यते।

उक्तं स्वविषये यथा—

"श्री क्षेमराजनिर्णीतव्याख्यानाध्वानुसारिणा।।
कृतिना कृष्णदासेन व्यञ्जितं कृपयाञ्जसा।"

(व० रा० वा०, पृ०, 45)

"मधुराजकुमाराणां महाहन्ताधिरोहिणाम्।
पश्चिमेन तदालोकध्वस्तपश्चिमजन्मना।।"

(व० रा० वा०, पृ०, 45)

एतत्पद्यमादाय वर्तमानकालिकाः शोधकारिणो विद्वांसं एवं निर्दिशन्ति यन्मधुराजस्य सुताः सर्वेऽप्यत्यन्तगर्व शीला अभूवन्निति, परं नैतत्साधु। अत्र महाहन्ताधिरोहिणामित्यस्य समस्तपदस्यायमेवाभिप्रायो यत्ते जीवोचितात् क्षुद्रादहङ्कारादुत्तरणपराः "अहमेवेदं सर्वमिति" एवम्प्रायस्य सदाशिवोचितस्य महाभिमानस्यपदवीमारुक्षवो जीवन्मुक्तिपदगामिन इति। एतदेव व्याख्यानं प्राक्तनेन पद्येन संगच्छते। यथा—

"अखण्डसंवित्साम्राज्ययौवराज्याधिकारिणाम्।
पराक्रमहठाक्रान्तषट्त्रिंशत्तत्त्वसम्पदाम्।।" इति।

(व० रा० वा०, पृ०, 45)

वरमुद्रा : — सुप्रसिद्धैषा मुद्रा। एषैव वरमुद्रेति कथिता बहुधा देवीस्तवेषु। यथा—

"वामं भुजं प्रसार्यैव जानूपरि निवेशयेत्।

प्रसृतं दर्शयेद्देवि वरः सर्वार्थसाधकः।।"

(स्व० तं०, उ० प०14, 11)

"उक्तं च तत्र **(श्री भैरवानुकरणस्तोत्रे):-**

वरदेन पाणिनां त्वं विश्वविभूतिप्रदत्वमभिनयसि।
न खलु परतत्त्वनिष्ठो वित्तमलैः स्पृश्यते जातु।। इति।

(स्व० तं०, उ० प०14, पृ०, 115)

वराहगुप्तः — अभिनवगुप्तस्य पितामहः। यथा—

"तस्यान्वये महति कोऽपि वराहगुप्त-
नामा बभूव भगवान् स्वयमन्तकाले।
गीर्वाणसिन्धुलहरीकलिताग्रमूर्धा
यस्याकरोत् परमनुग्रहमाग्रहेण।।"

(तं० आ०37, 53)

अन्वये महतीति कथनेनैतज्ज्ञायते यदत्रिगुप्तस्य वंशः कश्मीरेषु महान्तं विस्तारमवाप्तोऽभूदिति। ततोऽनुमातुं शक्यते यद्वसुगुप्तलक्ष्मणगुप्तरामगुप्तादयोऽपि गुरवोऽत्रिगुप्तवंशीया एवेति।

वरुणबीजम् :— वकारः वरुणबीजम्।

द्र०:- 'व' इति।

वर्गाः ~ प्रमातृतत्त्वानाम् :— **प्रमातॄणां वर्गीकरणं सप्तध तद्यथा—**

(1) सर्वथाऽभेदानिष्ठाः शिवाः (शाम्भवशाक्ताः) निर्मलाः प्रमातारः स्थूलमलरहिताः भेदाभेदानिष्ठाः प्रमातारः। तेषु (2) ध्वस्तमला मन्त्रमहेश्वराः, (3) तेष्वेवभेदावभास-प्रधानाः ध्वंसमानमला मन्त्रेश्वराः, (4) केवलेन मायीयेन मलेन युताः स्फुटभेददर्शिनो दिध्वंसिषुमला मन्त्राः (विद्येश्वरा वा), (5) आणवे नमलेन युक्ता स्वातन्त्र्यात्मकैश्वर्यहीनाः = विज्ञानाकलाः, (6) आणवमलयुताः प्रभावहीनकार्ममलाः सुषुप्त्यवस्थास्थाः शून्यप्रायाः = प्रलयाकलाः (प्रलयकेवलिनो वा), त्रिमलजुषः संसृतिसागरे सततमुन्मज्जननिमज्जनपराः = सकलाः।

"एतेषां लक्षणानि पृथक्-पृथक् स्वे-स्वे स्थाने दृष्टव्यानि।"

~प्रमेयतत्त्वानाम् :— **षट्त्रिंशत्तत्त्वानां प्रथमं वर्गद्वयं, शुद्धतत्त्वान्यशुद्धतत्त्वानि चेति। शुद्धानि शिवतत्त्वाच्छुद्धविद्यातत्त्वं यावत्। अशुद्धानि च मायामारभ्य धरान्तानि। तेष्वपि मायादीनि पुरुषान्तानि सप्तप्रमातृ-रूपाणि प्रमात्रन्तर्गतानि इतराणि प्राकृतानि। तेषामपि तत्त्वानां वर्गद्वयम्। तत्रान्तःकरणानि बहिष्करणानि च करणवर्गस्तत्त्वानाम, पञ्चतन्मात्राणि पञ्चभूतानि च कार्यवर्गः, प्रमेयतत्त्ववर्गः इति। तेष्वपि तन्मात्रपञ्चकं सूक्ष्मं भूतपञ्चकञ्च स्थूलम्। यथा—**

"त्रयोविंशतिधा मेयं यत्कार्यकरणात्मकम्।"

(ई० प्र०31-10)

"त्रयोदशविधा चात्र बाह्यान्तःकरणावलीः।"

(तदेव, 3-1-11)

वर्गीकरणम् :— जगद्भावानां पृथक्पृथग् वर्गेषु स्थापनम्। तच्च द्विप्रकारकम्। (1) तत्तद्रूपतया तेषां तेषां विकल्पनम्। (2) भावनाद्युपयोगार्थं शास्त्रसमयोपदिष्टं चेति। यथा—

"वर्गीकरणं प्रकारद्वयात्मा पक्षः, आद्यः समयोऽन्यः कलना तथा तथा विकल्पनम्।"

(तं० आ० वि०, खं० 7/2, पृ०, 6)

तत्र प्रथमः प्रकारस्तत्त्वविश्लेषणाख्यो, द्वितीयश्च भुव- नादीनां ध्यानोपयोगि यद् रूपं तदाकारतया।

वर्णकलाः — ~ मातृकाक्रमे — **अकारादि-क्षकारान्ताः वर्णकलाः। ता एव मातर इति, रश्मय इति, देव्य इति च कथ्यन्ते। यथा—**

"अकारादि-क्षपर्यन्ताः कलास्ताः शब्दकारणम्।
मातरः शक्तयो देव्यो रश्मयश्च कलाः स्मृताः।।"

(शि० सू० वा०1, 20-21)

वर्णकुण्डलिकाः — वेगेन स्पन्दमाना पराकुण्डलिका विमर्शनेन परनादरूपतां प्राप्ता सती वर्णकुण्डलिका इत्युच्यते। यथा—

"पराकुण्डलिकाभिख्या स्फुरन्त्याप्नोति सत्वरम्।।
विमर्शनेन नादात्मवर्णकुण्डलिकात्मताम्।"

(पू० प्र०1, 570-571)

"पारमेशी बोधाख्या शक्तिर्विश्वं गर्भीकृत्य परकुण्डलिका सती विमर्शरूपतया नादात्मवर्ण कुण्डलिकात्मना स्फुरित्वा ... .।"

(स्व० तं०, उ० प०4, पृ०,161-162)

वर्णक्रमः — ~ प्रक्षुब्धतायाम् : — **यद्यपि प्रक्षोभे सति वर्णक्रमो बहुप्रकारः सम्भवति तथापि नादिफान्त एव क्रमः प्राधान्यं भजते। यथा—**

"योनिबीजार्णसांकर्यं बहुधा यद्यपि स्थितम्।
तथापि नादिफान्तोऽयं क्रमो मुख्यः प्रकीर्तितः।"

(तं० आ०15, 127-128)

वर्णजालम् : — अकारादि-क्षकारान्तम्।

~ शिवत्वाभिव्यञ्जकम् : — **यद्यपि वर्णजातं भौतिकं सज्जडं, तथापि तस्य जाडयांशतिरोधानेन संविदंशोद्रेचनेन पर्यन्ते तत् परिपूर्णस्वात्मसंवित्प्रतिष्ठायाः साधनतामुपयाति। यथा—**

"यद्यत्सङ्कल्पसंभूतं वर्णजालं हि भौतिकम्।
तत् संविदाधिक्य वशादभौतिकमिव स्थितम्।।"

(तं० आ०5, 152-153)

वर्णत्रयम् — ~ प्रणवोपास्तौ :— **अकारो ब्रह्मा, उकारो विष्णुः मकारश्च रुद्रः। यथा—**

"मकारो ह्यत्र वै रुद्रो वर्णसंघट्ट उत्तमः।
यदा स्थितिं तु लभते स्वोन्मुखं सृष्टिकारणम्।
प्रतिष्ठाख्य उकारस्तु विष्णुः साक्षाद्भवत्यसौ।।"

(वि० भै०, उ०, पृ०,39)

वर्णभेदः — परम्परागतः श्रौतस्मार्तौ ब्राह्मणादिजातिभेदः, सामाजिकव्यवस्थासंस्थापकः।

~तदनादरः — **चतुर्वर्णव्यवस्थायाः न प्रामाण्यं शैव्यामन्तःसाधनायाम्, लोकव्यवहारे तस्याः प्रामाण्ये विद्यमानेऽपि। यथा :—**

"अत एवार्थसत्तत्वदेशिन्यस्मिन्न दिश्यते।
रहस्यशास्त्रे जात्यादि समाचारो हि शाम्भवे।।"
(तं० आ०15, 517)

"न मे प्रियश्चतुर्वेदो मद्भक्तः श्वपचोऽपि वा।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम्।।"
उद्ध० :– (तं० आ० वि०, खं०3, पृ०, 234)

~तदादरः — **अत्रैतदवधानविषयतां नेयं यत् काश्मीरशैवदर्शनं न वर्णाश्रमधर्मविरोधि। लोकव्यवहारे वर्णाश्रमधर्मस्य प्रामाण्यं स्वीकृतं प्रशस्तं चात्र। परं शिवानुग्रहपात्रभूतानामुत्तमानां भक्तानां कृते उपेक्ष्यमेव वर्णविशेषसम्बन्धित्वम्। सैषा परम्पराऽद्यत्वेऽपि प्रचलत्येव कश्मीरमण्डले। आचार्याभिनवगुप्तादयोऽपि वर्णव्यवस्थां लोकसंग्रहार्थं पालयन्तिस्म। तत्र च प्रमाणं तस्य यज्ञोपवीत-धारित्वं वेदप्रामाण्यप्रतिपादकत्वं च लोकधर्मविषये। यथा—**

"रक्ताङ्गो यक्षपङ्कोल्लसदसितगलो लम्बमुक्तोपवीतः।"
(गु० ना० प०, 5)

"यदि तु वेददूषणपरमेतदभविष्यत्, प्रकृतं युद्धकरणं व्यघटिष्यत — वेदादन्यस्य स्वधर्मनिश्चायकत्वाभावात्।"
(गी० सं०, पृ०, 23)

वर्णयोगः — (1) ध्वनियोग एव वर्णयोगः इत्युच्यते, प्राणोच्चारे स्फुरतोऽव्यक्तस्यानाहतस्य ध्वनेः सकलवर्णोत्पत्तिभूमित्वात्। यथा—

"योऽसावनाहतरूपो नादः, स वर्णोत्पत्ति निमित्तत्वाद्वर्ण उच्यते, वर्णशब्दाभिधेयो भवेदित्यर्थः।"
(तं० आ० वि०, खं०3, पृ०, 444)

यथा—

"सृष्टि संहारबीजात्मा सूक्ष्मप्राणे सदा स्फुरन्।
अव्यक्तानुकृतिप्रायो ध्वनिर्वर्णपदाभिधः।।"
(पं० प्र०1, 102)

(2) प्राणोच्चारध्वन्याश्रयतः कृते बीजमन्त्रजपे तत्फलत्वेन सितपीतादिवर्णदर्शने सति तत्र ध्यानेन क्रमेण परशिवपदप्रवेशो भवति। ततोऽपि प्राणोच्चारालम्बनाख्यो योगो वर्णयोग इति समाख्यायते। यथा—

"वर्णशब्देन नीलादि यद्वा दीक्षोत्तरे यथा।"
(तं० आ०5, 148)

"विस्फुलिङ्गप्रधानाग्निन्यायेन नीलपीताद्यनेकवर्णचित्रीकृत-हृदम्भोजे 'जाज्वलीति' स्पष्टनिरीक्षणीयतामेतीत्यर्थः।"
(तं० आ० वि०, खं०3, पृ०, 463)

"संहारवह्निमरुतो रुद्रबिन्दुयुतान्स्मरेत्।।
हृदये तन्मयो लक्ष्यं पश्येत्सप्तदिनादथ।
विस्फुलिङ्गाग्निवन्नीलपीतरक्तादिचित्रितम्।।
ज्वाज्वलीति हृदम्भोजे बीजदीपप्रबोधितम्।
दीपवज्ज्वलितो बिन्दुर्भासते विघनार्कवत्।।"
(तं० आ०5, 148-150)

~ तत्फलम् : — **बिन्दुमाध्यमेन साक्षात्कृतेन शिवेन सह योगीतादात्म्यवाप्नोति वर्णयोगाभ्यासतः। यथा—**

"स्वयं भासात्मनानेन तादात्म्यं यात्यनन्यधीः।
शिवेन हेमतां यद्वत्ताम्रं सूतेन वेधितम्।।"
(तं० आ०5, 151)

वर्णरहस्यम्ः — ~षडध्वयोगेः — संकेतस्पर्शरहितः पश्यन्त्यात्मकवाग्विमर्शात्मको वर्णयोगे वर्णः। ततोऽभेदेन सर्वार्थविमर्शकत्वेन प्रमाणाद्युत्तीर्णः प्रमात्मकस्वात्मविश्रान्ति-प्रधानो वर्णाध्वा। यथा—

"उच्छलत्संविदामात्रविश्रान्त्यास्वादयोगिनः।।
सर्वाभिधानसामर्थ्यादनियन्त्रितशक्तयः।
सृष्टाः स्वात्मसहोत्थेऽर्थे धरापर्यन्तभागिनि।।
आमृशन्तः स्वचिद्भूमौ तावतोऽर्थानभेदतः।
वर्णौघास्ते प्रमारूपां सत्यां बिभ्रति संविदम्।।"
(तं० आ०11, 63-65)

संविदा हि संविदेव। आपं चैवहलन्तानामिति वैयाकरणसमयात्।

वर्णविचारः — ~यागे :— त्रिकयागादौ होत्रादिभि-र्ब्राह्मणादिजाति कृतोऽभिमानो हेय एव तस्य स्वरूपावरकत्वात्। ततो ब्राह्मणेभ्यो निषिद्धानामपि तान्त्रिकयागसाधनानां खाद्यपेयानां प्रयोगे न काऽपि शङ्का विधेया। यथा—

"ब्राह्मणा क्षत्रिया वैश्याः शूद्रा वै वीरवन्दिते।
आचार्यत्वे नियुक्ता ये सर्वे ते तु शिवाः स्मृताः।।"
उद्ध० :– (तं० आ० वि०, खं०9, पृ०, 279)

शिवा एव। न ब्राह्मणाद्याः नापि शूद्राद्याः इति।

वर्णाः — ~ अमायिका :— सङ्केतग्रहसाचिव्यरहिताः केवलं ध्वनिरूपाः वर्णाः अमायिकाः तैश्च बालतिर्यगाद्या व्यवहरन्ति। यथा—

"बालास्तिर्यक्प्रमातारो येऽप्यसंकेतभागिन।
तेऽप्यकृत्रिमसंस्कारसारामेनां स्वसंविदम्।।
भिन्नभिन्नामुपाश्रित्य यान्ति चित्रां प्रमातृताम्।"
(तं० आ०11, 66-67)

द्र०:- (पू० प्र०2, 66-68) इति।

~चतुष्षष्टिः — **स्वराः = षोडश, दीर्घलृकारोऽपि स्वरेषु गणनीयः। व्यञ्जनानि चतुस्त्रिंशत्, क्षकारस्यापि पृथग् व्यञ्जनत्वेन गणना। जिह्वामूलीयोपध्मानीयौ = द्वौ। पञ्च यमाः। डकारढकारान्तःस्थक्षकाराः इति सप्त लघुप्रयत्नतराः। इति 16+34+2+5+7= 64 यथा—**

"अत एव — किञ्चिद्वैचित्र्यमालम्ब्यान्यत्वमन्यत्वं चाशङ्कमानैर्विसर्जनीयाज्जिह्वामूलीयोपध्मानीयौ, अनुनासिकेभ्यः पञ्चयमान्, डकारढकारयरलवक्षकारेभ्यस्तानेव लघुप्रयत्नतरान्, भेदेनाभिमन्य चतुःषष्टिर्वर्णा। उक्ताः।"

(प० त्री० वि०, पृ०, 191-192)

~ तत्तत्तत्त्वाभिव्यञ्जकाः— **ककारादारभ्य क्षकारान्तमेकैको वर्ण एकैकधरादिशक्त्यन्ततत्त्वात्मकत्व-व्यञ्जकः। विसर्गादारभ्य प्रतिलोम्येन अकारं यावद् ये षोडशस्वरास्ते शक्त्याविष्टशिवव्यञ्जकाः। यथा—**

"तत एकैकवर्णत्वं तत्त्वे तत्त्वे क्षमादितः।।
कृत्वा शैवे परे प्रोक्ताः षोडशार्णा विसर्गतः।"

(तं० आ०11, 49-50)

"संहारप्रक्रमस्याध्वशुद्धावुचितत्वाद् विसर्गादारभ्यानु-लोम्येनाकारपर्यन्तं स्वरषोडशकमुक्तम्।"

(तं० आ० वि०, खं०7/2, पृ०, 40)

~वर्णयोगे :— **श्वासप्रश्वासरूपे प्राणोच्चारे स्फुरन्नव्यक्तो ध्वनिर्वर्णः इति परिभाष्यते। तस्मिन् ध्वनौ सृष्टिसंहार-बीजमन्त्रयोरारोपो विधीयते। ततश्च तद्रूपतयैव तस्य सततश्रुतेरभ्यासः क्रियते, शुद्धविकल्पात्मकेनाभेदाध्यवसायेन साकम्। तदभ्यासात्परसंवित्तिलाभो भवति साधकस्य। यथा—**

"अस्मिन्नेवोच्चारे स्फुरन् अव्यक्तानुकृतिप्रायो ध्वनिर्वर्णः। तस्य सृष्टिसंहारबीजे मुख्यं रूपम्। तदभ्यासात् परसंवित्तिलाभः।"

(तं० सा०, पृ०, 42)

वर्णाध्वाः — (1) स्वकीयायाः परिपूर्णतायाः अभिव्यञ्जकश्चिद् विमर्शात्मको योगाभ्यासमार्गः। स्वरषोडविमर्शैः स्वीकायं शिवभाववैचित्र्यं बहुधा प्रकाशमानं साक्षादनुभूयते। कादिक्षान्तव्यञ्जनवर्णविमर्शैश्च निखिलं धरण्यादिशक्तितत्त्वान्तं विश्वं स्वात्मनि प्रतिबिम्बन्यायेन प्रकाशमानं सत् साक्षात्तथाऽनुभूयते। स एष वर्णाध्वा मातृकामालिनीक्रमाभ्यां शाम्भवोपाये समुपयुज्यते। आणवेऽपि बाह्योपायतयोपास्यते येन विधिना धरादितत्त्वसिद्धयो हस्तगता भवन्ति। तत्र वर्णानां द्विविधा कलना। केचिदकृत्रिमाः। स्वात्मविमर्शमया वर्णा, अन्ये च कृत्रिमा ध्वनिरूपा लिपिरूपा वा। तेषां कृत्रिमाणामाणवोपायेऽस्युपयोग आलम्बनत्वेन। यथा—

"तेनानन्तस्त्वमायीयो यो वर्णग्राम ईदृशः।
स चिद्विमर्शसचिवः सदैवं प्रविजृम्भते।।
तत एव च मायीया वर्णाः सूतिं वितेनिरे।
तेषां ते खल्वमायीया वीर्यमित्यवधार्यते।।"

(मा० वि० वा०1, 1027-1028)

"अध्वषट्कं यथा प्राणे संस्थितं कथयामि ते।।
.....।
..... वर्णाध्वानं निबोध मे।।
वर्णाः शब्दात्मकाः सर्वे जगत्यस्मिंश्चराचरे।
स्थिताः पञ्चाशता भेदैः शास्त्रेष्वानन्त्य(न्त)कोटिषु।।
शब्दात्प्राणः समाख्यातस्तस्माद्वर्णास्तु प्राणतः।
उत्पद्यन्ते लयं यान्ति यत्र शब्दो लयं गतः।।
शब्दातीतो वरारोहे तत्त्वेन सह युज्यते।
युक्तः सर्वगतो देवि धर्माधर्मविवर्जितः।।
नाधो निरीक्षते भूयः शिवतत्त्वं गतो यदा।
अधो वै यात्यधर्मेण धर्मेणोर्ध्वं व्रजेत्पुनः।।
विज्ञानेन द्वयं त्यक्त्वा सर्वगस्तु भवेदिह।
वर्णाध्वैवं समाख्यातः .....।।"

(स्व० तं०4, 241, 246-251)

(2) प्रमेय-प्रमाण-प्रमातृरूपाणामुपरि यत्प्रमात्मकं रूपं स एव वर्णाध्वा।

यथा—

"प्रमेयमानमातृणां यद्रूपमुपरि स्थितम्।।
प्रमात्मात्र स्थितोऽध्वायं वर्णात्मा दृश्यतां किल।"

(तं० आ०11, 62-63)

द्र० :– (पू० प्र०2, 63-64) इति

(3) औदासीन्यरहितः प्रक्षोभपदावरोहणाभावे सति, प्रमातृभागगः पूर्णात्मकः प्रमांशप्रधानोऽविकल्पः शाब्दो विमर्शो वर्णाध्वा। यथा—

"औदासीन्यपरित्यागे प्रक्षोभानवरोहणे।
वर्णाध्वा मातृभागे स्यात् पूर्वं या कथिता प्रमा।।
सा तु पूर्णस्वरूपत्वादविभागमयी यतः।।"

(तं० आ०11, 48-49)

पूर्णतारूपा या प्रमितिः पूर्वमुक्ता सैव प्रमात्रंशाश्रयणेन वर्णाध्वा स्यात्।"

(तं० आ० वि०, खं०7/2, पृ०, 39)

~द्विविधः — **मायीयो वर्णाध्वा शोध्यो भवति, अमायीयः पुनस्तस्य शोधकः। यथा—**

"वर्णाध्वा यद्यपि प्रोक्तः शोध्यः पाशात्मकस्तु सः।
मायीयः शोधकस्त्वन्यः शिवात्मा परवाङ्मयः।।"

(तं० आ०16, 209)

"तस्मात्तस्यैव वर्णस्य युक्ता शोधकशोध्यता।"

(तं० आ०16, 211)

~फलतः — **(1) वर्णाध्वधारणाया अपराणि फलानि, यथाः— वाक्सिद्धिः, कवित्वं, विद्वत्त्वमित्यादि। यथा—**

"तदुद्रेकमहत्त्वे तु प्रतिभात्मनि निष्ठिताः।
ध्रुवं कवित्ववक्तृत्वशालितां यान्ति सर्वतः।।
अत एव हि वाक्सिद्धौ वर्णानां समुपास्यता।।
तेषामेव ततस्तेन गुप्ता गुप्तेन भाषिताः।।"

(मा० वि० वा०1, 1032-1033)

(2) आद्ये, अमायीये वर्णे सङ्केतासहचारिणि सर्वेषामुत्तरोत्तराणां संकेतानामवस्थितिः, तदाधारत्वेन तेषाम्। तेन वर्णाध्वयोगाभ्यासेन यस्मिन् कस्मिंश्चिदपि मायीये

वर्णपुञ्जे स्थितिर्भवेत् तद्गता सिद्धयो हस्ते समायान्ति योगिनः। अमायीये चेद् वर्णे योगिनः स्थितिस्तदा सर्वज्ञतादि धर्माणामभिव्यक्तौ सशरीरशिवपदावस्थितिर्हस्तगता भवति।

यथा—

"आद्यामायीयवर्णान्तर्निमग्ने चोत्तरोत्तरे।।
संकेते पूर्वपूर्वांशमज्जने प्रतिभाभिदः।
आद्योद्रेकमहत्त्वेऽपि प्रतिभात्मनि निष्ठिताः।।
ध्रुवं कवित्ववक्तृत्वशालितां यान्ति सर्वतः।
यावद् धामनि संकेतनिकारकलनोज्झिते।।
विश्रान्तिश्चिन्मये किं किं न वेत्ति कुरुते न वा।
अत एव हि वाक्सिद्धौ वर्णानां समुपास्यता।।
सर्वज्ञत्वादिसिद्धौ वा का सिद्धिर्या न तन्मयी।"

(तं० आ०11, 77-81)

वर्णोदयः — सततं गतिशीलयोः प्राणापानयोरन्तः समुच्चरतां ध्वनि विशेषाणां पारमेश्वरभावविशेषोद्बोधकानामुदयः। किञ्चित् स्थूलालम्बनोऽयं योगो मानवबुद्ध्या ग्रहीतुं शक्यते। मानवानां विविधवासनाधीनत्वादस्य योगस्य फलभूतानां सिद्धीनां दुरुपयोगस्यास्ति महत्याशङ्का। तत एवैवम्भूताः योगप्रक्रियाः आचार्यैर्न स्पष्टीकृताः। सङ्केतमात्रतस्तत्र तत्र निर्दिष्टाः। ये च प्राप्तशिवदीक्षा अधिकारिणस्ते तावद्भिरेव संकेतैस्तत्त्वं निश्चेतुमलं भवन्ति। येऽनधिकारिणस्तेषां कृते स्पष्टीकरणस्य न किमपीष्टं फलम्; अनिष्टं तूक्तमेवोपरि। ततो वर्णोदयोऽपि करणयोगवद्रहस्यभूत एव विषयः। न चैष केवलविद्याभ्यासिनां विषयोऽपि तु योगिनामेव। प्राणचारस्य विभागोऽपि भाव्यते वर्णसंख्यानुसारमत्र योगे विविधैः प्रकारैः। एवमेव यत्नजे मन्त्रोदयेऽपि ज्ञेयम्।

यथा—

"सूक्ष्मस्तु वर्णशब्दवाच्यो वक्ष्यते।"

(तं० सा०, पृ०, 35)

श्वासप्रश्वासयोः षट्त्रिंशदङ्गुले चारे ते ते वर्णास्ते ते च वर्णवर्गास्तत्तदङ्गुलप्रमाणे स्थाने यथायथं श्रूयन्ते। ३६ अङ्गुलविस्तारो वर्णसंख्यानुसारं, वर्णवर्गसंख्यानुसारं च विभज्य तत्तद्वर्णानुविद्धतया साक्षादनुभूयते, तत्तद्वर्णव्यङ्गयं च वस्तुतवमनुभूयते साधकैः। परमरहस्योऽयं विधिर्गुरूपदेशत एव विज्ञेयः।

~अयत्नजः — **वर्णात्मकानां ध्वनीनामुदय एव हि तावदयत्नजो वर्णोदयः। स च प्राणापानगतौ स्वरसेनोदयशीलोऽनाहतध्वनिरूपः, स हि तत्तद्वर्णात्मक एव, न मन्त्रात्मको नापि पदात्मकः। सोऽपि त्रिविधः- (1) परः, (2) सूक्ष्मः, (3) स्थूलः इति। परोऽपि (1) परः, (2) परतरः, इति द्विप्रकारः। सूक्ष्मः- (1) परः (2) सूक्ष्मः (3) स्थूलः इति त्रिप्रकारः।**

"प्राणचारे वर्णानां, पदानां, मन्त्राणां चोदयः इति स्थितम्। स तु द्विधा स्वारसिकः प्रायत्निकश्चेति। तत्राद्यो वर्णानां, तेषां नैयत्येन सर्वत्रैवाविशेषात्।"

(तं० आ० वि०, खं०4/1, पृ०, 177)

द्र० :- (तं० सा०, पृ०, 59) **इति।**

~परः — **प्राणापानप्रवाहे आदिहान्तानां वर्णानामुदयः।**

यथा—

उक्तः परोऽयमुदयो वर्णानाम् .....।।"

(तं० आ०6, 224)

~परतमः — **वर्णोदयस्तु स्वभावतः परोऽयत्नजश्च। सोऽपि परतरो वा परतमोऽपि च भवति। तत्र परतमोऽनाहतनादात्मा। यथा—**

"वर्णोदयस्य तरतमभावेन द्वैविध्यमिति परतमं तदुदयमभिधातुमुपक्रमते।"

(तं० आ० वि०, खं०4/1, पृ०, 178)

"एको नादात्मको वर्णः सर्ववर्णाविभागवान्।
सोऽनस्तमितरूपत्वादनाहत इहोदितः।।"

(तं० आ०4, 217)

~परतरः — **अयत्नजः परिपूर्णाऽहं विमर्शसम्भिन्नः परिपूर्णोनादात्मकः सर्ववर्णाविभागवानाहतो ध्वनिः। यथा—**

"स तु भैरवसद्भावो मातृसद्भाव एष सः।
परा सैकाक्षरा देवी यत्र लीनं चराचरम्।।"

(तं० आ०6, 218)

~सूक्ष्मसूक्ष्मः — **अपाने षोडशापि स्वराः प्राणे पुनः बण्ठवर्जा द्वादश एव। व्यञ्जनानां च सस्थानस्वरानुसारमेवोदय इति। सूक्ष्मसूक्ष्मोऽयं वर्णोदयः। यथा—**

"तत्र सूक्ष्मसूक्ष्मं तावदुदयमाह।"

(तं० आ० वि०, खं०4/1, पृ०, 182)

"प्रवेशे षोडशौन्मुख्ये रवयः षण्ठवर्जिताः।।
तदेवेन्द्वर्कमत्रान्ये वर्णाः सूक्ष्मोदयस्त्वयम्।"

(तं० आ० वि,० खं०4/1, पृ०, 182)

रवयः इति द्वादशस्वराः।

~सूक्ष्मस्थूलः — **एकाशीत्यर्धमात्राणां क्रमिकः समुदयः सूक्ष्मस्थूलः। यथा—**

"सूक्ष्मसूक्ष्मं वर्णोदयमभिधाय सूक्ष्मस्थूलमप्याह"—

(तं० आ० वि०, खं०4/1, पृ०, 183)

"कालोऽर्धमात्रः कादीनां त्रयस्त्रिंशत उच्यते।।
मात्रा ह्रस्वाः पञ्चदीर्घाष्टकं द्विस्त्रिः प्लुतं तु लृ।
एकाशीतिमिमामर्धमात्राणामाह नो गुरुः।।"

(तं० आ० 6, 225-226)

"एकाशीतिपदादेवी या सा शक्तिः शिवात्मिका।"

(म० तं० 17,31)

द्र०:- **'एकाशीतिपदा' ~ 'देवी'- इति।**

~स्थूलः — **21600 संख्याकाः प्राणचाराः तत्तद्वर्णवर्गेषु विभज्यन्ते विशेषनियमानुसारमूततश्च तेषां तेषां वर्णवर्गाणां**

श्रुतयोऽनुभूयन्ते तदभिव्यङ्ग्यं च वास्तविकं वस्तुतत्त्वमनुभूयते रहस्यात्मकेन केनापि गुरूपदेशमात्रगम्येन प्रकारेण। यथा—

"एकैकमर्धप्रहरं दिने वर्गाष्टकोदयः।
रात्रौ च ह्रास वृद्धयत्र केचिदाहुर्न केऽपि तु।।"

(तं० आ०6, 241)

ह्रासवृद्धीदक्षिणायनोत्तरायणानुसारमिति।

~(प्राणचाराः) — तत्र— **प्रतिवर्णमत्र 216 प्राणचाराः। चषकसंख्या च 36, प्रतिचषकं षट् प्राणा इति। यथा—**

"एकैकवर्णे प्राणानां द्विशतं षोडशाधिकम्।
बहिश्चषकषट्त्रिंशद्दिनं इत्थं तथा निशि।।"

(तं० आ०6, 246)

वर्तनाः— सिन्दूरादि रजसा रेखाविन्यासो विविधाकृतिर्यागमण्डपे मण्डलविधौ। यथा—

"ततस्त्रिशूलपद्म चक्रादिवर्तनानन्तरं ..... दण्डद्वारादिवर्तनार्थं गृह्णीयात्।"

(तं० आ० वि०, खं०12, पृ०, 239)

"इदानीं दक्षिणोत्तरपार्श्वयोः शृङ्गवर्तनामाह।"

(तं० आ० वि०, खं०12, पृ०, 234)

वर्तमानकर्मनाशः — ज्ञानप्राप्तेः प्रागस्मिन्नेव जन्मनि कृतं कर्मज्ञानावाप्त्यनन्तरं वा क्रियमाणं कर्म सर्वं ज्ञानाग्निना समुच्छेद्यम्। एवं दीक्षायाः प्रागनन्तरं च। यथा—

"तत्रैव देहे यत्त्वन्यदद्यगं वा पुरातनम्।।
कर्म तज्ज्ञानदीक्षाद्यैः शण्ढीकर्तुं प्रसह्यते।"

(तं० आ०9, 131-132)

वर्तमानादिः — सहभावादिविमर्शयुक्तो व्यवहारः कालिकः। यथा—

"अस्यायं क्रियाप्रतानः सहभावेनास्ते विनाभावेन वेति वर्तमानादिः कालः।"

(ई० प्र० वि०, खं०2, पृ०, 43)

वर्ममन्त्रः — नैव स्पष्टमुक्तः।

(तं० आ०15, 236)

वर्षम् :— हायनम् 360 दिनानि। यथा—

वत्सरः मासद्वादशमितः कालः। स च मानवानामन्यः, पितृदेवसिद्धादीनां चान्यान्यपरिमाणकः।

~दैवम् :— **(1) मानुषाणां वर्षाणां शतत्रयेण षष्ट्या च देवानां वर्षः पितृणां चापि। अत्र देवपितृवर्षयोः समपरिमाणत्वमुक्तं त्रिकशास्त्रे। अन्यत्र शास्त्रेषु एष वर्षः देवानामेव, पितृणां पुनः त्रिंशन्मात्रैरेव मानुषैः वर्षैरिति। शैवमार्गोपासका पितरोऽपि देवतुल्य कक्ष्याभाज इत्येतेन प्रतीयते। यथा—**

"अब्दं पित्र्यस्त्वहोरात्रः।"

(तं० आ०6, 131)

पित्र्यं त्वहोरात्रम् इत्येवंभूतः पाठः शोभनः प्रतिभाति।

(2) केचन पुनराचार्याः स्वच्छन्दतन्त्रे एकादशे पटले 207 208, श्लोकयोः व्याख्यान्तरं कुर्वाणाः पितृणां वर्षं देवानामहोरात्रमिति मन्यन्ते। परं ते भ्रान्ता एवेति वदन्त्यभिनवगुप्तपादाः। यथा—

"पितृणां तदहोरात्रमित्युपक्रम्य पृष्ठतः।।
एवं दैवस्त्वहोरात्र इति ह्यैक्योपसंहृतिः।
तेन ये गुरवः श्रीमत्स्वच्छन्दोक्तिद्वयादितः।।
पित्र्यं वर्षं दिव्यदिनमूचुर्भ्रान्ता हि ते मुधा।"

(तं० आ०6, 136-138)

ये आचार्याः पितृणां वर्षं देवानामहोरात्रमित्यूचुस्ते भ्रान्ताः एव मन्तव्याः इति।

~पित्र्यम् : — **यावन्मात्रं देवानां तावन्मात्रं पितृणामपि।**

द्र०:- **"दैवम्, इति।**

स्वच्छन्दतन्त्रे तावदेष पाठोऽत्र विषये—

"दक्षिणं चायनं रात्रिरुत्तरं चायनं दिनम्।
पितृणां तदहोरात्रमनेनाब्दस्तु पूर्ववत्।।
एवं दैवस्त्वहोरात्रस्तत्राप्यब्दादि पूर्ववत्।"

(स्व० तं०11, 207-208)

अत्राभिनवगुप्तपादानां मतमेवम्:—पितृणां यदहोरात्रं तदेव हि देवानामपीति।

"इति ह्यैकोपसंहृतिः"

(तं० आ०6, 137)

इत्यस्य पद्यांशस्येदं तात्पर्यं यदैक्यमेव दैवस्य पित्र्यस्य चाहोरात्रस्येति।

क्षेमराजेन स्वच्छन्दतन्त्रोद्द्योते मतमेतदुल्लिखितं, परं नैवाक्षिप्तम्। न चात्र स्वगुरोर्वचनान्युदाहृतानीत्याश्चर्यम्, प्रत्युत सादरमिवोल्लिखितम्—

"अद्यतनैस्तु 'ऋतुर्द्विगुण एव सः' इत्यतोऽनन्तरः— 'कृष्णापक्षस्त्वहश्चैव शुक्लस्तु रजनी भवेत्।

"पितृणां सोऽप्यहोरात्रस्त्वनेनाब्दस्तु पूर्ववत्।।'

इति विपर्यास्य पठित्वा मानुष्यो मासः पित्र्योऽहोरात्र इति व्याख्यातं, तेषां च सांवत्सरिकी पितृदिनव्यवस्था लैकिक्यपि स्थितिः प्रसृता।"

(स्व० तं०, उ० प०11, पृ०,117)

एवं स्वीकृतप्रायमेवैतन्मतं क्षेमरोजेनेत्याश्चर्यम्।

~ ब्रह्मादीनाम्: — **उत्तरोत्तरभुवनपतीनामधिकाधिकविस्तारं वर्षम्। तत्र प्रायशोऽधरभुवनाधिपतेर्वर्षशतमुत्तरभुवनाधिपतेर्दिनम्, तावती तस्य रात्रिः। तन्मानेन वर्षशतं तदायुः।**

द्रष्टव्यमेतद्विस्तरतः—

(तं० सा०, पृ०, 54-56) इति।

(तं० आ०6, 139-166) इति च।

वर्षादित्यः — **सोमानन्दस्य प्रपितामहः। सङ्गमादित्यस्य पुत्रस्त्र्यम्बकमठिकायाः सप्तदशो गुरुः। यथा—**

"नाम्ना स सङ्गमादित्यो वर्षादित्योऽपि तत्सुतः।"
(शि० दृ०7, 119)

वल्लकी मुद्रा :— वीणा मुद्रा।

द्र०:- 'वीणामुद्रा' इति।

वसुगुप्तः — अद्वैतशैवदर्शनस्य पुरातनो गुरुः। शिवसूत्रस्य प्रकाशयिता। भट्टकल्लटादीनां गुरुः, स्पन्दसिद्धान्तस्य प्रथमो व्याकर्त्ता, स्पन्दोपासनायाः मुख्यः प्रवर्तकः कश्मीर शैवदर्शनाचार्यः। मठिकागुरुस्त्र्यम्बकशैवमठिकायाः। अनुमातुं शक्यमिदं यदत्रिगुप्तस्य वंशे जातोऽयं सिद्धगुरुः, अन्यस्य गुप्ताख्यस्य विद्वद्वंशस्य कश्मीरेष्वप्रसिद्धत्वात्। तदुपदेशानुसारमेव लोके स्पन्दशास्त्रं प्रवर्तितं भट्टकल्लटादिभिर्गुरुभिः। शिवसूत्रस्य खण्डत्रयमिदानीं कतिपय टीकायुतं लभ्यते। परं तस्य चतुर्थः खण्डो दुखापः। तदुपरि भट्टकल्लटेन निर्मिता तत्त्वार्थचिन्तामणिसमाख्या टीकाऽप्यलभ्या। परं कतिचित्सूत्राण्युद्धृतानि तस्मात्खण्डादद्यापि लभ्यन्ते, तथैव तत्त्वार्थचिन्तामणिवाक्यान्यपि कानिचित्।

यथा—

"वसुगुप्तादवाप्येदं गुरोस्तत्त्वार्थदर्शिनः।
रहस्यं श्लोकयामास सम्यक् श्रीभट्टकल्लटः।।"
(स्प० प्र०, पृ०, 54)

~अपरः — कोऽपि न्यायवेदान्ताचार्यस्तत्प्रधानस्य सिद्धान्तचन्द्रिकाख्यस्य ग्रन्थस्य रचयिता। स च ग्रन्थो पुण्यपत्तनस्थे प्राच्यविद्यापुस्तकालये मातृकासंग्रहे विद्यते। न च तस्य विषयः कथमपि शैवदर्शनेन सङ्गच्छते, न चापि तस्य ग्रन्थस्य शैली कश्मीरशैवदर्शनसम्वादिनी, वसुगुप्ताचार्यशैलीसदृशा वा कथञ्चिदपि। तेन ध्रुवमन्य एव कश्चिदाचार्योऽयम्।

वस्तुतत्त्वम् :— प्रकाशरूपः शिव एव हि सर्वस्य प्रमेयप्रमातृजातस्य वास्तविकं स्वरूपम्। ततो विश्वत्रैकमेव सत्यं तत्त्वम्, तच्च शिव एव। यथा—

"ज्ञेयस्य हि परं तत्त्वं यः प्रकाशात्मकः शिवः।
नह्यप्रकाशरूपस्य प्राकाश्यं वस्तुताऽपि वा।।"
(तं० आ०1, 52)

वस्तुस्थितिप्रकाशः — आचार्यामृतवाग्भवैः सैद्धदर्शनस्योत्कृष्टतरस्य सारस्य प्रतिपादनं हिन्दीभाषामयैर्लेखैः कृतमभूत्। ते च लेखास्तत्तत्काले 'श्री स्वाध्याय'पत्रिकायां प्रकाशिता अभूवन्। तत उद्धृत्योपरि निर्दिष्टसंज्ञया च सुसम्पाद्य पृथग्ग्रन्थरूपतयापि प्रकाशिता वर्तन्ते। पराद्वैतशैवदर्शनसिद्धान्तप्रतिपादकोऽयं ग्रन्थः।

वह्निः — शिवप्रकाशे स्रष्टव्यस्य प्रमातुर्यद् विमर्शनं तेन विमृश्यमानोऽसौ प्रकाशभिन्नतामत्यजन् प्रमाता वह्निः। इत्येषा प्रसिद्धा परिभाषाऽऽगमिकी। यथा ह्यग्निः सर्वमप्यदन्नग्निरूपतामापादयति तथा प्रमाताऽपि प्रमेयं स्वात्यन्पेकरूपतामापादयति। तथा प्रमाताऽपि प्रमेयं स्वात्मन्येकरूपतामापादयति। प्रकाशाभिन्नयोः प्रमाणप्रमेययोर्यः एकः संघट्टात्मा विमर्शः सोऽहमिति प्रमाता। ततः प्रकाशाभिन्नस्य प्रमातुरग्निरित्यागमिकी संज्ञा। यथा—

"अन्योन्यमवियुक्तौ तौ स्वतन्त्रावप्युभौ स्थितौ।।
भोक्तृभोग्योभयात्मैतदन्योन्योन्मुखतां गतम्।
ततो ज्वलनचिद्रूपं चित्रभानुः प्रकीर्तितः।।
योऽयं वह्निः परं तत्त्वं प्रमातुरिदमेव तत्।"
(तं० आ०3, 121-123)

"योऽयं वह्निः परं तत्त्वं प्रमातुरिदमेव तत्।"
इत्याद्युक्त्या परसंविदात्मा प्रमाता तावत् भेदेन्धनदाहकत्वादग्निः .....।"
(तं० आ० वि०, खं०3, पृ०, 126)

"शुचिर्नामाग्निरुद्भूतः संघट्टात् सोमसूर्ययोः।"

(उद्धरणम्)

इति, स च प्रमाणप्रमेयविभागात्मनोभेदस्य दाहकत्वाज्ज्वलन-प्रधाना चिद्रूपं यस्य सः — परिमित प्रमातृरूप इत्यर्थः।"
(तं० आ० वि०, खं०2, पृ०, 127)

उदानाख्या प्राणवृत्तिरपि वह्निरित्युच्यते उच्चारयोगे। यथा—

"उदानवह्नौ विश्रान्तो महानन्दं विभावयेत्।"
(तं० आ०5, 48)

~वर्णः — रकारः। यथा—

"वह्निवर्णेति रेफः।"
(तं० आ० वि०, खं०10, पृ०, 207)

" ..... वह्निः-
र्भासनात् .....।।"
(तं० आ०3, 157)

"भासनाद्, भास्वत्तालक्षणं धर्मं' .... वह्निबीजरेफात्मताम्, ...।"
(तं० आ० वि०, खं०2, पृ०, 158)

वह्निसदनम्ः — ऊर्ध्वमुखं त्रिकोणम्। यथा—

"वह्निसदन इत्यर्थादूर्ध्वमुखे (त्रिकोणे)"।
(तं० आ० वि०, खं०10, पृ०, 207)

वह्न्यर्कसोमाः — ~ बुद्धिध्याने— प्रमातावह्निः, प्रमाणमर्कः प्रमेयं सोमः। यथा—

"मातृमानप्रमेयाख्यं धामाभेदेन भावयेत्।
वह्न्यर्कसोमशक्तीनां तदेव त्रितयं भवेत्।।"
(तं० आ०5, 24)

वाक् :— (1) वस्तुस्वरूपविमर्शः। यथा—

"वक्ति स्वरूपं विमृशतीति वाक्।"
(ई० प्र० वि० वि०, खं०1, पृ०, 15)

(2) स्वकीयो यो बोधस्तद्विमर्शरुपिणी परत्र च तत्तद्बोधविमर्शकारिणी सूक्ष्मतरा, सूक्ष्मा, स्थूला च शब्दना, वक्ति स्पष्टतां नयतीति वाक्।

~चतुर्विधा :— **परा, पश्यन्ती, मध्यमा, वैखरी चेति चतस्रो वाचः। यथालक्षणानि स्वे स्वे स्थाने द्रष्टव्यानि।**

~जगत् (स्थितिभेदतः): — **वाक्चतुष्टयेऽर्थावभासः प्रथक्पृथक्प्रकारकः। यथा—**

"परवाक्तत्त्वे विभागहान्या विश्वं स्थितं, पश्यन्त्यामासूत्रितभेदं, मध्यमायामुन्मीलितभेदं, वेखर्यां भिन्नपरामृश्यमानरूपतया स्फुटीभूतभेदावभासम्।"

(ई० प्र० वि० वि०, खं०1, पृ०, 16)

~तत्त्वतः — **मूलतो विमर्श एव वाचस्तत्त्वम्। तेन परा वाक् केवलं शुद्धविमर्शरूपैव। पश्यन्त्यादावपि विमर्शात्मकमेव वाक् तत्त्वम्। लोकेऽपि हि चित्ते केनापि यद् विमृष्टं तदेवासौ वैखर्यां परं प्रति वक्तीति सर्वत्र विमर्श एव वाचस्तत्त्वम्। यथा—**

"शब्दनैकशरीरं विश्वं यथा क्रमेण विकसितं, पश्यन्त्यां विकासोन्मुखं, मध्यमायां विकसत् वैश्खर्यां पृथक्तया परामृश्यमानत्वेन लब्धविकासम्।"

(ई० प्र० वि० वि०, खं०1, पृ०, 15)

~त्रिप्रकारा :— **परां विहाय पश्यन्ती मध्यमा वैखरी चेति तिस्रोवाचः। तत्र पश्यन्ती तावदिच्छामयी, मध्यमा ज्ञानशक्तिमयी, वैखरी च क्रियाशक्तिमयी। यथा—**

"प्राक्पश्यन्त्यथ मध्यान्या वैखरी चेति ता इमाः।
परा पराऽपरा देवी चरमा त्वपरात्मिका।।
इच्छादि शक्तित्रितयमिदमेव निगद्यते।
एतत्प्राणित एवायं व्यवहारः प्रतायते।।"

(तं० आ०12, 271-272)

~देवीत्रयात्मिका :— **अभेदे भेदाभेदे स्फुटे च भेदे क्रमेण पश्यन्ती, मध्यमा, वैखरी चेति तिस्रो वाचः। एवं क्रमेणः—परा, परापरा, अपरा चेति देवीत्रयात्मिका तत्तत्क्षेत्रे शोधकत्वेन स्थितेति। यथा—**

"एवञ्च वैखरी पदमेव मध्यमाधामलब्धविजृम्भं स्वांशे परस्परवैचित्र्यप्रथात्मनि स्फुटवाच्यवाचक भावोल्लासे जाते तत्त्वजालमन्तःकृत्य यावदास्ते तावदपराभट्टारिका, तदन्तर्वर्तिमध्यमापदोल्लासे परापरा, पश्यन्त्युल्लासे च स्वरूपतो भगवती देवी चेति शोधकभावेन स्थितिः त्रैधमेवावतिष्ठते।"

(प० त्री० वि०, पृ०, 159)

वाक्त्रयम् :— परां वाचं विहाय पश्यन्ती मध्यमा वैखरीरूपं वाचां त्रयम्। तदपीह परं, सूक्ष्मं, स्थूलं चेति त्रिप्रकारकम्।

~परम् :— **जिगासाद्यानुपरक्तं यदाद्य रूपं जिगासाद्यात्मकेच्छाया अपि प्राक्कोटिभूतं शुद्धं स्पन्दमानं संवित्तत्त्वं, तदेव पश्यन्त्यादेः परं सूक्ष्मतरं स्वरूपं शिवात्मकम्। यथा—**

"एतस्यापि त्रयस्याद्यं यद्रूपमनुपाधिमत्।।
तत्परं त्रितयं तत्र शिवः परचिदात्मकः।"

(तं० आ०3, 247-248)

"जिगासाद्युपरञ्जकरहितमाद्यं रूपमिच्छाया अपि पूर्वकोटिभूतं संवित्तत्त्वं, तदेतद्, परं भेदत्रयम्।"

(तं० आ० वि०, खं०2, पृ०, 232)

त्रिरूपत्वमत्रसूक्ष्मतरशिवशक्तिमहिम्ना बोध्यम् त्रिरूपत्वबीजस्य तत्रावस्थितेः। यथा—

"परचिन्मात्ररूपशिवैकात्म्येनात्र पश्यन्त्यादित्रयमवभासत इत्यर्थः।

(तं० आ० वि०, खं०2, पृ०, 232)

~सूक्ष्मम् :— **जिगासाद्यनुसन्धानमयं वाक्त्रयं सूक्ष्ममिच्छात्मकम्। यथा—**

"अस्मिन्स्थूलत्रये यत्तदनुसन्धानमादिवत्।।
पृथक्पृथक्ततत्त्रितयं सूक्ष्ममित्यभिशब्द्यते।
षड्जं करोमि मधुरंवादयामि ब्रुवे वचः।।
पृथगेवानुसन्धानत्रयं संवेद्यते किल।"

(तं० आ०3, 245-247)

~स्थूलम् :— **व्यक्तं वाक्यत्रयं स्थूलम्। तत्र षड्जादिनादरूपा स्थूला पश्यन्ती, मृदङ्गादिध्वनिः स्थूला, मध्यमा, स्पष्टमुच्चार्यमाणा संस्कृतादिभाषा स्थूला वैखरीति। यथा—**

"तत्र या स्वर सन्दर्भसुभगा नादरूपिणी।।
सा स्थूला खलु पश्यन्ती वर्णाद्यप्रविभागतः।"

(तं० आ०3, 237-238)

"यत्तु चर्मावनद्धादि किञ्चित्तत्रैष यो ध्वनिः।।
स स्फुटास्फुटरूपत्वान्मध्यमा स्थूलरूपिणी।"

(तदेव 3, 241-242)

"या तु स्फुटानां वर्णानामुत्पत्तौ कारणं भवेत्।।
सा स्थूला वैखरी यस्याः कार्यं वाक्यादि भूयसा।"

(तदेव 3, 244-245)

वाक्पञ्चकम् :— महेश्वरानन्देन वाचो विश्लेषणं पञ्चधाकृतं वर्तते। तत्र क्रियाशक्तिरूपा कण्ठेनोच्चार्यमाणा वाग् वैखरी, ज्ञानशक्तिमयी विचारविमर्शानुकूला चिन्तनात्मिका वाङ्मध्यमा, इच्छाशक्तिमयी स्वात्मनि भेदाभेददृष्ट्या प्रमेयांशं विमृशन्ती क्रमरहिता वाक् पश्यन्ती। मयूराण्डरसन्यायेन सर्वमभेदभावेनाहमिति विमृशन्ती वाक् सूक्ष्मा। सैव परमेश्वरस्वरूपानुप्रविष्टा सती परा वाक्। अन्यैराचार्यैः सूक्ष्मैव परेति प्रतिपादितम्। यथा—

"तत्र वैखरीति प्रसिद्धा वाक् ताल्वादिकरणव्यापारोपारूढस्फुरणतया क्रियाशक्तिरित्यध्यवसीयते। मध्यमा च बुद्धिवृत्तिमात्रप्रवर्त्यमानत्वाद् ज्ञानशक्तिः। पश्यन्ती पुनरिच्छा, बहिः प्रसरणाभ्युपगमरूपत्वात् तस्याः, यतः परा वाक् पश्यतीति पश्यन्त्या व्युत्पत्तिः सूक्ष्मा तु शिखण्डयण्डरसन्यायादुक्तवाक्-

-त्रयशबलीभावस्वभावा प्रत्यग्द्रष्टुः परमेश्वस्योद्योग लक्षणा वृत्तिरित्याख्यायते। परा वाक् पुनस्तस्यैव परमेश्वरस्य स्वरूपमनुप्रविशन्ती परिस्फुरति।"

(म० मं०, प०, पृ०, 124)

वाक्यसुधाः — शैवयोगप्रतिपादकः कश्चन ग्रन्थः केनाप्यज्ञातनाम्नाऽऽचार्येण विरचितः। विज्ञानभैरवोद्द्योते शिवोपाध्यायेन ग्रन्थनामोल्लेखपूर्वकं वाक्यसुधाकारिकाः काश्चनोद्धृताः। यथा—

"तत्र दृश्यसम्पृक्तस्य समाधेर्लक्षणं वाक्यसुधायाम् ... . इत्यादिना।"

(वि० भै० उ०, पृ०, 100)

वागीशीः — देवरूपतया भाविता मातृकैव। अस्या नामान्तरे शुद्धविद्या महाविद्या इति। यथा—

"..... महाविद्या सर्वविद्याभवोद्भवा।।
जगतः प्रलयोत्पत्तिविभूतिनिधिरव्यया।
सा एव परमा देवी वागीशीति निगद्यते।।
अष्टवर्गविभिन्ना च विद्या सा मातृकैव तु।"

(स्व० तं०10, 1142-1144)

द्र०:- **'शुद्धविद्या'** इति।

वागीश्वरीः — (1) मायायामधिष्ठातृत्वं भजमाना काऽपि तान्त्रिकी देवता। यथा—

वागीश्वरी सम्प्रत्यशुद्धाध्वप्रमातृत्वान्माया, शुद्धाध्वप्रसवे तु एषैव महामायात्मा भविष्यति, मायारूपायाश्चास्याः शुद्धविद्यास्पर्शो नास्ति; अन्यथा क्रमिककर्मभोगानांयुग पच्छुद्धयर्थमनन्तदेहसृष्टेरयोगात्।"

(स्व० तं०, उ० खं०2, पृ०, 66)

(2) उत्पलदेवस्य जननी।

द्र० :- **'उत्पलदेव'** ~ 'लाट' इति।

वागीश्वरीमन्त्रः —

"ओं वां वागीश्वर्यै नमः।"

(तं० आ० वि०, खं०12, पृ०, 185)

वाजसनेयतन्त्रम् :— आगमिकः कोऽपि ग्रन्थ विशेषः सनामोल्लेखमुद्धृतः परात्रीशिका विवरणे। यथा—

"श्री वाजसनेयतन्त्रे वर्णान् यथोचितं निवेश्योक्तम्:—
इत्येतन्मातृकाचक्रं दिव्यं विष्णुपदास्पदम्।
ज्ञातं गुरुमुखात्सम्यक् पशोः पाशान्निकृन्तति।।"

(प० त्री० वि०, पृ०, 156)

वाजसनेयभट्टारिकाः — ग्रन्थविशेषो य इदानीं नैव लभ्यः। यथा—

"वाजसनेय भट्टारिकायामपिः—
अवधूता निराचारा सर्वभूतान्तरे स्थिता।
क्रीडत्यात्ममयैर्भावैर्बालः क्रीडनकैरिव।।
प्रबुद्धपूर्णभावाभ्यां विभज्यात्मानमात्मना।
अप्रबुद्धप्रबुद्धेन क्रीडार्थं भावयेद्भृशम्।। इति।"

(भा० वि०, पृ०, 6)

वाजसनेयाः — **काऽपि संहिता। यजुर्जेदीया वा, तदन्या वेति परीक्षणीया। यथा—**

"तथा श्रीवाजसनेयायाम्:—
या सा शक्तिः परा सूक्ष्मा व्यापिनी निर्मला शिवा।
शक्तिचक्रस्य जननी परानन्दामृतात्मिका।।
महाघोरेश्वरी चण्डा सृष्टिसंहारकारिका।
त्रिवहं त्रिविधं त्रिस्थं बलात्कालं प्रकर्षति।।"

(शि० सू० वि०, पृ०, 67)

वाणीः — परिपूर्णस्य परमेश्वरस्य पूर्णतामयी पराशक्तिरेव वाणीत्युच्यते, विश्वविमर्शनात्मकशब्दनकारितामाहात्म्यात्। सा च परिपूर्णोऽहं विमर्शः।

द्र०:- **'ऊर्मिः'** इति।

द्र०:- **'काली'** इति

द्र०:- (तं० सा०, पृ०, 27) इति च।

वाद्यतन्त्रम्ः — किमप्यागमिकं शास्त्रम्। यथा—

'तथाहि तदुक्तं श्रीवाद्यतन्त्रे संरुध्य रश्मिचक्रं स्वं पीत्वामृतमनुत्तमम्।
कालोभयापरिच्छिन्नं वर्तमाने सुखी भवेत्।। इति।"

(प० त्री० वि०, पृ०, 35)

वामकतन्त्रम्ः — **त्रिकागमत्रयमध्येऽन्यतम आगमः। एष एव तन्त्रालोकविवेके नामकतन्त्रमित्युक्तः शारदालिप्याम्। नाकारवाकारयोः परस्परं प्रभूतात् साम्याल्लेखप्रमादमूल एव "नामकतन्त्रम्"इति पाठो मुद्रितपुस्तकेषु।**

द्र०:- **'नामक तन्त्रम्'** इति।

'त्रिकम्' :— ~ आगमानाम्' इति च।

वामकर्णाभरणम्ः — ऊकारः। नवात्मकं मन्त्रापिण्डमधिकृत्योक्तं यथा—

"बिन्दुप्राणदण्डनाभिनितम्बवामस्तनकण्ठ वामस्कन्धवामकर्णाभरणाक्षरारब्धः।" इति।

(तं० आ० वि०, खं०12, पृ०, 212)

शारदालिप्यां संयुक्तानि व्यञ्जनान्यधोऽधो लिख्यन्ते बिन्दुश्च सर्वोपरि दीयते। तत एव नवात्मकेऽत्र मन्त्रे बिन्दोः सर्वप्रथमुल्लेखः, सर्वोपरि तस्यैव दर्शनात्।

द्र०:- **'नावत्मकः'** इति।

वामजङ्घाः — साङ्केतिकं नाम औकारस्य। यथा—

"वाम जङ्घा औ इति।"

(तं० आ० वि०, खं०11/2, पृ०, 127)

वामदेवः — बोधभरोल्लासेन प्रमातृप्रमेयभेदं स्वात्मनि स्वीकुर्वन् तस्योपरि च चिच्छक्त्यानन्दसुन्दरामनुप्राणनक्रियां

वमन्निव स्थितो भगवान् स्वच्छन्दनाथः शिवो वामदेव इत्युच्यते। यद्यप्येष भेदकल्पनां कुर्वन् निखिलानपि भावान् स्वात्मनि स्वीकरोति, तथापि भेदभावस्य चितौ संहारमेव कुर्वन् भेदव्यावस्थाया वामत्वेन तिष्ठन्नपि वामदेव इति। सौन्दर्यप्रदत्वेन सुभगत्वेनापि च वामदेवः। भिन्नानां मातृमानमेयानां यत् स्वात्मनि स्वीकरणं तदेव हि तेषां सुभगत्वम्। वामदेवो विष्णुस्थानीयः अविकसितायाः क्रियाशक्तेरत्र प्राधान्याम्। विश्वान् भावान् प्रतिबिम्बवत् स्वात्मनि धारयंस्तैः प्रतिबिम्बैः सुशोभितः सन्नयं तेनापि कारणेन सुन्दरः सन् वाम इति। निजाया चिद्रूपताया रागेण विश्वं रञ्जयन् स्थितोऽयम्। स्वप्नदशाकल्पाऽस्य स्थितिः। स्वच्छन्दनाथस्य वामदेवाख्यं वदनभुत्तराभिमुखं पीतवर्णं च। यथा—

"तस्माद्बोधभरोल्लासविसृष्टस्वपरस्थितिः।
चिदनुप्राणनां विश्वग्वमन्नानन्दसुन्दराम्।।
चिदेकवपुषा विश्वं स्वीचिकीर्षश्चिदात्मनि।
स्वबोधशक्तिवमनात् स देवो वाम उच्यते।।
स्वबोधशक्त्युद्रेकेण यद्यप्येष प्रयच्छति।
भावानां स्ववपुस्तादृक्तथापि परमार्थतः।।
स्वीकर्तुमिच्छन्संहारमेषां कल्पयते भिदः।
अतो भेदव्यवस्थायां वामोऽसौ परमेश्वरः।।
अत्र सौभाग्य निःष्यन्दि तादृज्ञानं प्रतायते
सौभाग्यं सोचयते तेषां भिन्नानां स्वीक्रियैवया।।
भावानां च विचित्राणां भोगाङ्गानां स्वशक्तितः।"
(मा० वि० वा०1, 271-276)

~तत्कलाः — त्रयोदशसंख्याकाः उक्ता, न लक्षिता आगमे। यथा—

"रजा रक्षा रतिः पाल्या काम्या तृष्णा मतिः क्रिया।
ऋद्धिर्माया च रात्रिश्च भ्रामिणी मोहनी तथा।।
मनोन्मनी कला ह्येता वामदेवे त्रयोदश।"
(स्व० तं०1, 57-58)

गणनायामेताश्चतुर्दश, परं तन्त्रे त्रयोदश एव कथिताः इति संशयितोऽयं विषयः।

वामदेवोः — ~भट्टः — योगेश्वरापरपर्यायस्य योगराजस्य शिष्यः। यथा—

"श्रीमद्योगेश्वराचार्यप्रसादासादितस्थितिः।
वामदेवश्चकारेदं जन्ममृत्युविचारणम्।।"
(ज० म० वि०, पृ०, 24)

वामनः— ~भट्टः — (1) वामनदत्ताचार्यः संवित्प्रकाशस्य निर्माता। यथा—

"भट्टश्रीवामनेनाप्युक्तम्ः—
आलम्ब्य संविदं यस्मात् संवेद्यं, न स्वभावतः।
तस्मात् संविदितं सर्वमिति संविन्मयो भवेत्।।"
(स्पं० नि०, पृ०, 48)

द्र०:- 'वामनदत्ताचार्यः' इति।

(2) कोऽपि कालीनयोपासकः। यथा—

"श्रीमद्वामनभानुः क्रमकमलविकासने चतुरः।"
सोमराजपद्यमिदमुद्धृतं जयरथेन
(तं० आ० वि०, खं०3, पृ०, 196)

कदाचिद् वामनदत्ताचार्य एवायं स्यात्।

वामनदत्ताचार्यः — अभिनवगुप्तस्यैको गुरुः, असौ सप्तत्रिंशेऽप्याह्निके नामनिर्देशेन स्मृतस्तन्त्रालोके। वर्णयोगप्रतिपादने पञ्चम आह्निके तु 'गुरुभिः' इति सामान्येन गुरुशब्देन स्मृतः। स च संवित्प्रकाशाख्यस्य शास्त्रस्य निर्माता। यथा—

"नीले पीते सुखे दुःखे संविद्रूपमखण्डितम्।।
गुरुभिर्भाषितं तस्मादुपायेषु विचित्रता।"
(तं० आ०5, 154-155)

"गुरुभिर्वामनदत्ताचार्येण भाषितमिति संवित्प्रकाशे।"
(तं० आ० वि०, खं०3, पृ०, 467)

(2) अद्वयसम्पत्तिवार्तिकाख्यस्य निर्माता। यथा—

"एष एव श्री वामनविरचिते अद्वयसम्पत्तिवार्तिके उपदेशनयो बोद्धव्यः।"
(प० त्री० वि०, पृ०, 198)

वामननाथः — वामनदत्ताचार्य एव स्याद् वामननाथः शिवोपाध्यायेन कृतनामोल्लेखः सपङ्क्तिसमुद्धरणम्। यथा—

"यदादिष्टं वामननाथेनः—
'अप्राणमस्वरं ध्यात्वा पश्यन्त्या निर्विभागया।
चिन्मात्रस्पर्शयोगेन विलीनः स्यात् परे पदे।।' इति।"
(वि० भै० उ०, पृ०, 140)

वामनभट्टः — वामनदत्ताचार्य एवायं भवेत्। यथा—

"भट्ट श्री वामनेनाप्युक्तम्—
'आलम्ब्य संविदं यस्मात्संवेद्यं न स्वभावतः।
तस्मात्संविदितं सर्वमिति संविन्मयो भवेत्।।' इति।"
(स्प० नि०, पृ०, 48)

वामनाथः — अमर्दकमठिकायाः गुरुरभिवगुप्तस्य काले। स चैरकनाथपुत्रोऽभिनवगुप्तस्य गुरुः। अस्मादामर्दमठिका-विज्ञानमभिनवगुप्तेनावाप्तम्। यथा—

"आनन्दसन्ततिमहार्णवकर्णधारः।
सद्दैशिकैरकवरात्मजवामनाथः।"
(तं० आ०37, 60)

वामभूषणम् :— साङ्केतिकं नाम ऊकारस्य। यथा—

"वाम भूषणम् ऊ"
(तं० आ० वि०, खं०11/2, पृ०,127)

वाममार्गः — असौ तान्त्रिकः साधनाक्रमो

यस्मिन्निर्लज्जतया निरर्गलतया च पञ्चमकार-सेवनं विधीयते स्म, तत्सहायतया च नितरां तन्मयीभावे समुदिते सति योगाभ्यासेन भूरिशः सिद्धिलाभो भवति स्म, पर्यन्ते च स्वरूपसाक्षात्कारोऽपि सञ्जायते स्म। इहैव देहे परमेश्वरतांशलाभोऽस्य मुख्यं फलम। सद्यो भुक्तिमुक्ति-लाभश्च द्वितीयं फलम्। हृद्यद्रव्यजातसेवनेनातिसुन्दरोऽयं भोगमोक्षमार्गः। सुन्दरत्वेनैव "वाम" इत्यस्य संज्ञा।

द्र०:- 'वामचारः' इति।

~तद्दोषः — बहुतरैहिकसिद्धिसमाकुलत्वमत्र दोषः। यथा—

"..... वामं सिद्धिसमाकुलम्।"

(तं० आ०37, 27)

बहुतरलौकिकसिद्धि जालैर्बन्धक एव बहुधा भवति, तेन च परमोक्षलाभे बिलम्बो जायते। मकारसेवने कदाचिद्बहिर्मुखतापि सम्भवति, येन साधको विषयभोगलम्पटतायामवतरति। मन्दमतयो जनाः कदाचिद्वाममार्गिणं साधकं दृष्ट्वा तदनुकरणं कुर्वन्तो पतिता भवन्तीति दोषाः वाममार्गे, सत्यपि तस्य सद्यः सिद्धिलाभप्रदत्वे।

वामशासनम्ः — वाममार्गशास्त्रम्।

द्र०:- 'वामाचारः' इति।

वामस्तनः — लकारः। यथा—

"वामः स्तनो लः।"

(तं० आ० वि०, खं०12, पृ०, 202)

वामाः — (1) संसारवमनशीला प्राणिनां ससृतिजाल-प्रवर्धनशीलाशिवस्य तिरोधान शक्तिः। यथा—

"वामा संसारवमना स्वरूपावरणात्मिका।"

उद्धृ०:- (तं० आ० वि०, खं०8, पृ०, 131)

वमनेनसृष्टिकर्तृत्वमस्या व्यज्यते। यथा—

"श्रीमदानन्द भैरवेः—

'वामया विसृजेत्सर्वं .....।

..... प्रभुः।।' इति।"

(स्व० तं० उ०10, पृ०, 484)

(2) बन्धयित्री शिवशक्तिः। यथा—

"वामा संसारवमनात् .....

(उद्धरण)

इत्याद्युक्त्या संसाराविर्भाविका तिरोधानशक्तिरित्यर्थः।"

(तं० आ० वि०, खं०3 , पृ०, 25)

वामाङ्घ्रिः — फ इति। यथा—

"वामाङ्घ्रिः फ।"

(तं० आ० वि०, खं०12, पृ०, 202)

वामाचारः — (1) मद्यमांसादिहृद्यवस्तुप्रयोगप्रधानोऽत एव वामःसुन्दरो हृद्य आचारस्तान्त्रिकः। सद्यो भुक्तिमुक्तिफलप्रदः। यथा—

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्।"

उद्धृ०:- (तं० आ० वि०, खं०1, पृ०, 49)

(2) वामपदस्य मुख्योऽर्थः सुन्दर इति, लाक्षणिक एवार्थो विपरीत इति। ततो वामाचारो हृद्य आचारः। सर्वेऽपि माहेश्वरा वाम-कौल-मत-त्रिकाः हृद्यत्वेन वामत्वेनोक्तास्तन्त्रा-लोकवाक्ये न तत्र वाममार्ग एवभिप्रेतोऽनेन पदेनेति स्मर्तव्यं सुधीभिः।

यथा—

"यदार्षे पातहेतूक्तं तदस्मिन्वामशासने।।

आशुसिद्धयै यतः सर्वमार्षं मायोदरस्थितम्।।"

(तं० आ०37, 5)

वामशासन पदेनात्र त्रिक-कौल-मताद्या अप्युक्ताः। सर्वेऽपि ते यतोऽतीव सुन्दरा हृद्याश्च।

(3) गुह्यो रहस्याचारः इति। यथा—

"वामशब्देन गुह्यं श्री मतङ्गादावपीरितम्।।"

(तं० आ०15, 279)

"रहस्योक्त्या स्मृतं वामं पत्युस्तेजः क्रियात्मकम्।"

उद्धृ०:- म० पा० आ०1-4-25)

(तं० आ० वि०, खं०9, पृ०, 138)

"यतस्तस्मात् स भगवान् वामगुह्यः प्रभाष्यते।"

उद्धृ०:- (म० पा०, तं०1-4-28)

(तं० आ० वि०, खं०9, पृ०, 138)

"वामगुह्यं समाख्यातममृतं खेचरीप्रियम्।

रहस्यं सर्वभूतानां वामशब्देन कीर्त्यते।।"

(तदेव, खं०9, पृ०, 138)

(4) संसृति विपरीततां मुक्तिदशां प्रतिप्रवर्तक आचारः। यथा—

"संसारवामाचारत्वात्सर्वं वामकरेण तु।।

कुर्यात्तर्पणयोगं च दैशिकस्तदनामया।"

(तं० आ०15, 278-279)

"वामः संसारविपरीतो लोकबहिष्कृतो मुक्त्यनुगुणोरहस्य आचारः।"

(तं० आ० वि०, खं०9, पृ०, 137)

वामा शक्तिः — (1) संसार, वमनशीला, पशून् संसृतिप्रवाहे प्रवाहयन्ती शिवस्य शक्तिः। यथा—

"वामा संसारिणामीशा प्रभुशक्तिर्विधायिनी।"

(तं० आ०6, 56)

"वामा संसारवमना .....।"

(तदेव, 57)

"अणुं स्वरूपदृश्वानं वामाधो विनिपातयेत्।"

उद्धृ०:- (तं० आ० वि०, खं०4/1, पृ०, 50)

(2) तिरोधानकरी शिवस्य शक्तिः। यथा—

"..... तिरोभावं तु वामया।"
(ने० तं०, खं०2, 21-44)

(3) वैष्णवादिष्वसच्छास्त्रेषु तावदवरानधिकारिणः प्रवर्तयन्ती शिवस्य शक्तिः। यथा—

"वामाख्यया मायाशक्त्या अधिष्ठिता दर्शनान्तरीया गुर्वाद्याः।"
(तं० आ० वि०, खं०3, पृ०, 41)

(4) ज्ञानशक्तेरपरं पारिभाषिकं नाम वामेति। यथा—

"इच्छाज्ञानक्रियापूर्वाः शक्तयः पञ्च संस्थिताः।
ईशान्यापूरणी हार्दी वामा मूर्तिश्च ता मताः।।"
(शि० सू० वा०1, 89)

परं संशयित एवायं विषयः। यतोऽत्र शक्तय 'इच्छाज्ञानक्रियापूर्वाः' इत्युक्ताः। तासु चिन्निर्वृतिशक्ती नैव गणिते। तत ईशान्यापूरण्याद्याश्चिन्निर्वृतिप्रभृतिरूपिण्यो वा इच्छाज्ञानादिमय्यो वेति न स्पष्टीकृतं ग्रन्थे।

वामेश्वरीः— ~कालीनयेः — **प्रमातृव्यवहारकलनसामर्थ्यरूपायाः काल्याः आगमिकं नामान्तरं श्रीनिशाटनागमे लभ्यमानम्। यथा—**

"वामेश्वरीति शब्देन प्रोक्ता श्रीनिशिसञ्चरे।"
(तं० आ०4, 178)

वामत्वेनास्या अतीव सुन्दरत्वमभिप्रेतं, न विपरीतस्वभावत्वम्।

वामेश्वरीचक्रम् : — जगत्सञ्चालकानां शक्तिव्रातानां समूहः। यथा—

"यत्र वमन्ति विश्वं भेदाभेदमयं भेदसारं च, गृणन्ति उच्चैर्गिरन्ति च भेदसारं, भेदाभेदमयं च अभेदसारमापादयन्ति इति संसारवामाचाराः वामाः शक्तयः, तासाम् ईश्वरी स्वामिनी एकैव भगवती-तदधिष्ठित्वात् वामाचक्रमपिवामेश्वरीचक्रमभिधीयते इति।
(स्प० सं०, पृ०, 20)

वामेश्वरी शक्तिः — वामेश्वरीचक्रस्वामिनी खेचरीगोचर्या- दीनामधिष्ठात्री शिवस्य परा शक्तिः। यथा—

"किञ्च चितिशक्तिरेव भगवती विश्ववमनात् संसारवामाचारत्वाच्च वामेश्वर्याख्या सती, खेचरीगोचरीदिक्चरीभूचरीरूपैः अशेषैः प्रमातृ-अन्तःकरण-बहिष्करणभावस्वभावैः परिस्फुरन्ती।"
(प्र० हृ०, पृ० 28-29)

"तथा च उक्तं ..... भट्टदामोदरेण विमुक्तकेषु—

'पूर्णावच्छिन्नमात्रन्तर्बहिष्करणभावगाः।
वामेशाद्याः परिज्ञानाज्ञानात्स्युर्मक्तिबन्धदाः।।' इति।
(तदेव, पृ०, 30)

"येयं स्पन्दतत्त्वात्मा पराशक्तिः सैव विश्वस्यान्तर्बहिश्च वमनात्संसारवामाचारत्वाच्च वामेश्वरीशक्तिः। तदुत्थापितानि तु खेचरीगोचरीदिक्चरीभूचरीरूपाणि चत्वारि देवताचक्राणि सुप्रबुद्धस्य परभूमिसंचारीणि अप्रबुद्धानां तु अधराधरसरणि प्रेरकाणि।"
(स्प० नि०, पृ०37-38)

वायव्यपुरम्ः — षड्दलमण्डलम्। यथा—

"वायव्यपुरं षडश्रम्, अर्थाद्यकारैर्लाञ्छितम्।"
(तं० आ० वि०, खं०10, पृ०, 207)

वायुः — पञ्चभूतेष्वेकतमः।

~तत्सृष्टिः — **मतद्वयमत्र। केचिन्मन्यन्ते यत् स्पर्शतन्मात्रतत्त्वमेव क्षुभितं सद् वायुरूपतां धत्ते, अपरे कथयन्ति शब्दस्पर्शतन्मात्रे मिलित्वा क्षुभिते सती वायुरूपतया परिणमेते। ततो वायुः शब्दस्पर्शगुणवान्। यथा—**

"स्पर्शतन्मात्रं क्षुभितं वायुः। शब्दस्त्वस्य नभसा विरहाभावात्।"
(तं० सा०, पृ०, 90)

"तदेतत्स्पर्शतन्मात्रयोगात् प्रक्षोभमागतम्।।
वायुतामेति तेनात्र शब्दस्पर्शोभयात्मता।"
(तं० आ०9, 284-285)

एतदिति शब्दतन्मात्रमेव।

वायुबीजम्ः — यकारः। यथा—

"इच्छैवानुत्तरानन्दयाता शीघ्रत्वयोगतः।
वायुरित्युच्यते वह्निर्भासनात् स्थैर्यतो धरा।।"
(तं० आ०3, 158)

"संस्कारलक्षणं वेगमुपाधित्वेन स्वीकृत्यवायुरित्युच्यतेवायुबीजयकाररूपतां। प्राप्तेत्यर्थः।"
(तं० आ० वि०, खं०2, पृ०, 158)

वायुवेगाः — षष्ठस्य लोकपालमन्त्रस्येदं नाम। न स्पष्टमुक्तो जयरथेन मन्त्रोऽयम्।

द्र०:- (तं० आ० वि०, खं०12, पृ०, 201)

द्र०:- **'लोकपालमन्त्राः' इति।**

वारुणः — वकारः। यथा—

"वारुणेन वकारेण।"
(ने० तं० उ०, खं०2, पृ०, 67)

वार्तिकम्ः — (1) अनेन नाम्ना तन्त्रालोकस्याप्युल्लेखः कृतोऽभिनवगुप्ताचार्यवर्यैः। यथा—

"मया च वार्तिके एतद् व्याख्यातम्।"
(ई० प्र० वि० वि०, खं०3, पृ०, 259)

इत्युक्त्वा— अग्रे तन्त्रालोकस्य प्रथमाह्निकस्य श्लोकाः 152 तः 155 यावदुद्धृताः।

(2) श्लोकबद्धाः शास्त्रतत्त्वप्रदर्शिनो ग्रन्थाः सर्वे वार्तिकेति संज्ञयोच्यन्ते स्मेति प्रतीयते अनेनाभिनवगुप्तीयेन वाक्येन।

वार्तिकान्तरम्ः — वरदराजो निर्दिशति यत् शिवसूत्रे वार्तिकान्तरमपि प्रचलितमासीत्। सम्भवतो भट्टभास्करीयं वार्तिकं प्रति निर्देशः स्यादयम्। यथा—

"इति श्री शिवसूत्राणां रहस्यार्थोपवृंहितम्।
प्रागुक्तवार्तिकांशेन संहितं वार्तिकान्तरम्।।"

(व० रा० शि० वा०, पृ०, 45)

परं वरदराजकृतवार्तिकं न भट्टभास्करमतानुसारि। ततः "प्रागुक्तवार्तिकांशेन सहितम्" इति पदसन्दर्भो न सङ्गच्छते, यदि भास्करीयं वार्तिकमत्राभिप्रेतं स्यात्। ततः प्रागुक्तवार्तिकांशः प्रकृतस्यैव वार्तिकग्रन्थस्य प्राङ् निर्मितः कश्चनांशो भवितुमर्हति संक्षिप्तप्रायः, इदञ्च सुविस्तृतं वार्तिकान्तरमिति।

वार्धानीः — अतिलघीयसी कलशी यस्यां शक्रादीनां दिक्पालानामस्त्राणि पूज्यन्ते यागारम्भे यागरक्षाविधौ विघ्नप्रशमनार्थम्। इयं कलशी कश्मीरभाषायां 'वार' इत्युच्यते। यथा—

"तत ऐश्यां दिशि स्थाप्यः स कुम्भो विकिरोपरि।।
दक्षिणे चास्त्रवार्धानी स्थाप्या कुम्भस्य साम्प्रतम्।"

(तं० आ०15, 384-385)

"वार्धान्यपि तथाभूता किन्तु सास्त्रेण पूजिता।"

(मा० वि० तं०8, 103)

"अविच्छिन्नां ततो धारां वार्धान्या प्रतिपादयेत्।"

(मा० वि० तं०8, 105)

वासनाः — जीवोचितः सीमित तत्तत्कर्मकर्तृत्वादि संस्कारः, तत्फलभोक्तृत्वसंस्कारः, कामक्रोधादिसंस्कारः, शमदमादिसंस्काराश्च बहुप्रकाराः।

~प्रभावतः —

द्र०:- 'जीवनान्त वासना' इति।

द्र०:- जीवनान्तक्षणप्रभावः ~वासनावशतःइति च।

~जन्मान्तरप्रदाः — यथा—

"यत्र सोऽनुभवो हेतुर्न जन्मान्तरसूतये।।
तस्यैतद्वासना हेतुः काकतालीयवत् स तु।"

(तं० आ०28, 345-46)

मरणसमयीयोऽनुभवस्तु क्वचित्-क्वचित् तात्कालिकत्वेनोदीयते काकतालीयन्यायेनैवापरजन्मप्राप्तिपूर्वभावी। अपरजन्मनिर्णायिका तु दृढतरा वासनैवेति तात्पर्यम्।

वासवीः — भगवद्गीता टीका।

कश्मीरमण्डले विद्वत्परम्परासु श्रूयते यद्वसुगुप्तेन वासवी नाम भगवद्गीता टीका विरचिताऽभवत्। परमस्याः समुल्लेखाः, समुद्धरणानि चाभिनवगुप्तीय-रामकण्ठीय टीकयोर्न क्वापि लभ्यन्ते, न चाप्यन्यत्र क्वापि ग्रन्थेऽस्य विषयस्य साधकं किमपि प्रमाणं विद्यते। ततो दन्तकथेवेयं परम्परा प्रतिभाति।

कश्मीर शोधविभागस्य मातृकासंग्रहे विद्यते भगवद्गीता टीकाया एको भागः यस्य पत्रेषु 'वा' इति लिखितमस्ति। परं तस्यां टीकायां यो भगवद् गीतायाः श्लोकपाठो, नासौ कश्मीरशाखानुसारी, अपित्तु शाङ्करं दाक्षिणात्यमेव पाठमनुसरति। क्वचित्क्वचित् स्थलेषु मयाऽसौ टीका संक्षेपतोऽवलोकिता। एवं च प्रतिभातं यद्रामकण्ठीयटीकाया संक्षेपरूपमेवासौ टीकेति। अनुमातुं च शक्यते यत् केनापि पण्डितेन स्वकीयपुस्तकालयस्य माहात्म्यवर्धनाय रामकण्ठीयटीकायाः सारमुद्धृत्याभिनवेयं टीका विरचिता, माहात्म्यवर्धनायैव च प्रतिपत्रं "वा" इति लिखितम्। असौ मातृका शोधात्मकमध्ययनमर्हति।

विंशतिकाशास्त्रम् :— भरतपुरे मिश्रगोविन्दशर्मण उद्धारार्थं विरचितो सैद्धदर्शनविद्यारहस्यप्रतिपादकः सुसंक्षिप्तो ग्रन्थः। निर्माता चास्य ग्रन्थस्य तत्र भवानाचार्यामृतवाग्भवः। टीकात्रययुतः प्रकाशितो वर्ततेऽयं ग्रन्थः।

विकरालः — झौ ऊं अथवा झ्रौं इति मन्त्रः। यथा—

"त्रादिः षष्ठस्वरोपेतस्त्रिपदेन समायुतः।।
बिन्दुमस्तकसम्भिन्नो विकरालो वरानने।"

(स्व० तं०1, 79-80)

विकल्पः — (1) विविधा तदतद्रूपात्मिका कल्पना विकल्पः। अथवा विविधत्वेन तदतद्रूपत्वेन शङ्कितस्य विषयस्य कल्पस्तस्यातद्व्यवच्छेदनं विकल्पः।

"विविधा कल्पना विविधत्वेन च शङ्कितस्य कल्पोऽन्यव्यवच्छेदनं विकल्पः, विविधत्वं च वह्नावनग्निसम्भावनासमारोपनिरासेऽसति भवत् द्वयं वह्नयवह्निरूपमाक्षिपति।, तेन विकल्पेऽवश्यं तच्च निश्चेतव्यमतच्च व्यपोहितव्यं भवति।"

(ई० प्र० वि०, खं०1, पृ०, 240-41)

"विकल्पो हि अन्यापोहलक्षणो द्वयं घटाघटरूपमाक्षिपन् अघटाद् व्यवच्छिन्नं घटं निश्चिनोति।"

(प० सा० वि०, पृ०, 33)

(2) संवृत्तिकल्पिताकारं बौद्धमध्यवसायात्मनं यज्ज्ञानं तदेव ज्ञानात्मको विकल्पः। यद्धि सविकल्पं ज्ञानमिति न्यायादिशास्त्रेषु प्रसिद्धं, तज्ज्ञानं शैवदर्शने विकल्प इति कथ्यते। साङ्ख्यशास्त्रीयमध्यवसायरूपं ज्ञानमप्यत्र शास्त्रे विकल्प इत्युच्यते। अशुद्धोऽयं विकल्पः। यच्च वेदान्तिनां "सर्वं खल्विदं ब्रह्मेति," "अहं ब्रह्मास्मीति" च शुद्धं ज्ञानं तदपीह शैवदर्शने विकल्प इत्येव गण्यते। परं शुद्धोऽसौ विकल्पः। शुद्धः सन्नपि बन्धरूप एवेति।

द्र०:- 'हेयः' इति।

~अचिरस्थायी :— यावत् प्राणस्पन्दान्तरात्मकं ज्ञानान्तरं नोदेति तावदेक एव विकल्पः। यथा—

"तस्मात् स्पन्दान्तरं यावन्नोदियात्तावदेककम्।।
विज्ञानं तद्विकल्पात्म धर्मकोटीरपि स्पृशेत्।"

(तं० आ०7, 36-37)

~ अनुभवरूपः — **निर्विकल्पज्ञानसंस्कारजन्यत्वेन विकल्पोऽपि वस्तुतः स्मृतिरूप एव, परं निर्विकल्पानन्तरं सद्य एव सम्पद्यमानत्वेनानुभवायमानतया तस्यानुभवरूपत्वम्। यथा—**

"अन्ये तु — विकल्पोऽपि परमार्थतोऽनुभवसंस्कारजत्वात् स्मृतिरेव, केवलमचिरवृत्तत्वादनुभवस्य सर्वात्मना तदुपरक्तत्वादिदन्तानिर्भा सिनीत्यनु भवायमानतया स्मृतित्वेन न भाति, इति पृथग् विकल्प उच्यते—इत्याहुः।"

(ई० प्र० वि० वि०, खं०1, पृ०, 283)

निर्भासिनी स्मृतिरिति सम्बन्धः।

~अशुद्धः — **मायाकृतावरणो जीवो स्वदेहादिकमेव स्वात्मत्वेन संविदन् किञ्चिन्मात्रं ज्ञातुं कर्तुं च समर्थः सन् वस्तूनां विषयेऽज्ञानात्मकान् यानध्यवसायरूपान् विमर्शान् बुद्धिसाहाय्येन सङ्केतस्मृतिसाहाय्येन च करोति, ते तस्य विमर्शाः अशुद्धो विकल्पः। स्वात्मविषयेऽपि देहाद्यभिमानपूर्वका येऽध्यवसायास्तेऽपि सर्वेऽशुद्धो विकल्पः। क्रयविक्रयादिकः सर्वोऽपि सांसारिको व्यवहारोऽशुद्धविकल्पात्मक एव। एषोऽशुद्धविकल्प एव प्ररूढिं गतः प्राणिनोऽज्ञानम्।**

~अहं प्रत्ययरूपः — **परिच्छिन्नस्वभावं देहं वा प्राणं वा बुद्धितत्त्वं वा, शून्यं वा प्रति योऽयं मायाप्रमातुरहमिति विमर्शः, स देहान्तरादिपदार्थानां व्यपोहनपरत्वेन विकल्पात्मक एवाङ्गीकर्त्तव्यः। अशुद्ध एवायं विकल्पः। यथा—**

"चित्तत्वं मायया हित्वा भिन्न एवावभाति यः।
देहे बुद्धावथ प्राणे कल्पिते नभसीव वा।।
प्रमातृत्वेनाहमिति विमर्शोऽन्यव्यपोहनात्।
विकल्प एव स परप्रतियोग्यवभासजः।।"

(ई० प्र०, 1-6-45)

~द्विप्रकारकः — **अध्यवसायात्मको विकल्पो द्विविधः।**

(1) मायीयः— नीलमिदं सुखमिदमित्यादिरूपः; शुद्धविद्यात्मकः — अहमिदमिति वा, इदमहमिति वा। यथा—

"प्रमातृ प्रमेयात्मनि भावौघे, स्फुटं कृत्वा, स्वात्मनः सकाशादन्यापोहरूपत्वेन भेदसंधायकत्वान्नैशं — मायीयमुच्यते .....'

तदेव विकल्पनं पुनः 'सर्वदिमहमेव' इत्येवं—रूपम्, अतं एव समस्तार्थपरिपूर्णस्वात्मैकनिष्ठम्, अत एवालं—पर्याप्तं सत् शुद्धविद्यात्मकमुच्यते।"

(तं० आ० वि०, खं०3, पृ०, 116-117)

निशा=माया, नैशं=मायीयम्।

~न वस्तुशून्यः — **बौद्धाः विकल्पं वस्तुशून्यं मन्यन्ते तथैव पातञ्जला अपि। परं विकल्पस्य या प्रकाशमानता सैव तस्य वस्तुता। न हि प्रकाशोऽवस्तुभूत इति। यथा—**

"नहि विकल्पेषु प्रतिभासमानमवस्तु तत्- इति ह्युक्तम् 'प्रकाशतैव वस्तुत्वम्' इति।"

(ई० प्र० वि०, खं०2, पृ०, 39)

~बन्धरूपः — **सर्वोऽपि विकल्पो बन्ध एव। निर्विकल्पैव स्थितिर्वास्तविकः परश्च मोक्षः। यथा—**

"परमार्थविकल्पेऽपि नावलीयेत पण्डितः।
को हि भेदो विकल्पस्य शुभे वाप्यथ वाशुभे।।"

उद्धः- (तं० आ० वि०, खं०3, पृ०, 7)

~बौद्धानाम्ः — **ज्ञानस्य शब्दोपरञ्जितत्वेन यो विमर्शः स एव विकल्पः। यथाहुर्बौद्धाः—**

"शब्दा रूषणया ज्ञानं विकल्पः किल कथ्यते।"

(तं० आ०7, 33)

~(नोपपन्नः): — **सर्वेषां ज्ञानानां क्षणिकत्वात् क्रमिकां शब्दारूषणां कः सम्पादयेत्, कस्यापि स्थिरस्याविद्यमानत्वात्। ततो विकल्पो नैव सम्भवेत् बौद्धमते। यथोक्तम्—**

"सा च (शब्दारूषणा) स्यात् क्रमिकैवेत्थं, किं कथं को विकल्पयेत।"

(तं० आ०7, 34)

"क्रमिकत्वाद्विकल्पस्योदितानां तत्क्षणानां प्रध्वस्तत्वान्नवानां चानुदयात् को नु कश्चित् कल्पितोऽपि विकल्पात्मा प्रमाता। किमुत्पन्नप्रध्वस्तप्रकल्प्यं पूर्वापरानुसन्धानादेरभावाच्च कथं विकल्पयेत्।"

(तं० आ० वि०, खं०4/2, पृ०, 26)

~शाक्तभूरूपः — **पशोर्या विकल्पज्ञानदशा सा तु परमार्थतः शाक्तज्ञानदशैव। परं पशोः सङ्कोचसम्भिन्नत्वेन नासौ तस्य शाक्तोपायदशानापि मोक्षदा। यथा—**

"एवं वैकल्पिकी भूमिः शाक्ते कर्तृत्ववेदने।
यस्यां स्फुटे, परं त्वस्यां सङ्कोचः पूर्वनीतितः।।"

(तं० आ०1, 217)

~शुद्धः — **यथास्थितं सत्यतत्त्वाध्यवसायात्मकं विकल्पज्ञानं शुद्धो विकल्पो, यथा— अहं सर्वत्र, मयि सर्वम्, सर्वं शिव एव इत्यादि। मायाप्रभावाद्दूढस्य देहादिप्रमातृताद्यात्मनोऽशुद्धस्य बन्धात्मकस्य विकल्पस्य यः स्थिरः संस्कारस्तस्य क्षयकरोऽयं शुद्धो विकल्पो, यदि नियमेनाभ्यस्येत। एष मोक्षात्मको विकल्पः। यथा—**

"विकल्पबलादेव जन्तवो बद्धमात्मानमभिमन्यन्ते, सोऽभिमानः संसारप्रतिबन्धहेतुः, अतः प्रतिद्वन्द्विरूपो विकल्प उदितः संसारहेतुं विकल्पं दलयति। इत्यभ्युदयहेतुः। स चैवं रूपः समस्तेभ्यः परिच्छिन्न स्वभावेभ्यः शिवान्तेभ्यस्तत्त्वेभ्यो यदुत्तीर्णमपरिच्छिन्नसंविन्मात्ररूपं, तदेव च परमार्थः, तद् वस्तु व्यवस्थास्थानम्, तद्विश्वस्यौजः, तेन प्राणिति विश्वं, तदेव चाहम्। अतो विश्वोत्तीर्णो विश्वात्मा चाहमिति।"

(तं० सा०, पृ० 21)

~हेयः — **विकल्पोऽशुद्धो वा शुद्धोऽपि वा सर्वो हि**

वस्तुत आपेक्षिकत्वेन संसारदशैव निर्विकल्पतैव हि परो मोक्षः। शुद्धविकल्पस्य निर्विकल्पदशारोहणोपायत्वेनैवोपायतयोपादेयता, न परमार्थतया। पारमार्थ्येन निर्विकल्पतैवोपादेया, न विकल्पता। शुद्धविकल्पो यतो निर्विकल्पतोपायभूतस्तत एवासावापेक्षिकत्वेनैव मोक्ष इति गण्यते। यथा—

"परमार्थविकल्पेऽपि नावलीयेत पण्डितः।
को हि भेदो विकल्पस्य शुभे वाऽप्यथवाऽशुभे।।"

उद्धः- (तं० आ० वि०, खं०3, पृ०,7)

विकल्पनिर्ह्रासः — यदा साधकः विकल्पहानेनोपायेन निर्विकल्पपरिगृहीतेष्वेत भावेषु परमेकाग्रत्वमवलम्ब्य 'अहमिदम्' इत्येवं साक्षात् पश्यति तथाऽभ्यासक्रमपरिपक्वतायां तस्य स्वाभाविकी मायाश्रिता विकल्पनशीलता क्षयं याति; ततश्च निजां निर्विकल्पां शिवतां "अहम्" इत्येव संवेत्ति स्वयमेव। स एव विकल्पनिर्ह्रासाभ्यासः शाक्तोपायो, निर्विकल्पैव च या स्वात्मसंवित्तिस्तस्या एवाभ्यासः शाम्भवोपायः। यथा—

"सोऽयं सर्गो यदा विकल्पहानक्रमेण तस्मिन्निर्किल्पकपरिगृहीत एव स्पष्टाभेऽर्थ एकाग्रत्वमवलम्ब्य 'अहमिदम्' इत्यैश्वर्यपरामर्शपदं भवति तदाऽन्तर्लक्ष्यबहिर्दृष्टिनिमेषोन्मेषपरिहारोपदेशदिशाक्रमेणाभ्यासतारतम्येन पशोः पशुत्वं प्रतिहन्तीश्वरत्वं च दर्शयति।"

(ई० प्र० वि०, खं०2, पृ०, 265-266)

अभ्यासक्रमेऽहमिदमिति विमर्शः। पर्यन्ते पुनर् "अहम्" इत्येव। यथा—

"तमेव च विकल्पनिर्ह्रासं यदि परिशीलयति, तदाऽनवरतनिर्विकल्पकसंवेदनरत्नमालाभूषितहृदयः परमेश्वरपदमाविशतीति।"

(ई० प्र० वि० वि०, खं०3, पृ०, 389)

"यथोक्तः —

'कैवल्यं जायते सद्यो नेत्रयोः स्तब्धमात्रयो': इति।"

(वि० मे०, 113)

विकल्पप्रसरः — सततगत्या मायीयाध्यवसाय परम्परायाः-प्रचलनं येन स्वप्नेऽपि प्राणी विकल्पानुद्भावयत्येव सततम्।

~शिवतादर्शकः — समावेशरसाभ्यासफलतः विकल्पप्रसरे प्रचलत्यपि साधकस्य शिवता न तिरोधीयते, तेनासौ विकल्पेषु प्रसरत्स्वपि शिव एव, स एव च जीवन्मुक्तः। यथा—

"न प्रत्यगात्मा नाम कश्चिदन्योऽहं, किन्तु ग्राह्यग्राहकप्रकाशघनः परमेश्वरो यः, स एवाहम्; स चाहमेव, नान्यः कश्चित्। ततो विकल्पसृष्टिरपि मम स्वातन्त्र्यात्मा विभवः — इत्येवं विमर्शे दृढीभूते विकल्पा अप्यस्य महाविमर्शपतिता अविकल्पीभवन्ति"

(ई० प्र० वि० वि०, खं०3, पृ०, 393)

द्रः- (ई० प्र० वि०, खं०2, पृ०, 267) इति।

विकल्पभेदाः — अध्यवसायः, स्मृतिः, प्रत्यभिज्ञा, उत्प्रेक्षा, विकल्पना, अतिशयोक्तिः, अन्ययोगव्यवच्छेदः, अयोगव्यवच्छेदः, सन्देहः, भ्रान्तिः, इत्याद्या नामरूपविमर्शसम्भिन्नाआभासविशेषाः विकल्पस्यैव प्रकाराः। यथा—

"स इत्यनुसन्धाने स्मृतिः, सोऽयमित्यनुवेधे प्रत्यभिज्ञा, स इवायमित्यनुरोधे उत्प्रेक्षा, स एवायमित्यनुयोगेव्यवच्छेदः, इत्यादयो विकल्पभेदाः अभिलापभेदमूला एव।"

(ई० प्र० वि० वि,०, खं०1, पृ०, 115)

विकल्पसंस्कारः — याथार्थिकवस्तुस्थितिविमर्शकस्य शुद्धस्य विकल्पस्य स्फुटतमा दृढतमा च स्थितिः। स च विरुद्धविकल्पानुदयपूर्वकं शुद्धविकल्पपरम्पराभ्यासेन सम्भवति। यथा—

विरुद्ध विकल्पान्तरोदयाभावात् ..... शाक्तोपाय निरूपित नीत्या "जात' एव स्फुटतम विकल्प स्वरूपासादनात्मनि 'संस्कारे' ....।"

(तं० आ० वि०, खं०3, पृ०, 310)

~तत्क्रमः — (1) प्रथमं भावनाबलाद् यः शुद्धौ विकल्पः समुदेति सोऽस्फुटः। अभ्यासेन स एव स्फुटतां प्रत्युन्मुखतां याति। ततस्तृतीये सोपाने स एव स्फुटताप्नुवँस्तुरीय एव स्तरे प्रस्फुटितो भवति। यथा—

"चतुर्ष्वेव विकल्पेषु यः संस्कारः क्रमादसौ।
अस्फुटः स्फुटताभावी प्रस्फुटन्स्फुटितात्मकः।।"

(तं० आ०4,4)

(2) अभ्यासबलेन विकल्पज्ञाने शुद्धतायाः संस्कारः क्रमेण सातिशयतां प्राप्नुवन् स्फुटतां याति ततः स्फुटतरतां, तदन्तरं चासौ स्फुटतम इति कथ्यते। तदमी षट्कोटयः शुद्धिसंस्कारस्य। पूर्वं चतुर्विधतयोक्त इदानीं षड्विध इति। यथा—

"ततः स्फुटतरो यावदन्ते स्फुटतमो भवेत्।"

(तं० आ०4,5)

(3) विकल्पो यद्यपि स्वयं चिन्मात्ररूप एव वस्तुतः, तथापि निश्चयात्मा सन् साधकस्यापि स्वस्वातन्त्र्यनिश्चायको भवति। यथा—

"विकल्पो नाम चिन्मात्रस्वभावो यद्यपि स्थितः।
तथापि निश्चयात्मासावणोः स्वान्त्र्ययोजकः।।"

(तं० आ०5,5)

ततः स्वातन्त्र्यानुभूतिस्तस्य फलम्।

(4) स्फुटतमविकल्पशुद्धिसंस्कारा संविदनायासमेव निर्विकल्पपारमेश्वरसंविद्रूपतामभ्येति। ततो विकल्पसंस्कारतारताम्यपराकाष्ठा निर्विकल्पसमावेशोपायभूता। तस्य च निर्विकल्पस्य समावेशास्याभ्यासः स्वात्मप्रत्य- भिज्ञात्मकः सद्यो भैरवभावापादको जीवन्मुक्तिलक्ष्मी विकासकः। तेनासौ योगी शरीरस्थ एव यदिच्छति तज्जानाति करोति च। यथा—

"ततः स्फुटतमोदारताद्रूप्य परिवृंहिता।
संविदभ्येति विमलामविकल्पस्वरूपताम्।।"
(तं० आ०4, 6)

~तदुपायः — **सततं निजस्य भैरवरूपत्वस्य पुनः पुनर्विकल्पज्ञानेन यद्विमर्शनस्याभ्यासस्तेनैव क्रमेण विकल्पेऽशुद्धिः गलति शुद्धिश्च सुसंस्कृता भवन्ती स्फुटतमां स्थितिमायाति। अन्ते च निर्विकल्पः शिवभावसमावेशः सिद्धो भवति। यथा—**

"अतश्च भैरवीयं यत्तेजः संवित्स्वभावकम्।
भूयो भूयो विमृशतां जायते तत्स्फुटात्मता।।"
(तं० आ०4,7)

विकल्पोद्भूतिमूलम्ः — ब्राह्मद्याः परमेश्वरस्य शक्तय एव घोरघोरतररूपतया विचरन्त्यः ककारादिवर्णरूपिण्यः सत्यः पशुं विकल्पन व्यापारेषु प्रेरयन्ति। ताभिः प्रेर्यमाणोऽसाववश इवाशुद्धेषु विकल्पेष्वेवाहरहः संलग्नो भवति। न पुनरविकल्पं निजमैश्वर्यं पश्यति। यथा—

"ईश्वरस्य परामर्शरूपतया शब्दराशिलक्षणस्य या शक्तिः स्वरूपविश्रान्तिलक्षणपारमैश्वर्योपरोधप्रयोजना ब्राह्मादिदेवताचक्रमयी तैस्तैः ककारादिवर्णवैचित्र्यैर्विचित्रा, तया यासौ विकल्पक्रिया तस्य पशोरेकत्र निरूढ्यभावाच्चञ्चला, तेन 'मित्रमयं शत्रुरयम्' इत्यादि- वर्णवैचित्र्यानुविद्धतया विकल्पनक्रियया तदात्मन ईश्वरस्वभावस्यैव पशोरसाधारणी सृष्टिः।"
(ई० प्र० वि०, खं०2, पृ०, 264)

विकिरः — तिललाजादिमिश्रः पूजासाधनविशेषः। एष तावद् यागादौ दिक्षु विकीर्यते। तत एव विकिरः इति। यथा—

"कृत्वान्तर्यागमादाय धान्याद्यस्त्रेण मन्त्रितम्।
दिक्षु क्षिपेद्विघ्ननुदे संहृत्यैशीं दिशं नयेत्।।"
(तं० आ०15, 369)

"तिला लाजा यवाश्चेव दूर्वाः सिद्धार्थकाः शुभाः।
कुसुमानि च शुक्लानि ससुगन्धीनि भूरिशः
ईषच्चन्दनपङ्केन मिश्रोऽयं विकिरः शुभः।"
उद्धः- (तं० आ० वि०, खं०9, पृ०, 187)

विक्षिप्तदीक्षाः — पुत्रकदीक्षाकर्मविस्तारः। यथा—

"इति श्रीतन्त्रालोके विक्षिप्तदीक्षाप्रकाशनं नाम सप्तदशमह्निकम्।"
(तं० आ० वि०, खं०10, पृ०, 176)

अत्र विक्षिप्तेति पदं संशयितमिव प्रतिभाति। आह्निकेऽत्र शिवतादात्म्यदा दीक्षाविधीनां विस्तरेण प्रतिपादना वर्तते। तत्र विक्षिप्तेति पदस्य कथं योजनेति संशयः। मूलग्रन्थे चाह्निकस्यारम्भे यथा—

"अथ भैरवतादात्म्यदायिनीं प्रक्रियां ब्रुवे।"
(तं० आ०17, 1)

इत्युक्तमन्ते चः—

"इत्येषा कथिता दीक्षा जननादिसमन्विता।।"
(तदेवः—17, 122)

इत्येवमुपसंहृतमाह्निकम्। व्याख्यातं चान्ते

"जननादि समन्वितेति विस्तृतेत्यर्थः।"
(तं० आ० वि०, खं०10, पृ०, 176)

तदिमाह्निके विस्तृतदीक्षाप्रकरणमित्युचिताभिधानम्। विक्षिप्तदीक्षेति लेखकप्रमादमूलको भवेत् पाठः।

विग्रहः — ब्रह्मादिकारणानामन्येषां वा देवाधिदेवानां शरीरं ध्येयतया तत्तत्फलप्रेप्सूनां कृते समुपदिष्टम्। यथा—

"ब्रह्मादिकारणानां तु विग्रहं यः सदा स्मरेत्।
पूर्वोक्तलक्षणं यच्च तन्मयत्वमवाप्नुयात्।।"
उद्धः- (तं० आ० वि०, खं०1, पृ०, 102)

विचार :— प्रमाणोपन्यासपूर्वको वस्तुस्वभावविमर्शः। यथा—

"एवमिच्छापूर्वकं प्रमाणस्य प्रवर्तनं संकल्पप्रयत्नरूपं विचार उच्यते।"
(ई० प्र० वि० वि०, खं०3, पृ०, 175)

विचित्रोपायताः — शैवदर्शनेऽधिकारिसामर्थ्यरुच्यादिभेदानुसारं विचित्राणानामुपायानामुपदेशः, सर्वजनोपकारित्वादस्य। यथा—

"तस्मिन्विषयवैविक्त्याद्विचित्रफलदायिनि।
चित्रोपायोपदेशोऽपि न विरोधावहो भवेत्।।"
(तं० आ०35, 25)

"चित्तभेदान्मनुष्याणां शास्त्रभेदो वरानने।
व्याधिभेदाद्यथा भेदो भेषजानां महौजसाम्।।
यथैकं भेषजं ज्ञात्वा न सर्वत्र भिषज्यति।
तथैकं हेतुमालम्ब्य न सर्वत्र गुरुर्भवेत्।।"
उद्धः- (तं० आ० वि०, खं०3, पृ०, 55)

विज्ञानकेवलः — (1) विज्ञानाकलः। ऐश्वर्येण हीनः शुद्धसंविन्मयः सांख्यपुरुषप्रायः प्रमाता। यथा—

"जीवो वै केवलस्तत्र आत्मज्ञानक्रियान्वितः।
बन्धनाशेषनिर्मुक्तः सत्तामात्रस्वरूपकः।।
समस्ताध्वपदातीतः शुद्धविज्ञानकेवलः।
गृह्णाति नापरं भावं न परं च शिवात्मकम्।।
परापरविनिर्मुक्तः स्वात्मन्यात्मा व्यवस्थितः।"
(स्व० तं०4, 388-390)

द्रः- **'विज्ञानाकलाः'** इति।

(2) विज्ञान— बोधरूपत्वमेव केवलम् ऐश्वर्यविहीनं येषां ते। विज्ञानकेवलाः प्रमातारः। यथा—

"विज्ञानं बोधात्मकं रूपं 'केवलं स्वातन्त्र्यविरहितमेषामिति।"
(ई० प्र० वि०, खं०2, पृ०, 224)

विज्ञानाकलानां प्रकाशरूपतायाः स्वस्याः अभिव्यक्तिर्भवति, परं तेषां विमर्शरूपता सुषुप्तेवासञ्चेत्यमाना तिष्ठति। तत एव ते स्वातन्त्र्यहीनाः प्राणिनः।

(3) ये— ऐश्वर्यरहिताः, संसारबन्धनान्मुक्ताः अंशेनाणवमलयुक्ताः, वैवर्तिक वेदान्त सिद्धान्तमनुप्रपन्नाः सन्ति, येषां च बोधात्मकं विज्ञानमस्ति ते विज्ञानकेवलाः प्रोक्ताः। कवलमेत तेषां तद्विज्ञानमात्रं नैश्वर्यचमत्कारयुक्तमिति। यथा—

"स्वातन्त्र्यहानिरूपांशाणवमलाञ्चिता इमे
मुक्ता वेदान्तसिद्धान्तब्रह्मभावगता इव।।
बोधात्मकं तु विज्ञानं स्वातन्त्र्यरहितं यतः।
रूपमेषामतः प्रोक्ता इमे विज्ञानकेवलाः।।"
(पू० प्र० वि०, 494-495)

विज्ञानकेवलीः—

द्र०:- **'विज्ञानाकलाः'** इति।

विज्ञानकौमुदीः — भट्टानन्दकृता विज्ञानभैरवस्य टीका। विज्ञानभैरवोद्द्योतात् प्राक्तनेयम्। परं नैतस्यास्तथाविधं माहात्म्यं यथाविधं विज्ञानभैरवोद्द्योतस्य। इयमेव शिवोपाध्यायेन "वृत्त्यन्तराद्" इति निर्दिष्टा भवेत् कदाचित्। 4774 तमे कलिसम्वत्सरे निर्मितेयं तदनुसारं 1663 ई० इत्यस्याः निर्माणकालः। शिवोपाध्यायेन सन् 1760 ई० प्राये वत्सरे विज्ञानभैरवोद्द्योतो निर्मितः। यथा—

"विज्ञानतत्र विवृतिः कृतसंग्रहेयं
वृत्त्यन्तरात्क्वचिदपि स्वमतेर्विलासात्।"
(वि० भै० उ०, पृ०, 143)

"वेद सप्तर्षिवेदान्त्य युगाब्दमद्युपधुतौ।
विज्ञानकौमुदीमेतां महानन्दो व्यकासयत"।।
(वि० कौ०, पृ०, 63)

विज्ञानदीक्षाः — मन्त्रप्रयोगपूर्वकं दृष्टि निपातनेन पुत्रकस्य क्रमेण निर्विकल्पसाक्षात्कारदशापादनम्। यथा—

"यदा विज्ञानदीक्षां तु कुर्याच्छिष्यं तदा भृशम्।
तन्मन्त्रसंजल्पबलात् पश्येदाचा विकल्पकात्।।"
(तं० आ०16, 249)

विज्ञानभट्टारकः — विज्ञानभैरव एव विज्ञानभट्टारक इत्युक्तो महार्थमञ्जरीपरिमले। सम्भवतो दक्षिणभारते 'विज्ञानभट्टारक' इत्येवास्याभिधानं प्रसिद्धमभूत्।

द्र०:- म० मं० प०, पृ०, 89, 107, 112, 122, 140, 143, 145, 146, इति।

विज्ञानभैरवः — (1) शैवयोगप्रक्रियोपदेशक आगमिको ग्रन्थविशेषः 161 श्लोकपरिमाणः। अत्र प्रारम्भे परतत्त्वस्वरूपनिरूपणम्, तदनन्तरं द्वादशाधिकशतसंख्याकानां योगप्रक्रियाणामुपदेशस्तदन्ते त्रिकाचारोचितज्ञानयोगप्रक्रियाणां प्राणयोग प्रक्रियाणां च कासामपि निरूपणं कृतं वर्तते। इदं शास्त्रं शिवोपनिषदिति नाम्ना कैश्चिद् दार्शनिकैः सिद्धैः समुल्लिखितम्। दाक्षिणात्याश्च महेश्वरानन्दादय इमं ग्रन्थं विज्ञानभट्टारक इति नाम्नोल्लिखिन्ति। यथा—

"निस्तरङ्गोपदेशानां शतमुक्तं समासतः।
द्वादशाभ्यधिकं देवि यज्ज्ञात्वा ज्ञानविज्जनः।।"
(वि० भै०, 139)

"श्रुतं देव मया सर्वं रुद्रयामलसम्भवम्।
त्रिकभेदमशेषेण सारात्सारविभागशः।।
अद्यापि न निवृत्तो मे संशयः परमेश्वर।"
(वि० भै०, 1,2)

(2) रुद्रयामलतन्त्रस्य विशेषः कश्चन खण्ड एवायं विज्ञानभैरव इति नाम्ना प्रसिद्धः। यथा—

"रुद्रयामलतन्त्रस्य सारमद्यावधारितम्।
सर्वशक्तिप्रभेदानां हृदयं ज्ञातमद्य च।।"
(वि० भै०, 162)

~तद् विषयसूची :—

(1) पर तत्त्व निरूपणम् — 1-21 कारिकाः
(2) 112 शिवयोगप्रक्रियाणां निरूपणम् 22-139 "
(3) योगफलकथनम्— 140-142 "
(4) शैवयोगोचितानां ध्यानहोमजपः पूजादीनां निरूपणम्— 143-153 "
(5) अजपाजपाख्यहंस वागीश्वरी निरूपणम्— 154-156 "
(6) अधिकारिनिरूपणमुपसंहारश्च—157-163 "

विज्ञानभैरवविवृतिः — विवृतिनाम्नी टीका विज्ञानभैरवे क्षेमराजेन लिखिताऽभूत्। सा तु शिवोपाध्यायस्य काले नष्टप्राया आसीत्। असौ "श्रुतं देव मयेत्यादि" प्रथमपद्याद् "ऊर्ध्वे प्राणो ह्यधो जीव" इति 24 तमं पद्यं यावदेव शिवोपाध्यायेन लब्धा, स्वकृते विज्ञानभैरवोद्द्योते च सैव तदवधि निबद्धा। अग्रे तस्या अलभ्यत्वादेव शिवोपाध्याये न निजा उद्योत नाम्नी टीका विनिर्मिता। यथा—

"श्रुतं देव मयेत्यादिप्रश्नग्रन्थार्थबन्धनम्।
ऊर्ध्वे प्राणादिपद्यान्तं क्षेमराजकृतं शुभम्।।
ततः परमुपाध्याय(मुपादाय)कुशकाशावलम्बनम्।
यद्वृत्तिग्रन्थकाकलपुस्तकं हस्तगोचरम्।।
भूर्जात्मकं वा नायातं जग्धं कालघुणेन तत्।
दग्धं वा वह्निनाच्छिन्नमत्र साक्षी महेश्वरः।।"
(वि० भै०, पृ०, 143)

उपाध्याय इति पदस्थाने उपादाय इति पदं भवेत् शुद्धपाठः।

विज्ञानवादप्रौढ़िः — अङ्गीकृतासावाचार्याभिनवगुप्तेन। यथा—

"एतच्च सर्वस्य संवित्परीक्षानिपुणस्य सम्मतमेवेत्याह बौद्धैरपीति।"

(ई० प्र० वि० वि०, खं०2, पृ०, 360)

अत्र संवित्परीक्षानिपुणत्वं विज्ञानवादिनामुक्तम्।

विज्ञानवेधः — वेधदीक्षाविशेषः। यथा—

"विज्ञानमष्टधा यद्घ्राणादिकबुद्धिसंज्ञकरणान्तः।
तत् स्वस्वनाडिसूत्रक्रमेण संचारयेच्छिष्ये।।
अभिमानदार्ढ्यबन्धक्रमेण विज्ञानसंज्ञको वेधः।
हृदयव्योमनि सद्यो दिव्यज्ञानार्कसमुदयं धत्ते।।"

(तं० आ०29,263-264)

रहस्यात्मिका इमाः एवंविधाः दीक्षाप्रक्रियाः कथं विधीयन्ते इति नैव जानाति कोऽपि वर्तमाने काले।"

विज्ञानाकलप्रलयाकलाः — श्री शम्भुनाथोपदेशानुसारमुभयेऽप्येते सुषुप्तिपदभाज एव। अन्तरं त्वेतावन्मात्रं यत् प्रलयाकलाः अशुद्धाः विज्ञानाकलश्च शुद्धा इति। यतः प्रलयाकलाः शून्यपदनिष्ठा विज्ञानाकलाः पुनरैश्वर्यरहितशुद्धसंविन्निष्ठाः इति।

यथा—

"शुद्धा एव तु सुप्ता ज्ञानाकलतां गताः .....।"

(तं० आ०15, 340)

"सुप्ता इति अप्रबुद्धाः।"

(तं० आ० वि०, खं०9, पृ०, 171)

~तत्त्वभेदनेः — **यद्यप्येते न किमपि विदन्ति प्रबुद्धाश्च सन्तो मन्त्रादिदृष्टयैव विदन्ति नाकलदृष्टया तथापि तत्त्वभेदनाख्ययोगधारणासु भावनाबलात् ताभ्यां वेद्यताऽवरेषु तत्त्वेषु कल्प्यते। इति पाञ्चदश्यादिकं सिद्धम्। यथा—**

"अतः प्रभोत्स्यमानत्वे यानयोर्बोधयोग्यता।।
तद्बलाद् वेद्यतायोग्यभावेनैवात्र वेद्यता।
तथाहि गाढनिद्रेऽपि प्रियेऽनाशङ्कितागताम्।।
मां द्रक्ष्यतीति नाङ्गेषु स्वेषु मात्यभिसारिका।"

(तं० आ०10, 140-142)

वेदनयोग्यतैवात्र वेद्यता। यथा—

"..... तदानीं योग्यतैव सा।
वेद्यता तस्य भावस्य भोक्तृता तावती च सा।।
लयाकलस्य चित्रो हि भोगः केन विकल्प्यते।

(तं० आ०10, 143-`44)

"भोगो हि देशकालावस्थास्वालक्षण्यादिवैचित्र्येण नानाविधो भोक्तृणां व्यवतिष्ठते, यथा स्फुट एव सुखदुःखाद्यनुभवो भोग इति न नियन्तुमुचितमस्फुटेऽपि तथाभावात्।"

(तं० आ० वि०, खं०7, पृ०,102)

विज्ञानाकलाः — (1) स्वात्मानं प्रकाशैकरूपं पश्यन्तोऽपि ये क्रियास्वातन्त्र्यमयं निजं पारमैश्वर्यात्मकं स्वभावं नाभिमन्वते ते प्रशान्तचिद्रूपाः सांख्यपुरुषप्रायाः प्राणिनो विज्ञानाकलाः। विज्ञाने स्वस्वरूपबोधे सत्यप्यकलाः कलनात्मकैश्वर्यविहीनाः सुषुप्तप्रायाः प्राणिनः। किञ्च कलया तत्परिणामभूतैश्च तत्त्वैर्विरहिताः सन्त एते विज्ञानेन स्वरूपबोधेन अकलाः कलायाः मुक्ताः इति। यथा—

"शुद्धबोधात्मकत्वेऽपि येषां नोत्तमकर्तृता
निर्मिताः स्वात्मनो भिन्ना भर्त्रा ते कर्तृतात्यात्।।"

(ई० प्र०, 3-2-6)

"ते च सांख्यपुरुषप्राया विज्ञानाकला उच्यन्ते।"

(ई० प्र० वि०, पृ०,65-66)

"विज्ञानेन बोधमात्ररूपत्वेनाकलाः कलोपलक्षिताशुद्धविद्यारागादियोगाभावाद् भोगशून्या इत्यर्थः।"

(ई० प्र० वि० वि०, खं०3, पृ०, 318)

(2) एक प्रकारकेणाणवेन मलेनाविष्टा अपि मायीयमलराहित्यात् कार्ममलस्याकिञ्चित्करत्वे सति निष्कर्मावस्थायां सुचिरं तिष्ठन्तः प्रमातारो विज्ञानाकलाः। यथा—

"निष्कर्मा हि स्थिते मूलमलेऽप्यज्ञाननामनि।।
वैचित्र्यकारणाभावान्नोर्ध्वं सरति नाप्यधः।
केवलं पारमित्येन शिवाभेदमसंस्पृशन्।।
विज्ञानकेवली प्रोक्तः शुद्धचिन्मात्रसंस्थितः।"

(तं० आ०9, 90-92)

"विज्ञानं बोधात्मकं रूपं केवलं स्वातन्त्र्य रहितमस्येति।"

(तं० आ० वि०, खं०6, पृ०, 78)

विज्ञानकेवलो, विज्ञानकेवली चेति नामान्तरेऽस्य। शून्यसमाधिस्थ योगिप्रायः प्रमाता विज्ञानाकलः।

यथा—

"प्रलयाकलविज्ञानाकलौ हि प्रसुप्तभुजगशून्यसमाधिस्थयोगिप्रायत्वान्न किञ्चिज्जानीतः।"

(तं० आ० वि०, खं०7, पृ०, 95)

द्र०:- (प्र० हृ०, पृ०7,12; पू० प्र०1, 156) **इति।**

~ऊर्ध्वगतिशीलाः — **(1) सुचिरं कालं शून्यप्रायायां स्थितौ स्थित्वाऽन्ते अधिकारविशेषं प्राप्य तस्याधिकारस्य समाप्तौ विज्ञानाकलो शिवस्य शक्तिपाततः सद्यो मन्त्रमन्त्रेशमन्त्रमहेशतामापद्यते, शिवत्वमपि वा, परं न कदाचिदनन्तनाथ कृपा तथाविधफलदा, अपितु शिवानुग्रह एव। यथा—**

"विज्ञानाकलतां प्राप्तः केवलादधिकारतः।।
मलान्मन्त्रतदीशादिभावमेति सदाशिवात्।"

(तं० आ०13, 275-276)

अधिकारोऽस्य निग्रहानुग्रहात्मा।

द्र०:- 'तत्प्रबोधः' इति।

(2) विज्ञानाकलोऽपि शिवानुग्रहेण मन्त्रादि रूपतामेति चिराच्चान्ते शिवत्वम्। मध्ये च निग्रहानुग्रहाधिकारवानपि भवति। यथा—

"स पुनः शाम्भवेच्छातः शिवाभेदं परामृशन्।।
क्रमान्मन्त्रेशतन्नेतृरूपो याति शिवात्मताम्।"

(तं० आ०9, 92-93)

द्र०:- **'तत्प्रबोधः' इति।**

~कार्ममलरहिताः — **कर्मकर्तृत्वाभिमानरहिताः सन्तो विज्ञानाकलाः कर्मसंस्काररूपात् कर्मकर्तृत्वसंस्काराच्च मुक्ताः सन्तः कार्ममलान्मुच्यन्ते। यथा—**

"..... ज्ञानाकलस्योक्तचरस्य यत्।
अनहंयुतया सर्वा विलीनाः कर्मसंस्क्रियाः।।"
(तं० आ०9, 117)

"..... अध्वस्त सङ्कोचोऽप्यसौ भावनया दृढम्।।
नाहं कर्तेति मन्वानः कर्मसंस्कारमुज्झति।"
(तं० आ०9, 103-104)

"कर्ता" इत्यत्र सीमितः कर्मकर्तेति वेद्यम्।

~जाग्रदादिदृशाः — **विज्ञानाकलादिषु प्रमातृष्वपि सकल-प्रलयाकलवदेव यद्यदपेक्षाकृतं स्फुटं स्वस्वरूपा- दि तज्जाग्रत्, यत् स्फुटमप्यस्थिरं पूर्वसंस्कारजं च तत् स्वप्नः, यत् पुनर्निजजाग्रतस्वप्नसंस्कारशेषमयमस्फुटं च तत् सौषुप्तम्। यद्वास्तविकनिजस्वरूपप्रकाशात्मकं तत्तुर्यम्, यच्च विगलित- विश्वप्रपञ्चं संविदानन्दघनं तत्त्वं तत् तुर्यातीतम्। एषैव सरणिर्विज्ञानाकलान्मन्त्रमहेश्वरं यावदवस्थाभेदविचारे।**

द्र०:- 'अवस्थाः' — ~ 'बहुभेदाः' इति।

"..... इति क्रमं सर्वं सर्वत्रानुसरेद्बुधः।।"
(तं० आ०10, 298)

~तच्छक्तीः — **विनाशोन्मुखे विद्याकले विज्ञानाकलस्य करणस्थानीये शक्तीतत्त्वभेदनप्रक्रियायाम्। यथा—**

"ज्ञानाकलस्य मानं तु गलद्विद्याकलावृति **(कृति)**।"
(तं० आ०10,14)

~तत्पदगामिनः — **ये तावदैश्वर्यहीनपुरुषतत्त्वभावनाभ्यास परा योगिनस्ते विज्ञानाकलपदं लभन्ते। यथा—**

"विज्ञानकेवलत्वं मायीयाध्वोत्तरणमात्रादेव परयोजनिका शून्याद्दीक्षाविशेषाद्गीताद्युक्तकार्मबन्धवन्ध्यकेवलपुरुषस्वरूप-भावानाबलात् तदन्ताध्वधारणाध्यानसमाधि बलाच्च लभ्यते इति। तल्लाभश्च भोगविशेष एव। तत एवोक्तमः —

यो यत्राभिलषेद्भोगान् स तत्रैव नियोजितः।
सिद्धिभाङ्मन्त्रसामर्थ्यात् .....।। इत्यादि"
(ई० प्र० वि० वि०, खं०3, पृ०,322)

~तत्प्रबोधः — **विज्ञानाकलस्य प्रबोधो चतुः प्रकारो भवति :— (1) कश्चित् प्रबुद्धः सन् मन्त्रेश्वरतामासादयति (2) कश्चित् पुनर्मन्त्रमहेश्वरताम्। एतावुत्कृष्टतरौ विज्ञानाकलौ (3) अवरकोटिभाजां प्रबोधः मन्त्रत्वावाप्तये भवति। (4) केचिद्विज्ञानाकलाः अस्मिन् संसारे निग्रहानुग्रहादिलीलां सम्पादयितुमवताररूपतया सकलप्राणित्वेनात्र पुनर्जायन्ते। यथा—**

"ज्ञानाकलोऽपि मन्त्रेश महेशत्वाय बुध्यते।
मन्त्रादित्वाय वा जातु जातु संसृतयेऽपि वा।।"
(तं० आ०10, 138)

"मन्त्रादित्वायेत्यादि शब्दान्न शिवत्वायापीति विशेषयति मन्त्रेशमहेशत्वायेति।"
(तं० आ० वि०, खं०7, पृ०,98)

"अवतारो हि विज्ञानियोगिभावेऽस्य भिद्यते।"
(तं० आ०10, 139)

"विज्ञानित्वेन योगित्वेन चावतारान्नेतरवत् संसृतिरिति।"
(तं० आ० वि०, खं०7, पृ०, 99)

न सामान्यपशुजनवत् तस्य संसृतिरिति।

~तत्संसृतिः — **विज्ञानाकलाः प्रकृतेरधोभागे कदापि नैव संसरन्ति, परमनन्तनाथप्रेरिताः सन्तः कलादिक्षेत्रे संसरेयुरपि। यथा—**

"स परं प्रकृतेर्बुध्ने सृष्टिं नायाति जातुचित्।।
मायाधरे तु सृज्येतानन्तेशेन प्रचोदनात्।"
(तं० आ०13,274-275)

~तत्स्थितिक्षेत्रम्ः — **(1) अवरप्रकारा या महामाया तस्यां तिष्ठन्ति विज्ञानाकलाः, उत्कृष्टप्रकारायां पुनर्मन्त्राः। सा च महामाया मायाया उपरि शुद्धविद्यायाश्चाधो मध्ये विद्यते।**

यथा—

"मायातत्त्वस्योपरि विद्यातत्त्वाधश्चावश्यं तत्त्वान्तरेण भवितव्यम् यत्र विज्ञानाकलानां स्थितिः। यथोक्तंः—

"मायोर्ध्वे शुद्धविद्याधः सन्ति विज्ञानकेवलाः।"

इति तथाहि महामायाऽभावे मायापदे प्रलयकेवलानामवस्थितिः' विद्यापदे च विद्येश्वरादीनाम्, इति किमिव तद् विज्ञानकेवलास्पदं स्यात्।।"
(प० त्री० वि० पृ०, 117-118)

द्र०:- (प० सा० वि०, पृ०,43) **इति।**

(2) वस्तुस्ते सुषुप्तौ स्थिता अपि तुर्यपदगामिन एव। अत एव ते क्वचित् तुर्यदशामध्ये स्थाप्यन्ते क्वचिच्च सौषुप्ते पदे। यथा—

"मध्योर्ध्वगाम्युदानाख्यस्तुर्यगो हुतभुङ्मयः।
विज्ञानाकलमन्त्रेशः .....।।"
(ई० प्र०, 3-2-20)

"अकलौ द्वौ परिज्ञेयौ सम्यक् स्वप्नसुषुप्तयोः।"
(मा० वि० तं०2, 28)

"त्रयोदशात्मके भेदे स्वरूपमकलावुभौ।।
प्रलयाकलभेदेऽपि स्वं विज्ञानाकलावुभौ।।"
(मा० वि० तं०2, 29-30)

"इह तु संसारादुत्तितीर्षतः सैवोपादेया प्रथमावस्था या भगवत्स्वरूपापेक्षया हेयतमाऽधमस्य प्रथमं प्रबुभूषतः इवापतित सेनापतित्वपरित्राणप्रकारसदृशी दशेति, ततस्तुर्यत्वेन गणनमित्याशयः।"
(ई० प्र० वि० वि०, खं०3, पृ०, 352)

एतेन ज्ञायते यत् तुर्यदशां प्रति जिगमिषव एवैते तुर्यदशाभाज इत्युक्ताः, न वस्तुतोऽद्यापि तुर्यपदं प्रविष्टा इति।

~तद्भेदः (परस्परम्):— **(1) तेषां स्वतो भेददर्शन व्यापारस्यापि न सम्भवः। तेषां यः परस्परं भेदः स केवलं परमेश्वरेच्छानिबन्धनः एव। ततो विज्ञानाकलादयो न विज्ञानाकलादिवेद्याः इति स्वोत्तरवर्तिप्रमातृवेद्यत्वमेवैषाम्। यथा—**

"विज्ञानकेवलादीनां तावत्यपि न वै भिदा।।
शिवस्वाच्छन्द्यमात्रं तु भेदायैषां विजृम्भते।"
(तं० आ०10, 130-31)

"बोधादिलक्षणैक्येऽपि तेषामन्योऽन्यभिन्नता।
तथेश्वरेच्छाभेदेन ते च विज्ञानकेवलाः।।"
(ई० प्र०, 3-2-7)

(2) विज्ञानाकलेषु यः परस्परं भेदो नासौ मायीयमलकृतस्तस्य तेष्वभावात्, ततोऽसावीश्वरेच्छामात्रकृतः। यथा—

"भेदवन्तः स्वतोऽभिन्नाश्चिकीर्ष्यन्ते जडाजडाः।"
(तं० आ०10, 292)

~तद्भोगः — **अन्तर्बाह्यविषयाग्रहणे सति सुषुप्तौ यः प्रमेयाभावशान्तिकृतो भोगोऽसौ विज्ञानाकलानां केवलान्मायीयान्मलात्। यथा—**

"..... सुतं सौख्याद्यवेदने।
ज्ञानाकलस्य मलतः केवलाद्भोगमात्रतः।।"
(तं० आ०10, 291)

मलतः इति भेदमयादिति। यथा—

"अत्र हेतुरभिलाषैकरूपाणवमात्रोत्थाद्भोगयोग्यत्वादिति।"
(तं० आ० वि०, खं०7, पृ०, 197)

"विशिष्टसुखदुःखादिसाधनावेदने सति।
तत्सामान्यमयो भोगो जागरे स्मृतिमागतः।।
सौषुप्तौ मलमात्रोत्थस्तत्र विज्ञानकेवलाः।
भेदवन्तः स्वतोऽभिन्नाश्चिकीर्ष्यन्ते जडाजडाः।।"
उद्धः०:- (तं० आ० वि०, खं०7, पृ०, 198)

~तन्मलः — **विज्ञानाकलेषु मलो दिध्वंसिषुः। नासो कर्म कारयति। प्रत्युत ध्वंसमानतां ध्वस्ततां च क्रमेणासादयति। यथा—**

"..... स हि मलो ज्ञानाकलो दिध्वंसिषु कथम्।।
हेतुः स्याद्ध्वंसमानत्वं स्वातन्त्र्यादेव चोदभवेत्।"
(तं० आ०9, 94-95)

"ध्वंसोन्मुखतात्मना स्वमहिम्ना ध्वंसमानत्वमेव तन्नान्तरीयकं ध्वस्तत्वमेव वोदियात्।"
(तं० आ० वि०, खं०6, पृ०, 80)

~दिध्वंसिषुमलाः — **येषां मलो दिध्वंसिषुरिति ध्वंसोन्मुख इति तात्पर्यम्।**

द्र०:- **'मलः'** ~ 'तारतम्यतः' **इति।**

~वेदकाः — **यद्यपि प्रलयाकलविज्ञानाकलौ न वेदनादि व्यापारं किमपि कुरुतस्तथापि प्रबोधावसरे तेषां स्फुट-ज्ञानक्रियाव्यापारस्य सत्त्वात् ताभ्यां सकलान्तस्य मायान्तस्य च तत्त्वव्रातस्य वेद्यत्वात्, प्रलयाकलानां च विज्ञानाकलवेद्यताऽपि तत्त्वभेदनप्रक्रियानुसारम्। यथा—**

"श्रूयतां संविदैकात्म्यतत्त्वेऽस्मिन्नसंव्यवस्थिते।।
जडेऽपि चितिरस्त्येव भोत्सयमाने तु का कथा।
स्वबोधावसरे तावद्भोत्स्यते लयकेवली।।"
(तं० आ०10, 133-134)

~संसृतिरहिताः — **विज्ञानाकलेषु कार्मो मलो दिध्वंसिषुः सन् न संसृतिकारणतामेति। ततो नैव ते प्राकृतसृष्टौ संसरन्ति। यथा—**

"..... स हि मलो ज्ञानाकले दिध्वंसिषुः कथम्।।
हेतुः स्याद् .....
.....।"
(तं० आ०9, 94-95)

"अतः प्रध्वंसनौन्मुख्यखिलीभूतस्वशक्तिकः।।
कर्मणो हेतुतामेतु मलः कथमिवोच्यताम्।"
(तं० आ०9, 97-98)

~सांख्यपुरुषप्रायाः — **सांख्यपुरुषसादृश्यमात्रमेषाम्। नैते सत्यं सांख्यपुरुषाः। सांख्यपुरुषाणं प्रलयाकलतां प्रति विशेषप्रवृत्तियुक्तत्वात्। यथा—**

"ततः सांख्यैः पुरुषैर्यत् सादृश्यं, तदात्यन्तिकं तज्जातीयतापर्यन्तं न भवति, इति प्रायिकं सादृश्यं युक्तम्।"
(ई० प्र० वि० वि०, खं०3, पृ०, 322)

~सुषुप्तप्रायाः — **विषयज्ञानेमेषां न विद्यते, स्वात्मनोऽपि स्फुटो विमर्शो न स्पन्दते, चमत्कारहीनत्वात्। तुर्योन्मेषे च विद्यमानेऽपि सुषुप्तिसंस्काराः नापयान्ति तेषाम्। यथा—**

"ज्ञत्वं हि तत्र व्यतिरिक्तवेदकात्मकं निषिद्धं यत् कलाविद्यारूपतत्त्वान्तरप्रसादात् सकलस्योदितमुच्यते, तच्च विज्ञानाकलस्य नैवास्ति। स्वात्मन्यपि वेदकत्वं प्रथग्भूततया नोपपद्यते, अपृथग्भावेन भवदपि अहमितिचमत्कारात्मनो विमर्शस्य तिरोधानादसतो न विशिष्यते।"
(ई० प्र० वि० वि०, खं०3, पृ०, 314)

एतेनैतत् प्रतिभाति यत्तुर्योन्मेषमात्रयुता या सुषुप्तिस्तस्यामेव तिष्ठन्ति विज्ञानाकलाः इति।

~स्वातन्त्र्यहीनाः — **स्वात्मना बोधमात्ररूपतया प्रकाशमाना अपि पारमैश्वर्यात्मकस्फुटस्वात्मविमर्शशून्याः प्रमातारो विज्ञानाकलाः। यथा—**

"ये संविन्मात्रपरमार्था अपि अहमितिस्वात्मविश्रान्तिलक्षणस्वातन्त्र्यपरमार्थानन्दचमत्कारतिरोधानयोगान्नोत्तमाः कर्तारः, ते भर्त्रा परमेश्वरेणाप्रतिहतपरिपुष्टस्वातन्त्र्येण तथा बुभूषुणा स्वात्मनः सकाशाद् घटादिवदेव भिन्ना निर्मिता येन मन्त्रमहेश्वरादीनां भेदेन भान्ति।"

(ई० प्र० वि० वि०, खं०3, पृ०, 319)

विज्ञानेन्दुकौमुदीः — महार्थमञ्जरीपरिमले समुद्धृतपङ्क्तिकृतनामोल्लेखं च किमपि शैवशास्त्रपुस्तकम। भट्टानन्दकृतविज्ञानकौमुद्याख्यविज्ञानभैरवव्याख्यातोऽन्यदिदं किमपि पुस्तकम्। समुद्धृतानां पङ्क्तीनां विज्ञानकौमुद्यामदर्शनात्। यथा—

"विज्ञानेन्दुकौमुद्याम्—
'सर्वव्यापकताभूमिर्ज्ञत्वकर्तृत्वसम्मता।
निजाभासचमत्कारमयी शिवदशा स्मृता।।' इति।"

(म० मं० प०, पृ०, 38)

वितर्कः — ~(शिवसूत्रे): —

"वितर्को विशिष्टस्तर्कः। संविदात्मकः शिव एव वस्तुतोऽहं न केवलं शरीरादिरूपः। तस्य शरीरादेरपि संविन्मात्रप्रतिष्ठितत्वात्। संविदः सत्त्वे संविदनुग्रहीतत्वे च तत् सत्त्वात्। तदनुग्रहाभावे तस्य सत्ताया एवासिद्धत्वात्। इत्येवं रूपो विशिष्टः सत्तर्को यस्तस्य योगिनोऽसौ तस्य वितर्कः।"

(शि० सू० विवृ०1, 18)

वित्तशाठ्यम् :— सत्यपि वित्ते यागादिविधौ गुरुपूजादिविधौ च वित्तविषये कार्पण्याचरणम्। तच्चातिदोषावहम्। यथा—

"वित्तशाठ्यविरहितो यागस्थानं कुर्यात्। असति वित्ते तु महामण्डलयागो न कर्त्तव्यः।"

(तं० सा०, पृ० 157)

~अशुभफलम् :— यथा—

"तत्राहुर्गमशास्त्रज्ञा वामाशक्तिमयास्तदा।।
मन्त्रा बध्नन्ति तं सम्यग्भवकारामहागृहे।"

(तं० आ०15, 422-23)

"सति वित्ते पुनः शाठ्यं व्याधये नरकाय च।"

(तं० आ०28, 144)

~निन्दितम् :— सति विभवे हामे वित्तशाठ्यं नैव कार्यम्, यथाशक्त्युदारभावेनाग्नि तर्पणं कर्तव्यम्। यथा—

"सति वित्तेऽपि लोभादिग्रस्तो बाह्यप्रधानताम्।।
प्रथयश्चिद्गुणीभावाच्छक्तिपातं न विन्दति।"

(तं० आ०15, 420-421)

बाह्य प्रधानता = होमद्रव्यव्ययसङ्कोचरूपा। द्रव्यरक्षणे प्राधान्यं न देवता तर्पणे। यथा—

"विभवे सति यो लोभान्न कुर्याद्विधिविस्तरम्।
नासौ फलमवाप्नोति जातुचित् परमेश्वरि।।"

उद्धः:- (तं० आ० वि०, खं०9, पृ०, 213)

~प्रायश्चित्तीयम् :— ज्येष्ठाशक्तेराराधनैव वित्तशाठ्यप्रायश्चित्तम्गुर्वनुग्रहात्मिका ज्येष्ठाशक्तिरेव वित्तशाठ्यदोषभाजं तत्फलभोगानन्तरं तारयति। यथा—

"या त्वनुग्राहिका शक्तिस्तेषां सा गुरुदीपिता।।
शोधयेत स्वशास्त्रस्थनष्कामोल्लङ्घनक्रियाम्।"

(तं० आ०15, 423-424)

"तस्मादकृत विघातात् कञ्चित्कालं पिशाचवरराजः।
भूत्वा विमलात्मासौ व्रजति च समतां परेशेन।।"

उद्धः:- (तं० आ० वि०, खं०9, पृ०, 214)

विदर्भग्रथितम् :— मन्त्रन्यासविशेषः। यथा—

"नाम्नः पश्चात् त्रिर्मन्त्रन्यासो विदर्भग्रन्थनम्। यदुक्तम्:-
'न्यस्यादावभिधेयं तु पश्चान्मन्त्रं त्रिधा लिखेत्।
विदर्भग्रथितं .....।।' इति।"

(ने० तं० उ०, खं०2, पृ०, 79)

विदर्भितम्: — यथा—

"नामान्तरं सकृन्मन्त्र इति विदर्भणम्।
यदुक्तम्:—
'अभिधेयं भवेत्पूर्वं ततो मन्त्रः सकृद्भवेत्।
विदर्भितं .....।।' इति।"

(ने० तं० उ०, खं०2, पृ०, 78)

विदिशाचतुष्टयम् :— दिग्द्वयमध्यविश्रान्तियोगेऽन्यदिक्चतुष्टयमाग्नेयादिकं विदिशाचतुष्टयम्। यथा—

"एवमाशाचतुष्केऽस्मिन् मध्यविश्रान्तियोगतः
चतुष्कमन्यत्तेनाष्टौ दिशस्तत्तदधिष्ठिताः।"

(तं० आ०15, 201-202)

विदेहमुक्तिः — प्रत्यभिज्ञातस्वात्मपरमेश्वरभावस्य योगिनः प्रारब्धपरिसमाप्तिकाले त्यक्तशरीरस्य जीवत्वाभिमानसंस्कारविलये जाते परिपूर्णपरमेश्वरत्वविमर्शः सततोदितः सन् परिस्पन्दते यत्तदेव विदेहमुक्तत्वं तस्य। यथा—

"ततो निवृत्ते प्रयाणप्राप्तिपर्यन्ते देहे परमेश्वरतैव (एकघना)।"

(ई० प्र० वि०, खं०2, पृ०,131)

विद्या :— (1) कूटबीजरूपाः रहस्यमन्त्रा विद्या इत्यप्युच्यन्ते साधनाप्रक्रियासु। शैवमन्त्रस्थाने प्रयुज्यमानाः शाक्ता मन्त्रा विद्या इत्युच्यन्ते।

(2) शक्तिस्वभावः साधनांशः। वेद्यार्थभासिका सती विद्यामन्त्रस्याप्यायनकरी भवति। यथा—

"विद्या च शक्तिस्वभावा।"

(तं० आ० वि०, खं०12, पृ०, 398)

"..... तत्र विद्यया।।
उपोद्बलनमाप्यायः सा हि वेद्यार्थभासिनी।"

(तं० आ०37, 19-20)

~अशुद्धा (कञ्चुकरूपा) :— (1) प्रमातुः प्रमेयाद्यंश-

विवेचनोपयोगि परिमितं ज्ञान सामर्थ्यम्। अनेन तत्त्वेन वेष्टितः परिमितः प्रमाता किञ्चिदेव ज्ञातुमलं सन् सर्वज्ञतायाश्च्यवते। यथा—

"..... विद्यां चापि विवेचिकाम्।"
(मा० वि० वा०1, 875)

"विद्या किञ्चिज्ज्ञताहेतू रागोऽभिष्वङ्गकारणम्।"
(अ० प्र० पं०, 24)

द्र०:-- (शि० सू० वा० भा० पृ०, 44) इति।

"किञ्चिज्ज्ञत्वदायिन्यशुद्धविद्या कलातो जाता, सा च विद्या बुद्धिं पश्यति तद्गतांश्च सुखादीन् विवेकेन गृह्णाति। बुद्धेर्गुणसंकीर्णाकाराया विवेकेन ग्रहीतुमसामर्थ्यात्। तस्माद् बुद्धि प्रतिबिम्बितो भावो विद्यया विविच्यते।"
(तं० सा०, पृ०, 81)

(2) अणोः किञ्चिन्मात्रमेव ज्ञातुं या शक्तिरसौ विद्या कञ्चुकरूपा। यथा—

"विद्या किञ्चिज्ज्ञताहेतू .....।"
(अ० प्र० पं०, 24)

एषाऽशुद्धविद्येत्युच्यते शुद्धविद्यायाः सकाशादस्याः भेदं प्रकटयितुम्। यथा—

"अस्य शून्यादेर्जडऽस्य विद्या किञ्चिज्ज्ञत्वोन्मीलनरूपा बुद्धिदर्पणसङ्क्रान्तं भावराशिं नीलसुखादिं विविनक्ति।"
(ई० प्र० वि०, खं०2, पृ०, 208)

"..... विद्यादर्शितगोचरः।"
(स्व० तं०11,98)

~शुद्धाः —

द्र०:- 'विद्यातत्त्वम्': — ~ 'शुद्धमिति' इति।

विद्याकञ्चुकम् :— अणोः किञ्चिन्मात्रमेव ज्ञातुं शक्तिः। ज्ञानशक्तिसङ्कोचस्तस्य।

~तत्सृष्टिः — **अणोः किञ्चित् कर्तृत्वसिद्धये कलैव तस्य किञ्चिज्ज्ञतां सूते, सैव तस्याशुद्धा विद्या। यथा—**

"किञ्चिद्रूपविशिष्टं यत् कर्तृत्वं तत्कथं भवेत्।।
अज्ञस्येति ततः सूते किञ्चिज्ज्ञात्वात्मिकां विदम्।"
(तं० आ० 9, 191-192)

~तदुपादानम् :— **कला हि विद्याया उपादानम्। यथा—**

"विद्या रागोऽथ नियतिः कालश्चैतच्चतुष्टयम्।
कलाकार्यम् .....।।"
(तं० आ० 9,203)

~तदुपासनाविषया :— **विद्योपासनायामालम्बनानि वर्णाः = 7, तत्त्वानि = 7, मन्त्रौ = 2, पदे = 2, भुवनानि = 28, इति। यथा—**

"मुनितत्त्वार्णं द्विकपदमन्त्रं वस्वक्षिभुवनमपरकला।"
(तं० सा०, पृ०,112)

अपरकलेति विद्याख्या।

~ विशिष्टकरणम् :— **विद्या हि विज्ञातुर्विशिष्टं करणम्, यस्तया करणभूतया असौ बुद्धिं बुद्धिधर्माश्च वेत्ति। यथा—**

"स्वच्छायां धियि संक्रामन्नभावः संवेद्यतां कथम्।
तया विनैति साप्यन्यत्करणं पुंसि कर्तरि।।"
(तं० आ० 9, 195)

"तस्माद्बुद्धिगतो भावो विद्याकरणगोचरः।।"
(तदेव 9, 198)

विद्याकमलम् :— ~(उच्चारयोगे) :— "अम्बुजम्" इति। यथा—

"अम्बुजं—भ्रूमध्यवर्ती विद्याकमलनामाधारः।"
(तं० आ० वि०, खं० 3, पृ०, 359)

चिन्त्यमेतद् व्याख्यानं सम्यग् विम्रष्टव्यं सुधीभिः।

विद्याकला :— पुंस्तत्त्वादारभ्य मायान्तं व्याप्य तिष्ठन्ती कला विद्या, प्रमेयस्याप्रधानत्वे प्रमातृत्वस्य वेदनस्वभावस्य प्राधान्यात्। यथा—

"पुमादि मायान्ते विद्या-वेद्यतिरोभावे संविदाधिक्यात्।"
(तं० सा०, पृ०,109)

"पुंस्तत्त्वाद्यावन्मायान्तं विद्याया व्याप्तिरिष्यते।।"
(स्व० तं० 4, 171)

~तद्विशेषा :— **विद्यायां भावनीयाः वर्णाः सप्त, मन्त्रद्वयं, पदद्वयं, तत्त्वानि सप्त, भुवनान्यष्टाविंशतिः। यथा—**

"मुनितत्त्वार्णं द्विकपदमन्त्रं वस्वक्षिभुवनमपरकला।"
(तं० आ०11, 52)

~धारणाविशेषे :— **निजदेहे एव पञ्चकलानां भावनया दर्शनस्याभ्यासे विद्याकलायाः स्थानं नाभिमारभ्य ताल्वन्तम्। यथा—**

"विद्याया नाभेस्ताल्वन्तं व्याप्तिः, तत्र पुरुषतत्त्वमारभ्य मायातत्त्वान्तं सप्ततत्त्वस्थितिः, तत्र रुद्रस्याधिकृतिः।"
(प० त्री० विवृ०, पृ०, 11)

विद्यागुरु :— प्रमाणस्तुतिदर्शनस्य निर्माता कोऽप्याचार्यः। यथा—

"श्रीमान् विद्यागुरुश्चाह प्रमाणस्तुतिदर्शने।"
(तं० आ० 13, 128)

द्र०:- (तदेव 17,115) **इति।**

"यद् विद्यागुरुः—
उत्तरोत्तरमवग्रहग्रहैः पश्यतोऽप्यधरमुत्तरस्य यः।
साधनस्य निजभावनाग्रहो हेतुस्त्र भवतो मरीचयः।।' इति।"

उद्ध०:- (ई० प्र० वि० वि०, खं०,3, पृ०, 262)

विद्यातत्त्वम् ~अशुद्धम्: — **(1) पशोः किञ्चिन्मात्रज्ञातृत्व**

शक्त्यभिमानो विद्यातत्त्वम्। इयं विद्याऽशुद्धविद्येति प्रोच्यते। यथा—

"स्वतन्त्रोऽपि बोधः स्वमायया यथा अणुत्वं प्राप्तः, तथैव तदीये ज्ञानक्रियाशक्तीसंकुचिते अस्य पशुरूपस्य विद्या-कले–इति उच्येते।"

(प० सा०, वि०, पृ०, 46-47)

"सर्वज्ञतास्य शक्तिः परिमिततनुरल्पवेद्यमात्रपरा।
ज्ञानमुत्पादयन्ती विद्येति निगद्यते बुधैराद्यैः।।"

(ष० त० सं०, 9)

"यथा—तस्यैव सर्वज्ञताशक्तिः संकोचं गृहीतवती किञ्चिज्ज्ञेयमात्रपरत्वेन ज्ञानोत्पादनात् विद्यातत्त्वं, विद्ययैव बुद्धिदर्पणे प्रतिफलिता भावा विविच्यन्ते गुणसंकीर्णतया तस्या विवेक्तुमक्षमत्वात्, तस्मात् विद्ययैव अर्थविवेकः।"

(ष० त्रि० त० सं०, वि०, पृ०, 7)

"तथा सर्वकर्तृत्वसर्वज्ञत्वलक्षणधर्मद्वयौदासीन्यात् किञ्चित्कर्तृत्वकिञ्चज्ज्ञत्वरूपाभ्यां कलाविद्याभिधानाभ्यां .....।"

(स्पं० वि०, पृ०, 135-136)

जानामि—इति किञ्चिदेव पुरोवर्ति घटादिकम्, न पुनर्दूरव्यवहितं वस्तु इति विद्यातत्त्वम्।"

(प० सा० यो०, वि०, पृ०,48)

(2) तच्च कञ्चुकमध्ये गणितम्।

द्र०:- 'विद्या-कञ्चुकम्' इति।

~त्रितत्त्वविधौ :— त्रितत्त्वविधौ शुद्धविद्यामारभ्य सदाशिवतत्त्वान्तं विद्यातत्त्वमिति गण्यते। यथा—

"सदाशिवान्तमध्वानं विद्यातत्त्वं विनिर्दिशेत्।।"

(स्व० तं० 4, 213)

~शुद्धम् :— अहमिदमंशयोर्या समधृततुलापुटन्यायेन विमर्शनरूपा स्थितिरसौ शुद्धविद्याख्यं तत्त्वम। भेदाभेदविमर्शात्मकं तत्त्वं शुद्धविद्याख्यम्। मन्त्रेश्वराणां मन्त्रमहेश्वराणां च यासौ "इदमहम्" इति रूपा वा "अहमिदम्" इति रूपा वा भेदाभेदमयी दृष्टिरसावेव शुद्धविद्या यत्तेषां करणस्थानीयं तत्त्वम्। यथा—

"सामानाधिकरण्यं च सछिद्याहमिदं धियोः।।
इदम्भावोपपन्नानां वेद्यभूमिमुपेयुषाम्।
भावानां बोधसारत्वाद्यथावस्त्ववलोकनात्।।"

(ई० प्र० 3-1-3-4)

वस्तुनो बोधसारत्वरूपत्वादेवैषा शुद्धेति वेदनाच्च विद्येति। यथा—

"मध्यमे तु रूपेऽहमिदमिति समधृततुलापुटन्यायेन यो विमर्शः स सदाशिवनाथ ईश्वरभट्टारके च, इदम्भावस्य तु ध्यामलाध्यामलताकृतो विशेषः। ये एते अहमिति, इदमिति धियौ, तयोर्मायाप्रमातारि पृथगधिकरणत्वम्, अहमिति ग्राहके, इदम् इति च ग्राह्ये, तन्निरासेनैकस्मिन्नेवाधिकरणे यत्सङ्गमनं सम्बन्धस्वरूपप्रथनं तत् सती शुद्धा विद्या।"

(ई० प्र० वि०, खं०,2, पृ०, 196-197)

(2) अहमिदमंशयोः स्वतन्त्रेव स्थितिः शुद्धेविद्येति योगराजस्य मतिः। यथा—

"अत्रापि इदन्ता प्राधान्येन अहन्तागुणीकारेण यः अहमहम्, इदमिदम्, इत्येवं रूपश्चमत्कारः सद्योजातबालस्येव शिरोऽङ्गुलीनिर्देश्यः, एतदेव बोधसारत्वाद् भगवतः शुद्धविद्यातत्त्वम्।"

द्र०:- (प्र० हृ०, पृ०,7) **इति।** (प० सा० यो०, पृ०, 43)

एषा दशाऽन्यत्रानन्तनाथस्येव स्थितिरिति माहमायेति गदिताऽस्ति। यथा—

"इदन्ताहन्तयोरैक्यमिति विद्या निगद्यते।"

(अ० प्र० पं०, 21)

विद्यात्रयम् :— श्रीसन्तताबुपदिष्टायाः दीक्षाविद्यायाः आद्यन्तयोर्योज्यं मन्त्रत्रयं श्रीभूतिराजोपदिष्टम्। यथा—

"एतद्दीक्षादीक्षित एतद्विद्यात्रयं स्मरन्। हृदये।
बाह्यर्चादि विनैव हि व्रजति परं धाम देहान्ते।।"

(तं० आ० 30, 106)

"एतद्विद्यात्रयं श्रीमद्भूतिराजो न्यरूपयत्।
यः साक्षादभजच्छ्रीमाञ्श्रीकण्ठो मानुषीं तनुम्।।"

(तदेव, 120-121)

ताश्च तिस्त्रो विद्या :— (1) मोक्षदा विद्या, (2) दीक्षा विद्या, (3) पारमेश्वरी विद्या चेति स्वेस्वे स्थाने द्रष्टव्याः।

विद्यादशा :— भेदाभेददशा, विद्यातत्त्वमीश्वरतत्त्वं सदाशिव तत्त्वं चेति तत्त्वत्रयं विद्यादशा। यथा—

"यस्यां पुनर्ज्ञानशक्त्युद्रेकेण अस्या बहिर्मुखत्वं बाह्याभ्यन्तररूप-सामानाधिकरण्यपर्यवसायित्वात् स्वरूपविश्रान्तिनिष्टत्वमेव सा विद्यादशा इति।"

(स्पं० वि०, पृ०,130-131)

विद्याधराः :— ~अधमाः — वज्राङ्काख्यस्य भुवर्लोकस्थस्य मरुतो लोके निवासिनो विद्याधराः। यथा—

"पञ्चाशदूर्ध्वं वज्राङ्के वायुरत्रोपलाम्बुदाः।
विद्याधराधमाश्चात्र वज्राङ्के सम्प्रतिष्ठिताः।।"

(तं० आ० 8, 128)

~ उत्तमाः — उत्तमा विद्याधराः आवहस्य मरुतो लोके निवसन्ति। यथा—

"जीमूतमेघास्तत्संज्ञास्तथा विद्याधरोत्तमाः।
ये च रूपव्रता लोका आवहे ते प्रतिष्ठिताः।।"

(तं० आ० 8, 137)

~मध्याः — भुवर्लोके विषावर्तस्य मरुतो भुवने निवासिनोऽवरे देवाः। यथा—

"विद्याधरविशेषाश्च तथा ये परमेश्वरम्।।
गान्धर्वेण सदार्चन्ति विषावर्तेऽथ ते स्थिताः।"

(तं० आ० 8, 134-135)

विद्याधिपतिः — (1) कश्चनाचार्यो यस्यानुभवस्तोत्रं प्राक् काले प्रसिद्धमासीत्। अयमेव विद्यापतिरित्युक्तो भवेत्। यथा—

"तदर्थमेव विद्याधिपतेरनुभवस्तोत्रे महान् संरम्भः।"

(तं० सा०, पृ०, 31)

(2) अभिनवगुप्तात् प्राक्तनः कोऽप्याचार्यः। यथा—

"तदुक्तं विद्यापतिनाः—

"कस्य नाम करणैरकृत्रिमैः पश्यतस्तव विभूतिमक्षताम्
विभ्रमादवरतोऽपि जायते त्वां व्युदस्य वरद स्तुतिस्पृहा'।।
इति।"

(ई० प्र० वि०, खं० 1, पृ०,7)

द्र०:- (स्पं० प्र०, पृ०,20, स्त०चि०वि०,पृ०,54, **इति।**

विद्यापतिः — कश्चनाचार्यः, प्रमाणस्तोत्रनिर्माता। सम्भवतो- ऽयमेवानुभवस्तोत्रनिर्माता विद्याधिपतिरिति। यथा—

"श्री विद्याधिपतिश्चाह मानस्तोत्रे तदीदृशम्।।
तदेव पठति
ये यौष्माके शासनमार्गे कृतदीक्षाः.....इत्यारभ्य येषां तृट् क्षुद्दुःखविबाधाः पुनरस्मिन्।। इत्यन्तम्"

(तं० आ० 14, 10-12)

विद्यापीठमूः — (1) चतुष्पीठमध्ये रहस्यभूतबीज-मन्त्राक्षरात्मकं पीठम् तदेव चक्रानुचक्रेषु यथायथं न्यस्य कौलिक आदियागो विधीयते। ते च मन्त्राः रहस्यत्वेन ग्रन्थेषु नैव स्पष्टं लिख्यन्ते। यथा—

"सर्वदा स्मरणं कृत्वा आदियागैकतत्परः।
शक्तिदेहे निजे न्यस्येद्विद्यां कूटमनुक्रमात्।।
ध्यात्वा चन्द्रनिभं पद्ममात्मानं भास्करद्युतिम्।
विद्यामन्त्रात्मकं पीठद्वयमत्रैव मेलयेत्।।
न पठ्यते रहस्यत्वात्सुस्पष्टैः शब्दैर्मया पुनः।
कुतूहली तूक्तशास्त्रसम्पाठादेव लक्षयेत्।।"

(तं० आ० 29, 167-169)

रहस्यत्रयाङ्गभूता स्पष्टमकथ्या अतिरहस्यभूता इमे मन्त्राः, यथा ब्राह्मी विद्या, विद्यात्रयम्, इत्याद्यास्त्रिंशे आह्निके प्रतिपादितास्तन्त्रालोके किञ्चिन्मात्रमेव स्पष्टतां नीताः।

(2) मन्त्रार्थोपोद्दलनमयी सार्थका वैखर्यात्मिका शब्दावलिर्विद्या। तदुपासनाप्रधानः साधकपरम्परासमूहो विद्यापीठम्। सिद्धयोगीश्वरीमताख्यस्त्रिकाचारो हि विद्यापीठ-प्रधानः। यथा—

"मननत्राणदं यत्तु मन्त्राख्यं तत्र विद्यया।।
उपोद्दलनमाप्यायः सा हि वेद्यार्थभासिनी।"

(तं० आ० 37, 19-20)

विद्यापौरुषमूः — अवरविद्यासु स्पर्धा। यथा—

"ये विद्यापौरुषे ये च श्मशानादिप्रसाधने।
मृतास्तत्सिद्धिसिद्धास्ते वज्राङ्के मरुति स्थिताः।।"

(तं० आ० 8, 129)

"विद्यापौरुषे गारुडविद्यादिस्पर्धायाम्।"

(तं० आ० वि०, खं5, पृ०, 97)

विद्याप्रमाताः —

"प्रकाशपरामर्शप्रधानत्वे तु विद्याप्रमातृता।"

(प्र० हृ०, पृ०,12)

विद्याबुद्धी :— बुद्धिर्गुणात्मिका सती जडा नासौ स्वयं किमपि विवेक्तुं समर्था। विद्या पुनः किञ्चिज्ज्ञता अणोः, तयासौ सुखदुःखादिविविनक्ति बुद्धिं चापि वेदयते। यथा—

"बुद्धिं पश्यति सा विद्या बुद्धिदर्पणचारिणः।।
सुखादीन् प्रत्ययान् मोहप्रभृतीन् कार्यकारणे।
कर्मजालं च तत्रस्थं विविनक्ति निजात्मना।।
बुद्धिस्तु गुणसंकीर्णा विवेकेन कथं सुखम्।
दुःखं मोहात्मकं वापि विषयं दर्शयेदपि।।"

(तं० आ० 9, 192-194)

एतेन विद्या विशिष्टं करणमात्मनः इति प्रतिपादितप्रायम्।

विद्याराजः :— मन्त्रः :— (1) ह् र् क्ष् म् ल् व् य् ऊँ इति।

(2) एष एवान्यत्र नवात्मा मन्त्र इत्युक्तः।

(3) बीजपिण्डविशेषो न स्पष्टतां नीतो जयरथेन। स्वच्छन्दतन्त्रे पुनरेवं प्रतिपादितः। यथा—

"क्षादिर्यान्तसमोपेतो हान्तेनाधोनियोजितः।।
भान्तो वादिर्लकारान्तो राद्योऽधो रुद्रयोजितः।
बिन्द्वर्धेन्दुसमायुक्तो नादशक्तिसमन्वितः।।
विद्याराजः समाख्यातो महापातकनाशनः।"

(स्व० तं० 1, 84-86)

एवमेष स्पष्टतां यातिः —

तत्र क्षादिः = ह्, यान्तः = र्, हान्तः = क्ष्, भान्तः =म्, वादिः = ल्, लकारान्तः = व्, रादिः =य्, रुद्रः =ऊ, बिन्द्वर्धेन्दू =

~तद्वर्णाः —

"विद्याराजस्य ये वर्णा नवसंख्योपलक्षिताः।
वाचकास्ते च तत्त्वानां कथयाम्यनुपूर्वशः।।
धरित्र्यादिप्रधानान्तमूकारो वाचकः स्मृतः।
पुरुषस्य यकारो वै रागतत्त्वान्वितस्य च।।
नियामिकां वकारेण विद्यातत्त्वसमन्विताम्।
कालं कलां लकारेण कल्पयेत्तु वरानने।।
मायातत्त्वं मकारेण विद्यातत्त्वं क्षकारतः।
रेफेण चैश्वरं तत्त्वं हकारेण सदाशिवः
प्रणवेन तथा शक्तिर्न्यसितव्या वरानने।"

(स्व० तं० 5, 4-7)

संहारक्रमेणैतान्निरूपणम्। तत्रैव क्रमे आदौ प्रणवेन

युक्तोऽप्ययं प्रयोज्यो भवतीति सङ्केतितमत्रागमवाक्येन। प्रणवोऽत्र तावद् सानुस्वारार्धचन्द्रः ऊकार एवेति वेद्यं तान्त्रिकसङ्केतानुसारम्।

द्र०:- 'नवात्मा' इति।

विद्यारायः :— काश्चन शुद्धविद्यापदस्था देव्यो याः मातङ्गतन्त्रे विद्येश्वरेभ्यो भिन्नतया परिगणिताः। अधिकतरेण विश्लेषणेन तत्त्वानां प्राणिवर्गाणां च संख्या वर्धतएवेति न विस्मर्तव्यमेवंविधोपदेशविषये। यथा—

"श्रीमतङ्गादौ विद्येश्वरेभ्यः पृथगेव विद्यारायोऽम्बिकाद्या निरूपिताः।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 277)

विद्यावरणादीनि :— उपासनाक्रमे गुरुणा शिष्यस्य मुख्यावरणादतिरिक्तान्यपराण्यपि बहून्यावरणानि शोध्यानि भवन्ति। तानि च विद्यावरणम्, शक्त्यावरणम्, तेजस्व्यावरणम्, मानावरणम्, सुशुद्धावरणम्, शिवावरणम्, मोक्षावरणम्, ध्रुवावरणम्, इच्छावरणम्, प्रबुद्धावरणम्, समयावरणम्, (अनन्तावरणम्), सुशिवावरणम्, बिन्द्वावरणम्, ब्रह्मबिलावरणम्। इति।

द्रष्टव्यानि विस्तरतः।

(तं० आ० 8, 358-36, 387-394)

विद्याव्रतम् :— प्राप्ताभिषेकः आचार्यपदे प्रतिष्ठापितः साधकः समनन्तरमेव यं मन्त्रप्रयोगसहितं भावनाभ्यासं शिष्यजनेष्वनुग्रहकरणसामर्थ्यलाभाय स्वयं करोति सोऽभ्यासो विद्याव्रतमित्युच्यते। यथा—

"हृच्चक्रादुत्थिता सूक्ष्मा .....।
इत्यारभ्य ..... इति देव्याख्ययामले।
इत्यन्तम्।
विद्याव्रतमिदं प्रोक्तं मन्त्रवीर्यप्रसिद्धये।।"

(तं० आ० 23, 33-39)

अस्य विद्याव्रतस्याभ्यासेन शिष्यस्यापि कृते गुरूपदिष्टा मन्त्रा वीर्यवन्तः सम्भवन्ति।

~तत्फलम् :— **चीर्णविद्याव्रतो गुरुः दीक्षादि सप्तसत्त्राणि समाचरितुमधिकारवान् भवति शिष्यविमोक्षणविषये। यथा—**

"कृतविद्याव्रतः पश्चाद्दीक्षाव्याख्यादि सर्वतः।।
कुर्याद्योग्येषु शिष्येषु नायोग्येषु कदाचन।"

(तं० आ० 23, 41-42)

विद्याशक्तिः :— (1) शुद्धविद्यातत्त्वं यत् प्रतिबिम्बात्मकं बहिस्तस्य यद् बिम्बस्थानीयं सारभूतं वस्तु तदेव परमेश्वरस्य विद्यानाम्नी शक्तिः।

(2) भेदे प्ररूढे सत्यपि शुद्धे चिन्मात्रेऽहन्तायाः स्फुटास्थितिर्विद्याशक्तिर्विद्येश्वराणाम्। सा च क्रियाशक्तिशेषरूपा महामायाभिधा च। यथा—

"चिन्मात्रग्राहकत्वेऽपि इदन्ताप्ररूढौ क्रियाशक्तिशेषरूपैव महामाया विद्येशशक्तिः।"

(ई० प्र० वि० वि०, खं०3, पृ०, 277)

(3) पशूनां वास्तविकात्मस्वरूपप्रकाशिका पारमेश्वरी-शक्तिः। तच्छक्त्युन्मेषेण पशुरपि स्वात्मानं शिवत्वेन प्रत्यभिजानाति। त्रिकाचारनीत्यनुसरणपक्षे एवं विधा परिभाषा।

यथा—

(क) "तस्यैश्वर्यस्वभावस्य पशुभावे प्रकाशिका।
विद्याशक्तिः .....।।"

(ई० प्र०, 3-1-7)

(ख) "अयमेव षडर्धसारादिदृष्टोऽप्यस्याचार्यस्य हृदयमावर्जयति पक्षः, 'अन्ये' इत्यनुक्तेः।"

(ई० प्र०, वि०, खं०2, पृ०, 203)

षडर्धसारोऽत्र त्रिकसारनामा ग्रन्थो बोद्धव्यः।

~योगिनाम् :— **(1) ग्राह्यग्राहकसंस्कारेषु विद्यामानेष्वपि लोकव्यवहारं कुर्वाणस्यैव योगिनो ज्ञानिनश्च यद्वस्तुपरमार्थप्रथनं सत्यज्ञानदृष्टयुन्मेषमयं तदपि विद्याशक्तिरिति परिभाषितमागमेषु। यथा—**

"ग्राहकग्राह्योभयविपर्याससंस्कारशेषत्वेऽपि योगिज्ञानिविषयं यद्वस्तुपरमार्थप्रथनं, तत्र यद् भगवतः स्वातन्त्र्यं मायाशक्तिविपरीतं तदवश्यं तत्त्वान्तरम्। ..... तदेव विद्यातत्त्वम्।"

(ई० प्र० वि० वि०, खं०,3, पृ०, 277)

(2) केचिच्छैवा एवेच्छादिशक्तीनामभिव्यक्तिमन्यथा प्रतिपादयन्ति दृष्टिभेदमाश्रित्य। योगप्रक्रियाभेदानुसारं कृताः व्याख्यानप्रकारा एवेमे तत्त्वभूतस्य वस्तुनः स्वभावप्रतिपादने। ततो नात्र स्ववचनविरोधो वा, मतभेदो वा शङ्कनीयः। तेषां दृष्टिरित्थं प्रतिपादितेश्वरप्रत्यभिज्ञाविमर्शिन्याम्। यथा—

"परे प्राहुः — भगवतः परमशिवस्याप्ररूढभेदावभासनं सदाशिवेश्वरता। तत्रास्फुटत्वे इच्छाशक्तिरीश्वरस्य व्याप्रियते, स्फुटत्वे ज्ञानशक्तिः, प्ररूढे तु भेदे ग्राह्यविपर्यासेऽपि ग्राहकचिन्मात्रतायां विद्येश्वरेषु क्रियाशक्तिः, ग्राहकग्राह्यविपर्यासद्वयप्ररूढौ तु मायाशक्तिः, सा च पशुप्रमातृषु, ग्राहकग्राह्योभयविपर्याससंस्कारे तु अविनिवृत्तेऽपि यदेतद् वस्तुपरमार्थ प्रथनं तत्र विद्याशक्तिव्यापारो योगिज्ञानिप्रभृतिष्व-पशुप्रमातृषु, तदेतद् दर्शयति—

तस्यैवर्श्यस्वभावस्य इत्यादि।
.....।।"

(ई० प्र० वि०, खं० 2, पृ०, 201-202)

विद्येश्वरता :— शुद्धबोधात्मतया शुद्धविद्यास्वरूपता मन्त्रप्राणिनां स्वतन्त्रकर्तृता चेश्वरता तेषाम्। ततस्ते विद्येश्वराः। यथा—

"बोधयोगेन विद्यास्पर्शः, कर्तृतया चेश्वरतेति।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 325)

विद्येश्वरा :— (1) मन्त्राख्याः प्रमातारः। शुद्धविद्यायाः अधस्तनं यत् क्षेत्रम्, तन्महामायेत्युच्यते। तस्या महामायायाः

अपि सोपानद्वयम्। तत्रोत्कृष्टायां भूमौ स्थिताः प्रमातरः विद्येश्वराः। न खलु तेषां स्वात्मनो विषये कोऽपि विपर्यासोऽस्ति, यतस्ते स्वात्मानं शुद्धसंविद्रूपमेव पश्यन्तः स्वात्मनः। परमेश्वरताख्यां स्वातन्त्र्यशक्तिमपि संविदन्ति। इत्थं ते उभयविधेनाणवेन मलेन रहिताः। कार्मं चापि मलं न तान् स्पृशति । परं तथापि भेददृष्टिरूपः क्षीणप्रायः केवलो मायीयो मलस्तेषां विद्यत एव। ततः एकमलास्ते प्राणिनः शुद्धेष्वेव प्राणिवर्गेषु गण्यन्ते। यथा—

"बोधनामपि कर्तृत्वजुषां कार्ममलक्षतौ।
भिन्नवेद्यजुषां मायामलो विद्येश्वराश्च ते।।"

(ई० प्र०, 3-2-9)

द्र०:- **'मन्त्राः'** (प्रमाता) इति।

(2) विद्येश्वरा हि कार्मेणाणवेन च मलेन रहिताः, तत एव शुद्धाः, परं तथापि भेददृष्टिभाजः सन्तः केवलेन तनीयसा मायीयेन मलेन युक्तास्ते। शुद्धमपरिमितं चिद्रूपमेव स्वात्मतया दर्शयन्ती, स्वात्मनः सर्वकर्तृत्वादिशक्तिं च विमर्शपदवीं नयन्ती तेषां शुद्धा दृष्टिरेवात्र विद्या। तदीशत्वेन ते विद्येश्वराः। यथा—

"ये चिन्मात्रमेवात्मतयाऽहमिति चमत्कारवन्तं पश्यन्ति, तत एवाप्रतिहतज्ञानक्रियास्तत एवाणवमलवियोगिनः कर्मसंस्कार-विकलाश्च संसारोत्तीर्णत्वात्; ते व्यतिरिक्तं वेद्यं कार्यं च पश्यन्तो द्वैतदर्शनाङ्गीकृतेश्वरतुल्या मायाख्यमलयुक्ता विद्यामन्त्रेश्वरादयः इति सूत्रार्थः।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 324)

नैयायिकादिद्वैतदर्शनेषु यथाविध ईश्वरस्तथाविधास्ते प्राणिन इति।

(3) स्थूलसूक्ष्मशरीरोत्तीर्णाः शुद्धचिद्रूपाः पारमैश्वर्यशक्ति-युताः सन्तोऽपि केवलमेकमात्रमायीयमलावृतास्तत एव भेददर्शिनः शुद्धाः प्रमातारो मन्त्रापरपर्यायाः एते। यथा—

"शरीरादिशून्या अपि ते न चिन्मात्रस्वभावाः, अपितु सजातीयेभ्यो वेद्याच्च पृथग्भावाभिमानसङ्कोचात्मकमायीयम-लाधिकृतसंवित्स्वभावास्ते भगवता निर्मिताः।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 245)

मायीयमलसंवलितत्वेनैव न चिन्मात्रं तेषां स्वभावोऽपि तु ते चित्स्वभावाः सन्तोऽपि मायीयमलस्वभावाः अप्यंशतः इति मायीयमलाधिकृतसंवित् स्वभावाः, न केवलशुद्धसंविदात्मका इति तात्पर्यमत्र।

(4) विद्यातत्त्वस्य तृतीये महामायाख्ये निम्ने स्तरे स्थिताः स्वतन्त्रसंविन्मात्रगृहीतात्मभावाः शुद्धाः प्राणिनो हि विद्येश्वराः। यथा च पदस्य निर्वचनम्। यथा—

"विद्यातत्त्वे स्थिता ईश्वराः सर्वज्ञाः सर्वकर्तारश्चेति विद्येश्वराः।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 277)

(5) तेषां निजस्वरूपविषये न कोऽपि विपर्यासो यतस्ते शुद्धं पारमैश्वर्यशक्तिमण्डितं च चिन्मात्रं स्वात्मत्वेन मन्यन्ते, परं तथापि ते वेद्यं स्वतो भिन्नमेव पश्यन्ति। भगवान् अनन्तनाथस्तेषामधिष्ठाता, तस्य ते उपासकाः स च तेषां पालकः।

द्र०:- (प०सा०वि०,पृ०,43; पू०प्र०2, 505,-507), इति।

~मायातत्त्वोत्तीर्णाः — **केवलभेददृष्टिरूपमायीयमलस-म्भिन्ना विद्येश्वराः वेद्यात्मकजडदेहाद्यहंभावात्मकघोरमायीय-मलाद्रहिताः सन्तो मायोत्तीर्णाः शुद्धाः प्रमातारः इति गण्यन्ते। मायाख्यात् तत्त्वादुत्तीर्णाः इति यथा—**

"नन्वेवं ते मायीया एवेति कथं मायातत्त्वोपरिवर्तिन उच्यन्ते इत्याशङ्क्याह—तावच्चेति। वेद्यदेहाद्यहम्भावज्ञात्व-कर्तृत्वविरहावभासनलक्षणपूर्णमायाव्यापाराभावादमायीयास्ते उच्यन्ते, सत्यपि तावति मायाव्यापारे इत्यर्थः।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 246)

~मायावरणावृताः — **भेददर्शनं तेषां मायाकृतदेवाव-रणाद् भवति। यथा—**

"विद्यातत्त्वे विद्येश्वरप्रमातृणां बोधरूपत्वाविशेषेऽपि या भेदप्रथा सा मायाशक्ति कृतैव—इति आगमेषु गीयते—'मायोपरि महामाया .....'।"

(प० सा० वि०, पृ०, 43)

सा च क्षीणशरीरा तेषां माया महामायेत्युच्यते।

द्र०:- **'महामाया'** ~'परा' इति।

विद्योपादानम् :— अशुद्धविद्यादीनां कञ्चुकानामुपादानं कलैवास्ति। न हि ज्ञातृत्वं विना कर्तृत्वस्य सम्भवः। ततः कलैव स्वव्यापारसिद्धयर्थं पशौ किञ्चिज्ज्ञत्वमप्यादधाति। इति कलात एवाशुद्धाविद्याया उदयः। यथा—

"न च कर्तृत्वमज्ञस्येति किञ्चिज्ज्ञत्वदायिन्यशुद्धविद्या कलातो जाता।"

(तं० सा०, पृ०, 81)

द्र०:- (तं० आ० 9, 191-192) **इति।**

द्र०:- (तं० आ० वि०, खं० 6, पृ०,150) **इति च।**

अशुद्धविद्याविषयेमेवैतन्न शुद्धविद्याविषयमिति न विस्मर्तव्यं सुधीभिः।

विधिनिषेधौ :— इदमेवं कुर्यादिति विधिः, इदमेवं न कुर्यादिति निषेधः। धर्मशास्त्रादौ तयोः प्राबल्यं, न त्रिकादिरूपायां शैव्यामुपासनायामिति। तत्र केवलं समयपालन-विधयः समयदीक्षायामेव। पुत्रकदीक्षादौ च समयपालनेऽपि न तथा भरः। ततो विधिनिषेधौ सामान्यतो धर्मशास्त्रसम्ब-न्धिनावेव।

~अकिञ्चित्करौ :— **(1) स्वात्मदर्शिनः प्रति विधिनि-षेधप्रपञ्चोऽकिञ्चित्करः। यथा—**

"तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्याजन्देहम्।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः।।"

(प० सा०, का०,83)

(2) तत्त्वदर्शी योगी व्यवहारे विषयानुपभुञ्जानोऽपि न तैः स्पृश्यते पद्मपत्रमिव जलेन। तदेतन्मालिनीवाक्योद्धरण-पूर्वकमुपदिष्टं तन्त्रालोके। यथा—

"तत्त्वे निश्चलचित्तस्तु भुञ्जानो विषयानपि।।
न संस्पृश्येत दोषैः स पद्मपत्रमिवाम्भसा।
विषापहारिमन्त्रादिसन्नद्धो भक्षयन्नपि।।
विषं न मुह्यते तेन तद्वयोगी महामतिः।।"

(तं० आ० 4, 219-221)

उद्धः०:- (मा० वि० तं०)

~अवकाशहीनौ :— **(1) त्रिकाचारसाधानासु, विशेषतः शाक्तशाम्भवोपाययोर्न विधिनिषेधयोः कश्चनाप्यवकाशः। तन्त्रालोके मालिनीविजयोत्तरवाक्यान्यत्र विषये समुद्धृतानि। यथा—**

"नात्र शुद्धिर्न चाशुद्धिर्न भक्ष्यादिविचारणम्।।
न द्वैतं नापि चाद्वैतं लिङ्गपूजादिकं न च।
न चापि तत्परित्यागो निष्परिग्रहतापि वा।।
सपरिग्रहता वापि जटाभस्मादिसंग्रहः।
तत्त्यागो न व्रतादीनां चरणाचरणं च यत्।।
क्षेत्रादिसंप्रवेशश्च समयादिप्रपालनम्।
परस्वरूपलिङ्गादि नामगोत्रादिकं च यत्।।
नास्मिन्विधीयते किञ्चिन्न चापि प्रतिषिध्यते।
विहितं सर्वमेवात्र प्रतिषिद्धमथापि च।।"

(तं० आ० 4, 213-217)

उद्धः०:- (मा० वि० तं०)

(2) शाक्त-शाम्भव-योगाभ्यासी नैव कथमपि विधिनिषेधाधीनः। तत एवासौ विषयाणां ग्रहणे परिवर्जनेऽपि स्वतन्त्रः। भोगभोक्तृताया अपि खलु कदाचिद् य उदयः सोऽपि पारमेश्वरादेव लीलामयात् स्वातन्त्र्यात्। ततो नासौ भोक्तृता परिहार्या परयोगिना, नापि सरागं वाञ्छनीया। प्रवाहपतित्वेन सर्वमपि तेन सेव्यम्। यथा—

"अत एव न कश्चिदाग्रहो विषयाणां ग्रहणेऽप्यपोहने।
परभैरवसंविदात्मनः स्वयमेवोच्छलिता हि भोक्तृता।।"

(मा० वि० वा० 2, 155)

~त्रिके :— **येनयेन कर्मणा संविन्निजं नैर्मल्यं रसयेत् तत्तत् कर्मात्र विहितं मन्तव्यम्। यथा—**

"यदा यथा येन यत्र स्वा संवित्तिः प्रसीदति
तदा तथा तेन तत्र तत्तद्भोग्यं विधिश्च सः।"

(तं० आ० 12, 16-17)

नाऽऽशङ्कनीयौ :— **षडध्वधारणासु सर्वं परिपूर्णपरशिवतया यत्र साक्षात् क्रियते तत्र कस्य वस्तुनो विधिः कस्य च निषेधः सम्भवेत्। यथा—**

"मन्त्रा वर्णस्वभावा ये द्रव्यं यत्पाञ्चभौतिकम्।।
यच्चिदात्म प्राणिजातं तत्र कः संकरः कथम्।
सङ्करभावतः केयं शङ्का तस्यामपि स्फुटम्।।
न शङ्केत तथा शङ्का विलीयेतावहेलया।"

(तं० आ० 12, 21-23)

उत्कृष्टयोगिविषय उक्तमेतदिति मन्तव्यं न साधारणसाधकविषये। यथा—

"अत्र पूजाजपाद्येषु बहिरन्तर्द्वयस्थितौ।
द्रव्यौघे न विधिः कोऽपि न कापि प्रतिषिद्धता।।
कल्पनाशुद्धिसन्ध्यादेर्नोपयोगोऽत्र कश्चन।"

(तं० आ० 12, 14-15)

विनयमार्गः :— जयरथमतेन कोऽपि तान्त्रिको मार्गः। यथा—

"विनयं तन्त्रप्रधानं शास्त्रम्।"

(तं० आ० वि०, खं० 12, पृ०,401)

अस्मन्मते तु बौद्धभिक्षूणां विनयपिट्टकाद्युक्तः साधनामार्गोऽयमभिप्रेतः। तस्यैव क्लेशबहुलत्वाद् अनात्मवादोपहतत्वात्, प्रलयाकलतोन्मुखत्वेन च वास्तविकमोक्षविद्यारहितत्वात्। इति विदांकुर्वन्तु सुधियः। अनात्मवादिनां प्रलयाकलपदजिगमिषूणां मार्गोऽयम्।

~दोषबहुलः :— **तत्र तावद्दोषाः —**

(1) स्वल्पपुण्यता, (2) क्लेशबाहुल्यम्, (3) आत्मसाक्षात्कारराहित्यम्, (4) वास्तविकमोक्षविद्याया अभावः इति।

यथा—

"स्वल्पपुण्यं बहुक्लेशं स्वप्रतीतिविवर्जितम्।
मोक्षविद्याविहीनं च विनयं त्यज दूरतः।।"

(तं० आ० 37, 28)

विनाशोत्पत्तिमान् :— ~प्रपञ्चः :— धरातत्त्वादनाश्रितशिवं यावत् सर्वोऽपि प्रपञ्चो विनाशोत्पत्तिमान्, ततो दीक्षया शोध्य एव सर्वोऽपि। यथा—

"यत्सदाशिवपर्यन्तं पार्थिवाद्यं च शासने।।
तत्सर्वं प्राकृतं प्रोक्तं विनाशोत्पत्तिसंयुतम्।"

(तं० आ० 8, 405-406)

"सदाशिवोऽत्रानाश्रितः, प्रकृतिश्च समना, तस्या एव मूलप्रकृतित्वात्।"

(तं० आ० वि०, खं० 5, पृ०, 264)

विन्दुः :— (1) स्वरूपस्यान्तरेव क्रियाशक्तेः परिपूर्णे उदये सति योऽन्तःकृत-प्रमेय-प्रमाण-प्रमात्रात्मक-सोम-सूर्य-वैश्वानरात्मकोऽसावविभागः प्रकाशः स एव विन्दुः, सृष्टयाद्यवभासनेच्छुर्विदि क्रियायां च स्वतन्त्रः इति। विन्दुरिच्छुः। विद् ज्ञाने इति धातोरस्य पदस्य व्युत्पत्तिः। विश्वसिसृक्षाविष्टोऽन्तःकृतस्रष्टव्यस्तं विश्वं तथा विमृशन् शिवो विन्दुः। स्रष्टव्यात्मक-प्रमाणादित्रयसम्भेदेऽप्यविभागः प्रकाशो विन्दुः। स च 'अं' इति मातृकावर्णे न व्यङ्ग्यः। बिन्दुशब्दोऽयमन्तःस्थवकारादिः।

यथा—

"अत्रानुत्तरशक्तिः सा स्वं वपुः प्रकटस्थितम्।
कुर्वत्यपि ज्ञेयकलाकालुष्याद्विन्दुरूपिणी।।
उदितायां क्रियाशक्तौ सोमसूर्याग्निधामनि।
अविभागः प्रकाशो यः स विन्दुः परमो हि नः।।"

(तं० आ० 3, 110-111)

वेत्तीति विन्दुः विदिक्रियायां स्वतन्त्रः प्रमाता, तस्य रूपमविभागः परः प्रकाशः।"

(तं० आ० वि०, खं० 2, पृ०, 117)

"सूर्यादीनामाश्रयभूतायां क्रियाशक्तावुदितायां—तत्तद्वैचित्र्यात्मना परिस्फुरन्त्यामपि, ... 'विन्दुः' विदिक्रियायां स्वतन्त्रः परप्रमात्रेकरूपः परमेश्वरः शिव, इत्यर्थः।"

(तं० आ० वि०, खं० 2, पृ०, 117)

(2) प्रकाशमध्ये सोमयसूर्याग्निरूपतायां प्रकाशमानतायामपि सदाप्रकाशमात्रत्वेन स्थितस्य प्रकाशस्य विन्दुरित्यागमिकी संज्ञा। स एव हि शिव बिन्दुः। ततः सर्वस्य वेदनमात्रशेषतैव विन्दुना द्योत्यते। यथा—

"अत्र प्रकाशमात्रं यत् स्थिते धामत्रये सति।
उक्तं विन्दुतया शास्त्रे शिवविन्दुरसौ मतः।।"

(तं० आ० 3, 133-134)

अन्तःस्थ वकारादिरयं शब्दो न पवर्गीयबकारादिः।

"विन्दुः पुनर्वेदनामात्रशेषतैव, सर्वस्य।"

यथा—

(प० त्री० वि०, पृ०, 176)

"वेद्यजातस्य वेदकात्मकविन्दुस्वरूपसंस्कारशेषत्वमित्यनेन रूपेण परिपूर्णं भवति।"

(प० त्री० ल० वृ०, पृ०, 5)

(3) चिद्रूपः शिवविन्दुः। विद् ज्ञाने इति धातोरस्य व्युत्पत्तिः। यथा—

"स विसर्ग एव विन्दुः विदिक्रियायां स्वतन्त्रः प्रमाता।"

(तं० आ० वि०, खं० 2, पृ०, 210)

~ग्राह्ययोगे :— (1) हृदयादिस्थानेषु योगिभिः संवेद्यं तारकाकारं तेजोबिन्दुः, बकारादिः। योगिसंवेदने त्वेवम्। परं वस्तुनो वेद्योल्लासोन्मुखः संवित्स्वरूपः शिव एव बिन्दुः। स एव च नरशक्ति शिवात्मकः सन्नप्यविभागप्रकाशैकरूपः। यथा—

"हृत्पद्ममण्डलान्तःस्थो नरशक्तिशिवात्मकः।।
बोद्धव्यो लयभेदेन विन्दुर्विमलतारकः।"

(तं० आ० 3, 112-113)

(2) बिन्दुरिति मुद्रितेषु पुस्तकेष्वपपाठः। यथा—

"द्वादशान्तभ्रूमध्यहृदयलक्षणेषु स्थानेषु ..... सङ्कुचितात्मतायाः प्राधान्याद् भेदभूमावेव प्राप्तप्ररोहः। ....तत्तद्वैचित्र्योल्लासेऽपि संविन्मात्ररूपत्वाच्छुद्धः, अत एव संसा-राब्धेस्तारकः।"

(तं० आ० वि०, खं० 2, पृ०, 118-119)

"भ्रूमध्यादौ तारकाप्रकाशरूपो विन्दुरशेषवेद्यसामान्य-प्रकाशात्मा।"

(स्पं० नि०, पृ०,63)

~साक्षात्कारतः :— विन्दुस्तावद् विषयजाते बाह्यतया, हृदये नरतया, नादे शक्तितया, परमे पदेऽन्तारूपतया, द्वादशान्ते च शिवतया साक्षात्कार्यो भवति। यथा—

"बहीरूपतया, हृदये नरतया, ... नादे शक्तितया, अन्तारूपतया परमे पदे, द्वादशान्ते शिवतया प्रस्फुरन् पञ्चप्रकारः।"

(तं० आ० वि०, खं० 2, पृ०, 210)

विन्ध्यवासी :— (1) कोऽपि ग्रन्थकारः यदुल्लेखो विवृत्तिविमर्शिन्यां विद्यते। प्रकरणतः एवं प्रतीयते यदयं कोऽपि सांख्यशास्त्राचार्यः। सांख्यशास्त्रीयग्रन्थेषूपलब्धैरुद्धरणैरेवं प्रतीयते यदसौ षष्टितन्त्रस्य कोऽपि प्राचीनो व्याख्याता। न तस्य ग्रन्थः कोऽपीदानीं लभ्यते। केचन विद्वांसः पञ्चशिखाचार्यमेव विन्ध्यवासीति मन्यन्ते।

(2) शब्दकल्पद्रुमानुसारं कोऽपि पुरातनः कोषकारः। यथा—

"अन्ये— इति विन्ध्यवासिप्रभृतयः। ते हि अहङ्कारबुद्ध्योः कारणस्कन्धतामेव आहुर्न करणस्कन्धताम्।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 301-302)

"विन्ध्यवासी—विन्ध्ये वसतीति ..... व्याड (डि) मुनिः। इति हेमचन्द्रः।"

(श० क० द्रु०, खं० 4, पृ०, 405)

"व्याडिः = कोषकारसुविशेषः ....।

विन्ध्यवासी, नन्दिनीतनयः। इति हेमचन्द्रः।
नन्दिनीसुतः इति त्रिकाण्डशेषः।"

(तदेव, पृ०,547)

विपरीतनिश्चयः :— अनात्मन्येव देहादावात्मत्वनिश्चयः। यथा—

"अनात्मन्यात्मगर्वो यः स विपरीतनिश्चयः।"

(पू० प्र०,1, 170)

विपर्ययाः :— विपरीतज्ञानप्रकाराः। यथा—

"तमो मोहो महामोहस्तामिस्त्रोऽन्यो विपर्ययः।।
अन्धतामिस्त्रमित्याहुरेवं पञ्च विपर्ययाः।"

(स्व० तं० 11, 138-139)

एषां नामान्येव दत्तानि तन्त्रे न पृथक्-पृथग् लक्षणानि।

विपुलम् :— सुषुप्तेर्द्वितीयो भेदविशेषो यत्र वेद्यसंस्कार-मात्रशेषतया वेदकस्यैव विततया प्ररोहः। यथा—

"विपुलमिति तथैव प्ररोहात्।"

(तं० आ० वि०, खं० 7, पृ०, 179)

विभागाभासनम् :— अहमिति परिपूर्णो यः संविदः स्वात्मविमर्शचमत्कारः सः सृष्टिरूपतायां विकासं प्राप्नुवन् पश्यन्ती-मध्यमा-वैखरीति त्रिविधवाग्विमर्शरूपतामादायैव विश्वरूपतां याति। यथा—

"विभागाभासने चास्य त्रिधा वपुरुदाहृतम्।
पश्यन्ती मध्यमा स्थूला वैखरीत्यभिशब्दितम्।।"
(तं० आ० 3, 236)

~तत्कारणम् :— अनुत्तरा तत्र परा शक्तिः, इच्छा च परापरा, उन्मेषशक्तिश्च तथाऽपरा इति शक्तित्रयं विभागावभासकारणम्। एताभ्य एव स्वरषोडशकं, कादिहान्तव्यञ्जनवर्गाश्चाविर्भवन्ति। यथा—

"अनुत्तरा परेच्छा च परापरतया स्थिता।
उन्मेषशक्तिर्ज्ञानाख्या त्वपरेति निगद्यते।।"
(तं० आ० 3, 249)

"ह्रस्वत्रयमेव च भैरवात्मनः परस्य तत्त्वस्य शक्तिरूपतया पूर्वं निर्णीतम्, तदुक्तम् :—

'अतः षण्णां त्रिकं सारं चिदिष्युन्मेषणात्मकम्।
तदेव त्रितयं प्राहुर्भैरवस्य परं महः'।। इति।"
उद्धः- (तं० आ० वि० खं० 2, पृ०, 233)

विभुः :— विशेषेण जगदाकारेण भवति-दर्पणनगर-न्यायेनाभासते स्वेच्छयेति विभुः, स्वतन्त्रः परमेश्वरो— स्वेच्छया जगत् सृष्ट्यादिकारी,—विविधतया भवनशीलः— आभासनशील इति। यथा—

"विभुरित्युक्ते व्यापनीयविशेषानभिधानाद् अशेषवस्त्वन्तर्भावेन दर्पणवत् वैश्वरूप्यावभासनसारत्वं विभुत्वमुक्तम्।"
(ई० प्र० वि० वि०, खं० 2, पृ०, 135)

"एष देवोऽनया देव्या नित्यं क्रीडारसोत्सुकः।
विचित्रान्सृष्टिसंहारान्विधत्ते युगपद्विभुः।।"
(बो० पं० द०, 6)

तेन न केवलमाकाशवत् सर्वगत एव, अपितु सर्वरूपोऽपि।

विभुत्वम् :— (1) परमेश्वरस्य विविधाकारतयावभासन-सामर्थ्यं तथाभासनशीलत्वं च न केवलं सर्वगतत्वमेव। यथा—

"विविधं कृत्वा भवतीति विभुत्वं, न तु इह व्यापकत्वं, देशभेदाभावात्तस्येहानुपयोगात्।"
(ई० प्र० वि० वि०, खं० 2, पृ०,13)

(2) देशकृतव्यवच्छेदशून्यत्वं परमेश्वरस्य। यथा—

"विभुत्वात्सर्वगो नित्यभावादाद्यन्तवर्जितः
विश्वाकृतित्वाच्चिदचित्तद्वैचित्र्यावभासकः।।"
(तं० आ० 1, पृ० 61)

"विभुः इति देशावच्छेदशून्यत्वात्।"
(तं० आ० वि० खं० 1, पृ०,99)

(3) तस्य विश्वाकृतित्वेन नियतदेशक्रमस्याभावो विभुत्वं, न पुनः सर्वमूर्त्तसंयोगित्वमात्रम्। यथा—

"अनपेक्षस्य वशिनो देशकालाकृतिक्रमाः।
नियता नेति स विभुर्नित्यो विश्वाकृतिः शिवः।।"
(तं० आ०1, 60-61)

विभूतिः :— (1) इयं परादेव्येव हि परमेश्वरस्य परमेश्वरतायाःआधारभूतं तत्त्वम्। परमेश्वरताया अभिव्यक्तिरेव हि तस्य परमेश्वरस्य विभूतिः ततोऽभिव्यक्तिरूपतायामसौ तस्य विभूतिरेषा तस्य शक्तिरेवानेनाभिधानेनोच्यते।

द्र०:- (तं० सा०, पृ०, 27) **इति।**

(2) परिपूर्णस्य परमेश्वरस्य पूर्णतामयी परा पारमेश्वरी शक्तिरेव तस्य विभूतिरित्युच्यते यतस्तदायत्तमेव तस्य पारमैश्वर्यवैभवम्।

द्र०:- 'ऊर्मिः' इति।

द्र०:- 'काली' इति च।

आगमिकी खल्वेषाऽस्याः संज्ञा।

विभ्रमाकरः :— उत्पलदेवस्य पुत्रः। यथा—

"विभ्रमाकरसंज्ञेन स्वपुत्रेणास्मि चोदितः।
पद्मानन्दाभिधानेन तथा सब्रह्मचारिणा।।"
(शि० दृ० वृ०, पृ०, 2)

विमर्शः :— (1) प्रकाशस्याहमिति स्वान्तःस्फुरतात्मिका स्वात्मविमर्शनक्रिया परदशोचिता। यथा—

"प्रकाशस्य जडवैलक्षण्यं संरम्भः कर्तृतारूपो यः, स एवात्मविश्रान्तिलक्षणो निरपेक्षत्वेन विमर्शोऽहमिति कथ्यते।"
(ई० प्र० वि० वि०, खं० 2, पृ०, 182)

"विमर्शाख्यो यः संरम्भः स्वान्तः स्फुरत्क्रियाशक्तिस्फाररूपः .....। सा चिदानन्देच्छाज्ञानक्रियारूपशक्तिपञ्चकसामरस्यस्वभावे त्याख्यायते।"
(म० मं० प०, पृ०, 67)

द्र०:- (प० प्रा०, पृ०, 1-2) **इति।**

(2) स्वातन्त्र्यशक्तिः। यथा—

"यस्यः विमर्शः, स्पन्दो, हृदयं, विसर्गः इत्यादयः सहस्रशो व्यपदेशाः।"
(तं० आ० वि०, खं० 3, पृ०, 386-387)

"यच्छ्रीकालीकुलम्:—
'तस्य देवादिदेवस्य परबोधस्वरूपिणः।
विमर्शः परमा शक्तिः सर्वज्ञा ज्ञानशालिनी'।। इति।"
(ने० तं० उ०, खं० 1, पृ०, 21)

(3) सर्वास्ववस्थासु वाचस्तत्त्वं, पराया आरभ्य वैखरीपर्यन्तम्। यथा—

"परमेश्वरः परा वाक् कथितः सिद्धैर्विमर्शसारत्वात्।
ज्ञप्तिमये व्यवहारे सर्वत्र विमर्श एव वाक्तत्त्वम्।।"
(स्वा० द० 3, 33)

विमर्शदीपिका :— कश्चन शैवशास्त्रग्रन्थो यस्य वाक्यानि विज्ञानभैरवोद्द्योते समुद्धृतानि सन्ति। यथा—

"विमर्शदीपिकायां तु :—

'विश्वात्म विश्वोत्तीर्णं च स्वतन्त्रं दिव्यमक्षरम् अहमित्युत्तमं तत्त्वं समाविश्य बिभेति कः'।। इति।"

(वि० भै० उ०, पृ०, 90)

"एतदेव विमर्शदीपिकायां ध्वनितम् :—

'स्वतन्त्रं परिपूर्णं चेत्यादि ..... सौगताः शून्यतां जडाः'।।" इत्यन्तम्।

(वि० भै०, उ०, पृ०, 110-111)

विमर्शनम् :— मायाप्रमातुः कृत्यविशेषः। तृतीयमिदं कृत्यम्। यथा—

"याश्च विचित्रा एव सृष्टिसंहारलीला :—आभासन-रक्ति-विमर्शन-बीजावस्थापन-विलापनात्मपञ्चविधकृत्यानि प्रख्यापयति।"

(स्पं० सं०, टिप्प०, पृ०,1)

विमर्शपारिजातः :—सिद्धश्रीराममहोदयानां शिष्येण (रामजूसौदागरेण) छन्दोभ्रष्टं वैयाकरणसंस्कारहीनं च निर्मितं किमपि वार्त्तिकपुस्तकं शिवसूत्रमधिकृत्य नेदं पुस्तकं प्रकाशितं केनापि। श्रीनीलकण्ठगुरटूशास्त्रिणाऽस्य संशोधनं सम्पादनं च कृतं 1989 तमे रवैस्तवत्सरे। सम्भवतः कदाचिद्रणवीरविद्यापीठेनास्य प्रकाशनं विधास्यते।

विमर्शशक्तिः :— (1) विश्ववैचित्र्योदभासिका पारमेश्वरी शक्तिः। यथा—

"एवं चेयद्विश्वशक्तिखचितपराशक्तिसुन्दरस्यस्वात्मनः स्वरूपगोपनक्रीडया स्वात्मभित्तावेवांशांशिकया निर्भासनं भगवान् यावच्चिकीर्षति तावदेकैवाभिन्नाप्यसौ तदीया विमर्शशक्तिरिच्छात्वं प्रतिपद्य ज्ञानक्रियारूपतया स्थित्वा शिवशक्तिपरामर्शात्मकबीजयोनि-भेदेन द्विधा भूत्वा वर्गभेदेन तत्कलाभेदेन च नवधा पञ्चाशद्धा च स्फुरन्ती .....।"

(स्पं० नि०, पृ०,66)

"सैव च क्रियाविमर्शः स्वस्था क्षुभिता च विश्वविस्तारः।।"

(म० मं० 11, पृ०, 33)

(2) शिवस्येयमेव शिवता। यतो हि— परस्पन्दरूपां परविमर्शशक्तिं विना पराशिवस्यापि सौषुप्तनभः कल्पत्वं, न परमेश्वरत्वं, नापि परब्रह्मता। विमर्शात्मिका या स्वातन्त्र्यशक्तिः सैव तस्य परस्वभावभूता सैव च तस्य परमेश्वरता। तद्वशादेव तस्य परब्रह्मता सर्वत्र विजृम्भते। यथा—

"कलनात्मिका हि विमर्शशक्तिस्तामन्तरेणाकुलमपि तुर्यातीतं नाम न किञ्चित्— सौषुप्तपदाविष्टत्वात्, तुर्यानन्तरताया अपि समानत्वात्; विमर्शशक्तिश्च परा परमेश्वरी भैरवभट्टारकस्य निरतिशयस्वातन्त्र्यात्मिकापूर्णकृशतदुभयात्मतदुभयरहि-तत्वेनावतिष्ठते।"

(प० त्री० वि०, पृ०,164-165)

(3) धरादिशक्त्यन्ततत्त्वातरूपेणावभासमाना पराशक्तिः शिवस्य कादिक्षान्ता मातृकादेवी।

यथा—

"धरादिशक्त्यन्तं कादिक्षान्तविमर्शशक्तिः षोडशी कला इति गीयते।"

(प० त्री० वि०, पृ०,6)

विमर्शस्वभावः :— स्वतन्त्रत्वं, सर्वंसहत्वं सर्वाकाराव-भासकत्वं च। यथा—

"विमर्शो हि सर्वंसहः परमप्यात्मीकरोति, आत्मानं च परीकरोति, उभयमेकीकरोति, एकीकृतं द्वयमपि न्यग्भावयति, इत्येवं-स्वभावः।"

(ई० प्र० वि०, खं० 1, पृ०, 205)

विमलकला :— अभिनवगुप्तस्य जननी।

यथा—

"कीदृशी जननी? 'विमलकलाश्रया' इति। 'विमला इति' वर्णकला 'आश्रयः' आलम्बनं यस्याः सा, विमलकला-भिधाना इत्यर्थः।"

(तं० आ० वि०, खं० 1, पृ०, 12-13)

विमलीकरणम् :— मन्त्रोपयोगसम्बन्धी क्रियांशविशेषः।

यथा—

"विमलीकरणं स्वाहाशब्देन ..... तदुक्तं श्रीमदुच्छुष्मतन्त्रे:—

..... स्वाहाकारोऽमले तथा।।' इति।"

(ने० तं० उ०, खं० 2, पृ०, 75)

विमोक्षः/मोक्षः :— चिदेकरूपता।

यथा—

"विमोक्षश्चिदेकमयता।"

(प० त्री० वि०, पृ०,8)

विमोहिनी :— ~माया :— परमेश्वरस्य सा शक्तिर्ययासौ स्वयं प्रकाशात्मतया सततं प्रकाशमानोऽपि स्वात्मनि भागशोऽप्रकाशनमवभासयति।

यथा—

"सैव भगवतो माया विमोहिनी नाम शक्तिस्तद्वशात्.. .....भागेनाप्रकाशनवशादनुपलक्षिते।"

(ई० प्र० वि०, खं० 1, पृ०, 37)

वियद्युग्मम् :— हृदयमध्ये बाह्यद्वादशान्ते च क्षणं-क्षणं प्राणापानराहित्येन ज्ञायमानं शून्यतात्मकं यत् स्थानद्वयं शून्यद्वयम्, तदेव वियद्युग्मम्।

यथा—

"मरुतोऽन्तर्बहिर्वापि वियद्युग्मानिवर्तनात्।
भैरव्या भैरवस्येत्थं भैरवि व्यज्यते वपुः।।"

(वि० भै०, 25)

"यद्वियद्युग्मं–हृदाकाशो द्वादशान्तश्च यद्दिवियद्द्वयम्।"
(वि० भै०,उ०, पृ०, 21)

विरूपाक्षनाथः :— विरूपाक्षपञ्चाशिकानिर्माता कोऽपि सिद्धः। अस्य कालः = एकादशताब्दी। तट्टीकाकारः कोऽपि विद्याचक्रवर्ती नाम विद्वान् कान्यकुब्जाधिपतेर्गोविन्दचन्द्रस्य सम्मानपात्रमभूत्। गोविन्दचन्द्रस्य कालो द्वादशशताब्दी। ततो विरूपाक्षनाथ एकादशशताब्दी इत्यनुमातुं शक्यते।

यथा—

"कृतेयं विवृतिर्लघ्वी श्रीविद्याचक्रवर्तिना।
गोविन्दचन्द्रधीनाम्नि निकषे विनिवेशिता।।"
(वि० पं०, पृ०, 28)

विरूपाक्षपञ्चाशिका :— शैवशाक्तोपासनारहस्यगर्भं स्तोत्रं विरूपाक्षनाथविरचितम्। इदं हि तथाविधं सैद्धदर्शनशास्त्रपुस्तकं यत् कश्मीरशैवदर्शनेन साकं समानतन्त्रसिद्धान्तबहुलम्।

द्र०:- (म० मं० प०, पृ०,52,70,73,74,119,131) इति।

केनापि विद्याचक्रवर्तिनाम्ना विदुषा विरचितया टीकयासहितं प्रकाशितमभूदेकदा। अनन्तरं वाराणस्यां संस्कृतविश्वविद्यालये तन्त्रसंग्रहग्रन्थे पुनः प्रकाशितमभवत्।

विलयकृत्यम् :— मायाकर्तृकं तिरोधानकृत्यम्, येन दीक्षितोऽपि समयोल्लङ्घनादिना गुरुशास्त्रमन्त्रादिकं प्रति द्वेषबुद्ध्याऽविश्वासमूलया नरकपातादि लभते। तिरोधानकृत्यम्, निग्रहकृत्यम्। तत् कृत्यं येन प्राणी गहनेष्ववज्ञानगर्तेष्वधोऽधो गच्छति।

द्र०:- (प्र० ह०, पृ०, 23) इति।

द्र०:- 'तिरोधानम्' इति।

द्र०:- 'निग्रहकृत्यम्' इति।

द्र०:- 'पिधानकृत्यम्' इति च।

~कालान्तरानुबन्धि :— मायाकृतं तत् तिरोधानं येन दीक्षितोऽदीक्षितोऽपि वा शिवगुरुशास्त्रसमयादि विद्वेषी सञ्जायते तत्फलत्वेन च नरके पतति, सुचिरं चाधोऽध एव गच्छति संसृतिसागरे।

द्र०:- ~'तात्कालिकम्' इति।

~तत्क्षेत्रम् :— (1) प्रवर्तमानायामेव सृष्टौ स्थितौ च विलयकृत्यस्यावकाशः। ततः सृष्टिस्थितिविशेषरूपतैव विलयः।

यथा—

"स्थितिसृष्ट्यवान्तर रूप एव च विलयः।"
(ई० प्र वि० वि०, खं० 3, पृ०, 27)

(2) ततः प्रथमं सृष्टिस्तदनन्तरं स्थितिः तन्मध्य एव विलयः। इत्थमनुग्रहोऽपि तन्मध्य एव वेद्यः। या च परिपूर्णशिवभावतिरोधानपूर्विका सदाशिवादितत्त्वसृष्टिर्नासौ-विलयकृत्यमध्ये गण्यते। असौ तिरोधानलीलैव न तत्कृत्यं भगवतः। तदनु चानुग्रहलीलेति लीलाद्वयमेव। इदं पुनर्विलयकृत्यं पञ्चकृत्यमध्ये गणितमिति पारिभाषिक- पदभेदोऽत्र स्मर्त्तव्यः सुधीभिः। ततो न सृष्ट्यादेः प्राग्विल- यस्य स्थानमपि तु स्थितिकृत्यमध्य एव।

~तात्कालिकम् :— कञ्चिदेव कालमधःपातकारि तिरोधानकृत्यं मायाकृतम्। यथा—

"तच्च तात्कालिकमात्रं वा कालान्तरानुबन्धि वा। पूर्वं कामान्धकत्रिपुररावणादीनाम्, उत्तरं तु शिवगुरुशास्त्रसमयादिद्वेषिणां नरकपातमयम्।"
(ई० प्र० वि० वि०, खं० 3, पृ०, 279)

विलापः :— तन्मयीभावः यथा—

"मन्त्रतन्मयता मुद्रा विलापाख्या प्रकीर्तिता।"
उद्धृतः- (तं० आ० वि०, खं० 12, पृ०, 308)

विलापोऽत्र विलीनता, न रोदनादि।

विलापनम् :— मायाप्रमातृभूमौ प्रवर्तमानं पञ्चमनुग्रहाख्यं कृत्यम्।

द्र०:- 'विमर्शनम्' इति।

विलासः :— परस्य तत्त्वस्य स्वभावभूतायाः परमेश्वरताया असौ क्रीडैव सृष्टि-स्थिति-संहार-पिधान-अनुग्रहाख्य- कृत्यपञ्चकाभिनयकारिणी, यद्वशाद्विश्वमिदमाभासते प्रचलति च सुविचित्राभिर्गतिभिः।

स चायं विलाससिद्धान्तस्तत्रभवद्भिराचार्यामृतवाग्भवैर्निजे आत्मविलासाख्ये सैद्धदर्शनग्रन्थे सविस्तरं प्रतिपादितो वर्तते।

यथा—

"अभिनवरमणीयं सच्चिदानन्दकन्दं
स्वनवनवविलासोल्लासनैकप्रवीणम्।
अनुभवसुरहस्यं मङ्गलं मङ्गलाना-
मधिहृदिपरमेशं मौनमेवाऽऽयेऽहम्।।"
(आ० वि०1,1)

"सोऽयं विलास एवास्य शक्तिरित्युदितो बुधैः।
शिवशक्तिस्वरूपाभ्यां व्यवहाराय कल्पते।।"
(तदेव 2, 2)

"विलासो न स्वतो भिन्नो विलासादपि न स्वयम्।
तदेतत् सच्चिदानन्दमद्वैतं पारमार्थिकम्।।"
(तदेव 2, 3)

विलुप्ताधिगमः :— उपायतो विलुप्तान्यपि शास्त्राणि पुनर्हस्तगतानिभवन्ति। प्रतिपादितोऽस्ति बीजमन्त्राद्यालम्बनः कोऽपि रहस्यात्मकः आणवो विधिः मालिनीविजयोत्तरे एकोनविंशे पटले 49-55 यावत् येनैतत् सम्पद्यते।

यथा—

"स्वप्ने मासात्समाधिस्थः षड्भिर्भासैर्यथेच्छया।
उच्छिनान्यपि शास्त्राणि ग्रन्थतश्चार्थतोऽपि वा।।
जानाति वत्सराद् योगी यदि तन्मयतां गतः।"
(मा० वि० तं० 19, 54-55)

विवर्त्तः— ~ शैवेः— **(1) स्वेच्छानुसारं स्व-स्वातन्त्र्यप्रभावतो एकस्याविचित्रस्यापि तत्त्वस्य विविधतया वर्तनं, तथा तथाऽऽभासमानतयाऽवस्थानम् स्वविलासत एव।**

यथा—

"यथाश्रीक्रमकेलौ "विवर्तो विचित्रेण रूपेण वर्तनं, न त्वविद्यावशादपि तु स्वातन्त्र्यतः" इति।

(म० मं० प०, पृ०, 150)

~वेदान्तादौ :— **(2) असत्यस्य वस्तुनोऽवभासः। अन्यस्य वस्तुनः अन्यवस्तुरूपत्वेनावभासो वा।**

यथा—

(क) "विवर्तते—तदसत्यरूपमात्मन्युपगच्छति, इति।"

(शि० दृ० वृ०, पृ०, 44)

(ख) "असत्यविभक्तान्यरूपोपग्राहिता विवर्तः।"

(तदेव, पृ०, 44)

(ग) "विवर्तो नाम भ्रान्त्यपरपर्यायमन्यस्यान्यत्रारोपणात्मकं ज्ञानमुच्यते।"

(म० मं० प०, पृ०, 149)

(3) अन्तरङ्गं रूपतायां संवृतत्त्वेन स्थितस्य जगतो बहिरिदंरूपतायामवभासनमेव हि वस्तुतो विवर्तः। स एव वैदान्तिकैराचार्यैरन्यथा व्याख्यातो बौद्धैः साकं स्पर्धां विदधद्भिः। वैयाकरणैश्चाप्यनुसृतोऽसावेव पन्थाः।

विवर्तवादः :— (1) वेदान्तिनां वैयाकरणानां चासौ दार्शनिको वादो यदनुसारमेकमेव ब्रह्माविद्याकारणादीश्वरतया, जीवतया, जडजगदात्मकतया च बहुप्रकारकत्वेनाभासते लोकव्यवहारे।

(2) असौ वेदान्तिप्रभृतीनां वादो यदनुसारं परमार्थतोऽविद्यमानमपि जीवेश्वरजगदात्मकं त्रयमविद्याख्याज्ञानकारणाद् भासते।

~तदनुपपत्तिः :— **न तर्कयुक्त्या विवर्तवाद उपपद्यते।**

यथा—

"सद्रूपमेव, ब्रह्माभिन्नं चकास्त्यविकल्पेन, विकल्पबलात्तु भेदोऽयमिति, चेत्, कस्यायं विकल्पनव्यापारो नाम? ब्रह्मणश्चेद् अविद्यायोगो, न चान्योऽस्ति; अविकल्पकं च सत्यं विकल्पकमसत्यम्—इति कुतो विभागो भासमानत्वस्याविशेषात्। भासमानोऽपि भेदो—बाधितः, इति चेद्, अभेदोऽपि एवम् भेदभासनेन तस्य बाधात्। विपरीतसंवेदनोदय एव हि बाधो नान्यः कश्चित् बाधोऽपि च भासमानत्वादेव सन् नान्यतः,—इति भेदोऽपि भासमानः कथमविद्या।"

(ई० प्र० वि०, खं० 2, पृ०, 179-180)

~तद्दोषाः :— **(1) वैदान्तिके वैयाकरणीये चापि।**

यथा—

"असत्यः प्रतिपाद्योऽस्मिन्नसत्यः प्रतिपादकः।।
असत्यस्योपदेशश्यत्वमसत्येन परीक्ष्यते।
येन सा वा प्रमाणेन स्थाप्यते तस्य सत्यता।।
तत्सत्यत्वे द्विसत्यत्वमसत्यत्वे न किञ्चन।"

(शि० दृ० 2, 67-69)

अविद्याया सत्यत्वे द्विसत्यत्वम्, तस्या असत्यत्वे जगदाभासाभावः प्रसज्जेतेति।

(2) असत्यस्य जगतः आभासनमेव नोपपद्यते। नहि शशशृङ्गं, क्वाप्याभासते।

यथा—

"विवर्तो हि असत्यरूपनिर्भासात्मेत्युक्तम्। निर्भासते चासत्यं चेति कथमिति तु न चिन्तितम्।"

(ई० प्र० वि० वि०, खं० 1, पृ०, 8)

विविक्तः :— कलादिभ्यः स्वात्मनः पृथक्तामनुभवन् साधकः।

विविक्तिः :— द्र०:- **'विवेकः'** इति।

विवृत्तिः :— व्याख्यया तात्पर्यस्य विवरणम्।

यथा—

"शास्त्रार्थस्य संवृतस्य आच्छादितस्येव शङ्क्यमानपरमतपांसुराशिप्रायावरणापसारणेन अपगतावरणत्वं विवरणं विवृत्तिः।

(ई० प्र० वि० वि०, खं० 1, पृ०, 17)

विवृत्तिविमर्शिनीः—उत्पलदेवस्येश्वरप्रत्यभिज्ञाविवृत्तेरूपर्यभिनवगुप्तेन निर्मिता बृहती व्याख्या ई० प्र० वि० वि० इति।

~तन्निर्माणकालः :— **4090 तमे लौकिकसम्वत्सरे-तदनुसारं 1014 खृस्तवत्सरेऽभिनवगुप्ताचार्येणेश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिनी निर्मिता।**

यथा—

"इति नवतितमेऽस्मिन् वत्सरेऽन्त्ये युगांशे
तिथिशशिजलधिस्थे मार्गशीर्षावसाने।
जगति विहितबोधामीश्वरप्रत्यभिज्ञां
व्यवृणुत परिपूर्णां प्रेरितः शम्भुपादैः।।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 407)

~तन्महिमा :— **एतस्याः पुरतोऽन्यशास्त्रग्रन्थाः कलविङ्कप्रलापकल्पाः इत्युक्तम्।**

यथा—

"सर्वान्यशासनकथाः कलविङ्ककेलिकल्पाः परं प्रकलयन्निह शास्त्रसारे।।"

(ई० प्र० वि० वि०, खं० 3, पृ०, 406)

अस्यामुपयुक्तानि सर्वाणि पदवाक्यप्रमाणादीनि शास्त्राण्येतद् द्वारैव स्वात्मोपयोगितां गच्छन्ति।

यथा—

"वाक्यप्रमाणपदतत्त्वसदागमार्थाः।
स्वात्मोपयोगममुतः किल यान्ति शास्त्रात्।
भौमान् रसाञ्जलमयांश्च न सस्यपुष्टयै
मुक्त्वार्कमेकमिह योजयितुं क्षमोऽन्यः।।"

(तदेव, पृ०, 407)

विवेकः :— स्वात्मनो जडेभ्यस्तत्त्वेभ्यो विविक्ततायाः सविश्वासं विज्ञानम्। फलं च तस्य तस्मात्तस्मात् तत्त्वान्मुक्तिः।

द्र०:- 'मोक्षः' इति।

~(तत्कारणम्) :— तस्या जडतत्त्वेभ्यः स्वात्मनो विविक्ततायाः विज्ञानस्य यन्मूलकारणं तत्तु पारमेश्वरोऽनुग्रहशक्तिपात एव।

यथा—

"सर्वत्र चैश्वरः शक्तिपातोऽत्र सहकारणम्।"

(तं० आ० 9, 188)

~कलातः :— कलायाः सकाशात् स्वात्मनो विविक्ततायाः विज्ञाने सति प्राणी मायायाः सकाशादप्यात्मनं विविक्तमेव विजानन् मायातो मुक्तिमवाप्य विज्ञानाकलतामासादयति।

यथा—

"अलक्ष्यान्तरयोरित्थं यदा पुंस्कंलयोर्भवेत्।
मायागर्भेशशक्त्यादेरन्तरज्ञानमान्तरम्।।
तदा मायापुंविवेकः सर्वकर्मक्षयाद्भवेत्।
विज्ञानाकलता मायाधस्तान्नो यात्यधः पुमान्।।"

(तं० आ० 9, 184-185)

"कलापुंसोर्विवेके तु मायाधो नैव गच्छति।"

(तं० आ० 9, 187)

~प्रकृतितः :— द्र०:- 'बुद्धितः' इति।

~प्रधानतः :— सांख्यानामिव विवेकज्ञानं यन्महिम्ना प्रमाताप्राकृतिकेषु तत्त्वेषु संसरणान्मुक्तिं लभमानोऽपवेद्यसौषुप्तपदे चिरं तिष्ठति। सैषाप्यांशिकी मुक्तिः।

यथा—

"धीपुंविवेके विज्ञाते प्रधानपुरुषान्तरे।
अपि न क्षीणकर्मा स्यात् कलायां तद्धि सम्भवेत्।"

(तं० आ० 9, 186)

~बुद्धितः :— बुद्धिभूमावेव हि प्रकृतिपुरुषविवेकख्यातिः सम्भवति। तया च पुरुषः स्वात्मानं बुद्धेरपि विविक्तमेव विजानाति। तेन च विज्ञानेन पुमान् प्राकृते संसारे न संसरति, अपि तु प्रलयाकलीभूयावान्तरप्रलयान्तं यावच्छान्तिसुखे निद्राति। अभिनवायां च सृष्टौ पुर्नजागर्ति, सुषुप्तिं परित्यज्य। ततो मुक्तिरेषा न सदातनी मुक्तिरपि तु कञ्चित् कालं यावदेवेति।

यथा—

"अतः सांख्यदृशा सिद्धः प्रधानाधो न संसरेत्।"

(तं० आ० 9, 187)

~मलतः :— आणवादपि मलात् सर्वथापि पृथगेव स्फुरन्तं स्वात्मानं विमृशन् प्रमाता मलतो विविक्तो भवति, सर्वथा च मुक्तो भवति, नाधः संसरति। मन्त्रेश्वरतन्महेश्वरत्वादि दशायां सचमत्कारं विलसति। तच्चमत्कारास्वादनेन तुष्यन् पर्यन्ते शिवीभवति।

"मलाद्विविक्तमात्मानं पश्यंस्तु शिवतां व्रजेत।"

(तं० आ० 9, 188)

~मायातः :— (1) कलापुरुषविवेके सञ्जाते एव प्राणी स्वात्मानं मायोपरि स्थितं विजानाति। यतः कला हि मायाया एव बर्हिमुखं किञ्चिद् व्यक्ततामिवापन्नं स्वरूपम्। ततो मायायाः विविक्तः प्राणी विज्ञानाकलपदवीं लभते इति वेद्यम्। विज्ञानाकलानां यत्परमेश्वराद् भिन्नत्वं तत्तु सूक्ष्मतममायामलप्रभावतः। तच्च सूक्ष्मतमं मायामलं प्राप्तो नैव मायातत्त्वमध्ये गण्यते। ततो विज्ञानाकलो मायायाः विविक्त इति।

(2) तस्मिन् विवेके समुदिते प्रमाता स्वात्मानं शुद्धसंविन्मयं पश्यति, कञ्चुकैर्मुक्तो भवति, मायीये प्राकृते पार्थिवे चाण्डे न संसरति। परं विज्ञानाकलतामेव भजते। न स्वात्मशिवतां साक्षात्कुरुते, स्वतन्त्रक्रियाशक्तिमत्ताया अनुभवस्याभावात्।

द्र०:- 'कलातः' इति।

विवेकज्ञानम् :— उपरतक्लेशस्य योगिनो बुद्धिदर्पणे विषयप्रतिबिम्बनक्रियायां विरतायां सत्यां केवलं पुरुषस्यैव प्रतिबिम्बनं भवति, नान्तरस्य बाह्यस्य वा विषयस्य। तदेषा विषयप्रतिबिम्बाभावावस्थैव लक्षणया पुरुषप्रकृतिविवेकावस्थेति मतं जयरथस्य। अत्र पुरुषो बुद्धिवृत्तिविविक्तं स्वात्मानं केवलमिति। यथा—

"वस्तुतः प्रकृतिपुरुषयोरुपरतविषयच्छायायां बुद्धौ निष्कम्पदीपशिखाप्रख्यकेवलचिच्छायासङ्क्रान्तिर्नाम वैविक्त्यज्ञानमुच्यते, यत्रेदमुपचर्यते प्रकृतिरन्या पुरुषोऽन्यश्चेति।"

(तं० आ० वि०, खं० 8, पृ०, 24)

विवेकबन्धः :— विवेकस्तु बुद्धिगत एवाध्यवसायविशेषः, ततो बुद्धिधर्मविशेषः सन्नात्मनः आवरणमेव कर्तुमलं न मोक्षात्मकफलदानाय समर्थम्। सर्वस्य बुद्धिधर्मजातस्यात्मस्वरूपावरकत्वात् ततो विवेकस्य सत्तापि बन्धरूपैव।

यथा—

"अविवेक एव परमिह संसार इति प्रवादमात्रमिदम्।
अविवेक एव हि परं निःश्रेयसलाभसोपानम्।।"

(मा० वि० वा०2, 116)

अविवेकपदेन द्वितीयेनात्राकिञ्चिच्चिन्तकत्वमभिप्रेतम्।

विवेकमार्तण्डः :— कश्चन देहयोगादिप्रतिपादको ग्रन्थविशेषः सोद्धरणं समुल्लिखितः शिवोपाध्यायेन।

यथा—

"यदुक्तं विवेकमार्तण्डे :—
'कपालकुहरे जिह्वा प्रविष्टा विपरीतगा।
भ्रुवोरन्तर्गता दृष्टिमुद्रा भवति खेचरी'।। इति।"

(वि०भै० उ०,पृ०,71)

विवेकाञ्जनम् :— भट्टदिवाकरवत्सकृतः कश्चन शैवदर्शनग्रन्थो य इदानीं नैव लभ्यः परं यस्य पङ्क्तिद्वयं समुद्धृतमाचार्याभिनवगुप्तपादैः।

यथा—

"यदाह भट्टदिवाकरवत्सो विवेकाञ्जनेः—
प्रकाशश्चैष भावानाम् .....।
इत्यादि ..... न शापोक्त्या विलीयते।"
इत्यन्तम्।

(ई०प्र०वि०खं०1,पृ०,10)

द्र०:- **'दिवाकरवत्सः'** (भट्टः) इति।

विशेषस्पन्दः :— (1) जगद्रूपतया विकसिष्यमाणं स्रष्टव्यं प्रति यः औन्मुख्यमयो विमर्शः संविदोऽसौ विशेषस्पन्द इत्युच्यते।

यथा—

"ततः स्वातन्त्र्यनिर्मेये विचित्रार्थक्रियाकृति।
विमर्शनं विशेषाख्यः स्पन्द औन्मुख्यसंज्ञितः।।"

(तं०आ० 5,81)

शिवभावे परिस्फुरन्नयं विशेषस्पन्दः इति ज्ञेयम्।

द्र०:- **'स्पन्दः' :—** 'सामान्यः' इति।

(2) करणचक्रप्रेरकप्राणशक्तिस्फुरणमयः संविदः प्रथमपरिणामकल्पो विशेषो विशेषस्पन्दः। पशुप्रमातृषु स्फुरत्ययम्।

यथा—

"यतः करणवर्गोऽयं विमूढोऽमूढवत्स्वयम्।
सहान्तेरण चक्रेण प्रवृत्तिस्थितिसंहृतीः।।
लभते तत्प्रयत्नेन परीक्ष्यं तत्त्वमादरात्।
यतः स्वतन्त्रता तस्य सर्वत्रेयमकृत्रिमा।।"

(स्पं० का०,6-7)

"गुणादिस्पन्दनिःष्यन्दाः सामान्यस्पन्दसंश्रयात्।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः।।"

(तदेव,19)

जीवदशायां साक्षात्कार्योऽयं विशेषस्पन्दः इति विज्ञेयम्।

द्र०:- **'स्पन्दः' :—** 'विशेषः' इति।

(3) जगद्विकासमध्ये स्फुरन्तो मायीयसुखदुःखाद्यभिमानसचिवाः परिस्पन्दाः।

यथा—

"तथैते अत्यन्तहेया विशेषस्पन्दा अनात्मभूतेषु देहादिषु आत्माभिमानमुद्भावयन्तः परस्परभिन्नमायीययप्रमातृविषयाः सुखितोऽहं दुःखितोऽहम्—इत्यादयो गुणमयाः प्रत्ययप्रवाहाः संसारहेतवः।"

(स्पं०वि०,पृ०,64)

विश्रान्तिः :— वास्तविकतया या स्वरूपभूता निजा चित् तस्यामेवेतरानपेक्षयैव यद् विश्रमणं सैव वास्तविकी चिद्विश्रान्तिमय्यवस्था अत एवोच्यते विश्रान्तिरिति।

~ प्राणे :— **प्राणस्पन्दः।**

द्र०:- **'प्राणस्पन्दः'** इति।

विश्रान्तिधामः :— ~ परम् :— **अहं परामर्शात्मिका परा संवित्।**

यथा—

"अहं परामर्शमात्ररूपत्वमेव हि गर्भीकृताशेषविश्वतया परं विश्रान्तिधाम।"

(तं०आ०वि०,खं० 3,पृ०,365)

विश्वप्रमाताः — शिवः—

यथा—

"शिवरूपे विश्वप्रमातरि सदाशिवरूपे च विश्वप्रमाणे सत्युपपद्यते।"

(ई०प्र०वि०वि०,खं० 1,पृ०,77)

शिवप्रमात्रापेक्षया सदाशिवस्य प्रमाणस्थानीयत्वम्।

विश्वम् :— सदाशिवादिधरान्तसृष्टतत्त्वमयं निखिलमपि जगत्, शिवशक्तीनां बहिर्मुखप्रतिबिम्बात्मकम्। तस्य शक्तयस्तस्यैव चित्प्रकाशभित्तौ बहिर्मुखत्वेन प्रतिफलिताः सत्यो विश्वाकारतयावभासन्ते।

यथा—

"अन्तर्विभाति सकलं जगदात्मनीह
यद्वद्विचित्ररचना मुकुरान्तराले।
बोधः परं निजविमर्शरसानुवृत्त्या
विश्वं परामृशति नो मुकुरस्तथा तु।।"

(तं०सा०,पृ०,19)

~ अभिलापमयम् :— **विमर्शात्मिका या सूक्ष्मा शब्दना तन्मयमेव सदभिलापात्मकं विश्वम्।**

यथा—

"अत्र तु दर्शने विषयस्यापि विमर्शमयत्वादभिलापमयत्वमेव वस्तुतः।"

(ई०प्र०वि०,खं० 1,पृ०,227)

~ ईश्वरकृतम् :— **न ह्यनीश्वरः कश्चिदपीदं सुविचित्रभिन्नभिन्नार्थक्रिया योग्यसन्निवेशविशेषवद् विश्वं जनयितुं समर्थोऽभविष्यत्। अनीश्वरस्य तस्यासर्वज्ञत्वे सत्येवंविधविविधवैचित्र्यमयार्थक्रियासाधकानन्तसन्निवेशविशेषज्ञानराहित्यात्।**

यथा—

"अन्योऽन्यार्थक्रियायोग्यसन्निवेशविशेषितम्।
तदिदं सकलं विश्वं युक्तमीश्वरनिर्मितम्।।"

(ई०सि०,14)

~ चित्प्रतिष्ठम् :— **पश्यत्यादिवाग्विषयप्रपञ्चोऽत्र बाह्यावभासेऽपि वस्तुतश्चित्प्रतिष्ठ एव सन्नवभासते तथा तथेति चिन्मात्रपरमेश्वर एवायं वस्तुतो, यतश्चिदेव तत्तदाकारतयाऽवभासते तत्र-तत्र।**

यथा—

"तथा तद्वाक्त्रयीविषयः सङ्कल्प्यमानो वाच्यराशिर्भावाभावस्वभावः उभयथा अयं चित्प्रपञ्चित एव चिन्निदानं चित्प्रतिष्ठितः चिन्मयः चिन्मात्रविश्रान्तो विश्वप्रपञ्चः।"

(म०प्र०वि०,पृ०,4)

~ त्रिकात्मकम् :— **नरशक्तिशिवात्मकम्।**

यथा—

"नरशक्तिशिवात्मकं हीदं सर्वं त्रिकरूपमेव।"

(प०त्री०वि०,पृ०,73)

~ प्रकाशात्मकम् :— **(1) प्रकाशात्मकत्वेनैव विश्वमस्ति भासते च। प्रकाशव्यतिरिक्तत्वे तस्य भानमपि न स्यात् कुतः सत्ता। यथा—**

"न च तद्व्यतिरेक्यस्ति विश्वं सद्वावभासते।"

(तं०आ० 3,2)

(2) जडं हि विश्वमप्रकाशरूपतया नैव प्रकाशितुमलमिति-तावद् विश्वात्र आन्ध्यं विजृम्भेत। परं विश्वं प्रमातृप्रमाणप्रमेयतया वैचित्र्येण प्रकाशते। तच्च कथम्? उच्यते—संवित्प्रकाश एव प्रमाणादिभेदवैचित्र्यमयेन विश्वरूपेण सदा प्रकाशते इति। अन्यथा न किञ्चिदिदं प्रकाशेत।

यथा—

"अन्यदेवाथ तत् किञ्चित् प्रकाशत्वाभिशब्दितम्।
तन्मेयमातृमानेषु नैव कुत्रापि सङ्गतम्।।
ततश्चाप्रकटं विश्वं सर्वदैव भवेदिदम्।
अप्रकाशस्य भावस्य यदि च स्यात् प्रकाशनम्।।"

(मा०वि०वा० 1,672-673)

~ प्रतिबिम्बात्मकम् :— **दर्पणे मुखमिव शिवादिक्षित्यन्तं परमेश्वरप्रकाशे प्रतिबिम्बतं सद्भासते। विश्वं तावद् परमेश्वरे अहमिति स्वात्मतया अभेदेन विद्यते, परं प्रतिबिम्बितं सदिदमिति भिन्नतया तत्त्वभुवनादिव्राततयाऽवभासते। पारमेश्वरप्रकाशमिश्रमेवेदं सर्वं प्रतिबिम्बजातं प्रकाशते, तद् व्यतिरिक्तत्वेन सर्वस्यासत्त्वादप्रकाश्यत्वाच्च।**

यथा—

"निर्मले मकुरे यद्वद्भान्तिभूमिजलादयः।
अमिश्रास्तद्वदेकस्मिँश्चिन्नाथे विश्ववृत्तयः।।"

(तं०आ०3,4)

~ बोधमिश्रम् :— **बोधात्मकमेव सद् विश्वं भासते। अबोधरूपत्वे नैव भासेत। इति बोधमिश्रमेव सर्वत्र व्यवहारजाते।**

द्र०:- **'विश्वं'** :— ~ 'प्रतिबिम्बात्मकम्' इति।

~ मूलकारणतः :— **लोके हि बिम्बस्य सान्निध्यं प्रतिबिम्बाभासे निमित्तम्। विश्वात्मकप्रतिबिम्बावभासस्य च न किमपि बाह्यं बिम्बभूतं वस्तुनिमित्तम्। तस्य निमित्तं परमेश्वरशक्तय एव। परमेश्वरो निजशक्तिवैभवभरादेव स्वेच्छास्वातन्त्र्यविलासतः स्वशक्तिप्रतिबिम्बजातमेव विश्वात्मकतयावभासयति। प्रतिबिम्बन्यायेन ततो विश्वस्याभासे शिवस्य स्वातन्त्र्यमेव मूलकारणम्।**

यथा—

"इत्थं विश्वमिदं नाथे भैरवीयचिदम्बरे।
प्रतिबिम्बमलं स्वच्छे न खल्वन्यप्रसादतः।"

(तं०आ०3,65)

~ विवर्तात्मकम् :— **विश्वं हि शिवे तच्छक्तिरूपतया सदा तिष्ठति, परं तस्य चिदानन्दात्मके स्वरूपेऽस्य विश्वात्मकं रूपं नैव प्रकटतां याति, यतश्चिदानन्दशक्त्योरन्तः। संवृतमिव तिष्ठति। तदेव शिवस्य शक्तेर्बहिर्मुखविलासतः एव विश्वाकारतयाऽऽभासमानतां गच्छद् विवृतं भवति प्रतिबिम्बन्यायेन। सैषा संवृतस्येव विश्वस्य या विवृततेवासावेव हि विश्वविवर्त्तः। मूलकारणं च तस्य शिवशक्तेर्बहिर्मुखो विलासो, न पुनर्बाह्यं किमप्युपाधिरूपमविद्यादीति विवर्त्तवादात् स्वातन्त्र्यसिद्धान्तस्य विशेषः।**

यथा—

"यद्यपि विश्वप्रपञ्चः समस्तोऽपि चिद्विवर्त्तस्तथापि सुप्रबुद्धश्रीमङ्गलारूपेणादिदेवतैव विवृता।"

(म०प्र०वि०,पृ०,5)

विश्वतुच्छत्वं :— सांसारिकाः भावा न परमार्थप्रदाः इति। वैराग्यवर्धकत्वमात्रमीदृशानामर्थवादरूपाणां वाक्यानां प्रयोजनं न शून्यवादप्रतिपादनमिति तात्पर्यम्।

यथा—

"विश्वतुच्छत्ववाक्यानां वैराग्याद्यर्थवादिनाम्।।
तातत्पर्येण न दोषोऽस्ति नानाचित्त्वं न कल्पते।"

(शि०दृ०3,95-96)

विश्वप्रमाणम् :— सदाशिवः शिवप्रमात्रपेक्षया।

द्र०:- **'विश्वप्रमाता'** इति।

विश्वरूपाः— ~ मन्त्रवर्णात्मकत्वेनः — माया–ईकारः।

यथा—

"विश्वरूपाया मायायाः – ईकारस्य।"

(ने०तं०उ०खं०1,पृ०,50-51)

विश्वसंहर्ताः— ~ मन्त्रवर्णः — मकारः।

यथा—

"विश्वसंहर्ता रुद्रस्तद्वाचित्वान्मकारः।"

(ने० तं० उ० खं०1, पृ०, 51)

विश्वसंहारः :— स्वात्मनि विश्वस्य लयो भाव्यमानः।

यथा—

"सर्वत्र स्वशक्तीनामेवाभिव्यक्तिं पश्यन् योगी विश्वमपि स्वात्मसातकुर्वन् शाक्तोपायेन शाम्भवं स्वं स्वरूपं प्रविशँस्समावेशभाग्भवति, तेन सर्वत्र स्वशक्तीनामेवानुसन्धाने सति साधकः

विश्वसंहारमनुभवति। विश्वस्य स्वात्मन्येव लयो भवति तस्येति।"
(शि०सू०विवृ०1,7)

"चित्तचित्रपुरोद्याने क्रीडेदेवं हि वेत्ति यः।
अहमेव स्थितो भूतभावतत्त्वपुरैरिति।।"
(तं०आ०11,102)

एषा भावनैव सार आणवोपायानां, विशेषतः स्थानकल्पनाभ्यासस्य।

विश्वसंहिता :— कोऽपि आगमिको दर्शनग्रन्थो यस्य प्रतिपाद्यो विषयः स्पन्दकारिकामनुसरति। स्पन्दप्रदीपिकायामुद्धृतान्यस्य पद्यानि तथा प्रत्याययन्ति।

यथा—

(1) "उक्तं हि विश्वसंहितायाम् :—
'ध्येये चित्तं यदा लीनं तदा ध्यानमुदाहृतम्।
ध्येयः प्रत्यक्षतां याति ध्याता तन्मयतां व्रजेत्।।
ऋच्छतस्त्विति पाठाद्वा ध्येयं चिन्तयतोऽत्र या।
तदात्मता समापत्तिरैक्यं तस्योदयः स तु।।' इति"
(स्पं० प्र०, पृ०, 41)

(2) "येयं स्वरूपसंवित्तिः साऽमृताप्तिरिहात्मनः।
जरामरणविच्छेदादपुनर्भवता न तु।।
दुग्धाब्ध्युद्गतस्यायमेव चात्मनोऽनुग्रहः स्वतः।
निर्वाणदीक्षा तच्चेयं परमात्मनियोजिका।।"
(स्पं० प्र०, पृ०, 42)

अत्र पद्ये पाठः सन्देहग्रस्तः।

विश्वहाः— ~ मन्त्रवर्णः — कालः मकारः।

यथा—

"विश्वहा कालस्तद्वाची मकारः।"
(ने०तं०उ,०खं० 1, पृ०, 51)

यथा—

"विश्वकृतित्वाच्चिदचितृत्तद्वैचित्र्यावभासकः।"
(तं०आ०1,62)

"विश्वाकृतिरिति चिदचिदाद्याकारवैचित्र्योल्लासकत्वात्।"
(तं०आ०वि०,खं०1, पृ०,99)

विश्वात्मत्वदर्शनम् :— अनुसन्धानपरस्य योगिनः सर्वं स्वात्मैवदृश्यते साक्षात्।

विश्वाकृतित्वम् :—

चिदचिदाद्याकारोल्लासकत्वं परमेश्वरस्य स्वयमेव प्रतिबिम्बन्यायेन तदुल्लासकत्वेन भासमानत्वम्।

यथा—

"चित्तचित्रपुरोद्याने क्रीडेदेवं हि वेत्ति यः।
अहमेव स्थितो भूतभावतत्त्वपुरैरिति।।"
(तं० आ० 11, 102)

विश्वाद्यः :— ~मन्त्रवर्णः — अवर्णः

यथा—

"विश्वस्याद्यः स्रष्टा ब्रह्मा तद्वाचित्वाद् अवर्णम्।"
(ने० तं० उ० खं० 1, पृ०,51)

विश्वाभासः :— विश्वं परमेश्वरस्य पारमैश्वर्यलीलयैवावभासते, नाविद्यया, अनादिवासनया वा। उभयोर्जडत्वेनावभासनक्रियाकरत्वाभावात्।

यथा—

"अतोऽसौ परमेशानः स्वात्मव्योमन्यनर्गलः।
इयतः सृष्टिसंहाराडम्बरस्य प्रदर्शकः।।"
(तं०आ०3,3)

~ शुद्धेऽध्वनि :— तत्र शिवभुवि विश्वमहमित्येव प्रकाशते, सदाशिव भुवि चाहमंशस्यान्तरेव ध्यामलो य इदमंशावभासस्तद्रूपतयाऽहमिदमित्याभासते। ईश्वरभुवि पुनरहन्तयाऽभेदमत्यजदेव विश्वं स्फुटरूपेदन्तयाऽवभासते। तदेवं विधस्त्रिप्रकारो विश्वावभासः शुद्धेऽध्वनि।

यथा—

"प्रकाशनं चास्य परमार्थप्रमातरि शिवेऽहमिति, सदाशिवभूमाविदमंशास्फुटतयाऽहमिदमिति, ईश्वरभुवि स्फुटेदमंशेनेदमहमिदमित्येतावान् ज्ञानशक्तिमात्रमवभासः। इयत्यां भूमाविदमंशस्य पृथक्त्वैव नास्ति अहन्तातो दर्पणादिव नीलस्य, ततः पृथक्त्वोल्लासेऽप्यपृथक्तया चैतन्यादिव देहस्य। एषा विद्याभूमिरुच्यते।"
(ई०प्र०वि०वि०,खं०1,पृ०,72-73)

अत्र "ज्ञानशक्तिमात्रम्" इति पदस्य कथं संगतिरिति पुनर्विचारणीयमस्ति। पाठश्च— "ईश्वरभुवि स्फुटेदमंशेनेदमहमित्येतावान्" इति साधु भवेत्।

विश्वावर्तः :— (1) श्रीमदुत्पलदेवमहाभागानां स्तुतिसूक्तानि तच्छिष्याभ्यां श्रीरामाऽऽदित्यराजाभ्यां भिन्नभिन्नस्तोत्ररूपतामापादितानि। तानि सर्वाणि विंशतिस्तोत्रेषु प्रविभज्य स्वबुद्धिकौशलात् तेषां स्तोत्राणां पार्थक्येन नामकरणमपि यः कृतवान् असौ परमशैवस्तेषां शिष्यः श्री विश्वावर्त्त आसीत्। एवमप्यनुश्रूयते यच्छ्रीमदुत्पलदेवमहाभागैः केवलं त्रयोदशस्तोत्रस्य सङ्ग्रहस्तोत्रम्, चतुर्दशस्तोत्रस्य जयस्तोत्रम्, पञ्चदशस्तोत्रस्य च भक्तिस्तोत्रमिति नामकरणं कृतमासीत् परं शेषाणां सप्तदशस्तोत्राणाणां नामकरणम्—श्रीविश्वावर्त्तेनैव कृतमिति।

यथा—

"श्री विश्वावर्त्तस्तु विंशत्या स्तोत्रैः स्वात्मोत्प्रेक्षितनामभिर्व्यवस्थापितवान् इति किल श्रूयते।"
(शि०स्तो०वि०,पृ०,2)

(2) वामकेश्वरीमतविषये कश्चन गुरुः, तद्विषयस्य कस्यचिद् ग्रन्थस्य कर्त्ताऽपि।

यथा—

"एतान् सद्गुरुलब्धान् विश्वावर्त्तः प्रवर्तितवान्।"
उद्धः:- (वा०म०पृ०,36)

अयं स एव शिवस्तोत्रावल्याः प्रतिसंस्कर्त्ता।

यथा—

"ततश्च श्री विश्वावर्त्तमुखेनैव लक्ष्यते यत्, तदेवेदमस्मत्

पर्यन्तं शिष्यप्रशिष्यक्रमेण सर्वेषामपि प्राप्तम्।"

(वा० म०, पृ०,48)

विषतत्त्वम् :— तत्त्वान्तरेषु व्यापकत्वेन स्थितं सकाररूपं तृतीयं ब्रह्म। विष्लृव्याप्तौ। अपानात्मकमाणवयोगे।

यथा—

"उवाच भगवानेव तच्छ्रीमत्कुलगह्वरे।
.....।।
काकचञ्चुपुटाकारं ध्यानधारणवर्जितम्।
विषतत्त्वमनच्काख्यं .....।।"

उद्ध०:- (तं०आ०3,169)

अत्र कुलगह्वरवाक्ये कामतत्त्वस्यैव विषतत्त्वतया वर्णनम्। तस्यैव शारदालिप्यां काकचञ्चुपुटाकारत्वात्। स्पष्टीकृतमेतज्जयरथेन टीकायाम्।

~ कामतत्त्वात्मकम् :— चर्याक्रमे शक्तिमच्छक्तिसंघट्टोत्सवे शक्तिशक्तिमतोरैक्ये स्थिते श्रूयमाणस्य विषतत्त्ववर्णस्यापि परिपूर्णविसर्गानन्दप्रदत्वेन कामतत्त्वेनैक्यमपि शास्त्रेषु गीतम्। तत एव तन्त्रालोके कुलगह्वरवाक्यानुसारं तथैव निर्दिष्टं "काकचञ्चुपुटाकारे" इत्यादौ।

यथा—

"कामस्य पूर्णता तत्त्वं संघट्टे प्रविभाव्यते।
विषस्य चामृतं तत्त्वं छाद्यत्वेऽणोश्च्युते सति।"

(तं०आ०3,170)

विषमदर्शनसारः :— कोऽपि दुष्प्राप्यः शैवशास्त्रग्रन्थः।

यथा—

"इयता सारत्वं निर्णीतं यद् वितत्य श्रीविषमदर्शनसारशास्त्रे निरूपितं शक्तिलक्षणेन।"

(ई०प्र०वि०वि०,खं०2,पृ०,204)

विषयपञ्चिका :— ग्रन्थः कोऽपि।

द्र०:- (म०मं०प०,पृ०,146) **इति।**

विषयप्रमा :— उक्तमत्र विषये स्फुटम्।

यथा—

"तदिदमुभयं समर्थनीयम—प्रकाशमानत्वं च बाह्यत्वं च। तत्राद्यं पारमार्थिकशिवसदाशिवेश्वरात्मकप्रमातृरूपाभेदेन घटते। बाह्यता तु कल्पितप्रमातृभावं मायीयं शरीरप्राणादिमपेक्ष्य सङ्गच्छते। एवं च मायीयस्य प्रमातुर्बाह्यरूपतावसाय एव नीलस्य प्रमा।"

(ई०प्र०वि०वि०,खं०1,पृ०,72)

विषयसुखम् :— इन्द्रियैरन्तःकरणैश्च गृहीतेष्वभिलषितेषु विषयेषु या सुखात्मिका चित्तवृत्तिरसौ विषयसुखमित्युच्यते।

~ स्वरूपलाभमयम् :— व्यावहारिके विषयसुखादौ प्रचलत्यपि यदा चिन्मात्ररूढता विमृश्यते तदा तेनापि स्वरूपलाभः एव भवति शिवयोगिनः।

यथा—

"स्वरूपपरिज्ञानं चैतावदेव — यदेतासु वृत्तिषु उदयसमयनिर्विकल्पैकरूपासु विकल्पोऽप्युदयमानो वर्णराशिसमारब्धतत्तद्विचित्रशब्दारूपितत्वेऽपि न तादृशेन वर्णपुञ्जात्मना शक्तिचक्रेण युज्यते, यत्तस्य प्राक्तननिर्विकल्पैकव्यवहारमयस्य विकल्पात्मनो मातुः स्वरूपं खण्डयेत्।"

(प०त्री०वि०,पृ०44-45)

~ स्वात्मप्रकाशमयम् :— विषयसुखमानन्दरूपम्। आनन्दश्चात्मनो नैसर्गिकः स्वभावः। ततो विषयसुखेऽप्यानन्दस्वरूपः स्वात्मैव प्रकाशते, साक्षात् क्रियते च तथावधानाधनैः शिवयोगिभिः, सर्वस्यानन्दस्य वस्तुतश्चिदानन्दनिष्ठत्वात्। यथा—

"एवं बाह्येषु भावेषु येषु येषु प्रकल्पनम्।
कुरुते तेषु तेष्वेव प्रथनं स्यात्तथैव तत्।"

(शि०सू०वा०,भा०टी०,पृ०,81)

"व्यवहारदशायां तत्तदिष्टसंगीतादिविषयाणामास्वादाद्यवसरेषु अन्तर्मुखविमर्शावस्थित्या बौद्धृतत्त्वं निरावरणं विद्युद्वत् प्रस्फुरेदिति।"

(तदेव, टिप्पणी, पृ०,80)

विषयाः :— इन्द्रियैरन्तःकरणैश्च प्रमाणादि द्वारा गृहीतानि प्रमेयजातानि।

~ अनेकवेद्यत्वे :— नटमल्लप्रेक्षादावनेकेषामपि प्रमातृणां साधारणीकरणात्मना विशेषेणैकप्रमातृत्वम्। तद्व्यवहारेऽप्यनेकेषामेकत्वं यदा साक्षात्कर्तुं शक्यते तदा किमुच्यते योगप्रक्रियाविषये। तत्रानेकवेद्यत्वे एव चमत्कारः। न हि नृत्यादेरेकजनदृश्यत्वे तथा चमत्कारो यथाऽनेकसामाजिकदृश्यत्वे।

यथा—

"एकैकप्रमातृवेद्याद्धि नृत्तादेरनेकप्रमातृवेद्यस्यास्त्येव सर्वसञ्चेत्योऽतिशयो येन तावत्यंशे प्रमात्रैक्यं स्यात्।"

(तं०आ०वि०,खं०7,पृ०,67)

~ बोधात्मकाः :— यथा—

"तत एव बोधं भेत्तुमशक्ता नीलादयो बोधानधिका अपि उपरि इव, अन्तरिव, बहिरिव, न क्वचिदिव परिप्लवमाना दर्पणानधिकगजतुरगादिप्रतिमतया प्रतिबिम्बतया उच्यन्ते।"

(ई०प्र०वि०वि०,खं०2,पृ०,88)

~ संविन्मयाः :— विषयस्य संवित्, संविदो विषयः, इत्युभयथाऽपि विमर्शे संविद्विषययोरभेद एव।

यथा—

"घटस्य संवित् संविदो घटः इति विषयिविषयतारूपो यो भेदस्तस्य मौलिकाभेदबाधेन प्रथनायोगात् ..... वस्तुतः..... कश्चिदिति दर्शितमादिसिद्धसूत्रे।"

(ई०प्र०वि०वि०,खं०2,पृ०,73)

विषुवत् :— (1) सर्वसाम्यावस्थैव योगप्रक्रियासु विषुवत्।

यथा—

"व्याप्तौ विषेर्यतो वृत्तिः साम्यं च व्याप्तिरुच्यते।।
तदर्हति च यः कालो विषुवत्तदिहोदितः।।"
(तं०आ०6,206-207)

"विशेषं दिनरात्रितदूनाधिकत्वलक्षणं विषमतात्मकमविरतं सुवति प्रेरयतीति वा विषुवत् सन्ध्याऽपि। मध्ये-मध्ये समानेन व्यवधानं यत् सुषुप्तस्य, इदमेव प्रधानतया प्राणापानरूपतां सतीमप्यधस्पदीकुर्वदिव सुषुप्तरूपम्।"
(ई०प्र०वि०वि०,खं०3,पृ०,343)

समानेनापवेद्येन सुषुप्तस्येति सवेद्यस्पा सुषुप्तरूपमिति परं सौषुप्तमिति।

~ कालः :— **(2) वेद्यवेदकसाम्यविमर्श-विश्रान्तिसमनुप्राणितः कालः।**

यथा—

"कदाचिद्वेद्ये स्वात्मनि च तुल्यकक्ष्यतया विश्रान्तिर्भवेत्, तदेव वेद्यवेदकयोः साम्यं। भवेत्। तदनुप्राणितं च रात्रिदिनयोस्तुल्यत्वं, यत् सर्व एव योगिनो महापुण्यं विषुवत्कालमाचक्षते।"
(तं०आ०वि०,खं०4/1,पृ०,75)

~ विस्तरतः :— **वर्णितं।**

यथा—

"विषुं साम्यरूपां व्याप्तिमर्हतीति विषुवत्।"
(स्व०तं०उ०,प०4,पृ०,201)

"..... विषुवत्तु निबोध मे।
प्रथमं प्राणविषुवन्मान्त्रं ज्ञेयं द्वितीयकम्।।
तृतीयं नाडिविषुवत्प्रशान्तं चतुर्थकम्।
पञ्चमं शक्तिविषुवत्षष्ठं वै काल उच्यते।।
सप्तमं तत्त्वविषुवत् प्रविभागस्त्वथोच्यते।
आत्मानं च मनः प्राणे संयोज्य विषुवद्भवेत्।।
प्राणे विषुवदाख्यातं मान्त्रं विषुवदुच्यते।
मन्त्रमुच्चारयेत्तावद्यावन्नान्यमना भवेत्।।
परापरविभागेन मन्त्रात्मा तु तदुच्यते।
मान्त्रं विषुवदित्युक्तं नाडिस्थं तन्निबोध मे।।
सर्वासामेव नाडीनां मध्ये या संव्यवस्थिता।
सुषुम्ना नाम सा ज्ञेया नाभेः शक्त्या शिवं गता।।
तत्र प्रवाहयेन्नादं नाडीविषुवदुच्यते।
प्रशान्तं विषुवच्चैवमधुना कथयामि ते।।
अयने षडङ्गुलश्चारः कारणान्यङ्गुलेऽङ्गले।
तान्यधस्तात्परित्यज्य कारणानि षडेव तु।।
सप्तमे तु प्रशान्तं वै प्रशान्तेन्द्रियगोचरम्।
प्रशान्तः स्तिमितो ज्ञेयः स्तिमितो निश्चलः स्मृतः।।
निश्चलो निस्तरङ्गश्च स्थिरः पूर्णः समन्ततः।
एवं भावं समास्थाय दीक्षा कार्या तु दैशिकैः।।
एतत्प्रशान्तविषुवत् शक्त्युपाधिं निबोध मे।
शक्तिमध्यगतो नादो नादोर्ध्वं च चरेद्यदा।।
तावत्तु शक्तिविषुवत् कालाख्यं तु निबोध मे।
तुटिः षोडशका या तु प्राणान्ते संव्यवस्थिता।।
कालो भ्रूक्षेपमात्रस्तु तत्रान्ते कीर्तितो मया।
तं परापरभागेन पुनरेव त्रिधा कुरु।।
अपरः षोडशो यावत् कालः सप्तदशः परः।
परापरस्तु यः कालः स प्रियेऽष्टादशः प्रभुः।।
प्राण एवं त्रिधा कालं कृत्वा चैव त्यजेत्पुनः।
अपरः शक्तिमूर्धस्थो व्यापिन्यां च द्वितीयकः।।
तृतीयः समनास्थाने तत्कालविषुवत्स्मृतम्।
एतत्षष्ठं समाख्यातं सप्तमं तात्त्वमुच्यते।।
उन्मना परतो देवि तत्रात्मानं नियोजयेत्।
तस्मिन्युक्तस्ततो ह्यात्मा तन्मयश्च प्रजायते।।
तत्त्वाख्यं विषुवद्देवि सर्वेषां परतः स्थितम्।
विषुवदेवं विधं ज्ञात्वा को न मुच्येत बन्धनात्।।"
(स्व०तं०4,316-333)

साधनारहस्यात्मकमिदं विस्तृतं वर्णनं विषुवतः। गुरूपदेशमात्रगम्यमिदम्।

विष्णुः :— उल्लासितस्य प्रमेयजातस्याग्रेसञ्चालनेऽधिष्ठातृत्वं भजमानोऽधिकारी विष्णुः।

यथा—

"प्रसृते भिन्ने प्रमेये तत्सन्तानप्रवहणलक्षणे प्रसरेऽधिष्ठातृदेवता विष्णुः।।"
(ई०प्र०वि०,खं०2,पृ०,217)

द्र०:- तं० आ०6, 145-146; 8, 155-156, स्व० तं०11, 264-266 **इति।**

~ तच्छक्तिपातफलम् :— **विष्णुरपि स्वभक्तेषु शक्तिपातं करोति, परं भुक्तिप्रद एवास्य शक्तिपातो, यतस्तत्फलतया सालोक्यादिरूप ऐश्वर्यभोग एव सिद्धो भवति न जीवरूपताया विलयः।**

यथा—

"तेन तद्रूपतायोगाच्छक्तिपातः स्थितोऽपि सन्।।
तावन्तं भोगमाधत्ते पर्यन्ते शिवतां न तु।
यथा स्वातन्त्र्यतो राजाऽप्यनुगृह्णति कञ्चन्।।
ईशशक्तिसमावेशात्तथा विष्ण्वादयोऽप्यलम्।"
(तं०आ०13,269-271)

~ तत्स्थानं (देहे) :— **मानवशरीरे तस्य स्थानं कण्ठदेशः।**

यथा—

"भगवान् विष्णुर्मध्यमा वैखर्यात्मकानुवर्तनोल्लासपदे परमेश्वरात् प्रभृति पशुप्रमातृपर्यन्तप्रमातृवर्गे कण्ठभूमौ वर्तमानः।"
(ई०प्र०वि०वि०,खं० 3,पृ०,308)

~ तदधिकारक्षेत्रम् :— **प्राकृतमण्डमिधितिष्ठत्यसौ।**

द्र०:- **'प्राकृतमण्डम्'**:— ~ 'तदधिष्ठाता' **इति।**

विष्णुब्रह्माद्यास्तु मायागर्भाधिकारिण एव। शिव एव भेददशामवरूढः सन् विष्ण्वादिरूपतायावभासते तत्तदधिकारवत्तया।

यथा—

"विष्ण्वादिरूपता देवे या काचित्सा निजात्मना।
भेदयोगवशान्मायापदमध्यव्यवस्थिता।।"

(तं०आ०13,268-269)

~ तदायुः :— **यद् ब्रह्मणः आयुस्तद्विष्णोर्दिनं, तावती च तस्य रात्रिः। तेनैव परिमाणेन तथोचितं वर्षशतं विष्णोरायुः।**

यथा—

"अनेन मानेन वर्षशतं ब्रह्मायुः। तद्विष्णोर्दिनम्, तावती च रात्रिः। तस्यापि शतमायुः।"

(तं०सा०,पृ०,24)

~ तद्भुवनम् :— **ब्रह्मासनादुपरिस्थितं पुरम्।**

यथा—

"ब्रह्मासनात्कोटियुग्मं पुरं विष्णोर्निरूपितम्।"

(तं०आ०8,155)

~ पालकः :— **सततगत्या विश्वसञ्चालकः। नियत्यनुसारं सततं सञ्चालनमेव पालनम्।**

यथा—

"न केवलं तत्रैव प्रथमक्षणे स भावावभासोऽस्ति, इत्येतावत्, अपितु स्मृत्यवस्थामपि स्वप्नावस्थामपि प्रतिपद्यते– इत्येवम्भूतमनुवर्तनं कुर्वाणः पालक उच्यते भगवान् विष्णुः।"

(ई०प्र०वि०वि०,खं०3,पृ०,308)

~ विविक्तिमात्रदः :— **यदा विष्णुप्रभृतयोऽपि शक्तिपातं कुर्वन्ति तदा तादृशैस्तेषां शक्तिपातैः कश्चित् प्रकृतिपुरुषविवेकतः शून्यभावापरपर्यायं कैवल्यम्, कश्चित् पुनः पुरुषकलाविवेकतो निष्कलतां कश्चिच्च पुरुषमायाविवेकेन विज्ञानाकलदशामुपैति। न तत उर्ध्वं, न च पूर्णं मोक्षम्।**

यथा—

"मायागर्भाधिकारीयशक्तिपातवशात्ततः।।
कोऽपि प्रधानपुरुषविवेकी प्रकृतेर्गतः।
उत्कृष्टात्तत एवाशु कोऽपि बुद्ध्वा विवेकिताम्।।
क्षणात्पुंसः कलायाश्च पुंमायान्तरवेदकः।
कलाश्रयस्याप्यत्यन्तं कर्मणो विनिवर्तनात्।।
ज्ञानाकलः प्राक्तनस्तु कर्मी तस्याश्रयस्थितेः।"

(तं०आ०13,271-274)

विष्ण्वाद्यनुग्रहः :— विष्ण्वादिकृतस्यानुग्रहशक्तिपातस्य न मोक्षप्रदत्त्वम्, अपितु भोगप्रदत्वमेव। स च भोगः सालोक्यादिदशासु लभ्यः। विष्ण्वादिषु याऽनुग्रहकरी शक्तिर्नासौ ज्येष्ठा अपि तु रौद्री वा वामा वेति न परमार्थ मोक्षदा।

यथा—

"वैष्ण्वादीनां तु राजानुग्रहवन्न मोक्षान्तता। इति नेह विवेचनम्। शिवशक्त्यधिष्ठानं तु सर्वत्रेत्युक्तम्। सा परं ज्येष्ठा न भवति, अपितु घोरा, घोरतरा वा।"

(तं०सा०,पृ०,124)

सेति विष्ण्वादिनिष्ठा।

विसर्गः :— (1) परमेश्वरकृता समस्त तत्त्वभुवनभावसृष्टिः।

(2) जगत्सृष्ट्युन्मुखतात्मिका परमेश्वरस्य स्पन्दसुनिर्भरा स्थितिः विसर्गवर्णाभिव्यंग्या।

(3) पारमैश्वर्यचमत्कारात्मकस्य जगदानन्दस्य बहिः समुच्छलनं प्रति यदौन्मुख्यं तदेव विश्वसिसृक्षात्मको विसर्गः, शक्तिविश्लेषणाभासः प्रतिबिम्बकल्पतया न परिणामतः। तस्य यः स्वात्मनि साक्षादनुभवः स एवानुत्तरप्रदप्रकाशकः।

यथा—

"यद्वीर्यमिति निर्णीतं तद्विश्लेषणयोजना।
विसर्ग इति तत्प्रोक्तं ध्रुवधाम तदुच्यते।।
अनुत्तरपदावाप्तौ स एष सुघटो विधिः।

(प०त्री०वि०,पृ०,214)

(4) स्वस्मिन्स्वरूपे स्वात्मरूपतयैव स्थितस्य विश्वस्य स्वे एव प्रकाशे स्वात्मनो भिन्नतयावभासनं विसर्गः। स एव च स्वात्मनि स्वात्मनो भाववैचित्र्येणावभासात्मकः क्षेपः इति कथ्यते शास्त्रेषु। यथा—

"स्वात्मनः स्वात्मनि स्वात्मक्षेपो वैसर्गिकी स्थितिः।"
"वैसर्गिकी—सृष्टिसंहारकारित्वलक्षणा स्थितिः, ...।"

(तं०आ०वि०,खं०2,पृ०,144)

(5) स्वातन्त्र्यशक्तिरपि विसर्ग इति व्यपदिश्यते।

द्र०:- **'विमर्शः'** इति।

(6) समस्त तत्त्वभुवनादिपरिपूर्णाः परमेश्वरः स्वशक्तेराभिमुख्येन संघट्टात्मकतया स्थितः सन् सृष्टिसंहारादिपञ्चकृत्यकारी भवति। तथाविधत्वं तस्य विसर्गेणाभिव्यज्यते मातृकोपासनक्रमे।

यथा—

"स एव भगवानन्तर्नित्यं प्रस्फुरदात्मकः।।
अन्तःस्थसर्वभावौघपूर्णमध्यमशक्तिकः।
स्वेच्छाक्षोभस्वभावोद्यज्जगदानन्दसुन्दरः।।
नित्यं स्फुरति सम्पूर्णविसर्गरसनिर्भरः।
शिवशक्त्योः स संघट्टः स्नेह इत्यभिधीयते।।"

(मा०वि०वा०1,893-895)

(7) बहिरुल्लिसिषास्वभावः स्पन्दः पारमेश्वरः।

यथा—

"ततस्तत्रैवानुत्तरस्य विसर्गो जायते अः इति।"

(तं०सा०,पृ०,15)

"एवं विसर्ग एव विश्वजनने भगवतः शक्तिः।"

(तं०सा०,पृ०,17)

(8) प्रमातुरन्तरेव प्रमेयसृष्टेरानन्दस्य चमत्कारो विसर्गो मातृकाक्रमे। स च परः (सूक्ष्मतरः) आ इति, परापरः (सूक्ष्मः) अः इति अपरः (स्थूलः) ह इति।

(9) शक्तिमद्रूपप्रधानता शिवस्य बिन्दुना द्योत्यते। ततः स्वात्मन्येव स्रष्टव्यतया विश्वं विमृश्यते परमेश्वरेण। स एवास्य विमर्शोऽग्रेप्रसरन् बिन्दुद्वयरूपेण विसर्गेण द्योत्यते मातृकाक्रमे। तत्र बिन्दुता संहारक्रमे बिन्दुद्वयता च सृष्टिक्रमे इत्यपि न विस्मार्यम्।

यथा—

"वेदनामात्रविशेषमपि विश्वं यदा स्वात्मन्येकगमनाय विसृजति स्वात्मनश्च सकाशात् तन्निर्माणेन विसृजति स एव परमेश्वरः प्रथमं शक्तिमद्रूपप्रधानतया "अ" इदानीं तु शाक्तविसर्ग-प्रधानतया "अः" इति।"

(प०त्री०वि०,पृ०,176-177)

(10) विश्व वमनग्रसनसामर्थ्यरूपमैश्वर्यमात्मशिवस्य व्यञ्जयन् मातृकावर्णः षोडशः।

यथा—

"एतद्विश्वमन्तःस्थितमानन्दशक्तिभरितो वमन् ग्रसमानश्च विसर्ग एव परमेश्वरो घनीभूय हकारात्मतां प्रतिपद्यानन्त-संयोगवैचित्र्येण क्षरूपतामप्येति।"

(प०त्री०वि०,पृ०,200)

(11) विसृष्टुमिच्छा पारमेश्वरी।

यथा—

"विसर्गो विसिसृक्षात्मकं परं पारमेश्वरं रूपं बिन्दुद्वयञ्च .....।"

(तं०आ०वि०,खं०3,पृ०,361)

एकस्यैव वस्तुन एकादशधेदं यद् व्याख्यानं विसर्गस्य विषये तदस्य तत्त्वं विस्तरतः प्रकाशयितुमेवेष्टं न मतभेदावहमिति वेद्यं सुधीभिः।

~ अपरः :— **स्थूलतमविसृष्ट्यभिव्यञ्जकः धरादि-शक्त्यन्तसमस्ततत्त्वसृष्टिव्यञ्जकोऽपरो विसर्गः हकारः। स एव पूर्णो विसर्गः। अवरोहक्रमेऽपरस्तृतीयः आरोहक्रमे च प्रथमः। स्थूलत्वेनायमपरः एव, न परो नापि परापरः।**

यथा—

"अपरस्य (विसर्गस्य) च हकारात्मनो वक्ष्यमाणत्वात्।"

(तं०आ०वि०,खं०2,पृ०,141)

~ अभेदप्रधानः — **शैवो विसर्गः।**

द्र०:- ~ 'परः' **इति।**

~ आणवः :— **संविदः शून्यभावात्मके पदे यश्चितिचेत्ययोः परस्परं संघट्टः स आणवो विसर्गः। सृज्यमानतयैवात्रासौ संघट्टो न स्थाप्यमानतया, नापि संह्रियमाणतया। अत एव विसर्ग इति परिभाषात्र प्रवृत्ता। भेददृष्ट्यनुविद्धत्वादाणवोऽयम्। मातृकाक्रमे हकारानुसन्धानाभ्यासपाटवादेवंविधस्य विसर्गस्य साक्षात्कारः। तत एव हकारः आणवः स्थूलश्च विसर्गः। स्थूलत्वमस्य स्फुटतयाभासमानत्वात्। भिन्नचेत्योन्मुखां चित्त-स्याध्यवसायादिवृत्तिं निरुन्धन्नेष आणवो विसर्गश्चित्तप्रशमलक्षणः प्रमेयोन्मुख्यात्मकसङ्कोचशालिनी चितिरेवात्र चित्तं नान्तः-करणम्।**

यथा—

"पूर्वं विसृज्यसकलं कर्त्तव्यं, शून्यतानले।
चित्तविश्रान्तिसंज्ञोऽयमाणवः .....।।"

(तं०आ०3,211)

"चितिचेत्ययोः संघट्टरूपं संकुचितं ज्ञानं .... भेदप्राधान्यादाणवो नरसम्बन्धी हकारात्मा स्थूलो विसर्गः।"

(तं०आ०वि०,खं०2,पृ०,203)

"हृत्पद्मकोशमध्यस्थस्तयोः संघट्ट इष्यते।।
विसर्गोऽन्तः स च प्रोक्तश्चित्तविश्रान्तिलक्षणः।"

(तं०आ०3,215-216)

~ कौले :— **अतो विसृजतीति शक्तिरूपं कुण्डं विसर्गः। विगतो सर्गोऽत्रेति लिङ्गं शिवात्मकं विसर्गः, विचित्रो विविधश्च सर्गोऽत्रेति मेलकं विसर्गः।**

यथा—

"विसृजति यतो विचित्रः
सर्गो विगतश्च यत्र सर्ग इति।"

(त०आ०29,140)

~(त्रिप्रकारः) : :— **(1) तत्र दूत्याः मुख्यमामनन्दचक्रं शक्त्यात्मकं सृष्टिरूपं, गुरोश्चानन्देन्द्रियं शिवात्मकं संहाररूपम्, उभयोर्मेलनं संघट्टात्मकं परं पदम्। तदेतत् त्रयमत्र विसर्गत्रयम्। शिवः शान्तता विसर्गस्य, शक्तिः प्रोदितता तस्य, सङ्घट्टश्च तपोः परिपूर्णता।**

यथा—

"त्रिविधो विसर्ग इत्थं
संघट्टः प्रोदितस्तथा शान्तः।"

(तं०आ०29,140)

"कुण्डं शक्तिः शिवो लिङ्गं मेलकं परमं पदम्।।
द्वाभ्यां सृष्टिः संहृतिस्तद्विसर्गस्त्रिविधो गमे।"

(तदेव,141-142)

गमे इति गमशासने यथोक्तम्।

विसर्गस्तु पारमेश्वरी सृष्टिशक्तिः। तस्याः साक्षात्कारस्त्रिप्रकारः। शिवरूपतायां परो विसर्गः—आकारः आनन्दशक्तिरूपः। शक्तिदशायाः प्राधान्येनोन्मेषे अः इति परापरो विसर्गः। नररूपतायामवतरणे हकारात्मकोऽपरो विसर्गः। एषां साक्षात्कारे योगी क्रमेण चित्तप्रलयं, चित्तसम्बोधम्। चित्तविश्रान्तिं चानुभवति। संज्ञाश्चैषां क्रमेण शाम्भवः, शाक्तः आणवः इति।

यथा—

"स च एष विसर्गस्त्रिधाः—आणवश्चित्तविश्रान्तिरूपः, शाक्तश्चित्तसम्बोधलक्षणः, शाम्भवश्चित्तप्रलयरूपः इति।"

(तं०सा०,पृ०,17)

न ह्यत्र शाम्भवाद्युपायत्रयनिरूपणमपि तु विसर्गानन्दत्रयप्रतिपादनमिति स्मर्त्तव्यं सुधीभिः। न भ्रमितव्यं नामसादृश्यात्।

(2) मातृकोपास्तिक्रमे (1) परो विसर्गः शाम्भवोऽभेदप्रधानः। स च आ इति। (2) भेदाभेदप्रधानः परापरो विसर्गः शाक्तः। स च अः इति। (3) भेदप्रधानोऽपरो विसर्गः स च ह इति। तत्र परः शिवात्मकः, परापरः शक्त्यात्मकोऽपरश्च नरात्मक इति। ते प्रकारास्तत्र तत्र स्थाने द्रष्टव्याः।

निष्कलः :— ग्राह्यग्राहकभेदे शिवयोगतो गलिते यः शाक्तो विसर्गः समुल्लसति स निष्कल इत्युच्यते।

यथा—

"निष्कलः शिवयोगतः।"

(तं०आ०3,218)

परनिःश्रेयसात्मश्रेयस्करस्वात्मसंविदेकीभावे पुनर्निष्कलो विश्वोत्तीर्णो, येनायं भेदाभेदप्रधानः।"

(तं०आ०वि०,खं०2,पृ०,206)

~ परः :— (1) परमेश्वरस्य जगत्सृष्टिं प्रति प्रथमः स्पन्दोन्मेषः। स चाऽनुत्तरस्य अकारस्य आकारताप त्तिराऽनन्दचमत्काराभिव्यक्तिमयी। आनन्दचमत्कारस्यान्तरेव विश्वसृष्टिबीजरूपः शिवस्य प्रथमो बहिर्मुखः स्पन्दः। तत एव च विसृष्टेः सम्भवः। इति विसृष्टिं प्रति प्रथमोऽयमुन्मेषः परो विसर्ग इत्युच्यते, विसृष्टेरादिरूपत्वादस्य परत्वं; आनन्दरूपत्वाच्चानन्दसंज्ञेयं मातृका 'आ' इति।

यथा—

"परस्यानन्दात्मनो विसर्गस्योक्तत्वात्।"

(तं०आ०वि०,खं०2,पृ०,141)

(2) शिवशक्त्योः परस्परं यः संघट्टः स एव विसृष्टिकारणत्वेन परो विसर्गः। स च "आ" इत्येवं रूपो मातृकाक्रमे आनन्दशक्तिरूपः।

यथा—

"आनन्दशक्तिः सैवोक्ता
यतो विश्वं विसृज्यते।।
परापरात्परं तत्त्वं
सैषा देवी निगद्यते।
तत् सारं तच्च हृदयं
स विसर्गः परः प्रभुः।"

(तं०आ०3,68-69)

~ परापरः :— (1) परमेश्वरः स्वकीयानामानन्दादिशक्तीनां विमर्शस्य परिस्पन्दनेनैव विसृष्टकरो भवति। तस्य च परमेश्वरतायाः विमर्शस्य षोडश स्थितयः षोडशभिः स्वरैरभिव्यङ्ग्या भवन्ति मातृकोपासनाक्रमे। बहिर्विसृष्टिकरणात्पूर्वं यः परमेश्वरस्यान्तर्विसृष्टृत्वसामर्थ्यस्य परिपूर्णो विमर्शोऽसौ षोडशेनस्वरेणाभिव्यज्यते मातृकोपासनक्रमाख्ये शाम्भवोपाये। परस्य आकारस्य अपरस्य च हकारस्य मध्ये स्थितोऽयं विसर्गः परापरो विसर्ग इत्युच्यते। स च अः इति।

(2) हकारार्द्धस्वरूपः षोडशोवर्णो मातृकाक्रमे "अः" इति। अन्तर्विश्वसिसृक्षायाः चरमकोटिस्थो वर्णो बिन्दुद्वययुतः।

यथा—

"परापरो योऽसौ विसर्गस्तस्य स्वरूपस्थौ यावाऽत्मभूतौ. विसर्जनीयशब्दवाच्यौ बिन्दू।"

(तं०आ०वि०,खं०2,पृ०,141-142)

~ पृथग्वर्णः :— द्र०:- **'अनुस्वारः'** इति।

~ बाह्ये :— जडेऽपि वस्तुनि विसर्गस्य स्थितिर्लक्ष्यते सङ्कोचविकासादिदशासु।

यथा—

"यावज्जडपाषाणादौ स्वयं सङ्कोचविकासलक्षणो विसर्गः स्वातन्त्र्यात्मा भगवतोऽनुत्तरस्य शक्तिः।"

(प०त्री०ल०वृ०,पृ०,5)

~ भेदप्रधानः :— नरात्मको विसर्गः।

द्र०:- **'अपर'** इति।

~ भेदाभेदप्रधानः :— शाक्तो विसर्गः।

द्र०:- **'परापरः'** इति।

~ शाक्तः :— (1) उच्चारयोगे :— तत्तदिन्द्रियगृहीतस्य तत्तद्वस्तुनः आत्मसंविदि प्रकृष्टं यदुन्मुखत्वं सकलात्मकभेदापहस्तनेन च निष्कल स्वरूपोद्रेचने स्वसंविदेकीभावभासनं नाम शाक्तो विसर्गः। स च चित्तसम्बोधलक्षणः। सवृत्तिकस्य चित्तस्यात्र स्वात्मसंविद्विश्रान्तेः सम्यग्बोधरूपात्मकः सम्बोधः इति। परापरोऽयं विसर्गो भेदाभेदमयः सूक्ष्मो विसर्गः। स च मातृकाक्रमे विसर्जनीयात्मको वर्णः। प्रमेयौन्मुख्यात्मकसङ्कोचयुता चितिरेवात्र चित्तम्।

यथा—

"दृष्टश्रुतादितिद्वस्तु प्रोन्मुखत्वं स्वसंविदि।
चित्तसम्बोधनामोक्तः शाक्तोल्लासभरात्मकः।।"

(तं०आ०3,212)

"यत्तच्चराचरात्मना प्रसिद्धं जगल्लक्षणं वस्तु तस्य यदात्मसंविदि प्रकर्षेणोन्मुखत्वं ग्राह्यग्राहकभेदात्मसकलरूपापहस्तनेन निष्कलरूपतोद्रेचनेन स्वात्मसंविदेकीभावेनावभासनं तदेव नाम चित्तस्य संकुचितात्मनो ज्ञानस्य स्वात्मसंविद्विश्रान्तेः सम्बोधः सम्यग्बोधः, तन्नामायं सूक्ष्मो विसर्जनीयात्मभेदाभेदप्रधानः शाक्तो विसर्ग उक्तः।"

(तं०आ०वि०,खं०2,पृ०,203)

"द्वितीयः स विसर्गस्तु चित्तसम्बोधलक्षणः।।
एकीभूतं विभात्यत्र जगदेतच्चराचरम्।"

उद्ध०:- (तं०आ०वि०,खं०2,216-217)

भिन्नस्य जगतः एकीभावापत्त्या भेदाभेदात्मकोऽयं शाक्तो विसर्गः।

(2) मातृकाक्रमेः — परापरो विसर्गः।

द्र०:- **'परापरः'** इति।

~ शाम्भवः **(उच्चारयोगे)** :— **भूतभविष्यत्सम्पन्न-सम्पत्स्यमानादिरूपस्य सङ्कोचस्य लये जाते यश्चित्तस्य चैत्यरञ्जितायाश्चितेः प्रकर्षेण लयो जायते, स एव शाम्भवो विसर्गः, चित्तप्रलयलक्षणः। स चानन्दरूपः सन् मातृकाक्रमे आ इति वर्णोपास्त्याभिव्यंग्यो भवति। ततः आ इति शाम्भवो विसर्गः। स एव च परः सूक्ष्मतरो विसर्गः, एकीभावात्मकः, प्रमेयोन्मुखतात्मकसङ्कोचशालिनी चितिरेवात्र चित्तम्।**

यथा—

"तत्रोन्मुखत्वतद्वस्तुसंघट्टाद्वस्तुनो हृदि।
रूढेः पूर्णतयावेशान्मितचित्तलयाच्छिवे।।
प्राग्वद्भविष्यदौन्मुख्यसम्भाव्यमिततालयात्।
चित्तप्रलयनामासौ विसर्गः शाम्भवः परः।।"

(तं०आ०3,213-214)

"शिवे चिदात्मनि बोधे, पूर्णतया कर्तृत्वाद्युत्तेजनेन ... . चित्तस्य प्रकर्षेण लयः संकुचिततापासनेन पूर्णतावलम्बनेन च स्वात्मसंविन्मात्रतया परिस्फुरणं, तन्नामायमभेद-प्रधान आनन्दात्मा परः शैवो विसर्गः।"

(तं०आ०वि०,खं०2,पृ०,203-204)

"ग्राह्यग्राहकविच्छित्तिसम्पूर्णग्रहणात्मकः।।
तृतीयः स विसर्गस्तु चित्तप्रलयलक्षणः।
एकीभावात्मकः सूक्ष्मो विज्ञानात्मात्मनिर्वृतः।।"

(तं०आ०3,218-19)

"यतोऽयं ग्राह्यग्राहकयोः संविन्मात्ररूढ्या येयं विच्छित्तिः त्रोटः, तया सम्यक् शून्यादिनियतावच्छेदाभावात्पूर्णं यद् ग्रहणं, तदात्मकः परप्रकाशरूप इत्यर्थः।

अत एवैकीभावात्मकः स्वात्मसंविन्मात्रावेशरूपः, अत एव सूक्ष्मः प्रमात्रैकरूपत्वात् परासंवेद्यः ..... अत एव चायमभेदप्रधानः।"

(तं०आ०वि०,खं०2,पृ०,206)

विसृष्ट्यौन्मुख्यानन्दप्रधानत्वातभेदरूपतायामप्यत्र विसर्गत्वोक्तिः। विसर्गोन्मुखः सन्नेव विसर्गोऽयमिति ज्ञेयम्।

~ शैवः :— **परो विसर्गः।**

द्र०:- **'शाम्भवः'** इति।

~ सकलः — (उच्चारयोगे):— **ग्राह्यग्राहकभेदावभासयुक् शाक्त एव विसर्गः सकलः इत्युच्यते। ततः शाक्तस्य प्रकारविशेषोऽयं विसर्गः।**

यथा—

"ग्राह्यग्राहकभेदो वै किञ्चिदत्रेष्यते यदा।।
तदासौ सकलः प्रोक्तः .....।"

उद्धः०:- (तं०आ०,3,217-218)

"ग्राह्यग्राहकभेदावभासे सकलो विश्वमयः ....।"

(तं०आ०वि०खं०2, पृ०, 206)

~ सूक्ष्मः :— **शाक्तो विसर्गः।**

द्र०:- **'परापरः'** इति।

~ स्थूलः :— आणवो विसर्गः।

द्र०:- **'अपरः'** इति।

विसर्गत्रयम् :— (1) परो विसर्ग आकारः, परापरो अः इति अपरश्च हकार इति विसर्गत्रयम्।

(2) आणवः, शाक्तः, शाम्भवश्च विसर्गः इति।

विसर्गब्रह्म :— सकारः।

यथा—

"विसर्गब्रह्म 'स'।"

(तं०आ०वि०,खं०12,पृ०,220)

विसर्गभूसमापत्तिः :— परैवानन्दशक्तिरिच्छादिरूपतामापद्यमाना सती पर्यन्ते तत्तद्विसृष्टिरूपतां यातीति सैव विसर्गभूः। अन्तरनुसन्धानेन तदात्मतायां या स्थितिर्योगिनः सा तत् समापत्तिः।

~ तदुपायाः :— **ते हि चर्याक्रमोचिता उपायाः, सुखोपायाः, सद्यः फलप्रदाश्च। ते च शाक्तक्षोभप्रभृतयः।**

यथा—

"शाक्ते क्षोभे कुलावेशे सर्वनाड्यग्रगोचरे।
व्याप्तौ सर्वात्मसङ्कोचे हृदयं प्रविशेत् सुधीः।"

(तं०आ०5,71)

विसर्गशक्तिः :— (1) शक्तितत्त्वादारभ्य धरातत्त्वं यावत् सर्वेषामपि तत्त्वानां सृष्ट्यादिकारिणी परमेश्वरस्य स्वस्वभावभूता परमेश्वरतैव विसर्गशक्तिरिति कथ्यते। सैव षोडशेन स्वरेण द्योत्यते।

यथा—

"स एष परमेश्वरो विसृजति विश्वम्, तच्च धरादिशक्त्यन्तं कादि क्षान्तरूपम्— इत्येतावती विसर्गशक्तिः 'षोडशी कला' इति गीयते।"

(प०त्री०वि०,पृ०,180-181)

(2) परमेश्वरे यद्विश्वसृष्ट्यादिसामर्थ्यं यच्च तस्य तत् सृष्ट्यादिक्रीडास्वभावत्वं तद् विसर्गशक्तिरूपमेव षोडशस्वराभिव्यंग्यं भवति।

यथा—

"अनुत्तरस्यैव च शक्तिः विसर्गशब्दव्यपदेश्येति।"

(तं०आ०वि०,खं०2,पृ०,189)

विसर्गानन्दः :— ~ चर्यासु :— **यथा—**

"सोमसूर्यकलाजालपरस्परानिघर्षतः।
अग्नीषोमात्मके धाम्नि विसर्गानन्द उन्मिषेत्।।"

(तं०आ०5,72)

" 'विसर्गानन्द उन्मिषेत्' मुख्यया वृत्त्या चरम-

धातुप्रक्षेपात्म परं सामरस्यमुदियात्।"

(तं०आ०वि०,खं०3,पृ०,381)

विसर्जनम् :— (1) आभासरूपतया समुल्लासनम्।

यथा—

" 'विसृजति' प्रमातृप्रमेयाद्यात्मना स्थूलेन रूपेण समुल्लसतीत्यर्थः।"

(तं०आ०वि०,खं०3,पृ०,370)

(2) पूजादौ देवविशेषस्य पूजनानन्तरं पुनरनभिमुखीकरणम्।

यथा—

"अभिमुखीभूतस्यानभिमुखीकरणम्।"

(तं० आ० वि०, खं०1/2, पृ०, 22) **इति।**

विस्तृतदीक्षा :— द्र०:- 'विक्षिप्तदीक्षा' इति।

वीणामुद्रा :— कराङ्गुलिमुद्राविशेषः, गुरूपदेशगम्यः।

यथा—

"..... वल्लकीं च निबोध मे।।
हस्तौ प्रसारयेद्देवि उत्तानौ तु समाहितः।
अनामे कुञ्चयित्वा तु वीणामुद्रा प्रकीर्तिता।।"

(स्व०तं०,14,16-18)

"एषा वामपार्श्वे प्रदर्शनीया। अस्याः सतत्त्वं दर्शितम् (श्री भैरवानुकरणस्तोत्रे): —

"वीणाघण्टाडमरूनुड्डामरदर्शयन्निदं दिशसि।
वृत्तित्रिभेदभिन्नं नादामर्शं निभालयन्नन्तः।।" इति

(स्व०तं०उ०,14,पृ०,116)

वीरः— ~ साधकः :— (1) तथा विधो यो यो जाग्रदादिव्यवहारैरपि स्व-स्वरूपचर्वणानन्दान्न चालयितुं शक्यते।

यथा—

"वीरस्तु प्रचलत्स्वपि दशात्रितयव्यवहारेषु स्वस्वरूपस्च्युतिरहितः सन् त्रितयस्य स्वातन्त्र्येण चमत्कर्त्ता भवति। अनेन वीरस्य योगिनो व्युत्थानेऽपि स्व-स्वरूप एव स्थितिः प्रतिपादिता।"

(शि०सू०वि,वृ०1,11)

(2) घृणाशङ्काजात्याद्यभिमानास्पृष्टः कौलयोगी।

" 'वीर' इति त्यक्तजात्यादिग्रहो निष्कम्पः।"

(स्व०तं०उ०प०3,पृ०,252)

वीरगतिः :— स्वदेहहोमकर्त्तारो, भृगुपातादिना देहत्यागिनो, धर्मयुद्धादौ वा सम्मुखत्वेन हता वीराः भुवर्लोकस्थितस्य वैद्युतनाम्नो मरुतो लोकमप्सरोभिर्युतमवाप्य दिव्यसुखमुपभुञ्जते। सैषा तेषां वीरगतिः।

यथा—

"..... अप्सरसश्चात्र ये च पुण्यकृतो नराः।।
भृगौ वह्नौ जले ये च सङ्ग्रामे चानिवर्तिनः।
गोग्रहे वध्यमोक्षे वा मृतास्ते वैद्युते स्थिताः।।"

(तं०आ०8,130-131)

वीरनागः :— कोऽप्यज्ञातविशेषो ग्रन्थकारो यस्य वाक्यमुद्धृतं विवृत्तिविमर्शिन्याम्।

यथा—

"यथाह वीरनागः —
'तदुत्पत्तिर्हेतोः स्थितिरपि निजप्रत्ययबलाज्जरा कालात् .....।' इत्यादि"

(ई०प्र०वि०वि०,खं०2,पृ०,197)

वीरनाथः :— कोऽपि कालीनयोपासकः।

यथा—

"श्री वीरनाथपादैः पञ्च च देवीनये कृताः शिष्याः।"

(तं०आ०वि०,खं०3,पृ०,196)

वीरपशुः :— पुत्रकदीक्षापरोक्षदीक्षादावुपह्रियमाणशरीरो यज्ञमण्डपे एव हन्यमानः पशुः।

यथा—

"प्रवेशितो यागभुवि हतस्तत्रैव साधितः।।
चक्रजुष्टश्च तत्रैव स वीरपशुरुच्यते।"

(तं०आ०16,52-53)

वीरभद्रः :— द्र०:- 'रुद्राः' इति।

द्र०:- 'तत्पुरम्' इति च।

~ तत्पुरम् :— भद्रकाल्या पुरादुपरि वीरभद्रस्य पुरं विजयाक्षम्।

यथा—

"ततः कोट्या वीरभद्रो युगान्ताग्निसमप्रभः।
विजयाख्यं पुरं चास्य .....।।"

(तं०आ०8,196-197)

वीरभैरवी :— ~खेचरी— श्वभ्रपातानुकृत्यात्मिका।

यथा—

"श्वभ्रे सुदूरे झटिति स्वात्मानं पातयन्निव।।
साहसानुप्रवेशेन कुञ्चितं हस्तयुग्मकम्।
अधोवीक्षणशीलं च सम्यग्दृष्टिसमन्वितम्।।
वीरभैरवसंज्ञेयं खेचरी बोधवर्धिनी।"

(तं०आ०32,60-62)

वीरवामनकः :— संवित्प्रकाशाख्यस्य ग्रन्थस्य निर्माता वामनदत्ताचार्यः।

यथा—

"यथाह भट्टश्रवीरवामनकः—
'यत्रेन्धनं द्वैतवनं मृत्युरेव महापशुः।
अलौकिकेन यज्ञेन तेन नित्यं यजामहे'।। इति"

(प०सा०वि०,पृ०,146)

वीर इत्युपनाम्नाऽसौ कौलोपासनाप्रवीण इति— प्रतिभाति।

द्र०:- 'संवित्प्रकाशः' इति।

(प०सा०वि०,पृ०,146)

द्र०:- 'वामनदत्ताचार्यः इति च।

वीरव्रताः— ~ शैवाः :— केचन वीरव्रताः कापालिकाः साधका ये तन्त्रालोके वर्णितास्तेषामेवानुपायिनः कदाचित् पुरातनाः वीरशैवाः इत्यनुमातुं शक्यते। यथा—

"कपालव्रतिनः स्वाङ्गहोतारः कष्टतापसाः।।
सर्वाभयाः खड्गधाराव्रतास्तत्तत्त्ववेदिनः।"

(तं०आ०8,301-302)

"ज्ञातज्ञेया विप्राः कापालव्रतभृतो विगतसङ्गाः। **इत्यारभ्य** .....असिधाराव्रतनिष्ठाः पूर्वपदं ध्यायिनो यान्तिः। इत्यन्तम्।"

उद्धः:- (तं०आ०वि०,खं०5,पृ०,208)

वीरशैवाः :— देहबलिदानप्रभृतीः साधनाः अनुतिष्ठन्तो पुरातनाः केचन वीरसाधका अभूवन्। तेषामेवानुयायिनो वीरशैवाः कर्णाटदेशेन्यवसन्। तत्सम्प्रदायभक्तानेकीकृत्य बसवेन गुरुणाऽभिनवया नीत्या घटितं वीरशैवमतमिदानीमपि वर्धते तत्र। इत्येवमनुमातुं शक्यते तन्त्रालोकवाक्याधारतः।

यथा—

"एतानि भक्तियोगप्राणत्यागादिगम्यानि।।"

(तं०आ०8,232)

द्र०:- 'वीरव्रताः' इति।

"..... ये स्मरन्तो महेश्वरम्।
जलेषु मरुषु चाग्नौ शिरश्छेदेन वा मृताः।।
ये यान्ति बोधमैशानं वीरभद्रं महाद्युतिम्।"

(तं०आ०8,197-198)

उपमन्युकृते स्तोत्रे वीरसाधनोल्लेखः। महाभारते सौप्तिकपर्वण्यश्वत्थाम्ना तोषितो वीरभद्रो वीरसाधनया।

वीरसङ्करयागः :— चक्रयागविशेषः। यथा—

"ततोऽवदंशान् भोजनादीन् चाग्रे यथेष्टं विकीर्येत, गुप्तगृहे वा सङ्केताभिधानवर्जं देवताशब्देन सर्वान् योजयेत्—इति वीरसङ्करयागः।"

(तं०सा०,पृ०,186)

वीरावलिः :— किमपि शैवसाधानाप्रधनमागमशास्त्रपुस्तकं कौलिकम्।

यथा—

"श्रीवीरावल्यमर्यादप्रभृतौ शास्त्रसञ्चये।"

(तं०आ०29,177)

"श्रीमद्वीरावलीशास्त्रे इत्थं प्रोवाच भैरवी।"

(तदेव, 186)

द्र०:- (तं०आ०4, 89-91; 241; 12,23; 29, 163; 235; 272; 32-46, प०त्री०वि०,पृ०,236; शि०सू०वि०,पृ०,9) इति।

वीरावलिहृदयम् :— किमपि शाक्तसाधनापरमागमिकं पुस्तकं यस्य मतं समुद्धृतं तन्त्रालोके।

द्र०:- (तं०आ०15,102-104,109) **इति च।**

बृहत्कायस्य वीरावल्यागमस्य संक्षेपोऽयं भवेत् कदाचित्।

वीरावलीकुलम् :— किमप्यागमशास्त्रं शैवम्। यथा—

"ते चोक्ताः परमेशेन श्रीमद्वीरावलीकुले।"

(तं०आ०6,74)

वीरेशः :— जाग्रदादि त्रयेऽपि तुर्यरससाक्षात्कारवान्, तत्र त्रयेऽपि च स्वसंविद्रूपं साक्षात्कुर्वन् स्वैश्वर्यचमत्काररसं च रसयन् प्रबुद्धः साधकेन्द्रो वीरेशः। यथा—

"त्रितयभोक्ता वीरेशः।"

(शि०सू०1,11)

"जाग्रदादित्रयस्य स्वातन्त्र्येण चमत्कर्त्ता (वीरेशः)"

(शि०सू०वि०1,11)

"तत्रापि ग्रासकृद् यस्मात् तेन वीरेश्वरः स्मृतः।"

(शि०सू०वा०भा०,पृ०,14)

"एतज्जागरादित्रयं शक्तिचक्रानुसन्धानयुक्त्या तुर्यानन्दाच्छुरितं यस्तत्परामर्शानुप्रवेशप्रकर्षाद्विगलितभेदसंस्कारमानन्दरसप्रवाहमयमेव पश्यति, स त्रितयास्यास्य भोक्ता चमत्कर्त्ता।"

(शि०सू०वि०,पृ०,12)

(2) जितेन्द्रियो वा योगी।

"भवभेदग्रसनप्रवणानां वीराणामिन्द्रियाणामीश्वरः यस्त्वेवं न भवति स जागराद्यवस्थाभिर्भुज्यमानो लौकिकः पशुरेव।"

(तदेव,पृ०,12)

वीर्यक्षोभसाधना :— सुषुम्नां नाडीमधिष्ठाय प्राणिनां प्राणशक्तिः सर्वं देहं व्याप्यावतिष्ठते। मैथुनसम्मन्थतोऽसौ शक्तिः किञ्चित् क्षुभ्यन्ती आनन्दरूपतां। स्वात्मनोऽभिव्यञ्जयति। तेन चानन्दातिरेकेण वीर्यविसृष्टिर्जायते। एवम्प्रकारैव स्पन्दात्मकप्रक्षोभमयी जगदानन्दता परमेश्वरस्य यया विश्वसृष्टिः सम्पद्यते। तदिदं द्वयं स्वभावतः एकरूपमपि सद्व्यवहारतो भिन्नरूपम्। जगदानन्दोऽनवच्छिन्नत्वेन परिपूर्णः सर्वथा, मायाप्रमातुश्च वीर्यविक्षोभानन्दः क्षणिकः सन् परिमितः। परं परिमितेऽपि तस्मिन् स्थिरावधानवान् साधको जगदानन्दानुभूतिं सद्य एव लभते। तत एव चर्याक्रमोऽयं क्वचित् क्वचिद्रहस्यमयीमवस्थां प्रविश्य तद्रहस्यमय्या वाचा शैवशास्त्रेषूपदिष्टः। विशेषतश्चोत्तमोत्तमेन केनापि विरलविरलेन साधकेन सद्गुरोरुपदेशत एव बोद्धव्यः।

यथा—

"तथाहि मध्यमां नाडीमधिष्ठायाखिलं वपुः।
प्राणयत्परमं तेजः प्रक्षुब्धमृतुमाल्य (द्य)तः (प्रतिमन्थतः)।।
विसृष्टिरूपतां गच्छद् यात्यानन्दचमत्क्रियाम्।
अपूर्णा केवलं सा तु पूर्णा तु भगवन्मयी।।

तेन वैसर्गिकी शक्तिरेकैवेयं प्रजृम्भते।"

(मा०वि०वा०1,897-899)

वीर्यम् :— (1) सारभूतमावश्यकं तत्त्वं यत्र विश्रम्यैव कृतकृत्यता भवति। तच्च आणवस्य शाक्तीभूः शाक्तस्य च शाम्भवी। आणवोपायः शाक्तीं भुवनमासाद्यैव कृतकृत्यो भवति, तथैव शाक्तः शाम्भवीम्।

द्र०:- 'औत्तराधर्यम्' इति।

~ तन्माहात्म्यम् :— **उपायजालं सवीर्यं सदेव भोगमोक्षफलप्रदं भवत् कृतकृत्यतामुपैति, न निर्वीर्यम्। आणवस्य शाक्तीं भुवमासाद्यैव कृतकृत्यता, तथा शाक्तस्य शाम्भवभूसमासादनत एव सा।**

यथा—

"वीर्यं विना यथा षण्ठस्तस्याप्यस्त्यथ वा बलम्।
मृतदेह इवेयं स्याद्बाह्यान्तःपरिकल्पना।।"

(तं०आ०5,158)

~ बीजाक्षरम् :— **(2) हकारः। यथा—**

"वीर्येण हकारेणाक्रम्य।" **(रहस्यसंकेतोऽयम्)**

(तं०आ०वि०,खं०10,पृ०,227)

~ साधनाक्रमे :— **अनुपायशाम्भवशाक्तादीनामुपायनां मध्ये पूर्वपूर्वमुत्तरोत्तरस्य वीर्यम्। आणवेष्वपि ध्यानोच्चार-करणध्वनिस्थानकल्पनासु तथैव पूर्वं पूर्वमुत्तरोत्तरस्य वीर्यम्। बाह्यपूजासु पुनः स्थण्डिल लिङ्गतूरादीनां मध्ये उत्तरोत्तरमेव पूर्वं पूर्वेभ्यः श्रेयः इति तदपि तस्य तस्य वीर्यकल्पम्। यथा—**

"अकिञ्चिच्चिन्तनं वीर्यं भावनायां च सा पुनः।।
ध्याने तदपि चोच्चारे करणे सोऽपि तद्ध्वनौ।
स स्थानकल्पने बाह्यमिति क्रममुपाश्रयेत्।।"

(तं०आ०5,156-157)

" यो हि यस्माद्गुणोत्कृष्टः स तस्मादूर्ध्व उच्यते।"

(मां०वि०तं०2,60)

"स्थण्डिलादुत्तरं तूरं तूरादुत्तरतः पटः।
पटाद्ध्यानं ततो ध्येयं ततः स्याद्धारणोत्तरा।।
ततोऽपि योगजं रूपं ततोऽपि ज्ञानमुत्तरम्।"

(तं०आ०2,42-43)

वृत्तिः :— तात्पर्यमात्रव्याख्यानपरं वाक्यं वाक्यसन्दर्भो वा।

यथा—

"इयति च व्याख्याने वृत्तिकृता भरो न कृतः, तात्पर्यव्याख्यानात्।" यदुक्तम्: 'सवृतसौत्रनिर्देशविवृतिमात्रव्यापारायाम्।' इति।।"

(ई०प्र०वि०,खं०1,पृ०,22)

सूत्रस्य स्वाभिधेये वर्तनं वृत्तिः, तत्प्रतिपादकत्वात् सूत्रार्थोद्भेदनो ग्रन्थोऽपि वृत्तिः।"

(ई०प्र०वि०वि०,खं०1,पृ०,17)

वृत्तिकारः :— आचार्य उत्पलदेव ईश्वरप्रत्यभिज्ञायाः (1) सूत्रकारो, (2) वृत्तिकारो, (3) विवृत्ति (टीका) कारश्चेत्येवं तत्र-तत्र तस्य तत्तन्नामोल्लेखः कृतः आचार्याभिनवगुप्तपादैः। ततो नायमुत्पलदेवाचार्याद् भिन्नः कोऽपि ग्रन्थकृत्।

वृन्दचक्रम् :— कौलसम्प्रदाये लब्धप्रतिष्ठं सिद्धयोगिनीचक्रम्। तत्र मातृकावर्णानां मेलनं ज्ञानमन्त्रमेलापादिसिद्धैः सह प्रतिपादितं मण्डलपूजोपयोगितया।

यथा—

"आदिवर्णस्वराः षोडशस्वरत्वेन ज्ञानसिद्धाः, कादि-मकारपर्यन्तं व्यञ्जनपञ्चविं-शकं मन्त्र-सिद्धाः, द्वादशधा स्वरव्यञ्जनमिश्रिता मात्राःप्रणवकला वा मेलापसिद्धाः, यकारादिहकारपर्यन्तमष्टशाक्तसिद्धाः, आदिवर्णस्य रौद्रचन्ताः कलाः चतस्रः शाम्भवसिद्धाः। ता इत्थं कथिता रहस्य, शास्त्रेः- 'आदौ यस्य शिरो रौद्री वक्त्रं वामा प्रकीर्तिता।

अम्बिका बाहुरित्युक्ता ज्येष्ठा चैवायुधे स्थिता।।' इत्यादिना।"

(वि०भै०उ०,पृ०,68-69)

वेत्ता :— अन्तर्मुखो विमर्शकृत्। यथा—

"वेत्तात्वन्तर्मुखस्थितिः।"

(तं०आ०6,82)

~ द्विप्रकारः :— **प्रथमं वेद्यस्य यद्वास्तविकं तत्त्वं तस्य विमर्शनकारी पश्चाच्च स्वरूपमात्रस्थितः इत्यवस्थाद्वयनिषेवी वेत्ता द्विप्रकारो ज्ञानोपायोपासकः। यथा —**

"पुरा विचारयन् पश्चात् सत्तामात्रस्वरूपकः।"

(तं०आ०6,83)

वेदकलो :— ~(बीजमन्त्रः) :— हूँ इति।

अत्र हकार-ऊकार-बिन्द्वर्धचन्द्रात्मिकाश्च चतस्रः कला इति वेदितव्यम्।

"वेदकलश्चतुष्कलः।"

(तं०आ०वि०,खं०12,पृ०,212)

वेदागमौ :— वेदाश्चत्वारस्तदङ्गानि च कल्पादीनि। ते च निगमाः। आगमाः शैवशाक्तवैष्णवाद्याः आगमग्रन्थाः।

~ प्रमाण्यतारतम्यतः :—**वेदाच्छैवागमाः उत्कृष्टतराः। वैदिका विधिनिषेधाः न प्रवर्तन्ते शैवागमोपदिष्टासूपासनासु। तासां तदुत्तीर्णत्वाद्, विधिनिषेधयोर्मायीयत्वात् शैवमार्गस्य च मायोत्तीर्णत्वात्। यथा—**

"श्रीमदानन्दशास्त्रादौ प्रोक्तं च परमेशिना।
ऋषिवाक्यं बहुक्लेशमधुवाल्पफलं मितम्।।
नैव प्रमाणयेद्विद्वान् शैवमेवागमं श्रयेत्।
यदार्षे पातहेतूक्तं तदस्मिन् वामशासने।।
आशुसिद्ध्यै यतः सर्वमार्षं मायोदरस्थितम्।"

(तं०आ०37,10-12)

वेदाचारः :— श्रवणमनननिदिध्यासनमयः पितृयानदेवयान- गतिफलद आचारो जनसामान्ययोग्यः।

वेदान्तवाददोषः :— द्वैतानुस्यूतो ह्यसौ वादो यतस्तत्रानाद्याऽविद्याऽनिर्वाच्योपाधिर्यद्वशाद् ब्रह्मशुद्धमपि सदेकतो जीवतयाऽपरतो जगत्तया अन्यत ईश्वरतया च चकास्ति। ततो जगदुपपत्तये ऽविद्यां ब्रह्म चेति तत्त्वद्वयमङ्गीकुर्वद् वेदान्तशास्त्रं न शुद्धमद्वैतशास्त्रमपि तु द्वैतगन्धवासितमेव परितः। यथा—

"अविद्यया :— इत्यनिर्वाच्यरूपया। अयं ब्रह्मवादोऽपि नैकान्तवादो, न निश्चिताद्वयवादः इति। मतं न विशदमिति सम्बन्धः।"

ब्रह्मापीष्टमविद्यया सह ततो नैकान्तवादोऽप्ययम्।।"

(ई०प्र०वि०वि०,खं०3,पृ०,404)

इति विवृत्तिविमर्शिनी पद्यांशस्य व्याख्यानमेतदिति प्रतिभाति।

वेदिता :— बहिर्मुखो वेद्यविश्रान्तो विज्ञाता। यथा—

"वेदिता वेद्यविश्रान्तो .....।"

(तं०आ०,6,82)

वेदी :— अर्धचन्द्राकृतिर्वेद्याकारो मण्डलस्य मध्यभागः।

यथा—

"वेदीमध्ये प्रकर्तव्या।"

(तं०आ०31,107)

"चतुरङ्गुलामुत्तानार्धचन्द्राकृतिं वेदीं कुर्यात्।"

(तं०आ०वि०,खं०12,पृ०,276)

"मूले वेदीं प्रकल्पयेत्।"

(तं०आ०31,108)

"वेदी वेद्याकारस्तत्र मध्यः सन्निवेशः।"

(तं०आ०वि०,खं०12,पृ०,276)

वेद्यता :— ज्ञेयं वेद्यं ज्ञाता च वेदकः। वेद्यं प्रमेयं वेदकश्चप्रमाता। वेदकेन यदा वेद्यं ज्ञायते तदा वेद्ये वेद्यताख्यो ज्ञाततापरपर्यायो धर्म उपजायते, येन तद्विषये ज्ञातॄणां विविधाः दृष्टयः समुल्लसन्ति।

यथा—

"यथा च शिवनाथेन स्वातन्त्र्याद्भास्यते भिदा।।
नीलादिवत्तथैवायं वेद्यता धर्म उच्यते।"

(तं०आ०10,77-78)

"तथा ह्येकाग्रसकलसामाजिकजनः खलु।
नृत्तं गीतं सुधासारसागरत्वेन मन्यते।"

(तदेव10,85)

सकलसामाजिकवेद्यत्वेनैव नृत्यादेर्विशेषदर्शनीयत्वं विशेषाह्लादप्रदत्वं चोद्भाव्यते।

यथा—

"एवं सिद्धं वेद्यताख्यो धर्मो भावस्य भासते।"

(तदेव,10,91)

~ तत्तादात्म्यभावना :— वेदकेन साकं तादात्म्यतया वेद्यं भाव्यते तत्त्वभेदनप्रक्रियायाम्।

यथा—

"अत्रापि वेद्यता नाम तादात्म्यं वेदकैः सह।
ततः सकलवेद्योऽसौ घटः सकल एव हि।।
यावच्छिवैकवेद्योऽसौ शिव एवावभासते।
तावदेकशरीरो हि बोधो भात्येव यावता।।"

(तं०आ०10,165-166)

वेद्यैकत्वम् :— नन्वनेकैः प्रमातृभिः पृथक्-पृथक् संवेद्यमानं वेद्यं कथमेकम्, उच्यते तस्य तथादर्शने समेषामपि प्रमातॄणामेकरूपतापाते सति तस्यैकत्वं निर्विवादम्।

यथा—

"अनन्तप्रमातृसंवेद्यमपि एकमेव तत् तस्य रूपम्।
तावति तेषामेकाभासरूपत्वात् इति न प्रमात्रन्तर संवेदनानुमानविघ्नः कश्चित्"।

(तं०सा०,पृ०,96)

वेधदीक्षा :— गुरोरनुग्रहशक्तिपातमय्या दृशा दृष्टस्य शिष्यस्य मध्यमप्राणशक्तिः षट्चक्रभेदनं कुर्वत्यारोहावरोह-क्रियया तमानन्दयन्ती शुद्धं चिन्मयं स्वरूपं साक्षात्कारयति। तथाविधैषा क्रियावेधदीक्षा।

यथा—

"वेधेति मध्यमप्राणशक्त्या ऊर्ध्वोर्ध्वक्रमणेन
चक्राधारादीनां भेदनम्। यद्वक्ष्यतिः-
'वेधदीक्षा च बहुधा तत्र तत्र निरूपिता।
सा चाभ्यासवता कार्या येनोर्ध्वोर्ध्वप्रवेशतः।।
शिष्यस्य चक्रसम्भेदप्रत्ययो जायते ध्रुवः'।"

(तं०आ०29,236-238)

~ तत्प्रकारा :— (1) मन्त्रवेधो, (2) नादवेधः, (3) विन्दुवेधः, (4) शक्तिवेधः, (5) भुजङ्गमवेधः, (6) परवेधः, इति षट्प्रकारो वेधः षट्प्रकारा च वेधदीक्षा।

यथा—

"मन्त्रनादबिन्दुशक्तिभुजङ्गमपरात्मिका।।
षोढा श्रीगह्वरे वेधदीक्षोक्ता परमेशिना।"

(तं०आ०29,239-240)

एतेषां पृथक्-पृथग् लक्षणानि नैवोक्तानि स्पष्टम्।

~ तत्फलम् :— अणिमाद्याविर्भावः।

यथा—

"येनाणिमादिका सिद्धिः .....।"

(तं०आ०29,238)

~ तद्रहस्यम् :— सिद्धयोगो गुरुः शिष्यं पुरतः उपवेश्य स्वानीन्द्रियाणि वृत्त्या तस्येन्द्रियेषु पातयन् तस्यान्तः-करणानि च स्वान्तःकरणैर्मेलयन् तं स्वात्मना साकं सामरस्य दशां प्रापयेदिति वेधदीक्षाविधेस्तत्त्वम्। गुरूशिष्ययोश्चित्ते

यदा समरसीभाव उपयाति तदा द्वयोरप्यौन्मनसे धामनि स्थितिर्भवति।

यथा—

"गुरोरग्रे विशेच्छिष्यो वक्त्रं वक्त्रे तु वेधयेत्।।
रूपं रूपे तु विषयैर्यावत् समरसीभवेत्।
चित्ते समरसीभूते द्वयोरौन्मनसी स्थितिः।।
उभयोश्चोन्मनोगत्या तत्काले दीक्षितो भवेत्।
शशिभास्कर संयोगे जीवस्तन्मयतां व्रजेत।।"

(तं०आ०29,273-275)

~ तद्विधि :— "बाह्यं प्राणं बाह्यगतं तिमिराकारयोगतः।।
निर्यातं रोमकूपैस्तु भ्रमन्तं सर्वकारणैः।
मध्यं निर्लक्ष्यमास्थाय भ्रमयेद्विसृजेत्ततः।।
संघट्टोत्पाटयोगेन वेधयेद्ग्रन्थिपञ्चकम्।
संघट्टवृत्तियुगलं मध्यधाम विचिन्तयेत्।।
नात्मव्योमबहिर्मन्त्रदेहसन्धानमाचरेत्।
दीक्षेयं सर्वजन्तूनां शिवतापत्तिदायिका।।"

(तं०आ०29,278-281)

प्रमेयोन्मुखतात्र तिमिराकारता। संघट्टोऽत्र प्राणापानयोरेकीकारः। ग्रन्थिपञ्चकं च ब्रह्मादिकारणपञ्चकाधिष्ठितम्। समरसीभूतप्राणापानयुग्ममत्र मध्यं धाम। मध्यं धाम = शुद्धसंवित्स्वरूपः स्वात्मा तदेकावधानो भवेच्छिष्यो गुरुकृपयाऽनया वेधदीक्षयोपायभूतयेति तात्पर्यम्।

~ तन्माहात्म्यम् :— **यथा—**

"वेधदीक्षां विना दीक्षां यो यस्य कुरुते प्रिये।
द्वावेतौ नरकं यात इति शाक्तस्य निश्चयः।।"

उद्धः- (तं०आ०वि०,खं०11/2,पृ०,131)

~ नवविधा :— **मतान्तरानुसारमेतत्। तत्र (1) मान्त्रोवेधो, (2) शाक्तोवेधो, (3) भुवनवेधो, (4) रूपवेधो, (5) विज्ञानवेधो, (6) पिण्डवेधो (7) स्थानवेधो, (8) नाडीवेधः, (9) परवेधः इति ते नव प्रकाराः। एतच्च साधनाक्रमभेदानुसारं नासमञ्जसम्।**

यथा—

"मनुशक्तिभुवनरूपज्ञापिण्डस्थाननाडिपरभेदात्।।
नवधा कलयन्त्यन्ये वेधं गुरवो रहस्यविदः।।"

(तं०आ०29,254-255)

~ षड्विधा :— **कुलगह्वरे षट् प्रकाराः एव प्रोक्ता वेधदीक्षायाः। अन्यत्र पुनर्नवा ते षट् प्रकाराः मन्त्रवेधो, नादवेधो, बिन्दुवेधः, शक्तिवेधो, भुजङ्गवेधः, परवेधः इति।**

यथा—

"मन्त्रनादबिन्दुशक्तिभुजङ्गमपरात्मिका।।
षोढा श्रीगह्वरे वेधदीक्षोक्ता परमेशिनां।"

(तं०आ०29,239-240)

"मन्त्रवेधं तु नादाख्यं बिन्दुवेधमतः परम्।
शाक्तं भुजङ्गवेधं तु परं षष्ठमुदाहृतम्।।"

उद्धः- (कुलगह्वरात्:- तं०आ०वि०,खं०11/2,पृ०,149)

"षोढा वै वेधबोधेन अध्वानं शोधयेत्प्रिये।"

उद्धः- (तं०आ०वि०,खं०11/2,पृ०,149)

वेल्लितशुक्तिः :— मुद्राविशेषः।

(1) द्वाभ्यां हस्ताभ्यां निःसन्धीकृताभ्यां वेल्लितशुक्तिः।

यथा—

"**(कराभ्याम्)** द्वाभ्यामुपरिगतदक्षिणाभ्यां निःसन्धीकृताभ्यां वेल्लितशुक्तिः।"

(तं०सा०,पृ०,186)

(2) द्रवद्रव्यपानोपयोगिनी करद्वयस्य विशेषा मुद्रा।

यथा—

"दक्षहस्तस्य कुर्वीत वामोपरि कनीयसीम्।
तर्जन्यङ्गुष्ठयोगेन दक्षाधो वामकाङ्गुलीः।।
निःसन्धिबन्धौ द्वावित्थं वेल्लिता शुक्तिरुच्यते।"

(तं०आ०28,95-96)

"द्वाभ्यां चैव तु कर्त्तव्या वेल्लिशुक्तिर्महाफला।।
दक्षिणे या कनिष्ठा तां कृत्वा वामस्य चोपरि।
हस्तस्य तु वरारोहे तर्जन्यङ्गुष्ठयोगतः।।
कृत्वा वामस्य चाङ्गुल्यो दक्षिणाधो व्यवस्थिताः।
निःसन्धिवेल्लिशुक्तिं तु कृत्वा पानं प्रसिद्ध्यति।।"

उद्धः- (तं०आ०वि०खं०11,पृ०,43)

वैकल्पिकाः :— विकल्प बुद्धावेवावभासमानाः भावाः।

यथा—

"येषां विकल्पनमेकं प्रयोजनं, न तु बाह्यं किञ्चित; विकल्पने एवं च ये भावाः, न तु बहिस्तत्रास्फुरणात्, ते वैकल्पिकाः।"

(ई०प्र०वि०वि०,खं०1,पृ०,94)

वैकारिकः— ~ अहङ्कारः —

द्रः- **'अहङ्कारः'** :— ~ **'वैकारिकः'** इति।

वैखरी :— (1) विशेषेण खरे कठोरे स्थूले शरीरे तिष्ठन्ती वाक्। पदपदार्थयोर्यत्र स्फुटो भेदः सा वैखरी।

यथा—

"वैखरी तु तदुभयभेदस्फुटतामय्येव।"

(प०त्री०वि०,पृ०,5)

द्रः- (स्पं०वि०, पृ०,150; भा०वि०,पृ०,24, म०न०प्र०पृ०,4)

"विखरः शरीरं, तत्र भवा तत्पर्यन्तचेष्टासम्पादिकेत्यर्थः।"

(ई०प्र०वि०वि०,खं०2,पृ०,187)

(2) असौ भेदमयी स्फुटा वाणी यस्यां शास्त्रोपदेशो वागिन्द्रियेणोच्चारितः सन् परैः श्रवणेन्द्रियेण श्रूयते।

यथा—

"यद्बहिर्वैखरीदशायां स्फुटतामियात्।।"

(तं०आ०वि०,खं०1,पृ०,36)

(3) प्राणीयेन प्रयत्नेनोच्चार्यमाणा वाणी वैखरी।

यथा—

"स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा।
वैखरी वाक् प्रयोक्तृणां प्राणवृत्तिनिबन्धना।।"

उद्धः- (स्त०चिं०वि०,पृ०,5)

~ तत्पतिः :— **वैखर्याः अधिपतिर्ब्रह्मा। अस्याः प्रतिष्ठा ईश्वरतत्त्वेक्रियाशक्त्यात्मनि।**

यथा—

"मनो ऽहङ्कारयो र्ब्रह्मविष्णु दे वतयो र्वै खरीमध्यमापदे पत्योरीशसदा- शिवक्रियाशक्तिपदमेव परा प्रतिष्ठाभूः।"

(प०त्री०वि०,पृ०,129-130)

~ सूक्ष्मा :— **उच्चारणात् प्राग् यदुच्चिचारयिषात्मकमनु-सन्धानं सा सूक्ष्मा वैखरी।**

यथा—

"अस्मिन्स्थूलत्रये यत्तदनुसन्धानमादिवत्।।
पृथक्पृथक्ततत्त्रितयं सूक्ष्ममित्यभिशब्द्यते।
षड्जं करोमि मधुरं वादयामि ब्रुवे वचः।।
पृथगेवानुसन्धानत्रयं संवेद्यते किल।"

(तं०आ०3,245-247)

~ स्थूला :— **श्रोत्रेणाकर्ण्यमानानां स्फुटानां वर्णानां ध्वनिः स्थूला वैखरी।**

यथा—

"या तु स्फुटानां वर्णानामुत्पत्तौ कारणं भवेत्।।
सा स्थूला वैखरी यस्याः कार्यः वाक्यादि भूयसा।"

(तं०आ०3,244-245)

वैराग्यभेदाः :— ते च तुष्टिनवकरूपः अम्भापृभृति संज्ञाः।

द्र०:- **'वैराग्यम्'** ~ 'अष्टविधम्' इति।

वैराग्यम् :— ऐहिकामुष्मिकभोगविरक्तिः। स एष बुद्धिधर्मविशेषः। मोक्षोपायसहायभूतं हि वैराग्यम्, न साक्षा त्मोक्षोपायः।

~ अष्टविधम् :— **अष्टप्रकारकाणां वैराग्याणां नामान्येवोक्तानि तन्त्रे न तेषां लक्षणानि।**

यथा—

"अम्भा च सलिला ओघा वृष्टिसंज्ञा तथापरा।।
सुतारा च सुपारा च सुनेत्रा च परा स्मृता।
अष्टमी च कुमारी स्यादुत्तमाम्भसिका तथा।।
वैराग्यं नवधा चैव कथितं तु मया तव।"

(स्व०तं०11,147-149)

"तदेतत्सिद्धितुष्टिसप्तदशकमिह तारादिदेवताधिष्ठि-तत्वादेवमभिहितमिति।"

(स्व०तं०,उ०11,पृ०,88)

वैरिञ्चशासनम् :— स्वायम्भुवागमः। यथा—

"..... वैरिञ्चे कलोर्ध्वे नियतिः श्रिता।।"

(तं०आ०9,46)

"वैरिञ्च इति—स्वायम्भुवे।"

(तं०आ०वि०,खं०6,पृ०,46)

वैरिञ्चाः :— वेदवादरताः जनाः। यथा—

"वैरिञ्चाः—ब्रह्मवादिनः।"

(तं०आ०वि०,खं०3,पृ०,25)

वैष्णवदर्शनम्ः :— विष्णूपासकानां दर्शनशास्त्रम्। तच्च षट्शाखं तद्यथा—

(1) पाञ्चरात्रमतम्, आगमिकम्।
(2) विशिष्टाद्वैतवेदान्तः, रामानुजीयः।
(3) द्वैतवेदान्तः, मध्वाचार्यस्य।
(4) द्वैताद्वैतवेदान्तः, भास्करनिम्बार्कादीनाम्।
(5) विशुद्धाद्वैत वेदान्तः, वल्लभाचार्यस्य।
(6) अचिन्त्य भेदाभेदवादः, चैतन्यमहाप्रभोः।

~ अवरमेव :— **शैवदर्शनापेक्षया वैष्णवबौद्धार्हद्वेदादि दर्शनानि षड्दर्शनानि चाप्यवराण्येव।**

यथा—

"वैष्णवाद्या हि तावन्मात्र एवागमे रागतत्त्वेन नियमिता इति नोर्ध्वदर्शनेऽपि तदुन्मुखतां भजन्ते, ततः सत्तर्क-सदागमसद्गुरूपदेशद्वेषिण एव। यथोक्तं पारमेश्वरेः—

'वैष्णवाद्या समस्तास्ते विद्यारागेण रञ्जिताः।
न विन्दन्ति परं तत्त्वं सर्वज्ञज्ञानवर्जिताः।। इति"

उद्धः- (तं०सा०,पृ०,22)

~ प्रवृत्तिस् (तत्र) :— **सा तावद्वामादेव्या एव प्रभावाद् भवति।**

यथा—

"यतस्तावति सा तस्य वामाख्या शक्तिरैश्वरी।।
पाञ्चरात्रिकवैरिञ्चसौगतादेर्विजृम्भते।"

(तं०आ०4,21-22)

~ भक्तिः (तत्र) :— **विष्ण्वाद्यवरदेवता विषया भक्तिः कर्माद्यपेक्षा। नासौ शिवभावप्रदा। न च शिवस्य स्वातन्त्र्यमात्रं तद्बीजम्।**

यथा—

"शिवीभावमहासिद्धिस्पर्शवन्ध्ये तु कुत्रचित्।।
वैष्णवादौ हि या भक्तिर्नासौ केवलतः शिवात्।
शिवो भवति तत्रैष कारणं न तु केवलः।।
निर्मलश्चापि तु प्राप्तावच्छिल्कर्माद्यपेक्षकः।"

(तं०आ०13,287-289)

अवच्छेददशाप्राप्तः कर्मादिसापेक्षः शिवस्तत्रकारणमिति।

~ भुक्तिविशेषदम् :— **वैष्णवाद्या मायया भ्रमिताः सन्तोऽमोक्षमेद मोक्षं मन्वानाः भ्रान्तदृशो भवन्ति। ततो वैष्णवदर्शनं भुक्तिविशेषमात्रप्रदम्।**

यथा—

"उक्तं स्वच्छन्दशास्त्रे तद् वैष्णवाद्यान् प्रवादिनः।
सर्वान्भ्रमयते माया साऽमोक्षे मोक्षलिप्सया।।"

(तं०आ०4,38)

"अतः परं भवेन्माया सर्वजन्तुविमोहिनी।
निर्वैरपरिपन्थिन्या यया भ्रमितबुद्धयः।।
इदं तत्त्वमिदं नेति विवन्दतीह वादिनः।
सत्पथं तु परित्यज्य नयति द्रुतमुत्पथम्।।
गुरुदेवाग्निशास्त्रस्य ये न भक्ता नराधमाः।
असद्युक्तिविचारज्ञाः शुष्कतर्कावलम्बिनः।।
भ्रमयत्येव तान्माया ह्यमोक्षे मोक्षलिप्सया।
साङ्ख्यवेदपुराणज्ञा अन्यशास्त्रविनिश्चये।।
न तांल्लङ्घयितुं शक्ता यदान्ये मोक्षवादिनः।
क्लिश्यन्ते मायया भ्रान्ता अमोक्षे मोक्षलिप्सया।" इति।

उद्धः:- (तं०आ०वि०,खं०3,पृ०,42-43)

(2) या तत्र मुक्तिरुक्ता नासौ पूर्णा मुक्तिः। अपितु कुतश्चिदेवबन्धनात्। शैवशास्त्राश्रयत एव सर्वथा मुक्तिः।

यथा—

"तेन वैष्णवबौद्धादिशासनान्तरनिष्ठिताः।
यथा सम्यङ्न मुच्यन्ते न तथा शैवसंस्कृताः।।"

(मा०वि०वा०1,191-192)

~ भोगदमेव :— **रागतत्त्वप्रेरितः एव जनो वैष्णवादिशास्त्रेषु भोगात्मकसिद्धिमात्रप्रदेषु महाप्रदसिद्धिदायकेषु रक्तो भवति। यथा—**

"शिवशासनमाहात्म्यं विदन्नप्यत एव हि।
वैष्णवाद्येषु रज्येत मूढो रागेण रञ्जितः।।"

(तं०आ०4,20-21)

~ भ्रान्तिरूपम् :— **यथा—**

"स्वच्छन्दशास्त्रे प्रोक्तं च वैष्णवादिषु ये रताः।।
भ्रमयत्येव तान्माया ह्यमोक्षे मोक्षलिप्सया।"

(तं०आ०13,316-317)

~ सुचिरान्मोक्षदम् :— **वैष्णवाद्याः साधकाः सवेद्यापवेद्यसुषुप्तादिदशासमवाप्य चिरं तत्रत्यं सुखमुपभुज्याभिनव सृष्ट्यारम्भेऽनन्तनाथेनानुगृहीताः शैवदर्शनमाश्रिताः सन्तो मन्त्रत्वमवाप्य ततः क्रमेण परां मुक्तिं लभन्ते।**

यथा—

"तं प्राप्यापि चिरं कालं तद्भोगाभोगभुक्तितः।
तत्तत्वप्रलयान्ते तु तदूर्ध्वां सृष्टिमागतः।।
मन्त्रत्वमेति सम्बोधादनन्तेशेन कल्पितात्।"

(तं०आ०4,31-32)

"अत एव प्राप्तायामपि वैष्णवादिदर्शनान्तरोक्तायां मुक्तौ संसारस्य प्रक्षयो न जायते।"

(तं०आ०वि०,खं०3,पृ०,36)

वैसर्गिकम् :— ऊर्ध्वकुण्डलिनीस्थानं विसर्गवर्णश्च।

यथा—

"वैसर्गिकमूर्ध्वकुण्डलिनीस्थानं बिन्दुद्वयं च"

(तं०आ०वि०,खं०3,पृ०,365)

व्यक्तलिङ्गम् :— द्र०:- 'लिङ्गं' ~ 'व्यक्तम्' इति।

~ उच्चारयोगे :— **(1) न्यक्कृतपराद्वयाहन्तापरामर्शं विशेषस्पन्दात्मकं नरतत्त्वप्रधानं विशेषतो भोगमात्रप्रदं तथापि चिदात्मकमेवापरं लिङ्गम्। आत्मलिङ्गमित्यप्यस्य नामान्तरं पारिभाषिकम्।**

यथा—

"यन्नयक्कृतशिवाहन्तासमावेशं विभेदवत्।।
विशेषस्पन्दरूपं तद् व्यक्तं लिङ्गं चिदात्मकम्।"

(तं०आ०5,116-117)

"व्यक्तलिङ्गं तदुक्तं तु यत् केवलनरात्मकम्।।"

(मा०वि०वा०2,65)

(2) इदं तत्रात्मलिङ्गमित्युच्यते।

यथा—

"यद्व्यक्तमात्मलिङ्गाख्यं नररूपसमाश्रयि।
देहाभेदमये बाह्ये विश्वस्मिन्भरिते सति।।
समुदेति महानन्दभूमौ लीनस्य योगिनः।"

(मा०वि०वा०2,67-68)

एतेन ज्ञायते यन्महानन्दभूमौ व्यक्तलिङ्गस्य साक्षात्कारो भवति इति।

~ बाह्यपूजासु :— **पात्रवस्त्रादौ निर्मितं वा, पाषाणादिघटितं वा लिङ्गम्।**

यथा—

"व्यक्तं वा चित्रपुस्तादौ देवदारुसुवर्णजम्।
अथ दीक्षितसच्छिल्पिकृतं स्थापयते गुरुः।।"

(तं०आ०27,19-20)

व्यक्ताव्यक्तलिङ्गम् :— ~ उच्चारयोगे :— **(1) देहादावात्मभिमाने सत्यपि य इदमहमिति शुद्धविद्यापरामर्शः स व्यक्ताव्यक्तलिङ्गाभिधानः। तच्च नरशक्तिमयं परापरं लिङ्गं भुक्तिमुक्तिप्रदं शक्तिप्रधानम्।**

यथा—

"देहगाध्वसमुन्मेषे समावेशस्तु यः स्फुटः।।
अहन्ताच्छादितोन्मेषिभावेदं भावयुक् स च।
व्यक्ताव्यक्तमिदं लिङ्गं मन्त्रवीर्यं परापरम्।।
नरशक्तिसमुन्मेषि शिवरूपाद्विभेदितम्।"

(तं०आ०5,114 -116)

"देहादावात्माभिमाने सत्यपि यः पुनरपरिम्लानः परतत्त्वान्तः समावेशः तदिदं व्यक्ताव्यक्तं लिङ्गम्।

.....

इदमहमिति-प्रतीतिरूपः .....।

नरशक्तिरूपमिति यावत्। एवमपि परापरं शक्ति-प्रधानमित्यर्थः।

.....

एतद्दशामधिशयानो हि मन्त्रः स्वोचितफलदानसामर्थ्य-भाग्भवतीति भावः।"

(तं०आ०वि०,खं०3,पृ०,424-425)

(2) शाक्तसमुल्लासभरादन्तः कृतमन्त्रवीर्यं नरशक्तिमयं तावद्व्यक्ताव्यक्तं लिङ्गम्।

यथा—

"शाक्तसमुल्लासभरादन्तःकृतमन्त्रवीर्यपरासारः।
नरशक्तिमयमिदं तद्व्यक्ताव्यक्तं भवेल्लिङ्गम्।।"

(मा०वि०वा०2,63-64)

'परसारः' इति वा भवेदत्र पाठश्छन्दसोऽनुरोधात्।

व्यञ्जनत्वम् :— कादीनां स्वरवर्णान्तर्गतत्वे सत्येव बहिरभिव्यज्यमानतया व्यञ्जनत्वम्। तेषां बहिर्व्यञ्जनमपि स्वरसाहाय्येनैव।

यथा—

"अत एव तद्वर्णजातं बहिरभिव्यक्तं सद् व्यज्यत इति 'व्यञ्जनं' न पुनरपूर्वतयैवोत्पाद्यम्—पूर्वमपि स्वरात्मनास्यावस्थानात्। ..... अभिव्यक्तमेवैतद्वर्णजातं स्वरानुप्राणितमेव भवेत्, अन्यथा ह्यनच्कतयास्योच्चार एव न भवेत्।"

(तं०आ०वि०,खं०2,पृ०,180)

व्यञ्जनसृष्टिः :— चिदानन्दादिशक्तिपञ्चकयोगात् स्वरेभ्यः पञ्चपञ्चानां स्पर्शवर्णानां सृष्टिः। जाग्रदाद्यवस्था-पञ्चकसम्भेदतः स्वराः पञ्च-पञ्चस्पर्शवर्णसृष्टिमूलभूताः।

यथा—

"तत्रानुत्तरात्कवर्गः। शुद्धाया इच्छायाश्चवर्गः, सकर्मिकाया इच्छाया द्वौ टवर्गस्तवर्गश्च, उन्मेषात् पवर्गः। शक्तिपञ्चकयोगात् पञ्चकत्वम्।"

(तं०सा०,पृ०,15-16)

व्यवहरणम् :— ज्ञानरूपो वचनरूपश्च व्यवहारः।

यथा—

"व्यवहरणं हि ज्ञानाभिधानरूपम्।"

(ई०प्र०वि०वि०,खं०2,पृ०,109)

द्र०:- **'व्यवहारः'** इति।

व्यवहारः :— लौकिको ज्ञानक्रियाव्यापारः।

~ अभेदमयः — **संविद्रूपाज्ज्ञानात् प्रमेयं न भिद्यते। ततो ज्ञायमानो नीलादिर्वस्तुतः संविद्रूप एव। संविदि प्रतिष्ठितस्य नीलादेर्न कथमपि संविद्भेदकत्वम्। स्वयं प्रकाशमाने परमेश्वररूपे संवित्प्रकाशे प्रकाशमानस्य नीलादेर्न स्वकीयविशेषतात्मक-प्रातिस्विकस्वभाववशादपि कोऽपि परस्परं भेदः, तासां विशेषतानां संविदभिन्नत्वात्।**

यथा—

"ज्ञानाद्विभिन्नो न हि कश्चिदर्थस्
तत्तत्कृतः संविदि नास्ति भेदः।
स्वयं प्रकाशाच्छतमैक धाम्नि
प्रातिस्विकी नापि विभेदिता स्यात्।।"

(प०च०,2)

~ द्विविधः :— **स च समलो निर्मलश्च।**

द्र०:- **'व्यवहारः'** — ~ **'निर्मलः'** इति।

द्र०:- **'व्यवहारः'** — ~ **'समलः'** इति च।

~ निर्मलः :— **(1) विवेकिनां शास्त्राध्ययन-विचारण-योगाभ्यासादिरूपः।**

यथा—

"निर्मलः (व्यवहारः) प्रत्यभिज्ञातात्मपरमार्थानां पारमेशरूपावेशलाभाद् विशेषदृशि वीरेशव्यपदेशानां, न तु लाकुलादिपशूनाम्।" इत्यादि।

(ई०प्र०वि०वि०,खं०2,पृ०,405)

(2) प्रत्यभिज्ञातात्मस्वरूपाणां सर्वोऽपि व्यवहारो निर्मल एव।

(3) साधकानां शास्त्रचिन्तनयोगसाधनादिव्यवहारो नैर्मल्यं प्रति प्रवर्तकत्वेन निर्मल एव गण्यते शास्त्रव्यवहारे।

~ परमार्थदः :— **यद्यदवभासते तत्तत् प्रमातृप्रकाशे प्रकाशमानमेव तथा भवति। ततः प्रमातृप्रकाश एव स्वच्छस्फटिककल्पत्वेन गृहीततत्तद्विषयप्रतिबिम्बस्तत्तदाकारतया स्वयं प्रकाशते। इत्थं भासमानं विश्वं संवित्प्रकाशादभिन्नमेव सत् परमशिवात्मकमेव वस्तुतः। तथा विमृश्यमानो लौकिको व्यवहारः परमार्थसत्यस्वरूपमभिव्यनक्ति।**

यथा—

"ततो भेदे तु भास्यस्य घटते भासमानता।
तेनोक्तं प्रत्यभिज्ञायां तदद्वयमयं जगत्।।"

(अ०प्र०सि०,27)

"व्यवहारोप्ययं भगवदनुगृहीतानां परमार्थप्रवेशे प्रत्युत अभ्युपाय, न तु विरोधी।"

(ई०प्र०वि०वि०,खं०3,पृ०,157)

"अर्थेषु तद्भोगविधौ तदुत्थे
दुःखे सुखे वा गलिताभिशङ्कम्।
अनाविशन्तोऽपि निमग्नचित्ता
जानन्ति वृत्तिक्षयसौर- ख्यमन्तः।"

(मा०वि०वा०,2-114)

~ परमेश्वरतामयः :— **उन्मीलित सत्यज्ञानचक्षुः साधको निजे ऐन्द्रियके लौकिके व्यवहारेऽपि स्वात्मनः पारमेश्वराणि पञ्चकृत्यानि कुर्वन्तमिव स्वात्मानं साक्षात्कुरुते।**

यथा—

"ऐक्येन तावत्यंशे निर्मिमाणस्तत्रैव स्थितिं भासयन् पूर्वप्रमात्रैक्यं संहरन्, तदेकघननिजरूपनिमीलनात् विलयमुपदर्शयन् ऐक्यावेशांशेनानुग्रहकलां निर्भासयन् ..... कृत्यपञ्चक-सम्पादने सदेवोद्युक्तः इत्यादि।"

(ई०प्र०वि०वि०,खं०2,पृ०,316)

रहस्योपायोऽयम्।

~ पारमेश्वरलीलामयः :— **अहन्तया सततं प्रकाशमानमेवार्थजातं परमेश्वरः स्वविलासलीलयेदन्तयाप्यवभासयति। तदुभयं वस्तुतः परमेश्वरस्य परमेश्वरत्वमेव सदविरुद्धम्।**

यथा—

'मायापदे देहप्राणादिमपि प्रभुरेव प्रकाशपरमार्थ इच्छया-मायाशक्तिरूपया, आविशन्–देहप्राणादिप्राधान्येन स्वरूपं प्रदर्शयन्, अन्तः–संविन्मात्रे, भान्तम्, अहमित्येवंरूपम् अर्थौघम् इच्छयैव बहिरिदमिति भासयति।"

(ई०प्र०वि०,खं०1,पृ०,259-260)

ततो नैष बाह्याभासोऽविद्याकारण कोऽपि तु मायाशक्ति- कारणकः। न चासौ मायापरमेश्वरस्योपाधिरपितु तदभिन्ना तद्रूपा तत्सारभूता च पारमेश्वरी पराशक्तिरिति वेदितव्यम्।

~ प्रकाशमयः :— **घटसुखादयो प्रमेयाभासाः प्रकाशरूपाः सन्त एव प्रकाशितुमलं भवन्ति। ततो प्रकाशरूपास्ते। अप्रकाशस्य प्रकाशनासम्भवात्। प्रकाशाद् भेदे सत्याभासमानोऽर्थः सर्वान् प्रति वा न कञ्चिद्वा प्रति, अपि तु स्वात्मन्येव आभासेत। स्वात्मन्यपि वा न स्यादित्यन्धता जगतः।**

यथा—

"प्रागिवार्थोऽप्रकाशः स्यात्प्रकाशात्मतया विना।
न च प्रकाशो भिन्नः स्याद् आत्मार्थस्य प्रकाशता।।"

(ई०प्र०,1-5-2)

"नीलादिरूपतैव यदि प्रकाशमानता न पुनरपरा काचिदर्थशरीरोत्तीर्णा प्रकाशात्मता तर्हि यथा सर्वान् प्रति नीलमेव तत्सम्भावनया भण्यते, न कञ्चिद्वा प्रति, वस्तुतो वा स्वात्मन्येव तन्नीलं परस्य परनिष्ठतानुपपत्तेः, स्वात्मनि वा न नीलं नानीलं प्रकाशानुग्रहेण विना व्यवस्थानायोगात् .....।

(ई०प्र०वि०,खं०1,पृ०,154-155)

"सर्वथार्थशरीरविश्रान्तश्चेत प्रकाशो ममावभासते इति प्रमातृलग्नतया प्रकाशस्थितिर्दुरुपपादा।"

(तदेव,पृ०,156)

"तस्मात् संवित्प्रकाश एव घटादिप्रकाशो, न त्वसौ स्वतन्त्रः कश्चिद् वास्तवः। प्रकाश एव चात्मा।"

(ई०प्र०वि०,खं०1,पृ०,34)

~ मोक्षोपायः :— **उत्कृष्टाः शिवयोगिनो लौकिकविषयव्यापारान् पश्यन्तोऽपि तेषु शिवशक्तिविलासमेव वस्तुतः साक्षात्कुर्वन्तो विजयन्ते। इति व्यवहारोऽपि तेषां कृते शिवत्वसाक्षात्कारोपायतां याति।**

यथा—

"सर्वथा तावदत्र प्रमेये भगवत एव भेदने चाभेदने च स्वातन्त्र्यम् घटगताभासभेदाभेददृष्टिरेव च परमार्थाद्वयदृष्टिप्रवेशे उपायः समवलम्बनीयः, न तु व्यवहारोऽप्ययं परमेश्वरस्वरूपानुप्रवेशविरोधी इति .....।"

(ई०प्र०वि०,खं०2,पृ०,116-17)

"दर्शनान्तर प्रणेतृमनीषया संसारनिबन्धत्वेनोपकल्पितः शब्दस्पर्शादिविषयविक्षोभो जीवन्मुक्तिलक्षणाह्लादस्वभावं स्वात्मनो विमर्शं प्रत्युपायतयोपदिश्यते।"

(म०मं०प०,पृ०,14)

~ सत्यः :— **तेन जगदाभासो न भ्रान्तिः। भ्रान्तिस्तु मृगमरीचिकादिरूपा, शुक्तिरजतादिरूपा वा प्रतीतिः। न व्यावहारिकज्ञानरूपा। एतस्यास्तत्तदर्थक्रियाकारित्वे स्वीकृतेऽपि भ्रान्तिरियमिति कथनं हि स्वात्मवञ्चनं परवञ्चनम् च।**

यथा—

"सकलदेशकालदशापुरुषोपयोगी यद्येष व्यवहारो न सत्यस्तर्हि नान्यस्य सत्यत्वं विद्मः—इति नात्र भ्रान्तिरिति भ्रमितव्यम्।"

(ई०प्र०वि०,खं०2,पृ०,59)

~ समलः :— **येषामात्मप्रत्यभिज्ञा न वृत्ता तेषां जीवदशोचितः क्रयविक्रयादिरूपो व्यवहारः समलः।**

यथा—

"अप्रत्यभिज्ञातात्मपरमार्थानां समलो व्यवहारो, अन्येषां स एव निर्मलः।"

(ई०प्र०वि०,खं०1,पृ०,315)

द्र०:- **'व्यवहारः'** ~ 'द्विविधः' इति।

~ समाधिमयः :— **परो योगी बाह्यान्तःकरणव्यवहारे सततं प्रवर्तमानोऽपि सर्वं स्वात्मशिवतया साक्षात्कुर्वन् समाधिस्थ एव तिष्ठति।**

यथा—

"सृष्ट्यादीनां प्रवृत्तावाऽप्युन्मज्जनेऽपि, नास्य योगिनः संवेत्तृभावात् तुर्यचमत्कारात्मकविमर्शमयादुपलब्धृत्वान्निरासश्चलनम्। तन्निरासे कस्यचिदप्यप्रकाशनात्।"

(शि०सू०वि०,पृ०,59)

~ समावेशमयः — **प्राप्तपराकाष्ठो योगी योगस्याभ्यासं विनाप्येवमेव परशिवदशासमाविष्टो भवति, व्यवहारदशायां प्रवर्तमानोऽपि।**

यथा—

"सत्येवात्मनि चित्स्वभावमहसि स्वान्ते तथोपक्रियां।
तस्मै कुर्वति तत्प्रचारविवशे सत्यक्षवर्गेऽपि च।।
सत्स्वर्थेषु सुखादिषु स्फुटतरं यद्भेदवन्ध्योदयं।
योगी तिष्ठति पूर्णरश्मिविभवस्तत्तत्त्वमाचीयताम्।।"

(तं०आ०5,127)

व्याख्याक्रमः :— शास्त्रव्याख्यावसरे विधीयमानं किमपि नैमित्तिकं कर्म।

यथा—

"अथ वच्मि गुरोः शास्त्रव्याख्याक्रममुदाहृतम्।।
देव्यायामलशास्त्रादौ तुहिनाभीषुमौलिना।" **इत्यादि।**

(तं०आ०28,385-386)

द्र०:- (तं०आ०28,386-414) **इति।**

व्याख्याविधिः :— **क्रियाबहुलो विधिः प्रतिपादितस्तन्त्रालोके सविस्तरम्।**

द्र०:- (तं०आ०28,397-407) **इति।**

व्यानः :— (1) भेदे विगलिते सति विश्वोत्तीर्णविश्वमयोभयरूपस्य परिपूर्णस्य स्वात्मनो यद् विमर्शनम् "अहमिति" सा प्राणवृत्तिर्व्यानरूपा, तस्या अभिव्यक्तिः शिवप्रमातृषु। तां च तुर्यातीतावस्थां मन्यन्ते सिद्धयोगिनः।

यथा—

"विलीने तु भेदे सर्ववेद्यराशिरूपतत्त्वभूतभुवनवर्गात्मक देहव्यापाररूपेण प्राणवृत्तिर्व्यानरूपा विश्वात्मकपरमशिवोचिता तुर्यातीतरूपा।"

(ई०प्र०वि०,खं०2,पृ०,247)

(2) विश्वात्मिका सर्वव्यापिनी प्राणवृत्तिर्व्यानः। स च योगिज्ञानिषु यदा कदा प्रकाशते। परमे शिवे तु सततं प्रकाशमानैव जृम्भते।

यथा—

"स एव तु समस्तं देहवर्ति तत्त्वभुवनादि यदा व्याप्य आसमन्तादनिति, तदा परमशिवस्वभावस्तुर्यातीतरूपतया परः पूर्णो व्यानः।"

(ई०प्र०वि०वि०,खं०3,पृ०,349)

एतेनैतच्छङ्क्येत केनापि यत् परमशिवादधः शक्तिशिवावप्युदानक्षेत्र एव विलसतो न व्यानक्षेत्र इति। परमत्रैतन्न विस्मर्तव्यं यत् परमशिव एव हि शिवतया शक्तितया चोच्यते, वर्ण्यते उपास्यते च। तत एकस्यैव परतत्त्वस्य नामत्रयं शक्तिः, शिवः, परमशिव इति।

~ कालोदयः (तत्र) :— **व्याने तु सूक्ष्मसूक्ष्मतरस्पन्दनमात्रात्मनि विशेषे कालीया भावना कर्तुं शक्या। यद्यपि कालकलनातीतं व्यानस्यक्षेत्रम्।**

यथा—

"व्याने तु विश्वात्ममये व्यापके क्रमवर्जिते।
सूक्ष्मसूक्ष्मोच्छलद्रूपमात्रः कालो व्यवस्थितः।।"

(तं०आ०6,214)

व्यानक्षेत्रम् :— **शिवः, शक्तिः, परमशिवश्चेति व्यानस्य क्षेत्रम्।**

यथा—

"शिवरूपता व्यानः।"

(ई०प्र०वि०वि०,खं०3,पृ०,350)

अत्रैतन्न विस्मर्तव्यं यच्छिव एव शक्तिरिति, परमशिव एव च शिवः शक्तिश्चेत्युच्यते। तदियत् क्षेत्रं सर्वं व्यानस्यैव।

व्यानशक्तिः :— **विश्वव्याप्तिसारा परमेश्वरोचिता परा शक्तिः।**

यथा—

"विश्वव्याप्तिसारां च व्यानशक्तिं ..... तुर्यातीतदशारूपां च।"

(प्र०हृ०,पृ०,31)

व्यापकं :— ~ **बीजम्** :— **सकारः।**

यथा—

"तत एव सकारेऽस्मिन्स्फुटं विश्वं प्रकाशते।"

उद्धः:- (तं०आ०3,165)

"सार्णेनाण्डत्रयं व्याप्तम् .....।"

(मा०वि०तं०4,25)

व्यापकानि :— ~ **तत्त्वानि** :— **पुंस्तत्त्वं विद्यातत्त्वं शक्तितत्त्वञ्चेति त्रीणि व्यापकानि तत्त्वानि पृथिव्यादिमायान्तं पुंस्तत्त्वस्य व्याप्तिः विद्यादिसदाशिवान्तं विद्यातत्त्वस्य, शिवशक्त्योश्च शक्तितत्त्वस्य व्याप्तिः।**

यथा—

"पुंविद्याशक्तिसंज्ञं यत्तत्सर्वव्यापकं यतः।
अव्यापकेभ्यस्तेनेदं भेदेन गणितं किल।।"

(तं०आ०1,188)

"मायान्तं ह्यात्मतत्त्वस्य (पुंस्तत्त्वस्य), सदाशिवान्तं विद्यातत्त्वस्य, शिवान्तं च शक्तितत्त्वस्य व्याप्तिः।"

(तं०आ०वि०,खं०1,पृ०,217)

व्यापित्वम् :— **देशकृतावच्छेदरहितत्वम्।**

यथा—

"व्यापित्वं देशेनानवच्छेदः, ... देशविशेषायोगेन व्यापित्वम्।"

(ई०प्र०वि०वि०,खं०1,पृ०,136)

व्यापिनी :— **(1) शिवतत्त्वाधो वर्तमाना पराशक्तिः।**

यथा—

"शून्याद् व्यापिन्यादिपदाद्भावसंस्कारस्यापि प्रक्षयादतिशून्यं षट्त्रिंशं तत्त्वमित्यर्थः।"

(तं०आ०वि०,खं०7/2,पृ०,13)

(2) व्यापिन्यां स्रष्टव्यं विश्वं संस्कारकल्पतया तिष्ठतीति व्यज्यतेऽनेन व्याख्यानेन।

द्र०:- (वि०भै०उ०,पृ०,5)

"समन्ताद्व्याप्नुयाद्यस्माद् व्यापिनीत्यभिधीयते।।"

(स्व०तं०4,307)

(3) विश्वमप्यन्तर्बहिर्व्याप्य स्थिता शक्तिर्व्यापिनीति व्यपदिश्यते।

यथा—

"सा शक्तिर्व्याप्य यतो विश्वमध्यानमन्तर्बहिरास्ते तस्माद्व्यापिनी।"

(तं०सा०,पृ०,65)

~ **तत्पदम्** :— **अनाश्रितादप्युत्तरं पदम्।**

यथा—

"शून्यमनाश्रितभट्टारकान्ताशेषविश्वावभासप्रशमाभावाव-

भासात्मकव्यापिनीपदम् .....।"

(स्व०तं०,उ०,11,पृ०,7)

~ शक्तिः :— **(1) विश्वं क्रोडीकृत्य स्थिता शक्तिः परैव व्यापिनीति समाख्या।**

यथा—

"..... क्रोडीकरोति या विश्वं .. ..।।"

(वि०भै०उ०,पृ०,38)

(2) कौण्डल्याः शक्त्याः अन्तस्तलभूता शक्तिः।

यथा—

"मध्यतो व्यापिनी तस्यां व्यापीशो व्यापिनीधरः।"

(तं०आ०8,397)

(3) इच्छाशक्तेः सूक्ष्मा स्थितिः।

यथा—

"एकैव परमेशेच्छाशक्तिः परसूक्ष्मस्थूलरूपतया मेयाभास-सूत्रणामयी समना व्यापिनी शक्तिरिति चोच्यते एकस्या अपि इच्छायाः सूक्ष्मरूपज्ञानक्रियाशक्तिसंभेदेन त्रित्वात्।"

(स्व०तं०उ०,प०11,पृ०,7)

~ (त्रैशिरसे) :— **दीप्तायाश्चिच्छक्तेस्तथैव दीप्ततया स्थिरा स्थितिर्व्यापिनी।**

यथा—

"व्यापिन्यां कथञ्चिदुद्रेकेऽपि तथैवावस्थानम्।"

(तं०आ०वि०,खं०12,पृ०,180)

व्यापिनीकला :— परयोगिभिरेवानुभाव्याः व्यापिन्याः कलाः।

यथा—

"सूक्ष्मा चैव सुसूक्ष्मा च ह्यमृतामृतसम्भवा।।
व्यापिनी चैव विख्याता शक्तितत्त्वसमाश्रिताः।
अलुप्तशक्तिसम्बन्धाच्चिच्छक्तिसमधिष्ठिताः।।
शक्तितत्त्वे स्थिता ह्येताश्चिन्मात्रा अपि लक्षिताः।
व्यापिनी व्योमरूपा च ह्यनन्तानाथसंज्ञिता।।
अनाश्रिता महेशानि व्यापिन्यास्तु कलाः स्मृताः।"

(ने०तं०22,42-45)

व्याप्तिः :— (1) सर्वस्य संविन्मात्ररूपतया विमर्शनस्याभ्यासः।

यथा—

"व्याप्तौ इति सार्वात्म्यप्रतिपत्त्या सर्वाक्षेपकारिणि विकाससमाधावित्यर्थः।"

(तं०आ०वि०,खं०3,पृ०,379)

(2) (स्वप्नावस्था) यतः स्वप्नवृत्तिर्बाह्यां वेद्यसत्तामनपेक्ष्यैव निजस्वातन्त्र्यबलादेव प्रमेयं व्याप्नोति ततो ज्ञानिनः स्वप्नावस्थां व्याप्तिरिति वदन्ति।

यथा—

"वेद्यसत्तां बहिर्भूतामनपेक्ष्यैव सर्वतः।।
वेद्ये स्वातन्त्र्यभाग् ज्ञानं स्वप्नं व्याप्तितया भजेत्।"

(तं०आ०10,255-256)

~ करणयोगे :— **यथाश्वो दूरदेशात् स्वं गृहं प्रत्यावर्तमानः सन् स्वस्थानसमीपं प्राप्नुवन् नासाग्रेण पुनः पुनर्जिघ्रन् स्थानं स्थानमग्रे स्वीयमेव प्रत्यभिजानन् तुष्यति, तथैव भावं भावं स्वात्मत्वेन प्रत्यभिजानन् योगी पूर्णतां साक्षात्कुर्वंस्तुष्यति। एवं साक्षात्कृतां स्वात्मनो व्याप्तिमपि न्यग्भावयन् शुद्धे बोधे प्रतिष्ठां लभते करणयोगाभ्यासविशेषेण।**

यथा—

"..... तद् व्याप्तिरभिधीयते।।
स्वरूपस्थितिभावस्य एकदेशगतस्य च।
घोणार्चिः प्रविकासं तु स्थानात्स्थानपदक्रमात्।।
ज्ञायते वस्तुबोधज्ञस्त्रिप्रकारेण वस्तुनि।
व्याप्तिस्तु कथिता, सा तु सर्वज्ञा सर्वगा परा।"

(तं०आ०वि०,खं०3,पृ०,441)

नेयं सम्यक् स्पष्टतां नीताऽऽचार्यैः, करणयोगस्य साक्षाद्गुरूपदेशमात्रवेद्यत्वात्। तदत्र विषये पुनर्विचारणीयं सुधीभिः।

व्यावहारिकः :— ~ (कालः) :—

द्र०:- **~'कालः'** 'लोकव्यवहारे' इति।

व्युत्थानम् :— समावेशविच्छेदे पुनर्व्यावहारिकायामवस्थायामवतरणम्।

~ समावेशमयम् :— **उत्कृष्टस्य सुप्रबुद्धस्य योगिनो व्युत्थानावस्थायामपि समावेशावस्थाया विच्छेदो न भवति। असौ लोकव्यवहारे लग्नोऽपि शिवसमावेशे एव तिष्ठति।**

यथा—

"सत्येवात्मनि चित्स्वभावमहसि स्वान्ते तथोपक्रियां तस्मै कुर्वति तत्प्रचारचतुरे सत्यक्षवर्गेऽपि च।
सत्स्वर्थेषु रसादिषु स्फुटतरं यद्भेदवन्ध्योदयं योगी तिष्ठति पूर्णरश्मिखचितस्तत्तत्त्वमादीयताम्"

(मा०वि०वा०2,115)

व्योमः :— (1) शून्यमवकाशमात्रम्। आकाशः।

(2) रिक्तं स्थानं मण्डले।

यथा—

"पद्मानामथ चक्राणां व्योम्नां वा सप्तकं भवेत्।"

(तं०आ०31,28)

(3) सुस्फुटतां गता समना अपि व्योम इत्युच्यते।

यथा—

"समना व्योम सुस्फुटम्।"

(पू०प्र०1,615)

~ त्रिविधम् :— **आणवधारणासु व्योम्नः आलम्बनरूपत्वेन त्रिविधा कल्पना विधीयते। आभ्यन्तरं दहरादिरूपं, बाह्यं महाकाशरूपम्, उभयसमुच्चयात्मकं चेति। इयं व्योमधारणा विस्तरतो मालिनीतन्त्रे त्रयोदशेऽधिकारे प्रतिपादिता वर्तते।**

यथा—

"बाह्याभ्यन्तरभेदेन समुच्चयकृतेन च।
त्रिविधं कीर्तितं व्योम .....।।"

(मा०वि०तं०12,10)

तयोः समुच्चयः कथं विभाव्यते इति न स्पष्टीकृतं तन्त्रे। चित्तव्योम्नि महाकाशभावनया भवेदयमिति सम्भाव्यते।

व्योमचरी :— ~ मुद्रा :— यथा

"श्वभ्रे सुदूरे झटिति स्वदेहं
सम्पातयन् वासमसाहसेन।
आकुञ्च्य हस्तद्वितयं प्रपश्यन्
मुद्रामिमां व्योमचरीं भजेत।।"

(तं०सा०,पृ०,206)

व्योमरेखा :— न स्पष्टीकृता टीकायाम्।

मण्डलान्तः कापि रेखा भवेदेषा।

व्योमवामेश्वरी :— पारमेश्वरी चिच्छक्तिः।

यथा—

"व्योमनामोमात्मकप्रणवरूपताविमर्शवैशिष्ट्यानुप्राणनानां वक्ष्यमाणसर्वपञ्चकात्मनां वामं वमनं प्रतीश्वरी सामर्थ्यशालिनीति व्योमवामेश्वरी। सा च परमेश्वरस्याविकल्पभूम्यनुप्रविष्टा चिच्छक्तिः।"

(म०मं०प०,पृ०,86)

व्योमव्यापिनी :— (1) शुद्धविद्या।

यथा—

"एकत्व लक्षणाद्धेतोर्व्योमव्यापिरूपः शुद्धविद्यात्मा विकल्पः।"

(तं०आ०वि०,खं०4/2,पृ०,29)

(2) एकाशीत्यर्धमात्रात्मिका शिवस्य शक्तिः।

यथा—

"शक्तिरिति व्योमव्यापिरूपा।"

(तं०आ०वि०,खं०4/1,पृ०,185)

"नन्वस्या व्योमव्यापिरूपिण्याः पारमेश्वर्याः शक्तेः .... इति (अर्धमात्राप्रकरणे)"

(तदेव,पृ०,185)

व्योमाख्या खेचरी :— लक्षिता परं न स्पष्टमुक्ता रहस्यात्मकत्वात्।

यथा—

"तस्मादेव समुत्तम्ब्य बाहू चैवावकुञ्चितौ।।
सम्यग्व्योमसु संस्थानाद्व्योमाख्या खेचरी मता।"

(तं०आ०32,55-56)

व्योमेशस्वस्तिकम् :— तन्नामको मण्डलविशेषः।

यथा—

"एवं शूलाब्जभेदमभिधाय व्योमेशस्वस्तिकं निरूपयति।"

(तं०आ०वि०,खं०12,पृ०,284)

"स्वस्तिकेनाथ कर्त्तव्यं युक्तं तस्योच्यते विधिः।"

(तं०आ०31,132)

"कर्तव्यमिति .....
..... मण्डलम्।"

(तं०आ०वि०,खं०12,पृ०,284)

~ तदङ्गानि :— **पद्मं, चन्द्रमण्डलं, पीठं, वीथी, द्वारमिति।**

यथा—

"वंशैर्विषयसंख्यैश्च पद्मं युग्मेन्दुमण्डलम्।।
रससंख्यैर्भवेत्पीठं स्वस्तिकं सर्वकामदम्।
वसुसंख्यैर्द्वारवीथावेवं भागपरिक्रमः।।"

(तं०आ०31,134-135)

व्योमेश्वरी :— प्रमाणप्रमेयादि प्रपञ्चशून्या चिद्व्योमरूपाऽपरिमितसंविन्मयी स्वात्मचितिः।

यथा—

"व्योमेश्वरीमात्मचितिं विगाह्य क्रोडयेज्जडम्।"

(प०पं०,23)

व्रतम् :— ~ अध्वोपयोगे :— एवमेव पूजाजपध्यानहोमादि कुर्वतः सर्वं च समभावेन स्वात्मपरमेश्वरं पश्यतः शिवयोगिनो या स्वस्वरूपस्थितौ निश्चलता सैव तस्य व्रतमध्वोपयोगे।

यथा—

"तथैवं कुर्वतः सर्वं समभावेन पश्यतः।
निष्कम्पता व्रतं शुद्धं साम्यम् .....।।"

(तं०आ०12,12)

~ शाक्तोपाये :— **देहघटादीनां परमेश्वरात्मकतयावलोकनाभ्यासो व्रतम्। एतेन सर्वथा परमेश्वरताभिमानो दृढीभवति।**

यथा—

"सर्वत्र सर्वदा निरुपाय परमेश्वराभिमानलाभाय परमेश्वरसमताभिमानेन देहस्यापि घटादेरप्यवलोकनं व्रतम्।"

(तं०सा०,पृ०,27)

~ शिवयोगिनः :— **स्वैरं प्रवर्तमानाः, कायवाङ्मानसाः स्नानपानाहारव्याहारादिव्यापाराः एव शिवयोगिनो व्रतम्, न पुनरनुशासनबहुलं किमपि।**

यथा—

"शिवतुल्यस्य योगिनः शिवाहम्भावेन वर्तमानस्य, शरीरे वृत्तिर्वर्तनं यत् तदेव व्रतम् ..... न पुनस्तस्य देहस्थितिव्यतिरिक्तं व्रतमुपयुक्तम्।"

(शि०सू०वृ०3,26)

श

श :— मातृकाक्रमे महामाया-स्थानीयो वर्णः, तस्य तत्क्रमे महामायाया वास्तविकस्य स्वरूपस्याभिव्यञ्जकत्वात्। यथा—

" तदूर्ध्वं शादि विख्यातं पुरस्ताद्ब्रह्मपञ्चकम्।"

(प० त्री०,7)

"शादि क्षान्तं महामायाविद्येश्वरसदाशिवशक्त्याख्यं तत्त्वपञ्चकम्।"

(प०त्री०पृ०,117)

अयं वर्णो मातृकोपासनक्रमे स्वात्मनः शक्तिविशेषं स्वात्मचिद्दर्पणे बहिर्मुखतया प्रतिबिम्बितं सतं प्रतिबिम्बरूपतया च महामाया तत्त्वात्मतकयाऽऽभासमानं सन्तं साधकस्य च स्वात्मानं तत्प्रतिबिम्बखचितसुन्दरं साक्षात्कारयत्यविकल्पमेवाहमिति।

शकारः :—

द्र०:- **'षट्त्रिंशत्तत्त्वदीक्षा'** (5) (स्व०तं०) इति।

शक्तयः :— पञ्चत्रिंशत्तत्त्वमयं सर्वमपि हि जगच्छिवस्य शक्तय एव बहिरभिव्यक्तिमापन्नाः प्रतिबिम्बन्यायतः। यथा—

"पञ्चत्रिंशतत्त्वी शिवनाथस्यैव शक्तिरुक्तेयम्।"

उद्धृ०:- (ई०प्र०वि०वि०,खं०3,पृ०,271)

~ अनन्ताः :— **परमेश्वरस्य शक्तयो नैव परिमितसंख्याकाः, अपि त्वनन्ताः, संख्यातुमशक्या एव। न तासामियत्ता कापि। यथाः—**

"संविन्नाथस्य महतो देवस्योल्लासिसंविदः।
नैवास्ति काचित्कलना विश्वशक्तेर्महेशितुः।।"

(तं०आ०5,39)

कलना = इयत्तायाः विचारणा इति।

~ अन्तरङ्गाः :— **शिवस्यान्तरतमस्वभावभूताः शक्तयः। ताश्च पञ्च। यथा—**

चिच्छक्तिः, आनन्दशक्तिः, इच्छाशक्तिः, ज्ञानशक्तिः, क्रियाशक्तिश्चेति।

"चिदानन्दाशंसाविदिकृतिमयीभावसुभगा,
कला धन्या कन्या जयकृतिरनन्या शिवगुरोः।" इति

(म०श०स्तो०,7)

आशंसाऽत्रेच्छा। विदिर्ज्ञानम्।

~ तत्त्वसमन्वयतः :— **चिदाद्याः पञ्चान्तरङ्गशक्तय एव बहिः प्रसरक्रमारम्भे शिवादीश्वरान्ततत्त्वरूपतयावभासन्ते। यथाः—**

"उक्तं हि–ज्ञानशक्तिमान् सदाशिवः, उद्रिक्तक्रियाशक्तिरीश्वर इति। अत एवेच्छाशक्तिमयः शिवो यावच्चित्स्वातन्त्र्यशक्तिमान् पर्यन्ते परमशिवः। अत्रान्तरे चौन्मुख्यनिर्वृत्यपेक्षयाधिकतत्त्वसम्भवः। तदस्तु, मा वा भूत, नैतदिह मुख्यवृत्त्या प्रतिपाद्यम्, अत एवाधिकशक्तिप्रदर्शने कृतेऽप्युक्तं "षट्त्रिंशत्तत्त्वरूपतां बिभ्रत्" इति।"

(शि० दृ० वृ०,पृ०,36-38)

पुनर्विश्लेषणेन संख्या वर्धते इति तात्पर्यं वृत्तिवाक्यस्य।

द्र०:- **'शक्तिपञ्चकम्'** इति।

~ पराः :— **शुद्धविद्यादिशक्त्यन्ताश्चतस्रः। यथा—**

"पञ्चत्रिंशत्तत्त्वी शिवनाथस्यैव शक्तिरुक्तेयम्।
तत्र चतस्रस्तु परा अन्त्यं वै पञ्चविंशकं स्थूलाः।।
मध्यास्तु सूक्ष्मरूपाः शक्तय इह साञ्जनास्तु परम्।"

उद्धृ०:- (ई०प्र०वि०वि०,खं०3,पृ०,271)

पराः शक्तय एव शुद्धविद्यादिशक्त्यन्तशुद्धतत्त्वात्मकतयाऽवभासन्ते इति।

~ बहिरभिव्यक्तौ :— **अनन्ता विश्वे हि भावा शिवस्य शक्तय एव तथा बहिरभिव्यक्ताः सत्योऽवभासन्ते। यथा—**

"अनन्ता विश्वे भावा हि तस्यैव शक्तय इत्युक्तम् स्वामिन.....इत्यत्र।"

(ई०प्र०वि०वि०,खं०3,पृ०,185)

स्वामिन इत्येष संङ्केतः सूत्रविशेषं प्रति। तच्चेदम्:—

"स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनम्।
अस्त्येव न बिना तस्मादिच्छामर्शः प्रवर्तते।।"

(ई०प्र०,1-5-10)

~ बहुप्रकाराः :— **बहुभेदभिन्नाः शास्त्रेषु तत्र-तत्रोक्ताः। यथा—**

"शक्तयश्च खेचर्याद्या वेच्छाया वा पराद्या वा, अघोराद्या वा, वामाद्या वा, ब्राह्माद्या वा अन्या वैष्णवशैव-सौर-बौद्धाद्युक्ता वा"

(स्पं०प्र०,पृ०,11)

बहुधा शक्तीनां विश्लेषणं कृतमाचार्यैरिति तात्पर्यम्।

~ सूक्ष्माः :— **सूक्ष्मरूपाः शिवशक्तयः मायादिकञ्चुकान्ताः। यथा—**

"मध्यास्तु सूक्ष्मारूपाः शक्तय इह साञ्जनास्तु परम्।।"

द्र०:- ~ 'पराः' इत्यत्रैव।

~ स्थूलाः :— **पुरुषप्रकृती आरभ्य धरान्ताः पञ्चविंशति- तत्त्वरूपाः।**

"..... अन्त्यं वै पञ्चविंशकं स्थूलाः।"

(उद्धृ०, तदेव)

आभासरूपतायामेव स्थूलाः इति बोध्यम्।

शक्तिः :— (1) परमेश्वरस्य परमेश्वरतैव तस्य शक्तिः। परमेश्वरस्यासौ स्वभावो येनाऽसौ सततमेव कृत्यपञ्चकं निभालयति। असौ हि तस्य विमर्शात्मिका स्पन्दरूपतैव। सृष्टयादिलीलात्मकस्तस्य विलसनरूपो नैसर्गिकः स्वभाव एव हि तस्य शक्तिः। इत्थं विश्वक्रीडात्मकः परमेश्वरस्य विलासो हि शक्तिः। यथा—

"सोऽयं विलास एवास्य शक्तिरित्युदितो बुधैः।
शिवशक्तिस्वरूपाभ्यां व्यवहाराय कल्पते।।"

(आ०वि०2,2)

द्र०:- (म०प्र०वि०,पृ०10,44; इति, अ०प्र०पं०9 इति च।)

(2) परमेश्वरस्य शिवस्यासौ स्वभावभूता विशेषता या तस्य परमेश्वरत्वं निर्वहति। सैव तस्य परमेश्वरता। तस्या एव बहिरभिव्यक्तिरूपं सर्वमपि जगत्, सर्वे च प्राणिनः, सर्वश्च बन्धमोक्षादिव्यवहारः, सृष्टिसंहारादिप्रपञ्चश्चेति। शक्तिः शक्तिमांश्चेति कथने एव भेदावभासः। न तयोर्वस्तुतो भेदः।

यथा—

"शक्तिश्च शक्तिमांश्चेति पदार्थद्वयमुच्यते।
शक्तयोऽस्य जगत् सर्वं शक्तिमांस्तु महेश्वरः।।"

(स०मं०आ०)

उद्ध०:- (प०सा०वि०,पृ०,10)

(3) नैव परं तत्त्वम्, शक्तिः।

यतोऽसौ निजाधाररूपतयाऽन्यं शक्तिमन्तमाक्षिपति, यथा बुद्धिर्बुद्धिमन्तम्। क्तिन्प्रत्ययान्तानां शब्दानां तथाविधादेव सामर्थ्यात्।

यथा—

"न हि स्वतन्त्रं शक्तिस्वरूपं भवितुमर्हति।"

(ई० प्र०वि०,खं०1,पृ०,275)

~ अकलस्य शिवस्य :— **स्फुटस्त्वातन्त्र्यात्मिका स्वतन्त्रेच्छा शिवस्य शक्तिः।**

यथा—

"स्वातन्त्र्यमात्रसद्भावा या त्विच्छा शक्तिरैश्वरी।
शिवस्य सैव करणं तया वेत्ति करोति च।।

(तं०आ०10,17)

"इच्छात्मिका स्फुटस्वातन्त्र्यात्मिका शिवस्य।"

(तं०सा०,पृ०,94)

~ अनेकाभिधाना :— **आगमेष्वनेकैर्नामभिः शक्तिरभिहिता।**

"पूर्णतैवास्य शक्तिः, कुलं, सामर्थ्यम्, ऊर्मिः, हृदयम्, सारं, स्पन्दः, विभूतिः, त्रीशिका, काली, कर्षणी, चण्डी, वाणी, भोगो, दृक्, नित्या, इत्यादिभिरागमभाषाभिस्तत्तदन्वर्थप्रवृत्ताभिरभिधीयते, तेन तेन रूपेण ध्यायिनां हृदि आस्तामिति।"

(तं०सा०,पृ०,27)

~ अभेदरूपा :— **नैवासौ शक्तिमतः कथमपि भिन्ना वस्तुतः। यथा—**

"प्रतिबिम्बे हि भेदोऽसन्नप्याभाति तावत्, शक्तौ तदपि नेति।"

(ई०प्र०वि०वि०,खं०3,पृ०,270)

~ अव्यतिरिक्ता :— **न शिवाद् व्यतिरिक्ता शक्तिः। शिव एव शिवताया उल्लासनप्रपञ्चे स्वयं शक्तिरित्युच्यते।**

यथा—

"व्यतिरिक्ता न चैवेषा कर्तृत्वं शक्तिरुच्यते।"

(ने०तं०21,40)

~ उच्चारयोगे :— **खदशके चतुर्थं खम्। मध्यमप्राणवाहिनी सुषुम्नाख्या नाडी।**

तदुक्तम्—

"शक्तिर्मध्यमप्राणवाहिनी।"

(तं०आ०वि०,खं०3,पृ०,404)

प्रमेयप्रमाणप्रपञ्चशून्यतैवास्या आकाशरूपतोक्ता।

~ कृशपूर्णरूपा :— **(1) जगतो बहिः सृष्टौ रिक्तप्राया कृशेति, जगतः स्वास्मिन् संहारे च पूर्णेति व्यपदिश्यते कैश्चित्।**

यथा—

"एषैव **(शक्तिः)** विश्वगतसृष्टिसंहारोपचारात् कृशपूर्णोभयरूपापि एकैव सर्वरहस्यनयेषु गीयते।"

(प०सा०वि०,पृ०,42)

द्र०:- **कृशाः— ~'देवी' इति।**

(2) अपरेण विचारेण तावच्छास्त्रचिन्तकाः विश्वोत्तीर्णां सतीं केवलचिन्मात्ररूपतया कृशां, विश्वरूपतायां च सकलब्रह्माण्डव्रातमयीं बहिर्विकसितां सतीं पूर्णामिति वदन्ति।

यथा—

"अन्तः शून्यो बहिरपि घटः शून्य एवाम्बरान्तः।
अन्तः पूर्णो बहिरपि तथा पूर्ण एवार्णवेऽस्ति।
एवं मातस्त्वमसि सततं शून्यपूर्णस्वरूपा
तत्त्वोत्तीर्णाऽप्यहमनुभवा तत्त्वरूपा त्वमेव।।"

(मं०क्रा०स्तो०,65)

शून्यत्वेन कृशत्वमभिप्रेतमत्र।

एष तावद् विचारो सिद्धान्तदृष्ट्या युक्तियुक्तः प्रतिभाति। साधनाक्रमानुसारं प्रकारान्तरेणापि कृशपूर्णताविचारः; तद्यथा—

कालीनयोपास्तेरभ्यासे शुद्धचिन्मयी कलनसामर्थ्यरूपा पराशक्तिश्चिन्मात्ररूपतया कृशाऽतीव सूक्ष्मा, द्वादशधा विश्वग्रसनशीलतया सर्वमात्मसात्कुर्वाणा च पूर्णा इति।

विचारभेदेन भावनाभेदेन च द्विप्रकारतयोक्ता कृशता पूर्णता चेति वेद्यं सुधीभिः।

द्र०:- **'कृशा':—** ~ 'देवी' इति।

'पूर्णा':— ~ 'देवी' **इति च।**

~ कृशा :— द्र०:- **'कृशा' :—** ~ 'देवी' इति।

~ कौण्डली त्रैशिरसे :— **स्वात्मनश्चिद्रूपताया यदुद्दीपनमुद्रेकोऽसौ कौण्डली शक्तिः।**

"एवं बुद्धायाः संविदः शक्तिदशायामुद्रेकः।"

(तं०आ०वि०,खं०12,पृ०,180)

"चिदुद्बोधः परावस्था दीपनं शक्तिरुच्यते।"

उद्ध०:- (तं०आ०वि०,खं०12,पृ०,180)

~ जीवरूपा :— **जीवरूपतयापि पारमेश्वरी शक्तिरेवावभासते सर्वत्र।**

यथा—

"श्री त्रिशिरोभैरवेऽपिः–
'जीवः शक्तिः शिवस्यैव सर्वत्रावस्थितापि सा।
स्वरूपप्रत्ययारूढा ज्ञानस्योन्मीलनाच्छिवा।।'
इति।"

उद्धः:- (ने०तं०उ०,खं०,2,पृ०,30)

~ ज्ञानक्रियारूपा :— **प्रकाशमयी सती ज्ञानात्मिका प्रकाशनात्मकसंरम्भरूपा सती च क्रियात्मिका। यथा—**

"वस्तुत एकैव ईश्वरस्य स्वभावप्रत्यवमर्शरूपा शक्तिः; सा संवेदनरूपत्वात् ज्ञानशब्देन उच्यते, तावन्मात्रसंरम्भरूपत्वात् क्रियाशब्देन चोच्छोष्यते।

(स्प०वि०,पृ०,42)

संरम्भोऽत्र सम्पादनानुकूलो यत्नः। एतेन ज्ञायते यज्ज्ञानस्य यत् सम्पादनं सापि जननात्मिका क्रियैव। तत एव जानाति, जानीतो, जानीषे, जानामीति वचनपुरुषलकारादि— योगो यः क्रियोचित एव सर्वथा।

~ तत्त्वसमन्वयतः :—

द्र०:- 'शक्तिपञ्चकम्' इति।

~ त्रिरूपा :— **परा, परापरा, अपरा चेति।**

यतः पारमेश्वरी शक्तिस्त्रिधा परमेश्वरत्वं निर्वहति— अभेदेन परदशायां, भेदाभेदाभ्यां परापररूपे विद्याक्षेत्रे, भेदेन चापरात्मके मायाक्षेत्रे, तदेषा त्रिरूपा। यथा—

"तिसृषु तावद् विश्वं समाप्यते। ययेदं शिवादिधरण्यन्तम् अविकल्प्यसंविन्मात्ररूपतया बिभर्ति च पश्यति च भासयति च परमेश्वरः सा अस्य श्रीपराशक्तिः। यथा च दर्पणहस्त्यादिवत् भेदाभेदाभ्यां सा अस्य श्रीपराशक्तिः। यया परस्परविविक्तात्मना भेदेनैव सा अस्य श्रीमदपराशक्तिः।"

(तं०सा०पृ०,28)

~ दूरान्तिकारूपा :— **परिपूर्णा शक्तिः परा। सा तु सर्वाः शक्तीराक्षिपन्ती सर्वशक्तिव्यापिका। अन्याः अपराः शक्तयः। तास्वपि बहुतरशक्तिव्यापिका अन्तिका, अल्पतरशक्तिव्यापिका च तदपेक्षया दूरा।**

यथा—

"तत्र काचित्पुनः शक्तिरनन्ता वा मिताश्च वा।
आक्षिपेद्भवतासत्त्वन्यायाद्दूरान्तिकत्वतः।।
तेन पूर्णस्वभावत्वं प्रकाशत्वं चिदात्मता।
भैरवत्वं विश्वशक्तीराक्षिपेद्व्यापकत्वतः।।
सदाशिवादयस्तूर्ध्वव्याप्त्यभावादधोजुषः।
शक्तीः समाक्षिपेयुस्तदुपासान्तिकदूरतः।।"

(तं०आ०1,207-209)

~ द्वादशरूपा :— **(1) पराशक्तिरपरा शक्तिः, परापरा चेति तिस्रोऽपि प्रत्येकं चतुर्विधा भवन्ति। ताश्च सृष्टौ, स्थितौ, संहारे, अनाख्ये च रूपे तथा-तथा भवन्ति। सङ्कलनया च ता द्वादश।**

यथा—

"परा परापरा चेयमपरा च सदोदिता।
सृष्टिसंस्थितिसंहारैस्तासां प्रत्येकतस्त्रिधा
चतुर्थं चानवच्छिन्नं रूपमासामकल्पितम्।"

(तं० आ०5, 25-26)

(2) परमेश्वरोऽभेदे भेदाभेदे भेदे चापि विश्वं पश्यति बिभर्ति च स्वशक्त्या। ततस्त्रिरूपाऽसौ शक्तिः, परा, परापरा, अपरा चेति। तिसृणां चासां समष्टिरूपा चतुर्थी। चतस्रोऽपि ताः सृष्टौ, स्थितौ संहारे च विश्वं बिभ्रतीति ता द्वादशा भवन्ति।

द्र०:- 'शक्तिचक्रम्' (1) इति।

प्रकारान्तरमेतच्छक्तीनां विश्लेषणस्य। प्रकारद्वयमप्ये-तद्भावनाङ्गतया-पयोगि ततो न मतभेदशङ्काऽत्र कार्या। भावनाया उभयथापि सम्भवात्।

~ पूर्णतात्मिका :— **परमेश्वरस्य या सृष्टयादिकृत्येषु स्वतन्त्रता तस्याः स्वतन्त्रतायाः परिपूर्णतैव तस्य शक्तिः।"**

"तत्र परमेश्वरः पूर्णसंवित्स्वभावः, पूर्णतैवास्य शक्तिः।"

(तं०सा०,पृ०,27)

~ पूर्णा :— **पारमैश्वर्यविलासमयतया बहिर्विकासमुपयाता पूर्णा। केवलचिन्मात्रतायामवतिष्ठन्ती च कृशेति।**

यथा—

"अस्यास्ति महती शक्तिरतिक्रान्तक्रमाक्रमा।
निःशेषनिजचिच्छक्तिचक्राक्रमणलम्पटा।
रिक्तारिक्तोभयाकाराप्यतैतद्रूपिणी परा।।"

(शि०सू०वा०व०,पृ०,5)

~ प्रणवकला :— **शब्दात्मकताप्रशान्तौ आह्लादात्मकताया उन्मेषदशारूपा शक्तिर्नाम प्रणवकला।**

यथा—

"प्रशान्तौ तु ह्लादात्मस्पर्शव्याप्त्युन्मेषरूपा शक्तिः।"

(वि०भै०उ०,पृ०,5)

सा च कौण्डली शक्तिरित्युच्यते। तल्लक्षणं च त्रिशिरोभैरवे "चिद्रूपताया उद्दीपनम्" इत्युक्तम्।

"चिदुद्बोधः परावस्था दीपनं शक्तिरुच्यते।।"

(तं०आ०वि०,खं०12,पृ०,180)

परावस्थाऽत्र नादान्तः। चितो दीपनं च कौण्डली शक्तिरिति तात्पर्यम्।

~ प्रलयाकलस्य :— **प्रलयाकलस्य शक्ती अस्फुटाऽशुद्धविद्या तथाभूता च कला।**

यथा—

"प्रलयाकलस्य तु ते एव निर्विषयत्वादस्फुटे।"

(तं०सा०,पृ०,93)

"लयाकलस्य मानांशः स एव परमस्फुटः।।"
(तं०आ०10,13)

स एवेति "विद्याकलात्मक" इति।

~ बहुप्रकाराः :— **शक्तयोबहुप्रकाराः शास्त्रेषु तत्र-तत्रोक्ताः।**

तद्यथा—

"शक्तयश्च खेचर्याद्या वेच्छाद्या वा, पराद्या वा, अघोराद्या वा, वामाद्या वा, ब्राह्मया वा, अन्या वैष्णवशैवसौरबौद्धाद्युक्ता वा।"
(स्पं०प्र०,पृ०,11)

बहुधा शक्तीनां वर्गीकरणं कृतमाचार्यैरिति तात्पर्यम्।

~ बाह्यस्था :— कौले :— **कौलिके दूतीयागे दूतीत्वेन नियोज्या काचन स्त्री शक्तिरित्युच्यते। यथा—**

"साकं बाह्यस्थया शक्त्या यदा त्वेष समर्चयेत्।"
(तं०आ०29,96)

~ मन्त्रमहेश्वरस्य :— **पूर्णस्वातन्त्र्यभावं प्राप्तुं समुन्मुखी शुद्धविद्या मन्त्रमहेश्वरस्य शक्तिः। यथा—**

"सैव **(शुद्धविद्यैव)** इच्छाशक्तिरूपतां स्वातन्त्र्यस्वभावां जिघृक्षन्ती मन्त्रमहेश्वरस्य (शक्तिः)।"
(तं०सा०,पृ०,94)

"..... तत्संस्कारविवर्जिता।
मानं मन्त्रमहेशानां करणं शक्तिरुच्यते।।"
(तं०आ०10,16)

~ मन्त्रस्य :— **प्रबुध्यमाना शुद्धविद्या मन्त्रस्य शक्तिः। तस्यामशुद्धविद्याकलयोः ध्वंसस्य यः संस्कारस्तस्य शेषता तिष्ठति।**

यथा—

"प्रबुध्यमाना शुद्धविद्या मन्त्रस्य।"
(तं०सा०,पृ०,94)

"अशुद्धविद्याकलनाध्वंससंस्कारसङ्गता।
प्रबुभुत्सुः शुद्धविद्या मन्त्राणां करणं भवेत्।।"
(तं०आ०10,14-15)

~ मन्त्रेशस्य :— **विद्याकलासंस्कारयुता प्रबुद्धा शुद्धविद्या मन्त्रेश्वरणां शक्तिः।**

यथा—

"तत् संस्कारहीना सैव प्रबुद्धा मन्त्रेशस्य।"
(तं०सा०,पृ०,94)

"प्रबुद्धा शुद्धविद्या तु तत्संस्कारेण सङ्गता।।
मानं मन्त्रेश्वराणां स्यात् .....।"
(तं०आ०10,15-16)

~ मातृकासु :—**क्वचित् कदाचित क्-ष्- संयोगजः क्षकारः मातृकाक्रमे शक्तिरित्युच्यते। क्षवर्णस्य तत्क्रमे शक्तितत्त्वाभिव्यञ्जकत्वात्।**

तदुक्तम् :—

"शक्तिः क्ष एव सः .....।"
(पू०प्र०2,100)

"शक्तिरते क्षकारः स्यादित्युक्तं तु पुरा मया।।"
(पू०प्र०2,103)

~ विज्ञानाकलस्य :— **विगलत्कल्पाऽशुद्धविद्या, तथभूता च कला विज्ञानाकलस्य शक्ती।**

यथा—

"विज्ञानाकलस्य ते एव विगलत्कल्पे।"
(तं०सा०,पृ०,94)

ते इति विद्याकले। यथा—

"ज्ञानाकलस्य मानं तु गलद्विद्याकलावृत्ति।"
(तं०आ०10,14)

~ शिवस्वभावभूता :— **स्वभावतः एव शिवः समस्तशक्त्येकघनः।**

यथा—

"शिवस्वभावैव शक्तिः न वस्त्वन्तरम्, इत्येकमेव शिवव्यपदेश्यं शक्तिव्यपदेश्यं च वस्तुतत्त्वं नापूर्वं किञ्चित्।"
(म०प्र०वि०,पृ०,44)

~ शिवाभिन्ना :— **सुस्पष्टीकरणप्रयोजनाय कथनमात्रेण शक्तिः शक्तिमांश्चेति द्वौ पदार्थौ, परं वस्तुतः उभयमेकात्मकमेव।**

यथा—

"न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी।।
शिवः शक्तस्तथा भावानिच्छया कर्तुमीहते।
शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते।।"
(शि०दृ०3,2-3)

"न हिमस्य पृथक् शैत्यं नाग्नेरौष्ण्यं प्रथग्भवेत्।"
(तदेव,3,6)

"शक्तिश्च शक्तिमद्रूपाद् व्यतिरेकं न वाञ्छति।
तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव।।"
(बो०पं०द०,3)

द्र०:- (म०प्र०वि०,पृ०,44) **च।**

~ सकलस्य :— **तत्र सकलस्य शक्ती सामान्यरूपा अशुद्धविद्या कला चापि तथाविद्या।**

"तत्र सकलस्य विद्याकले शक्ती।"
(तं०सा०,पृ०,93)

"सकलस्य प्रमाणांशो योऽसौ विद्याकलात्मकः।
सामान्यात्मा स शक्तित्वे गणितो नतु तद्भिदः।।"
(तं०अ०10,12-13)

~ सप्तप्रमातृगता :— **शिवादिसकलान्तानां प्रमातृवर्गाणां सप्तविधा शक्तयः पृथक्-पृथगुक्तास्तत्र-तत्र दृष्टव्याः।**

शक्तिकर्तृत्वम् :— सर्वं शुद्धाशुद्धादिरूप व्यवहारं तु वस्तुतः पारमेश्वरी शक्तिरेव करोति कारयति चेति सिद्धान्तः।

यथा—

"उक्तं श्रीयोगसंचारे तथाहि परमेशिना।।
चतुर्दशविधे भूते पुष्पे धूपे निवेदने।
दीपे जपे तथा होमे सर्वत्रैवात्र चण्डिका।।
जुहोति जपति प्रेद्धे पूजयेद्विहसेद् व्रजेत्।
आहारे मैथुने सैव देहस्था कर्मकारिणी।।"

(तं० आ०15,391-393)

अत्र प्रेद्धेऽग्नौ जुहोतीति भवेदन्वयः।

शक्तिकुण्डलिनी :— (1) स्वात्ममात्रविश्रान्ताऽऽनन्दैकघना परा शिवशक्तिः। मातृकाक्रमे आकारात्मकेन वर्णेन व्यङ्ग्या। पञ्चकृत्यक्रीडानिभालनपरैषैव तस्य शिवत्वनिर्वाहिका सती मूलतः परसंवित्स्पन्दमय्येव।

यथा—

"बहिर्भावौन्मुख्येन विरहिता सती प्रसुप्तभुजगाकारत्वात् स्वात्ममात्रविश्रान्ता शक्तिकुण्डलिनी–परा संविन्मात्ररूपेति यावत्।"

(तं०आ०वि०,खं०2,पृ०,142)

(2) बहिर्भावौन्मुख्यप्रस्पन्दनात् प्रागवस्थायां वर्तमाना चिच्छक्तिरकारविमर्शात्मिका, लिपिरूपतावाप्तेः प्रागेव सुतरां देदीप्यमाना सप्तदशी अमाख्या शुद्धचिद्रूपिणी कला, या शिवस्य विसर्गशक्तिरितिविसर्गात् प्राग्भाविनी स्वरूपसंङ्कुचिता पराशक्तिरिति चोक्ता।

यथा—

"कला सप्तदशी तस्मादमृताकाररूपिणी।
परापरस्वस्वरूपबिन्दुगत्या विसर्पिता।।
प्रकाश्यं सर्ववस्तूनां विसर्गरहिता तु सा।
शक्तिकुण्डलिका चैव .....।।"

(तं० आ०3,138-139)

"सैव पुनर्विसर्गेण—बहिर्भावौन्मुख्येन विरहिता सती, प्रसुप्तभुजगाकारत्वात् स्वात्ममात्रविश्रान्ता शक्तिकुण्डलिनी परासंविन्मात्ररूपेति यावत् .....।"

(तं०आ०वि०,खं०2,पृ०,142)

(3) परमेश्वरस्य परा मायाख्या शक्तिः। सा शक्तिर्ययाऽसौ विश्वं बिभर्ति।

यथा—

"कर्मरूपा स्थिता माया यदधः शक्तिकुण्डली।"

(तं० आ०8,404)

"शक्तिकुण्डलीति, अशेषस्य विश्वस्य स्वतादात्म्येन गर्भीकारात्।"

(तं०आ०वि०,खं०5,पृ०,263)

शक्तिचक्रम् :— (1) परमेश्वरो याभिः शक्तिभिर्विश्वं अभेद-भेदाभेद-भेदभूमिकासु धारयति ता अस्य तिस्रः शक्तयः परा, परापरा, अपरा, च देव्यः। तासामाधारभूता समष्टिरूपा पराया अपि परतरा पूर्णा पारमेश्वरी शक्तिः। ताश्चतस्रो विश्वं सृष्टौ, स्थितौ, संहृतौ च धारयन्त्यो द्वादशतामुपयान्ति। तासामेव समूहेन संविद्रूप आत्मा परिवृत्तो वर्तते। असौ शक्तिसमूह एव हि शक्तिचक्ररूपं कालीचक्रम्, विश्वस्य कलनाकरत्वात्।

यथा—

"ययेदं शिवादिधरण्यन्तमविकल्प्यसंविन्मात्ररूपतया बिभर्ति च पश्यति च भासयति च परमेश्वरः सास्य श्री पराशक्तिः। यया च दर्पणहस्त्यादिवत् भेदाभेदाभ्यां सास्य श्री परापराशक्तिः। यया परस्परविविक्तात्मना भेदेनैव सास्य श्रीमदपरा शक्तिः। एतत् त्रिविधं यया धारणमात्मन्येव क्रोडीकारेणानुसन्धानात्मना ग्रसते सास्य भगवती श्री परैव श्रीमन्मातृसद्भाव-कालकर्षिण्यादिशब्दान्तरनिरुक्ता। ता एताश्चतस्रः शक्तयः स्वातन्त्र्यात् प्रत्येकं त्रिधैव वर्तन्ते। सृष्टौ, स्थितौ, संहारे चेति द्वादश भवन्ति।"

(तं०सा०,पृ०,28-29)

(2) आसामसंख्यप्रकारात् परस्परमिश्रणाच्छक्ति-चक्रमसंख्यप्रकारतामुपयाति।

यथा—

"द्वादशारमिदं चक्रं सर्वदा परिवर्तते।
यस्यैताः स्थूलमात्रत्वं मासराश्यादिसम्पदः (संविदः)।।
अक्रमक्रमवशाद्द्विशस्त्रिशो
भूरिशोऽथ विविधैः क्रमाक्रमैः।
चक्रमेतदुदितं विजृम्भते
मेयमानमितिमातृभक्षकम्।।"

(मा० वि०, वा०1,941-942)

भक्षणमत्र स्वात्मसात्करणम्।

(2) अन्यापदेशेन किञ्चिद्विस्तरतः प्रकटीकृतमाचार्याभिनवगुप्तपादैः।

"ईश्वरस्य विश्वपरामर्शविग्रहत्वेन शब्दराशिशरीरस्य या मायाख्या शक्तिर्निजस्वभावविश्रमणात्मकपारमैश्वर्योपरोधप्रयोजना तत्तद्ब्राह्मयादिदेवताचक्राधिष्ठितवर्गाष्टकमयी, तत एव ककारादिवर्णगतव्याससमासवैचित्र्यशतसहस्रगर्भतयाऽष्टाष्टक-भेदसहस्रवैचित्र्यविचित्रा, तत एव प्राणापानादिप्रेङ्खारोहणचञ्चला क्षणमप्येकत्ररूढिमनासादयन्ती, मित्रमिदं शत्रुरयमित्येवमादिकं विकल्पनं यया क्रियते।"

(ई०प्र०वि०वि०,खं०3,पृ०,381)

~ त्रिवर्गकम् :— **ब्राह्मीमाहेश्वरीप्रभृतीनामष्टसंख्यानां मातृणां येऽवान्तरशक्तिव्रातास्तेषां त्रयो वर्गाः अघोर-घोर-घोरतराख्याः। ते च प्रतिप्राणिसंलग्नाः मातरः प्रमातॄन् भोगमोक्षादिव्यवहारेषु योजयन्ति, तत्राघोराः शक्तयो मोक्षमार्गं प्रति प्रेरयन्ति प्राणिनो; घोरतराश्चाज्ञानान्धकूपेषु तान् प्रक्षिपन्ति; घोराः पुर्नमध्ये संस्थापयन्ति, जीवनसुखदानेन रोधयन्ति संसृतिमध्य एव।**

यथा—

"कवर्गादिषु माहेश्वर्याद्याः पशुमातरः"
(शि०सू०3,19)

"माहेश्याद्यष्टकं तत्र परापरफलप्रदम्।।
अधिष्ठाय पशूनां च बाह्यार्थावगमे स्थितम्।
मिश्रकर्मफलासक्तिजनकं घोरलक्षणम्।।
विषयासक्तचित्तानामधोऽधः पातकारकम्।
घोरघोरतरं तत्स्यादघोरं शिवदायकम्।।
एवं मात्राष्टकं चैतत्प्रतिवर्गं त्रिभेदवत्।"
(शि०सू०वा०,भा०,पृ०,61)

~ देवात्मकम् :— **जगद्व्यवहारसञ्चालनरताः खेचरीप्रभृतयः शक्तिव्राताः।**

यथा—

"खेचरी गोचरी चाऽथ दिक्चरीभूचरीभिदा।
परादि भारतीसंस्थं शक्तिचक्रं चतुर्विधम्।।" इति।
(स्पं०प्र०,पृ०,11)

~ भावनाभ्यासे :— **तिस्रः शक्तपः प्रत्येकं चतुर्विधतया भाविताः सत्यो द्वादशतां यान्ति। ताश्च संविज्ज्वलनस्य ज्वाला इव तं परिवृत्य चक्रवदवस्थिता भावनीया भवन्ति।**

यथा—

"एवं द्वादश ता देव्यः सूर्यबिम्बवदास्थिताः।"
(तं०आ०5,26)

~ मुख्यम् :—**षण्ठवर्णवर्जमकारादिविसर्गान्तस्वरवर्ण-द्वादशकमेव द्वादशकाल्यात्मकं मुख्यं शक्तिचक्रम्।**

यथा—

"आसामेव समावेशात्क्रियाशक्तितयोदितात्।।
संविदो द्वादश प्रोक्ता यासु सर्वं समाप्यते।
एतावद्देवदेवस्य मुख्यं तच्छक्तिचक्रकम्।।
एतावता देवदेवः पूर्णशक्तिः स भैरवः।"
(तं०आ० 3, 250-252)

"इयदेव च मुख्यं शक्तिचक्रम् अत्रैवोक्तवक्ष्यमाणनीत्या शक्त्यन्तराणामन्तर्भावात्।"
(तं०आ०वि०,खं०2,पृ०,234)

शक्तितत्त्वम् :— (1) परमेश्वरस्य परमेश्वरतायाः बहिरवभासनं प्रति विजृम्भाया आरम्भ एव शक्तितत्त्वम् वस्तुतस्तादृशविजृम्भादृष्ट्या विचार्यमाणं परतत्त्वमेव हि शक्तितत्त्वम्।

यथा —

"भगवत्परमशिवविजृम्भारूपात् शक्तितत्त्वादेवारभ्य सदाशिवेश्वरविद्याभूमिषु .....।
(ई०प्र०वि०वि०,खं०1,पृ०,90)

(2) शिवतत्त्वमेव किञ्चिदुच्छूनतां प्रत्यौन्मुख्यस्य विचारेण—शक्तितत्त्वमित्युच्यते।

यथा—

"शिव एव शक्तिस्वभावः कथितः। तस्यैव किञ्चिदुच्छूनतावस्थायां शक्तिशब्दव्यपदेशः।"
(म०मं०प०,पृ०,38)

"यदा स्वहृदयवर्तिनमुक्तरूपमर्थतत्त्वं बहिः कर्तुमुन्मुखो भवति, तदा शक्तिरिति व्यवह्रियते। औन्मुख्यं च तदिच्छया ज्ञानेन क्रियया च भवति।"
(तदेव,पृ०,39)

(3) बहिर्मुखीभावमापन्ना पारमेश्वरी इच्छैव शक्तितत्त्वम्।

यथा—

"इच्छैव सा परिम्लाना शक्तितत्त्वमुदञ्चयन्।।
(अ०प्र०पं०,19)

द्र०:- (पं०प्रा०,पृ०,6-7)**इति।**

तथा (प०सा०वि०,पृ०,42) **इति च।**

~ नरशिवमयम् :— **शक्तितत्त्वमपि वस्तुत एकतः शिवात्म- कम्, अपरतश्च नरात्मकम्। शक्तेः शिवाभिन्नत्वान्नरतत्त्वस्य च शक्तिरूपतया तदन्तःस्थितत्वात्। ततः शक्तित्त्वस्य प्राधान्यादेव तथा व्यपदेशो मन्तव्यः।**

द्र०:- 'नरतत्त्वम्' इति।

~ त्रिरूपः— (प्रणवकलासु) :— **प्रणवोपासनाक्रमे शक्तित्त्वं कुण्डली-व्यापिनीसमनाख्यैस्त्रिभीरूपैर्भावना विषयतामेति। यथा —**

'कुण्डली'

'..... तदूर्ध्वं शक्तिकुण्डली।'

इति वचनाच्छक्तिः। यथायथमावरणविगमाच्च 'शान्तं' व्यापिन्याः, **'प्रशान्तं'** समनाया रूपम्।

.....

परमेश्वरस्य हि स्वातन्त्र्याख्या समवायिनी शक्तिरेव समनादिनेच्छादिना चान्तर्बहीरूपेण त्रैरूप्येण प्रस्फुरन्ती सती षट्चक्रं शक्तितत्त्वमित्युक्तम्।"
(तं०आ०वि०,खं०7/2,पृ०,23-24)

~ शक्तिमदभिन्नम् :— **शक्तेः फलानां भेदेन हेतुना शक्तिभेदाः। शक्तेः फलप्रदत्वेन लक्षणया शक्तिमतः सकाशादारोपितमात्र एव भेदः, न वस्तुतः, शक्तिशक्तिमतोरभेदात्।**

यथा—

"सा च पदार्थस्यात्मैव, किन्तु व्यापारभेदादारोपभेदो, यदाहुः

'फलभेदादारोपितभेदः पदार्थात्मा शक्तिः।"

उद्धृ०:- (तं०आ०वि०,खं०6,पृ०,63)

शक्तित्रयम् :— ~ अन्तरङ्गम् :— इच्छा-ज्ञान-क्रियात्मकं परमेश्वरता-निभालना-साधनभूतं शक्तित्रिकम्। तत्रेच्छा शक्तिरसौ यया निरावरणतया शिवत्वेन भाति परमेश्वरः। ज्ञानशक्त्या त्वंशतया निरावरणं तथाऽशंतश्चावृततया भात्यसौ। क्रियाशक्तिविकासवशेन च पशुभूमिमवतीर्णः सन्नसावावृत- निजस्वभावतया भाति।

यथा—

"निरावरणमाभाति भात्यावृतनिजात्मकः।
आवृतानावृतो भाति बहुधा भेदसङ्गमात्।।
इति शक्तित्रयं नाथे स्वातन्त्र्यापरनामकम्।
इच्छादिभिरभिख्याभिर्गुरुभिः प्रकटीकृतम्।।"

(तं०आ०1,93-94)

वस्तुतो विश्वमेव शिवशक्त्यात्मकं सच्छक्तिरूपमेव। तत्र तेन तेनाभिप्रायविशेषेण तस्य तस्य शक्तित्रयस्य गणना शास्त्रीये व्यवहारे परम्परागता सती तन्त्रालोकादौ प्रतिपादितेति नात्र विरोधः आशङ्कनीयः सुधीभिः।

~ अन्यथा :— **तच्च ज्ञान-क्रिया-मायाख्यम् इति। यथा—**

विश्वरूपस्य भगवतः स्वरूपभूत एव विश्वत्रयः प्रकाशो यश्च विमर्शः, ते तावज्ज्ञानक्रिये स्वरूपपरामर्शापरित्यागेनैव तु यद्भिन्नतयापि विमर्शनं स्वरूपपरामर्श एव विश्रान्तम्—अहमिदमिति सदाशिवेश्वरपरमार्थं सा भगवतो मायाशक्तिः, ताः एतास्तिस्रः शक्तयो भगवति नैसर्गिक्यो दृष्टाः।"

(ई०प्र०वि०,खं०2,पृ०,254-255)

एतेनैतद्विज्ञायते यत् प्रकाशरूपता भगवतो ज्ञानं विमर्शात्मकसंरम्भरूपता तस्य क्रिया। तस्यैव याऽसौ स्वभावभूता भेदावभासोन्मुखता, यद्वशात्। सदाशिवभुवि प्रमेयांशस्यावभासः, सा भगवतो मायाशक्तिः परैषा मायाशक्तिरसम्भवस्यापि सम्भवत्वकारिणी।

~ उच्चारयोगे :— **इच्छाज्ञानक्रियाः। खदशके चरमं खत्रयम्।**

यथा—

"शक्तित्रयम् :— (1) द्रष्टृपरक्ता ज्ञानशक्तिः, (2) दृश्योपरक्ता क्रियाशक्तिः, (3) तद्विवर्जितेच्छाशक्तिः।"

(तं०आ०वि०,खं०3,पृ०,404-405)

~ गुणत्रयबीजम् :— **परमेश्वरस्था ज्ञानशक्तिः पशुभूमौ जीवस्य सत्त्वगुणः, एवं तस्य क्रियाशक्तिरत्र रजोगुणो मायाशक्तिश्च तमोगुण इति गुणत्रयस्य बीजानि परमेश्वरस्य शक्तित्रये निहितानि। यथा—**

"स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
मायातृतीये ते एव पशोः सत्त्वं रजस्तमः।।"

(ई०प्र०,4-1-4)

~ तत्त्वभेदने :— **तत्त्वभेदनदृशा तुर्यसंवित् परमेश्वरस्य (1) पराशक्तिः सुषुप्तिः, (2) परापरा, जाग्रत्स्वप्नश्च, (3) अपरेति। यथा—**

"जाग्रदाद्यपि देवस्य शक्तित्वेन व्यवस्थितम्।।
अपरं परापरं च द्विधा तत्सा परात्वियम्।"

(तं०आ०10, 272-273)

"इयं तु तुर्यात्मा संवित्परा तेन जाग्रत्-
स्वप्नावपरा, सुषुप्तं परापरा, तुर्यं च परा।'

(तं०आ०वि०,खं०7,पृ०,185)

नेदं व्याख्यानं निःसंशयतः शङ्कारहितमिति विचार्यं सुधीभिः। द्विधेति पदस्यान्वयेऽत्र संशयः।

~ बुद्धिध्याने :— **प्रमातृ-प्रमाण-प्रमेयाख्यं त्रयं बुद्धिध्याने परा, परापरा, अपरा चेति शक्तित्रयम्। यथा—**

"परा परापरा चेयमपरा च सदोदिता।।"

(तं०आ०5,25)

शक्तित्रिशूलम् :— इच्छाज्ञानक्रियात्मकं तदन्तरङ्ग-शक्तित्रयं यत्प्रसरतः परमेश्वरः कृत्यपञ्चकं सम्पादयति।

यथा—

"इष्यत इति वेद्यत इति सम्पाद्यत इति च भास्वरूपेण।
अपरामृष्टं यदपि तु नभः प्रसूनत्वमभ्येति।।
शक्तित्रिशूलपरिगमयोगेन समस्तमपि परमेशे।
शिवनामनि परमार्थे विसृज्यते देवदेवेन।।"

(प०सा०,44-45)

"जयमूर्त्तत्रिशक्त्यात्मशितशूलोल्लसत्कर।
जयेच्छामात्रसिद्धार्थपूजार्हचरणाम्बुज।।"

(शि०स्तो०14,4)

द्र०:- (अनु०प्र०पं०,45) **इति।**

शक्तिदशा :— दर्शनसिद्धान्तदृष्ट्या शक्तितत्त्वदशा परमेश्वरस्येच्छाशक्तेरेव बहिरभिव्यक्तिरूपा। यतो ज्ञानशक्तिः स्फुटं सदाशिवरूपिणीत्युक्ता क्रियाशक्तिश्चेश्वरात्मिका। तत एवेच्छाशक्तिः शक्तितत्त्वमयीति सिद्धयति। एष एव सिद्धान्तः शिवदृष्टौ। परं योगाभ्यासे यदाशक्तितत्त्वं भावनाभ्यासालम्बनतां नीयते तदा तदुपरिवर्तिन्याऽऽनन्द-शक्त्याऽभिन्नमेव तद् भाव्यते, इच्छाशक्तेरानन्दशक्तावेव यतो बीजरूपतयावस्थानम्। एतया दृष्ट्या तन्त्रालोकतन्त्रसारादौ साधनाङ्गत्वेन शक्तिदशाऽऽनन्दशक्तिमयी सदाशिवदशा चेच्छाशक्तिमयी तथेश्वरतन्वदशा ज्ञानशक्तिमयीति प्रतिपादितम्। सोऽयं दृष्टिभेद एव, न मतभेदः इति बोध्यम्।

द्र०:- (तं०आ०9,50-51),
(तं०सा०पृ०,74)

तथा (ष०त्रिं०त०सं०वि०,पृ०,3) **इति।**

शक्तिद्वादशान्त :— कौण्डिलीति परिभाषितो द्वादशान्तः।

यथा—

"कौण्डिली शक्तिद्वादशान्तः।"

(तं०आ०वि०,खं०3,पृ०,460)

कथमसौ द्वादशान्त इति गण्यते इति न स्पष्टीकृतं जयरथेन। ततः संशयित एवायं विषयः।

शक्तिपञ्चकम् :— (1) चिच्छक्तिः, आनन्दशक्तिः, इच्छाशक्तिः, ज्ञानशक्तिः, क्रियाशक्तिश्चेति।

तदुक्तम्ः —

"चिदानन्देच्छाज्ञानक्रियालक्षणमेव हि शक्तिपञ्चकम्।"

(ई०प्र०वि०वि०,खं०2,पृ०,303)

अन्तरङ्गमेतच्छक्तिपञ्चकं परमेश्वरस्य।

यथा—

"तस्य च स्वातन्त्र्यमानन्दशक्तिः, तच्चमत्कार इच्छाशक्तिः, प्रकाशरूपता चिच्छक्तिः आमर्शात्मकता ज्ञानशक्तिः। सर्वाकारयोगित्वं क्रियाशक्तिः।"

(तं०सा०,पृ०,6)

(2) मूलभूतं हि परमशिवाख्यं तत्त्वं चिच्छक्त्येकघनम्। चितः स्वभावो ह्यानन्दः। आनन्दस्योच्छलनस्वभावतैवेच्छा। ततश्चिदानन्देच्छाख्यं शक्तित्रयं परमशिवे एवौतप्रोतत्वेन स्थितम्। शिष्यजनावबोधनार्थमाचार्यैस्त्रिधा तस्य परस्य तत्त्वस्योपदेशः कृतः शास्त्रेषु। तद्यथा —विश्वोत्तीर्णत्वेन परमः शिवश्चिदेकघनः इति। विश्वोल्लासनमूलभूतस्यानन्दमयत्वस्य दृष्ट्या य एव शिवतत्त्वयोपदिश्यते। विश्वोल्लासनं प्रति याऽसावानन्दस्योच्छलत्तात्मिकेच्छा तदावेशप्राधान्यदृष्ट्या परमशिव एव शक्तिरित्युपदिश्यते। तेन शास्त्रीये व्यवहारे परमशिवश्चिच्छक्तिप्रधानः, शिवतत्त्वमानन्दशक्तिप्रधानम्, शक्तितत्त्वं चेच्छाशक्तिप्रधानम्। इच्छैव बहिर्मुखतया समुच्छलन्ती यदा चित्प्रकाशस्यान्तरेव स्रष्टव्यस्य प्रमेयतत्त्वस्यातीत ध्यामल—

याभासनं करोति तदा सदाशिवतत्त्वोदयः। प्रमेयस्यावयासमात्रकारित्वेन तत्तत्त्वं ज्ञानशक्तिप्रधानमिति स्वीक्रियते। प्रमेयस्य यदग्रे स्फुटमवभासनं तदेव तस्यान्तर्निर्माणम्। तदिदं चित्प्रकाशस्यान्तरेव यत् प्रमेयांशस्य तथाभूतं स्फुटमवभासनं यदपेक्षया प्रमातृप्रकाशो गुणीभूततामिवापाद्यते, यदेव च ततः प्रमेयनिर्माणमित्युच्यतेऽसौपरमेश्वरस्य क्रियाशक्तिर्या तावदीश्वरतत्त्वस्थितौ स्फुटमभिव्यक्ता भवति। तदिमाश्चिदानन्देच्छाज्ञानक्रियाभिधानाः परमेश्वरस्यान्तरङ्गाः शक्तयः तस्य शक्तिपञ्चकम्।

(3) तन्त्रालोकादौ साधनानुकूलतायाः दृष्ट्याऽऽसां पञ्चशक्तीनां तत्त्वैः साकं मेलनं क्रमेण शिवादिविद्यान्ततत्त्वपञ्चकेन कृतम्। यतः परमशिवमयी चिच्छक्तिरेव सृष्टिक्रमेऽग्रे प्रसरन्ती शिवतत्त्वतयोपदिश्यते, ततः शिवश्चिच्छक्तिमयतयोच्यते। एवमेव शक्तितत्त्वं तन्मूलभूतयाऽऽनन्दशक्त्या समन्वयविषयतां नीयते भावनया। तथैव सदाशिवेश्वरौ तन्मूलभूताभ्यामिच्छाज्ञानशक्तिभ्यां शुद्धविद्यातत्त्वं च तथैव क्रियाशक्त्या समन्वितं सद्भावनाभ्यासविषयतां नीयते। इति दृष्टिभेदकृतोऽयं द्विप्रकारकस्तत्त्व-शक्ति-समन्वयः, न विरोधावहो वस्तुतः।

तेन सिद्धान्तदृष्ट्या— चित् = परमशिवः; आनन्दः = शिवतत्त्वम्; इच्छा = शक्तितत्त्वम्; ज्ञानं = सदाशिवतत्त्वम्; क्रिया = ईश्वरतत्त्वम्। यथा—

"आत्मैव सर्वभावेषु स्फुरन्निर्वृतचिद्विभुः।
अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः।"

(शि०दृ०1,2)

"तदेवं प्रसृतो देवः कदाचिच्छक्तिमात्रके।।
बिभर्ति रूपमिच्छातः कदाचिज्ज्ञानशक्तितः।
सदाशिवत्वमुद्रेकात्कदाचिदैश्वरीं स्थितिम्।।"
क्रियाशक्तिसमाभोगात् .....। इति।"

(तदेव, 29-31)

"अथास्माकं ज्ञानशक्तिर्या सदाशिवरूपता।"

(तदेव,2,1)

(4) भावनाभ्यासदृष्ट्या च— चिन्मयं शिवतत्त्वम्, आनन्दमयं शक्तितत्त्वम्, इच्छामयं सदाशिवतत्त्वम्, ज्ञानशक्तिमयमीश्वरतत्त्वम्, क्रियाशक्तिमयं च शुद्धविद्यातत्त्वम्।

यथा—

"चित्प्राधान्ये शिवतत्त्वम्, आनन्दप्राधान्ये शक्तितत्त्वम्, इच्छाप्राधान्ये सदाशिवतत्त्वम्, इच्छाया हि ज्ञानक्रिययोः साम्यरूपाभ्युपगमात्मकत्वात्; ज्ञानशक्तिप्राधान्ये ईश्वरतत्त्वम्, क्रियाशक्तिप्राधान्ये विद्यातत्त्वमिति।"

(तं०सा०,पृ०,74)

"चिदानन्देषणाज्ञानक्रियाणां सुस्फुटत्वतः।।
शिवशक्तिसदेशानविद्याख्यं तत्त्वपञ्चकम्।"

(तं०आ०9,50-51)

स्फुटत्वमग्रे प्रसरणेन विकासरूपत्वं बहिर्मुखत्वमिति ज्ञेयम्।

द्र०:- (प० सा०,14) **इति।**

(5) वस्तुतः एकैव परा पारमेश्वरी शक्तिः स्वस्वातन्त्र्यादात्मानमनेकधाऽऽभासयन्ती तत्तदाभासात्मकफलभेदादनेकैर्नामभिर्व्यपदिश्यते शास्त्रे। तत्र मुख्याः पञ्चशक्तयो अन्तरङ्ग इति वेद्यम्। यथा—

"या सा शक्तिर्जगद्धातुः कथिता समवायिनी।
इच्छात्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते।।
सैकापि सत्यनेकत्वं यथा गच्छति तच्छृणु।
एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम्।।
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते।
एवंभूतमिदं वस्तु भवत्विति यदा पुनः।।
जाता तदैव तत्तद्वत्कुर्वत्यत्र क्रियोच्यते।
एवं सैषा द्विरूपापि पुनर्भेदैरनेकताम्।।
अर्थोपाधिवशाद्याति चिन्तामणिरिवेश्वरी।"

(मा०वि०तं०3,5-9)

~ योगिपरम्परासु :— **याः खलु चिदानन्देच्छाज्ञानक्रियाख्याः शिवस्य पञ्चान्तरङ्गाः शक्तयस्तासामेव योगिपरम्परासु नामान्तराणि प्रसिद्धानि, तानि च क्रमेण :— (1) ईशानी (2) आपूरणी (3) हार्दी (4) वामा (5)** मूर्तिः इति।

तदुक्तम्: —

"इच्छाज्ञानक्रियापूर्वाः शक्तयः पञ्च संस्थिताः।
ईशान्या-पूरणी-हार्दी-वामा-मूर्तिश्च ता मताः।।"

(शि०सू०वा०भा०,पृ०,23)

शक्तिपातः :— जीवस्योपरि शिवेन स्वेच्छास्वातन्त्र्येणैव कृतो भुक्तिमुक्तिफलप्रदः सुविचित्रप्रकारकोऽनुग्रहः। परमेश्वरः स्वलीलया स्वात्मानं मायाकृतेनावरणेन गोपयित्वा सांसारिकजीवरूपतया संसरति। स एव जीवरूपे स्वात्मनि स्वेच्छयाऽनुग्रहं कुर्वंस्तत्फलत्वेन जीवाय यथेष्टां भुक्तिं मुक्तिं च ददाति। जीवे योऽसौ स्वेच्छानुसारं शिवेन कृतो भुक्तिमुक्तिप्रदोऽनुग्रहः स एव हि शक्तिपातः।

यथा—

"आत्मना बद्ध्यते ह्यात्मा मुञ्चेन्नात्मानमात्मना।।
कोशकारो यथा कीट आत्मानं वेष्टयेद्दृढम्।
न चोद्वेष्टयितुं शक्तं आत्मानं स पुनर्यथा।।
तथा संसारिणः सर्वे बद्धाः स्वैरेव बन्धनैः।
न च मोचयितुं शक्ताः पशवः पाशबन्धनाः।।
स्वयमेव स्वमात्मानं यावद्वै नेक्षते शिवः।
शिवशक्तिनिपातात्तु मुच्यन्ते पाशबन्धनात्।।
अन्यथा नैव जानन्ति स्वरूपं यत्सुनिर्मलम्
यत्तत्स्वाभिजनं शुद्धमनौपम्यमनामयम्।।"

(स्व० तं०10, 360-364)

जीवः स्वात्मानमात्मना न मुञ्चेद्, अपि तु शिव एवैनं मोच्येदनुग्रहशक्तिपातेनेति तात्पर्यं प्रथमपंक्तेरत्र।

द्र०:- (शि० स्तो०13-19;16-21;17-18; प० सा० वि०, पृ०,50; स्त० चिं०117,118, स्त० चि० वि० पृ०,125-127 तथा प० सा० वि०, पृ०,28-29)

"पत्युः परस्माद्यस्त्वेष शक्तिपातः स वै मलात्।
अज्ञानाख्याद्वियोक्तेति शिवभावप्रकाशकः।
नान्येन शिवभावो हि केनचित् सम्प्रकाशते।।"

(तं० आ०13, 276-277)

~ अपक्षपातावह :— **शक्तिपातपात्रतां तिरोधानपात्रतां वा नीयमानो जीवो वस्तुतः स्वयं परमेश्वर एव स्वलीलया तथातथावभासमानः न जीवस्तस्माद्भिन्नः कोऽपि। ततो नात्र पराद्वैतसिद्धान्ते पक्षपातापक्षपातशङ्कासमुदयावसरः। द्वैतक्षेत्र एव पक्षपातसम्भवान्नाद्वैते।**

यथा—

"न वाच्यं तु कथं नाम कस्मिंश्चित्पुंस्यसौ तथा।
नहि नाम पुमानूकश्चिद्यस्मिन्पर्यनुयुज्यते।।"

(तं०आ०13,106)

पुरुषस्तु न तस्मादन्यः कश्चिदिति। ततो न कश्चन पक्षोऽन्यो यद्विषये पक्षपातशङ्का विधीयेत इति तात्पर्यम्। यथा—

"न च वाच्यं — कस्मात् कस्मिँश्चिदेव पुंसि शक्तिपात इति। स एव परमेश्वरस्तथा भाति इति सतत्त्वे कोऽसौ पुमान् नाम यदुद्देशेन विषयकृता चोदनेयम्।"

(तं०सा०,पृ०,119)

"भगवन् भवदिच्छयैव दासस्तव जातोऽस्मि परस्य नात्र शक्तिः।"

(शि०स्तो०12,26)

"शक्तिपातसमये विचारणं प्राप्तमीश न करोषि कर्हिचित्।"

(तदेव13,11)

"दासधाम्नि विनियोजितोऽप्यहं स्वेच्छयैव परमेश्वर त्वया।"

(तदेव13,10)

~ अवरः :— **(1) ब्रह्माविष्णुरुद्रादिकृतः। स चावरेभ्योऽधिकारिभ्यस्तैस्तथातथा क्रियते। नासौ पारमार्थिकमोक्षप्रदः।**

यथा —

"इत्थं विष्ण्वादयः शैवपरमार्थैकवेदिनः।
कांश्चित्प्रति तथादिक्षुस्ते मोहाद्विमतिं श्रिताः।"

(तं०आ०13,360)

"वैष्णवादीनां तु राजानुग्रहवन्न मोक्षान्तता।"

(तं०सा०,पृ०,124)

(2) अवरकोटिकाः शक्तिपाताः कुतश्च न एव बन्धान् मुक्तिं ददति, न सर्वतः। तथाहि कश्चित् मन्त्रदशाप्राप्तिकारणं न पूर्णशिवपदप्राप्तिदः। कैश्चिन्मायातो वा विवेको, कलातो वा विवेकः, पुरुषप्रकृतिविवेको वा, पुरुषबुद्धिविवेको वा फलत्वेन सूयते। स च विवेकस्तदधरत्वभोगं निवारयति। परं न पूर्णं मोक्षं ददाति।

यथा—

"लोकोत्तररूपभोगोत्सुकस्य तु स एव शक्तिपातः परमेश्वरेच्छाप्रेरितमायागर्भाधिकारीयरुद्रविष्णुब्रह्मादिद्वारेण मन्त्रादिरूपत्वं, मायापुंविवेकं, पुंस्कलाविवेकं, पुम्प्रकृतिविवेकं, पुम्बुद्धिविवेकमन्यच्च फलं प्रस्नुवानः तदधरतत्त्वभोगं प्रतिबध्नाति।"

(तं०सा०,पृ०,118-119)

"नहि ईश्वरशक्तिपातमन्तरेण तद्विवेकज्ञानमेवोदियादिति तन्निमत्ताया मुक्तेरपि कोऽवसरः।"

(तं०आ०वि०,खं०8,पृ०,5)

~ उत्कृष्टतीव्र :— द्र०:- **'शक्तिपातः'** ~ 'तीव्रतीव्रः' इति।

~ उत्कृष्टमध्य :— द्र०:- **'शक्तिपातः'** ~ 'तीव्रमध्यः' इति।

~ कर्मनिरपेक्षः — **न हि प्राणिभिः कृतानां कर्मणां फलं शक्तिपातः। कर्मणां जात्यायुर्भोगमात्रफलप्रदत्वात्।**

यथा —

"उभयत्रापि कर्मादेर्मायान्तर्वर्तिनो यतः।।
नास्ति व्यापार इत्येवं निरपेक्षः स सर्वतः।"

(तं०आ०13,256-257)

~ कर्मसाम्यानपेक्षः :— **शैवसिद्धान्ते कर्मसाम्यं शक्तिपातस्य कारणत्वेन मन्यते। परं न तन्मतं तर्कसङ्गतम्।**

तद्यथा—

"क्रमिकत्वे (कर्मणां) विरोधायोगात्। विरोधेऽप्यन्यस्य अविरुद्धस्य कर्मणो भोगदानप्रसङ्गात्, अविरुद्धकर्माप्रवृत्तौ तदैव देहपातप्रसङ्गात्। जात्यायुष्प्रदं कर्म। न प्रतिबध्यते, भोगप्रदमेव तु प्रतिबध्यते इति चेत् कुतः। तत्कर्मसद्भावे यदि शक्तिः पतेत् तर्हि सा भोगप्रदात् किं बिभियात्।"

(तं०सा०,पृ०,116-117)

~ कर्मापेक्षः :— **भोगेप्सूनां साधकानामुपरि क्रियमाणः शक्तिपातस्तत् पूर्वकर्मापेक्षः।**

यथा—

"या फलार्थितया भक्तिः सा कर्माद्यमपेक्षते।"

(तं०आ०13,118)

भोगमोक्षोभयेप्सूनामुपरि यः शक्तिपातोऽसौ भोगप्रदेऽंशे कर्माद्यपेक्षते मोक्षप्रदे तु नापेक्षते, इति सापेक्षनिरपेक्षोऽसौ।

यथा—

"भोगापवर्गद्वितयाभिसंधातुरपि स्फुटम्।।
प्राग्भागेऽपेक्षते कर्म चित्रत्वान्नोत्तरे पुनः।"

(तं०आ०13,119-120)

~ कालानपेक्षः :— **न हि कालविशेषप्रभावः शक्तिपातस्य विषये कोऽपि। यथा—**

"अथापि कालमाहात्म्यमपेक्ष्य परमेश्वरः।
तथा करोति वक्तव्यं कालोऽसौ कीदृशस्त्विति।।"

(तं०आ०13,74)

~ कालानियन्त्रितः :— **यदि जीवस्य कर्मणो भोगस्य वाऽऽदिमत्त्वं भवेत् तदा कालिको नियमस्तत्र प्रवर्तेत, येन कस्मिँश्चिदेव नियतेकाले कस्याप्युपरि शक्तिपातो भवेत्। यावतां जीवः कर्म भोगश्चेति त्रितयमिदमनादि ततो न शक्तिपातः कालानियन्त्रितः। यथा —**

"किञ्चानादिरयं भोगः कर्मानादि सपुद्गलम्।
ततश्चभोगपर्यायकालः सर्वस्य निःसमः।।
आदिमत्त्वे हि कस्यापि वर्गादस्माद् भवेदियम्।
वैचित्री भुक्तमेतेन कल्पमेतेन तु द्वयम्।।
इयतो भोगपर्यायात् स्यात् साम्यं कर्मणामिति।।"

(तं०आ०13,75-77)

अत्र निःसमः 'निःशेषेणसमः' इति।

~ क्रमिकः :— **असौ शक्तिपातो यद्वशात् साधकोऽधतराणि शास्त्राण्यारभ्य नियतेन क्रमेणाक्रमेण (अनियतेन क्रमेण) वोत्तरोत्तरेषु शास्त्रेषु रुचिमान् भवति, उत्तराश्च साधनाः अभ्यस्य सर्वोत्तरत्वेन त्रिकाचारमाश्रयते, सुदीर्घेण वा क्रमेण, लघुनापि वा तेनेति; मध्ये मध्ये कानिचित् सोपानन्युल्लङ्घ्येति वा।**

यथा—

"क्रमिकः शक्तिपातश्च सिद्धान्ते वामके ततः।
दक्षे मते कुले कौले षडर्धे हृदये ततः।।
उल्लङ्घनवशाद्वापि झटित्यक्रममेव वा।"

(तं०आ०13,300-301)

~ क्रियादीक्षानपेक्षः :— **तीव्रः शक्तिपातो नैव क्रियादीक्षामपेक्षते, मन्दः पुनरपेक्षत एव ताम्।**

यथा—

"ये तु तीव्रतमोद्रिक्तशक्तिनिर्मलताजुषः।।
न ते दीक्षामनुन्यासकारिणश्चेति वर्णितम्।"

(तं०आ०15,275-276)

~ तन्मूलकारणम् :— **शक्तिपातस्य मूलकारणं तु शिवस्य स्वातन्त्र्यमेव। स्वस्वातन्त्र्यलीलया शिवः यस्मिन् कस्मिन्नपि जन्तौ शक्तिपातलीलाविलाससमभिनयति स्वेच्छानुसारम्। नात्र पक्षपातस्याशङ्का। पक्षपातस्तु तत्रैव सम्भवति यत्रानेकपक्षता सम्भवेत्। परमाद्वैतरूपे शिवे कुतः पक्षान्तरम्। तदभावे कुतः पक्षपातः।**

यथा—

"तेन रागक्षयात्कर्मसाम्यात्सुकृतगौरवात्।
मलपाकात्सुहृद्योगाद्भक्तेर्भावाच्च सेवनात्।।
अभ्यासाद्वासनोद्भेदात्संस्कारपरिपाकतः।
मिथ्याज्ञानक्षयात्कर्मसंन्यासात्काम्यविच्युतेः।।
साम्याच्चित्तस्य सा शक्तिः पततीति यदुच्यते।
तदसन्ननु तत्रापि निमित्तान्तरमार्गणात्।।"

(मा०वि०वा०,689-691)

~ तीव्रः :— **त्वरितं मुक्तिप्रदोऽनुग्रहः परमेश्वरस्य। तस्यापि मुख्यास्त्रयः प्रकाराः = तद्यथाः—तीव्रतीव्रो, मध्यतीव्रो मन्दतीव्रश्चेति। यथा —**

"तारतम्यप्रकाशो यस्तीव्रमध्यममन्दताः।।
ता एव शक्तिपातस्य प्रत्येकं त्रैधमास्थिताः।।"

(तं०आ०13,129-130)

तीव्रमध्यमन्दाः शक्तिपाताः तारतम्यतः स्थिताः अपि प्रत्येकं पुनस्तारतम्यतः त्रिप्रकाराः इति। ते च प्रकाराः तीव्रतीव्रो, मध्यतीव्रो तथा मन्दतीव्र इत्याद्याः।

~ तीव्रतीव्रः :— **(1) येन शक्तिपातेन शिष्यस्यानुग्रहक्षणानन्तरमेव स्वात्मसाक्षात्कारो भवति, शरीरं पतति, परशिवता च तत्क्षणमेव प्रभास्वरतया प्रकाशते, स एव तीव्रतीव्रः शक्तिपातः।**

यथा—

"एनमेवार्थमन्तःस्थं गृहीत्वा मालिनीमते।
एवमस्यामनः काले कस्मिँश्चिद्योग्यतावशात्।।
शैवी सम्बध्यते शक्तिः शान्ता मुक्तिफलप्रदा।
तत् सम्बन्धात्ततः कश्चित् तत्क्षणादपवृज्यते।।

इत्युक्त्वा तीव्रतीव्राख्यं विषयम् .....।"

(तं०आ०13, 199-201)

(2) अनेनैता गतयः साधकस्य— (1) तीव्रतीव्रशक्तिपातप--वित्रितः सन् कश्चिच्छिष्यस्तदानीमेव देहपाते सति परिपूर्णशिवत्वेन प्रकाशते।

(2) कश्चन पुनर्जीवन्नेव परिपूर्णशिवैश्वर्यरसचमत्कारवशीकृतः सन् काष्ठादिवत्तिष्ठत्यन्तश्चमत्कारमात्रनिष्ठः।

(3) कश्चिच्चलल्लोकव्यवहारपराङ्मुखः स्वानन्दनिष्ठतिष्ठस्ति। चिरशीघ्रादिभेदोऽप्यस्त्येव शक्तिपातस्यास्यापि मुख्यतया त्रिप्रकारत्वादवान्तरप्रकारबहुत्वाच्चापि।

यथा —

"तत्रापि तारतम्यादिवशाच्छीघ्रचिरादितः।
देहपातो भवेदस्य यद्वा काष्ठादितुल्यता।।
समस्तव्यवहारेषु पराचीनितचेतनः।
तीव्रतीव्रमहाशक्तिसमाविष्टः स सिध्यति।।"

(तं०आ०13, 210-211)

"उत्कृष्टतीव्रात् तदैव देहपाते परमेशता।"

(तं०सा०,पृ०,120)

द्र०:- (प०सा०,96) **इति।**

~ (त्रिविधः) :— **सद्योमुक्तिप्रदः शक्तिपातः त्रिविधः- तत्काल एव शरीरपाते सति मोक्षदः, कालान्तरे वा चिराद्वेति। यथा —**

"तीव्रतीव्रः शक्तिपातो देहपातवशात्स्वयम्।।
मोक्षप्रदस्तदैवान्यकाले वा तारतम्यतः।"

(तं०आ०13,130-131)

तारतम्यतः इति चिरशीघ्रादितया। एष शक्तिपातो गुरोरनुग्रहेण तत्कृतेन प्राणहरणदीक्षादिना भवति। शिष्यस्य देहो वा पतति, काष्ठादितुल्यता वाऽऽसाद्यते तेन। व्यवहारपराङ्मुखो वा स्वानन्दनिष्ठस्तिंष्ठति।

~ तीव्रमध्यः :— **(1) तीव्रमध्यः शक्तिपातो मध्येषु शक्तिपातेषु सर्वोत्तमः प्रकारः। एतेन पवित्रितस्य साधकस्य दीक्षायां सम्पन्नायामपि स्वात्मनः परशिवत्वं तावन्न स्फुटमनुभूतिपथे प्रकाशते यावत्तस्य शरीरं तिष्ठति। प्रारब्धकर्मान्ते पतिते शरीरे तस्य निजा परमशिवता स्फुटतां याति। ततश्च नित्यं परशिवरूपतयैव चकास्तीति विदेहमुक्तो भवति।**

यथा—

"तीव्रमध्ये तु दीक्षायां कृतायां न तथा दृढाम्।।
स्वात्मनो वेत्ति शिवतां देहान्ते तु शिवो भवेत्।"

(तं० आ०13, 240-241)

"विकल्पात्तु तनौ स्थित्वा देहान्ते शिवतां व्रजेत्।"

(तं०आ०13,242)

(2) तीव्रमध्येन शक्तिपातेन साधकः पुत्रकदीक्षां लभते। यथा —

"तत्र प्रथमः प्रकारः पुत्रकविषयः।"

(तं०आ०वि०,खं०8,पृ०,151)

(3) तीव्रमध्यस्य शक्तिपातस्य पात्रतां यातः साधको यावत् प्रारब्धवशाज्जीवति तावत् शरीरद्वयवेष्टितः सन् स्वात्मनः शिवतायां न पूर्णतया विश्वसिति, न च तां स्फुटं संवेत्ति, परं त्यक्ते देहे सद्य एव शिवी भवति। यथा —

"उत्कृष्टमध्यात् शक्तिपातात् कृतदीक्षा कोऽपि स्वात्मनः शिवतायां न तथा दृढ़प्रत्तिपतिभवति। प्रतिपत्तिपरिपाकक्रमेण तु देहान्ते शिव एव।"

(तं०सा०,पृ०,123)

~ तीव्रमन्दः :— **त्रिषु मन्देषु प्रकारेषूत्तमोऽयम्। अनेन शक्तिपातेन विद्धस्य लोकधर्मिणः साधकस्य शिवत्वावाप्त्यपेक्षया भोगवासना प्रबला भवति, परं नात्यन्तं प्रबला। ततो मन्दत्वेऽप्यस्य शक्तिपातस्य किञ्चित् तीव्रत्वम्। असौ लोकधर्मी साधकः दीक्षितः सन् गुरुकृतेन योजनिकानुष्ठानेन देहपातानन्तरं क्वचिदुत्तरे लोके प्रापितः सन् तत्रोत्कृष्टान् योगसिद्धिरूपान् भोगान्भुक्त्वा तदनन्तरमत्रत्याया एव दीक्षायाः प्रभावेण शिवतां व्रजति, न दीक्षान्तरं गुर्वन्तरं वापेक्षते। यथा —**

"यः कश्चित्तीव्रमन्दशक्तिपातवांल्लोकधर्मी, स दीक्षाबलात् देहान्ते क्वचन यथाभिमते भुवनादौ भोगान् भुक्त्वा शिवतां यायात्।"

(तं०आ०वि०,खं०8,पृ०,152)

"लोकधर्मिणमारोप्य मते भुवनभर्तरि।
तद्धर्मापादनं कुर्याच्छिवे वा मुक्तिकांक्षिणम्।।"

उद्ध०:- (तं०आ०वि०,खं०8,पृ०,152)

"प्रारब्धदेहभेदे तु भुंक्तेऽसावणिमादिकम्।
भुक्त्वोर्ध्वं याति यत्रैष युक्तोऽथ सकलेऽकले।।"

(तं०आ०15,30)

~ त्रिप्रकारः :— **शक्तिपातो हि तीव्रो वा मध्यो वा मन्दो वेति प्रथमं त्रिप्रकारस्ततोऽवान्तरप्रकारता मुख्यतया नवविधा। यथा—**

"स चायं शक्तिपातो नवधाः— तीव्र-मध्य-मन्दस्योक्तर्ष-माध्यस्थ्या-निकर्षैः पुनस्त्रैविध्यात्।"

(तं०सा०, पृ०,119-120)

~ नवप्रकार :— **प्रथमं तावच्छक्तिपातस्त्रिप्रकारः— (1) तीव्रो, (2) मध्यः, (3) मन्दश्चेति। तेषु प्रत्येकं त्रिप्रकारकत्वं तीव्र-मध्य-मन्दत्वैः।**

तद्यथा —

1- तीव्रः = (1) तीव्रतीव्रः (2) मध्यतीव्रः (3) मन्दतीव्रः

2- मध्यः = (1) तीव्रमध्यः (2) मध्यमध्यः (3) मन्दमध्यः

3- मन्दः = तीव्रमन्दः (2) मध्यमन्दः (3) मन्दमन्दः इति। यथा —

"तारतम्यप्रकाशो यस्तीव्रमध्यममन्दताः।।
ता एव शक्तिपातस्य प्रत्येकं त्रैधमास्थिताः।
(तं० आ०13,129-130)

~ निकृष्टमध्यः :— द्र०:- **'शक्तिपातः'** ~ 'मन्द-मध्यः' इति।

~ निरपेक्षः :— **भोगेच्छारहितानां साधकानां या निष्कामा भक्तिः शिवे सा निरपेक्षस्य शक्तिपातस्य फलं तथा चिह्नम्। तेन केवलं मोक्षेप्सूनामुपरि क्रियमाणः शक्तिपातो निरपेक्षः। यथा —**

"कुलजातिवपुष्कर्मवयोऽनुष्ठानसम्पदः।।
अनपेक्ष्य शिवे भक्तिः शक्तिपातोऽकलार्थिनाम्।"
(तं० आ०13,117-118)

"भक्तिर्हि नामास्य प्राथमिकं चिह्नम्।
.....अफलार्थिनामिति मुमुक्षूणाम्।"
(तं० आ० वि०, खं०8, पृ०, 79)

~ बहुप्रकारः :— **प्रथमं तावत् तीव्रो, मध्यः मन्दश्चेति त्रिधा। तेषु प्रत्येकं त्रैविध्यम् तद्यथा-मन्दतीव्रः, मध्यतीव्रस्तीव्रतीव्रश्चेतित्यदिप्रकारतः— एवमेति नवप्रकाराः। तेऽपि प्रत्येकं मन्दमध्यतीव्रवेगयुताः इति त्रिप्रकाराः। एवं सप्तविंशतिप्रकारः शक्तिपातः। तत्रापि प्रमातृप्रकृतिभेदवशाद् गुरुशिष्यसामर्थ्यभेदवशतश्चानन्ताः प्रकाराः शक्तिपातस्य। यथा —**

"नवधा शक्तिपातोऽयं शम्भुनाथेन वर्णितः।"
(तं०आ०13,254)

"एवं विचित्रेऽप्येतस्मिञ्छक्तिपाते स्थिते सति।।
तारतम्यादिभिर्भेदैः समय्यादिविचित्रता।"
(तदेव-295-296)

~ मध्य :— **मध्येन शक्तिपातेन देहान्ते वा मोक्ष इहलोके एव वैश्वर्यभोगानन्तरं देहपाते मुक्तिः, उत्कृष्टभुवनभोगानन्तरं वा।**

द्र०:- **'तीव्रमध्यः'** इति **'मध्यमध्यः'** इति। **'मन्दमध्य'** इति च।

~ मध्यतीव्र :—

मध्यतीव्रेण शिवस्य शक्तिपातेन साधकस्यान्तः स्वत एव प्रातिभं ज्ञानमुदेति विनोपदेशं, विनाप्यभ्यासं, विना शास्त्राध्ययनादिकं च।

यथा —

"मध्यतीव्रात्पुनः सर्वमज्ञानं विनिवर्तते।।
स्वयमेव यतो वेत्ति बन्धमोक्षतयात्मताम्।
तत्प्रातिभं महाज्ञानं शास्त्राचार्यानपेक्षि यत्।।"
(तं० आ०13,131-132)

"मध्यतीव्राच्छास्त्राचार्यानपेक्षिणः स्वप्रत्ययस्य प्रातिभज्ञानोदय, यदुदये बाह्यसंस्कारं विनैव भोगापवर्गप्रदः प्रातिभो गुरुरित्युच्यते। तस्य हि न समय्यादिकल्पना काचित्।"
(तं०सा०,पृ०,120-121)

~ मध्यमध्य :— **मध्यमध्येन शक्तिपातेन साधकः शिवतोत्सुकोऽपि भोगेच्छुः सन्ननेनैव देहेनैश्वर्यभोगान् भुक्त्वा देहपाते शिवीभवति।**

यथा —

"मध्यमध्यात्तु शिवतोत्सुकोऽपि भोगप्रेप्सुर्भवति। इति तथैव दीक्षायां ज्ञानभाजनम्। स च योगाभ्यासलब्धम्। अनेनैव देहेन भोगं भुक्त्वा देहान्ते शिव एव।"
(तं०सा०,पृ०,123)

"मध्यमध्ये शक्तिपाते शिवलाभोत्सुकोऽपि सन्।।
बुभुक्षुर्यत्र युक्तस्तद्भुक्त्वा देहक्षये शिवः।"
(तं०आ०13,242-243)

~ मध्यमन्दः :— **यदा भोगवासना मुमुक्षापेक्षया अतितीव्रा भवेत् तदा तत्र साधके यः शक्तिपातोऽसो मध्यमन्दः। तेन च जन्मान्तरेषु भोगान् भुञ्जानस्यैव क्रमेण शिवभावप्रत्यभिज्ञा सञ्जायते चिरेण कालेन।**

यथा—

"कश्चिच्च मध्यमन्दशक्तिपातवान् क्वचन भुवनादौ कञ्चित्कालं भोगान्भुक्त्वा, तदीश्वरदीक्षितः पर्यन्ते शिवतां गच्छेत्।"
(तं०आ०वि०,खं०8,पृ०,152)

~ मन्दः :— **(1) मन्देन शक्तिपातेन विद्धस्य साधकस्य मुमुक्षापेक्षया भोगोत्सुकता प्रधानभूता भवति।**

यथा —

"भोगोत्सुकता यदा प्रधानभूता तदा मन्दत्वम्।"
(तं०सा०,पृ०,123)

(2) साधकस्तथाविधो यद्यपि भोगोत्सुकस्तथापि शक्तिपाता विद्ध एव, यतश्शिवभक्तो यतश्च शिवमार्गे प्रवृत्तः। शिवशासनोपायेन प्राप्यमाना भोगा अप्यन्ततः शिवाभेदं प्रति नयन्ति यतः पर्यवसाने।

यथा—

"..... पारमेश्वरमन्त्रयोगोपायतया यतस्तत्र औत्सुक्यम्। पारमेशमन्त्रयोगादेश्च यतो मोक्षपर्यन्तत्वम्, अतः शक्तिपातरूपता।'"
(तं०सा०पृ०,124)

~ (तत्प्रकाराः) :— **भोगवासनाया गतिभेदानुसारं चिरक्षिप्रादिभेदवानेष शक्तिपातः।**

यथा —

"तत्रापि तारतम्यस्य सम्भवाच्चिरशीघ्रता।।
बहुत्यभोगयोगश्च देहभूमाल्पताक्रमः।"
(तं० आ०13, 244-245)

चिरशीघ्रतादि शिवधार्मिकसाधकविषयम्। बहल्पभोग-योगश्चापिशिवधर्मिविषय इति ज्ञेयम।

यथा —

"तत्र प्रथमः प्रकारः पुत्रकविषयः। शिष्टं तु प्रकारद्वयं शिवधर्मिसाधकविषयम्।"

(तं०आ०वि०,खं०8,पृ०,151)

~ मन्दतीव्रः :—

मन्दतीव्रे शक्तिपाते सति साधकस्य गुरुं प्रति यियासा भवति, शास्त्रं प्रति रुचिर्जायते, वर्धते च। असौ गुरुकृपया ज्ञानदीक्षां लभते। तत्प्रभावेण तस्य शिवभावसमावेशः, तदभ्यासेन च जीवन्मोक्षावाप्तिः सत्वरमेव भवति साधकस्य।

यथा —

"मन्दतीव्राच्छक्तिपातात् सद्गुरुविषया यियासा भवति।"

(तं०सा०,पृ०,122)

"एवं यियासुर्गुरोर्ज्ञानलक्षणां दीक्षां प्राप्नोति, यया सद्य एव मुक्तो भवति जीवन्नपि। अत्रावलोकनात् कथनात् शास्त्र-सम्बोधनात्, चर्यादर्शनात्, चरुदानाद् इत्यादयो भेदाः।"

(तं०सा०,पृ०,123)

~ मन्दमध्यः :—

मन्दमध्येन शक्तिपातेन विद्धः साधकः स्थूलदेहपातानन्तरं क्वापि उत्कृष्टे लोके तल्लोकोचितेन देहेन भोगान् भुक्त्वा तच्छरीरत्यागे शिवी भवत्यत्रत्यस्य गुरोरेव कृपया।

यथा —

"निकृष्टमध्यात्तु देहान्तरेण भोगं भुक्त्वा शिवत्वमेति।"

(तं०सा०,पृ०123)

देहान्तरं चेह दिव्यलोकोचितमेव, न तु मर्त्यदेहविशेषः इति।

यथा —

"मन्दमध्ये तु तत्रैव तत्त्वे क्वापि नियोजितः।।
देहान्ते तत्त्वगं भोगं भुक्त्वा पश्चाच्छिवं व्रजेत्।"

(तं०आ०13,243-244)

~ मन्दमन्दः :— **अनेन शक्तिपातेन विद्धो जनोऽत्यन्तं बुभुक्षर्भवति, अनेकैः जन्मभिर्भोगान् भुञ्जानः क्रमेण मलशुद्धिं प्राप्नुवँश्चिरेण मुक्ति लभते।**

यथा —

"तीव्रमन्दे मध्यमन्दे मन्दमन्दे बुभुक्षुता।।
क्रमान्मुख्यातिमात्रेण विधिनैत्यन्ततः शिवम्।"

(तं०आ०13,245-246)

"मन्दमन्दशक्तिपातवान् पुनस्तत्रैव सालोक्यसामीप्यसायुज्या-सादनक्रमेण चिरतरं कालं भोगान्भुक्त्वातत एव दीक्षामासाद्य शिवतामियात्।"

(तं०आ०वि०,खं०8,पृ०,152-153)

~ मलपाकानपेक्षः :— **शैवसिद्धान्तनिष्ठाः मलपाकं शक्तिपातस्य कारणं मन्यन्ते। परं मलपाकः स्वयं कार्यभूतः सन् स्वकारणमपेक्षते। ततो नासौ शक्तिपातस्य कारणत्वेन स्वीकर्तुं शक्यते।**

"अथ मलपरिपाके शक्तिपातः। सोऽपि किं स्वरूपः? कि च तस्य निमित्तम्?"

(तं०सा०,पृ०,117)

द्र०:- 'स्वातन्त्र्यनिष्ठः' इति।

~ **'वैराग्याद्यहेतुकः'** इति च।

~ महिममण्डितः :— **शक्तिपातस्य ह्यचिन्त्यो महिमा। यतः पारमेश्वरशक्तिपातानुविद्धात्मैव जनः सद्गुरूपासने, सच्छास्त्राभ्यासे, शिवभक्त्यादौ च प्रवर्तते, नान्यः।**

यथा —

"शक्तिपातवशद् देवि नीयते सद्गुरुं प्रति।
दीयते परमं ज्ञानं क्षीयते कर्मवासना।" इति।

(स०मं०आ०)

उद्धः:- (प०सा०वि०,पृ०,8)

~ लक्षणतः :— **असौ साधकः शिवशक्तिपातपात्रतामुपयात इति वेद्यं य :— (1) सद्गुरोः शरणं याति; (2) सच्छास्त्राध्ययनचिन्तनादौ प्रवर्तते; (3) शिवभक्तौ रुचिमान् सञ्जायते, (4) अधरशास्त्रगुरुं विहायोत्तरशास्त्रगुरोः शरणमुपैति; (5) अधरं शास्त्रमार्गमप्रधानीकृत्य त्रिकादिरूपस्योत्तरस्य शास्त्रस्य अभ्यासे प्रवर्तते। इति मुख्यानि लक्षणानि शिवशक्तिपातस्य।**

द्र०:- **'गुरुः'** ~ 'अधरोत्तरः' इति।

~ विचित्रगतिकः :—

शिवोऽनुग्रहं कृत्वापि कदाचिन्न त्वरिगत्या स्वरूप-साक्षात्कारं कारयति। अपितु प्रायो निग्रहानुग्रहांशानां लीलामाचरति जीवानधिकृत्य। येन न सर्वे सततं मोक्षमार्गे एव प्रसरन्ति, अपितु मध्ये-मध्ये लोकव्यवहारे एव रज्यन्ति। सेयं क्रीडात्मकता शक्तिपातस्य। यथा—

"श्रीमानुत्पलदेवश्चाप्यस्माकं परमो गुरुः।
शक्तिपातसमये विचारणं प्राप्तमीश न करोषि कर्हिचित्।।
अद्य मां प्रति किमागतं यतः स्वप्रकाशनविधौ विलम्बसे।
कर्हिचित्प्राप्तशब्दाभ्यामनपेक्षित्वमूचिवान्।।
दुर्लभत्वमरागित्वं शक्तिपातविधौ विभोः।
अपरार्धेन तस्यैव शक्तिपातस्य चित्रताम्।।
व्यवधानचिरक्षिप्रभेदाद्यैरुपवर्णितैः।"

(तं०आ०13,290-293)

~ विष्ण्वादिकृतः :— **(1) लोकोत्तरभोगेच्छोः साधकस्य कृते यः शक्तिपातोऽसौ परमेश्वरेच्छाप्रेरितब्रह्मविष्णुरुद्रादिद्वारा कार्यते। यथा** —

"लोकोत्तररूपभोगोत्सुकस्य तु स एव शक्तिपातः परमेश्व-

रेच्छाप्रेरितमायागर्भाधिकारीयरुद्रविष्णुब्रह्मादिद्वारेण।"

(तं०सा०,पृ०,118)

(2) नासौ मुक्तिप्रदोऽपि तु भुक्तिमात्रप्रदः।

यथा —

"विष्ण्वादिरूपता देवे या काचित्सा निजात्मना।।
भेदयोगवशान्मायापदमध्यव्यवस्थिता।
तेन तद्रूपतायोगाच्छक्तिपातः स्थितोऽपि सन्।।
तावन्तं भोगमाधत्ते पर्यन्ते शिवतां नतु।
यथा स्वातन्त्र्यतो राजाप्यनुगृह्णाति कञ्चन।।
ईशशक्तिसमावेशात्तथा विष्ण्वादयोऽप्यलम्।"

(तं०आ०13,268-271)

~ वैचित्र्ययुतः :— **उक्तं स्पष्टमेतत् :—**

"परोपजीविताबुद्ध्या सर्वं इत्थं न भासते।
तदुक्त्या न विना वेत्ति शक्तिपातस्य मान्द्यतः।।
स्फुटमेतच्च शास्त्रेषु तेषु तेषु निरूप्यते।
किरणायां तथोक्तं च गुरुतः शास्त्रतः स्वतः।।
ज्ञानयोग्यास्तथा केचिच्चर्यायोग्यास्तथापरे।"

(तं०आ०13,161-163)

"तथाशब्देन च केचिद्योगयोग्याः क्रियायोग्याश्च इत्याक्षिप्तम्।"

(तं०आ०वि०,खं०8,पृ०,104)

~ वैराग्याद्यहेतुकः :— **न हि वैराग्याद्या शक्तिपातस्य हेतवः। तेषां सर्वेषामपि स्वयं कार्यत्वात् तद्धेतवोऽन्वेष्याः, न च ते लभ्याः। इति न तेष्वप्याश्रितः पारमेश्वरः शक्तिपातः, प्रत्युत तदाश्रिता एव वैराग्यादयः।**

यथा —

"एतेनान्येऽपि येऽपेक्ष्या ईशेच्छायां प्रकल्पिताः।
ध्वस्तास्तेऽपि हि नित्यान्यहेत्वहेत्वादिदूषणात्"।।

(तं०आ०13,97)

तेषां वैराग्यादीनां च परिगणनं संक्षेपतः कृतमस्ति तन्त्रालोकेऽपि।

यथा—

"वैराग्यं भोगवैरस्यं धर्मः कोऽपि विवेकिता।
सत्सङ्गः परमेशानपूजाद्यभ्यासनित्यता।।
आप्तप्राप्तिस्तन्निरीक्षा देहे किंञ्चिच्च लक्षणम्।
शास्त्रसेवा भोगसंघपूर्णता ज्ञानमैश्वरम्।।
इत्यपेक्ष्यं यदीशस्य दूष्यमेतच्च पूर्ववत्।
व्यभिचारश्च सामस्त्यव्यस्तत्वाभ्यां स्वरूपतः।।
अन्योन्यानुप्रवेशश्चानुपपत्तिश्च भूयसी।
तस्मान्न मन्महे कोऽयं शक्तिपातविधेः क्रमः।।"

(तं०आ०13, 98-101)

द्र०:- **'स्वातन्त्र्यनिष्ठः'** इति।

~ शैवसिद्धान्ते :— **(क) शैवसिद्धान्तादिशास्त्रेषु शक्तिपातस्यैतानि कारणानि मन्यन्तेः—**

(1) ज्ञानोदयः, (2) शुभं कर्म, (3) ईश्वरेच्छा, (4) कर्मसाम्यम्, (5) मलपाकः, (6) वैराग्यम्, (7) धर्मविशेषः, (8) विवेकः, (9) सत्सेवा, (10) सत्प्राप्तिः, (11) देवपूजा, इत्यादीनि। परमेतेषां सर्वेषामपि स्वयं कार्यभूतत्वात् केनाप्यन्येन कारणेन भाव्यमेव। ततो नैतेषां मध्ये किमपि शक्तिपातस्य मूलकारणम्। भेदवादे ईश्वरेच्छाया अपि शक्तिपातकारणत्वं नैव संगच्छते। ततोऽनिमित्तः एव शक्तिपातः परमेशितुः। इति त्रिकशास्त्रसिद्धान्तः। तदुक्तम्—

"तत्र केचिदाहुः .... ज्ञानोदयात् शक्तिपातः.....।
..... कर्मजन्यत्वे ..... ईश्वरेच्छानिमित्तत्वे .....। कर्मसाम्यम् ..... ततः शक्तिपातः। .....। मलपरिपाके शक्तिपातः। वैराग्यं, धर्मविशेषो, विवेकः, सत्सेवा, सत्प्राप्तिः, देवपूजा इत्यादि हेतुः प्रत्युक्तः।"

(तं०सा०,पृ०,116-118)

द्र०:- **'स्वातन्त्र्यनिष्ठः'** इति।

(ख) मलस्य या रोद्धी शक्तिस्तस्या यन्निवर्तनं परमेश्वरकृतं तदेव शक्तिपाताख्यया प्रसिद्धम्। मूलशक्तेर्वैचित्र्यान्निवर्तनस्य वैचित्र्यं, तेन च शक्तिपाते विचित्रता। तदुक्तं पूर्वपक्षतया।

यथा —

"तस्य रोद्धी यदा शक्तिरुदास्ते शिवरश्मिभिः।
तदाणुः स्पृश्यते स्पृष्टः स्वके ज्ञानक्रिये स्फुटे।।
समाविशेदयं सूर्यकान्तोऽर्केणेव चोदितः।
रोद्धयाश्च शक्तेर्माध्यस्थ्यतारतम्यवशक्रमात्।।
विचित्रत्वमतः प्राहुरभिव्यक्तौ स्वसंविदः।
स एष शक्तिपाताख्यः शास्त्रेषु परिभाष्यते।।"

(तं०आ०13, 50-52)

"मलपरिपाकहेतुकः प्रक्रान्तः शिवरश्मिस्पर्शः।"

(तं०आ०वि०,खं०8,पृ०,36)

~ सप्तविंशतिप्रकारकः :— द्र०:- **'बहुप्रकारः'** इति।

~ सापेक्षः :— **बुभुक्षं प्रति यः शक्तिपातः स कर्माद्यपेक्षो भवति।**

यथा —

"यस्तु भोगोत्सुकस्य स कर्मापेक्षः।"

(तं०सा०,पृ०,118)

~ सापेक्षनिरपेक्षः :— **भोगमोक्षोभयोत्सुकस्योपरि क्रियमाणः शक्तिपातः सापेक्षनिरपेक्षः। तत्र भोगांशे सापेक्षो मोक्षांशे च निरपेक्षः।**

यथा —

"भोगमोक्षोभयोत्सुकस्य भोगे कर्मापेक्षो, मोक्षे तु तन्निरपेक्ष इति सापेक्षनिरपेक्षः।"

(तं०सा०,पृ०,119)

~ स्थावरादिविषयः :— उक्तमेतन्मातङ्गतन्त्राश्रयेण।

यथा —

"व्याचक्षाणेन मातङ्गे वर्णिता निरपेक्षता।
स्थावरान्तेऽपि देवस्य स्वरूपोन्मीलनात्मिका।।
शक्तिः पतन्ती सापेक्षा .....।"

(तं० आ०13,294-295)

~ स्वातन्त्र्यनिष्ठः :— (1) यस्मिन् प्राणिनि शिवो यदा यथा चानुग्रहं कर्तुमिच्छति तस्मिँस्तथैव तदैव च करोति। लीलास्वातन्त्र्यमेतत् तस्य यतः। यथा —

"भेदवादिनां सर्वमसमञ्जसम्। स्वतन्त्रपरमेशाद्वयवादे तु उपपद्यते एतत्। यथाहि—परमेश्वरः स्वरूपाच्छादनक्रीडया पशुः पुद्गलोऽणुः संपन्नः, न च तस्य देशकालस्वरूपभेदविरोधः, तद्वत् स्वरूपस्थगनविनिवृत्त्या स्वरूपप्रत्यापत्तिं झटिति वा क्रमेण वा समाश्रयन् शक्तिपातपात्रम् अणुः उच्यते। स्वातन्त्र्यमात्रसारश्च असौ परमशिवः शक्तेः पातयिता इति।"

(तं०सा०,पृ०,118)

(2) पारमेश्वराच्छक्तिपातादेव प्राणी शास्त्राध्ययने गुरुशुश्रूषायां च प्रवृत्तिं लभमानो मोक्षमार्गे प्रसरति। स च शक्तिपातो न बाह्यकारणाधीनः, सर्वेषां तेषां रागक्षयादीनां परैः शक्तिपातकारणत्वेनाकलितानां पदार्थानां तर्कदोषदुष्टत्वात्। न ह्येतत् परमेश्वरे रागद्वेषा। पादकम्। यतः पक्षपाताशङ्का द्वैतक्षेत्रे एवोत्तिष्ठति नाद्वैते। यत्र परमेश्वरः स्वयमेव सर्वं तत्र को रागद्वेषावकाशः। भक्तिरपि पारमेश्वरात् प्रसादादेवोदेति जनस्य हृदि, इति नासावपि शक्तिपातकारणम्, अपि तु तत् कार्यभूतैव सा।

यथा —

"अन्यथा नेश्वरस्यास्ति रागो द्वेषोऽथ वा क्वचित्।।
येन क्वाप्येष नियतां स्वां शक्तिं पातयेद्विभुः।
अनिमित्तस्तथा चायं शक्तिपातो महेशितुः।।
तेन रागक्षयात्कर्मसाम्यात्सुकृतगौरवात्।
मलपाकात्सुहृद्योगाद्भक्तेर्भावाच्च सेवनात्।।
अभ्यासाद्वासनोद्भेदात्संस्कारपरिपाकतः।
मिथ्याज्ञानक्षयात्कर्मसंन्यासात्काम्यविच्युतेः।।
साम्याच्चित्तस्य सा शक्तिः पततीति यदुच्यते।
तदसन्ननु तत्रापि निमित्तान्तरमार्गणात्।।
अनवस्थातिप्रसङ्गसम्भवाभावयोगतः।।
अन्योन्याश्रयानिःश्रेणिचक्रकाद्युपपाततः।।
अस्मिँस्तु पक्षे सर्वेषां प्रवादानामपि स्थितिः।
युक्ता सर्वसहे पक्षे न किञ्चित्किल दुष्यति।।
.....।
.....।।
तस्यैव हि प्रसादेन भक्तिरुत्पद्यते नृणाम्।
यया यान्ति परां सिद्धिं तद्भावगतमानसाः।।
इत्थं पुराणशास्त्रादौ शक्तिः सा पारमेश्वरी।
निरपेक्षैव कथिता सापेक्षत्वे ह्यनीशता।।"
.....।
.....।।"

(मा०वि०वा०1,687-703)

शक्तिपाततिरोभावौ :— सद्गुरुं विहायाऽसद्गुरुविषया यियासा पारमेश्वरतिरोभावकृत्यादेव भवति। असद्गुरुं त्यक्त्वा सद्गुरुविषया पुनर्यियासाऽनुग्रहशक्तिपातवशादेव जायते।

यथा —

"असद्गुरुविषयायां तु (यियासायां) तिरोभाव एव। असद्गुरुतस्तु सद्गुरुगमनं शक्तिपातादेव।"

(तं०सा०,पृ०,122)

शक्तिप्रणवः :— ह्रींकारः।

द्र०:- ~ 'प्रणवः' ~ 'शाक्तः' इति।

शक्तिप्राधान्यम्ः :— जगद्व्यवहारे एव शक्तेः प्राधान्यं न पारमार्थिके तत्त्वे। यच्च शक्तिप्राधान्यं कैश्चन शैवैरपि क्वचित् क्वचिद्वर्णितं तद्भक्त्यतिशयद्योतकमेव न दर्शनसिद्धान्तप्रतिपादकमिति वेद्यं सुधीभिः।

यथा —

"अथ शक्तेः परावस्था यैर्भक्त्या परिगीयते।
युक्त्या प्रकाशितो देवस्ततः शक्तिदशा यतः।"

(शि०दृ०3,1)

यतः शिवस्यैव देवस्य सा परत्वेन प्रतिपादिता शक्तिस्ततः शिवस्यैव परत्वमभिप्रेतं तत्रेति तात्पर्यम्।

यथा —

"लिङ्गविशेषान्यथानुपपत्त्या शक्तित्वेनैवाभिमतस्यार्थस्य परावस्थारूपाभिधानं भक्तिरेव, ततः परस्य शक्तिमतोऽभावात् शक्तिमदभिन्ना हि तत उद्धृत्यापि प्रयोजनवशान्निर्दिश्यमाना तत्पारन्त्र्येण तदन्तरं निर्देशमर्हति। यतस्तैरेव ततः परावस्थातोऽनन्तरं शक्तिदशा किञ्चिदुच्छूनतेत्यादिनोक्ता। ततो यैः शक्तेः परत्वं गीयते तैस्तया धर्मभूतया धर्मी स्वाश्रयः स्वतन्त्रो वास्तवाभेदयुक्त्या देवः शिवः प्रकाशितः।"

(शि०दृ०वृ०,पृ०,95)

~ कौले :— संघट्टे सति शक्तिरेव सृष्टिभूमिर्न शक्तिमान्। परसंवित् प्रवेशेऽपि शक्तेरेव प्राधान्यम्। ततः कुलगुरुः परं कौलं स्वरूपं स्वशक्तावेव संक्रामयति, ततः तन्मुखादेव शिष्यान् ग्राहयति। तेनैव विधिना शिष्या अपि परामनवच्छिन्नां संविदं सद्योऽनायासमेव प्रविशन्ति।

यथा —

"तस्यामेव कुलार्थं सम्यक् संचारयेद्गुरुस्तेन।।
तद्द्वारेण च कथितक्रमेण संचारयेत नृषु।"

(तं०आ०29,122-123)

नृषु = शिष्यवर्गे।

यथा —

"स्त्रीमुखे निक्षिपेत्प्राज्ञः स्त्रीमुखाद्ग्राहयेत् प्रिये।"
उद्धः- (तं०आ०वि०,खं०11/2,पृ०,88)
"स्त्रीमुखाच्च भवेत्सिद्धिः सुसिद्धं तासु तत्पदम्।"
उद्धः- (तदेव)

शक्तिबीजम् :— सकारः = अमृतवर्णः।

यथा —

"शक्तिबीजेनअमृतार्णेन।"
(तं०आ०वि०,खं०10,पृ०,311)

अत्रैवाग्रे त्रिशूलवर्णविसर्गयोरुल्लेखेनैतत् प्रतीयते यज्जयरथीयविचारानुसारं "सौः" इत्येष बीजपिण्ड एव शक्तिबीजं, तस्यैव प्रथमाङ्गतया वर्णितोऽमृतवर्णः सकारस्तेनात्रेति।

शक्तिमान् :— सकलशक्त्याभासनतिरोधानसंयोजन-वियोजनादिषु स्वतन्त्रः परमेश्वरः।

यथा —

"स च तच्छक्तिसंयोजनवियोजनादिस्वाच्छन्द्ययोगान्महेश्वरो, न तु जडस्वरूपवह्न्यादिवद् दाहकपाचकादिशक्त्याश्रयमात्रम्।"
(ई०प्र०वि०,खं०1,पृ०,275)

शक्तिमुद्रा :— ~ खेचरी :— लक्षिता परं न स्पष्टमुक्ता।

यथा—

"एषैव शक्तिमुद्रा चेदधोधावितपाणिका।"
(तं०आ०32,58)

शक्तिलक्षणम् :— यदाश्रयेण प्रमाता ज्ञानक्रियेच्छादौ प्रवर्तितुं क्षमो भवति सा सामर्थ्यविशेषात्मिका तस्य शक्तिः।

यथा —

"यत्रस्थः पुरुषः सर्वं वेत्त्यतीतमनागतम्।।
सन्नियम्येन्द्रियग्रामं तत्तत्त्वं शक्तिलक्षणम्।
यत्र यत्र भवेदिच्छा ज्ञानं वापि प्रवर्तते।।
क्रियाकृत्यस्वरूपा वा तत्तत्त्वं शक्तिलक्षणम्।
व्यापकस्य यतो देवि चिद्रूपस्यात्मनः शिवात्।।
प्रसरत्यद्भुतानन्दा सा शक्तिः परमा स्मृता।"
(ने०तं०8,32-35)

शक्तिलिङ्गम् :— ~ उच्चारयोगे —

द्रः- **'लिङ्ग'** ~ 'व्यक्ताव्यक्तम्' इति।

शक्तिवह्निः :— स्वातन्त्र्यशक्तिः, सर्वस्य संविन्मात्रताव-शेषतया विगालनाद् वह्निरिति त्रिकोणमित्यप्यभिधानमस्याः।

यथा —

"त्रिकोणे शक्तिवह्नौ सर्वशक्तिक्रीडीकारिण्यां स्वातन्त्र्यशक्तौ।"
(तं०आ०वि०,खं०3,पृ०, 386)

शक्तिविभागः :— शिवस्य शक्तिरिच्छा, सदाशिवस्य ज्ञानशक्तिरी ईश्वरस्य च क्रियाशक्तिरिति।

यथा —

"भगवतीच्छा, श्रीसदाशिवे ज्ञानशक्तिः, ईश्वरे पुनः क्रियाशक्तिरित्यागमे शक्तिविभागः।
(ई०प्र०वि०वि०,खं०3,पृ०,253)

शक्तिविषुवत् :— द्रः- 'विषुवत्' इति।

शक्तिवृन्दम् :— इन्द्रियदेवीनां समूहः, संविद्देवीचक्रम्।

यथा —

"सुखप्रधानसंवेद्य-सम्भोगैर्भजते च यत्।
त्वामेव तस्मै घोराय शक्तिवृन्दाय ते नमः।"
(शि०स्तो०2,23)

"शक्तिवृन्दम्, संविद्देवी चक्रम्।"
(शि०स्तो०वि०,पृ०,32)

शक्तिवेधः :— रहस्यभूतः शक्तिपातविशेषः। लक्षितो

यथा —

"नाड्या विश्यान्यतरया चैतन्यं कन्दधामनि।
पिण्डीकृत्य परिभ्रम्य पञ्चाष्टशिखयां हठात्।।
शक्तिशूलाग्रगमितं क्वापि चक्रे नियोजयेत्।
शक्त्येति शाक्तो वेधोऽयं सद्यः प्रत्ययकारकः।।"
(तं०आ०29, 257-255)

नाडया, इडया वा पिङ्गलया वा सुषुम्नया वा। पिण्डीकरणमुपसंहरणम्। परिभ्रमणं दक्षिणावर्तक्रमेण तत्र। पञ्च कर्मेन्द्रियाणि, अष्टौ = बुद्धीन्द्रियाणि पञ्चान्तः करणत्रयं चेति। शिखया = शक्त्या। शक्तयः शक्तिव्यापिनीसमना इति तिस्रः। प्रत्ययः = आवेशः।

शक्तिशक्तिमन्तौ :— सकलशक्तीनामेकघनं स्वात्मनिष्ठं तद्रूपं शक्तिमान्, यत्र शक्तीनां न पृथक-पृथक् स्थितिः। शक्तिमतः एकैकप्रभावबीजभूता याः विशेषतास्तास्तस्य शक्तयः।

यथा —

"तस्माद्येन मुखेनैष भात्यनंशोऽपि तत्तथा।
शक्तिरित्येष वस्त्वेव शक्तितद्वत्क्रमः स्फुटः।।"
(तं०आ०1,74)

"अनंशोऽपि येन भुवनाद्यन्यतमांशलक्षणेन मुखेन भावनादौ भासते तन्मुखं '..... शैवीमुखमिहोच्यते, इत्याद्युक्त्या तथा शिवप्राप्त्युपायतया शक्तिरेव।"
(तं०आ०वि०,खं०1,पृ०,115)

~ तदभेद :— **(1) यथाग्नेर्दाहन=प्रकाशन-पाचनादि-शक्तयोऽग्निरूपा एव; यथा च तासां समष्टिरेवाग्निस्तथा भावजातं परमेश्वरस्य शक्तय एव। तासां सर्वासां शक्तीनामेकघनः पदार्थः परमेश्वरः।**

यथा —

"शक्तिश्च शक्तिमद्रूपात्
व्यतिरेकं न गच्छति।

तादात्म्यमनयोर्नित्यं
वह्निदाहिकयोरिव।।"

(बो०पं०द०,3)

"शक्तिशक्तिमतामुक्ता सर्वत्रैव ह्यभेदिता।।"

(शि०दृ०3,65)

(2) शक्तिरेव शिवः शिव एव च शक्तिः। द्वयमपि वस्तुत एकमेव परं तत्त्वं सम्बोधनार्थं पदद्वयेन विचारद्वयेन च विमृष्टं शास्त्रेषु। तदेकमेव परं तत्त्वमचलत्वेन शिवाख्यं चलत्तावभासनसामर्थ्ययोगेन च तदेव शक्तिसमाख्यम्। यथा—

"शक्तिशक्तिमतोर्यद्वदभेदः सर्वदा स्थितः।
अतस्तद्धर्मधर्मित्वात् परा शक्तिः परात्मनः।।
न वह्नेर्दाहिका शक्तिः व्यतिरिक्ता विभाव्यते।
केवलं ज्ञानसत्तायां प्रारम्भोऽयं प्रवेशने।।"

(वि०भै०,18-19)

स्थिरताऽत्र शुद्धसंविन्मात्ररूपत्वेऽवस्थानं, चलत्ता च सृष्टिसंहारादिलीलया विश्वावभासनशीलत्वम्। यथा —

"पर एव हि स्वतन्त्रो बोधस्तदुपाधिवशात् तत्तच्छक्तिरूपतया व्यपदिश्यते इति न वस्तुतः किञ्चिच्छक्तितद्वतोर्भेदः।"

(तं०आ०वि०,खं०1,पृ०194)

"शक्तिश्च नाम भावस्य स्वं रूपं मातृकल्पितम्।
तेनाद्वयः स एवापि शक्तिमत्परिकल्पने।।"

(तं०आ०1,69)

"शक्तिशक्तिमत्परिकल्पनेऽपि क्रियमाणे, स एवाद्वयमयो विभुः— न काचिदद्वयखण्डना।"

(तं०आ०वि०खं०1,पृ०,110)

शक्तिशिवौ :— ~ परौः — एकमेव परात् परं तत्त्वम् पारमैश्वर्यसंवित्स्पन्दानन्दचमत्कारनिर्भरं सत्पराशक्तिरिति, महासामरस्यविश्रान्तं च सत् परः शिवः इत्युच्यते। यथा—

"सानन्दा तु पराशक्तिर्निरानन्दः परः शिवः।।"

(ने०तं०21,32)

"सहानन्देनोल्वणेन हर्षेण वर्तते सानन्दा। निःशेषेण महासामरस्यविश्रान्त्यात्मा आनन्दो यस्य, स निरानन्दः।।"

(ने०तं०उ०,खं०2,पृ०,266)

शक्तिसन्धानम् :— स्वात्मनः परमेश्वरत्वस्य पुनः पुन-र्विमर्शनेन हृदयङ्गमीकरणम्। यथा —

"अस्य शक्तिरुक्ता, तामेव यदा अनुसन्धत्ते, दार्ढ्येण तन्मयीभवति।"

(शि०सू०वि०,पृ०,18)

शक्तिसमन्वय :— ~ तत्त्वैः —

द्र०:- 'शक्तिपञ्चकम्' 2-3 इति।

शक्तिसोपानमालिका :— बिन्दु-नाद-नादान्त-शक्ति-व्यापिनी-समनात्मिका प्रणवकला योगभूमिमाला। यथा —

"श्रयेद्भ्रूबिन्दुनादान्तशक्तिसोपानमालिकाम्।"

(तं०आ०5,57)

"भ्रूपृष्ठादारभ्य बिन्दुनादनादान्तशक्तिव्यापिनीसमना एव ऊर्ध्वोर्ध्वपदारोहोपायत्वात् सोपानानि .....।"

(तं०आ०वि०खं०3,पृ०,360)

शक्तिहीनत्वम् :— ~ मन्त्रस्य :— मन्त्राणां सात्त्विक-राजस-तामसगुणैरावृतत्त्वात् साञ्जसत्वम्-शक्तिहीनत्वम् मन्त्रदोषः। यथा —

"भावहीनास्तु ये मन्त्राः शक्तिहीनास्तु कीलिताः।

शक्तिहीनाः साञ्जनाः। यथोक्तम्, "साञ्जनास्तेऽण्ड-मध्यस्थाः सात्त्वराजसतामसाः।"

(ने०तं०उ०खं०1,पृ०207-208)

शक्त्यण्डम् :— (1) शुद्धविद्याया आरभ्य शक्तितत्त्वान्तं शुद्धतत्त्वान्यवष्टभ्य स्थितमण्डं शक्त्यण्डम्। यथा —

"मायातत्त्वाच्छुद्धविद्या दशकोटिगुणिता। विद्यातत्त्वात् ईश्वरतत्त्वं शतकोटिधा। ईश्वरतत्त्वात् सादाख्यं सहस्रकोटि-धा। सादाख्यात् वृन्दगुणितं शक्तितत्त्वम्, इति शक्त्यण्डम्।"

(तं०सा०,पृ०,65)

(2) सदाशिवेश्वर शुद्धविद्याख्यतत्त्वत्रयकोशरूपं वस्तु शक्त्यण्डमित्युच्यते। यथा —

"विश्वस्य प्रमातृप्रमेयरूपस्य पराहन्ता चमत्कारसारस्यापि स्वस्वरूपापोहनात्माख्यातिमयी निषेधव्यापाररूपा या पारमेश्वरी "शक्तिः" सैव आच्छादकत्वेन बन्धकतया शक्त्यण्डम् :— इत्युच्यते।

एतस्मिन्नण्डे .....
सदाशिवेश्वरावेवाधिपती .....।"

(प०सा०वि०,10-11)

सर्वथा परिपूर्णताया अभिन्नतायाश्च यत् स्थगनमिवात्र, तदेव निषेधव्यापारपदेनाभिप्रेतम्, नात्राभाववादोऽभिप्रेत इति वेद्यं सुधीभिः। यथा —

शक्त्यभिव्यक्तिः :— अभिव्यक्तैव शिवशक्तिः साधकं शिवभावे प्रतिष्ठापयितुमलम्। अत एव तस्या अभिव्यक्तये सयत्नाः साधकाः। यथा—

"यथार्करश्मिसंयोगात् कमलं प्रसरेत्क्षणात्।।
शिवशक्त्या तथात्मा वै गृहीतः सर्वतः शिवः।
सार्वज्ञ्यादिगुणैर्युक्तो भवत्येव शिवो यथा।।
निराभासः परं शान्तो ह्यप्रतर्क्यो ह्यनुत्तमः।
यावन्न पूर्णतां प्राप्तस्तावत्साभास उच्यते।।
यदा तु सर्वभावेन शक्त्यात्मा सम्प्रसारितः।
ततः प्रसररूपिण्या गृहीतस्तु परस्तदा।।
शिवो भवति देवेशि ह्यविभागेन सर्वशः।"

(ने०तं०22, 54-58)

शङ्करः :— (1) जगदुत्पत्तिस्थित्यादिविलासपूर्वकं प्राणिनां शं कल्याणं भुक्तिमुक्तिमयं करोतीति शङ्करो भगवान् महेश्वरः। यथा —

"यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ।
तं शक्तिचक्रविभवप्रभवं शंकरं स्तुमः।।"

(स्पं०का०,1)

"भोगापवर्गाख्यं शं श्रेयः सुखं वा करोतीति शङ्करः।"

(स्पं०प्र०,पृ०,7)

द्र०:- (स्पं०प्र०,पृ०,28-29; स्पं०नि०,पृ०,3;स्पं०सं०,पृ०,3) इति।

(2) स्तवचिन्तामणिरचयितुः श्रीमद्भट्टनारायणस्य ज्येष्ठभ्रातुर्नाम शङ्करः इति। यथा —

"शङ्कराभिधानो ज्येष्ठो भ्राता अभवत्।"

(स्त०चि०वि०,पृ०,10)

शङ्करनन्दनः :— प्रज्ञालङ्काराख्यस्य दर्शनशास्त्रग्रन्थस्य निर्माताऽऽचार्यविशेषो यस्य नामोल्लेखोऽभिनवगुप्तपादैः कृतः परमाणूपादानायाः सृष्टेर्वादस्यालोचनावसरे।

द्र०:- **'प्रज्ञालङ्कारः'** इति।

एष एव भट्टशङ्करनन्दन इत्युक्तोऽन्यत्र। यथा —

"तथाहि भट्टशङ्करनन्दनः स्मृतिदिशैवार्थधर्मतां प्रकाशमानताया न्येषधीत्।"

(ई०प्र०वि०वि०,खं०1,पृ०,236)

शङ्करोपलः :— महादेवपर्वतस्य पादांशभूतः प्रस्तरमयः सुविशालः पर्वतस्याधोभागः। अनुमातुं शक्यते यद् भट्टनारायणस्य भ्रात्रा शङ्करेणात्र शिलातले उपविश्य शैवयोगसाधना कृता। तत एवायं शङ्करोपल इति प्रथां गतः। इदानीमेषा शिला कश्मीरभाषायां "शेङ्करपल" इति ख्याता।

क्षेमराजेन वर्णितास्ति कथैका शिवसूत्रविमर्शिन्याम्। तदनुसारमेतस्या एव शिलायाः अधोभागे शिवसूत्राणि टङ्कितान्यासन्, यानि स्वप्नोपदेशतो वसुगुप्ताचार्येण लब्धानि प्रचारितानि च शिष्यमण्डले। तदनन्तरं च शिलैषा पुनरधोमुखतां यातेति।

परं शिलाया दर्शनेनैतत् प्रतीयते यन्न तस्याः प्रस्तर-धातुरक्षरटङ्कनयोग्यो न चापि सा शिलोत्थापननिपातनयोग्या। महतः शैलस्याङ्गभूताऽसौ न ततः पृथक्कर्तुं शक्येति। ततः कथं तस्या उत्थापनं वा निपातनं वा सम्भवेत्। एतेनैतत् प्रतीयते यत् क्षेमराजेन वर्णिता शङ्करोपलकथा दन्तकथैवेति।

न च प्राचीनैः भट्टकल्लट-रामकण्ठ-भट्टभास्करैः शैवसिद्धैः शङ्करोपलस्य वा तदुपरि वा शिवसूत्राणां टङ्कितत्वेन वर्तमानत्वस्य कोऽप्युल्लेखः क्वचिदपि कृतः। सूत्राणां विषये केवलं सिद्धादेशप्राप्तत्वं तैर्वर्णितम्। स च सिद्धादेशः स्वप्ने वा सम्भवति, साक्षात् सिद्धदर्शनतो वा सम्भवति, महार्थमञ्जरीवदिति विदाङ्कुर्वन्तु सुधियो विद्वांसः।

शङ्का :— ~ कालीनये :— शुभाशुभफलप्रदायकापूर्वाख्य-संस्कारविशेषः स्वकृतशुभाशुभकर्मकर्तृत्वाभिमानजन्यः। यथा —

(क) "आश्यानीभूतः संस्काररूपतया वर्तमानः शङ्का... .....।"

(तं०आ०वि०,खं०3,पृ०,170)

(ख) "कार्याकार्यलक्षणप्रतिनियतभावाहितः संस्कारः प्रबुद्धः सन् शुभाशुभरूपां फलसम्पदं जनिष्यते, येनायं लोकः स्वर्निरयादिपात्रतया सुखदुःखादिभोक्तृतामिपात्।"

(तदेव, पृ०, 170-171)

शङ्कातङ्कपरिहार :— समयिना शिष्येण जातिकुलादिमूलाः शङ्काः न कदापि कार्याः इति। यथा —

"ब्राह्मणोऽहं मया वेदशास्त्रोक्तादपरं कथम्।
अनुष्ठेयमयं जातिग्रहः परनिरोधकः।।"

(तं०आ०15,597)

शङ्काशून्यता :— सर्वथा निःशङ्कत्वम्। आवश्यकत्वमस्याः, साधनासिद्धये।

"विद्याशङ्की मलाशङ्की शास्त्रशङ्की न सिद्ध्यति।"

(तं०आ०32,24)

शङ्कुः — शङ्क इत्येषा संख्या क्वचित् शङ्कुरित्यपि कथिता।

"दशभिस्तन्निखर्वं च शङ्कुः स्याद् दश तानि तु।
शङ्कुर्भिदशभिः पद्मम् .....।।"

उद्धः:- (तं०आ०वि०,खं०4/1,पृ०,144)

शचीमतम् :— शैवशाक्तविचारप्रधानं किमप्यागमिकं शास्त्रम्।

द्र०:- (म०मं०प०,पृ०,44,118) इति।

शतरुद्राः :— ब्रह्माण्डबाह्ये स्थिताः ब्रह्माण्डधारकाः रुद्राः। यथा —

"शतरुद्रानतो वक्ष्ये समासेन कृशोदरि।।
दश दश क्रमेणैव दशदिक्षु समन्ततः।

(स्व०तं०10,622)

.....
.....
एकैकस्य सहस्रं तु परिवारोऽभिधीयते।।
शतरुद्रा इति ख्याता ब्रह्माण्डं व्याप्य संस्थिताः।"

(तदेव, 644-645)

"प्रतिदिक्कं दश दशेत्येवं रुद्रशतं बहिः।
ब्रह्माण्डधारकं तच्च स्वप्रभावेण सर्वतः।।"

(तं०आ०8, 167-168)

~ तदायु :— रुद्रलोकाधिपस्य रुद्रस्य यदायुस्तच्छतरुद्राणां दिनम्, तावती रात्रिः। तेन मानेन तेषां वर्षशतमायुः। तदन्ते ब्रह्माण्डनाशः। यथा —

"रुद्रस्योक्ताधिकारावधिः, ब्रह्माण्डधारकाणां तद् दिनं

शतरुद्राणां निशा तावती, तेषामपि च शतमायुः। शतरुद्रक्षये ब्रह्माण्ड-विनाशः।"

(तं०सा०,पृ०,54)

शब्दः :— ~ नादयोगे :— **भ्रमरीरव इव श्रूयमाणश्चतुर्थो नादो नादयोगाभ्यासे। यथा** —

"चतुर्थः स तु वै शब्दः सर्वशब्दभवारणिः।
आत्मानं रावयन्नादः रवे यथा भ्रमरीरवः।।"

(स्व०तं०उ०,प०11,पृ०, 9)

शब्दजशब्दाग्रहणम् :— **श्रोत्रं नैव शब्दजशब्दग्राहकम्, दूरान्तिकादिकत्वेन शब्दानां ग्रहणात्। न हि कर्णच्छिद्रप्रदेशे किमपि दूरं वान्तिकं वा। ततः श्रवणेन्द्रियं दूरस्थस्य मूलशब्दस्य प्रतिबिम्बमेव गृह्णाति, नाभिनवं शब्दजं शब्दम्। यथा** —

"नहि शब्दजशब्दस्य दूरादूररवोदितेः।
श्रोत्राकाशगतस्यास्ति दूरादूरस्वभावता।"

(तं०अ० 9,302-303)

शब्दजशब्दश्रवणपक्षे तत्र दूरत्वमन्तिकत्वं च नैव गृहीतं स्यात् सर्वस्य कर्णछिद्रं सम्प्राप्तस्य शब्दजशब्दस्य समानतया तत्समीपवर्तित्वात्। यथा हि दूरागतः शब्दः कर्णच्छिद्रसन्निहितस्तथैव समीपागतोऽपि। यत उभयोः शब्दजशब्दत्वे दूरागतत्वं वा समीपागतत्वं वा न किमपि ग्रहीतुं शक्यम्। ततो नावधेयं शब्दस्य शब्दजत्वे कथमपि परमवधीयते श्रोतृभिर्दूरादूरागतत्वम्। यथा —

"एतच्चान्यैरपाकारि बहुधेति वृथा पुनः।
नायस्तं पतिताघातदाने को हि न पण्डितः।।"

(तं०आ०9,305)

शब्दतन्मात्रम् :— **तारत्वमन्दत्वादिविशेषाभासरहितः क्षोभमप्राप्तः शब्दत्वमात्रावच्छिन्नः सामान्याकारः सूक्ष्मतरः श्रोत्रग्राह्यो विषयः। असौ प्रक्षोभमाप्तस्तत्तद्विशेष-सार्थकनिरर्थकादिशब्दरूपताम्,नितरां प्रक्षुब्धश्च गन्धतन्मात्र-वन्निजसम्बन्धिभूततत्त्वात्मकाकाशरूपतां धत्ते। यथा** —

"एवं रसादिशब्दान्ततन्मात्रेष्वपि योजना।"

(तं०आ०9,282)

द्र०:- **'गन्धतन्मात्रम्' इति।**

~ आकाशादन्यत् :— **तन्मात्रं हि श्रोत्रग्राह्यम्, आकाशः पुनरवकाशदं तत्त्वम्। ततस्तन्मात्राद् भिन्नः।**

"योऽसौ सन्निवेशात्मना सुषिरस्वभावः तदाकाशमेव; न तु तन्मात्रम्। यत्तु असन्निवेशात्मकं क्षोभमयं रूपं, स शब्दो गुण इत्यभिप्रायः।"

(ई०प्र०वि०वि०,खं०3,पृ०,298)

शब्दनम् :— **ज्ञानस्य यद्विमर्शात्मकत्वं तदेव हि शब्दनम्। तच्चाभेददशायाम् "अहम्" इत्येव। भेदाभेददशायाम् "अहमिदम्" इति। भेददशायां च "इदम्" इति, "घटोऽयं नीलमिदम् सुखमिदम्" इत्यादि च।**

"यावता संविद्रूपे प्राणितकल्पं यद् विमर्शरूपत्वं शब्दनात्मत्वम्, तत् तावदसाङ्केतिकमिति वितत्य वक्ष्यते।"

(ई०प्र०वि०वि०,खं०1,पृ०,56)

शब्दप्रतिबिम्बम् :— **प्रतिश्रुत्कात्मको यः शब्दो नासौ शब्दजः शब्दो यथा नैयायिकैः प्रतिपादितः, अपितु शब्दस्य प्रतिबिम्बं तत्। यः शब्दः श्रोत्रेण श्रूयतेऽसावप्युच्चार्यमाणस्य शब्दस्य प्रतिबिम्बात्मकं एव। यथा** —

"शब्दस्य प्रतिबिम्बं यत् प्रतिश्रुत्केति भण्यते।
न चासौ शब्दजः शब्दः आच्छत्त्वेन संश्रवात्।। इत्यादि।"

(तं०आ०3,24-26)

आगच्छत्त्वेनेति दूरादागच्छत्त्वेन। तेन प्रथम एव शब्दः श्रोत्रे प्रतिबिम्बितो भवति न शब्दजः शब्दः इति।

शब्दाधारः :— **नैयायिकवैशेषिकाः शब्दमाकाशमात्रगुणं वदन्ति, परं शैवाः पृथिव्यादिपञ्चके सर्वत्र शब्दस्य सत्तां प्रतिपादयन्ति। यथा** —

"पटहे ध्वनिरित्येव भात्यबाधितमेव यत्।।"

(तं०आ०9,298)

शम्भुः :— **(1) अनुत्तरः परमशिवो यः सर्वस्यात्मा। यथा** —

"अनुत्तरं सर्वस्य स्वात्मदेवतारवरूपं पराहन्ताचमत्कारसारमपि गृहीतनानात्वम्, अथ च अत्यन्ताखण्डितस्वस्वातन्त्र्यपरमाद्वयप्रकाश-स्वभावं भगवन्तं शम्भुम् .....।"

(प०सा०वि०,पृ०,5)

(2)शम-कल्याणं, भवत्यस्मात्—इति शम्भुः। यथा —

"शं भवतिअस्मात्इति शम्भुः।
संहृतस्पर्शयोगाय संपूर्णामृतसूतये।
वियन्मायास्वरूपाय विभवे शम्भवे नमः।।"

(स्त०चिं०वि०,पृ०,13)

द्र०:- (स्त०चि०,5) **इति।**

(3) सर्वप्रमातृतया स्वयमवस्थितः परमेश्वरः।

"सर्वप्रमातृस्फुरत्तासारं स्वात्मदेवतारूपमेव 'शम्भुं' अनुत्तरश्रेयःस्वभावं सत्तात्मकम् .....।"

(प०सा०वि०,पृ०,2)

शम्भुनाथः :— **(1) जालन्धरपीठाधीश्वरोऽभिनवगुप्तस्य ज्ञानविज्ञानद उत्कृष्टतमो गुरुर्यस्य मतं तन्त्रालोके प्रमाणत्वेन 22 वारमुल्लिखितम्, यस्य च प्रशंसा तन्त्रसारे मालिनीवि-जयवार्त्तिकादौ च कृता, यः कौलप्रक्रियायास्तत्त्वविद्यो-गसिद्धश्च गुरुः, यः "त्रिकार्थाम्भोधिचन्द्रमाः" इति, "जगदुद्धृतिक्षमः" इति चोक्तस्तन्त्रालोके। जालन्धरपीठे स्थिताया अर्धत्र्यम्बकमठिकायाः प्रधानगुरुरयमभूदभिनवगुप्तस्य काले। अस्य गुरुः श्रीशैलस्थः श्री सुमितनाथः। भुवनेश्वरीस्तोत्रे पृथ्वीधराचार्य एनं सिद्धनाथ इति शम्भुनाथ इति च नामभ्यां स्तुतवान्।**

"श्रीसिद्धनाथकरुणाकरशम्भुनाथ।
श्रीशम्भुनाथकरुणाकरसिद्धनाथ।।"

(भु०स्तो०,40)

"श्री सिद्धनाथ इति कोऽपि युगे चतुर्थे।
प्राविर्बभूव करुणावरुणालयेऽस्मिन्।
श्री शम्भुरित्यभिधया स मयि प्रसन्नं।
चेतश्चकार सकलागमचक्रवर्ती।।"

(तदेव,37)

"जयताज्जगदुद्धृतिक्षमोऽसौ भगवत्या सह शम्भुनाथएकः।
यदुदीरितशासनांशुभिर्मे प्रकटोऽयं गहनोऽपि शास्त्रमार्गः।।"

(तं०आ०1,13)

"श्रीशम्भुनाथभास्करचरणनिपातप्रभापगतसङ्कोचम्।
अभिनवगुप्तहृदम्बुजमेतद्विचिनुत महेशपूजनहेतोः।।"

(तदेव1,21)

द्र० चः- (तं० आ०5, 41; 8,254; 9, 264-265; 10, 186-187, 199; 13, 254-256; 13, 334-342; 15, 245-246, 339-352, 408; 19, 3-9; 20, 6, 21-26; 28, 366-367; 29,95; तं० आ० वि०, खं०1, पृ०, 31-32; तं० सा०, पृ०, 207; प० त्री० वि०, पृ०, 282, मा० वि० वा०1, 3-4) इति।

(2) योगसिद्धिप्राचुर्यकारणादेवायं सिद्धनाथ इति ख्यातिं गत इति सरभाव्यते। गुरुनामग्रहणे कातराश्च शिष्यपंक्तय एनं सिद्धनाथ इत्येवोक्तवत्यो न शम्भुनाथ इति वा तर्क्यम्। यथा जयरथः केयूरवर्ती ककारदेवीत्युक्तवान्। श्रीशिवानन्दनाथं च श्रीमदवतारकनाथ इति। यथा —

"अत्र श्रीककारदेव्यास्तस्याः।"

(तं०आ०वि०,खं०3,पृ०,195)

"श्रीमदवतारकनाथस्याप्यत्र त्रयोदशैव विवक्षिताः यो श्रीगोविन्दराजादीनामपि परमगुरुत्वेन स्थितः।"

(तदेव,पृ०,197)

(3) बहुभिर्नामभिस्तत्र तत्र स्थानेषु प्रसिद्धोऽयमभूदाचार्यः यदुक्तमभिनवगुप्तैरेव। यथा —

"भट्टं भट्टारिकानाथं श्रीकण्ठं दृष्टभैरवम्।
भूतिकलाश्रिया युक्तं नृसिंहं वीरमुत्कटम्।।
नानाभिधानमाद्यन्तं वन्दे शम्भुं महागुरुम्।"

उद्धः- (तं०आ०वि०,खं०1,पृ०,34)

(4) अयं मूलतो दाक्षिणात्यः, श्रीशैलस्थस्य सुमतिनाथस्य शिष्यत्वात्। परमग्रे जालन्धरपीठाधीश्वरत्वमवाप्य महतीं ख्यातिमलभत। तत्रैवाभिनवगुप्तसदृशाः गुरवोऽप्यस्य शिष्यतामुपयाताः। यथा —

"कश्चिद् दक्षिणभूमिपीठवसतिः श्रीमान्विभुर्भैरवः।
पञ्चस्त्रोतसि सातिमार्गविभवे शास्त्रे विधाता च यः।
लोकेऽभूत्सुमतिस्ततः समुदभूत्तस्यैव शिष्याग्रणीः।
श्रीमाञ्छम्भुरिति प्रसिद्धिमगमज्जालन्धरात् पीठतः।।"

उद्धः- (तं०आ०वि०,खं०1,पृ०,236)

~ सुमितनाथशिष्यः :—

"श्रीसोमतः सकलवित्किल शम्भुनाथः।"

(तं०आ०37,61)

इति वाक्यांशमाश्रित्य जयरथेन यत्

"श्रीसुमतिनाथस्य श्रीसोमदेवः शिष्यस्तस्य श्रीशम्भुनाथः इति ह्यायातिक्रमविदः।"

(तं०आ०वि०,खं०1,पृ०,236)

इत्युक्तं तदसङ्गतमिव प्रतीयते; यतोऽभिनवगुप्तेन श्रीशम्भुनाथस्य श्रीसुमतिनाथीयसाक्षात्शिष्यत्वमुक्तम्। यथा—

"इत्येतत् प्रथमोपायरूपं ध्यानं न्यरूपयत्।
श्रीशम्भुनाथो मे तुष्टस्तस्मै श्रीसुमतिप्रभुः।।"

(तं०आ०5,41)

"इति श्रीसुमतिप्रज्ञाचन्द्रिकाशान्ततामसः।
श्रीशम्भुनाथः सद्भावं जाग्रदादौ न्यरूपयत्।।"

(तदेव 10,287)

उभयत्रात्र शम्भुनाथस्य साक्षात् सुमतिनाथशिष्यत्वं स्पष्टमुक्तम्। "कश्चिद् दक्षिण-भूमिपीठ-वसतिः" इत्यादि पद्यमपि तथैव स्पष्टं प्रतिपादयति।

"श्रीसोमतः इत्यस्य पदस्य विषयेऽनुमातुं शक्यते यच्छम्भुनाथवत्तस्य गुरुः श्री सुमतिनाथोऽप्यनेकैर्नामभिः प्रसिद्धोऽभूदिति। अथवा सहोमया वर्तत इति सोमः। स च सुमतिनाथ एव। शक्त्यविभिन्नशिवपदस्थः इति। उमाख्या दूत्या युक्तः सोमः" इति वाऽत्र तात्पर्यम्।

अथवैतदपि सम्भवति यच्छ्रीशम्भुनाथो मूलतः सुमतिनाथशिष्यः सन् पश्चात् श्रीसोमतः जालन्धरपीठाधिपत्वं प्राप्तवानिति। तत्र तस्योत्तराधिकारीति न शिष्यः।

शम्भुभट्टारकः :— श्री शम्भुनाथ एवायं भवेद् योऽभिनवगुप्तस्य गुरुः। यथा —

"यथाह श्रीशंभुभट्टारकः—
'एको भावः सर्वभावस्वभावः
सर्वे भावा एकभावस्वभावाः।
एको भावस्तत्त्वतो येन दृष्टः
सर्वे भावास्तत्त्वस्तेन दृष्टाः।।' इति।"

(प०सा०वि०,पृ०,58-59)

शम्भवैक्यदीपिका :— किमपि शिवाद्वैतप्रतिपादकं पुस्तकं सोद्धरणं समुल्लिखितं महार्थमञ्जरीपरिमले।

यथा—

"यत् प्रयुक्तं शम्भ्वैक्यदीपिकायाम् :—
'विश्वमिदं मन्मयम्, मत्कार्यत्वात्। यदित्थं तत् तथा। यथा शरीरम्। इदं च मम कार्यं तस्मान्मन्मयम्।"

(म०मं०प०,पृ०,18)

द्र० चः- (म०मं०प०,पृ०,160) **इति।**

शय्याल्कृप्तिः :— समयदीक्षाङ्गविशेषः। गुरुणाऽनुगृहीतः शिष्यो मन्त्रन्यासपूर्वकं शय्यायां शाय्यते। तत्रासौ यद्यत् स्वप्ने पश्यति तेन-तेन तस्य भावि शुभाशुभमनुमातुं शक्यते। तदनुसारमेव दीक्षाशेषसम्पादनमस्य विधीयते। सैषा हि शय्याक्लृप्तिस्त्रिके। यथा—

"उक्तं च पूर्णां च कृशां ध्यात्वा द्वादशगोचरे।।
प्रविश्य हृदये ध्यायेत्सुप्तः स्वातच्छन्द्यमाप्नुयात्।"
(तं० आ०15,480-481)

द्र० चः- (तदेव 15,474-491) इति।

"तथा स्वप्नेऽप्यभीष्टार्थान् प्रणयस्यानतिक्रमात्।
नित्यं स्फुटतरं मध्ये स्थितोऽवश्यं प्रकाशयेत्।।"
(स्पं० का०,34)

शरस्वरः :— पञ्चमः स्वरः उकारः। यथा —

"उक्तं यथा—शरस्वरः उः।"
(तं०आ०वि०,खं०12,पृ०,200)

शरीरत्रयम् :— पाञ्चभौतिकं शरीरं स्थूलम्, महत्तत्वान्तःकरणबाह्यकरणतन्मात्रमयं सूक्ष्मम्, बिन्दुनादादि—समनान्तं परं शरीरम्। यथा—

"महाभूतात्मकं, पुर्यष्टकरूपं, समनान्तं यत् स्थूलं, सूक्ष्मं, परं शरीरम्।।"
(शि०सू०वि०,पृ०,38)

शरीरम् :— ~ परम् :—

द्र०:- **'शरीरत्रयम्'** इति।

~ सूक्ष्मम् :— द्र०:- **'शरीरत्रयम्'** इति।

~ स्थूलम् :— द्र०:- **'शरीरत्रयम्'** इति।

शरीरपीठरूपम् :— कौलाचारे पूर्वं स्वशरीरमेव षट्कोणचक्रभावनासम्भिन्नं पीठतयोपास्यम्। यथा —

"आकट्योराकन्धरमादोष्णोरा च नाभिसीमान्तम्।
षट्कोणं यच्छरीरं संवित्पीठं त्रिकोणसाम्यं तत्।।
इति स्थित्या स्वशरीरस्यैव पीठतयोपासनं प्राक् कर्तव्यम्।"
(म०मं०प०,पृ०,85)

शरीरात्मवादिनः :— चावार्कास्तत्प्रायाश्चान्ये सर्वे। यथा —

"देहाभिमानभूमिकायां स्थिताश्चार्वाकाः 'चैतन्यविशिष्टकायः पुरुषः' इति कायमेव प्राधान्येनाहुः—स्त्रीबालमूर्खाणां तथाभिमानात्।"
(ई०प्र०वि०,खं०1,पृ०,249-251)

शवः :— ~ साधनाक्रमे :— सदाशिवः। वस्तुतस्तु शक्तिरेव तस्यापि चैतन्यम्। तदपेक्षया भिन्नत्वेन, शक्तेरासनत्वेन भावनादौ कल्पनीयोऽसौ क्वचिच्छिव इत्युक्तः। इकारस्य शक्तिनामत्वेन व्यवहारात्। शक्तिरेव हि तस्य सदाशिवस्य शिवता। ततो नासौ शक्तिहीनः। परं तथापि भावनोपासनाभिप्रायेण शक्त्यपेक्षया पृथक्त्वेन या तद्विषया भावना तामनुरुध्य शक्तिव्यतिरेककल्पनया शब्दप्रयोगकरणे सदाशिवः शव इत्युच्यते क्वचित्, शक्तेः प्राधान्यविवक्षया। यथा—

स्वच्छन्दभैरवस्य ध्याने :—

"पञ्चवक्त्रं शवारूढं दशबाहुं भयानकम्।"
(ने०तं०10,2)

"ब्रह्मविष्णुमहेशान्तं शवान्तं परिकल्पयेत्।"
(स्व०तं०1,39)

साधनाक्रमे शक्तेरासनत्वेन सदाशिवो लक्षणया महाप्रेत इत्युक्तः क्वचित्। परं वस्तुतो नासौ शवः। कवित्वकल्पनामात्रत एव तद्विषये प्रेत इति शव इति च शब्दप्रयोगो लाक्षणिकः।

द्र०:- **'महाप्रेतः'** इति।

शवर्गदेवता :— चामुण्डा।

यथा—

"..... चामुण्डा तु शवर्गिका।"
(स्व०तं०1,36)

शशाङ्किनी :— ~ खेचरी :— सुगूढार्थैर्वाक्यैः प्रतिपादितेयं मुद्रा न स्पष्टतां याता।

यथा—

"सूपविष्टः पद्मके तु हस्ताग्राङ्गुलिरश्मिभिः।
पराङ्मुखैर्झटित्युद्यद्रश्मिभिः पृष्ठसंस्थितैः।।
अन्तःस्थितिः खेचरीयं सङ्कोचाख्या शशाङ्किनी।।"
(तं०आ०32,54-55)

शशिमण्डलम् :— ठकारात्मकस्य बीजमन्त्रस्यैवागमिकमभिधानं शशिमण्डलमिति।

यथा—

"शशिमण्डलं ठकारम्।"
(ने०तं०उ०,खं०2,पृ०,63)

शशी :— ~ उच्चारयोगे :— विषयग्रहणात्मिकाऽपानवृत्तिरपि शशीत्युच्यते उच्चारयोगे। यथाः—

"परानन्दगतस्तिष्ठेदपानशशिशोभितः।"
(तं०आ०5,46)

शश्वत् :— कालस्पर्शोत्तीर्णता यथास्यात्तथेति न पुनः सदातनत्वम्। सदातनत्वस्य सार्वकालिकत्वात्। ततश्च कालसम्बन्धस्तस्य न निवर्तते। यथा —

"शश्वदिति कालपरिच्छेदासम्भवः।"
(ई०प्र०वि०वि०,खं०1,पृ०,7)

शाकदर्शनम् :— नूतनशैवदर्शनमेव। शकनं शाकः। भावे घञ्। समस्तशक्त्येकघनः परमेश्वरः। तस्यैतस्या एव विशेषतायाः प्राधान्येन प्रतिपादकं नूतनं शैवदर्शनमेव हि शाकदर्शनम्। श्रीमदमृतवाग्भवाचार्यप्रवर्तितम्।

द्र०:- **'अमृतवाग्भवाचार्यः'** इति।

शाकिनी :— सूक्ष्मदेहस्थैव कापि स्त्री देवयोनिमध्ये गणिताऽऽचार्यैः।

यथा—

द्र०:- 'शाकिन्यः' इति।

द्र०:- 'मातरः' इति।

द्र०:- (ने०तं०उ०,खं०2,पृ०,145-146) **इति।**

शाकिन्यः :— सूक्ष्मदेहभाजः स्त्रीविशेषाः पूजनीयाः समयिना शिष्येण।

उक्तस्तासां स्वभावो यथा—

"शाकिन्यः पूजनीयाश्च ताश्चेत्थं श्रीगमोदिताः।।
साहसं द्विगुणं यासां कामश्चैव चतुर्गुणः।
लोभश्चाष्टगुणस्तासां शङ्कयं शाकिन्य इत्यलम्।।"

उद्ध०:- (तं०आ०15, 531-532)

"रूपपरिवृत्त्यर्थं पशुशोणिताद्याकर्षिणी शाकिनी।"

(ने०तं०उ०,खं०1,पृ०,47)

शाक्तक्षोभः :— चर्याक्रमेण शक्तिशक्तिमतोः रिरंसया परस्परौन्मुख्ये यत् स्पन्दनं स एव शाक्तक्षोभः।

यथा—

"शाक्ते क्षोभे इति बाह्यशक्तिसम्भोगे।"

यदुक्तम् :—

"शक्तिसङ्गमसंक्षुब्धशक्त्यावेशावसानिकम्।
यत्सुखं ब्रह्मतत्त्वस्य यत् सुखं स्वाक्यमुच्यते।।"

(वि०भै०,69)

उद्ध०:- (तं०आ०वि०,खं०3,पृ०,377-378)

~ वैशिष्ट्यत :— **सर्वेष्वपि रहस्यचर्योपायेषु शाक्तः क्षोभ एवोत्कृष्टतमो विसर्गभूसमासादनोपायः। यथा—**

"कथं शाक्तस्यैव क्षोभस्य प्राधान्येन निर्देशः कृत? इत्याशङ्क्याह।"

(तं०आ०वि०,खं०3,पृ०,380)

"सोमसूर्यकलाजालपरस्परनिघर्षतः।
अग्नीषोमात्मके धाम्नि विसर्गानन्द उन्मिषेत्।।"

(तं०आ०5,72)

नाधिकं स्पष्टीकरणमेवंविधस्य रहस्योपायस्योचितमित्यस्त्वेतावन्मात्रम्। द्रष्टव्यं विस्तरतो मालिनीविजयवार्तिके प्रथमे काण्डे 893-898 यावत्।

शाक्तप्रणवः :— द्र०:- **'प्रणवः'** ~ 'शाक्तः' इति।

शाक्तलिङ्गम् :— उच्चारयोगाभ्याससाफल्ये साक्षात्कार्यं नरशक्त्युभयात्मकं स्पन्दस्वरूपं लिङ्गम्। एतच्च व्यक्ताव्यक्तलिङ्गमुन्मिषद्वेधं, भुक्तिमुक्त्युभयप्रदम्। इदमहमिति साक्षात्परामर्शात्मकमेतल्लिङ्गम्। लिङ्गत्वं चास्य लयादागमनाच्च। विश्वमित एवोदेत्यत्रैव च लीयते।

यथा—

"एवमुच्चारविश्रान्तौ यत् परं स्पन्दनं गलिताशेषवेद्यं, यच्चोन्मिषद्वेद्यं, यच्चोन्मिषितवेद्यं तदेव लिङ्गत्रयम्।"

(तं०सा०,पृ०,40-41)

"देहगाध्वसमुन्मेषे समावेशस्तु यः स्फुटः।।
अहन्ताच्छादितोन्मेषिभावेदं भावयुक् स च।
व्यक्ताव्यक्तमिदं लिङ्गं मन्त्रवीर्यं परापरम्।।
नरशक्तिसमुन्मेषि शिवरूपाद्विभेदितम्।।"

(तं०आ०5,114-116)

द्र०:- 'व्यक्ताव्यक्तलिङ्गम्' इति।

~ तद्विशेषता :— **उपासनाक्रमे सकलभोगमोक्षप्रदं शाक्तमेव लिङ्गं भवति। शिवाख्यं लिङ्गं केवलं मोक्षप्रदम्, नराख्यं च केवलं भोगप्रदम्। यथा —**

"न पुंसि न परे तत्त्वे शक्तौ मन्त्रं नियोजयेत्।
पुंस्तत्त्वे जडतामेति परे तत्त्वे तु निष्फलः।।
शक्तौ मन्त्रो नियुक्तस्तु सर्वकर्मफलप्रदः।"

उद्ध०:- (तं०आ०वि०,खं०3,पृ०,425)

"मृच्छैलधातुरत्नादिभवं लिङ्गं न पूजयेत्।
यजेदाध्यात्मिकं लिङ्गं यत्र लीनं चराचरम्।।
बहिर्लिङ्गस्य लिङ्गत्वमनेनाधिष्ठितं यतः।
अतः प्रपूजयेदेतत् परमाद्वैतमाश्रितः।।"

(मा०वि०तं०18,2-4)

शाक्तवेध :— वेधदीक्षायाः प्रकारविशेषो, द्विः प्रतिपादितोऽपि सम्यगवबोद्धुं न शक्यते विना गुरुकृपाम्।

कुलगह्वरे यथा —

"शाक्तं शक्तिमदुच्चारादुगन्धोच्चारेण सुन्दरि।
शृङ्गाटकासनस्थं तु कुटिलं कुण्डलाकृतिम्।।
अनुच्चारेण चोच्चार्य वेधयेन्निखिलं जगत्।
एवं भ्रमरवेधेन शाक्तवेध उदाहृतः।।"

(तं०आ०29,246-247)

अन्यमते यथाः —

"नाड्याविश्यान्यतरया चैतन्यं कन्दधामनि।
पिण्डीकृत्य परिभ्रम्य पञ्चाष्टशिखया हठात्।।
शक्तिशूलाग्रगमितं क्वापि चक्रे नियोजयेत्।
शक्त्येति शाक्तो वेधोऽयं सद्यः प्रत्ययकारकः।।"

(तदेव,257-258)

मत्तगन्धाख्यगुदस्थानसंकोचनात्कुटिलाकृतेः प्राणशक्तेर्बलात् स्वयमेवोच्चरति प्राणोच्चारेऽवधाय सर्वमपि चक्रजातं वेधयेदिति तात्पर्यमस्य रहस्योपदेशस्य।

शाक्तशैवाभिन्नता :— उत्पलदेवादिभिश्शैवैर्भट्टप्रद्युम्नादयश्शाक्ताः स्वयूथ्या इति व्यपदिष्टाः। तस्माच्छाक्ताः शैवा एव, नान्यवर्गीया इत्यवधातव्यम्। यथा —

(क) "स्वयूथ्यानद्वयवादिनः प्रतीदानीमारम्भः। तथा च

तैरुक्तम् :—

"यस्या निरुपधिज्योतीरूपायाः शिवसंज्ञया।
व्यपदेशः परां तां त्वामम्बां नित्यमुपास्महे।।' इति"।

(शि०दृ०,वृ०,पृ०,94)

(ख) "शिवता नान्यत्र क्वचिद्भवेदिति शैवदर्शनानुपपत्तिः स्वयूथ्यानाम्।।"

(तदेव,पृ०,98)

शाक्तसमावेशः :— उच्चारादि-बाह्यालम्बनसाहाय्यरहितः स्वस्वरूपभावनाभ्यासलभ्यः शिवभावसमावेशः। अत्र हि निजं शुद्धं स्वरूपमेवालम्बनम्। तद्विषय एव विकल्पात्मिकाया भावनाया अभ्यासः, अहं सर्वत्र, मयि सर्वमित्यादिरूपः।

यथा —

"उच्चाररहितं वस्तु चेतसैव विचिन्तयन्।
यं समावेशमाप्नोति शाक्तः सोऽत्राभिधीयते।।"

(मा०वि०तं०2,22)

द्र०:- 'समावेशः' ~ 'शाक्तः' इति।

प्राणचारादिप्रमेयवस्त्वालम्बनरहितो भावनाभ्यासः।

"प्राणक्षोभवर्जितः सानन्दः शाक्तः।"

(म०प्र०वि०,पृ०,22)

शाक्तसिद्धा :— ~ मुद्रा :— ताश्च खेचरीप्रभृतयः।

"शाक्तसिद्धाखेचरी लेलिहानेति।"

(म०प्र०वि०,पृ०,87)

शाक्ताणवभेदः :— शाक्तोपाये स्वस्मादन्यत् किमपि प्रमेयं नैव शुद्धविकल्पस्यालम्बनतां नीयते, अपि तु स्वात्मैव। यथा— "अहं सर्वम्; मयि सर्वम्; अहं सर्वत्र, मत्तः सर्वम्" इत्यादिरूपाणां स्वात्मविषयकाणां शुद्धविकल्पानामभ्यासः शाक्तोपायः। स्वस्माद् भिन्नं, बुद्धि-प्राण-देह-बाह्यादि-विषयजातमधिकृत्य विधीयमानः शुद्धविकल्पज्ञानाभ्यासः पुनराणवोपायः। तत्रोपाये किमपि प्रमेयं वस्तु परिपूर्णपरमेश्वरतया भाव्यते; "सर्वं सर्वात्मकम्" इति सिद्धान्तमुपाश्रित्य। ततस्तद्भावनयापि शिवतायाः समावेशो जायते। संक्षेपतः शाक्तः स्वात्मालम्बनो शुद्धविकल्पात्मको भावनाभ्यासः, आणवश्च प्रमेयालम्बनस्तथाविधो विकल्पाभ्यासः इति।

यथाः —.

"विकल्पस्य द्वयी गतिः, स हि कस्यचिदुपायान्तरनिरपेक्षतया स्वस्वातन्त्र्यादेव संस्कृतः स्यात्, कस्यचित्तु अन्यथा। तत्र पूर्तः प्रकारः शाक्तोपाये निरूपित; इतरः पुनराणवोपाये निरूपयिष्यते।"

(तं०आ०वि०खं०3,पृ०310-311)

उपायान्तरपदेनात्र भावनालम्बनान्तरमभिप्रेतं मन्तव्यम्। आणवेनाप्युपायेन विकल्पसंस्कार एव साध्यो भवतीति स्पष्टीकृतम् अनेनः —

"विकल्पः कस्यचित्स्वात्मस्वातन्त्र्यादेव सुस्थिरः।
उपायान्तरसापेक्ष्यवियोगेनैव जायते।।
कस्यचित्तु विकल्पोऽसौ स्वात्मसंस्करणं प्रति।
उपायान्तरसापेक्षः .....।।"

(तं०आ०5,3-4)

उपायान्तरसापेक्षो हि ध्यानोच्चारादिविधिः। तद्राहित्येनैव शाक्तेन विधिनेति तात्पर्यम्।

स्पष्टीकृतं प्रश्नपूर्वकं यथा—

"ननु वैकल्पिकी किं धीराणवे नास्ति तत्र सा।
अन्योपायात्र तूच्चारहितत्वं न्यरूपयत्।।"

(तं०आ०1,219)

तत्र = आणवे। अत्र = शाक्ते।

उच्चाराद्यालम्बनताऽऽणवे नासौ शाक्ते इति।

शाक्तीः— ~भूमि :— परस्य तत्त्वस्य पञ्चकृत्योल्लासलीलाप्रवणाऽवस्था।

~ उपास्या :— **शिवात्मिका भूमिर्नोपास्या, अभेदमयत्वात्तस्याः उपास्योपासकसम्बन्धातीतत्वात्। नरात्मिकायाः पुनर्जडत्वेनोपास्यत्वाभावात् सापि नोपासनीया। ततः शक्त्येव भूमिरूपास्या। सैव भुक्तिमुक्तिफलप्रदा।**

यथा—

"शाक्ती भूमिश्च सैवोक्ता यस्यां मुख्यास्ति पूज्यता।
अभातत्वादभेदाच्च नह्यसौ नृशिवात्मनोः।।"

(तं०आ०17,15)

"न पुम्सि न परे तत्त्वे शक्तौ मन्त्रान्नियोजयेत्।"

उद्ध०:- (तं०आ०वि०,खं०10,पृ०,136)

शाक्तेन शाम्भवः :— शाक्तोपायेन शाम्भवस्याधिगमः। यथा —

विकल्पसंविदोऽभ्यासः करोत्येवाविकल्पताम्।
यतः शास्त्रविकल्पज्ञोऽभ्यासाद्यात्यविकल्पताम्।।"

(पू०प्र०1,174)

काश्चिदुत्कृष्टतरः साधकः साक्षात् शाम्भवमेवाभ्यस्यति, कश्चित् पुनः शक्तेनाभ्यस्यँस्तत्परिपक्वतायां स्वतः सम्पन्नामेव शाम्भवीमभ्यासभुवमारोहति। अथवा आसने स्थित्वा प्रथमं शाक्तमभ्यासमारभते, तत एव शाम्भवीं प्रक्रियामाश्रयति। सोऽयमप्यभ्यासः शाक्तेन शाम्भव इति।

शाक्तोपायः :— (1) क्षणिकानां शुद्धविकल्पज्ञानानां परम्परायाः सततगत्याऽभ्यासः शाक्तोपाय इति। यथा —

"विकल्पः संस्कृतः सूते विकल्पं स्वात्मसंस्कृतम्।
स्वतुल्यं सोऽपि सोऽप्यन्यं सोऽप्यन्यं सदृशात्मकम्।।"

(तं०आ०4,3)

(2) स्वात्मविषये शुद्धविकल्पात्मकस्य भावनामयस्य ज्ञानस्य सततगत्याऽभ्यासः। यथा :— विश्वोत्तीर्णोऽहं, विश्वमयोऽहं, सर्वत्राहं, मयि सर्वम्, अहं सर्वम, मत्तः सर्वम् इत्यादि।

विकल्पसंस्कार इत्यस्योपायस्य नामान्तरम्। भावनोपायो,

ज्ञानोपायो, भेदाभेदोपायो, ज्ञानयोगः, शाक्तयोगः, सत्तर्कः, इत्येवं प्रकाराण्यस्य नामान्तराणि। इदमेवोपनिषत्सु निदिध्यासनमित्युक्तं, परं विवर्त्तवादिभिरन्यथा व्याख्यातम्।

यथा —

"विकल्पबलाद् एव जन्तवो बद्धम् आत्मानम् अभिमन्यन्ते, सोऽभिमानः संसारप्रतिबन्धहेतुः, अतः प्रतिद्वन्द्विरूपो विकल्प उदितः संसारहेतुं विकल्पं दलयति, इति अभ्युदयहेतुः। स च एवं रूपः समस्तेभ्यः परिच्छिन्नस्वभावेभ्यः शिवान्तेभ्यस्तत्त्वेभ्यो यद् उत्तीर्णम् अपरिच्छिन्नसंविन्मात्ररूपं, तदेव च परमार्थः, तत् वस्तुव्यवस्थास्थानं, तद् विश्वस्य ओजः, तेन प्राणिति विश्वम्, तदेव च अहम्। अतो विश्वोत्तीर्णो विश्वात्मा च अहम इति।"

(तं०सा०,पृ०,21)

"नन्वित्थं परं तत्त्वं विकल्प्यरूपं स्यात्? मैवम्, विकल्पस्य द्वैताधिवासभङ्गमात्रे चरितार्थत्वात्।"

(तदेव,पृ०,22)

"तथाविध (शुद्ध) विकल्पप्रबन्ध एव सत्तर्क इत्युक्तः; स एव च भावना भण्यते, अस्फुटत्वाद् भूतमप्यर्थमभूतमिव स्फुटत्वापादनेन भावयते ययेति।"

(तदेव,पृ०,23)

द्र०:- ~ 'विस्तरतः': — तन्त्रालोके चतुर्थे आह्निके 1-15 इत्यत्र।

"नाहं देहात्मको नाहं कर्माधीनो न मे मलः।
नान्येन प्रेरितोऽस्मीति किंत्वेतद्विपरीतकम्।
इत्थं विकल्पं संस्कृत्य स्पष्टविद्यात्मतां नयन्।
कश्चिद्याति समावेशं धन्यः श्री गुरु वाक्यतः।।"

(तं०व०धा०2,6-7)

(3) शुद्धविकल्पस्य पुनः पुनरभ्यासेनाशुद्धविकल्पसंस्कारस्य प्रलोपे सति साधको निश्चयपूर्वकमात्मानं परमेश्वरमभिमन्यते। यथा —

"इदं विकल्पनं शुद्धविद्यारूपं स्फुटात्मकम्।।
प्रतिहन्तीह मायीयं विकल्पं भेदभावकम्।"

(तं०आ०4,113-114)

~ कालीनयात्मकः :—

द्र०:- 'काली' इति।

~ क्रमप्रक्रियात्मकः :— **द्र०:- 'काली'** इति, **कालीनयः'** इति,

'क्रमदर्शनम्' इति, **'क्रमनयः'** इति च।

~ जपात्मकः :— **वास्तविकस्य सत्यस्य पुनः पुनर्विमर्शनस्य अभ्यासः शाक्तयोगे जपः। यथा—**

"उभयात्मकपरामर्शोदयार्थं बाह्याभ्यन्तरादिप्रमेयरूपभिन्नभावानपेक्षयैव 'एवंविधं तत् परं तत्त्वं स्वस्वभावभूतमिति अन्तः परामर्शनं जपः।"

(तं०सा०,पृ०26)

द्र०:- 'जपः' ~ 'शाक्तोपाये' इति।

~ध्यानात्मकः :— द्र०:- **'ध्यानम्'** ~ 'शाक्तोपाये' इति।

~ परम्परोपायः :— **शाक्तोपायो न साक्षाद् प्रत्यभिज्ञाफलदः। अपितु शाम्भवोपायप्रवेशदः। तद्द्वारैव तस्य प्रत्यभिज्ञोपायता।**

"तेनास्य शाम्भवोपाय एव विश्रान्तिः, इत्यावेदितम् ... . येन निर्विकल्पस्वरूपानुप्रवेशो भवेत्।"

(तं०आ०वि०,खं०3,पृ०,2)

~ पर्यवसाने :— **परिपक्वावस्थायां विकल्पे स्फुटतमतां याते सति स विकल्पोपायोऽपि निर्विकल्पसाक्षात्कारदशामाप्नोति। यथा** —

"अभिमानेन संकल्पाध्यवसायक्रमेण यः।
शाक्तः स मायोपायोऽपि तदन्ते निर्विकल्पकः।।"

(तं०आ०1,215)

"अन्ते स्फुटतमार्थसाक्षात्कारात्मा निर्विकल्पः शाम्भवः समावेशः स्यात्।"

(तं०आ०वि०,खं०1,पृ०,238)

~ प्रकारभेदतः :— **(1) विकल्प-संस्कारो बहुधा विधीयते। ततस्तद्रूपस्य शाक्तोपायस्य बहवः प्रकाराः। तेषु ये मुख्यास्ते पञ्च। तद्यथा यागो, होमो, जपो, व्रतं, योग इति। पारिभाषिक्य एताः संज्ञाः, न प्रसिद्धतरयागादितया ग्राह्याः। शुद्धविकल्पाभ्यासप्रकाराः इमे, न बाह्यक्रियारूपाः। यथा** —

"सत्तर्क एव साक्षात्तत्र (विकल्पसंस्कारे) उपायः। स च शुद्धविद्या। स च बहुप्रकारतया संस्कृतो भवति। तद्यथा :— यागो, होमो, जपो, व्रतं, योग इति।"

(तं०सा०,पृ०,25)

(2) विकल्पसंस्कारो बहुप्रकारकैरभ्यासैर्विधीयते। तेषां प्रकाराणां भिन्नभिन्नानि पारिभाषिकाणि नामानि, तद्यथा :— स्नानम्, शुद्धिः, पूजनम्, होमः, ध्यानम्, जपः इत्यादिनि।

"शुद्धविद्यापरामर्शो यः स एव त्वनेकधा।।
स्नानशुद्ध्यर्चनाहोमध्यानजप्यादियोगतः।"

(तं०आ०4,114-115)

~ फलदृष्ट्या :— **इहैव जन्मनि स्वात्मनो भैरवत्वप्रख्यातिः, पतिते च देहे एकमात्रपरशिवता शाक्तोपायफले। यथा** —

"अत्र यागे गतो रूढिं कैवल्यमधिगच्छति।
लोकैरालोक्यमानो हि देहबन्धविधौ स्थितः।।"

(तं०आ०4,212)

~ महेश्वरानन्दमते :— **उक्तं हि तेन। यथा** —

"प्राणस्पन्दोच्चारणाद्यशुद्धविकल्प आणवः। चित्तमात्रनिर्वर्त्यशुद्धविकल्पात्मा शाक्तः। विकल्पसर्वविलयस्वभावः शाम्भव इति

त्रिविधेऽप्युपायतत्त्वे स्थूलसूक्ष्मादितारतम्ययोगेन शक्त्युल्लेखस्य सर्वत्राप्यनुस्यूतिः।"

(म०मं०प०,पृ०,141)

मतमेतन्महेश्वरानन्दस्य कौलत्वेन शक्तिभक्तस्य। न खलु शाम्भवेऽनुपाये वा विकल्पोपयोगः। तयोः सर्वथा निर्विकल्पत्वात्। न ततस्तत्र शाक्तस्य संकरः। आणवश्चापि शुद्ध एव विकल्पो नाशुद्धः अशुद्धस्तु क्रयविक्रयादिरूप एव। परं ग्राह्यबाह्यप्रमेयालम्बनः। इति शाक्तात्तस्य विशेषः।

~यागात्मक :— द्र०:- **'यागः'** ~ 'शाक्तोपाये' इति।

~योगात्मक :— द्र०:- **'योगः'** ~ 'शाक्तोपाये' इति।

~ वीर्यदृष्ट्या :— **शाक्तोपायस्तद्वैव मोक्षोपायतां भजेत यदा शाम्भवे पर्यवस्येत्। शाम्भवपदमवाप्यैवासौ परमार्थमोक्षप्रदः। ततः शाक्तभावनायाः सारभूतं वीर्यमकिञ्चिच्चिन्तनात्मकः शाम्भवो योगः। यथा —**

"अकिंचिच्चिन्तनं वीर्यं भावनायाम् .....।"

(तं०आ०5,156)

~ व्रतात्मक :— द्र०:- **'व्रतम्'** ~ 'शाक्तोपाये' **इति।**

~ होमात्मक :— द्र०:- **'होमः'** ~ 'शाक्तोपाये' **इति।**

~ सप्रयोजन :— **(1) ननु विद्यमाने त्वरितफलदे शाम्भवे किं प्रयोजनं शाक्तेनाणवेन चेति? अत्रोच्यते :—न खलु सर्वेऽपि साधकाः शाम्भवेनोपायेन स्वरूपे प्रवेष्टुं समर्थाः। ततो यो भगवतो महेश्वरस्यानन्यभक्तः सन्नपि तेनोपायेन स्वे महेश्वरभावे न प्रवेष्टुं शक्तस्तस्य कृते शाक्तोपाय उपदिष्टो वेदितव्यः। यश्च तदभ्यासेऽप्यसमर्थस्तस्य कृते आणवः। तत्रापि तारतम्यमनयैव दृष्ट्या। अनेनैवाभिप्रायेणावरोहक्रमेणैव प्रतिपादिताः शाम्भवाद्या उपाया, नारोहक्रमेण, यथा पातञ्जले योगसूत्रे।**

(2) ननु सति शाम्भवे किं प्रयोजनं शाक्तेन। यथा —

"इह तु पुरोक्ताद् युक्तिकलापाद्
यः प्रविशेत् सद्यो नाशक्तः।
तं प्रति शाक्तोपायपथेन
प्रकटीक्रियते हृदयस्पन्दः।।"

(मा०वि०वा०2,26)

~ साफल्यरहस्यत :— **जपहोमध्यानादितया परिभाषितानां शाक्तोपायप्रकाराणां बहुविधेन सतताभ्यासेन तथा स्वात्मसंविद्द्वैतवासनाप्रक्षालनपूर्वकमद्वैतनिष्ठतामापाद्यते, यथा समनिम्नोन्नतादिस्थलीषु बाह्यमानोऽश्वः स्वेच्छानुकूलधारी सुशिक्षितः सञ्जायते। यथा —**

"यथाहि तत्र तत्राश्वः समनिम्नोन्नतादिषु
चित्रे देशे बाह्यमानो यातीच्छामात्रकल्पिताम्।
तथा संविद्विचित्राभिः शान्तघोरतरादिभिः।
भङ्गीभिरभितो द्वैतं त्याजिता भैरवायते।।"

(तं०आ०4,205-206)

~ स्नानात्मक :— द्र०:- **'स्नानम्'** ~ शाक्तोपाये इति।

शादिवर्गः :— ~ मातृकासु :— **महामाया, शुद्धविद्या, ईश्वरः, सदाशिवः, शक्तिः, इत्यस्य तत्त्वपञ्चकस्य यद्वातविकं स्वरूपं तत् स्वात्मनः एव शक्तिपञ्चकस्य स्वस्मिन्नेव चित्प्रकाशे प्रतिबिम्बात्मकं बाह्याभासरूपत्वम्। तस्यैवाभिव्यञ्जका इमे शादयः क्षान्ताः पञ्च मातृकावर्णाः मातृकायोगक्रमाभ्यासे। एतान् वर्णानन्तरवधानालम्बनकृद्योगी एतानि तत्त्वानि स्वशक्तिप्रतिबिम्बरूपाणि पश्यन् स्वात्मानं च, तत्प्रतिबिम्बखचितं सानन्दसन्दोहं साक्षात्कुर्वंस्तृप्यति।**

"शादि-क्षान्तं महामाया विद्येश्वरसदाशिवशक्त्याख्यं तत्त्वपञ्चकम्।"

(प०त्री०वि०,पृ०,117)

शान्तनाद :— वंशध्वनिसदृशो ध्वनिर्यो नादयोगाभ्यासतः श्रूयते। यथा —

"नादं वै व्यापकं ध्यायेदहोरात्रायनेषु च।
दक्षिणोत्तरसंक्रान्त्या विषुवज्ज्ञस्य मोक्षदः।।
वंशध्वनिसमप्रख्यः शान्तनादस्तु स स्मृतः।
सदाशिवः स विज्ञेयः .....।।"

(स्व० तं०12,148-149)

"घोषादिविशेषरूपतोपशमात् शान्तः प्रोक्तस्थूलसदाशिवविलक्षणः।"

(स्व०तं०,उ०12,पृ०,80)

शान्तब्रह्मवाद :— विवर्तवादिनामसौ ब्रह्मवादो यदनुसारं ब्रह्मनिष्क्रियमस्पन्दमनीश्वरं च; सर्वं च सृष्टिसंहारादिक्रिया- त्मकमीश्वरत्वमविद्यात्मकोपाधिवशादाभासमानमनाद्यज्ञानोप- हतैरेव च जीवैः संवेद्यमानं सद् वस्तुतो वन्ध्यासुतवदसत्यमेव। यथा —

"न खल्वेष शिवः शान्तो नाम कश्चिद्विभेदवान्।।
सर्वेतराध्वव्यावृत्तो .....।"

(तं०आ०15, 264-265)

शान्तम् :— ~ पदम् :— **(1) स्फुटविमर्शात्मकस्पन्दाभिव्यक्तिरहितं प्रकाशमात्रमन्तर्लीनविमर्शं पदं शान्तम्। तच्च विश्वोत्तीर्ण-शुद्धसंविन्मात्रम्। यथा —**

"शान्तमिति विश्वोत्तीर्णम्।"

(तं०आ०वि०,खं०11/2,पृ०,84)

(2) सुषुप्तेस्तृतीयो भेदो यत्र वेद्यसंस्कारोऽपि विलीयते। यथा —

"शान्तमिति प्रलीनसंस्कारत्वात्।"

(तं०आ०वि०,खं०7/1,पृ०,179)

"चतुर्धा रूपसंस्थं तु ज्ञातव्यं योगचिन्तकैः।
उदितं विपुलं शान्तं सुप्रसन्नमथापरम्।।"

(मा०वि०तं०2,44)

(3) शक्तिशक्तिमतोः स्वात्मनिष्ठत्वमेव रूपम्, उदितसमाख्यात् परस्परसङ्घट्टमयाद्रूपादन्यदेतत्। यथा —

"नो शान्तं नाप्युदितं शान्तोदितसूतिकारणं परं कौलम्।"
(तं०आ०29,117)

"रूपमुदितं परस्परधामगतं शान्तमात्मगतमेव।"
(तदेव, 29,120)

"शान्तोदितात्मकं द्वयमथ युगपदुदेति शक्तिशक्तिमतोः।"
(तदेव 29,119)

विश्वोत्तीर्णा सृष्ट्यादिसंरम्भशून्या शुद्धसंविन्मात्ररूपा स्थितिः स्वात्मनः शान्तं पदम्। इत्येतदत्र तात्पर्यम्।

~ तदुपास्तिफलम् :— **कौलयागविधौ शान्तस्वरूपानुसन्धानपरा योगिनः शान्तं शिवपदमाप्नुवन्ति। यथा —**

"यत्तच्छान्तं रूपं तेनाभ्यस्तेन हृदयसंवित्त्या।।
शान्तं शिवपदमेति हि गलिततरङ्गार्णवप्रख्यम्।"
(तं०आ०29,133-134)

~ निरानन्दम् :— **सृष्ट्याद्यैश्वर्यचमत्काराभिव्यक्तिशून्यं पदम्।**

"तच्छान्तपदाध्यासाच्चक्रस्थो देवतागणः सर्वः।।
तिष्ठत्युपरतवृत्तिः शून्यालम्बी निरानन्दः।"
(तं०आ०29,134-135)

शान्ताः— ~ कला :— **शुद्धविद्यादिशक्त्यन्तं तत्त्वजातं व्याप्य तिष्ठन्ती कला शान्तेति वा शान्तिरिति वा परिभाष्यते। यथा —**

"शुद्धविद्यादिशक्त्यन्ते शान्ता, कञ्चुकतरङ्गोपशमात्।
(तं०स०,पृ०,109-110)

"अशेषभेदोपशमाच्छान्ता।"
(स्व०तं०उ०खं०2,प०.4,पृ०,108)

~ व्याप्तित :—

"शान्तायाः कलायास्तालुनो बिन्द्वन्तं व्याप्तिः तत्र शुद्धविद्यादितत्त्वत्रयस्थितिः, तत्र ईश्वरस्याधिकृतिः।"
(प०त्री०विवृ,पृ०,11-12)

शान्ताख्या :— ~ खेचरी :— **लक्षिताऽस्पष्टैरेव वाक्यैः।**

द्र०:- **'खेचरी'** ~ **'शान्ताख्या'** इति।

शान्तातीता :— ~ कला :— **शान्त्यतीता कला। सा च शिवतत्त्वे, भावनादौ तस्यापि कल्यमानत्वात्। यथा—**

"शान्तातीता शिवे तत्त्वे .....।"
(तं०आ०11,9)

"अशेषभेदोपशमाच्छान्ता, तामप्यतीता तत्संस्कारेणापि शून्या शान्तातीता।"
(स्व०तं०उ०,खं०2,प०4,पृ०,108)

शान्ति :— ~ कला :— **शान्तैव कला शान्तिकला। कञ्चुकतरङ्गोपशमयुक्ततत्त्वव्यापिनी कला, शुद्धविद्यादिशक्त्यन्ततत्त्वालयभूता। यथा —**

"मायीयस्योपशमनेन .....।"
(तं०आ०वि०,खं०7/2,पृ०,3)

~ तद्विशेषाः — **अत्र वर्णास्त्रयः, मन्त्र एकः, पदमेकं, तत्त्वानि त्रीणि, भुवनानि चाष्टादश। यथा —**

अग्न्यर्णतत्त्वमेककपदमन्त्रं सैन्यभुवनमिति तुर्या।
(तं०आ०11,52)

द्र०:- (तं०सा०,पृ०,113) इति।

शान्त्यतीतः :— **शान्तिकलोत्तीर्णः परमशिवः।**

~ ध्येयत्वेन :— **देशाध्वधारणायां ध्यानार्थं परशिवस्यापि शरीरकल्पना। यथा —**

"शान्त्यतीतः शिवस्तत्र तच्छक्तयुत्सङ्गभूषितः।
निवृत्त्यादिकलावर्गपरिवारसमावृतः।
असंख्यरुद्रतच्छक्तिपुरकोटिभिरावृतः।।"
(तं०आ०8,377-378)

शान्त्यतीता :— ~ कला :— **शान्तातीतैवेति। शिवतत्त्वस्यापि भावनादौ कलनीयत्वेन कलात्वं व्यवह्रियते कलाध्वसाधनायाम्। ततः शिवतत्त्वं शान्त्यतीता कला। यथा —**

"शिवतत्त्वे शान्तातीता, तस्योपदेशभावनार्चादौ कल्यमानत्वात्।"
(तं०सा०,पृ०,110)

"तदतीतत्वेन च कलनात्तदाख्यत्वम्।"
(तं०आ०वि०,खं०7/2,पृ०,3)

~ अभुवनाः — **चतसृष्वपि कलासु विविधसंख्याकाः भुवनावल्यः परं शान्त्यतीता कला त्वभुवनैव। न तत्र प्रयोज्यप्रयोजकव्यापारः, पूज्यपूजकव्यापारो वा, ईशित्रीशितव्यव्यापारो वा कोऽपि। यथा—**

"..... शान्त्यतीता त्वभुवनैव।"
(तं०आ०8,452)

एतच्च मालिनीविजयानुसारमेव। अन्यत्रत्यासु प्रक्रियासु तत्रापि भुवनकल्पना भावनीयैव।

यथा—

"ननु शान्त्यतीतायामप्यन्यत्र भुवनविभाग उक्तस्तत् पुनरिह कस्मात् न ?"
(तं०आ०वि०,खं०5,पृ०,283)

~ तद्विशेषा :— **अत्र वर्णा षोडश, मन्त्र एकः, पदमेकम्, तत्त्वमेकम्, भुवनं न किमपि। यथा —**

"षोडश वर्णाः पदमन्त्रतत्त्वमेकं च शान्त्यतीतेयम्।"
(तं०आ०11,53)

द्र०:- (तं०सा०,पृ०,113) इति।

~ तद्व्याप्ति :—

"शान्त्यतीताया बिन्दोः करन्ध्रान्तं व्याप्तिः, तत्र

अनन्तव्याप्तशिवतत्त्वस्थितिः तत्र अनाश्रितशिवस्याधिकृतिः।"
(प०त्री०,विवृ०,पृ०,12)

शाम्भवदीपिका :— किमपि शैवशास्त्रम्।

द्र०:- (म०मं०प०,पृ०,115) इति।

शाम्भवयोगः :— शाम्भवोपायः इति।

~ अनादृतान्यसाधन :— **न हि शाम्भवोपायाभ्यासे मन्त्रमुद्रादीनां यमनियमादीनां ध्यानधारणासमाध्यभ्यासानां वा विषये कोऽप्यादरः। यथा —**

"अयं रसो येन मनागवाप्तः
स्वच्छन्दचेष्टानिरतस्य तस्य।
समाधियोगव्रतमन्त्रमुद्रा-
जपादिचर्या विषवद्विभाति।।"

उद्ध०:- (तं०आ०वि०,खं०2,पृ०,247)

~ त्रिप्रकारक :— **(1) साक्षाच्छाम्भवः।**

(2) शाक्तेन शाम्भवः (शाक्तोपायमारम्य पश्चात् शाम्भवे सङ्क्रमणेन)।

(3) आणवेन शाम्भवः = आणवमारभ्याभ्यस्यतो योगिनस्ततः शाक्ते ततश्च शाम्भवे सङ्क्रमणेन। साक्षाद्वाऽऽणवादेव शाम्भवे सङ्क्रमणेन।

तदुक्तम् :—

"तत्रापि स्वपरद्वारद्वारित्वात् सर्वशोऽशशः।
व्यवधानाव्यवधिना भूयान्भेदः प्रवर्तते।।"
(तं०आ०1,143)

~ प्रकारभेदत :— **मुख्यमस्य प्रकारद्वयम्, यथा :—**

(1) मातृकाख्यः प्रकारो यस्तन्त्रालोकतन्त्रसारादौ विस्तरेण प्रतिपादितः।

द्र०:- **'मातृका'** इति।

(2) मालिन्याख्यः प्रकारो यः परात्रीशिकाविवरणे सविस्तरं प्रतिपादितः 151-154 पृष्ठेषु।

द्र०:- **'मालिनी'** इति।

(3) उत्कृष्टतरश्च प्रकारो यः प्राचीनेषु नवेषु च शास्त्रेषु प्रतिपादितो यथा :—

कालिकेन क्रमेण :—

(क) भगवद्गीतासु) :— **तत्र षष्ठेऽध्याये शाम्भवीमुद्रासहायाः शाम्भवोपायः स्पष्टं प्रतिपादितः। विशेषतः अ० 6- श्लो० 11-25 इत्यत्र। यथा —**

"शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्।। 11।।
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये।। 12।।
समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।
विलोक्य नासिकाग्रं स्वं दिशश्चानवलोकयन्।। 13।।
.....
.....
यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा।। 18।।
यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः।। 19।।
.....
.....
.....
शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्।। 25।।"
(भ०गी०6,13-25)

(ख) याज्ञवल्क्यस्मृतौ) :— **तत्र तृतीयेऽध्याये, यतिधर्म प्रकरणे।**

यथा—

"अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम्।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत् प्रभुः।।"
(या०स्मृ०3,111)

"अरुस्थोत्तानचरणः सव्ये न्यस्योत्तरं करम्।
उत्तानं किञ्चिदुन्नाम्य मुखं विष्टम्य चोरसा।।
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन्।
तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः।।
सन्निरुद्ध्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः।
द्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमेत्।।
ततो ध्येयः स्थितो योऽसौ हृदये दीपवत् प्रभुः।
धारयेत् तत्र चात्मानं धारणां धारयन् बुधः।।"
(या०स्मृ०3,198-201)

(ग) कुमारसम्भवे काव्ये) :— **तत्र तृतीये सर्गे यथा—**

"पर्यङ्कबन्धस्थिरपूर्वकायम् ऋज्वायतं सन्निमतोभयांसम्।
उत्ता-पाणिद्वयसन्निवेशात् प्रफुल्लराजीवमिवाङ्कमध्ये।। 45।।
.....
.....
किञ्चित्प्रकाशस्तिमितोग्रतारैर् भ्रूविक्रियायां विरतप्रसङ्गैः।
नेत्रैरविस्पन्दितपक्ष्ममालैर् लक्ष्यीकृतघ्राणमधोमयूखैः।। 47।।
.....
.....
कपालनेत्रान्तरलब्धमार्गैर् ज्योतिः प्ररोहैरुदितैः शिरस्तः।
मृणालसूत्राधिकसौकुमार्यां बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः।।
49।।
मनो नवद्वार निषिद्धवृत्ति हृदिव्यवस्थाप्य समाधिवश्यम्।
यमक्षरं क्षेत्रविदो विदुस्तम् आत्मानमात्मन्य-
वलोकयन्तम्।।50।।"
(कु०सं०3,45-50)

(घ) सिद्धमहारहस्ये आचार्यामृतभाग्मवविरचित आधुनिके ग्रन्थे :—

"पद्मासनमधिष्ठाय समसर्वाङ्गविग्रहम्।
परस्परोपरिधृतौ करौ कृत्वाङ्गगावुभौ।।
निवातदीपवत्तिष्ठन् क्रियाज्ञानैषणाः समाः।
अगृह्णन्नत्यजन् नित्यं स्वात्मानं शम्भुमीक्षते।।
महाराजाधिराजोऽयं योगानामुत्तमोत्तमः।
स्वशाकप्रत्यभिज्ञाने महाशाको न संशयः।।"

(सि०म०2, 6, 21-23)

~ प्रकारान्तरतः :— **प्रकारान्तराणि शाम्भवयोगस्योपदिष्टानि पुरातनेषु शैवशास्त्रग्रन्थेषु परं न विस्तरेण प्रतिपादितानि। स्पष्टाक्षराणीव तानि तत्र-तत्र द्रष्टव्यानि। कालिकेन क्रमेण निर्दिष्टान्यत्र यथाः —**

(शिवसूत्रे) :—

द्र०:- शि०सू०1, 5-6; 2, 7; 3, 20, 26, 27, 28, 30; **(विज्ञानभैरवे) :— द्र०:-** वि०भै०- 49, 61, 75, 91, 101, 103, 108, 126, 146; **(स्पन्दकारिकासु) :— द्र०:-** स्पं०का०6, 7, 11, 22, 41, 43; **(शिवदृष्टौ) :— द्र०:-** शि०दृ०,7, 17, 18, **(अनुत्तराष्टिकायाम्): — द्र०:-** अ०अ० 1, 2; **(अनुभवनिवेदनस्तोत्रे) :— द्र०:-** अ० नि० स्तो०,2, इति।

~ फलदृष्ट्या :— **शाम्भवोपायतः समावेशरसाभ्यासपरः सत्वरमेव जीवन्मुक्तिमवाप्नोति। शैवीनां शाक्तीनां च विभूतीनामाविर्भावोऽपि तस्य सञ्जायते येन जीवन्नेव यथेच्छं ज्ञातुं कर्तुं च समर्थो भवन् निजां भैरवस्वभावतामप्यनुभवति। यथा —**

"भूयोभूयः समावेशं निर्विकल्पमिमं श्रितः।
अभ्येति भैरवीभावं जीवन्मुक्त्यपराभिधम्।।"

(तं०आ०3,271)

~ तत्फलम् :— **सर्वासामपि व्यावहारिकपारमार्थिकसिद्धीनां भुक्तिमुक्त्योश्च प्रदाने क्षमः समावेशः शाम्भवः। यथा —**

"अलं हि चर्व्यमाणेऽस्मिन्सरसे संविदासवे।
निस्सरन्ति महोल्लासाः संख्या येषु न विद्यते।"

(मा०वि०वा०2,149-150)

~ तद्भेदोपपत्ति :— **रुद्रशक्तिसमावेशोपदेशावसरे भौतादिसमावेशोपदेशस्य कोऽवसरः इति शङ्का। सर्वसर्वात्मकतासिद्धान्तानुसारं पृथिव्यादीनामपि सर्वात्मकत्वादिति तत् समाधानम्। तत एव पाञ्चदश्यादिविधौ धरादीनां विश्वरूपता परशिवता च साक्षात्कार्या। ततो भूततत्त्वादिसमावेशा अपि निरूपणीया अत्र। यथा —**

"रुद्रशक्तिसमावेशः पञ्चधा ननु चर्च्यते।
कोऽवकाशो भवेत्तत्र भौतावेशादिवर्णने।।"

(तं०आ०1,192)

"यावान् षट्त्रिंशकः सोऽयं यदन्यदपि किंचन।
एतावती महादेवी रुद्रशक्तिरनर्गला।।
तत एव द्वितीयेऽस्मिन्नधिकारे न्यरूप्यत।
धरादेर्विश्वरूपत्वं पाञ्चदश्यादिभेदतः।।"

(तं०आ०1,195-196)

~ धराद्युपायोऽपि :— **शाम्भव्या दृष्टया सर्वं परिपूर्णं परमशिवात्मकं सर्वसर्वात्मभावतः। इति भूततत्त्वादिसमावेशोऽपि शाम्भव एव चेन्निर्विकल्प एव तस्योदयः। यथा —**

"धरामेवाविकल्पेन स्वात्मनि प्रतिबिम्बिताम्।
पश्यन्भैरवतां याति जलादिष्वप्ययं विधिः।।"

(तं०आ०3,275)

"एकमेव धरातत्त्वमविकल्पज्ञानेन न तु विकल्पमात्रेण स्वात्मनि प्रतिबिम्बितं पश्यन् स्वात्मसंविन्मात्ररूपतया साक्षात्कुर्वन् सर्वस्य सर्वात्मकत्वाद्भैरवतां याति परप्रकाशरूपतया परिस्फुरतीत्यर्थः। एतदेव च तत्त्वान्तरेष्वप्यतिदिशति।"

(तं०आ०वि०,खं०2,पृ०,250)

मातृकाक्रमाभ्यासप्रकारा एवंविधा एव।

~ पञ्चाशद्विध :— **बारंबारमेकैकमपि धरादिकं तत्त्वं वारशः स्वात्मनि दर्पणनगरन्यायेनाभासमानं पश्यतोऽपि शाम्भवः समावेशो जायते। स चेत्थं पञ्चाशद्विधः। यथा**

तत्र भूतसमावेशाः = 5
तत्त्वसमावेशाः = 30
आत्मसमावेशाः = 3
मन्त्रसमावेशाः = 10
शक्तिसमावेशौ = 2
सर्वे मिलित्वा = 50

"रुद्रशक्तिसमावेशः पञ्चधा परिपठ्यते।
भूततत्त्वात्ममन्त्रेशशक्तिभेदा,रानने।।
पञ्चधा भूतसंज्ञस्तु तथा त्रिंशद्विधोऽपरः।
आत्माख्यस्त्रिविधः प्रोक्तो दशधा मन्त्रसंज्ञकः।।
द्विविधः शक्तिसंज्ञोऽपि ज्ञातव्यः परमार्थतः।
पञ्चाशद्भेदभिन्नोऽयं समावेशः प्रकीर्तितः।।"

(मा०वि०तं०2,17-19)

~ विशेषमाहात्म्यतः :— **शाम्भवसमावेशाभ्यासशाली परानुग्रहेऽपि समर्थो भवन् शिष्यांस्तारयितुमलं भवति। यथा —**

"परानुग्रहकारित्वमत्रस्थस्य स्फुटं स्थितम्।
यदि तादृगनुग्राह्यो देशिकस्योपसर्पति।।"

(तं०आ०3,290-291)

शिवशक्तिपातपवित्रित एव हि जनस्तथोपकार्यो भवति न सर्वः।

शाम्भवसमावेशः :— (1) भावनाद्यपेक्षाराहित्येन निर्विकल्पतयैव स्वसंविदः शिवेन साकं यत् तादात्म्येन

प्रकाशनं तदेप शाम्भवं ज्ञानं शाम्भवोपायजन्यम्। स एव हि शाम्भवः समावेशः। यथा —

"तेनाविकल्पा संवित्तिर्भावनाद्यनपेक्षिणी।
शिवतादात्म्यमापन्ना समावेशोऽत्र शाम्भवः।।"
(तं०आ०1,178)

(2) स्वात्मानमन्तः प्रतिबिम्बितविश्ववैचित्र्यखचितं निर्विकल्पतया साक्षात्पश्यन्, पुनः पुनश्च तदभ्यासं कुर्वन, योगी शाम्भवसमावेशभाग् भवति। तस्य समावेशस्याभ्यासेन तस्मिन्नेव जीवने शिवतां निजां संवेत्ति, देहपाते चैकघनः शिव एव। यथा —

''इत्येवं सकलपरामर्शविश्रान्तिमात्ररूपं प्रतिबिम्बितसमस्ततत्त्व- भूतभुवनभेदम् आत्मानं पश्यतो निर्विकल्पतया शाम्भवेन समावेशेन जीवन्मुक्तता। अत्रापि पूर्ववत् न मन्त्रादियन्त्रणा काचिदिति।

अन्तर्विभाति सकलं जगदात्मनीह
यद्वद्विचित्ररचना मुकुरान्तराले।
बोधः परं निजविमर्शरसानुवृत्त्या
विश्वं परामृशति नो मुकुरस्तथा तु।।"
(तं०सा०,पृ०,19)

द्र०:- 'समावेशः' ~ 'शाम्भवः' इति।

द्र०:- म०प्र०वि०, पृ०,22,पू०प्र०1,264-265; मा०वि०तं०2, 23

शाम्भवसिद्धा :— ~ मुद्राः — खेचरी।

यथा :—

"शाम्भवसिद्धा–वामेश्वरी खेचरी मुद्रा।"
(म०प्र०वि०,पृ०,87)

शाम्भवावेश :— शाम्भवः समावेशः इत्येव।

शाम्भवी मुद्रा :— द्र०:- 'शाम्भवयोगः ~ प्रकारभेदतः' इति।

शाम्भवोपायः :— अकिञ्चिञ्चिन्तकस्य साधकस्य चित्तं यदा निर्वातदीपवत् स्थितं भवति, तदा तस्य स्वात्मसंवित्प्रकाशेन स्वात्मनः एव साक्षाद्दर्शनस्याभ्यासः शाम्भवोपायः। दर्शनीयश्च स्वात्मा यदि मायया सङ्कुचितो अणुस्तर्हि सुषुप्तिपदेऽवस्थानं, न चासौ शाम्भवोपायोऽपि तु, जेनयोगो बौद्धानाम् भावातीतं वा ध्यानं स्वात्मनो, गुरुपदर्वी ख्यापयतां चाधुनिकानां केषामप्युदेशकानाम्। ततो यत्राभ्यासेऽपरिमितस्य पारमैश्वर्यमण्डितस्य च शुद्धसंवित्स्वरूपस्य स्वात्मनः स्वयमेव साक्षात्कारो भवत्यसावेव शाम्भवोपायः। स चाभ्यासस्तुर्यदशाक्षेत्रे चरणशीलो बहुविधः। मातृकामालिनी प्रभृतयस्तस्यैव प्रकाराः। यथा —

"नोर्ध्वे ध्यानं प्रयुञ्जीत नाधस्तान्न च मध्यतः।
नाग्रतः पृष्ठतः किंचित्पार्श्वयोरुभयोरपि।।
नान्तःशरीरसंस्थाने न बाह्ये भावयेत्क्वचित्।
नाकाशे बन्धयेल्लक्ष्यं नाधो दृष्टिं निवेशयेत्।।
न चाक्ष्णोर्मीलनं किञ्चिन्न किञ्चित् दृष्टिबन्धनम्।
अवलम्बं निरालम्बं सालम्बं न च भावयेत्।।
नेन्द्रियाणि न भूतानि शब्दस्पर्शरसादि यत्।
सर्वं त्यक्त्वा समाधिस्थः केवलं तन्मयो भवेत्।।
सावस्था परमा प्रोक्ता परस्य परमात्मनः।
निराभासं पदं तत्तु तत्प्राप्य विनिवर्तते।।"
(ने०तं०8,41-45)

तन्मय इति परसंविन्मयः। निराभासमिति नाभासरूपमपि तु स्वप्रकाशसत्यसंविन्मयमिति।

~ अकिञ्चिच्चिन्तनात्मकः :— **अकिञ्चिच्चिन्तनात्मको निर्विकल्पः सद्यः सफलः स्वशिवत्वसाक्षत्काराभ्यासः शाम्भवः। यथा —**

"अकिञ्चिच्चिन्तकस्येति विकल्पानुपयोगिता।
तया च झटिति ज्ञेयसमापत्तिर्निरूप्यते।।"
(तं०आ०1,171)
द्र०:- (मा०वि०तं०2,23)

~ अनधिकारिविषये :— **यदि कश्चिद् समलसंविदपि भक्तिमान् शिष्यः शाम्भवसमावेशशालिनं गुरुमुपगच्छेत् तदा गुरुः तमाणवादिधारणाः एव शिक्षयति मन्त्रादि चोपदिशति शाम्भवेऽधिकारप्राप्त्यर्थम्। न सद्यः साक्षात् शाम्भवं शक्तिपातं कुरुते। यथा —**

"अथासौ तादृशो न स्याद्भवभक्त्या च भावितः।।
तं चाराधयते भावितादृशानुग्रहेरितः।
तदा विचित्रं दीक्षादिविधिं शिक्षेत कोविदः।।"
(तं०आ०3,291-292)

~ इच्छायोग :— **तीव्रेणेच्छाशक्त्युपयोगेन शुद्धेऽपरिमिते च स्वात्मसंवित्तत्त्वे स्थिरतयावस्थानस्याभ्यासः। यथा —**

"एवं परेच्छाशक्त्यंशसदुपायमिमं विदुः।
शाम्भवाख्यं समावेशं सुमत्यन्तेनिवासिनः।।"
(तं०आ०1,213)

द्र०:- (तं० व० धा०2-4,5,6,7; पू० प्र०1-168,270,271) इति।

~ तत्त्वसाक्षात्कारमयः :— **शाम्भवेन समावेशेन धरादिकं वा निखिलं वा प्रपञ्चजातं स्वात्मनः सकाशादेवोदितं, स्वात्मन्येव प्रतिबिम्बन्यायेनावभासमानं, स्वात्माभिन्नं चेति त्रिधा निर्विकल्पतया साक्षादनुभूयते। त्रिस्कन्धत्वमस्य 'अ' इति 'ह्' इति 'अं' इति च 'अहम्' इति। यथा —**

"मत्त एवोदितमिदं मटयेव प्रतिबिम्बितम्।
मदभिन्नमिदं चेति त्रिधोपायः स शाम्भवः।।"
(तं०आ०3,280)

~ तदधिकारी :— **तीव्रेण शक्तिपातेनानुगृहतः कश्चिदेव विरलो जनः शाम्भवोपायसाधनाधिकारी।**

यथा —

"तदास्मिन् परमोपाये शाम्भवाद्वैतशालिनि।
केऽप्येव यान्ति विश्वासं परमेशेन भाविताः।
(तं०आ०3,288)

~ध्यानादिरहित :— **शाम्भवोपाये ध्यानस्नानव्रतादीनामकिञ्चित्करत्वम्। यथा** —

"स्नानं व्रतं देहशुद्धिर्धारणा मन्त्रयोजना।
अध्वल्कृप्तिर्यागविधिर्होमजप्यसमाधयः।।
इत्यादिकल्पना कापि नात्र भेदेन युज्यते।"
(तं०आ०3,289-290)

~ प्रयोजनदृष्ट्या :— **अखण्डमण्डले स्वात्मशिवस्वरूपे यदा साधकोऽनुपायमेव प्रवेष्टुमसमर्थो भवति तदा तस्मै साधकाय तत्प्रवेशोपायतया शाम्भवोपाय उपदिश्यते। ततस्तत्प्रवेशयोग्यताप्तिरस्य प्रयोजनम् प्रयोजनान्तरं च भुक्तिमुक्ती। अखण्डमण्डले पुनः प्रवेशोऽनुपायत एवेति। यथा** —

"यदेतत्प्रकाशरूपं शिवतत्त्वम् उक्तम्, तत्र अखण्डमण्डले यदा प्रवेष्टुं न शक्नोति तदा स्वातन्त्र्यशक्तिमेवाधिकां पश्यन् निर्विकल्पमेव भैरवसमावेशम् अनुभवति।"
(तं०सा०,पृ०,10)

~ मातृकाभ्यासमय :— **अकारादि-क्षकारान्तमातृकावर्णसम्भिन्नं शिवादिपृथिव्यन्ततत्त्वजातं स्वसंविदि स्वयैव लीलया दर्पणनगरन्यायेन प्रतिबिम्बितं साक्षात्कुर्वतो योगिनः स्वात्मशिवभावः साक्षादनुभवविषयतामापद्यते। नात्र विकल्पज्ञानस्याभ्यासः कोऽपि। निर्विकल्पमेव विश्वप्रतिबिम्बखचितं स्वात्मानं पश्यन् कृतकृत्यतां याति शाम्भवयोगनिष्ठः साधकः। असौ केवलं परिपूर्णस्य संविदात्मकस्य स्वात्मनो विमर्शं अहमिति निर्विकल्पमेव कुर्वन् कृतार्थो भवति। नान्यत् किमपि ध्यानधारणाभावनादिकं तेन कार्यं भवति।**

यथा—

"संविदात्मनि विश्वोऽयं भाववर्गः प्रपञ्चवान्।
प्रतिबिम्बतया भाति यस्य विश्वेश्वरो हि सः।।
एवमात्मनि यस्येदृगऽविकल्पः सदोदयः।
परामर्शः स एवासौ शाम्भवोपायमुद्रितः।।
पूर्णाहन्तापरामर्शो योऽस्यायं प्रविवेचितः।
मन्त्रमुद्राक्रियोपासास्तदन्या नात्र काश्चन्।।"
(तं०आ०3,268-270)

~ मालिन्यनुसन्धानमयः :— **नादिफान्ता या मालिनी तदनुसन्धानेन विश्वप्रतिबिम्बखचितसुन्दरस्य स्वात्मसंवित्स्वरूपस्य साक्षाद्दर्शनं यत्तस्यैवाभ्यासः। स च सद्यो भुक्तिमुक्तिफलप्रदः। यथा** —

"न्यसेच्छाक्तशरीरार्थं भिन्नयोनिं तु मालिनीम्।।
.....
.....
.....
.....
एऐकारौ तथा जङ्घे तत्परौ चरणौ दफौ।।"
(मा०वि०तं०3,36-41)

साधनान्तरमय :— द्र०:- **'शाम्भवयोगः प्रकारभेदतः'** इति," **प्रकारान्तरतः'** इति च।

शार्वी दीक्षा :— रश्मिचक्रनिरोधेन भोगमोक्षग्रासपरा कापि रहस्यात्मिका दीक्षा। यथा —

"निरुध्य रश्मिचक्रं स्वं भोगमोक्षावुभावपि।
ग्रसते यदि तद्दीक्षा शार्वीयं परिकीर्तिता।"
(तं०आ०29,276-277)

भोगमपि मोक्षरूपतामापदयन्तीयं दीक्षा। यथा —

"रश्मिचक्रं निरुध्योभौ परस्परव्यावृत्तौ भोगमोक्षावपि ग्रसते भोगेऽपि मुक्तस्तदियं पारमेश्वरी दीक्षा परिकीर्तिता।"
(तं०आ०वि०,खं०11,पृ०,165)

आपेक्षिकौ भोगमोक्षौ ग्रसमानौ पारमार्थिकं मोक्षं प्रदीपयति इति तात्पर्यम्। यो हि कौतश्चित्क एव मोक्षोऽसावापेक्षिको न पारमार्थिको यतः।

शासनम् :— शास्त्रोपदेशेन बोध्यानां बोधनम्।

"शासनं शास्त्रोपदेशादिना बोध्यानां बोधनम्।"
(तं०आ०वि०,खं०1,पृ०,147)

शास्त्रम् :— (1) शिवादुद्भूतमागमात्मकं वाङ्मयम्। यथा —

"अदृष्टविग्रहाच्छान्ताच्छिवात्परमकारणात्।
ध्वनिरूपं विनिष्क्रान्तं शास्त्रम् .....।"
(ने०तं०उ०,खं०1,पृ०,10)

(2) जगद्विषये, कर्मफलवैचित्र्यविषये, मोक्षादिविषये च सूक्ष्मसूक्ष्मविमर्शात्मकमुपदेशजातं शास्त्रम्। सर्वप्रकारकं बौद्धार्हतश्रौतस्मार्तादिरूपं शास्त्रजातं मूलतः शिवोद्भवमेव। तदिच्छानुसारमेव बुद्धादिभिरुपदिष्टमिति न विस्मर्तव्य सुधीभिः। यथा —

"सकलजगन्निष्ठवस्तुनः तद्गतस्य च कर्मफलसम्बन्धवैचित्र्यस्य यद्विमर्शनं तदेव शास्त्रम्। इति परमेश्वरस्वभावाभिन्न एव समस्तः शास्त्रसन्दर्भो वस्तुत एकफलप्रापकः एकाधिकार्युद्देशेनैव, तत्र तु परमेश्वरनियतिशक्तिमहिम्नैव भागे भागे रूढिः लोकानाम्।"
(तं०सा०,पृ०,193)

परमेश्वरकृतया प्रेरणयैव कस्यचित् साधकविशेषस्य कस्मिँश्चिदेव शास्त्रविशेषे प्रवृत्तिर्भवतीति।

~ अधरोत्तरम् :— **(1) यद्यपि सर्वाणि शास्त्राणि पारमेश्वरविमर्शमयानि तथाप्यधिकारिभेदात्तानि भिन्नभिन्नप्रकारकाभ्युदयनिःश्रेयससोपानप्रापकतयोपयुक्तानि लोके। तदनुसारं वेदसांख्यवैष्णवादिशास्त्राणामधरता, आगमशास्त्राणामुत्तरता त्रिकशास्त्रस्य च सर्वोत्तमता। यथा** —

"केचिन्मायोचितभेदपरामर्शात्मनि वेदागमादिशास्त्रे रूढाः, अन्ये तथाविध एव मोक्षाभिमानेन सांख्यवैष्णवशास्त्रादौ, परे तु विविक्तशिवस्वभावामर्शनसारे शैवसिद्धान्तादौ, अन्ये सर्वमयपरमेश्वरतामर्शनसारे मतङ्गादिशास्त्रे, केचित् तु विरलविरलाः समस्तावच्छेदबन्ध्यस्वातन्त्र्यानन्दपरमार्थसंविन्मयपरमेश्वरस्वरूपामर्शनात्मनि श्रीत्रिकशास्त्रक्रमे, केचित्तु पूर्वपूर्वत्यागक्रमेण, लङ्घनेन वा।"

(तं०सा०,पृ०,193-194)

(2) बौद्धार्हतवेदवैष्णवादिभ्य उत्तराणि शैवरौद्रसिद्धान्तागमशास्त्राणि तदुत्तराणि भैरवागमरूपाणि शास्त्राणि तदुत्तराणि त्रिकशास्त्राणीति क्रमेणोत्तरोत्तरशास्त्रदीक्षा पूर्वपूर्वशास्त्रदीक्षितस्य लिङ्गोद्धारसंस्कारमपेक्षते। यथा —

"सिद्धान्ते दीक्षितास्तन्त्रे दशाष्टादशभेदिनि।।
भैरवीये चतुःषष्टौ तान्पशून्दीक्षयेत्त्रिके।
सिद्धवीरावलीसारे भैरवीये कुलेऽपि च।।
पञ्चदीक्षाक्रमोपात्ता दीक्षानुत्तरसंज्ञिता।"

(तं०आ०22,40-42)

~ तत्तारतम्यम् :— **सर्वोत्कृष्टं शास्त्रं पराद्वैतं शैवदर्शनं तदनुकूला च त्रिकाख्याऽऽगमसन्ततिः। ततोऽवराणि तावदापेक्षिका द्वैतदर्शीनि, द्वैताद्वैतदर्शीनि, द्वैतदर्शीनि च दर्शनशास्त्राणि। तानि च :— औपनिषदं दर्शनम्, वीरशैवं, श्रीनाथमतं, आमर्दकमतं, पाशुपतं, सिद्धान्तशैवं, श्रीकण्ठमतं, गोरक्षमतं, वैष्णवमतानि, षड्दर्शनानि, बौद्धार्हतादिदर्शनानि च। साधनाक्रमेषु त्रिकाचारादवराः आचाराः क्रमेण मताचारः, कौलाचारः, कुलाचारः, दक्षिणाचारः वामाचारः, शैवाचारः (चर्याक्रियादिरूपः), वेदाचारः, इति। यथा** —

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम्।।"

इति (आगमः)।

(तं०आ०वि०,खं०3,पृ०,56)

"वेदादिभ्यः परं शैवं शैवाद्वामं च दक्षिणम्।
दक्षिणात् परतः कौलं कौलात् परतरं त्रिकम्।।"

(वि०भै०उ०,पृ०,4)

~ तत्प्रयोजनम् :— **सर्वस्य स्वरूपभूतं शिवत्त्वं सदा स्वत एव प्रकाशमानं वर्तते सर्वत्र। केवलं मोहकृतादावरणात् तथा न लक्ष्यते। शास्त्रेण तदावरणमपसार्यते। अपसृते तस्मिँस्तत्त्वभूतं वस्तु स्वयंप्रकाशमानतयाऽनुभूयते। यथा—**

"न तु किञ्चिदपूर्वं क्रियते, नापि तत्त्वतोऽप्रकाशमानं प्रकाश्यते, प्रकाशमान एव यद् 'न प्रकाशते' इत्यभिमननं तदपसार्यते।"

(ई०प्र०वि०,खं०2,पृ०,129)

~ तदधिकारिण :— **(1) द्वैतादिशास्त्राणि तावदवरकोटिभाग्भ्यः साधकेभ्यो हितानि, अद्वैतशास्त्राणि पुनरुत्तरकोटिभाग्भ्यः। द्वैतशास्त्रं पाशवं ज्ञानम्, अद्वैतशास्त्रं च पतिज्ञानम्। परमाद्वयपरं त्रिकशास्त्रं तु सर्वोत्कृष्टं पतिज्ञानं तीव्रतरशिवानुग्रहपात्राणां कृते प्रवृत्तं लोके। यथा** —

"यतो यद्यपि देवेन वेदाद्यपि निरूपितम्।
तथापि किल सङ्कोचभावाभावविकल्पतः।।
संङ्कोचतारतम्येन पाशवं ज्ञानमीरितम्।
विकासतारतम्येन पतिज्ञानं तु बाधकम्।।"

(तं०आ०4,252-253)

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम्।"

उद्धः:- (तं०आ०वि०,खं० 3,पृ०,56)

~ तत्-साङ्कर्यम् :— **शैवादिशास्त्रप्रक्रियाणां वैष्णवादिप्रक्रियाभिर्मिश्रणम्।**

~ (अहितम्) :— **तेन साधक उभयभ्रष्टो भवति प्रायशः। यथा** —

"वैष्णवादिः शैवशास्त्रं मेलयन्निजशासने।।
ध्रुवं संशयमापन्न उभयभ्रष्टतां व्रजेत्।"

(तं०आ०13,317-318)

"नान्यशास्त्राभियुक्तेषु शिवज्ञानं प्रकाशते।"

(तदेव,320)

~ तत्साफल्यम् :— **अत्यन्तमूढोऽपि श्रद्धया चेच्छास्त्रं शृणोति तदा कदाचित् पर्यन्ते मुक्तो भवत्येव। यथा** —

"यस्य तु सर्वथा नापसरति, तत्रेश्वरशक्तिबलान्मूढतैव, तस्यापि कर्णपथगमनात् संस्कारपाकेनावश्यं कदाचिद् भविष्यत्येव स्वरूपलाभः।"

(ई०प्र०वि०,खं०2,पृ०,132)

~ तत्स्रोतांसि :— **तानि च सद्योजाताद्याः मन्त्राख्या अधिकारिशिवाः। तैरेव हि भिन्नभिन्नानि शास्त्राण्युपदिष्टानि। यथा** —

"लौकिकं देवि विज्ञानं सद्योजाताद्विनिर्गतम्।
वैदिकं वामदेवात्तु आध्यात्मिकमघोरतः।।
पुरुषाच्चातिमार्गाख्यं निर्गतं तु वरानने।
मन्त्राख्यं तु महाज्ञानमीशानात्तु विनिर्गतम्।।"

(स्व०तं०11,44-45)

उद्धः:- (तं०आ०वि०,खं०12,पृ०,371)

~ तदनधिकारी :— **यो यच्छास्त्रं द्वेष्टि नासौ तच्छास्त्रश्रवणेऽप्यधिकारी। ततस्तत्समीपे न तच्छास्त्रमुच्चार्यम्। यथा** —

"शास्त्रनिन्दां मैष कार्षीद् द्वयो पातित्यदायिनीम्।
इत्येवं परमेतन्नादीक्षिताग्रे पठेदिति।"

(तं०आ०19,47-48)

~ तद्व्याख्यातार :— **तारतम्यतो विविधाधिकारभाजो गुरवः तद्व्याख्यातारः पञ्चप्रकाराः। यथा—**

"कल्पवित् तत्समूहज्ञः शास्त्रवित्संहितार्थवित्।।
सर्वशास्त्रार्थविच्चेति गुरुर्भिन्नोऽपदिश्यते।।"

(तं०आ०28,386-87)

पञ्चप्रकारा इमे शास्त्रव्याख्यातारः। तेषां मध्ये कोऽपि द्वित्रादिलक्षणयुक्तोऽपि भवितुमर्हति, पञ्चलक्षणोऽपि वा, पृथक्पृथगेकैकलक्षणयुक्ताश्चेति वा।

~ तदुपयोग :— **बौद्धाज्ञानसमुदयार्थं शास्त्राध्ययनमेव मुख्य उपायः। इति शास्त्राणामवश्योपादेयता। यथा —**

"तथाविधाववसायात्मबौद्धविज्ञानसम्पदे।
शास्त्रमेव प्रधानं यज्ज्ञेयतत्त्वप्रदर्शकम्।।"

(तं०आ०1,47)

~ तदुपादेयता :— **कल्याणेच्छुना शास्त्रमवश्यमुपादेयम्। यथा—**

"शास्त्रहीने न सिद्धिः स्याद्दीक्षादौ वीरवन्दिते।"

उद्ध०:- (तं०आ०वि०,खं०3,पृ०,48)

~ तदेकवाक्यता :— **वस्तुतः सूक्ष्मतरेणाध्ययनेनैतत् प्रतीयते, यत् पारमेश्वरेष्वागमेषु, अन्यासु च शैववैष्णवरहस्य-साधनासु, सौगतेष्वपि पार्यन्तिकेषु सिद्धान्तेषु वस्तुतः पराद्वैतमेवाभिप्रेतं सद्वर्णितं वर्तते। परं व्याख्याकृद्भिः भ्रमेण द्वैतदृष्ट्या तेषां शास्त्राणामभिप्रायाः भिन्नभिन्नप्रकारेण प्रचारिताः इति। वस्तुतः एकवाक्यतैव शास्त्राणां बहूनाम्। यथा —**

"पारमेश्वेषु तावदागमेषु शैववैष्णवरहस्येषु वेदान्तेषु च स्पष्ट एवोक्तोऽयमस्मदुक्तोऽर्थः। तदनुसारिणा च सुगतेनोक्तम् :—

'चित्तमात्रमिदं यदुत त्रैधातुकम्'

इति तदत्र विवरणकारैर्दुरभिनिवेशवशेन विप्रतारितो जनः।"

(ई०प्र०वि०वि०,खं०3,पृ०,405)

~ तद्भेदप्रयोजनम् :— लोके विचरतामधिकारिणां योग्यता भेदमनुरुध्य शिवेन शास्त्रभेदः प्रसारितो, येन सर्वस्यापि स्वाधिकारानुकूलं शास्त्रं सुलभं भवेत्। यथा —

"चित्तभेदान्मनुष्याणां शास्त्रभेदो वरानने।
व्याधिभेदाद्यथा भेदो भेषजानां महौजसाम्।।
यथैकं भैषजं ज्ञात्वा न सर्वत्र भिषज्यति।
तथैकं हेतुमालम्ब्य न सर्वत्र गुरुर्भवेत्।।"

उद्ध०:- (तं०आ०वि०,खं०3,पृ०,55)

"सर्वमेतत्प्रवृत्त्यर्थं श्रोतॄणां तु विभेदतः।
अर्थभेदात्तु भेदोऽयमुपचारात्प्रकल्प्यते।।
फलभेदो न कल्प्योऽत्र कल्प्यश्चेदयथायथम्।"

उद्ध०:- (तं०आ०वि०,खं०1,पृ०,48).

क्रमश एवारोहन् साधकः उत्तरोत्तरे शास्त्रेऽधिकारं लभमानोऽन्ते पराद्वैतसिद्धान्तमाश्रित्य त्रिकसाधनाभ्यासेन परां मुक्तिं लभत इति तात्पर्यम्।

~ तद्विरोध :— **शास्त्राणां परस्परं मतभेदो यथा वैष्णवानां शैवैः शाक्तैश्च; बौद्धार्हतादीनामास्तिकशास्त्रै-रित्यादिर्बहुविधः।**

~ (अदोषः) :— **अधिकारभेदेनोपयुक्तानि सर्वाणि शास्त्राणि परस्परविरोधे सत्यपि नासामञ्जस्यदोषभाञ्जि, निजनिजाधिकारिकृते समुपयुक्तत्वात्।**

"परस्परबाधो विषयभेदादकिञ्चित्करः। ब्रह्महननतन्नि-षेधवत्।"

(तं०सा०,पृ०,194)

~ तद्विशेषा :— **मुख्यतो धर्मज्ञानवैराग्यैश्वर्यादिप्रति-पादिकानि तानितानि शास्त्राणि। यथा —**

"धर्मेणैकेन देवेशि बद्धं ज्ञानं हि लौकिकम्।
धर्मज्ञाननिबद्धं तु पाञ्चरात्रं च वैदिकम्।।
बौद्धमारहतं चैव वैराग्येणैव सुव्रते।
ज्ञानवैराग्यसंबद्धं सांख्यज्ञानं हि पार्वति।
ज्ञानं वैराग्यमैश्वर्यं योगज्ञानप्रतिष्ठितम्।
अतीतं बुद्धिभावनामतिमार्गं प्रकीर्तितम्।।
लोकातीतं तु तज्ज्ञानमतिमार्गमिति स्मृतम्।।"

(स्व०तं०11,179-182)

उद्ध०:- (तं०आ०वि०,खं०12,पृ०,371)

~ तन्मर्यादा :— **तत्र तत्र पालनीयतयोपदिष्टाः समयादिनियमाः।**

द्र०:- समयदीक्षाह्निकं तन्त्रालोकस्य।

(तं०आ०,आ०15)

~ (पालनीयाः) :— **अनुपायनिष्ठोऽपि योगी गुरुः शास्त्रमर्यादा-पालनाय संविन्नैर्मल्यहीनं शिष्यं प्रथमं शास्त्रश्रवणादौ प्रेरयति, तं पाठयति, आणवादियोगाभ्यासशिक्षां तस्मै ददाति, ततः संविन्नैर्मल्ये जातेऽनुपायानुग्रहेण तं शिवतां नयति। नैव स्वरूपप्रकाशं तस्य सद्य एव कारयति। इत्येव हि सामान्यतो नियमः। यथा —**

"शङ्काशून्योऽपि तत्त्वज्ञो मुमुक्षुप्रक्रियां प्रति।
न त्यजेच्छास्त्रमर्यादामित्याज्ञा पारमेश्वरी।।"

(तं०आ,आ०2,46)

लोकसंग्रहार्थमपि ताः मर्यादाः पालनीयाः एव गुरुभिरपि।

~ तन्मूलतत्त्वम् :— **सर्वेषामवि शास्त्राणां यत्तत्त्वं तन्मूलतः परावाक्सारे पारमेश्वरे विमर्शे एव सदा तिष्ठति। तत एव च पश्यन्त्यादिक्रमेणावतरति भिन्न-भिन्नसामर्थ्येष्व-धिकारिषु।**

"अकृत्रिमपरावेशमूलसंस्कारसंस्कृतः।
शास्त्रार्थो लौकिकान्तोऽस्ति सप्तत्रिंशे परे विभौ।।"

(मा०वि०वा०1,413)

~ बाध्यबाधकतया :— **उत्तरोत्तरं हि शास्त्रं पूर्वपूर्वा-पेक्षयापवादात्मकं पूर्वपूर्वं च तदपेक्षयोत्सर्गरूपम्। तथा हि मानवकृतेभ्यः शास्त्रेभ्य उत्तममृषिकृतं, तदुत्तरं देवकृतं, तदुत्तरोत्तरं च क्रमेण ब्रह्मविष्णुरुद्रेश्वरसदाशिवशक्तिशिवकृतम्। यथा —**

"नरर्षिदेवद्रुहिणविष्णुरुद्राद्युदीरितम्।
उत्तरोत्तरवैशिष्ट्यात् पूर्वपूर्वप्रबाधकम्।।"

(तं०आ०4, 248)

न शैवं वैष्णवैर्वाक्यैर्बाधनीयं कदाचन।।
वैष्णवं ब्रह्मसम्भूतैर्नेत्यादि परिचर्चयेत्।
बाधते यो वैपरीत्यात् स मूढः पापभाग्भवेत्।।"
(तदेव 4, 249-250)

~ मुख्यम् :— **निजः परिपूर्णस्वात्मशिवतापरामर्श एव मुख्यं शास्त्रम्, वाचोदितानां शास्त्राणां तत एव प्रवर्तनात्, तत्रैव च विश्रान्तेः। यथा—**

"तदेव नः शास्त्रम् यत् सर्वसंवित्संघट्टनात्मना स्वहृदयस्य परितः पृथिव्यादितत्त्वपरम्पराक्रोडीकारप्रावीण्येन स्पन्दः परामर्शात्मा चमत्कारः। पारमेश्वरः परामर्श एव ह्यागम इति।"
(म०मं०प०,पृ०,22)

शास्त्रमेलनम् :— (1) शास्त्राणां परस्परोपकारित्वं मिथः सङ्कल्पाधिकारिभेदानुसारं चोपयोगेन पर्यन्ते एकलक्ष्योन्मुखत्वम्। यथा—

"एक एवागमस्तस्मात् तत्र लौकिकशास्त्रतः।
प्रभृत्यावैष्णवाद् बौद्धाच्छैवात्सर्वं हि निष्ठितम्।।
तस्य यत् तत् परं प्राप्यं धाम तत् त्रिकशब्दितम्।"
(तं०आ०35,30-31)

पर्यन्ते च सर्वं शास्त्रजातं त्रिकशास्त्र एव विश्राम्यति। (2) सर्वशास्त्रैकवाक्यता। यथा—

"अथोच्यते समस्तानां शास्त्राणामिह मेलनम्।"
(तं०आ०35,1)

"सर्वशास्त्रैकवाक्यतावचनद्वारा द्वितीयार्धेन सर्वागमप्रामाण्यं प्रतिपादयितुं प्रतिजानीते।"
(तं०आ०वि०,खं०12,पृ०,355)

~ तत्प्रामाण्यम् :— **यतः तत्त्वदर्शिना श्रीशम्भुनाथनाम्ना सिद्धेनाभिनवगुप्ताय प्रोक्तासौ प्रक्रिया ततः प्रमाणभूता। उक्तं तत एव यथा—**

"इत्थं श्रीशम्भुनाथेन ममोक्तं शास्त्रमेलनम्।"
(तं०आ०35,44)

शास्त्रान्तराणि :— (1) बौद्धार्हतवैष्णवद्वैतशैवादीनि बहूनि शास्त्राणि यानि पराद्वैतशैवशास्त्रादवराणि। (2) वामदक्षिणकौलमतादीनि साधनाशास्त्राणि यानि त्रिकाचारापेक्षयावराणि।

~ (शाम्भवविश्रान्तानि) :— **ये तावत् सांख्यवेदवैष्णव-बौद्धा- र्हदादयः सम्प्रदायाः तेषां गुरुभिस्तावच्छैवयोगस्यैव कासाञ्चित् प्रक्रियाणामालम्बनं कृतम्। तेषां सम्प्रदायानां परिपूर्णता शाम्भवयोगालम्बनेनैव भवेत्। यथा—**

"वेदसांख्यभेदवादन्यायसौगतलौकिकैः।
पाञ्चरात्रक्रियाशास्त्रसिद्धान्तादिभिरप्यलम्।।
उचितोचितविज्ञानक्रियांशपरिभावकैः।
सर्वैः स्वप्रक्रियारूढैस्तैस्तैरौचित्ययोगतः।।
यत्र बीजसमावापखननादिक्रियाक्रमः।
अकारि शांभवानेकशाखाभिर्योऽतिविस्तृतः।।"
(मा०वि०वा०2,144-146)

भेदवादेति शैववैष्णवभेदवादाः इति।

अत्र मुद्रिते ग्रन्थे "भवेद्वाद" इति यः पाठोऽसावपपाठ इव प्रतिभाति।

~ तदुपासकगति :— **अवरशास्त्ररताः मायापाशबद्धाः सन्तो न वास्तविकीं परिपूर्णां मुक्तिं लभन्ते पराद्वैतशैवशास्त्रा-लम्बनं बिना।**

द्र०:- **'कामिका'** इति।

शिखाजालकम् :— बिन्दुः।

"शिखाजालकेन–बिन्दुना।"
रहस्यसङ्केतोऽस्यम्
(तं०आ०वि०,खं०10,पृ०,227)

शिखाबन्धः :— प्राणचारे प्रचलति सति तदादौ तन्मध्ये तदन्ते च यः सावधानः परामर्शविशेषाभ्यासः कालाध्वयोगे स शिखाबन्ध इति। यथा—

"प्राण एव शिखा श्रीमत्त्रिशिरस्युदिता हि सा।।
बद्धा यागादिकाले तु निष्कलत्वाच्छिवात्मिका।"
(तं०आ०6,22-23)

"अयमेव हि शिखाबन्धो यत्प्राणशक्तेः प्रतिचारमादि-मध्यान्तेष्ववधानेन पुनः पुनः परामर्शनं नाम।"
(तं०आ०वि०,खं०4/1,पृ०,25)

शिखिनी :— लोकपालमन्त्रः पञ्चमः अस्पष्टः।
(तं०आ०वि०,खं०12,पृ०,201)

**"पूतना शूलदण्डस्तु कवालं नाभिरेव च।
शिखनी वायुवेगा चपरम च निताम्बक'।।
विज्ञेयाश्च महादेवि दीर्घयुक्ता सविडकाः।
मन्त्रास्तु लोकपालसातदस्त्रा दीर्घवर्जिताः।।**

द्र०:- **'लोकपालमन्त्राः'** इति।

शिखिवाहन :— ~ मन्त्र :— ह्रूं इति बीजपिण्डः। यथा—

"सान्तो बिन्दुरधो ह्यग्निः षष्ठयुक्तस्तु कीर्तितः।।
शिखिवाहनसंज्ञस्तु ज्ञातव्योऽसौ वरानने।"
(स्व०तं०प०5/1,77-78)

सान्तो = ह्, अग्निः = र्, षष्ठः = ऊ, बिन्दुरनुस्वारः इति।

शितिकण्ठः :— ~ प्रथम :— **देशभाषायां शास्त्रनिर्माता पुरातनः शास्त्रकार आचार्यः। अस्य देशभाषा लल्लेश्वर्याः देशभाषातः अतिप्राचीना। ततः अयं त्रयोदश्यां शताब्दौ चतुर्दश्या वारम्भे अभवत् इति अनुमातुं शक्यते। अस्य ग्रन्था :—**

(1) देशभाषापद्यमयो महानयप्रकाशो, नाम कारिकाग्रन्थः।

(2) महानयप्रकाशस्य संस्कृत-व्याख्या।

(3) स्तोत्रमाला, यस्या एकं पद्यं महानयप्रकाशटीकायां समुद्धृतम्।

द्र०:- (म०न०,प्र०पृ०,47)

~ द्वितीय :— **सोमानन्दवंशीयः पद्मपुरनिवासी बाल-बोधिनीन्यासटीकाकृत्। तस्य समयः हस्सनशाहशासनकालः (1472-1485) ई०।**

यदुक्तं तेन :—

"भूजानौ हस्सनाख्ये भुवमवति मया तन्यते ग्रन्थ एषः"
(बाल बोधिनी न्यासस्य अन्ते)

"यच्छ्रीपद्मपुरं पुरन्दरपुरप्रोद्यत्प्रभं भासते।
तत्राचार्यवरो बभूव भगवान् सोमः स सोमप्रभः।।
यः सिद्धामृतशम्भुदर्शितमहाविद्यः सतां मस्तकः।
शापानुग्रहकृद्वितानपरमः सोमस्तदीयान्वये।।
.....
.....
..... व्याख्यामि तां श्रीशितिकण्ठकोऽहम्।।"
(बा० बो० न्या०, प्रारम्भे)

शिरोमाला :— षण्ठवर्णचतुष्टयम्। यथा—

" न शिखा ऋ ॠ लृ लॄ च शिरोमालाथ मस्तकम्।
नेत्राणि च ध वै नासा ई समुद्रेणुणू श्रुती।। इत्यादि।"
(मा०वि०तं०3,37)

ऋ, ॠ, लृ, लॄ इति वर्णचतुष्टयं शिरोमालेति।

शिवः :— (1) परमशिवाख्यमेकमात्रमद्वैततत्त्वं विश्वोत्तीर्ण- तादृष्ट्या शिव इत्युच्यते शास्त्रे, विश्वमयतादृष्टया च शक्तिरित्युक्तः, सामरस्यदृष्टया पुनः परमशिवः।

शास्त्रीये व्यवहारे पारमैश्वर्यात्मिकया पूर्णयेच्छाशक्त्या समाविष्टः परमेश्वरः शिव इति व्यवह्रियते उपदेशभावनादौ।

परं हि तत्त्वं परिपूर्णशुद्धसंविदात्मकम्। संविच्च चित्प्रकाशविमर्शसामरस्यमयी। सैव प्रकाशप्राधान्यविवक्षया शिव इति; विमर्शप्राधान्यविचारेण शक्तिरिति, सामरस्यदृष्टया च परमशिव इत्युच्यते।

(2) पञ्चशक्तिसमाविष्टरूपः स्वतन्त्रः संवित् प्रकाश एव शिवः। तस्य प्रकाशेनैव प्रमातृप्रमाणप्रमेयावभासः। चिदानन्देच्छाज्ञानक्रियास्तस्य पञ्चशक्तयः। यथा—

"एक एव प्रकाशः, स एव च संवित्, अर्थपकाशरूपा हि संविदिति सर्वेषामत्राविवाद एव। स च प्रकाशो न परतन्त्रः, प्रकाश्यतैव हि पारतन्त्र्यम्, प्रकाश्यता च प्रकाशान्तरापेक्षितैव, न च प्रकाशान्तरं किञ्चिदस्तीति स्वतन्त्र एकः प्रकाशः, स्वातन्त्र्यादेव च देशकालाकारावच्छेदविरहाद्, व्यापको नित्यः सर्वाकार, निराकारस्वभावः।"
(तं०सा०,पृ०,6)

(3) सर्वमेकमात्राहंरूपतया निर्विकल्पं पश्यँश्चिदात्मा। यथा सुप्रवीणो गान्धिकस्तत्तदनन्तवस्तुगन्धमक्रमेणैव विमृशति तथैव शिवो विश्वमक्रमेणैव विमृशति निर्विकल्पमहमिति। यथा—

"यथा गान्धिकोऽनन्तगन्धद्रव्यसौगन्ध्यमियत्तयाऽनवधारयन्नक्रमेण सर्वमवधारयन्नास्ते, तथा विश्वान् भावान् देशकालक्रमशून्यान् वाच्यवाचकात्मनः पश्यन्निविकल्पः शिवो भवति, अहमित्येव पूर्णाहम्भावेनैषां प्रकाशनात्। अहंपरामर्शवानप्यविकल्पकः।"
(शि०दृ०वृ०,पृ०,134-135)

(4) मोहजालरहितः पारमैश्वर्यात्मकभोगमोक्षानन्दैकघनतया पारमैश्वर्यक्रीडाविलासतत्परः परमेश्वरः। यथा—

"अशिवरूपसांसारिकमोहापहस्तनयोगादानन्दसारभोगापवर्गरूपपरापरश्रेयःपरमार्थतया शिवः परमेश्वरः।"
(ई०प्र०वि०वि०,खं०1,पृ०,7)

(5) धरण्यन्ततत्त्वव्राततया दृश्ययमानानां शक्तीनामेकसंघट्टः स्वतन्त्रः निजहृदयसंरम्भस्वरूपः शिवः। संरम्भरूपता चास्य स्वस्वभावत एव स्पन्दमानता, या सृष्टिसंहारादिकारणभूता। यथा—

"तथा तथा दृश्यमानानां शक्तिसहस्राणामेकसंघट्टः।
निजहृदयोद्यमरूपो भवति शिवो नाम परमस्वच्छन्दः।।"
(म०मं०13,पृ०,37)

पञ्चकृत्यावभासनानुकूलोद्यन्तृतोन्मुखाऽहमित्यपरिच्छिन्ना संवित्। यथा—

"विश्वविक्षोभात्मकानन्तबाह्यशक्तिचक्रवैचित्र्यविजृम्भणाद्भुतोद्भावनप्रगल्भस्वात्मचैतन्योद्यन्तृतापरिस्पन्दसारः प्रमातृविशेषः शिवभट्टारकः।"
(म०मं०प०,पृ०,38)

(6) स्वप्रकाशः शक्तिमान् अवच्छेदरहितः स्वतन्त्रः- सर्वात्मत्वेन भासमानः परमेश्वरः शिवः। यथा—

"स्वप्रकाशैकरूपत्वाद् भावात्मत्वेन भासनात्।
तथात्वेऽपि स्वतन्त्रत्वाच्छक्तिमान् स शिवः स्मृतः।।
सर्वात्मभूतः सर्वाध्वसमुत्तीर्णः स्वतन्त्रकः।
स्वशक्त्या भासितानन्तविश्वः स परमेश्वरः।।"
(तं०व०धा०1,9-10)

(7) आत्मोल्लाससमीहया युक्तः स्वानन्दनिर्भरः प्रकाशरूपः परमेश्वरः शिवः। यथा—

"स्वानन्दनिर्भरोऽसौ स्वात्मोल्लासेच्छया समाविष्टः।
आनन्दत्वेन शिवः .....।।
स शिवः प्रकाशरूपः .....।"
(स्वा०द०3,1-2)

(8) शक्तिप्रसरसङ्कोचाभ्यां जगदुदयलयकारी महेश्वरः। यथा—

"शक्तिप्रसरसङ्कोचनिबद्धावुदयव्ययौ।
यस्यात्मा स शिवो ज्ञेयः सर्वभावप्रवर्तकः।।" इति।
उद्धः- (स्पं०प्र०,पृ०,9)

(9) उपास्यतया यः प्रसिद्धः सशरीरः कैलासवासी भगवान् श्रीकण्ठनाथस्तस्यापरमूर्तिमयो भगवानुमापतिनाथश्चापि शिव इत्युच्येते। पुराणेतिहासादौ लोकपरम्परासु च भगवानुमापतिनाथ एव शिवः। स एव शिवसूत्रादीनामागमानामुपदेष्टा। स एव च लिङ्गमूर्त्याद्यालम्ब्य पूज्यो भवति शिवभक्तानाम्। स एव च तत्तत्पुण्यक्षेत्ररूपेषु भगवद्विश्वनाथ वैद्यनाथसोमनाथादीनां स्थानेषु विजयेश्वरामेश्वरसुरेश्वरादिरूपेषु च स्थितः सन् भक्तजनानां पूजां स्वीकुर्वंस्तेभ्यो भुक्तिमुक्तिफलप्रदो भवति। वस्तुतोऽसावीश्वरभट्टारकावतारः।

(10) सर्वव्यापकः सर्वकारणकारणभूतोऽपि भेदरहितः प्रपञ्चोत्तीर्णः परमेश्वरः। यथा—

"व्यापकस्तु शिवः सूक्ष्मः सबाह्याभ्यन्तरं स्थितः।
सर्वातिशयनिर्मुक्तः सर्वकारणवर्जितः।
सृष्टिसंहारनिर्मुक्तः प्रपञ्चातीतगोचरः।
निर्मलो विमलः शान्तस्त्वध ऊर्ध्वं व्यवस्थितः।।
आकाशस्य यथा नोर्ध्वं न मध्यं नाप्यधः क्वचित्।
एवं सर्वगतो देवः शिवः परमकारणम्।।
व्याप्य देवि जगत्सर्वं व्योमसु व्योमवत्स्थितः।"

(स्व०तं०11,33-36)

(1) सृष्टौ सत्यां तथातथा व्यवस्थितः इति।

(2) वस्तुतो न तथा।

(11) ब्रह्मादिकारणषट्कं सृष्ट्यादिकृत्येषु प्रेरयन्ती या पारमेश्वरी पराशक्तिस्तस्याम् अभेदसारतयाऽधितिष्ठन् परब्रह्मापरपर्यायः परमात्मा परमेश्वरः। यथा—

"एवं वै शिवतत्त्वं तु कथितं तव सुन्दरि।।
शोधियित्वा ततश्चोर्ध्वं शक्तिश्चैव परा स्मृता।
समना नाम सा ज्ञेया मनश्चोर्ध्वं न जायते।।
परिपाट्या स्थितानां तु पृथिव्यादिशिवावधौ।
सर्वेषां कारणानां च कर्तृभूता व्यवस्थिता।।
बिभर्त्यण्डान्यनेकानि शिवेन समाधिष्ठिता।
तत्रारूढस्तु कुरुते शिवः परमकारणम्।।
सृष्टिस्थितिसमाहारं तिरोभावमनुग्रहम्।
हेतुकर्त्ता महेशानः सर्वकारणकारणम्।।
समना नाम या शक्तिः सा तस्य करणं स्मृतम्।
तयाधितिष्ठेद्देवेशो ह्यधः कारणपञ्चकम्।।"

(स्व०तं०10,1255-1260)

"परमकारणमिति परमशिवः।"

(स्व०तं०उ०10,पृ०,544)

~ अनन्तः :— **यद्धि क्वचन परिसामाप्तं भवति तत् सान्तम्। यथा वाप्यग्रे वनस्य प्रारम्भो ग्रामस्य चान्त इत्युभयं सान्तम्। शिवस्य न क्वाप्यन्तो, यतो न क्वापि नेदं शिवात्मकमिति वक्तुं ज्ञातुं वा शक्यते; सर्वस्य तदात्मकत्वात्। यथा—**

"भेदा अपि तदात्मकाः, अत एव तदनन्तकं भिन्नार्थसद्भावे सति अन्तः स्यात् तद्रूपानाक्रमणात्।"

(शि०दृ०वृ०,पृ०,35)

~ अनादिसादिरूप :— **परमार्थतोऽनादिशिवस्तु विश्वोत्तीर्णः परमेश्वर एव। व्यवहारजाते त्वनादिशिवो भगवानुमापतिनाथः। साक्षात्कृतस्वात्मशिवभावाः पुनः परयोगिनः सादिशिवाः। सादिशिवेभ्योऽनादिशिवस्यातितरामुत्कर्षः। अत एव पाशुपताः मुक्तशिवस्य शिवतुल्यतां, न तु शिवतां प्रतिपादयन्ति। काश्मीरशैवदृष्ट्या तूपाधिसम्पर्कं यावद् योगी सादिशिवः, उपाधिविरतौ च शिवः एवैकघनः। यथा—**

"यथा भेदेऽनादिसिद्धाच्छिवान्मुक्तशिवा ह्यधः।।
तथा सांसिद्धिकज्ञानादाहृतज्ञानिनोऽधमाः।।"

(तं०आ०4,74-75)

~ अवस्थाभेददृष्ट्या :— **(1) भावनाभ्यासप्रक्रियायां शिवेऽप्यवस्थापञ्चकं भाव्यते। तद्यथा तस्यावस्था :—**

(1) जाग्रत् = पञ्चकृत्याधिकारदृष्ट्या क्रियाशक्तिरूपतया।

(2) स्वप्नः = अधिकारस्यान्तर्लीनतादृष्ट्या ज्ञानशक्तिरूपतया।

(3) सुषुप्तिः=ज्ञानक्रियाप्रेरकत्वदृष्ट्या इच्छाशक्तिरूपतया।

(4) तुर्या = इच्छानिवृत्तिदृष्ट्याऽऽनन्दशक्तिरूपतया।

(5) तुर्यातीतम् = अन्तरतमस्वस्वरूपनिष्ठतादृष्ट्या चिच्छक्तिरूपतया। यथा—

"व्यापारादाधिपत्याच्च तद्धान्या प्रेरकत्वतः।
इच्छानिवृत्तेः स्वस्थत्वाच्छिव एकोऽपि पञ्चधा।।"

(तं०आ०10,309)

"सव्यापाराधिपत्वेन तद्धीनप्रेरकत्वतः।।
इच्छानिवृत्तेः स्वस्थत्वादभिन्नमपि पञ्चधा।"

(मा०वि०तं०2,34-35)

उद्ध०:- (तं०आ०वि०खं०7,पृ०,207)

(2) शिवे क्रियाशक्तिविमर्शः जाग्रत्, ज्ञानशक्तिविमर्शः स्वप्नः, इच्छाशक्तिविमर्शः सुषुप्तिः, निर्वृत्तिशक्तिविमर्शस्तुर्यम्, चिच्छक्तिविमर्शश्च तुर्यातीतम्। यथा—

"एकत्रापि प्रभौ पूर्णे चितुर्यातीतमुच्यते।
आनन्दस्तुर्यमिच्छैव बीजभूमिः सुषप्तता।।
ज्ञानशक्तिः स्वप्न उक्तः क्रियाशक्तिस्तु जागृतिः।"

(तं०आ०10,299-300)

(3) यदेव शिवे शक्तिरूपतया वर्तते तदेव सृष्ट्यादिविषयतामापन्नं सद् बहिरन्तश्च संवेद्यते व्यवह्रियते च। यत्तत्र नास्ति न तत् क्वापि प्रकाशेत कथञ्चिदपि। ततः जाग्रदादिपञ्चकमपि तत्र बीजरूपतया पञ्चशक्तिरूपेण तिष्ठत्येव। यथा—

"न चैवमुपचारः स्यात्सर्वं तत्रैव वस्तुतः।"

(तं०आ०10,300)

~ उपास्यतया :— **अनेकेषु रूपेषु शिवः उपास्यो भवति। साधकैर्निजनिजयोग्यतानुसारं भोगाद्यभिलाषानुसारं चेति।**

द्र०:- **'शिवः'** ~'षड्विधः' इति।

~ खत्रयात्मक :— **शक्तिः (कौण्डली) व्यापिनी समना चेति शक्तित्रयं प्रमाणप्रमेयशून्यत्वेन खत्रयम्। उत्तरोत्तरस्य शुद्धशुद्धतरचिद्विमर्शमयत्वेन शून्यत्वमप्युत्कृष्टोत्कृष्टत्तरमेव**

च। इति खत्रयमेतदुत्तरोत्तरं सूक्ष्मतरमुत्कृष्टोत्कृष्टतर च।

"खं-शून्यं=शक्ति-व्यापिनी-समनालक्षणम्।"

(तत एव)

द्र०:- **'प्रणवकलाः'** इत्यत्र।

~ ज्योतिर्मय :— **भ्रूमध्यादौ दृश्यमानं स्फुरत्तारकादिनिभं तेजः; शरीरधारणात्मके करणयोगे साक्षात्कार्यमेतत् ज्योतिर्बिन्दुः। यथा—**

"कदम्बगोलकाकारः स्फुरत्तारकसन्निभः।" इत्यादिनास्य ज्योतिरूपत्वेनाभिधानात्।"

(तदेव)

~ तत्त्वभेदने :— **भेदरहित एव। यतः शिवे धारणालम्बनतां नीते सति न प्रमातृप्रमाणवेद्यताभेदः कोऽपि। तस्य प्रमात्रैकरूपत्वान्न वेद्यत्वेन तस्य ध्यानादि। न च तस्य वेद्यताकृतः कोऽपि भेदः। यथा—**

"श्रीपूर्वशास्त्रे तेनोक्तं शिवः साक्षान्न भिद्यते।"

(तं०आ०10,121)

~ देहस्थ :— **प्रत्यभिज्ञातस्वात्मशिवभावाः सिद्धास्तावद् देहस्थिताः शिवाः इत्युच्यन्ते। यथा—**

"जयति गुरुरेक एव श्रीश्रीकण्ठो भुवि प्रथितः।
तदपरमूर्त्तिर्भगवान् महेश्वरो भूतिराजश्च।।"

(तं०आ०1,9)

"एतद्विद्यात्रयं श्रीमद्भूतिराजो न्यरूपयत्।।
यः साक्षादभजच्छ्रीमाञ्श्रीकण्ठो मानुषीं तनुम्।"

(तदेव 30,120-121)

~ पञ्चकृत्यकारी :— **शिवः जगतः सृष्टिस्थितिसंहारान्, प्राणिनां च बन्धमोक्षमूलकारणभूते विलयानुग्रहकृत्येऽपि करोति सततम्। यथा—**

"सृष्टिसंहारकर्त्तारं विलयस्थितिकारकम्।
अनुग्रहकरं देवं प्रणतार्तिविनाशनम्।।"

(स्व०त,०1,3)

"नमः शिवायः सततं पञ्चकृत्यविधायिने।
चिदानन्दघनस्वात्मपरमार्थावभासिने"।।

(प्र०ह०,पृ०,1)

~ बन्धमोक्षकृत् :— **शिवस्यैव शक्तिरविज्ञाता सती जीवान् बन्धने स्थापयति; सैव च सम्यग् विज्ञाता सती तान् मोचयति। यथा—**

"सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका।।"

(स्पं०का०,48)

"सा चेयं क्रियास्वभावा भगवतः पशुवर्तिनी शक्तिः।

यदुक्तम् :—

'न सा जीवकला काचित्संतानद्वयवर्तिनी।
व्याप्त्री शिवकला यस्यामधिष्ठात्री न विद्यते।।'

इति। सैव च बन्धकारणम् अज्ञाता, ज्ञाता सा च पुनः परापरसिद्धिप्रदा भवति पुंसाम्।"

(स्पं०वृ०,पृ०,37-38)

~ भुवनमिति :— **तत्तदूर्ध्वभुवनं यथाभिलषित-भोगसिद्धिदं, तत्रत्यभुवनेशसहितमुपास्यं भवति। शिव एव तत्तदाकारतयोपास्यो भोगप्रदः। जडस्य भोगदत्वाभावात् स एवहि तत्र भुवनाधिपतिरूपेण स्थितः इति भुवनसमाख्यः। यथा—**

"भुवनं तत्तद्भुवनाधिष्ठेयं भोगाधाररूपम्।"

(तं०आ०वि०,खं०1,पृ०,100)

नैतद् व्याख्यानं सम्यक् सन्तोषकरम्। तत्तद्भुवनमपि भुवनपतिसहितं यतः शिवरूपं ततः शिवो भुवनात्मकतयाप्युपास्यो भवतीति शोभनतरं व्याख्यानम्।

~मन्त्र इति :— **बीजपिण्डात्मकाः वर्णसमुदायविशेषाः। यथा—**

"ॐ" "ह्रीं" "श्रीं" "क्लीं" इत्याद्याः। यथा—

"मन्त्रःअकारोकारमकारात्मा।"

(तत एव)

~ मातृकाक्रमे :— **मातृकाक्रमे अकारादि-विसर्गान्तः शिवः उच्यते। तत्र 'अ' इत्यनुत्तरः परशिवः। 'आ' इत्यानन्दः। 'इ' चेच्छा। इत्येवमेवाकाराद्यास्तस्य शक्तयस्तद्विशिष्टः शिव एव स्वरषोडशकरूपतयाभिव्यक्तो भवति मातृकाभ्यासे। यथा—**

"अकारादिविसर्गान्तः शिवः।"

(पू० प्र०2,100)

~ मूर्तिषट्कतया :— **उपासनाविषयतादृष्ट्या शिवः प्राधान्येन षट्सु मूर्तिषूपास्यो भवति, गौणत्वेन मूर्तिगणनां कः कुर्यात्। ताश्च शिवस्य षट् संख्याकाः प्रधाना मूर्त्तय एताः—**

(1) भुवनावली (भुवनाध्वनीत्या)भुवनेशमूर्त्तयश्च।

(2) विग्रहः = तत्तद्रुद्रादिविग्रहवन्तोऽधिकारिणो देवाधिदेवाः।

(3) ज्योतिः = भ्रूमध्यादौ साक्षात्क्रियमाणं बिन्द्वादिमयं तेजः, स्फुरत्तारकसन्निभः प्रकाशविशेषः।

(4) खम् = प्रमाणप्रमेयप्रपञ्चशून्यं शक्ति (कौण्डली) व्यापिनीसमनाख्यं शक्तित्रयं प्रणवकलात्मकम्।

(5) शब्दः = नादोऽनाहतः।

(6) मन्त्रः = प्रणवादिबीजपिण्डात्मका वर्णसमूहाः।

तान्त्रिकासु साधनास्वेतेषु षट्सु मूर्तिरूपेषु स्थितः शिवः उपास्यो भवति प्रायः। यथा—

"भुवनं विग्रहो ज्योतिः खं शब्दो मन्त्र एव च।

बिन्दुनादादिसम्भिन्नः षड्विधः शिव उच्यते।।"
(तं०आ०1,63)

"बिन्दुर्नादस्तथा व्योम मन्त्रो भुवनविग्रहौ।
षड्वस्त्वात्मा शिवो ध्येयः फलभेदेन साधकैः।।"
उद्धः:- (तं०आ०वि०,खं०1,पृ०,100)

बिन्दुरत्र ज्योतिः, नादः = शब्दः, व्योम = खम् यथा—

"उन्मना तु परोभावः स्थूलस्तस्यापरो मतः।
पुनः शून्यं च व्योमात्मा संस्पर्शश्च ततः परम्।।
शब्दो ज्योतिस्तथा मन्त्राः कारणा भुवनानि च।"
उद्धः:- (तत एव)

"व्योम-विग्रह-बिन्द्वर्ण-भुवनाध्वविभेदतः।
लक्ष्यभेदः स्मृतः षोढा .....।।"
(तत एव)

बुभुक्षूणामेव कृत एतदिति वेद्यम्। यथा—
"यो यत्राभिलषेद्भोगान् स तत्रैव नियोजितः।
सिद्धिभाक् .....।।"
(तत एव)

~ लक्षणतः :— **सततं स्फुरद्रूपत्वम्, निर्वृतचिद्रूपत्वं, विभुत्वम्, अनिरुद्धेच्छाप्रसरत्वं, सतत प्रसरज्ज्ञानक्रियाशक्तिमत्त्वं चेति लक्षणजातं शिवस्य। यथा—**

"आत्मैव सर्वभावेषु स्फुरन्निर्वृतचिद्विभुः।
अनिरुद्धेच्छाप्रसरः प्रसरद्ज्ञक्रियः शिवः।।
(शि०दृ०1,2)

"निर्वृतचित्त्वाद्येव च शिवत्वमित्यर्थाच्छिवलक्षणमपि दर्शितम्।"
(शि०दृ०वृ०,पृ०,5)

~ लिङ्गादिरूपः :— **लिङ्गस्थण्डिलमूर्त्तिचित्रयन्त्रादि जडमपि वस्तु शिवत्वभावनयोपास्यमानं सच्छिव एव। तत एवाभीष्टफलप्रदातृत्वमस्य। यथा—**

"तथा वेद्यस्वभावोऽपि वस्तुतो न शिवात्मताम्।।
कोऽपि भावः प्रोज्झतीति सत्यं तद्भावना फलेत्।"
(तं०आ०10,120-121)

"कोऽपीति तृणपर्णपाषाणादिरपीत्यर्थः।"
(तं०आ०वि०,खं०7,पृ०,89)

~ विग्रहः इति :— **विग्रहपदेन तत्तच्चतुर्मुख-चतुर्भुज-त्रिनेत्रादि-शरीरधारी देवाधिदेवविशेषोऽभिप्रेतो ब्रह्मविष्णुरुद्रेश्वर-भट्टारकादिः। एषु शरीरेषु शिव एवोपास्यो भवति। यथा—**

"विग्रहशब्देनोपचाराद् विग्रहिणो लक्ष्यन्ते। तेषां च रुद्रक्षेत्रज्ञादिनानारूपत्वेऽपि तत्तत्सिद्धिदानसामर्थ्यादिह रुद्रादीनि कारणान्येव।"
(तं०आ०वि०,खं०1,पृ०,100)

कारणानि च ब्रह्म-विष्णु-रुद्रेश्वरसदाशिवानाश्रिताख्यानि षट्; अनाश्रितं विहाय च पूर्वाणि पञ्च। एतेष्वेव शरीरेषु प्रायः पूज्यते शिवः।

~ विश्वरूप :— **न खलु शान्तब्रह्मरूपता शिवस्य, तथात्वं, तु खादितुल्यत्वेन जडत्वम्, अपितु स्वरसेन विश्वात्मकतयापि तस्यावभासनशीलत्वं शिवत्वम्। तेन शिवः सततं संविद्रूपतायां तिष्ठन्नपि स्वात्मानं स्वरसेन विश्वरूपतयापि यद् भासयति तदेवास्य शिवत्वं शून्यात् भेदप्रयोजकम्। यथा—**

"न खल्वेष शिवः शान्तो नाम कश्चिद्विभेदवान्।।
सर्वेतराध्वव्यावृत्तो घटतुल्योऽस्ति कुत्रचित्।
महाप्रकाशरूपा हि येयं संविद्विजृम्भते।।
स शिवः शिवतैवास्य वैश्वरूप्यावभासिता।
तथाभासनयोगोऽतः स्वरसेनास्य जृम्भते।।"
(तं०आ०15, 264-266)

"तदित्थं परमेशानो विश्वरूपः प्रगीयते।
न तु भिन्नस्य कस्यापि धरादेरुपपन्नता।।"
(तं०आ०11,116)

~ विश्वोत्तीर्ण :— **विश्वोत्तीर्णः शुद्धोऽनवच्छिन्नः प्रकाशः शिवः। विश्वमयताभासनलीलाऽस्य शिवता, या शक्तिरूपतास्योक्ता। विश्वोत्तीर्णत्वे सततं प्रकाशमानेऽपि विश्वमयत्वमात्मनः प्रकटयन् देवः परमशिवः। स च शिवशक्त्योः सामरस्यमयी शुद्धा संवित्। स एव हि परमेश्वरः। यथा—**

"परमस्वच्छन्द इति प्राग्वद् विश्वोत्तीर्ण एवोच्यते। अन्यस्तु विश्वोत्तीर्णविश्वमयः परमशिवभट्टारकः पश्चात् प्रकटयिष्यते।"
(म०मं०प०,पृ०,37-38)

~ शक्तिनरात्मक :— **शिव एव शक्तिरूपतया नररूपतया चाप्याभासते स्वमहिम्ना। यथा—**

"चिदेकघनः शिव एव शक्तिरूपतया उल्लास्य नरात्मकविश्वरूपतया स्फुरति, न तु शिवव्यतिरिक्तं शक्तिनरयोः किमपि रूपं, शिव एव तु इत्थं निजरसाश्यनतया स्फुरति।"
(प०सा०वि०,पृ०,95)

~ षडविध :— **भुवनविग्रहादिरूपत्वेनोपास्यः शिवः। यथा —**

"भुवनं विग्रहो ज्योतिः खं शब्दो मन्त्र एव च।
बिन्दुनादादिसम्भिन्नः षड्विधः शिव उच्यते।।"
(तं०आ०1,63)

~ शब्दः इति :— **स चानाहतनादात्मेति विज्ञेयः। यथा—**

"शब्दो नादात्मा।"
(तत एव)

~ सदाऽद्वैतरूप :— **शिवः पञ्चकृत्यप्रपञ्चोल्लासनपरः**

सन्नपिसदाऽद्वैतभावस्थ एव भवति।

यथा—

"शिवस्य परिपूर्णस्य स्वतन्त्रस्य विभोर्यतः।
कः कर्ता क्षोभकः को वा तस्मादद्वैतता शिवे।।"

(ने०तं०21,41)

~ सर्वकर्त्ता :— **सर्वेषु प्राणिरूपेषु स्वयं स्थितः शिव एव सर्वत्र कर्त्ता। जीवोऽपि शिव एव। शिवप्रेरणयैव जीवस्य करणे प्रवृत्तिः। यथा—**

"स्वरूपानधिकस्यापि क्रमस्य स्वस्वभावतः।।
स्वातन्त्र्यादृभासनं स्याच्चेत् किमन्यद्ब्रूमहे वयम्।
इत्थं श्रीशिव एवैकः कर्त्तेति परिभाष्यते।।"

(तं०आ०9,20-21)

"क्रमस्य स्वस्वातन्त्र्यादतिरिक्तायमानतयावभासनमित्युच्यते, तर्ह्यस्मद्दर्शनमेवागतोऽसीत्याह।"

(तं०आ०वि०,खं०6,पृ०,29)

द्र०:- (पू०प्र०,खं०2,67-68)

"पर एव शिवः स्वेच्छया नियतिदशायां कुम्भकारस्य मृदादेश्च परस्परापेक्षया कार्यमुपजनयेत्, यस्तु तस्य सत्यपि मृत्पिण्डादौ 'मयेदं कृतम्' इत्यभिमानः सोऽपि तन्महिम्नैव।"

(तं०आ०वि०,खं०6,पृ०,12)

"स्वतन्त्रता च चिन्मात्रवपुषः परमेशितुः।।"

(तं०आ०9,9)

~ सर्वकारणम् :— **वस्तुतः शिवः सर्वजगत्कारणम्। स एव स्वान्तश्चिद्रूपतया प्रकाशमानं भावजातं स्वतो बहिरिदन्तया भासयति, अन्तःकरणैकवेद्यतयापि, उभयकरण-वेद्यतयापि।**

यथा—

"वस्तुतः सर्वभावानां कर्तेशानः परः शिवः।"

(तं०आ०9,8)

"चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद्बहिः।
योगीव निरुपादानमर्थजातं प्रकाशयेत्।।"

(ई०प्र०1-5-7)

~ सर्वभावस्वभाव :— **सर्वेषामपि भावानां यो निजो भावः— सत्ता, असौ वस्तुतः प्रकाशात्मा शिव एव।**

यथा—

"अत एव सर्वभावानां शिवः स्वभावस्तेन विना निःस्वभावत्वात् सर्वस्येत्याशयेन स्पन्दशास्त्रे तमधिष्ठातृभावेन स्वभावम् .....।"

(स्पं०का०,11) इति कथितम्।

वृत्तावपि :—

"स्वस्वभावस्यैव शिवात्मकस्य।"

(स्पं०वृ०,11)

(ई०प्र०वि०वि०,खं०3,पृ०,270)

~ सर्वरूप :— **शिव एव नटवज्जगदाकारतयाऽऽभासते।**

यथा—

"क्रीडया दुःखवेद्यानि कर्मकारीणि तत्फलैः।
सम्भत्स्यमानानि तथा नरकार्णवगह्वरे।।
निवासीनि शरीराणि गृह्णति परमेश्वरः।
यथा नृपः सार्वभौमः प्रभावामोदभावितः।।
क्रीडन्करोति पादातधर्मांस्तद्धर्मधर्मतः।
तथा प्रभुः प्रमोदात्मा क्रीडत्येवं तथातथा।।"

(शि०दृ०1,36-38)

"नानाविधवर्णानां रूपं धत्ते यथाऽमलः, स्फटिकः।
सुरमानुषपशुपादपरूपत्वं तद्वदीशोऽपि।।"

(प०सा०,6)

~ सर्वव्यापक :— **सर्वेषु भुवनेषु प्रकाशैकघनरूपतया व्याप्तः शिवः। सर्वं प्रकाशते। ततः प्रकाश एव सर्वाकारतया प्रकाशते। अप्रकाशस्य प्रकाशनासम्भवात्। यथा—**

"यान्युक्तानि पुराण्यमूनि विविधैर्भेदैर्यदेष्वन्वितं
रूपं भाति परं प्रकाशनिबिडं देवः स एकः शिवः।।"

(तं०आ०9,1)

~ सर्वात्मा :— **सर्वमप्यनुभूयमानं प्रमेयजातं प्रमातृप्रकाशे एवावभासते। तत्र प्रमातृप्रकाश एव सर्वप्रमेयरूपतया प्रकाशते। प्रकाशस्यैव प्रकाशितुं समर्थत्वात्। तदसौ शिवप्रकाश एव सर्वत्र तत्तदाकारतयावभासते। यथा—**

"एक एव आत्मा ग्राह्यग्राहकतया नानारूपस्वभावः सन्, पुनरपि सर्वानुभवितृतया सर्वस्यैकतया प्रथते इति न काचिदद्वयवादक्षतिः।।"

(प०सा०वि०,पृ०,23-24)

~ स्वप्रकाश :— **चिदात्मकः शिवः केन प्रकाशनीयः, चितः एव सर्वप्रकाशकत्वात्। ततोऽसौ स्वप्रकाशः सर्वप्रकाशकश्चेति। यथा—**

"शिवः प्रमाता नो मेयो ह्यन्याधीनप्रकाशता।।
मेयता सा न तत्रास्ति स्वप्रकाशो ह्यसौ प्रभुः।"

(तं०आ०10,113-114)

शिवज्ञानम् :— अनुभूतिमयम् :— सर्वथाऽभेदभावस्य साक्षात्कारः।

यथा—

"शिवज्ञानं रुद्रशक्तिसमावेशः।"

(ने०तं०उ०,खं०2,पृ०,45)

~ शास्त्ररूपम् :— **शैवागमात्मकं शास्त्रजातम्।**

यथा—

"शिवादिगुरुपंक्तिर्या रुद्रकोटयो ह्यनेकशः।।
आप्तोपदेशमात्रेण पारम्पर्येण संस्थिताः।
शिवज्ञानं यतो देवि सदैवाप्तागमः स्मृतः।"

(ने०तं०16,81-82)

~ तद्विशेषा :— यथा—

"लौकिकाद्येषु ये साध्या अतिमार्गान्तगोचरे।।
लीलया साधयेत्सर्वान् शिवज्ञाने महोदये।
न सर्वैः साध्यते तद्वै यतोऽतीव सुनिर्मलम्।।
यतो योजयते देवि अभावे परमे पदे।
अभावं भावनातीतं प्रपञ्चातीतगोचरम्।
मनोबुद्ध्यादिनिर्मुक्तं हेतुवादविवर्जितम्।
प्रत्यक्षादिप्रमाणैश्च व्यतीतं प्रभु चाव्ययम्।।
सर्वतर्कागमातीतं पाशमन्त्रविवर्जितम्।
सर्वज्ञं सर्वगं शान्तं निर्मलं निरुपप्लवम्।।
सर्वशक्त्यात्मकं ह्येकं स्वतन्त्रानाथनादिमत्।
सर्वातिशयनिर्मुक्तमनादिभवर्जितम्।।
सर्वज्ञानपदातीतं शैवं ज्ञानं परं स्मृतम्।"

(स्व०तं०11,189-195)

'स्वतन्त्रानाथनादिमत्'

इत्यत्र पाठः संशयित इव प्रतिभाति।

टीका च तत्र यथा —

"न विद्यतेऽन्यो नाथो यस्य तत्"

(स्व०तं०उ०,खं०6,प०11,पृ०,109)

एषापि न सम्यक् सन्तोषावहा।

शिवतत्त्वम् :— (1) परस्परावियुक्तप्रकाशविमर्शात्मकज्ञानक्रिया स्वरूपं, क्रियाशक्तिद्वारा स्वीकृतसृष्ट्यादिकृत्यपञ्चकाभासनप्रपञ्चम्, उपदेशावसरे तथोपदिश्यमानं परं सत्यं शिवतत्त्वम्। यथा—

"ततो हेतोरन्योन्यमविमुक्ते ज्ञानक्रिये प्रकाशविमर्शात्मिके। तदेव च सर्वभावानां पारमार्थिकं वपुः। ततः क्रियाशक्तिद्वारा-स्वीकृतसकलकृत्यपञ्चकप्रपञ्चनस्वातन्त्र्यं भावनाद्युपयोगितयो पदेशेनाभास्यमानमनवभासरूपमपि शिवतत्त्वमुच्यते।"

(ई०प्र०वि०वि०,खं०3,पृ०,257)

(2) प्रकाशविमर्शात्मकं तत् शुद्धं संवित्तत्त्वं यत् स्वेच्छया दर्पणनगरन्यायेन स्वात्मन्येव विश्ववैचित्र्यसृष्टिसंहारादिसम्पादनसमर्थं परं पारमेश्वरं तत्त्वम्।

तदुक्तम् —

"तदेतदवियुक्तज्ञान, क्रियारूपं क्रियाद्वारेण सकलतत्त्वराशिगत- सृष्टिसंहारशतप्रतिबिम्बनसहिष्णु यत् तदुपदेशभावनादिषु तथाभासमानमनाभासरूपमपि वस्तुतः, शिवतत्त्वम्।"

(ई०प्र०वि०,खं०2,पृ०,190)

परमशिवाख्यस्य परस्य तत्त्वस्यावस्थाविशेषरूपता शिवतत्त्वम्।

(3) अनन्तप्रकारकस्वातन्त्र्यशाक्त्येकघनं तच्चमत्कारेण च भैरवस्वभावं परं तत्त्वं शिवतत्त्वं, न पुनः शान्तसंविन्मात्ररूपमनीश्वरम्। यथा—

"शिवतत्त्वमेव अनन्तविचित्रस्वातन्त्र्यस्फारस्फुरणशक्तिचमत्कारभरिततोपात्तभैरवभावं निर्णीतम्।"

(प०त्री०वि०,पृ०,178)

(4) सर्वादिमध्यान्तभूतं तत्त्वं शिवतत्त्वम्।

यथा—

"सर्वाग्रमध्यान्तगामित्वेनापरिच्छिन्नमनन्तशक्ति शिवतत्त्वम् अत्रोक्तं भवति।"

(प०त्री०वि०,पृ०,152)

(5) अनाद्यनन्तं सर्वं वस्तुजातमात्मनि संविद्रूपतायामेव बिभ्रत् स्वतन्त्रमैश्वर्यघनं भैरवात्मकं परिपूर्णं संविदेकघनं परं तत्त्वम्। यथा—

"शिवतत्त्वमिदमनाद्यन्तं स्वयं प्रथमानं पूर्णतात्मकनिरपेक्षतामात्रसतत्त्वस्वातन्त्र्यसारमन्तःक्रोडीकृत्यात्मतैकपरमार्थं तत्त्वजातं ..... यावदकालकलितमासीनं भैरवरूपमवतिष्ठते।"

(प०त्री०वि०,पृ०,143)

(6) स्वभावतोऽविकल्पप्रकाशात्मकं सदपि समस्तविकल्पात्मकाभासजातोद्भवविलयभूमिभूतं स्वतन्त्रं स्वेच्छया तत्तत्तत्त्वोद्भवविलयकारी। यथा—

"तदेवमेव इहापि शिवतत्त्वं सदा अविकल्पमेव विकल्पसूति स्वातन्त्र्यसरसमनादिसर्वादिभूतं सिद्धम्। अत्र तावन्न विमतिः।"

(प०त्री०वि०,पृ०,137)

(7) अप्रमेयं स्वप्रकाशं शुद्धं संवित्तत्त्वं प्रकाशांशप्राधान्येन प्रकाशमानम्। यथा—

"अप्रमेयं ततो ज्ञेयं शिवतत्त्वं वरानने।।"

(स्व०तं०10,674)

(8) सृष्टिं प्रति परमेश्वरस्य प्रथम स्पन्दः शिवतत्त्वम्। यथा—

"सिसृक्षोः प्रथमस्पन्दः शिवतत्त्वं विभोः स्मृतम्।।"

(अ०प०,18)

यथा—

"यदयमनुत्तरमूर्त्तिर्निजेच्छयाखिलमिदं जगत्स्रष्टुम्।
पस्पन्दे स स्पन्दः प्रथमः शिवतत्त्वमुच्यते तज्ज्ञैः।।"

(ष०त्रिं०त०सं०,1)

(9) परिपूर्णशुद्धसंविन्निष्ठाहन्ताविमर्शसारः स्वात्मप्रकाशः शिवतत्त्वम्। तच्च— "अहम्" इत्येव प्रकाशते। न तत्रेदमंशस्य मनागप्यवभासः।

यथा—

"सर्वप्रमातृणामन्तः पूर्णाहन्ताचमत्कारमयं सर्वतत्त्वोत्तीर्णं महाप्रकाशवपुर्यच्चैतन्यमेतदेव शिवतत्त्वम्।"

(प०सा०वि०,पृ०,41)

(10) विश्वोत्तीर्णं शुद्धप्रकाशात्मकं परिपूर्णं तत्त्वम्। तत्तत्त्वं यच्छुद्धमात्मरूपं सत् समस्तस्य प्रपञ्चस्योद्भवस्थानम्; तत्तत्त्वं यतः सर्वमुदेति यस्येच्छया च यस्मिन्नेव सर्वं लयं याति, सर्वं स्थितेऽपि यत्तत्त्वं मनागपि न स्वरूपाद विचलति।

द्र०:- (आ०वि०सु०,पृ०,123)

(11) "तदुक्तम् :— शिवतत्त्वं नाम इच्छाज्ञानक्रियात्मककेवल पूर्णानन्दस्वभावरूपः परमशिव एव।"

(प०प्रा०,पृ०,6)

~ अनण्डरूपम् :— **अण्डं त्वावरणात्मकं भवति। शिवतत्त्वं त्वनावृतमेव। ततो नाण्डता तस्य।**

यथा—

"शिवतत्त्वमतः शून्यातिशून्यं स्यादनाश्रि(वृ)तम्।"

(तं०आ०11,21)

~ कलात्मकम् :— **यद्यपि शिवतत्त्वमखण्डं परिपूर्णं च सर्वतः सर्वदा, सर्वतश्चाकलितम्। तथाप्युपदेशभावनादौ तस्यापि कल्यमानत्वात् तदपि कला, सा च शान्त्यतीतेति बोद्धव्यम्। यथा—**

"स्वातन्त्र्यात्तु निजं रूपं बोद्धृधर्मादविच्युतम्।।
उपदेशतदावेशपरमार्थत्वसिद्धये।
बोध्यतामानयन्देवः स्फुटमेव विभाव्यते।।
यतोऽतः शिवतत्त्वेऽपि कलासंगतिरुच्यते।"

(तं०आ०11,10-12)

~ नरशक्तिमयम् :— **त्रीण्यपि शिवादीनि तत्त्वानि त्रिकरूपाणि। तेन शिवेऽपि शक्तिरूपता नररूपता चान्तस्तिष्ठत्येव। तथापि शिवत्वस्यैव तत्र प्राधान्यात्तथैव व्यपदेशः।**

द्र०:- 'नरतत्त्वम्' इति।

~ पञ्चावस्थाकम् :— **शिवतत्त्वे तावत् क्रियाशक्तिः = जाग्रत्, ज्ञानशक्तिः = स्वप्नः, इच्छाशक्तिः = सौषुप्तम्, आनन्दशक्तिः = तुर्यम्, चिच्छक्तिः = तुर्यातीतम्। यथा—**

"अभिन्नेऽपि शिवतत्त्वे क्रियाज्ञानेच्छानन्दचिद्रूपक्लृप्त्या प्रसंख्यानयोगधनाः पञ्चपदत्वमाहुः।"

(तं०सा०,पृ०,108)

~ मातृकाक्रमे :— **षोडशशक्तिव्यञ्जकस्वरषोडशकरूपम्। यथा—**

"अकारादिविसर्गान्तं शिवतत्त्वम्।"

(प०त्री०विवृ०,पृ०,4)

~ विश्वाधारभूतम् :— **सर्वं हि सृष्टं तत्त्वजातं शुद्धप्रकाशात्मके शिवतत्त्व एवाधारभूते प्रतिष्ठितं सदवभासते, न स्वतन्त्रतया। यथा—**

"शिवतत्त्वं हि सर्वपदार्थानां वपुः। तद्भित्तिपृष्ठे त्र सर्वभावचित्रनिर्भास इति।"

(ई०प्र०वि०वि०खं०3,पृ०,257)

~ शक्त्यभिन्नम् :— **वस्तुतः परमशिव एव शिवः, स एव च शक्तिः। विश्वोत्तीर्णत्वेन स एव शिव इति, विश्वमयत्वेन च स एव शक्तिरिति शिष्यबुद्धिवैषद्यार्थं व्यपदिश्यते। ततः शिवशक्त्योः पृथक्पृथक् तत्त्वरूपता केवलं वाचनिकी, उपदेशसौकर्याय कल्पिता गुरुभिरिति न मुख्य वृत्त्योक्ता मन्तव्या। यथा—**

"शिवशक्त्योस्तु तत्त्वव्यपदेशो नात्यन्तं मुख्यया वृत्त्या, किं तर्हि सदाशिवाद्युत्तरतत्त्वव्रातनिर्वाहकताकारविकल्प संस्पर्शमात्रादौपचारिकः।"

(म०मं०प०,पृ०,41)

~ सर्वात्मकम् :— **सर्वस्य प्रकाशात्मकत्वात्, प्रकाशस्य च शिवरूपत्वात्। यथा—**

"शिवतत्त्वमेव सर्वमेतदेव च सर्वभावानां तत्त्वमिति तदेव तावद् ज्ञानक्रियायोगादाभासविमर्शसारम्।।"

(ई०प्र०वि०वि०खं०3,पृ०,256)

~ स्वरूपत :— **शिवतत्त्वं नैव शून्यात्मकम्, अपितु चिदानन्दात्मस्वतन्त्रबोधात्मकम्। यथा—**

"तत्किं न किंचिद्वा किंचिदित्याकाङ्क्षावशे वपुः।
चिदानन्दस्वतन्त्रैकरूपं तदिति देशने।।
सप्तत्रिंशं समाभाति तत्राकाङ्क्षा च नापरा।"

(तं०आ०11,25-26)

सप्तत्रिंशताऽत्रोपदेशमध्य एवोदेति न वस्तुतः षट्त्रिंशदतिरिक्तता कापि। अत एव क्वचित् षट्त्रिंशत्तत्त्वापेक्षया मूलभूतं तत्त्वं सप्तत्रिंशत्तत्त्वतयोपदिश्यते। परमुपदेशाङ्गतयैवैषा कल्पना, न पुनर्वस्तुतः शिवशक्तिपरमशिवतां परस्परं भेदः।

शिवतनुशास्त्रम् :— (1) आगमिकः कश्चन ग्रन्थो यन्मतं तन्त्रालोके भूरिशः समुद्धृतं, पंक्तयश्चोद्धृतास्तद्विवेके। यथा—

"योगाष्टकं गुणस्कन्धे प्रोक्तं शिवतनौ पुनः।।
योनीरतीत्य गौणे ..... इत्यारम्य।।
..... श्री कण्ठनाथस्य।।
इत्यन्तम्।"

(तं०आ०वि०खं०5,पृ०,182-183)

(2) बृहस्पतिपादनाम्ना गुरुणा प्रोक्तं किमपि शैवागम शास्त्रम्। यथा—

"इति निर्वचनैः शिवतनुशास्त्रे गुरुभिः स्मृतो देवः।"

(तं०आ०1,103)

"गुरुभिरिति बृहस्पतिपादैः स्मृत इति—
एवं वामो देवः स दीव्यति क्रीडति प्रभुर्यस्मात्। **(उद्ध०)**
अविहतगतिः स यस्माद्देवस्तस्मात्सदाशिवो गीतः।
इत्यन्तेन ग्रन्थेन व्यावर्णितः इत्यर्थः।"

(तं०आ०वि०खं०1,पृ०,146)

अस्य पंक्तय उद्धृतास्तन्त्रालोकादौ।

तद्यथा—

"योनीरतीत्य गौणे .....। इत्यारभ्य ..... भर्तुः श्रीकण्ठनाथस्य।। इत्यन्तम्"।

(तं०आ०8,264-267)

द्र०:- (तं०आ०8, 299-301, 9, 206, तं०आ०वि०,खं०1, पृ०,146,खं०5,पृ०,205-207,209,210,खं०6,पृ०, 166-167,स्व०तं०उ०,प०1,पृ०,4,प०10,पृ०,494) **इति।**

शिवताः — ~ साधकस्यः — **(1) सांसारिकमोहराहित्यादानन्दसार भोगापवर्गरूपपरापरश्रेयः परमार्थता। यथा—**

"अशिवरूपसांसारिकमोहापहस्तनयोगादानन्दसारभोगापवर्गरूपपरापरश्रेयः परमार्थतया शिवः परमेश्वरः।"

(ई०प्र०वि०वि०,खं०1,पृ०,7)

(2) समूलमुन्मुलिते सति मले साधकः सर्वभासिनीं शिवतां पश्यति। यथा—

"साकल्येन पुनर्ध्वस्ते शिवता सर्वभासिनी।।"

(पू०प्र०श्लो०,158)

(3) समरसरूपायाः पूर्णाहन्तायाः अनुभूतिः साधकस्य शिवता। यथा—

"तदा नीलामात्रापेक्षया अहन्ताच्छादितेदन्तासूत्रणरूपा तावती सदाशिवेश्वरता उच्यते। तदैव सैव च पूर्णाहन्तात्मसामरस्यावस्थित विश्वापेक्षया शिवतापि।"

(स्प०सं०,पृ०,7-8)

~ शुक्तिरजतादौः — यद्यत् प्रकाशते तत्तत्प्रकाशरूपमेव, अत एव सत्यं शिवात्मकं चेति। रज्जुसर्पोऽपि वा शुक्तिकारजतमपि वा सत्यं शिवात्मकमेव सर्वम्। इदं सत्यमिदमसत्यमिति लोकव्यवहारमात्रम्। यथा—

"मिथ्याज्ञानविकल्पनीयानां रजतसर्पादिनां घटादीनामिवचिद्व्यक्तिशक्ता प्रकाशमानता नाम विद्यते, तदेप सत्त्वं परमार्थात्वमतोऽपि तच्छिवत्वम्। अनिवार्यं च एतदिष्यत एव एषुसत्यत्वं चिदभिव्यक्तेः तेन तेन रूपेण शिवस्य प्रसरोऽयं यतः। घटज्ञानरजतज्ञानयोश्च द्वयोरपि सत्यत्वे सम्यग्मिथ्यात्वभेदस्तर्हि कथम्। व्यवहारायं व्यवहारप्रयोजनोऽसौ। न च अप्ररूढत्वात् व्यवहारसत्यत्वं वा सत्यत्वं भवति।"

(शि०दृ०वृ०,पृ०,149)

शिवतासमापत्तिः — स्वात्मनः शिवरूपतया प्रत्यभिज्ञायां सञ्जातायां साधकस्य शिवीभावः।

"तस्य ध्येयस्य य आत्मा स्वरूपं तस्य भापस्तदात्मता तया समापत्तिरेकीभावः।"

(स्पं०वि०,पृ०,95)

"तदात्मतासमापत्तिः शिवैक्यावेशो, न तु पञ्चवक्त्रादेर्व्यतिरिक्त स्याकारस्य दर्शनं ..... अहमेव तत्संवेदनरूपेण तादात्म्य प्रतिपत्तितो विश्वशरीरश्चिदानन्दघनः शिव इति सङ्कल्पो यस्याविकल्पशेषी भूतत्वेन फलति, तस्य ध्येयमन्त्रदेवतादि किं न नाम अभिमुखीभवति सर्वस्यैतदद्वयप्रथालग्नत्वात्।"

(स्प०नि०,पृ०,51)

शिवतासादनप्रकारः — परोयोगी स्वकीयायाः इच्छाशक्तेः प्रयोगेण भेददृष्टिं यदा निमज्जयति तदा तेन निज-चिद्घन- स्वभावोन्मज्जनेन शिवत्वं सृष्टि-संहारादि-समर्थत्वं साक्षादासाद्यत इव। यथा—

"भेदस्य, तिरस्कारे चिद्धंन-स्वभावोन्मज्जनादपहस्तने सति सर्गान्तरकर्मत्वं यथाभिलषितनिर्मेयनिर्मातृत्वं भवति।"

(शि०सू०वृ०3,36)

शिवतुल्यता :— साक्षात्कृतपारमैश्वर्यात्मकस्वात्मस्वभावो जीवन्मुक्तो योगी तथाविधस्य साक्षात्कारस्य पुनः पुनरभ्यासेन हृदयग्रन्थीभावे जाते सति शिवतुल्यतामासादयति, सृष्टिसंहारादि स्वेच्छया विधातुं समर्थो भवति। यथा—

"तुर्यपरिशीलनप्रकर्षात् प्राप्ततुर्यातीतपदः, स्वच्छस्वच्छन्दचिदानन्दघनेन शिवेन भगवता तुल्यः देहकलाया अगलनात् समो जायते, तद्विगलनेन असौ साक्षात् शिव एव।"

(शि०सू०वृ०3,25)

शिवत्वम् :— (1) सृष्ट्यादिपञ्चकृत्यकारित्वं शिवस्य। यथा—

"इत्थं सृष्टिस्थितिध्वंसतिरोभावमनुग्रहः।
(तिरोभावअनुग्रहः)
इति पञ्चसु कर्तृत्वं शिवत्वं संविदात्मनः।।"

(तं०आ०14,24)

(2) पञ्चकृत्यकारित्वेऽपि परमेश्वरस्याविचलत्वम् कूटस्थप्रकाशरूपत्वम्।

द्र०:- (आ०वि०सु०,पृ०,123) **इति।**

~ तत्साक्षात्कारोपायः — विकल्पात्मकस्मृतिपरम्परायां शामितायां यन्निर्विकल्पे स्वात्मस्वरूपेऽवस्थानाभ्यासः स एव सरलतमः शिवत्वसाक्षात्कारोपायः, चेत् तदभ्यासतः साधकः सुषुप्तौ न प्रविशेत्। यथा—

"कल्मषक्षीणमनसा स्मृतिमात्रनिरोधनात्।
ध्यायते परमं ध्येयं गमागमपदे स्थितम्।।
परं शिवं तु व्रजति भैरवाख्यं जपादपि।"

(तं०आ०,1,89-90)

"निराधारं मनः कृत्वा विकल्पान्न विकल्पयेत्।
तदात्मपरमात्मत्वे भैरवो मृगलोचने।।"

(वि०भै०108)

~ सिद्धयोगिन :— **असौ देहस्थोऽपि शिवभाव एव तिष्ठति। यथा—**

"यत्र स्थितमिदं सर्वं कार्यं यस्माच्च निर्गतम्।
तस्यानावृतरूपत्वान्न निरोधोऽस्ति कुत्रचित्।।"

(स्पं०का०,2)

"कथं पुनः स्वस्वभावस्यैव संसारिणः शिवत्वेन निर्देशः—

इति यद्युच्यते, तद्यत्र स्थितमिदं जगत्, यस्माच्चोत्पन्नं तस्य संसार्यवस्थायामपि अनाच्छादितस्वभावत्वान्न कवचिन्निरोधः, अतः शिवत्वमुच्यते।"

(स्पं०वृ०,53)

"पञ्चकृत्यस्वतन्त्रत्वसम्पूर्णस्वात्ममानिनः।
योगिनोऽर्चाजपध्यानयोगाः संस्युः सदोदिताः।।"

(तं०आ०14,25)

शिवदशा :— (1) असौ शुद्धसंविदः स्थितिर्यस्यां

नैव सृष्टिर्नैव च संहारः, न च भावाभासः कोऽपि। यथा—

"शिवत्वे तु भावानां नामापि नास्ति, इति न तु सृष्टिर्न संहारः।"

(ई०प्र०वि०वि०,खं०3,पृ०,27)

(2) असौ स्थितिर्यस्यां सर्वमपि जगत् शुद्धसंविन्मयतायामेव तिष्ठति, बीजमध्ये इव वृक्षो बीजमात्ररूपतायाम्। यथा—

"यथा हि पुरुषस्य इच्छावस्थायाम् इष्यमाणः पदार्थः स्वरूपाव्यतिरेकेणैव अवतिष्ठते, तथा भगवतः शक्तौ अनन्तावभासविशेषचित्रं जगद् मनागपि अनुपजातविशेषात् स्वरूपाद् अव्यतिरेकेणैव अवतिष्ठते। सेयं परमार्थसती शिवदशा।"

(स्पं०वि०,पृ०,5)

शिवदृष्टिः :— ~ ग्रन्थ :— काश्मीरशैवदर्शनस्य सर्वप्रथमस्तर्कयुक्तिप्रधानो दर्शनग्रन्थः। इतः पूर्वं केवलमागमिकानामेव ग्रन्थानामाविर्भावोऽभूत, न पुनर्नैयायिकशैल्यां रचितस्य कस्यापि दर्शनग्रन्थस्य। ग्रन्थस्यास्य प्रकरणमिति नामकरणम्। तदुक्तं ग्रन्थान्ते :—

(क) तदेवमेतद् विहितं मया प्रकरणं मनाक्।"

(शि०दृ०7,122)

(ख) "शिवदृष्टिप्रकरणे करोमि पदसङ्गतिम्।"

(शि०दृ०वृ०,पृ०,2)

आ० सोमानन्दोऽस्य शास्त्रस्य निर्माता। आ० उत्पलदेवोऽस्योपरि वृत्तिकृत्। आ० अभिनवगुप्तेनास्योपरि शिवदृष्ट्यालोचनमिति संज्ञकं भाष्यं लिखितमभूत्। परमद्यत्वे तन्नैव लभ्यते क्वापि। शिवदृष्टिवृत्तिरपि तावदपूर्णैव लभ्यते। कश्मीरमातृकासु चतुर्थस्याह्निकस्य चतुःसप्तति संख्यां कारिकां यावदेव शिवदृष्टिस्तद्वृत्तिश्च लभ्येते। शेषः कारिकाभागः मद्रपुरे (Egmore Manuscripts Library) **इति नामकात् पुस्तकालयात् सम्प्राप्यैव कशमीरग्रन्थावल्यामस्य ग्रन्थस्य मुद्रणं जातम्। ग्रन्थोऽयमतीव तर्कबहुलः। अत एव नेश्वरप्रत्यभिज्ञावदतिलोकप्रियः। परं सूक्ष्मविचारबहुलः, सूक्ष्मतरदर्शनतत्त्वप्रकाशकश्चेति महामहिममण्डितः। अत्र ग्रन्थे तत्काले विद्यमानानां सर्वेषामपि वैदिकागमिकबौद्धार्हतवैयाकरणानां दर्शनविद्यायाः पञ्चदशशाखानां मूलसिद्धान्ताः वर्णिता आलोचिताश्च। किञ्च विज्ञानवादीयानां सूक्ष्मसूक्ष्माणां तर्कयुक्तीनां प्रकाशनमालोचनं चापि सूक्ष्मतरैस्तर्कैः कृतमस्ति। अन्येषां दर्शनानां गुरुभिर्विज्ञानवादं प्रति न्यायं नैव कृतमभूत्। परं शिवदृष्टौ षष्ट आह्निके त्रयोदशदर्शनविद्यानां परीक्षणं यत्र केवलं द्वात्रिंशद्भिरेव श्लोकैः कृतं तत्र केवलस्य विज्ञानवादस्य तर्कयुक्तीनां परीक्षणं त्रयस्त्रिंशत्तमकारिकातोऽष्टाशीतितमकारिकां यावत् पञ्चपञ्चाशद्भिः श्लोकैः कृतमस्ति। यतोऽत्र विषये सोमानन्दनाथस्यैवैषा नीतिर्यत् पूर्वपक्षस्यापि परिपूर्णोऽवबोधः परमावश्यकः उक्तं च तथाभिनवगुप्ताचार्यैः :—**

"तेषां **(सोमानन्दनाथानाम्)** हीदृशी शैली—

'स्वपक्षान्परपक्षांश्च निःशेषेण न वेद यः।
स्वयं स संशयाम्भोधौ निमज्जंस्तारयेत् कथम्।।' इति।"

(प०त्री०वि०,पृ०,117)

~ तद्विषयसूचि :—

प्रथमे आह्निके :—

विषयाः	**कारिकाः**
1- परतत्त्वनिरूपणम्	1-7,
2- परशिवस्य स्वाभाविकी सिसृक्षा	7-8,
3- साधकैस्तस्याः स्वसंवेदनतः साक्षात्कारः	9-10,
4- परतत्त्वस्य स्वाभाविकं परमेश्वरत्वम्	11-12,
5- औन्मुख्यशक्तेः प्रतिपादनम्	13-16,
6- इच्छाशक्तेः प्रतिपादनम्	17-20,
7- ज्ञानक्रिययोः प्रतिपादनम्	20-21,
8- शक्तिपञ्चकस्यौन्मुख्यस्य च सर्वत्र व्यवहारे स्फुरणम्	22-25,
9- बोधरूपतायाः प्रतिपादनम्	26-28,
10- परमेश्वरस्य तत्त्वभुवनशरीरादितयावस्थानं स्वेच्छया	29-38,
11- परमेश्वरस्य विश्वात्मकत्वम्	39-43,
12- एकमात्रायाः पारमेश्वरेच्छाया एव जगत्-कारणत्वम्	44-46,
13- सर्वस्य परमेश्वरात्मकत्वम्	46-49,

द्वितीये आह्निके :—

1- शब्दब्रह्मविषये वाक्चतुष्टयविषये च वैयाकरणमतप्रदर्शनम्	1-11,
2- वाचो ब्रह्मत्वेऽनुपपत्तिः	12-19,
3- पश्यन्त्याः न कथमपि परता ब्रह्मता वा	20-28,
4- अविद्यावादेऽनुपपत्तयः	28-35,
5- पश्यन्त्याः ब्रह्मत्वेऽनुपपत्तयः	36-44,
6- पश्यन्त्याः लक्षणमेवानुपपन्नम्	44-71,
7- ठयाकरणे दार्शनिकतत्त्वविवेचनस्यानवकाशः	72,
8- शब्दस्य ब्रह्मत्वेऽनुपपत्तयः	73-90,

तृतीये आह्निके :—

1- शक्तिभक्तानां मतस्योल्लेखः	1-,
2- शक्तिशक्तिमतोरभेदः	2-3,
3- शक्तेः प्राधान्यकथनेऽनुपपत्तयः	4-8,
4- वाचा प्राधान्यकथनेऽनुपपत्तयः	9,
5- शैवागमादौ तथा कथनस्य तात्पर्यम्	11-16,
6- सर्वत्र शिवात्मकताया एव प्रतिपादनम्	17-20,
7- सर्वशिवतायामाशंक्यमानाः दोषाः	21-32,
8- तेषामेकैकशो निराकरणम्	33-99,

चतुर्थे आह्निके :—

अस्मिन्नाह्निके एकस्य शिवतत्त्वस्यैव जगद्रूपतयावभासनं बहुधा प्रतिपादितमस्ति। तच्चेत्थम् :—

1- शक्तिशक्तिमदभेदतः 1-6,
2- व्यावहारिकपारमार्थिकसत्तयोरवभासनेन 7-32,
3- सत्कार्यवाददृशा 33-59,
4- अवयविभावदृशा 60-64,
5- ज्ञानज्ञेयसम्बन्धतः 60-69,
6- शब्दार्थयोः परस्परं सम्बन्धतः 70-79,
7- प्रमाणप्रमेयभावसम्बन्धतः 80-91,
8- क्षणभङ्गवादेऽपि व्यवहारसम्भवदृष्ट्या 92-99,
9- करणगणस्याबाधितव्यवहारतः 99-118,
10- स्मृतिप्रत्यभिज्ञादिव्यवहारतः 118-120,
11- सम्बन्धव्यवहारतः 120-125,

समताप्रतिपादननाम्नि पञ्चमे आह्निके :—

अस्मिन्नाह्निके सर्वस्य भावजातस्य सममेव शिवत्वं प्रतिपादितं बहुधा। तद्यथा :—

1- सर्वेषु प्राणिषु शिवत्वलक्षणानामुपलब्धेः 1-10,
2- अचेतनेष्वपि विषयेषु तथैव 11-21,
3- प्रत्यक्षज्ञानविषयताबलादचेतनेषु शिवता 22-44,
4- अनुमानविषयतायोग्यत्वेन जडानां शिवता 44-61,
5- प्रसङ्गादनुमानप्रामाण्यपरीक्षणम् 62,
6- शब्दप्रमाणविषयताबलाज्जडानां शिवता 63-73,
7- प्रसङ्गादर्थापत्तिप्रामाण्यपरीक्षणम् 74-76,
8- सर्वप्रमाणविषयतायोग्यत्वेन जडानामपि शिवता 77-78,
9- चेतनोचितस्वभावत्त्वेन जडानां शिवता 79-83,
10- प्रकाशमानताप्राप्तियोग्यत्वेन जडानां शिवता 83-98,
11- सद्योजातशिशुव्यवहारतो जन्तूनां शिवता 99-103,
12- सर्वशिवतात्मकः पराद्वैतसिद्धान्तशैवदर्शनस्य 104-110,

षष्ठे आह्निके (समदर्शनानतिरेकनाम्नि) :—

अस्मिन्नाह्निके मुख्यतया परवादपरीक्षणमेव कृतं वर्तते। तत्रैषः क्रम :—

1- युक्तियुक्ता जगदवभासोपपत्तिः केवलं शैवदर्शने एव 1-2,
2- विविधानां वेदान्तवादानां, परीक्षणम् 3-15,
3- पाञ्चरात्रमतपरीक्षणम् 16-24,
4- जैनमतपरीक्षणम् 24-26,
5- सेश्वरानीश्वर-सांख्यमतपरीक्षणम् 27-28,
6- न्यायवैशेषिकमतपरीक्षणम् 28-29,
7- नारदसंग्रहादिनिष्ठानां चतुर्णां वादानां, बौद्धस्य च सर्वास्तिवादस्य परीक्षणम् 29-32,
8- विज्ञानवादिनां मतस्य परीक्षणम् 33-35,
9- क्षणभङ्गवाददोषतो बौद्धमतस्य परीक्षणम् 36-38,
10- भेदावभासानुपपत्तितो विज्ञानवादपरीक्षणम् 39-48,
11- भावानां विनाशित्व परीक्षणम् 49-63,
12- वैनाशिकत्वे कार्यकारणभावानुपपत्तिः 63-76,
13- अनुमानशब्दादिलौकिकप्रामाण्यासम्भवः शून्य - वादे 77-88,
14- चार्वाकमतनिरसनपूर्वकं सर्वशिवतायाः स्थापनम् 88-93,
15- सर्वशिवतां प्रत्याक्षेपास्तन्निरसनं च 93-129

सप्तमे आह्निके समाप्तिसंज्ञके :—

1- स्वात्मप्रत्यभिज्ञाया उपादेयता 1-4,
2- सम्पन्नायां प्रत्यभिज्ञायामुपायानां नोपयोगः 5-6,
3- उपायानामवश्योपादेयता 7-12,
4- शक्तेः प्राधान्यप्रतिपादनमुपासनक्रमे 12-16,
5- अन्तरङ्गानां पञ्चशक्तीनां साक्षात्कारतः स्वात्मप्रत्यभिज्ञा 17-26,
6- शक्तेः साक्षात् संवेदनस्यावश्यकता 27-29,
7- पिण्डपदादिशिवता 30-31,
8- भोगमोक्षफलदाः विविधा उपायाः 32-69,
9- व्यावहारिकसिद्ध्युपायाः 70-77,
10- शाक्तोपायमयाः ध्यानपूजनस्नानादय उपाया अनेकप्रकाराः 78-104,
11- उपसंहारो ग्रन्थस्य 105-106,
12- त्र्यम्बकमठिकेतिहासमय आयातिक्रमः शास्त्रस्य 107-122,
13- चरम उपसंहारो ग्रन्थस्य 122-123,

~ तदालोचनम् :— द्र०:- **'शिवदृष्टयालोचनम्'** इति।

~ तदुल्लिखितागमा :— **1- कालोत्तरः। यथा—**

(क) "कथिता कालपादादौ नादाख्यं यत् परं त्विति।" (शि०दृ०3,11)

(ख) "कथिता सूक्ष्ममन्त्रात्मकता कालोत्तरादौ—'नादाख्यं यत्परं बीजं' .....।" (शि०दृ०वृ०,पृ०,102)

(ग) "उक्तं वा कालपादादावागोपालाङ्गनादिना।" (शि०दृ०3,63)

2- खेटपालभाष्यं। यथा—

(क) "तथा चाह खेटपालः शब्दराशेर्विशेषताम्।। स्वायम्भुवस्य टीकायां बाढमित्यादिना गुरुः।" (तदेव 3,13-14)

(ख) "तदैक्यं खेटपालोऽपि .....।" (तदेव,3,64)

(3) मतङ्गशास्त्रं। यथा—

"तथा मतङ्गटीकायां व्याख्यानिगुरुणोदितम्।" (तदेव 3,14)

(4) किरणशास्त्रं। यथा—

"किरणेषु तथा चोक्तं नादबिन्द्वादि नेदृशम्।"
(तदेव,3,16)

~ तद्वृत्ति :— द्र०:- 'शिवदृष्टिवृत्तिः' इति।

शिवदृष्टिवृत्ति :— उत्पलदेव विरचिता शिवदृष्टिशास्त्रस्य लघ्वी टीका येदानीमपूर्णैव लभ्यते। यथा—

"शिवदृष्टिप्रकरणे करोमि पदसङ्गतिम्।"
(शि०दृ०वृ०,पृ०,2)

शिवदृष्ट्यालोचनम् :— अभिनवगुप्तेन कृता शिवदृष्टेर्बृहती टीका येदानीं नैव क्वापि लभ्या। यथा—

"यथोक्तं मयैव शिवदृष्टयालोचने:—
'प्रेषोऽपि स भवेद् यस्य शक्तता नाम विद्यते'। इति।"
(प०त्री०वि०,पृ०,116)

शिवद्वादशान्त :— प्रक्रियान्त इति पदेनोक्तस्तन्त्रालोके। यथा—

"कन्दहृत् कण्ठताल्वग्रकौण्डिली प्रक्रियान्ततः।"
(तं०आ०5,145)

"प्रक्रियान्तः शिवद्वादशान्तः।"
(तं०आ०वि०,खं०3,पृ०,460)

न सम्यक् स्पष्टतां यातोऽयं विषयः।

शिवधर्मः :— शैवदीक्षासंस्कारपूर्वकं समयविशेषपालनं शिवधर्मः। शिवधर्म एव सनिश्चयम् अभीष्टभुक्तिमुक्तिफलप्रदो भवति। ततो मुख्यतया तत्रैवावधातव्यं भवति साधकेन।लोकधर्ममसौ लोक संङ्ग्रहार्थमेव पालयति न मुख्यवृत्त्या। शिवधर्मविषयाः समयाश्च सविस्तरं प्रतिपादितास्तन्त्रालोके—15 आह्निके, 522-612 इति। यथा—

"गर्भाधानादितः कृत्वा यावदुद्वाहमेव च।
तावत्तु वैदिकं कर्म पश्चाच्छैवे ह्यनन्यभाक्।।"
उद्धृ०:- (तं०आ०वि०खं०3,पृ०,278)

"न मुख्यवृत्त्या वै स्कन्द लोकधर्मान्समाचरेत्।"
उद्धृ०:- (तं०आ०वि०खं०3,पृ०,278)

अभेदभावनया सर्वं पूजाजपध्यानादि कर्त्तव्यं भवति शिवधर्मे। यथा—

"शिव इत्यभिमानेन दृढेन हि विलोकनम्।।
सर्वस्य संस्क्रिया तत्त्वं तत्तस्मै यद्यतोऽमलम्।"
(तं०आ०15,413-414)

~ ग्रन्थविशेष :— **यथा—**

"उक्तं च—
'शिवस्य परिपूर्णस्य किं नाम क्रियते नरैः।
यत्कृतं शिवभक्तेषु तत्कृतं तु शिवे भवेत्।।'
इति शिवधर्मेषु।"
(स्व०तं०उ०,प०4,पृ०,326)

शिवधर्मिणी :— ~ दीक्षा— **(1) असौ दीक्षा यया गुरुः शिष्यस्याशुभानि कर्माणि लोकधर्मात्मकानि च शुभान्यपि तानि शोधयेत्। यथा—**

"साधकस्य तु भूत्यर्थमित्थमेव विशोधयेत्।
शिवधर्मिण्यसौ दीक्षा लोकधर्मापहारिणी।।"
(तं०आ०15,28)

(2) परं प्रारब्धकर्माणि नैव शोधनीयानि भवन्ति। तत एव प्रारब्धकर्मभोगान्तं साधको जीवति। अन्यथा समस्तकर्मशोधने सति तत्कालमेव शरीरपातोऽभविष्याच्छिष्याणाम्। यथा—

"..... प्रारब्धेकं न शोधयेत्।
साधकस्य तु भूत्यर्थं प्राक्कर्मैकं तु शोधयेत्।।
प्राक्कर्मागामि चैकस्थं भावयित्वा च दीक्षयेत्।
शिवधर्मिण्यसौ दीक्षा .....।।"
(स्व०तं०4,141-142)

"शिवधर्मिणी या दीक्षा साणोः शिवधर्मफलश्रियो मूलं मन्त्रमन्त्रेशत्वादिप्राप्त्यात्मकपारमेशफलसंपदो हेतुरेका, इतरा तु शिवधर्मिण्येव भुवां भोगभूमीनामाविलयात् प्रलयकालं यावत् तनोः शरीरस्य भङ्गं विना हिता यथाभीष्टखङ्गपातालरोचनाञ्जनपादुकादिसिद्धिसंपादिकेति।"
(स्व०तं०उ०,प०4,पृ०,90)

शिवधर्मी :— असौ बुभुक्षुः साधको यः आगमोक्तेन मार्गेण भक्त्या परमेश्वराराधनतत्परो भवेत्। यथा—

"तत्र बुभुक्षुः साधकः। स च द्विविधः शिवधर्मी लोकधर्मी च।"
(तं०आ०वि०,खं०9,पृ०,16)

"साधको द्विविधस्तत्र शिवधर्म्येकतः स्थितः।
शिवमन्त्रविशुद्धाध्वा साध्यमन्त्रनियोजितः।।
ज्ञानवांश्चाभिषिक्तश्च मन्त्राराधनतत्परः।
त्रिविधायास्तु सिद्धेर्वै सोऽत्रार्हः शिवसाधकः।।
द्वितीयो लोकमार्गस्थ इष्टापूर्तविधौ रतः।
कर्मकृत्फलमाकाङ्क्षन् शुभैकस्थोऽशुभोज्झितः।।
तस्य कार्यं सदा मन्त्रैरशुभांशविनाशनम्।
गृहस्थो वा यतिर्वासावाश्रमैकतमस्थितः।।
मुमुक्षुर्द्विविधः प्रोक्तो निर्बीजो बीजवान्पुनः
बालबालिशवृद्धस्त्रीभोगभुग्व्याधितात्मनाम्।।
एषां निर्बीजका दीक्षा समयादिविवर्जिता।
विद्वद्द्वन्द्वसहानां तु सबीजा कीर्तिता प्रिये।।
दीक्षानुग्राहिका तेषां समयाचारसंयुता।
विशेषसमयाचारा मन्त्राख्ये ये प्रकीर्तिताः।।
तेऽत्र पाल्याः प्रयत्नेन मोक्षसिद्धिमभीप्सता।
सबीजा सा तु विज्ञेया पुत्रकाचार्ययोः स्थिताः।।"
(स्व०तं०4,83-90)

~ साधक :—**(1) ब्राह्मणोचितसंस्कारहितः, शास्त्राद्य-भ्यासेऽसमर्थः शिवशक्तिपरायणः साधकः। स च गुरुकृतया दीक्षयैवाध्यात्ममार्गेऽग्रे सरति। अवधूतप्रायः**

साधकः। यथा—

"साधको द्विविधः शैवधर्मा लोकोज्झितस्थितिः।।"

(तं०आ०15,23)

द्र०:- उपरि **'शिवधर्मी'** इति।

द्र०:- **'साधकः'** ~ 'द्विविधः' इति।

(2) मन्त्रमन्त्रेश्वरादिभोगोत्सुकः शिवधर्मानुयायी शुद्धभुवनभोगान्ते मोक्षपदगामी साधकः। यथा—

"शिवधर्मिणश्च भोगे, सबीजकस्य च पुत्रकस्य मोक्षे संस्कारयोगादुपायः।"

(तं०आ०वि०,खं०9,पृ०,2)

शिवधर्मोत्तरम् :— शास्त्रं किमपि :—

"यथा शिवधर्मोत्तरे शास्त्रे :—

'इहैक भाविको मोक्षः एषः तावत् परीक्ष्यताम्।
अनेकभविका मुक्तिर्भवतां केन वार्यते।।' इति।"

(प०सा०वि०,पृ०,195)

शिवनिर्माल्यम् :— शिवेऽर्पितं पत्रपुष्पफलपक्वान्नादि-वस्तुजातम्।

~ तद्ग्रहणव्यवस्था :— **शिवेऽर्पितमन्नफलादि सर्व-साधारणतया नैव भोज्यं मानवैः। परं दीक्षितानामस्ति तद्भक्षणेऽधिकारः कदाचिददीक्षिता अपि तीव्रभक्तिप्रेरितास्तद्भ-क्षयन्ति; तेन च तेषामुपरि शिवस्तुष्टो भवति न रुष्टः। अत एव वीरशैवाः सर्वं शिवार्पणं कृत्वैवोपभुञ्जते।**

"शिवोपयुक्तं हि हविर्न सर्वो भोक्तुमर्हति।" यथा—

(तं०आ०16,30)

"यस्तु दीक्षाविहीनोऽपि शिवेच्छाविधिचोदितः।
भक्त्याश्नाति स सम्पूर्णः समयी स्यात् सुभावितः।।"

(तदेव16,31)

परं लौल्यवशाद् भक्षणे पात एव भवति। यथा—

"अत एव लौल्यादिना भुक्ते प्रत्यवायो भवेत्।"

(तं०आ०वि०,खं०10,पृ०,12)

शिवन्यास :— षोढान्यासे षष्ठः शिवन्यासः। यथा—

"शिवो भैरवसद्भावः साङ्गवक्त्रो यदुपरि साङ्गवक्त्रो मातृसद्भावः। यथा—

(तं०आ०वि०,खं०9,पृ०,123)

द्र०:- **'षड्विधो'** ~ 'न्यासः' इति।

शिवपूजनविधि :— ~ त्रिके :— वर्णितोऽसावभिनवगुप्तेन स्वकृतस्तोत्रात्मकश्लोकत्रयेण समुद्धृत्य निवेशितेन तन्त्रालोके।

तद्यथा—

"शिवाभेदभराद्भाववर्गः श्च्योतति यं रसम्।।
तमेव परमे धाम्नि पूजनायार्पयेद्बुधः।
स्तोत्रेषु बहुधा चैतन्मया प्रोक्तं निजाह्निके।।
अधिशय्य पारमार्थिकभावप्रसरप्रकाशमुल्लसति।
या परमामृतदृक् त्वां तयार्चयन्ते रहस्यविदः।।
कृत्वाधारधरां चमत्कृतिरसप्रोक्षाक्षणक्षालिता-
मात्तैर्मानसतः स्वभावकुसुमैः स्वामोदसन्दोहिभिः।
आनन्दमातृनिर्भरस्वहृदयानर्घार्घपात्रक्रमात्।
त्वां देव्या सह देहदेवसदने देवार्चयेऽहर्निशम्।।
नानास्वादरसामिमां त्रिजगतीं हृच्चक्रयन्त्रार्पिताम्।
उर्ध्वाध्यस्तविवेकगौरवभरान्निष्पीड्य निःष्यन्दितम्।।
यत्संवित्परमामृतं मृतिजराजन्मापहं जृम्भते।
तेन त्वां हविषा परेण परमे संतर्पयेऽहर्निशम्।।"

(तं०आ०26,61-66)

शिवप्रणव :— = हूंकार :—

द्र०:- **'प्रणवः'** ~ 'शैवः' इति।

शिवप्रमाता :— सर्वं स्वात्मैकरूपं पश्यन् प्रमेयतावभासास्पृष्टः शुद्धचिद्रूपः स्वातन्त्र्यभरोल्लासमयः प्रमाता। यथा—

"शिवो ह्यच्युतचिद्रूपः .....।"

(तं०आ०10,178)

शिवप्रसाद :— स्वात्मसंविद्रूपस्य तस्य निर्मलीभावः, स च परिपूर्णशिवतया प्रकाशनरूपः, स एव परः शक्तिपातः। यथा—

"प्रसादो निर्मलीभावस्तेन संपूर्णरूपता।।
आत्मना तेन हि शिवः स्वयं पूर्णः प्रकाशते।"

(तं०आ०13,286-287)

शिवप्रेरणा :— ~ शास्त्ररचने— यथा वुसगुप्तः शिवेन स्वप्न उपदिष्टः यथा च स्वप्न एव श्रीसोमानन्दः शिवदृष्टिविरचने प्रेरितस्तथैव अभिनवगुप्तोऽपि विवृत्तिविमर्शिनीविरचने शिवेनैव स्वप्नदर्शने प्रेरित इति प्रतिभाति।

यथा—

"जगतिविहितबोधामीश्वरप्रत्यभिज्ञां।
व्यवृणुत परिपूर्णां प्रेरितः शम्भुपादैः।।"

(ई०प्र०वि०वि०,खं०3,पृ०,407)

शिवब्रह्मतनुग्रन्थ :— आगमशास्त्रसम्बन्धी कोऽपि ग्रन्थः। सम्भवतोऽयमेव ग्रन्थः शिवतनुशास्त्रमित्यन्यत्र कृतनामोल्लेख इति।

यथा—

"तथाहि :— शिवब्रह्मतनुग्रन्थे गुरुपादैर्निरूपितम्:—
'पञ्चत्रिंशत्तत्त्वी शिवनाथस्यैव शक्तिरुक्तेयम्।
तत्र चतस्रस्तु परा अन्त्यं वै पञ्चविंशकं स्थूलाः।।
मध्यास्तु सूक्ष्मरूपाः शक्तय इह साञ्जनास्तु परम्।'
इति।"

उद्धृ०:- (ई०प्र०वि०वि०,खं०3,पृ०,271)

शिवभट्टारक :— प्रकाशांशप्रधाना परैव संविच्छिवभट्टारकः।

यथा—

"शिवभट्टारकस्य प्रकाशैकवपुषः प्रकाशैकरूपा एव भावाः।"

(प्र०हृ०,पृ०,8)

शिवभावभावना :— सर्वशिवता विमर्शनम्। यथा—

"शिवो रविः शिवो वह्निः पक्तृत्वात् स पुरोहितः।
तत्रस्था देवताः सर्वा द्योतयन्त्योऽखिलं जगत्।।"

(तं०आ०32,25)

शिवमव्ययम् :— ~ तत्त्वम् :— यद् वाचा न वक्तुं शक्यते, यन्नान्तः करणैर्न च बाह्यकरणैर्ज्ञेयम्, अतीन्द्रियम्, सर्ववर्णरसरहितमवि यत् सर्ववर्णरसैर्युक्तम्, यन्मात्सर्यमान- गर्वादिरहितनैव साधकेन लभ्यं तच्छाश्वतं तत्त्वं शिवमव्ययम्। यथा—

"यन्न वाग्वदते नित्यं यन्न दृश्येत चक्षुषा।
यच्च न श्रूयते कर्णैर्नासा यच्च न जिघ्रति।।
यन्नास्वादयते जिह्वा न स्पृशेद्यत्त्वगिन्द्रियम्।
न चेतसा चिन्तनीयं सर्ववर्णरसोज्झितम्।
सर्ववर्णरसैर्युक्तमप्रमेयमतीन्द्रियम्।।
यत्प्राप्य योगिनो देवि भवन्ति ह्यजरामराः।
तदभ्यासेन महता वैराग्येण परेण च।।
रागद्वेषपरित्यागाल्लोभमोहक्षयात्प्रिये।
मदमात्सर्यसंत्यागान्मानगर्वतमः क्षयात्।।
लभ्यते शाश्वतं नित्यं शिवमव्ययमुत्तमम्।"

(ने०तं०,पृ०,178-179)

शिवमार्ग :— (1) योगज्ञानभक्तिसमन्वयात्मकः साधनामार्गः। यथा—

"ज्ञानस्य परमा भूमिर्योगस्य परमा दशा।
त्वद्भक्तिर्या विभो कर्हि पूर्णा मे स्यात्तदर्थिता।।"

(शि०स्तो०9,9)

(2) शाक्तं पदम् यथा—

"शिवमार्गे-परे शाक्ते पदे।"

(शि०स्तो०वि०,पृ०,14)

(3) स्वात्मशिवभावविमर्शाभ्यासः।

यथा—

" 'शिवस्य' स्वात्ममहेश्वरस्य योऽसौ "मार्गः" 'परमाद्वयचिदानन्दैकघनोऽस्मि' ममैव इदं विश्वं स्वशक्तिविजृम्भणमात्रम्' या स्वात्मस्वरूपविभूतिप्रत्यवमर्शरूपा सरणिः .....
.....।"

(प०सा०वि०,पृ०,50)

शिवयोगः :— शाम्भवशाक्ताणवोपायात्मकः स्वात्मशिवतायाः साक्षात्कारस्याभ्यासः दर्शनसिद्धान्तज्ञानस्य परमेश्वरभक्तेश्चात्रावश्यकसाहाय्यकारित्वम्। हठयोगात् पातञ्जलयोगाच्च भिन्नस्वभावोऽयम्। अत्र योगे नैवेन्द्रियदमनं न च बलान्मनसो निरोधनं कर्तव्यं भवति। अस्य योगस्य भुक्तिमुक्तिप्रदत्वम्। अनेन योगेन लभ्या भोगपरम्परापि पर्यन्ते पारमार्थिकमुक्तावेव विश्राम्यति।

यथा—

"अनादरविरक्त्यैव गलन्तीन्द्रियवृत्तयः।
यावत्तु विनियम्यन्ते तावत्तावद्विकुर्वते।।"

(मा०वि०वा०2,112)

"निमज्जमानमप्येतन्मनो वैषयिके रसे।
नान्तरार्द्रत्वमभ्येति निश्छिद्रं तुम्बकं यथा।।"

(तदेव 2,108-109)

"स्वं पन्थानं ह्यस्येव मनसो ये निरुन्धते।
तेषां तत्खण्डनायोगाद्धावत्युन्मार्गकोटिभिः।।"

(तदेव,109-110)

"अत एव न कश्चिदाग्रहो
विषयाणां ग्रहणेऽप्यपोहने।
परभैरवसंविदात्मनः
स्वयमेवोच्छलिता हि भोक्तृता।।"

(तदेव 2,155)

~ उत्कृष्टतरः :— गोरक्षोपदिष्टेभ्यो नेतिधौतिप्रभृतिकर्मभ्यः, पातञ्जलेभ्यश्च यमनियमासनप्राणायामप्रत्याहारादिभ्यो भावनासारस्य शैवस्याणवयोगस्योत्कृष्टता, ततोऽपि यथाक्रमं शाक्तशाम्भवयोर्योगयोः। यथा—

"प्राणायामादिकैर्लिङ्गैर्योगाः स्युः कृत्रिमा मताः।
तेन तेऽकृतकस्यास्य कलां नार्हन्ति षोडशीम्।।"

(मा०वि०तं०,18,19)

जीवस्य वस्तुतः परमेश्वरत्वमेव सत्यं स्वरूपम्। शिवयोगश्च जीवपरमेश्वरयोरैक्यं साक्षादनुभावयन्नैसर्गिको योगः। अन्ये चित्तेन्द्रियनिरोधाद्याः योगाः क्रियासाध्याः कृत्रिमा एवेति तात्पर्यम्।

शियोगिन :— (1) परः शिवयोगी सकलं प्रपञ्चं स्वशक्तिस्फारात्मकं स्वभित्तौ स्वेच्छया प्रतिबिम्बन्यायेनाभासमानं पश्यतीत्येषा तस्य दृष्टिः। यथा—

"स्वशक्तिप्रचयोऽस्य विश्वम्।"

(शि०सू०3,30)

"अस्यापि स्वस्याः संविदात्मनः शक्तेः प्रचयः क्रियाशक्तिस्फुरणरूपो विकासो विश्वम्।"

(शि०सू०वृ०3,30)

(2) यथार्थज्ञानवन्तो हि सर्वं शिवरूपतयैव पश्यन्ति। ईदृशी तेषां दृष्टिरेव शिवदृष्टिः। यथा—

"एवं सर्वपदार्थानां समैव शिवता स्थिता।
परापरादिभेदोऽत्र श्रद्दधानैरुदाहृतः।।"

(शि०दृ०,1,48)

शिवरस :— मद्यम्।

"व्याख्यातस्तथा —
शिवरस इति। तदुक्तम्—
"सुरा च परमा शक्तिर्मद्यं भैरव उच्यते।

आत्मा कृतो द्रवरूपो भैरवेण महात्मना।।"

उद्धः- (तं०आ०वि०,खं०11/2,पृ०,9)

"द्वाभ्यां पार्श्वस्थिताभ्यां शिवरस (सरकं)पूर्णताम्बूलपेटीं।
दूतीभ्यां बिभ्रतीभ्यामपरकरलसन्मातुलुङ्गोत्पलाभ्याम्।।"

(गु०ना०प०,4)

शिवरात्रिः :— (1) मायीय-प्रथायाः संहर्त्री शिवभावसमावेशभूमिः शिवरात्रिः। यथा—

"यत्र सोऽस्तमयमेति विवस्वाँश्चन्द्रमः प्रभृतिभिः सह सर्वैः।
कापि सा विजयते शिवरात्रिः स्वप्रभाप्रसरभास्वररूपा।।"

(शि०स्तो०4,22)

"सा कापि लोकोत्तरा, शिवरात्रिः—शिवसमावेशभूमिः, समस्तमायीयप्रथायाः संहरणाद्रात्रिरिव रात्रिः।"

(शि०स्तो०वि०वृ०,पृ०,68)

(2) लयं गतासु सर्वासु बाह्यन्तः करणवृत्तिषु स्वप्रकाशमहिम्ना स्वयमेव प्रकाशमाना साधकस्य चितेः स्वतन्त्र स्वात्मनिष्ठा पराद्वैतमयी शिवात्मिका स्थितिः।

यथा—

"ज्योतिरस्ति कथयापि न किञ्चिद्,
विश्वमप्यतिसुषुप्तमशेषम्।
यत्र नाथ शिवरात्रिपदेऽस्मिन्,
नित्यमर्चयति भक्तजनस्त्वाम्।।"

(तदेव 25,17)

(3) फाल्गुनमासस्य कृष्णपक्षस्य त्रयोदश्यां प्रदोषकालादारभ्योपास्यमानं परं शैवं पर्व।

शिवरात्रिविचारवार्तिकम् :— रम्यदेवस्य कृतिः कापि। यथा—

"तदुक्तं मया शिवरात्रिविचारवार्तिके:—
नित्यमात्तकरणक्रमोन्मिषच्चित्रभावशतसंनिवेशिनीः।
निष्क्रियो निजमरीचिनर्तकीर्नर्तयामि परननृत्तदैशिकः। इति।"

(भा०वि०,पृ०,33-34)

शिवरवस्तोत्रम् :— भट्टरम्यदेवाचार्यस्य कृतिः कापि। यथा—

"तदुक्तं मयैव शिवरवस्तोत्रे :—
"अथ वा हृदम्बरगतेन
जनिनिधनहीनमूर्तिना।
चन्द्रविमलमुकुटेन नुता
वनुमोदिता मम मतिः प्रवर्तते।' इति।"

(भा०वि०,पृ०,10-11)

शिवलिङ्गम् :— ~ उच्चारयोगे :—

द्र०:- **'लिङ्गम्'** ~ 'अव्यक्तम्' इति।
'लिङ्गम्' ~ 'त्रिविधम्' इति च।

शिवव्याप्तिः :— (1) औन्मनसात् पदादारम्य शिवव्याप्तिर्न तदधः। तदधस्तु समनान्तव्याप्तिरेव। यथा—

"मोहस्य जयादुन्मना शिवव्याप्त्यात्मनः सहजविद्यायाः प्राप्तिरुक्ता।"

(शि०सू०वि०,पृ०,41-42)

(2) भावनया सर्वज्ञतादिगुणोद्भावनाभ्यासः शिवव्याप्तिः। यथा—

"सार्वज्ञ्यादिगुणा येऽर्था व्यापकान्भावयेद्यदा।
शिवव्याप्तिर्भवेदेषा चैतन्ये हेतुरूपिणी।।"

(स्व०तं०प०,4,435)

व्यापकाँस्तान् भावान् भावयेदिति संगतिरत्र।

शिवव्योम् :— (1) परा कुण्डलिनी समाख्या सा पारमेश्वरी पराशक्तिर्ययैव परमेश्वरो निजं परमेश्वरत्वं निर्वहति। प्रपञ्चाभासशून्यत्वेनासौ व्योमेति कथ्यते। यथा—

"कुण्डलाख्या तु सा ज्ञेया सर्वाध्वोपरिवर्तिनी।
इत्युपक्रम्य :—
प्रमाणोत्थानरहितमुपमाभेदवर्जितम्।
भूतव्योमपदातीतं चिद्व्योमान्तपदं परम्।।
भावप्रत्ययसंरम्भमभावं परमा गतिः।
शिवव्योम तु तज्ज्ञेयं सर्वाधारत्वलक्षणम्।
बृहत्त्वं बृंहकत्वं च सूक्ष्मं तच्चान्तवर्ति च।
परं ब्रह्मेति तत्प्रोक्तं लक्ष्यभूतमलक्षकम्।।"

उद्धः- (त्रिशिरो भैरवात्, तं०आ०वि०,खं०2,पृ०,143)

(2) सप्तदशी अमाख्या कला। यथा—

"एवं त्वियमेव संविन्मात्ररूपा सप्तदशी कला :—
शिवव्योमेति, परमं ब्रह्मेति, शुद्धात्मस्थानमिति चोच्यते।"

(तं०आ०वि०,खं०2,पृ०,142)

परमेश्वरतात्मिकायाः परायाः संविद एव नामान्तराणिः— सप्तदशी कला, अमा-कला, शिवव्योम इत्यादीनि।

द्र०:- **'साभासः'** ~ **शिवः** इति।

शिवशक्ति :— ~ तत्त्वभेदने :— स्वतन्त्रा पारमैश्वर्यमयीच्छैव शिवस्य करणस्थानीया शक्तिः। यथा—

"स्वातन्त्र्यमात्रसद्भावा या त्विच्छा शक्तिरैश्वरी।
शिवस्य सैव करणं तया वेत्ति करोति च।।"

(तं०आ०10,17)

शिवशक्तिमयता :— सर्वं हि विश्वं शिवशक्तिमयम्; सर्वस्यास्य शक्तिप्रतिबिम्बमात्रसारत्वात्। यथा—

"शिवादिगुरुपङ्क्तिर्या रुद्रकोट्यो ह्यनेकशः।।
आप्तोपदेशमात्रेण पारम्पर्येण संस्थिताः।
शिवज्ञानं यतो देवि सदैवाप्तागमः स्मृतः।।
ब्रह्मादिस्तम्बपर्यन्तं शिवशक्तिसमन्वितम्।
एवं शक्तिमयं सर्वं जगत्स्थावरजङ्गमम्।।
शक्तिमान्सर्वकर्माणि कुरुते नात्र संशयः।
शक्तिहीना न सिद्ध्यन्ति यागकोटिशतैरपि।।
जपकोटिसहस्रैस्तु होमलक्षैः सविस्तरैः।
तस्मात्सर्वप्रयत्नेन शिवज्ञानं समभ्यसेत्।।

तदा सिध्यन्त्यशेषाणि कर्माण्येवान्यथा न हि।"
(ने०तं०16,81-86)

शिवशक्तिस्पन्दा :— सृष्टयादिपञ्चकृत्यानि तेषु च व्यापकस्तुर्यप्रकाशप्रसर इति सर्वं शिवशक्तिविजृम्भितमेव। यथा—

"सृष्टिस्थितितिरोधानसंहारानुग्रहादि च।
तुर्यमित्यपि देवस्य बहुशक्तित्वजृम्भितम्।।"
(तं०आ०1,79)

शिवशक्ती :— एकस्यैव परस्य तत्त्वस्य विषये शिष्यबुद्धिवैशद्यार्थं शिवत्वेन शक्तित्वेन च व्यपदेशः कृतो गुरुभिः।

"आलेख्यविशेष इव गजवृषभयोर्द्वयोः प्रतिभासम्।
एकस्मिन्नेवार्थे शिवशक्तिविभागकल्पनां कुर्मः।।"
(म०मं०28,पृ०,71)

शिवशक्त्यभेद :— व्यवहार एवाभिधानद्वयस्यास्य प्रयोगः। वस्तुतः शिवः शक्तिश्चेत्येकस्यैव परतत्त्वस्य नामद्वयम्। विश्वोत्तीर्णतादृष्ट्या यदेव तत्त्वं शिव इति तदेव प्रपञ्चलीलाविलासाभिव्यक्तिदृष्ट्या शक्तिरित्युच्यते। यथा—

"क्वचिदेव भवान् क्वचिद्भवानी
सकलार्थक्रमगर्भिणी प्रधाना।
परमार्थपदे तु नैव देव्या
भवतो नापि जगत्त्रयस्य भेदः।।"
(शि०स्तो०18,2)

"न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी।
शिवः शक्तस्तथा भावानिच्छया कर्तुमीहते।
शक्तिशक्तिमतोर्भेदः शैवे जातुः न वर्ण्यते।"
(शि०दृ०3,2-3)

"भेदे हि शक्तिः किं कार्यं करोत्युत च शक्तिमान्।"
(तदेव,3,5)

"न हिमस्य पृथक् शैत्यं नाग्नेरौष्ण्यं पृथग्भवेत्।"
(तदेव,3,7)

"स्वातन्त्र्यमेव शक्तिः शिवनाथस्य स्वतो यया सूते।
निरूपादानं विश्वं सैव शिवत्वप्रयोजिका तस्य।।
शक्तिः शिवस्य शिवता शक्तेः शिव एव चास्ति शक्तित्वम्।
दाहादि शक्तिवह्न्योरिव शिवशक्त्योः सदैव तादात्म्यम्।"
(स्वा०द०3,4-5)

"शक्तिः शिवस्वभावैव न तु वस्त्वन्तरात्मिका।
शिवो वा कथ्यतां शक्तिर्भेदो नास्त्येव वस्तुतः।।"
(पू०प्र०,511)

शिवशक्त्यविनाभावस्तोत्रम् :— श्रीमदभिनवगुप्तकृतं किमपि स्तोत्रम् कथाशेषमधुना। यथा—

"तथा च मयैव शिवशक्त्यविनाभावस्तोत्रे :-
'तव न काचन न स्तुतिरम्बिके
सकलशब्दमयी किल ते तनुः।
निखिलमूर्तिषु मे भवदन्वयो
मनसिजासु बहिष्प्रसरासु च।।
इति विचिन्त्य शिवे शमिताशिवे
जगति जातमयत्नवशादिदम्।
स्तुतिजपार्चनचिन्तनवर्जिता
न खलु काचन कालकलापि मे।।' इति।"
(श्रीमद् भगवद्गीता०,पृ०,156)

तत्र ग्रन्थे, अन्यत्रापि बहुषु ग्रन्थपत्रिकादिषु पद्यद्वयमेतन्मुद्रितं दृश्यते। परं सर्वत्र "तव च काचन न स्तुतिरम्बिके" इत्येवमशुद्ध एव पाठो मुद्रितः। चकारस्य स्थानेऽत्र नकारः समुचितो येन द्वौ नञौ सुनिश्चिततया सर्वस्य वाग्जालस्य भगवत्याः स्तुतिरूपत्वं प्रतिपादयेताम्। इत्यत्रावधेयं सुधीभिः।

शिवशासनम् :— शिवात् प्रसृताः आगमशास्त्रपरम्पराः।

~ परम्पराद्वयमयम् :— तत्रैका लकुलीशगुरुप्रवर्तिता या पाशुपतपरम्परेति प्रसिद्धा, सालोक्यसायुज्यादिप्रदा। अपरा श्रीकण्ठनाथप्रवर्तिता या यथेष्टभोगदा सती पर्यन्ते जीवन्मुक्तिप्रदा, कदाचित् क्रममुक्तिदापि भवति। अन्ते च ध्रुवं विदेहमुक्तिदा भवति। यथा—

"अज्ञत्वानुपदेष्टृत्वसंदष्टेऽधरशासने।।
एतद्विपर्ययाद् ग्राह्यमवश्यं शिवशासनम्।
द्वावाप्तौ तत्र च श्री मच्छ्रीकण्ठकुलेश्वरौ।।
द्विप्रवाहमिदं शास्त्रं सम्यङ्निःश्रेयसप्रदम्।
प्राच्यस्य तु यथाभीष्टभोगदत्वमपि स्थितम्।।"
(तं०आ०37,13-15)

~ सर्वोत्कृष्टम् :— नरर्षिदेवद्रुहिणहरिप्रभृतिभिः प्रचालितासु शास्त्रपरम्परासु सर्वोत्कृष्टा शिवशासनपरम्परैव। यथा—

"अज्ञत्वानुपदेष्टृत्वसंदष्टेऽधरशासने।।
एतद्विपर्ययाद् ग्राह्यमवश्यं शिवशासनम्।"
(तं०आ०37,13-14)

"नरर्षिदेवद्रुहिणविष्णुरुद्राद्युदीरितम्।।
उत्तरोत्तरवैशिष्ट्यात् पूर्वपूर्वप्रबाधकम्।"
(तं०आ०4,248-249)

शिवशून्यम् :— भेदभावोचितभावराश्याभासशून्यं सकलस्योत्पत्तिलयस्थानं, पारमैश्वर्यशक्तिसुमण्डितं परिपूर्णं शुद्धमपरिच्छिन्नं च संवित्स्वरूपं परं तत्त्वम्। यथा—

"एतदेव विमर्शदीपिकायां ध्वनितम् :—
'स्वतन्त्रं परिपूर्णं च शिवाख्यं शून्यधाम तत्।
तत्त्वानि यत्र लीयन्ते यस्मात्समुदयन्ति च।।
तत्त्वेश्वरास्ततो जातास्तत्रैव निवसन्ति च।
क्षीयन्ते किल तत्रैव शिवाख्ये शून्यधामनि।।
दर्शनान्तरदृष्टानि यानि शून्यान्तराण्यपि।
तेषामुत्पत्तिविलयौ शिवशून्ये सदोदिते।।
न तदस्ति न यत्तत्र न तदस्ति न यत्र तत्।
अन्तर्बहीरूपतया ततोऽन्यन्नोपपद्यते।।

उपेयमितरन्नास्ति स्वातन्त्र्यात्परमे नये।
तदनादृत्य गाहन्ते सौगताः शून्यतां जडाः।।
इति स्वातन्त्र्यस्वरूपं तच्छून्यं।' इति।"

(वि०भै०उ०,पृ०,110-111)

द्र०:- **'महाशून्यम्'** इति।

शिवसूत्रम् :— वसुगुप्तेन स्वप्ने शिवात् सम्प्राप्तः कोऽपि सूत्रशैलि निबद्धः शैवयोगग्रन्थः। तस्मिन् स्पन्दसिद्धान्तः संसूचितस्तदभ्याससरणिश्चापि। असौ सिद्धान्तोऽग्रे भट्टकल्लटेन स्पन्दकारिकाभिः प्रकटतां नीतः। शिवसूत्रे भट्टभास्करेण वार्तिकं निर्मितं, क्षेमराजेन च विमर्शिन्याख्या व्याख्या विरचिता। तदनुसारं वरदराजेनाप्यपरं शिवसूत्रवार्तिकं विरचितम्। भट्टभास्करीयवार्तिकानुसारमपि केनापि विदुषा वृत्तिरेका निर्मिता। तथा विमर्शिन्याः संक्षेपोऽपि केनापि शिवसूत्रवृत्तिरिति नाम्ना निबद्धः।

ग्रन्थ एषः शैवागमेषु गण्यते, शिवोक्तत्वात्।

~ आगमग्रन्थः :— आगमत्वेनोल्लिखितं शिवसूत्रमाचार्याभिनवगुप्तेनेश्वरप्रत्यभिज्ञाविमर्शिन्याम्। यथा—

"न केवलं संवित्तत्त्वस्यास्माभिरेव विमर्शप्राधान्यमुक्तं यावदागमान्तरैरपि .....। धर्मिवाचिना शब्देन सामानाधिकरण्यमाश्रित्योदितः कथितो भगवता शिवसूत्रेषु।"

(ई०प्र०वि०,खं०1,पृ०,199-200)

~ तत्खण्डत्रयं :— प्राचीनपरम्परानुसारं शिवसूत्रस्य त्रयाणां खण्डानां नामकरणानि एतानि—तत्र प्रथमः खण्डः चित्प्रकाशस्वरूपनिरूपणाख्यः, द्वितीयश्च सहजविद्योदयाख्यः तृतीयः पुनर्विभूतिस्पन्दाख्य इति। परमग्रे एकादशशतकमध्ये क्षेमराजेन शिवसूत्रविमर्शिन्यां खण्डत्रयस्य :—

शाम्भवोपायप्रकाशनं, शाक्तोपायप्रकाशनम्, आणवोपायप्रकाशनम् चेति नामान्यङ्कितानि। सत्यमिदं यत् प्रथमे खण्डे "उद्यमो भैरवः" इत्येवंविधैः सूत्रैः शाम्भवोपायस्य प्रकाशनं मनाक् कृतमस्ति, परं न नियमतः शाक्ताणवयोरेवोपाययोरन्यप्रकरणद्वये प्रतिपादनं वर्तते। न च तयोः खण्डयो शाक्तोपायात्मिकाया भावनायाः, न चापि तदात्मकस्य कालीनयस्य, नापि तत्प्रकारभूतानां भावनामयानां यागहोम-जप-स्नान-योगादीनां मनागपि निरूपणं कृतं वर्तते द्वितीये खण्डे। ततो न तस्य खण्डस्य "शाक्तोपाय" इति नामकरणमुचितम्।

एवमेव तृतीये खण्डे ध्यानोच्चारकरणध्वनिरूपाणां षडध्वात्मकानां वाऽऽणवोपायानां प्रतिपादनं मनागपि नैव लभ्यते क्वापि। ततो नासौ नामकरणसरणिः प्रमाणिकेति वेद्यं सुधीभिः। केवलमभिनवत्वप्रकाशनहेवाकित्वं तत्। किञ्च तृतीयस्मिन्नपि खण्डे शाम्भवशाक्तोपासनयुक्तयो लभ्यन्ते। प्रथमे च खण्डे मालिनीक्रमस्य नामापि नास्ति। शाम्भवोपाये च मालिन्या एव प्राधान्यम्।

ततो भट्टभास्करस्य सरणिरेव प्रामाणिकी। तदनुसारं भैरवाख्येनोद्यमेन कथं चित्स्वरूपस्य प्रकाशनं सम्भवति, किं-किं च तेन प्रकाशनेन लभते साधकः, इति तस्योपायस्य साक्षात्फलानां प्रतिपादनं कृतमस्ति। द्वितीयस्मिंश्च खण्डे एतत् प्रतिपादितं वर्तते यदुद्यमाख्येन शाम्भवोपायेनैव साधकस्य बुद्धौ सहजविद्योदयो भवति। स च कथं भवति, किं रूपोभवति, किं च तस्य साक्षात् फलमित्युपदिष्टं वर्तते तत्र।

ततस्तृतीयस्मिन् प्रकरणे चित्प्रकाशप्रदीप्तेः सहजविद्योदयस्य च यान्यानुषङ्गिकानि फलानि व्यावहारिकसिद्धिरूपाणि, तेषां विस्तरेण प्रतिपादनं कृतं वर्तते। तत्तदानुषङ्गिकफललाभ एव हि शाम्भवयोगस्य विभूतिविस्तरः। तत एवैतस्य खण्डस्याभिधानं विभूतिस्पन्द इति। एतान्येवाभिधानानि स्पन्दकारिकायाः खण्डत्रयस्योपयुक्तानि प्रयुक्तानि च भट्टकल्लटेन स्वोपज्ञवृत्तौ। ततः शिवसूत्रं भास्करविरचितवार्तिकानुसारमेव विचारणीयं सुधीभिः। तस्यैव प्रमाणिकत्वात्, सद्यः फलप्रदत्वाच्चेति।

~ तत्तुर्यखण्ड :— उक्तमस्ति भट्टभास्करेण यच्छिवसूत्रं चतुः खण्डमासीत्, खण्डत्रयस्य तात्पर्यं भट्टकल्लटेन निजैः स्पन्दसूत्रैः (स्पन्दकारिकाभिः) प्रकाशितं, परं चतुर्थस्य खण्डस्य व्याख्यानं पृथक्तत्त्वार्थचिन्तामण्याख्येन व्याख्यानग्रन्थेन कृतमिति। तत्त्वार्थचिन्तामणेरुल्लेखोऽभिनवगुप्तेनापि कृतोऽस्ति। तस्याः वाक्यानि क्षेमराजजयरथोत्पलवैष्णवादिभिरप्युद्धृतानि। परं नासौ ग्रन्थः क्वापि लभ्यत इदानीम्।

कानिचित् तथाविधानि शिवसूत्रीयाणि सूत्राणि ग्रन्थान्तरेषूद्धृतानि लभ्यन्ते यानि विद्यमाने खण्डत्रये नैवविद्यन्ते। ततोऽनुमातुं शक्यते यत्तथाविधानि सूत्राणि तस्मादेव चतुर्थात् खण्डादुद्धृतानि, यस्योपरि भट्टकल्लटेन तत्त्वार्थचिन्तामणिनामकं व्याख्यानं विरचितमभूत्।

तस्याः टीकायाः कान्यप्युद्धरणानि तथारूपाणि यथानुमातुं शक्यं यदेतानि नैव टीकापदमयान्यपि तु मूलभूतानि सूत्राण्येव। कानिचिदेव चोद्धरणानि टीकाभागादुद्धृतानीति।

द्र०:- **'तत्त्वार्थचिन्तामणिः'** इति।

~ तत् सूत्राणि :— तस्य चतुर्थखण्डस्य कानिचित् सूत्राण्यन्यत्र ग्रन्थेषूद्धृतानि।

यथा—

"अस्ति च शिवसूत्रम् :—

(1) "सकृद्विभातोऽयमात्मा पूर्णोऽस्य न क्वाप्यप्रकाशसम्भवः।"

इति तथा :—

(2) "चिद्घनमात्मपूर्णं विश्वम्।"

(स्पं०सं०,पृ०,25)

(3) यत् किल शिवसूत्रम् :—

"ब्रह्मपदे कमलशरीरस्तदुत्थप्राणिरूपेण सर्वत्र सर्वदा विचरति।"

(ई०प्र०वि०वि०,खं०2,पृ०,301)

(4-5) अत एव श्रीभट्टकल्लटेन "प्राणाख्यनिमित्तदार्ढ्यम्" "प्राक्संवितप्राणे परिणता" इति तत्त्वार्थचिन्तामणावुक्तम्।"

(शि०सू०वि०,पृ०,68)

(6) "देहनीलादीनां सर्वशरीरग्रहणम्।"
(तं०आ०वि०,खं०11,पृ०,38)

(7) "अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः।"
(तं०आ०6,12)

(8) "भट्टश्रीकल्लटादिभिः श्रीशिवसूत्रे "प्राणाख्य-निमित्तदार्ढ्यम्" इत्यत्रोक्तः।"
(ई०प्र०वि०वि०,खं०3,पृ०,349)

~ तत्संस्करणानि :— **(1) प्रथमं संस्करणम्:— कश्मीरग्रन्थावल्या सर्वप्रथमत्वेन प्रकाशितं विमर्शिनीसहितं शिवसूत्रम् सन् 1911 तमे वर्षे।**

(2) अस्यैव ग्रन्थस्य द्वितीयं संस्करणं तत्रैव प्रकाशितमभवत् सन् 1970 प्राये काले।

(3) तत्रैव भट्टभास्करकृतवार्तिकसहितं संस्करणं प्रकाशितमभूत् सन् 1916 वर्षे।

(4) तत्रैव पुनर्वरदराजकृतेन वार्तिकेन साकमपरं संस्करणं सन् 1925 वर्षे।

(5) श्रीनिवास आयङ्गरकृतमाङ्गलभाषानुवादसहितं विमर्शिन्या अपरमपि संस्करणं पुरा प्रकाशितमभूत्।

(6) अपरं विमर्शिनी संस्करणमाङ्गलानुवादसहितं जयदेवसिंहेन सम्पादितं मोतीलालबनारसीदाससंस्थया प्रकाशितमभूत्।

(7) सप्तमं संस्करणं पीताम्बरापीठेन सूत्राणां हिन्दीव्याख्यया साकं प्रकाशितम्।

(8) अष्टमं संस्करणं रजनीशकृतेनाङ्गलव्याख्यानेन साकं तदाश्रमे प्रकाशितम्।

(9) नवमं च संस्करणं श्रीनगरे विमर्शिन्या हिन्दीभाषानुवादेन साकं जानकीनाथकमलेन निर्मितं प्रकाशितं च।

(10) भट्टभास्करीयवार्तिकग्रन्थेन साकं शिवसूत्र-वृत्तिसहितमपि तत् प्रकाशितमस्ति।

~ तदुद्गम :— **भट्टकल्लटोक्त्यनुसारं शिवसूत्रं शिवेन वसुगुप्ताय स्वप्ने उपदिष्टम्। भट्टभास्करकृतशिवसूत्रवार्तिकानु-सारं, रामकण्ठकथनानुसारं च महादेवपर्वते वसुगुप्तेन सिद्धादेशोपायतः सम्प्राप्तं सूत्रशैल्या निर्मितं शाम्भवयोगप्रति-पादनपरं किमपि पारमेश्वरं शास्त्रम्। सिद्धादेशश्च साक्षाद्दृष्टस्य वा स्वप्नदृष्टस्य वा सिद्धस्यानुग्रहतः सूत्राक्षरदर्शनेन वा सूत्रपदश्रवणेन वापि सम्भवति। क्षेमराजोक्ता शङ्करोपलकथा नात्र वार्तिके कथिता। न चापि भट्टकल्लटरामकण्ठाभ्यामुक्ता कथमपि। ततः सा कल्पनाशील-भक्तजन-कल्पितेव प्रतिभाति। शिवसूत्राणीदानीं त्रिखण्डान्येव लभ्यन्ते। परं पुरा चतुः खण्डान्यासन्। अत्यन्तरहस्यात्मकं चतुर्थं खण्डमादाय भट्टकल्लटेन तत्त्वार्थचिन्तामणिनामकं शास्त्रं निर्मितमभूत्। सभाष्यस्य तस्य खण्डस्य वाक्यश्लोकपंक्तयस्तत्रतत्र ग्रन्थान्तरेष्वर्वाचीनैर्गुरुभिः समुद्धृता लभ्यन्ते, परं ग्रन्थोऽसौ विलुप्त एवास्माल्लोकात्। शिवसूत्रस्य प्रथमे खण्डत्रये यत् स्पन्दसिद्धान्ताङ्गभूतं प्रमेयजातं प्रतिपादितमस्ति सुरहस्यात्मिकया शैल्या, तदेव तयैव शैल्या किञ्चित्-किञ्चित् स्फुटं प्रतिपादितम् अस्ति स्पन्दकारिकायाम्। उक्तमेवम्प्रायं प्रमेयजातमधिकृत्य। यथा—**

(क) "दृब्धं महादेवगिरौ महेशस्वप्नोपदिष्टाच्छिवसूत्र सिन्धोः।
स्पन्दामृतं यद्वसुगुप्तपादैः श्रीकल्लटस्तत्प्रकटीचकार।।"
(स्पं०वृ०,पृ०,40)

(ख) "श्रीमन्महादेवगिरौ वसुगुप्तगुरोः पुरा।
सिद्धादेशात्प्रादुरासन् शिवसूत्राणि तस्य हि।।
सरहस्यान्यतः सोऽपिः प्रादाद्भट्टाय सूरये।
श्रीकल्लटाय सोऽप्येवं चतुः खण्डानि तान्यथ।।
व्याकरोत्त्रिकमेतेभ्यः स्पन्दसूत्रैः स्वकैस्ततः।
तत्त्वार्थचिन्तामण्याख्यटीकया खण्डमन्तिमम्।।"
(शि०सू०वा०1,3-5)

भट्टकल्लटकृताः स्पन्दकारिकाः एव स्पन्द सूत्राणीति कथ्यन्ते, तासामल्पाक्षरत्वे सति बह्वर्थत्वात्। यथा—

"गुरोर्वसुगुप्ताभिधानस्य साक्षात् सिद्धमुखसङ्क्रान्तसमस्त-रहस्योपनिषद्भूतस्पन्दतत्त्वामृतानिःष्यन्दस्य भारतीं वाचं स्तौमि।"
(स्पं०का०,पृ०,165)

भट्टकल्लटो वसुगुप्तस्य साक्षाच्छिष्यस्तत् समकालिकश्च। रामकण्ठोऽपि नवमशताब्दीकत्वात् पुरातन एव गुरुः, वसुगुप्तात् किञ्चिन्मात्रमेवार्वाक्तनः। ततस्तयोरेव मतं प्रमाणं न क्षेमराजस्यैकादशशतकमध्ये वर्तमानस्य। भट्टभास्करश्च वसुगुप्तस्य शिष्यपरम्परायां सप्तमो गुरुः! क्षेमराजात् पुरातनत्वेन परम्परया च सम्प्राप्तशिवसूत्रागमेतिहासत्वेन तस्यापि मतं क्षेमराजोक्तकथापेक्षया श्रद्धेयत्तरम्।

~ दन्तकथानुसारम् :— **क्षेमराजेन शिवसूत्राणामाविर्भावस्य कापि दन्तकथा शिवसूत्रविमर्शिन्यां निबद्धा—यदनुसारं महादेवपर्वताधित्यकायां स्वप्नदृष्टशिवादेशानुसारं वसुगुप्तः शिवसूत्राणि महत्यां शिलायां टङ्कितान्यवापेति। यथा—**

"श्रीमहादेवगिरौ महामाहेश्वरः श्रीमान् वसुगुप्तनामा गुरुरभवत्।
कदाचिच्च असौ ..... शिवेन स्वप्नेऽनुगृह्योन्मिषित-प्रतिभः कृतो यथा अत्र महीभृति महति शिलातले रहस्यमस्ति तदधिगम्यानुग्रहयोग्येषु प्रकाशय इति।"
(शि०सू०वि०,पृ०,1-2)

परं नैष इतिहासः प्रामाणिकः प्रतिभाति। यतः प्राचीनै-र्भट्टकल्लटरामकण्ठभट्टभास्करसदृशैर्नोक्तैषा कथा। अपि त्वन्यथैवोक्तं तैः।

द्र०:- **'शङ्करोपल'** इति।

शिवसूत्रवार्तिकम् :— ~ भास्करीयम् :— **भट्टभास्करेण वसुगुप्तात् प्रवृत्तामत्रुटितां गुरूपदेशपरम्परामनुसृत्य विरचितः सूत्रव्याख्यात्मको ग्रन्थः। अयं भट्टभास्करः वसुगुप्तादारम्य सप्तमो गुरुः। अत्र वार्तिके सूत्राणामवतरणिकां निर्माय ग्रन्थकृता तेषां तात्पर्यार्थाः पदार्थाश्च सम्यग्**

व्याख्याताः। क्वचित् क्वचिद्रहस्योपायप्रतिपादनपराणि कानिचिद्वार्तिकपद्यानि नात्र सुस्पष्टार्थानि। तथापि सूत्रतात्पर्यावबोधनेऽतीवोपयोगी वार्तिकग्रन्थोऽयम्। यत्रयत्र क्षेमराजीय-व्याख्यया सह मतभेदस्तत्रतत्र वार्तिकमेवेदं प्रमाणम्, गुरुपरम्परागतार्थवबोधकत्वात्। यथा—

"तस्मात् प्राप्य करोम्येष सूत्रवार्तिकमादरात्।।
दैवाकारिर्भास्करोऽहमन्तेवासिगणेरितः।"

(शि०सू०वा०1,8-9)

~ तट्टिप्पणी :— (1) भट्टभास्करकृतस्य शिवसूत्रवार्तिकस्यैका टिप्पण्यपि पृष्टानामधः प्रकाशिता वर्तते कश्मीरग्रन्थावली संस्करणे। असौ टिप्पणी तु प्रायशः परिपूर्णा वृत्तिरेव भास्करीयवार्तिकानुसारिणी। उपयोगिनी चासौ सूत्रार्थावबोधने, वार्तिकतात्पतर्यावबोधने च। टिप्पणीकृता निजनामनिर्देशो न क्वापि कृतः। एतद्विषये आधारभूतानां मातृकाणां परीक्षणमपेक्ष्यते। तच्च नाद्य यावत् सम्पन्नम्।

(2) भास्करकृतं "सूत्राणि विवृणोमि" इति वाक्यमाश्रित्य केचन विद्वांस एवं मन्यन्ते यद् भट्टभास्करेण शिवसूत्रविवरणमपि निर्मितमभूदिति। ततस्तेषामनुमानमस्ति यदेषा टिप्पण्येव तद्विवरणमिति।

परं यदीयमेव टिप्पणी भास्करकृतं विवरणमभविष्यत् तदा प्रतिसूत्रं टिप्पणी निर्मिताऽभविष्यत्। परं प्रथमखण्डस्य प्रथमसूत्रस्य विवरणं टिप्पण्यां नास्ति। 5-6 इत्यत्र टिप्पण्यां त्रिकदर्शिनोऽपि "मायामोहिताः" इति कथिताः। तत इयं टिप्पणी कस्याप्यवान्तरकालिकस्य पण्डितस्यैव कृतिर्न भट्टभास्करस्येति सुधीभिरवधेयम्। यथा—

"विश्वोत्तीर्णतन्मयतादिस्वभावं त्रिकादिदर्शिन आत्मानं प्रतिपद्यन्ते। सर्वे अमी पारमार्थिकस्वातन्त्र्यवञ्चिता मायया भेदभूमिमापन्नाः।"

(शि०सू०वा०,टि०1,पृ०,6)

~ रामचन्द्रीयम् :— वर्तमाने युगे रामचन्द्रसोदागरेण निर्मितमभिनवं विमर्शपारिजाताभिधानं वार्तिकपुस्तकम्। नैतत् प्रकाशितं क्वापि। मातृकायाः परीक्षणेन ज्ञायते यच्छैवसिद्धन्तविषये ज्ञानवानपि रामचन्द्रोऽयं नैव व्याकरण-छन्दःशास्त्रज्ञः। ततो भ्रष्टे संस्कृते वृत्तभ्रष्टोऽयं वार्तिकग्रन्थो भक्त्यावेशत् एव निर्मितस्तेन। श्रीनीलकण्ठ- गुरटूमहोदयेनैतस्य संशोधनं विधाय सम्पादनमस्य कृतं 1989 तमे खैस्ते वत्सरे। श्रीरामजूमहोदयस्य शैवसिद्धस्य शिष्योऽयमभूच्छ्रीरामचन्द्रसोदागरः।

~ वरदराजीयम् :— क्षेमराजशिष्येण वरदराजेन शिवसूत्रविमर्शिनीमनुसृत्य विरचितो द्वितीयोऽयं वार्तिकग्रन्थः शिवसूत्रव्याख्यानप्रयोजनः। क्षेमराजीयकल्पनानुसारं विरचितोऽयं ग्रन्थो न तथोपयोगी, न चापि तथा प्रमाणं, यथा गुरुपरम्परानुसारं प्रवृत्तः वार्तिकग्रन्थो भट्टभास्करस्य। अत्र वार्तिके सूत्रग्रन्थीयप्रकरणत्रयस्य यन्नामकरणं शाम्भवोपायादि-निरूपणात्मकं, तदपि परम्पराविरुद्धम् अप्रमाणिकं चेति वेदितव्यम्। न हि प्रकरणत्रये तन्त्रालोकतन्त्रसारा-दिवदुपायत्रयस्य पृथक्-पृथग् निरूपणं सूत्रैः कृतं शिवेनेति बोध्यं सुधीभिः। शिवसूत्रविमर्शिन्या अवबोधने वार्तिकमेतदतीव साहाय्यकरम्। यथा—

"महामाहेश्वरश्रीमत्क्षेमराजमुखोद्गताम्।
अनुसृत्यैव सद्वृत्तिमञ्जसा क्रियते मया।।
वार्तिकं शिवसूत्राणां वाक्यैरेव तदीरितैः।"

(व०रा०वा०1,4-5)

शिवसूत्रविमर्शिनी :— क्षेमराजकृता शिवसूत्राणां विस्तृता टीका। अत्र टीकायां क्षेमराजेन बहूनामन्येषां शास्त्राणां वाक्यानि प्राचुर्येण समुद्धृतानि वर्तन्ते। अत्र सूत्रस्थानां पदानां सूत्रतात्पर्याणां च प्रकाशनार्थं तथाविधो यत्नः क्षेमराजेन नैव कृतो यथाविधस्तेन शास्त्रान्त-रैर्ग्रन्थान्तरैश्चैकवाक्यतां साधयितुं स्वकीयं च बहुश्रुतत्वं प्रख्यापयितुं कृतः। सूत्राणां तात्पर्यस्य विषये कोऽभिप्रायः क्षेमराजस्येति तस्य विमर्शिनीतस्तथा न प्रकटीभवति यथा वरदराजीयेन वार्तिकेन स्पष्टीक्रियते। भूयांसि च समुद्धृतानि वाक्यानि कौलाचारपरेभ्यः शास्त्रेभ्यः समुद्धृतानि विमर्शिन्याम्। भट्टभास्करस्य वार्तिकं विमर्शिन्यपेक्षया शोभनतरां व्याख्यां करोति शिवसूत्राणां तात्पर्य्यस्य।

शिवसूत्रग्रन्थस्य यश्चतुर्थः खण्डस्तं प्रत्यत्र विमर्शिन्यां न कोऽपि निर्देशः क्वचिदपि लभ्यते। न चेयं विमर्शिनी गुरुपरम्परोपदेशानुसारिणी, अपि तु बहुशः स्वबुद्धिवैभवकल्पि-तैवेति विदाङ्कुर्वन्तु सन्तः। गुरुपरम्पराप्राप्तं यच्छिवसूत्रव्याख्यानं तद् भट्टभास्करीये वार्तिक एव लभ्यम्।

~ व्याख्या :— क्षेमराजः शिवसूत्रविमर्शिन्यां भूयांसि सूत्राणि विध्यर्थप्राधान्येन व्याख्याति।

त्रिष्वपि प्रकरणेषु भूयसां सूत्राणां व्याख्याने "एवं योगिना विधेयम्" इत्येवं व्याख्यां करोति। परं पारम्परिकदृष्टेर्विरुद्धैषा तस्य दृष्टिः। पारम्परिकव्याख्यानुसारं सम्पन्नचित्प्रकाशस्य योगिन एतत् सर्वमेवानुषङ्गिकफलत्वेन भवति। चित्प्रकाशे परिनिष्ठितस्य योगिनः स्वयमेव सहजविद्योदयो भवति। तथाविधविद्योदयस्य फलान्यपि पुरतः समायान्ति। किञ्च तस्य पुरतः स्वयमेव शाम्भव-शाक्ताणवसमावेश फलानि नृत्यन्ति, तानि च तद्विभूतिमयानि। इत्येवमेव शिवसूत्राणि पुरातनैगुर्रुभिर्व्याख्यातानि। क्षेमराजेन स्ववुद्धिवैभवं प्रकटयितुमभिनवामिव कल्पनामाश्रित्य आणवशाक्तविधि परत्वेन व्याख्यातानि भूयांसि सूत्राणि। ततो नैषा सूत्रव्याख्या सर्वत्र यथार्था।

~ तत्संस्करणानि :— (1) प्रथमं संस्करणम्— काश्मीरग्रन्थावलीतः प्रकाशितम् दुर्लभम्।

(2) द्वितीयं संस्करणम् :— आङ्गलभाषानुवादमयम् दुर्लभम्।

(श्रीनिवास आयङ्गरकृतम्)

(3) तृतीयं संस्करणम् :— कश्मीरग्रन्थावलीतः प्रकाशितम्।

(4) चतुर्थं संस्करणम् :— श्रीजयदेवसिंहेन कृतेनाङ्गलभाषानुवादेन सहितम्।

(5) पञ्चमं संस्करणम्ः — श्री जानकीनाथ-कमलकृतेन हिन्दीभाषानुवादेन सहितम्।

शिवसूत्रविवरणम् :— शिवसूत्रवार्तिकस्य भास्करीयस्य टिप्पण्यां प्रतिसूत्रं कापि व्याख्यापि मुद्रिता वर्तते। ग्रन्थसस्योपोद्घाते ऽस्याः व्याख्यायाः कर्तुर्विषये न किमप्युक्तम्। वार्तिके विद्यमानादेकान्निर्देशादेवं तु प्रतीयते यद् भट्टभास्करणे स्वयं शिवसूत्रविवरणमपि निर्मितं शिष्यजनहितायेति। परं तस्याभिप्रायोऽयमेव यद्वार्तिकस्थैरेव पदैः सूत्रव्याख्यानं कृतमिति ततो वार्तिकमेव विवरणमिति। तत एवाधस्तन-सूत्रस्य व्याख्यानं टिप्पण्यां नैव लभ्यते— सू० 1-1।

अग्रेऽपि तत्रतत्र टिप्पण्यां स्पष्टं प्रतिपादितं यद्वार्तिकानामेव व्याख्या, टिप्पणीति। न चासौ टिप्पणी भट्टभास्करेण रचिता; अपित्वर्वाचीनेन केनापि पण्डितेनेति प्रतीयते।

तदुक्तं वार्तिके :—

"यस्मादागमविभ्रंशाद् भ्रान्तेर्भ्रमितबुद्धयः।
सुकुमारा अतस्तानि सूत्राणि विवृणोमि च।।"

(शि०सू०वा०1,9-10)

विवृणोमीति प्रकृतवार्तिकरचनयैव न टीकान्तररचनयेति तात्पर्यमत्र वेद्यम्।

शिवसूत्रविवृत्तिः :— शिवसूत्रोपरि लिखितानां प्राचीनानां टीकानामध्ययनं विधाय सूत्रप्रतिपादितान् विषयानधि कृत्य योगिजनैः सह विमर्शं कृत्वा स्वयं च भूयोभूयो सूत्रार्थविमर्शनमभ्यस्य बलजिन्नाथपण्डितेन निर्मितेयं लघ्वी टीका शिवसूत्राणाम्। अनेकार्थत्वं हि सूत्राणां स्वभाव एव। अतोऽत्र केषामपि सूत्राणां अनेकेप्यर्थाः प्रतिपादिताः। प्राचीनेषु टीकाकृत्सु भट्टभास्करः क्षेमराजश्चेति द्वावेव प्रधानौ। उभयोर्दृष्टि भिन्न भिन्नप्रकारा। सूक्ष्मतरेण सूत्रार्थविमर्शनेन, टीकाविचारणेन, स्पन्दशास्त्रोक्तार्थसंवादेन, चैतद्विभाति यद् भट्टभास्करीयमेव व्याख्यानं शोभनतरं यथार्थञ्चेति तथा सूचितमनेकधाऽत्र विवृत्तौ।

अविच्छिन्नगुरुशिष्यपरम्परागतं तद् व्याख्यानं प्रमाणमिति स्वीकार्यम्। ततस्तदेव प्राधान्यतः समाश्रित्य विरचितेयं शिवसूत्रविवृत्तिः। सूत्रतात्पर्यार्थप्रकाशिकेयं टीका नाति विस्तृता न च शब्दशः सूत्रव्याख्याकारी सर्वत्र। परं तात्पर्यप्रकाशिका तात्पर्यविषये च मतमतान्तरनिर्देशकारिणी सती स्वल्पकायैव। किञ्चिद्विस्तारयुक्तया च हिन्दीभाषाटीकयापि समलङ्कृतेयं विवृत्तिः प्रकाशनीया वर्तते।

शिवसूत्रवृत्तयः :— एवमनुमीयते यदेकादशे शतके शिवसूत्रस्योपर्यनेका वृत्तयोऽभूवन्। ता अनादृत्य विरचिता विमर्शिनी क्षेमराजेन।

यथा—

"आसमञ्जस्यमालोक्य वृत्तीनामिह तत्त्वतः।
शिवसूत्रं व्याकरोमि गुर्वाम्नायविगानतः।।"

(शि०सू०वि०,पृ०,1)

शिवसूत्रवृत्तिः :— अस्त्येका लघ्वी वृत्तिः शिवसूत्रेषु याभट्टभास्करीयेण शिवसूत्रवार्तिकेन सह प्रकाशिता वर्तते। तत्र ग्रन्थे स्पन्दकारिकावृत्तिरपि प्रकाशितास्तिभट्टकल्लटकृता। उभयोर्वृत्त्योः शैल्याः साम्येन पण्डिता शिवसूत्रवृत्तिमिमां कल्लटकृतामेव मन्यन्ते। वृत्तेरस्याः पुष्पिकासु नैव कस्यचिदपि ग्रन्थकर्तुर्नामनिर्देशो वर्तते नाप्यारम्भे न चाप्युपसंहारे।

परमस्याः वृत्तेरध्ययनेनैवं प्रतीयते यच्छिवसूत्रविमर्शिन्याः क्षेमराजकृतायाः अति संक्षिप्तं सारमिवैतदिति। बहुशोऽत्र-शब्दसन्दर्भसाम्यमप्युपलभ्यते।

ततोऽनुमीयते यत्केनापि विदुषा शिवसूत्रविमर्शिनी-मधीत्य तस्याः सारञ्च संगृह्य वृत्तिरियं विरचिता विनैव स्वनामनिर्देशमिति।

वृत्तेः प्रकरणत्रयान्ते शिवसूत्रविमर्शिनीमनुसरता तथैव तेषां नामकरणमत्र कृतं तेन विदुषा। यथा—

(1) " इति श्रीशिवसूत्रवृत्तौ शाम्भवोपायप्रकाशनं नाम प्रथम उन्मेषः।"

(शि०सू०वृ०1,22)

(2) " इति श्रीशिवसूत्रवृत्तौ शाक्तोपायप्रकाशनं नाम द्वितीय उन्मेषः।"

(तदेव 2,10)

(3) "इति श्रीशिवसूत्रवृत्तौ आणवोपायप्रकाशनं नाम तृतीय उन्मेषः।"

(तदेव 3,45)

शिवस्तोत्रावलीः :— आचार्योत्पलदेवकृतानां कति-पयस्तोत्राणां सुप्रभूतानां च मुक्तकपद्यानां संग्रहोऽयं क्षेमराजकृतव्याख्यायुतो लभ्यते। कश्मीरेष्वतीव लोकप्रियाण्य-त्रत्यानि स्तोत्राणि। ईश्वरप्रत्यभिज्ञादिशास्त्राणां यः सारोऽसावत्र सुमधुरया काव्यशैल्या प्रकटितः सन्नत्यन्तं हृदयङ्गमीभावमापद्यते साधकानाम्। ततः काव्यात्मकमेतदतिमाहात्म्यमण्डितं शास्त्रमिति विदाङ्कुर्वन्तु सुधियः। यथा—

"ईश्वर प्रत्यभिज्ञाकारो वन्द्याभिधानः
श्री मदुत्पलदेवाचार्योऽस्मात्परमेष्ठी .....
..... संग्रहस्तोत्रजयस्तोत्रभक्तिस्तोत्राण्याह्निकस्तुतिसूक्तानि च कानिचिन्मुक्तकान्येव बबन्ध।"

(शि०स्तो०वि०,पृ०,1)

~ तद्विवृत्ति :— **क्षेमराजकृता शिवस्तोत्रावल्याष्टीका।**

यथा—

"तस्माद्गुरोरभिनवात्परमेशमूर्तेः
क्षेमो निशम्य विवृत्तिं व्यतनोदमुत्र।।"

(शि०स्तो०वि०,(उपसंहार),पृ०,355)

"व्याकरोमि मनाक् श्रीमत्प्रत्यभिज्ञाकृतः स्तुतीः।।"

(तदेव,पृ०,1)

अस्याः टीकायाः सारं श्रीलक्ष्मणजूमहोदयैः हिन्दी-भाषायां प्रतिपादितं सत्प्रकाशितं च सदिदानीं लभ्यते।

शिवहस्तः :— (1) अक्षतपुष्पादिधारी गुरोर्दक्षिणो हस्तो योऽनुग्रहपूर्वकं समन्त्रोच्चारं शिष्यस्य मूर्ध्नि भुक्तिमुक्तिलाभाय प्रदीयते। यथा—

"शिवहस्तं ततः कुर्यात् पाशविश्लेषकारकम्।।"
(मा०वि०तं०9,44)

"शिवहस्तविधिः प्रोक्तः सद्यः प्रत्ययकारकः।।"
(तदेव11,22)

"शिवहस्तप्रयोगेन (ण) समारोप्य मुखं नयेत्।"
(तदेव11,25)

"तेनाभिषेचयेत्तं तु शिवहस्तोक्तवर्त्मना।"
(तदेव11,44)

(2) गुरुः स्वीये दक्षिणे हस्ते वामहस्तेन मन्त्रचक्रपूजां विधाय तं हस्तं शिष्यस्य मस्तके निदधाति अङ्गान्तराण्यपि कानि चित्तस्य तेन स्पृशति। तेन च शिष्यः ईश्वरसायुज्यार्थं नियुज्यते येन शरीरपातानन्तरं शिवसायुज्यं लभते एव। स एष एवंविधो गुरोर्हस्तः शिवहस्त इत्युच्यते। यथा—

"ततः स दक्षिणे हस्ते दीप्तं सर्वाध्वपूरितम्।।
मन्त्रचक्रं यजेद्वामपाणिना पाशदाहकम्।
तं शिष्यस्य करं मूर्ध्नि देहन्यस्ताध्वसंततेः।।
न्यसेत् क्रमेण सर्वाङ्गं तेनैवास्य च संस्पृशेत्।"
(तं०आ०15,456-458)

~ कौलविधौ :— गुरुः शिष्यस्य मन्त्रिते मस्तके तस्य शिष्यस्य मन्त्रितौ हस्तौ मन्त्रबलेन तथा प्रेरयति यथा तौ शिष्यस्य मस्तके स्वयमेव सन्निपततः। असौ शिवहस्तविधिः कौलदीक्षायाम्। तया च दीक्षया शिष्यस्य स्वरूपप्रकाशः सञ्जायते।

यथा—

"ततोऽस्य मस्तके चक्रं हस्तयोश्चार्च्य योगवित्।
तद्धस्तौ प्रेरयेच्छक्त्या यावन्मूर्धान्तमागतौ।।
शिवहस्तविधिः प्रोक्तः सद्यः प्रत्ययकारकः।"
उद्धृ०:- (तं०आ०वि०,खं०11/2,पृ०,126)

~ तत्फलम् :—

"उक्तं स्पष्टम् :—
'दत्तेन शिवहस्तेन समयी स विधीयते।
सायुज्यमीश्वरे तत्त्वे जीवतोऽधीतियोग्यता।।" इति।"
(तं०आ०15,459)

अधीतियोग्यतेति :— शास्त्राध्ययनाधिकारः।

~ पुत्रकदीक्षायाम् :— रहस्यमन्त्रैः पूजितो गुरोर्दक्षिणो हस्तो यः शिष्यस्य मूर्ध्नि निधीयते पुत्रकदीक्षायां पाशमोचकत्वेन। यथा—

"ब्रह्मपञ्चकसंयुक्तः शिवेनाधिष्ठितः शुभः।
पाशच्छेदकरः क्षेमी शिवहस्तः प्रकीर्तितः।।"
उद्धृ०:- (तं०आ०वि०,खं०,10,पृ०,32)

शिवाः (प्रमातारः) :— साक्षात्कृतस्वात्मशिवभावाः सर्वथाऽभेदभावास्थिताः केवलम् "अहम्" इत्येव विमर्शभाजः, शिवशक्तितत्त्वस्थिताः शाम्भवाः शाक्ताश्च प्रमातारः शिवप्रमातारः इत्युच्यन्ते। काश्मीरपरम्परासु तेषामेव पारिभाषिकी संज्ञा अकलाः इति। यथा—

"आ शिवात् सकलान्तं ये मातारः सप्त.....।"
(तं०आ०10,18)

"तत्र शिवाः, मन्त्रमहेशाः, मन्त्रेशाः, मन्त्राः, विज्ञानाकलाः, प्रलयाकलाः, सकला इति सप्त शक्तिमन्तः।"
(तं०सा०,पृ०,92)

शिवागमा :— भेददृष्टिप्रधानाः दश आगमाः शैवाः। ते च कामिकाद्याः श्रीकण्ठयां संहितायां परिगणिताः। ताश्च संहितापंक्तयः समुद्धृतास्तन्त्रालोकविवेके खण्ड-1, पृ० 40 इत्यत्र।

"तन्त्रं जज्ञे रुद्रशिव भैरवाख्यमिदं त्रिधा।
वस्तुतो हि त्रिधैवेयं ज्ञानसत्ता विजृम्भते।।
भेदेन भेदाभेदेन तथैवाभेदभागिना।"
उद्धृ०:- (तं०आ०वि०खं०1,पृ०,45)

ईशान-तत्पुरुष-सद्योजातैरुपदिष्टा एते दशागमाः।

~ एकैकभेदा :— **उद्बूभूषुभिरीशानतत्पुरुषसद्योजातैरुपदिष्टाः = 3**

एतैरेवोद्भूतैरुपदिष्टाः = 3 सर्वे = 3+3=6

एतदवस्थाप्राप्तैः सिद्धैरुक्ता एव आगमाः इति वेद्यं सुधीभिः।

~ तन्नामानि :—

"कामजं योगजं चिन्त्यं मौकुटं चांशुमत् पुनः।
दीप्तं सूक्ष्मं सहस्रार्कं सुप्रभं कारणं पुनः।।
शिवभेदाः समाख्याताः .....।
श्रीश्रीकण्ठीसंहितावाक्यम्।"
उद्धृ०:- (तं०आ०वि०,खं०1,पृ०40)

~ तत् स्त्रोतांसि :— **ईशानः, तत्पुरुषः, सद्योजातः इति त्रिभिरुद्बुभूषुभिरुपदिष्टाः शिवागमास्त्रयः, एतैरेवोद्भूतैस्त्रिभिरुपदिष्टास्ते त्रयः, त्रिभिरपि मिश्रैरुपदिष्ट एकः, ईशान-तत्पुरुषाभ्याम्, ईशानसद्योजाताभ्याम्, सद्योजाततत्पुरुषाभ्यां चोपदिष्टास्त्रयः इति संकलनया 3+3+1+3=10 दश शिवागमाः। यथा—**

"ईशतत्पुरुषाजातैरुद्भूतैरुद्बुभूषुभिः।
एककैः षड्भिरेकेन त्रिकेण द्वयात्मकैस्त्रिभिः।।
तदित्थं शिवभेदानां दशानामभवत्स्थिति।"
उद्धृ०:- (तं०आ०वि०,खं०1पृ०,37)

द्र०:- (तदेव पृ०,36) **इति।**

ईशानादीनां पञ्च मन्त्राख्यानामधिकारिशिवानां मध्ये तत्तदेकैकमन्त्रप्राणिदशाप्राप्तौ, मन्त्रप्राणिद्वयमिश्रदशाप्राप्तौ वा यस्य कस्यापि सिद्धस्यागमद्रष्टुरागमभेदानां यद् दर्शनं तदेव तत्तत्मन्त्रप्राणिस्रोतस्त्वभागमानां वेद्यम्।

~ त्रिकभेद :— ईशान+तत्पुरुष+सद्योजातैस्त्रिभिर्मिलित्वोक्तः =1 त्रयाणामेषां मन्त्राख्यानामधिकारिणां मिश्रया दर्शनदृष्टयोपदिष्ट आगमोऽयमेकः।

~ द्विकभेदा :— ईशानतत्पुरुषौ, ईशानसद्योजातौ तत्पुरुषसद्योजातौ इत्येतौ पृथक्पृथक् मिलित्वागमत्रयस्य वक्तारः।

द्वयोर्द्वयोर्मिश्रया दृष्टयोपदिष्टा इमे आगमाः।

शिवाद्वैतम् :— ~ शास्त्रम् :— त्र्यम्बकादित्येन प्रवर्तितं वसुगुप्तादारभ्याभिनवगुप्तान्तं यावद् येऽभूवन्नाचार्यास्तैः सुविकासं प्रापितमद्वैतशैवशास्त्रम्। एतच्छास्त्रं वर्तमाने युगे कश्मीरशैवदर्शनमिति नाम्ना प्रसिद्धमस्ति। इदं शास्त्रमीश्वराद्वयवादः इति ईश्वरा द्वैतवाद इत्यपि चोच्यते। आचार्याभिनवगुप्तपादाः इदं शास्त्रं पराद्वैतं, परमाद्वैतं, परमाद्वयम् इत्यादिनामभिरुक्तवन्तः।

द्र०:- **'अद्वैतशैवदर्शनम्'** इति।

शिवानन्दः :— महानयविद्याप्रकाशकः कालीनयोपासनाप्रवर्तकादुत्तरपीठाधिपतेः शिवानन्दाद् भिन्नः। असौ शिवानन्दः कल्याणिकादीनां गुरुः; अयं पुनः महेश्वरानन्दस्य परमगुरुः। यथा—

"अथ सा (देवी) कालयोगेन शिवानन्दस्य धीमतः।
शिष्यस्योपादिशद् देवी चिदद्वैतस्य निश्चयम्।।
क्रमेण तच्च नाथानां परिपाट्या भुवः स्थलम्।
दिव्यसिद्धमनुष्यौघप्रविभागादवातरत्।।
.....
.....
अथ कालक्रमवशाच्चोलदेशशिरोमणिः।
महाप्रकाशो नामासीद् देशिको दृक्क्रियोत्तरः।।
तस्य शिष्योऽभवद्धीमान् गोरक्षो नाम वश्यवाक्।
महेश्वरानन्द इति प्राप्तपूज्याह्वयो महान्।।"

(म०मं०,पृ०,190)

शिवानन्दनाथः :— उत्तरपीठाल्लब्धकालीनयोपदेशः कश्मीर-मण्डले तस्य प्रवर्तयिता गुरुः। अस्य शिष्याः श्रीकेयूरवती- श्रीमदनिका-श्रीकल्याणिका इति मुख्यास्तिस्त्रः। तासां परम्पराऽग्रे प्रसृता। अयं तावदष्टमशताब्द्यामभूदित्यनुमीयते यतोऽसौ सोमानन्दस्य परमेष्ठिगुरुः। अयं तावदवतारकनाथ इत्यप्युक्तोऽन्यत्र। यथा—

"यथैकः श्रीमान् वीरवरः सुगृहीतनामधेयो 'गोविन्दराजाभिधानः, 'श्रीभानुकाभिधानो, द्वितीयः 'श्रीमान् एरकसमाख्यस्तृतीयः' सममेवोपदेशं पीठेश्वरीभ्यः उत्तरपीठलब्धोपदेशात् श्रीशिवानन्दनाथाल्लब्धानुग्रहेभ्यः.....
.... प्राप्नुवन्तः।"

उद्धः:- क्रमकेलितः— (तं०आ०वि०,खं०3,पृ०,192)

~ **तत्पद्यद्वयम्** :— समुद्धृतमेतदवतारकनाथकृतत्वेन जयरथेन।

(क) "यदाह (श्रीमानवतारकनाथः)—
"एकं स्वरूपरूपं प्रसरस्थिति विलयभेदतस्त्रिविधम्।
प्रत्येकमुदयसंस्थितिलयविश्रमतश्चतुर्विधं तदपि।।
इति वसुपञ्चकसंख्यं विधाय सहजस्वरूपमात्मीयम्।
विश्वविवर्तावर्तप्रवर्तकं जयति ते रूपम्"।।

उद्धः:- (तं०आ०वि०,खं०3,पृ०,197)

(ख) "यदाहः (श्रीमानवतारकनाथः) —
'कालस्य कालि देहं विभज्य मुनिपञ्चसंख्यया भिन्नम्।
स्वस्मिन् विराजमानं तद्रूपं कुर्वती जयसि"।।

उद्धः:- (तदेव,पृ०,198)

शिवानुग्रहः :— शिवस्य पञ्चकृत्येषु चरमं कृत्यं येन जनो मोक्षमार्गे प्रवृत्तो भवन् पर्यन्ते स्वात्मानं शिवमेव प्रत्यभिज्ञाय सर्वथा कृतकृत्यो भवति।

द्र०:- **'शक्तिपातः'** इति।

द्र०:- **'अनुग्रहः'** इति च।

शिवैकीभावः :— स्वात्मानं सर्वथा शिवमयं पश्यन् शिवयोगी स्वं जीवत्वं स्वस्मिन्नेव शिवत्वे विलीनतां नयति। स एष संकुचितस्यात्मनोऽपरिमितो विस्तार एव जीवभावस्य लय इत्युच्यते। यथा—

"व्यापिनमभिहितमित्थं सर्वात्मानं विधूतनानात्वम्।
निरुपमपरमानन्दं यो वेत्ति स तन्मयो भवति"।।

(प०सा०का०,82)

शिवेन सह तन्मयीभाव एव हि कल्पितस्य जीवभावस्य लयः।

शिवोपनिषद् :— विज्ञानभैरवः।

"तदुक्तं शिवोपनिषदि—
'भावेऽत्यक्ते निरुद्धा चिन्नैव भावान्तरं व्रजेत्।
तदा तन्मध्यभावेन विकसत्यति भावना।।' इति।"

(वि०भै०,61)

उद्धः:- (भ०गी०सं०,पृ०,53)

"उक्तं च शिवोपनिषदि—
इच्छायामथवा ज्ञाने जाते चित्तं निवेशयेत्।"

(वि०भै०,98)

उद्धः:- (तदेव,पृ०,81)

शिवोपाध्यायः :— विज्ञानभैरवोद्द्योतस्य निर्माता, कश्मीरेषु शैवशास्त्रग्रन्थनिर्मातॄणां मध्ये चरमः आचार्यः, पट्टानराज्ये सुखजीवननाम्नः प्रशासकस्य राज्यकाले (1754-1762 ई) विज्ञानभैरवोद्द्योतं विरचितवान्।

यथा—

"सुखजीवनाभिधाने रक्षति कश्मीरमण्डलं नृपतौ।
अगमन्निःशेषत्वं विज्ञानोद्द्योतसंग्रहः सुगमः।।"

(वि०भै०उ०,पृ०,144)

शिवोपाध्यायोऽयं शाङ्करवेदान्तं प्रति भक्तिमान् शैवाचार्यः। अस्य वंशजा अद्यापि श्रीनगर्यां पुरुषयारस्थले

निवसन्ति। अस्यैव वंशजानां सकाशे रत्नकण्ठहस्तलिखिता राजतरङ्गिणीपाण्डुलिपिरभूद् यस्या प्रतिलिपिं मुल्लराख्योऽधिकारी प्राप्तवान्। स्टैनेन तद्वंशजेभ्यः त्रिभ्यो जनेभ्यः सकाशात् खण्डत्रयं तस्याः प्राप्तं प्रतिलिपिलेखनार्थम्। प्रथमः खण्डस्तस्येदानीमपि कश्मीरशोधसंस्थान- पुस्तकसंग्रहालये वर्तते।

राजानकशङ्करकण्ठहस्तलिखितेश्वरप्रत्यभिज्ञाविमर्शिन्यापि शिवोपाध्यायवंशजस्यानन्दपण्डितस्य गृहेऽभूत्। सापीदानीं कश्मीरशोधपुस्तकालयमातृकासंग्रहालये विद्यते। सुन्दरकण्ठोऽस्य गुरुः। तदुक्तम्। यथा—

"कृतिः श्रीमद्गोविन्दगुरुसुन्दरकण्ठपादपद्मानुजीविनः शिवोपाध्यायस्य।"

(वि०भै०उ०,पृ०,144)

~ अस्यान्ये ग्रन्था :— श्रीविद्या निर्णयः, बहुरूपगर्भस्तवटीका, गायत्री निर्णयः, इति। एतेन निर्मितं स्ववंशवर्णनाख्यं काव्यं न क्वापि लभ्यत इदानीम्।

शिष्टः :— प्रातिभज्ञानवान् योगी, न शिष्यो नापि शास्ता, यतो न केनापि शास्यते न च कमपि शास्ति। उपदेष्टा न भवत्युपदेश्योऽपि न भवति। तदसौ शिष्टौ गुरुः शिष्टौ योगी चेति समाख्यायते। यथा—

"स शिष्टः कर्मकर्तृत्वात् शिष्योऽन्य. कर्मभावतः।"

(तं०आ०13,134)

" 'लूयते केदारः' इतिवत् कर्मवद्भावात् कर्मणि क्ते शिष्ट इति।"

(तं०आ०वि०,खं०8,पृ०,88)

शिष्य :— ~ त्रिके :— शैवशास्त्रप्रवेशेऽधिकारवान् लक्षणसम्पन्नः साधकः। यथा—

"अथ लक्षणसम्पन्नं सिद्धिसाधनतत्परम्।
शास्त्रज्ञं संयतं धीरमलुब्धमशठं दृढम्।।
सुपरीक्ष्य गुरुस्तद्वत् साधकत्वे नियोजयेत्।"

(मा०वि०तं०10,1-2)

~ योग्यतातारतम्यतः :—

"ज्ञानयोग्यास्तथा केचिश्चर्यायोग्यास्तथापरे।
दीक्षायोग्या योगयोग्या इति श्रीकैरणे विधौ।।"

(तं०आ०15,18)

कैरणे इति किरणागमे।

शीधु :— इक्षुरसोद्भवं मद्यम्।

'..... शीधुस्त्विक्षुरसेन तु।'

उद्धः:- (तं०आ०वि०,खं०9,पृ०,39)

शुद्धतत्त्वानि :— शिवादि-विद्यान्तानि शुद्धानि तत्त्वानि। तत्र सर्वथा स्वप्रकाशं तत्त्वं शिवतत्त्वम्, तस्य यदनवच्छिन्न- ज्ञानक्रियासमर्थत्वं तत्प्राधान्येन तदेव शक्तितत्त्वम्, एवमेव सर्वज्ञानक्रियावत्त्वयोग्यता सदाशिवतत्त्वम्, सृष्टयादि कृत्यपञ्चके प्रेर्यत्वमीश्वरतत्त्वम्, यथार्थबोधाख्या शुद्धविद्येति। यथा—

"अतः शुद्धानि तत्त्वानि प्रोच्यन्ते तत्त्ववेदिभिः।
स्वज्योतिष्ट्वं शिवं तत्त्वं दृक्क्रिये शक्तिरुच्यते।
सर्वज्ञानक्रियावत्त्वयोग्यता स्यात् सदाशिवः।।
प्रेर्यत्वमैश्वरं तत्त्वं तद्द्वारा प्रेषणा यतः।।
शिवशास्त्रादिबोद्धृत्वं विद्या शुद्धेह कीर्तिता।"

(शि०सू०वा०3,17-19)

"तत्र परमेश्वरः पञ्चभिः शक्तिभिर्निर्भर इत्युक्तम्, स स्वातन्त्र्याच्छक्तिं तां-तां मुख्यतया प्रकटयन् पञ्चधा तिष्ठति। चित्प्राधान्ये शिवतत्त्वम्, आनन्दप्राधान्ये शक्तितत्त्वम्, इच्छा-प्राधान्ये सदाशिवतत्त्वम्—इच्छाया हि ज्ञानक्रिययोः साम्यरूपाभ्युपगमात्म-कत्वात्, ज्ञानशक्ति प्राधान्ये ईश्वरतत्त्वम्, क्रियाशक्तिप्राधान्ये विद्यातत्त्वमिति।"

(तं०सा०,पृ०73-74)

यच्चेश्वर प्रत्यभिज्ञाविमर्शिन्यां शिवदृष्टिवृत्तौ चान्यथा निरूपितम्, तन्न विरोधावहम्। तत्र चिन्निर्वृतीच्छाज्ञानक्रियाप्राधान्ये क्रमेण परमशिव-शिव-शक्ति-सदाशिव-ईश्वर-तत्त्वानामभिव्यक्तिरिति प्रतिपादितं यत् तत् सिद्धान्तदृष्ट्या तथोक्तम्। इह च प्रयोगप्रधाने तन्त्रशास्त्रेऽधरं तत्त्वमुत्तरस्याः शक्तेर्बहिः परिस्पन्दस्य फलम्। तत एवाधरेऽधरे तत्त्वे धारणाविषयतामुपनीते तत्तत्त्वमूलभूतोत्तरोत्तरैव शक्तिरुपास्या।

ज्ञानक्रियाप्राधान्ये सदाशिवेश्वरौ। परं तद्विषयकतत्त्वाध्वधारणायां क्रमेणेच्छाशक्तिर्ज्ञानशक्तिश्चोपास्ये भवतः। एवमेव विद्यातत्त्वधारणायां तन्मूलभूता भगवतः क्रियाशक्तिरेवोपास्या न विद्याशक्तिः। अनेनैव क्रमेण साधकस्योर्ध्वमूर्ध्वं प्रगतिः सम्भवति।

शुद्धतत्त्वेश्वराः :— ते हि क्रमेण भगवान् अनाश्रितः, सदाशिवभट्टारकः, ईश्वरभट्टारकः, अनन्तनाथः (गहनेशापरनामा) इति।

~ तत्समानान्तराः (प्रमातारः) :— अत्र अनाश्रितः शून्यप्रमाता, सदाशिवो बुद्धिप्रमाता, ईश्वरः प्राणप्रमाता, अनन्ताख्यः शुद्धविद्येश्वरश्च देहप्रमाता। यथा—

"अनाश्रितः शून्यमाता बुद्धिमाता सदाशिवः।।
ईश्वरः प्राणमाता च विद्या देह प्रमातृता।"

(तं०आ०6,43-44)

"अनाश्रयो हि शून्यत्वं ज्ञानमेव हि बुद्धिता।।
विश्वात्मता च प्राणत्वं देहे वेद्यैकतानता।"

(तं०आ०6,44-45)

"शून्यमिति, विश्वोच्छेदात्। ज्ञानमिति सदाशिवस्य ज्ञानशक्तिप्राधान्यात्। 'विश्वात्मतेति' बहिरुन्मेषरूपत्वात्। वेद्यैकतानतेति, तत्रैवाभिष्वङ्गात्।"

(तं०आ०वि०,खं०4/1,पृ०,40)

शुद्धप्रकाशः :— असौ केवलमहमितिविमर्शसारः स्वात्मप्रकाशो यः शिवे वा शिवप्रमातृषु वा स्पन्दते। न हि

ते किमपीदन्तया पश्यन्ति, तेषां केवलमपरिच्छिन्नाहं विमर्शसारत्वात्।

~ अविकल्पः :— **अतद्व्यावृत्तिशून्यश्चित्प्रकाशः। प्रकाशे तद्रूपेऽप्रकाशस्यातद्रूपस्य सम्भावनैव न भवितुमर्हति। ततो न तत्र द्वयाक्षेपी विनिश्चयो यो विकल्पस्य जीवितम्। ततो नासौ विकल्पः। यथा—**

"यस्त्वयं प्रकाशो नाम तस्य स्थाने यः सम्भाव्येत स तावदप्रकाशरूपो न भवति—तुल्यकक्ष्यस्य हि सम्भावनं भवति। न च यत् प्रकाशेन कर्तव्यं तदप्रकाशस्य कदाचिद् दृष्टम्—सम्भावनारोपणादिबलादेव चास्याप्रकाशरूपत्वं विघटेत। अतः प्रकाशतुल्यस्यान्यस्याप्रकाशरूपस्य भेदिनस्तत्तुल्यकक्ष्यस्यापोहनात्मकभेदनव्यापारासहिष्णोरवभासनमेव नास्ति। तदभावे कस्यापोहनम्? अवभाससम्भवेऽपि प्रकाशरूपत्वमेव। न च प्रकाशस्य स्वरूपदेशकालभेदो—येन द्वितीयः प्रकाश एकस्मादपोह्येतेति।"

(ई०प्र०वि०,खं०1,पृ०,242)

शुद्धमात्मतत्त्वम् :— (1) "अहम्" इत्येतन्मात्ररूपतया प्रकाशमानं स्वात्ममात्रविमर्शमयं पूर्णं संवित्तत्त्वम्।

"इत्थं चिदात्मकं सर्वं षट्त्रिंशद्भेदतत्त्वतः।
आदौ शुद्धात्मकं तत्त्वं पञ्चधा तमसः परम्।।
शिवः शक्तिश्च सादाख्यमीशो विद्येति भिद्यते।
अक्षादिशान्तवर्णात्मा निरमायि शिवेन तु।।"

(अ०प्र०पं०,14-15)

अत्र चरमा पंक्तिर्न स्पष्टार्था।

(2) देह प्राणधीप्रभृतिभ्य उत्तीर्णं देहादावात्मताभिमानरहितं शुद्धं संवित्तत्त्वमेवात्मतत्त्वम्। यथा—

"देहाभावेऽपि वै तस्य प्राणधीशून्यगोचरे।
आत्मसंस्कारसद्भावे भवेत्तद्रूपता परम्।
प्राणादावपि तु ध्वस्ते स्वात्मभावे परिस्फुटम्।
सर्वावच्छेदहीनं तदात्मतत्त्वं प्रकाशते।"

(तं०व०धा०1,6-7)

शुद्धविकल्प :— यथार्थं विकल्पात्मकं ज्ञानम्, यथा अहं सर्वत्र, मयि सर्वम्, मत्तः सर्वम् इत्यादि। यथा—

"इति शक्तिचक्रयन्त्रं क्रीडायोगेन वाहयन् देवः।
अहमेव शुद्धरूपः शक्तिमहाभचक्रनायकपदस्थः।।
मय्येव भाति विश्वं दर्पण इव निर्मले घटादीनि।
मत्तः प्रसरति सर्वं स्वप्नविचित्रत्वमिव सुप्तात्।।
अहमेव विश्वरूपः करचरणादिस्वभाव इव देहः।
सर्वस्मिन्नहमेव स्फुरामि भावेषु भास्वरूपमिव।।"

(प०सा०,47-49)

~ तारतम्ययुक्तः :— **तत्र कयोरपि द्वयोः शुद्धविकल्पयोर्मध्येऽपि स्फुटत्वास्फुटत्वयोरल्पत्वाधिकत्वकृताद्वैचित्र्यादस्ति तारतम्यात्मक आरोहक्रमः।**

"अस्फुटादौ विकल्पे च भेदोऽप्यस्त्यान्तरालिकः।"

(तं०आ०4,5)

"तथाहि अस्फुटस्फुटताभाविनोरन्तराले भ्रश्यदस्फुटत्वः, एवमीषत्प्रस्फुटत्वः, अङ्कुरितस्फुटितत्त्वः आसूत्रितस्फुटतरत्वः उद्गच्छत्स्फुटतमत्वश्चेति।"

(तं०आ०वि०,खं०3,पृ०,5-6)

उपलक्षणमेतद् अन्येषां क्रमिकप्रकाराणां सम्भवताम्। तद्यथा-पूर्वं-भ्रंशोन्मुखास्फुटत्वः, ततो भ्रश्यदस्फुटत्वः, ततो भ्रष्टास्फुटत्वस्तत उदयोन्मुखेषत्स्फुटत्वः, उदीयमानेषत्स्फुटत्वः, उदितेषत्स्फुटत्वः इत्यादिरूपा बहुभेदता वेद्या।

~ परम्परात्मकः :— **शिवोऽहं शिवोऽहमित्यादि विकल्पज्ञानं यत् शाक्तोपायाभ्यासे सततगत्या चिरमभ्यस्यते तदेव भावनामयं परम्परारूपं विकल्पज्ञानम्।**

~ बन्धरूपः :— **अशुद्धो विकल्पो लोकव्यवहारात्मकस्तु बन्ध इति नात्र संशयः "शिवोऽहम्" इत्यादि रूपः शुद्धोऽपि विकल्प ईषद्बन्ध एव, विकल्पमात्रस्य बन्धनमध्ये गणितत्वात् परिपूर्णस्य मोक्षस्य च निर्विकल्पस्वात्मदर्शनरूपत्वात्। यथा—**

"परमार्थविकल्पेऽपि नावलीयेत पण्डितः।
को हि भेदो विकल्पस्य शुभेऽवाप्यथवाऽशुभे।।"

उद्धः- (तं०आ०वि०,खं०1,पृ०,57)

~ मोक्षोपायभूतः :— **ननु सर्वो विकल्पः संसार इति कथं विकल्पज्ञानात्मकस्य शाक्तोपायस्य मोक्षफलता। उच्यते शुद्धविकल्पस्याभ्यासेन मायाकृतस्याशुद्धविकल्पस्य द्वैतसंस्कारस्य च क्रमेण क्षयो विधीयते। तेन च शुद्धविकल्पसंस्कारो दार्ढ्यमायाति, येन साधकः सत्ये स्वे शिवत्वे विश्वसिति। यथा—**

"नन्वित्थं परं तत्त्वं विकल्प्यरूपं स्यात्? मैवं विकल्पस्य द्वैताधिवासभङ्गमात्रे चरितार्थत्वात्।"

(तं०सा०,पृ०,22)

शुद्धविद्या :— सर्वत्राहमिदमिति वा, इदमहमिति वा यो भेदाभेदविमर्शोऽसौ शुद्धविद्या। यथा—

"सा भवति शुद्धविद्या
येदन्ताहन्तयोरभेदमतिः।"

(ष०त्रिं०त०सं०,4)

शुद्धविद्यैव सद्विद्या।

द्र०:- (प०प्रा०,पृ०,7) इति।

द्र०:- (ष०त०सं०वि०,पृ०,4) इति च।

~ अभिधानान्तरतः :— **(1) महाविद्या, वागीशी इत्यादीनि नामान्तराणि शुद्धविद्यायाः।**

यथा—

"..... महाविद्या सर्वविद्या भवोद्भवा।।
जगतः प्रलयोत्पत्तिविभूतिनिधिख्यया।
सा एव परमा देवी वागीशीति निगद्यते।।
अष्टवर्गविभिन्ना च विद्या सा मातृकैव तु।"

(स्व०तं०10,1142-1144)

(2) निमेषोन्मेषरूपतया द्विरूपा शुद्धविद्या। यथा—

"प्रथमा दशा निमेषः कथितः शास्त्रेषु चापरोन्मेषः।
उभयत्र वर्तमाना शक्तिर्देवस्य शुद्धविद्याख्या।।"
(स्वा०द०3,7)

तत्र निमेषः सदाशिवदशा, उन्मेषश्चेश्वरदशा।
"ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिवः।"
(ई०प्र०3-1-3)

~ तत्त्वात्मिका :— **मन्त्रेश्वरमन्त्रमहेश्वरयोर्भेदाभेददृष्टिः। सैव तेषां करणस्थानीयं तत्त्वम्।**

द्र०:- **'मन्त्रेश्वराः'** इति।

द्र०:- **'मन्त्रमहेश्वराः'** इति च।

~ तृतीया :— द्र०:- **'शुद्धविद्या'** — विद्येश्वराणाम् इति।

द्र०:- **'महामाया'** इति च।

~ द्विप्रकारा :— **एका तावत् सदाशिवदशोचिता 'अहमिदम्' इति विमर्शमयी, अपरा चेश्वरतत्त्वोचिता 'इदमहम्' इति विमर्शरूपा। उभयथा भेदाभेदविमर्शात्मिका। पूर्वत्राहन्तायाः प्राधान्यं परत्र चेदन्तायाः इत्यनयोर्विशेषः।**

~ विद्येश्वराणाम् :— **स्वतन्त्रबोधमात्रनिष्ठानां विद्येश्वराणां या भेददृष्टिरसावपि शुद्धविद्यैव तृतीये स्तरे। उपरितने स्तरद्वये मन्त्रेश्वराणां तन्त्रमहेश्वराणां च भेदाभेदमयी दृष्टिः शुद्धविद्या।**

"तेन परमेश्वरस्वातन्त्र्योपजीविनी विद्येश्वरशक्तिः शुद्धविद्या।"
(ई०प्र०वि०वि०,खं०3,पृ०,276)

शुद्धविद्यातत्त्वम् :— वेद्यभावदृष्ट्यानुसन्धेयं मन्त्रेश्वर-मन्त्रमहेश्वरयोः करणस्थानीयं तत्त्वम्। द्विप्रकाराणां तेषां शुद्धाशुद्धानां प्रमातृणां या भेदाभेददृष्टिरसौ शुद्धविद्या। मन्त्रमहेश्वराणां मन्त्रेश्वरापेक्षया शुद्धतरा। सदाशिवेश्वर-भट्टारकयोः करणस्थानीयापीयमेव। यथा—

(क) "अथ तदधिष्ठातृदेवताद्वयगतं करणं विद्यातत्त्वमाह।"
(ई०प्र०वि०,खं०2,पृ०,196)

(ख) "वेद्यभावनिष्ठा दशा तत्त्वस्वरूपा तदवभासयितृमन्त्रेश्वरादिशुद्धप्रमातृसंवेद्यवस्तुसारा। या तु तन्निष्ठसंवेदनदशा सा शुद्धविद्या, तत् प्रमातृवर्गाधिष्ठातृत्वं श्री सदाशिवेश्वरभट्टारकरूपता।"
(ई०प्र०वि०,खं०2,पृ०,199)

शुद्धस्पन्दः :— द्र०:- **'स्पन्दः'** इतिं

शुद्धात्मस्थानम् :— अमाख्या सप्तदशी कला।

द्र० **'शिवव्योम'** इति।

शुद्धाध्वप्रमाता :— महामायातत्त्वादारभ्य शिवतत्त्वान्तं ये वर्तन्ते प्रमातारस्ते शुद्धाध्वप्रमातारः।

"समाधिप्रयत्नोपार्जिते तु चित्प्रधानत्वे शुद्धाध्वमातृता क्रमात्क्रमं प्रकर्षवती।"
(प्र०ह०,पृ०,12

शुद्धाध्वसृष्टि :— शिवशक्तिसदाशिवेश्वरशुद्धविद्याख्य-पञ्चतत्त्वमयस्याध्वनः सृष्टिं स्वयं परमेश्वरः स्वेच्छास्पन्दमहिम्ना करोति। अत्रत्यान् तत्त्वेश्वरान्, प्राणिनश्चापि स्वयमेव स्वविलासेन सृजति संहरति च। सैषा तस्य शुद्धाध्वसृष्टिः। यथा—

"शिवः स्वतन्त्रदृग्रूपः पञ्चशक्तिसुनिर्भरः।।
स्वातन्त्र्यभासितभिदा पञ्चधा प्रविभज्यते।
चिदानन्देषणाज्ञानक्रियाणां सुस्फुटत्वतः।।
शिवशक्तिसदेशान विद्याख्यं तत्त्वपञ्चकम्।"
(तं०आ०9,49-51)

शुद्धावरणम् :— ज्ञानक्रियाविभूषितं भुवनं सदाशिवतत्त्वस्थम्। यथा—

"ऐशात् सादाशिवं ज्ञानक्रियायुगलमण्डितम्।।
शुद्धावरणमित्याहुः .....।"
(तं० आ० 8, 357-58)

शुद्धाशुद्धाध्वविभेद :— शुद्धविद्यादिशिवतत्त्वान्तं शुद्धोऽध्वा, मायादिधरान्तं चाशुद्धः। तत्र मन्त्रादिशिवान्ताः प्रमातारः शुद्धाः, सकलादिविज्ञानाकलान्ताः अशुद्धाः। इत्येष शुद्धाशुद्धाध्वविभेदः। आणवमलमेवाशुद्धिबीजम्। तच्च विज्ञानाकलप्रलयाकलसकलाख्येष्वेव प्रमातृषु। मन्त्रप्रमातॄणां स्वात्मविषये न कोऽपि विपर्यासः। ततस्तेषां मायीयमल-वत्त्वेऽपि शुद्धेष्वेव गणना। केचिच्च तान् शुद्धाशुद्धान् मन्यन्ते तथैव मन्त्रेश्वरान् मन्त्रमहेश्वरांश्चेति दृष्टिभेदमात्रमिदं, न पारस्परिको मतभेदः।

~ अपारमार्थिक :— **शिवविलासकलितत्वेनायं भेद आभासरूप एव न पारमार्थिकः इति। यथा—**

"शुद्धाशुद्धविभेदो हि परमार्थकथासु नो।
स तु तत्-कृत एवास्ते मूढानां धियि निश्चलः।।"
(मा०वि०वा०1,105)

शुद्धासंवित् :— विशुद्धाऽपरिच्छिन्नाहम्प्रकाशविमर्श-सामस्यात्मिका परासंविदेव तत्त्वतो विशुद्धा। न हि तस्यामशुद्धतावहस्येदमात्मकस्य प्रमेयभावस्य कश्चनाप्यवभासः। तत्र हि सर्वमपि जगदहमित्यनेनैव रूपेण विलीनमिव तिष्ठति। जडता प्रमेयता ह्यशुद्धिः। नासौ तत्र कथञ्चनापि।

~ अशुद्धाध्वस्रष्ट्री :— **न ह्यस्याशुद्धाध्वमयस्य जडस्यभोगपरस्य च लोकस्य कुतश्चन तत्त्वान्तरात् सृष्टिः सम्भवति। तस्यापि तत्त्वान्तरस्य सृष्टिमूलं यतः शुद्धायाः संविदः एव पारमैश्वर्याख्ये स्वभावे सन्दृष्टः सूरिभिः। ततः स्वानन्दनिर्भरा समुच्छलदानन्दप्रवाहा चासौ शुद्धैव संवित् स्वयमेवाशुद्धमध्वानं स्वात्मनि स्वविलासत एवाभासयति। ततो भोगपरोऽयमज्ञोऽपि लोकस्तत एव सृष्टः संस्तथा तथा व्यवहरति तदिच्छानुसारमेवेति दर्शनं शिवयोगिनाम्। यथा—**

"तर्हि संविदियं शुद्धा स्वभावादेव चेत् कथम्।
अशुचिभ्योऽपि भोगेभ्यो रसात् स्पृहयतेतमाम्।।
.....।
स्वभावादेव संवित्तिः प्रकाशपरमार्थिका।

विश्वावभासयोगेन भातीति हि विपञ्चितम्।।
अतश्च संविदो देव्या विश्वस्मिन् भावमण्डले।
स्वात्मन्येवोच्छलत्त्वं किं खण्डनादापि जायते।।
.....।
.....।।
निम्नं तडागपानीयं कः प्रवर्तयितुं क्षमः।।
परिपूर्णे पुनस्तस्मिन् प्रवाहाः सर्वतोमुखाः।"

(मा०वि०वा०1,238-246)

शुद्धिः :— (1) कालुष्यापगमः। यथा—

"कालुष्यापगमो हि शुद्धिः।"

(तं०सा०,पृ०,129)

द्र०:- **'कालुष्यम्'** इति।

(2) चिदानन्दमयात् स्वात्मनो भिन्नतयावभासितानां भावानां यच्चिदानन्दात्मतयैव पुनः स्वात्मत्वेन साक्षाद् विमर्शनं सैव तेषां शुद्धिः। भेदस्याभेदे निमज्जनमेतत्।

यथा—

"शुद्धिर्बहिष्कृतार्थानां स्वाहन्तायां निमज्जनम्।"

(प०प०,9)

स्वात्मनो भिन्नतयेदन्तया भावानां विमर्शनं तेषामशुद्धिरित्यपि सूचितमत्रेति वेदितव्यम्।

~ अष्टधा :— **क्षित्यादिमूर्त्यष्टके मन्त्रन्यासमहिम्ना मूर्त्यष्टकस्य तदविभागवृत्तेश्च चैतन्यस्य शुद्धिः सञ्जायते।**

यथा—

"क्षितिजलपवनहूताशनाकाशसोमसूर्यात्मरूपासु अष्टासु मूर्तिषु मन्त्रन्यासमहिम्ना परमेश्वररूपतया भावितासु तादात्म्येन च देहे परमेश्वरसमाविष्टे शरीराद्यविभागवृत्तेः चैतन्यस्यापि परमेश्वरसमावेशप्राप्तिः।"

(तं०सा०,पृ०,129-130)

~ (तत्फलम्) :— **अष्टास्वपि मूर्त्तिषु शुद्धतां यातासु फलानि-क्षितिशुद्धौ धृतिः, सलिलशुद्धावाप्यायः, वायुशुद्धौ वीर्यम्, वह्निशुद्धौ मलदाहः आकाशशुद्धौ व्याप्तिः, सोमशुद्धौ सृष्टिसामर्थ्यम्, अर्कशुद्धौ स्थितिसामर्थ्यम्, आत्मशुद्धावभेदः, इत्यष्टसंख्यम् यथा—**

"उक्तं च श्रीमदानन्दादौ—धृतिः, आप्यायो वीर्यं, मलदा- हो व्याप्तिः, सृष्टिसामर्थ्यं, स्थितिसामर्थ्यम्, अभेदश्च, इत्येतानि तेषु मुख्यफलानि—तेषु तेषूपाहितस्य मन्त्रस्य तत्तद्रूपधारित्वात्।"

इत्यादि द्रष्टव्यं विस्तरतः।

(तं०सा०,पृ०,130-131) **इति।**

~ कलादीनाम् :— **परमेश्वराभेदरसोपजनकत्वेन कलादीनां पूजादिकारणभूतानां मोक्षोपायतैव शुद्धिः। उक्तं यथा—**

"कला हि शुद्धा तत्तादृक्कर्मत्वं सम्प्रसूयते।
मितमप्याशु येनास्मात् संसारादेष मुच्यते।।
रागविद्याकालयति प्रकृत्यक्षार्थसंचयः।
इत्थं शुद्धं इति .....।।"

(तं०आ०9,172-173)

शिवाभेदभावनाबलेन कलादीनां शुद्धिः सम्पद्यते। यथा—

"शिवाद्वयमयत्वादेषां शुद्धत्वमपि सम्भवेत्।"

(तं०आ०वि०खं०6,पृ०,133)

"एषा कलादितत्त्वानां सर्वेषामपि भाविनाम्।
शुद्धत्वमस्ति तेषां ये शक्तिपातपवित्रिताः।।"

(तं०आ०9,170)

~ यागसाधनानाम् :— **शिवभावभावनया दृष्टानि यागसाधनानि शुद्धयन्ति। यथा—**

"यच्छिवाद्वयपीयूषसंसिक्तं परमं हि तत्।।
तेनार्घपुष्पगन्धादेरासवस्य पशोरथ।
या शिवाद्वयतादृष्टिः सा शुद्धिः परमीकृतिः।।"

(तं०आ०16,26-27)

~ वास्तविकी :— **परमेश्वरतासमावेश एव वास्तविकी शुद्धिः।**

"स्नानं च शुद्धता उच्यते, शुद्धता च परमेश्वरस्वरूपसमावेशः।"

(तं०सा०,पृ०129)

तेनासौ समावेश एव स्नानमिति तात्पर्यम्।

शुद्धिसाधनम् :— बाह्यशुद्धिः पञ्चगव्यादिनान्तः-शुद्धिर्मन्त्रादिना। यथा—

"पञ्चगव्यं जलं शास्त्रे बाह्याशुद्धिविमर्दकम्।
लौकिक्यामविशुद्धौ हि मृदितायामथान्तरीम्।।
अशुद्धिं दग्धुमास्थेयं मन्त्रादि यदलौकिकम्।"

(तं०आ०15,373-374)

शुद्धिस्नानम् :— ~शाक्तम् :— निर्मला चिदेवेदं जगत्। अहमपि तथाविधा चिदेवेति दृढविश्वासतो या भावना सैव शुद्धिस्नानं शाक्तोपायमयम्। यथा—

"चिन्निर्मला तन्यमं हि जगदस्मि तथाविधः।।
इत्यास्थाजलशौचेन शुद्धिस्नानं तथोदितम्।"

(शि०दृ०7,89-90)

शुद्धोध्वा :— शिवादीनि पञ्च शुद्धतत्त्वानि तत्त्वाध्वधारणोपयोगमार्गत्वेनाध्वेति परिभाष्यमाणानि। यथा—

"तदेवं पञ्चकमिदं शुद्धोऽध्वा परिभाष्यते।"

(तं०आ०9,60)

यथा—

"इयति **(शिवतत्त्वाच्छुद्धविद्यातत्त्वपर्यन्तम्)** च शुद्धस्वातन्त्र्यमेव तत्तद्वैचित्र्येण स्फुरति, इति शुद्धाऽध्वा।"

(ष०त्रिं०तं०सं०वि०,पृ०,4)

~ शिवकर्तृक :— **शिवेन स्वयं सृष्टोऽयमध्वा। यथा—**

"तदेवं पञ्चकमिदं शुद्धोऽध्वा परिभाष्यते।
तत्र साक्षाच्छिवेच्छैव कर्त्र्याभासितभेदिका।।"

(तं०आ०9,60)

"इयति साक्षात् शिवः कर्त्ता। अशुद्धं पुनरध्वानमनन्तापरनामाघोरः सृजति।"

(तं०सा०,पृ०,75)

शुद्धोऽहंप्रत्ययः :— शक्तिक्षेत्रे शुद्धविद्याक्षेत्रे च तत्रत्यानां प्रमातॄणां स्वात्मविमर्शः। स च "अहम्" इति वा "अहमिदम्" इत्यादि वा। यथा—

"उक्तं हि :—द्विविधोऽपिचायम् "अहंप्रत्ययो" द्विधा—अनुभवमात्ररूपश्चानुसन्धानात्मा च, शिवात्मनि "अहमिति" सदाशिवात्मनि 'अहमिदमिति' शुद्धो द्विधा।"

(ई०प्र०वि०,खं०1,पृ०,254-255)

'अहम्' इति खल्वविकल्पानुभवमयः। 'अहमिदम्' इति 'इदमहम्' इति चानुसन्धानात्मा। अहमिदमयो; परस्परमत्रानुसन्धानं यतः। तत्रानुभवरूपः शुद्धतरोऽनुसन्धानरूपापेक्षया।

शुद्धोऽहं विमर्शः :— असावविकल्पोऽहमिति प्रत्यवमर्शो यः परावागात्मकः। यश्च शिवतत्त्व एव स्फुरति। यथा—

"अहं प्रत्यवमर्शो यः प्रकाशात्मपि वाग्वपुः।
नासौ विकल्पः .....।।"

(ई० प्र० 1-6-1)

शुद्ध्यशुद्धी :— संविन्मयता शुद्धिः संविदो भिन्नता चाशुद्धिः। यद्यावत् संविदात्मकतायाः निकटं तत्तत्तावत्तावच्छुद्धं यद्यच्च यावद्यावद्दूरं तत्तत्तावत्तावदशुद्धम्।

यथा—

"तेन यद्यदिहासन्नं संविदश्चिदनुग्रहात्।।
कियतोऽपि तदत्यन्तं योग्यं यागेऽत्र जीववत्।
अनेन नययोगेन यदासत्तिविदूरते।।
संविदेति तदा तत्र योग्यायोग्यत्वमादिशेत्।"

(तं०आ०15,164-166)

~ अनियते :— **यत् कस्मैचिच्छुद्धं त तत् सर्वस्य कृते तथा, यच्च कस्मैचिदशुद्धं न च तदपि सर्वस्य कृते तथा। पुरुषापेक्षयैव भावनां शुद्ध्यशुद्धी। यथा—**

"अत एव शुद्ध्यशुद्धी न नियते, कस्यचिद्धि यदशुद्धं तन्नान्यस्येति।"

(तं०आ०वि०,खं०3,पृ०,271)

~ वीरावलौ :— **स्पष्टमुक्तं तत्र।**

"सर्वेषां वाहको जीवो नास्ति किञ्चिदजीवकम्।
यत्किंचिज्जीवरहितमशुद्धं तद्विजानत।।
तस्माद्यत्संविदो नातिदूरे तच्छुद्धिमावहेत्।"

(उद्ध०:- वीरावलेः)

(तं०आ०4,242-243)

~ व्यवहारे :— **संविदङ्गतां गतं सर्वमशुद्धमपि शुद्धं यथा देहधातवो देहान्तर्गतं च मलमूत्रादि। तदेव संविदः पृथक्कृतमशुद्धम् यथा देहोत्सृष्टं मलमूत्रादि। यथा—**

"मृतदेहेऽथ देहोत्थे या चाशुद्धिः प्रकीर्तिता।
अन्यत्र नेति बुद्ध्यन्तामशुद्धं संविदश्च्युतम्।।
संवित्तादात्म्यमापन्नं सर्वं शुद्धमतः स्थितम्।"

(तं०आ०4,240-241)

शुमशुमायनम् :— नादयोगाभ्यासे श्रूयमाणः शूँ-शूँ इत्याकारो ध्वनिः। ध्वन्यनुकरणपरमेतत् परम्।

यथा—

"भेदयेन्नादसंस्थानं ब्रह्मरब्ध्रं सुदुर्भिदम्।।
भिद्यतो ब्रह्मरन्ध्रस्य शब्दः शुमशुमायते।"

(स्व०तं०4,381-82)

शून्यता :— ~ उपास्तौ :— प्रमाणप्रमेयात्मकभाववर्गरहितता प्रमातृसंविदः, न पुनरभावरूपता।

तदुक्तम्—

"अशून्यं शून्यमित्युक्तं शून्यं चाभाव उच्यते।
अभावः स समुद्दिष्टो यत्र भावाः क्षयं गताः।।"

(स्व०तं०4,292-293)

~ तत्तारतम्यम् :— **विशेषतः शून्यत्वं रुद्रावस्थायां संवेद्यं भवति।**

स्पष्टीकृतं यथा—

"शालिबीजं हि पलालतण्डुलकणमात्रपूर्णम्, न्यग्रोधबीजादेरन्तः कृतानन्तशाखापल्लवस्कन्धादेर्महाबीजात् परिमितमेव। एवं संसारिणि क्रमविकासो यावत् सर्वज्ञेषु विकासतारतम्येन, परमो विकासो रुद्रभुवि शून्यस्य।"

(ई०प्र०वि०वि०,खं०3,पृ०,378)

~ तत्प्रपञ्च :— **शरीरप्राणकरणादिरहितं संकुचितं चित्तत्वं शून्यम्। तच्च प्राणबुद्ध्यादेर्वेदकम्। तस्य प्राणाद्यभावस्यापि यद् वेदकं चित्तत्त्वं तदपरं सूक्ष्मतरं शून्यम्। ततोऽपि भेदमलहानितारतम्येन शून्यान्तराणि योगिनः साक्षात् कुर्वन्ति। यत् पार्यन्तिकं शून्यं तदेव शुद्धप्रमातृरूपम्। एतदुक्तं यथा—**

"समस्तशरीरप्राणाधीप्रभृतिभावनिषेधोपाधिसंकुचितंचितत्वं तस्य प्राणबुद्ध्यादेर्वेदकं भवति। अयं प्राणाद्यभाव इत्यपि साक्षात्कारे तद्वेद्यरूपाभावनिषेधात्मकं शून्यान्तरमेव तदपेक्षया विकसितमिव प्रमात्री भवति। तत्रापि विकसिततरमित्यादिक्रमेण महाशून्यभागमेषु शून्यातिशून्यशब्दवाच्यं पार्यन्तिकं प्रमातृरूपमुल्लसति।"

(ई०प्र०वि०वि०,खं०2,पृ०,63)

~ तत्साक्षात्कार :— **नेति-नेति विमर्शेन प्रपञ्चमपलपन्तो**

योगिनः स्वकीयं जीवचैतन्यमात्रं साक्षात्कुर्वन्ति। यथा—

"तदेव शून्यरूपत्वं संविदः परिगीयते।
नेति नेति विमर्शेन योगिनां सा परा दशा।।"
(तं०आ०6,10)

"शून्यता भावप्रक्षयात्मकं निष्कलरूपम्।"
(तं०आ०वि०,खं०2,पृ०,202)

~ दार्शनिकदृष्ट्या :— **(1) प्रमेयाभासरहिता प्रमाणव्यापारविहीना च केवला या परिमितप्रमातुः स्वसत्ता सुषुप्तौ प्रकाशमानाऽसौ शैवदर्शने शून्यतेत्युक्ता। अत एव हि तथाविधां शून्यतामेवात्मत्वेनाभिमन्वानाः पशुप्रमातारः शून्यप्रमातार इत्युच्यन्ते।**

यथा—

द्र०:- **'शून्यम्'** जीवरूपम्

शून्यद्वयम् :— ~ बीजवर्णत्वे— **विसर्गः। उक्तो यथा—**

"शून्यद्वयं विसर्गः।"
(तं०आ०वि०,खं०12,पृ०,197)

शून्यपरम्परा :— निर्दिष्टा यथा—

"तथाहि देहाभावरूपं शून्यं देहातीतब्रह्मरन्ध्रोर्ध्वशून्यप्रमातृभावेन विषयीक्रियते, महाविदेहधारणासमापत्तौ पुनस्तदूर्ध्वं शून्यं प्राणाभावरूपं द्वादशान्तोपलक्षितेन शून्येन, तदपि परतरेणेत्येवं तारतम्यभेदेन मायापदेऽनवस्थैव सृज्यमानशून्यानां पर्यन्तस्यालाभात्।

.....
.....

इति शुद्धसंविदेव परमार्थतः सर्वत्र ग्राहिका।"
(ई०प्र०वि०वि०,खं०3,पृ०,371)

अपरथापि वर्णिता।

यथा—

"..... शून्यभावस्त्वथोच्यते।
ऊर्ध्वशून्यमधः शून्यं मध्यशून्यं तृतीयकम्।
शून्यत्रयं चलं ह्येतत्तदधो मध्य उर्ध्वतः।।
चतुर्थं व्यापिनीशून्यं समनायां च पञ्चमम्।
उन्मनायां तथा षष्ठं षडेते सामयाः स्थिताः।।
तत्त्वेनाधिष्ठिताः सर्वे सामया अपि सिद्धिदाः।
षट् शून्यानि परित्यज्य सप्तमे तु लयं कुरु।।
तच्छून्यं तु परं सूक्ष्मं सर्वावस्थाविवर्जितम्।
अशून्यं शून्यमित्युक्तं शून्यं चाभाव उच्यते।।
अभावः स समुद्दिष्टो यत्र भावाः क्षयं गताः।
सत्तामात्रं परं शान्तं तत्पदं किमपि स्थितम्।।
यत्र यत्र च नादादिस्थूला अन्येऽपि संस्थिताः।
तत्र तत्र परं शून्यं सर्वं व्याप्य व्यवस्थितम्।।
तदेव भवति स्थूलं स्थूलोपाधिवशात्प्रिये।
स्थूलसूक्ष्मप्रभेदेन तदेकं संव्यवस्थितम्।।
तत्प्राप्य तन्मयत्वं च लभते नात्र संशयः।
शून्यभावः समाख्यातः .....।"
(स्व०तं०4,288-96)

शून्यप्रमाता :— (1) प्रमाणप्रमेयादिरहिते जीवसंविन्मात्रे योऽहम्भावाभिमानोऽसौ शून्येऽहम्भावः, तदाश्रयश्च प्रमाता शून्यप्रमाता यः सुषुप्ति-मद-मूर्छाद्यवस्थासु प्रलयाकलत्वे वा चकास्ति। यथा—

"सुषुप्ते प्रलये वाऽभावसमाधौ च यद् व्योमकल्पमनात्मरूपमिवाभाति, तदनुस्मर्यमाणत्वेन वेद्यं सदहमित्यात्मत्वेन स्वातन्त्र्येणाभिनिविश्यते।"
(ई०प्र०वि०वि०,खं०3,पृ०,280)

(2) आणवमलकृतसङ्कोचयुक्तश्चिदात्मा। सौषुप्तावस्थः प्रमाता। यथा—

"अपरे तु तस्यापि (प्राणस्यापि) योगिदशायां वेद्यभावादपरत्वं मन्यमानाः, असंवेद्यपर्वरूपं यन्न किञ्चिद्रूपं सकलवेद्यराशिविनिर्मुक्तं शून्यत्वान्नभस्तुल्यं न तु महाभूताकाशस्वभावं प्रमातृतत्त्वं शून्यब्रह्मवादिनः सांख्यप्रभृतय आहुः।"
(ई०प्र०वि०,खं०1,पृ०,252)

(3) संकोचपरिच्छिन्नमात्मतत्त्वम्। जीवत्वाभिमानमयोऽहमिति विमर्शः। सुषुप्तेः साक्षिणी जीवसंवित्। यथा—

"सुषुप्ते प्रलये 'न' इत्यभावसमाधौ च तावच्छून्यमाकाशकल्पमनात्मरूपं वेद्यभावोचितम् 'अहम्' इत्यात्मत्वेन वीक्ष्यते।"
(ई०प्र०वि०,खं०2,पृ०,204-205)

(4) कार्यकरणतत्त्वानामवान्तरप्रलयकाले वा गाढनिद्रायां वा मुर्च्छायां वा, मदोन्मादादौ वा, समाधौ वा, प्राणिना यत्र, केवले निजे पुरुषतत्त्वे स्थीयते, भावान्तराणां देहबुद्ध्यादीनां चावभासाः यत्र विलीयन्ते, केवलमाणवमलसंकुचितो मायीयः प्रमाता स्वात्मानमेव संवेत्त्यहमिति सा प्रगाढा सुषुप्त्यवस्था। तस्या अभिमानी यः प्रमाता स एव करणकार्यशून्यः सन् शून्य इत्युच्यते। तेन देहबुद्धिप्राणेभ्य उत्तीर्ण मायीयः प्रमाता शून्यः। स च मायया सङ्कुचितश्चिन्मात्ररूपोऽहमिति मित एव प्रमाता नापरिमितः। यथा—

"स एवोत्तरभागान्तरासङ्कीर्णो यदा विश्राम्यति तदनुदयाद्वा तत्प्रध्वंसाद्वा प्रलय इव, तदनादरणाद्वा निद्रा समाधिमूर्च्छादाविव ..... तदा सैवावस्था ..... 'शून्य' इत्युच्यते।"
(ई०प्र०वि०खं०2,पृ०,234)

"महाप्रकाशाच्च न व्यतिरेकं किञ्चिदपि सहते, इति नूनं महाप्रकाशेन सङ्कोच आत्मनि निर्भासनीयः, संविदो वस्तुनाञ्चान्योन्यसंकोचनप्राणो नञर्थरूयोऽसौ शून्य इत्युच्यते। संकोचावभास एव च मायीयप्रमातुरुत्थानम्। अत एकया सृष्टिशक्त्या प्रमातृ-प्रमाण-प्रमेयोल्लासः परमार्थतः।"
(ई०प्र०वि०,खं०2,पृ०,65-66)

यथा—

"संकोचप्राधान्ये तु शून्यादिप्रमातृता।"
(प्र०ह०,पृ०,12)

शून्यम् :— ~ अणुरूपम् :— **(1) आणवमल-कृतसंकोचयुतमहमिति प्रमाणप्रमेयस्पर्शरहितं शुद्धं संविन्मात्रमेव शून्यम्, नाभावरूपम् जीवचैतन्यम्। यथा—**

"संविन्मात्रं हि यच्छुद्धं प्रकाशपरमार्थकम्।
तन्मेयमात्मनः प्रोज्झ्य विविक्तं भासते नभः।।
तदेव शून्यरूपत्वं संविदः परिगीयते।"

(तं०आ०6,9-10)

"अपरे तु तस्याः **(बुद्धेः)** अपि योगिदशायां वेद्यभावादपरत्वं मन्यमानाः असंवेद्यपर्वरूपं यन्न किञ्चिद्रूपं सकलवेद्यराशि-विनिर्मुक्तं शून्यत्वान्नभस्तुल्यं न तु महाभूताकाशस्वभावं प्रमातृतत्त्वं शून्यब्रह्मवादिनः सांख्यप्रभृतय आहुः।"

(ई०प्र०वि०,खं०1,पृ०,252)

(2) चिदात्माबोध एव संकोचसम्भिन्नः सन् शून्यमित्युच्यते। यथा—

"बोध एव सङ्कुचितः शून्यमिति बोधरूपत्वात् का वेद्यता?"

(ई०प्र०वि०वि०,खं०3,पृ०,333)

"यतो बोधमात्रमेव सङ्कुचितं शून्यमुक्तम्, शून्यरूपता तु न स्फुटवेद्यरूपा।"

(ई०प्र०वि०वि०,खं०3,पृ०,333)

(3) देहप्राणबुद्ध्याद्यभावात्मकं संकुचिताहं संविन्मयं प्रमातृतत्त्वं शून्यम्।

"अर्वाग्दृशां हि न शून्यं साक्षात्कारभूमिरिति स्फुटभावेन, अपि तु समस्तशब्दादिवेद्यविनिर्मुक्तं नेति नेति ब्रह्मवादिदृष्ट्या यदुपकल्पितं तत् विकल्पविज्ञाने युक्त्यागमादि प्रभवे चकास्ति।"

(ई०प्र०वि०वि०,खं०3,पृ०,371)

"तच्च शून्यं संविन्मात्ररूपं च सङ्कोचाधिकं चेत्युभयं दर्शयति।"

(तदेव,पृ०,377)

(4) प्रमाणप्रमेयादिप्रपञ्चोत्तीर्णं सङ्कुचितं संवित्तत्त्वं, पुरुषतत्त्वाभिधानम्। यथा—

"भेदवादिनामिव संवितत्त्वं समस्ताद् विश्वराशेः सङ्कुचितमिव नित्यम्। सङ्कोचादेव शून्यशब्दवाच्यं विश्वानवभासं संहारतमः प्रधानेन मायायाः पदे रुद्रनाथेनाधिष्ठितम्।"

(ई०प्र०वि०वि०,खं०3,पृ०,374)

"संकोचमात्ररूपं चित्तत्वं शून्यम्, भूतलं, यथा धटाभावः, संकोचोपरि वेद्यांशच्छायाच्छुरितं तु चित्तत्त्वमेव बुद्धिप्राणदेहादि।"

(ई०प्र०वि०,खं०1,पृ०,252-253)

(5) व्यापिनीशक्तेः पदम्।

यथा—

"शून्यमनाश्रितभट्टारकान्ताशेषविश्वावभासप्रशमाभावाव-भासात्मकव्यापिनीपदम् .....।"

(स्व०तं०उ०11,पृ०,7)

~ अनालम्बनम् :— **देहप्राणबुद्ध्यस्त्वाणवोपाये विकल्पज्ञानाभ्यासस्यालम्बनतामुपयान्ति परं न शून्यं तस्यालम्बनम् तस्य विकल्पात्मकभावनाविषयतोपगमाभावात्। यथा—**

"बुद्धिप्राणशरीरेषु पारमेश्वर्यमञ्जसा।
विकल्प्यं शून्यरूपे न प्रमातरि विकल्पनम्।"

(तं०आ०5,16-17)

~ द्विस्वभावम् :— **एकः स्वभावः संविन्मात्ररूपत्वं प्रमेयप्रमाणादिकथाराहित्यम्, अपरश्च सङ्कोचसम्भिन्नत्वं येन परमेश्वरताहानिः। सूचितमेतद् यथा—**

"तच्च शून्यं संविन्मात्ररूपं च, सङ्कोचादिकं चेत्युभयं दर्शयति।"

(ई०प्र०वि०वि०,खं०3,पृ०,377)

~ परोक्तम् :—

"सर्वालम्बनधर्मैश्च सर्वतत्त्वैरशेषतः।
सर्वक्लेशाशयैः शून्यं न शून्यं परमार्थतः।
इति नागार्जुनोक्तमीदृशं तच्छून्यमिति।"

(स्पं०नि०,पृ०,27)

"सावस्था काप्यविज्ञेया मादृशां शून्यतोच्यते।
न पुनर्लोकरुढ्येव नास्तिक्यार्थानुपातिनी।।
इत्यालोकमालायामुक्तम् .....।"

(तदेव,पृ०,28)

द्र०:- (स्पं०नि०,पृ०,29,म०न०प्र०वि०,पृ०,5 **इति।**

~ प्रमेयम् :— **प्रमेयपदवीमवतरति शून्यम्। यथा—**

"शून्यादिर्हि वेद्यत्वेन स्फुरति उपाधिभावात्, संविदंशोऽपि वेद्यच्छायाच्छुरित एव।"

(ई०प्र०वि०वि०खं०3,पृ०,314)

~ साक्षात्कार्यम् :— **योगिनामस्य शून्याख्यस्य प्रमातृतत्त्वस्य साक्षात्कारो जायते एव। यथा—**

"अथात्र शून्यप्रमातरि साक्षात्कारात्मकं संवेदनं किं न सम्भवत्येव। सम्भवति चेत्याह योगिष्विति। प्राणबुद्ध्यादि साक्षात्कारानन्तरं भावनाप्रभवेण ज्ञानेन ये शून्यमपि विषयीकर्तुमुद्यतास्ते शून्यान्तरे तद्वेद्यशून्यापेक्षया विततबद्धप्रमातृभावा भवन्ति।"

(ई०प्र०वि०वि०,खं०3,पृ०,371)

शून्यम् :— ~ उपास्यम् :— **सर्वथा प्रपञ्चरहितं परतरं तत्त्वम् कल्पितप्रपञ्चेन सर्वथा रहितं तत्त्वम्। परं तदेव समस्तकल्पितप्रपञ्चावभासस्य मूलकारणमवभासकं च। ततः सर्वं तदात्मकमेवेति। इत्येतदन्तरं बौद्ध-शैव-शून्ययोः परस्परम्। यथा—**

"अशून्यं शून्यमित्युक्तं शून्यं चाभाव उच्यते।।
अभावः स समुद्दिष्टो यत्र भावाः क्षयं गताः।
सत्तामात्रं परं शान्तं तत्पदं किमपिस्थितम्।।
यत्र यत्र च नादादिस्थूला अन्येऽपि संस्थिताः।
तत्र तत्र परं शून्यं सर्वं व्याप्य व्यवस्थितम्।।"

(स्व०तं०प०4,292-94)

~ अध :— **शान्तं हृदयक्षेत्रम्। यथा—**
"अधः शून्यमनुल्लसितप्रपञ्चं हृत्क्षेत्रम्।"
(स्व०तं०उ०खं०2,पृ०,185)

~ ऊर्ध्वम् :— **समस्तपाशप्रशमभूस्वरूपं शाक्तं पदम्। यथा—**
"ऊर्ध्वशून्यमत्र नादान्तान्तनिः शेष-पाशप्रशमभूः शक्तिपदम्।"
(स्व०तं०उ०,खं०2,पृ०,185)

~ चतुर्थम् :— **व्यापिनीशक्तिरूपम्। यथा—**
"चतुर्थं व्यापिनीशून्यं।"
(स्व०तं०प०4,290)

~ पञ्चमम् :— **समनात्मकं शून्यम्। यथा—**
"समनायां च पञ्चम्।"
(स्वं०तं०प०4,290)

~ मध्यम् :— **कण्ठतालुभ्रूमध्यादिचक्रजातम्। यथा—**
"मध्यशून्यं तु क्रमेणाधस्तनप्रमेयप्रशमात्मकं।
कण्ठतालुभ्रूमध्यललाटमूर्धरन्ध्रात्मकम्।"
(स्वं०तं०उ०,खं०2,पृ०,185)

~ व्यापिनीरूपम् :— **चतुर्थं शून्यं। यथा—**
"चतुर्थं व्यापिनीशून्यम्।"
(स्व०तं०प०4,पृ०,290)

~ षष्ठम् :— **उन्मनात्मकं शून्यम्। यथा—**
"उन्मनायां तथा षष्ठम्।"
(स्व०तं०पं०4,290)

~ सप्तमम् :— **षड्भ्योऽपि शून्येभ्य उत्तीर्णं सप्तमं परशिवात्मकंशून्यम्। यथा—**
"षट् शून्यानि परित्यज्य सप्तमे तु लयं कुरु।
तच्छून्यं तु परं सूक्ष्मं सर्वावस्थाविवर्जितम्।।"
(स्वं०तं०प०4,291-292)

~ सप्तस्तरकम् :— **ऊर्ध्वशून्यादिभूमिकाः षट् तदुत्तीर्णं च शिवशून्यम्। इत्येवं सप्तस्तरकं शून्यं शैवे साधनाक्रमे।**
द्र०:- **'शून्यपरम्परा'** इति।

~ समनात्मकम् :— **पञ्चमं शून्यम्। यथा—**
"समनायां च पञ्चमम्।"
(स्व०तं०पं०4,290)

~ सामयम् :— **षट्प्रकारकमपि ह्युन्मनान्तं यच्छून्यजातं तत् सर्वं सामयम् आमयेनाणवाख्येन मलरूपेण रोगेण युतम्। यथा—**
"षडेते सामयाः स्थिताः।"
(स्व०तं०प०4,290)
"आमयपदेनात्र हेयत्वमुपलक्ष्यते।"
(स्व०तं०उ०खं०2,पृ०,186)

शून्यषट्कम् :— ऊर्ध्वशून्याद्याः षट्साक्षात्कृत्य हेयाः सप्तमे शिवशून्ये प्रवेशार्थम्।
द्र०:- **'शून्यपरम्परा'** इति।

शून्यसप्तकम् :— उपास्यानि षट्शून्यानि, उपेयं च शिवशून्यं सप्तमम्।
द्र०:- **'शून्यपरम्परा'** इति।

शून्यातिशून्यम् :— मायीयात् प्रपञ्चादुत्तीर्णं शिवशून्यम्। विगलितप्रमाणप्रमेयप्रपञ्चा शुद्धा चिन्मयी स्थितिः।
द्र०:- **'महाशून्यम्'** इति।

शून्यात्मवादिन :— सांख्यप्रभृतयः।
"अपरे तु तस्यापि योगिदशायां वेद्यभावादपरत्वं मन्यमानाः असंवेद्यपर्वरूपं यन्न किञ्चिद्रूपं सकलवेद्यराशिविनिर्मुक्तं शून्यत्वान्नभस्तुल्यं न तु महाभूताकाशस्वभावं प्रमातृतत्त्वं शून्यब्रह्मवादिनः सांख्यप्रभृतय आहुः।"
(ई०प्र०वि०,खं०1,पृ०,252)

शून्येऽहन्ता :— द्र०:- **'शून्यप्रमाता'** इति।

शूरः :— क्षेमराजस्य शिष्यः कोऽपि। यथा—
"रुद्रशक्तिसमावेशशालिनः शिवरूपिणः।।
शूरनाम्नः स्वशिष्यस्य प्रार्थनातिरसेन तत्।
निर्णीतं क्षेमराजेन स्फारान्निजगुरोर्गुरोः।।"
(स्पं०नि०,पृ०,77)

शूलदण्डः :— लोकपालमन्त्रो द्वितीयः न स्पष्टीकृतो जयरथेन।
(तं०आ०वि०,खं०12,2पृ०,201)
द्र०:- **'दिक्पालमन्त्राः'** इति।

शूलम् :— (1) इच्छाज्ञानक्रियाशक्तयः।
(2) औकाररूपो वर्णः। यथा—
"शूलम्-इच्छादिशक्तित्रयमौकारश्च।
(तं०आ०वि०,खं०3,पृ०,365)
शूलमौ।
(तं०आ०वि०,खं०12,पृ०,212)
परमन्यत्र शूलं जः इत्युक्तम्।
(2) जकारः।
"शूलं जः।"
(तं०आ०वि०,खं०12,पृ०,203)
परमन्यत्र शूलमौ इत्युक्तम्।
(3) हृदयस्थनाडीत्रयं ग्रन्थिद्वादशकम्। यथा—
(1) "हृत्स्थस्य नाडित्रयात्मनः शूलस्य ग्रन्थिद्वादशकस्य"
(2) ब्रह्मरन्ध्रोपरिवर्तिनः शक्त्याद्यात्मनः शूलस्य च।
(तं०आ०वि०,खं०12,पृ०,324)

शूलमूला :— परस्याः खेचर्याः नामान्तरम्। यथा—
"यदियं परा खेचरी योन्याधारेति विख्याता तत उदिता सती शूलमूलेति शब्द्यते।"
(तं०आ०वि०,खं०12,पृ०,322)

शूलशृङ्गम् :— न स्पष्टीकृतं-तद्यथाः —
"शूलशृङ्गेषु च-सबिन्दुदण्डं शूलम्।"
(तं०आ०वि०,खं०12,पृ०,178)

शूलाब्जम् :— (1) मण्डलविशेषः सिद्धातन्त्रोक्तः। यथा—

"व्योमेशस्वस्तिकमभिधाय श्रीसिद्धातन्त्रोक्तमपि शूलाब्जमभिधत्ते।"

(तं०आ०वि०,खं०12,पृ०,297)

(2) स च मालिनीविजयोत्तरे, त्रिशिरोभैरवे, सिद्धातन्त्रे, त्रिककुले, देवीयामले, त्रिकसारे, तन्त्रसद्भावे, गुह्ययोगिनी तन्त्रे च प्रतिपादितः।

अथ शूलाब्जविन्यासः श्रीपूर्वे त्रिशिरोमते।
सिद्धातन्त्रे त्रिककुले देव्यायामलमालयोः।।
यथोक्तः सारशास्त्रे च तन्त्रसद्भावगुह्ययोः।

(तं०आ०31,60-61)

देव्यायामलमालयोरिति पदसन्दर्भः संशयितार्थः एव। सारशास्त्रमिति त्रिकसारनामकं शास्त्रमन्यत्र कथितं जयरथेन।

शूलाम्बुजम् :— इच्छाज्ञानक्रियाशक्तिसङ्घट्टः।

"इत्थमिच्छाकलाज्ञानशक्तिशूलाम्बुजाश्रितः।
भैरवः सर्वभावानां स्वभावः परिशील्यते।।"

(बो०पं०द०,15)

शूलारः :— जूं इति।

"शूलारवाचकं जूंकारम्।"

(तं०आ०वि०,खं०12,पृ०,178)

शृङ्गम् :— न स्पष्टीकृतं टीकाकृता। पूर्वपश्चिममुखा समारेखा, मण्डले। यथा—

"पार्श्वशृङ्गद्वयवर्तनामभिधाय मध्यशृङ्गवर्तनामप्याह।"

(तं०आ०वि०,खं०12,पृ०,234)

शृङ्गवर्तना :— शृङ्गलेखनप्रक्रिया।

शृङ्गाटकम् :— एकारस्यैव त्रिकोणात्मनः शृङ्गाटकम् इति रहस्यशास्त्रे संज्ञा। यथा—

"त्रिकोणमेकादशमं वह्निगेहं च योनिकम्।
शृगारं चैव एकारं नामभिः परिकीर्तितम्।।"

उद्धः- (तं०आ०वि०,खं०2,पृ०,103)

शृङ्गारः :— दाशीराजानकपुत्रः सुभटदत्तस्य गुरुः जयरथस्य च परमगुरुः। यथा—

"अप्यस्य राजतन्त्रे चिन्तयतो राजतन्त्रमास्त गुरुः।
दाशीराजानकजन्मा श्री शृङ्गारो ममापि परमगुरुः।।"

(तं०आ०वि०,खं०12,पृ०,433)

अस्येति जयरथपितुः शृङ्गाररथस्य।

शेषमहामुनिः :— पतञ्जलिः। यथा—

"यत् प्रातिभाद्वा सर्वं चेत्यूचे शेषमहामुनिः।"

(तं०आ०13,146)

शेषवर्तनम् :— संवृत्तायां दीक्षायामाजीवनमनुष्ठेयाः क्रियाकलापाः व्यवहाराश्च शेषवर्तनमिति समाख्याताः। अनुशासन विशेषाः शिवमार्गे दीक्षितस्य कृते। यथा—

"तत्र या दीक्षा संस्कारसिद्धयै ज्ञानयोग्यान् प्रति या च तदशक्तान् प्रति मोक्षदीक्षा सबीजा, तस्यां कृतायामाजीवं शेषवर्तनं गुरुरुपदिशेत्।"

(तं०सा०,प्र०,178)

द्र०:- 'शेषवृत्तिः' इति।

~ तत्प्रकाराः :— शेषवर्तनं त्रिप्रकारकम्, तच्च नित्यं, नैमित्तिकं, काम्यं चेति। यथा—

"तत्र नित्यं, नैमित्तिकं, काम्यमिति त्रिविधं शेषवर्तनम्।"

(तं०सा०,पृ०,178)

~ तत्प्रयोजनम् :— विघ्न निवारणपुरः सरं शिवैक्यपदावाप्तिः। यथा—

"दीक्षया ये पुत्रकादयो दीक्षितास्तेषामाजीवं वृत्तिर्वक्तव्या येनैषां निर्विघ्नमेव संविदैकात्म्यं सिद्ध्येत्।"

(तं०आ०वि०,खं०1,पृ०,330)

"ततः स संस्कृतं योग्यं ज्ञात्वात्मानं स्वशासने।
तदुक्तवस्त्वनुष्ठानं भुक्त्यै मुक्त्यै च सेवते।।
आचार्यप्रत्ययादेव योऽपि स्याद्भुक्तिमुक्तिभाक्।
तत्प्रत्यूहोदयध्वस्त्यै ब्रूयात्तस्यापि वर्तनम्।।
स्वसंविद्गुरुसंवित्योस्तुल्यप्रत्ययभागपि।
शेषवृत्त्या समादेश्यस्तद्विघ्नादिप्रशान्तये।।

(तं०आ०26,6-8)

~ तद्विषयाः :— नित्यानि नैमित्तिकानि च कर्मादीनि शेषवृत्त्यङ्गानि, न काम्यानि। यथा—

"तत्रैषां शेषवृत्त्यर्थं नित्यनैमित्तिके ध्रुवे।
काम्यवर्जं यतः कामाश्चित्राश्चित्राभ्युपायकाः।।"

(तं०आ०26,11)

~ नित्यम् :— सम्यक् सफलतया चाभ्यस्ततत्तदुपायैः साधकैः स्वरूपलाभानन्तरमाजीवनं कर्तव्यं कर्मजातं परिपालनीयं स समयजातं शेष वर्तनम्।

द्र०:- 'नित्यं कर्म' इति।

शेषवृत्तिः :— अनुशासनविशेषप्रपञ्चः। दीक्षान्तरमाजीवनं पालनीयाः अनुशासननियमाः। यथा—

"अथोच्यते शेषवृत्तिर्जीवतामुपयोगिनी।।"

(तं०आ०26,1)

~ अनुपाये :— अनुपाययोगनिष्ठस्येयतीव शेषवृत्तिर्यत्पात्रभूतेषु साधकेष्वनुग्रहकरणम्। कदाचित्ते कारुण्यप्रेरिताः सन्तः समलसंविदोऽपि साधकाननुगृह्णन्ति। तेऽपि वस्तुतः पात्रभूता एव, शिवेनकृतादनुग्रहादिति वेदितव्यम्, अन्यथा कथमस्य तादृशी करुणा तेषु समुदिता भवेत्।

~ ज्ञानिनः :— लोकोपकारमात्रं हि साक्षात्कृततत्त्वेन कर्तव्यं भवति, नान्यन्नित्यनैमित्तिककर्मयोगादि। प्रायशो लोकोपकारप्रवृत्तोऽसौ शास्त्रनिर्माणसाधनोपदेशादि करोति। यथा—

"परमेश्वरप्रसादादेव लब्धात्यन्तदुर्लभतद्दास्यलक्ष्मीरहमेकाकिसम्पदा लज्जमानो जनसमीपमखिलं स्वस्वामिनं वक्ष्यमाणोपायेन

प्रत्यभिज्ञापयामि येन तस्यापि परमार्थलाभेन परितुष्येयम्।"
(ई०प्र०वृ०,पृ०,1)

परं नैष नियमः, तीव्रतीव्रशक्तिपातभाजां सद्यो मुक्तिलाभदर्शनात्।

~ तदधिकारिणः :— संस्कारमात्रप्रयोजनया दीक्षया, सबीजया च दीक्षया दीक्षितैः शिष्यैः शेषवर्तनमवश्यं पालनीयं भवति। सबीजा दीक्षासंसृतिबीजानि सद्यो न निर्मूलयति, क्रमश एव परिपूर्णमुक्तिपदवीमारोपयति। यथा—

"तत्र संस्कारसिद्धये या दीक्षा साक्षान्न मोचनी।
अनुसंधिवशाद्या च साक्षान्मोक्त्री सबीजिका।।
तपोभय्या दीक्षिता ये तेषामाजीववर्तनम्।
वक्तव्यं पुत्रकादीनां तन्मयत्वप्रसिद्धये।।"
(तं०आ०12,3-4)

~ तदपेक्षारहिता :— सांसिद्धिकज्ञानवन्तो निर्बीजदीक्षाश्च शिष्याः शेषवृत्तिं नापेक्षन्ते। यथा—

"यः सर्वथा परापेक्षामुज्झित्वा तु स्थितो निजात्।
प्रत्ययाद्योऽपि चाचार्यप्रत्ययादेव केवलात्।।
तौ सांसिद्धिकनिर्बीजौ को वदेच्छेषवृत्तये।
(तं०आ०26,9-10)

शैवदर्शनम् :— शिवोक्तेष्वागमेषूपदिष्टं दर्शनशास्त्रम्। तच्च बहुशाखम तत्र दक्षिणे—

(1) भेददृष्टिप्रधानं पाशुपतशैवं, शिवतुल्यताप्रापकम्।

(2) भेददृष्टिप्रधानमेव सिद्धान्तशैवं, शिवभोगप्रदम्, शिवसालोक्यसामीप्य प्रापकम्, तमिलदेशे प्रवृद्धम्।

(3) भेदाभेददृष्टिप्रधानं श्रीकण्ठप्रवर्तितमभेद-परिणामवादप्रधानम्, शिवसायुज्यप्रदम्। एतच्च शिवविशिष्टा-द्वैतमित्यप्युच्यते। एतदपि सुदूरे दक्षिणदेशे विकसितम्।

(4) सामरस्यप्रदं लिङ्गायतधर्मोपदेशकं वीरशैवम्। कर्णाटकदेशे जनसाधरणस्य धर्मतया प्रथितमिदम्।

उत्तरे :— (5) त्र्यम्बकादित्येन पुत्रद्वारा प्रवर्तितं पराद्वैतपरं दर्शनम्। कश्मीरेष्विदं विकासमुपयातं सदिदानीं "काश्मीरशैवदर्शनम्" इत्येवं भूतामाख्यां प्राप्तम्। त्र्यम्बकमठिकादर्शनम्।

(6) त्र्यम्बकादित्येन दुहितृद्वारा प्रवर्तितमर्द्धत्र्यम्बकाख्यं पराद्वैतप्रधानं दर्शनं पुरा जालन्धरपीठे प्रवृद्धं सदिदानीं लुप्तप्रायमेवं। अर्धत्र्यम्बकमठिकादर्शनम्।

(7) अमर्दकनाथेन प्रवर्तितं द्वैतदृष्टिपरं मन्त्रपदवीप्रापकं दर्शनं पूर्वं कश्मीरेषु प्रवृद्धं सदिदानीं लुप्तमेव। आमर्दकठिकादर्शनम्।

(8) श्रीनाथाख्येन सिद्धेन प्रवर्तितं भेदाभेददृष्टिप्रवणं मन्त्रेश्वर-मन्त्रमहेश्वर-पदवीप्रापकं दर्शनं पूर्वं कश्मीरेषु प्रथितं सदिदानीं नामशेषमेव। श्रीनाथमठिकादर्शनम्।

(9) गोरक्षदर्शनम्- गोरखनाथाख्येन सिद्धेन प्रवर्तितं सदिदानीमपि नेपालदेशे, उत्तरभारते, गूर्जरमहाराष्ट्रदेशयोः, पाकिस्ताने अफगानिस्ताने, बल्लोचिस्ताने च कनफटाख्य-योगिजनेषु प्रवर्तमानमेव। अस्य मुख्यं केन्द्रं गोरखपुरे वर्तते।

(10) आचार्यामृतवाग्भवप्रवर्तितमात्मविलासाख्यं नूतनं शैवदर्शनम्। आत्मविलासे, सिद्धमहारहस्ये, विंशतिकाशास्त्रे च प्रतिपादितमेतत्।

~ अद्वैतम् :— (1) त्र्यम्बकमठिकादर्शनम्, काश्मीर शैवदर्शनम्।

(2) अर्द्ध त्र्यम्बकमठिकादर्शनम्। उभयमपि शाङ्कराद्विवर्त्तवादाश्रितादद्वैतदर्शनात् सर्वथा भिन्नं भारतीयं दर्शनम्। तत एवाचार्याभिनवगुप्ताद्या एतं पराद्वैतमिति वा, परमाद्वयमिति वा वदन्ति स्म।

(3) आचार्यामृतवाग्भवप्रवर्तितं विलाससिद्धान्तप्रधानं नूतनं शैवदर्शनम्।

~ द्वैतम् :— (1) आमर्दमठिकादर्शनम्।

(2) पाशुपतदर्शनम्।

(3) सिद्धान्तशैवदर्शनं चेति।

~ द्वैताद्वैतम् :— (1) श्रीनाथमठिकादर्शनम्

(2) श्रीकण्ठशिवाचार्य दर्शनम्।

(3) सामरस्यपरं वीरशैवदर्शनम्।

~ सर्वोत्तीर्णम् :— वैष्णववामकौलादिभ्यः उत्तरोत्तर-मुत्कृष्टेभ्योऽपि समुत्कृष्टतरं त्र्यम्बकदर्शनम् तदङ्गभूतं च त्रिकशास्त्रमेव। न ततः उत्तरं किमप्यपरं मोक्षशास्त्रम्। यथा—

"तेनोच्यते वैष्णवाद्याः पशुशासनसंश्रिताः।।
न शैवेऽधिकृतास्तन्त्रे न शैवा वामगोचरे।
तेऽपि नो दक्षिणे तेऽपि न स्युः कुलमते त्रिके।।
उक्तं श्रीभैरवकुले पञ्चदीक्षाक्रियोचितः।
गुरुरुल्लङ्घिताधस्त्यस्त्रोता वा त्रिकशास्त्रगः।।"
(मा०वि०वा०2,286-288)

शैवप्रणवः :— हुंङ्कारः।

द्र०:- 'प्रणवः शैव' इति।

शैवयोगफलम्ः — शैवयोगाभ्यासे परिपक्के सति साधको जीवन्मुक्ततामवाप्य लोकव्यवहारं कुर्वाणोऽपि परात् स्वरूपादच्युत एव तिष्ठति। यथा—

"स्वतन्त्रशिवतामेति भुञ्जानो विषयानपि।"
(मा०वि०तं०18,23)

योगोऽत्र त्रिकाचारयोगोऽभिप्रेतः।

शैववेधदीक्षाफलम् :— उक्तं यथा—

"निरूद्ध्य रश्मिचक्रं स्वं भोगमोक्षावुभावपि।।
ग्रसते यदि तद्दीक्षा शार्वीयं परिकीर्तिता।"
(तं०आ०29,276-277)

~ उत्कर्षतारतम्यतः :— दशाष्टादशागमप्रतिष्ठं शास्त्रं हि शैवम्। ततोऽप्युत्कृष्टं च चतुष्षष्टिभैरवागमप्रतिष्ठं, सर्वोत्कृष्टं चोर्ध्वोर्ध्वागमषट्के, सौरभर्गशिखादौ प्रतिष्ठितम्। षण्णामपि तेषां मध्ये यच्छासनं सिद्धानामक (वामक)

मालिन्याख्यागमत्रिके प्रतिष्ठितं तदेव तत्राप्युत्कृष्टतरम्। शिवपुराणादिनिष्ठमपि शास्त्रं शैवशास्त्रमेव। शाक्तं शास्त्रजातमपि पर्यन्ते शैवमेव। पाशुपत-सिद्धान्तशैव वीरशैव-श्रीकण्ठमतादिरूपाः दर्शनविद्या अपि शैव्या एव। गोरक्षसम्प्रदायदर्शनमपि शैवमेव। एतासु दर्शनविद्यासु सर्वोत्तमा विद्या काश्मीरशैवमिति ख्याता प्रत्यभिज्ञाशास्त्रविद्या। साधनाक्रमाश्च सिद्धान्तवाम-दक्षिणकौलमत- त्रिकाख्याः शैवा एव। तेषु सर्वोत्तमः साधनाक्रमस्त्रिकाख्यः।

~ तत्फलम् :— **अधिकारिजनयोग्यतानुसारं शैवागमः भुक्तिमुक्त्युभयफलप्रदो भवति। उभयस्य प्राप्तेरुपायास्तत्र प्रसिद्धाः। यथा—**

"धमार्थकाममोक्षेषु पूर्णापूर्णादिभेदतः।
विचित्रेषु फलेष्वेक उपायः शाम्भवागमः।।"

(तं०आ०35,24)

~ तदधिकारी :— **जाति धर्मवयोलिङ्गाद्यनपेक्षया पारमेश्वरानन्य- भक्त्यैकसमाश्रयात्राधिकारिता मन्तव्या। सा च पारमेश्वरानुग्रहफलात्मिका। यस्मिञ्जने परमेश्वरोऽनुग्रह-शक्तिपातं विदध्यादसावेव जनस्तथाविधया भक्त्याऽलङ्क्रियते। तेन यः कश्चन भक्तिमान् जिज्ञासुरसावत्राधिकारी। यथा—**

"जनस्येति यः कश्चित् जायमानस्तस्य, इत्यने-नाधिकारिविषयो नात्र कश्चिन्नियम इति दर्शयति, यस्य यस्य हीदं स्वरूपप्रथनं तस्य तस्य महाफलम्। यथा—

(ई०प्र०वि०,खं०1,पृ०,14)

~ तदनधिकारिणः :— **न हि तदधिकारिणो बौद्धाहर्तवैष्णवाद्याः। न हि ते शैवे शास्त्रे श्रद्धावन्तस्तत एव ते नाधिकारिणः। यथा—**

"तेनेह वैष्णवादीनां नाधिकारः कथञ्चन।।
ते हि भेदैकवृत्तित्वादभेदे दूरवर्जिताः।"

(तं०आ०13,280-81)

~ तद्वैशिष्ट्यम् :— **अन्यशास्त्राणि सालोक्यादिमात्रप्रदानि वा विज्ञानाकलप्रलयाकलस्थितिप्रदानि वा अद्वैतं पुनः शैवदर्शनं भुक्तिमुक्तिप्रदम्, पर्यन्ते पारमार्थिकपरिपूर्णपर-मोक्षपदप्रापकम्। यथा—**

"स्वच्छन्दशास्त्रे तेनोक्तं वादिनां तु शतत्रयम्।
त्रिषष्ट्यभ्यधिकं भ्रान्तं वैष्णवाद्यं निशान्तरे।।
शिवज्ञानं केवलं च शिवतापत्तिदायकम्।"

(तं०आ०13,78-79)

शैवशास्त्रम् :— शैवशाक्तागमव्रातमूलकं सर्वं सिद्धान्तरूपं साधना प्रक्रियारूपं च शास्त्रं शैवमेव।

शैवसिद्धान्तदोषाः :— (1) शैवसिद्धान्ताचार्याः आगमशास्त्र- व्याख्यां द्वैतदृष्ट्या कुर्वन्ति। तां विहायाद्वैतदृष्टिं यदि ते स्वीकुर्वीरँस्तदा तदुपासकोऽपि काश्मीरशैवोचितं पराद्वैतं परशिपदं लभेत।

उक्तमेतद् यथा—

"आगमेषु द्वैतव्याख्यानमपास्य ..... सिद्ध्यत्येव जनः।"

(ई०प्र०वि०वि०,खं०3,पृ०,405)

(2) त्रिकापेक्षया सैद्धान्तिकी प्रक्रिया विधिनिषेधप्र-धाना मायीयकर्मबहुला च।

"सिद्धान्ते कर्मबहुलं मलमायादिरूषितम्।"

(तं०आ०37,27)

शैवागमाः — (1) ईशानादिभिः पञ्चभिर्मन्त्राख्यै-रधिकारिशिवैरुक्ता आगमाः। ते चात एव पञ्चस्त्रोतोमया इत्युच्यन्ते, पञ्चस्त्रोतसो वेति। ते च भेददृष्टिप्रधाना कामिकाद्याः दश, भेदाभेददृष्टिप्रधाना विजयाद्याः अष्टादश।

यथा—

"स्रोतस्युर्ध्वे भवेज्ज्ञानं शिवरुद्राभिधं द्विधा।
कामजं योगजं चिन्त्यं मौकुटं चांशुमत्पुनः।
दीप्तं (**सूक्ष्मं सहस्रार्कं सुप्रभं कारणं पुनः**)।
शिवभेदाः समाख्याता रुद्रभेदांस्त्विमाच्छृणु।।
विजयं चैव निःश्वासमुद्गीतं पारमेश्वरम्।
मुखबिम्बं च सिद्धं च सन्तानं नारसिंहकम्।।
चन्द्रांशुं वीरभद्रं च आग्नेयं च स्वयम्भुवम्।
विसरं रौरवाः पञ्चविमलं किरणं तथा।।
ललितं सौरभेयं च तन्त्राण्याहुर्महेश्वरी।
अष्टविंशतिरित्येवमूर्ध्वस्त्रोतो विनर्गताः।।"

उद्ध०:- तं०आ०वि०,खं०1,पृ०,40)

अत्र रेखाङ्कितान्यागमनामानि तन्त्रालोक विवेकस्य पंक्तिषु त्रुटितानि। दक्षिणदेशे या शिलारेखाश्रिता प्रद्धिस्तत्र तत्र शोधग्रन्थेषु लिखिता वर्तते, तत आदाय स्वबुद्धया च तदक्षराणां मूहं कृत्वाऽत्र कोषपंक्तिषु तेषामागमनाम्नां पूर्तिः कोषकारेण कृता वेदितव्या। केचिदागमाः अनेकनामकाः। तेन श्रीकण्ठी पंक्तिषु दाक्षिणात्येषु च शिलालेखेषु भिन्न-भिन्नैर्नामभिरपि केचन प्रसिद्धाः। मौकुटं शास्त्रं श्रीश्रीकण्ठयां शिवागमेषु गणितं दक्षिणे पुना रुद्रागमेषु।

(2) उर्ध्वस्त्रोतःसमुद्भूताश्चाभेददृष्टिप्रवणाश्चतुः षष्टिसंख्याका आगमा अपि। ते चाष्टस्वष्टकेषु विभक्ताः।

यथा—

"..... उर्ध्वस्रोतोविनिर्गताः।
तच्च भेदैः प्रवक्ष्यामि चतुष्षष्टिं विभागशः।।
भैरवं यामलं चैव मताख्यं मङ्गलं तथा।
चक्राष्टकं शिखाष्टकं बहुरूपं च सप्तमम्।।
वागीशं चाष्टमं प्रोक्तमित्यष्टौ वीरवन्दिते।
एतत् सादाशिवं चक्रं कथयामि समासतः।।"

उद्ध०:- (तं०आ०वि०,खं०10,पृ०,41-42)

अष्टस्वप्यष्टकेष्वेतेषु संगृहीता ये आगमास्ते तत्रैव नामशः परिगणिताश्चतुः षष्टिरिति। एते तत्र भैरवागमाः इत्युक्ताः।

द्र०:- **'भैरवाख्याः'** इति।

~ अतिप्राचीनाः :— **प्राचीनेषु युगेषु ऋषयः मौखिकं शैवागमरहस्योपदेशं गुरुशिष्यसन्तत्या चक्रुः। यथा—**

"शैवादीनि रहस्यानि पूर्वमासन् महात्मनाम्।
ऋषीणां वक्त्र कुहरे तेष्वेवानुग्रहक्रिया।।"
(शि०दृ०7,107)

~ ऊर्ध्वस्रोतसः :— **अभेददृष्ट्योपदिष्टाः चतुष्षष्टि-भैरवागमाः।**

द्र०:- 'शैवागमाः' (2) इति।

~ ऊर्ध्वागमाः :— **भैरवागमा एव।**

~ ऊर्ध्वोर्ध्वाः :— **ते च सौरभर्गशिखाद्याः षडागमाः। तेषां पूर्वार्धरूपाः आगमास्त्रिकाख्यास्त्रयः। यथा—**

"यावत्तावत् तदूर्ध्वोर्ध्वं स्रोतो यद् भेदवर्जितम्।।
सौरभर्गशिखादीनि ततः शास्त्राणि तेनिरे।
उक्तं भर्गशिखायां च देवेन परमेष्ठिना।।
ऊर्ध्वस्रोतोद्भवं ज्ञानमिदं तत् परमं प्रिये।
परमध्वनिनोर्ध्वोर्ध्वं .....।।
.....।
.....।।"
(मा०वि०वा०1,160-163)

~ त्रिकाख्याः :— **ते च सिद्धातन्त्रं, वामक (नामक) तन्त्रं मालिनीतन्त्रं चेति। एते एवागमाः काश्मीरशैवदर्शनगुरुभिः सर्वोच्चतया सम्मताः। एतत् त्रयेऽपि मालिनीतन्त्रस्य माहात्म्यमुच्चतमम्। यथा—**

"इह यावत्तु मुख्येयं षडात्मा शास्त्रसन्ततिः।।
एतत् पूर्वार्धभागीनि त्रिकशास्त्राणि यानि तु।
षडर्धसंज्ञया तानि गुरुभिर्भाषितान्यलम्।।"
(मा०वि०वा०1,164-165)

सौरभर्गशिखादीनामूर्ध्वोर्ध्वानां षडागमानां पूर्वभागरूपा आगमास्त्रिकाख्यास्तत एव षडर्धागमा इति नाम्नापि प्रसिद्धाः इति।

~ त्रिवर्गकाः :— **भेद-भेदाभेद-अभेदमयीर्दृष्टीराश्रित्य शिवै रुद्रैर्भैरवैश्चोपदिष्टाः शैवागमास्त्रिप्रकाराः। यथा—**

"अतश्च भेद-भेदाभेद-अभेद-प्रतिपादकं शिवरुद्र-भैरवाख्यं
त्रिधैवेदं शास्त्रमुद्भूतमिति सिद्धान्तः।
तन्त्रं जज्ञे रुद्रशिवं भैरवाख्यमिदं त्रिधा।
वस्तुतोहि त्रिधैवेयं ज्ञानसत्ता विजृम्भते।।
भेदेन भेदाभेदेन तथैवाभेदमागिना।"
उद्ध०:- तं०आ०वि०खं०1,पृ०,45)

~ पञ्चस्त्रोतसः :— **ईशानादिभिः पञ्चमन्त्रैरुक्ताः शिवागमाः दश, रूद्रागमाश्चाष्टादश इति।**

द्र०:- 'शैवागमाः' (1) इति।

~ परिपूर्णाः :— **अपूर्णमन्येषां शास्त्राणां ज्ञानम्, शैवागमानामभेदनिष्ठानामेव ज्ञानं पूर्णम्। यथा—**

"तयैवाशैशवात् सर्वे व्यवहारधराजुषः।
सन्तः समुपजीवन्ति शैवामेवाद्यमागमम्।।
अपूर्णास्तु परे तेन न मोक्षफलभागिनः।"
(तं०आ०35,16-17)

"तस्मात् संपूर्णसंबोधपराद्वैतप्रतिष्ठितम्।
यः कुर्यात् सर्वतत्त्वार्थदर्शी स पर आगमः।।"
उद्ध०:- (तं०आ०वि०खं०12,पृ०,365)

~ प्रसृताः :— **अति प्राचीनेष्वपि युगेषु सिद्धपरम्परास्वागमिकस्य शैवयोगवधेः प्रचारोऽभवत्। यथा—**

"एवं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्।।"
(भ०गी०4,1)

"एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।"
(तदेव,4,2)

भगवद्गीतासु षष्ठेऽध्याये शाम्भवस्यैव योगस्य विस्तरतः प्रतिपादनं कृतमस्ति। उपनिषत्स्वस्य निर्देशास्तत्र तत्र लभ्यन्ते।

"तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।"
(क०उ०2-6-11)

"मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योग-विधिं च कृत्स्नम्।।"
(तदेव,2-6-18)

"त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा सन्निरुध्य।"
(श्वे०उ०,2,8)

"न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्।"
(श्वे०उ०2,12)

याज्ञवल्क्यस्मृतौ यतिधर्मप्रकरणे रहस्यभूतः आगमिकः शाम्भवाख्यो योगविधिरूपदिष्टोऽस्ति सुस्पष्टतरम्।

यथा—

"उरुस्थोत्तानचरणः सव्ये न्यस्योत्तरं करम्।
उत्तानं किञ्चिदुन्नाम्य मुखं विष्टभ्य चोरसा।।
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन्।
तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः।।
सन्निरुद्ध्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः।
तद्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमेत्।।
ततो ध्येयः स्थितो योऽसौ हृदये दीपवत् प्रभुः।
धारयेत्तत्र चात्मानं धारणां धारयन् बुधः।।"
(या०स्मृ 3,118-201)

"अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम्।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत् प्रभुः।।"
(तदेव,3,111)

शाम्भव्येषा मुद्रा त्रिकाचारसारभूता।

द्र०:- (भ०गी०6,10-23)
(कु०सं०3,44-50)

अवधूतगीतायामस्य परिभाषाः समुल्लिखिता वर्तन्ते। यथा—

"न शाम्भवं शाक्तिकमाणवं न वा।
पिण्डं च रूपं च पदादिकं न वा।।"

(अ०गी०2,33)

पातञ्जले योगसूत्रेऽयमागमिको योगतिथिः प्रतिबिम्बितमात्र इव दृश्यते ततः स्फुटतरं च तथा भर्तृहरिकृतस्य वाक्यपदीयस्य ब्रह्मखण्डे। बौद्धैरार्हतैरप्युपात्ताः शैव्या योग-विधयः। पाञ्चरात्रैस्तु ते एव विद्ययो वैष्णवत्वेन रूपेण प्रचारिताः। वज्रयानीयैः परं पुनर्विज्ञानवादानुकूलतामुपनीय प्रसारिताः प्रचारिताश्च तिब्बतादिषु भौटदेशेषु।

~ बहुभेदभिन्नाः :— **शिवस्य पञ्च दिव्यरूपाणि तावदीशानतत्पुरुषासद्योजातवामदेवाघोराख्यानि क्रमेण चिदानन्देच्छाज्ञानक्रियाप्रधानानि। कानिचिच्च तथाविधानि दिव्यानि रूपाणि येषु पंचानामीशानादीनां मध्ये द्वयोस्त्रयाणां, चतुर्णां, पञ्चानामपि वा दृष्टयो विविधैः प्रकारैर्मिश्रतां याताः। तत एव पञ्चभेदो सुबहुभेदतां यातीति तथाविधैः शिवरूपैरुक्तेषु शास्त्रेष्वपि बहुभेदता। यथा—**

"ईशतत्पुरुषाजातैरुद्भूतैरूद्बुभूषूभिः।
एकैकैः षड्भिरेकेन त्रिकेण द्वयात्मकैस्त्रिभिः।।
जायते शिवभेदानां दशानां विविधास्थितिः।
.....।।
.....।
यदा त्रयाणां वक्त्राणां वामदक्षिणसंगतिः।।
तदा प्रत्येकशक्तित्वं भविष्यद्भवदुद्भवैः।
षण्णां त्रित्वे रुद्रभेदस्तेनाष्टादशधा स्थितः।।
इत्यादि।"

(मा०वि०वा०1,374-377)

~(भैरवाख्याः) :— **अभेददृष्टयोपदिष्टा चतुष्षष्टिसंख्याका आगमाः अष्टस्वष्टकेषु विभक्ताः। तन्त्रालोकविवेके समुद्धृतासु श्री कण्ठीसंहितापंक्तिषु परिगणिताः।**

यथा—

"स्वच्छन्दो भैरवश्चण्डः क्रोध उन्मत्तभैरवः।
असिताङ्गो महोच्छुष्मः कपालीशस्तथैव च।।
एते स्वच्छन्दरूपास्तु बहुरूपेण भाषिताः।
ब्रह्मयामलमित्युक्तं विष्णुयामलकं तथा।।
स्वच्छन्दश्च रुरुश्चैव षष्ठं चाथर्वण स्मृतम्।
सप्तमं रुद्रमित्युक्तं वेतालं चाष्टमं स्मृतम्।।
अतः परं महादेवि मतभेदाञ्छृणुष्व मे।
रक्ताख्यं लम्पटाख्यं च मतं लक्ष्म्यास्तथैव च।।
पञ्चमं चालिका चैव पिङ्गलाद्यं च षष्ठकम्।
उत्फुल्लकं मतं चान्यद्विश्वाद्यं चाष्टमं स्मृतम्।
चण्डभेदाः स्मृताः ह्येते भैरवे वीरवन्दिते।
भैरवी प्रथमा प्रोक्ता पिचुतन्त्रसमुद्भवा ।।
सा द्विधा भेदतः ख्याता तृतीया तत उच्यते।
ब्राह्मी कला चतुर्थी तु विजयाख्या च पञ्चमी।।
चन्द्राख्या चैव षष्ठी तु मङ्गला सर्वमङ्गला
एष मङ्गलभेदोऽयं क्रोधेशेन तु भाषितः।।
प्रथमं मन्त्रचक्रं तु वर्णचक्रं द्वितीयकम्।।
तृतीयं शक्तिचक्रं तु कलाचक्रं चतुर्थकम्।
पञ्चमं विन्दुचक्रं तु षष्ठं वै नादसंज्ञकम्।।
सप्तमं गुह्यचक्रं च खचक्रं चाष्टमं सुमृतम्।
एष वै चक्र भेदोऽयमसिताङ्गेन भाषितः।।
अन्धकं रुरुभेदं च अजाख्यं मूल संज्ञकम्।
वर्णभण्ठं विडङ्गं च ज्वालिनं मातृरोदनम्।
कीर्तिता परमेशेन रूरूणा परमेश्वरि।।
भैरवी चित्रिका चैव हंसाख्या च कदम्बिका।
हृल्लेखा चन्द्रलेखा च विद्युल्लेखो च विद्युमान्।।
एते वागीशभेदास्तु कपालीशेन भाषिताः।
भैरवी तु शिखा प्रोक्ता वीणाचैव द्वितीयिका।।
वीणामणिस्तृतीया तु सम्मोहं तु चतुर्थकम।
पञ्चमं डामरं नाम षष्ठं चैवाप्यथर्वकम्।।
कबन्धं सप्तमं ख्यातं शिरश्छेदोऽष्टमः स्मृतः।
एते देवि शिखाभेदा उन्मत्तेन च भाषिताः।
एतत् सादाशिवं चक्रमष्टाष्टकविभेदतः।।

उद्ध०: —

(तं०आ०वि०,खं०1,पृ०,42–43)

~ (रौद्राख्याः): :— **भेदाभेदप्रधाना विजयाद्याः आगमाः।**

तेषां नामानि प्राग्दत्तानि।

द्र०:- 'शैवागमाः'(1) इति।

~(शिवाख्याः): — **भेददृष्टिप्रधानाः कामिकाद्याः(कामजाद्या) दश प्राक् परिगणिता एव।**

द्र०:- 'शैवागमाः' (1) इति।

~ महामहिमानः — **प्रत्यक्षानुमानादिप्रमाणैरगम्यस्य वस्तुतत्त्वस्य ज्ञानमागमाद् भवति।आगमेष्वपि माहेश्वरा अगमास्तत्तस्तुरहस्यप्रकटने समर्थाः, यत्र यत्रागमान्तराणां गतिर्नास्ति। यथा—**

"अस्मदादिप्रत्यक्ष नाशेषसाक्षात्कारि, अनुमानमप्येव सर्वस्य लिङ्गव्याप्त्युपलब्धिसम्भवाभावात्। असङ्कुचितप्रकाशात्मकपर-मेश्वरविमर्शात्मकः पुनरागमो विश्वं प्रमातुं समर्थः, तत एव विवृताववतार्यते पदार्थतत्त्वोपपादनार्थमिति परमेश्वरागम एव तत्त्वमुपपादयितुं शक्तः, युक्तिस्तु तदुपवृंहणाय।"

(ई०प्र०वि०वि०,खं०3,पृ०,255)

"प्रमाणमेकं तद्वाक्यं तथ्यमीश्वरभाषितम्।
तस्योक्तिः पौरुषैः स्थूलैः प्रमाणैर्न प्रबाध्यते।"

उद्ध०:- (तदेव,पृ०,256)

~ लुप्ताः :— **कलौ ऋषयो मनुष्यलोकादुपरि यदा संक्रान्तास्तदा शैवागमोपदेशपरम्पराणां लोप इव जातः। यथा—**

"कलौ प्रवृत्ते यातेषु तेषु दुर्गमगोचरे।

कलापिग्रामप्रमुखे समुच्छिन्ने च शासने।।"

(शि०दृ०7,108)

~ विकसिताः — **कलौ श्रीकण्ठनाथाज्ञया भुवमवतीर्णैस्त्रिभिः सिद्धैः शैवदर्शनस्य विकासः पुनरत्र भूलोके प्रवर्तितः। अमर्दकेन भेददृष्ट्या, श्रीनाथेन भेदाभेददृष्ट्या, त्र्यम्बाकादित्येन परमाभेददृष्टया। तेषां शिष्यपरम्परायां विकासोऽस्याः विद्यायाः सञ्जातः। विशेषतोऽसौ कश्मीरमण्डल एव सम्भवत्। यथा—**

"तेषां क्रमेण तन्मध्ये भ्रष्टं कालान्तराद्यदा।
तदा श्रीकण्ठनाथाज्ञावशात् सिद्धा अवातरन्।।
त्र्यम्बकामर्दकाभिख्यश्रीनाथा अद्वये द्वये।
द्वयाद्वये च निपुणाः क्रमेण शिवशासने।।
आद्यस्य चान्वयो जज्ञे द्वितीयो दुहितृक्रमात्।
स चार्धत्र्यम्बकाभिख्यः सन्तानः सुप्रतिष्ठितः।।"

(तं०आ०36,11-13)

~ सर्वश्रेष्ठाः :—

"शिवागमस्य सर्वेभ्योऽप्यागमेभ्यो विशिष्टता।
शिवज्ञानेन च विना भूयोऽपि पशुतोद्भवः।।"

(तं०आ०22,9)

शैवाचारः :— चर्या-क्रिया-योग-ज्ञानात्मकोचतुर्भूमिको भक्तिप्रधानः क्रियाबहुलः शैवसिद्धान्ताद्याचारः। वेदाचारादुत्कृष्टोऽपि तान्त्रिकेभ्यः कौलाद्याचारेभ्योऽवर एवा यथा—

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम्।।"

उद्धः:- (तं०आ०वि०,खं०1,पृ०,49)

उद्धः:- (प०त्री०वि०,पृ०,92)

शैवीमुखं :— ~ शिवस्य :— **यदा योगी रहस्ययोगाभ्यासेन शक्त्यवस्थां प्रविशति तदासौ स्वात्मशिवभावमभेदेन भावयितुं साक्षात्कर्तुं च शक्नोति, तत एवासौ स्वात्मानं शिवरूपतया प्रत्यभिज्ञाय शिवीभवती। यथा जनः मुखदर्शनेन प्रत्यभिज्ञायते चैत्रोऽयमिति, तथैव स्वात्मा शक्तिमुखदर्शनेनैव प्रत्यभिज्ञायते, शिवोऽहमिति। स्वस्यानिरुद्धां ज्ञानशक्तिं क्रियाशक्तिं च साक्षात्कृत्यैव साधकः स्वात्मनः शिवरूपतायां विश्वस्तो भवति, "सत्यं शिव एवाहं नाल्पशक्तिर्जीवः" इति। तदेतेन कारणेन शिवत्वप्रत्यभिज्ञा-साधनभूता पारमेश्वरी शक्तिस्तस्य मुखमित्युच्यते शास्त्रेषु। यथा—**

"शक्त्यवस्थाप्रविष्टस्य निर्विभागेन भावना।
तदासौ शिवरूपी स्याच्छैवी मुखमिहोच्यते।।"

(वि०भै०,20)

"मुखं प्रवेशोपायद्वारमिहागमेषूच्यते।"

(वि०भै०उ०,पृ०,14)

"यथालोकेन दीपस्य किरणैर्भास्करस्य च।
ज्ञायते दिग्विभागादि तद्वच्छक्त्या शिवः प्रिये।।"

(वि०भै०,21)

"यथा हि वक्त्रेणैवायमिति लभ्यते तथा शक्त्यैव शिवोऽयमिति व्यपदेशः।"

(वि०कौ०,पृ०,8)

शैवेऽनधिकारिणः :— ते हि वैष्णवसौगतादिशास्त्राणि प्रति श्रद्धावन्तोऽवराः साधकाः। यथा—

"वैष्णवा सौगताः श्रौतास्तथा श्रुत्यन्तवादिनः।
इत्यादयो नाधिकृता जातुचिच्छिवशासने।।"

उद्धः:- (तं०आ०वि०,खं०8,पृ०,189)

तेषां हि वैष्णवादिशा स्तेष्वेव दृढो विश्वासो भवति। ततस्ते नैव शैवशास्त्रे दृढविश्वासभाजः। तत एव ते तत्र नाधिकारिणः इति।

शोधकत्वम् :— भगवत्यपराभट्टारिकाऽपि शोधिका, परा परा चापि। परा तु शोधिका भवत्येव।

"एवं भगवत्यपरा शोधकभावेन स्थिता परापरापि च।"

(प०त्री०वि०,पृ०,162)

शोधनम् :— भावनया बोधाग्निना भेदात्मकस्य भावमण्डलस्य दाहेन बोधैकीकरणेन भेदमलशोधनम्। यथा—

"ततोऽपि देहारम्भीणि तत्त्वानि परिशोधयेत्।
शिवात्मकेष्वप्येतेषु बुद्धिर्या व्यतिरेकिणी।।
सैवाशुद्धिः पराख्याता शुद्धिस्तद्धीविमर्दनम्।"

(तं०आ०4,118-119)

~ क्रमदृष्ट्या :— **यद्यपि परावाचः प्रतिबिम्बेषु पश्यन्त्या- मवभासमानेषु वर्णेषु तत्त्वानां वैपरीत्येन स्थितिः क्षकारः शक्तिः ककारो धरेति, तथापि यदा गुरुणा शिष्यस्य तत्त्वशुद्धिर्विधीयते तदा परात्मनि यथा तत्त्वानां स्थितिस्तदनुसारमेव वर्णमन्त्रादिप्रयोगः क्रियते। तनैवाभिप्रायेण मालिनी विजयोत्तरे कलाध्वनिरूपणप्रकरणे द्वितीयेऽधिकारे 50 तः 55 श्लोकं यावत् क्षकारादारभ्य ककारान्तं वर्णानां निवेशः धरादि शक्त्यन्तेषु तत्त्वेषु निवृत्त्यादि शान्तान्तासु स कलासूपदिष्टो महेश्वरेणेति न किमपि विरोधावहं तथोपदेशे इत्यवधारयन्तु सुधियः। यथा—**

"परात्मनि परामर्शे परामर्शैकतत्त्वान्येव तत्त्वानि, परामर्शश्च कादिक्षान्तशाक्तरूपपरमार्थः ..... ततः प्रथिवी 'क्षकार' इत्यादिशोध्यरूपापेक्षया न किञ्चिद्विरुद्धम्, तत्रापि परदशानपायात्।"

(प०त्री०वि०,पृ०,146-47)

~ फलभेदभिन्नम् :— **अध्वशुद्धिर्बहुधा विधीयते, तेषां शोधनविधीनां फलानि बहुधा। तद्यथा—**

(1) तत्तद्भुवनादौ लभ्यानां भोगानां प्राप्तिः।
(2) तत्तद्भुवनाद्याधिपत्यम्।

(3) तत्तद्भुवनादेरुत्क्रमणम्।
(4) तत्तद्भुवनादेः शिवात्मत्वदर्शनम्।
(5) शिवात्मनि तत्तद्भुवने लीनता।
(6) तत्तद्भुवनादिनिरासपूर्वकं विश्वोत्तीर्णशिवपदप्राप्तिः।
यथा—

"शोधनं बहुधा तत्तद्भोगप्राप्त्येकतानता।।
तदाधिपत्यं तत्त्यागस्तच्छिवात्मत्ववेदनम्।
तल्लीनता तन्निरासः सर्वं चैतत् क्रमाक्रमात्।।"

(तं०आ०11,85-86)

अत्र जयरथकृता व्याख्या न समीचीना प्रतिभाति।

~ लिङ्गोद्धारे :— **द्र०:- 'लिङ्गोद्धारः'** 'शोधनेन' इति।
द्र०:- (तं०आ०22,18-22)

शोधयम् :— (1) आपृथिवीतत्त्वादासदाशिवतत्त्वं यावत् सर्वमपि तत्त्वजातं सभुवनाभोगं शोध्यकोटावेव गणितं शुद्धविद्येश्वरसदाशिवतत्त्वानाममायीयत्वेऽपि। शोधिते एवैतस्मिन् विद्याभूमिकायास्तत्त्वत्रये पार्यन्तिका पूर्णा च मुक्तिः सुलभा। यथा—

"पश्यन्तीदशायाश्चारम्य भेदासूत्रणात्मांशांशोल्लासः, इति ततः प्रभृत्येव शोध्यशोधकभाव इति तावद् व्यवस्थानपह्नवनीया, यथोक्तम्:—

'यत् सदाशिवपर्यन्तं पार्थिवाद्यं च सुव्रते।
तत् सर्वं प्राकृतं ज्ञेयं विनाशोत्पत्तिसंयुक्तम्।।' **इत्यादि।"**

(प०त्री०वि०,पृ०,143-144)

प्राकृतत्वेनात्र सृष्टत्वं सर्वसामान्यत्वं, शोध्यत्वं च सूच्यते न प्रकृतिविकारताऽत्र तात्पर्यम्।

(2) शोध्यं पश्यन्त्यादिकमपि मध्यमावैखर्ययोः शोधकम्, शोधनक्रियापि स्वयं शोध्यभूतैव सती शोधिका भवति। यथा—

"तदीयमेतावती धारा यच्छोधकमपि शोधनमपि शोध्यमेव इति श्रीषडर्धशास्त्रे एवोक्तम्।"

(प०त्री०वि०,पृ०,161)

(3) शोधकस्याप्यपरात्मकस्य शक्तिसमूहस्य परापरात्मकस्य वापि शोध्यत्वमेव। यथा—

"एवं शोधकस्यापि शोध्यत्वमित्यन्य उत्कर्षः।
..... कुलात्परतरं त्रिकम्।"
इति स्थित्या।

(प०त्री०वि०,पृ०,163)

शोध्यशोधकशोधनानि :— शोध्याः साधकाः, शोधिका भगवत्यः, शोधनं मलापहारः।

~ त्रिरूपाणि :— **शोध्याः शोधकाः शोधनक्रियाश्चेति सर्वेषामेतेषां त्रिकरूपता। शोधकं शोधनं शोध्यमपि। शोधनं शोधकं शोध्यमपि। शोध्यं च शोधनं शोधकमपि। यथा—**

"ततश्च शोध्यशोधनशोधकानां सर्वत्रैव त्र्यात्मकत्वात् त्रिकमनपायि, यथोक्तं मयैव स्तोत्रे :—

"..... यत्र त्रिकाणां त्रितयं समस्ति'। इति।"

(प०त्री०वि०,पृ०,163)

शोषः :— मलस्य नामस्वेकं नामधेयम्। यथा—

"मलोऽभिलाषश्चाज्ञानमविद्या लोलिका प्रथा।
भवदोषोऽनुप्लवश्च ग्लानिः शोषः .....।।"

(पू०प्र०1,446)

शोषकं :— ~ बीजम् :— यकारः।
द्र०:- 'दाहकं बीजम्' इति।

शोषणम् :— नाडीशोधने मलस्य विनाशनम्। येन साधकः स्वात्मनः परिपूर्णतां विमृशन्नभेददृष्ट्या पश्यन् विश्वकर्तृत्वमात्मनो विमृशति। यथा—

"शोषो मलस्य नाशः .....।"

(म०मं०44,पृ०,111)

श्रद्धा :— यया विना कस्यापि कोप्यर्थः न सिद्ध्यति सा निश्चयात्मिका दृढा मतिः श्रद्धा। यथा—

"यया विना न कस्यापि कोप्यर्थः सिद्ध्यति क्वचित्।
तत्प्रतिपादितेऽर्थे या निश्चयात्मा दृढा मतिः।
सा श्रद्धा निश्चयात्माऽन्यन्निघ्नन्ती हन्ति संशयम्।।"

(पू०प्र०श्लो०298-299)

~ पराद्वैतविषये :— **यद्यपि पराद्वैतसिद्धान्तप्रसिद्धिर्नैव जनस्यानुभवविषया, तथापि शिवेनानुगृहीतो जनोऽग्रे भविष्यमाणां तामनुभूतिं कल्पनयाश्रित्य तत्र विश्वस्तो भवति। यथा—**

"एवं भाविशिवत्वोऽमुं प्रसिद्धिं मन्यते ध्रुवम्।।"

(तं०आ०35,22)

श्राद्ध-दीक्षा :— मृतस्य शिष्यादेस्त्रिकशास्त्रविधानेन आगमोक्तेन श्राद्धविधिना भुक्तिमुक्तिफलदा या दीक्षा विधीयतेऽसौ श्राद्धदीक्षेति।

द्र०:- **'श्राद्धविधिः'** इति।

श्राद्धविधिः :— (1) अन्त्येष्टिदीक्षया दीक्षितः शिष्यो अदीक्षितोऽपि वा कश्चन शिवशासनोपदिष्टेन श्राद्धविशेषेण बन्धनान् मोच्यते योज्यते चोत्तरे क्वापि भुवने। सैषा दीक्षाशेषभूता श्राद्धविधिः। यथा—

"अथ श्राद्धविधिः श्रीमत् षडर्धोक्तो निगद्यते।।
.....।
अन्त्येष्ट्या सुविशुद्धानामशुद्धानां च तद्विधिः।।"

(तं०आ०25,1-2)

(2) अन्त्येष्टिदीक्षया प्रेरितानामन्येषां वा पितृगुरुप्रभृतीनां श्राद्धदीक्षात्र्यहं, तुर्ये दिने, मासि मासि, संवत्सरे च विधीयते। विशेषतो बुभक्षूणां कृते। तेषां क्रियाभूयस्त्वेन फलभूयस्त्वम्। यथा—

"अन्त्येष्ट्या शुद्धानामन्येषामपि वा श्राद्धदीक्षां त्र्यहं, तुर्ये दिने, मासि मासि संवत्सरे संवत्सरे कुर्यात्।" ..... **इत्यादि।**

(तं०सा०,पृ०,176)

"अन्त्येष्टिमृतोद्धरणश्राद्धदीक्षाणाम् अन्यतमेनापि यद्यपि कृतार्थता तथापि बभुक्षोः क्रियाभूयस्त्वं फलभूयस्त्वायेति सर्वमाचरेत्"।

(तदेव)

"बुभुक्षोस्तु क्रियाभ्यासभूमानौ फलभूमनि।
हेतु ततो मृतोद्धारश्राद्धाद्यस्मै समाचरेत्।।"

(तं०आ०25,9)

"त्र्यहे तुर्येऽह्नि दशमे मासि मास्याद्यवत्सरे।
वर्षे वर्षे सर्वकालं कार्यस्तत्स्वैः स पूर्ववत्।।
तत्र प्राग्वद्यजेद्देवं होमयेदनले तथा।"

(तं०आ०25,3-4)

~ तत्फलम् :— **यस्यैषा विधीयते स यथेष्टमूर्ध्वभुवनभोगं मोक्षं च क्रमेणाप्नोति। यथा—**

"एवं श्राद्धमुखेनापि भोगमोक्षोभयस्थितिम्।।
कुर्यादिति शिवेनोक्तं तत्रतत्र कृपालुना।"

(तं०आ०25,21-22)

श्रावणविधिः :— ~ लिङ्गोद्धारे :—

द्र०:- **'लिङ्गोद्धारः'** ~ श्रावणविधिना इति।

(तं०आ०22,14-17)

श्रीकण्ठनाथः :— (1) गुणतत्त्वेऽवतीर्ण ईश्वरभट्टारक एव श्रीकण्ठनाथः। अस्यैवापरं शरीरमुमापतिनाथो यः पुराणेतिहासलोकपरम्परासु प्रसिद्धः कैलासवासी शिवः। श्रीकण्ठनाथोऽपि कैलासवासी। स एव हि त्र्यम्बकामर्दकश्रीनाथान् सिद्धान् भूलोकेऽवतरितुं प्रेरितवान् शैवशास्त्रप्रचारार्थम्। भगवतो दुर्वाससो गुरुः श्रीकण्ठनाथः। उमापति-श्रीकण्ठौ कदाचित् परस्पराभेदतयाप्युल्लिखितावागमेषु शैवग्रन्थेषु च।

यथा—

"श्रीकण्ठ एव परया मूर्त्योमापत्तिरुच्यते।"

(तं०आ०8,241)

"कैलासाद्रौ भ्रमन् देवो मूर्त्या श्रीकण्ठरूपया।
अनुग्रहायावतीर्णश्चोदयामास भूतले।।
मुनिं दुर्वाससं नाम भगवानूर्ध्वरेतसम्।
नोच्छिद्येत यथा शास्त्रं रहस्यं कुरु तादृशम्।।"

(शि०दृ०7,109-110)

"तदा श्रीकण्ठनाथाज्ञावशात् सिद्धा अवातरन्।।
त्र्यम्बकामर्दकाभिख्यश्रीनाथा अद्वये द्वये।
द्वयाद्वये च निपुणाः क्रमेण शिवशासने।।"

(तं०आ०36,11-12)

(2) दीक्षाक्रमे उमापतिनाथस्य गुरुः श्रीकण्ठनाथः। यथा—

"ममापि च पुरा दीक्षा तथा चैवाभिषेचनम्।
श्रीकण्ठेन पुरा दत्तं तन्त्रं सर्वार्थसाधकम्।।"

(स्व०तं०पं०8,35-36)

"ममापीति कैलासवासिनस्तन्त्रप्रवक्तुर्भगवत उमापतेरुक्तिः।"

(स्व०तं०उ०,खं०4,पृ०,23)

परं तन्त्रालोकेऽष्टम् आह्निके उमापतेः पुरादूर्ध्वं श्रीकण्ठनाथस्य पुरं प्रदर्शितम्। यथा—

"उमापतेः पुरं पश्चान्मातृभिः परिवारितम्।।"

(तं०आ०8,240)

द्र०:- **'तद्भुवनम्'** इति।

(3) श्रीकण्ठनाथेऽनुग्रहकर्ता भगवाननन्तनाथः। यथा—

"श्रीकण्ठनाथश्चाधिगततत्त्वः श्रीमदनन्तनाथात्, सोऽपि श्रीभगवच्छक्तितः इत्याद्यागमेषु निरूपितम्।"

(ई०प्र०वि०वि०,खं०3०,पृ०,402)

~ अधिकारतः :— **श्रीकण्ठनाथो विविधै रूपैरधोऽध उपर्युपरि चाधिष्ठाय बहूनां भुवनानामाधिपत्यं करोति। यथा—**

"तत्र श्रैकण्ठमुक्तं यत् तस्यैवोमापतिस्तथा।।
मूर्तयः सुशिवा वीरो महादेवाष्टकं वपुः।"

(तं०आ०8,252-253)

"सर्वेश्वरानधिष्ठाय श्रीकण्ठः कारणेच्छया।
एकः स बहुभी रूपैरास्ते प्रतिनिकेतम्।।"

उद्ध०:- (तं०आ०वि०,खं०5,पृ०,173)

~ तदायुः :— **महत्तत्त्वाधिपस्य रुद्रस्य यदायुस्तद्दिनं श्रीकण्ठनाथस्य तावती च रात्रिः। तस्यापि स्वमानेन वर्षशतमायुः।**

~ तद्भुवनम् :— **मायापुरमित्यस्याभिधानम्।**

"ततो मायापुरं भूयः श्रीकण्ठस्य च कथ्यते"।

(तं०आ०8,238)

उमापतिभुवनात् पूर्वमेव श्रीकण्ठभुवनं वर्णितं तन्त्रालोके। भुवनाध्ववर्णनं च तत्रारोहदृशा। इति संशयः समुदेति यच्छ्रीकण्ठनाथोमापतिनाथयोर्मध्ये को गुरुः कश्च शिष्य इति।

अथवा—

"ममापि च पुरा दीक्षेत्यादिवाक्यं"

स्वच्छन्दनाथोक्तं भवेत्। ततो न शङ्का कापि क्रमश्चारोह दृष्टया—

(1) स्वच्छन्दनाथः।
(2) श्रीकण्ठनाथः।
(3) उमापतिनाथ।

~ संहर्त्ता :— **(3) श्रीकण्ठनाथ एव प्राकृतसृष्टिं पुनः संहरति। यथा—**

"ततश्च ब्रह्मा रुद्राश्च अवाद्यधिकारिणोऽव्यक्ते तिष्ठन्ति इति श्रीकण्ठनाथश्च तदा संहर्त्ता।"

(तं०सा०,पृ०,55)

~ स्रष्टा :— **(4) भगवान् श्रीकण्ठनाथः प्रकृतिं क्षोभयति, तेन तस्यां गुणवैषम्ये जाते सति महत्तत्त्वादारम्य**

सांख्योक्तक्रमेण धरान्तानां त्रयोविंशतितत्त्वानां सृष्टिः प्रकृतिपरिणामवशाद् भवति। तस्यां सृष्टौ प्रलयाकलीभूताः शास्त्रान्तरमुक्ता अपि प्राक्कल्प संस्कारानुसारं शरीरमादाय जन्म लभन्ते। यथा—

"ईश्वरेच्छावशक्षुब्धलोलिकं पुरुषं प्रति।
भोक्तृत्वाय स्वतन्त्रेशः प्रकृतिं क्षोभयेद् भृशम्।।"
(तं०आ०9,225)

"एषोऽवान्तरप्रलयस्तत्क्षये सृष्टिः। तत्र शास्त्रान्तरमुक्ता अपि सृज्यन्ते।"
(तं०सा०,पृ०,55)

"स च क्षोभः प्रकृतेस्तत्त्वेशाधिष्ठानादेव, नान्यथा नियतं पुरुषं प्रतीति सिद्धयेत्।"
(तं०सा०,पृ०,85)

प्रकृतेर्जडत्वात् बद्धमविवेकिनमेव पुरुषं प्रतिक्षोभो न स्यात्, अपि विवेकिन प्रत्यपि भवेत्।

भगवानीश्वरभट्टारक एव गुणतत्त्वेऽवतीर्णः सन् भगवान् श्रीकण्ठनाथः।

श्रीकण्ठी संहिता :— किमपीदानीमलभ्यमागमशास्त्रं यस्य वाक्यानि तत्र तत्र ग्रन्थेषूद्धृतानि शास्त्रकृद्भिः। तन्त्रालोकविवेके शिव-रुद्र-भैरवागम-निरूपणावसरेऽन्यत्रापि च समुद्धृता अस्यागमस्य पंक्तयः क्वचित्क्वचित् त्रुटितप्रायाः।

द्र०:- शि०सू०वि०, पृ०, 24; स्व०तं०उ०8, पृ०, 19; 10 पृ०, 3, 107,9- पृ०, 79; 11, पृ०, 44, स्त०चिं०वि०, पृ०, 93; ने०तं०उ०खं०2, पृ०, 39; तं०आ०वि०खं०1, पृ०, 40-45, पृ०, 129 **इति।**

श्रीकुलम् :— किमप्यागमशास्त्रम्। यथा—

"श्रीकुले यथोक्तम् :—
'हेलया क्रीडया वापि आदराद्वाथ तत्त्ववित्।
यस्य सम्पातयेद् दृष्टिं स मुक्तस्तत्क्षणात् प्रिये।।' इति।"
(प०सा०वि०,पृ०,186)

श्रीतोतुला :— द्र०:- 'तोतुला' इति।

श्रीदया :— स्तवचिन्तामणिकारस्य श्रीमद्भट्टनारायणस्य मातुर्नाम श्रीदया इति। यथा—

"श्रीदयाख्या माता।"
(स्व०चि०वि०,पृ०,20)

श्रीनाथ :— (1) द्वैताद्वैतशैवदर्शनप्रवर्तको गुरुः। शिवस्याज्ञया भुवमवतीर्य तेन भेदाभेददृष्ट्या मध्यमाधिकारिणां कृते शैवशास्त्रमुपदिष्टम्। तेन प्रचालितायाः शैवमठिकाया दशमशताब्दीको गुरुर्भूतिराजतनयो भट्टेन्दुराजः कश्मीरेषु शास्त्रप्रचारमकरोत्।

यथा—

"श्रीमच्छ्रीकण्ठनाथाज्ञावशात् सिद्धा अवातरन्।
त्र्यम्बकामर्दकाभिख्यश्रीनाथा अद्वये द्वये।।
द्वया द्वये च निपुणाः क्रमेण शिवशासन।"
उद्ध०:- (तं०आ०वि०,खं०1,पृ०,26)

"श्रीनाथसन्ततिमहाम्बरधर्मकान्तिः।
श्रीभूतिराजतनयः स्वपितृप्रसादः।।"
(तं०आ०37,60)

(2) कश्चनार्वाचीनो गुरुर्यस्य वाक्यं समुद्धृतं क्षेमराजेन। कदाचिदयमसौ कौलसम्प्रदायगुरुः स्याद्यस्य कृते। यथा—

"चित्तान्तरङ्गचपल-तृष्णा-सलिल-प्रपञ्च-वाराशेः।
यदनुग्रहेण तीर्णस्तस्मै श्रीनाथनाविकाय नमः।।"
(का०क०वि०,55)

इत्युक्तं पुण्यानन्दनाथेन। क्षेमराजेनापि यथा—

"यदुक्तं श्रीश्रीनाथपादै :—
'श्रयेत् स्वातन्त्र्यशक्तिं स्वां सा श्रीकाली पराकला।' इति।"
(शि०सू०वि०,पृ०,44)

श्रीपरा :— काचनागमिकी संहिता यस्याः पंक्तयः समुद्धृताः स्वच्छन्दतन्त्रोद्द्योते।

द्र०:- (स्व०तं०उ०10, पृ०, 16-18,21,25,28-29; 46-47; 52, 83, 86-87, 89;91-92; 95; 96-101,232) **इति।**

श्रीपारदर्शनम् :— किमपि दर्शनशास्त्रपुस्तकं यद्वाक्यं ग्रन्थनामोल्लेखपूर्वमुद्धृतम् आचार्येण।

तद्यथाः —

"यथोक्तं श्रीपारदर्शने :—
'शङ्कापि न विशङ्क्येत निः शङ्कत्वमिदं स्फुटम्।' इति।"
(ई०प्र०वि०वि०,खं०3,पृ०,393)

श्रीपूर्वम् :— ~ शास्त्रम् :—

मालिनीविजयोत्तरं तन्त्रम्। यथा—

"योग्यतावशसंजाता यस्य यत्रैव वासना।
स तत्रैव नियोक्तव्यः पुरेशाच्चोर्ध्वशुद्धिभाक्।।"
(मा०वि०तं०12,40)

"इति श्रीपूर्वकथितम् .....।"
(तं०आ०28,262-263)

"इत्येष समयी प्रोक्तः श्रीपूर्वे करकम्पतः।"
(तं०आ०29,197)

श्रीपूर्वशासनम् :— मालिनीविजयोत्तरं तन्त्रम्। यथा—

"त्रिशूलत्वमतः प्राह शास्ता श्रीपूर्वशासने।"
(तं०आ०3,105)

श्रीभुल्लक :—

द्र०:- 'भुल्लकराजानकः' इति।

श्रीमत्परा :— श्रीपरैव भवेदियम्।

यथा—

"पवित्राः पावना गावः सर्वदेवतविग्रहाः।
गोमूत्रे स्वः सरिन्मुख्या तटस्था मृच्च गोमयम्।।
अमृतं तत्पयो दिव्यं तद्विकारो दधि स्थितम्।
तद्धृतं तद्गतः सारस्तत्सदामरतर्पणम्।।
इति श्रीमत्पराख्यसंहितोक्तातिशयानि।"
उद्ध०:- (स्व०तं०उ०,प०3,पृ०,181)

श्रीमाला :— रत्नमालायाः नामान्तरम्।

तद्यथा—

"श्रीमालायां च चोदिता।।"

(तं०आ०29,238)

श्रीरामः :— रामकण्ठाचार्यः।

"अथ कदाचित्तानि एव तद्वयामिश्राणि लब्ध्वा श्रीराम आदिराजश्च पृथक्-पृथक् स्तोत्रशय्यायां न्यवेशयत .....।"

(शि०स्तो०,क्षे०रा०विवृ०,पृ०,1-2)

श्रीललिता :— किमप्यागमिकं पुस्तकम्। यथा—

"नहि दीक्षासमं किञ्चित् .....।

इति श्री ललितायाम्।"

(ई०प्र०वि०वि०,खं०3,पृ०,326)

श्रीवत्सः :— चिद्गगनचन्द्रिकायाः निर्माता। लेखकप्रमादाद्वासम्पादकानवधानतो वा स्तोत्रमिमं कालिदास इति नामतो जानन्ति सर्वत्र पण्डिता वर्तमाने युगे। अयथार्थो वा पद्यस्य विषयेऽर्थावबोधोऽस्या असम्बन्धायाः हेतुः।

उक्तं हि तत्र। यथा—

"कालि दासपदवीं तवाश्रितः।" इति।

(ि ग०चं०,307)

अत्र 'कालि' इति पृथक् पदं देव्याः सम्बोधनं, न पूर्वपदंसमासस्येति विमृशन्तु सुधियः। स्वनाम च स्पष्टमेवोक्तं स्तोत्रकृता।

यथा—

"पूर्णपीठकृतं सिद्धेस्सद्भावस्तवमादरात्।

वामकार्थं महागुह्यं श्रीवत्सो विदधे स तु।।"

(तदेव,313)

सम्पादनस्य बहुदोषदुष्टत्वादस्य स्तोत्रस्य पाठो बहुदोषदुष्टः। व्याकरणदर्शनछन्दः शास्त्रदृष्ट्या संशोधितोऽत्रोद्धृतः।

श्रीसन्ततिः :— श्रीनाथीया गुरुपरम्परा। ततोऽपि गृहीतं किमपि तन्त्रालोके विद्यते। यथा—

"प्रकर्तव्या यथा दीक्षा श्रीसन्तत्यागमोदिता।

कथ्यते हाटकेशानपातालाधिपचोदिता।।"

(तं०आ०30,101)

अत्र प्रेरको हाटकेश्वरः पाताललोकाधिप इति ज्ञेयम्।

~ दीक्षाविधानं (तत्र) :— **वित्तहीनानामसमर्थानां भक्तानां कृते दीक्षाविधिरयं स्पष्ट एवोक्तो मन्त्रादिसहितः। तद्यथाः —**

"श्रीनाथ आर्य भगवन्नेतत् त्रितयं हि कन्द आधारे।

वरुणो मच्छन्दो भगदत्त इति त्रयमिदं हृदये।।

धर्मादिवर्गसंज्ञाश्चत्वारः कण्ठदेशगाः पूज्याः।

ह्रीं श्रींपूर्वाः सर्वे सम्बोधजुषश्च पादशब्दान्ताः।।

मूर्धतलेविद्यात्रयमुक्तं भाव्यथ मनोऽभियोगेन।

कुसुमैरानन्दैर्वा भावनया वापि केवलया।।

गुरुणा तत्त्वविदा किल शिष्यो यदि मोक्षमात्रकृतहृदयः।

मोक्षैकदानचतुरा दीक्षा सेयं परोपनिषदुक्ता।।

एतद्दीक्षादीक्षित एतद्विधात्रयं स्मरन् हृदये।

बाह्यर्चादि विनैव हि व्रजति परं धाम देहान्ते।।"

(तं०आ०30,102-106)

श्रीसिद्धा :— सिद्धातन्त्रम्। यथा—

"श्री सिद्धाटनसद्भावमालिनीसारशासने।"

(तं०आ०28,113)

त्रिकागमेषु क्रियाप्रधानं तन्त्रं सिद्धातन्त्रम्। अस्य वाक्यानि बहुधा समुद्धृतानि तन्त्रालोके विशेषतश्च तद्विवेके।

यथा—

"तत्र क्रियाप्रधानं सिद्धातन्त्रम्।"

(तं०आ०वि०,खं०1,पृ०,49)

श्रीहस्तनयः :— कोऽपि साधनापरो ग्रन्थः। यथा—

"तथा चः—

'सदसद्विभेदसूतेर्दलनपरा कापि सहजसंवित्तिः।

उदिता त्वमेव भगवति जयसि जयाद्येन रूपेण।।'

इत्यादि श्रीहस्तनयाभ्युदितेन जयाद्येनापि रूपेण त्वमेव परिस्फुरितेत्युक्तम्।' इति।"

(तं०आ०वि०,खं०3,पृ०, 200)

श्रुतज्ञानम् :— शास्त्रार्थपरिशीलनतो निश्चितं ज्ञानं श्रुतं भवति। केवलं बुद्धिगताध्यवसायात्मकं साक्षादनुभूतिरहितमेतज्ज्ञानम्। यथा—

"शास्त्रार्थस्य परिज्ञानं विक्षिप्तस्य श्रुतं मतम्।"

(मा०वि०तं०4,29)

श्रुतिस्मृती :— अपूर्वं पारमेश्वरं धर्मादीनां प्रकाशनं श्रुतिः। पूर्वप्रकाशितस्यैव धर्मतत्त्वस्य तत्पूर्वप्रकाशानुसारं यत् पुनः प्रकाशनं सा स्मृतिः। यथा—

"तत्पूर्वप्रकाशतादात्म्यप्रवेश एव हि तस्य योगिनस्तदानीं स्मर्तृता। तत एव मन्वादीनां धर्मविषये प्रकाशनमपि सार्वज्ञ्यात् भवत् परमेश्वरस्य अनादेरयमित्थं प्रकाश इति तत्प्रकाशप्रमाणीकरणेन भवत् स्मृतिरुच्यते। तदपूर्वपारमेश्वर प्रकाशानुग्रहोत्थं हि प्रमाणं श्रुतिः।"

(ई०प्र०वि०वि०,खं०2,पृ०,51)

श्रेष्ठो गुरु :— सांसिद्धिको गुरुर्यदि शास्त्रज्ञाद् गुर्वन्तरात् शास्त्राभ्यासादिना संस्कृतो भवेत् तर्हि श्रेष्ठेष्वपि श्रेष्ठोऽसौ गण्यते। तादृशो गुरुः साक्षाद्भैरवः। यथा—

"यस्त्वकल्पितरूपोऽपि संवाददृढताकृते।।

अन्यतो लब्धसंस्कारः स साक्षाद्भैरवोगुरुः।

यतः शास्त्रक्रमात्तज्गुरुप्रज्ञानुशीलनात्।।

आत्मप्रत्ययितं ज्ञानं पूर्णत्वाद्भैरवायते।"

(तं०आ०4,76-78)

"एवमेवैतत्, नान्यथा' इत्येवं निश्चयोत्पादात् दार्ढ्यं 'प्राप्तमत् एव नैराकाङ्क्षयात् पूर्णं सद् भैरवायते :—

निराशंसानुत्तरपरज्ञानरूपतया प्रस्फुरति।' इत्यर्थः।"

(तं०आ०वि०,खं०3,पृ०,83)

श्लोकवार्तिकम् :— मालिनी विजयवार्तिकमेवाभिनवगुप्ताचार्याः श्लोकवार्तिकमिति वा मालिनीश्लोकवार्तिकमिति वा वदन्ति। तद्यथा—

"अन्वर्थत्वं चात्र दर्शितं तन्त्रालोके श्लोकवार्तिके च।"

(तं०सा०,पृ०,107)

ष

ष :—मातृकाक्रमे शुद्धविद्याया यद्वास्तविकं तत्त्वमनुत्तरशिवशक्तिविशेषप्रतिबिम्बरूपत्वं तस्याभिव्यञ्जको वर्णः।

षकारः —

द्र०:- **'पददीक्षा'** इति।

द्र०:- **'षट्त्रिंशत्तत्त्वदीक्षा'** (4) इति च।

षट्त्रिंशतत्त्वम् :— शक्तितत्त्वं विश्वात्मकत्वेनान्तः कृतवेद्यजातम्; तदुपरि वेद्यवलयात्मकं विश्वोत्तीर्णं सद् भावनादिविषयत्वेन चकास्ति यत्तदेव षट्त्रिंशं शिवतत्त्वम्। तद्यथा—

"यद्वेद्यं किञ्चिदाभाति तत्क्षये यत्प्रकाशते।
तत्तत्त्वमिति निर्णीतं षट्त्रिंशं हृदि भासते।।"

(तं०आ०11,24)

षट्त्रिंशत्तत्त्वदीक्षा :— तत्त्वाध्वानुसारं तत्तद्भुवनकलामन्त्रवर्णपदादिकमालम्ब्य विधीयमाना आणवोपायानुकूला दीक्षा भावनाभ्यासपरा। यथा—

1- "षट्त्रिंशत्तत्त्वदीक्षायां तु पृथिव्यां निवृत्तिः कला, अष्टोत्तरशतं भुवनानां, प्रकृतिपद्मान्नव पद्मानि प्रकृत्यन्तं तेषामेव नियुक्तत्वात्, सद्योहृदये मन्त्रो, क्ष- वर्णः।

2- जले प्रतिष्ठा कला, वामदेवशिरः शिखास्त्रयो मन्त्राः, पदानि पूर्वोक्तानि नव। एतानि मन्त्रकलापदानि प्रकृत्यन्तं यावत्। एवमेव ह-वर्णः, भुवनानि लकुलीशादीन्यमरान्तान्यष्टौ।

3- तेजसि स-वर्णः, भैरवादीनि हरिश्चन्द्रान्तान्यष्टौ भुवनानि।

4- वायौ ष-वर्णः, भीमादिगयान्तानि अष्टौ भुवनानि।

5- खे श- वर्णः, स्थाण्वादिवस्त्रापदान्तानि भुवनान्यष्टौ।

6- गन्धे व-वर्णः, शार्वं भुवनम्।

7- रसे ल-वर्णः, भुवनं भवस्य।

8- रूपे र-वर्णः, भुवनं पशुपतेः।

9- स्पर्शे य-वर्णः, ईशानभुवनम्।

10- शब्दे म-वर्णः, भीमभुवनम्।

11- उपस्थे भ-वर्णः, कश्यपभुवनम्।

12- पायौ ब-वर्णः, मित्रस्य भुवनम्।

13- पादे फ-वर्णः, विष्णोर्भुवनम।

14- पाणौ प-वर्णः, इन्द्रस्य भुवनम्।

15- वाचि न-वर्णः, अग्नेर्भुवनम्।

16- घ्राणे ध-वर्णः, पृथ्व्या भुवनम्।

17- जिह्वायां द-वर्णः, वरुणस्य भुवनम्।

18- चक्षुषि थ-वर्णः, खेर्भुवनम्।

19- त्वचि त-वर्णः, वायोर्भुवनम्।

20- श्रोत्रे ण-वर्णः, दिशां भुवनम्।

21- मनति ढ-वर्णः, चन्द्रस्य भुवनम्।

22- अहंकृतौ ड-वर्णः, स्थलेश्वरादिछगलाण्डान्तानि भुवनान्यष्टौ।

23- बुद्धौ ठ-वर्णः, देवयोनिक्रोधतेजोयोगाष्टकानि चत्वारि भुवनानि।

24- अन्तर्भूतगुणतत्त्वे प्रधाने ट-वर्णः, गुरुपङ्क्तित्रयादाद्यानां शिवशक्तियोक्तृणां त्रीणि भुवनानि क्रोधेश्वराष्टकभुवनं प्रकृतिभुवनं चेति पञ्चभुवनानि। एतावत्पर्यन्तं कलामन्त्रपदानि प्राग्वत्।

25- पुंसि विद्या कला, अघोरकवचौ मन्त्रौ, मायान्ते षट्के कलामन्त्रौ एवमेव, ऊकारादियकारान्तमुत्तरदिक्पद्मगतं पदनवकं, ञ-वर्णः, तुष्टिसिद्धिगुरुशिष्यपङ्क्तित्रयनाडीविग्रहाष्टकदेहपाशागन्तुगाणेशवैद्येशपाशभुवनानि द्वादश।

26- नियतौ वायव्यपद्मगतमूकारादिवकारान्तं पदनवकं, झ-वर्णः, वामदेवाद्यष्टकभुवनम्।

27- कालतत्त्वे ऊकारादिलान्तं वारुणपद्मगतं पदनवकं, ज-वर्णः, शुद्धादिशंभुराडन्तशिवदशकभुवनानि।

28- रागे पौरुषमेव पदनवकं, छ-वर्णः, सुहृष्टादिरुद्रदशकस्य भुवनं, कल्याणादेश्च गुरुशिष्यदशकस्य भुवनम्।

29- अशुद्धविद्यायां नैयतमेव पदनवकं, च-वर्णः, वामादिमनोन्मनान्तं भुवननवकम्।

30- कलायां पदनवकं कालीयमेव, ङ-वर्णः, महादेवमहातेजोमहाज्योतिषां भुवनत्रयम्।

31- मायायां निवृत्तिपद्मादूकारादिमान्तं पदनवकं, घ-वर्णः, गोपत्याद्यनन्तान्तानि सप्तभुवनानि।

32- शुद्धविद्यायां याग्यपद्मादूकारादिक्षान्तं पदनवकं, शिष्टं पददीक्षावत्।

33- ईश्वरतत्त्वे आग्नेयपद्मादूकारादिरेफान्तं पदनवकं, शिष्टं पददीक्षावत्।

34- सदाशिवतत्त्वे प्राक्पद्मादूकारादिहान्तं पदनवकं, शिष्टं पददीक्षावत्।

35- शक्तृभिन्ने शिवतत्त्वे मध्यपद्मादूकारादिप्रणवान्तं पदनवकं, शिष्टं पददीक्षावत्।"

(स्व०तं०उ०,प०5,पृ०,34-35)

षट्त्रिंशत्तत्त्वसंदोहः :— अमृतानन्दकृतात् सौभाग्यसुभगोदयात् कान्यपि पद्यान्यादाय केनाप्यानन्दाचार्येण विरचितो लघुकायो ग्रन्थस्ततपद्य व्याख्यामयः। अत्र ग्रन्थे शिवादारम्य धरण्यन्तं तत्त्वानां स्वरूपं प्रकाशितं वर्तते। तद्यथा—

"तत्त्वानां लक्षणानि मयैव सौभाग्यसुभगोदये निरूपितानि, यथा यदयमनुत्तरमूर्ति .....। इत्यादि"

(यो०ह०दी०,पृ०,124-126)

परमनेन टीकाकृता अमृतानन्दस्य नामोल्लेखोऽपि नैव क्वापि कृतः। तद्यथा—

"इति षट्त्रिंशत्तत्त्वसंदोहः श्रीमद्राजानकानन्दाचार्यविरचित विवरणोपेतः .....।"

(ष०त्रि०त०सं०वि०,पृ०,13)

षट्त्रिंशत्तत्त्वानि :— आरोहक्रमेण— पंच महाभूतानि = 5, पञ्चतन्मात्रतत्त्वानि = 10, पञ्चकर्मेन्द्रियाणि = 15, पञ्चज्ञानेन्द्रियाणि = 20, त्रीण्यन्तःकरणानि = 23, पुरुषः, प्रकृतिः = 25, पञ्चकञ्चुकतत्त्वानि = 30, मायातत्त्वम् = 31, शुद्धविद्यातत्त्वम् = 32, ईश्वरतत्त्वं = 33, सदाशिवतत्त्वं 34, शिवशक्ती-35, 36 तत्त्वे इति। शुद्धानि पञ्चतत्त्वान्यन्तिमानि। यथा—

"अथ तत्त्वानि गण्यन्ते स्थितान्यत्र यथाक्रमम्।

शिव-शक्ति-सदाशिव-ईश्वर-शुद्धविद्या-माया-कला-राग-नियति-काल-पुरुष-प्रकृति-बुद्धिः-अहङ्कार-मनः- श्रोत्र-त्वक्-चक्षु-जिह्वा-घ्राण-वाक्-पाणि-पाद-पायु-उपस्थ-शब्द-स्पर्श-रूप-रस-गन्ध-आकाश-वायु-वह्नि सलिल-भूमयः, इत्येतानि षट्त्रिंशत्तत्त्वानि।।"

(पू०प्र०खं०2,136-138)

~ उर्ध्वागमा :— **पञ्चस्रोतःसमाख्याः शैव-रौद्र-भैरवागमा द्विनवतिसंख्याकाः। ते च 10+18+64= 92 इति। तेषु तावद् तेषूत्कृष्टाश्चतुष्षष्टिर्भैरवागमाः एव। ते चाभेददृष्टिप्रधानाः पराद्वैतपरशिवपदप्रापकाः। यथा—**

दशाष्टादशधा स्रोतः पञ्चकं यत्ततोऽप्यलम्।
उत्कृष्टं भैरवाभिख्यं चतुःषष्टिविभेदितम्।।"

(तं०आ०37,17)

भेददृष्टिप्रवणाः शिवागमा अप्यूर्ध्वेष्वागमेषु गण्यन्ते क्वचित्। यथाऽत्रैव प्राक्।

"अष्टाविंशतिरित्येवमूर्ध्वस्रोतोविनिर्गताः।।"

उद्धः०:- (तं०आ०वि०,खं०1,पृ०,40)

षडध्वानः :— (1) बाह्यालम्बनाश्रितो योगविधिः षट्प्रकारः। पर-सूक्ष्म-स्थूलात्मकानां वर्णाध्वा, मन्त्राध्वा, पदाध्वेति कालाध्वत्रयम्। कलाध्वा, तत्त्वाध्वा, भुवनाध्वेति च देशाध्वत्रयम्। मिलित्वा षडध्वानः एते। यथा—

"त्रिकद्वयेऽत्र प्रत्येकं स्थूलं सूक्ष्मं परं वपुः।
यतोऽस्ति तेन सर्वोऽयमध्वा षड्विध उच्यते।।"

(तं०आ०6,36)

(1) नामरूपात्मकं विश्वं पारमेश्वरपराशक्तिप्रतिबिम्बरूपम्। तत्र वाचकात्मकं नाम वर्ण-मन्त्र-पदभेदेन त्रिधा पर सूक्ष्म-स्थूल-रूपतया स्थितम्। वाच्यात्मकं रूपं कला-तत्त्वभुवनभेदेन त्रिधा पर सूक्ष्म-स्थूलरूपतया स्थितम्। सर्वमपीदं स्वात्मपरमेश्वररूपतया द्रष्टव्यं साधकैः सर्वसर्वात्मकता स्थित्या। एवं भाव्यमानं वस्तुतत्त्वं शिवभावसमावेशफलप्रदम्। यथा—

"परमेश्वरश्चिदानन्दघनः स्वतन्त्रभट्टारकः उन्मनाख्यया स्वस्वातन्त्र्यशक्त्या शून्यादिक्षित्यन्तमनन्तं वाच्यवाचकरूपं स्वभित्तौ स्वानधिकमपि अधिकमिव युगपदवभासयति। तत्र वाचकं ग्राहकभागावस्थितं परसूक्ष्मस्थूलभेदेन वर्णमन्त्रपदात्मकं त्रिधा, वाच्यमपि ग्राह्यभागाभिनिविष्टं कलातत्त्वभुवनात्मकं तथैव।"

(वि०भै०उ०,पृ०,47)

~ तदायतनम् :— **संविदेव षण्णामाप्यध्वनां मूलभूतमायतनम्। यथा—**

"अध्वा समस्त एवायं चिन्मात्रे संप्रतिष्ठितः।
यत्तत्र नहि विश्रान्तं तन्नभः कुसुमायते।।"

(तं०आ०8,3)

ततो नैवाविद्यादावधिष्ठिता इमे।

~ तत्प्रतिष्ठास्थानम्: — **देशकालभेदात्मकस्य षडध्वात्मनः प्रमेयस्य प्रमातृप्रकाशनेन विमृश्यतयैव सिद्धिः, ततोऽस्य प्रतिष्ठा प्रमातृतत्त्वे। प्रमाता च प्राणी, प्राणनसमर्थः। ततः प्राणनस्यैव तत्र प्राधान्यम्। अत एव प्रमातृत्वेनावभासमाने प्राणे एवं देशकालरूपस्य समस्तस्याध्वनः प्रतिष्ठा। एतदेवाभिप्रेत्योक्तम्। यथा—**

"यावान् समस्त एवायमध्वा प्राणे प्रतिष्ठितः।"

(तं०आ०6,21)

~ तदभ्यासविधिः :— **कालाध्वत्रयं भावनया प्राणे विलाप्यते, देशाध्वत्रयञ्च देहे, देहोऽपि तथैव प्राणे, प्राणो बुद्धौ, बुद्धिः शून्याकारे पुरुषतत्त्वे, पुरुषः पूर्णायां स्वात्मसंविदि। एवं कृते सति साधकः स्वात्मानं परिपूर्णशिवात्मकं साक्षात् कुर्वञ्जीवन्मुक्तिं लभते। स एष षडध्वयोगविधिः। उक्तमेतद्विषये—**

"अध्वानमिमं सकलं देहे प्राणेऽथधियि महानभसि।
संविदि च परं पश्यन् पूर्णत्वाद्भैरवी भवति।।"

(तं०सा०,पृ०,68)

~ विशेषतः :— **कालाध्वनि परोऽध्वा वर्णः, सूक्ष्मो मन्त्रः, स्थूलश्च पदम्। देशाध्वनि परोऽध्वा कला, सूक्ष्मस्तत्त्वात्मकः स्थूलश्च भुवनात्मकः। यथा—**

"त्रिकद्वयेऽत्र प्रत्येकं स्थूलं सूक्ष्मं परं वपुः।"

(तं०आ०6,36)

~ विस्तरतः :— **परमशिव एव षडध्वरूपतया तिष्ठति। तत्र प्रमातृरूपतायां तिष्ठन् वर्णाध्वेतिकथ्यते, प्रमातृरूपतायां च मन्त्राध्वेति, तथैव प्रमाणरूपतायां पदाध्वेति। प्रमाणरूपताया आवेशमपरित्यजन्नेव प्रमेयरूपतया स्थितः सन् स एव कलाध्वेति, शुद्धायां प्रमेयतायां तिष्ठन् तत्त्वाध्वेति, तत्त्वाध्वनः स्थूलतायां तिष्ठन् स एव भुवनाध्वेति परिभाष्यते। यथा—**

"सोऽयं समस्त एवाध्वा भैरवाभेदवृत्तिमान्।।
तत्स्वातन्त्र्यात् स्वतन्त्रत्वमश्नुवानोऽवभासते।
सोऽयं प्रमातृरूपस्थो मन्त्राध्वेति विभाव्यते।।
प्रमारूपतया सोऽयं वर्णाध्वेति निरुच्यते।
प्रमाणरूपतामेत्य प्रयात्येष पदाध्वताम्।।
प्रमाणरूपतावेशमपरित्यज्य मेयताम्।
गच्छन् संकल्पनायोगात् कलाध्वा मातृसंगतः।।
शुद्धे प्रमेयतायोगे स तत्त्वाध्वेति गृह्यताम्।
तत् स्थौल्याधारतायोगाद् भुवनाध्वेति वर्णितः।।"

(मा०वि०वा०1,1013-1017)

षडरं :— ~ चर्यासु :— **कौलिकचर्याभ्यासे-शिवशक्त्यानन्दचक्रद्वय संघट्टे षडरत्वस्थितिर्जायते।**

यथा—

"चर्याक्रमेऽपि हि सिद्धयोगिनीत्रिकोणद्वयसम्पुटीभावेन षडरमुद्रामयी स्थितिर्जायते, इति।"

(तं०आ०वि०,खं०2,पृ०,105)

षडराः :— **त्रिकोणद्वयमेव षडराः। तथा हि अनुत्तरानन्दौ यदा त्रिकोणरूपेण एकारेण पुनः संघट्टमासादयतस्तदाऽपरस्य त्रिकोणस्य ऐकारस्य प्रसरः। यथा—**

"अनुत्तरानन्दशक्ती तत्र रूढिमुपागते।।
त्रिकोणद्वित्वयोगेन व्रजतः षडरस्थितिम्।"

(तं०आ०3,95-96)

"लिपौ पुनरेवंरूपत्वमतिरहस्यत्वान्न प्रदर्शयते-इत्येका-

रस्यैव द्विगुणीभावोन्मीलनायोपरिरेखाविन्यासः।"

(तं०आ०वि०,खं०2,पृ०,105)

~ तच्चक्र देव्यः :— उक्ता यथा—

"विश्वा तदीशा हारौद्री वीरनेत्र्यम्बिका तथा।
गुर्वीति षडरे देव्यः श्रीसिद्धावीरदर्शिताः।"

(तं०आ०33,2)

~ पुंदेवता (तत्र) :— उक्ता यथा—

"बलिश्च बलिनन्दश्च दशग्रीवो हरो हयः।।
माधवः षडरे चक्रे .....।"

(तं०आ०33,7-8)

षडर्धशास्त्राणि :— सौरभर्गशिखादीनि यानि तावदूर्ध्वोर्ध्वस्रोतसः प्रवृत्तानि षट्शास्त्राणि तेषां मध्ये पूर्वं यच्छास्त्राणां त्रिकं तदेव षण्णामर्धत्वेन त्रिकेति वा षडर्धेति वा संज्ञया लोके प्रसिद्धमागमत्रयम्। तच्च सिद्धा-नामक (वामक) मालिनीत्यभिधानमागमत्रयं काश्मीरशैवदर्शनस्य प्रमुखं स्त्रोतः। षण्णामर्धत्वेनैवेदं त्रिकनामकम्। न पुनः केवलं रहस्यात्मकत्वे- नैवास्य शास्त्रस्येदं नाम, तथाविधत्वे द्वादशार्द्धार्द्धाद्यप्यस्य नाम क्वचिदुक्तं भवेत्।

यथा—

"इह यावत्तु मुख्येयं षडात्मा शास्त्रसन्ततिः।।
एतत् पूर्वार्धभागीनि त्रिकशास्त्राणि यानि तु।
षडर्धसंज्ञया तानि गुरुभिर्भाषितान्यलम्।।
न तु गूढरहस्यत्वादेवैष वचनक्रमः।
एवं हि द्वादशार्धार्धमित्याद्यपि न किं भवेत्।।"

(मा०वि०वा०1,164-166)

षडर्धश्लोकवार्तिकम् :— तन्त्रालोकस्य नामान्तरमेतत्। यथा—

"यथोक्तं मयैव श्रीषडर्धश्लोकवार्तिके तन्त्रालोके।"

(ई०प्र०वि०वि०,खं०1,पृ०,33)

षडात्मा :— षड्दले चक्रे षड्देवतात्मकतया प्रकाशमानः शिवः। यथा—

"पञ्चमूर्तिः षडात्मायं सप्तकोऽष्टकभूषितः।"

(तं०आ०1,110)

षडात्मा इति यद्वक्ष्यति

"विश्वा तदीशिका रौद्री वीरका त्र्यम्बिका तथा।
गुर्वीति षडरे देव्यः .....।।"

(तं०आ०वि०खं०1,पृ०,153)

षड्जन्मा :— ~ पशु :— षड्वारं पशुयागे निवेदितः पशुः। यथा—

"निवेदितः पुनः प्राप्तदेहो भूयो निवेदितः।
षट्कृत्व इत्थं यः सोऽत्र षड्जन्मा पशुरुत्तमः।।"

(तं०आ०16,63)

षड्धातुसमीक्षा :— ग्रन्थः कोऽपि। तद्यथा—

'उक्तं षड्धातु समीक्षायाम्—

"कर्माणि मोहमूलानि संसृतेः कारणं यतः।
तत्क्षयात् कर्मनिर्मुक्तः स्वस्थः शान्ततमस्ततः।।
इति।'

(स्पं०प्र०,पृ०,99)

षड्विधः :— ~ शिवः— भुवनविग्रहादिरूपत्वेनोपास्यः। यथा—

"भुवनं विग्रहो ज्योतिः खं. शब्दो मन्त्र एव च।
विन्दुनादादिसम्भिन्नः षड्विधः शिव उच्यते।।"

(तं०आ०वि०,खं०1,पृ०,100)

षड्विधोऽध्वा :— त्रिकप्रक्रियानुसारं क्रियात्मिकायां दीक्षायां गुरुः शिष्यं मोचयन् क्रमेण तस्य पृथ्वीतत्त्वात् शिवतत्त्वं यावत् सर्वमपि देशकालात्मकमध्वानं शोधयति, येन शुद्धः सन्नसौ परमशिवतत्त्वं स्वस्वरूपतया पश्यँस्तदेव समाविशति तेन वा समाविष्टो भवति। उभयथा स्वात्मानं परमशिवतया साक्षात् कुरुते। दीक्षाकाले गुरुः प्रायः शोधनक्रियासंकल्पवाक्यानि संक्षेपतयैव समुच्चरन्—"निवृत्ति-कलां शोधयामि" इत्यादि भाषमाण एव तत्तत् कला-सम्बन्धि सर्वमपि देशकालप्रपञ्चं तस्य शोधयति। तत्र शोधनं तावन्मार्गद्वयसरण्या कुर्वंस्तस्य देशकृतं कालकृतं च बन्धनमपाकरोति। तदेतत्तत्त्वशुद्धेरध्वद्वयम्। उभयं पुन-स्त्रिधा स्थूल-सूक्ष्म-पररूपतया। तत्र देशाध्वा भुवन-तत्त्व-कलात्मकः कालाध्वा च पदमन्त्रवर्णात्मकः शोध्यो भवति। तत् प्रपञ्चस्तावदयम्:—

कला भुवनानि	पदानि तत्वानि	मन्त्राः		वर्णाः (विलोमक्रमेण)	
निवृत्तिः	1	1	1=क्ष	16	1
प्रतिष्ठा	5	5	23 (ह तः ट)	56	23
विद्या	2	2	7 (त्र तः घ)	28	7
शान्ता	1	1	3 (ग तः क)	18	3
यान्त्यतीता	1	1	16 स्वराः (अः तः अ)	ग	1

तदुक्तम् :—

"आद्यं धारिकया व्याप्तं तत्रैकं तत्त्वमिष्यते।।
एकमेकं पृथक् क्षार्णं पदार्णमनुषु स्मरेत्।
कालाग्निभुवनाद्यावद्वीरभद्रपुरोत्तमम्।।
पुरषोडशकं ज्ञेयं षड्विधोऽध्वा प्रकीर्तितः।
आप्यायिन्या द्वितीयं च तत्र तत्त्वानि लक्षयेत्।।
त्रयोविंशत्यबादीनि तद्वट्टाद्यक्षराणि च।
पदानि पञ्च मन्त्राश्च षट्पञ्चाशत्पुराणि च।।
तत्त्वानि सप्तबोधिन्या तच्चतुर्धा पुराणि च।
तृतीये सप्त वर्णाः स्युः पदमन्त्रद्वयं द्वयम्।।
उत्पूयिन्या चतुर्थं तु तत्र तत्त्वत्रयं विदुः।
वर्णत्रयं मन्त्रमेकं पदमेकं च लक्षयेत्।।
अष्टादश विजानीयाद्भुवनानि समासतः।
शिवतत्त्वं परं शान्तं कला तत्रावकाशदा।।
स्वरषोडशकं मन्त्रं पदं चैकं विलक्षयेत्।
इत्येवं षड्विधोऽप्यध्वा समासात्परिकीर्तितः।।"

(मा०वि०तं०2,50-57)

एतैरेवाध्वभूतैः पदार्थैर्वेष्टितः सन्नधोऽधः प्रसरन्नात्मा

पशुतां यातः, एतैरेव च क्रमेण शोध्यमानैरध्वकल्पैरुपर्यारोहन्नसौ परशिवतां पुनरभ्येतीत्यत एवैतेषामध्वेति संज्ञा सुप्रसिद्धा।

षड्विधो — ~ न्यासः — **(1) मूर्तिन्यासः (नवात्मा), (2) सृष्टिन्यासः (मातृका), (3) त्रितत्त्वन्यासः, (4) अघोराद्यष्टकन्यासः, (5) मुर्त्यङ्गन्यासः, (6) शिवन्यासः इति।**

(दृश्यताः — तं०आ०15,247-248)
(तं०आ०वि०,खं०9,पृ०,123)

"न्यासः षोढैव कीर्तितः।।"

(तं०आ०15,257)

"षोढैवायमुदाहृतः।।"

(तं०आ०15,258)

एतेषां मन्त्राणां रहस्यात्मकत्वेन नातितरां स्पष्टतां नीतोऽयं विषयः आचार्यैः। ततो गुरुमुखादेव स्पष्टतरं वेद्यो।

षण्ठवर्णाः :— (1) ऋ,ॠ लृ, लॄ इति चत्वारो वर्णाः। नैतेभ्यः कस्यापि व्यञ्जनवर्गस्य सृष्टिः सैवैषां षण्ठता। स्रष्टत्वौन्मुख्यत एव स्वात्मनो यत् स्रष्टव्यं प्रति स्रष्टत्वविमर्शनं तेन विश्वपरिपूर्णताया हानिरिव मनाक्। सैव सूक्ष्मसूक्ष्मतरा शून्यता। तत्कारणादेव स्रष्टत्वहानिरिव क्षणं या चकास्ति सैव षण्ठता याऽनेन वर्णचतुष्टयेन द्योत्यते। यथा—

"अनुत्तरसंवित् ..... स्वरूपविस्मरणेन शून्यीभूतेव बहिर्मुखा ऋ ॠ इति, निश्चलशून्यताप्त्या लृ लॄ इति, एतच्चतुष्कं शून्यत्वाप्त्या दग्धबीजमिव षण्ठरूपं भाष्यते, न तु सर्वथा बीजत्वव्यपगमः।"

(प०त्री०वि०,वृ०,पृ०,5)

बीजत्वमंत्रोतप्रोतत्वेन स्थितस्य इवर्णस्यैव, न तु रेफांशलांशयोः। तत एव बीजभूतादंशाद् रकारलकारयोः सृष्टिः।

यथा—

"इच्छाशक्तिश्चया द्वेधा क्षुभिताक्षुभितत्त्वतः। सा विजातीय शक्त्यंशप्रोन्मुखी याति यात्मताम्। सैवशीघ्रतरोपात्तज्ञेयकालुष्यरूषिता विजातीयोन्मुखत्वेन रत्वं लत्वं च गच्छति।"

(तं०आ०3,154-155)

एषैव वार्ता टवर्ग-तवर्गयोः सृष्टेः। यथा—

"या तूक्ता ज्ञेयकालुष्यभाक् क्षिप्रचारयोगतः।।
द्विरूपायास्ततो जातं टताद्यवर्गयुग्मकम्।"

(तं०आ०3,151-152)

क्षिप्रचरयोगो लकाररकारयोरन्तः प्रवेश इवर्णे।

(2) ऋ, ॠ, लृ, लॄ इत्येते वर्णाःस्वराः इवर्णस्यैव रूपान्तरात्मकाः। परमत्र रकारलकारयोरपि श्रुतिः। सैषां व्यञ्जनरूपता न च स्फुटात्र व्यञ्जनता, श्रुतिमात्रत्वेन तस्याः। तदिदं वर्णचतुष्टयं बीजयोन्यात्मकत्वेनोभयाकारं सन्नपुंसकम्। स्वरव्यञ्जनयोर्बीजयोनिरूपत्वेन पुस्त्वं स्त्रीत्वं च यतः। यथा—

" न हि वर्णश्रुतिरेव वर्णः, अत एव नरसिंहवत् जात्यन्तरमिदमिति श्रीमहाभाष्यकारः, अत एव चैतद्वर्णचतुष्टयमुभयच्छायाधारित्वाद् "ऋ ॠ, लृ, लॄ चतुष्कं च नपुसंकगणस्तथा।' इत्याद्युक्त्या सर्वत्रैव नपुंसकत्वेन व्यपदिश्यते।"

(तं०आ०वि०,खं०2,पृ०,90)

"अक्षुब्धा ज्वलनशक्त्याच्छुरितेच्छा ऋ, क्षुब्धा तु ॠ, एवं धराशक्त्याच्छुरिता लृ लॄ इति।"

(तं०आ०वि०,खं०2,पृ०,90)

(3) यतो हि इ -ई वर्णे शून्यरूपानुप्रवेशेन ऋ, ॠ, लृ लॄ रूपतयावतिष्ठेते ततः षण्ठता वर्णचतुष्टयस्यास्य भण्यते। यथा—

"एतच्चतुष्कं शून्यरूपनुप्रवेशाद् दग्धबीजमिव षष्ठरूपं भण्यते न तु सर्वथा बीजरूपत्वाभावात्।"

(प०त्री०वि०,पृ०,174)

इच्छायामीषणायां च यदाऐषणीयमन्तरमनुप्रविश्यास्फुटतया प्रकाशते, तदा इकारे ईकारे च ऋकारादिवर्णरूपताप्राप्तिः। तदेषणीयप्रवेशे प्रकाशप्राधान्याद्रकारश्रुतिः, विश्रान्तिप्राधान्याच्च लकारश्रुतिः। स्वरान्तःप्रवेशादस्या श्रुतेर्न स्फुटं व्यञ्जनत्वम्। अपितु स्वरमध्यगत्वमेव। तत्र रकारान्तः प्रवेशे ऋ, ॠ, इति लकारान्तः प्रवेशे च लृ लॄ इति वर्णचतुष्टयविमर्शः। स्वरव्यञ्जनोभयमयत्वेन षण्ठवर्णतास्य स्वरचतुष्टयस्य। यथा—

"यदा तु इच्छायामीशने च, कर्मानुप्रविशति यत् तदिष्यमारणम् ईश्यमानमिति चोच्यते, तदास्य द्वौ भेदौ प्रकाशमात्रेण रश्रुतिः, विश्रान्त्या ल श्रुतिः। रलयोः प्रकाशस्तम्भस्वभावत्वात्, इष्यमाणं च न बाह्यवत् स्फुटम्, स्फुटरूपत्वे तदेव निर्माणं स्यात्, नेच्छा, ईशनं वा, अतोऽस्फुटत्वादेव श्रुतिमात्रं रलयोः, न व्यञ्जनवत् स्थितिः। तदेतद्वर्णचतुष्टयमुभयच्छायाधारित्वान्नपुंसकम्- ऋ, ॠ लृ, लॄ इति।"

(तं०सा०,पृ०,13-14)

~ उभयभिन्नाः :— **षण्ठवर्णचतुष्टयं वस्तुतो नैव बीजं न चापि योनिः। यथा—**

"प्रकृतं ब्रूमहे नेदं बीजं वर्णचतुष्टयम्।
नापि योनिर्यतो नैतत् क्षोभाधारत्वमृच्छति।।"

(तं०आ०3,91)

~ भृष्टबीजकल्पाः :— **षण्ठवर्णानां क्षोभान्तराभावान्न तेभ्योऽन्येषां बीजवर्णानां प्रसरः। स्वरत्वेन तेषां बीजता, सृष्ट्यन्तराभावेन चाबीजता। ततो भृष्टबीजकल्पेव तेषां बीजता। यथा—**

"क्षोभान्तरस्यासद्भावान्नेदं बीजं च कस्यचित्।"

(तं०आ०3,81)

"नेदं बीजमिति" स्वात्ममात्रविश्रान्तेः, क्षोभान्तरानुल्लासकतया स्वकार्याकरणाद् दग्धप्रायत्वात्, न तु सर्वसर्विकया बीजरूपत्वाभावात्।"

(तं०आ०वि०,खं०2,पृ०,92)

~ षण्डात्मानः :—

"इच्छेशनान्तरारूढा स्फुटास्फुटजगन्मयी।

चत्वारः परतो वर्णाः षण्डात्मानः प्रचोदिताः।।"

(अ०प्र०पं०,33)

~ स्पष्टत्वहीनाः :— **तवर्गस्य, टवर्गस्य, रकारस्य, लकारस्य च न सृष्टिः षष्ठवर्णांशतः। अपितु यस्तत्र इवर्णांशस्तत एवैषां सृष्टिः। यथा—**

"तथाहि तत्रगा यासाविच्छाशक्तिरुदीरिता।
सैव सूते स्वकर्त्तव्यमन्तःस्थं स्वेष्टरूपकम्।।"

(तं०आ०3,176)

षाट्कौशिकम् :— षट् कोशा यस्य तत् षाट्कौशिकम् शरीरम्।

तच्चिः-त्वङ्, मांस, रुधिर, मज्जा, अस्थि, शुक्ररूपैः, षड्भिः कोशैः परिगतम् अस्ति।

तथाभूतं देहं मलिनमुच्यते। यथा—

"धारणामारभेतात्र युगपच्छोषणादिभिः।
षाट्कौशिकं तु मलिनं निर्दग्धं तत्र भावयेत्।।"

(ने०तं०खं०1,पृ०,67-68)

षाड्गुण्यम् :— षण्णां सर्वज्ञतादिगुणानां यदीश्वरे विद्यमानताऽसौ तस्य भगवतो गुणषट्कम्। यथा—

"श्री भगवान् किल पूर्णषाड्गुण्यत्वाच्छरीरसंपर्कमात्र-रहितोऽपि स्थितिकारित्वात् कारुणिकतया आत्मांशं सृजति। आत्मा-पूर्णषाड्गुण्यः।"

(भ०गीतार्थसं०,पृ०,46)

"सर्वज्ञता, तृप्तिः, अनादिबोधः, स्वतन्त्रता, नित्यमलुप्तशक्तिः, अनन्तशक्तिश्चेति षाड्गुण्यम्।"

उद्ध०:- (भ०गी०सं०,पृ०,46)

षोडशकला :— (1) अकाराद्याः विसर्गान्ताः षोडशवर्णाः।

(2) मनोज्ञानेन्द्रियपञ्चकं, कर्मेन्द्रियपञ्चकं, तन्मात्रपञ्चकं चेति। (तर्कितमात्रमिदम्) यथा—

"अथेन्दुः षोडशकलो विसर्गग्रासमन्थरः।।"

(तं०आ०5,64)

"षोडश- अकाराद्या बुद्धीन्द्रियाद्याश्च कला यस्यासौ प्राप्तनिजपूर्णस्वरूपः।"

(स्वबुद्धिकल्पितैषा व्याख्या प्रतिभाति।)

(तं०आ०वि०,खं०3,पृ०,369)

षोडशारं चक्रम् :— प्रमेयप्रमाणप्रमातृप्रमाणां परस्परमोत- प्रोतत्वेन प्रत्येकं चतुर्धावभासेन षोडशधा तेषां स्थितिर्यतस्त- तस्तत् संविच्चक्रं षोडशारम्।

यथा—

"प्रमेयप्रमाणप्रमातृप्रमाणां सर्वसर्वात्मकत्वात् षोडशारं चक्रं तिष्ठति।"

(तं०आ०वि०,खं०3,पृ०,136)

षोडशारदेवाः :— उक्ता स्पष्टं मालिनीविजयोत्तरे यथा—

"अमृतोऽमृतपूर्णश्च अमृताभोऽमृतद्रवः।
अमृतौघोऽमृतोर्मिश्च अमृतस्यन्दनोऽपरः।
अमृताङ्गोऽमृतवपुरमृतोद्गार एव च।
अमृतास्योऽमृततनुस्तथा चामृतसेचनः।।
तन्मूर्तिरमृतेशश्च सर्वामृतधरोऽपरः।
षोडशैते समाख्याता रुद्रबीजसमुद्भवाः।।"

(मा०वि०तं०3,17-19)

~ तद्देव्यः :—

"सिद्धिर्वृद्धिर्द्युतिर्लक्ष्मीर्मेधा कान्तिः सुधा धृतिः।
दीप्तिः पुष्टिर्मतिः कीर्तिः सुस्थितिः सुगतिः स्मृतिः।
सुप्रभा षोडशीचेति श्रीकण्ठादिकशक्तयः।"

(तं०आ०33,6-7)

~ पुंरूपाः :— (1) उक्ताः स्पष्टम् :—

"श्रीकण्ठोऽनन्तसूक्ष्मौ च त्रिमूर्तिः शम्बरेश्वरः।।
अर्घीशो भारभूतिश्च स्थितिः स्थाणुर्हरस्तथा।
झण्ठिभौतिकसद्योजानुग्रहक्रूरसैनिकाः।।
द्वयष्टौ .....।"

(तं०आ०33,9-10)

यच्च मालिनीविजयोत्तरे 3-17 तः 19 इत्यत्र निरूपितमेतद्विषये तेन साकं यो विरोधः प्रतिभात्यसौ न विवेचितो न चापि परिहृतो जयरथेन।

(2) उक्ताः यथा—

"..... यद्वामृतस्तेन युक्ताः पूर्णामृतद्रवाः।
ओघोर्मिस्यन्दनाङ्गाश्च वपुरुद्गारवक्रकाः।।
तनुसेचनमूर्तीशाः सर्वामृतधरोऽपरः।"

(तं०आ०33,11-12)

अमृतः, अमृतपूर्णः, अमृताभः, अमृतद्रवः इत्यादि - नामानः इतिः। एतदपि तं. आ. 33, 9-10 इत्यनेन न सङ्गच्छते।

~ स्त्रीरूपाः :— **पुंदेवतानां स्त्रीलिङ्गे यानि नामानि तान्येव तत्र स्त्रीदेवतानाम्। यथा—**

"श्रीपाठाच्छक्तयश्चैताः षोडशैव प्रकीर्तिताः।"

(तं०आ०33,12)

अत्रैव 6,7 कारिकयोर्यदन्यथा प्रतिपादितं तज्जयरथेन न विवेचितम्, न च संशयो निवर्तितः।

षोडशीकला :— यथा—

"धरादिशक्त्यन्तं कादिक्षान्तविमर्शशक्तिः षोडशी कला इति गीयते।"

(प०त्री०विवृ०,पृ०,6)

द्र०:- **'विसर्गशक्तिः'** इति।

षोढान्यासः :— स च गणेशन्यासो, ग्रहन्यासो, नक्षत्रन्यासो, योगिनीन्यासो, राशिन्यासः पीठन्यासश्च क्रियाडम्बर उपयोगी।

यथा—

"गणेश-ग्रह-नक्षत्र-योगिनी-राशि-पीठाख्य-न्यास षट्कजन्या वान्तरापूर्तषट्कैकयरमा पूर्वसाधनीभूतो न्यासः षोढान्यास उच्यते।"

(सौ०भा०,पृ०,5)

स

स :—

~ मातृकाक्रमे :— **(1) सादाशिवस्य तत्त्वस्य वास्तविकीं स्थितिमभिव्यञ्जयन् वर्णः।**

(2) अकारादिहकारान्तक्रमे एव सङ्केतः।

(3) अकारादिक्षकारान्तक्रमेण एव सङ्केते सकारः ईश्वर एव ब्रह्मपञ्चकमध्ये तृतीये ब्रह्मरूपत्वादस्य। यथा—

"शादिक्षान्तं महामाया-विद्येश्वरसदाशिवाशक्त्याख्यं तत्त्वपञ्चकम्।"

(प०त्री०वि०,पृ०, 117)

~ बीजमन्त्रः :— **अमृतबीजम्। विषतत्त्वम्।**

द्र०:- **'अमृतवीजम्'** इति।

~ मन्त्ररूपतायाम् :— **(1) तृतीयं बस, यथा—**

"चतुर्दशयुतं भद्रे तिथी शान्तसमन्वितम्।
तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः।"

(प०त्री०,9–10)

~ रहस्य चर्याक्रमे :— **कामतत्त्वविषयतत्त्वनिरञ्जन-तत्त्वात्मकतया रहस्यभूतानां सादिवर्णध्वनीनां प्रतिपादनं रहस्यात्मिकयैव शैल्या सम्पादितमाचार्यैः। न च तद्रहस्यमयत्वात् स्फुटं व्याख्यातं टीकाकारैः।**

द्र०:- (तं०आ०3,165-174) इति।

(तं०आ०वि०,खं०2, पृ०,164-173) इति च।

संकर्षणीयामलम् :— किमप्यागमशास्त्रं यस्य पङ्क्तयः समुद्धृताः जयरथेन। यथा—

"श्री संकर्षणीयामले :—
'इत्येतत् परमानन्दं महासर्वमनुत्तमम्।'
इत्यादि।"

(तं०आ०वि०,खं०9,पृ०,139)

भैरवतन्त्रवर्गे यामलाष्टके न लभ्यते कोऽपि समुल्लेखोऽस्य सङ्कर्षणीयामलस्येति विजानन्तु बुधाः।

संक्षिप्तदीक्षा :— क्रियाजालाडम्बरशून्या स्वभ्यस्तज्ञानवता गुरुणानुग्रहशक्तिपातपुरःसरं विधीयमाना स्वल्पेनैव होमादिना सहकृता दीक्षा यथा—

"न रजो नाधिवासोऽत्र न भुक्षेत्रपरिग्रहः।
यत्र तत्र प्रदेशे तु पूजयित्वा गुरुः शिवम्।।
अध्वानं मनसा ध्यात्वा दीक्षयेत्तत्त्वपारगः। इत्यादि"

(तं०आ०18,1-6)

~ तत्सम्पादनाधिकारी :— **स्वभ्यस्तज्ञानवानेव गुरुः संक्षिप्तदीक्षां विधातुमलं भवति, तथा चासावेव पुत्रकं मोचयितुमलं, न साधारणो दीक्षकः। यथा—**

"यथायथा च स्वभ्यस्तज्ञानस्तन्मयतात्मकः।
गुरुस्तथा तथा कुर्यात् संक्षिप्तं कर्म नान्यथा।।"

(तं०आ०18,8)

संख्यानम् :— ~ कालीनये :— **विकल्पात्मक ज्ञानविषयीकरणम्। सम्यक् ख्यानमत्र संख्यानम्। यथा—**

"..... विकल्पः संख्यानमन्यतो व्यतिभेदनात्।।"

(तं०आ०4,174)

"भेदितस्यैव प्रमातृप्रमेयादेरर्थस्य परस्परापोहनात् इदमिदं नानिदम्, इति प्रतिनियततयावस्थापनात् संख्यानं विकल्पः।"

(तं०आ०वि०खं०3,पृ०,204)

संख्याव्यवस्था :— एकसंख्याया आरम्भ दशदशधावृद्ध्या अष्टादशस्तराः संख्याः भवन्ति तद्यथा :— (1) एकम् (2) दश, (3) शतम्, (4) सहस्रम्, (5) अयुतम्, (6) अक्षम्, (7) नियुतम्, (8) कोटिः, (9) अर्बुदम्, (10) वृन्दम्, (11) खर्वम्, (12) निखर्वम्, (13) शंखः, (14) पद्मम्, (15) सागरः, (16) मध्यम्, (17) अन्त्यम्, (18) परार्धञ्चेति। यथा—

"दशशत सहस्रमयुतं लक्षनियुतकोटि सार्बुदं वृन्दम्।
खर्वनिखर्वे शङ्खाब्जजलधिमध्यान्तमथ परार्धं च।।
इत्येकस्मात् प्रभृति हि दशधा दशधा क्रमेण कलयित्वा।
एकादि परार्धान्तेष्वष्टादशसु स्थितिं ब्रूयात्।।"

(तं०आ०6,168-169)

संघट्टः :— शिवशक्त्योराभिमुख्येन यः प्रकाशविमर्शात्मकयोः शिवशक्त्योर्मेलनात्मक इवानु-सन्धानरूपः परामर्शः स एव संघट्टः, तदेव तयोर्यामलं स्वरूपम्। तेन संघट्टेनैव सृष्टयादि पञ्चकृत्यप्रसरः।

यथा—

"तयोर्यद् यामलं रूपं स संघट्ट इति स्मृतः।
आनन्दशक्तिः सैवोक्ता यतो विश्वं विसृज्यते।।"

(तं०आ०3,68)

संचारविधिः :— कौलिकोपासनक्रमे वीरपान - सम्बन्धी विधिः।

उक्तो यथा—

"चक्रचर्यान्तरालेऽस्या विधिः संचार उच्यते।।
कलिपात्रं सुसम्पूर्णं वीरेन्द्रकरसंस्थितम्।
अवलोक्य परं ब्रह्म तत्पिबेदाज्ञया गुरोः।।
तर्पयित्वा तु भूतानि गुरवे विनिवेदयेत्।
कृत्वा भुवि गुरुं नत्वादाय सन्तर्प्य खेचरीः।।
स्वं मन्त्रं तच्च वन्दित्वा दूर्तीं गणपतिं गुरून्।
क्षेत्रपं वीरसङ्घातं गुर्वादिक्रमशस्ततः।।
वीरस्पृष्टं स्वयं द्रव्यं पिबेन्नैवान्यथा क्वचित्।"

(तं०आ०29,285-289)

~ तदवसरः :— **यागादिकर्मसु विधीयतेऽयं विधिः।**

"यागादौ यागमध्ये च यागान्ते गुरुपूजने।
नैमित्तिकेषु प्रोक्तेषु शिष्यः कुर्यादिमं विधिम्।।"

(तं०आ०29,291)

~ तद्विशेषनियमाः :—

"पर ब्रह्मण्यवेत्तारो गमागमविवर्जिताः।।
लोभमोहमदक्रोधरागमायाजुषश्च ये।
तैः साकं न च कर्तव्यमेतच्छ्रेयोर्थिनात्मनि।।"

(तं०आ०29,289-290)

संज्ञा-प्रकाराः :— अभिधान प्रकाराः। तत्र संज्ञा त्रिप्रकारा भवतिः—

(1) यौगिकी यस्या नाम नैमित्तिकीति।

(2) रूढा—या प्रसिद्धेति कथ्यते।

(3) पारिभाषिकी—या शास्त्रविशेषे संकेतिता। यथा—

"उक्तं श्रीमन्निशाचारे संज्ञात्र त्रिविधा मता।।
नैमित्तिकी प्रसिद्धा च तथान्या पारिभाषिकी।"

(तं०आ०6,31-32)

संविच्चक्रम् :— द्वादशकाली चक्रम्। यथा—

"अनेन कल्पितार्चाद्यनादरानन्तर्येण अनुजोद्देशोद्दिष्टः संविच्चक्रोदयोऽप्युक्रान्तः।"

(तं०आ०वि०खं०3,पृ०,125)

काल्युपासनाविषये उक्तमेतत्।

संवित् :— स्वयं स्वेनैव प्रकाशेन सततं प्रकाशमाना, स्वयमेव च स्वात्मविमर्शनं विदधती, अर्थजातं स्वात्मनि धारयन्ती, तस्यापि सृष्ट्यादिभूमिकासु प्रकाशनं विमर्शनं च कुर्वती शुद्धा चेतना।

यथा—

"संवित् तावत् प्रकाशते इति तावन्न केचिदपह्नुवते। सा तु संविद् यदि स्वात्ममात्रविश्रान्ता, अर्थस्य सा कथं प्रकाशः। स हि अर्थधर्म एव तथा स्यात्। ततश्चार्थप्रकाशस्तावत्येव पर्यवसितः, इति गलितो ग्राह्यग्राहकभावः। अतोऽर्थप्रकाशरूपां संविदमिच्छता बलादेवार्थोऽपि तद्रूपान्तर्गत एवाङ्गीकर्तव्यः। स चार्थ प्रकाशो यद्यन्यश्चान्यश्च तन्न स्मरणमुपपन्नम्। इत्यत एक एवासौ। इत्येकत्वात् सर्वो वेद्यराशिस्तेन क्रोडीकृत इत्येतदप्यनिच्छताङ्गीकार्यम्।"

(ई०प्र०वि०,खं०1,पृ०,107)

~ अकालकलिता :— **(1) अकल्यादपि कालादुत्तीर्णा तस्याप्याभासभित्तिभूता कारणभूता च संविन्नैव स्वयं कालकलनामर्हति। यथा—**

"संविच्च कालकलनां सहेत यदि तत् स्फुटम्।
भुञ्जीमहि निशातासिच्छिन्ना व्योमांशशर्कराः।।"

(मा०वि०वा०1,419)

(2) कालः संविदं नैव स्पृशति कथञ्चिदपि। यथा—

"न चासौ वस्तुतो दीर्घा कालभेदव्यपोहनात्।।
वस्तुतो ह्यत एवेयं कालं संविन्न संस्पृशेत्।"

(तं०आ०7,29-30)

"दीर्घेत्यर्थान्न सूक्ष्मापि, दैर्घ्यादि हि कालाधीनम्।"

(तं०आ०वि०,खं०4/2,पृ०,22)

नैवदीर्घा नापि सूक्ष्मेति। यथा—

"वस्तुतो नित्यत्वमप्यस्या न सम्भवेत्, तद्धिकालत्रयानुगामित्वमुच्यते।"

(तदेव,-पृ०,23)

~ अज्ञेया :— **संविदित्युच्यमाना तु न पारमार्थिकी संवित्। यतोऽसौ सदैव स्वप्रकाशतया प्रकाशमानैव तिष्ठति। नैव कदाचिज्ज्ञेयता स्पर्शदूषिता भवति। यथा—**

"संविज्ज्ञेयेति शब्दोऽयं वन्ध्या मे जननीत्यदः।
वाक्यं स्मारयतीव स्वं स्वात्मसब्रह्मचारि यत्।।"

(मा०वि०वा०2,164)

~ अतिरोहिता :— **व्यवहारावस्थासु यद्यपि प्रमाणप्रमेयादीनां संविदुद्रिक्ततयावभासस्तथाप्येषां संविदात्मकता नापह्नूयते।**

"उच्छलन्त्यपि संवित्तिः कालक्रमविवर्जनात्।।
उदितैव सती पूर्णा मातृमेयादिरूपिणी।"

(तं०आ०3,128-129)

~ अद्वैतरूपा :— **प्रमातृप्रमेयादिरूपतया द्वादशधा भासमानापि संविद् वस्तुत एकैवेति साक्षादनुभूयते शाक्तोपायाभ्यासतः। यथा—**

"अत एषा स्थिता संविदन्तर्बाह्योभयात्मना।
स्वयं निर्भास्य तत्रान्यद् भासयन्तीव भासते।।"

(तं०आ०4,147)

~ अभ्यासविषयतोत्तीर्णा :—

द्र०:- **'अभ्यासोत्तीर्णता संविदः'** इति।

~ असंस्कार्या :— **संविद् भगवती तु स्वेनैव स्वभावेन सदैव शुद्धैवेति न तस्याः संस्कारैः शोधनं सम्भवतीत्यसंस्कार्यासौ। यथा—**

"ये त्वभ्यासपथेन संविदमिमां संस्कर्तुमभ्युद्यतास्ते किं कुत्र कुतः कथं विदधतामित्यत्र संदिह्महे।।"

(मा०वि०वा०2,4)

~ आभासभेदेऽप्येका :— **प्रमाणप्रमेयाद्यनेकाकारतयाऽऽभासमानापि चिदात्मिका संविच्चिद्रूपैव वस्तुतः इत्येकैव सा।**

यथा—

"एकैव संविद् उपलब्धृरूपाऽहमिति स्फुरन्ती पारमार्थिकी, मायाशक्तिजनिततथाविधस्वभावपरामर्शाभावबलात् सुखाद्य नित्यवस्तुवेदकत्वेन 'अहं सुखी दुःखी च'— इत्यादिना बुद्ध्याद्यवस्थासमानाधिकरण्यम् उपगता सती, संविद इति बहुवचनेन निर्दिष्टा। यदि पुनः सुखादिवेद्यवस्तुसम्बन्धात् सुखादिवत् संविदोऽपि अहंप्रत्ययरूपाः परमार्थत एव बह्वयः स्युः, तदा स्मृतिप्रत्यभिज्ञाद्यनुसन्धानं न स्यात्। असति च तस्मिन् सर्वव्यवहारोच्छेदः प्रसक्तः।"

(स्प०वि०,पृ०,27)

~ उभयस्वभावाः :— **वस्तुतो विश्वोत्तीर्णशुद्धचिद्रूपाऽपि सा विश्वावभासखचितत्वेन विश्वात्मकतयावभासमानापि**

स्वैश्वर्यबलाद् भवति। यथा—

"विश्वात्मिकां तदुत्तीर्णां हृदयं परमेशितुः।
परादिशक्तिरूपेण स्फुरन्तीं संविदं नुमः।।"

(प०प्रा०,पृ०,1)

~ गुरुशिष्यमयी :— **संविदेव हि स्वात्मनि शङ्कामुत्थापयति सैव च तां समाधानतः शमयति। इति संविदेव स्वयं प्रश्नोत्तरकर्त्री भैरवभैरवीरूपा विराजते आगमशास्त्रप्रसारणविधौ। यथा—**

"एवं प्रबुद्ध्यमानरूपा संविद् यदा प्रश्नं निर्भृतावभासमानपरमार्थस्वरूपं करोति, तदा प्रबुद्धावस्थाप्रतिपत्तौ सैव पूर्णरूपा भैरवदेवतात्मिका प्रतिवचनदात्री सम्पद्यते।"

(प०त्री०ल०वृ०,पृ०,3)

~ चित्राऽप्येकरूपा :— **प्रमाणप्रमेयादितयावभासमानाऽपि वस्तुतः सदैव चिन्मात्ररूपा संवित्। यथा—**

"इत्थं प्रकाशतत्त्वस्य सोमसूर्याग्निता स्थिता।।
अपि मुख्यं तत् प्रकाशमात्रत्वं न व्यपोह्यते।"

(तं०आ०3,130-131)

~ चिद्रूपा :— **यथा—**

"संविदेका भगवती अजडा, अतोऽन्यत् तदुल्लासितं सर्वमिदं शवस्थानीयं जडम्।"

(प०सा०वि०,पृ०,153)

~ नाभावरूपा :— **न कथमपि तस्या सत्ताऽपह्नोतुं शक्या।**

यथा—

"न च संविदः स्फुरत्तामात्रसाररूपायाः अपह्नवः शक्यक्रियः इति यत् किञ्चिदेतत्।"

(तं०आ०वि०,खं०1,पृ०,67)

~ नाभ्यासविषया :— **संविदि रूढो विषय एवाभ्यासविषयतां नेतुं शक्यते, न पुनः स्वयं संविदिति न संविदात्मकं शिवत्वमभ्यासविषयीकर्तुं शक्यम्। यथा—**

"अभ्यासश्च परे तत्त्वे शिवात्मनि स्व-स्वभावे न सम्भवत्येव।"

.....
.....
.....

"संविद्रूपे तु न किञ्चिदादातव्यं नापसारणीयमिति कथमभ्यासः।"

(तं०सा०पृ०,24)

~ निर्मलीकरणतः :— **जीवसंविद्धि मायया मलिनतामापादितेवाभासते।**

ततस्तन्मालिन्याभासोऽपसारयितव्यो भवति। तच्च मूलतः शिवानुग्रहाद्वा, प्राग् जन्मनि कृतात्-शैवयोगाभ्यासप्रकर्षाद्वा, साधकस्य सम्भवति। यथा—

"नैर्मल्यं संविदश्चेदं पुर्वाभ्यासवशादथो।
अनियन्त्रेश्वरेच्छात इत्येतच्चर्चयिष्यते।।"

(तं०आ०1,185-186)

~ परा :— **(1) परस्यां संविदि यथैव वस्तुस्थितिस्तथैव व्यवहारः। स च "अहम्" इत्येव परिपूर्णो विमर्शः। यथा—**

"परसंविदि यथैव भासा तथैव व्यवहारमयोऽपि विमर्शः। तेन जल इव जलं, ज्वालायामिव ज्वाला, सर्वथाऽभेदमया एव भावा भासन्ते, न तु प्रतिबिम्बकल्पेनापि।"

(प०त्री०वि०,पृ०,133)

(2) उपदेशावसर एव परस्याः संविदो प्रमेयतात्मको भेदमयो विमर्शः "असौ पूर्णा संवित्" इत्यादिरूपः।

यथा—

"केवलं यावदेषाऽपि परमेश्वर्युपदेशाय निरूप्यते तावदधरसत्ताक्लृप्ता तथा भवति।"

(तदेव,पृ०,133-134)

(3) प्रकाशात्मिकाऽसौ भैरवस्वरूपा सर्वस्याद्यभूता सर्वस्यान्तभूतापि च सदैव वर्तमानस्वभावा विश्वोत्पत्तिलयभूमिः।

यथा—

"एवं च भासात्मकं भैरवरूपं स्वतः सिद्धम्, अनादि प्रथमं सर्वतश्चरमं च सर्वतश्च वर्तमानमिति किमपरं तत्रोच्यताम्।"

(तदेव,पृ०,134)

~ प्रमाणतयास्थिता :— **संवित्तावत् स्वस्वातन्त्र्यात् स्वात्मानं संकुचितमवभासयन्ती चक्षुर्गोलकादीनि विषयप्रकाशार्थं निमित्तकारणत्वेन कलयति। तेषां चक्षुर्गोलकादीनां तद्व्यापाराणां वा संविदनुग्रहेणैव प्रामाण्यम्। सैव प्रत्यक्षादिभूमिकामवतरन्ती-व्यावहारिकप्रामाण्यशय्यामधिशेते। यथा—**

"तस्या एव विचित्राणि नामानि बहुभङ्गिभिः।
तत्प्रसादोत्थितान्येव वादिनः पर्यचीक्लृपन्।।"

(मा०वि०वा०1,435)

~ प्रामाणान्तरानपेक्षा :— **सर्वप्रमाणावभासिकायाः संविदः प्रमाणानपेक्षित्वम्। यथा—**

"प्रमायां न प्रवर्तन्ते मानानि यदुपेक्षया।
किं प्रमाणं भवेत्तत्र मानप्राणान् वितन्वति।।
सर्वावभासकस्यास्य परापेक्षा न विद्यते।
निरपेक्षोऽस्त्यतः पूर्णः स्वतन्त्रः सर्वभासकः।।
न नियताऽऽकृतिस्तस्य देशो न नियतः प्रभोः।
यतो हि विश्वरूपत्वे नैयत्यं प्रतिबन्धकम्।।"

(पू०प्र०1 ,38-40)

~ प्रमातृत्वमयी :— **प्रमेयोन्मुखप्रमाणव्यापारेषु सत्स्वप्यसत्स्वपि च संवित् सर्वकालं प्रमातृवद्धिरित्यङ्गीक्रियते केवलं तथा-विधयोग्यतावशात्।**

यथा—

"यथा शास्त्रज्ञस्य व्याचिख्यासादिविरहेऽपि शास्त्राणां स्वात्माभेदेन वर्तमानत्वात् तत्र ज्ञातृत्वमुच्यते, तथा परस्यापि प्रमातुः सर्वभावनिर्भरत्वाद् आत्मसंस्थ एवं ज्ञेय जात इति।"

(तं०आ०वि०,खं०2,पृ०,130)

~ प्राणेपरिणता :— **भट्टकल्लटेनोद्धृते प्रसिद्ध-सूत्रवाक्ये "प्राक् संवित् प्राणे परिणता" इत्यत्र न परिणामवादोऽभिप्रेतः आचार्यस्य। अपि त्वयमभि-प्रायः—संविदन्तर्वर्तिनी या क्रमाक्रमात्मकस्य कालस्यावभासिका पराशक्तिरसौ बहिर्मुखावभासोन्मुखी प्रथमं केवलं प्रमातृत्वमात्रमवभासयति प्रमेयप्रमाणशून्यम्। तच्छून्यमेव तत्त्वं समुच्छूनस्वभावं सद् भेदात्मकप्रमेयांशावभासोन्मुखतां प्राप्नुवत् प्राणस्पन्दोर्मिरूपतयावभासते। तदेव तस्याः संविदः प्राणनव्यापारतया परिभाष्यते। तदनन्तरमेव प्रमाण-प्रमेयादिपदार्थावभासोऽग्रिमायां बहिर्मुखविकासभूमौ। तदेतदेवाभिप्रेत्य भट्टकल्लटैस्तथोक्तं वेदितव्यम्।**

यथा—

"संविन्मात्रं हि यच्छुद्धं प्रकाशपरमार्थकम्।
तन्मेयमात्मनः प्रोज्झ्य विविक्तं भासते नभः।।
तदेव शून्यरूपत्वं संविदः परिगीयते।
नेति-नेति विमर्शेन योगिनां सा परादशा।।
स एव खात्मा मेयेऽस्मिन् भेदिते स्वीक्रियोन्मुखः।
पतन्समुच्छलत्त्वेन प्राणस्पन्दोर्मिसंज्ञितः।।
तेनाहुः किल संवित्प्राक् प्राणे परिणता .....।"

(तं०आ०6,9-12)

~ महेशानरूपा :— **अतिदुर्घटसम्पादनकरी संविदेव परमेश्वररूपा।**

यथा—

"एतदेव च दुर्घटकारि महेशानत्वं संवित्तत्वस्य, यत् तथा तथा पशुप्रमातृतया स्वर्गनरकादिभोग भोक्ताऽपि सर्वानुभवितृतया संवित्स्वरूप एव।"

(प०सा०वि०,पृ०,23)

~ मातृमानमेयाभासमयी :— **प्रमातृप्रमाणप्रमेयात्मकं त्रिकोणं संविद एव बहिर्मुखं रूपमाभासात्मकम्। यथा—**

"तेन संवित्तिकात्मैव मातृमानप्रमेयता।
गृह्णती स्वप्रकाशत्वं स्वभावादेव भासते।।"

(मा०वि०वा०1,433)

~ लक्षणत :— **अहमिति प्रकाशविमर्शमयत्वं हि संविदो लक्षणम्।**

यथा—

"इहन्तैव हि संविदो लक्षणम्।"

(ई०प्र०वि०वि०,खं०1,पृ०,265)

~ विमर्शांशप्रधाना :— **विमर्शरूपतां विहाय हि संविद् असंविदो नैव कमपि विशेषं धारयेत्। ततो विमर्शे एव संविदः प्राणप्रतिष्ठा। सा हि सततमहमिति विमर्शमयी स्फुरन्ती नीलसुखादिकमपि विषयतयेदमिति विमृशति। ततश्चसकल व्यवहारप्रतिष्ठापदभूता विजृम्भते। यथा—**

"संविदप्यपरामर्शरूपा चेत्तदसावपि।
अभावेन जडेनाथ तुल्यैव प्राग्वदात्मनि।।
सैवं भूतात्मना स्वेनाप्यलब्धपरिनिष्ठितिः।
कथमन्यस्य भावस्य प्रतिष्ठास्पदतामियात्।।"

(अ० प्र० सि०, 9,10)

~ विश्वरूपा :— **संविदाभासा एव हि विश्वम्।**

यथा—

"सर्वमेतत् संविद्रूपतयैवावभासते न तु बाह्यतया।"

(तं०आ०वि०,खं०7/2,पृ०,77)

स्वप्नादावपि संविदेव तथातथा भासते यथा तथैव जाग्रत्यपीति तात्पर्यम्।

~ सर्वकारणभूता :— **संविदेव सर्वकारणकारणम् इति।**

यथा—

"न च कुम्भकारे प्राणपुर्यष्टकबुद्धिशून्यदेहप्राये तदेतत् **(घटादि)** स्थितम्। तस्यापि जडत्वात्। ततः संविदेव विश्वमात्मनि भासयति शक्तिवैचित्र्यात्। ..... संविन्महिम्ना कुम्भकृति दण्डचक्रादौ घटेऽवस्थिते तन्महिम्नैवाभिमानो जायते यथा मया इदं कृतम्, अनेनेदं कृतम्, मम हृदये स्फुरितम्, अस्य हृदये स्फुरितमिति। तत्र जडस्य मृदादेर्दूरापेतोऽभिमान—इति संवित्स्वभावे कर्तृत्वं व्यवस्थाप्यते।"

(ई०प्र०वि०,खं०2,पृ०,140-141)

~ सोमसूर्याग्निरूपा :— **प्रमेयं सोमः, प्रमाणं सूर्यः, प्रमाता = अग्निः। एतत्त्रितयात्मिका हि संवित्। यथा—**

"इत्थं प्रकाशतत्त्वस्य सोमसूर्याग्निता स्थिता।।"

(तं०आ०3,130)

~ सृष्टिसंहारकर्त्री :— **एकरूपाप्यनन्तवैचित्र्यगर्भिण्येव संविद्देवी किं च स्वेच्छं सृजेत् संहरेद्वा।**

यथा—

"वयमेकां तावदनन्तचित्रता—गर्भिणीं तां संविदात्मिकां गिरं संगिरामहे।"

(प०त्री०वि०,पृ०,149)

~ स्वप्रमाणा :— **स्वेनैव चित्प्रकाशेन सदा प्रकाशमाना।**

यथा—

"सा चान्तःस्थितमन्त्रात्मशब्दनामर्शसुन्दरा।
अनपेक्षान्यविरहात् प्रमाणं स्वत एव हि।।"

(मा०वि०वा०1,434)

शब्दनमत्र विमर्शनं तच्च स्वाभाविकमेव संविदः। विमर्शनरहिता हि न कथमपि क्वापि संवित्, तस्या विमर्शप्राणत्वात्। सैव मूलतः स्वत एव प्रमाणम्।

संवित्प्रकरणम् :— **किमपि शैवशास्त्रपुस्तकम्। यथा—**

"अन्यत् संवित्प्रकरणे :—

उक्तः—

'यथाऽग्निना समाविष्टं सर्वं तद्रूपमीक्ष्यते।
तथा ज्ञानसमाविष्टं सर्वं तद्रूपमीक्ष्यताम्।।' इति।"

(स्पं०प्र०,पृ०,36)

संवित्प्रकाशः :— अभिनवगुप्तस्य गुरुणा वामनदत्ताचार्येण निर्मितः शैवशास्त्रग्रन्थः कोऽपि योऽद्यत्वे न लभ्यते क्वचिदपि।

यथा—

"गुरुभिर्वामनदत्ताचार्येण भाषितमिति संवित्प्रकाशे।"

(तं०आ०वि०,खं०3,पृ०,467)

भगवन्तं माधवं सम्बोध्योक्तोऽयं ग्रन्थोवामनदत्ताचार्येण। अनेकैराचार्यैरस्य ग्रन्थस्य पङ्क्तयस्तत्र तत्रोद्धृताः। परं ग्रन्थो न लभ्यते। ग्रन्थकर्त्ता च वैष्णवः प्रतिभाति। ततोऽभिनवगुप्तस्य गुरुरेवायमन्यो वा कश्चन समाननामधेयः पाञ्चरात्रमार्गानुयायीति संशय इव जायते।

द्र०:- स्पं०प्र०पृ०,4,6,9,16,20,21,22:

वि०भै०उ०, पृ०,108, 109 म०प०,पृ०,20,25, **इति।**

एतदपि सम्भवति यद् ग्रन्थद्वयं समानाभिधानम्। एकस्तत्राभिनवगुप्तस्य गुरुणानिर्मितोऽपरश्च प्राक्तनेन केनापि वैष्णवेनेति।

द्र०:- **'वामनदत्ताचार्यः'** इति।

संवित्स्तोत्रम् :— महेश्वरानन्दस्य गुरुणा महाप्रकाशेन कृतः कश्चन देवीस्तवः।

द्र०:- (म०मं०प०,पृ०,68)

संवित्स्वभावः :— (1) क्रमात्मकभेदावभासनप्रवणत्वमेव संविद्रूपस्य परमशिवस्य स्वभावः। तदेव तस्य परमेश्वरत्वम्। यथा—

"इदमेव संवेदनस्य संवेदनत्वं—यदेवंभूताभासनस्वातन्त्र्यमिति।"

(ई०प्र०वि०वि०,खं०3,पृ०,25)

"एवं संविदः शुद्धत्वेऽपि तत्तदर्थोपरक्ततया परिस्फुरणं नाम मुख्यं रूपमित्युक्तं स्यात्।"

(तं०आ०वि०,खं०3,पृ०,215)

(2) स्वस्वरूपादप्रच्यावेऽपि विश्वाकारतयावभासनं संविदो नैसर्गिकः स्वभावः। तत एव विश्वेषां व्यवहाराणां सम्भवः। अन्यथा न किञ्चिदप्यभविष्यत् शून्यमेव शून्यमस्थास्यत् सदा सर्वत्र। यथा—

"अस्थास्यदेकरूपेण वपुषा चेन्महेश्वरः।।
महेश्वरत्वं संवित्त्वं तदत्यक्ष्यद् घटादिवत्।"

(तं०आ०3,100-101)

संविदनुप्राणनम् :— व्यवहारेऽपि संवित्स्वरूपताया उत्तेजनम्। सकलव्यावहारिकव्यापाराणां प्रारम्भिकात् क्षणात्पूर्वं शुद्धायाः संविद्रूपतायाः प्रकाशः प्रकाशत एव। तद्विना सर्वस्य जगतो मूकबधिरकल्पतापत्तेः। सैव व्यवहारजातस्यानुप्राणिका। तामेव प्राक् क्षणे प्रकाशमानां संविदमादाय तयैवाग्रे व्यवहारक्षणाः यदा व्याप्यन्ते योगिना तदा तस्य सर्वमपि व्यवहारजातं तद्रूपानुविद्धमेव साक्षात् प्रकाशते, इत्येषा संविदनुप्राणनमयी सुखोपाया स्वशिवत्वख्यातिः।

यथा—

"पदानामवस्थानां, यदादि प्रधानमानन्दघनं तुर्याख्यं पदं मायाशक्त्याच्छादितमपि तत्तद्विषयोपभोगाद्यवसरेषु विद्युद्वदाभासमानं तेनानुप्राणनमात्मन उत्तेजनं कुर्यात्।"

(शि०सू०वृ०3,38)

संविदुल्लासः :— महेश्वरानन्दकृतः कश्चन शैवशास्त्रदर्शनग्रन्थः।

यथा—

"मया चोक्तं संविदुल्लासे :—
प्रमाणिकी विधिनिषेधकथा यदि स्यात्
पर्यन्ततः परम एव शिवः प्रमाणम्।
सर्वोत्तरः स खलु तत्र विधिं निषिद्धे
कर्तुं क्षमेत विहिते च विभुर्निषेधम्।।' इति।।"

निषिद्धे विधिं विहिते च निषेधं कर्तुं क्षमेतेति।

उद्धृ०:— (म०मं०प०,पृ०, 22)

द्र०:- म०मं०प०,पृ०,12,22,28,31,32,75,100,107, 123,132,145,146,152,165,

संविद्देवी तर्पणम् :— (1) देहस्थदेवताचक्रस्तोत्रानुसारं सर्वा इन्द्रियदेव्य आनन्दभैरवाख्यं शिवमानन्दभैरवीरूपां च देवीं शब्दस्पर्शादिविषयोपहारैः पूजयन्तीति भाव्यते योगिनाऽऽन्तरयागविधौ। यथा—

"विसर्गामृतमेतावद् बोधाख्ये हुतभोजिनि।।
विसृष्टं चेद् भवेत् सर्वं हुतं षोढाध्वमण्डलम्।"

(तं०आ०5,66-67)

(2) विषयाभासोपहारेण दृगादीन्द्रियदेवीसन्तोषणम्। एवं प्रकारं यागं विदधानो योगी अहमिदं पश्यामीत्यादि रूपमभिमानं नैव विदधाति, अपि त्विन्द्रियदेवताभ्य इदं विषयावभासजातमहमिच्छाज्ञानक्रियादिभिरर्पयामीति मनुते। न तस्य व्यक्तिगतः परिमितोऽहङ्कारोऽत्र विषयसेवने समुदेति।

यथा—

"देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ।।"

(भ०गी०सं०3,11)

"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।"

(तदेव,4,34)

इति श्लोकयोष्टीका द्रष्टव्या।

"संविद्देवीषु तर्पकम्'—रूपादिविषयरसास्वादेन दृगादि देवीः स्वात्ममात्रविश्रान्ता विदध्यादित्यर्थः।

(तं०आ०वि०,खं०3,पृ०,370)

संविद्देव्यः :— (1) मृगादीन्द्रियाधिष्ठात्र्यो देव्यः। यथा—

"संविद्देवीषु .....
दृगादि देवीः ..... इति।"

(तं०आ०वि०,खं०3,पृ०,370)

"आत्मीयविषयभोगैरिन्द्रिय देव्यः सदा हृदम्भोजे।
अभिपूजयन्ति यं तं चिन्मयमानन्दभैरवं वन्दे।। 3।।"
इत्यारम्य
.....
.....
संस्फुरदनुभवसारं सर्वान्तः सततसन्निहितम्।
नौमि सदोदितमित्थं निजदेहगदेवताचक्रम्।।15।।
इत्यन्तम् (दे०दे०स्तो०)

देहस्थदेवताचक्रस्तोत्रमभिनवगुप्तस्य द्रष्टव्यम् तच्च स्तोत्रं डॉ० कान्तिचन्द्र पाण्डेय महोदयानामभिनवगुप्तविषयस्य शोधप्रबन्धास्यान्ते मुद्रितं वर्तते।

(2) निजसंविदः शक्तयः। ताश्च तत्तत् कार्यजातसम्पादनोपयोगितया बहुधा प्रभिद्यन्ते। वस्तुतः एकैव संविच्छक्तिः फलभेदमधिकृत्य बहुधा विभज्योपास्यते योगिभिः। संश्लेषण-विश्लेषेणाभ्यां संविद्देवीनां संख्या क्षीयते वर्धते चापि।

यथा—

"एवं कृत्य क्रियावेशान्नामोपासा बहुत्वतः।
आसां बहुविधं रूपमभेदेऽप्यवभासते।।
आसामेव च देवीनामावापोद्वापयोगतः।
एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टनवोत्तरैः।।
रुद्रार्कान्यकलासेनाप्रभृतिर्भेदविस्तरः।"
(तं०आ०3,265-267)

रुद्रेत्येकादश, अर्केति द्वादश, कलेतिषोडश, सेनेत्यष्टादश इत्यादि संख्याः।

संविद्व्यवहारः :— सर्वोऽपि प्रमाणप्रमेयाश्रितो लोक-व्यवहारः संविन्निष्ठत्वाद् वस्तुतः संविद्व्यवहार एव।

~ द्वादशधा :— संविद्व्यवहारे प्राधान्यं प्रमाणांशस्य। तस्यागमिकी संज्ञा इति सूर्याश्च द्वादश। ततः प्रमाणस्यापि द्वादश कलाः। प्रमेयमपि प्रमाणग्राह्यं सत् तदात्मकमेव। प्रमातापि व्यवहारे प्रमाणोपोद्बलिततयैवाभासते। ततः संविद्व्यवहारो मुख्यतया द्वादशधावभासते। तत एव काल्योऽपि द्वादश उपास्याः। यथा—

"सूर्य एव हि सोमात्मा स च विश्वमयः स्थितः।।
कलाद्वादशकात्मैव तत् संवित् परमार्थतः।"
(तं०आ०4,124)

सोम इति प्रमेयस्यागमिकी संज्ञा।

संविन्मयः :— (1) शुद्धचैतन्यस्वरूपः ज्ञानक्रियास्वतन्त्रत्वाच्छुद्धप्रकाशस्य शुद्धविमर्शस्य च सामरस्यभूतः आत्मा।

(2) बहुरूपस्यापि परमेश्वरस्य विश्वरूपत्वे सत्यपि संविन्मयत्वमेव तस्य प्रधानं स्वरूपम्। यथा—

"अग्नीषोमरविब्रह्मविष्णुस्थावरजङ्गम।
स्वरूप बहुरूपाय नमः संविन्मयाय ते।।"
(शि०स्तो०2,1)

"एवं च अग्नि-सोम-सूर्य-स्थावरजङ्गमैरष्टमूर्तितया, ब्रह्म-विष्णूपलक्षिताशेषाधिष्ठातृतया विश्वमयत्वम्। अत एव बहुरूपायेत्युक्तम्। एवं विश्वरूपत्वेऽपि प्रधानमस्य स्वरूपमाह— 'संविन्मयाय' इति। एतदेव हि संविन्मयत्वं, यत्स्वातन्त्र्योल्लासिताशेषविश्वनिर्भरत्वम्।"
(शि०स्तो०विवृ०,2,1)

संवृतिः :— (1) वास्तविकस्य वस्तुतत्त्वस्य विकल्पकल्पिताभ्यां नामरूपाभ्यां संवरणकारिणी मायाप्रमातुर्विकल्पबुद्धिः। यथा—

"संवृतिर्विकल्पबुद्धिः।"
(ई०प्र०वि०,खं०2,पृ०,42)

(2) संवरणम्, गोपनं मन्त्रादीनाम्।

द्र०:- **'संवृत्युपरतः'** इति।

संवृतिसत्यता :— विकल्पबुद्धिबलादेवाभासमाना नामरूपयोः सत्यता। सत्यताया एव प्रकारविशेषोऽसौ इति नासत्यता यथा बौद्धैरद्वैतवेदान्तिभिश्चोक्ता। यथा—

"एवं संवृतिर्विकल्पबुद्धिस्तद्वशादुच्यतां संवृतिसत्यत्वं सत्यत्वस्यैव तु प्रकारस्ततः।"
(ई०प्र०वि०,खं०2,पृ०,42)

~ सत्यतत्त्वोद्भाविता :— संवृतिसत्यतापि या, नासौ विद्याया अभावरूपा याऽसावविद्या, तयोद्भाविता। तस्या अवस्तुत्वेन तुच्छत्वात्। ततस्तस्याः कारणं वस्तुभूतमेव। तच्च परमेश्वरत्वं परस्य तत्त्वस्य। यथा—

"यद्यप्याभासानां ज्ञानान्तर्वर्तिनामपारमार्थिकं संवृतिसत्त्वमुच्येतापि तथापि यदेषां कारणं तत् वस्तुसदेवाङ्गी कार्यम्। अवस्तुनः सर्वसामर्थ्यविरहितालक्षणस्य कार्यसम्पादनप्राणितसामर्थ्यात्मकस्वभावानुपपत्तेः।"
(ई०प्र०वि०,खं०1,पृ०,167-168)

संवृत्युपरतः :— अरक्षितरहस्यः। यथा—

"संवृतिर्गुप्तिस्तत उपरतो निवृत्तः।"
(तं०आ०वि०,खं०11,पृ०,177)

संवेत्ता :— न केवलं संवेदनक्रियाणां कर्ता; अपि तु तासां संविदां परस्परं संयोजनम् वियोजनं च कर्तुं स्वतन्त्रः प्रमाता। स चात एव क्षणिकविज्ञानपरम्परायाः अतिरिक्त एव। यथा—

"एतदेव हि संवेदनाधिकं संवेदितृत्वं **(संवेत्तृत्वं)** यत् संवित्सु संयोजने वियोजने च स्वाच्छन्द्यमिति।"
(ई०प्र०वि०वि०,खं०2,पृ०,33)

संवेदनम् :— साक्षादनुभवजन्यं ज्ञानम्।

~ प्रमाणम् :— न हि तस्य प्रामाण्यमपोहितुं शक्यते यद् यावदभ्रान्तरूपतयानुवर्तते। यथा—

"ऐन्द्रियके बोधे सुखादिसंवेदने योगिज्ञाने च अविवादमेव **(तच्च प्रामाण्यम्)** मुख्यतयैव प्रमेयरूपे आभासे साक्षाद्विश्रान्तेः।"
(ई०प्र०वि०,खं०2,पृ०,78-79)

संवेद्यम् :— ~ सौषुप्तम् :— **प्राणे बुद्धितत्त्वे वा शुद्धे विश्रान्तिः सूक्ष्मतरसुखदुःखाद्यनुभवयुता। यथा—**

"प्राणसुषुप्ते तु स्पर्शकृतस्य सुखदुःखादेर्भावाद् मायाख्यमस्ति मलम्, इति संवेद्यं तत्।"

(ई०प्र०वि०,खं०2,पृ०,238)

संसारः :— (1) पशुप्रमातुर्जन्ममरणचक्रेषु संसरणम्। तच्च संसरणमत्र ब्रह्माण्डान्तः सञ्चलति। तत इदं ब्रह्माण्डमपि संसार इत्युच्यते। यथा—

"आत्मा संसरति ह्यत्र मायाद्यवनिगोचरे।।
संसारः प्रोच्यते तस्मात्पर्यटेत्स यतस्ततः।"

(स्व०तं०10,354-355)

(2) मलस्यापरं नाम। संसृतेः साक्षात्कारणत्वेन तदेव संसार इत्युच्यते क्वचित्।

यथा—

"शरीरभुवनाद्यात्मभिन्नताभासकारणम्।
मायिकं मलमित्युक्तं संसारोऽप्ययमुच्यते।।"

(पू०प्र०,वि०,476)

~ तन्मूलकारणम् :— **कार्मो मल एव संसृतेः साक्षाद्धेतुः। संसृतेः कार्ममलस्य चापि यन्मूलकारणं तत्तु परमेश्वरस्य स्वातन्त्र्यमेव तद्वशादेव हि मलस्योदयो यतः।**

यथा—

"यदेतस्यापरिज्ञानं तत्स्वातन्त्र्यं हि कीर्तितम् (वर्णितम्)।
स एव खलु संसारो जडानां यो विभीषका।।"

(बो०प०द०,11)

संसारावस्था :— जाग्रत्स्वप्नसुषुत्याख्यास्तिस्रोऽप्यवस्थाः संसारदशा एव। वेदान्तैकदेशिनः सुषुप्तिं मोक्षदशात्मतयोपमानत्वेन प्रयुञ्जते। परं शैवे सापि बन्धनदशैव सम्मता।

यथा—

"सेयं जाग्रत्स्वप्नसुषुप्तिरूपा संसारावस्था।"

(ई०प्र०वि०,खं०2,पृ०,230)

संसारी :— संसरणशीलः पशुप्रमाता।

यथा—

"बद्धः संचरति ह्येवं मायाद्यवनिगोचरे।
संसारी प्रोच्यते तस्मात्संसरेद्यत्पुनः पुनः।।"

(स्व०तं०11,104)

द्र०:- 'जीवः' इति।

द्र०:- प०प्रा० पृ०8, 8, प्र०ह०, पृ० 9, 21, 22.

संसृतिः :— संसरणमेव संसृतिः पुनः पुनर्जननमरणादिरूपा।

~ तत्कारणम् :— **अज्ञानमेव संसृतिकारणम्। यथा—**

"लोकव्यवहारकृतां य इहाविद्यामुपासते मूढाः।
ते यान्ति जन्ममृत्यू धर्माधर्मार्गलाबद्धाः।।"

(प०सा०,का०54)

~ तन्मूलकारणम् :— **परमेश्वरस्य लीलामयीच्छैव संसृतिकारणस्याज्ञानस्य मूलकारणम्। तदिच्छैव तिरोधानमयी पशुप्रमातृनधोऽधः पातयति संसृतिगर्त्तेषु।**

यथा—

"तस्मात् सा परमेशेच्छा ययायं मोहितस्तथा।
अनन्तकालसंवेद्यदुःखपात्रत्वमीहते।।"

(तं०आं०14,15)

संसृतेर्मुक्तिः :— यथा तुषादिरहितो तण्डुलकणो नाङ्कुरादि जनयितुमलमेवमेव मलत्रयपरिमुक्तस्य साधकस्य नाग्रे पुनर्जन्मात्मकाङ्कुरोदयः।

यथा—

"तुषकम्बुककिंशारुकमुक्तं बीजं यथाङ्कुरं कुरुते।
नैव-तथाणवमायाकर्मविमुक्तो भवाङ्कुरं ह्यात्मा।"

(प०सा०का०,56)

संस्कारः :— प्राक्तनस्थितेः स्थापको धर्मविशेषः।

यथा—

"संस्कारश्च प्राक्तनरूपां स्थितिं स्थापयति, आकृष्टशाखादेश्चिरसंवर्तितस्य विवर्त्यमानस्य भूर्जादेः।"

(ई०प्र०वि०,खं०,पृ०,64)

इत्थं वासनाख्यः संस्कारोऽपि शैवदृष्टौ स्थिति स्थापक एव, वेगाख्यश्चापि तथैव, तयोः प्रागवस्थायां स्थापकत्वात्। वासनाख्यश्च संस्कारः स्मृतिकालेऽप्यनुभूतिकालिकायामवस्थायां स्थापयति प्रमातारम्।

संस्कारफलम् :— स्मृतिकाले प्रागनुभूतस्य वस्तुनस्तथाऽनुभूतत्वेन पुनरवस्थापनमवभासनं च तथा संस्कारफलम्।

यथा—

"अनुभवाद्विशिष्टं विशिष्टस्मृत्याख्यकार्यकारि ज्ञानं परम्परया जायते इतीयानेव संस्कारार्थः।"

(ई०प्र०वि०,खं०1,66)

स्वर्गनरकपुनर्जन्माद्यपि हि कर्मसंस्कारफलमेव।

संहारः :— (1) कार्यभूतस्य वस्तुनः पुनः स्वकारणभूतवस्तुस्वरूपेऽनुप्रवेशः। स च संहारः प्रायशः संहर्त्तारमपेक्षते एव।

द्र०:- स्प०सं०,पृ०,10;म०न०वि०,पृ०,40,44;पू०प्र०1, 513

(2) वस्तूनां निजबीजभावोपगमनं संहारः तेषामहन्तान्तर्मग्नतापि संहार एव।

यथा—

"यथा हि बीजतोपगमनं संहारः, तथाऽहन्तान्तर्मग्नतापि।।"

(ई०प्र०वि०वि०,खं०3,पृ०,27)

~ परः :— **अवान्तरप्रलयप्रलयमहाप्रलयानां तथाविधानां च सृष्टीनामप्यसौ संहारो यत्र भगवान् सदाशिवोऽपि बिन्द्वर्धचन्द्रादिक्रमेण शिवशक्तौ विलीयते। सा चानाश्रितेऽनाश्रितोऽपि सामनसे शिवपदे प्रलयं याति।**

यथा—

"सर्वं संहार-संहार-संहारमपि संहरेत्।
सा शक्तिर्देवदेवस्याभिन्नरूपा शिवात्मिका।।"

(तं०आ०वि०,खं०3,पृ०,221)

"सदाशिवः स्वकालपरिक्षये बिन्द्वर्धचन्द्रनिरोधिका आक्रम्य नादे लीयते, नादः शक्तितत्त्वे, तद् व्यापिन्यां, सा चानाश्रिते ..... अनाश्रितः सामनसे पदे।"

(तं०सा०,पृ०,56)

~ पाशवः :—

"यथाः — देहप्राणादि पदम् आविशन् चिद्रूपो महेश्वरो बहिर्मुखीभावावसरे नीलादिकमर्थं नियतदेशकालादितया यदा आभासयति, तदा ..... अन्यदेशकालाद्याभासांशे अस्य संहर्तृता।"

(प्र०ह०,पृ०,23)

योगाभ्यास विशेषोऽयम्।

संहारकाली :— द्वादशकालीषु पञ्चमी काली, ग्रस्तशङ्कं भावं स्वात्मसात्क्रियमाणतया कलयन्ती संवित्।

यथा—

"ग्रस्तशङ्कांशं भावभागमात्मनि उपसंहारेण कलयति।"

(तं०सा०,पृ०,29)

~ क्रमस्तोत्रयो :— **यथा**—

"उन्मन्यनन्ता निखिलार्थगर्भा
या भावसंहारनिमेषमेति।
सदोदिता सत्युदयाय शून्यां
संहारकालीं मुदितां नमामि।।"

(क्र०स्तो०सि०ना०)

उद्धः- (तं०आ०वि०,खं०3,पृ०,167)

"विलीने शङ्कौघे सपदि परिपूर्णे च विभवे गते लोकाचारे गलितविभवे शास्त्रनियमे।
अनन्तं भोग्यौघं ग्रसितुमभितो लम्पटरसा विभोः संहाराख्या मम हृदि भिदांशं प्रहरतु।।"

(क्र०स्तो०अ०,19)

~ चिद्गगन चन्द्रिकायाम् :—

"आत्मभावमखिलस्य जग्मुषी त्वं शिवे निखधिः सदोदिता।
भावसंहृतिनिमेष विग्रहा संहृतिं कलयसि ह्यनावृतिः।।"

(चि०ग०चं०,228)

~ तन्त्रालोकादौ :— **शङ्काग्रसनपूर्वकं भावस्य प्रमाद्वारा स्वात्मनि विलापनेनोपसंहारकलनास्वभावा संहारकाली।**

यथा—

"ग्रस्तशंङ्काशं भावभागमात्मन्युपसंहारेण कलयति।
संहृत्य शङ्कां शङ्क्यार्थवर्जं वा भावमण्डले।
संहृतिं कलयत्येव स्वात्मवह्नौ विलापनात्।।
विलापनात्मिकां तां च भावसंहृतिमात्मनि।
आमृशत्येव येनैषा मया ग्रस्तमिति स्फुरेत्।।"

(तं०आ०4,152-153)

"संविद्देवी स्वात्मवह्निसात्कारलक्षणाद्विलापनाद् हेतोर्निखिलेऽपि भावमण्डले संहृतिं कलयत्येव येन श्रीपञ्चशतिकादौ संहारकालीशब्दव्यपदेश्या।"

(तं०आ०वि०,खं०3,पृ०,166)

"स्वयमेव हि नाम भावानां संविद्विलीनतोत्पादनात्मा संहारो यद् बहीरूपताविलापनेन प्रमाणदशामधिशयानायां संवित्तावभेदेन परामर्शनं, यत एवेयं संवित्—'मयैतदर्थजातमात्मनि अभेदेनावभासितम्' इत्येवं स्फुरत्तारूपा भवेत्।"

(तदेव,पृ०,167)

"इयमेव हि संविदः प्रमाणरूपतायां सृष्टिः।"

(तदेव,168)

~ पञ्चशतिकायाम् :— **विश्वसंहाररूपिणी कला यस्यां विलयं याति सा संवित्कला संहारकाली।**

यथा—

'चण्डकाली शुद्धवर्णा यामृतग्रसनोद्यता।
भावाभावविनिर्मुक्ता विश्वसंहाररूपिणी।।
यत्र सा याति विलयं सा च संहारकालिका।"

उद्धः- (तं०आ०वि०,खं०3,पृ०,166)

संहारकृत्यम् :— परमेश्वरोऽत्र जगति तत्तत् कार्यभूतं तत्त्वं तत्रतत्र तत्तत्कारणभूते तत्त्वे विलापयंस्तस्य तस्य तत्त्वस्य संहारं करोति। तदेतत् संहारकृत्यं भगवतः।

संहारचतुष्टयम् :— (क) (1) लोकत्रयस्य संहारोऽन्यस्य च लोकत्रयस्य धूमे प्रस्वापनम् स एष संहारो लयः इति। तत्र संहर्त्ता कालाग्निरुद्रः, स्रष्टा च ब्रह्मा। अत्र लये पृथ्वी तत्त्वात्मकं स्थूलं जगत् स्वकारणे लयं याति।

(2) द्वितीयः कार्यकरणतत्त्वानां संहारो मूलप्रकृतौ। तत्र सृष्टिसंहारकर्त्ता भगवाञ्छ्रीकण्ठनाथः। एषोऽवान्तरप्रलयः।

(3) तृतीयः प्रकृतिपुरुषयोः कञ्चुकानां च संहारो मायायां, तत्र सृष्टिसंहारकर्त्ता भगवाननन्तनाथोऽघोरेशापरपर्यायः। स एष प्रलयः।

(4) चतुर्थो मायायाः शुद्धतत्त्वानां च संहारो भगवतः शक्तौ तत्र सृष्टिसंहारकर्त्ता स्वयं परमशिवाभिधानः परमेश्वर एव। एष महाप्रलयो यत्र सदाशिवोऽपि भगवान् शक्तौ, साप्यनाश्रितेऽसावपि बिन्द्वर्धचन्द्रादिक्रमेण शिवे विलीयते। यथा—

"स्वकवर्षशतान्तेऽस्य क्षयस्तद्वैष्णवं दिनम्।" **अस्येति ब्रह्मदेवस्य।"**

(तं०आ०6,145)

"ब्रह्मणः प्रलयोल्लाससहस्रैस्तु रसाग्निभिः।
अव्यक्तस्थेषु रुद्रेषु दिनं रात्रिश्च तावती।
तदा श्रीकण्ठ एव स्यात् साक्षात् संहारकृत्प्रभुः।।"

(तदेव 6,148-149)

"प्रधाने यदहोरात्रं तज्जं वर्षशतं विभोः।
श्रीकण्ठस्यायुरेतच्च दिनं कञ्चुकवासिनाम्।।
तत् क्रमान्नियतिः कालो रागो विद्या कलेत्यमी।

यान्त्यन्योन्यं लयं तेषामायुर्गाहनिकं दिनम्।।
तद्दिनप्रक्षये विश्वं मायायां प्रविलीयते।
क्षीणायां निशि तावत्यां गहनेशः सृजेत्पुनः।।
एवमव्यक्तकालं तु परार्धैर्दशभिर्जहि।
मायाहस्तावती रात्रिर्भवेत् प्रलय एष सः।।"
(तदेव 6,153-156)

(ख) कालाध्वनि तु सादाशिवी निशैव महाप्रलय इत्युक्तः। नात्र विषये टीकाकृद्भिः स्पष्टीकरणं कृतम्। मूलग्रन्थेषु यद्वर्णनं न तत् सर्वथैकविधम्।

यथा—

"ब्रह्मदिनान्ते कालाग्निदग्धे लोकत्रये, अन्यत्र च लोकत्रये धूमप्रस्वापिते सर्वे जना वेगवदग्निप्रेरिता जनलोके प्रलयाकलीभूय तिष्ठन्ति। महाप्रबुद्धास्तु कूष्माण्डहाटकेशाद्या महोलोके क्रोडन्ति।"
(तं०सा०,पृ०,54)

"ततश्च ब्रह्मा रुद्राश्च अबाद्यधिकारिणोऽव्यक्ते तिष्ठन्ति। एषोऽवान्तरप्रलयः, तत्क्षये सृष्टिः।

तद् गहनेशस्य दिनं, तावती एव क्षपा। तस्यां च समस्तमेव मायायां विलीयते .....। स एव प्रलयः।

ऐश्वरे काले परार्धशतगुणिते या संख्या तत् सादाशिवं दिनम् तावती निशा। स एव महाप्रलयः।"
(तं०सा०,पृ०,54-56)

**"गुणयित्वैश्वरं कालं परार्धानां शतेन तु।
सादाशिवं दिनं रात्रिर्महाप्रलय एव सः।"**
(तं०आ०6,160)

(ग) अत्रैव संशयोत्पादकं कारिकाद्वयमपि वर्तते।

तद्यथा—

"कालाग्निर्भुवि संहर्त्ता मायान्ते (मूलान्ते) कालतत्त्वराट्।
श्रीकण्ठो मूल एकत्र सृष्टिसंहारकारकः।
तल्लयोऽवान्तरस्तस्मादेकः सृष्टिलयेशिता।
श्रीमानघोरः शक्त्यन्ते संहर्त्ता सृष्टिकृच्च सः।।"
(तं०आ०6,171-172)

"तदूर्ध्वे शुद्धमध्वानं यावच्छक्त्यन्तगोचरम्।
तत्सर्वं संहरेद्घोरमघोरो घोरनाशनः।।"
उद्ध०:- (तं०आ०वि०,खं०4,पृ०,147)

अत्र 'मायान्ते' इत्यस्य स्थाने 'मूलान्ते' इति पाठः शोभन इव प्रतिभाति, विचारणीयमेवैतद्विद्वद्भिः।

(घ) अन्यत्र शुद्धेऽध्वनि शिव एव सृष्टिसंहारकृदुक्तोऽघोरेशश्चाशुद्धेऽध्वनि कञ्चुकादिविषये। अपपाठोऽत्र भवेत् क्वचित्क्वचित्। भावनाभ्यासभेदविशेषोपयोगितया वोक्तं स्यादेवमेवम्। कालतत्त्वराट् चात्र भगवानघोरेश एवोक्तः स्यात्। तत्पक्षे 'मायान्ते' इति पाठः शुद्ध एव।

संहारदेवी :— तद्यथा—

"निशाकान्तकला संहारदेवी।"
(भा०वि०,पृ०,6)

द्र०:- — **'निशाकान्तकला'** इति।

संहारबीजम् :— (प्राणापानाभ्यासे) :— **"हं" इति प्राणचारध्वनिः।**

~ मन्त्रात्मकम् :— **क्षकारः।**

"संहारः = क्ष इति।"
(तं०आ०वि०,खं०12,पृ०,178)

संहारमुद्राः— ~ खेचरी :— **लक्षिता परं न स्फुटतामापादिता।**

यथा—

"संहारमुद्रा चैषैव यद्यूर्ध्वं क्षिप्यते किल।"
(तं०आ०32,59)

संहाररूपाः— ~ शक्तिः :— द्र०:- **'कृशा'** ~ परा शक्तिः इति।

संहारवर्णः :— क्षकारः। यथा—

"संहारः–क्षकारः।"
(तं०आ०वि०,खं०3,पृ०,463)

संहारिणीः— ~ मुद्रा :— **यथा—**

"प्रसार्य दक्षिणं पाणिं कनिष्ठादिक्रमाच्छनैः।
आकृष्य बन्धयेन्मुष्टिमङ्गुष्ठेन प्रपीडयेत्।।
मुद्रा संहारिणी प्रोक्ता .....।"
उद्ध०:- (तं०आ०वि०,खं०10,पृ०,144)

संहितासारः :— ग्रन्थः कश्चन।

यथा—

"संहितासारेऽपि :—
'णिसिवासर दुपहरेणा आभुञ्जन्ति गहपराहणा।
जस्स दिनं सेवारो विणिवत्तइ रअणिव अणा ते।
कमपरिवेत्तण दिणरत्तिं भुञ्जन्ति बाणपरिवत्ते।।" इति।
देशभाषापंक्तय एताः।'
(स्व०तं०उ०,प०6,पृ०,197)

संहृतिः :— संहारकृत्यम्।

~ अवस्था :— **योगाभ्यासजन्या काऽपि स्थितिः।**

यथा—

"संहृतिः कृतकृत्यत्वात् बाह्यार्थपरित्यागे स्वव्यापारोपरमः प्रत्यस्तमयावस्था।"

~ वर्ण :— क्षकारः—

द्र०:- **'संहारः'** — ~ 'वर्णः' इति।
(स्पं०वि०,पृ०,34)

सकलः— ~प्रमाता :— **(1) आणवादिमलत्रयमलिनीकृतो मायान्तरे विलुंठन् बद्धः संसृतिभाक् च पशुप्रमाता। जीवः, पुद्गलः, पुरुषः, अणुः, इत्याद्याः अस्य संज्ञाः। देवाद्याः स्थावरान्ताः सर्वे प्रमातारः सकला एव।**

यथा—

"देवादीनां च सर्वेषां भविनां त्रिविधं मलम्।"
(ई०प्र०3-2-10)

द्र०:- (प०सा०वि०,पृ०,55)

(2) प्रलयाकलाः कञ्चित्कालं संसृतिरहिताः। परं सकलाः सततं भविन इति वेद्यम्।

यथा—

"ये त्वेते मायातत्त्वान्तरालपरिवर्तिनो देवादयः स्थावरान्ताश्चर्तुदशधा शास्त्रेषु परिगणितास्ते सर्वे भविनः संसारिणः। तेषां च त्रयोऽपि युगपन्मलाः।"

(ई०प्र०वि०,खं०2,पृ०,227)

(3) तत्त्वसामर्थ्यात्मकः कलासंघातः शरीरम्। तदस्यातीति सकलः पशुः।

यथा—

"तत्त्वानां यत्स्वसामर्थ्यं कलास्ताः परिकीर्तिताः।
तत्संघातः शरीरं स्यात् सकलत्वमतोऽस्य तत्।।"

(शि०सू०वा०,34)

~ तच्छक्ती :— **किञ्चिज्ज्ञत्व-किञ्चित्कर्तृत्वरूपे विद्याकले तावत् सकलाख्यस्य प्रमातुः शक्ती। तयोः शक्त्योरेव विशेषरूपाणि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च।**

यथा—

"तत्र सकलस्य विद्याकले शक्ती, तद्विशेषरूपत्वाद् बुद्धिकर्माक्षशक्तीनाम्।"

(तं०सा०,पृ०,93)

द्र०:- (तं०आ०10,12-13) इति।

~ तत्स्थितिक्षेत्रम् :— **सकलः प्रमातोद्भूतकञ्चुकः, तथाविधैः कञ्चुकैर्वेष्टितत्वमेव तस्य सकलत्वम्। ततः कञ्चुकवर्गस्तस्य शरीरस्थानीयो यत्र स्थितोऽसौ परिमितप्रमातृतां स्वीयां निर्वहति।**

यथा—

"यदा तु मेयता पुंसः कलान्तस्य प्रकल्प्यते।
तदुद्भूतः कञ्चुकांशो मेयो नास्ति प्रमातृता।।"

(तं०आ०10,105)

अत्र कञ्चुकांशस्य यन्मेयत्वं तदेव सकलात्मकस्य पुंसो मेयत्वमुक्तं, तेन कञ्चुकवर्गे तस्य स्थितिः।

~ तद्विशेषलक्षणम् :— **उद्रिक्तकञ्चुकषट्कस्त्रिमलप्रभावैः क्लिश्यमानः प्रमाता।**

यथा—

"यत्तूच्यते कलाद्येन धरान्तेन समन्विताः।।
सकला इति तत् कोषषटकोद्रेकोपलक्षणम्।"

(तं०आ०10,98-99)

~ तद्व्यवहारक्षेत्रम् :— **धरादिमूलप्रकृतितत्त्वान्तं सकलस्य प्रमातृताव्यवहारः। यथा—**

"तेन प्रधाने वेद्येऽपि पुमानुद्भूतकञ्चुकः।
प्रमातास्त्येव सकलः पाञ्चदश्यमतः स्थितम्।।"

(तं०आ०10,101)

सकलम्:— ~ तत्त्वम् :— **सादाशिवस्य तत्त्वस्याप्या- गमिकी संज्ञा सकलमिति। यथा—**

"इङ्घेषु त्रयं विद्याद् विद्यातः सकलावधि।"

(मा०वि०तं० 4,16)

"रौद्री ज्येष्ठा च वामा च तथा शक्ति सदाशिवौ।
एतानि सकले पञ्च भुवनानि विदुर्बुधाः।।"

(तदेव 5,32)

~ इङघ इति मालिनी : — **वर्णत्रये विद्यातत्त्वम् ईश्वरतत्त्वं सदाशिवतत्त्वं चेति तात्पर्यम्। सकले पञ्चेत्यत्र सकलपदेन सदाशिवतत्त्वमेवोक्तं ततः प्रागीश्वरतत्त्वादीना क्रमेणोल्लेखात्, इत्यत्रावधेयं सुधीभिः।**

~ रूपम् :— **(1) कलनसम्भिन्नं, कलाभिश्च सम्भिन्नं परापरात्मकमपरात्मकञ्च स्वरूपं परमशिवस्य। तच्च सदाशिवादिरुद्रपर्यन्तं बहुविधतारतम्ययुक्तमुपास्यतया निरूपितं शास्त्रे। तदुत्तीर्णं स्वरूपं निष्कलम्, अचिन्त्यमवर्ण्यं चानुत्तरं तत्त्वम्।**

यथा—

"परापरायाः सकलमपरायाश्च वा पुनः।
पराया यदि तद्वत् स्यात् परत्वं तद्विरुध्यते।।
न हि वर्णविभेदेन देहभेदेन वा भवेत्।
परत्वं निष्कलत्वेन सकलत्वेन तद् भवेत्।।"

(वि०भै०,5-6)

(2) परमेश्वरस्य यद्यत् सकलं रूपं, न तत् परमार्थिकमपितु तत् कलनाकलितं प्रतिबिम्बकल्पतयैवावभासमानं चकास्ति।

तस्य च शास्त्रे निरूपणमवराधिकारिहितार्थम्। ते हि तदेव ध्यायन्तः क्रमेणारुहन्तः पर्यन्ते निष्कलेन परमशिवेन सार्धमेकी भवन्ति।

यथा—

"यत् किञ्चित् सकलं रूपं भैरवस्य प्रकीर्तितम्।।
तदसारतया देवि विज्ञेयं शक्रजालवत्।
मायास्वप्नोपमं चैव गन्धर्वनगरभ्रमम्।।
ध्यानार्थं भ्रान्तबुद्धीनां क्रियाडम्बरवर्तिनाम्।
केवलं वर्णितं पुसां विकल्पनिहतात्मनाम्।।"

(वि०भै०,8-10)

एतेनैतत् सिद्ध्यति यत् सकलानि दिव्यशरीरमयानि मन्त्रात्मकानि मण्डलात्मकानि मूर्तिलिङ्गाद्यात्मकानि च परमेश्वरस्य स्वरूपाणि सकलकोटिगतानि मन्दशक्तीनामवराणामधिकारिणां कृते उपास्यतया तिष्ठन्तीति।

सकार :— द्र०:- **'षट्त्रिंशत्तत्त्वदीक्षा (3)'** इति।

सङ्कर्षिणी :— कालीदेवी।

सा शक्तिर्या कालं सङ्कर्षति कालमिह बहिष्कुरुते इति।

यथा—

"सैव च भूयः स्वस्मात् संकर्षति कालमिह बहिष्कुरुते।
संकर्षिणीति कथिता .....।।"

(तं०आ०15,347)

सङ्कल्पः :— पशुप्रमातुर्मनसो वृत्तिरूपा क्रिया।

यथा—

"प्रत्यगात्मनो मनोवृत्तिः सङ्कल्पः।"

(ई०प्र०वि०वि०,खं०2,पृ०,218)

यथा—

"मनसा विषयेण चास्फुटेन **(नियन्त्रितं संवित्तत्त्वम्) सङ्कल्पः।"**

(ई०प्र०वि०,खं०1,पृ०,224)

सङ्केतः :— अस्माच्छब्दादयमर्थो बोद्धव्य इति या परम्परया प्रसिद्धिश्चलति लोकेऽसौ संङ्केतः।

~ परमेश्वरकृतः :— **आपाततः पुरुषेच्छया कृता अपि मैत्रादिदेहवस्त्वादीनां सङ्केताः मूलतः परमेश्वरेच्छाकृता एव मन्यन्ते। तदिच्छाप्रेरिता एव हि पुरुषास्तत्तत्सङ्केतकरा भवन्तीति। अत एवाप्यायनमारणमोहनादौ नाम सङ्केतेन प्रयुक्ताः मन्त्राः सफला भवन्ति। सर्वथा मायीयपुरुषतन्त्रत्वे तेषां सफलत्वं न स्यात्।**

यथा—

"सङ्केतस्यापि परमार्थसत्तैव। नहि सङ्केतो नामान्यः कश्चिद् ऋते परमेश्वरेच्छातः।"

(प०त्री०वृ०,पृ०,125)

संङ्कोचः :— मायाकृतं पारिमित्यं स्वरूपस्य स्वशक्तीनां च। स एवाणवोमलः।

यथा—

"संकोच एव हि पुंसामाणवमलमित्युक्तप्रायम्।"

(स्व०तं०उ०10,पृ०,519)

~ चिन्मयः :— **यथा—**

"संकोचोऽपि विचार्यमाणः चिदैकात्म्येन प्रथमानत्वात् चिन्मय एव, अन्यथा तु न किञ्चित्।"

(प्र०हृ०,पृ०,10)

सङ्कोचाख्या :— ~ खेचरी :— **शशाङ्किन्येव।**

सङ्केतम् :— स्वाप्नप्रमाणविषयस्तद्दशाभेदविशेषः।

यथा—

"तत्रापि चातुर्विध्यं तत् प्राग्दिशैव प्रकल्पयेत्।।
गतागतं सुविक्षिप्तं सङ्गतं सुसमाहितम्।"

(तं०आ०10,252-253)

"सङ्कल्पनैकवृत्तिमनोमात्रसंसर्गात्।"

(तं०आ०वि०,खं०7,पृ०,172)

सङ्गमादित्यः :— (1) त्र्यम्बकमठिकायाः षोडशो गुरुः, स्त्रीपुरुषसङ्गमाऽजातो यः कश्मरीनागत्य तत्रैवोपनिविष्टः संस्तत्रैव त्र्यम्बकमठिकाकार्यकलापान् प्रवर्तयामास। सोमानन्दस्य चतुर्थः पूर्वजः। यथा—

"ब्राह्मणेन विवाहेन ततो जातस्तथाविधः।
तेन यः स च कालेन कश्मीरेष्वागतो भ्रमन्।।
नाम्ना स सङ्गमादित्यः .....।"

(शि०दृ०7,118-119)

"सिद्धः सम्प्राप त्र्यम्बकादित्यः। तद्वंशे षोडशकः पुत्रो नाम्ना तु सङ्गमादित्यः।।"

(स्वा०द०1,78)

सङ्गीतं :— ~ साधनम् :— वीणाद्युपायत आनन्दमध्ये निमज्जनस्याभ्यासः सफलो भवति षड्जादयः स्वराः झगिति चिदानन्दरूपतामुद्द्योतयन्ति शैवयोग-साधकस्य।

यथा—

"तदस्यां नादरूपायां संवित्सविधवृत्तितः।।
साजात्यात्तन्मयीभूतिर्झगित्येवोपलभ्यते।"

(तं०आ०3,139-140)

सच्चिदानन्दकन्दः :— तन्मूलभूतं पारमार्थिकतया सत्यं तत्त्वं यद्विलासवशादेव यदन्तरेव सत्तायाश्चित्तायाः आनन्दरूपतायाश्चपरिस्फुरणं सदैव भवति। ततः सच्चिदानन्दानामपि बीजभूतं सारभूतं च तत्तत्त्वं यत्तेषां कन्दस्थानीयं सच्चकास्ति सदा स्वमहिम्ना।

यथा—

"मूढं प्रत्युपदेशाय स्वात्मायं तत्त्वदर्शिभिः।
सच्चिदानन्दरूपेण भव्यते न तु वस्तुतः।।"

(आ०वि०2,21)

वस्तुतस्तु त्रयस्यापि यत् स्फुरणं तस्य कन्दभूतं मूलतत्त्वमेव हि स्वात्मेत्यभिप्रायः। यथा—

"अभिनवरमणीयं सच्चिदानन्दकन्दम्
स्व नवनवविलासोल्लासनैक प्रवीणम्।
अनुभवसुरहस्यं मङ्गलं मङ्गलानाम्
अधिहृदि परमेशं मौनमेवाश्रयेऽहम्।।"

(आ०वि०1,1)

सच्चिदानन्दा :— सत्तो भावः सत्ता। चित्तैव वस्तुतः सत्ता, चित एव स्वातन्त्र्येण स्वमहिम्ना सत्त्वेन प्रकाशमानत्वात्। ततः सत्ता चित्ता चेति पार्श्वद्वयमेकस्यैव तत्त्वस्य प्रतिपादनप्रक्रियायाम्। उभयोश्च सामरस्यमानन्दः। चित्तैव सत्तया प्रकाशमानाऽऽनन्दः। एतदेव संक्षेपतः प्रतिपादितं महार्थमञ्जरीपरिमले।

यथा—

"सन्नित्यत्र या सत्तोक्ता, सैव चित्त्वमुच्यते। सत्त्वचित्त्वयोश्च सामरस्यमानन्दः।

यदुक्तं श्री रसान्वये :—

'या चित् सत्तैव सा प्रोक्ता सा सत्तैव चिदुच्यते।
यत्र चित्सत्तयोर्व्याप्तिस्तत्रानन्दो विराजते।।' इति।"

(म०मं०प०,पृ०,34)

सञ्चारः— ~ जपात्मक :—

द्र०:- **'जपः (चतुर्विधः)'** इति।

सञ्जीवनीः— ~ कला :— **(1) विश्वस्याप्यायनकरी अमाख्या कला। सा च संविदेव सैव शरीरकरणादिरूपतां पोषयन्ती सञ्जीवनी।**

यथा—

"वित्प्राणगुणदेहान्तर्बहिर्द्रव्यमयीमिमाम्।
अर्चयेज्जुहुयाद् ध्यायेदित्थं सञ्जीवनीं कलाम्।।"

(तं०आ०5,69)

"निखिलजगदाप्यायकारिणीममाख्यां सञ्जीवनीं कलामाश्रित्य सार्वात्म्यप्रतिपत्तितत्त्वमर्चनादि विदध्यात्, यतो विद् याज्या परासंवित् प्राणबुद्धिदेहात्मानः प्रमातारश्च याजकाः।"

(तं०आ०वि०,खं०3,पृ०,375)

(2) अमाख्या सप्तदशी अमृतकला।

यथा—

"सञ्जीवनी :—
'पुरुषे षोडशकले तामाहुरमृतां कलाम्।'
इत्याद्युक्त्या विश्वसंजीवनहेतुरमाख्या सप्तदशी कला।' इति।"

(तं०आ०वि०,खं०3,पृ०,370)

सत्कार्यवादः :— (1) उत्पत्तेः पूर्वमपि तथोत्पत्तिसमकालमुत्पत्त्युत्तरकालमपि च भावनां शुद्धचिदात्मकस्य परमेश्वरस्यान्तस्त्रैकालिकी स्थितिर्भवति। स एष सिद्धान्त एव शैवदर्शनस्य सत्कार्यवादः। बहिरभिव्यक्तिर्भावानां प्रतिबिम्बन्यायेन भवति न परिणामतः। एतदन्तरं सांख्यं शैवसत्कार्यवादयोः परस्परम्। शैवनये शिवस्य शक्तयो बर्हिमुखतया प्रतिफलिताः सत्य एव कार्यरूपतया आभासन्ते। ताश्च शक्तयः सत्याः। अतस्तद्रूपं कार्यजातं वस्तुतः सत्यमेव। यथा—

"वर्तमानावभासनां भावानामवभासनम्।
अन्तःस्थितवतामेव घटते बहिरात्मना।।"

(ई०प्र०1-5-1)

(2) शुद्धचिन्मात्रे स्वतन्त्रे भैरवात्मके प्रकाशे सर्वं सृष्टिस्थित्याद्यवभासनं प्रमेयजातं सदैव संविद्रूपतया विद्यते एवेति सिद्धान्तः शैवदर्शनस्य। यथा—

"अकालकलिते संविदात्मनि सततविश्वशक्त्यवियुक्ते स्वातन्त्र्यवशसङ्कोचविकासावभासितसंहृतिसृष्टिशताविरुद्धैकरूपलक्षात्मकवपुषि परमेश्वरेऽस्मिञ्जिह्वाग्रहृदयानपायिनि-भैरवभट्टारके सर्वमस्ति।"

(प०त्री०वि०,पृ०,142-143)

(3) सर्वं जगत् पारमेश्वर्यां संविदि शक्तिरूपतया सदा विद्यामानमेव तिष्ठतीति सुविलक्षणोऽयं सत्कार्यवादः शैवः। यथा—

"अनन्तरं श्लोकेन **(दशमेन)** चिदात्मन्यर्थानामवश्यं सद्भावः परामर्शात्मनेति प्रकटयति।"

(ई०प्र०वि०,खं०1,पृ०,152)

(4) सर्वाणि कार्याणि उत्पत्तेः प्रागपि बहिरभिव्यक्तिहीनानि सन्ति वस्तुतः सद्रूपाण्येव, शिवात्मकत्वात्।

यथा—

"अभिव्यक्तिं वर्जयित्वाऽन्यत्सदेव कार्यमित्यस्माकं तावदभ्युपगमः।"

(शि०दृ०वृ०,पृ०,163)

"चिद्रूपः परमेश्वरस्तथा तथा भावस्वरूपैः स्वयमेव प्रकल्पते भवति **(तथातथा)** स च नित्यमेव सन्निति कथमसत्कार्यताशङ्का।"

(शि०दृ०वृ०,पृ०,167)

(5) विश्वेऽपि व्यवहारा यद्यप्याभासरूपास्तथाऽपि सत्या एव यतो हि प्रतीयमानौ विश्वलयोदयौ स्वयं मूलसंविद एव बहिरन्तर्मुखौ स्पन्दो, ततः संविदात्मकावेव वस्तुतः, इति नाविद्याकल्पितौ, न चाऽपि बन्ध्यासुतकल्पौ। ततो विश्वं संविदात्मकं सत् सत्यमेव, संविदः सत्यत्वात्। व्यवहारेऽपि सत्यमेव, अर्थक्रियाकारित्वात्।

यथा—

"अंतः संवित्प्रतिष्ठानौ यतो विश्वलयोदयौ।।
शक्त्यन्तेऽध्वनि तत्स्पन्दा संख्याता वास्तवी ततः।"

(तं०आ०7,63-64)

उत्तरार्द्धस्यान्वयो न सङ्गच्छते। पाठभेदः कश्चन भवेद् यथार्थ इति टीकाऽपि न स्पष्टीकरणं विदधाति।

"तत्स्पन्दा संख्याता" **इति पदसन्दर्भः संशययुतः। यथा**—

"संवृतिर्विकल्पबुद्धिस्तद्वशाद् उच्यतां संवृतिसत्यत्वं सत्यत्वस्यैव प्रकारस्ततः।"

(ई०प्र०वि०,खं०2,पृ०,42)

~ अद्वयनिष्ठः :— **विश्वं परस्मिन् संवित्तत्त्वे सदा विद्यमानमेव भवति, परं तत्राहन्तया संविदभेदेनैवास्य स्थितिः। न भेदेन ततोऽद्वयमेव वस्तुतः सिद्धम्। यथा**

"यद्यपि विश्वं भगवदात्मनि सदा स्थितं, तथापि तच्छक्त्यैवाध्यारोपितप्रमातृभावप्राणादिरूपापेक्षयेदमित्यपि भेदेन भाति। तदा तु सिसृक्षात्मनि परिस्पन्दे तद् विश्वमात्मनि सम्यक् तिष्ठति कथञ्चिदपि भेददशामनाश्रितमिति।"

(ई०प्र०वि०वि०,खं०2,पृ०,168)

स्थितमिदं—चिदात्मनि विश्वं प्रथमेच्छापरामर्शभूमावहमित्येवोचितेन रूपेण भाति इति।"

(तदेव,पृ०,173)

~ व्यवहारे :— **व्यवहारोपयोगितया सत्यमेवेदं जगत् न बन्ध्यासुतकल्पम् एतस्य सत्यत्वमाश्रित्यैव पठनपाठन-दीक्षणाभ्यासनादिसम्भवो नान्यथा। यथा**—

"इह दर्शने यद् यथावभास्यते, तत् तथा सदिति परोपदेशकाले सृष्टोऽयं धर्मधार्मिभेदः पारमार्थिक एव।यथैव च सृष्टस्तथैव पारमार्थिकः इत्यभेदविश्रान्ततैव,तथैव सृष्टेः, अन्यथा घटपटवत् को धर्मधर्मिभावः स्यात्।"

(ई०प्र०वि०वि०,खं०,पृ०,81)

~ परावस्थायाम् :— **परमेश्वरो प्रमेयतया**

प्रकाशितमपि तत्वव्रातं पुनरात्मस्वरूपेणाच्छादयति सर्वमपि संविद्रूपतया व्याप्नुवानः। एतेन ज्ञायते यत् परमेश्वरस्यान्तस्तत्वजातं सदा वर्तत एव नावर्तिष्यत चेत्तत्र तर्हि आच्छादनीयस्य व्यापनीयस्याभावेन किमसावाच्छादयेद् व्याप्नुयाद्वा।

यथा—

"तत्रापि च यदिदन्ताया अहन्तया आच्छादनं तदाच्छादनीयेदन्तोपपत्तावुपपद्यते, न च शुद्धपरमेश्वरचिन्मयरूपानपेक्षं भिन्नप्रथात्मकमिदन्ताख्यं रूपमुपपद्यते, इति आच्छादनीयानुपपत्तौ तद्वशेन तदाच्छादकताप्यहम्भावस्य नोपपन्ना। इति तथा विद्येश्वरबोधानुपपत्तिः, तदनुपपत्तौ च न किञ्चिद् भासेत, कारणाभावात्, इत्युक्तमसकृत् भासते चेदं तद्भासा। व्यतिरेकरहितमपि परमेश्वरशक्तित एव बहिः प्रथते, कारणान्तरासम्भवात्, स्वसंविदि च संविद एव सर्वमयत्वप्रथनात्।"

(प०त्री०वि०,पृ०,114-115)

~ परमशिवे :— **सिसृक्षाविषयभूतं भावजातं सृष्टेः प्रागपि स्रष्टुरन्तस्तदेकात्मतया विद्यमानमेव तिष्ठति। तत्र तस्यावभासनमप्यहन्तया स्रष्टुः शक्तिरूपतया भवत्येव, अन्यथाऽनाभातं सत्तत् सिसृक्षाविषयतामेव कथं यायात्, तद्विना च कथं सृज्येत।**

तदेतदेवोक्तं भङ्ग्यन्तरेण—

"न केवलमिदमित्यनेन वपुषा निर्भासमानस्य बाह्यभावजातस्य भासनं सकललोकसिद्धमस्ति, यावद् भगवतः प्रकाशैकरूपस्यान्तः स्थिततयापि भासनमस्त्येव, केवलं बहिर्भावलक्षणेदन्तानुल्लासादहन्तौचित्येनैवास्त्यवभासनं, न तु नास्ति। तदभावे हि कुविन्दस्य 'पटं करवाणि' इति प्रथमपरामर्शे इच्छाशब्दवाच्ये यदि। एष्टव्यं नियामकं न स्यात् पटस्येव घटस्य निष्पत्तिः। ततो भवितव्यं तावदेषणीयेन पटेन।"

(ई०प्र०वि०वि०,खं०2,पृ०,166-167)

~ स्वप्नसंसारे :— **शिव एव सर्वम्। ततः शिवत्वेन सर्वस्य सत्यता स्वप्नसङ्कल्पादेरपि सत्यता, तत् कालेऽर्थक्रियाकरणात्।शशविषाणादेरपि सत्यता वाचिकव्यवहारयोग्यत्वात्। केवलं लोकव्यवहारार्थं तदसत्यमिति स्थापितं लोके। शिव एव सकलजगद्रूपतया भावाभावरूपतया च स्वेच्छयाऽऽभासते इति कथं कस्यासत्यता।**

यथा—

"एवं भेदात्मकं नित्यं शिवतत्त्वमनन्तकम्।
तथा तस्य व्यवस्थानान्नानारूपेऽपि सत्यता।।"

(शि०दृ०1,49)

सत्तर्कः :— (1) विकल्परूपं शुद्धविद्यात्मकं यथार्थं ज्ञानं सत्तर्कः।

यथा—

"सोऽपि सत्तर्कयोगेन नीयते सद्गुरुं प्रति।
सत्तर्कः शुद्धविद्यैव सा चेच्छा परमेशितुः।।"

(तं०आ०4,34)

यथार्थज्ञानाश्रयेण यः समुदेति विकल्पोऽसावपि सत्तर्क इति।

(2) असौ शुद्धविकल्पात्मकोऽध्यवसायो यः पुनः पुनरभ्यस्यते परयोगिना। शुद्धविकल्पाश्रितश्च प्रतिज्ञाहेतुप्रभृतिप्रयोगोऽपि सत्तर्क एव। यथा—

"गुरोरागमनिरूपणे व्यापारः, आगमस्य च निःशङ्कसजातीय तत्प्रबन्धप्रसवनिबन्धनसमुचितविकल्पोदये व्यापारः। तथाविधविकल्पप्रबन्ध एव सत्तर्क इत्युक्तः।"

(तं०सा०,पृ०,23)

~ तत्फलम् :— **ज्ञानयोगात्मकेन सत्तर्केण द्वैतस्य यद्विगालनं विधीयते तदेव तस्य मुख्यं फलम्। यथा—**

"दुर्भेदपादपस्यास्य मूलं कृन्तन्ति कोविदाः।
धारारूढेन सत्तर्ककुठारेणेति निश्चयः।।"

(तं०आ०4,13)

अमुख्यं च फलं तत्तदैश्वर्यलाभादि।

सत्ता :— अनुन्मूल्यमाना स्वोचितविमर्शपरिस्पन्दमयी प्रकाशात्मकता शुक्तौ हि रजतरूपता पश्चात् प्रकाशमानशुक्तिविमर्शेनोन्मूल्यते यथा—

"इति प्रकाशमानतैवानुन्मूल्यमानतथोचितविमर्शपरिस्पन्दाभावस्य सत्त्वम्।"

(ई०प्र०वि०,खं०2,पृ०,56)

व्यवहारेऽयं सिद्धान्तः। ततो प पारमार्थिकः।

सत्त्वम् :— (1) विषयप्रकाशजनको गुणः।

यथा—

"सत्त्वं प्रकाशजनकं .....।"

(स्व०तं०11,65)

(2) स्वसत्तानन्दमयः प्रकाशः सुखरूपः सत्त्वम्।

यथा—

"तत्राद्यो यः सत्तानन्दभागः सेति सत्ता सत्त्वम्, प्रकाशसुखात्मकमिति यावत्।"

(ई०प्र०वि०वि०,खं०3,पृ०,363)

सत्त्वादिगुणाः :— पशुप्रमात्रपेक्षया भिन्नेषु भावेषु ज्ञानं सत्त्वं, तेष्वेव क्रिया रजः, शुद्धं भिन्नत्वमात्रं तमः।

यथा—

"स्वरूपापरिज्ञाने तु भावेषु ज्ञानं क्रिया शुद्धमेव भिन्नत्वं प्रकाशविमर्शाननुगृहीतमिति पश्वपेक्षया प्रकाशः प्रकाशाप्रकाशत्वमप्रकाश इति प्रकाशक्रियानियमनात्मकानि सत्त्वादीनि।"

(ई०प्र०वि०वि०,3,पृ०,361)

पश्वपेक्षया भावानां प्रकाशः सत्त्वं, तेषां प्रकाशाप्रकाशौ रजः, तेषां प्रकाशस्याभावस्तमः इति।

~ पृथग्गणनार्हाः :— **यद्यपि पुरुषस्य सङ्कुचिता दृष्टिरेव सत्त्वाद्याः गुणास्ततः पुरुषस्याङ्गकल्पा इमे, तथाप्यागमेषु पुरुषाद् भिन्नत्वेन गणिताः, यतो इमे सत्त्वादयस्ततः पृथिव्यन्त परिणाममयत्वे भिन्नत्वेनैव गृह्यन्ते पौरुषे व्यवहारे।**

यथा—

"तस्मादप्रत्यभिज्ञानमये पुरुषस्वरूपे चिन्त्यमाने सत्त्वादयः पृथिव्यन्तपरिणाममयास्ततो भिन्ना एवेति पृथगेव तेषामागमेषु गणना युक्तेति सूत्रार्थः।"

(ई०प्र०वि०वि०,खं०3,पृ०,362)

सत्यलोकः :— ब्रह्मलोकः।

द्र०:- **'ब्रह्मलोकः'** इति।

~ तदधिकारिणः :— **वेदाः कर्मज्ञानसंसिद्धा योगिनो गायत्र्याद्याश्च देव्यः।**

यथा—

"सत्ये वेदास्तथा चान्ये कर्मध्यानेन भाविताः।"

(तं०आ०8,154)

सदानन्दः :— जीवभावतां गतोऽप्ययं प्रभुः सर्वदा आनन्दस्वरूप एव, यतो ह्ययं जीवरूपमपि स्वानन्दायैव गृह्णाति अतोऽयं सदानन्दः।

यथा—

"स्वविलासेनाऽवरूढ आरुरुक्षुः स्वयेच्छया।
आरोहते सदाऽऽनन्दो नैर्मल्योल्लासपण्डितः।।"

(आ०वि०5,4)

सदाशिवः :— सादाख्ये सादाशिवे तत्त्वेऽधिष्ठातृतया तिष्ठन्, मन्त्रमहेश्वरैरुपास्यमानो भगवान् शिव एव तत्रावतीर्णः सदाशिवः। असौ सर्वे च मन्त्रमहेश्वराः शुद्धे पारमैश्वर्यसमुद्भासिनि परिच्छेदरहितेऽहमात्मके स्वात्मसंवित्तत्त्वे ध्यामलप्रायामिदमंशस्य प्रतिच्छायामिव पश्यन्तोऽहमंशे एव सरसं तिष्ठन्तोऽहमिदमिति विमृशन्ति। शुद्धविद्यायाः सर्वोच्चमेतत् सोपानं यत्र भगवान् सदाशिवोऽधिष्ठातृत्वं भजते।

द्र०:- — **'सदाशिवभट्टारकः'** इति।

~ अनुग्रहपरः :— **मुख्यतयाऽनुग्रहकृत्यप्रवणोऽयं भगवान्।**

यथा—

"स्वेच्छाशक्त्युद्गीर्णं जगदात्मतया समाच्छाद्य।
निवसन्स एव निखिलानुग्रहनिरतः सदाशिवोऽभिहितः।

(ष०त्रि०त०सं०,3)

~ उपास्यरूपत्वेन :— **ध्यानधारणादावुपास्यमस्य यद्रूपं तद्वर्णितं स्पष्टमेव।**

यथा—

"चन्द्रार्बुदप्रतीकाशं हिमाद्रिनिचयोपमम्।
पञ्चवक्त्रं विशालाक्षं दशबाहुं त्रिलोचनम्।।
नागयज्ञोपवीतन्तु व्याघ्रचर्माम्बरच्छदम्।
बद्धपद्मासनासीनं सितपद्मोपरि स्थितम्।।"

(ने०तं०,खं०1,पृ०,219)

~ तत्कालमानम् :— **परार्धशतगुणितः ऐश्वरः कालः सादाशिवं दिनम्। तावती रात्रिः। तेन मानेन सदाशिवभट्टारकस्य वर्षशतमायुः।**

यथा—

"ऐश्वरे काले परार्धशतगुणिते या संख्या, तत् सदाशिवं दिनम्, तावती निशा। स एव महाप्रलयः।"

(तं०सा०,पृ०,56)

~ तत्पाशौ :— **भगवान् सदाशिवः स्वाधिकारं निभालयन् स्वतत्त्वोचितमैश्वर्यभोगं भुङ्क्ते इति द्वौ तस्य पाशौ, अधिकारो भोगश्चेति।**

यथा—

"यतोऽधिकारभोगाख्यौ द्वौ पाशौ तु सदाशिवे।

(तं०आ०17,76)

अधिकारसमाप्तौ भोगराहित्ये सदाशिवस्य शिवत्वगतिः।

~ धारणाविशेषे :— **विद्यादेहत्वेन ध्येयो भगवान्।**

यथा—

"विद्यादेहस्वरूपेण ध्यात्वा देवं सदाशिवम्।

(स्व०तं०4,488)

"विद्यादेहोऽष्टादशभुजः सकलभट्टारकः।"

(स्व०तं०उ०,प०4,पृ०,302)

~ नादरूपः :— **प्राणापानमयनादयोगाभ्यासे श्रूयमाणः शान्तो वंशध्वनिरिव नादः सदाशिवनादः।**

यथा—

"वंशध्वनिसमप्रख्यः शान्तनादस्तु स स्मृतः।
सदाशिवः स विज्ञेयः .....।।"

(स्व०तं०12,149)

स्वात्मनः सदाशिवत्वाभिव्यञ्जकत्वमस्य नादस्य भवेत्।

यथा—

"तस्मात्सदाशिवो देवो व्यक्तो वै दृक्क्रियात्मकः।।"

(स्व०तं०11,8)

"स एव नादो ज्ञानक्रियारूपसदाशिव
भट्टारकाभिव्यक्तिसतत्त्व इत्यर्थः।"

(स्व०तं०उ०11,पृ०,10)

~ प्रणवकलासु :— **तत्र नादरूपः सदाशिवः। यथा—**

"ध्वनिरूपो यदा स्फोटस्त्वदृष्टाच्छिवविग्रहात् प्रसरत्यतिवेगेन ध्वनिनापूरयञ्जगत्।
स नादो देवदेवेशः प्रोक्तश्चैव सदाशिवः।।"

(ने०तं०21,62-63)

~ भावनाविषयत्वे :— **भावनाभ्यासविषयत्वे इच्छाशक्तिरूपधरः सदाशिवः। यथा—**

"इच्छाशक्तिः परा देवि यया सर्वमधिष्ठितम्।
उत्पत्तिस्थितिसंहारांस्तिरोभावमनुग्रहम्।।
यया करोति देवेशः सर्वदा सर्वमध्वनि।
तस्योत्सङ्गगता सा तु नित्यं चैवात्मवर्तिनी।।
सा चेच्छा देवदेवस्य शिवस्य परमात्मनः।

"स एवापररूपेण पञ्चमन्त्रमहातनुः।।
इच्छारूपधरः श्रीमान् देवदेवः सदाशिवः।"
(स्व०तं०10,1204-1207)

~ सदाशिवत्वं (तस्य) :— **अशिवत्वांशद्योतकस्येदमंशस्याभासे सत्यपि सादाशिवायां भूमौ शिवतानुगतैव न तिरोहिता। ततः सदैवात्र शिवतेति कृत्वा सदाशिवोऽयम्।**

यथा—

"यदा तु सा प्रशान्त्युपलक्षिता ध्यामलत्वेनास्फुटा सम्पद्यते (इदन्ता) तदा वेद्ययोगेऽपि शिवताया उन्मज्जनात् सर्वेण कलनाप्रकारेण शिवतेति सदाशिवतोच्यते।"
(ई०प्र०वि०वि०,खं०3,पृ०,267)

"इदन्तोन्मेषेऽपि शिवतेति हि सदाशब्देनोक्तम्।"
(ई०प्र०वि०वि०,खं०3,पृ०,264)

सदाशिवतत्त्वम् :— (1) प्रमातृ-प्रमाण-प्रमेयमयस्य विश्वस्य तथा विधा स्थितिर्यस्यां सर्वमपि प्रमेयजातं सामान्येन ध्यामलप्रायम् इदमिति आभासते शुद्धेऽहंरूपे परिमिते प्रमातरि, न च ततः सर्वथा भेदं सहते। तत्र तत्त्वे प्रमातारो मन्त्रमहेश्वराख्याः ये शुद्धे स्वात्मनि ध्यामलप्रायं प्रमेयाशं पश्यन्तो "अहमिदम्" इति विमृशन्तः स्वात्मन्येव तुष्यन्ति। अधिष्ठाता च तेषां भगवान् सदाशिवभट्टारकस्ते च तस्योपासकाः। तदियं प्रमातृप्रमेययोर्भेदाभेदात्मिका प्रमातृप्रकाशप्रधाना स्थितिरेव सदाशिवतत्त्वम् तदेव सादाख्यमित्यप्युच्यते। ज्ञानशक्तेरत्र प्राधान्येनाभिव्यक्तिर्भवति, यतः प्रमेयमत्राभासते। न च स्फुटमाभासते। स्फुटमाभासनं तु निर्माणमेव। तथात्वे तु तत्र क्रियाशक्तेः प्राधान्यमापद्येत।

यथा—

"ततश्च शुद्धचैतन्यवर्गो यो मन्त्रमहेश्वराख्यस्तस्य प्रथमसृष्टावस्माकमन्तकरणैकवेद्यमिव ध्यामलप्रायमुन्मीलितमात्र-चित्रकल्पं यद् भावचक्रं, संहारे च ध्वंसोन्मुखतया तथाभूतमेव चकास्ति प्रतिबिम्बप्रायतया, तस्य चैतन्यवर्गस्य तादृशी भावराशौ तथा प्रथनं नाम यच्चिद्विशेषत्वं तत् सदाशिवतत्त्वम्।"
(ई०प्र०वि०,खं०2,पृ०,192-193)

यच्च तन्त्रालोकादौ सदाशिवतत्त्वस्येच्छाशक्तिमयत्वमुक्तं तत्तूर्ध्वोर्ध्वतत्त्वभूमिमारूरुक्षूणां साधकानां कृते यथोक्तं वेदितव्यम्। ततो नात्र मतभेदस्य वा, स्ववचननिरोधस्य वा शङ्का काऽपि विधातव्या सुजनैः।

यथा—

"सदेवाङ्कुरायमाणमिदं जगत् स्वात्मनाहन्तयाच्छाद्यस्थितं रूपं सदाशिवतत्त्वम्।"
(प०प्रा०,पृ०,7)

यथा—

"सदाशिवतत्त्वे अहन्ताच्छादितास्फुटेदन्तामयं यादृशं परापररूपं विश्वं ग्राह्यं, तादृगेव श्री सदाशिवभट्टारकाधिष्ठितो मन्त्रमहेश्वराख्यः प्रमातृवर्गः परमेश्वरेच्छावकल्पिततथावस्थानः।"
(प्र०ह०,पृ०7)

(2) शुद्धेऽहंप्रकाशे इदमंशस्य यत्रात्यन्तमस्फुटोऽवभासो "ऽहमिदमिति" भेदावभासे सत्यप्यभेदनिष्ठोऽसावेव सदाशिवतत्त्वरूपता परमशिवस्य।

यथा—

"अत्रैव विश्वसमुत्पत्तिबीजभूमौ महाशून्यातिशून्याख्यायां, महेशस्य 'अहमिदम्' इति—अभेदेन पूर्णाहन्तामयो यश्चमत्कारो ज्ञानप्राधान्यात् क्रियाभागस्याहन्ता विश्रान्तेः सेयं सदाशिवदशा।"
(प०सा०वि०,पृ०,42)

यथा—

द्र०:- "तत्र शुद्ध चैतन्यवर्गस्य ..... इत्यारभ्य तत् सदाशिवतत्त्वम् — इत्यन्तम्।"
(ई०प्र०वि०वि०खं०3,पृ०,264)

~ ज्ञानशक्त्यभिव्यक्तिमयम् :— **यथा—**

"अत एव हि सादाख्ये ज्ञानशक्तिस्वरूपिणि।।
अशुद्धिलेशकालुष्यात् परापरतया स्थितिः।"
(मा०वि०वा०1,187-188)

"..... कदाचिज्ज्ञानशक्तितः।
सदाशिवत्वमुद्रेकात् .....।।"
(शि०दृ०1,30)

"ज्ञानरूपा या दशा तस्या उद्रेकाभासने 'सदाख्यम्' सदाख्यायां भवम्, यतः प्रभृति सदिति प्रख्या, सादाख्यायाश्च सदाशिवशब्दरूपाया इदं वाच्यं तत्त्वम्।"
(ई०प्र०वि०खं०2,पृ०,191)

~ शिवशक्तिमयम् :— **सर्वं हि जगच्छिवशक्तिमयमेव। परमेश्वरस्य या परा ज्ञानशक्तिस्तस्या अतिरेकतोऽभिव्यक्तिः सदाशिवतत्त्वरूपतायाम्। परं तस्य या स्वतन्त्रेच्छाशक्तिरसावेवाग्रे प्रसरन्ती सदाशिवरूपतयाभिव्यक्ता भवति। ततो भावनाभ्यासे तत्त्वाध्वविधौ सदाशिव इच्छाशक्त्यात्मकतयैवोपास्यते। अत एव साधनाप्रधानेषु तन्त्रालोकादिषु ग्रन्थेषु सदाशिव इच्छात्मक एवोक्तः परं सिद्धान्तप्रधानेषु शिवदृष्टीश्वर-प्रत्यभिज्ञादिषु ग्रन्थेषु ज्ञानशक्त्यभिव्यक्तिप्राधान्यत इति। ततो नात्रविरोधशङ्कावकाशः कोऽपि।**

सदाशिवभट्टारकः :— सदाशिवतत्त्वेऽधिष्ठातृत्वं भजमानो मन्त्रमहेश्वरैरूपास्यो भगवान्।

द्र०:- **'ईश्वरभट्टारकः'** इति।

"यस्तु सदाशिवभट्टारक ईश्वरभट्टारकश्च ध्येयोपास्यादि-रूपतया स ब्रह्मविष्णुतुल्यः पृथगेव मन्तव्यः।"
(ई०प्र०वि०,खं०2,पृ०,193)

सदाशिवतत्त्वमन्यत् सदाशिवभट्टारकश्चान्यः इति न विस्मर्त्तव्यं सुधीभिः।

सदाशिवेश्वरतत्त्वे :— ज्ञानस्य प्राधान्ये क्रियायाश्च गौणत्वे समुन्मीलितमात्रचित्रकल्पा या विश्वस्य स्थितिः सा सदाशिवतत्त्वम्। क्रियाशक्तेः प्राधान्येन विकासे चित्रकारस्य बुद्धौ सुस्फुटतामाप्तस्य चित्रस्येव विश्वस्य शिव चित्रप्रकाशन्तः-स्थितिरीश्वरतत्त्वम्। सदाशिवदशायामहमंशस्य प्राधान्य-

मीश्वरदशायां चेदमंशस्येति विशेषः।

यथा—

"प्रथमस्य — ज्ञानस्योद्रेके द्वितीयायाश्चार्थात् (क्रियायाः) अस्फुटत्वरूपेन्यग्भावे सति सदाशिवाख्यं तत्त्वम् .....।"

(म०मं०प०,पृ०,41)

"द्वितीया क्रिया, तस्या उल्लेखे स्फुरणापरपर्याये प्राचुर्ये ज्ञानस्य चार्थतः स्तैमित्ये सतीश्वरो नाम भवति। ईश्वराख्यं तत्त्वमित्याम्नायते।"

(तदेव,पृ०,41)

"एतदुक्तं भवति—अहन्तेदन्तालक्षणयोर्ज्ञानक्रिययोराद्योद्रेकादनुन्मीलितचित्रन्यायेन व्यक्ताव्यक्तमयविश्वप्रमातृतास्वभावं सदाशिवाख्यं तत्त्वम्, एतद्विपर्यासेन क्रियाशक्त्यौज्ज्वल्ये व्यक्ताकारविश्वानुसन्धातृरूपमीश्वर तत्त्वमिति।"

(तदेव,म०मं०,पृ०,41)

सदाशिवेश्वरौ :— ज्ञानशक्त्युद्रेकवशतः समुन्मीलितमात्राया इदन्ताया अहन्तान्तरेवावभासे शिवस्य सदाशिवता, इदन्तायाः पुनस्तत्रस्फुटरूप आभासे तस्येश्वरता।

यथा—

"ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिवः।"

(ई०प्र०31-2)

~ शिवरूपौ :— **सदाशिवेश्वरपदयोरिदम्भावोल्लासेऽपि शुद्धसंविद्रूपता न सर्वथा तिरोहिता भवति, न चाप्यपरिमिता स्वतन्त्रा क्रियाशक्तिः। ततस्तत्पदद्वयं शिवरूपता प्रायमेवेति तयोः पतित्वमेव न पशुत्वम्। तथैव च मन्त्रेश्वरमन्त्रमहेश्वराणाम्। सूचितमेतत् सर्वं सङ्केतमात्रतो।**

यथा—

"सदाशिवेश्वरता च परमपदान्न भिद्यते देशकालादिभेदाभावादिति तावानेव शिवनाथः। तत एव रुद्रेश्वरसदाशिवभूमयः परमेश्वरपदमय्यः इति।"

(ई०प्र०वि०वि०,खं०3,पृ०,366)

सद्गुरु :— (1) परिपूर्णस्वात्मपरमेश्वरत्वस्य स्वभ्यस्तं ज्ञानं यस्य विद्यते स एव सद्गुरुः। योगसिद्धिसम्पन्नोऽपि स्वभ्यस्तज्ञानवत्त्वेनैव सद्गुरुत्वपदं लभते। ज्ञानरहिता योगसिद्धयस्तु सौभाग्यलावण्यादिलौकिकगुणतुल्या एव, न सद्गुरुत्वप्रयोजिकाः।

यथा—

"सद्गुरुस्तु समस्तैतच्छास्त्रतत्त्वज्ञानपूर्णः साक्षाद्भगवद् भैरवभट्टारक एव। योगिनोऽपि स्वभ्यस्तज्ञानतयैव मोचकत्वे तत्र योगित्वस्य सौभाग्यलावण्यादिमत्त्वस्येवानुपयोगात्।"

(तं०सा०पृ०,122-123)

"यः पुनः सर्वतत्त्वानि वेत्त्येतानि यथार्थतः।।
स गुरुर्मत्समः प्रोक्तो मन्त्रवीर्यप्रकाशकः।
दृष्टाः सम्भावितास्तेन स्पृष्टाश्च प्रीतचेतसा।।
नराः पापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि।
ये पुनर्दीक्षितास्तेन प्राणिनः शिवचोदिताः।।
ते यथेष्टं फलं प्राप्य पदं गच्छन्त्यनामयम्।"

(तं०आ०13,219-222)

(2) यः सिद्धान्तज्ञः, अनुभवशीलश्चासौ सद्गुरुः।

यथा—

"श्रोत्रियं ब्रह्मनिष्ठं स्वं श्रोत्रियाद् ब्रह्मनिष्ठतः।
विज्ञाय सच्चिदानन्दरूपे विहरतां सदा।।"

(आ०वि०3,23)

श्रोत्रियत्वेनात्र शास्त्रज्ञानवत्त्वं ब्रह्मनिष्ठत्वेन च साक्षात् स्वस्वरूपानुभवशीलत्वमुक्तं वेदितव्यम्।

~ प्रकारभेदतः :— **वस्तुतो भुक्तिमुक्तिप्रदानसमर्थो गुरुः कश्चित् सांसिद्धिको भवति प्रातिभज्ञानवान् कश्चित् पुनः दीक्षादिसंस्कारसंस्कृतो गुरुपदेऽभिषिक्तो भवति। प्रतिभादेस्तारतम्यतो प्रातिभगुरवोऽपि पुनर्बहुप्रकारा भवन्ति।**

यथा—

"..... आचार्यः प्राप्यते स च।।
तारतम्यादियोगेन संसिद्धः संस्कृतोऽपि च।
प्राग्भेदभागी झटिति क्रमात् सामस्त्यतोऽशतः।।
इत्यादिभेदभिन्नो हि गुरोर्लाभ इहोदितः।"

(तं०आ०13,223-225)

सद्भावशास्त्रम् :— तन्त्रसद्भावो नामागमः।

"श्रीसिद्धाटनसद्भावमालिनीसारशासने।"

(तं०आ०28,113)

सद्यः प्राणाहरीः— ~ दीक्षा :— **मन्दतीव्रस्यानुग्रहस्य पात्रतां याताय कस्मैचिदधिकारिणे गुरुः सद्यः प्राणवियोजिकां दीक्षां ददाति येन तस्य शरीरमपि पतति सद्यः, तत्पात एवासौ साक्षाच्छिवत्वसमावेशभाग्भवति वा, ऊर्ध्वलोके वा योज्यते क्वचिद् यदि भोगवासनावशिष्टा भवेत्। परं तथाविधा प्राणहरी दीक्षा आसन्नमरणे एव शिष्ये विधीयते। यथा—**

"अभ्यासवतो वा तदानीं सद्य एव प्राणवियोजिकां दीक्षां लभते। सा तु मरणक्षण एव कार्या, इति वक्ष्यामः।"

(तं०सा०,पृ०,123)

सद्यः समुत्क्रमणदीक्षा :— आसन्नमरणास्य सद्यः प्राणवियोजिका दीक्षा विधीयते। गुरुः शिष्यस्य प्राणान् उत्क्रमय्य ब्रह्मरन्ध्रमार्गेण च निष्क्रमय्य सकलानावरणांश्च विभेद्य तं परमशिवेनैकीकरोति, योजयति वा समुत्कृष्टे क्वापि भुवने दिव्यातिदिव्यभोगसिद्ध्यर्थं स्वशक्तिबलेन। शिष्यस्य सर्वेऽपि पाशाः सद्यः शोध्यन्ते पाशशोधनपूर्वकमसौ बुभुक्षुः सन् सद्यः ऊर्ध्वभुवनगतिं, मुमुक्षुः सन् परमशिवैकीभावमासादयति। एवंविधा दीक्षा मरणाकाले एव विधीयते प्रारब्धकर्मणि समाप्तप्राये सति। न ततः प्राक् प्रारब्धस्याशोधनीयत्वनियमात्।

यथा—

"यदा पुनरासन्नमरणास्य स्वयं वा बन्धुमुखेन शक्तिपात

उपजायते, तदास्मै सद्यः समुत्क्रमणदीक्षां कुर्यात्। समस्तमध्वानं शिष्ये न्यस्य तं च क्रमेण शोधयित्वा भगवर्ती कालरात्री मर्मकर्तनी न्यस्य, तया क्रमात्क्रमं मर्मपाशान् विभिद्य ब्रह्मरन्ध्रवर्ति शिष्यचैतन्यं कुर्यात्। ततः पूर्वोक्तक्रमेण योजनिकार्थं पूर्णाहुतिं दद्यात्, यथा पूर्णाहुत्यन्ते जीवो निष्क्रान्तः परमशिवाभिन्नो भवति। बुभुक्षोस्तु, द्वितीया पूर्णाहुतिः—भोगस्थाने योजनाय .....।"

(तं०सा०,पृ०,162)

~ गोपनीया :— **यथा—**

"उक्तेयं सद्य उत्क्रान्तिर्या गोप्या प्राणवद्बुधैः।।"

(तं०आ०19,56)

सद्यः समुत्क्रान्तिदीक्षा :—

द्र०:- **'सद्यः समुत्क्रमणदीक्षा'** इति।

सद्योजातः :— पञ्चसु मन्त्रप्राणिष्वेकः। भगवान् स्वच्छन्दनाथ एव तद्रूपधारी। एषा तस्य भगवतः रौद्रीदशा। भोग्यादि पदार्थजातात् प्रतिसंहृताऽत्र चितिः। मोक्तृभोग्ययोरत्र निमीलनं जायते। विश्वमात्रमजातमिव सद्योऽवभासते। तत एवास्यैतदभिधानम्। ज्ञानशक्तिप्रधानम्। शिवशून्यताया अन्तरप्यत्र विश्वं प्रोच्छलद्रूपतया स्थितमेव। अस्य बोधरूपतया यद्भावव्यापकत्वं तदस्यौदासीन्यं शिथिलयदिव चकास्ति। एषैवास्य ज्ञान शक्तिविजृम्भा। सद्योजाताख्यं स्वच्छन्दनाथस्य पश्चिमाभिमुखं वदनं शुक्लवर्णम्। यथा—

"सद्योजातश्च यद्रुद्रः पुरुषश्चेश्वरात्मकः।।"

(मा०वि०वा०1,251)

"यदा हि चितिरेवैषा सर्वथा सङ्कुचत्स्थितिः।।
क्रमेण भोग्योपायेभ्यो भोग्येभ्यो देहतो भुजः।
भोगाद् भोक्तुस्तथा शून्यमहाप्रलयभागिव।।
जायते रुद्ररूपैषा दशा सांहारिकी यतः।"

(मा०वि०वा०1,249-251)

"अतश्च सद्योजातेऽस्मिन् मुख्या रौद्रदशा स्थिता।"

(तदेव 1,255)

"अजातमिव तद्विश्वमत्र सद्योऽवभासते।
सद्योजातपदं तेन शून्यसंवेदनात्मकम्।।"

(तदेव1,259)

"अतो निज विबोधेन तान्भवान् व्याप्नुवन्विभुः।
एतैस्त्याजयते तां स्वामौदासीन्यदशां प्रभुः।।
ज्ञानशक्तेरियं जृम्भा तज्ज्ञानस्थितिभाविनः।
भावाः प्रयान्ति पूर्णत्वं विकासि निजतेजसः।।"

(तदेव1,266-267)

~ तत्कला :— **अष्टौ कलास्तस्य प्रतिपादिताः शास्त्रेषु।**

"सिद्धिर्ऋद्धिर्द्युतिर्लक्ष्मीर्मेधा कान्तिः सुधा स्थितिः।।
सद्योजातकलास्त्वेवमष्टौ संपरिकीर्तिताः।"

(स्व०तं०1,58-59)

एतासां पृथक्-पृथक् लक्षणानि नैव लभ्यन्ते क्वापि।

~ शिशुवत्प्रवृत्तः :— **पूर्वजन्मसम्बन्धिप्रसिद्धि-संस्कारानुसारमेव बालस्य स्तन्यपानादौ प्रवृत्तिर्भवति।** **यथा—**

"प्राग्वासनोपजीवी चेद्विमर्शः सा च वासना।।
प्राच्या चेदागता सेयं प्रसिद्धिः पौर्वकालिकी।"

(तं०आ०35,9-10)

यथा बालस्य स्वत एव प्रवृत्तिस्तथा भगवतः सद्योजातस्यापि मता कैश्चन सिद्धैः।।

सद्योज्योतिः :— स्वायम्भुवागमटीकाकृदाचार्यः खेटपालेति नाम्नापि प्रसिद्धः।

यथा—

"उवाच सद्योज्योतिश्च वृत्तौ स्वायम्भुवस्य तत्।
बाढमेको हि पाशात्मा शब्दोऽन्यश्च शिवात्मकः।।"

(तं०आ०16,210)

"तथा चाह खेटपालः शब्दराशेर्विशेषताम्।।
स्वायम्भुवस्य टीकायां बाढमित्यादिना गुरुः।"

(शि०दृ०3,13-14)

"खेटपालगुरुः श्री स्वायम्भुव शास्त्रटीकायाम्।"

(शि०दृ०वृ०,पृ०,103)

द्र०:- **'खेटपालः'** इति।

सद्योनिर्वाणदः— ~ मन्त्रः — स च स्रूक्ष्यूँ इत्येकपिण्डात्मा।

यथा—

"बिन्द्विन्द्वनलकूटाग्निमरुत्षष्ठस्वरैर्युतम्।"

(तं०आ०30,60)

"बिन्दुः, इन्दुः स्, अनलो र्, कूटं क्ष्, अग्निः र्, मरुत् य् षष्ठः स्वरः ऊ एवं 'स्रूक्ष्यूँ'।।"

(तं०आ०वि०,खं०12,पृ०,203)

~ तद्रहस्यम् :— **यथा—**

"आपादतलमूर्धान्तं स्मरेदस्त्रमिदं ज्वलत्।।
कुञ्चनं चाङ्गुलीनां तु कर्तव्यं चोदनं ततः।
जान्वादिपरचक्रान्तं चक्राच्चक्रं तु कुञ्चयेत्।
कथितं सरहस्यं तु सद्योनिर्वाणकं परम्।।"

(तं०आ०30,60-62)

सद्योनिर्वाणदाः— ~ दीक्षा :— गुरुणा तीव्रतरानुग्रहदृष्ट्या सम्पादिता सती विशेषप्रकारा दीक्षा सद्योमुक्तिप्रदा। मन्दतीव्रोऽत्रानुग्रहशक्तिपातः।

यथा—

"समयाचारपाशं तु निर्बीजायां विशोधयेत्।।
दीक्षामात्रेण मुक्तिः स्याद् भक्तिमात्राद्गुरोः सदा।
सद्योनिर्वाणदा दीक्षा निर्बीजा सा द्वितीयिका।।
अतीतानागतारब्धपाशत्रयवियोजिका।
दीक्षावसाने शुद्धि स्याद् देहत्यागे परं पदम्।।"

(स्व०तं०4,147-149)

"सद्य इति दीप्ततममन्त्रदीक्षावियोजितदेहकलावस्थिति-समनन्तरमेव, अत एवारब्धकार्यस्यापि पाशत्रयस्य वियोजिका

देहत्यागे देहत्यागसमये दीक्षाया यदवसानं निष्पत्तिस्तत्रेत्यर्थः। एवं चारिष्टलक्षणादिभिर्निश्चितासन्नमरणस्यैवेयं कार्येति तात्पर्यम्। यदुक्तं श्रीमद्गह्वरे :—

"दृष्ट्वा शिष्यं जराग्रस्तं व्याधिना परिपीडितम्।
उत्क्रमय्य ततस्त्वेनं परतत्त्वे नियोजयेत्।।'
इति।"

(स्व०तं०उ०प०4,पृ०,94)

~ विद्या :— **सद्योनिर्वाणदो मन्त्र एव।**

स च मर्मकर्तनीत्यपराभिधानः कालरात्रिसमाख्यो मन्त्रः स्वे स्थाने द्रष्टव्योऽत्र कोषे।

सद्योभुक्तिमुक्तिप्रदोः— ~ दीक्षाविधिः :— **मण्डल- कुण्डाद्युपयोगरहिता भावनामात्रेण कृत्यविशेषकारिणी सद्यः सकलाध्वशोधनकरी स्वरूपप्रथाप्रदात्री काचन दीक्षोपदिष्टा मालिनीतन्त्रे। सैव सद्यः—प्रत्ययकारिणी दीक्षा।**

यथा—

"अथातः सम्प्रवक्ष्यामि दीक्षां परमदुर्लभाम्।
भुक्तिमुक्तिकरीं सम्यक् सद्यः प्रत्ययकारिकाम्।।
नास्यां मण्डलकुण्डादि किञ्चिदप्युपयुज्यते।
न च न्यासादिकं पूर्वं स्नानादि च यथेच्छया।।
प्रविश्य यागसदनं सूपलिप्तं सुचर्चितम्।
प्राङ्मुखोदङ्मुखोवापि सुपुष्पाम्बरभूषितः।।
.....
ततः शिष्यं समाहूय बहुधा सुपरीक्षितम्।
रुद्रशक्त्या तु सम्प्रोक्ष्य देवाग्रे विनिवेशयेत्।।
भुजौ तस्य समालोक्य रुद्रशक्त्या प्रदीपयेत्।
.....
इत्यादि सकलाधिकारान्तम्।"

(मा०वि०तं०11,1-47)

सद्योमुक्तिः :— सा च सिद्धयोगस्य कौलोपासनालब्धसामर्थ्यस्य योगिनोऽनुग्रहदृष्टिपातमात्रतो भवति।

यथा—

"श्रीकुले यथोक्तम् :—
'हेलया क्रीडया वाऽपि आदराद्वाथ तत्त्ववित्।
यस्य सम्पातयेद्दृष्टिं स मुक्तस्तत्क्षणात् प्रिये।।' इति।"

(प०सा०वि०,पृ०,186)

सद्विद्या :— अहन्ताया इदन्तायाश्च समधृततुलापुटन्यायेन यो सामानाधिकरण्येन भेदाभेदमयो विमर्शस्तस्याभिव्यक्तिः सद्विद्या।

यथा—

(क) "सामानाधिकरण्यं च सद्विद्याऽहमिदं धियोः।"

(ई०प्र०3,1-3)

(ख) "अहमिदमिति समधृततुलापुटन्यायेन यो विमर्शः स सदाशिवनाथ ईश्वरभट्टारके च। इदम्भावस्य तु ध्यामलाध्यामलकृतो विशेषः। ये एते अहमिति इदमिति धियौ तयोर्मायाप्रमातरि पृथगधिकरणत्वम्—अहमिति ग्राहके इदमिति च ग्राह्ये, तन्निरासेनैकस्मिन्नेवाधिकरणे यत् सङ्गमनं सम्बन्धस्वरूपप्रथनं तत् सती शुद्धा विद्या; अतोऽशुद्धविद्यातो मायाप्रमातृगताया अन्यैव।"

(ई०प्र०वि०,खं०2,पृ०,196-197)

~ द्विप्रकारा :— **यथा**—

"अहमित्यनन्योन्मुखः प्रकाशविमर्शः, इदमित्यन्योन्मुखः। एकः शिवभट्टारके, द्वितीयो, विद्येश्वरवर्गे। मायाप्रमातरि च तौ ग्राहकग्राह्यलक्षणे पृथगधिकरणे सिद्धौ। यदा तु मध्यकोटौ समधृततुलावद् विश्राम्यतस्तदा अहमिदमिति ग्राहके ग्राह्यस्य प्रक्षेपोऽत एव ध्यामलग्राह्यांशे विमर्शः सदाशिवनाथे। इदमहमिहति ग्राह्ये स्फुटीभूतेऽहमिति प्रक्षेपात् सामानाधिकरण्यं विमर्श ईश्वरभट्टारके।"

(ई०प्र०वि०वि०,खं०3,पृ०,266)

सन्तर्पणम् :— मन्त्र प्रयोगविधिविशेषः। यथा—

"तर्पणं बलवत्ताधानं, तच्च प्रतिवर्णं लांकारेण सम्पुटीकरणम्।
लांकारेण तु बीजेन तथैकान्तरितेन च।
बलवाञ्जायते मन्त्रः.....।। इति।"

(ने०तं०उ०खं०2,पृ०,75)

सन्धानम् :— पूजाङ्गविशेषः।

यथा—

"सन्धानं मन्त्रादिविषयम्।"

(तं०आ०वि०आ०2,26)

सन्ध्यक्षराणि :— ए ऐ ओ औ इति वर्णचतुष्टयं सन्ध्यक्षरचतुष्टयम्, स्वरविशेषाणां परस्परसन्ध्याजन्यत्वात् तेषाम्।

~ तदुदयः :— **(1) अनुत्तरानन्दयोर्भोक्तृतया स्थितयोरिच्छादिभिर्भोग्यभावस्थिताभिः सह परस्परसंघट्टतया यो विशेषः शिवस्यान्तरेव स एव सन्ध्यक्षरोदयरूपः।**

यथा—

"अनुत्तरानन्दभुवामिच्छाद्ये भोग्यतां गते।।
सन्ध्यक्षराणामुदयो भोक्तृरूपं च कथ्यते।"

(तं०आ०वि०,खं०2,189-90)
(तं०आ०3,189-190)

(2) अनुत्तरानन्दौ यदा इच्छोन्मेषाद्युन्मुखौ पुनः पुनर्भवतस्तदा विशेषप्रकारायाः शिवताया उल्लासोऽन्तरेव स एवोल्लासः क्रमेण ए, ऐ ओ औ इति सन्ध्यक्षरचतुष्टयम् एष क्रियाशक्तेः क्रमिकः स्कारः। यथा—

"अनुत्तरानन्दयोरिच्छादिषु यदा प्रसरस्तदा वर्णद्वयम् ए, ओ इति। तत्रापि पुनरनुत्तरानन्दसङ्घट्टात् वर्णद्वयम् ऐ औ इति। सेयं क्रियाशक्तिः। तदेव च वर्ण चतुष्टयम् ए ऐ ओ औ इति।"

(तं०सा०पृ०,14)

~ तद्विशेषः (अन्तःस्थेभ्यः): — **सन्ध्यक्षरात्मके संघट्टेऽनुत्तरानन्दयोः प्राधान्ये सतीच्छादीनां गुणीभूतत्वमित्यतो**

ह्येषां स्वरात्मकता। अन्तःस्थेषु पुनरिच्छादीनामेव प्राधान्ये सति तेषां व्यञ्जनता।

यथा—

"सन्ध्यक्षराणि गुणीभूतेच्छाकानि अनुत्तरप्रधानानि अन्तःस्थास्तु गुणीभूतानुत्तरा इच्छादिप्रधानाः इति।"

(तं०आ०वि०,खं०2,पृ०,185)

सन्ध्योपासनम् :— त्रिकाचारे समयदीक्षाविधौ ये संस्काराः तेषु सन्ध्याऽपि परिगणिता।

यथा—

"मेखला दण्डमजिनत्र्यायुषे वह्न्युपासनम्।
सन्ध्याभिक्षेति संस्काराः सप्तसप्त व्रतानि च"।।

(तं०आ०15,506)

~ तन्नियमभेदः :— **मुख्यत उदङ्मुखीभूय सन्ध्योपास्यते त्रिकाचार परैःसाधकैः।**

यथा—

".....आश्रित्योत्तरदिग्वक्त्रः"।

(तं०आ०26,30)

कौलादावन्यथैव नियमो यथा—

"अन्ये तु प्रागुदक्पश्चाद्दशदिक्षु चतुष्टयीम्।।
सन्ध्यानामाहुरेतच्च तान्त्रिकीयं न नो मतम्"

(तं०आ०26,33-34)

तान्त्रिकीति वामाद्याचारसम्बन्धिनी। तान्त्रिकीयमिति तन्त्रसम्बन्धि मतम्।

सन्निवेशः :— ~ करणयोगे :— स्वात्मरूपतयाभिनिविश्यमानं देहादिकमहन्तयाभिमन्यमानं सत् सन्निवेशनम्। विशेषतः करङ्किण्यादिमुद्रावस्थासु स्थाप्यमानं देहादि सन्निवेशनम्। सन्निवेशविशेषेण साकं भावनाविशेषोऽपि भावनीयो भवति। तेन च स्वस्वरूपस्थितिरवाप्यते। ततो ग्राह्यादिवत् शरीरादेरपि परिमित स्वस्वरूपतातिरस्कारेण परिपूर्णचिद्रूपतादर्शनं करणयोगेविशेषः।

यथा—

"विचार्यमाणं यत् किञ्चित् स्वरूपविभवात्मकम्।
सन्निवेशं तु तज्ज्ञेयं....."।।

(त्रिशिरोभैरवात्) **उद्धः**- (तं०आ०वि०,खं०3,पृ०,441)

सप्तकः :— सप्तमातृरूपतया पूज्यः शिवः।

यथा—

"सप्तक इति तदुक्तम् :—
'ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही च तथेन्द्राणी चामुण्डा चेति मातरः' इति।।"

(तं०आ०वि०,खं०1,पृ०,54)

सप्तत्रिंशत्तत्त्वम् :— ~ सिद्धान्ततः :— परशिवा- त्मकं परं तत्त्वम्। षट्त्रिंशत्तत्त्वाविभागात्मकं तत्त्वग्रामस्योदयलयस्थानम्। यथा—

"यत्तु सर्वाविभागात्म स्वतन्त्रं बोधसुन्दरम्।।
सप्तत्रिंशं तु तत्प्राहुस्तत्त्वं परशिवाभिधम्।"

(तं०आ०11,21-22)

"षट्त्रिंशस्यैव तत्त्वस्य सर्वाविभागात्मत्वाद्यात्मकमेकं रूपं सप्तत्रिंशत्वेन परिकल्पितम्।"

(तं०आ०वि०,खं०7/2,पृ०,14)

भावनोपदेशादावेव सप्तत्रिंशत्तत्त्वरूपताव्यहारः। वस्तुतो न षट्त्रिंशादधिकं किमपि। एकमेव परं तत्त्वं शिवतया शक्तितया परमशिवतया च साक्षात्कार्यं भवति परिपूर्णज्ञानेच्छुना साधकेन।

~ साधनादृष्ट्या :— **शिवतत्त्वेऽप्युपदेशभावनादिविषयतां नीते सति तस्य प्रतिष्ठास्पदत्वेन सप्तत्रिंशं परमशिवतत्त्वं स्वीक्रियते। यथा—**

"सर्वावच्छेदशून्यं शिवतत्त्वं षट्त्रिंशं तद्यदोपदिश्यते भाव्यते वा यत्तत् प्रतिष्ठापदं तत् सप्तत्रिंशम्।"

(तं०सा०,पृ०,110-111)

व्यवहारमात्रमेवैतदिति।

सप्तदशी :— ~ कला :— (1) स्वरषोडशकस्यापि मूलभूता परतत्त्वप्राणभूता च परासौ पारमेश्वरी महाशक्तिर्यद्दशात्तत्परं तत्त्वं निजं परमेश्वरत्वं सदा निर्वहति। यथा—

"उक्तं च त्रिशिरःशास्त्रे कलाव्याप्त्यन्तचर्चने।।
कला सप्तदशी तस्मादमृताकाररूपिणी।
परापरस्वस्वरूप बिन्दुगत्या विसर्पिता।।
शक्तिकुण्डलिका चैव प्राणकुण्डलिका तथा।।"
विसर्ग प्रान्ते देशे तु करकुण्डलिनीति सा

(तं०आ०3,137-140)

आनन्देच्छोन्मेषादि विसर्गात् प्रागिति।

(२) परमेश्वरस्य वैसर्गिकी शक्तिराकारात्मकेन वर्णेनाभिव्यङ्ग्या मातृकाक्रमे। यथा—

" 'पुरुषे षोडशकले तामाहुरमृतां कलाम्।'

इत्याद्युक्त्या अन्तःकरणप्रभृतीनां षोडशानामपि कलानामप्यायकारित्वान्नित्योदितत्वेन न चानस्तमितरूपत्वात् अमृताकाररूपिणी येयं चिन्मात्रस्वभावा कौलिकीति परेति एवमादिशब्दव्यपदेश्या हकारार्धार्धरूपिणी अमाख्या सप्तदशी कला।"

(तं०आ०वि०,खं०2,पृ०,141)

सप्तधात्वधारणा :— ~ तत्त्वभेदने :— मन्त्रे प्रमातरि धारणालम्बनीभूते मन्त्रेश्वरादित्रयेण, तच्छक्तित्रयेण च तस्यौतप्रोतत्वेन दर्शने सप्तधा विचित्रस्तस्य साक्षात्कारो भवति योगिनः। एवमेवाधारायां शुद्धविद्यायामालम्बनीकृतायाम्। अत्र प्रमातारः = 3, प्रामाणानि = 3 (शक्तयः), प्रमेयमालम्बनीभूतं = 1, इत्येवं सप्तधात्वम्।"

यथा—

"मन्त्राः सप्तविधा .....।"

(मा०वि०तं०2,6,)**उद्धः**- (तं० आ०वि०,खं०7,पृ०,6)

"सप्तधेति सशक्तिकस्य मन्त्रेश्वरादेस्त्रयस्य प्रमातृत्वात्।"
(तं०आ०वि०,खं०7,पृ०,6)

~ तत्रावस्थापञ्चकम् :— तत्र जाग्रत् = मन्त्रप्रमातुः स्वरूपम् = 1
स्वप्नः = मन्त्रेश्वरस्तच्छक्तिश्च = 2
सुषुप्तिः = मन्त्रमहेश्वरस्तच्छक्तिश्च = 2
तुर्या = शिवस्य शक्तिः = 1
तुर्यातीतम् = शिवः = 1
7

यथा—
"सप्तभेदे तु मन्त्राख्ये स्वं मन्त्रेशा महेश्वराः।
शक्तिः शम्भुश्च पञ्चोक्ता अवस्था जाग्रदादयः।।"
(तं०आ०10,306)

"पूर्ववत्सप्तभेदेऽपि स्वं मन्त्रेशेशशक्तयः।।
शिवश्चेति परिज्ञेयाः पञ्चैव वरवर्णिनि।"
(तं०आ०वि०,खं०7,पृ०,207)

उद्धृतः- (मा०वि०तं०2,32-33)
द्र०:- (तं०सा०,पृ०,107) इति।

सप्तपञ्चकानि :— केवलमेवमुक्तानि न च स्पष्टीकृतानि विवृतिविमर्शिन्याम्।

यथा—
"शक्तिपञ्चकं क्रमेण प्रसरमासादयत् सप्तपञ्चकानि दर्शयति, अविभागेन चास्ते इति षट्त्रिंशत्तत्त्वात्मनस्ते इति।"
(ई०प्र०वि०वि०,खं०2,पृ०,303)

तानि चानुमानत इमानि :—
(1) शिवादिपञ्चकं, शुद्धतत्त्वात्मकम्।
(2) कारणपञ्चकं-ब्रह्म-विष्णु-रुद्र-ईश्वर-सदाशिवात्मकम्।
(3) मन्त्रपञ्चकं-ईशान-तत्पुरुष-सद्योजात-वामदेव-अघोरात्मकम्।
(4) ज्ञानेन्द्रियपञ्चकम्। (5) कर्मेन्द्रियपञ्चकम्।
(6) तन्मात्रपञ्चकम्। (7) भूतपञ्चकम्।

सप्तप्रमातृवर्गाः :— ते च स्पष्टं प्रतिपादिताः ईश्वरप्रत्यभिज्ञादौः—
(1) शिवाः :— सर्वथाऽभेदनिष्ठाः।
(2) मन्त्रमहेश्वराः :— अहमिदमिति विमर्शपराः।
(3) मन्त्रेश्वराः :— इदमहमित्येवं स्वात्मविमर्शवन्तः।
(4) मन्त्राः (विद्येश्वराः) :— स्वात्मानमैश्वर्यसुमण्डित-शुद्धसंविदात्मकं विमृशन्तोऽपि भेददृष्टिभाजः।
(5) विज्ञानाकलाः :— ऐश्वर्यहीनां शुद्धसंविदमात्मत्वेनाभिमन्वानाः।
(6) प्रलयकलाः :— प्राणं वा परिमितां क्रियासामर्थ्यशून्यां वैयक्तिकीं वा संविदमात्मत्वेनाभिमन्वानाः सुषुप्तप्रायाः प्रमातारः।
(7) सकलाः :— कर्मपाशबद्धाः संसृतिसागरेषु परिलुठन्तः प्रमातारः। एतेषां लक्षणानि स्वेस्वे स्थाने दृष्टव्यानि।

~ अपरथाऽपि :— अपरोऽपि विशेषः प्रकारः सप्तप्रमातृनिरूपणपरः समुल्लिखितः आचार्याभिनवगुप्तपादैः। तदनुसारं केवलमेकैकमलयुक्ताः प्रमातृप्रकारास्त्रयः, द्विबमलयुक्तास्त्रयः, त्रिमलयुक्तश्चैकः। तदेष विश्लेषणप्रकारः कथं सङ्गच्छते इति न तैः स्पष्टीकृतम्। तत्र त्रिमलाः प्राणिनः सकलाः प्राणप्रलयाकलाश्च, आणवमायीयमलयुक्ता परस्परं भेदभाजः विज्ञानाकलाः, आणवकार्मयुक्ताः शून्यप्रलयाकलाः, मायीयकार्ममलयुक्ताः के इति न स्पष्टीकृतम्। केवलेन मायीयेन मलेन युक्ता विद्येश्वराः। केवलेनाणवेन कार्मेण च युक्ताः केके इत्यपि न स्पष्टीकृतम्। चेद् विज्ञानाकला केवलाणवमलभाजस्तर्हि मायीयाणवमलद्वययुक्ताः के इति स्पष्टतां यायात्। मन्त्रेश्वराः, मन्त्रमहेश्वराः, शाम्भवशाक्ताश्च प्राणिनः शुद्धा एव गण्यन्ते। ते कथं मलभाजः इति सर्वमेतत् संदिग्धमेव। प्रक्रियान्तरं भवेत्किमप्यागमिकं यदनुसारं विवृतिविमर्शिन्यां विमर्शिन्यां चैतदुक्तमाचार्यमहोदयैः। तदेष विषयस्तदैव निर्णेतुं शक्यो यदा किमप्यलब्धं ग्रन्थान्तरं लभ्येत यदनुसारमेतदुक्तं वर्तते। न खल्वभिनवगुप्तोक्तावसामञ्जस्यं किमपि सम्भवितुमर्हति। यथा—
"एवं त्रिभिस्त्रिभिरेकद्विकभेदैरनेकेन च त्रिकभेदेन सप्तप्रमातृविकल्पाः।"
(ई०प्र०वि०वि०,खं०3,पृ०,326)

~ **शिवविभूतयः** :— शिवस्यैश्वर्यमेव प्रमातृभेदावभासकम्। ततः प्रमातृभेदाः शिवविभूतयः।
"महामन्त्रेश-मन्त्रेश-मन्त्राः शिवपुरोगमाः।
अकलौ सकलश्चेति शिवस्यैव विभूतयः।।"
(तं०आ०1,81)

अकलौ-प्रलयाकलो विज्ञानाकलश्चेति द्वौ।

सप्तमातरः :— (1) मनुष्याणां कल्याणायोमापतिना स्वशक्तेरुमायाः अंशाः भूलोकमवतारिताः अत्र मातृकासप्तकरूपेणोपास्यन्ते। ताश्च मातरो ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, ऐन्द्री, चामुण्डा (विच्चिकाऽपरपर्याया) इति। यथा—
"ब्राह्म्यैशी स्कन्दजा हारी वाराह्यैन्द्री सविच्चिका (चर्चिका)।।
पीता शुक्ला पीतनीले नीला शुक्लारुणाक्रमात्।
अग्नीश-सौम्य-याम्याप्य पूर्व-नैर्ऋतगास्तु ताः"।।
अंशेन मानुषे लोके धात्रा ता ह्यवतारिताः"
(तं०आ०8,241-243)

(2) मातृका वर्गाधिष्ठात्र्यो देव्यः। यथा—
"अवर्गे तु महालक्ष्मीः कवर्गे कमलोद्भवा।।
चवर्गे तु महेशानी टवर्गे तु कुमारिका।
नारायणी तवर्गे तु वाराही तु पवर्गिका।।
ऐन्द्री चैव यवर्गस्था चामुण्डा तु शवर्गिका।

एताः सप्त महामातृः सप्तलोकव्यवस्थिताः"।।
(स्व०तं०1,34-36)

सप्तरुद्राः :— शर्वभीमभवाद्याः रुद्रलोकाधिपाः।

यथा—

"सप्तलोकेषु ये रुद्रा कथयामि समासतः।
शर्वो रुद्रस्तथा भीमो भव उग्रस्तथैव च।।
महादेवस्तथेशानो रुद्रलोकाधिपास्त्वमी।
ब्रह्मलोके स्थितो ब्रह्मा विष्णुर्वै वैष्णवे पुरे।।
रुद्रलोके स्थितो रुद्रः सर्वेषां नायकः स्मृतः।"
(स्व०तं०10,615-617)

सप्तसत्री :— सप्तानां सूत्राणां समूहः सप्तसत्रीति। लब्धाभिषेकः साधको गुरुपदवीमवाप्य शिष्याणां बन्धविमोचनाय यां प्रक्रियामनुतिष्ठति सा सप्तसत्रीति कथ्यते। दीक्षादीनि च सप्ताङ्गानि तस्याः।

यथा—

"ज्ञानमूलो गुरुः प्रोक्तः सप्तसत्रीं प्रवर्तयेत्।
दीक्षा व्याख्या कृपा मैत्री शास्त्रचिन्ता शिवैकता।।
अन्नादिदानमित्येतत् पालयेत् सप्तसत्रकम्।"
(तं०आ०23,22-23)

परिपूर्णज्ञानवानेव गुरुः सप्तसर्ती विधातुं समर्थो भवतीति।

सप्तात्मकत्वम्:— ~ तत्त्वभेदने :— मन्त्रस्य धारणालम्ब- नस्वरूपत्वे सति तस्य मन्त्रेशादि त्रयव्यापकत्वं चेति 1+3+3 इति सप्तात्मकतया भावनाभ्यासस्तत्त्वभेदने।

यथा—

"मन्त्रस्य स्वरूपत्वे त्रयाणां प्रमातृत्वे सप्त।"
(तं०सा०,पृ०,98)

सप्तात्मिका :— ~ विद्या :—

द्र०:- **'तत्त्वभेदनम् एकादशात्मकम्'** इति।

सप्रत्यया :— ~ दीक्षा :— (1) यस्या दीक्षायाः साफल्यविषये सर्वेजनाः विश्वासभाजो भवन्ति सा सप्रत्यया।

(2) गुरुः शिष्यस्य यवादिबीजानां च सममेव पाशान् शोधयति दीक्षया। ततो बीजानि भूमावुप्यन्ते। चेत्तान्यङ्कुरं- नैव जनयेयुस्तर्हि विश्वस्यते यत्तेषां यथा पुनर्जन्मपरम्परा- समाप्ता तथैव शिष्यस्यापीति। सैषा सप्रत्यया दीक्षा। एषैव निर्बीजा दीक्षा, बीजानां निर्बीजताऽऽपादनात्।

यथा—

"सप्रत्ययां निर्बीजां तु यदि दीक्षां मूढाय आयातशक्तिपाताय च दर्शयेत्, तदा हि शिवहस्तदानकाले अयं विधिः त्रिकोणमाग्नेयं ज्वालाकरालं रेफविस्फुलिङ्गं बहिर्वात्याचक्रध्मायमानं मण्डलं दक्षिणहस्ते चिन्तयित्वा तत्रैव हस्ते बीजं किञ्चिन्निक्षिप्य ऊर्ध्वाधोरेफविबोधित फटकारपरम्पराभिः अस्य तां जननशक्तिं दहेत्।

एवं कुर्वस्तं हस्तं शिष्यस्य मुर्धनि निक्षिपेत्। इति द्वयोरप्येषा दीक्षा निर्बीजा स्वकार्यकरण-सामर्थ्यविध्वंसिनी भवति। स्थावराणामपि दीक्ष्यत्वेनोक्तत्वात्।
(तं०सा०,पृ०,163-64)

(3) तुलया शालिबीजाद्यैर्वा परीक्ष्यमाणफला दीक्षा या मुक्तिप्रदाया दीक्षायाः सफलत्वं निश्चययति।

यथा—

"उप्तं नैतत् प्ररोहाय तेनैव प्रत्ययेन तु।
मलमायाख्यकर्माणि मन्त्रध्यान क्रिया बलात्।।
दग्धानि न स्वकार्याय निर्बीजप्रत्ययं त्विमम्।"
(तं०आ०,20,5-6)

"तुलाशुद्धिपरीक्षां वा कुर्यात् प्रत्ययोगिनाम्।"
(तं०आ०20,11)

~ अन्त्येष्टिदीक्षा :— **यत्र शवशरीरं स्पन्दते मनाक्।**

यथा—

"सुषुम्नान्तर्गतेनैव विसर्गेण पुनःपुनः।
ताडयेत कलाः सर्वाः कम्पतेऽसौ ततः पशुः।।"
उद्धार्यः— "पशुः कम्पते, वामं वा हस्तमुत्क्षिपेत्।
ततः प्रत्ययोत्पादानन्तरं परे योजयेत्।"
(तं०आ०वि०,खं०10,पृ०,311)

द्र०:- **'अन्त्येष्टिदीक्षा'** इति।

~ तत्कर्त्ता :— **प्रक्रियाविधानज्ञ एव गुरुः सप्रत्ययदीक्षाकरणे अधिकारी न केवलज्ञानवान्।**

यथा—

"यो गुरुर्जपहोमार्चाध्यानसिद्धत्वमात्मनि।
ज्ञात्वा दीक्षां चरेत्तस्य दीक्षा सप्रत्यया स्मृता।।"
(तं०आ०20,8)

~ तत्फलम् :— **तस्यां कृतायां शिष्यस्य न कश्चिदपि विशेषः। केवलं गुरुकृते मन्त्रादिप्रयोगे लोकः आश्वस्तो भवति।**

यथा—

"साभ्यासस्य तदप्युक्तं बलाश्वासि न तत्कृते।"
(तं०आ०21,42)

अन्येषां विश्वासार्थं न शिष्यप्रयोजनायेति।

~ तदनधिकारी :— **क्रियाप्रपञ्चे रुचिरहिता अवधूतप्रायः केवलज्ञानिनो नाधिकृताः सप्रत्ययदीक्षाकरणे।**

यथा—

"अवधूते निराचारे तत्त्वज्ञे न त्वयं विधिः।
साचारैः क्रियते दीक्षा या दृष्टप्रत्ययान्विता।।
निराचारेण दीक्षायां प्रत्ययस्तु न गद्यते।"
(तं०आ०20,9-10)

~ मृतोद्धारे :— **शवशरीरे क्रियमाणोऽसौ दीक्षा- विधिर्यत्र मन्त्रादिसामर्थ्येन शवशरीरे पुनः प्राणसञ्चारो भवति, शवशरीरं च कम्पते। तेन जनानां विश्वासो भवति दीक्षायाः सफलतायाम्।**

इत्येषा सप्रत्यया-सविश्वासा दीक्षा।

अनया दीक्षयाऽकृताभ्यासोऽपि जीवन् शिवशासनेऽदीक्षितोऽपि च शिवमार्गेणोर्ध्वं सरति भोगमोक्षलब्धये।

यथा—

"मूढानां तु प्रतीतिरूढये सप्रत्ययामन्त्येष्टिं क्रियाज्ञानयोगबलात् कुर्यात्। तत्र शवशरीरे संहारक्रमेण मन्त्रान् न्यस्य जालक्रमेणाकृष्य रोधनवेधनघट्टनादिं कुर्यात्-प्राणसञ्चारक्रमेण हृदि कण्ठे ललाटे चेत्येवं शवशरीरं कम्पते। ततः परमशिवे योजनिकां कृत्वा तद् दहेत् पूर्णाहुत्या।"

(तं०सा०,पृ०,175-176)

सबीजाः— ~ दीक्षा :— (1) समयादिपरिपालने समर्थेषु पुत्रकाचार्यादिषु या दीक्षा विधीयते सा सबीजेति कथ्यते। पुत्रकाद्यैर्दीक्षाप्राप्त्यनन्तरमपि समयादिनियमाः पालनीया एव भवन्ति। यथा—

"विद्वद्द्वन्द्वसहानां तु सबीजा कीर्तिता प्रिये।।
दीक्षानुग्राहिका तेषां समयाचारसंयुता।
विशेषसमयाचारा मन्त्राख्ये ये प्रकीर्तिताः।।
तेऽत्र पाल्याः प्रयत्नेन मोक्षसिद्धिमभीप्सता।"

(स्व०तं०उ०,प०,4,88-90)

(2) पुत्रकदीक्षा आचार्यदीक्षा च सबीजैव भवतः, ततः पुत्रकैराचार्यैश्च समयाद्याचाराः पालनीया एव भवन्ति।

यथा—

"सबीजा सा तु विज्ञेया पुत्रकाचार्ययोः स्थिता।।"

(स्व०तं०4,90)

(3) अस्यां दीक्षायां कृतायां देहत्यागानन्तरमपि समयाचारनियमाः पालनीया एव भवन्ति। तेषामवहेलनेनाधःपातो भवति। ते च नियमाः सूक्ष्मशरीरैः पालनीया भवन्ति। यथा—

"देहत्यागे सबीजायां कर्माभावाद्विपद्यते।।
समयाचारपाशं तु दीक्षितः पालयेत् सदा।"

(तं०आ०15,33-34)

"आज्ञाविलङ्घनाद्देवि क्रव्यादत्वं शतं समाः।"

उद्धः०- (तं०आ०वि०,खं०9,पृ०,22)

(4) अनया दीक्षया कर्मणां बीजाभावो न सर्वथा नष्टो भवति। यथा—

"निर्वाणेऽपि सबीजायां कर्माभावाद्विपद्यते।
समयाचारपाशं हि दीक्षितः पालयेत्तु यः।।
तं पाशं नैव शुध्येत सा सबीजा प्रकीर्तिता।
समयाचारपाशं तु निर्बीजायां विशोधयेत्।।"

(स्व०तं०4,146-147)

शुध्येत इत्यस्य पदस्य तात्पर्यं हि शोधयेदिति। यथा—

"दीक्षितः समयाचारपाशं पालयेत् यस्मात्तस्मात्तमस्य निर्बीजदीक्षितस्येव न शोधयेत्।"

(स्व०तं०उ०,खं०2,पृ०,93)

~ तत्पात्रभूता :— समयादिपालनसमर्था ये साधकाः शिवेनानुगृहीतास्ते सबीजदीक्षया भुक्तिमुक्तीं प्रति प्रेर्यन्ते गुरुणा।

द्र०:- **'सबीजादीक्षा'** इति।

समदृष्टिः :— सर्वत्र तत्तत्सारभूतायाः शिवतायाः समानतया दर्शनं, न पुनः सर्वं समानतया व्यवहरणम्, व्यवहारस्य मायीयत्वेन विधिनिषेधविषयत्वात्। ज्ञानदृष्टिस्तु भिन्नतया व्यवह्रियमाणेष्वपि पदार्थेषु शिवत्वविमर्शनं समानतया कारयितुमलम्। यथा—

"निर्विशेषं ब्रह्म सर्वत्रास्तीति बोधमेव धारयन्, न तु श्वश्वपाकादिना सह उपवेशनभोजनादिकं व्यापारमाचरन्निति ज्ञानप्रकर्ष एव उक्तः अन्यथा :—

'बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि।
शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे।।' इति।।"

(वि०भै०उ०,पृ०,86-87)

समना :— (1) सूक्ष्मस्यापि वेद्यांशस्य प्रशमात् शुद्धप्रकाशोन्मेषदशा तद्रूपतामननात्मिकेव सती समना।

यथा—

"समस्तभावाभावात्मवेद्य प्रशान्तौ मननमात्रात्मककरणरूप बोधमात्रावेशे समना।"

(वि०भै०,उ०,पृ०,5)

(2) नेयं परादशा अपि तु हेयैवोपान्त्य प्राया काऽपि दशा।

यथा—

"समनान्तं वरारोहे पाशजालमनन्तकम्।"

(स्व०तं०4,432)

~ अवरोहदृष्टौ :— सिसृक्षानुकूलक्षोभयुक्तोन्मनैव क्षोभारम्भदशायां समना इति। यथा—

"अस्तित्वमात्रमात्मानं क्षोभ्यं क्षोभयते यदा।।
समनासौ विनिर्दिष्टा शक्तिः सर्वाध्ववर्तिनी।"

(ने०तं०21,60-61)

~ तत्कला :— अत्यन्तरहस्यभूता उत्कृष्टयोगिभिरेवानुभाव्याः समनायाः कलाः।

यथा—

"सर्वज्ञा सर्वगा दुर्गा सवना स्पृहणा धृतिः।।
समना चेति विख्याता एताः शिवकलाः स्मृताः।
इच्छाशक्तिमधिष्ठाय इच्छाशक्तिप्रदायिकाः।।
शिवतत्त्वं समाश्रित्य सुसम्पूर्णार्णवप्रभाः।
अनन्तशक्तिसंस्थानाः सूक्ष्माश्चात्यन्तनिर्मलाः।।"

(ने०तं०22,45-47)

नैतासां पृथक्-पृथग् लक्षणानि लभ्यन्ते क्वापि।

~त्रैशिरसे (आरोहदृष्ट्या) :— चिद्रूपतायाः संवित्तिः, साक्षात्कारः इति।

यथा—

"योगिनां समनापदे तत्साक्षात्कारः।"

(तं०आ०वि०,खं०12,पृ०,180)

संवित् साक्षात्कार इति तात्पर्यम्। आरोह-क्रमेणैतल्लक्षणमुक्तं त्रिशिरोभैरवे।

~ स्थानतः :— **शक्तितत्त्वस्यान्तरेव समनायाः स्थानम्।**

यथा—

"नास्य शिवतत्त्वस्योर्ध्वमन्तर्वा समनापि त्वधस्तस्याः शक्तितत्त्व एवाम्नात्।"

(तं०आ०वि०,खं०5,पृ०,259)

द्र०:- (स्व०तं०10,1256) **इति।**

द्र०:- (पू०प्र०,1,549) **इति।**

द्र०:- (म०न०प्र०,वि०,पृ०,42) **इति।**

समनाद्याः :— कौण्डली व्यापिनी समना चेति शिवस्य शक्तयः। तत्र समना परा, व्यापिनी सूक्ष्मा, शक्तिः (कौण्डली) च स्थूलरूपा।

यथा—

"एकैव परमेशेच्छा शक्तिः परसूक्ष्मस्थूलरूपतया मेयाभाससूत्राणमयी समना व्यापिनी शक्तिरिति चोच्यते एकस्या अपि इच्छायाः सूक्ष्मरूपज्ञानक्रियाशक्तिसंभेदेन त्रित्वात्।"

(स्व०तं०उ०,11,पृ०,7)

समनाशक्तिः :— (1) अनाश्रितशिवभुवनादूर्ध्वं विलसन्ती शक्तिः, देशाध्वधारणासोपानविशेषमयी।

यथा—

"शिवतत्त्वोर्ध्वतः शक्तिः परा सा समनाह्वया।"

द्र०:- 'कार्यविशेषकारिणी' इति।

(तं०आ०8,400-401)

"व्यापिनी पदावस्थितानाश्रितभुवनादप्यूर्ध्वमित्यर्थः।"

(तं०आ०वि०,खं०5,पृ०,260)

(2) परमेश्वरस्य पारमैश्वर्यव्यवहारे करणस्थानीया तस्य शक्तिः। यथा

(क) "तदारूढः शिवः कृत्यपञ्चकं कुरुते प्रभुः।।
समनाकरणं तस्य हेतुकर्तुर्महेशितुः।"

(तं०आ०8,401-402)

हेतवोऽत्र कारणपञ्चकरूपाः।

(ख) "तयाधितिष्ठति विभुः कारणानां तु पञ्चकम्।"

(तं०आ०8,403)

~ कार्यविशेषकारिणी :— **सृष्ट्यादिकृत्यकारिणी।**

यथा—

"एवं वै शिवतत्त्वं तु कथितं तव सुन्दरि।।
शोधयित्वा ततश्चोर्ध्वं शक्तिश्चैव परा स्मृता।
समना नाम सा ज्ञेया मनश्चोर्ध्वं न जायते।।
परिपाट्या स्थितानां तु पृथिव्यादिशिवावधौ।
सर्वेषां कारणानां च कर्तृभूता व्यवस्थिता।।
विभर्त्यण्डान्यनेकानि शिवेन समधिष्ठिता।
तत्रारूढस्तु कुरुते शिवः परमकारणम्।
सृष्टिस्थितिसमाहारं तिरोभावमनुग्रहम्।
हेतुकर्त्ता महेशानः सर्वकारणकारणम्।।
समना नाम या शक्तिः सा तस्य करणं स्मृतम्।
तयाधितिष्ठेद्देवेशो ह्यधः कारणपञ्चकम्।।"

(स्व०तं०10,1255-1260)

(स्व०तं०उ०,10,पृ०,544)

"परम कारणमिति परमशिवः।"

(स्व०तं०उ०,10,पृ०,544)

समन्वयः :— भिन्नभिन्नाभिः प्रमाभिरुह्यमानानां विषयाणामेकस्यां प्रमातृभित्तौ रूढिः। न पुनस्तां विहाय परस्परमासां कोऽपि सम्बन्ध उपपद्यते।

यथा—

"तास्ता, विभिन्नाः संविदो निश्चयरूपाः प्रमात्मानो यास्तान्येव मुखानि द्वाराणि उपाया मार्गास्तैर्मुखैर्नदीस्त्रोतः स्थानीयैर्यद्यमी भावा नीलसुखादयः उह्यमाना एकस्मिन् 'अहमिति' प्रमातृरूपे महासंवित्समुद्रे प्रतितिष्ठन्ति आभिमुख्येन विश्रान्तिं भजन्ते, तत एषु परस्परं समन्वयरूपं यज्ज्ञातेयं तद् उपपत्त्या घटते।"

(ई०प्र०वि०,खं०1,पृ०,281-282)

समयदीक्षा :— क्रियाप्रधाना अभिषेकपूजनहवन-तर्पणादिविधिप्रपञ्चरूपा शैव शास्त्रीया दीक्षा यया शिष्यो मन्त्राभ्यासनित्यपूजादौ शास्त्रश्रवणाध्ययनादौ चाधिकारी भवति। इयं दीक्षा विधिनिषेधनियमिता भवति। अत्रत्या विधिनेषेधा एव समयाः इति कथ्यन्ते। तद्योगाच्छिष्यः समयी।

प्रतिपादितमेतद्विधानं विस्तरतस्तन्त्रसारे पृ०, 149-155 यावत्, तन्त्रालोके च पूर्णविस्तरेण पञ्चदशाह्निके। तत्रतत्रैव द्रष्टव्यम्।

~ तत्फलम् :— **एषा क्रमेण शिवभावापादनकारिणी।**

यथा—

"शिवत्वं क्रमशो गच्छेत् समयी यो निरूप्यते।"

(तं०आ०13,297)

समयनिष्कृति :— (1) समयाः समयदीक्षाचार-नियमाः। तेषामकरणादौ यत् प्रायश्चित्तं विधेयं तदेव समयनिष्कृतिरिति।

तत्त्वज्ञाननिष्ठस्य नैव प्रायश्चित्तादि किमपि। परमन्यत्र केवलं क्रियाकलापनिष्ठानां कृते समयोल्लङ्घने अवश्यं प्रायश्चित्तकरणम्। अन्यथा दुर्गतिस्तेषाम्। लोकसंग्रहार्थं तत्त्वज्ञानिनापि समयाः पालनीयाः, समयभङ्गे च प्रायश्चित्तं विधेयम्। यथा—

"यद्यपि तत्त्वज्ञाननिष्ठस्य प्रायश्चित्तादि न किञ्चित्तथापि चर्यामात्रादेव मोक्षभागिनः ताननुग्रहीतुमाचारवर्तनीं दर्शयेत्। अतत्त्वज्ञानी तु चर्यैकायत्तभोगमोक्षः समयोल्लङ्घने कृते प्रायश्चित्तमकुर्वन् वर्षशतं क्रव्यादो भवति।"

(तं०सा०,पृ०,190)

तत्त्वज्ञानी तु स्वयं प्रायश्चित्तादि सम्पादयन् शिष्यानपि तथातथा शिक्षयेत्।

(2) प्रमादादौ जाते प्रायश्चित्तीयं कर्म। एतदपि नैमित्तिकप्रकारविशेषतयोक्तम्। यथा—

"विशेषपूजनं कुर्यात्समयेभ्यश्च निष्कृतौ।"

(तं०आ०28,408)

"समयेभ्यश्च निष्कृतावित्यनेन समयनिष्कृतिरिति प्रागुक्तं त्रयोविंशमपि नैमित्तिकं व्याख्यातुमुपक्रान्तमिति।"

(तं०आ०वि०,खं०11,पृ०,174-175)

समयनिष्कृतिरिति प्रायश्चित्ताचरणमित्यर्थः।

~ तद्विधि :— **प्रतिपादितोऽयं विधिस्तन्त्रालोकेऽष्टाविंश-आह्निके विस्तरतो वैविध्येन।**

तत्रैव दृष्टव्यः।

द्र०:- (तं० आ० 28, 415-423)

समयलक्षणम् :— यथा—

"अवश्यपालनीयत्वात् परतत्त्वेन सङ्गमात्।।
ज्ञानप्राप्त्यभ्युपायत्वात् समयास्ते प्रकीर्तिताः।"

(तं०आ०15,609-610)

"समयन्ति **(सम्+अयन्ति)** सङ्गच्छन्ते परं तत्त्वमनेनेति, सम्यगयनं ज्ञानमस्मादिति च व्युत्पत्त्या समयशब्दः—प्रवृत्त इत्यर्थः।"

(तं०आ०वि०,खं०9,पृ०,284)

समयाः :— समयदीक्षायां विधिनिषेधादिमयाः नियमाः।

यथा—

"ततः समयानस्मै निरूपयेत् — गुरौ सर्वात्मना भक्तिः, तथा शास्त्रे देवे, तत्प्रतिद्वन्द्विनि पराङ्मुखता .....
.....।"

इत्यादि सविस्तरम्।

(तं०सा०,पृ०,149-55)

द्र०:- विस्तरतः (तं०आ०15,531-540) **इति।**

~ अमुख्याः :— **श्रीगमशासनाद्युक्ताः बहवोऽन्ये नियमाः।**

द्र०:- (तं०आ०15,453-562)

~ ऊर्मिकुलोक्ताः :— **द्र०:-** (तं०आ०15,563-570)

~ त्रिशिरो भैरवोक्ताः :— **कृच्छ्र चान्द्रायणादिव्रताः।**

द्र०:- (तं०आ०15,540-553) इति।

~ मुख्याः :— **चतुष्षष्टिर्नियमाः पालनीयाः समयिना शिष्येण।**

ते च देवीयामलोक्ताः। यथा—

"तमापादितरुद्रांशं समयान् श्रावयेद् गुरुः।।
अष्टाष्टकात्मकान् देव्या यामलादौ निरूपितान्।"

इत्यादि विस्तरतः।

(तं०आ०15,521-531)

~ शास्त्रान्तरोक्ताः :— **द्र०:-** (तं०आ०15, 571-610)

समयापहा :— ~ विद्या :— पारमेश्वरी विद्यैव विद्यात्रये तृतीया।

समयाष्टकम् :— यथा—

"अवादोऽकरणं गूढिः पूजा तर्पणभावने।।
हननं मोहनं चेति समयाष्टकमष्टधा।"

उद्धरणं देवीयामलात्:— (तं०आ०15,522-523)

समयी :— (1) गुरुणा शिरसि दत्तेन शिवहस्तेन शिष्यः समयी सम्भवति। यथा—

"दत्तेन शिवहस्तेन समयी स विधीयते"

(तं०आ०15,459)

(2) समयाचारपालनपरः समयदीक्षा पात्रतां यातः शिष्यः। यथा—

"इत्थं समयी भवति। मन्त्राभ्यासे नित्यपूजायां श्रवणेऽध्ययने अधिकारी।"

(तं०सा०,पृ०,155)

(3) पारमेश्वरशास्त्रमर्यादावर्तनपरः साधकः।

यथा—

"समयी संस्कृतो ह्येवं .....।"

(स्व०तं०4,78)

"एवमिति जात्युद्धारद्विजत्वरुद्रांशापत्तिभिः समयी, समयः पारमेशशास्त्रमर्यादावर्तनमस्यास्तीति कृत्वा।

(स्व०तं०उ०,प०4,पृ०,36)

(4) ईश्वरतत्त्वारोहणोपयोगिसाधनपरः साधकः।

यथा—

"समयिनस्तु अधिष्ठातृकारणविश्लेषमात्रपूर्वमीश्वरतत्त्वाराधनयोगयोग्यता .....।"

(स्व०तं०उ०,प०4,पृ०,39)

यथा—

"..... समयी राजपुत्रवत्' इति।"

(तदेव)

(5) क्रमेण शिवभावगामी समयाचारपरः साधकः।

यथा—

"कश्चिद्रुद्रांशतामात्रापादनात्तत्प्रसादतः।।
शिवत्वं क्रमशो गच्छेत् समयी यो निरूप्यते।"

(तं०आ०13, 296-297)

~ अधिकारतः :— **समयी शिष्यः समयपालनजनितमहिम्ना पुत्रकत्वे वा साधकत्वे वा, आचार्यकत्वेऽपि वा दीक्षापात्रत्वमुपयाति।**

यथा—

"..... समयी राजपुत्रवत्।
सर्वत्रैवाधिकारी स्यात् पुत्रकादिपदत्रये।।"

(तं०आ०15,469)

~ गतितः :— **शिरसि दत्तेन शिवहस्तेन शिष्यः समयी भवति, स देहपातानन्तरमीश्वरभट्टारकसायुज्यं लभते,**

जीवंश्च रहस्यशास्त्राध्ययने पात्रत्वमवाप्नोति।

यथा—

"दत्तेन शिवहस्तेन समयी स विधीयते।
सायुज्यमीश्वरे तत्त्वे जीवतोऽधीतियोग्यता।।"

(तं०आ०15,459)

"समयी संस्कृतो ह्येवं वाचनेऽस्यार्हता भवेत्।
श्रवणेऽध्ययने होमे पूजनादौ तथैव च।।"
चर्याध्यानविशुद्धात्मा लभते पदमैश्वरम्।

(तं०आ०वि०,खं०9,पृ०,231)

समयोल्लङ्घनदोषः :— यथा—

"समयोल्लङ्घनाद्देवि क्रव्यादत्वं शतं समाः।।"

उद्धरणम् :— (तं०आ०16,204)

समरसता :— सामरस्ये स्थितो यः साधकस्तस्य समरसता, शिवैकता। यथा—

"शून्यभावः समाख्यातः सामरस्यं निबोध मे।"

(स्व०तं०उ०,प०4,296)

शून्यभाव इति शुद्धचिन्मात्रमयी शिवता नाभावरूपतेति वेद्यं सुधीभिः।

~ तत्प्रकाराः :— **ते च (1) आत्मसामरस्यम्, (2) मन्त्रसामरस्यम्, (3) नाडीसामरस्यम्, (4) शक्तिसामरस्यम्, (5) व्यापिनीसामरस्यम्, (6) समनासामरस्यम्, (7) तात्त्विकं सामरस्यम्।**

यथा—

"आत्मन्येकः समरसो मन्त्रे ज्ञेयो द्वितीयकः।
तृतीयं नाडिगं कुर्याच्छक्तौ कुर्याच्चतुर्थकम्।।
व्यापिन्यां पञ्चमं प्रोक्तं समनायां तु षष्ठकम्
तात्त्वः समरसो देवि! सप्तमस्तु विधीयते।।"

(स्व०तं०,प०4,297-298)

सामरस्यमेतदुत्तरोत्तरं समुत्कृष्टं सत् सप्तस्तरकमत्र प्रतिपादितम्।

~ तत्साधनविधय :— **रहस्यात्मकास्ते विधयोऽनुभूतिसम्पन्नेन गुरुणैव सम्यग् व्याख्येयाः। उक्तास्ते स्वच्छन्दतन्त्रे विस्तरतः।**

यथा—

"शिष्यात्मानं तु संगृह्य पूर्वोक्तविधिना क्रमात्।
पश्चादात्मनि संयोज्य लोलीभूतं विचिन्तयेत्।।
पूरकं कुम्भकं कृत्वा समानेन निरोधयेत्।
यावत्यो नाडयो देवि तिर्यगूर्ध्वमधः स्थिताः।।
समानेन समाकृष्टा एकीभूता भवन्ति ताः।
तासु ये वायवस्तेऽपि प्राणे समरसीगताः।।
नाडयस्तु सुषुम्नायामेकीभूता व्यवस्थिताः।
ततो वै उच्चरेन्मन्त्रः नादे लीनं विचिन्तयेत्।।
मन्त्र आत्मा तथा नाडी एवं समरसी भवेत्।
वामदक्षिणमध्ये तु ततो नादं प्रमोचयेत्।।
सेतुबन्धं च तं मार्गं यत्र गत्वा न जायते।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च।।
एतेऽत्र समतां यान्ति अन्यथा तु पृथक्-पृथक्।
तस्मिन्समुच्चरेन्नादं यावच्छक्तौ लयं गतः।।
शक्तिमध्यगतो नादः शक्त्यात्मा तु विधीयते।
सर्वं शक्तिमयं तत्र सर्वं समरसी भवेत्।।
तदूर्ध्वं व्यापिनीं प्राप्य सर्वं तन्मयतां व्रजेत्।
समन्ताद् व्याप्नुयाद् यस्माद् व्यापिनीत्यभिधीयते।।
तदूर्ध्वं समनां व्याप्य तन्मयत्वं व्रजेत्पुनः।
सा च सर्वगता ज्ञेया सामरस्येन संस्थिता।।
षष्ठं समरसं त्यक्त्वा सप्तमं तु ततो व्रजेत्।
तं प्राप्य तन्मयत्वं हि नात्र कार्याविचारणा।।
स च सर्वेषु भूतेषु भावतत्त्वेन्द्रियेषु च।
स्थावरं जङ्गमं चैव चेतनाचेतनस्थितम्।।
अध्वानं व्याप्य सर्वं तु सामरस्येन संस्थितः।"

(स्व०तं०4,299-311)

समाधानम् :— समाधिः। स च शैवे योगे न चित्तनिरोधमात्रम्, अपि तु स्वात्मनि चित्तलये कृते सति स्वात्मनो जीवचैतन्यस्य शिवचैतन्ये लयः यः समावेश इत्युक्तः। ततो नात्र पातञ्जलः समाधिरभिप्रेतः शास्त्रे।

~ अनुपायम् :— **उपायाद्यपेक्षारहितम्।**

यथा—

"उपायानपेक्षतयानुपायं सततोदितं समाधिमादिशति-
'सम्यक्स्वरूपं संवेद्य संविद्रूपं स्वभावजम्।
स्वसंवेद्यस्वरूपं च समाधानं परं विदुः।।' इति।"

(ने०तं०8,19)

~ आणवम् :— **प्रमेयतत्त्वालम्बनोपायकम्।**

यथा—

"समं सर्वेषु भूतेषु आधानं चित्तनिग्रहः।
समाधानमिति प्रोक्तमन्यथा लोकदाम्भिकम्।।"

(ने०तं०8,17)

"एतद्ध्यानोपायकमाणवं समाधानम्।"

(ने०तं०उ०खं०1,पृ०,185)

~ शाक्तम् :— **शुद्धविकल्पात्मकम्।**

यथा—

"शुद्धविकल्पोपायं शाक्तम् **(समाधानम्)।**
स्वपरस्थेषु भूतेषु जगत्यस्मिन्समानधीः।
शिवोऽहमद्वितीयोऽहं समाधिः स परः स्मृतः।।"

(ने०तं०8,18)

~ शाम्भवम् :— **निर्विकल्पस्वात्मसाक्षात्कारमयम्।**

यथा—

"अविकल्पोपायं शाम्भवं समाधिमाहः—
'राशिभ्यां चिज्जडाभ्यां च विचार्य निपुणं पदम्।
यन्नित्यं शाश्वतं रूपं समाधानं तु तद्विदुः।।' इति।।"

(ने०तं०8,20)

समाधिः :— ~ अध्वोपयोगे :— **अध्वोपयोगोचितार्चनज-पध्यानहोमव्रत विधिफलत्वेन शिवयोगिनो या परिपूर्णा स्थितिरसावध्वयोगाभ्यासे समाधिः।**

यथा—

"तथार्चनजपध्यानहोमव्रतविधिक्रमात्।
परिपूर्णां स्थितिं प्राहुः समाधिं गुरवः पुरा।।"
(तं०आ०,12,13)

"पुरा गुरवः पूर्वगुरवः श्रीकण्ठाद्याः। यदाहुः—
'स्वपरस्थेषु भूतेषु जगत्यस्मिन्समानधीः।
शिवोऽहमद्वितीयोऽहं स समाधिः परः स्मृतः।।' इति।"
(ने०तं०8,18)

~ परमः :— **निर्व्युत्थानसमाधिः। व्यवहारेऽपि परमार्थदर्शनरूपा स्थितिः।**

यथा—

"यदुक्तं केनचिन्महायोगीन्द्रेणः—
'चैतन्यपूरितमिदं निखिलं हि विश्वं
चित्तं चिदात्मनि यदास्तमुपैति शश्वत्।
एवं चितेरपृथगेव सुसंस्थितत्त्वा-
दुक्तो निरस्तकरणः परमः समाधिः'।।इति।"
(स्त०चि०वि०,पृ०127)

~ षड्विधः :— **येन केनापि प्रकारेण स्वचेतसि वा बाह्येषु वा विषयेषु सर्वत्र शिवत्वदर्शनमेव शैवानां समाधिः। स च षड्विधः विज्ञानभैरवोद्योते वाक्यसुधाख्यग्रन्थानुसारं तत्तत्कारिकोद्धरणपूर्वकं प्रतिपादितः।**

यथा—

"समाधिर्नाम चित्तस्याखण्डात्माद्वयब्रह्मतामात्रेण स्थिरीभावः, स तु बहिरन्तर्वा विधेयः। तत्र हृदयान्तः कर्तव्यः समाधिर्द्विविधः—सविकल्पकनिर्विकल्पकभेदात्। सविकल्पकोऽपि द्वेधा— दृश्यसम्पृक्तः शब्दसम्पृक्तश्च। तत्र दृश्य सम्पृक्तस्य समाधेर्लक्षणं वाक्यसुधायाम्ः—

'कामाद्याश्चित्तसादृश्यात्तत्साक्षित्वेन चेतनाम्।
ध्यायेद् दृश्यानुविद्धोऽयं समाधिः सविकल्पकः।।'

इति अयं स्थूलः सविकल्पकः समाधिः। सूक्ष्मं सविकल्पकं द्वितीयं समाधिमाह तत्रैवः—

'असङ्गः सच्चिदानन्दः स्वप्रभो द्वैतवर्जितः।
अस्मीति शब्दविद्धोऽयं सविकल्पसमाहितः।।
इति।

एवं यत्नतः क्रमेण समाधिद्वयसम्पत्तौ स्वयमेव भवन्तं निर्विकल्पसमाधिमाह :

'स्वानुभूतिरसावेशाद् दृश्यशब्दानुपेक्ष्य तु।
निर्विकल्पः समाधिः स्यान्निवातस्थलदीपवत्।।'
इति च।

एवं संविकल्पौ द्वौ, निर्विकल्पक एकः इति त्रयः समाधयः। एतत् समाधित्रयं सूर्यचन्द्राकाशादि बाह्यालम्बनं व्युत्पायतिः

'हृदीव बाह्यदेशेऽपि यस्मिन् कस्मिंश्च वस्तुनि।
समाधिराद्यः सन्मात्रे नामरूपपृथक् स्थितः।।'

इति दृश्यानुविद्धसविकल्पकः समाधिः। शब्दानुविद्धं सविकल्पकं समाधिमाह—तत्रैव—अखण्डैकरसं वस्तु सच्चिदानन्द- लक्षणम्।

इत्यविच्छिन्नचिन्तेयं समाधिर्मध्यमो भवेत्।।

इति। अत्रापि केवलब्रह्माकारत्वान्मनसो निश्चेष्ट निर्विकल्पकः समाधिर्यथाः—

'स्तब्धीभावरसास्वादात्तृतीयः पूर्ववन्मतः।
एतैः समाधिभिः षड्भिर्नयेत् कालं निरन्तरम्।। इति।
एतच्छ्लोकप्रतिबिम्बवस्तु तत्रैव—
देहाभिमाने गलिते विज्ञाते परमात्मनि।
यत्र यत्र मनो याति तत्र तत्र समाधयः।।' इति।"
(वि०भै०,उ०,पृ०,99-101)

शिवोपाध्यायस्य प्रतिपादनशैली पातञ्जलशैल्याः वैदान्तिकशैल्याश्च भूयांसं संकरं धारयन्ती नैव शुद्धा कश्मीरशैवदर्शनशैली। कश्मीरशैवसिद्धान्तानसौ पातञ्जलशाङ्करादिकृताः परिभाषा आदाय व्याख्याति।

शैववैदान्तिकाद्वैतैकीकरणप्रयत्नपरोऽसौ। इति तत्कृतैः शब्दप्रयोगैर्न भ्रमितव्यम्। वैदान्तिके अद्वैते मायां परब्रह्मशक्तित्वेन प्रतिष्ठाप्य तेन स्वकृतायां श्रीविद्यायां द्वयोरद्वैतयोः समन्वयोऽपि प्रतिपादित एव। परमसौ श्रीविद्या न प्रकाशमुपनीता केनापि। अमुद्रितैव पाण्डुलिपिभाण्डारे विद्यते श्री नगरीयविश्वविद्यालयपुस्तकागारे।

~ सुषुप्तता :— **चित्तवृत्तिनिरोधेन यः समाधिः सम्पद्यतेऽसौ शून्यरूपता सुषुप्तिरेव न तुर्या दशा। यथा**—

"सर्वासां चित्तवृत्तीनां निरोधेनोपलक्षिता या शून्यावस्था, सा तावन्मात्रेवस्थूलरूप शून्यतैव, न तु शरीरादुत्तरं यत्प्राणादि तच्छून्यतासौ, यतः स्थूलशरीरशून्यता नाम प्राणादिरूपतैव भूतलमिव घटाभावरूपता। ततश्च तस्यां शून्यतायां न तुर्यता, शून्ये वेद्य एवानात्मनि आत्मताभिनिवेशात्।

.....
.....
.....

यदि शून्यमपि तदा वेद्यतया नावशिष्येत, तर्हि वेद्यं सर्वथा तुच्छीभूतं प्रख्योपाख्या विरहादिति वेदकतैव निःसपत्ना—इति कथमियं सुषुप्तदशा भवेत्। तुरीयदशैव हि साम्यार्थः (सा स्यात्)। यदा तु शून्यरूपमेव वेद्यमस्ति, तदा तथात्वमिति सुषुप्तरूपत्वमुपपद्येत।"
(ई०प्र०वि०वि०,खं०2,पृ०,305)

समाधिसुखम् :— **प्रमाणप्रमेयवर्गद्वयं स्वात्मत्वेन पश्यन्नानन्दनिर्भरो यद् भवति योगी तदेव तस्य समाधिसुखमित्युच्यते। यथा**—

"लोक्यत इति लोको वस्तुग्रामो, लोकयतीति च लोको

ग्राहकवर्गः **(करणवर्ग इति)** तस्मिन् स्फुरति सति प्रभातृपदविश्रान्त्यवधानात् तच्चमत्कारमयो य आनन्द एतदेवास्य समाधिसुखम्।"

(शि०सू०वृ०1,18)

समानः :— (1) सुषुप्तौ प्राणापानयोर्यो विच्छेदस्तदुभयोत्तीर्णस्य मायाप्रमातुर्यास्वात्मसंवित्तिरसौ समानः।

यथा—

"सुष्ठु सुप्तस्य तु यत् प्रमातुः पदं तत्र द्विविधेऽपि प्राणापानसद्भावेऽपि निरिन्द्रियहृत्प्रदेशविश्रान्तिरेव मुख्यं सुषुप्तरूपमिति।"

(ई०प्र०वि०वि०,खं०3,पृ०,342)

(2) इयं प्राणापानयोर्मध्ये क्षणमवभासमाना सौषुप्तप्राया स्थितिर्जीवनक्रियायाः समानः।

द्र०:- **'विषुवत्'** इति।

(3) सवेद्येऽपवेद्ये च सौषुप्ते या परित्यागोपादानविरतिपुरस्सरं स्वस्मिञ्जीवस्वरूपे स्थितिरहमिति ध्यामलप्रायविमर्शमयी सा समानाख्यप्राणनव्यापारात्मिका सती समान इत्युच्यते। अस्मिन् समाने प्राणापानौ समानतया विलीनौ सन्तौ समानरूपतयावभासेते। तदित्थं प्राणापानयोर्या सामान्ये प्राणनव्यापारे विश्रान्तिरसौ समान नाम्नी प्राणनावृत्तिः। इयं प्राणवृत्तिः सौषुप्ते पदे नितरां चकास्ति। प्रलयाकला अनयैव प्राणवृत्त्या जीवन्ति।

यथा—

"तद्द्विविधमपि **(सौषुप्तम्)** समानरूपं विशेषं प्राणीयं स्वीकरोति। सवेद्ये तावत् सुषुप्ते यद्यपि प्राणापानस्पन्दो लक्ष्यते तथापि तयोर्मध्ये या विश्रान्तिर्हृदयसदने निरिन्द्रिये प्रदेशे तदेव मुख्यतः सुषुप्तमिति। तत्र प्राणापानयोर्यश्छेदोविश्रान्तिः कञ्चित्कालं तदात्मा सकलरसादि वर्गस्योर्ध्वाधरतिर्यक्षुसमानीकरणव्यापारात्मा, तत एव हृत्पद्मविकासदानाद् भुक्तपीतजरणकारी समानो दिनरात्रिरूपयोः प्राणापानयोः कञ्चित्कालं साम्याद्विच्छेदाच्च विषुवत्कालतुल्यः।..... ततश्च हानादानयोर्बीजरूपता सुषुप्ते, इयति च सर्वः प्रलयाकलान्तः पशुवर्गः।"

(ई०प्र०वि०,खं०2,पृ०,245,246)

~ अन्वर्थ :— **यथा—**

अन्वर्थ इति समं कृत्वा आ— निजव्यापारविषयमनिति प्राणितीति हि समानः। प्राणनं च तत्र सूक्ष्मवृत्त्या प्रशान्ताङ्गारज्वलनवत् स्थितमेव। "षट्त्रिंशदङ्गुलश्चारः" इत्यादि दिशा तु दीर्घप्रसरणात्मना या प्राणापानरूपता सा विच्छिन्नेत्युच्यते, सूक्ष्मात्वस्त्येव।"

(ई०प्र०वि०वि०,खं०3,पृ०,344,345)

~ कालभावनालम्बनः :— **(1) योगिनः समानेऽपि कालस्य भावनामभ्यस्यन्ति।**

यथा—

"एवं समाने विधिः .....।"

(तं०आ०6,195)

(2) एकविंशतिसहस्राणि षट्शतानि च यानि प्राणचाराणां तेषामेव विभागेनाहोरात्रादिकल्पना कालाध्वयोगे समानाख्यप्राणविषया। तेष्वेव दक्षिणायनोत्तरायण विषुवद्दिनादिकल्पना।

यथा—

"इत्थं समानमरुतो वर्षद्वयविकल्पनम्।।
चार एकत्र न ह्यत्र श्वासप्रश्वासचर्चनम्।"

(तं०आ०6,208-209)

~ तत्क्षेत्रप्राणिनः :— **प्रलयाकलाः मुख्यतया समानप्राणस्य यत् क्षेत्रं तस्य प्राणिनः। विज्ञानाकलेषु द्वैविध्यं प्रतिभाति। केचन तेषां समानवृत्तिभाज एव, अपरे पुनरुदानवृत्ति- प्रवेशमात्रस्थितिभाजः। तदिदं द्वैविध्यं प्रत्यभिज्ञासूत्र- तद्विवृतिविमर्शिनीतो ज्ञायते।**

यथा—

"मध्योर्ध्वगाम्युदानाख्यस्तुर्यगो हुतभुङ्मयः।
विज्ञानाकलमन्त्रेशः .....। इति"

(ई०प्र०,3-2-20)

विवृतिविमर्शिन्यां च :—

"प्रलयाकला विज्ञानाकलाः समानः, मन्त्रादयः उदानः। इति।"

(ई०प्र०वि०वि०,खं०3,पृ०,350)

~ तत्संचारः :— **शरीरे प्रसृतासु दशनाडिषु समानस्य सञ्चारः तन्निःसृतासु नाड्यन्तरेष्वपि।**

यथा—

"दशमुख्या महानाडीः पूरयन्नेष तद्गताः।।
नाड्यन्तराश्रिता नाडीः क्रामन्देहे समस्थितिः।"

(तं०आ०6,196-197)

~ तत्सञ्चारमार्गः :— **इडापिङ्गलासुषुम्नाख्यं नाडीत्रयमेवास्य मुख्यतया सञ्चारस्थानम्।**

यथा—

"स एव नाडीत्रितये वामदक्षिणमध्यगे।।
इन्द्वर्काग्निमये मुख्ये चरंस्तिष्ठत्यहर्निशम्।"

(तं०आ०6,198-199)

नाडीत्रितये इतिः— इडापिङ्गलासुषुम्नात्मके।"

(तं०आ०वि०,खं०4/1,पृ०,165)

~ तत्स्थानम् :— **नाभिः समानस्य मुख्यमधिष्ठानम्।**

यथा—

"समानस्यापि मुख्यया वृत्त्या नाभिरेव स्थानम्।"

(तं०आ०वि०,खं०4/1,पृ०,162)

~ तद्गति :— **सा हि समानवृत्तिर्हृदयात् प्रसृतासु दशनाडिषु प्रसरति। योगिभिरेव संवेद्याऽसौ।**

यथा—

"एवं समानेऽपि विधिः स हि हार्दीषु नाडिषु।।
सञ्चरन् सर्वतो दिक्कं दशधैव विभाव्यते।"

(तं०आ०6,195-196)

~ तन्निर्वचनम् :— यथा—

"देहे समननात् समाननामायम्।"

(तं०आ०वि०,खं०4/1,पृ०,163)

समननं चात्र समं प्राणनम्।

समावेशः :— (1) अविशङ्कं परे शिवभावे एव साक्षात् स्वात्मनः स्थितेर्विमर्शनम्।

(2) स्वस्य जीवभावस्य शिवभावे निमज्जनम्। यथा—

"अज्ञानरूपमलप्रतिद्वन्द्वितया समावेशलक्षणं सत्यस्वरूपे सम्यगासमन्तात् प्रवेशलक्षणं ज्ञानं, यल्लाभेन ज्ञानी यदभ्यासे न च देहप्राणादावनन्तसंविद् धर्मात्मकविभवसमासादनाद् योगी भवति।"

(ई०प्र०वि०वि०,खं०3,पृ०,327)

(3) परिपूर्णे शुद्धे सर्वैश्वर्यमये च निजे संविद्रूपे कायचित्तप्राणशून्यानां यन्निमज्जनं, चिदेकरूपतायाश्च यदुन्मज्जनं स एव समावेशः। समावेश एव परमं रहस्यं सर्वेषामपि कौलत्रिकादिशास्त्रोपदिष्टानां योगक्रमाणाम्।

यथा—

"यद्यनिशमाविशति—शरीरप्राणबुद्धिशून्येभ्योऽन्यतमं द्वयं सर्वं वा तत्रैव निमज्जयति, अनवरतं तत्तां तां विभूतिं परविभूति पर्यन्तां लभते।"

(ई०प्र०वि०खं०2,पृ०,272-273)

द्र०:- (पू०प्र०2,524-526)

(4) स्वात्मशिवभावदर्शनपूर्वकं निजस्य मायीय प्रमातृभावस्य तत्र निमज्जनेन शिवरूपतयावस्थानम्।

यथा—

"मायाप्रमात्रभिमानातिरेकन्यग्भावितसंविदात्मकस्वस्वरूपताया उन्मग्नतात्मकः समावेशः।"

(ई०प्र०वि०वि०,खं०1,पृ०,7)

(5) योगिनस्तुर्याख्या दशा तुर्यातीताख्या चेत्युभयं समावेश इति कथ्यते।

यथा—

"सेयं द्वय्यपि दशा समावेशो यल्लाभायान्यदुपदिश्यते।"

(ई०प्र०वि०वि०,खं०3,पृ०,328)

द्र०:- (ई०प्र०वि०,खं०2,पृ०,231)

(6) शुद्धचिदात्मकस्य बोधस्यैवाहन्तया विमर्शनं स्वात्मनि चानवच्छिन्नशुद्धकर्तृतासामर्थ्यस्य विमर्शनं, तेन च देहादिप्रमातृभावस्य न्यग्भावनं समावेशः। सत्ये निजे स्वरूपे सम्यगावेशमेव समावेशः। समावेशभाक् साधको ज्ञानीत्युच्यते, समावेशरसाभ्यासतः योगसिद्धिसम्पन्नः सन् योगीत्यभिधीयते। यथा—

"मुख्यत्वं कर्तृतायाश्च बोधस्य च चिदात्मनः।
शून्यादौ तद्गुणे ज्ञानं तत् समावेशलक्षणम्।।"

(ई०प्र०3-2-12)

(7) प्रमेयभूतस्य जडस्यापि घटादेर्भावस्याचिद्रूपतायाः सम्यग् निमज्जनेन चिद्रूपतायाश्चोन्मज्जनेन यो विमर्शोऽसौ समावेश इत्युच्यते।

यथा—

"नन्वेवं घटेऽपि यदि चिद्रूपतां कश्चित् पश्येत् तर्हि किमभ्रान्त एवासौ। ओमित्याह ..... शक्त्या शुद्धविद्यारूपया ह्ययं सम्यगिति जडरूपता न्यक् क्रियया चिद्रूपताप्राधान्येनावेशः आसमन्तात् स्वरूपप्रवेशः इत्यर्थः।"

(ई०प्र०वि०वि०,खं०3,पृ०,315)

(8) पर तन्त्रसत्तायाः स्वतन्त्रसत्तायां निमज्जनेन यः पूर्णः स्वतन्त्रसत्ता प्रकाशोऽसावपि समावेशः। जडभावस्य जीवभावस्य च चिद्भावमध्ये शिवभावमध्ये च निमज्जनेनैकस्य चिद्भावस्यैव शिवभावस्यैव वा या स्वतन्त्रा प्रथाऽसौ समावेशः।

यथा—

"आवेशश्चास्वतन्त्रस्य स्वतद्रूपनिमज्जनात्।
परतद्रूपताशम्भोराद्याच्छक्त्यविभागिनः।।"

(तं०आ०1,173-174)

"अस्वतन्त्रस्य जडस्य बुद्ध्यादेर्मितस्य प्रमातुः स्वमसाधारणं तत् सङ्कुचितं यद्रूपं तस्य निमज्जनं गुणीभावः, तदवलम्ब्य परेण स्वतन्त्रेण बोधेन या तद्रूपता तादात्म्यं स आवेशः इति सम्बन्धः।"

(तं०आ०वि०,खं०1,पृ०,206)

द्र०:- 'आवेशः' इति।

~ अद्वैतभावमयः :— यथा—

"समाविष्टश्च शिवोऽपीत्युच्यते देवदत्तादिरपि च, उभयोरैक्यगमनाविशेषात्।"

(शि०दृ०वृ०,पृ०,3)

~ आणवः :— **आणवोपायाभ्यासोद्भावनीयः शिवताया आवेशः, आणवः समावेशः। असौ शाक्तस्य शाम्भवस्य च समावेशस्योपायः। शाक्ते वा शाम्भवे वाऽसौ विश्रमणामवाप्यैव कृतार्थतां याति। प्राणोच्चारकरणाद्या अत्रोपायाः। यथा—**

"उच्चारकरणध्यानवर्णस्थानप्रकल्पनैः।
यो भवेत् स समावेशः सम्यगाणव उच्यते।।"

(मा०वि०तं०2,21)

उच्चारादीनां लक्षणानि स्वे स्वे स्थाने द्रष्टव्यानि।

~ चिदानन्दघनः :— **समावेशावस्था हि तुर्यात्मिका, तुर्यातीतरूपा वा, उभयथापि तत्रानन्दघनस्वात्मसाक्षात्कार चमत्कारः। यथा—**

"समावेशे हि देहप्राणादेः प्राधान्याभावात्
तन्महिमोपनतक्षुत्परिश्रमादि दुःखानुदये—
आच्छादयेद् बुभुक्षाम् .....।" (स्प० 4, 8)

इति न्यायेन तत् प्रशमजं तृप्ति विश्रान्ति रूपं मनागहन्तात्मकनैरपेक्ष्य स्वातन्त्र्यानन्दकणरूपं सुखमपि चेति परमानन्दमयतैव।

(ई०प्र०वि०वि०,खं०3,पृ०,341)

संस्कारशेषीकृतदेहप्राणादिसत्ताप्रभाववशत्वमत्र मनागित्यादि पदाभ्यां सूच्यते। एतदभावे परमशिवतैवैकघनेति कः कुत्र समाविशेत्।

~ तत्तात्कालिकफलम् :— **शाम्भवादिसमावेशस्य पौनःपुन्येनाभ्यासं विनापि योगसिद्धिलक्षणाद्याविर्भावपूर्वकं स्वरूप- साक्षात्कारे जाते सति तत्क्षण एव जीवन्मुक्तिलाभः।**

यथा—

"अनभ्यासेऽपि तु तत्क्षणावेश एवानन्दोद्भवकम्पनिद्रा व्याप्तिरूपघूर्ण्याविर्भावनक्रमेण जीवन्मुक्ततालाभः।"

(ई०प्र०वि०वि०,खं०3,पृ०,330)

~ तत्त्वसमावेशा :— **तानि-तानि तत्त्वान्यालम्ब्याभ्यसनीयाः समावेशाः। तत्र धराद्यालम्बनाः पञ्च समावेशाः भूतसमावेशेषु परिगण्यन्ते। शिव समावेशोऽपि तत्रात्मसमावेशेन संगृहीत इति परिशिष्टास्तत्त्वसमावेशाः त्रिंशदेव।**

~ तदभ्यासफलम् :— **पुनः-पुनः समावेशाभ्यासे कृते योगी इहैव शरीरे पारमैश्वर्यशक्त्यंशाननुभवति स्वात्मनि।**

यथा—

"यदा तु देहादेः किं तत्त्वमिति चिन्तोपक्रमं प्रकाशघनमेव संविद्रूपमिति, तदा बोधस्वरूपीकृतं तद्रसानुविद्धमेव शून्यादि-देहान्तमवभातीत्यभ्यासात् तस्य संविद्धर्माः शक्तिविशेषाः सम्यगाविशन्तो विभूतीरुत्थापयन्ति।"

(ई०प्र०वि०वि०,खं०3,पृ०,330)

"अनयैव दृष्ट्या तत्तद्दृद्ध्यर्थमधिकतरः समावेशोऽभ्यसनीयः स्वप्रयत्नेनापीत्येतदपि सूचितम्।"

(शि०दृ०वृ०,पृ०,3)

~ त्रिप्रकारकः :— **(1) स चाणवोपायतोलभ्य आणवः समावेशः।**

(2) शाक्तोपायतो लभ्यः शाक्तः समावेशः।

(3) शाम्भवोपायतो लभ्यः शाम्भवः समावेशः।

उत्तरोत्तरमुत्कृष्टा इमे समावेशाः।

~ पञ्चविधः — **यथा—**

(1) भूतसमावेशः, (2) तत्त्वसमावेशः, (3) आत्मसमावेशः, (4) मन्त्र समावेशः, (5) शिवशक्तिसमावेशः इति। यथा—

"रुद्रशक्तिसमावेशः पञ्चधा परिपठ्यते।
भूततत्त्वात्ममन्त्रेश शक्तिभेदाद् वरानने।।"

(मा०वि०तं०2,17)

~ **पञ्चाशद्विधः तत्र—**

आत्मसमावेशाः = 3
शक्तिसमावेशौ = 2
भूतसमावेशाः = 5
तत्त्वसमावेशाः = 30
मन्त्रवर्णसमावेशाः = 10
सर्वे = 50

यथा—

"पञ्चधाभूतसंज्ञस्तु तथा त्रिंशद्विधोऽपरः।
आत्माख्यस्त्रिविधः प्रोक्तो दशधा मन्त्रसंज्ञकः।।
द्विविधः शक्तिसंज्ञोऽपि ज्ञातव्यः परमार्थतः।"

(मा०वि०तं०2,18-19)

एतेषां पृथक्-पृथक् स्वरूपं नैव स्पष्टीकृतं सर्वेषाम्। तं-तं पदार्थमालम्बनीकृत्याभ्यस्यमाना एते समावेशाः।

~ भूतसमावेशः :— **ननु भूतानि जडानीति तत्र किं समावेशेन प्रयोजनम् ? उच्यतेः— शैवदर्शनीये सर्व-सर्वात्मकतासिद्धान्ते जडभूतान्यपि परिपूर्णशिवरूपाणीति संविद्रूपाण्येव। अतः शिवयोगिनः कृते भूतसमावेशा अपि परिपूर्णचिदानन्दघनतासाराः।**

यथा—

"उच्यते द्वैतशास्त्रेषु परमेशाद्विभेदिता।
भूतादीनां यथा सात्र न तथा द्वयवर्जिते।।
.....
तत एवं द्वितीयेऽस्मिन्नधिकारे न्यरूप्यत।
धरादेर्विश्वरूपत्वं पाञ्चदश्यादि भेदतः।।"

(तं०आ०1,194-199)

द्र०:- **सर्वसर्वात्मकता** इति।

~ व्युत्थानेऽपि :— **परे शिवयोगिनो यदा शाम्भवाद्युत्कृष्ट-योगाभ्यासे सम्यग्रूढा भवन्ति, तदा ते व्युत्थानोचितेषु क्रयविक्रयभोजनासनशयनादिव्यापारेषु प्रचलत्स्वपि परशिवसमावे-शभाजो भवन्त्येव। सहजोऽयं समावेशः।**

यथा—

"अर्थेषु तद्भोगविधौ तदुत्थे दुःखेसुखे वा
गलिताभिशङ्कम्।
अनाविशन्तोऽपि निमग्नजानन्ति वृत्तिक्षय
सौख्यमन्तः।।"

(तं०आ०5,126)

"बहिस्तत्तद्व्यवहारपरत्वेऽपि स्वात्ममात्र विश्रान्त्या परं चमत्कारातिशयमनुभवन्तीत्यर्थः।"

(तं०आ०वि०,खं०5,पृ०,435)

~ शाक्तः :— **शाक्तोपायाभ्यासेनोद्भावनीयः शिवभावावेशः शाक्तः समावेशः। असौ शाम्भवे समावेशे विश्रान्तः सन्नेव कृतकृत्यतां याति। शाम्भवसमावेशस्योपायभूतोऽयम्।**

प्राणोच्चारादि साहाय्यराहित्ये केवलं बुद्धिगतेन भावनाभ्यासेनाभ्यस्यते यः शाक्तोपायस्तत् फलभूत एव समावेशः। यथा—

"उच्चाररहितं वस्तु चेतसैव विचिन्तयन्।
यं समावेशमाप्नोति शाक्तः सोऽत्राभिधीयते।।"

(मा०वि०तं०2,22)

~ शाम्भवः :— **शाम्भवोपायाभ्यासफलतः परिस्फुरन् शिवभावसमावेशः शाम्भवः। नात्र ध्यानधारणाभावनादीनां कश्चिदप्यवसरः। तत एवमेवासौ समुद्दीप्तोभवति। अभ्यासक्रमारम्भे मुद्राविशेषस्य भवत्यपेक्षा। परं परिपक्वतायां-**

विनैव मुद्रादि साहाय्यं समुद्दीप्यते शाम्भवः समावेशो यत्र तस्यानुपाय इति समाख्या।

यथा—

"अकिञ्चिच्चिन्तकस्यैव गुरुणा प्रतिबोधतः।
जायते यः समावेशः शाम्भवोऽसावुदाहृतः।।"

(मा०वि०तं०2,23)

समीरणो :— ~ बीजम् :— यथा—

"समीरणो य इति।"

(तं०आ०वि०,खं०12,पृ०,178)

सम्पत् :— स्वात्मसाक्षात्कार एव हि वास्तविकी सम्पत्।

"सम्पत्– स्वप्रथारूपसमृद्ध्यात्मा क्रियाशक्तिः।"

(स्त०चि०वि०,पृ०,6)

सम्पर्कदीक्षा :— सुसिद्धशाक्तोपायनिष्ठो योगी यदा पारमेश्वरानुग्रहपवित्रितस्य यस्य कस्यापि जनस्य पुरतस्तिष्ठति स जनोऽपि तथाविधयोगसिद्धिसम्पन्नो भवतीति सन्निधान-मात्रेण शिवज्ञान संक्रमणकारिणीयं दीक्षा।

यथा—

"यं कञ्चित् परमेशानशक्तिपातपवित्रितम्।
पुरो भाव्य स्वयं तिष्ठेदुक्तवद्दीक्षितस्तु सः।।"

(तं०आ०4,203)

"येनासौ दीक्ष्यः .....
..... भुजङ्गवद्गरलसङ्क्रामः।
इत्याद्युक्त्या तत् स्वरूप संक्रमात्।
..... दीपाद्दीपमिवोदितम्। इति न्यायेन दीक्षितः।"

(तं०आ०वि०,खं०3,पृ०,234)

अनुपायदीक्षाप्रकारविशेषरूपैषा दीक्षा यां विधातुं शाक्तोपायेन सुसिद्धो योगी विधातुं समर्थो भवति। अत एव दीपाद् दीपमित्यादि समुद्धृतमत्र प्रकरणे विवेक कृता।

सम्पातः :— भोक्तृभोग्ययोरेकानुसन्धानात्मकः सङ्गमः।

यथा—

"सममेकानुसन्धानात् पाततो भोक्तृभोग्ययोः।।
अन्योऽन्यत्र च सम्पातात् सङ्गमाच्चेत्थमुच्यते।"

(तं०आ०15,443-444)

सम्पुटम् :— "आद्यन्तयोर्मन्त्रन्यासः सम्पुटवत्। यदुक्तं:—

मन्त्रमादौ लिखेद्विद्वानमिधेयमतः परम्।
मन्त्रमस्य लिखेत्पश्चात्सम्पुटं परिकीर्तितम्।।"

(ने०तं०उ०खं०2,पृ०,77)

सम्पुटयोगः :— यत् किमपि तत्त्वं वा, घटादिर्विषयो वा, प्रमाता वा कोऽपि यस्मिन् योगे शिवरूपतया दृश्यते, तस्य च शिवस्य च मध्येऽवभासमानानि तत्त्वादीनि सर्वाणि तदैक्यमयानि भावनया दृश्यन्तेऽसौ योगः सम्पुटयोगः।

यथा—

"स एष एव सम्पुटयोगेऽस्मद् गुरुणां सम्प्रदायः—
शुद्धपरसत्तया सर्वस्यैव एकैकतत्त्वस्य निखिलस्य च तत्त्वौघस्य सम्पुटीकरणात्।"

(प०त्री०वि०,पृ०,143)

सम्पूर्णज्ञानः :— सर्वमपि विश्वं करामलकवच्छिवरूपतया प्रत्यभिजानन् सकलशङ्कासमाधानकरणपटुः, भुक्तिमुक्ति-प्रदानसमर्थो गुरुः सम्पूर्णज्ञानः। ज्ञानपदमत्र विज्ञानस्याप्यु-पलक्षकम्। विज्ञानेन रहितं हि ज्ञानं निर्जीवम्।

द्र०:- 'गुरुः' सम्पूर्णज्ञानः इति।

~ अत्याज्यः :— चेत् सम्पूर्णज्ञानवान् गुरुः शिष्यं चिरमप्युपेक्षेत्, नैव चाभीष्टमार्गप्रदर्शनं कुर्यात्, तथापि नासौ त्याज्यः।

रहस्य वस्तुनोऽवचनमपि मर्शनीयमेव, तस्य सर्वज्ञत्वेन किमुचितं किं हितमिति सम्यग् विजानतो गुरोरिच्छानुवर्तनीया शिष्यजनेन। यथा—

"ननु सोऽप्यब्रुवन् विपरीतं वा ब्रुवन् किं न त्याज्यः, नैवेति ब्रूमः। तस्य हि पूर्णज्ञानत्वादेव रागाद्यभाव इति।

अवचनादिकं शिष्यगतेनैव केनचिदयोग्यत्वानाश्वस्तत्वादिना निमित्तेन स्यात्। इति तदुपासने यतनीयं शिष्येण, न तत्त्यागे।"

(तं०सा०,पृ०,125)

सम्बन्धः— (1) — ~ लोकव्यवहार :— अनेक प्रमेयविषये माया प्रमातुरेकाकारो विमर्शः। यथा रामो दशरथस्य पुत्रः इति रामदशरथयोः परस्परसमन्वयात्मकः पुत्रभावपितृभावविमर्शः। स च द्विप्रकारः कालकृतो देशकृतश्च। ततः कालोऽपि सम्बन्धविशेषमय एव न स्वतन्त्रः कोऽपि पदार्थस्तथा देशोऽपि।

यथा—

"सम्बन्धः सम्पर्कः संश्लेषः इत्येते पर्यायास्तावद् भवन्ति। स च संश्लेषार्थोऽनेकस्यैकता कथ्यते, न त्वनेकतैव नाप्येकतैवापि तूभयावस्थापेक्षोऽयमर्थः सम्बन्धः।"

(सं०सि०वृ०,पृ०,2)

"ते ह्यमिश्राः स्वयं भावास्तान् योजयति कल्पना" इत्याहुः। तथा नीलमुत्पलमिति शाब्द्या कल्पनया परं नीलोत्पलयोरेकात्मता प्रतीयते।"

(तदेव,पृ०,3)

"स्वात्मनिष्ठा विविक्ताभा भावा एकप्रमातरि।
अन्योऽन्यान्वयरूपैक्ययुजः सम्बन्धधीपदम्।।"

(ई०प्र०,2-2-4)

~ कालिकः :— व्यावहारिकोऽयं सम्बन्धो लोके प्रचलति। एष तावत् क्रियावैचित्र्योपरि मायाप्रमात्रा परिकल्पितेन पौर्वापर्यात्मना क्रमेणावभासमानयोराभास-विशेषयोर्विषये तथा तथा तेन-तेन प्रमात्रा एकविमर्शविषयतां नीयमानोऽपरः आभासविशेषः कालिकः सम्बन्धः। स च ताभ्यां भिन्नः एकस्तयोर्द्वयोरपि परस्पर समन्वयात्मकः। यथा—

"सर्वत्राभासभेदोऽपि भवेत् कालक्रमाकरः।
विच्छिन्नभासः शून्यादेर्मातुर्भातस्य नो सकृत्।।"

(ई०प्र०2-1-6)

"क्रियावैचित्र्यनिर्भासात् कालक्रममपीश्वरः।।"
(तदेव,2-1-5)

"क्रिया विमर्शविषयः कारकाणां समन्वयः।"
(तदेव,2-2-6)

"कालः सूर्यादि सञ्चारस्तत्तत्पुष्पादिजन्म वा।
शीतोष्णे वाथ तल्लक्ष्यः क्रम एव स तत्त्वतः।।"
(ई०प्र०,2-1-3)

~ तद्बुद्धिः :— **विषयद्वयस्य रूपश्लेषतया विमर्शनं विदधती मायाप्रमातुबुर्द्धिः।**

~ द्र०:- **'सम्बन्धः'** ~ तद्रूपता इति।

यथा—

"तच्च नैक्यमात्रं स्वरूपविगलने सम्बन्धायोगात्, किन्तु परस्पररूपश्लेष,समकालनिमज्जदुन्मज्जद्भेदाभेदकोटिद्वय दोलायन्त्ररूपमन्वयलक्षणम्।"
(ई०प्र०वि०वि०,खं०3,पृ०,52)

~ तद्रूपता :— **सम्बन्धरूपतानामसकललोकव्यवहाराधारभूता सा च परमेश्वरेणैव स्वेच्छया भासिता सती विजृम्भते सर्वत्र।**

यथा—

"भेदाभेदात्मसम्बन्धसहसर्वार्थसाधिता।
लोकयात्रा कृतिर्यस्य स्वेच्छया तं स्तुमः शिवम्।।
भावभेदादिसम्बन्धमयेन वपुषोन्मिषन्।
जयत्येकोऽपि विश्वात्मा प्रकाशः परमेश्वरः।।"
(सं०सि०,1,2)

यदा मायाप्रमाताऽनेकान् पदार्थानेकविमर्शविषयत्वेन विमृशति तदैव ते पदार्थाः परस्परं सम्बद्धाः इवाभासन्ते। तत्रैवैकविमर्शविमृश्यतायां सम्बन्धस्तयोराभासते लोकव्यवहारे। राजा पुरुषश्च पृथक् प्राणिद्वयम्। मायाप्रमाता यदा तावेकविमर्शविषयतया विमृशति तदा राजा पुरुषस्य स्वामित्वेन सम्बद्धः पुरुषश्च राज्ञो भृत्यत्वेन सम्बद्धोऽवभासते।

यथा—

(क) "सं शब्देन सहार्थवृत्तिना समानार्थवृत्तिना वा बन्धिना च देशान्तरपरिहारपूर्वकैकदेशावस्थानार्थेन विस्पष्टमुक्तैव स ह्यनेकस्यैकता।"
(सं०सि०वृ०,पृ०,3)

(ख) "केवलमित्थं रूपयैवानया कल्पनाप्रतीत्या सांसारिकव्यवहारनिर्वर्तनार्थमर्थाः परस्परव्यावृत्ता अपि कार्यकारणरूपत्वेनावास्तवेनैव प्रतिपाद्यन्ते।"
(तदेव,पृ०,4)

(ग) "इत्यमिश्राः स्वयं भावास्तान् योजयति कल्पना।"
(तदेव,4)

~ देशकृतः :— **व्यावहारिकोऽयं सम्बन्धो लोके प्रचलति। एष तावन्मूर्ति वैचित्र्योपरि मायाप्रमात्रा समीपदूरदक्षिणोत्तरादिरूपतया कल्प्यमानं दैशिकं क्रममाश्रित्य परत्वापरत्वरूपतया कल्प्यमानेन क्रमेणावभासमानयोराभासविशेषयोर्विषये तथा-तथा तेन-तेन प्रमात्रा एकविमर्शविषयतां नीयमानोऽपरः आभासविशेषो दैशिकः सम्बन्धः। स च ताभ्यां भिन्नः एकस्तयोर्द्वयोरपि परस्परसमन्वयरूपः।**

यथा—

"मूर्ति वैचित्र्यतो देशक्रममाभासयत्यसौ।।"
(ई०प्र०,2-1-5)

"तद् यथा गृहमित्यन्यत् स्वरूपं, प्राङ्गणमित्यन्यत्, विपणिरित्यन्यत् ..... देशरूपोदूरादूरविततत्वाविततत्वादिः क्रमः।"
(ई०प्र०वि०,खं०2,पृ०,13-14)

"देशक्रमोऽपि भावेषु भाति मातुर्मितात्मनः।
स्वात्मेव स्वात्मना पूर्णा भावा भान्त्यमितस्य तु।।"
(ई०प्र०,2-1-7)

~ द्विविधः :— **यद्यपि सम्बन्धोऽनन्तप्रकारो भवति तथापि ज्ञाप्यज्ञापकतारूपः कार्यकारणतारूपश्चेत्यसौ परमार्थतो द्विविध एव। यथा—**

"अधुना तु सम्बन्धतत्त्वमेवैकघनतया व्युत्पादनीयम्।
तच्च द्विविधमेव परमार्थतोज्ञाप्यज्ञापकताकार्य कारणता च।"
(ई०प्र०वि०,खं०2,पृ०,61)

~ न भ्रमः :— **यतः सम्बन्धबुद्ध्याश्रिताः सर्वे लोकव्यवहारास्ततो नैवासौ भ्रान्तिरूपा।**

यथा—

"न परं तास्तथा भ्रान्ताः सर्वा अपि प्रतिक्षणात्।
स्वसंवित् संज्ञकानन्तचिद्विमर्शप्रतिष्ठिताः।।"
(सं०सि०,20)

~ बहुविधः :— **अनेकप्रकारोऽस्य विस्तारः।**

यथा—

"यावद् हि प्रातिपदिकार्थस्य पृष्ठपाति वपुर्भाति तदतिरिक्तं सर्वं सम्बन्ध एवेति कारकाणामपि सम्बन्धरूपतैव केवलं क्वचिदसौ सम्बन्धो व्यपदेशान्तरग्रन्थिं सहते यथा सास्नादिमतां सम्बन्धो 'गाव' इति एक व्यपदेशसहिष्णुः तत्र सामान्यादिव्यवहारः। व्यपदेशान्तरग्रन्थिभङ्गे तु सम्बन्धवाचोयुक्तिरेव।"
(ई०प्र०वि०,खं०2,पृ०,43)

~ स्वरूपतः :— **द्वयोर्भावयोरनेकेषां वा भावानां प्रमातृ संविदारुढतायां सत्यां यत्तत्रैकरूपत्वं कल्यते स एव सम्बन्धः। अतोऽनेकेषामेकत्वमेव सम्बन्धतत्त्वम्। तच्च तेषां भेदाभेदात्मिका कलना।**

यथा—

"राजा पुरुषश्च बहिस्तटस्थौ स्वात्मैक परिसमाप्तौप्रमातृभूमौ यदैक्यं गच्छतो, न चैक्यमात्रं, तयोर्भेदविगलनापत्तेः, अपि तु परस्पररूपश्लेषात्मकं युगपेदव निमज्जदुन्मज्जद्भेदाभेदकोटिद्वयदोलारोहणलक्षणमन्वयरूपं तदा तावेव सम्बन्धधियः आलम्बनं भवतो 'राज्ञः पुरुषः' इति। ..... एवं

बहिरनेकता, अन्तस्तु परस्परूपश्लेषेणैक्यमिति सम्बन्धस्य रूपम्।"

(ई०प्र०वि०,खं०2,पृ०,45-46)

यथा—

"यत्र पदार्थाभासस्य आत्मविश्रान्त्या सन्तोषमपुष्यतः आभासान्तरपरामर्शविश्रान्तिसाकाङ्क्षतया स्वरूपनिष्ठा तत्र सम्बन्धरूपतैव क्रियाशक्तिविजृम्भामयी, तत्रापि भावान्तरापेक्षया सम्बन्धान्तरमप्यस्तु, यथा संख्यादौ समवायं मन्यन्ते।"

(ई०प्र०वि०,खं०2,पृ०,53)

सम्बन्धः— ~शास्त्रावतारे :— सिद्धयोगीश्वरीशास्त्रस्य गुरु शिष्यपरम्परया अवतारः। स च मूलतः परः, अवतारे च पञ्चभूमिकः। यथा—

(1) महान्, (2) अवान्तरः, (3) दिव्यः, (4) मिश्रो (दिव्यादिव्य इति), (5) इतरेतरः (अन्योऽन्य इति)। एतेषां लक्षणान्यत्रैवाग्रे द्रष्टव्यानि।

द्र०:- 'पञ्चविधः' इति।

~ अदिव्यः :—**मानवस्य मानवेनैव गुरुशिष्यसम्बन्धः।**

द्र०:- 'इतरेतरः' इत्यग्रेऽत्रैव।

~ अन्तरालः :— **अवान्तरस्यैव सम्बन्धस्य नामान्तरम्।**

"परो महानन्तरालो दिव्यो मिश्रस्त्वदिव्यकः।"

उद्ध०:- (तं०आ०वि०,खं०1,पृ०,280)

~ अन्योन्यः :— **अदिव्यः। इतरेतरः एव।**

द्र०:- 'इतरेतरः' इति।

~ अवान्तरः :— **शास्त्रप्रवक्ता यदाऽनन्तनाथस्य स्थितावस्थाय शङ्कामुत्थापयति, भगवत्-सदाशिवपदमवस्थाय च तस्याः समाधानं करोति, तदा शास्त्रतत्त्वस्य तथाविधायां विचारणायां प्रष्टाऽनन्तनाथः वक्ता च भगवान् सदाशिवः। स एष तयोः सम्बन्धोऽवान्तरसम्बन्धः। अनेनैव सम्बन्धेन शास्त्रावतारक्रमे शास्त्रतत्त्वमनन्तनाथेन सदाशिवभट्टारकात् प्राप्तमिति क्रमागमेषु प्रसिद्धः। यथा—**

"अवान्तरश्च योगेन सादाख्यात् क्रमशः पुनः।।
प्राप्तोऽनन्तेशदेवेन द्वितीयस्तेन कीर्तितः।"

उद्ध०:- (तं०आ०वि०,खं०1,पृ०,283)

द्वितीय इति परस्यात्रागणने। एष सम्बन्धः पश्यन्त्यामेव वाचि परिस्फुरति। अवान्तर इति महतोः दिव्यस्य च सम्बन्धस्य मध्ये वर्तमानत्वेनेति वेद्यम्।

~ इतरेतरः :— **यत्र मानवशरीरा योगिनो गुरवः जिज्ञासवश्चापि मानवा एव शिष्यास्तत्र तयोर्विद्यासम्बन्ध इतरेतर इति वाऽन्योऽन्य इति वाऽभिधीयते।**

यथा—

"व्याख्यानक्रमयोगेन विद्यापीठप्रपूजने।
शिष्याचार्यस्वरूपेण पञ्चमस्त्वितरेतरः।।"

(तं०आ०वि०,खं०1,पृ०,283)

पञ्चम् इति संख्याऽत्र परस्य सम्बन्धेष्वगणनेन एष एवादिव्यः सम्बन्धः।

~ दिव्यः :— **यत्र गुरुशिष्यक्रमे उत्कृष्टो दिव्योऽधिकारी प्रवक्ता अवरश्च दिव्य एव प्रष्टा, तत्र स्फुरिते शास्त्रतत्त्वे यो गुरुशिष्यक्रमोऽसौ दिव्य इत्यभिधीयते। योगसिद्धो ज्ञानसिद्धश्च शास्त्रकारोऽपि स्वयमधरदिव्याधिकारिपदेऽवस्थाय शङ्कामुत्थापयति, उत्तराधिकारिपदे स्थित्वा च तत्समाधानं करोति। स एष प्रश्नोत्तरकृतोः सम्बन्धो दिव्य इत्युच्यते। तत्रापि प्रश्नोत्तरयोर्यः परामर्शोऽसौ दिव्यो न इतरेतरः; उभयोरपि गुरु शिष्ययोर्दिव्यत्वात्। यथा—**

"तृतीयस्तु पुनर्देवि श्रीकण्ठो नन्दिना सह।
द्वाभ्यां देवात्तु मत्त्वैवं तेन दिव्यः प्रकीर्तितः।।"

उद्ध०:- (तं०आ०वि०,खं०1,पृ०,283)

अत्र सम्बन्धे भगवान् श्री कण्ठनाथो नन्दीश्वरश्च प्रष्टारौ भगवानन्तनाथश्चोपदेष्टा। तृतीय इति परस्य संख्यायामगणने।

~ दिव्यादिव्यः :— **यत्र गुरु शिष्यक्रमेदिव्यशरीरो वक्ता मर्त्यशरीरश्च शिष्यः प्रष्टा तत्र तयोः सम्बन्धो दिव्यादिव्य इति मिश्र इति वाभिधीयते, मर्त्यास्तत्र तावदृषयो न साधारणा जनाः। मूलतोऽनेनैव सम्बन्धेन सिद्धयोगीश्वरीमतं पृथिव्यामवतीर्णम्।**

यथा—

"ऋषीणां च समासेन नन्दिना प्रतिपादितम्
चतुर्थस्तु भगवता दिव्यादिव्यः प्रकीर्तितः।"

उद्ध०:- (तं०आ०वि०,खं०1,पृ०,183)

चतुर्थ इति परस्यागणेन।

स्वात्मसाक्षात्कारकृच्छास्त्रनिर्माता कदाचित् स्वयमेव ऋषित्वभूमाववस्थाय शङ्कामुत्थाप्य नन्दिसदृशस्य देवस्यावस्थामारोहति, तदा तस्यामवस्थायां स्थित्वा स्वयं समाधनं विदधाति। तदनुसारं च - "ऋषिरुवाच", "नन्दी प्राह" इत्यादि निर्देशाः लोके प्रचलिताः।

~ पञ्चविधः :— **(1) महान्, (2) अन्तरालः(अवान्तरः), (3) दिव्यः, (4) दिव्यादिव्यः, (5) इतरेतरः, इति पञ्चप्रकारको गुरुशिष्यसम्बन्धः।**

यथा—

"महानवान्तरो दिव्यो दिव्यादिव्यश्चतुर्थकः।
इतरेतरमार्गेण पञ्चधा भिन्नलक्षणः।।"

उद्ध०:- (तं०आ०वि०,खं०1,पृ०,282)

परस्यनात्र संख्यायां गणनं, तस्य पञ्चस्वप्योतप्रोतत्वदृष्टया।

यथा—

"सम्बन्धः परमेशानि सर्वः परकलामयः।
महानवान्तरो दिव्यो मिश्रोऽदिव्यश्च तत्परः।।"

उद्ध०:- (तं०आ०वि०,खं०1,पृ०,284)

परकलात्मक इति परस्यैव पञ्चधाऽयं विभवः इति।

~ परः :— परस्मिंस्तत्त्वे शिवत्वं शक्तित्वं चोभयं परस्परविमिश्रं सच्छास्त्रार्थस्य विमर्शं करोति। तत्र शक्तित्व-प्राधान्येन शङ्काविमर्शः शिवत्वप्राधान्येन च तत्स-माधानविमर्शः। लोकेऽपि पराद्वैतशास्त्रकारः स्वात्मनैव शक्तित्व-प्राधान्येन शङ्काविमर्शं शिवत्व प्राधान्येन च तत् समाधान- विमर्शं करोति। तत एव तथाविधशङ्कासमाधान-रूपस्य शास्त्रतत्त्वविमर्शस्य शिवशक्तिसंवादरूपता प्रसिद्धा सैद्धदर्शनपरम्परासु। स्पष्टीकृतोऽयं सिद्धान्तो विस्तरतो अभिनवगुप्तमहोदयैः परात्रीशिकाविवरणेः-"देव्युवाच", "भैरव उवाच" इति च वाक्यद्वयव्याख्याने।

(प०त्री०वि०,पृ०,11,121)

शास्त्रतत्त्वस्यैतद्विमर्शनं परस्यामेव वाचि सिद्धम्। तत एव परोऽयं सम्बन्धः शास्त्रतत्त्वपरिस्पन्दस्य। यथा—

"गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः।
पूर्वोत्तरपदैर्वाक्यैस्तन्त्रं समवतारयत्।।"

उद्धः- (प०त्री०वि०,पृ०,12)

.....तन्त्रामाधारभेदतः-

(स्व०तं०8,31-32)

इति पाठभेदोऽत्र।

आचार्याभिनवगुप्तमहोदयैरपिः-

(क) "एतत् प्रश्नोत्तरात्मत्वे पारमेश्वरशासने।
परसम्बन्धरूपत्वमभिसम्बन्धपञ्चके।।"

(तं०आ०1,273)

(ख) "अदृष्टविग्रहाच्छान्ताच्छिवात् परमकारणात्।
ज्ञानरूपं विनिष्क्रान्तमनवच्छदनं महत्।।"

उद्धः- (स्व०तं०खं०4,पृ०,19)

"अभिसम्बन्धपञ्चके" इत्यनेनैतदुक्तं यत् पर एव हि शिवशक्ति सम्बन्धो "महानवान्तरो" इत्याद्युक्त" सम्बन्धपञ्चकरूपतया स्वयमग्रे प्रसरतीति। यथा—

"यथोक्तं रत्नमालायां सर्वः परकलात्मकः।
महानवान्तरो दिव्यो मिश्रोऽन्योन्यस्तु पञ्चमः।।"

(तं०आ०1,274)

सर्वथाऽद्वैतभावनिष्ठः शिवशक्तिसाम्मुख्यभावमयोऽयं व्यावहारिकशब्दप्रयोग एव सम्बन्धत्वेनोच्यते।

यथा—

"भिन्नयोः प्रष्टृतद्वक्त्रोश्चैकात्म्यं यत्स उच्यते।
सम्बन्धः परता चास्य पूर्णैकात्म्यप्रथामयी।।"

(तं०आ०1,275)

"इत्थं संविदियं देवी स्वभावादेव सर्वदा।
उद्देशादित्रयप्राणा सर्वशास्त्रस्वरूपिणी।।"

(तदेव,277)

~ महान् :— शिवस्य शक्तिरेव बहिर्मुखे प्रसारे सदाशिवरूपतयाऽवतिष्ठते। तदनुसारं शास्त्रकारः सदाशिवभुवमधिष्ठाय प्रश्नस्य विमर्शं करोति, शिवदशां चाधिष्ठायान्तस्तत्समाधानस्य स्फुरणं करोति। एवं शास्त्रतत्त्वं शिवेनोक्तं सत् सदाशिवेन गृह्यते। स एष गुरु शिष्य-सम्बन्धो महानित्युच्यते। त्रिकशास्त्रतत्त्वमनेन सम्बन्धेन सदाशिवस्य सकाशं प्राप्तमिति।

यथा—

"शिवस्य परिपूर्णस्य परस्यामिततेजसः।
तच्छक्तिश्चैव सादाख्या स्वेच्छाकर्तृत्वगोचरा।।
सत्त्वं तेन च सम्प्राप्तं सम्बन्धं प्रथमं विदुः।।"

उद्धः- (तं०आ०वि०,खं०1,पृ०,283)

प्रथममिति परस्य सम्बन्धस्यागणने सति। मूलतोऽपि शास्त्रतत्त्वं सदाशिवेन शिवादेव प्राप्तमनेन गुरुशिष्य-सम्बन्धेन। एष सम्बन्धः उत्कृष्टायां पश्यन्त्यां वाचि परिस्फुरति।

यथा—

"गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः।।
पूर्वोत्तरपदैर्वाक्यैस्तन्त्रमाधारभेदतः।
तज्ज्ञानमीश्वरेऽदात्तदीश्वरेण शिवेच्छया।।
विद्यायाः कथितं पूर्वं विद्येशेभ्यस्तथादरात्।"

(स्व०तं०,8,31-33)

~ मिश्रः :— द्र०:- ~ दिव्यादिव्यः इति।

~षड्विधः :— (1) परो, (2) महान्, (3) अन्तरालो, (4) दिव्यः, (5) मिश्रः, (दिव्यादिव्यः), (6) अदिव्यः (इतरेतरः), इति षड् गुरुशिष्यसम्बन्धाः।

यथा—

"परो महानन्तरालो दिव्यो मिश्रस्त्वदिव्यकः।
सम्बन्धः षड्विधस्तन्त्रे .....।।"

उद्धः- (तं०आ०वि०,खं०1,पृ०,280)

परस्यापि प्रकारमध्ये गणनेन षट्संख्यता सम्बन्धा-नाम्।

सम्बन्धसिद्धिः :— सिद्धित्रय्यां प्रकाशितेयमपि पुस्तिकाऽतीव लघुकलेवरा केवलमेकविंशतिकारिकात्मिका। मायीयप्रमातृकल्पनाकल्पितस्य सम्बन्धपदार्थस्य प्रतिपादनमत्र तर्कयुक्तिभिः सम्यक् कृतं वर्तते। पुस्तिकायाः आदौ ग्रन्थकृता एकप्रघट्टकनिर्मिता पुस्तिका श्लोकतात्पर्यप्रकाशिनी संक्षिप्ता वृत्तिर्विनिर्मिता येदानीं मुद्रिता लभ्यते, प्रकाशयति च तर्कयुक्तीनां तात्पर्यम्। अस्याः सिद्धेरुपर्यपि विनिर्मिताभूदाचार्याभिनवगुप्तेन विस्तृता विमर्शिनी नाम टीका इत्यनुमीयते। यतः ईश्वरसिद्धेरजडप्रमातृसिद्धेश्चोपरि विनिर्मितयोर्विमर्शिन्योः स्फुटं नाम कीर्त्तनं पङ्क्त्युद्धरणञ्च लभ्यते महार्थमञ्जरीपरिमले। अतिसूक्ष्मविचारमयीयं लघ्वी पुस्तिका। ईश्वरप्रत्यभिज्ञायां क्रियाधिकारे स्तृष्टस्तावदयं विषयः सम्बन्धाख्यः। परं तत्र संक्षेपत एव प्रतिपादितोऽत्र पुनर्विस्तरतः।

सम्बन्धे सावधानता :— ग्राह्यग्राहकः विक्षोभात्मे लोकव्यवहारेऽपि विकल्पनिर्द्धासपूर्वकं यो निर्विकल्पः संवित्

साक्षात्कार चमत्कारः स एव सम्बन्धे सावधानता। यथा—

"ग्राह्यग्राहक संवित्तिः सामान्या सर्वदेहिनाम्।
योगिनां तु विशेषोऽस्ति सम्बन्धे सावधानता।।"

(वि०भै०,106)

"लोकास्तु **(अप्रबुद्धाः)** विकल्प विश्रान्त्या तामहन्तामयीं, अहन्ताच्छादितेदम्भावविकल्पप्रसरां, निर्विकल्पां च विमर्शभुवम्, अप्रकाशितामिव मन्यन्ते दुःखावस्थां सुखविश्रान्ता इव। विकल्पनिर्हासेन तु सा प्रकाशते एव, इति यमसौ सम्बन्धे ग्राह्यग्राहकयोः सावधानता।"

(तं०सा०,पृ०,104)

सम्बाह्यः :— (1) सम्यक् बाह्यविषयौन्मुख्येन चाल्यते इति सम्बाह्यः करण वर्गः।

यथा—

"सम्यग् बाह्यविषयाभिमुखो विधीयते इति सम्बाह्यः करण-वर्गः।"

(शि०सू०विवृ०3,4)

(2) सम्बाह्यते भारवाहपशुपद्-इति सम्बाह्यः करण वर्गः।

(3) मायाप्रमाताऽपि पारमैश्वर्या शक्त्या तथैव प्रेर्यत इति सोऽपि सम्बाह्य एव। यथा—

"सम्वाह्यते पशुवद् भारवहनप्रायेषु कर्मसु स्वेच्छं प्रेर्यतइति सम्बाह्यः करणवर्गः।"

(शि०सू०विवृ०3,40)

"बाह्येषु भिन्नेषु विषयेषु सम्यग् वाह्यते विषयवासनया प्रेर्यत इति सम्बाह्यः पशु जीवः।"

(तदेव 3,40)

"योनेर्योन्यन्तरं नीयमानत्वेन सम्वाह्यः पशुः प्रमाता।"

(तदेव 3,40)

सम्वाहिका :— दूती।

"दूती सम्वाहिका ज्ञेया .....।।"

(स्व०तं०15,9)

"समं सह वाहयति निर्वाहयति वीरस्य रहस्याचारमिति सम्वाहिका दूती भार्योच्यते। अथ दूती घण्टा सममान्तरध्वनिना वाहयति प्रापयति बाह्यमिति कृत्वा सम्वाहिका।"

(स्व०तं०उ०,प०5,पृ०,131)

सर्वकर्तृता :— (1) आत्मसाक्षात्कारी स्वात्मानं सर्वकर्तृतया प्रत्यभिजानाति, सास्य सर्वकर्तृता।

यथा—

"द्रष्टा श्रोता घ्राता देहेन्द्रिय वर्जितोऽप्यकर्तापि।
सिद्धान्तागमतर्कांश्चित्रानहमेव रचयामि।।"

(प०सा०,50)

(2) परमेश्वरेच्छानुसारमेव तदधीनयैश्वर्यैव च व्यवस्थया यतः कुम्भकारादीनां परिमितं कर्तृत्वं, ततः सर्वत्र मूलतः परमेश्वर एव कर्तेति सर्वकर्तृत्वं तस्य। यथा—

"कुम्भकारादेरपि चैतदेव करणम्—यत् परमेश्वरस्य संविद्रूपस्य तथावस्थानं नान्यत् कुम्भकारसंविदोऽपि भगवतोऽनन्यत्वात्।"

(ई०प्र०वि०वि०,खं०2,पृ०,9)

(3) शैवदर्शने परमेश्वरस्य सर्वकर्तृत्वं पूर्णकर्तृत्वं च स्वीकृतम्। स स्वयं सर्वं कुर्वन् सर्वाकारतयाऽवभासमानः स्वयं प्रकाशते स्वस्वातन्त्र्यमहिम्ना।

यथा—

"सर्वमिदं यज्जडाजडस्वभावं विश्वं तद्रूपतया तिष्ठन्तम्
'कर्तासि सर्वस्य यतः स्वयं वै विभो ततः सर्वमिदं त्वमेव।'
इति न्यायेन हि व्यतिरिक्तस्यान्यस्याप्रकाशमानस्य कार्यत्वानुपपत्तेः।"

(प०सा०,पृ०,4)

(4) परमेश्वर एव वस्तुतः संविद्रूपतया सर्वव्यापकः सन् सर्वत्र सर्वं कर्म करोति। जडाः बुद्धिप्राणादयः संकुचितं स्वात्मानं तत्तत्कर्मकर्तृतयाभिमन्वानाः तत्तत्कुर्वन्तस्तत्फलभागिनो भवन्ति। तेषामसौ संकुचितः कर्तृत्वाभिमान एव कार्मो मलः। गलिते तस्मिन् मले सर्वत्र परमेश्वर एव कर्तृतया प्रकाशते। यथा—

"संवेदनात्मको देव एकस्तस्मात् स्वतः खलु।
सर्वकर्ता स वैचित्र्यात् कर्मयोगीति भण्यते।।"

(मा०वि०वा०2,206)

(5) सर्वस्य जगतो मूलभूतसम्वालकः सन् परमेश्वर एव अस्मदादिदेहेन्द्रियादिभिर्वस्तुतः सर्वमपि तत्तत्कर्मजातं कारयतीति स एव विश्वकर्त्ता। अस्माकं तु कर्तृत्वाभिमानोऽज्ञान-निष्ठः।

यथा—

"अस्मदादिदृश्या ह्यर्थास्तेनैव भगवता निर्मीयन्ते।
प्रजापतिमातापितृकुम्भकारादेस्तु निर्मातृताभिमानो यः, सोऽपि तस्यैव सृष्टिरित्युक्तमसत्कृत्।"

(ई०प्र०वि०वि०,खं०3,पृ०,369)

(6) मायीयानां क्षुद्राणां कर्तृणामपि यत् कर्तृत्वं तन्मूलभूते पारमेश्वरे एव कर्तृत्वे विद्यमाने सति तदङ्गतयैवावभासते, तथैव भगवत् सदाशिवादीनामपि कर्तृत्वं भिन्नभिन्नेषु स्तरेषु पारमेश्वरकर्तृत्वेनैवावभासितम्। ततः स एव विश्वकर्त्ता।

यथा—

"कुम्भविशेषं पटविशेषं च चिकीर्षतः प्रथमेच्छास्पन्दे-कुम्भकृत्कुविन्दादेः कर्तव्यतादि निर्भासते एव .....
.....
..... तथाहि मुख्यत्वेन तदेश्वरेच्छैव अनन्तसृष्टिसंहार-प्रबन्धसहस्रं क्रोडीकृत्यावस्थिता तस्य नियतक्रमकस्य हेतुः। तन्मध्य एव नियतिशक्त्या श्रीमत् सदाशिवादीनां मन्त्रेश्वरादीनां किं बहुना ब्रह्मादीनामिच्छा।"

(ई०प्र०वि०वि०,खं०2,पृ०,171-172)

सर्वकारणमकारणम् :— सर्वेषां ब्रह्मादिकारणानां कारणस्वरूपः, परमेश्वरः।

यथा—

"परः सर्वात्मकोऽनन्तो निष्क्रियो निर्मलस्तु यः।
व्यापकः परमेशानः सर्वकारणकारणम्।।
सर्वभूतान्तरावस्थः सर्वानुग्रहकारकः।।"

(ने० तं० 20,11-12)

सर्वगतः— ~ बीजमन्त्रः :— हकारः।

यथा—

"सर्वगतो ह।"

(तं० आ० वि०, खं०12, पृ०, 202)

सर्वज्ञभैरवः :— कोऽपि ग्रन्थविशेषः। यथा—

"तदुक्तं सर्वज्ञभैरवे च :—
'नान्यत्र गमनं स्थानं मोक्षोऽस्ति सुरसुन्दरि।
अज्ञानग्रन्थिभेदो यः स मोक्ष इति कथ्यते।।' इति।"

(स्प० प्र०, पृ०, 7)

सर्वज्ञानम् :— सर्वज्ञानोत्तराख्य आगमः।

यथा—

"क्षेत्रं मानं ब्रुवे श्रीमत् सर्वज्ञानादिषूदितम्।"

(तं० आ० 28,251)

सर्वज्ञानोत्तरम् :— आगमः कश्चन यस्य वाक्यानि प्रमाणतयोद्धृतानि तन्त्रालोकादिषु ग्रन्थेषु।

यथा—

"सर्वज्ञानोत्तरादौ च भाषते स्म महेश्वरः।
नरर्षिदेवब्रह्मिणविष्णुरुद्राद्युदीरितम्।।
उत्तरोत्तरवैशिष्ट्यात् पूर्वपूर्वप्रबाधकम्।"

उद्ध०:- (तं० आ० 4,248-249)

"यदुक्तं तत्र **(सर्वज्ञानोत्तरे)** :—
'न पुंभिरार्षवाक्यं च वैदिकं चर्षिभिस्तथा।
न देवैर्ब्रह्मणो वाक्यं वैष्णवं पद्मजन्मजैः।।
न शैवं विष्णुवचनैर्बाध्यते तु कदाचन।' इति।"

उद्ध०:- (शि० सू० वि०, पृ०, 23,) (तं० आ० वि०,खं०3, पृ०,276)

द्र०:- (तदेव, पृ०, 277,279)

सर्वतोभद्रम् :— (1) ज्ञानिसम्प्रदाये सर्वतो वेद्यसत्ताभासकारिणीजाग्रदवस्था सर्वतोभद्रमिति कथ्यते।

यथा—

"प्रसंख्यानैकरूढानां ज्ञानिनां तु तदुच्यते।
सर्वतोभद्रमापूर्णं सर्वतो वेद्यसत्तया।।"

(तं० आ० 10,244)

(2) ज्ञानी यतः सर्वतो सुमङ्गलात्मकं परिपूर्णं संवित्स्वरूपमेव पश्यति ततस्तस्य दृष्टौ सर्वतोभद्रमिति पदमेतदुच्यते।

यथा—

"सर्वसत्तासमापूर्णं विश्वं पश्येद् यतो यतः।
ज्ञानी ततस्ततः संवित्तत्त्वमस्य प्रकाशते।।"

(तदेव 10,245)

(3) पाञ्चदश्याद्याणवधारणाप्रसंख्यानपराः साधकाः जाग्रत् प्रपञ्चस्थं पृथिव्यादि सर्वतः परिपूर्णं परमशिवरूपं दृष्ट्वा तद्रूपतासमापत्तिमात्मनोऽनुभवन्ति। तया सर्वमेव विश्वरूपत्वेन शिवमेव यतः पश्यन्ति ततोऽस्य जाग्रत् प्रपञ्चस्य नाम सर्वतोभद्रमिति व्यवहरन्ति।

~ ग्रन्थः :— श्री रामकण्ठविरचितस्य भगवद्गीताभाष्यस्य नाम सर्वतोभद्रमिति।

द्र०:- पुष्पिकाः प्रत्यध्यायम्।

सर्वतोभद्राद्याः :— ~ संज्ञाः — जाग्रदाद्याः एव दशा ज्ञानिभिः सर्वतोभद्रादिपरिभाषाभिः परिभाष्यन्ते। तदनुसारं क्रमेण सर्वतोभद्रं, व्याप्तिर्महाव्याप्तिः प्रचयो महाप्रचयश्चेति संज्ञापञ्चकं प्रवृत्तं जाग्रदादिदशानामभिधानान्तरत्वेन।

यथा—

"सर्वतोभद्रताद्यास्तु प्रसंख्या ज्ञानिनिर्मिताः।"

(मा० वि० वा० 1,1011)

"प्रसंख्यानधनास्तु सर्वतोभद्रं, व्याप्तिः, महाव्याप्तिः प्रचयः, इति शब्दैः। अन्वर्थत्वञ्चात्र दर्शितं तन्त्रालोके श्लोकवार्तिके च। यच्च सर्वान्तर्भूतं पूर्णरूपं तत् तुर्यातीतं सर्वातीतं महाप्रचयञ्च निरूपयन्ति।"

(तं०सा०,पृ०,107)

सर्वतोवृतत्वम् :— मन्त्रादौ तदन्ते च साध्यनाम निर्देशः।

यथा—

"मन्त्रस्याद्यन्तयोः साध्यनामनिवेशः सर्वतोवृतत्वम्।
'यद्भवेत्सम्पुटे रूपं तद् भवेत्सर्वतोवृते।' इति।"

(ने०तं०उ०,खं०2,पृ०,79)

सर्वभावातीतशिवः :— शुद्धकर्तृत्वमात्रसाक्षात्कारभाग् योगी।

यथा—

"कर्तृमात्रे सर्वभावव्यतीतशिवभावता।।"

(शि०दृ०,7,31)

सर्वमङ्गलाशास्त्रम् :— मङ्गलाष्टकमध्ये परिगणितो भैरवागमः। यथा—

"यदुक्तं श्री सर्वमङ्गलाशास्त्रे :—
'शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते।
शक्तयोऽस्य जगत्सर्वं शक्तिमांस्तु महेश्वरः।।'
इति।"

(प०सा०वि०,पृ०,10)

"चन्द्राख्या चैव षष्ठी तु मङ्गला सर्वमङ्गला।

एष माङ्गलभेदोऽयं क्रोधेशेन तु भाषितः।।"

उद्धः- (तं०आ०वि०,खं०1,पृ०,43)

सर्ववीरभट्टारकः :— किमपि शैवागमसिद्धान्तानुसारि मोक्षशास्त्रम्।

यथा—

"श्री सर्ववीरभट्टारकेऽपिः—

'अज्ञानाच्छङ्कते लोकस्ततः सृष्टिश्च संहृतिः।

मन्त्राः शिवात्मकाः सर्वेसर्वे वर्णाः शिवात्मकाः।।' इति।"

(म०मं०प०,पृ०,27)

अयमेवागमोऽन्यत्र सर्ववीर इत्येवमेव कृतनामोल्लेखः स्यात्।

यथा—

(तं०आ०13,145; स्व०तं०उ०,प०1,पृ०,10; ने०तं०उ०, खं०1,पृ०,47; प्र०हृ०,पृ०,26-27; तं०आ०वि०,खं०7/2,पृ०, 103)

सर्ववीरमतम् :— सर्ववीरभट्टारकाख्य आगमशास्त्रग्रन्थः कोऽपि।

यथा—

"यथोक्तं श्रीसर्ववीरमते :—

कदाचिद् भक्तियोगेन कर्मणा दीक्षयाऽपि वा

संसारिणोऽनुगृह्णाति .....।"

उद्धः- (ई०प्र०वि०वि०,खं०3,पृ०,311)

सर्वशक्तिविलोलता :— रहस्योपायतोऽत्र सर्वत्र योगिनश्चित्स्वरूपदर्शनम्। एकतस्तीव्रतरभावावेशादौ यश्चमत्कारः, अपरतस्त्वरिततरक्रियात्मकक्रमस्फुटप्रसरकाले, अन्यासां वैवंविधानामनुभूतीनां काले, सुस्फुटमानस-व्यवहारक्रमस्यानवभासेऽपि यदिष्टस्यैव क्रमिकक्रियाकलापस्य निरर्गला प्रवृत्तिस्तत्रोभयत्रान्येषु वैवंविधेष्ववस्थाविशेषेषु या चमत्कारमयी स्थितिरसौ व्यवहारेऽपि पारमैश्वर्यविजृम्भामय चित्स्वरूपाभिव्यक्तिरचिरद्युतिवद् द्योतते, अनुभूयते च सूक्ष्मतरावधानधनैः शिवयोगिभिस्तथा। एषैव स्पन्दतत्त्वाभि-व्यक्तिर्यदनुसारं योगिनो व्यवहारं चित्प्रतिबिम्बकल्पमनुभवन्ति। एषैव सर्वशक्तिविलोलता, सर्वशक्तिसामरस्यात्मिकैकघनता।

यथा—

"सा च दृश्या हृदुद्देशे कार्यस्मरणकालतः।

प्रहर्षावेदसमये दरसंदर्शनक्षणे।।

अनालोचनतो दृष्टे विसर्गप्रसरास्पदे।

विसर्गोक्तिप्रसङ्गे च वाचने धावने तथा।।

एतेष्वेव प्रसङ्गेषु सर्वशक्तिविलोलता।"

(शि०दृ०1,9-11)

विलोलताऽत्र मिश्रीभावः पञ्चानामपि शक्तीनाम्। यथा—

"न चासौ भेदेनैव परामर्श एषामिति। भेदेन हि परामर्शे वाचिकमानसपरिस्पन्दपरम्परातोऽभिमिलापसङ्केतस्मरणप्रबन्धसद्भावे त्वरिततैव न निर्वहेत्।"

(शि०दृ०वृ०,टि०1,पृ०,12)

सर्वशास्त्रस्रोतः :— परमेश्वर एव मूलभूत स्रोतः स्थानीयः सर्वशास्त्राणम्।

यथा—

"तथापि जगदानन्दसुन्दरे बोधभैरवे।।

भावनिर्भरतामात्रसंतृप्ते शक्तिशालिनि।

पूर्णया निजशक्त्यैव न्यक्कृते शक्तिमत्पदे।।

तादृगेव विमर्शात्मा ज्ञानधारा विजृम्भते।

यस्यां भोगोपदेशेन कोऽपि ह्लादः प्रवर्तते।।"

(मा०वि०वा०,1,42-44)

सर्वशिवता :— (1) न केवलं शिव एव सर्वम्, अपि तु प्रत्येकं वस्तु यावज्जडं परमाण्वाद्यपि शिवरूपमेव। साक्षात् क्रियते च तथैव परैर्योगिभिः। स एष पराद्वैतसिद्धान्तः शैवानां यत्र शिव एव सर्वम्, सर्वमपि च शिव एवेति। यथा—

"इक्षौ प्रत्यणु माधुर्यं यथा सर्वात्मना तथा।

प्रत्येकं परमाणौ हि सर्वसृष्टिमयी स्थितिः।।"

(मा०वि०वा०,1,1064)

"प्रकाशमानता हि प्रकाशाभेदः। प्रकाशश्चानपह्नवनीयः सर्वप्रतिष्ठारूपः परमार्थः। सर्वेषां च घटादीनां प्रकाशरूपतया विशेषाभावादेकप्रकाशात्मता, तत एवैकशिवत्वम्।"

(शि०दृ०वृ०,पृ०,148)

"अस्मद्रूपसमाविष्टः स्वात्मनात्मनिवारणे।

शिवः करोतु निजया नमः शक्त्या ततात्मने।।"

(शि०दृ०1,1)

"वस्तुस्थित्या हि सर्वतत्त्वविग्रहो वक्ष्यमाणनीत्या शिवः।"

(शि०दृ०वृ०,पृ०,2)

(2) यद्यद् द्रव्यगुणक्रियादिमयमिहाभाति तत् प्रकाशैक्ये सत्येव भाति, प्रकाशभिन्नत्वे कथं किं भासेत। प्रकाशश्च संवित्। संविच्च शिवात्मिका। ततः सर्वं शिवात्मकमिष्टमनिष्टमित्यादिरूपम्। यथा—

"सर्वं च शिवमयमिति नमस्कारे वाङ्मनसादि करणमपि शिव एव।

विघ्ना अपि तदात्मान एव निवार्याः.....।

नमस्कारे चास्मदीयेच्छादिशक्तिः शैव्येव.....।

एतेन सर्वा एव क्रियाः सकारकाः सफलाश्च गमन भोजनादिका एवमेवानुगन्तव्येति दर्शितम्।"

(शि०दृ०वृ०,पृ०,3-4)

यथा—

"सर्वथा यद्यत् प्रतिभासते तच्चिद्रूपशिवात्मकमेव।"

(शि०दृ०वृ०,पृ०,130)

यथा—

"एवं सुवर्णवत् परमेश्वर एव पूर्वोक्तेच्छादिशक्तिमान् तथा तत्त्वभुवनकार्यकरणादिप्रकारवैचित्र्येण सर्वैः पदार्थैरित्थंभूतलक्षणैः स्थितोऽतः शिवात्मकमेव सर्वं न तु शक्त्यात्मकम्। व्यावहारिकशक्तिभेदाश्रयणे तु शक्त्यात्मकमुक्तम् :—

'शक्तयस्तु जगत् कृत्स्नं .....।'

इति, वस्तुतस्तु शिवात्मकमेव।"

(शि०दृ०,पृ०,106-107)

द्र०:- **'सर्वसर्वात्मकता'** इति।

सर्वशोध्यता :— शोध्यं तु मायात्मकं सर्वं शोध्यमेव। परं तस्य शोधकं शाम्भवाद्युपायजालं दीक्षादिकर्मजालं चाप्यन्ते शोध्यमेव। यः पुनः पार्यन्तिको शोधकः शिवभट्टारकस्तद्विषये यो विकल्पज्ञानविमर्शोऽसावपि पर्यन्ते शोध्य एव निर्विकल्पानुपायस्थितौ।

यथा—

"शोधनमप्यन्ततः शोधकोऽपि वा भेदांशोच्छलत्तायां पाशात्मकत्वात् शोध्य एव शोधनं च परमार्थतः सर्वमलप्लोषचतुरभैरवसंविदभेदि हुतवह इव सर्वस्यानुप्रवेशे परिपूर्णातैव।"

(प०त्री०वि०,पृ०,163)

सर्वसङ्केतमूलम् :— पश्यन्ती वाग्रुपशुद्धविद्यात्मको योऽमायीयो वर्णग्रामः स एव समस्तसङ्केत मूलम्। अत एव नैयायिका अपीश्वरेच्छामूलत्वं सङ्केतस्याहुः। यथा—

"तेनानन्तो ह्यमायीयो यो वर्णग्राम ईदृशः।
संविद्विमर्शसचिवः सदैव स हि जृम्भते।।
यत एव च मायीया वर्णाः सूतिं वितेनिरे।
ये च मायीयवर्णेषु वीर्यत्वेन निरूपिताः।।
सङ्केतनिरपेक्षास्ते प्रमेति परिगृह्यताम्।"

(तं०आ०11,71-73)

योगाभ्यासजन्यानुभूतिमूलकमेतत् प्रतिपादनम्। विस्तरतोऽप्युक्तमत्र विषयेऽनुभूत्याधार एव। यथा—

"तथा हि परवाक्येषु श्रुतेष्वाव्रियते निजा।।
प्रमा यस्य जडोऽसौ नो तत्रार्थेऽभ्येति मातृताम्।
शुकवत् स पठत्येव परं तत् क्रमितै(कै)कभाक्।।
स्वातन्त्र्यलाभतः स्ववाक्यप्रमालाभे तु बोद्धृता।
यस्य हि स्वप्रमाबोधो विपक्षोद्भेदनिग्रहात्।।
वाक्यादिवर्णपुञ्जे स्वे स प्रमाता वशीभवेत्।
यथा-यथा चाकृतकं तद्रूपमतिरिच्यते।।
तथा-तथा चमत्कारतारतम्यं विभाव्यते।"

(तं०आ०11,73-77)

रहस्यात्मकमेतद् वर्णनम्।

सर्वसंहारकारकः :— ~ मन्त्र :— स च "ह् क्ष् ह्रौं" इति, यो हठमेलापमन्त्रः

द्र०:- **'हठमेलापमन्त्रः'** इति।

अस्य सर्वसंहारकारकत्वं किं कथञ्चेति न स्पष्टीकृतं मूले वा विवेके वा। यथा—

"षष्ठप्राणत्रिकूटोर्ध्वबाहुशूलाख्यबिन्दुभिः।।
अनच्कनासाधोवक्त्रचन्द्रखण्डैश्च मण्डितम्।"

(तं०आ०30,94-95)

अत्र नादः कुण्डलीशक्तिरर्धचन्द्रश्च रहस्यविधिनाऽन्त्ये उच्चारणीयाः भवन्ति।

सर्वसत्यता :— शिव एव सकलप्रपञ्चरूपतया स्वयमवभासते, इति सर्वं शिवमयमेव सत्यं नाविद्याकल्पितं शशशृङ्गतुल्यं जगत्।

यथा—

"एवं भेदात्मकं नित्यं शिवतत्त्वमनन्तकम्।
तथा तस्य व्यवस्थानान्नानारूपेऽपि सत्यता।।"

(शि०दृ०,1,49)

यथा—

"अतो बाध्यबाधकव्यवहारोपपन्नः, नीलादिवत् किल तान् **(रजतद्विचन्द्रादीन्)** अपि व्यवहारान् स एव परमेश्वरः स्वातन्त्र्यादभासयति। तत् तेऽपि सत्या एवेति।"

(ई०प्र०वि०,खं०1,पृ०,294-295)

यथा—

"तथा हि चित् स्वतन्त्रेयं यथा भासयते तथा।
सत्यं भात्यखिलाकारगर्भा सा चेति निश्चितम्।।"

(मा०वि०वा०1,1063)

"उक्तक्रमेण भेदात्मकं न तु भावभेदपृथग्भूतम्। भेदा अपि तदात्मकाः। अत एव तदनन्तकम्। भिन्नार्थसद्भावे सत्यन्तः स्यात्,—तद्रूपानाक्रमणात्। एवं व्यवस्थानस्वभावत्वात् तस्य परमेश्वरस्य नानारूपेऽपि विश्वस्मिन् सत्यतैवेति।"

(शि०दृ०वृ०,पृ०,35)

सर्वसमता :— इदमेवोपादेयं नेदमिति न त्रिकोपासनायां नियमः। येन-केनापि स्वरूपप्रवेशः सम्भवेत् तदेवोपादेयं, सर्वत्र च समदृष्टिः समाश्रयणीया।

यथा—

"समता सर्वदेवानामोवल्लीमन्त्रवर्णयोः।।
आगमानां गतीनां च सर्वं शिवमयं यतः।"

(तं०आ०4,274-275)

"समता सर्वभावानां वृत्तीनां चैव सर्वशः।
समता सर्वदृष्टीनां द्रव्याणां चैव सर्वशः।।
भूमिकानां च सर्वासामोवल्लीनां तथैव च।
समता सर्वदेवीनां वर्णानां चैव सर्वशः।।"

(तं०आ०वि०,खं०3,पृ०,304)

सर्वसर्वात्मकता :— (1) सर्वं सर्वात्मकमिति सिद्धान्तः पराद्वैत शैवदर्शनस्य।

यथा—

"सर्वे सर्वात्मभावेन सर्वज्ञा वा व्यवस्थिताः।
सर्वे भावाः स्वमात्मानं जानन्तः सर्वतः स्थिताः।
घटो मदात्मना वेत्ति वेद्म्यहं वा घटात्मना।।
सदाशिवात्मना वेद्मि स वा वेत्ति मदात्मना।
शिवात्मना यज्ञदत्तो यज्ञदत्तात्मना शिवः
सदाशिवात्मना वेत्ति घटः स च घटात्मना।"

(शि०दृ०5,104-107)

(2) न केवलं परमेश्वर एव विश्वात्मको यावद् घटादिभावा अपि सर्वे वस्तुतः परमेश्वरात्मकतया स्वयं सर्वात्मकाः। इति वस्तुतो न कोऽपि भेदः क्वापि। तस्य त्वाभासमात्रम्। तच्चापि पारमेश्वरलीलोद्भावितं सन्मूलतस्तत्त्वतश्चैकमेव शिवात्मकं तत्त्वम्।

यथा—

"सर्वे सर्वात्मका भावाः सर्वसर्वस्वरूपतः
सर्वस्य सर्वमस्तीह नानाभावात्मरूपकैः।
मद्रूपत्वं घटस्यास्ति ममास्ति घटरूपता
नानाभावैः स्वमात्मानं जानन्नास्ते स्वयं शिवः।
चिद् व्यक्तिरूपकं नानाभेदभिन्नमनन्तकम्।।"

(शि०दृ०5,107-109)

द्र०:- **'एकात्मकता'** इति।

यथा—

"वस्तुतश्चेयमक्रमैव पारमेश्वरी शक्तिः स्फुरति, तत्रापि च स्वस्वातन्त्र्याद् दर्पणनगरवत् क्रममप्यादर्शयति, क्रमेऽपि च पूर्वं पूर्वमुत्तरत्र व्यापकतया स्थितं, मृदिव घटादौ, उत्तरामुत्तरं तु पूर्वत्र शक्त्यात्मना स्थितं, वृक्ष इव स्वबीजे इति सर्वं सर्वात्मकमेव।"

(वि०भै०उ०,पृ०,47)

द्र०:- (स्व०तं०उ०,प०4,पृ०,51) इति।

(3) पराद्वैतरूपया शैवदृष्ट्या दृश्यमानं सर्वमपि सर्वात्मकमेव। सर्वं ततः शिवात्मकं परिपूर्णमेव वस्तुतः।

द्र०:- (1) इति।

(4) सर्वं शिवमयमेव। ततो यथा शिवो घटादिरूपस्तथैव घटादिरपि शिवरूपः। यथा—

"एक एव स्वशक्तियुक्तो महाप्रकाशवपुरेव प्रमाता सर्वतोऽभिन्न एवावभासते।"

(प०सा०,पृ०,15)

(5) अध्वप्रक्रियया यस्य कस्यापि प्रमेयादेः सर्वात्मकपूर्ण-परशिवतया दर्शने सर्वस्य सर्वात्मकता स्वीकृता त्रिकशास्त्रे।

यथा—

"सर्वं सर्वत्र रूपं च तस्यापि न-न भासते।
न ह्यवच्छेदितां क्वापि स्वप्नेऽपि विषहामहे।।"

(तं०आ०12, 5)

(6) सर्वमेव वस्तुजातं वस्तुतः शिवादिधरान्ततत्त्वमयम्। एवंविधो हि सर्वसर्वात्मकता सिद्धान्तोऽद्वैतशैवदर्शनस्य।

यथा—

"सकलमिदं तत्त्वजालं .....
.....
सर्वसर्वात्मकपदप्राप्त्या वृंहितमिति .....
.....।"

(प०त्री०वि०,पृ०,230)

द्र०:- **'पराद्वैतदृष्टिः'** इति।

सर्वाकारता :— आत्मसाक्षात्कारी स्वात्मानं विश्वरूपतया प्रत्यभिजानाति सास्य सर्वाकारता।

यथा—

"अहमेव विश्वरूपः करचरणादिस्वभाव इव देहः।
सर्वस्मिन्नहमेव स्फुरामि भावेषु भास्वरूपमिव।।"

(प०सा०का०,49)

सर्वागम-प्रामाण्यम् :— सर्वेऽप्यागमाः परम्पराप्राप्ताः पर्यन्ते च शिवेनैवोद्भावितत्वेन शिवोक्ता एव, तत एव च तेषां प्रामाण्यम्।

यथा—

"अत एव सर्वागमा अनादय एव। तथा च पारमेश्वरेष्वपि शास्त्रेषु तद् वृत्तान्ताः श्रूयन्ते—

बुद्धितत्त्वे स्थिता बौद्धा अव्यक्ते पाञ्चरात्रिकाः।
इति।
यत्किंञ्चिद् वाङ्मयं लोके बौद्धमार्हतवैदिकम्।
वैमलं पाञ्चरात्रं च लाकुलं सांख्यमेव च।।
तद् ग्राह्येन्न सन्देहः .....।
इति।'
इत्येवं वादिनां तेषां वादिनां तु शतत्रयम्।
त्रिषष्टयभ्यधिकं च .....
इति
एतत् पुरुषविज्ञानं कपिलाय महात्मने।
मया प्रोक्तं .....
इत्यादि च।"

उद्ध०:- (ई०प्र०वि०वि०,खं०3,पृ०,97-98)

सर्वागमैकता :— तच्च पूर्वाङ्गपराङ्गभावेन।

यथा—

"एक एवागमस्तस्मात् तत्र लौकिकशास्त्रतः।
प्रभृत्यावैष्णवाद् बौद्धाच्छैवात् सर्वं हि निष्ठितम्।।"

(तं०आ०35,30)

सर्वागमैकमूलता :— यथा—

"एकस्मादागमाच्चैते खण्डखण्डा व्यपोद्धृताः।
लोके स्युरागमास्तैश्च जनो भ्राम्यति मोहितः।।"

(तं०आ०35,37)

तत्तदागमोक्तविषये ह्येतदेव पार्यन्तिकं सत्यं, नान्यदतूत्तरमिति बुद्ध्यते मायया भ्रामितो जनः। बुधः पुनस्तत्रतत्रोपायोपेयभावं पश्यन् पर्यन्ते पराद्वैतशैवागममेव

सर्वोत्तरं स्वीकुर्वाणः सर्वानप्यागमान् मूलतः शिवप्रेरितानेव पश्यति।

सर्वाचारः :— शैवः आगमविशेषो यस्य मतमुद्धृतं तन्त्रालोके।

यथा—

"शास्त्रेष्वदीदृशच्छ्रीमत्सर्वाचारहृदादिषु।।
वाममार्गाभिषिक्तस्तु दैशिकः परतत्त्ववित्।
तथापि भैरवे तन्त्रे पुनः संस्कारमर्हति।।"
(तं०आ०13,303-304)

द्र०:– (तं०आ०12,23; 13,305; प०त्री०वि०,पृ०,92, 235-36; शि०स्तो०वि०पृ०,30; ने०तं०उ०,खं०2,पृ०,130)

सर्वाचारहृदयम् :— किमपि कौलागमानुसारिशास्त्रम्।

यथा—

"श्री सर्वाचारहृदये तदेतदुपसंहृतम्।"
(तं०आ०29,103)

सर्वाजडता :— आदिकोटावन्तकोटौ च प्रमातृतायां विश्रान्तेः सर्वमाद्यन्तकोटयोरजडम् शिवरूपम्।

यथा—

"सर्वं तु वस्तुतो विमर्शात्मकप्रमातृस्वभावतादात्म्याहं परामर्शविश्रान्तेरजडमेव पूर्वापरकोट्योः।"
(ई०प्र०वि०,खं०,1,पृ०,199)

सर्वातीतम् :— (1) समस्तव्यवहारदशाभ्यः समुत्तीर्णा परमशिवोचिता तुर्यातीताख्या परासंवित्।

(2) योगिनस्तुर्यातीतं सर्वातीतमिति वदन्ति।

द्र०:- **'पिण्डस्थाद्याः'** इति।

(3) केषाञ्चिन्मते योगिनस्तुर्यातीतं नैव केनापि विशेषनामान्तरेण व्यवहरन्ति तुर्यातीतस्य योगविषयत्वाभावात्।

सर्वात्मकत्वम् :— ~ आत्मन :— पराद्वैतदृष्ट्या पश्यतः साधकस्य स्वात्मा शिव एव, सर्वं च जगत् स्वात्मरूपमेव।

यथा—

"यस्मात्सर्वमयो जीवः सर्वभावसमुद्भवात्।
तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः।।
तेन शब्दार्थचिन्तासु न सावस्था न या शिवः।
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः।।"
(स्पं०का०28-29)

सर्वात्मसङ्कोचः :— सर्वेषां वस्तूनां संविन्मात्ररूपतया विमर्शनेन भावनया तेषां बाह्यरूपतायाः संहरणम्। अत्र जयरथस्य व्याख्या न सर्वथा समीचीना।

यथा—

"सर्वात्मसङ्कोच इति सर्वेणात्मना बाह्यस्य सङ्कोचे नैतद् वस्तु सत् किञ्चिदिति भावनायामित्यर्थः।"
(तं०आ०वि०,खं०3,पृ०,379)

संविदेवैतद् वस्तु न बाह्यं किमपीति भावनाऽत्र न्याय्या, न पुनरभावभावना।

सर्वार्थम् :— योगिपरम्परासु सुषुप्तिसम्पृक्तायास्तुर्यदशायाः पारिभाषिकं नाम। यतः सुषुप्तावारूढानां योगिनां कृते प्रमेयप्रमाणादि सर्वं स्वात्मनि शक्त्यात्मनावतिष्ठते।

यथा—

"सर्वार्थमिति सुषुप्ते विश्वस्य शक्त्यात्मनावस्थानात्।"
(तं०आ०वि०,खं०7,पृ०,188)

द्र०:- **'अनन्तम्'** इति।

सर्वोत्कृष्टं :— ~ शास्त्रम् :— विद्यापीठाख्यस्य साधनाक्रमस्य प्रतिपादकं त्रिकशास्त्रपरपर्यायं सिद्धयोगीश्वरीमतं प्रधानं साधनापरेषु शास्त्रेषु, तत्र-त्रिकशास्त्रेऽपि मालिनीविजयोत्तरं तन्त्रं सर्वप्रधानम्।

यथा—

"विद्यापीठप्रधानं च सिद्धयोगीश्वरीमतम्
तस्यापि परमं सारं मालिनीविजयोत्तरम्।"
(तं०आ०37,24-25)

सलिलम् :— जलतत्त्वम्। शब्दस्पर्शरूपरसतन्मात्राणि मिलित्वा क्षुभितानि सन्ति सलितरूपतया परिणमन्ते। ततः सलिलमेतच्चतुष्टययुतम्।

यथा—

"तैस्त्रिभिः सरसैरापः .....।।"
(तं०आ०9,288)

सशब्दजपः :— परैः श्रोतुं शक्यो जपः।

यथा—

"परे शृण्वन्ति यं देवि सशब्दः स उदाहृतः।"
(स्व०तं०2,147)

सहस्रारचक्रम् :— स्वात्मनो विश्वरूपताया अभिव्यञ्जकं चक्रं ध्येयोपास्यतया निरूपितम्।

यथा—

"भूतभावभुवनादिरूपतयानन्तभेदं विश्वं .....
व्यतिरिक्तायमानत्वेऽपि स्वसंलग्नमेव प्रस्फुरेदित्यर्थः।"
(तं०आ०वि०,खं०3,पृ०,143)

सांख्यवादः :—प्रकृतिपरिणामवादः पौरुषभोगकैवल्यवादश्च मुख्यतः।

~ अनुपपन्न :— अनुपपत्तिहेतुश्च मुख्यतो मोक्षासम्भवता।

तद्यथा :— सांख्यानुसारं गुणाः स्वस्वभावत एव पुरुषस्यार्थं परिणामाय प्रवर्तन्ते। तत्परिणामांश्च पुरुषो बुद्धिसाहाय्येन साक्षात्कुर्वन् तदुत्थं सुखं दुःखञ्च भुङ्क्ते। ततो गुणानामेव सृष्ट्यादिकारित्वं स्वाभाविकमिति। अत्र शैवा एवमाक्षेपं कुर्वन्ति—गुणानां जडत्वेनाविवेकित्वे सति नैतन्निश्चेतुं सामर्थ्यं यदेष पुरुषः समाप्तभोगः कैवल्ययोग्यः अपरे पुनरसमाप्तभोगाः संसृति योग्या इति। एवंविधविवेकाभावे प्रधानं विवेकज्ञानसमृद्धं पुरुषं प्रति

बुद्ध्यादिरूपपरिणामसन्ततेर्नैव विरमेत्, ततो विवेकिनोऽपि पुरुषाः लिङ्गशरीरसंश्लिष्टा एव सन्तो नैव कदापि मुच्येरन्।

यथा—

"इति चेत् तत् समाप्तेऽपि पुरुषार्थेऽपि तं प्रति।।
स्वकार्यपरिणामान्न विरमेन्मूलकारणम्।"

(ई०सि०,44-45)

"तथापि देहभूतादेः परिणामः स्वभावतः।।
पूर्ववन्न भवेत् कस्मात्तं—मुक्ताभिमतं प्रति"

(ई०सि०,46-47)

~ अपूर्णः :— **सांख्यानां दृष्टिः पुरुषतत्त्वं यावदेव प्रसरति, न तदूर्ध्वं कञ्चुकादितत्त्वानि विद्यादीनि शुद्धतत्त्वानि वा यावत्। यथा—**

"परमेश्वरेण हि सांख्यानां तावदेवोपदिष्टमपूर्णम्। इदं (शैवं) तु पूर्णं ज्ञानमिति भावः।"

(ई०प्र०वि०वि०,खं०3,पृ०,316)

~ तत्प्रामाण्यबीजम् :— **सांख्यशास्त्रस्योपदेष्टृपरम्परायां पूर्वगुरुः कपिलः, तस्यापि दिव्यगुरुपरम्परायाः पार्यन्तिकः प्रवाहयिता भगवान् महेश्वर एव मन्तव्यः।**

यथा—

"एवं चतुर्विंशतितत्त्वभावनाभावितः कपिलो मन्तव्यः।"

(ई०प्र०वि०वि०,खं०3,पृ०,97)

तस्याप्यन्तःप्रेरणाकरः पर्यन्ते शिव एवेति प्रकरणात्तात्पर्यं मन्तव्यम्।

द्र०:- 'प्रसिद्धि, :— ~ 'तत्प्रामाण्यम्' इति।

सांख्यादौ मुक्तिदशा :— मोक्षदशा हि केवलस्य भावं कैवल्यं सांख्यानां पातञ्जलानां च, अप्रवृत्तिदशाख्योऽपवर्गो नैयायिकवैशेषिकाणाम्, आलयविज्ञानपरम्परोच्छेदरूपं निर्वाणं बौद्धानां, शून्यकल्पे शान्ते ब्रह्मणि लयो वेदान्तिनाम, इत्येवं तेषु-तेषु दर्शनेषु प्रतिपादिताः।

~ संसृति पर्यवसाना :— **सांख्यवेदन्यायबौद्धादिशास्त्रोपासकास्तत्तन्मोक्षदशायां सुषुप्ताः इव स्थिताः। श्रीकण्ठनाथस्याभिनवे दिवसेऽभिनवायां सृष्टौ सुषुप्तेरुत्थिताः सन्तः पुनः संसृति चक्रेष्वावर्तन्ते प्रायशः। केषाञ्चिदेव पूर्वसमभ्यस्तयोगानां तेषामुपरि श्रीकण्ठनाथोऽनुग्रहं करोति येन ते मुक्तिपथगामिनः सम्भवन्ति। अन्ये च पुनरावर्तन्ते।**

यथा—

"सांख्य वेदादिसंसिद्धाच्छ्रीकण्ठस्तदहर्मुखे।
सृजत्येव पुनस्तेन न सम्यङ् मुक्तिरीदृशी।।"

(तं०आ०6,152)

सांख्याद्युपादेयता :— अधिकारभेदेन सफलत्वमुपादेयत्वं चैतेषां दर्शनानाम्। यथा—

"सांख्यं योगं पाञ्चरात्रं वेदांश्चैव न निन्दयेत्।
यतः शिवोद्भवाः सर्वं इति स्वच्छन्दशासने।।"

(तं०आ०35,36)

सांसिद्धिकः :— ~ उपासकः :— **स्वप्रतिभोद्द्योतितस्वात्मशिवभावः उपासकः, आचार्योपदेशमात्रतो वोद्बोधितप्रतिभः। यथा—**

"यः सर्वथा परापेक्षामुज्झित्वा तु स्थितो निजात्।
प्रत्ययाद् योऽपि चाचार्यप्रत्ययादेव केवलात्।।"

(तं०आ०26,9)

~ आहृतादुत्कृष्टः :— **येषां ज्ञानं सांसिद्धिकं ते एवोत्कृष्टा ज्ञानिनः। येषां ज्ञानमुपायजाताभ्यासफलं तत एवाहृतं न तेषां तथाविधं माहात्म्यम्। यथा—**

"तथा सांसिद्धिकज्ञानादाहृतज्ञानिनोऽधमाः।"

(तं०आ०4,75)

~ शेषवृत्तिरहितः :— **केवलं शिवमयताचमत्काराभ्यासगुरुपूजनादि च तेन कर्तव्यं, नान्यत् किमपि शेषवृत्तिरूपं कर्म।**

यथा—

"तौ सांसिद्धिकनिर्बीजौ को वदेच्छेषवृत्तये।
क्रमात्तन्मयतोपायगुर्वर्चनरतौ तु तौ।।"

(तं०आ०26,10)

लोकसंग्रहाय परम्परानुसारं नित्यनैमित्तिककर्मानुष्ठानतो असौ प्रारब्धान्तं कालं यापयति। यथा—

"तत्रैषां शेषवृत्त्यर्थं नित्यनैमित्तिके ध्रुवे।
काम्यवर्जं .....।।"

(तदेव 26,11)

सांसिद्धिको :— ~ गुरुः :— **द्र०:- 'अकल्पितो गुरुः'** इति।

~ साधकः :— **स्वयमेवोदितशुद्धविद्यात्मकसत्तर्को योगी।**

यथा—

"स तावत्कस्यचित्तर्कः स्वत एव प्रवर्तते।।
स च सांसिद्धिकः शास्त्रे प्रोक्तः स्वप्रत्ययात्मकः।"

(तं०आ०4,40-41)

साक्षात्कारः :— इन्द्रियगोलके विषयप्रतिबिम्बप्रकाशो निर्विकल्पको निरभिलापः। स एष विषयसाक्षात्कारः। एवमेवात्मसाक्षात्कारोऽपि निर्विकल्प एव स्वसंवेदनात्मकः। तत्र स्वात्मा स्वात्मानं स्वेनैव प्रकाशेन स्वयं विमृशति।

~ विमर्शमयः :— **अङ्गुलिनिर्देशकल्पे विशेषशब्दप्रयोगरहिते निर्विकल्पेऽपि ज्ञाने वर्तत एव सूक्ष्मतरो विमर्शः। यथा—**

"साक्षात्कारक्षणेऽप्यस्ति विमर्शः कथमन्यथा।
धावनाद्युपपद्येत प्रतिसन्धानवर्जितम्।।"

(ई०प्र०,1-5-19)

~ शाम्भवः :— **शाम्भवोपायतः स्वात्मनः सृष्टिस्थितिसंहारकारित्वे प्रकाशमानेऽपि निरंश एव स्वात्मसंवित्प्रकाशोऽहमिति।**

यथा—

"जगत्सर्वं मत्तः प्रभवति विभेदेन बहुधा
तथाप्येतद्रूढं मयि विगलिते त्वत्र न परः।
तदित्थं यः सृष्टिस्थितिविलयमेकीकृतिवशा-
दनंशं पश्येत् स स्फुरति हि तुरीयं पदमितः।।"
(तं०आ०3,287)

नैष विमर्शो बुद्धिद्वारा समुदेति, अपि तु निर्विकल्पः स्वात्मनः साक्षात्कार इति। एतेनैतत् स्पष्टतां याति यद् "मदभिन्नमिदम्" इति परामर्शेन स्वात्मनः सर्वसंहारकत्वं परामृष्टमिति।

~ त्रिसन्धिकः :— **शाम्भवसमावेशतः स्वात्मनो जगत् स्रष्टृत्वं "मत्तः" इति, जगद्धारकत्वं "मयि" इति, जगत्संहर्तृत्वं च "मदभिन्नम्" इति निर्विकल्पं प्रकाशते साधकस्य। यथा—**

"मत्त एवोदितमिदं मय्येव प्रतिबिम्बितम्।
मदभिन्नमिदं चेति त्रिधोपायः स शाम्भवः।।
सृष्टे स्थितेः संहृतेश्च तदेतत्सूत्रणं कृतम्।
यत्र स्थितं यतश्चेति तदाह स्पन्दशासने।।"
(तं०आ०3,280-281)

स्पन्दशासने इति स्पन्दकारिकायाम्। यथा—

"यत्र स्थितमिदं विश्वं कार्यं यस्माच्च निर्गतम्।
तस्यानावृतरूपत्वान्न निरोधोऽस्ति कुत्रचित्।।"
(स्प०का०,2)

साक्षादुपायः :— शाम्भव उपायः साक्षात्स्वात्मप्रत्यभिज्ञाजनकत्वेन साक्षादुपाय इति कथ्यते। अन्ये ये उपायास्ते शाम्भवोपायद्वारेणैवात्मप्रत्यभिज्ञापकाः इति न ते साक्षादुपायाः। किञ्च, शाम्भवे मनोबुद्ध्यादिकृतविकल्पव्यापारव्यवधानं विनैव स्वात्मस्वरूपं साक्षात्क्रियते इत्यसौ साक्षादुपायः।

यथा—

"साक्षादुपायेन इति शाम्भवेन। तदेव हि अव्यवहितं परज्ञानावाप्तौ निमित्तम्। स एव परां काष्ठां प्राप्तश्चानुपाय इति।"
(तं०आ०वि०,खं०1,पृ०,182)

ततोऽनुपायद्वारा शाम्भवः प्रत्यभिज्ञाकरः इति तस्य परम्परोपायता न शङ्कनीया, अनुपायस्य शाम्भववरिपक्ववतामात्रत्वेन शाम्भवात्मकत्वादिति।

साचाराः :— ~ गुरवः :— **क्रियाप्रपञ्चविधानज्ञाः।**

यथा—

"साचारैः — क्रियाप्रधानैः।"
(तं०आ०वि०,खं०10,पृ०,209)

साञ्जनं :— ~ तत्त्वम् :— **शिवताभिव्यञ्जकं शक्तितत्त्वं शिवस्याञ्जनकरत्वेन साञ्जनम्।**

यथा—

"तस्य पुनः क्रियाशक्त्यात्मनः चान्द्रस्य धाम्नो यत्तत्त्वं, परमप्रकाशात्मशक्तिमल्लक्षणं विश्रान्तिस्थानं तत् साञ्जनम्।"
(तं०आ०वि०,खं०2,पृ०,171)

सात्त्विकः :— (1) — ~ पुरुषः :— **सत्त्वगुणप्रधानाबुद्धिर्यस्य सः पुरुषः। सत्त्वगुणमयाः विशेषास्तस्मिन् विकासमुपयान्ति।**

यथा—

"प्रकाशभावः सत्त्वं च धर्मः सत्त्वसमाश्रितः।
संविभागी च सततं नित्यं सत्त्वोपकारकः।।
क्षमादयासमायुक्तो ज्ञानविज्ञानपारगः।
प्रीतिर्दानं धृतिर्मेधा तपः शौचं दमस्तथा।।
ऋतवाक् समदृष्टिश्च दिव्यबुद्धिप्रबोधनम्।
यस्मिन्नेते सदा धर्मा भवन्ति पुरुषोत्तमे।।
स सात्त्विकस्तु विज्ञेयः .....।"
(स्व०तं०12,65-68)

सात्त्विकः— (2) ~ अहङ्कारः :— **सत्त्वगुणप्रधानोऽहङ्कारः। बुद्धीन्द्रियाणां मनसाश्च प्रकृतिभूतः।**

द्र०:- **'प्रकृतिस्कन्धरूपः'**। इति।

~ प्रकृतिस्कन्धरूपः :— **सात्त्विकादहङ्कारान्मनसा सह बुद्धीन्द्रियाणि (श्रोत्रम्, त्वक्, चक्षुषी, रसना, घ्राणञ्च) प्रजायन्ते। इति तेषां प्रकृतिभूतोऽहङ्कार एव। यात्वेतत्परिणामशीलताऽहङ्कारस्य सास्य प्रकृतिस्कन्धः। यथा—**

"बुद्धीन्द्रियाण्यहङ्कारात् सात्त्विकान्मनसा सह।"
(पू०प्र०2,559)

सादाख्यः :— सदाशिवतत्त्वाधिष्ठाता भगवान् सदाशिवभट्टारकः भवो देवः।

यथा—

"सादाख्यस्तु समाख्यातः सकलो मन्त्रविग्रहः।
सर्वकारणमध्यक्षः सृष्टिसंहारकारकः।।
भुक्तिमुक्तिप्रदाता च साधकानां क्रियावताम्।"
(स्व०तं०10,1200-1201)

"भवनामतः प्रभृति सदिति व्यपदेशप्रवृत्तेः सदाख्ये सदाशिवतत्त्वे भवो देवः सादाख्यः।"
(स्व०तं०उ०,प०,10,पृ०,513)

सादाख्यम् :— ~ तत्त्वम् :— **सदाशिवतत्त्वस्यैवेदं नामान्तरम्। तत्तत्त्वोपरि शिवतैव शुद्धा। सा सदिति। वाऽसदिति वा वक्तुमशक्या, उभयस्यास्यापेक्षिकत्वात्, शिवतत्त्वस्य चापेक्षोत्तीर्णत्वात्। ततः सदिति कथनमेवासतोऽपेक्षां द्योतयति, परिपूर्णतायाश्च मनाक् च्यावयति। ततः सदिति वचनप्रयोगस्तत्रैव समीचीनो यत्र सङ्कोचस्य कश्चनांशो भासेत। सा च सादाशिवी स्थितिः, यत्र परिपूर्णेऽप्यहंरूपे शुद्धे प्रमातरि कथञ्चिदिदमंशस्यात्यन्तमस्फुटाभासोऽहमिदमिति। यतोऽस्मादेव पदात् सदित्याख्यायाः प्रयोगस्तस्मादिदं तत्त्वं सादाख्यमित्युच्यते।**

यथा—

"सादाख्यं-सदाख्यायां भवम्; यतः प्रभृति सदिति प्रख्या, सदाख्यायाश्च सदाशिवशब्दरूपाया इदं वाच्यं तत्त्वम्। सृष्टि-

क्रमोपदेशादौ प्रथममुचितं तत् सादाख्यं तत्त्वम्।"

(ई०प्र०वि०,खं०2,पृ०,191)

किञ्च ज्ञानशक्तेरेव प्राधान्येन यत्र तत्त्वे आभासस्तत् तत्त्वं सदाशिव तत्त्वं सादाख्यम्।

यथा—

"ततश्चान्तरी ज्ञानरूपा या दशा तस्या उद्रेकाभासने सादाख्यम्।"

(तदेव,पृ०,191)

"सादाख्यं सदाख्यायां भवं सृष्टिक्रमोपदेशादौ प्रथमदर्शनीयं तत्त्वं, यतः प्रभृति सदितिसदिति प्रख्या ततः सदाशिवशब्दवाच्यं च।"

(ई०प्र०वि०वि०,खं०3,पृ०,264)

"स्वेच्छया सूचितं विश्वमाच्छाद्याहन्तया स्थितम्।।
स एव तत्त्वं सादाख्यं सर्वानुग्रहणोद्यतम्।"

(अ०प्र०पं०,19-20)

स इति शैवः स्पन्दः प्राकरणिकः।

सादाशिवं :— ~ (चक्रम्) :— अष्टाष्टकमयाः चतुष्षष्टिर्भैरवागमा एव सादाशिवं चक्रम्। यतः सदाशिवस्यानुग्रहमूर्त्तित्वेन भैरवागमप्रवर्तकत्वं स्वीक्रियते। यथा—

"एतत् सादाशिवं चक्रमष्टाष्टकविभेदतः।"

उद्ध०:- (तं०आ०वि०,खं०1,पृ०,43)

द्र०:- **'आगमाः'** — ~ भैरवात्मकाः इति।

साधकः :— (1) ईदृशः शैवशास्त्रोपासको यः सद्योमुक्तिपात्रं नास्ति, यस्य चान्तर्भोगवासना विद्यत एव। असौ भोगान् भुक्त्वैव चिरान्मुक्तिमार्गेऽग्रेसरो भवति।

"भोगव्यवधिना कोऽपि साधकश्चिरशीघ्रतः।"

(तं०आ०13,298)

तेष्वपि कश्चिच्छीघ्रमेव भोगभुक्तिं लब्ध्वा सत्वरमेव मोक्षमार्गगामी भवति, कश्चित् पुनः सुचिरादिति विवेकस्तेषु। यथा—

"लोकधर्मी फलाकांक्षी।"

(तं०आ०15,24)

"तत्र बुभुक्षुः साधकः"

(तं०आ०वि०,खं०9,पृ०,16)

(2) निर्वाणकलशेनाभिषिक्तः समयी साधकोभवति यः शरीरत्यागानन्तरं सदाशिवदशाभोगमुपयुज्यान्ते शिवत्वं याति परिपूर्णम्।

यथा—

"निर्वाणकलशेनादौ तत ईश्वरसंज्ञिना।।
अभिषिक्तः साधकः स्याद् भोगान्तेऽस्य परे लयः।"

(तं०आ०15,465-466)

"साधकस्य हि शिवे योजनिकायां कृतायामपि सदाशिवपदे **(एव)** भोगार्थमवस्थानम्, अत एवाह भोगान्तेऽस्य परे लयः इति।"

(तं०आ०वि०,खं०9,पृ०,235)

~ अनुशासनबद्धः :— **आचार्यस्तु स्वतन्त्रः शक्तिपातकरणे, ततो नासावनुशासनबद्धः कथञ्चित्। समयी पुत्रकश्चोभौ शास्त्रविद्वेषरहितस्य जन्तोः समीपे शैवान् मन्त्रानुच्चारयितुं समर्थाः, न तत्र कर्मणि कोऽपि निषेधः। परं साधकोऽदीक्षितस्याग्रे कथमपि रहस्यमन्त्रोच्चारणं न कुर्यादित्यस्ति नियमः। तदुच्चारितमन्त्रश्रवणसम्प्राप्त-शक्तिदुरुपयोगशङ्कायाः सम्भवत्वात्।**

यथा—

"साधकस्तु सदा साध्ये फले नियतियन्त्रणात्।।
मक्षिकाश्रुतमन्त्रोऽपि प्रायश्चित्तौचितीं चरेत्।"

(तं०आ०19,50-51)

~ अबुभुक्षुः :— **अबुभुक्षुर्मुमुक्षुरेव शिष्यः साधकः सन् पुत्रकदीक्षापात्रतां नीयते गुरुणा। यथा—**

"..... मुमुक्षुर्निर्बीजः।"

(तं०आ०15,24)

मुमुक्षुः पुत्रकः।

(तं०आ०वि०,खं०9,पृ०,16)

~ अवस्थाभेदभिन्नः :— **असौ पञ्चप्रकारः। तद्यथा—**

(1) शक्तिप्रधानाच्चक्रादध एव स्वाधिष्ठानमणिपूरादौ वर्तमानः साधकोऽबुधः।

(2) हृच्चक्रं प्राप्तः सन् बुध्यमान इत्युच्यते।

(3) हृच्चक्रादूर्ध्वं प्राप्तोऽसौ बुधः इति कथ्यते। तत्रासौ कौण्डलीं शक्तिमाश्रितो भवति।

(4) तदूर्ध्वं व्यापिनीं शक्तिमासाद्यासौ प्रबुद्ध इत्युच्यते।

(5) तत ऊर्ध्वं प्राप्तः सन् सुप्रबुद्ध इति संज्ञां लभते।

यथा—

"शक्त्या चाधो यदा गच्छेद् बुधस्तु तदा भवेत्।
हृद्गतः पुनरुत्तिष्ठेद् बुध्यमानः स उच्यते।।
शक्तिं प्राप्य बुधो ज्ञेयः व्यापिन्यंशे प्रबुद्धता।"

(स्व०तं०4,238-239)

~ द्विविधः :— **स च शिवधर्मी लोक धर्मीचेति। तत्र-शिवधर्मी आगमिकविधानानुसारी, लोकधर्मी च वेदस्मृत्यनुसारी।**

यथा—

"साधको द्विविधस्तत्र शिवधर्म्येकतः स्थितः।
शिवमन्त्रविशुद्धाध्वा साध्यमन्त्रनियोजितः।।
ज्ञानवांश्चाभिषिक्तश्च मन्त्राराधनतत्परः।
त्रिविधायास्तु सिद्धेर्वै सोऽत्रार्हः शिवसाधकः।।
द्वितीयो लोकमार्गस्थ इष्टापूर्तविधौ रतः।।
कर्मकृत्फलमाकाङ्क्षन् शुभैकस्थोऽशुभोज्झितः।।"

(स्व०तं०4,83-85)

~ निर्बीजः :— **असौ शिष्यो यः स्वयं योगादि - साधनाभ्यासं कर्तुमसमर्थः परं यथाकथञ्चिद् गुरोः करुणापात्रतां यातः सन् गुरुणा स्वबलेनैव मन्त्रादिप्रयोगबहुलया**

क्रियात्मिकया निर्बीजया दीक्षया सर्वेभ्योऽपि पाशेभ्यो मोच्यते, यस्य मलकर्मणी फलदानसामर्थ्यशून्यतां प्राप्नुतो दीक्षाकर्मप्रभावतः इति।

यथा—

"कृतनिर्बीजदीक्षस्तु देवाग्निगुरुभक्तिभाक्।।
इयतैव शिवं यायात् सद्यो भोगान् विभुज्य वा।"
(तं०आ०17,96-97)

"साधको द्विविधः शैवधर्मा लोकोज्झितस्थितिः।
लोकधर्मी फलाकाङ्क्षी शुभस्थश्चाशुभोज्झितः
द्विधा मुमुक्षुर्निर्बीजः समयादिविवर्जितः।।
बालबालिशवृद्धस्त्रीभोगभुग्व्याधितादिकः।"
(तं०आ०15,23-25)

~ सबीजः :— **यस्य मुमुक्षोर्भोगवासनांशाः शेषतया वर्तन्ते हृदि, अत एव च सञ्चितकर्मणां बीजभावता नैव नष्टा। एवं विधं शिष्यं गुरुः विविधक्रियाडम्बरबहुलया दीक्षया दीक्षयति। शिष्यश्चासौ समयान् पालनयन्नभ्यासं च कुर्वन् भुक्तिमुक्ती लभते क्रमेण।**

द्र०:- **'दीक्षा'** ~ सबीजा इति।

साधना :— भोगमोक्षोपायक्रमाः।

~ उत्कर्षतारतम्यतः :— **वैष्णवबौद्धार्हदादीनां दर्शनानां साधनक्रमाः नैव पारमार्थिकमुक्तिप्रदाः। पारमार्थिकीं मुक्तिं कौलत्रिकाद्या एव साधनक्रमाः दातुमलम्। तेष्वपि कश्चित् मार्गस्त्वरितं, कश्चिच्चिरेण, कश्चित् कष्टोपायैः कश्चिच्च सुखोपायत इत्यादिरस्ति परस्परं विशेषः।**

यथा—

"परमेशानशास्त्रे तु ये सम्यग् दीक्षिता नराः।
तेषां नैवापवर्गस्य लाभे भेदोऽस्ति कश्चन।।
न चैतदतिरिक्तोऽपि मोक्षोपायोऽस्ति कश्चन।
केवलं क्वाप्यनायासा जीवन्मुक्तिक्रमेण च।।
शीघ्रमेव परासिद्धिर्यथास्मद्दर्शनेष्विति।
क्वापि तत्त्वावलीयोगपरिपाटीक्रमाच्चिरात्।।
तैस्तैः क्रियाकलापैश्च लभ्यते परमं फलम्।"
(मा०वि०वा०1,193-196)

~ उत्तरोत्तरवैशिष्ट्यतः :— **सिद्धान्तशैवादुत्कृष्टौ वामदक्षिणौ, ताभ्यां मताचार, यामालाचारौ, ताभ्यामपि त्रिकाचार उत्कृष्टः। साधनायामासनपरिकल्पनातः एतत् स्पष्टं भवति।**

यथा—

"विद्याकलान्तं सिद्धान्ते वामदक्षिणशास्त्रयोः।
सदाशिवान्तं समनापर्यन्तं मतयामले।।
उन्मनान्तमिहाख्यातमित्येतत् परमासनम्।।"
इह इति त्रिके।
(तं०आ०15,319-320)

~ तच्छास्त्रतारतम्यम् :— **तत्रोत्तरोत्तरमुत्कृष्टतराणि शास्त्राणि यथा—**

(1) सिद्धान्तशैवाचारः, (2) वामाचारः, (3) दक्षिणाचारः, (4) मताचारः, (5) कुलाचारः, (6) कौलाचारः, (7) त्रिकाचारः इति।

यथा—

"क्रमिकः शक्तिपातश्च सिद्धान्ते वामके ततः।।
दक्षे मते कुले कौले षडर्धे हृदये ततः।"
(तं०आ०13,300-301)

"वेदाच्छैवं ततो वामं ततो दक्षं ततो मतम्।
ततः कुलं ततः कौलं त्रिकं सर्वोत्तमं परम्।।"
उद्ध०:- (तं०आ०वि०,खं०8,पृ०,181)

दृष्टयन्तरेण कौलादुप्युत्तरं स्थानं मतशास्त्रस्य।

यथा—

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम्।।"
उद्ध०:- (तं०आ०वि०,खं०1,पृ०,49)
(प०त्री०,पृ०,92)

साधारणी :— ~ सृष्टिः :— केवलेश्वरकृतैव विश्वभावसृष्टिः।

यथा—

"साधारणोऽन्यथा चैशः सर्गः स्पष्टावभासवान्। इत्यादिना-साधारणी सृष्टिर्वक्ष्यते केवलेश्वरकर्तृका यत्र तावत्याभासांशे प्रमातृणां भेदविगलनेनैकात्मतापत्तिः।"
(ई०प्र०वि०वि०,खं०2,पृ०,108)

असाधारणी च जीवसङ्कल्पमनोराज्यादिकृता। असावपीश्वरकृतसृष्ट्युपजीवनं विदधत्येवाभासते, नासौ सर्वथा स्वतन्त्रा।

द्र०:- **'सृष्टिः'** ~ 'साधारणी' इति।

साधिकाराः :— ~ पुत्राः (कौले)— मच्छन्दनाथस्य ते शिष्याः ये पुत्रक्रमेण शिष्यपरम्परया वा ज्ञानसन्तान-प्रवर्तकाः अमरादयः षट्।

यथा—

"अधिकारो हि वीर्यस्य प्रसरः कुलवर्त्मनि।"
(तं०आ०29,42)

"अधिकारो हि नाम वीर्यस्य मन्त्रमुद्रासम्बन्धिनः स्फारस्य चरमधातोश्च कुलवर्त्मनि शैष्ये मध्यनाड्यादौ देहमार्गे शाक्ते च आद्याधारे प्रसरसङ्क्रमणम्।"
(तं०आ०वि०,खं०11/2,पृ०,31)

साध्यः :— ~ मन्त्रः :— यः सिद्धयेद् वा न वा सिद्धयेदिति संशयारूढ एव।

द्र०:- **'मन्त्रपरीक्षा'** इति।

साभासः :— ~ शिवः :— शिवादिशुद्धतत्त्वाभासे भगवान् अनाश्रितः, श्रीकण्ठनाथः, उमापतिनाथ, इत्यादिरूपतयावस्थितः शिवः साभासः इति। यथा—

"यावन्न पूर्णतां प्राप्तस्तावत्साभास उच्यते।।

यदा तु सर्वभावेन शक्त्यात्मा संप्रसारितः।
ततः प्रसररूपिण्या गृहीतस्तु परस्तदा।।
शिवो भवति देवेशि ह्यविभागेन सर्वशः।"
(ने०तं०22,56-58)

"विप्रसार्य तमात्मानं सर्वज्ञादिगुणैर्गुणी।।
साभासः कथ्यते देवि शिवः परमकारणम्।
सर्वज्ञः परितृप्तश्च यस्य बोधो ह्यनादिमान्।।
स्वतन्त्रो ह्यप्रलुप्तश्च यश्च वानन्तशक्तिकः।
शक्तिमान् गुणभेदेन स्वगुणान् विन्दते गुणी।।
पृथग् भेदविभेदेन नानात्वं विमृशेदिह।
स साभास इति प्रोक्तो .....।।"
(ने०तं०8,35-38)

सामनसं :— ~ पदम् :— अत्यन्तसाम्यात्मकं पदं यत्रानाश्रितादिधरान्तं तत्त्वजातं समभावतया संविदेकरूपतया तिष्ठति।

यथा—

"सोऽपि याति लयं साम्यसंज्ञे सामनसे पदे।।
स कालः साम्यसंज्ञः स्यान्नित्योऽकल्यः कलात्मकः।
यत्तत् सामनसं रूपं तत् साम्यं ब्रह्मविश्वगम्।।"
(तं०आ०6,165-166)

सामयी :— ~ दीक्षा :— बाह्यक्रियया मन्त्रमण्डलाद्युपासनसाहाय्येन शिष्ये शिवभावापादनप्रवणदीक्षा सामयी।

यथा—

"दीक्षा च सामयी नाम मन्त्रतादात्म्यदायिनी।
चर्याक्रमेण देहान्ते सम्यक् समयपालनात्।
सा च सर्वाध्वसम्पूर्णमान्त्रसंविदभेदिता।।"
(तं०व०धा०3,21-22)

सामरस्यम् :— मयूराण्डरसन्यायेन सर्वस्याप्येकशिवरूपता। तामेव शैवदर्शने लोलीभाव इति वदन्ति। स च लोलीभावः परस्पन्दाभिव्यक्ति काले साक्षात्क्रियते साधकोत्तमैः। तत्र चिदाद्याः पञ्चापि शक्तय एकरूपतया परिस्पन्दमानाः साक्षात्क्रियन्ते।

यथा—

"सा च दृश्या हृदुद्देशे कार्यस्मरणकालतः।
प्रहर्षावेदसमये दरसंदर्शनक्षणे।।
अनालोचनतो दृष्टे विसर्गप्रसरास्पदे।
विसर्गोक्तिप्रसङ्गे च वाचने धावने तथा।।
एतेष्वेव प्रसङ्गेषु सर्वशक्तिविलोलता।"
(शि०दृ०1,9-11)

"समो रसो यस्मिन् स समरसो लोलीभावः।"
(स्व०तं०उ०,खं०2,पृ०,191)

~ तत्तारतम्यम् :— यथा—

"आत्मन्येकः समरसो मन्त्रे ज्ञेयो द्वितीयकः।
तृतीयं नाडिगं कुर्याच्छक्तौ कुर्याच्चतुर्थकम्।।
व्यापिन्यां पञ्चमं प्रोक्तं समनायां तु षष्ठकम्।
तात्त्वः समरसो देवि सप्तमस्तु विधीयते।।"
(स्व०तं०पं०4,पृ०,297-298)

~ तदभ्यासविधिः :— रहस्यात्मकस्तस्य विधिः प्रोक्तस्तन्त्रे न च सम्यक् स्पष्टीकृतः केनापि।

यथा—

"शिष्यात्मानं तु संगृह्य पूर्वोक्तविधिना क्रमात्।
पश्चादात्मनि संयोज्य लोलीभूतं विचिन्तयेत्।।"
(स्व०तं०प०4,299)

तद्विस्तरोऽग्रे वर्णितः सुवस्तिरतः इति तत एव द्रष्टव्यः।
(तदेव,प०4,300-315)

सामर्थ्यम् :— (1) परिपूर्णस्य परमेश्वरस्य परिपूर्णतामयी या पराशक्तिः सैव सामर्थ्यमित्युच्यते यतस्तद्विनासौ समर्थ एव नाभविष्यत् सृष्ट्यादिकरणे।

द्र०:- **'ऊर्मिः'** इति।

(2) पारमेश्वरी पराशक्तिः।

द्र०:- **'काली'** इति।

आगमिकी खल्वेषाऽस्याः संज्ञा।

सामानाधिकरण्यम् :— (1) समाने चिद्रूपे प्रतिबिम्बितं भिन्नस्याप्यभेदेनैव यद् भासनं तत् सामानाधिकरण्यम्।

यथा—

"अहमिदमिति–तदेतत् समाने चिदात्मन्यधिकरणे उभयं प्रतिबिम्बितमभेदेनैवावभासनं सामानाधिकरण्यमुक्तम्"।
(प०त्री०वि०,पृ०,130)

(2) न खलु समानेऽधिकरणे स्थितत्वमिह शास्त्रे सामानाधिकरण्यमपि तु द्वयोर्मध्ये एकस्य सारभूतत्वमपराश्रयभूतत्वं च, तथाऽपरस्य स्वयं निःसारत्वं पराश्रितत्वं चेति।

यथा—

"सामानाधिकरण्यं तु वैयधिकरण्यनिष्ठितपृथक्त्वप्रकाशाभावमात्र उपचरितम्। न त्वहन्तेदन्तयोस्तृतीयमधिकरणं किञ्चित् समानमस्ति। न च यथा नीलमेवानीलम्, अनीलमेव नीलमिति एकप्राणीकरणेऽपि तद्विभक्तोभयरूप, प्रकाशः; तद्वद् योऽहं, तन्नीलं, यन्नीलं, तदहमिति प्रकाशे, अपि तु नीलमेतत् स्वयं निःसारमहं प्रकाश, प्राणितमेवेति।"
(ई०प्र०वि०वि०,खं०1,पृ०,91)

सामान्यम् :— यथा—

"समानानां यदेकं भाति तत् सामान्यम्।"
(ई०प्र०वि०,खं०2,पृ०,42-43)

सामान्यस्पन्द :— (1) विश्वसृष्टेः प्राक् परिपूर्णस्वात्मपरमेश्वरताविमर्शोऽनवच्छिन्नाहं विमर्शमयः स्फुरत्तात्मकः परमेश्वरस्य परः स्वभावः।

"विश्वात्मतास्वीकारस्यादौ——निर्मित्सावसरे, पर्यन्ते-सञ्जिहीर्षा- समये च भवनशीलः, अत एव स्वात्मविकाससङ्कोचमयत-

योच्छलत्तारूपः, अत एव विशेषरूपताया अनुल्लासात् प्रशमाच्च सामान्यशब्दवाच्यः स्पन्दशास्त्रादौ 'स्पन्दः' कथ्यते।"

(तं०आ०वि०,खं०3,पृ०,213)

(2) हृदये स्वानुभवेन साक्षात्करणीयश्चिच्चमत्कारमयः शुद्धपरिपूर्णैश्वर्यात्मकोऽपरिमितोऽहं परामर्शो यत्र सर्वं यतः सर्वं यस्मिंश्च सर्वं प्रकाशते। स एष योगिजनसाक्षात्कार्यः सामान्यस्पन्दः।

यथा—

"हृदये बोधमयो यः स्वविमर्शः पूर्णचिच्चमत्कारः।
युगपद् द्रागिति हठतो लीनीकृतविश्वत. स्फुरणः।।।
भावग्रहाद्यचरमदशाद्वयोल्लासिनिर्वृतिसुपूर्णः।
जगदानन्दमयोऽसौ सामान्यस्पन्द इत्युक्तः।"

(मा०वि०वा०,2,19-20)

द्र०:- 'स्पन्दः' ~ 'सामान्यः' इति।

(3) सृष्टेषु पदार्थेषु यत् स्पन्दरूपत्वं तेन-तेन परिमाणेनाभासते तस्य सर्वस्य मूलभूतं परमेश्वरस्यानन्दचमत्कारात्मकमुच्छलत्तासम्पादकं सृष्टयादिकृत्यानामुत्सभूतं चितः शुद्धमपरिमितं च स्फुरद्रूपत्वं यत्तदेव हि मूलतः सामान्यस्पन्दपदेनोच्यते शास्त्रे।

यथा—

"गुणादिस्पन्दनिःष्यन्दाः सामान्यस्पन्दसंश्रयात्।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः।।"

(स्पं०का०,19)

"गुणादिस्पन्दनिःष्यन्देषु यत् सामान्यस्पन्दरूपमक्रमप्रकटितनिमेषोन्मेषसृष्टिस्थितिप्रकारमीषदुच्छूनतया किञ्चिच्चलनात्मकम्।"

(भा०वि०,पृ०,21-22)

यथा—

"पञ्चपञ्चात्मकं विश्वं पञ्चस्पन्दविजृम्भितम्।।
संकोचयत्परामर्शात्सामान्यस्पन्दकेवलम्।
अहम् प्रलयं कुर्वन्निदम् प्रतियोगिनः।।"

(अ०प्र०पं०,49-50)

"एष उपादेयतमः परमकारणभूतस्य सत्यस्य आत्मस्वरूपस्य-अयमहमस्मि, अतः सर्वं प्रभवति, अत्रैव च प्रलीयते–इति प्रत्यवमर्शात्मको निजो धर्मः सामान्यस्पन्दः।"

(स्पं०वि०,पृ०,63-64)

"सामान्यस्पन्दस्य सर्वव्यापकस्यान्तर्लीनान्तविशेषस्पन्दस्य परस्य शक्तिस्फुरितस्य।"

(तदेव,पृ०,65)

(4) हृदये ऽनवच्छिन्नप्रकाशविमर्शात्मकतया पारमैश्वर्यविभूतिविभूषितं परिपूर्णमहमिति।

यथा—

"……
तदिदं पूर्णमिहाहमात्मकम्।
हृदयं शिव शक्तिसङ्गम–
स्फुरणात्मैव सदावभासते।।"

(मा०वि०वा०,2,24)

"इह सृष्टि लयस्थितिक्रमाः शतशो वापि सहस्रकोटिशः।
प्रविभान्ति सदातनात्मना हरविष्णवम्बुजहेतु सञ्चिताः।।"

(मा०वि०वा०2,25)

द्र०:- 'स्पन्दः' ~ 'सामान्यः' इति।

सामान्यस्वरूपम् :— अनेकेषां पदार्थानामनेकत्वेऽपि बहिरप्येकत्वं प्रमातृकल्पितं लोकव्यवहारे च रुढम्।

यथा—

"गावः इति हि प्रतिभासे पृथक् च ता बहिर्व्यक्तयो भान्ति, येन च बहुवचनम्, अनुयायि चासां भाति वपुर्यदेकप्रातिपदिकार्थपरामर्शानुगमः, उभयं च तद् बहिरेव 'इमा' इत्यङ्गुल्या निर्देशात्, केवलं बाह्यत्वमपि स्थिते परमार्थप्रकाशान्तर्भावे, इति न तत्र भेदाभेदौ दूषणम्— चित्रसंवेदन इव।"

(ई०प्र०वि०,खं०2,पृ०,48)

सामुदायिक यागः :— पुत्रकदीक्षायाः आरम्भेऽनुष्ठीयमानो यागविशेषः सविस्तरं प्रतिपादितस्तन्त्रालोके षोडशाह्निकस्यारम्भे।

यथा—

"यदा तु समयस्थस्य पुत्रकत्वे नियोजनम्।
गुरुत्वे साधकत्वे वा कर्तुमिच्छति दैशिकः।।
तदाधिवासं कृत्वाऽद्धि द्वितीये मण्डलं लिखेत्।
सामुदायिकयागेऽथ तथाऽन्यत्र यथोदितम्।।"

(तं०आ०16,1-2)

द्र०:- 'विस्तरतः' (तदेव 16, 3-15)

तत्र तस्य यागस्य विधिः प्रदर्शितोऽस्ति।

साम्मुख्यम् :— शिष्यस्य गुरुसाम्मुख्यमावश्यकं दीक्षायां तच्च गुरुकृतानुग्रहास्पदत्वमेव वस्तुतः।

यथा—

"भुक्तिमुक्ति प्रसिद्ध्यर्थं नीयते सद्गुरुं प्रति।
इत्यस्मिन् मालिनीवाक्ये प्रतिः साम्मुख्यवाचकः।।
साम्मुख्यं चास्य शिष्यस्य तत्कृपास्पदतात्मकम्।
तमाराध्येति वचनं कृपाहेतूपलक्षणम्।।"

(तं०आ०21,2-3)

सायुज्यम् :— भेदाभेददृष्ट्या शिवेन साकमेकत्वे स्थितिः।

यथा—

"मायीयग्राहकाभावे परसंवित्तत्त्वे या युक् एकता, तया सह वर्तते यस्तस्य भावः सायुज्यम्।"

(ई०प्र०वि०वि०,खं०3,पृ०,347)

~ तदधिकारिणः :—

"ये तु तत्तत्त्वविज्ञानमन्त्रचर्यादिवर्तिनः।।
मृतास्ते तत्र तद्रुद्रसयुक्त्वं यान्ति कोविदाः।"

(तं०आ०28,264-265)

~ भुक्तिरूपम् :— **सायुज्यं, सालोक्यं, सामीप्यं, सारूप्यमित्येतत् सर्वमपि भोगमध्य एव गण्यते न मोक्षे।**

यथा—

"सायुज्ये हि भोगानां सामस्त्यं सालोक्यादौ तु व्यस्तत्वम्।"

(तं०आ०वि०,खं०10,पृ०,166)

सारः :— (1) पारमेश्वरी पराशक्तिः।

द्र०:- **'काली'** इति।

आगमिकी खल्वेषाऽस्याः संज्ञा।

(2) परत्रिकात्मकमनुत्तरं परतत्त्वम्।

द्र०:- 'त्रिकम्' इति।

सारम् :— (1) परिपूर्णाहं विमर्शात्मकं विश्वस्यातुच्छं वास्तविकं स्वरूपम्।

यथा—

"सारमिति यदतुच्छं रूपं तदियमेव विमर्शशक्तिः।"

(ई०प्र०वि०,खं०1,पृ०,211)

(2) परिपूर्णस्य परमेश्वरस्य या परिपूर्णतामयी पराशक्तिरसावेव परमेश्वरतायाः सारभूतत्वेनागमेषु सार इत्युक्ता।

द्र०:- **'ऊर्मिः'** इति।

सारशासनम् :— परात्रीशिका शास्त्रम्। यथा—

"श्री सिद्धाटनसद्भावमालिनीसारशासने।"

(तं०आ०28,113)

अथवा त्रिकसाराख्यो ग्रन्थः इति।

द्र०:- **'सारशास्त्रम्'** इति।

सारशास्त्रम् :— (1) कश्मीरेषु मौखिकपरम्परानुसारं सारशास्त्रं मालिनीविजयोत्तरं तन्त्रम्। अस्याः परम्परायाः लिखितं प्रामाण्यमन्वेष्यमेव। उक्तं हि विवृत्ति विमर्शिन्याम्। यथा—

"श्री सारशास्त्रेऽपि निरूपितम् :—

यत्सारमस्य जगतः सा शक्तिर्मालिनी परा।"

(ई०प्र०वि०,खं०1,पृ०,211)

परमेतद्वाक्यं मालिनीविजयोत्तरे नैव लभ्यते। एतत् सम्भाव्यते यद् बृहत्काये मालिनीतन्त्रे वाक्यमेतदभूदिति।

(2) क्वचिन्मालिनीविजयोत्तरादन्यदपि किमपि त्रिकसाराख्यं पुस्तकं सारशास्त्रपदेनोक्तम्।

यथा—

"श्री सारशास्त्रे चाप्युक्तं मध्यएकाक्षरां पराम्।।

पूजयेद् भैरवात्माख्यां योगिनीद्वादशावृताम्।"

(तं०आ०3,253-254)

"सारशास्त्रे इति श्रीत्रिकसारे।"

(तं०आ०वि०,खं०2,पृ०,236)

द्र०:- (तं० आ० 13, 121-125) इत्यपि।

(3) समस्तशास्त्रसारभूतमत एवोत्कृष्टतरमूर्मिकौलादिशास्त्रमपि सारशास्त्रमित्युच्यते।

यथा—

"सारशास्त्रेष्विति प्रधानेषूर्मिकौलादिष्वित्यर्थः।"

(तं०आ०वि०,खं०8,पृ०,231)

सारसङ्ग्रहः :— कोऽपि ग्रन्थो य इदानीमलभ्यः।

यथा—

"औषधीनां वरैकैव सहदेवा शिवागमे।"

इति सारसंग्रहे .....।"

(स्व०तं०उ०,प०3,पृ०,189)

सारस्वतसंग्रहसूत्रम् :— इदानीमलभ्यः कश्चनागमिको ग्रन्थः।

यथा—

"सकृद्विभातोऽयमात्मा। पूर्णस्यास्य न क्वाप्यप्रकाशनसम्भवः। इति सारस्वतसंग्रहसूत्रैकदेशार्थोऽध्यासदृष्ट्या शब्दे हेतुत्वेनोक्ते कथित एव भवतीत्यागमोऽयं, न स्वमनीषिका।"

(ई०प्र०वि०वि०,खं०3,पृ०,23)

सारस्वतस्तोत्रम् :— शिवमहिम्नस्तोत्रस्यापरं नाम सारस्वतं स्तोत्रमिति।

यथा—

"युदक्तं सारस्वते स्तोत्रे :—

'त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।

रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां

नृणामेको गम्यस्त्वमसि पयसामर्णव इति'।।"

(स्त०चि०वि०,पृ०,26)

सार्द्ध(र्ध)शतिकम् :— (1) किमपि कालीनयसम्बन्धिशैवागमशास्त्रमुद्धृतं यस्य वाक्यं जयरथेन।

यथा—

"यदुक्तं श्रीसार्धशतिके :—

'द्वादशारं महाचक्रं रश्मिरूपं प्रकीर्तितम्'।

इत्यादि।"

(तं०आ०वि०,खं०3,पृ०,161)

(2) पञ्चशतिकनाम्नः आगमस्यैव नामान्तरं प्रतिभाति। परं न निश्चेतुं शक्यते।

यथा—

"तदुक्तं श्रीपञ्चशतिके .....

.....

.....

श्रीसार्द्धशतिकं तु समनन्तरमेव संवादितम्।"

(तं०आ०वि०,खं०3,पृ०,189)

साधार्णम् :— ट् इत्येतावानच्को वर्णः।

यथा—

"साधार्णं ट्।"

(तं०आ०वि०,खं०12,पृ०,220)

सार्वरयं :— ~ भगवतः :— **सर्वं हि वेद्यं परमेश्वरे सदा विद्यमानमस्ति, प्रकाशते च तत्र प्रकाशमात्रतया तथा प्रकाशमानं सर्वं परमेश्वरो वेत्ति, तस्याहं प्रकाशस्य विमर्शात्मकत्वात्। ततः सर्वमेकमात्रशुद्धप्रकाशरूपतया सदा विमृशन् परमेश्वरः सर्वज्ञः। एवं सर्वस्याहमात्मकतया सततं विमृशत्वं यत् परमेश्वरस्य तत्तस्य सार्वज्ञ्यम्। यथा—**

"बोधमात्रस्य हि प्रमातुराहरणीयो बोधो नास्ति, यत्रेन्द्रियादिसामग्र्युपयोगः। वेद्योपरागमात्रेण हि तस्य नीलादि-बोधरूपता, वेद्यं च सदा सन्निहितमिति सार्वज्ञ्यमेवास्य युक्तम्,

"केन नाम न रूपेण भासते परमेश्वरः।"

(ई०प्र०वि०वि०,खं०3,पृ०,247)

सर्वप्रकाशरूपत्वेन भासमानत्वेन वा परमेश्वरस्य सर्वज्ञत्वमत्राभिप्रेतं मन्तव्यम्।

सालोक्यादि :— **(1) इष्टदेवस्य लोके निवासित्वं सालोक्यम्। (2) तत् पुरतः सदावस्थानं सामीप्यम्। (3) तत् समानरूपत्वं सारूप्यम्। (4) तेन साकं युगपद् भेदाभेदतयावस्थानं सायुज्यम्। सारूप्यमेव साष्टिः। ततश्चतुःसंख्यमेव सालोक्यादि। वैष्णवाः द्वैतशैवाश्च सालोक्यमेव परां मुक्तिं मन्यन्ते, वीर-शैवाः पुनः सायुज्यम्। पाशुपताश्चापि तदेव।**

~ अमोक्षः :— **चत्वारोऽपि सालोक्याद्याः विशिष्ट-भोगरूपतयैव गण्यन्ते शैवदर्शनेऽत्र, न मोक्षरूपतया।**

यथा—

"मोक्षेऽप्यस्ति विशेषः क्रियाल्पभूयस्त्वजः सलोकादिः।
इति केचित्तदयुक्तं स विचित्रो भोग एव कथितः स्यात्।"

(तं०आ०16,200-201)

~ तदधिकारिणः :— **आयतनेषु मृताः जना योग्यतानुसारं सालोक्यं वा, सामीप्यं वा सायुज्यं वा लभन्ते।**

यथा—

"पशुमात्रस्य सालोक्यं सामीप्यं दीक्षितस्य तु।
तत्परस्य तु सायुज्यमित्युक्तं परमेशिना।।"

(तं०आ०28,273)

तत्परस्येति दीक्षानुसारं प्राप्तविवेकस्य। नास्य पदस्य जयरथकृतं व्याख्यानं साधु प्रतिभाति।

यथा—

"दीक्षितस्येति—लोकधर्मदीक्षया। तत्परस्येति। एवं दीक्षितत्वेऽपि तत्तत्स्थानादौ मृतस्य।।"

(तं०आ०वि०,खं०11/1,पृ०,107)

सालोक्यादित्रयमपि हि तत्र-तत्रायतनेषु मृतानां लोक-धर्मिणां कृतं उक्तं न सायुज्यमेव।

सावहा :— **स्वाहा इति।**

यथा—

"सा वहा स्वाहा।"

(तं०आ०वि०,खं०12,पृ०,220)

सावित्रिका :— ~ बीजम् :— **औकारः।**

यथा—

"सावित्रिका औ।"

(तं०आ०वि०,खं०12,पृ०,197)

सिद्धः :— ~ ग्रन्थकारः :— **कश्चन सिद्धिभाग् महापुरुषः। कदाचिच्छम्भुनाथ एव स्यात्। तस्य सिद्धनाथत्वेनापि प्रसिद्धेः।**

"सिद्धोक्तं च :—
'यद्वत्प्रकाशभवने प्रकाश्यविषयो न दृश्यते मातः।
सम्पर्कात्तव तद्वत्संविद् वेद्या न भाव्यते जातु।।'
इति।"

(स्पं०प्र०,पृ०,28)

~ परमेश्वरः :— **प्रमाणव्यापारविषयतां यो नाप्नोति कदाचित् तथापि योऽस्तीति स्वसाक्षिकत्वेन स्वयमेव स्थितः। यथा—**

"परमेश्वरः प्रमाणव्यापारनैरपेक्ष्येण स्फुरणात् सिद्धः।"

(ई०प्र०वि०वि०,खं०2,पृ०,135)

~ मन्त्रः :— **यः केनापि कालेन सिद्ध्यति शुभे प्रारब्धकर्मोदये।**

द्र०:- **'मन्त्रपरीक्षा'** ~ 'चक्रविधिना' इति।

~ योगी :— **(1) सफलयोगाभ्यासः साधकः। यथा—**

"सिद्धोक्तं च :—
'चिद्व्योम्नस्थोऽनुसन्धत्ते यत्तत्पश्यत्यखण्डितम्' इति।"

(स्पं०प्र०,पृ०,43)

(2) यस्य चित्तं तत्त्वान्नैव चलति स योगी सिद्धः—सिद्धयोगो वेत्युच्यते।

यथा—

"तदेवं चेतसा नान्यद् द्वितीयमवलम्बते।।
सिद्धयोगस्तदा ज्ञेयो योगी योगफलार्थिभिः।"

(मा०वि०तं०4,36-37)

सिद्धजनाः :— **योगादिना प्राप्तपरापरसिद्धयः महापुरुषाः।**

~ अनिन्दनीयाः — **सिद्धजनेन कदाचिदसमञ्जसमपि चेद् व्याख्यातं स्यात्तन्न खण्डनीयं तद्विषये उदासीनतालम्बनीया। यथा—**

"एवं हि—
'..... तस्यै हेतुं न चाचरेत्।'
इति वक्ष्यमाणदृशा स्वात्मनि समयलोपावहं महात्मनां महागुरूणां निन्दाबीजमासूत्रितम्, इति भवेत्।"

(तं०आ०वि०,खं०1,पृ०,15)

उक्तं ह्येतदन्येषां तन्त्रालोकटीकाकृतां विषये। तेषां मते दोषोद्भावनेन पापं मा भवत्विति कृत्वा।

~ नानुकार्याः :— **यद्यद् दृष्टतत्त्वसाराः सिद्धजनाः स्वयं कुर्वन्ति तत्तत् सर्वमस्माभिः प्राकृतैर्जनैर्नानुकर्तव्यम्, यद्यत्ते कर्त्तव्यत्वेनोपदिशेयुस्तत्तदेव कार्यमस्माभिः।**

यथा—

"यत्ते कुर्युर्न तत् कुर्यात् यद् ब्रूयुस्तत्समाचरेत्।"

उद्धः- (तं०आ०वि०,खं०3,पृ०,270)

सिद्धनाथः :— क्रमस्तोत्रनिर्माता कोऽप्याचार्यः। सम्भवतः शम्भुनाथ एव। अभेदार्थकारिकाख्यस्य ग्रन्थस्यापि निर्माता।

यथा—

"वस्तुतस्तु निर्नामक एव सः, प्रोक्तं .....।
चैतत् सिद्धनाथेन अभेदार्थकारिकासु .....।।"

(स्पं०प्र०,पृ०,4)

(1) पृथ्वीधराचार्येण भुवनेश्वरीस्तोत्रे "शम्भुनाथ एव सिद्धनाथ" इति स्पष्टमुक्तम्। (2) स च प्रसिद्धस्य क्रमस्तोत्रस्य निर्माता चिद्गगनचन्द्रिकायां तथोक्तत्वात्। यथा—

"हे सिद्धनाथ करुणाकर शम्भुनाथ।
हे शम्भुनाथ करुणाकर सिद्धनाथ।" इति

(भुवनेश्वरीस्तोत्रस्यान्ते)

"सिद्धनाथ कृत ते क्रमस्तुतिं कालिदासरचितां च पञ्चिकाम्।
मद्विनिश्चितपदं च ते स्तवं योऽम्ब वेद कुरु तद्वशं जगत्।"

(चि०ग०चं०,306)

द्रः- **'शम्भुनाथ'** इति।

सिद्धपादाः :— कस्याप्याचार्यस्य नाम्।

"यथोक्तं सिद्धपादे :—
उदेत्येकः समालोकः प्रमाणार्थप्रमातृजः।" इति।

(ई०प्र०वि०वि०,खं०3,पृ०,71)

"यत्सिद्धपादा आदिदिशु :—
पिथिव आपा ता तेजु तकारुसु वातशत्तितिर्यग अवयवति। नभुरा पञ्च अक्कु अकारुसु एहुए सिष्टि पसरु आकलति।।" इति।

(म०प्र०वि०,प्र०,32)

"..... लोलीभूता परा स्थितिः।"

(स्पं०सं०,पृ०,10-11)

(2) पुष्पदन्ताचार्यः, शिवमहिम्नस्तोत्रस्य कर्ताऽनेन नाम्नोक्तोऽभिनवगुप्तपादैः। यथा—

"यदाहुः सिद्धपादा :—
अतीतः पन्थानं तव च महिमा वाङ्मनसयोर–
तद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि।।"

(ई०प्र०वि०वि०,खं०2,पृ०,65)

सिद्धमहारहस्यम् :— सैद्धदर्शनविषयकोऽयं ग्रन्थ आचार्यामृतवाग्भवप्रणीतः। अत्र सैद्धदर्शनसिद्धान्ताः, विशेषतश्च शाक्तसिद्धान्तः, योगप्रक्रियाः, योगाभ्यासफलभूतानि च दिव्यदर्शनानि श्लोकबद्धानि वर्तन्ते। हिन्दीटीकायुतः प्रकाशितोऽयं ग्रन्थः। अस्य संस्कृतटीकाऽपि कदाचित् प्रकाशयिष्यते बलजिन्नाथपण्डितविरचिता।

सिद्धयः :— ~ अष्टौ :— (1) अणिमाद्याः।

द्रः- **'अष्टसिद्धयः'** इति।

(2) ताराद्याः परिगणिता यथा—

"तारा चैव सुतारा च तारयन्ती प्रमोदिका।
प्रमोदिता मोदमाना रम्यका च ततः परम्।।
सदा प्रमुदिता चैव सिद्ध्यष्टकमुदाहृतम्।"

(स्व०तं०10,1071-1072)

~ दश (तन्त्रे) :— तन्त्रे तावद् अणिमा, लघिमा, महिमा, ईशित्वम्, वशित्वम्, प्राकाम्यम्, भुक्तिः, इच्छा, (स्वातन्त्र्यम्) मोक्षः (जीवन्मुक्तिः), रसः (जगदानन्दः), इति दश सिद्धयः उक्ताः।

यथा—

"अणिमा लघिका महिमेशित्ववशित्वे प्रकामता भुक्तिः।
इच्छामोक्षरसाश्चेहोक्ताः सिद्धयस्तन्त्रे।"

(वा०म०,पृ०,5)

~ नोपसर्गाः :— अन्यासु योगप्रक्रियासु सिद्धयो व्युत्थाने हर्षप्रदाः, सत्योऽपि समाधिप्रतिपन्थिन्यः। परमत्र व्यावहारिक- सिद्धयोऽपि शिवभावप्रदाः, शिवभावादुदिताः सत्यः शिवभाव एव विश्रान्तिकारिण्यश्च; स्वात्मनः शिवभावस्य च यतो निश्चायिकाः। यथा—

"आवरणकारणभूतानां मोहमयीनां लौकिकसिद्धीनामुदयात्प्राक् तासां लयाच्चानन्तरं योगिन अद्यन्तकोटौ परैव सिद्धिः, सहजविद्योदयबलाद् भवति। तेन मोहावरणादप्यस्य शिवयोगिनः परसिद्धिरेव। नासौ तेन मोहावरणेन कथमपि निरुध्यते।"

(शि०सू०वि०,वृ०3,6)

सिद्धयोगीश्वरीमतम् :— मूलतस्त्रिकशास्त्रमेवाभिनवगुप्तादिभिः सिद्धयोगीश्वरीमतमिति नाम्नोक्तम्। परं क्वचित्-क्वचित् सिद्धातन्त्रवाक्यान्येव तन्मततया सङ्केतितानि तन्त्रालोके समुद्धृतानि च जयरथेन तद्विवेके। ततः सिद्धयोगीश्वरीमतमिति पदस्याभिप्रायस्त्रिकशास्त्रमित्येव। सिद्धातन्त्रवाक्यानि, त्रिकोपदेशाश्चोभयमपि सिद्धयोगीश्वरीमतान्तर्भूतमेव। ततो नात्र मनागपि विचिकित्सनीयं सुधीभिः। ततः सिद्धा-वामक-मालिनीसमाख्यमागमत्रयमपि सिद्धयोगीश्वरीमतमिति ज्ञेयम्। यथा—

द्रः- **'त्रिकम्'** इति।

"सिद्धयोगीश्वरीतन्त्रं नवकोटिप्रविस्तरम्।।
यत्त्वया कथितं पूर्वं भेदत्रयविसर्पितम्।
मालिनीविजये तन्त्रे कोटित्रितयलक्षिते।।"

(मा०वि०तं०1,8-9)

"भैरवाद् भैरवीं प्राप्तं सिद्धयोगीश्वरीमतम्।
ततः स्वच्छन्ददेवेन स्वच्छन्दाल्लाकुलेन तु।।
लकुलीशादनन्तेन अनन्ताद् गहनाधिपम्।।
गहनाधिपतेर्देवि देवेशं तु पितामहम्।।

पितामहेन इन्द्रस्य इन्द्रेणापि बृहस्पतेः।
कोटिह्रासाच्छ्रुतं सर्वैः स्वच्छन्दाद्यैर्महाबलैः।।"
(तं०आ०वि०,खं०12,पृ०,383)

कदाचित् क्वचित्क्वचित् सिद्धातन्त्रमपि सिद्धयोगीश्वरीमतान्तर्गतत्वेन तथोक्तम्। यथा—

"सिद्धातन्त्रे तु पातालपृष्ठे यक्षीसमावृतम्।
भद्रकाल्याः पुरं यत्र ताभिः क्रीडन्ति साधकाः।"
(तं०आ०8,41-42)

"अत्रैव श्रीसिद्धयोगीश्वरीमतोक्तं विशेषं दर्शयति :—
'पातालोर्ध्वं भवेद् भद्रं भद्रकालीगृहं शुभम्।
यक्षिणीनां तु सर्वासां नायिका संप्रकीर्तिता।।
चतुःषष्टिःसहस्राणि यक्षिणीनां पुराणि तु।
तत्र कोटिशतं यावत् कन्यानां तु पुरेपुरे।।
क्रीडन्ति साधकास्तत्र तैः सार्धं तु मला (ह्या) बलाः।
ज्ञात्वा तु यक्षिणीकल्पं सिद्धयोगीश्वरीमते।।' इति"
(तं०आ०वि०,खं०5,पृ०,35-36)

सिद्धसन्तानः :— (1) आगमः कश्चन।

कदाचित् सिद्धातन्त्रस्यैवेदं नामान्तरं स्यात् तन्त्रसन्तानयोः समानतात्पर्यतः। यथा—

"तदुक्तं सिद्धसन्तानेः —
'प्रकाशमाना भासैव यद्भूतिस्तत् सदेव हि।' इति।"
(प०त्री०वि०,पृ०,91)

(2) सिद्धपरम्परा वा स्यादेषा। यथा—

"उक्तं च सिद्धसन्तान.....।"
(तं०आ०14,31)

सिद्धाः :— (1) चतुर्षु युगेषु कौलमतस्य प्रवर्तकाश्चत्वारा गुरवः। ते च क्रमेणः— (1) खगेन्द्रनाथः, (2) कूर्मनाथो, (3) मेषनाथो, (4) मत्स्येन्द्रनाथश्चेति। यथा—

"सिद्धानां सिद्धिदं ज्ञानं खेचर्यः पर्युपासते।"
(ने०तं०खं०2,20-23)

"सिद्धाः श्रीखगेन्द्राद्याः।"
(ने०तं०उ०,खं०2,पृ०,224)

(2) पञ्चविधाः कौलयोगिनः मातृका वर्णैः रहस्यमय्या वाचोक्ताः। ते च :— (क) ज्ञानसिद्धाः, (ख) मन्त्रसिद्धाः, (ग) मेलापसिद्धाः, (घ) शाक्तसिद्धाः, (ङ) शाम्भवसिद्धाः, इति। यथा—

"आदिवर्णस्वराः षोडशस्वरत्वेन ज्ञानसिद्धाः; कादिमकारपर्यन्तं व्यञ्जनपञ्चविंशकं मन्त्रसिद्धाः; द्वादशधा स्वरव्यञ्जनमिश्रिता मात्राः प्रणवकलाः वा मेलापसिद्धाः, यकारादिहकारपर्यन्तमष्टशाक्तसिद्धाः, आदिवर्णस्य रौद्रचन्ताः कलाश्चतस्रः शाम्भवसिद्धाः।"
(वि०भै०उ०,पृ०,68)

साङ्केतिकमेवेदं वेदितव्यम्।

सिद्धातन्त्रम् :— (1) त्रिकागमेष्वेकतममागमशास्त्रम्। यथा—

"असंख्यचक्रसम्बन्धः श्रीसिद्धादौ निरूपितः।"
(तं०आ०16,4)

(2) अभिनवगुप्तेनापि तन्त्रस्यास्य नामोल्लेखः कृतोऽस्ति। यथा—

"सर्वत्र च श्रीमालिनीविजयोत्तरसिद्धातन्त्रस्वच्छन्दादिशास्त्रेषु 'क्षकारात्' प्रभृत्यवर्गान्तं पार्थिवादीनां शिवान्तानां तत्त्वानां निवेशः।"
(प०त्री०वि०,पृ०,120-121)

द्र०:- (तं०आ०1,243;7,40;8,115-117;15,157;15,321;21,11;23-28;24,6-9;25,2;26,23;27,25;28,93-94,113;तं०आ०वि०,खं०1,पृ०,49;खं०2,पृ०,212-213; खण्ड 5,पृ०,35-36,132;ने०तं०उ०,खं०2,पृ०,124; खण्ड2,पृ०,36;म०मं०प०;पृ०,7,132;शि०सू०वि०, पृ०,32)

सिद्धान्तः :— सिद्धस्य वस्तुनः कथनं सिद्धान्तः। यथा

"सिद्धान्तता चास्य, सिद्धस्यैव—न साध्यस्य ईश्वरतत्त्वस्य, अन्तो-निष्ठा निश्चयः।"
(स्पं०वि०,पृ०,12)

सिद्धान्तचन्द्रिका :— केनापि न्यायवेदान्ताचार्येण वसुगुप्तनाम्ना विरचितः कोऽपि ग्रन्थः। नायं शैवदर्शनग्रन्थो न चापि शिवसूत्रदर्शिना वसुगुप्तेन विरचितः।

सिद्धान्तज्ञानम् :— सिद्धस्य वस्तुनः यथा ज्ञानं तथा तदस्ति वस्तुतः। तच्च ज्ञानं बौद्धं च स्वसाक्षात्कारमयं च। बौद्धं तु तत्-यत् प्रमात्रा स्वबुद्धौ विकल्पात्मकेनाध्यवसायेन सुकल्पितं; तदेव प्रायः सिद्धान्तज्ञानपदेनाभिप्रेतं भवति।

द्र०:- 'ज्ञानम्' ~ 'बौद्धम्' इति।

~ आवश्यकम् :— **वस्तुतत्त्वमधिकृत्य सिद्धान्तज्ञानं विना बुद्धिगतो मोहस्तथैव तिष्ठन् मुक्तिमार्गं निरुणद्धि। ततः सिद्धान्तानां बौद्धं ज्ञानं मोक्षायापेक्ष्यते।**

यथा—

"सृष्टयादितत्त्वमज्ञात्वा न मुक्तो नापि मोचयेत्।"
(तं०आ०6,58)

"उत्पत्तिस्थितिसंहारान् ये न जानन्ति योगिनः।
न मुक्तास्ते तदज्ञानबन्धनैकाधिवासिता।।"
(तदेव,59)

सिद्धान्तमुक्तावलिः :— योगसाधनफलोपवर्णनपरः कश्चन ग्रन्थो विज्ञानकौमुद्यां भट्टानन्देन निर्दिष्टः सश्लोकोद्धरणम्। यथा—

"तथा च सिद्धान्तमुक्तावल्याम् :—
'पश्यामि चित्रमिव सर्वमिदं द्वितीयं
तिष्ठामि निष्कलवदेक अनेकरूपः।
आत्मानमद्वयमनन्तसुखैकरूपम्
स्मरामि दग्धरशनामिव सुप्रपञ्चम्।।
आश्चर्यमप्यनुभवामि करस्थबिल्व-

तुल्यं शरीरमहिनिर्लुय(र्ल्वय)नीव वीक्षे।
एवं च जीवनमपि प्रतिभासनं च
निःश्रेयसोऽधिगमनं च मम प्रसिद्धम्' इति।।"
(वि०कौ०,पृ०,20)

सिद्धामतम् :— (1) किमपि शैवयोगप्रतिपादकमागमशास्त्रम्। कदाचित् त्रिकाचारागमोऽयं स्यात् सिद्धातन्त्राख्यः। समुद्धृतमस्य वाक्यं महेश्वरानन्देन।

यथा —

"यदुक्तं सिद्धामते :—
'अध्वषट्' कं च दीक्षा च शिवशास्त्रमिति स्मृतम्।
दीक्षाध्वा निर्भयो भोगशास्त्रे भैरव संज्ञके।।' इति।"
(म०मं०प०,पृ०,7)

द्र०:- (तं०आ०16,4; 20,11; प०त्री०वि०,पृ०, 120-121, 266)

(2) कोऽप्यागमग्रन्थविशेषः। उद्धृतमस्य वाक्यं तन्त्रालोके चक्रोदयप्रकरणे।

यथा—

"सिद्धामते कुण्डलिनी शक्तिः प्राणसमोन्मना।"
(तं०आ०7,40)

(3) कदाचित् क्वचित् सिद्धातन्त्रमतमेवानेन पदेनोक्तं भवेत्। यथा—

"पुस्तकाधीतविद्याश्चेत्युक्तं सिद्धामते ततः।"
(तदेव,26,23)

"पात्राभावे पुनर्भद्रं वेल्लिताशुक्तिमेव च
पात्रे कुर्वीत मतिमानिति सिद्धामते क्रमः।।"
(तं०आ० 28, 93-94)

द्र०:- (तदेव 7, 40;16,4)

(3) अनेन नाम्ना कदाचिन्मताष्टकसम्बन्धी कोऽप्युपागमोऽप्यभिप्रेतो भवेत्, तत्राष्टकोऽपरिगणनादुपागमः स्यात्तत्रत्यः कोऽपि।

यथा—

"केवलं स्मरणात् सिद्धिर्वाञ्छितेति मतादिषु।"
(तं०आ०15,157)

"मतादिष्विति–सिद्धामतादौ।"
(तं०आ०वि०,खं०9,पृ०,80)

द्र०:- (तं०आ०20,11;ने०तं०उ०,खं०2,पृ०,36; म०मं० प०,पृ०,132 इति च।)

सिद्धामृतम् :— कश्चनागमिको ग्रन्थविशेष इदानीमलभ्यः।

यथा—

"उक्तं च श्री सिद्धामृते :—
सात्र कुण्डलिनीबीजम् .....। इत्यारभ्य–
.....
..... मन्त्रत्वेनैव पश्यति।। इत्यन्तम्।"
(शि०सू०वि०,पृ०,32)

सिद्धिः :— ~ अवरा :— लक्षिता स्पष्टम्। यथा—

"हेयेऽप्यादेयधीः सिद्धिः .....।
(तं०आ०8,279)

"तथा चोक्तं कापिलै :—
"ऊहः शब्दोऽध्ययनं दुःखविधातास्त्रयः सुहृत्प्राप्तिः।
दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशास्त्रिविधः।।"
उद्ध०:- (तदेव 8, 281)

सिद्धित्रयी :— उत्पलदेवकृतानां त्रयाणां लघुकायानामेकत्र ग्रन्थेग्रथितानां ग्रन्थानां नामधेयमिदं लेखकसम्पादकादिकल्पितम्। ग्रन्थकृता तु त्रयाणामपि नामकरणं पृथक्-पृथगेवं कृतम्—अजडप्रमातृसिद्धिः, ईश्वरसिद्धिः, सम्बन्धसिद्धिश्चेति। पूरकमेतत् त्रयमीश्वरप्रत्यभिज्ञायाः। तत्र संक्षेपतः प्रतिपादितानां केषामपि विषयाणामत्र विस्तरतः प्रतिपादनं कृतं वर्तते।

यथा—

(क) "ततोऽभेदे तु भास्यस्य घटते भासमानता।
तेनोक्तं प्रत्यभिज्ञायां तदद्वयमयं जगत्।।
(ख) स्वात्मैवायं स्फुरति सकलप्राणिनामीश्वरोऽन्तः-
कर्ता ज्ञाताऽपि च यदि परं प्रत्यभिज्ञास्य साध्या।
सा चास्माभिर्विहितघटनाऽन्यत्र किन्त्वीश
सिद्धिर्द्वैतेऽप्यस्तीत्युचितमधिकं भाति वह्निर्निशीथे।।"
(ई०सि०,56)

सिमिसिमायनम् :— प्राणयोगेनार्धचन्द्रविभेदनानन्तरं निरोधिनीभेदनावसरे श्रूयमाणः प्राणगतिशब्दः। स च सिमिसिमीत्याकारः। शब्दानुकृत्यात्रायमेवं विधः पदप्रयोगः।

यथा—

"अर्धचन्द्रं तु भित्त्वा वै भेदयेत्तु निरोधिनीम्।
तस्यास्तु भिद्यमानायाः शब्दः सिमिसिमायते।।"
(स्व०तं०,4,378)

सुकाली :— एषा तु द्वादशाधिका काली मन्त्रराजभट्टारके, पञ्चशतिके चोक्ता।

द्र०:- 'पञ्चशतिकम्' इति।
'तन्त्रराजभट्टारकः' इति च।

"श्री पञ्चशतिकेः–
'डकला भीषणा रौद्रा कुलकालि (ली) निराकुला।
अलक्ष्या लक्ष्यनिर्लक्ष्या सुकाली नाम सिद्धिदा।।' इति।"
(तं०आ०वि०,खं०3,पृ०,189)

"सृष्टि काली च संहारे सृष्टौ सा परमेश्वरी।
स्थितिकाली तथा घोरा ततः संहारकालिका।।
रक्तकाली चर्वयन्ती रक्तौघमविभेदतः।
सुकाली यमकाली च मृत्युकाली भयावहा।।
भद्रकाली तथा चान्या परमादित्यकालिका।
मार्तण्डकाली कालाग्नि रुद्रकालमहोल्वणा।।
महाकालकुलेकाली महाभैरवकालिका।
त्रयोदशविधा काली विज्ञेया नामभेदतः।।

इति श्री सार्धशतिकं तु समनन्तरमेव संवादितम्।"
(तं०आ०वि०,खं०3,पृ०,189)

सुखदुःखरहस्यम् :— चिद्रूपताया उद्दीप्तिः सुखं तस्यास्तिरोधनं दुःखम्।

यथा—

"तस्य चिद्रूपस्य यथा-यथा हानिस्तथा तथा दुःखोपचयो, यथा-यथा किञ्चिदुन्मज्जनं तथा-तथा सुखोपचयः। तथाहि बुभुक्षा- काले प्राणस्यैवोद्रेकाद् दुःखम्, तृप्तौ तस्य न्यग्भावादहन्तोद्रेके सुखम्। एवं श्रान्तस्य मर्दनामर्दने देहप्राधान्याप्राधान्ये मन्तव्यम्।"
(ई०प्र०वि०,खं०2,पृ०,242)

सुखादयः :— ते च बुद्धिधर्माः आत्मस्वरूपबाह्याः विषयतुल्याः सङ्कल्पोत्थाः क्षणभङ्गुराश्च।

यथा—

"सुखादयः पुनः सङ्कल्पोत्थाः क्षणभङ्गुरा आत्मस्वरूप-बाह्याः शब्दादिविषयतुल्याः।"
(स्पं०सं०,पृ०,5-6)

सुघटमार्गः :— ~ आत्मदर्शनस्य :— (1) निखिलं तत्त्वभुवनादिभावविषयकं कल्पनाजालमेकतः कृत्वा शुद्धे निजे चिदानन्दघने स्वरूपे यदवस्थानं तस्याभ्यासेन सुखोपायं परास्वात्मप्रत्यभिज्ञा समुदेति सत्वरं साधकस्य।

यथा—

"यदि चात्रैव निखिलकल्पनारश्मिमण्डलम्।
अविस्फार्य क्षणं तिष्ठेत् सन्निरुद्धनिजस्थितिः।।
तन्निजामृतविस्फारचमत्कारैकचर्वणाम्।
लभते परमानन्दसुधासन्दोहवाहिनीम्।।"
(मा०वि०वा०1,143-144)

(2) कष्टतपःप्रत्याहारप्राणायामादयो हि मार्गाः दुर्घटाः, कष्टसाध्यत्वात्। शाक्तशाम्भवानुपायमार्गाः पुनः सुघटाः, कायचित्तक्लेशकरत्वाभावात्।

यथा—

"बाह्यान्तरचर्याप्राणायामादिक्लेशप्रयासकलाविरहात् सुघटस्तावदुक्तः।"
(ई०प्र०वि०,खं०2,पृ०,271)

"इति प्रकटितो मया सुघट एष मार्गो नवो,
महागुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा।।"
द्र०:- (ई०प्र०4-2-1)

सुधा :— सकारः। यथा—

"सुधा सः।"
(तं०आ०वि०,खं०11/2,पृ०,137)
" " " " " ", पृ०,203)

सुधाधारः :— नाडीकेन्द्रविशेषो देहे। यथा—

"सुधाधारं बिन्द्वाख्यं भ्रूमध्यवर्तिनं विद्याकमलसंज्ञित-माधारम् .....।"
(तं०आ०वि०,खं०12,पृ०,325)

सुनिर्वाणम् :— मोक्षावस्थाविशेषः।

यथा—

"न कालो न कलाचारो न तत्त्वं न च कारणम्।
सुनिर्वाणं परं शुद्धं गुरुपारम्परागतम्।।
तद्विदित्वा विमुच्येत गत्वा भूयो न जायते।"
(स्व०तं०4,240-241)

सुप्रबुद्धः :— (1) व्यापिन्याः शक्तेरूर्ध्वं प्राप्तः शिवयोगी। यथा—

"अतीतः सुप्रबुद्धस्तु उन्मनस्त्वं तदा भवेत्।"
(स्व०तं०4,239)

समनां प्राप्तस्य तदोन्मनस्त्वमेव भवेत् क्रमेण।
उदानाख्यप्राणस्य चारे विशेषोऽयं शिवयोगिमात्रवेद्यः।

यथा—

"शक्त्याश्चाधो यदा गच्छेदबुधस्तु तदा भवेत्।
हृदगतः पुनरुत्तिष्ठेद् बुध्यमानः स उच्यते।।
शक्तिं प्राप्य बुधो ज्ञेयः व्यापिन्यंशे प्रबुद्धता।
अतीतः सुप्रबुद्धस्तु उन्मनस्त्वं तदा भवेत्।।"
(स्व०तं०4,238-239)

"छिन्नद्वैतदशाः प्रतिष्ठितसंविदः सुप्रबुद्धाः।"
(स्पं०वि०,पृ०,134)

(2) जाग्रदादित्रयेऽपि व्यामोहरहितत्वेन विचरन् योगी। यथा—

"तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी।
नित्यं स्यात्सुप्रबुद्धस्य तदाद्यन्तेऽपरस्य तु।।"
(स्पं०का०,17)

द्र०:- (स्पं०वि०,पृ०,8) इति।

~ प्रणवकलाभ्यासे :— **प्राणात्मनारूपेण समनान्तं प्रसृतः सन् साधकः सुप्रबुद्ध इति गण्यते।**

यथा—

"यदा तु ततोऽप्यूर्ध्वमारोहति तदा समनापर्यन्तमशेष-मध्वानम् :—

..... उन्मनस्त्वं तदा भवेत्।
अतीतः सुप्रबुद्धस्तु .....।"
(स्व०तं०उ०,प०4,पृ०,149)

~ लक्षणतः :— **यथा—**

"..... सुप्रबुद्धं तु मे शृणु।।
दीक्षाज्ञानेन योगेन चर्ययाप्यथ सुव्रते।
यदा प्राप्तः परं स्थानमध्वातीतं निरामयम्।।
विरजो विमलं शान्तं प्रपञ्चातीतगोचरम्।
निष्कम्पं कारणातीतं सर्वज्ञं सर्वतोमुखम्।।
सुतृप्तानादि संबुद्धं स्वतन्त्रं नित्यमेव हि।
अलुप्तशक्तिविभवं सुप्रबुद्धं सनातनम्।।
तस्मिन्युक्तस्तदात्मा वै तद्गुणैस्तु समन्वितः।
सुप्रबुद्धः स एवोक्तो भैरवस्य वचो यथा।।"
(स्व०तं०11,121-125)

"सुप्रबुद्धस्य सुष्ठु प्रबुद्धस्य देहाद्यहं-प्रत्ययदीर्घदुःस्वप्नमय्या मोहमहानिद्रया मनागपि अनावृतसंविदः सिद्धसाध्यस्य सम्यग्दर्शिनः. .....।"

(स्पं०वि०,पृ०,55-56)

~ व्यावहारिकस्थितौ :— तत्त्वे निश्चलचित्तस्तु योगी लोकव्यवहारे सततगत्या प्रवर्तमानोऽपि स्वरूपात् क्षणमपि यो न च्यवतेऽसौ योगी सुप्रबुद्धः इति। यथा—

"तत्त्वे निश्चलचित्तस्तु भुञ्जानो विषयानपि।
न संस्पृश्येत दोषैः स पद्मपत्रमिवाम्भसा।।
विषापहारमन्त्रादि सन्नद्धो भक्षयन्नपि।
विषं न मुह्यते तेन तद्वद् योगी महामतिः।।"

(मा०वि०तं०18,80-81)

द्र०:- 'त्रिवर्गता' ~ 'योगिनाम्' इति।

द्र०:- 'साधकः' ~ 'अवस्थाभेदतः' इत्यपि।

सुप्रबुद्धम् :— जाग्रत्तुर्या। जाग्रदवस्थाभेदविशेषः।

तं०आ०10,338 इत्यत्र 'इत्यादि' इति पदेन सूचितमेतत्।

द्र०:- 'अवस्थाभेदविस्तरः' इति।

सुप्रसन्नम् :— अहम्भावरसोन्मुखतात्मता सुषुप्तेश्चावान्तरावस्थातुर्य-सुषुप्तिसमाख्या।

यथा—

"सुप्रसन्नमित्युद्भवदहंभावरसौन्मुख्यात्।"

(तं०आ०वि०,खं०7,पृ०,179)

सुबोधमञ्जरी :— किमपि दर्शनशास्त्रं—यस्य मातृका कश्मीरसर्वकारस्य शोधविभागस्य मातृकासंग्रहे विद्यते।

यथा—

"सुबोधमञ्जर्याम् :—
"रूपादि पञ्चवर्गोऽयं विश्वमेतावदेव हि।
गृह्यते पञ्चभिस्तच्च चक्षुरादिभिरिन्द्रियैः।।' इति।"

सुभगोदयः :— महेश्वरानन्दस्य परमगुरुणा शिवानान्दनाथेन रचितः ग्रन्थः। यथा—

"यदुक्तमस्मत्परमगुरुभिः सुभगोदये :—
'पराहन्तामये संविदग्नौ संवेद्य तर्पणे।
इदन्तालक्षणं हव्यं जुहुयादबहिर्मुखः।।' इति।"

(म०मं०प०,पृ०,127)

सुभटदत्तः :— त्रिभुवनदत्तपुत्रः विश्वदत्तपौत्रः शृङ्गाररथस्य, कल्हणस्य, जयरथस्य च दीक्षागुरुः। तन्त्रालोके विवरणाख्यायाष्टीकाया निर्माता। इदानीं तद्विवरणं न लभ्यते। परमनुमीयते यत्तदनुसारमेव जयरथेन निर्मितस्तन्त्रालोक विवेक इति। यथा—

"श्री विश्वदत्तपौत्र त्रिभुवनदत्तात्मजः कुलक्रमतः।
श्री सुभटदत्त आसीदस्य गुरुर्यो ममाप्यकृतदीक्षाम्।।"

(तं०आ०वि०,खं०12,पृ०,33)

अस्येति शृङ्गाररथस्य जयरथपितुरिति। यथा—

"व्यधुस्तन्त्रालोके किल सुभटपादा विवरणं
यदर्थं यश्चैभ्यो निखिलशिवशास्त्रार्थविदभूत्।
शिवाद्वैतज्ञाप्तिप्रकटितमहानन्दविदितं
गुरुं श्रीकल्याणाभिधममुमवाप्यास्तरजसम्।।"

(तदेव,39)

सुमतिनाथ :— श्री शम्भुनाथाय बुद्धिध्यानयोगाद्युपदेष्टा गुरुः, अभिनवगुप्तस्य चात्र विषयेषु परमगुरुः।

यथा—

"इत्येतत् प्रथमोपायरूपं ध्यानं न्यरूपयत्
श्रीशम्भुनाथो मे तुष्टस्तस्मे श्री सुमतिप्रभुः।।"

(तं०आ०5,41)

श्री सुमतिः प्रभुः साक्षादेव न्यरूपयच्छ्रीशम्भुनाथाय, न श्री सोमदत्तपरम्परयेति वेद्यं सुधीभिः। यथा—

"इति श्रीसुमतिप्रज्ञाचन्द्रिकाशान्ततामसः।
श्रीशम्भुनाथः सद्भावं जाग्रदादौ न्यरूपयत्।।"

(तं०आ०10,287)

"श्रीमत्सुमति संशुद्धसद्भक्तजनदक्षिणः।।
शम्भुनाथः प्रसन्नो मे भूयाद् वाक्पुष्पतोषितः।"

(मा०वि०वा०1,3-4)

"एवं परेच्छाशक्त्यंश सदुपायमिमं विदुः।
शाम्भवाख्यं समावेशं सुमत्यन्तेनिवासिनः।।"

(तं०आ०1,213)

अत्र यज्जयरथेनोक्तम् :—

"सुमत्यन्ते निवासिनः— इति श्री सोमदेवादयः।
श्री सुमतिनाथस्य श्री सोमदेवः शिष्यः। तस्य श्री शम्भुनाथः, इति — आयाति क्रमविदः यद् वक्ष्यति श्री सोमतः सकलवित् किल शम्भुनाथः। इति।"

(तं०आ०वि०,खं०1,पृ०,236)

तदविचारितोक्तमेव मन्तव्यम्। श्री सुमतिनाथस्य श्रीशम्भुनाथं प्रति साक्षादुपदेशकत्वेनोपरितनेषु तन्त्रालोकपद्येषु स्पष्टमुक्तत्वात्।

अथवा :— सम्भाव्यमेतदपि यच्छ्रीसोमदेवः श्रीशम्भुनाथश्चोभावपि श्रीसुमतिनाथस्य शिष्यौ। तयोः पूर्वं श्रीसोमदेव एव जालन्धरपीठस्थिताया अर्धत्र्यम्बकमठिकाया अधिष्ठातृत्वेऽभ्यषिच्यत, तदनन्तरं तस्योत्तराधिकारित्वेन श्रीशम्भुनाथ इति। ततः एवायातिक्रमे श्रीसोमदेवस्योत्तराधिकारी श्रीशम्भुनाथ इति प्रसिद्धिः प्रचलिताऽभूदिति। तदनुसारमेवोक्तं जयरथेनैतत्।

सुरा :— सामान्यतो मदिरा; विशेषतश्च विभीतकोद्भवं मद्यम्। यथा—

"नातितीव्रमदा लघ्वी पथ्या वैभीतकी सुरा।।"

उद्ध०:- (तं०आ०वि०,खं०9,पृ०,39)

सुराभावना :— ~ (मूर्तियागे) :— सुरायाः विषये तां सेवमानेन साधकेनैवं भावना विधेया। यथा—

"प्रेतरूपं भवेत्पात्रं शाक्तामृतमथासवः।।
भोक्त्री तत्र तु या शक्तिः स शम्भुः परमेश्वरः।
अणुशक्ति शिवात्मेत्थं ध्यात्वा सम्मिलितं त्रयम्।।"
(तं०आ०28,88-89)

इत्थं नरशक्तिशिवात्मकतया भावनीया सुरेति।

सुविक्षिप्तम् :— स्वाप्नप्रमेयविषयः तद्दशाभेदविशेषः।

यथा—

"दूरतरदेशकालोल्लिख्यमानपदार्थसंस्पर्शात्। इत्यादि।"
(तं०आ०वि०,खं०7,पृ०,172)

द्र०:- **'अवस्थाभेदविस्तरः'** इति।

सुवीथिः :— सूर्यस्योत्तरायणमार्गः।

द्र०:- **'अजवीथिः'** इति।

सुशिवः :— ईश्वरभट्टारकादुपरि सदाशिवभट्टारकाच्चाधो मध्यभूमौ सुशिवभट्टारकस्य स्थितिः।

द्र०:- ~ 'आवरणम्' इति।

~ आवरणम् :— **सुशिवस्य याऽवस्था साऽपि सूक्ष्मतरावरणतया सम्मता सती शोध्यैव भवति दीक्षाकाले। सूक्ष्मतरविश्लेषणतस्तस्याः स्थितेः स्वीकारः। अत एव न सुशिवः पृथक् तत्त्वतया परिगणितोऽत एव च तस्य सदाशिवतत्त्व एवान्तर्भावः।**

यथा—

"स्थितिस्तस्मादीश्वरोर्ध्वे सदाशिवपदादधः।
सुशिवावरणेनोक्ता श्रीमत्स्वच्छन्दशासने।।"
(मा०वि०वा०1,407)

"ईश्वरस्य तथोर्ध्वे तु अधश्चैव सदाशिवात्।
सुशिवावरणं चोर्ध्वे तस्मिञ्ज्ञेयः सदाशिवः।।"
(स्व०तं०10,1190)

"यदेतत्सर्वविषयस्फुटेदन्ताहन्ता सामानाधिकरण्यवभासादेकमीश्वरतत्त्वमुक्तं, तदन्तरा स्फुटेदन्ताच्छादकाहन्तावभासात्मकसदाशिवतत्त्वं विना नोपपद्यते। नहि आन्तराभासं विना बाह्याभासस्योदयो भवतीत्येतदीश्वरतत्त्वमित्तिभूतेन सदाशिवतत्त्वेन भवितव्यमित्याशयेन ईश्वरस्योपरि सदाशिवतत्त्ववर्तिवक्ष्यमाणप्रधान सदाशिव भुवनस्याधः सदाशिवतत्त्वाश्रितसुशिवावरणमस्तीत्युक्तम्। सुशिवश्चेह सदाशिवभट्टारक एव। यदाह 'तस्मिञ्ज्ञेयः सदाशिवः' वक्ष्यमाणपररूपात् सदाशिवादन्योऽयमपररूप इत्यर्थः।"
(स्व०तं०उ०10,पृ०,502)

~ प्रमातारः :— (तत्र) :— **शिवभावनिष्ठाः प्रमातारः सुशिवावरणे।**

यथा—

"सुशिवावरणे रुद्राः सर्वज्ञाः सर्वशक्तिसम्पूर्णाः।
अधिकारबन्धविलये शान्ता शिवरूपिणोऽपुनर्भविनः।।"
(तं०आ०8,376)

सुषुप्तावस्था :— प्रमातुरेव केवलं स्वस्य भानं यत्र सा सुषुप्तावस्था। अत्र प्रमेयप्रमाणयोर्बीजरूपतायामेव स्थितिरधिष्ठातृरूपस्य च मायाप्रमातुः प्राधान्यम्।

यथा—

"यदा तु तत्रैवाधिष्ठातृरूपतया बीजात्मतयैव भानं तदा सुषुप्तावस्था।"
(तं०सा०,पृ०,106)

द्र०:- **'सुषुप्तिः'** इति।

सुषुप्तिः :— (1) प्रमाणप्रमेयप्रपञ्चरहिते केवले परिमिते प्रमातृतत्त्वे जीवतत्त्वापरपर्याये या स्थितिरसौ सुषुप्तिः। एषा सुषुप्तिः प्राणापानादिप्रेरिका दशा। इयमेव करणानामान्तरी वृत्तिरित्युच्यते। एषापवेद्या सुषुप्तिः। प्राणादिवृत्तिषु प्रवर्तमानास्वपि तद्वेदनाभावात्। प्राणादिनिष्ठत्वे तु सूक्ष्मतर-सुखाद्यनुभवादसौ सवेद्या सुषुप्तिः।

यथा—

"शून्ये बुद्ध्याद्यभावात्मन्यहन्ताकर्तृतापदे।
अस्फुटारूपसंस्कारमात्रिणि ज्ञेयशून्यता।।
साक्षाणामान्तरी वृत्तिः प्राणादिप्रेरिका मता।
जीवनाख्याऽथवा प्राणेऽहन्ता पुर्यष्टकात्मिका।।
तावन्मात्रस्थितौ प्रोक्तं सौषुप्तं प्रलयोपमम्।
सवेद्यनपवेद्यं च मायामलयुतायुतम्।।"
(ई०प्र०3-2-13-15)

(2) जाग्रत्कायामनुभूतौ स्वाप्ने च विकल्पे यः प्रमाता, केवलं तत्प्रकाशमात्रा या वृत्तिः सा सुषुप्तिः। प्रमेयात्मकभावाग्रहणमेव तत्र सुष्ठु सुप्तत्वम्। सौषुप्ते प्रपञ्चे नैव भावग्रहणं किमपि। तत्रत्याः प्रलयकलाः स्वात्ममात्रावभासाः।

यथा—

"अनुभूतौ विकल्पे च योऽसौ द्रष्टा स एव हि।।
न भावग्रहणं तेन सुष्ठु सुप्तत्वमुच्यते।"
(तं०आ०10,258-259)

(3) यत्र सन्नपि प्रमाताऽसन्निव भाति।

यथा—

"सुषुप्तं गाढनिद्रारूपा सुखस्वापावस्था, मनोव्यापाररयापि व्युपरमे सति यत्र व्यतिरिक्तवेद्यसंवेदनं तात्कालिकं नास्ति।"
(स्पं०वि०,पृ०,20)

"सुषुप्तावस्थायां तु सदपि चिन्तामात्ररूपं तत्त्वं मोहवशादहमित्युपलब्धृचमत्कारविरहात्।"
(तदेव,पृ०,62)

(4) विषयादिविवेचनाभावरूपा शून्यतेव दशा सुषुप्तिः। अस्यां संकुचितो मायाप्रमाता प्रकाशते, परं न तथा स्फुटं संवेत्ति, बुद्धेरपि सुषुप्तत्वात्।

यथा—

"विवेचनाभावोऽख्यातिः। एतदेव मायामयं सौषुप्तम्।"
(शि०सू०वृ०1,10)

(5) जगदवभासरहितः केवलः प्रमातुः स्वात्मनः एवावभासो मुख्यतः सुषुप्तिः। लौकिकी निद्राद्यवस्थापि

विषयग्रहणाभावमयी, जीवचैतन्यमात्रप्रकाशेति सुष्ठु प्रसुप्तता सुषुप्तिः। यथा—

"यत्त्वधिष्ठातृभूतादेः पूर्वोक्तस्य वपुर्ध्रुवम्।।
बीजं विश्वस्य तत्तूष्णींभूतं सौषुप्तमुच्यते।
अनुभूतौ विकल्पे च योऽसौ द्रष्टा स एव हि।।
न भावग्रहणं तेन सुष्ठु सुप्तत्वमुच्यते।
तत् साम्याल्लौकिकीं निद्रां सुषुप्तं मन्वते बुधाः।।
बीजभावोऽथाग्रहणं साम्यं तूष्णींस्वभावता।
मुख्या मातृदशा सेयं सुषुप्ताख्या निगद्यते।।"

(तं०आ०10,257-260)

~ अन्तर्लीनविश्वा :— **तत्र यदेवान्तर्लीनं विश्वं तदेव स्वप्नजागरयोरिदन्तात्मकतया बाह्यतयाऽवभासते।**

यथा—

"सौषुप्ते तत्त्वलीनत्वं स्फुटमेव हि लक्ष्यते।
अन्यथा नियतस्वप्नसंदृष्टिर्जायते कुतः।।

तद्यत्तत्त्वविलयसारं सौषुप्तं तत्तत्त्वोचितभावभुवनादिमयी स्वप्नसृष्टिर्विभाव्यते, यथा धरालीनस्य पर्वतारोहणम्, अबादिलीनस्य चोदन्वत्तरणादि।"

(तं०आ०वि०,खं०7,पृ०,119)

~ गुणत्रयमयी :— **सुखदुःखादिकं सूक्ष्मं सुषुप्तेनापि प्रमात्रा संवेद्यते। तदेतदुदाहरणतः स्पष्टीकृतम्।**

यथा—

सौषुप्ते तर्हि कथम् आह। .....।

"रमणीकुचकलशस्पर्शादिमयं तावन्निद्रायां सुखं, तदभावेऽपि स्वशरीरान्तर्वर्तिस्वस्थस्वभावप्राणवायुस्पर्शमयं सुखम्, अतएवास्वस्थ-प्राणवायुस्पर्शो दुःखात्मा, निद्रायां तमःसंपिण्डितप्राणमयत्वे मोहात्मा।"

(ई०प्र०वि०वि०,खं०2,पृ०,304)

~ चतुर्विधा :— **सुषुप्तेर्भेदचतुष्टयम्। तच्च नामतः उदितम्, विपुलम्, शान्तम्, सुप्रसन्नम् इति। यथा—**

"चतुर्धा रूपसंस्थं तु ज्ञातव्यं योगचिन्तकैः।
उदितं विपुलं शान्तं सुप्रसन्नमथापरम्।।"

(मा०वि०तं०2,44-45)

उद्ध०:- (तं०आ०वि०वि०,खं०7,पृ०,179)

ते च प्रकाराः :— जाग्रत्सुषुप्तिः, स्वप्नसुषुप्तिः, सुषुप्ति-सुषुप्तिः, तुर्यसुषुप्तिरिति। यथा—

"ततश्च सुप्ते तुर्ये च वक्ष्यते बहुभेदता।"

(तं०आ०9,97)

"उदासीनस्य तस्यापि वेद्यं येन चतुर्विधम्।
भूतादि तदुपाध्युत्थमत्र भेदचतुष्टयम्।।
उदितं विपुलं शान्तं सुप्रसन्नमथापरम्।"

(तं०आ०10,263-264)

~ चिन्मयी :— **परिमितसंविदात्मकस्य मायाप्रमातुर्निजे संकुचिते चित्स्वरूपे स्थितिः।**

यथा—

"जाग्रत्स्वप्नपदयोर्वेद्यसद्भावः स्फुट उक्तः।
सुषुप्ततुर्ययोः, पुनस्तदभावात् चिन्मयत्वम्।"

(ई०प्र०वि०वि०,खं०3,पृ०,333)

~ तत्त्वभेदने (एकादशात्मके) :— **प्रलयाकले वेद्ये विज्ञानाकलः सुषुप्तिस्थानीयः।**

द्र०:- **'स्वप्नः'** ~ एकादशात्मकत्वे इति।

~ (त्रयोदशात्मके) :— **विज्ञानाकलस्तच्छक्तिश्च। इति।**

~ (त्रयात्मके) :— द्र०:- **'सुषुप्तिः'**~मन्त्रमहेश्वरे इति।

~ (नवात्मके) :— द्र०:- **'सुषुप्तिः'**~विज्ञानाकले इति।

~ (पञ्चात्मके) :— द्र०:- **'सुषुप्तिः'**~मन्त्रेश्वरे इति।

~ पाञ्चदश्ये :— **सशक्तिकेन विज्ञानाकलेनानुस्यूतत्वं वेद्यत्वं च तत्र सुषुप्तिः**

द्र०:- **'स्वप्नः'** ~ पाञ्चदश्ये' इति।

द्र०:- **'अवस्था ~ भेदविस्तरः'** इति।

~ (प्रलयाकले) :— द्र०:- **'सुषुप्तिः'**~एकादशात्मकत्वे इति।

~ (मन्त्रमहेश्वरे) :— **ज्ञानशक्तिः शिवस्य।**

द्र०:- **'अवस्थाभेदविस्तरः'** इति।

~ (मन्त्रे) :— **मन्त्रमहेश्वरस्तस्य च शक्तिः।**

द्र०:- **'अवस्थाभेदविस्तरः'** इति।

~ (मन्त्रेश्वरे) :— **मन्त्रमहेश्वरता।**

द्र०:- **'अवस्थाभेदविस्तरः'** इति

~ (विज्ञानाकले) :— **मन्त्रेश्वरस्तच्छक्तिश्चेति।**

द्र०:- **'अवस्थाभेदविस्तरः'** इति।

~ (शिवतत्त्वे) :— **शिवस्येच्छाशक्तिरूपता तत्र तत्त्वे सुषुप्त्यवस्थातत्त्वभेदननीत्या।**

द्र०:- **'अवस्थाभेदविस्तरः'** इति।

~ (सप्तात्मकभेदे) :—

द्र०:- **'सुषुप्तिः'** ~ 'मन्त्रे' इति।

~ मुख्या :— **प्रलयाकलानां स्थितिः, ते हि सुचिरं कार्यकारणरहितास्तिष्ठन्ति शून्याकारा इव, न स्वात्मानमपि स्फुटतया विदन्ति। यथा—**

"एतत् कार्ममलं प्रोक्तं येन साकं लयाकलाः।
स्युर्गुहागहनान्तःस्थाः सुप्ता इव सरीसृपाः।।"

(तं०आ०9,138)

~ लौकिकी :— **प्रलयाकलादिस्थितिसाम्येन लौकिकी गाढनिद्रापि सुषुप्तिरिति कथ्यते।**

यथा—

"तत्साम्यालौकिकीं निद्रां सुषुप्तं मन्वते बुधाः।।

बीजभावोऽथाग्रहणं साम्यं तूष्णींस्वभावता।।"
(तं०आ०10,259-260)

~ व्यावहारिकभेदतः — **उक्तास्तत्प्रकारा।**

यथा—

(1) "श्रमेण चेन्निद्रा, (2) अभिघातधातुदोषादिना चेत्— मूर्छा, (3) मद्यगरोपयोगादिना चेत् मदोन्मादादि, (4) स्वातन्त्र्योत्थापितात् प्रयत्नबलाच्चेत् समाधिरित्यादयोऽवान्तरभेदाः सौषुप्तस्य।"
(ई०प्र०वि०वि०,खं०3,पृ०,337)

द्र०:- (ई०प्र०वि०,खं०2,पृ०,237) इति।

~ सामान्यलक्षणतः :— **जागरसंस्कारशेषात्मकं यद्भावरूपत्वेनाभासतेऽस्फुटमेव तत्सौषुप्तम्।**

यथा—

"अस्फुटं तु यदाभाति सुप्तं तत्तत् पुरोऽपि यत्।।"
(तं०आ०10,295)

"ततः सुषुप्तात् पुरो जागरायामपि तद् भवतीति।"
(तं०आ०वि०,खं०7,पृ०,200)

जागरे यद् भवति तदेव संस्कारमात्ररूपतयावस्थितमिति।

सुषुम्ना :— मध्यनाडी।

यथा—

"सर्वासामेव नाडीनां मध्ये या संव्यवस्थिता।
सुषुम्ना नाम सा ज्ञेया .....।।"
(स्व०तं०4,321)

क्षुभ्नादेराकृतिगणत्वेऽत्र णत्वाभावो निपातितः।

सुसमाहितम् :— स्वाप्नप्रमाविषयस्तद्दशाभेदविशेषः।

यथा—

"वैकल्पिकार्थैकतानत्वाच्चेत्येवमन्वर्थनामानः .....
.....।"
(तं०आ०वि०,खं०7,पृ०,172)

"न केवलं जागरायामेव चातुर्विध्यमस्ति, यावत् स्वप्नेऽपीति।"
(तदेव,पृ०,172)

"तत्रापि चातुर्विध्यं तत् प्राग्दिशैव प्रकल्पयेत्।।
गतागतं सुविक्षिप्तं संगतं सुसमाहितम्।"
(तं०आ०10,252-253)

सुसिद्धः :— ~मन्त्रः :— यः सद्यः एव सुतरां सिद्धिदो भवति।

द्र०:- 'मन्त्रपरीक्षा' ~ 'चक्रविधिना' इति।

~ योगी :— यो व्यवहारे व्यापृतः सन्नपि तत्त्वे निश्चलचित्तो भवति, व्यवहारजालमपि यं तत्त्वान्नैव चालयितुमलं भवेदसौ योगी सुसिद्ध इति परिभाष्यते।

यथा—

"यः पुनर्यत्र तत्रैव संस्थितोऽपि यथा-तथा।।
भुञ्जानस्तत्फलं तेन हीयते न कथञ्चन।
सुसिद्धः स तु बोद्धव्यः सदाशिवसमः प्रिये।।"
(मा०वि०तं०4,37-38)

सूक्ष्मः :— ~ कालाध्वा :— प्राणचारे यः मन्त्रोदयः स एव।

द्र०:- 'कालाध्वा' ~ परः इति।

सूक्ष्मसंस्क्रिया :— ~योगाङ्गानाम् :— सा च समर्थेन गुरुणा विधीयते शिवदृष्टिपातमात्रेण। यथा—

"शिव इत्यभिमानेन दृढेन हि विलोकनम्।।
सर्वस्य संस्क्रिया तत्त्वं तत्तस्मै यद्यतोऽमलम्।"
(तं०आ०15,413-414)

सूक्ष्माग्निसंस्क्रिया :—

यथा—

"अथवाग्नेः शिखा वामप्राणेनादाय हृज्जुषा।।
चिदग्निनैक्यमानीय क्षिपेद्दक्षेण संस्कृताम्।"
(तं०आ०15,412-413)

सूक्ष्माध्वशुद्धिः :— पञ्चकलामात्रशोधनम्। पञ्चकलासु शोधितासु तत्त्वानां भुवनानाञ्च शोधनमनायासमेव भवति स्वत एवेति कलाशोधनप्रक्रियैव सूक्ष्माध्वशुद्धिः। एवमेव वर्णाध्वशुद्धयैव कैश्चन मन्त्रपदाध्वशुद्धिर्विधीयते वर्णाध्वनि मन्त्रपदाध्वनोः समाविष्टत्वात्।

यथा—

"अनन्तर्भावशक्तौ तु सूक्ष्मं सूक्ष्मं तु शोधयेत्।।
तद्विशुद्धं बीजभावात् सूते नोत्तरसन्ततिम्।"
(तं०आ०11,84-85)

सूक्ष्मावरणम् :— वामाज्येष्ठारौद्रीणां भुवनत्रयं सूक्ष्मावरणम्। एतदैश्वरे तत्त्वे स्थितम्।

यथा—

"वामा ज्येष्ठा च रौद्रीति भुवनत्रयशोभितम्।।
सूक्ष्मावरणमाख्यातमीशतत्त्वे गुरूत्तमैः।"
(तं०आ०8,356-357)

सूत्रम् :— (1) अनेकार्थसूत्रणावद् बह्वर्थं स्वल्पं वाक्यम्।

यथा—

"यत उक्तं :— 'अनन्तार्थसूत्रणात्सूत्रम्'।"
(प०त्री०वि०,पृ०,276)

"सूत्र्यतेऽर्थो येन, तत् सूत्रम्।"
(ई०प्र०वि०वि०,खं०1,पृ०,17)

(2) वर्तुलाकाररेखालेखनोपायभूतं सूत्रं मण्डललेखन-विधौ।

यथा—

"अधस्ताद् भ्रामयेत् सूत्रं शशाङ्कशकलाकृतिं।"
(तं०आ०31,157)

(3) वृत्तार्धवृत्तकमलदलादि लेखनोपयोगिसूत्रम्।

यथा—

"मध्यभागवर्तितखण्डेन्दुकोटिं यावत् सूत्रं भ्रामयेद् येन दैर्घ्याच्चतुरङ्गुलमानः कट्याकारः सन्निवेशः पार्श्वद्वयेऽपि सिद्ध्येत्।"

(तं०आ०वि०,खं०12,पृ०,277)

(4) अक्षसूत्रम्।

यथा—

"सूत्र इत्यक्षसूत्रे।"

(तं०आ०वि०,खं०10,पृ०,364)

सूत्रवृत्तिटीकाकाराः :— ~ (ईश्वर प्रत्यभिज्ञायाः):— **ईश्वरप्रत्यभिज्ञाविषये एक एवोत्पलदेवाचार्यः सूत्रकारो वृत्तिकारष्टीकाकरश्चेति त्रिभिर्नामभिरुच्यते तत्तद् ग्रन्थांश निर्मातृत्वेन। क्वचिच्च ग्रन्थत्रयस्य भिन्नभिन्नाभिप्रायत्वमपि स्वीकृतम्। न तु तेन भिन्नभिन्नेनाभिप्रायेण ग्रन्थांशत्रय-कर्तृत्वे कश्चनापिभेदः। इयमेव हि शैली तावत् कश्मीरकाणामाचार्याणां या ध्वन्यालोकलोचने प्रयुक्ता सती एतदनभिज्ञानां विदुषामपि चेतसि शङ्काः समुत्थापयति। एक एवाचार्यो भिन्नभिन्नेष्ववसेरेषु भिन्नभिन्नानभिप्रायाभिव्यनक्तुमलं भवत्येव। अभिनवस्याभिप्रायस्याभिव्यञ्जनकाले न ते पूर्वमभिव्यक्तमभिप्रायं परिवर्तयन्ति। यथोक्तं महाभाष्य-कृता पतञ्जलिना :— "न चेदानीमाचार्याः सूत्राण्युक्त्वा निवर्तन्ते" इति। यथा—**

"अथवा सूत्रकारस्यायमेवार्थोऽभिप्रेतः, न तु टीकाकारोपक्रममेवेयं व्याख्येत्यर्थः।"

(ई०प्र०वि०वि०,खं०2,पृ०,243)

सूर्यः :— **(1) प्राणवृत्तेरिदमागमिकं पारिभाषिकं नाम।**

यथा—

"प्राणोऽवभासनेन देहादि रिक्तीकुर्वन्नेव विषयं प्रकाशयन् सूर्य इति, तत् कालो दिनम्' .....एवं विभज्यते।"

(ई०प्र०वि०वि०,खं०3,पृ०,343)

(2) प्रमाणदशावभाससम्भिन्नः प्रमातैव प्रमाणम्। प्रमाणस्य द्वादशकला :— दशेन्द्रियाणि मनो बुद्धिश्चेति। द्वादशकलात्मकत्वात् सूर्य इति प्रमाणस्य संज्ञा पारिभाषिकी। यथा—

"सूर्यं प्रमाणमित्याहुः।

स (प्रमाता) एव चाहं प्रतीतिमात्रस्वरूपः स्वस्वातन्त्र्यात् बुद्धीन्द्रियाद्यात्मना द्वादशधा प्रस्फुरन् प्रमाणदशामधिशयानः 'सूर्य' इत्युच्यते।"

(तं०आ०वि०,खं०3,पृ०,126)

"मातृमानप्रमेयाख्यं धामाभेदेन भावयेत्।
वह्न्यर्कसोमशक्तीनां तदेव त्रितयं भवेत्।।"

(तं०आ०5,24)

(3) सुस्पष्टः प्रकाशः। ज्ञानशक्तिः। प्रमाणम्। तीक्ष्णत्वं स्वभावोऽस्य।

यथा—

"प्रकाशमात्रं सुव्यक्तं सूर्य इत्युच्यते स्फुटम्।"

(तं०आ०3,120)

"सूर्यस्य शुद्धं प्रकाशमात्रमेव रूपमिति भावः। अत एव चास्य प्रमाणत्वम्, तस्य हि ज्ञानमात्रमेव विवक्षितं रूपम्।"

(तं०आ०वि०,खं०2,पृ०,124-125)

"ज्ञानशक्तिः परस्यैषा तपत्यादित्यविग्रहा।"

उद्धः:- (तदेव,पृ०,125)

प्रमाणसम्भेदेनावभासमानोऽविभागः प्रकाश एव सूर्य इति तात्पर्यम्।

~ उच्चारयोगे :— **अपानोदानयोः शशिवह्निरूपत्वं यदुक्तं तेनानुमातुं शक्यं यत् प्राणवृत्तिः सूर्यात्मिकेति। तत एव जयरथेन बुद्धिध्यानयोगस्य प्रथमसोपानत्वेन प्राणापानोदान-वृत्तीनां संघट्टभावनाप्रतिपादिता।**

"परानन्दगतस्तिष्ठेदपानशशिशोभितः।"

(तं०आ०5,46)

"उदानवह्नौ विश्रान्तो महानन्दं विभावयेत्।"

(तदेव,48)

"महार्चिषिप्रमात्रात्मन्युदानवह्नौ।"

(तं०आ०वि०,खं०3,पृ०,353)

~ कालीनये :— **बुद्ध्यन्तानि द्वादशकरणानि वस्तुप्रकाशकत्वेन सूर्य इति परिभाष्यन्ते कालीनयात्मके शाक्ते योगे।**

द्र०:- **'करणानि'** ~ 'द्वादश' इति।

~ कौले :— **शैवमानन्दचक्रं मुख्यम्।**

यथा—

"मध्यस्थपूर्णसुन्दरशशधरदिनकरकलौघसंघट्टात्।।"

उद्धः:- (तं०आ०वि०,खं०11/2,पृ०,105)

द्र०:- (तं०आ०29,152) इति।

अत्र दिनकर पदेन पौंस्नमानन्दकरणमभिप्रेतम्।

~ बुद्धिध्याने :— **प्रमाणम्।**

यथा—

"तत्र प्रमातृप्रमाणप्रमेयरूपस्य .....
वह्न्यर्कसोमत्रितयस्य .....।"

(तं०सा०,पृ०,36)

~ मातृकाक्रमे :— **स्वराः ह्रस्वरूपत्वे सूर्य इति परिभाष्यन्ते।**

यथा—

"एषां यत् प्रथमं रूपं ह्रस्वं तत् सूर्य उच्यते।।"

(तं०आ०3,131)

एकारस्य ओकारस्य च ह्रस्वमध्य एव गणना मातृकाक्रमे।

सूर्यकला :— **कर्मेन्द्रियाणि, ज्ञानेन्द्रियाणि, मनो, बुद्धिश्चेति द्वादशकरणानि प्रमाणादित्यस्य द्वादशकलाः।**

किञ्च, षष्ठवर्णान् विहाय अकाराद्याः विसर्गान्ता द्वादश स्वराः। चिदादित्यस्य कलाः ताभिरेव यतः सृष्टयादि कलना तस्य।

संकेतितमेतद्यथा :—

"बहिर्मुखेन द्वादशषष्ठवर्जमकारादि विसर्गान्ता याः कलाः परामर्शास्तत्स्वभावेन प्राप्तपरिपूर्णस्वरूपेण प्रमाणात्मना 'सूर्येण' .....।"

(तं०आ०वि०,खं०3,पृ०,368)

सूर्यरश्मयः :— ~ मातृकाक्रमे :— ते च मुख्याः अकारादिस्वरषट्काधिष्ठात्र्यः षड्देवताः इति। ताश्च दहनी, पचनी प्रभृतयः। यथा—

"स्वराणां षट्कमेवेह मूलं स्याद्वर्णसन्ततौ।।
षड्देवतास्तु ता एव ये मुख्याः सूर्यरश्मयः।"

(तं०आ०3,184-185)

"दहनी पचनी धूम्रा कर्षिणी वर्षिणी रसा।"

उद्ध०:- (तं०आ०वि०,खं०2,पृ०,181)

सूर्यरूपा :— ~ (शक्तिः)—

द्र०:- 'कृशा' ~ 'शक्तिः' इति।

सूर्यादेरप्रकाशकता :— लोके सूर्यचन्द्रादयो दीपादयश्च घटनीलादिप्रकाशकाः मन्यन्ते। परं ते नैव प्रकाशकाः, युतो नैव प्रकाशरूपाः स्वयम्। प्रकाश एव प्रकाशते। स च चित् प्रकाश एव। कीटसंविदि सूर्यः — प्रकाशते, न स्वतः। तत्रापि प्रकाशात्मतयैव प्रकाशते। ततो सूर्यदीपादेर्यत् प्रकाशकत्वं तल्लोकव्यवहारमात्रं, न वस्तुतत्त्वम्। यथा—

"अर्केन्दु दीपाद्यवभासभिन्नं न भात्यतिव्याप्ततया ततश्च।
प्रकाशरूपं तदियत् प्रकाश्यप्रकाशिताख्या व्यवहार एव।।"

(प०च०,1)

सृष्टिः :— (1) उत्तरोत्तराणां तत्त्वानां पूर्वपूर्वेभ्यस्तत्त्वेभ्यो बहिर्मुखो विकासोऽवभासरूपः।

(2) अहमिति संविद्रूपतया स्वरूपे स्थितस्य विश्वस्य भावजातस्येदमितिरूपेण भेदात्मकेन बहिर्भावेनावभासनं सृष्टिः। यथा—

"स्वरूपावस्थितमशेषं वेद्यवेदकप्रपञ्चं ततः स्वरूपाद् बहिर्भावेन निजयेच्छया बहिर्भावयन्नसौ .....।"

(ई०प्र०वि०वि०,खं०1,पृ०,4)

(3) स्वात्मस्वरूपस्य विश्वस्य स्वस्माद् भेदेनावभासनमेव तस्य सृष्टिः। सा च परमेश्वरस्यैश्वर्यलीलायाः एव विलासतो भवति। यथा—

"अकामतः सृजेत्सर्वं शक्त्या सर्वं चराचरम्।।"

(ने०तं०21,56)

(4) यः शिवस्य पराशक्तेर्बहिर्भावेनावभासोऽसावेव विश्वस्य सृष्टिः।

यथा—

"आद्यैव शक्तिः स्पन्दनशीला बहिर्विषयोन्मुखी व्यापिनी भावेन सृष्टिव्यपदेशभाजनम्।"

(म०प्र०वि०,पृ०,44)

द्र०:- (प्र०हृ०,पृ०,23,स्पं०सं०,पृ०,10) इति।

~ असाधारणी :— पशुप्रमात्रा स्वप्नसंकल्पमनोराज्यादौ कृता सृष्टिर्या नैव सर्वजनवेद्याऽसौ न सर्वसाधारणी, तत एवासाधारणी वैयक्तिकी सृष्टिः। यथा—

"तस्यासाधारणी सृष्टिरीशसृष्टयुपजीविनी।"

(ई०प्र०,4-1-9)

द्र०:- (प०पं०,17) इति।

~ आहङ्कारिकी :— करणवर्गत्रयस्य, तन्मात्रवर्गस्य च बहिर्मुखतयावभासोऽहङ्कारादेव न भूतेभ्यः।

नैयायिकाः इन्द्रियाणां पाञ्चभौतिकत्वमुपदिशन्ति, परं शैवास्तेषामाहङ्कारिकत्वमेव मन्यन्ते। इन्द्रियव्यापारेषु सर्वत्राहं शृणोमि स्पृशामीत्यादि दर्शनादहमात्मनाऽहङ्कारेण बद्धत्वमिन्द्रियाणां सिद्धम्। यथा—

"अहं शृणोमि पश्यामि जिघ्रामीत्यादि संविदि।।
अहन्तानुगमादाहङ्कारिकत्वं स्फुटं स्थितम्।"

(तं०आ०9,241-242)

~ तत्क्रमः :— सृष्टिक्रमनिरूपणे वर्तन्ते सम्प्रदायभेदाः। यतः सृष्टिप्रकाराः क्वचित्-क्वचित्-भिन्नभिन्ना एव स्वीकृताः परमत्र शास्त्रे अभिनवगुप्तादिभिरा- चार्यैर्मालिनीविजयोत्तरे समुपदिष्ट एव तत्त्वसृष्टिक्रमः स्वीकृतस्तत्त्वाध्वधारणाविषये। ततस्तन्मतमेवात्र प्रमाणम्। यथा—

"कार्यकारणभावीये तत्त्वे इत्थं व्यवस्थिते।।
श्रीपूर्वशास्त्रे कथितां वच्मः कारणकल्पनाम्।"

(तं०आ०9,48-49)

श्रीपूर्वशास्त्रं तु मालिनीविजयोत्तरम्।

~ तत्तत्त्वम् :— पारमार्थिके स्वात्मनि भासमानस्यैव जगतः स्वात्मनः सकाशात् कल्पितेन भिन्नत्वेनावभासनं हि सृष्टेस्तत्त्वम्।

यथा—

"प्रभुः सृष्टिकाले व्यवहारकाले च देहादीन्
प्रमात्रीकुर्वन्नेवान्तर्भान्तमर्थराशिं बहिर्भासयतीति।"

(ई०प्र०वि०वि०,खं०2,पृ०,316)

~ तत् त्रैगुण्यतारतम्यम् :— केवलं तमः प्रधाना सृष्टिस्तिर्यंचाम् तमोरजःप्रधाना मानवानां, रजःसत्त्वप्रधाना मुनीनाम्, सत्त्वप्रधाना पुनर्देवानाम्।

यथा—

"प्रथमां तामसीं सृष्टिं करोति तमसोत्कटाम्।"

उद्ध०:- (स्व०तं०11,247)

द्र०:- (तं०आ०वि०,खं०4/1 ,पृ०,125) इति।

"तमोरजःसमावेशान्मानवान् स सृजेत् पुनः।
रजः सत्त्वसमाविष्टः सृजेन्मुनिवरेश्वरान्।।
गतनिद्रः प्रबुद्धः स सत्त्वाविष्टो जगत्पतिः।
सृजेद् देवान् स लोकांश्च पूर्वयैव व्यवस्थया।।"

उद्धः- (तदेव,248-249)

द्रः- (तं०आ०वि०खं०4/1,पृ०,125)इति।

~ तदुपादानम् :— **न किमपि बाह्यमुपादानं मूलसृष्टेः। ततः परमेश्वरस्य पारमेश्वरी शक्तिरेव सृष्ट्युपादानकल्पापि न वस्तुतः उपादानरूपा।**

यथा—

"अकामात्संसृजेत्सर्वं जगत्स्थावरजङ्गमम्।
स्वतेजसा वरारोहे व्योम संक्षोभलीलया।।
उपादानं तु तत्प्रोक्तं संक्षुब्धं समवायतः।"

(स्व०तं०11,4)

"निरुपादानसम्भारमभित्तावेव तन्वते।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने।।"

(स्त०चिं०,9)

~ तद्रूपा शक्तिः :— **द्रः- 'पूर्णाशक्तिः'** इति।

~ तन्नयासः :— **षोढान्यासे द्वितीयो मातृकान्यासनामा।**

यथा—

"सृष्टिर्मातृका यदुपरि मालिनी।"

(तं०आ०वि०,खं०9,पृ०,123)

~ तन्मूलकारणम् :— **(1) परमनुत्तरमेव पारमेश्वरं तत्त्वं सर्वस्याः सृष्टेर्मूलकारणम्। स परमेश्वर एव स्वशक्तेर्बहिरभिव्यक्त्या शिवादिधरण्यन्ततया स्वयं भासते सततम्। यथा—**

"तदेव ह्यनुत्तरं महाप्रकाशात्म अन्तःकृतबोधमयविश्वभाव-प्रसरम्, अनुत्तरत्वादेव निरतिशयस्वातन्त्र्यैश्वर्यचमत्कारभराद् भेदं विकासयति।"

(प०त्री०वि०,पृ०,38)

(2) शिवस्य नैसर्गिकस्वभावभूतस्य परमेश्वरत्वस्य सततपरिस्पन्दमानतैव, न पुनः करुणा वैशेषिकाद्यभिमता। करुणा तावत् क्वचिदेव सृष्टिसोपाने सहकारिकारणतामियात्। मूलसृष्टौ तस्या न कारणता। तस्याः अपि सृष्टत्वात्। एवमेवोपाधितयाङ्गीकृताऽविद्या वा माया वाऽपि न तन्मूलकारणम्, तयोरपि सृष्टत्वं यतः। यथा—

"पञ्चप्रकारकृत्योक्तिशिवत्वान्निजकर्मणे।
प्रवृत्तस्य निमित्तानामपरेषां क्व मार्गणम्।।"

(शि०दृ०1,12-13)

शिवत्वमत्र परतत्त्वस्य परमेश्वरत्वम्। तदेव सृष्टयादि मूलकारणमिति।

~ मालिनीमते :— **गुणत्रयमध्ये विशेषगुणयुक्तादहङ्कारादि-न्द्रियादि तत्त्वविशेषाणां योत्पत्तिस्तत्र मतानामनेकत्वम्। परं त्रिके मालिनीमतमेव प्रमाणम्। यथा—**

"श्री पूर्वशास्त्रे तु मनो राजसात् सात्त्विकात् पुनः।।
इन्द्रियाणि समस्तानि युक्तं चैतद्विभाति नः।
तथा हि बाह्यवृत्तीनामक्षाणां वृत्तिभासने
आलोचने शक्तिरन्तर्योजने मनसः पुनः।
उक्तं च गुरुणा कुर्यान्मनोऽनुव्यवसायि सत्।।
तद् द्वयालम्बना मातृव्यापारात्मक्रिया इति
तन्मात्रस्तु गणो ध्वान्तप्रधानाया अहङ्कृतेः।।
अत्राविवादः सर्वस्य ग्राह्योपक्रम एव हि।"

(तं०आ०9,276-280)

~ शाम्भवी :— **अविकल्पतयाऽऽत्मनो विश्वात्मता-विमर्शनं शाम्भवी सृष्टिः।**

यथा—

"अविकल्पस्फुटाभासा सा सृष्टिः शाम्भवी मता।"

(प०पं०,12)

~ साधारणी :— **परमेश्वरकृता तत्त्वभुवनभावादि-सृष्टिर्यस्याः उपयोगं सर्वे जनाः साधारणतया कर्तुं समर्थाः।**

"साधारणोऽन्यथा चैशः सर्गः स्पष्टावभासनात्।"

(ई०प्र०4-1-11)

द्रः- 'साधारणी' ~ 'सृष्टिः' इति।

~ स्वतन्त्रा :— **यथा योगी स्वयमपरिणमन्नेव स्वेच्छा-प्रयोगमात्रतो भावान् सृजति तथा परमेश्वरोऽपि विश्वम्। यथा—**

"तस्य तु परस्य यादृगात्मत्वमभीष्टं तथावस्थानमेवोत्पत्तिर्योगि-नामिव।"

(शि०दृ०वृ०,पृ०,111)

शिवः सृष्टजगद्रूपतया स्वयमवतिष्ठते इत्यभिप्रायः।

"शिवस्य तादृगात्मत्वमुत्पद्येतात्र योगिवत्।।
इच्छया सर्वभावत्वमनेकात्मत्वमेव च।
नात्र स्वात्मविकारेण जनयेद् भावमण्डलम्।।"

(शि०दृ०3,34-35)

सृष्टिकाली :— भावान् पूर्वं संविदोऽन्तरेव कलयन्ती शिवस्य शक्तिः। अन्तःकलनां बिना बहिःकलनाया असम्भवात्। कुम्भकारोऽपि प्रथमं घटादि स्वबुद्धावन्तः कलयति संकल्पयत्नादिकाले।

यथा—

"संवित् पूर्वमन्तरेव भावं कलयति।"

(तं०सा०,पृ०,29)

~ क्रमस्तोत्रे :— **क्रमस्तोत्रे सिद्धनाथीये उपासनाप्रसङ्गे ध्यानोपयोगनीत्या वर्णनं सृष्टिकाल्याः इत्थम्।**

"श्रीक्रमस्तोत्रेऽपि :—

'कौलार्णवानन्दघनोर्मिरूपामुन्मेषमेषोभयभाजमन्तः।
निलीयते नीलकुलालये या तां सृष्टिकालीं सततं नमामि।।'
इति।"

(सिद्धनाथीयेस्तोत्रे)

उद्धः- (तं०आ०वि०,खं०3,पृ०,158)

अभिनवगुप्तीये :—
"परासृष्टिर्लीना हुतवहमयी यात्र विलसत् (सेत्)
परोल्लासौन्मुख्यं व्रजति शशिसंस्पर्शसुभगा।
हुताशेन्दुस्फारोभयविभवभाग् भैरवविभो
तवेयं सृष्ट्याख्या मम मनसि नित्यं विलसतात्।।"
(क्र०स्तो०,15)

प्रमेयसृष्टिकलनोद्भाविनीयं सृष्टिकाली।

यथा—
"एवं प्रमेयगतं सृष्टिस्वरूपमभिधाय .....।"
(तं०आ०वि०,खं०3,पृ०,159)

~ चिद्गगनचन्द्रिकायाम् :—
"विश्वसंहृतिपदे लयोज्झिते लीयसे यदि निरंशतः शिवे।
सृष्टि काल्यसि यया बहिः पदे क्षिप्तमम्ब जगदाशु गृह्यते।।"
(चि०ग०चं०,224)

~ तन्त्रालोकादौ :— **संवित्तत्त्वस्य सिसृक्षात्मिका कलनशक्तिर्ययाऽनतिरिक्तस्यापि प्रमेयवर्गस्यातिरिक्तायमानतया संविदन्तरेवभासनं भवति सा संविच्छक्तिः सृष्टिकाली। शाक्तोपायात्मककाल्युपासनक्रमे साधक एतां प्रमेयसृष्टेः कलनकारिणीं पारमेश्वरीं शक्तिं स्वसंविदन्तर्गततया साक्षात्कुर्वंस्तामात्मसात्करोति।**

यथा—
"संवित् पूर्वमन्तरेव भावं कलयति।"
(तं०सा०,पृ०,29)

"ततश्च प्रागियं शुद्धा तथाभासनसोत्सुका।
सृष्टिं कलयते देवी तन्नाम्नागम उच्यते।।"
(तं०आ०4,148)

"स्वात्मानतिरेकेऽपि अतिरेकायमाणतया यत् स्वातन्त्र्याद् भासनं, तत्र सोत्सुका—सिसृक्षायोगिनी सती, सृष्टिं कलयते—बहिरासूत्रितप्रायं भावजातं विमृशति।"
(तं०आ०वि०,खं०3,पृ०,158)

~ पञ्चशतिके :— **जगत्सृष्टिक्षमासंविदःकलनशक्तिः तस्याः यस्यां शक्तावन्तर्भवति सा शक्तिः सृष्टिकालीति पञ्चशतिकातात्पर्यम्।**

यथा—
"मन्त्रोदया व्योमरूपा व्योमस्था व्योमवर्जिता।
सर्वा सर्वविनिर्मुक्ता विश्वस्मिन् सृष्टिनाशिनी (भासिनी)।।
या कला विश्वविभवा सृष्टयर्थकरणक्षमा
यदन्तः शान्तिमायाति सृष्टिकालीति सा स्मृता।"
उद्ध०:- (पञ्चशतिकात्) (तं०आ०वि०,खं०3,पृ०,158)

सृष्टिकृत्यम् :— परमेश्वरस्य पञ्चकृत्येषु प्रथममिदं कृत्यम्। स्वात्मनि चिद्रूपतया शक्तिरूपतया च सदास्थितं सदाशिवाधिरान्तं विश्वं परमेश्वरः स्वलीलया स्वात्मप्रकाशभित्तौ-बहिर्मुखतया प्रतिबिम्बयन् सर्वमिदं स्वात्मनो भिन्नतया, प्रमेयतया प्रतिफलितं सत् तथा तथैवावभासयति। तदेतदस्य सृष्टिकृत्यम्। अभिन्नस्यापि जगतो भिन्नतयावभासनम्, अहंरूपतया स्थितस्यापि तस्येदं रूपतयाऽप्यवभासनम्, अन्तः सदाविद्यमानस्यैव बहिरप्यवभासनम्, प्रमातृशक्तिरूपतया स्थितस्यापि प्रमेयतत्त्वादिरूपतयाऽवभासनम्। इत्यादि बहुप्रकारकम्। यथा—

"सृष्टिसंहारकर्तारं विलयस्थितिकारकम्।
अनुग्रहकरं देवं प्रणतार्तिविनाशनम्।।"
(स्व०तं०1,3)

सृष्टिश्रुतिः :— एतस्मादात्मनः आकाशः सम्भूतः आका- शाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिपी इति श्रुति वाक्यम्।

अस्याः श्रुतेस्तत्पर्यमेतत् :— आकाशभूताच्छब्दतन्मात्रात् स्पर्शतन्मात्रसहकृताद्वायोः सृष्टिः। पूर्वतन्मात्रद्वयसहकृतादेव रूपतन्मात्राादग्नेः सृष्टिः। एवमेवाग्रेऽपि तदन्ते तन्मात्रचतुष्टयसहकृतादेव गन्धात् पृथिव्याः सृष्टिरिति। एवं व्याख्याने एव सृष्टिश्रुतिर्युक्तियुक्ताऽवभाति नान्यथा। इत्यादि

द्र०:- (ई०प्र०वि०वि०,खं०,3, पृ०,299) इति।

~ तद्रहस्यम् :— **साधकस्तत्त्वाध्वधारणायां स्थूलस्थूलं तत्त्वं सूक्ष्मसूक्ष्मतत्त्वे। विलीनंभावयँस्तत्तत्तत्त्वसिद्धीः सर्वाः आसादयितुमलं भवति। तत एव तथाविधा सृष्टिश्रुतिः सप्रयोजनासिद्धयति। दीक्षाकाले च तत्त्वशुद्धौ सौकर्यं भवति। न चात्राभिप्रायः सर्वथा स्पष्टतामुपयाति। ततो विद्वद्भिरत्र पुनर्विचारणीयम्। कदाचित् मूलविवृत्तौ लब्धायामाशयः स्पष्टतां यायादिति सम्भाव्यते।**

यथा—
"यदि ह्याकाशमेव गुणान्तरस्पर्शाधिक्यात् वायुरित्येषा दिक् न भवेत्, तदा शब्दस्पर्शाभ्यां स्पर्शादेव वायोर्जन्म; एवमुत्तरेषां, ततः पूर्वस्य महाभूतस्योत्तरं प्रति कथं कारणत्वं स्यादित्याशयः। ननु किमर्थं शैवसाङ्ख्यादय इत्थमाहुः। उच्यतेः — 'अस्य क्रमस्य,' इति। पृथिवीधारणायां जितायां पृथिवीमपि जलविलीनां भावयन् योगी जलमेव पश्यंस्तत् सिद्धीः प्रतिपद्यते यावदाकाशैकलीनानि शून्यैकताभाञ्जि पूर्वमहाभूतानि भावयन्नाकाशसिद्धीः। दीक्षाकालेन च विशुद्धं पूर्वतत्त्वं धरामप्सु उत्तरत्र योजनीयमिति योजनासु निरूपितम्:—

'येषामध्यवसायोऽस्ति न विद्यां प्रत्यशक्तितः।
सुखोपायमिदं तेषां विधानमुदितं गुरोः।।'

इति ह्यागमे दीक्षायोजनं सर्वानुग्राहि पुक्तम्। तत्र कारणे कार्यस्य प्रविलयो योजनं च"।
(ई०प्र०वि०वि०,खं०3,पृ०,299)

सृष्टिसंहाराः :— बहिर्मुखतयाऽन्तर्मुखतया च पारमेश्वर- स्वरूपाभिव्यक्तिमया एव हि ते वस्तुतः।

यथा—
"एवमस्य स्वतन्त्रस्य निजशक्त्युपभेदिनः (भोगिनः)।
स्वात्मगाः सृष्टिसंहाराः स्वरूपत्वेन संस्थिताः।।"
(बो०प०द०,9)

~ तत्कर्तारः :— **तन्त्रालोकतद्विवेकानुसारमेवमत्र विषये निष्कर्षः :—**

(1) पार्थिवेऽण्डे सृष्टिकृद् ब्रह्मा, संहारकृत् कालाग्निरुद्रः। यथा—

"ब्रह्मदिनान्ते कालाग्निदग्धे लोकत्रयेऽन्यत्र च लोकत्रये-धूमप्रस्वापिते सर्वे जना वेगवदग्निप्रेरिता जनलोके प्रलयाकलीभूय तिष्ठन्ति। प्रबुद्धास्तु कूष्माण्डहाटकेशाद्या महोलोके क्रीडन्ति। ततोनिशासमाप्तौ ब्राह्मी सृष्टिः"।

(तं०सा०,पृ०,55)

(2) प्राकृतेऽण्डे सृष्टिसंहारोभयकर्ता श्रीकण्ठनाथः। यथा—

"ततश्च ब्रह्मा रुद्राश्च अबाद्यधिकारिणोऽव्यक्ते तिष्ठन्ति इति।

श्री कण्ठनाथश्च तदा संहर्त्ता एषोऽवान्तरप्रलयः, ततक्षये सृष्टिः"। (तदेव)

(3) मायीयेऽण्डे सृष्टिसंहारोभयकर्त्ता श्री गहनेशापर-पर्यायोऽनन्तनाथः। यथा—

"तत्कञ्चुकवासिनां रुद्राणां दिनम्, तावतीत्येव क्षपा। तस्यां च समस्तमेव मायायां विलीयते पुनर्गहनेशः सृजति"

(तं०सा०,पृ०,55)

(4) शुद्धाध्वरूपे शाक्तेऽण्डे सृष्टिकृत् स्वयं शिवः संहाराकृच्चगहनेश एव इति। यथा—

"इति शुद्धोऽध्वा। इयति साक्षाच्छिवः कर्त्ता"।।

(तं०सा०पृ०,75)

"शुद्धेऽध्वनि शिवः कर्त्ता, प्राक्तोऽनन्तोऽसिते प्रभुः"।

उद्धः- (तं०आ०वि०,खं०6,पृ०,56)

~ तद्विमर्शरहस्यम् :— **रहस्योपासनविधौ अ-ह-म्-इति बहिर्मुखः सृष्टिप्रधानः स्वात्मविमर्शः म्-ह-अ- इति च संहारक्रमेण स एवान्तर्मुखः परिपूर्णो विमर्शः। रहस्यात्मकोऽयं विमर्शः।**

यथा—

"केवलमत्र शक्तिमत्प्राधान्यं संहाररूपेण म्-ह-अ इत्येवं रूपम्"।

(प०त्री०वि०,पृ०,63)

सृष्ट्यादित्रयकारणम् :— जगत्सृष्टिस्थितिसंहाराणां मूलकारणमीश्वरेच्छैव, परं सहकारिकारणं तत्र मलं, कर्म माया च। अत एवैषा सृष्टिः सापेक्षेण परमेश्वरेण न पुनः पूर्णपरमेश्वरेणैव साक्षाद् विधीयते। स सापेक्षः परमेश्वरो भगवाननन्तनाथः। स जीवानां मलं, कर्म चापेक्ष्य तदनुसारमेव मायोपादानां कञ्चुकादि सृष्टिं कुरुते। अग्रेऽप्यवरो यः सापेक्षपरमेश्वरो भगवाञ्छ्रीकण्ठनाथः, सोऽपि प्रकृतिमुपादाय जीवगतमलकर्मानुसारमेव करणकार्यतत्त्व सृष्टिं विदधाति। एवमेव ब्रह्मादयः कारणपरेमश्वराः अपि सापेक्षा एव सृष्ट्यादिकरणे। परं तिरोधानकृत्यमनुग्रहकृत्यञ्च परिपूर्णः परमेश्वरः केवलं निजया स्वतन्त्रयेच्छयैव करोति कारयति च तत्तद् गुरुमुखेन मल-कर्म-मायाः अनपेक्ष्य एव। यथा—

"इत्थं सृष्टिस्थितिध्वंसत्रये मायामपेक्षते।।
कृत्यै मलं तथा कर्म शिवेच्छैवेति सुस्थितम्"।

(तं०आ०13,113-114)

सृष्टयादीनि :— तानि हि सृष्टिः, स्थितिः, संहारः, पिधानम् (विलयः), अनुग्रहश्चेति पञ्च पारमेश्वराणि लीलामयानि कृत्यानि।

द्र०:- 'सृष्टि': इति।

~ अच्यावकानि :— **सृष्टयादिप्रपञ्चमवभासयन्नपि, पारमैश्वर्यलीलां चाभिनयन्नपि परमशिवोऽनुत्तरात् स्वातन्त्र्य-मयात् स्वरूपान्मनागपि नैव च्यवते, अस्य प्रपञ्चस्य प्रतिबिम्बन्यायेनावभासमानत्वात्।**

यथा—

"तत् प्रवृत्तावप्यनिरासः संवेत्तृभावात्"।

(शि०सू०3,32)

"तेषां सृष्टयादिभावानां प्रवृत्तावपि चिद्विभुः।।
स्वस्थितिं न जहात्येव सदा संवेत्तृभावतः।।"

(शि०सू०वा०भा०,पृ०,73)

~ तद्विषया :— **सदाशिवादारभ्य धरान्तानि चतुस्त्रिंशदपि तत्त्वानि सृज्यन्ते संह्रियन्ते च परमेश्वरेण। षट्त्रिंशत्तत्त्वानीति न तावत् सृष्टिसंहारसिद्धान्तोऽपि तु तत्त्वाध्वधारणोपयोगी सिद्धान्तः। षट्त्रिंशतामपि तत्त्वानां यदेकाकारं स्वरूपं तत् परमशिवतत्त्वम्। शिवतत्त्वं शक्तितत्त्वं चेति या तत्त्वद्वयविभागकल्पनाऽसौ परमशिवस्यैव कूटस्थं स्थिरत्वं चलत्तावभासरूपं च स्पन्दनशीलत्वमितिद्वयमभिप्रेत्य शास्त्रकृद्भिः कल्पितम्। वस्तुतो यः शिवः सैव शक्तिः। विश्वोत्तीर्णतादृष्टौ यत् परतत्त्वं शिवाख्यं, तदेव विश्वात्मकसृष्टि- संहारादिकर्तृत्वदृशा शक्तिरित्युच्यते। शिष्यजनावबोधनार्थं केवलम्। दस्तुतः शिवः, शक्तिः, परमशिवश्चैकमेव परात् परतरं तत्त्वं सर्वेतरतत्त्वोदयास्तमयभूमिरूपम्। ततः सृष्टिसहारौ येषां तत्त्वानां दर्पणनगरन्यायेन भवतस्तानि तावत् सदाशिवात् प्रभृति पृथिव्यन्तानि चतुस्त्रिंशदेव। परं तथापि तत्त्वाध्वधारणायां, सृष्टिसंहारकालाध्वधारणायां चोपास्ति विशेषोपयोगितया तत्त्वसंख्या षट्त्रिंशन्मिता स्वीकृता सर्वैरप्यागमपारगैः शिवयोगिभिः। ततः सर्वाणि तत्त्वान्येक-तत्त्वस्वरूपाणि, एकञ्च तत्त्वं सर्वतत्त्वस्वरूपं द्रष्टव्यं भावनया शिवयोगिभिः।**

यथा—

"श्रीमत्सदाशिवोदारप्रारम्भं वसुधान्तकम्।
यदन्तर्भाति तत्त्वानां चक्रं तं संस्तुमः शिवम्।।"

(ई०प्र०वि०वि०,खं०2,पृ०,186)

~ तन्मूलकारणम् :— **परमेश्वरस्य पारमैश्वर्यात्मिका या परा शक्तिरसौ तस्य लीलात्मकक्रीडारूपतयाऽवभासमाना सती सृष्टिसंहारादिरूपतया प्रकाशते। ततः परमेश्वरः**

स्वस्वभावभूतया पारमैश्वर्यलीलया युगपदेव सृष्ट्यादि-कृत्यपञ्चकं बहुधा कुरुते। यथा—

"एष देवोऽनया देव्या नित्यं क्रीडारसोत्सुकः।
विचित्रान् सृष्टिसंहारान् विधत्ते युगपद् विभुः।।"
(बो०प०,द०,6)

"तस्मादनुत्तरो देवः स्वाच्छन्द्यानुत्तरत्वतः।।
विसर्गशक्तियुक्तत्वात् सम्पन्नो विश्वरूपकः।"
(तं०आ०3,195-196)

~ पारमेश्वरस्पन्दमयानि :— **पारमेश्वरे चिदानन्द-स्फुरत्तामये परस्पन्दमध्ये एव ब्रह्मविष्ण्वादिकृता अनन्ताः सृष्टिसंहारादयः सततमुदयलयभाजः।**

यथा—

"इह सृष्टिलयस्थितिक्रमाः शतशो वापि सहस्रकोटिशः।
प्रविभान्ति सदातनात्मना हरविष्ण्वम्बुजहेतुसञ्चिताः।।"
(मा०वि०वा०2,25)

सेवा :— लक्षजपादिसाधना सेवा।

यथा—

"स्वकल्पाम्नातायां लक्षजपादिरूपायां सेवायां कृतायामपि .....।"
(तं०आ०वि०,खं०3,पृ०,68)

सोम :— (1) प्रमेयस्य सोम इति संज्ञा पारिभाषिकी शैवागमेषु प्रसिद्धा। सूर्यप्रकाशेन सोमस्य प्रकाशमानत्वात्, प्रमाणस्य च सूर्यसंज्ञकत्वात्।

यथा—

"प्रकाश्यवस्तुसारांशवर्षि तत् सोम उच्यते।।
सूर्यं प्रमाणमित्याहुः सोमं मेयं प्रचक्षते।
अन्योऽन्यमवियुक्तौ तौ स्वतन्त्रावप्युभौ स्थितौ।।"
(तं०आ०3,120-121)

"प्रमाणं नाम च ज्ञानम्, तच्चोपाश्रयशून्यं न क्वचिदपि सम्भवतीत्यवश्यमेव मेयाक्षेपेण वर्तते, इति तदप्यत्रान्तर्भूतमेव, तदाह :—'सूर्य एव' इत्यादि, 'सोमः' प्रमेयम्।"
(तं०आ०वि०,खं०3,पृ०,126)

(2) क्रियाशक्तिः परमात्मनः।

यथा—

"यतः क्रियाशक्त्यात्मा सोमः।"
(तं०आ०वि०,खं०3,पृ०,144)

"क्रियाशक्त्यात्मा सोमः।"
(तदेव,पृ०,145)

(3) सकारात्मा बीजमन्त्रः। यथा—

"सोमः सः।"
(तं०आ०वि०,खं०11/2,पृ०,137)

~ बुद्धिध्याने :— **प्रमेयमेव।**

यथा—

"तत्र प्रमातृप्रमाणप्रमेयरूपस्यवह्न्यर्कसोमत्रितयस्य संघट्टं ध्यायेत्।"
(तं०सा०,पृ०,36)

~ मातृकासु :— **स्वराणामेव दीर्घत्वे सोम इति संज्ञाऽऽगमिकी।**

यथा—

"क्षोभानन्दवशाद् दीर्घं विश्रान्त्या सोम उच्यते।"
(तं०आ०3,135)

सोमदेव :— जयरथस्य मतेन श्रीसुमतिनाथस्य शिष्यः श्रीसोमदेवः, तस्य च श्रीशम्भुनाथ इति। परं नैतन्मतं साधु, श्रीसुमतिनाथस्य श्रीशम्भुनाथं प्रति साक्षादुपदेशकत्वं यतोऽनेकशः स्पष्टमेव कथितं तन्त्रालोके।

द्र०:- **'सुमतिनाथः'** इति।

एतत् सम्भाव्यते यच्छ्रीशम्भुनाथस्य रहस्यशासन-दीक्षागुरुः श्रीसुमतिनाथ एव। जालन्धरपीठस्थितायाः अर्धत्र्यम्बकमठिकायास्तत्पूर्वोऽधिष्ठाता श्रीसोमदेवः, तत एवायाति क्रमे श्रीशम्भुनाथः श्रीसोमदेवस्योत्तराधिकारीति-संस्तच्छिष्यत्वेन प्रसिद्धो लोकपरम्परायामिति।

सोमराज :— कोऽपि कालीनयोपासको ग्रन्थकृत्।

यथा—

"तदुक्तं स्वपारम्पर्यं व्याचक्षाणेन श्रीसोमराजेन।"
(तं०आ०वि०,खं०3,पृ०,196)

सोमरूपा :— ~शक्तिः :— परिपूर्णा शक्तिः।

द्र०:- **'पूर्णाशक्तिः'** इति।

सोमशम्भुः :— कश्चनाचार्यः कस्यापि शैवदर्शन-ग्रन्थस्यकर्त्ता। तस्य ग्रन्थोऽपि कदाचित्तन्नाम्नैवोच्यते स्म।

यथा—

"तथा च सोमशम्भु :—
'अथ हूहुककालाग्निरुद्रौ हाटक एव च'। इत्यादि।"
(तं०आ०वि०,खं०5,पृ०,19)

सोम-सूर्य-वह्नयः :— (1) तत्र भावजातप्रपूरकः सृष्टिक्रमः सोमः। भावजातस्थापकः स्थितिक्रमः सूर्यः— भावजातविलापकः संहारक्रमो वह्निः। एतास्तावदागमिक्यो रहस्यपरिभाषाः।

यथा—

"प्रथमं तद् बाह्यं सोमरूपतया सृष्टिक्रमेण प्रपूरितं ततोऽर्करूपतया स्थित्यावभासितम् ततोऽपि संहारवह्निरूपतया विलापितम्।"
(तं०सा०,पृ०,36)

(2) सोमः प्रमेयम्, सूर्यः प्रमाणम्, वह्निः प्रमाता, एता अप्यागमिक्यो रहस्यपरिभाषाः एतस्य त्रयस्य।

यथा—

"तत्र प्रमातृप्रमाणप्रमेयरूपस्य वह्न्यर्क सोमत्रितयस्यसंघट्टं ध्यायेत्।।"
(तं०सा०,पृ०,36)

सोमसूर्यौ :— साधनाप्रक्रियासु प्रमेयं प्रमाणं चोभौ सोमसूर्यावित्युच्येते।

यथा—

"अन्योऽन्यमवियुक्तौ तौ स्वतन्त्रावप्युभौ स्थितौ।"

(तं०आ०3,121)

सोमानन्दः :— (1) शिवदृष्ट्यादिग्रन्थरत्नप्रणेता त्र्यम्बकमठिकायाः विंशतितमो गुरुः, आनन्दस्य पुत्रः।

यथा—

"आनन्दसंज्ञकस्तस्मादुद्बभूव तथाविधः।
तस्मादस्मि समुद्भूतः सोमानन्दाख्य ईदृशः।।
करोमि स्म प्रकरणं शिवदृष्ट्यभिधानकम्।।"

(शि०दृ०7,120-121)

शिवदृष्टिरेव पराद्वैतशैवदर्शनस्य सर्वप्रथमो दार्शनिकशैल्या विरचितो ग्रन्थः।

(2) अभिनवगुप्तस्य परमेष्ठी गुरुः। तत्रेयं गुरुपरम्पराः— (क) अभिनवगुप्तः, (ख) लक्ष्मणगुप्तः, (ग) उत्पलदेवः, (घ) सोमानन्दः इति यथाक्रममुत्तरे त्रयोऽस्य गुरु-परमगुरु- परमेष्ठिगुरव इति। यथा—

"तदुक्तं श्रीपरमेष्टिपादैः शिवदृष्टौ:—
घटो मदात्मना वेत्ति वेद्मयहं च घटात्मना।
.....
.....।"

(ई०प्र०वि०वि०,खं०1,पृ०,110)

(3) उत्पलदेवस्य गुरुः।

यथा—

"इति प्रकटितो मया सुघट एष मार्गो नवो
महागुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा।"

(ई०प्र०,4-2-1)

महागुरुरत्र तत्रभवान् सोमानन्दः, शिवदृष्टिशास्त्र-प्रणेता। प्रतीयते यद् भट्टकल्लटादयोऽप्यस्य गुरवः। अत एव सोमानन्दनाथेन साकं निजं विशेषसम्बन्धं द्योतयितुं महागुरुरिति शब्दप्रयोगः कृतः।

~ तच्छैली :— **सोमानन्दस्तावत् परपक्षं सम्यगवबुध्य तद्बोधानुसारमेव तस्य परीक्षणं कुरुते, न पुनः स्वपक्षविरोधमात्रतः तन्निरस्यति। उभयपक्षज्ञानपूर्वकमेव विचारणीयानि दर्शनतत्त्वानीतीदृशी तेषां शैली।**

यथा—

"तेषां ईदृशी शैली :—
'स्वपक्षान् परमक्षाँश्च निःशेषेण न वेद यः।
स्वयं स संशयाम्भोधौ निमज्जँस्तारयेत्कथम्।।' इति।"

(प०त्री०वि०,पृ०,117)

अत एव श्रीसोमानन्देन शिवदृष्ट्याः षष्ठे आह्निके विज्ञानवादस्यैव परीक्षणमतिविस्तरेण कृतं, बौद्धवादस्यैव मुख्यपूर्वपक्षत्वात्। अन्यैश्च बादरायणशङ्कराचार्यवाचस्पति-प्रभृतिभिर्दर्शनविद्याशास्त्रार्थमहारथिभिर्नैव कृतो मनागपि न्यायो विज्ञानवादं प्रति। अविचार्यैव स्वप्रौढोक्त्या तन्निरसनं कृतं तैः।

~ तद्ग्रन्थान्तरम् :— **श्रीसोमानन्देन परात्रीशिकायाः काचन विवृतिर्निर्मिताऽभूत। तस्य वाक्यानि समुद्धृतानि निजे परात्रीशिकाविवरणेऽभिनवगुप्ताचार्येण। परं पुस्तकं तद् दुखापम्।**

यथा—

"सोमानन्दपादैरपि निजविवृत्तौ :—
भगवत्या रतस्थायाः प्रश्न, इति परैकमयत्वेऽपि तन्मयमहदन्तरालाभिप्रायेण।।" इति

(प०त्री०वि०,पृ०,52)

"यत्तु श्रीसोमानन्दपादाः :— अकारः शिव इत्युक्तस्थकारः शक्तिरुच्यते।" इति।

(तदेव,पृ०,99)

द्र०:- ~ **'महामहिममण्डितः'** इति।

~ तद्वसतिस्थलम् :— **सोमानन्दस्तु कश्मीरक इत्यत्र नास्ति कोऽपि विवादस्यावकाशः। परं कश्मीरेषु कुत्रास्य निवासभूमिरित्येतद् विषये न किमप्युक्तं तेन, उत्पलदेवेन वा, अभिनवगुप्तेन वा। हस्सनशाहराज्ये 1472-1484 ई० कश्मीरेषु निवसता द्वितीयेन शितिकण्ठेन जगद्धरभट्टकृत-बालबोधिन्या न्यासे स्वपूर्वजस्य कस्यचिन्निग्रहानुग्रहकरणे समर्थस्य शिवानुग्रहपात्रस्य सिद्धस्य सोमस्य नामकीर्तनं कृतमस्ति। चेदसौ सोमः सोमानन्द एव तर्हि तस्य निवास-स्थानं पद्मपुरम्, पाम्पुर इत्यधुना ख्यातम्। तदुक्तं बाल-बोधिनीन्यासस्यारम्भे शितिकण्ठेन। यथा—**

"विद्यातीर्थविहारशालिनि परं श्रीशारदासंश्रये
कौबेर्यां हरितो ललाटतिलके काश्मीरदेशेऽभये।
यच्छ्रीपद्मपुरं पुरन्दरपुरप्रोद्यत्प्रभं भासते
तत्राचार्यवरो बभूव भगवान् सोमः स सोमप्रभः।।
यः सिद्धामृतशम्भुदर्शितमहाविधः सतां मस्तकः।
शापानुग्रहकृद्वितानपरमः सोमस्तदीयेऽन्वये।।
विद्यावानवतारकः समुचितः ..... इत्यादि।"

(रत्नकण्ठटीकायुतस्तुतिकुसुमाञ्जलेरन्ते)।

कल्हणेन श्रीनगर्युपकण्ठे कस्मिंश्चिच्छ्मशाने श्रीसोमानन्द प्रतिष्ठापितस्य सोमेश्वरमन्दिरस्य वर्णनं युद्धे हर्षदेव वीरगतिवर्णनप्रसङ्गेन कृतमस्ति। परं तेन प्रसङ्गेन श्री सोमानन्दस्य निवासस्थानं प्रति न कोऽपि सङ्केतः क्रियते। सोमानन्दवंशीया "त्र्यम्बि" इति ख्याता जना इदानीमपि कश्मीरेष्वनेकेषु पत्तनेषु ग्रामेषु च लभ्यन्ते। परं सर्वेऽपि तु इदानीं मौसुलमतानुयायिन एव। यद्यपि विवेकभाजो बुद्धिविभवशालिनो धनाढ्याश्च।

डॉ० श्रीनाथ टिक्कू नामकस्य कश्मीरविदुषो विचारे श्रीसोमानन्दनाथस्य निवासस्थानं पद्मपुरसमीपस्थे सिंहपुरे (इदानीं "स्यम्पोर" इति ख्याते) आसीत्। तेषां मत-स्याधारः सोमानन्दवंशजस्य नरहरिनामकस्य राजनिघण्टु-निर्मातुरुक्तिरस्ति, या आनन्दाश्रममुद्राणलयेन प्रकाशिते राजनिघण्टौ विद्यते। परमसौ निघण्टुग्रन्थो नाद्यावध्यस्माभिः

क्वापि परीक्षणायात्र लब्धः। ततो न निश्चयतः किमपि वक्तुं शक्यतेऽत्र विषये।"

~ महामहिममण्डितः :— **श्रीसोमानन्दनाथस्य माहात्म्यं स्वस्य च तच्छासनक्रमपवित्रितत्वं स्ववचनेनोक्तमभिनवगुप्ताचार्येण।**

यथा—

"तदुक्तं श्रीसोमानन्दपादै :—

'पञ्चविधकृत्यतत्परभगवद्भैरवभट्टारकस्य प्रथमशाक्तस्पन्दसमनन्तरम्' इत्यादि निजवृत्तौ। तद्ग्रन्थिनिर्दलनार्थ एवायमस्माकं तच्छासनपवित्रितानां यत्नः।।"

(प०त्री०वि०,पृ०,16)

सोमेश्वरः :—

बीजपिण्डः कश्चन किञ्चित् स्पष्टीकृतः क्षेमराजेन। "क्ष् ह् सूं" इत्येवं रूपः "हुं" इत्येव वा स्यात्। उत्तरो विकल्पोऽत्र गरीयान्।

यथा—

"क्षसान्तर्बिन्दुसंयुक्तः पञ्चमेन विभेदितः।।
सोमेश्वरः समाख्यातो जन्ममृत्युविनाशनः।"

(स्व०तं०,183-184)

क्षकारसकारयोर्मध्ये योऽत्र हकारः, स एव बिन्दुसंयुक्तः पञ्चमेन च स्वरेण युतः "हुं" इत्येव।

सौधः :— ~ उच्चारयोगे :— **लम्बिकोपरि स्थितः सुधाया आधारो यतः सौषुम्नममृतं स्रवति।**

यथा—

"तदूर्ध्वे सुधाया आधारः सौधः।"

(तं०आ०वि०,खं०3,पृ०,359)

~ वर्णः :— **'स' इति।**

यथा—

"अथ च सुधायाः इदं सौधं सकारम्।"

(तं०आ०वि०,खं०3,पृ०,359)

सौधभूमिः :— जगदानन्दामृतवर्षिणी दशा। सुधासारभूमिः।

यथा—

"सौधं सुधासमूहस्तस्य भूमिमाकर स्थानम्।"

(तं०आ०वि०,खं०3,पृ०,376)

सौभाग्यहृदयस्तोत्रम् :— महेश्वरानन्दस्य परमगुरुणा श्रीशिवानन्दनाथेन विरचितः कश्चन स्तवः।

यथा—

"यदुक्तमस्मत्परमगुरुभिः श्रीसौभाग्यहृदयस्तोत्रे .... नेत्रादि जालकोपान्ते .....। इत्यादि।"

(म०मं०प०,पृ०,13,70)

सौम्यक्रूरकर्माणि :— तत्र सौम्यान्याप्यायनपोषणादिफलानि क्रूराणि च मारणोच्चाटनादीनि कर्माणि।

~ तत्कालनियम :— **क्रूराणि कर्माणि प्रायो रात्रौ कृष्णपक्षे च, तथा सौम्यानि दिने शुक्लपक्षे च सिद्धयन्ति प्रायशः।**

यथा—

"दिने क्रूराणि सौम्यानि रात्रौ कर्माण्यसंशयम्।"

(तं०आ०6,72)

"दिनं कृष्णो निशा शुक्लः पक्षौ कर्मसु पूर्ववत्।"

(तं०आ०6,76)

"कृष्णपक्षे क्रूराणि कर्माण्यन्यत्र च सौम्यानीति।"

(तं०आ०वि०,खं०4/1,पृ०,67)

सौरभेयम् :— किमपि पुस्तकम्।

यथा—

"यदुक्तं सौरभेये :—

या चिद्व्यापाररूपैव युक्तिः सर्वत्र साधनम्।
भोगे वाप्यथवा मोक्षे तस्मात्तत्रादृतो भवेत्।।' इति।"

(ने०तं०उ०,खं०2,पृ०,255)

सौशुकः :— महामहिम्नः श्रीकात्यायनस्य विदुषो वंशीयः कोऽप्य द्वितीयो विद्वान्। रामकण्ठस्य कोऽपि पूर्वजः।

यथा—

"श्रीमान् कात्यायनोऽभूद्वररुचिसदृशः प्रस्फुरद्बोधतृप्तस्, तद्वंशालङ्कृतो यः स्थिरमतिरभवत्सौशुकाख्योऽतिविद्वान्।

(गी०सं०,पृ०,186)

सौषुप्तम् :— (1) प्रमाणतद्व्यापारप्रमेयाद्यवभासनरहिते पुर्यष्टकमात्रे या मायीयस्य प्रमातुः स्थितिस्तत् तस्य सौषुप्तम्।

द्र०:- **'सुषुप्तिः'** इति।

(2) विषयविवेचनाभावमयी प्रमातुरवस्था सौषुप्तम्।

यथा—

"यस्त्वविवेको, विवेचनाभावोऽख्यातिरेतदेव मायारूपं मोहमयं सौषुप्तम्।"

(शि०सू०वि०,पृ०,11)

सौषुम्नम् :— ~(भुवनम्) :— देशाध्वधारणायां नादस्योपरि भावनया दृश्यं भुवनम्।

यथा—

"नादोर्ध्वतस्तु सौषुम्नं तत्र तच्छक्तिभृत्प्रभुः।
तदीशः पिङ्गले(ला)डाभ्यां वृतः सव्यापसव्ययोः।।
या प्रभोरङ्गगा देवी सुषुम्ना शशि सप्रभा।
ग्रथितोघ्वा तया सर्वं ऊर्ध्वश्चाधस्तनस्तथा।।"

(तं०आ०8,390-391)

स्कन्दयामलम् :— आगमशास्त्रं किमपि। यामलाष्टके यत् पञ्चमं नामतो नोद्दिष्टं तदिदमेव स्यात् कदाचित्।

यथा—

"अधिकारी ततो मुक्तिं यातीति स्कन्दयामले।।"

(तं०आ०28,430)

द्र०:- (तं०आ०वि०,खं०1,पृ०,42) इति।

स्तम्भकं :— ~ बीजम् :— लकारः।

द्र०:- **'दाहकं बीजम्'** इति।

स्तम्भनम् :— ~ मन्त्राणाम् :— निष्फलीकरणम्।

यथा—

"स्तम्भनं निश्चेष्टत्वापादनम्।"

(ने०तं०उ०,खं०2,पृ०,17)

स्तवचिन्तामणिः :— भट्टनारायणकृता दर्शनशास्त्र-रहस्यगर्भा स्तुतिः शिवनाथस्य।

यथा—

"स्तवचिन्तामणिं भूरिमनोरथफलप्रदम्।
भक्तिलक्ष्म्यालयं शम्भोर्भट्टनारायणो व्यधात्।।"

(स्त०चि०,120)

~ तद्विवृत्तिः :— एका तु रामकण्ठेन विरचिताऽभूत् काऽपि व्याख्या, या नैव लभ्यते क्वापि। अपरा क्षेमराज-कृता, या लभ्यते। यथा—

"श्रीरामेण कृतात्र सद्विवृत्तिरित्येषा किमर्थेति मा सन्तश्चेतसि
कृध्वमस्ति विवृत्तौ कोऽपि प्रकर्षो(**महान्**)ऽत्र यत्।
तेनार्थिप्रणयाद्दिनैस्त्रिचतुरैर्या क्षेमराजो व्यधात्।
क्षेत्रे श्रीविजयेश्वरस्य विमले सैषा शिवाराधनी।।"

(स्त०चिं०वि०,पृ०,130)

एतेन ज्ञायते यत् क्षेमराजेन विजयेश्वर एव निवसता विरचिता स्तवचिन्तामणिटीकेति।

स्तुतिः :— स्तुत्यस्य देवस्यान्तरभेदबुद्ध्या स्तोतुः प्रवेशस्तेन चोभयोर्य एकीभावः, स एव स्तोतुर्वास्तविकी स्तुतिः। केवला श्लोकरचना तु न वास्तविकी स्तुतिः।

यथा—

"स्वरूपानुप्रवेश एव स्तुतिः। अत्र त्वभिन्नत्वमेवाभिमतम्। अन्यथा कः स्तोता ? कः स्तुत्यः ? का वा स्तुतिः" 2।

(स्पं०प्र०,पृ०,8)

स्तोत्रभट्टारकः :— (1) कश्चन शाक्तः स्तवो य इदानीं नैव लभ्यते पूर्णः। कालीनयोपास्तिसम्बद्धोऽयं स्तवः प्रतिभात्युद्धृतैर्वाक्यैः।

(2) क्रमस्तोत्रमेव स्तोत्रभट्टारकं वदति प्रायशो जयरथः। कालीनयप्रकरणोद्धृतेभ्यस्त्रयोदशपद्येभ्य अधिकमपरं पद्यमपि जयरथेनैवोद्धृतमस्य स्तोत्रस्य।

यथा—

"अत एव श्री स्तोत्रभट्टारकेऽपि :—

"कालानलाद् व्योमकलावसानं चिन्त्यं जगद् ग्रास कलालयेन।
चक्रं महासंहृतिरूपमुग्रं गतं चिदाकाशपदस्थमित्थम्।' इति।"

(तं०आ०वि०,खं०3,पृ०,223)

द्र०:- तदेव इति।

(3) सिद्धनाथकृतं क्रमस्तोत्रमेव महेश्वरानन्दोऽपि स्तोत्रभट्टारक इति नाम्नोल्लिखति।

यथा—

"श्री स्तोत्रभट्टारकेऽपि :—

"चिदग्निसंहारमरीचिमन्त्रः संविद्विकल्पान् ग्लपयन्नुदिति' इति।"

"यथोक्तं श्रीस्तोत्रभट्टारके :—

(म०मं०प०,पृ०,122)

'कौलार्णवानन्द मयोर्मिरूपाम्'।

(म०मं०प०,पृ०,126)

तत्र 122 तमे पृष्ठे उद्धृतं पद्यं क्रमस्तोत्रीयमेव प्रतिभाति छन्दोऽनुहारतः।

यथा—

"चिदग्निसंहारमरीचिमन्त्रः संविद्विकल्पान् ग्लपयन्नुदेति।"

(म०मं०प०,पृ०,122)

(4) तन्त्रालोकविवेकेऽपीयं पंक्तिरुद्धृता किञ्चिन्मात्रपाठ-भेदेन। परं तत्र स्पष्टतयाऽस्याः क्रमस्तोत्रस्यैव पद्यत्वेनोल्लेखः।

यथा—

"कौलार्णवानन्दघनोर्मिरूपामुन्मेषमेषोभयभाजमन्तः।
निलीयते नीलकुलालये या तां सृष्टिकालीं सततं नमामि।।"

(तं०आ०वि०,खं०3,पृ०,158)

महार्थमञ्जरीपरिमलेऽपि तत्सम्बन्धेनैव क्रमकेलिरप्यु-द्धृता। ततोऽपि सिद्ध्यति यत् क्रमस्तोत्रस्यैव नामान्तरं स्तोत्रभट्टारक इति।

द्र०:- (म०मं०प०,पृ०,100-101,112,122,126,) इति।

स्तोत्रमाला :— शितिकण्ठस्य काऽपि कृतिः।

यथा—

"यत्स्तुतं स्तोत्रमालायां मयैव :—
विलोक्यते चित्रपटे यथोभयं पटैक्यमन्तर्वपुषां गणे बहिः।
अखण्ड धाम्नोऽन्तरमुष्य वेत्तृता ज्ञानत्वमक्षान्तजुषां चिदर्चिषाम्।।"

(म०प्र०वि०,पृ०,47-48)

स्तोभः :— (1) कुलाचारप्रक्रियासु प्राणवृत्तेः सौषुम्नमार्ग-प्रवेशे सति तत्र चिदानन्दविकासो यो मध्यविकासः इति परिभाषितः।

यथा—

"..... कुले स्तोभात्मिका मता।।"

उद्धृ०:- (तं०आ०वि०,खं०8,पृ०,182)

(2) विशेषा गतिशीलता। यथा—

"शिष्यहस्ते पुष्पभृते चोदनास्त्रं तु योजयेत्।।
यावत् स स्तोभमायातः स्वयं पतति मूर्धनि।
शिवहस्तः स्वयं सोऽयं सद्यः प्रत्ययकारकः।।"

(तं०आ०29,193-194)

(3) क्षोभात्मकः कम्पः। यथा—

यथा—

"शिवहस्ते महेशानि इदं कूटं तु योजयेत्।
उद्धः:- (तं०आ०वि०,खं०11/2,पृ०,127)
यावत् स्तुभ्ययसौ देवि स्वयमेव चलत्यसौ।।"
"इत्येष समयी प्रोक्तः श्रीपूर्वे करकम्पतः।"
(तं०आ०29,197)

(4) अङ्गविशेषस्य चलनम्। यथा—

"सूर्यकलोदयमयानच्कसकारमात्रविश्रान्तो रोमाञ्चस्तोभोत्पतनवाष्पकम्पस्तम्भाद्यनुग्रहीतदेहो ऽभ्यासं कुर्यादिति भट्टधनेश्वरशर्मा।"
(प०त्री०वि०,पृ०,274)

(4) पाशानां धूननम्। यथा—

"पाशस्तोभपशुग्राहो प्रकुर्वीत यथेच्छया।।"
(मा०वि०तं०11,36)

~ करस्य :— (1) करकम्पः, करचालनम्, शिष्यदेहस्थे विशेषे चक्रे करपातनं शिवहस्तविधौ। यथा—

"इत्येष समयी प्रोक्तः श्रीपूर्वे करकम्पतः।।
समयी तु करस्तोभादिति श्रीभोगहस्तके।"
(तं०आ०29,197-198)

"यच्छ्री पञ्चाशिका :— "समयी तु करस्तोभान्मुद्रया पुत्रको भवेत्।' इति।"
(तं०आ०वि०,खं०11/2,पृ०,129)

(2) स्तोभपदं कम्पपदं चात्रैवंविधेष्वागमवाक्येषु यत एकं समानमेवार्थं प्रतिपादयितुं प्रयुक्तं तत इदं प्रतीयते यत् स्तोभपदं तान्त्रिकसाधनासु कम्पार्थकम्। तेन करस्तोभः करकम्प इति। स्तुभ्यति कम्पविशेषरूपां गतिं गृह्णातीति। गुरुणा मन्त्रशक्तिबलेन शिष्यस्याभिमन्त्रितो हस्तश्चालनीयो भवति, स च चालितो यद्-यदङ्गं स्पृशति तत्र-तत्रैव पुष्पचरुवस्त्रादिसमर्पणं क्रियते कौलदीक्षाविधौ। असौ हस्तकम्पः हस्तस्य तत्र-तत्र प्रचालनं च करस्तोभः। यथा—

"अनेनैव प्रयोगेण चरुकं ग्राहयेद्गुरुः।
शिष्येण दन्तकाष्ठं च तत्पातः प्राग्वदेव तु।।
करस्तोभो नेत्रपटग्रहात् प्रभृति यः किल।
दन्तकाष्ठसमादानपर्यन्तस्तत्र लक्षयेत्।।"
(तं०आ०29,195-196)

~ परीक्षणार्थः :— चेत् स्तोभितः शिष्यहस्तः पुष्पपातप्रणामचरुदानादौ प्रतिवारमेकस्मिन्नेवाङ्गे पतेत्, तत्रैव च चरुदानादि कारयेत्, तदा तीव्रोऽनुग्रह इति सिद्धयति। चेत् पूजाङ्गेषु भिन्न-भिन्नेषु पतन् भिन्नभिन्नान्येतान्यङ्गानि-स्पृशेत् तदाऽनुग्रहस्य मन्दता ज्ञायते। यथा—

"..... तत्र लक्षयेत्।।
तीव्रमन्दादिभेदेन शक्तिपातं तथाविधम्।"
(तं०आ०29,196-197)

"यदा हि यत्रैव चक्रे पुष्पपातो वृत्तस्तत्रैव प्रणामस्तत्रैव चरुदानम्, तत एव तद्ग्रहणमित्यादि, तदा तीव्रः शक्तिपातो लक्षणीयो, अन्यथा तु मन्दः इति। तदुक्तम् :—

"एतेषां चलनान्मन्त्री शक्तिपातं परीक्षयेत्।
मन्दतीव्रादिभेदेन मन्दतीव्रादिकं बुधः।।' इति।"
उद्धः:- (तं०आ०वि०,खं०11/2,पृ०,128)

स्त्रीवधपातकम् :— तत्तु महापातकं प्रायश्चित्तैरप्यशोध्यं भवति। यथा—

"शतं जप्त्वाऽस्य चास्त्रस्य मुच्यते स्त्रीवधादृते।"
(तं०आ०28,415)
"..... स्त्रीवधे निष्कृतिः कुतः।"
(तं०आ०वि०,खं०11,पृ०,178)
" ..... शक्तिनाशान्महादोषो नरकं शाश्वतं प्रिये।।"
(तदेव,पृ०,179)

स्थण्डिलम् :— यागार्थं गृहीत उन्नतो भूभागः वेदिकल्पः। यथा—

"स्थण्डिलं यागार्थं गृहीतो भूप्रदेशः।"
(तं०आ०वि०,खं०2,का०,42)

स्थण्डिलयाग :— शेषवृत्तिप्रशिक्षणप्रयोजनो यागो गुरुणा शिष्यस्य दीक्षाङ्गतया समाचरणीयः।

यथा—

"उक्तः स्थण्डिलयागोऽयं नित्यकर्मणि शम्भुना।।"
(तं०आ०26,76)

स्थण्डिलादियागाः :— यथा—

"तन्मयीभावसिद्ध्यर्थं स शिष्यः सन्ध्यासु तन्मयीभावाभ्यासं कुर्यात्। तद्द्वारेण सर्वकालं तथाविधसंस्कारलाभसिद्ध्यर्थं प्रत्यहं च परमेश्वरं च स्थण्डिले वा लिङ्गे वाऽभ्यर्चयेत्। तत्र हृद्ये स्थण्डिले विमलमकुरवद् ध्याते स्वमेवरूपं याज्यदेवताचक्राभिन्नं मूर्तिबिम्बितमिव दृष्ट्वा हृद्यपुष्पगन्धासवतर्पणनैवेद्यधूपदीपोपहारस्तुतिगीतवाद्यनृत्तादिना पूजयेज्जपेत् स्तुवीत, तन्मयीभावमशङ्कितं लब्धुम्। ....., न चात्र कश्चित् क्रमः प्रधानम्, ऋते तन्मयीभावात्।"
(तं०सा०,पृ०,179-180)

स्थानकल्पना :— भावनाबलेन बाह्यस्य कालात्मकस्य जगतः षट्त्रिंशदङ्गुलायामे प्राणचार एव पुनः पुनर्दर्शनस्याभ्यासः देशात्मकस्य च जगतस्तथैव निजे देहे दर्शनस्याभ्यासः। इत्थं कालरूपस्य देहरूपस्य च बाह्यस्य सर्वस्यापि स्थानस्य क्रमेण प्राणचारे देहे च परिसमापनस्याभ्यासः स्थानकल्पना।

यथा—

"तत्र प्राणे तावद् विधिः सर्वोऽसौ वक्ष्यमाणोऽध्वा प्राणस्थः कल्यते।"
(तं०सा०,पृ०,45)

"एवमखिलं कालाध्वानं प्राणोदय एव पश्यन् सृष्टिसंहारांश्च विचित्रान् निःसंख्यांस्तत्रैवाकलयन् आत्मन एव पारमैश्वर्यं प्रत्यभिजानन् मुक्त एव भवति इति।"
(तं०सा०,पृ०,61)

"तं समस्तमध्वानं देहे विलाप्य, देहं च प्राणे, तं धियि, तां शून्ये, तदुत्तीर्णां संविदं परमशिवरूपां पश्यन् विश्वमयीमपि संवेदयेत।"

(तं०सा०,पृ०,63)

~ तत्फलम् :— **बाह्यालम्बनसाध्येन स्थानकल्पनायोगेन साधकः सर्वाः अपि व्यावहारिकीः सिद्धीरवाप्नोति, सर्वविषयकं च तत्त्वज्ञानं तस्य जायते। स च बहुतरपशुव्रातमोचको गुरुर्भवति लोके। ततो सिद्धिलाभोत्सुकेभ्यः साधकेभ्योऽवर-कोटिनिष्ठोऽप्ययं योगो रोचतेऽतितराम्।**

यथा—

"एवं भुवनमालापि भिन्ना भेदैरिमैः स्फुटम्।
विज्ञेया योगसिद्ध्यर्थं योगिभिर्योगपूजिता।।
एतेषामेव तत्त्वानां भुवनानां च शाङ्करि।
य एकमपि जानाति सोऽपि योगफलं लभेत्।।
यः पुनः सर्वतत्त्वानि वेत्त्येतानि यथार्थतः।
स गुरुर्मत्समः प्रोक्तो मन्त्रवीर्यप्रकाशकः।।
स्पृष्टाः सम्भाषितास्तेन दृष्टाश्च प्रीतचेतसा।
नराः पापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि।।
ये पुनर्दीक्षितास्तेन प्राणिनः शिवचोदिताः।
ते यथेष्टं फलं प्राप्य पदं गच्छन्त्यनामयम्।।"

(मा०वि०तं०2,8-12)

~ तन्त्रालोके :— **(1) दीक्षास्थण्डिलमण्डलमन्त्रादिरूपा स्थानकल्पनातन्त्रालोके पञ्चदशादाह्निकादारभ्य चतुस्त्रिंशमाह्निकं यावत् प्रतिपादिता वर्तते। विस्तरतो भेदप्रभेदप्रदर्शनपूर्वकं, प्रक्रियाविधिप्रतिपादनपूर्वकं च।**

(2) षष्ठादाह्निकादारभ्य द्वादशमाह्निकं यावत् तन्त्रालोके कालाध्वदेशाध्वरूपः स्थानकल्पनायोगः एव प्रतिपादितः।

स्थानभेद :— स्थानं तावद् बाह्यात्मकालम्बनमाणवयोगस्य, तच्च त्रिप्रकारकम्:—प्राणो, देहः, बाह्यञ्च देशकालरूपम्।

यथा—

"स्थानभेदस्त्रिधा प्रोक्तः प्राणे देहे बहिस्तथा।"

(तं०आ०6,2)

स्थानम् :— (1) यागादिभूमिः। एकलिङ्गादिभूमिः।

यथा—

"एकलिङ्गदि च स्थानं यत्रात्मा सम्प्रसीदति।"

(तं०आ०21,19)

(2) शरीरे तत्तद्धारणाभ्यासस्थानभूतं नाडीचक्रात्मकं स्थानम्।

यथा—

"त्रिकोणकन्दहृत्कण्ठभ्रूमध्यद्वादशान्तकम्।
स्थानशब्दसमाख्येयं यदभ्यासाच्छिवात्मता।।"

(पू०प्र०,103)

~ स्थानकल्पने :— **प्राणवायुः शरीरं, बाह्यं जगच्चेति त्रयं स्थानकल्पनाख्ये योगविधौ स्थानमुच्यते।**

यथा—

"तत्र त्रिधा स्थानं प्राणवायुः शरीरं बाह्यञ्चेति।"

(तं०सा०,पृ०,45)

स्थानवेधः :— क्रमेणैकैकस्य चक्रस्य संविन्मयतापत्त्या समुद्दीपनं स्थानवेध इति। तेषां चक्राणां संविन्मयतया प्रकाशनं तत्फलम्।

यथा—

"यद्यद्देहे चक्रं तत्र शिशोरेत्य विश्रमं क्रमशः।
उज्जवलयेत्तच्चक्रं स्थानाख्यस्तत्फलप्रदो वेधः।।"

(तं०आ०29,267)

स्थापनम् :— पूजाङ्गविशेषः।

यथा—

"स्थापनमुद्रया भगवतोऽवस्थानम्।"

(तं०आ०वि०,खं०1/2,पृ०,22)

स्थावरमुक्तिः :— शिवहस्तादिविधौ प्रयुक्तानां शालियवतिलादिबीजानामपि जन्मकोटिजालेभ्यो मुक्तिर्भवति। सप्रत्ययायां दीक्षायामुप्तानि तानि बीजानि न प्ररोहन्ति तेन यवादिरूपाणां स्थावराणामपि पुनर्जन्मजालान्मुक्तिर्भवति।

यथा—

"बीजस्याप्यत्र कार्या च योजना कृपया गुरोः।
यतो दीक्षा सुदीप्तत्वात्स्थावराण्यपि मोचयेत्।।"

(तं०आ०20,7)

"ऋक्षपक्षितरक्ष्वादीन् स्थावराण्यपि मोचयेत्।"

उद्धृ०:- (तं०आ०वि०,खं०10,पृ०,208)

स्थावरादिगतिः :— क्रमशोऽभ्युदयपरम्परयाऽन्ते तेषां मुक्तिर्भवति समर्थगुरुकृपया। यथा—

"स्थावराद्यास्तथाभावमुत्तरोत्तरतां च वा।।
प्रपद्यन्ते न ते साक्षाद्रुद्रतां तां क्रमात्पुनः।"

(तं०आ०28,249-250)

तेषामुत्तरोत्तरमभ्युदये सति क्रमेणैव रुद्रत्वगतिरित्य-भिप्रायः।

स्थितिः :— सृष्टिकालात् संहारकालं यावदवस्थानम्। तच्च त्रिभूमिकम्, उदयअवस्थानअस्तमयभागित्वात्।

यथा—

"एवं स्थितिरपि उद्यन्ती स्थितिमती प्रत्यस्तमिता च इति त्रिरूपा।"

(म०प्र०वि०,पृ०,40)

~ पशुप्रमातृकृता :— **यथा—**

"देह प्राणादिपदमाविशन् चिद्रूपो महेश्वरो बहिर्मुखीभावावसरे नीलादिकमर्थं नियतदेशकालादितया यदा आभासयति, तदा... ..... नीलाद्याभासांशे स्थापकता।"

(प्र०हृ०,पृ०,23)

द्र०:- (सं०वि०,पृ०,34;सं०सं०,पृ०,10;मं०प्र०वि०,पृ०,44)

स्थितिकृत्यम् :— बहुविधप्रमातृप्रमाणप्रमेयभेदभिन्नमिदं सृष्टं जगन्नियति कृतनियमानुसारं सुचिरं प्रचालयन् परमेश्वरः स्थितिकृत्यं स्वलीलया कुरुते।

लीलैषा प्रमेयस्य संहारात्मकं रूपं ग्रसन्ती तृतीया काली जयरथानुसारम्।

यथा—

"प्रमेयगतं स्थिति स्वरूपमभिधाय संहारस्वरूपमप्यभिधातुमाह"।

(तं०आ०वि०,खं०3,पृ०,162)

स्थितिनाशकाली :— प्रमात्मकतया स्वात्मनि प्रमेयसंहारस्य कलनां कुर्वती या संविदः शक्तिः सैव विकल्पात्मकेन प्रमाणेन प्रमेयमात्मसात् कुर्वती।

परमेश्वरस्य कलनाशक्तिर्द्वादशकालीक्रमे तृतीया।

यथा—

"तत्रैव रक्तिमयतां गृहीत्वा ततस्तमेव भावमन्तरूपसंजिहीर्षया कलयति।"

(तं०सा०,पृ०,29)

"विसृष्टे भावांशे बहिरतिशयास्वादविरसे
यदा तत्रैव त्वं भजसि रभसाद्रक्तिमयताम्।
तदा रक्ता देवी तव सकलभावेषु ननु माम्
क्रियाद्रक्तापानक्रमघटितगोष्ठीगतघृणम्।।"

(अभिनवगुप्तीये,क्र०स्तो०,16)

प्रमेयस्थितिरूपताकलनकारिणीशक्तिरेषा। यथा—

"एवं प्रमेयगतं सृष्टिस्वरूपमभिधाय स्थितिस्वरूपमप्यभिधातुमाह।"

(तं०आ०वि०,खं०3,पृ०,159)

सूक्ष्मसूक्ष्मतरापि सर्वशरीरव्यापिनी येयं प्रमामुखेन प्रमाणप्रमेयविश्रान्तिभूमिभूता मितप्रमातृता सा शुद्धसंविदो यस्याः शक्तेरुदेति यत्र च लीयतेऽसौ प्रमादिकलनसामर्थ्यरूपा संविच्छक्तिःस्थितिनाशकाली।

यथा—

"हासिनी पौद्गली येयं बालाग्रशतकल्पना।
कल्पते सर्वदेहस्था स्थितिं सर्वस्य कारिणी।।
यदुत्पन्ना तु सा देवी पुनस्तत्रैव लीयते।
तां विद्धि देवदेवेश स्थितिकालीं महेश्वर।।"

(उद्धृतं पञ्चशतिकातः— तं०आ०वि०,खं०3,पृ०,163)

~ क्रमस्तोत्रादौ :—

"वाजिद्वयस्वीकृतवातचक्रप्रक्रान्तसंघट्टगमागमस्थाम्।
शुचिर्ययास्तं गमितोऽर्चिषा तां शान्तां नमामि स्थितिनाशकालीम्।।

उद्धृतं क्रमस्तोत्रात् सिद्धनाथकृतात् :—

(तं०आ०वि०,खं०3,पृ०,163)

"बहिर्वृत्तिं हातुं चितिभुवमुदारां निवसितुं
यदा भावाभेदं प्रथयसि विनष्टोर्मिचपलः।
स्थितेर्नाशं देवी कलयति तदा सा तव विभो
स्थितेः सांसारिक्याः कलयतु विनाशं मम सदा।।"

(अभिनवगुप्तीये क्रमस्तोत्रे, 17)

~ चिद्गगनचन्द्रिकायाम् :—

"लब्धसाम्यपवनद्वयाहतं वातचक्रमधितस्थुषी शिवे।
निर्गमागममयोज्झितान्तरे त्वं स्थिते ग्रससि हि स्थिताऽम्बिके।"

(चि०ग०चं०,225)

~ तन्त्रालोकादौ :— प्रमात्मकतया स्वात्मनि प्रमेयसंहारस्य कलनां कुर्वती संविदः शक्तिः विकल्पात्मकेन प्रमाणेन प्रमेयमात्सात् कुर्वतीकाली क्रमेण तृतीया द्वादशसु।

यथा—

(क) "तत्रैव रक्तिमयतां गृहीत्वा ततस्तमेव भावमन्तरूपसंजिहीर्षया कलयति।"

(तं०सा०,पृ०,29)

(ख) "..... तामन्तर्मुखतारसात्।
संजिहीर्षुः स्थितेर्नाशं कलयन्ती निरुच्यते।।"

(तं०आ०4,150)

(ग) "प्रमाणरूपां रक्त्यपरपर्यायां स्थितिमन्तः प्रमात्रेकात्मतायामौन्मुख्ये 'ज्ञातो मयार्थः' इति स्वात्मविश्रान्ति चमत्कारात्मनोरसात् संहर्तुमिच्छुः आत्मसाच्चिकीर्षुः अत एव स्थितेर्नाशं कलयन्ती निरुच्यते।"

(तं०आ०वि०,खं०3,पृ०,162-163)

~ पञ्चशतिके :— सूक्ष्मसूक्ष्मतरापि सर्वशरीरव्यापिनी येयं प्रमामुखेन प्रमाणप्रमेयविश्रान्तिभूमिभूता मितप्रमातृताऽसौ शुद्धसंविदो यस्याः शक्तेरुदेति यत्र च लीयतेऽसौप्रमादिकलनसामर्थ्यरूपा संविच्छक्तिः— स्थितिनाशकाली।

यथा—

"हासिनी पौद्गली येयं बालाग्रशतकल्पना।
कल्पते सर्वदेहस्था स्थितिः सर्गस्य कारिणी।।
यदुत्पन्ना तु सा देवी पुनस्तत्रैव लीयते।
तां विद्धि देवदेवेश स्थितिकाले महेश्वर।।"

(उद्धृतं पञ्चशतिकातः, तं०आ०वि०,खं०3,पृ०,163)

स्थिरता :— (1) अनुद्रिक्तशक्तिका शक्तिमद्रूपता।

यथा—

"स्थिरं स्वात्मविश्रान्त्या निर्व्यापारं शक्तिमद्रूपम्।"

(तं०आ०वि०,खं०7,पृ०,79)

(2) शक्तिभेदनप्रक्रियादृष्ट्या प्रमातृवर्गाणां स्वात्मविश्रान्तिपक्षे या शिवरूपतया ध्रुवप्राया स्थितिः सा स्थिरता तत्र।

द्र०:- **'कम्प्रता'** इति।

स्थूलः :— ~ कालाध्वा :— प्राणचारे यः पदोदयः स एव।

द्र०:- **'कालाध्वा'** ~ 'परः' – इति।

स्थूलत्वम :— ~ वेदनस्य :— एकान्तभिन्नतयैव

यद्वस्तुवेदनं तद् वेदनस्य स्थूलत्वम्। विद्यातत्त्वे यद्वेदनं तत् स्थूलवेदनम्।

यथा—

"प्रमातृणां च बोधात्मत्वेऽपि शिवेच्छातो भेदापत्तेः स्थूलत्वम्। अतो वेदनस्यापि स्थूलत्वम्। इदन्तु विद्यात्वम्।"

(शि०दृ०वृ०,पृ०,24-25)

~ वेद्यस्य :— **(1) वस्तूनामेकान्तभिन्नतयावभासनम्।**

यथा—

"एकान्तभिन्नतैव वेद्यस्य विश्वस्य स्थूलत्वम्।"

(शि०दृ०वृ०,पृ०,24)

(2) वस्तूनां बाह्येन्द्रियवेद्यत्वम्।

स्थैर्यशक्तिः :— स्थैर्येण विश्रान्त्यात्मिका धराशक्तिः, लकारश्रुतिः।

यथा—

"इष्यमाणसमापत्तिः स्थैर्येणाथ धरात्मना।"

(तं०आ०3,79)

स्थौल्यम् :— सूक्ष्मस्य चिदानन्दघनस्वरूपस्यात्मनः क्रियाशक्त्युल्लासतो बहिर्भेदेनाभासनम्।

यथा—

"उपायोपेयभावस्तु ज्ञानस्य स्थौल्यविभ्रमः।
एषैव च क्रियाशक्तिर्बन्धमोक्षैककारणम्।।"

(तं०आ०1,145)

"चिदानन्दैकघनपरसूक्ष्मस्वरूपनिमज्जनादनन्तग्राह्य-ग्राहकात्मनाभेदेनोल्लसनम्।"

(तं०आ०वि०,खं०1,पृ०,184)

स्नानम् :— ~ शाक्तोपाये :— (1) आत्मनः स्वाभाविकस्य शुद्धत्वस्य पुनःपुनर्विमर्शनस्याभ्यासः स्नानम्।

यथा—

"न मे बन्धो न मे मोक्षस्तौ मलत्वेन संस्थितौ।।
प्रतिपत्त्यानया स्नानं निर्मलीकरणं मतम्।"

(शि०दृ०7,87-88)

अपर प्रकारेण यथा—

(2) बन्धमोक्षावुभौ मलात्मकौ, नाहं ताभ्यां स्पृष्टोऽस्मि। अतः सततं निर्मलोऽहमिति विमर्शनमेव स्नानम्।

(3) भावनया बोधाग्निना दग्धाद्भावमण्डलादुत्थिते बोधभस्मनि स्वदेहादेर्मज्जनं स्नानम्। येन सर्वं विश्वं स्वात्मा च बोधैकरूपतया प्रकाशेत्। यथा—

"विश्वमेतत् स्वसंवित्तिरसनिर्भरितं रसात्।।
आविश्य शुद्धो निखिलं तर्पयेदध्वमण्डलम्।
उल्लासिबोधहुतभुग्दग्धविश्वेन्धनोदिते।।
सितभस्मनि देहस्य मज्जनं स्नानमुच्यते।"

(तं०आ०4,115-117)

सर्वस्य बोधैकरूपतापत्तिरेव तस्य तर्पणम्।

"इत्थं च विहितस्नानस्तर्पितानन्तदेवतः।।"

(तं०आ०4,117)

(4) पारमैश्वर्यानन्दसमुद्रकल्पे शुद्धे चिद्रूपत्वे जीवभावस्य यन्निमज्जनं तदेव शिवयोगिनः स्नानम्। तच्च समावेश इति परिभाष्यते।

यथा—

"स्वतन्त्रानन्दचिन्मात्रसारः स्वात्मा हि सर्वतः।
आवेशनं तत्स्वरूपे स्वात्मनः स्नानमीरितम्।।"

(वि०भै०,152)

(5) परे भैरवे क्षित्याद्यष्टमूर्तिसम्मज्जनं स्नानम्।

यथा—

"परभैरवसंम्मज्जनमाहुः स्नानं यथा तु तद् भवति।
तदपि बाह्यं स्नानं न मुख्यमुपचारतः किन्तु।।"

(तं०सा०,पृ०,131)

~ आभ्यन्तरम् :— द्र०:- **'आभ्यान्तरस्नानम्'** इति।

स्पन्दः :— (1) शुद्धचिन्मात्ररूपः परमेश्वरो हि स्वस्वभावत एवानन्दचमत्कारनिर्भरः। असौ तच्चमत्कारो हि तच्चित् स्फुरणं येन परमेश्वरः सततं सृष्टिसंहारादिपारमेश्वर-क्रीडाजालावभासनाप्रवणत्वस्य निजस्य शाक्तस्य स्वरूप-स्याभिव्यञ्जने सततमुद्युक्त एव तच्चित्स्फुरणं 'स्पन्द' इति परिभाष्यते। ततः स्पन्द इत्येतदप्यागमिकं नामान्तरं परमेश्वरतात्मकस्यपरतत्त्वस्वभावस्य।

द्र०:- (तं०सा०,पृ०,27) इति।

(2) अनवच्छिन्नसंवित्स्वरूपस्य परमेश्वरस्य सृष्ट्यादिसम्पादनप्रवृत्तौ निमित्ततामुपयान्ती तस्य चैतन्यात्मकस्य स्वातन्त्र्यस्योच्छलत्तेव काचनानन्दचमत्कारमयीस्फुरत्ताशीला पारमेश्वरी चिन्मयता। सैव तस्य पूर्णता। यतस्तद्वशादेवासौ परिपूर्णः सर्वथा, सर्वतः, सर्वदा च सर्वरूपःसर्वप्रवर्त्तकः सर्वावभासकश्चेति सर्वः। यथा—

"तत्र परमेश्वरः पूर्णसंवित्स्वभावः, पूर्णतैव अस्य शक्तिः—, कुलं, सामर्थ्यं, ऊर्मिः, हृदयं, सारं स्पन्दः, विभूतिः, त्रीशिका, काली, कर्षणी, चण्डी, वाणी, भोगो, दृक्, नित्या, इत्यादिभिः आगमभाषाभिः तत्तदन्वर्थप्रवृत्ताभिः अभिधीयते।"

(तं०सा०,पृ०,27-28)

द्र०:- **'स्फुरत्ता'** इति।

(3) परमेश्वरस्यान्तर्बहिरुभयतोमुखी गतिशीलतेव कापि परमेश्वरताख्या विशेषता यद्वशात्तस्य सृष्ट्यादि-पञ्चकृत्यलीलाविलासो निरन्तरं प्रचलत्येव। यथा—

"सदा सृष्टिविनोदाय सदा स्थितिसुखासिने।
सदा त्रिभुवनाहारतृप्ताय स्वामिने नमः।।"

(शि०स्तो०20,9)

"अनन्तभावसंभारभासने स्पन्दनं परम्।
उपोद्घातयते यस्य तं स्तुमः सर्वदा शिवम्।।"

(ई०प्र०वि०,खं०1,पृ०,28)

(4) चित्प्रकाशात्मकस्य संवित्समुद्रस्य लहरीकल्पः स्वाभाविकश्चलत्तावभासरूपो विलासः स्पन्दः। यथा—

"किञ्चिच्चलनमेतावदनन्यस्फुरणं हि यत्।
ऊर्मिरेषा विबोधाब्धेर्न संविदनया विना।।"
(तं०आ०4,184)

(5) शुद्धस्य परिपूर्णस्य पारमैश्वर्यमण्डितस्य च स्वात्मनोऽनवच्छिन्नानन्दचमत्कारसम्भिन्नः परामर्शो योऽहमिति तस्यैव हि चैतन्यानन्दचमत्कारमयी योच्छलत्ताख्या गतिशीलता सा योगिभिर्निजे बोधात्मके हृदयेऽनुभूयते। सैव हि स्पन्दः। यथा—

"हृदये स्वविमर्शोऽसौ द्राविताशेषविश्वकः।।
भावग्रहादिपर्यन्तभावी सामान्यसंज्ञकः।
स्पन्दः स कथ्यते शास्त्रे स्वात्मन्युच्छलनात्मकः।।"
(तं०आ०3,182-183)

(6) अचलस्यापि संवित्तत्त्वस्य यत् सृष्टिसंहारादि शतैः चलत्त्वमिव भासते दर्पणनगरन्यायेन, तदेव लक्षणया किञ्चिच्चलत्त्वरूपं 'स्पन्द' इत्युच्यते; स्पदि किञ्चिच्चलने इति धात्वर्थानुसारम्। यथा—

"स्पन्दनं च किञ्चिच्चलनं स्वरूपाच्च यदि' वस्त्वन्तराक्रमणं तच्चलनमेव, न किञ्चित्त्वं, नो चेत् चलनमेव न किञ्चित्, तस्मात् स्वरूप एव क्रमादिपरिहारेण चमत्कारात्मिका—उच्छलत्ता ऊर्मिरिति मत्स्योदरीति-प्रभृतिशब्दैरागमेषु निदर्शितः 'स्पन्द' इत्युच्यतेः—किञ्चिच्चलनात्मकत्वात्, स च शिवशक्तिरूपः सामान्यविशेषात्मा।"
(प०त्री०वि०,पृ०,207-208)

"स्पन्दनं च किञ्चित् चलनम्, एषैव च किञ्चिद्रूपता—यत् अचलम् अपि चलम् आभासते इति, प्रकाशस्वरूपं हि मनागपि नातिरिच्यते, अतिरिच्यते इव इति अचलमेव आभासभेदयुक्तमेव च भाति।"
(ई०प्र०वि०,खं०1,पृ०,208-209)

"स्फुरणस्पन्दनादिकं हि किञ्चिच्चलनं प्रसिद्धम्, किञ्चित्त्वं च इदमेव यदचलेऽपि चलत्वावभासः। लोकेऽपि बहुतराध्यवसायस्वातन्त्र्यपूर्णोऽपि अचलप्रतिष्ठः स्पन्दवानित्युच्यते।"
(ई०प्र०वि०वि०,खं०2,पृ०,199)

"अचलस्यापि चलत्तेवान्तः संरम्भरूपिणीव रुचिः।"
(स्वा०द०,2-11)

द्र०:- (स्पं०प्र०,पृ०,3) इति।

(7) परमेश्वरस्य परमेश्वरतात्मको यः स्वभावोऽसौ स्पन्दमूलक एव। यथा—

"योऽयं प्रकाशात्मा स्वस्वभावः शाङ्कर उक्तः, असौ... ..... निजशक्त्याश्लिष्टः सदा पञ्चविधकृत्यकारी स्वतन्त्रः स्पन्दललितेश्वरादिशब्दैः आगमेषूद्घोष्यते।"
(स्पं०नि०,पृ०,66)

"एषैव भगवत इयद्विश्ववैचित्र्यचलत्तामिव स्वात्मनि प्रथयन्ती स्पन्दते इत्यर्थानुगमात् स्पन्द इति इहोच्यते।"
(तदेव)

"तत एव चित्स्वाभाव्यादचलस्यापि श्रीभगवतः स्वातन्त्र्यशक्तिरविभक्ताप्यशेषसर्गसंहारादिपरम्परां दर्पणनगरवत्स्वभित्तावेव भावियुक्त्यानधिकामप्यधिकामिव दर्शयन्ती किञ्चिच्चलत्तात्मक - धात्वर्थानुगमात्स्पन्द इत्यभिहिता।"
(स्पं०नि०,पृ०,3)

(8) मायाख्यशक्तेः सारं विभूतिः, सामर्थ्यञ्च 'स्पन्द' इति बोध्यम्।

यथा—

"विभूतिर्हृदयं सारं स्पन्दः सामर्थ्यमेव च।।"
(पू०प्र०,146)

"एष एव च विमर्शः—चित्, चैतन्यं, स्वरसोदितापरावाक्, स्वातन्त्र्यं, परमात्मनो मुख्यमैश्वर्यं, कर्तृत्वं, स्फुरत्ता, सारो, हृदयं, स्पन्दः, इत्यादिशब्दैरागमेषूद्घोष्यते।"
(प०प्रा०,पृ०,2)

"गुणादिस्पन्दनिःष्यन्दिषु यत् सामान्यस्पन्दरूपम्, अक्रमप्रकटितनिमेषोन्मेषसृष्टिस्थितिप्रकारम् ईषदुच्छूनतया किञ्चिच्चलनात्मकमपि तदेव मन्दिरं सर्वस्य प्रथमनिवासित्वात्, अमन्दोऽनवच्छिन्न आनन्दनिःष्यन्दोऽहमित्युल्लेखचमत्कारप्रसरो यत्र तादृशस्पन्दमन्दिरस्य .....।"
(भा०वि०,पृ०,21-22)

"दशादिक्कालाद्यैरकलितचिदालोकवपुषः
सदा तादृक्स्वात्मानुभवितृतया विस्फुरति यः।
निजो धर्मः शम्भोरनुपमचमत्कारसरसः
परं शाक्तं तत्त्वं जगति जयति स्पन्द इति तत्।।"
(स्पं०वि०,पृ०,1)

"स्पन्दशब्दश्च अयं स्वस्वभावपरामर्शमात्रस्य नित्यस्य शून्यताव्यतिरेचनकारणभूतस्य तावन्मात्रसंरम्भात्मनः शक्त्यपराभिधानस्य पारमेश्वरस्य धर्मस्य किञ्चिच्चलनात् 'स्पन्द' इति।"
(स्पं०वि०,पृ०,13-14)

द्र०:- **'स्पन्दसिद्धान्तः'** इति।

(9) स्पन्दप्रदीपिकायामपि व्याख्यातः स्पन्दो यथा—

"स्पदि-किञ्चिच्चलने, इति। स्पन्दनात् स्पन्दः। स्पन्दनञ्चनिस्तरङ्गस्यास्य तावत् परमात्मनः युगपन्निर्विकल्पा या सर्वत्रौन्मुख्यवृत्तिता। तस्मात्:— 'शान्तषाड्गुण्यरूपस्य यत् (यः) स्फुरन्प्रतिभोदयः।
स चाऽऽत्मबलशक्तीशः चिद्रूपः स्पन्दसंज्ञकः।"
(स्पं०प्र०,पृ०,3)

"इति। अतश्चाऽस्मत्पितुर्मातामहाचार्येण महाबलेन :—
'यथार्थनाम्नः क्रोधे'।
इत्यादिनोक्तो विभवोदयो रहस्यस्तोत्रे। उक्तं चेश्वरप्रत्यभिज्ञायाम् :—
'या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता।
अक्रमानन्तचिद्रूपः प्रमाता स महेश्वरः।।
व्यापकत्वात्स सामान्यः सर्वसाधारणादपि' इति।"
(स्पं०प्र०,पृ०,3)

(अत्र तृतीया पङ्क्ति प्रक्षिप्ताऽस्ति।)

"अस्य च :—

'स्पन्दः सामान्यपूर्वश्च शुद्धात्मा शङ्करः शिवः।
भावः स्वभावः तत्त्वं च ज्ञातेत्याद्यभिधाः स्मृताः।।' इति।
अन्यच्च, चित्, संवित् ज्ञानं, बोधश्चेति, पर्यायाः।
एष एव निरावरणचित्स्वरूपत्वाद् दिक्कालाद्यनवच्छिन्नप्रसरोऽद्वितीयः स्वानुभवैकप्रमाणः शक्तिचक्रेश्वर आत्मचिन्तामणिः उपेयतयाऽभिधेयः।"

(स्पं०प्र०,पृ०,3)

(10) स्वातन्त्र्य शक्तिः, संवित्तत्त्वम्।

द्र०:- 'विमर्शः' इति।

(11) पारमेश्वरी पराशक्तिः।

द्र०:- 'काली' इति।

आगमिकी खल्वेषाऽस्याः संज्ञा।

द्र०:- (स्पं०वि०,पृ०,1,14; स्पं०सं०पृ०,5; प०प्रा०,पृ०, 2,भा०वि०,पृ०,21-22;पू०प्र०1,146) इति।

~ अभिव्यक्त :— **तीव्रासु देहप्राणचित्ताद्यवस्थासु स्पन्द- तत्त्वं स्वयमेव स्फुटं प्रकाशते। सावधानैश्च साध्वकैर्विनायासं साक्षात्कर्तुं शक्यते। ताश्चावस्था बह्वयोऽपि प्रदेशमात्र- निर्देशनदिशा सूचिता विज्ञानभैरवे।**

यथा—

"क्षुताद्यन्ते भये शोके गह्वरे वा रणाद् द्रुते।
कुतूहले क्षुधाद्यन्ते ब्रह्मासत्तामयी दशा।"

(वि०भै०,118)

ब्रह्मसत्तापदेनात्र पारमैश्वर्यस्फुरत्तासुमण्डिता शुद्धचिन्मयतोक्ता शिवात्मिकेति।

~ अशुद्ध :— **समस्तबाह्यन्तःकरणदेहादिक्रियाः स्पन्दरूपाः, सर्वमपि जडं पदार्थजातं गतिमत्त्वेन स्पन्दनशीलम्। परमाणोरप्यङ्गानि परस्पराकर्षणविकर्षणशीलतया स्पन्दनशीलानि। मायीये क्षेत्रेदृश्यमानेयं सर्वापि गतिशीलताऽशुद्धः स्पन्दः, अस्य स्वचिद्रूपाभिव्यञ्जकत्वाभावात्।**

~ परः :— **विश्वसिसृक्षात्मकः परमशिवस्य शिवतायाः- प्रथमः समुन्मेषः। यथा—**

"अनन्तभावसंभारभासने स्पन्दनं परम्।
उपोद्घातायते यस्य तं स्तुमः सर्वदा शिवम्।।"

(ई०प्र०वि०,खं०1,पृ०,28)

द्र०:- 'परः स्पन्दः' इति।

~ प्रतिष्ठितः :— **सामान्यस्पन्दस्यैवाभिधानान्तरं प्रतिष्ठित इति।**

तद्यथा—

"सामान्यविशेषभेदेन प्रतिष्ठिताप्रतिष्ठितरूपत्वात् स्पन्दस्य द्वैविध्ये स्थिते, उपादेयः 'प्रतिष्ठितः स्पन्दः' तत्र पदे उपलभ्यते इति सम्बन्धः। यः प्रतिष्ठितश्चलत्वव्यपदेशहेतुः सुखित्वाद्यनित्य विशेषस्पन्दाविषयत्वादप्रकम्पस्थितिः स्वभावमात्राधारः सामान्यरूपो मुख्यः स्पन्दः प्रत्यस्तमितसमस्तविशेषशक्तिचक्रपरमात्मधर्मः।"

(स्पं०वि०,पृ०,70)

एवं प्रतीयते यदेतत् पदं कारिकाकृता क्रियार्थत्वेन फलान्ततया प्रयुक्तम्, न पुनर्विशेषपारिभाषिकपदत्वेनेति। तथाविधोऽत्र प्रयोगो व्याख्याकर्तुरेव बुद्धिवैभवस्य परिस्पन्दः इति।

~ विशेषः :— **शिवशक्तेर्बहिर्विकासात्मकः परस्य तत्त्वस्य विचित्रार्थक्रियाकरस्तस्य विश्वात्मकताख्यापकः कोऽपि सुविचित्रोविशेषः। तस्य बहिर्मुखताया विकासकः तां प्रत्यौन्मुख्यपरम्परात्मकः स्फुरत्तारूपः स्पन्दः स च तस्य विश्वपदार्थावभासनक्रीडाविमर्शनमयः।**

"ततः स्वातन्त्र्यनिर्मेये विचित्रार्थक्रियाकृति।
विमर्शनं विशेषाख्यः स्पन्द औन्मुख्यसंज्ञितः।।"

(तं०आ०5,81)

अयं विशेषस्पन्दो मूलतः शिवभावमध्य एव परिस्फुटतीति ज्ञेयं सुधीभिः।

द्र०:- 'विशेषस्पन्दः' इति।

~ व्यवहारमध्ये :— **(1) व्यवहारेऽपि सर्वेषां ज्ञानानामुत्पत्तेः प्राग्यावस्था, अन्ते ज्ञानफलप्राप्तौ चापि यावस्था सा स्फुटा स्पन्दरूपा परमशिवतैव; सैव भगवदनुग्रहपात्रैः सूक्ष्मतरावधानधनैः रहस्यमयशिवयोगदृष्ट्या स्फुटं तथा साक्षात्कर्तुं शक्यते। यथा—**

"सर्वविकल्पादिज्ञानानामग्रत उत्पित्सावस्थायां ज्ञानज्ञेयाना बिलज्ञातृस्वरूपसंस्पर्शोऽवश्यंभावीति तदवस्थास्वपि परव्यवस्था।"

(शि०दृ०वृ०,पृ०,8)

(2) हर्षशोकादितीव्रतरभावावेशक्षणेषु तीव्रवेगवत्याः क्रियायाश्च क्षणेषु स्वात्मनः शुद्धा स्पन्दरूपताऽचिरद्युतिवच्चकास्ति। परं स्पन्दतत्त्वविविक्तविधानज्ञैर्योगिभिरेव तथा साक्षात्कर्तुं शक्यते।

यथा—

"अतिक्रुद्धः प्रहृष्टो वा किं करोमीति वा मृशन्।
धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः।।"

(स्पं०का०,22)

"सा च दृश्या हृदुद्देशे कार्यस्मरणकालतः।
प्रहर्षावेदसमये दरसंदर्शनक्षणे।।
अनालोचनतो दृष्टे विसर्गप्रसरास्पदे।
विसर्गोक्तिप्रसङ्गे च वाचने धावने तथा।।
एतेष्वेव प्रसङ्गेषु सर्वशक्तिविलोलता।"

(शि०दृ०1,9-11)

~ शुद्धः :— **(1) अचलस्यापि चित्तत्त्वस्य चलत्तावभासनमात्रेण जगदुन्मेषनिमेषावभासकः स्वभावः। यथा—**

"तदेतदुभयमचलस्यापि चित्तत्त्वस्य चलनावभासनमात्रेण किञ्चिच्चलनात्मकमिति शुद्धस्पन्दोऽयमुक्तः। सर्वाणि हि तत्त्वानि भगवतः शक्तिरूपाणि स्पन्द एव।"

(ई०प्र०वि०वि०,खं०3,पृ०,265)

(2) सदाशिवेश्वरतत्त्वावभासनलीलात्मकः परमशिवस्यान्तर्बहिर्विमर्शनक्रीडात्मकः पारमेश्वरः परो विलासः।

यथा—

"शुद्धोऽयं स्पन्दः परमेश्वरस्याचलस्याप्यप्ररूढरूपान्तरापत्ति लक्षणः किञ्चिच्चलनात्मतया स्फुरद्रूपत्वात्।"

(ई०प्र०वि०,खं०2,पृ०,195)

~ (द्विविधः) :— **स च सामान्यविशेषात्मकत्वेन द्विप्रकारः शुद्धः स्पन्दः। यथा—**

"स्पन्दस्य, परस्य शाक्तस्य तत्त्वस्य उपचरित-सामान्यविशेषात्मकतया द्विप्रकारत्वेन व्याख्यास्यमानस्य, यत्तत्त्वं परमार्थः यथाक्रममुपादेयतया हेयतया च निश्चितं रूपं ....।"

(स्पं०वि०,पृ०,63)

"सामान्यविशेषभेदेन प्रतिष्ठिताप्रतिष्ठितरूपत्वात्स्पन्दस्य द्वैविध्ये स्थिते .....।"

(तदेव,पृ०,70)

~ सामान्यः :— **शिवात्मकः स्पन्दो परस्य तत्त्वस्य विश्वोत्तीर्णताख्यापकः।**

द्र०:- 'स्पन्दः' इति।

अस्य साक्षात्कारोऽन्तरवधानाभ्यासतो भवति शिवयोगिनाम्।: यथा—

"तेन संवित्त्वमेवैतत्स्पन्दमानं स्वभावतः।।
लयोदया इति प्राणे .....।"

(तं०आ०6,181)

द्र०:- 'सामान्यस्पन्दः' इति।

"परामर्शस्वभावत्वादेतस्या यः स्वयं ध्वनिः।।
सदोदितः स एवोक्तः परमं हृदयं महत्।
हृदये स्वविमर्शोऽसौ द्राविताशेषविश्वकः।।
भावग्रहादिपर्यन्तभावी सामान्यसंज्ञकः।
स्पन्दः स कथ्यते शास्त्रे स्वात्मन्युच्छलनात्मकः।।"

(तं०आ०4,181-183)

एवं प्रतीयते यत् परः एव स्पन्दः योगिसाक्षात्कारे विजृम्भमाणः सन् सामान्यस्पन्दः इति समाख्यां लभते। स च परमशिवस्वभावभूता परमेश्वरत्वख्यापिका चितः स्फुरत्तैव वस्तुतः।

स्पन्दकारिका :— स्पन्दसिद्धान्तस्य, स्पन्द-तत्त्वविविक्त्यभ्यासस्य तत् फलानां च विस्तरतः प्रतिपादिकः कारिकाबद्धो भट्टकल्लटकृतो ग्रन्थविशेषः। अत्र ग्रन्थेः— (1) भट्टकल्लटकृता :— स्पन्दसर्वस्वाख्या वृत्तिः; (2) स्पन्दविवृत्तिः श्रीरामकण्ठनिर्मिता; (3) स्पन्द निर्णय :— श्री क्षेमराजनिर्मितः; (4) स्पन्दसंदोहः— तेनैव निबद्धः; स्पन्दप्रदीपिकाः— उत्पलवैष्णवकृता इत्येताष्टीका लभ्यन्ते।

इदानीन्तनैरप्याचार्यम्मन्यैः कैश्चन गुरुभिरांगलहिन्दी-प्रभृतिभाषासु लिखिता अस्य ग्रन्थस्य व्याख्याः वर्तन्ते। परमस्माभिर्नैव ता अत्रोपयुक्ताः। तासां प्रामाणिकत्वस्यानिश्चि-तत्वात्। केवलमेका हिन्दीभाषामयी व्याख्या प्रो० नीलकण्ठगुरटू-निर्मिता वर्तते। या प्राक्तनगुरुवराणां दृष्टिमेवानुसरति।

~ तत्तात्पर्यम् :— **अस्य ग्रन्थस्य कासामपि विशेषकारिकाणां तात्पर्यस्य स्पष्टीकरणं तन्त्रालोके कृतमस्ति। तद्यथाः —**

(1) सर्वस्यापि देशाध्वजातस्य स्वात्माङ्गभूततया दर्शनस्याभ्यासेनानायासमेव या स्वात्मभैरवतानुभूतिः सैवोपदिष्टा। यथा—

"दिदृक्षयेव सर्वार्थान् .....।

(स्पं०का०,43)

इत्यादि कारिकया यथा —

"दिदृक्षयेव सर्वार्थान् यदा व्याप्यावतिष्ठते।
तदा किं बहुनोक्तेन इत्युक्तं स्पन्दशासने।।"

(तं०आ०8,6)

"सर्वमहमित्यनुसन्धानपूर्वं स्वात्मनि क्रोडीकृत्यावतिष्ठते तथा निःशेष वेद्यविगलनेन परभैरवदशावेशचमत्काररूपं यत् फलं .....।"

(तं०आ०वि०,खं०5,पृ०,5)

"तदाक्रम्य बलं मन्त्राः।"

(स्पं०का०,26)

(2) इत्यादि रूपायाः कारिकायास्तात्पर्यमेतत् :— अभिषेकप्रकाशनविषये तन्त्रालोकस्य त्रयोविंश आह्निके यद् विद्याव्रतमुपदिष्टं तच्चरणेनैव भाविनो गुरोर्मन्त्राः वीर्यवन्तो भवन्तीति। तदेतद् विद्याव्रतं स्वबलोज्जृम्भणे उपायभूतम्। तच्च विद्याव्रतं तत्र विस्तरतः प्रतिपादितं भावनाभ्यासविशेषात्मकं 33 तः 39 यावत् कारिकासमूहेन। विद्याव्रतोद्भावितेन बलेनैव गुरोर्मन्त्राः वीर्यवन्तो भवन्तीति कारिकायास्तात्पर्यम्। यथा—

"..... यदुक्तं स्पन्दशासने।
तदाक्रम्य बलं मन्त्राः" इत्यादि।।

(तं०आ०23,39-40)

(3) "तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः।
प्रवर्तन्तेऽधिकाराय करणानीव देहिनाम्।।"

(स्पं०का०,26)

इत्यारभ्य—

"इयमेवामृतप्राप्तिरयमेवात्मनो ग्रहः।
इयं निर्वाणदीक्षा च शिवसद्भावदायिनी।।"

(स्पं०का०,32)

इत्यन्तं याः कारिकास्तासामेष सारो यद् विमलायां मतौ संविद्विकासेन यद् बलं विजृम्भते तदाक्रम्यैव सर्वाभीष्टफलप्राप्तिः, तद्बलेनैव च भोगमोक्षलाभः। तद्बलेनैव च मन्त्राः वीर्यवन्तः सम्भवन्तीति। यथा—

"तदाक्रम्य बलं मन्त्राः अयमेवोदयः स्फुटः।
इत्यादिभिः स्पन्दवाक्यैरेतदेव निरूपितम्।।"

(तं०आ०15,113-114)

~ तन्निर्माता :— वसुगुप्तदृष्टस्य स्पन्दसिद्धान्तस्य प्रकाशनं भट्टकल्लटेन स्पन्दकारिकाभिः कृतमित्यत्र नास्ति संशयः। यथा—

"दृब्धं महादेवगिरौ महेश स्वप्नोपदिष्टाच्छिवसूत्र-सिन्धोः। स्पन्दामृतं यद्वसुगुप्तपादैः श्रीकल्लटस्तत्प्रकटीचकारः।"

(स्पं०का०,पृ०,40)

भ्रमकारणभूतेनानेन वसुगुप्तमाहात्म्यवर्णनेन पुरातना महान्तोऽप्याचार्याः अनवधानतः स्पन्दकारिकां वसुगुप्त-कृताममन्यन्त। परं पूर्वं रामकण्ठेन ततो भट्टभास्करेणोत्पल-वैष्णवेन चायं भ्रमोऽपध्वस्तः।

एवं प्रतीयते यदभिनवगुप्ताचार्यं यावद् भूयांसो गुरवो भट्टकल्लटकृतस्य निर्देशस्यापातत एव लब्धमर्थमनुसरन्तो वसुगुप्तमेव कारिकाकारं मन्यन्ते स्म। न तै रामकण्ठकृतं निर्देशं प्रति सूक्ष्मदृष्ट्या कदाप्यवधानं विहितम्। यतो नेयं काप्युग्रा समस्याऽभवत्तस्मिन्युगे। अत एवाचार्याभिनवगुप्तैः अपि तथाविध एव निर्देशः कृतः।

यथा—

"चिदद्वयवाद एव संविद्दर्पणप्रतिबिम्बरूपे भावकलापे अभ्युपगम्यमाने शक्तिव्यक्तिविभागः संविच्छक्तिचित्रितनिमेषणोन्मेषण-परमार्थ उपपद्यते, नान्यथा इति दर्शितं श्रीवसुगुप्तपादैः संविद्रूपात्मकस्पन्दादेवोन्मेषनिमेषतः संघातविग्रहविपर्यासैर्लयोद योपलक्षितकृत्यपञ्चकप्रपञ्चसम्भवं निरूपयद्भिः।"

(ई०प्र०वि०वि०,खं०2,पृ०,312)

अत्रोन्मेषनिमेषशब्दौ लयोदयशब्दौ च स्पन्दकारिकायाः प्रथमां कारिकां प्रति निदेशकाः। परं वसुगुप्तस्य शिष्यपरम्परायां ये गुरवोऽविच्छिन्नया परम्परया शास्त्रोपदेशं लब्धवन्तोऽभूवँस्ते तदनुसारं भट्टकल्लटमेव कारिकानिर्मातार-मुद्घोषयन्ति स्म। एवं परम्पराद्वयं पृथक्-पृथक् प्रचलति स्म, विना पारस्परिकं संघर्षम्। परमेतदप्यनुमातुं शक्यते यत्क्षेमराजस्य काले व्यूहद्वये परस्परं महतीस्पर्धाप्युदगच्छदिति। अत्रानुमाने इमे हेतवः—

(1) आचार्याभिनवगुप्तादिभिर्विशेषतः सुसमादृतं भट्ट-कल्लटगुरुं प्रति क्षेमराजेन बहुशोऽनादरसूचकानां पदानां प्रयोगः कृतः।

(2) तस्य पक्षीया ये साधकाः शिष्याश्चासँस्तैः स्पन्दकारिकायां त्रिपञ्चाशत्तमा कारिका प्रक्षिप्ता तथा च तस्याः पदरचनाकृता यथा तया वसुगुप्तकर्तृत्वं स्पन्दकारिकायाः सिद्ध्यति। असौ कारिका क्षेमराजीये स्पन्दनिर्णये व्याख्याता लभ्यते। वसुगुप्तीयपरम्परानुसारिभिरप्यग्रे पञ्चत्रिंशत्तमा कारिका तथा पदनिबन्धपूर्वकं प्रक्षिप्ता यथाऽसौ भट्टकल्लटनिर्मातृत्वं स्पन्दकारिकायाः प्रत्याययति। असौ तथाविधा कारिका उत्पलवैष्णवकृतायां स्पन्दप्रदीपिकायां लभ्यते। परं रामकण्ठकृतायां स्पन्दविवृत्तौ द्विपञ्चाशदेव कारिकाः व्याख्याताः सन्ति। ततः त्रिपञ्चाशत्तमा कारिका उभयत्र पृथक्-पृथक् प्रयोजनानुकूल्येन प्रक्षिप्तैव सिद्ध्यति। तदत्रास्याः समस्यायाः विषये सारभूतमिदं वस्तुजातं प्रत्यवधेयं सुधीभि :— (1) भट्टकल्लटोक्त्या आपाततः प्रतीयमानमर्थमनुसृत्य पुरातने- ष्वाचार्येषु भूयांसो वसुगुप्तगुरुमेव स्पन्दकारिकानिर्मातार- ममन्यन्त। न च तैरत्र विषये गम्भीरा गवेषणा कृता। यतो नेयं काप्युत्कटा समस्याऽभवत् तत् काले। (2) उत्पलवैष्णवेन च गुरुपरम्परोपदेशमनुसृत्य गम्भीरां गवेषणां विधाय भट्टकल्लट एव कारिकाकर्तृत्वेन स्थापितः।

(3) आचार्याभिनवगुप्तेनात्र विषये गम्भीरा विचारणा नैव कृता, यतस्ततकरणोचितोऽवसर एव नागतस्तस्य पुरतः।

(4) वसुगुप्तपरम्परायामाविर्भूतेन भट्टभास्करेण स्वाभाविकतयैव परम्परोपदेशाश्रयणेन भट्टकल्लटकर्तृत्वं स्पन्दकारिकायाः प्रतिपादितम्।

(5) उत्पलवैष्णवेन च तदेव मतं नितरां सुविशदीकृतम्।

(6) क्षेमराजेन भट्टकल्लटपरम्परया साकं स्पर्धायाः कारणाद् निजपरम्परामतमुद्घोषयितुं महान्तं यत्नं विदधता वसुगुप्तकर्तृत्वं स्पन्दकारिकायाः प्रतिपादितम्, प्रक्षिप्तां कारिकामाश्रयता।

(7) भट्टकल्लटसमकालीनस्य रामकण्ठस्य व्याख्यया अभिव्यज्यमानमर्थं प्रति न केनाप्यवधानं दत्तम्।

(8) सोमानन्द परम्परायां केनापि गुरुणा स्पन्दकारिकायाः 53 तमस्य पद्यस्य निर्माणं विदधता तदपि कारिकासु योजितम्। परं तत् पद्यमपरया परम्परया न स्वीकृतम्। तस्याः परम्पराया गुरुभिरप्येवंविधस्य पद्यान्तरस्य निर्माणं विधाय तदेव योजितं कारिकासु। परं रामकण्ठसम्मत-पाठानुसारमुभयं प्रक्षिप्तमेव भाति।

(9) रामकण्ठस्य भट्टकल्लटसमकालत्वेन तदुक्तमेव मतं दृढतरं प्रमाणं यदनुसारं वसुगुप्तपादाः स्पन्दकारिकाकर्तुर्गुरव एव न स्वयं तद्ग्रन्थकर्तारः इति।

द्र०:- "अगाधसंशयाम्भोधिसमुत्तरणकारिणीम्।
वन्दे विचित्रार्थपदां चित्रां तां गुरुभारतीम्।।" इति।

(स्पं०का०,52)

इत्यस्याः कारिकायाः रामकण्ठकृता व्याख्या, यदनुसारं कारिकाकारः स्वगुरोर्वसुगुप्तस्य भारतीमनया स्तौति।

~ (उत्पलवैष्णवमते) :— उत्पलवैष्णवो द्विवारं स्पन्दकारिकायाः भट्टकल्लटकृतत्वमुक्तवान्। यथा—

"रहस्यं श्लोकयामास सम्यक् श्री भट्टकल्लटः।।"

(स्पं०प्र०,पृ०,54)

"अयमत्र किलाम्नायः सिद्धमुखेनागतं रहस्यं यत्।
तद् भट्टकल्लटेन्दुर्वसुगुप्तगुरोरवाप्य शिष्याणाम्।।
अवबोधार्थमनुष्टुप्पञ्चाशिकयाऽत्र संग्रहं कृतवान्।"

(स्पं०प्र०,पृ०,1)

~ (क्षेमराजमते) :— आचार्य वसुगुप्त एव स्पन्दकारिका-निर्माता, भट्टकल्लटश्च केवलं व्याख्यातैवेति। यथा—

"स्वप्नोपलब्धोपदेशः श्रीमान्वसुगुप्ताचार्यो महादेवपर्वताद्-

भगवदिच्छयैव महाशिलातलोल्लिखितान्यतिरहस्यानि शिवसूत्राण्यासाद्य प्रसन्नगम्भीरैकपञ्चाशता श्लोकैरागमानुभवोपपत्त्यैकीकारं प्रदर्शयन्संगृहीतवान्।"

(स्पं०नि०,पृ०,1-2)

"एतानि च सम्यगधिगम्य भट्टश्रीकल्लटाद्येषु सच्छिष्येषु प्रकाशितवान् स्पन्दकारिकाभिश्च संगृहीतवान्।"

(शि०सू०वि०,पृ०,2)

~ (भट्टभास्करमते) :— **तन्मते भट्टकल्लट एव स्पन्दकारिकानिर्माता। यथा—**

"व्याकरोत्त्रिकमेतेभ्यः स्पन्दसूत्रैः स्वकैस्ततः।"

(शि०सू०वा०भा०,पृ०,3)

स्पन्दकारिकाः एव स्पन्दसूत्रेति नाम्ना प्रसिद्धा आसन्। क्षेमराजादिभिरपि कारिकाणां निर्देशाः सूत्रत्वेन कृताः। द्र०:- 'स्पन्दसूत्रम्' इति।

~ (रामकण्ठमते) :— **रामकण्ठो वसुगुप्तं स्पन्दकारिकाकर्तुर्गुरुत्वेन निर्दिष्टवान्, न कारिकाकर्तृत्वेन—"वन्दे तां गुरुभारतीम्" इत्यस्य वाक्यस्य व्याख्यायाम्। यथा—**

"गुरुभारतीं वन्दे गुरोः वसुगुप्ताभिधानस्य साक्षात् सिद्धमुखसंक्रान्तसमस्तरहस्योपनिषद्भूतस्पन्दतत्त्वामृतनिःष्यन्दस्य, भारतीं वाचं स्तौमि।"

(स्पं०वि०,पृ०,165)

गुरुभारतीमिति पदं हि स्पन्दकारिकायाः एव। एतेन च पदेन कारिकाकारः स्वगुरोर्भारतीं प्रणमति। सोऽत्र स्पन्दकारिकानिर्मातुर्गुरुरेव वसुगुप्त इति स्पष्टतां याति। ततः कारिकाकारो वसुगुप्तस्य शिष्यो भट्टकल्लट एवेति सिद्ध्यति।

~ तद्वाक्यानि :— **समुद्धृतानि तन्त्रालोके। तद्यथा—**

"तदाक्रम्य बलं मन्त्राः अयमेवोदयः स्फुटः।।
इत्यादिभिः स्पन्दवाक्यैरेतदेव निरूपितम्।"

(तं०आ०15,113-114)

~ प्रभूतव्याख्यायुता :— **भूयस्योऽस्य ग्रन्थस्य टीका अभूवन्। परमिदानीं पुरातन्यश्चतस्र एवावशिष्टाः। ताश्च भट्टकल्लटरामकण्ठक्षेमराजोत्पलवैष्णवकृताः प्रागुक्ताः। तद्यथा—**

"यद्यप्यस्मिन् विवृत्तिगणना विद्यते नैव शास्त्रे।
.....।।
अनन्तापरटीकाकृन्मध्ये स्थितिममृष्यता।
विवृतं स्पन्दशास्त्रं नो गुरुणा नो, मयास्य तु।।"

(स्पं०नि०, पृ०,77)

स्पन्दतत्त्वम् :— परमेश्वरस्य परमेश्वरताया विलासस्य यद्बीजं तत्तु पारमेश्वरपरिपूर्णस्वातन्त्र्यमयं स्पन्दतत्त्वमेव। परमेश्वरस्य सततं चिदानन्दचमत्कारात्मकस्पन्दतत्त्वाविष्टत्वे एव तस्य परमेश्वरतायाः विलासः चलति यतः।

"एवं चानेन विश्वोत्तीर्णं विश्वमयं विश्वसर्गसंहारादिकारि शाङ्करं स्वस्वभावात्मकं तत्त्वमित्यभिदधता सर्वेषु पारमेश्वरेषु यदुपास्यं तदितः स्पन्दतत्त्वान्नाधिकं केवलमेतत्स्वातन्त्र्यवशेनैव तदुपासावैचित्र्यमाभास्यते।"

(स्पं०नि०,पृ०,12)

"स्पन्दाख्यं तत्त्वमेवमिति शून्यवन्न स्मर्यमाणत्वं प्रतिपद्यते तस्य सर्वदानुस्यूतोपलब्धेरकरूपस्य कदाचिदप्यनुपलभ्यत्वायोगात्। ..... यद्यपि च समावेशदशा व्युत्थितेन प्राणादिसंस्कारवशात् स्मर्यते तथापि न तावदेव स्पन्दतत्त्वमपि तु सर्वानुस्यूतानवच्छिन्नप्रकाशानन्दसारप्रमातृरूपमेव तत्। .... अतोऽस्यानवच्छिन्नचमत्काररूपस्य न जातुचित्स्मर्यमाणत्वं मूढत्वं वा।"

(स्पं०नि०,पृ०,29-30)

~ तदभिव्यक्तिः :— द्र०:- **'स्पन्दः'**~'अभिव्यक्तः' इति।

~ तद्विविक्तिः :— **अन्तरनुसन्धानात्मना रहस्योपायेन तस्य स्पन्दतत्त्वस्य स्वविमर्शेनाभेददृष्ट्या विवेचनम्। तेन च विवेचनेन सद्यो जीवन्मुक्तिलाभो भवति शिवयोगिनाम्। यथा—**

"अतः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये।
जाग्रदेव निजं भावं न चिरेणाधिगच्छति।।"

(स्प०का०,21)

~ परसाक्षात्कारदम् :— **स्पन्दतत्त्वोपलब्धेरभ्यासेन परतत्त्व साक्षात्कारोऽनायासमेव भवति।"**

"यामवस्थां समालम्ब्य यदयं मम वक्ष्यति।
तदवश्यं करिष्येऽहमिति सङ्कल्प्य तिष्ठति।।
तामाश्रित्योर्ध्वमार्गेण सोमसूर्यावुभावपि।
सौषुम्नेऽध्वन्यस्तमितो हित्वा ब्रह्माण्डगोचरम्।।
तदा तस्मिन्महाव्योम्नि प्रलीनशशिभास्करे।
सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः।।"

(स्पं०का०,23-25)

स्पन्दनम् :— (1) उच्छलता। उक्तं यथा—

"स्पन्दनस्य स्वात्मोच्छलत्ताया .....।"

(तं०आ०वि०,खं०3,पृ०,361)

द्र०:- **'स्पन्दः'** इति।

(2) अचलस्यापि तत्त्वस्य किञ्चिच्चलनशीलत्वमिव, येन वस्तुतोऽचलमपि तत् किञ्चिच्चलदिव भासते। स्वरूपस्यान्यथाभावमप्राप्नुवदपि प्राप्नुवदिव प्रतीयते इति। यथा—

"स्पन्दनं च किञ्चित् चलनम्, एषैव च किञ्चिद्रूपता यदचलमपि चलमाभासते इति, प्रकाशस्वरूपं हि मनागपि नातिरिच्यते, अतिरिच्यते इव इति अचलमेव आभासभेदयुक्तमेव च भाति।"

(ई०प्र०वि०,खं०1,पृ०,208)

परमेश्वरो निजपरमेश्वरतायाः मनागप्यच्यवमानोऽपि जगद्रूपतया आभासते। तदेतत् तस्य स्पन्दशीलताया एव

माहात्म्यम्। एतन्माहात्म्यमसाक्षात्कुर्वन्त एव विवर्तसंवृत्यादि शरणं वाञ्छन्तः स्वयं भ्रान्ताः सन्तो जगदपि भ्रान्तितमसि निमज्जयन्ति इति तावन्मन्वते कश्मीरशैवदर्शनगुरवोऽभिनवगुप्तपादप्रभृतयः। यथा—

"अत एव भेदाभेदयोर्विरोधं दुःसमर्थमभिमन्यमानैरेकैरविद्यात्वेनानिर्वाच्यत्वमपरैश्चाभासलग्नतया सांवृतत्वमभिदधद्भिः आत्मा परश्च वञ्चितः इति।"

(ई०प्र०वि०,खं०2,पृ०,118)

उद्धृतं च भट्टनायकवाक्यं क्षेमराजेन यथा—

"नपुंसकं महादेव परं ब्रह्म फलेत् कियत्
तत् पौरुषनियोक्त्री चेन्न स्यात्त्वच्छक्तिसुन्दरी। इति"

(स्पं०नि०,पृ०,18)

औपनिषदमप्यद्वैतं प्राधान्येनैश्वर्यवादपरमेव। यथा—

"सोऽकामयत बहुस्यां प्रजायेयेति।"

(तै०उ०2,6)

इत्यादि वाक्यानि परब्रह्मणः स्पन्दनशीलत्वं ध्वनयन्ति।

स्पन्दप्रदीपिका :— उत्पलवैष्णवकृता स्पन्दकारिकाया वैदुष्यमयी व्याख्या। अत्र बहूनां ग्रन्थानां, ग्रन्थकाराणां चापि परिचयो लभ्यते।

तद्यथा—

"मायाश्यामतमश्छन्न आत्मचिन्तामणिर्यतः।
न दृश्यतेऽतस्तत्प्राप्त्यै ग्राह्या स्पन्दप्रदीपिका।।
.....
.....
मोहनिशामध्यगता मन्ददृशस्तदपि नार्थमीक्षन्ते।
सूक्ष्मं दीपिकयाऽन्ते स्वतस्तदुद्दीपनार्थमहमद्य।।"

(स्पं०प्र०,पृ०,1)

"शुद्धबोधोल्लासवशात्कृता स्पन्दप्रदीपिका।।"

(तदेव,उद्ध०का०53)

स्पन्दशक्तिः :— परमेश्वरस्य परमेश्वरतायाः मुख्यं स्वरूपम्। यथा—

"सर्वं स्वात्मस्वरूपं मकुरनगरवत्स्वस्वरूपात्स्वतन्त्र-
स्वच्छस्वात्मभित्तौ कलयति धरणीतः शिवान्तं सदा या।
दृग्देवीमन्त्रवीर्यं सततसमुदिता शब्दराश्यात्मपूर्णा
हन्तानन्तस्फुरत्ता जयति जगति सा शाङ्करी स्पन्दशक्तिः।।"

(स्पं०नि०,पृ०,1)

"सा चैषा स्पन्दशक्तिर्गर्भीकृतानन्तसर्गसंहारैकघनाहन्ताचमत्कारानन्दरूपा निःशेषशुद्धाशुद्धरूपा मातृमेयसंकोचविकासाभासनसतत्त्वा सर्वोपनिषदुपास्या युगपदेवोन्मेषनिमेषमयी।"

(स्पं०नि०,पृ०,3-4)

स्पन्दसर्वस्वम् :— स्पन्द वृत्तिसहितायाः स्पन्दकारिकाया एतदभिधानम्। यथा—

"समाप्तं स्पन्दसर्वस्वं प्रवृत्तं भट्टकल्लटात्।
स्वप्रकाशैकचित्तत्त्वपरिरम्भरसोत्सुकात्।।"

(स्पं०का०,पृ०,40)

स्पन्दसिद्धान्तः :— कश्मीरशैवदर्शनस्यैकतमः प्रमुखः सिद्धान्तो यदनुसारं परं तत्त्वं स्वस्वभावभूतेन पारमैश्वर्यसारेणानन्दचमत्कारात्मकेन परिस्फुरणेन निर्भरः सन् तत् फलतयैव सततं सृष्टिसंहारादीनामवभासं कुर्वन् विजयते। एतदेव मुख्यमन्तरं शैवदर्शनीयस्य परशिवतत्त्वस्याद्वैतवेदान्तीयात् सर्वथा शान्ताच्छून्यकल्पात्ब्रह्मतत्त्वात्। अस्पन्दं हि विवर्त्तवादीयं ब्रह्म, सृष्टिसंहारादि च तत्र मायाकृतमेव न ब्रह्मकृतम्।

~तत्प्रतिपादनम् :— (1) सर्वप्रथमं भगवता दुर्वाससा निजे परशम्भुमहिमस्तवे प्रतिपादितोऽयं सिद्धान्तः।

यथा—

(क) "यज्जाताः सर्वनाडीपथचलदनिलव्याप्तयः सर्वभावाः।
नानारूपाश्च सर्वायनपथिकमहस्पन्दकः स त्वमेव।।"

(प०म०स्तो०6,4)

(ख) "निर्वाणः कृष्णवर्त्मा भवति तव महास्पन्दतामेत्य शम्भो।।"

(तदेव,6,5)

(2) ततोऽनुत्तरप्रकाशपञ्चाशिकायामादिनाथेनोक्तः स्फुरत्तेति शक्तिरिति च पदाभ्यामपि।

यथा—

(क) "भेदे सत्तास्फुरत्ताभ्यां भिन्नं किन्तु जगद् भवेत्।।"

(अ०प्र०पं०,4)

(ख) "स्वभावतः स्फुरत्ता च सत्ता च न विनाशिनी।"

(तदेव,7)

(ग) "जयति बहुशः स्पन्दाकारा परा चिदनुत्तरा।"

(तदेव,52)

(घ) "पञ्चपञ्चात्मकं विश्वं पञ्चस्पन्दविजृम्भितम्।।"

(तदेव,49)

(ङ) "संकोचयत्परामर्शात्सामान्यस्पन्दकेवलम्।"

(तदेव,50)

(3) तत आचार्यवसुगुप्तेन शिवसूत्रात् समुद्धृतो भट्टकल्लटेन च सविस्तरं प्रतिपादितः स्पन्दकारिकादिग्रन्थेषु। आदिनाथोऽसौ भट्टकल्लटात् प्राचीनो वा अर्वाचीनो वेति न निर्णेतुं शक्यते। सम्भवतोऽर्वाचीन एव स्यात्।

दुर्वाससः परम्परायामाविर्भूतेन वसुगुप्तेन स्पन्दतत्त्वं सम्यगुपलभ्य तद्विविक्तेरभ्यासस्य सरणिरप्युपलब्धा। ततोऽसावेव स्पन्दशास्त्रस्यादिगुरुरिति गण्यते। सविस्तरं च प्रतिपादनमस्य शास्त्रस्य कृतं भट्टकल्लटेनैव स्पन्दकारिकातद्वृत्तिप्रभृतिभिर्ग्रन्थैः।

व्याख्यातरश्चास्य स्पन्दतत्त्वस्यः — (1) रामकण्ठः, (2) भट्टभास्करः, (3) अभिनवगुप्तः, (4) उत्पलवैष्णवः, (5) क्षेमराजः इति।

~ तदनुशीलनविधिः :— स च सूक्ष्मसूक्ष्मतरेण तीव्रतीव्रतरेण चावधानेन सततगत्या स्वस्याश्चिदानन्दरूपतायाः स्वसंवेदनेनोपायेन पुनः पुनर्दर्शनस्याभ्यासः। तदभ्यासे परिष्कृततां याते स्वात्मा चिद्रूपः आनन्दस्पन्दनिर्भरः

साक्षात्कारविषयतामायाति, निखिलं च जगत् स्वानन्दस्पन्दनफलं स्वशक्तिप्रतिबिम्बमयं च प्रतिभाति।

तद्यथा—

"यथा ह्यर्थोऽस्फुटो दृष्टः सावधानेऽपि चेतसि।
भूयः स्फुटतरो भाति स्वबलोद्योगभावितः।।
तथा यत्परमार्थेन यदा यत्र यथा स्थितम्।
तत्तथा बलमाक्रम्य न चिरात्संप्रवर्तते।।"

(स्पं०का०36-37)

~ तदभिव्यक्तिः :— **बहुधा स्पन्दतत्त्वस्याभिव्यक्तिर्भवति। अनायासं तावत्तस्याः साक्षात्कारस्तीव्रक्रोधहर्षादिभावावेशक्षणेषु भवति चेत् साधकः सम्यगन्तर्मुखावधानशक्तिर्भवेत्। यथा—**

"कामक्रोधलोभमोहमदमात्सर्यगोचरे।
बुद्धिं निस्तिमितां कृत्वा तत्तत्त्वमवशिष्यते।।"

(वि०भै०,101)

"अतिशयितकामक्रोधाद्यवस्थासु स्वरसत एव समस्तापरवृत्तिक्षयमया यदि स्पन्दतत्त्वविविक्तये समुद्युक्ता झगित्यन्तर्मुखी भवन्ति योगिनः, तत् समीहितमचिरेणैव लभन्ते। अयोगिनस्तु अत्र मूढा एव।"

(वि०भै०उ०,पृ०,87)

द्र०:- (वि०भै०,118)

~ तद्भ्यासफलम् :— **(1) देहे स्थितेऽपि स्वात्मपरमेश्वरतायाः साक्षादनुभूतिः।**

(2) सर्वज्ञत्वसर्वकर्तृत्वाद्याः शक्तयः।

(3) क्षुत्पिपासानिद्रादिवशीकारः।

(4) अन्याश्च व्यावहारिकसिद्धयः।

यथा—

"दुर्बलोऽपि तदाक्रम्य यतः कार्ये प्रवर्तते।
आच्छादयेद् बुभुक्षां च तथा योऽतिबुभुक्षितः।।
अनेनाधिष्ठिते देहे यथा सर्वज्ञतादयः।
तथा स्वात्मन्यधिष्ठानात्सर्वत्रैवं भविष्यति।।"

(स्पं०का०,38-39)

~ तदुदयः (क्षणिकः) :— **स च सावधानैर्योगिभिरेव संवेद्यो, न जनैः साधारणैः। यथा—**

"तस्य च स्पन्दतत्त्वस्य अतिक्रुद्धे प्रहृष्टे धावमाने च किं करोमि,—इत्येवं चिन्ताविष्टे यदा शक्ति प्रत्यस्तमयः, तदा स्पन्दतत्त्वस्य स्फुट एवोदयो गुरूपदेशाद् अधिगन्तव्यः।"

(स्पं०का०,पृ०,18-19)

स्पन्दसूत्रम् :— स्पन्दकारिका एव स्पन्दसूत्राणीत नाम्नोल्लिखितान्याचार्यैस्तासाम् अल्पाक्षरत्वे सति बह्वर्थबोधकत्वात्।

तद्यथा —

"एवमेतादृशेषु चिन्तारत्नप्रायेषु श्रीस्पन्दसूत्रेषु यदन्यैः सर्वैर्विवृत्तिकृद्भिर्व्याख्यायि यच्चास्माभिः किञ्चिद् व्याक्रियते।"

(स्पं०नि०,पृ०,13)

"इहापि चः—
'दिदृक्षयेव .....।'
इत्यत्र सूत्रे।"

(स्पं०सं०,पृ०,8)

"भट्टश्रीकल्लटवृत्त्यक्षराण्यपेक्ष्य वयमपि तद् वृत्त्यक्षरानुरोधेन सौत्रमर्थम् .....।"

(स्पं०नि०,पृ०,34)

"निर्णीतं चैतद् द्वितीयसूत्रवृत्तौ।"

(तदेव,पृ०,49)

स्पर्शः :— ~ रहस्योगे :— **(1) कुण्डलिनीशक्तिरूपाऽवस्था विश्वविकासक्रमे।**

यथा—

"प्रसुप्तभुजगाकारशक्तितत्त्वात्मा स्पर्शः।"

(स्व०तं०उ०,11,पृ०,7)

(2) त्वगिन्द्रियग्राह्यो गुणः। रहस्यविधिना तदभ्यासे योगिनः स्पृहयालवः। तस्य सद्यः परपदप्रवेशकत्वात्। यथा—

"इति स्थिते नये शक्तितत्त्वान्तेऽप्यस्ति सौक्ष्म्यभाक्।
स्पर्शः कोऽपि सदा यस्मै योगिनः स्पृहयालवः।।
तत्स्पर्शान्ते तु संवित्तिः शुद्धचिद्व्योमरूपिणी।
यस्यां रूढः समभ्येति स्वप्रकाशात्मिकां पराम्।।"

(तं०आ०11,30-31)

स्पर्शविशेषोऽयमनुभूयते साधकैः कालाध्वाभ्यासक्रमे।

~ अक्षोभकः :— **बिन्दुनादादयः क्षोभकत्वेनोक्ताः परं स्पर्शस्तत्र तथा न गणितः। यथा—**

"अतो बिन्दुरतो नादो रूपमस्मादतो रसः।
इत्युक्तं क्षोभकत्वेन स्पन्दे स्पर्शस्तु नो तथा।।"

(तं०आ०11,32)

स्पर्शतन्मात्रम् :— उष्णत्वकोमलत्वादिविशेषप्रविभागशून्यः, स्पर्शत्वावच्छिन्नः सामान्याकारस्पर्शमात्रात्मकः सूक्ष्मतरस्त्वगिन्द्रियग्राह्योऽप्रक्षुब्धो विषयः। स च तमः —प्रधानादहङ्कारादुद्भूतः सन् सामान्यात्मकोऽपि प्रक्षोभमधिगम्योष्णत्वादिविशेषात्मकतां धत्ते, नितरां च प्रक्षोभमवाप्तः सन् वाय्वात्मकभूततत्त्वरूपतामुपयाति सृष्टिक्रमे।

यथा—

"एवं रसादिशब्दान्ततन्मात्रेष्वपि योजना।।"

(तं०आ०9,282)

द्र०:- (1) **'गन्धतन्मात्रम्'** इति।

(2) **'तन्मात्रम्'** इति च।

स्पर्शवर्णा :— ~ मातृकासु :— **कादयो यावसानाः पञ्चवर्गमयाः व्यञ्जनवर्णाः।**

~ स्पर्शता (तेषाम्): — **स्पर्शपदेन स्फुटा ज्ञेयता लक्ष्यते। पञ्चत्रिंशति तत्त्वानि हि स्फुटानि ज्ञेयानि, ततस्तद्-**

व्यञ्जकानां पञ्चवर्गवर्णानां स्पर्श इति समाख्या। यथा—

"ज्ञेयरूपमिदं पञ्चविंशत्यन्तं यतः स्फुटम्।
ज्ञेयत्वात् स्फुटतः प्रोक्तमेतावत्स्पर्शरूपकम्।।"
(तं०आ०3,153)

"नियत्यादि हि .....
..... ज्ञातुरत्यन्तं कण्ठसंलग्नत्वेनाभिन्नमेव।"
(तं०आ०वि०,खं०2,पृ०,155)

ततो न प्रमेयतया स्फुटत्वं तेषाम्। तत एव न स्पर्शवर्णव्यंग्यत्वं तेषाम्। यथा—

"अत एव चैतावत्तत्त्वपञ्चविंशकान्तं विश्वं स्फुटाज्ज्ञेयत्वादेव हेतोः इन्द्रियैः स्पृश्यन्त इति 'स्पर्शाः' तद्रूपम्।"
(तदेव)

स्पर्शात्मिका :— ~शक्तिः :— प्रसुप्तभुजगाकृतिशीला स्पर्शात्मिका शक्तिःकुण्डलिनी। यथा—

"ततः स्पर्शात्मिका शक्तिः प्रसुप्तभुजगाकृतिः।"
(पू०प्र०1,616)

स्फरमुद्रा :— न स्पष्टमवबुध्यतेऽस्याः विधिः। स तु स्वभ्यस्तक्रियाप्रपञ्चाद् योगिन एव सकाशाद् वेद्यः।

यथा—

"मुष्टिं बद्ध्वा कनिष्ठां च प्रसार्येत वरानने।
आत्मनः सम्मुखं कृत्वा स्फरस्ते कथितो मया।।"
(स्व०तं०,14,5)

"कृत्वेति वामहस्तमित्यर्थात्। .....
..... उक्तं च तत्रैव **(श्रीभैरवानुकरणस्तोत्रे) :—**

'भवभयहर्ता सोऽहं स्फराख्योऽवस्थितोऽस्मि मा भैष्ट।
इत्यास्फोटितखेटकदर्शनतो दिशसि नः स्वामिन्।।' इति।"
(स्व०तं०उ०14,पृ०,112)

स्फुटता :— इन्द्रियजन्येन प्रत्यक्षेण यद् विषयस्य स्फुटीकरणं सैव स्फुटता। यथा—

"तात्कालिकेन्द्रियव्यापारविषयीकार्यतायां स्फुटत्वव्यवहारो लोकस्य।"
(ई०प्र०वि०वि०,खं०3,पृ०,382)

स्फुरत्ता :— (1) स्पन्दस्वभावा चितिरेव स्पन्दमाना सती स्फुरत्तेत्युच्यते। सैव हि परस्य तत्त्वस्य परस्वातन्त्र्यरूपा परमेश्वरता। यथा—

"चितिः प्रत्यवमर्शात्मा परा वाक्स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः।।
सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः।।"
(ई०प्र०1-5-13-14)

(2) स्पन्दनात्मिका प्राणस्य गतिः।
द्र०:- 'प्राणस्पन्दः' इति।

स्फोटः :— ~ नादयोगे :— स्फुटसार्थकशब्दात्मा पञ्चमो नादः नादयोगाभ्यासे श्रूयमाणः।

यथा—

"वाक्यस्य स्फुटतां धत्ते वर्णभेदावभासकः।
स्फोट इत्युदितो नादः पञ्चमः शास्तृभिस्ततः।।"
(स्व०तं०उ०,प०,11,पृ०,9)

यथा—

"भुवोर्मध्यं यदा गच्छेत्स्फोटशब्दस्तु जायते।"
(स्व०तं०4,375)

स्मर्तृत्वम् :— सर्वकालमवस्थास्नोः प्रमातुः प्राग् बहिर्मुखतया प्रकाशितस्याभासस्य इदानीमन्तर्मुखतया पुनर्विमर्शनशीलत्वम्। यथा—

"अस्मद् दर्शने तु भिन्नकाला अपि संविदः तत्कालात्यागेनैव एकताभासनेन स्वतन्त्रः प्रमाता यावदन्तर्मुखतया तावत्यंशे विमृशति तावत् प्रकाशस्य तात्कालिकबहिर्भावावभासो, विमर्शस्य इदानीन्तनान्तर्मुखा स्थितिरेव।"
(ई०प्र०वि०,खं०1,पृ०,129)

~ परमेश्वरस्य :— परमेश्वरस्यैवं स्मृतिशक्त्या स्मरणं सम्भवति। ततो मूलतस्तस्यैव स्मर्तृत्वम्। यथा—

"एवं च स एव परमेश्वरः 'स्मरति।' एतदेव हि तस्य स्मरणम्—यत् एवं प्रकारपरामर्शोचितकालकलादिस्पर्शसहिष्णुमाया-प्रमातृभावपरिग्रहः, इति मायाविद्याद्वयाद्वयमयम्"
(ई०प्र०वि०,खं०1,पृ०,119-120)

स्मृतिः :— प्राक्काले (अनुभवकाले) प्रकाशितस्य विषयाभासस्य परतः (स्मृतिकाले) विमर्शनम्। "सः" इत्येवमसावेवाभासो विमृश्यते यः पूर्वमनुभवप्रकाशेन प्रकाशितोऽभूत्। यथा—

"अतीतानुभवकालः पूर्वानुभूतभावस्वालक्षण्याक्षेपकत्वेना पेक्षणीयो वेद्यभागे प्रकाशात्मकावभासाभिनिवेशितया, स्मृतदेह-प्राणाद्यवभासकालश्चावलम्बनीयो वेदकभागे विमर्शांशाभिनिवेशित्वेन।"
(ई०प्र०वि०,खं०1,पृ०,124)

द्र०:- (ई०प्र०वि०वि०,खं०1,पृ०,115) **इति।**

स्मृतिशक्तिः — पूर्वगृहीतस्य संस्काररूपतयान्तः-स्थितस्य कस्यचिदेव वस्तुनः कदाचिदेव पुनर्बहिर्भावतयावभासन-कारिणी भगवतः शक्तिः स्मृतिशक्तिः। तच्छक्तिसामर्थ्यवशात् कदाचिदेव किञ्चिदेव पूर्वगृहीतं वस्तु केनचिदेव प्रकारेण-पुनरुन्मग्नतामापद्यते। यथा—

"तेन क्वचित् आभासे गृहीतपूर्वे यत् संवेदनं बहिर्मुखम् अभूत्, तस्य यदन्तर्मुखं चित्स्वरूपत्वं तत् कालान्तरेऽपि अवस्थास्नु स्वात्मगतं तद्विषयविशेषे बहिर्मुखत्वं परामृशति,:— इति एषा स्मृतिशक्तिः।"
(ई०प्र०वि०,खं०1,पृ०,109)

~ व्यावहारिकी :— अनेकवैचित्र्यपूर्णतया तत्तत्स्मर्तृ-स्मार्यभावावभासनशक्तिः परमेश्वरस्य, यया कश्चिदेव प्रमाता, किञ्चिदेवानुभूतं प्रमेयं, कदाचिदेव, केनचिदेव प्रकारेण, केनचिदेवांशेन वा पूर्णतयापि वा पुनः प्रागनुभूततया विमृशन् तं प्रमेयं स्मरति। यथा—

"आभातपूर्ववस्तुनि बहिर्मुखं यत् संवेदनमासीत्, तस्य यदन्तर्मुखं रूपं, तत् कालान्तरावस्थायि सत् स्वात्मगतां तामेव विशिष्टविषयां बहिर्मुखतां परामृशति, मायाप्रमातरि तदेतत् स्मरतीत्युच्यते। तत्र यत् तथाविधप्रमात्रादिनिर्माणसामर्थ्यं, तद् भगवतः स्मृतिशक्तिः।"

(ई०प्र०वि०वि०,खं०1,पृ०,286)

स्मृत्यवस्थाः — अनुभूतस्य विषयस्य संस्काररूपतया स्थितस्य पुनराभासनमय्यवस्था। यथा—

"स्मृत्यवस्था अनुभूतविषयासंप्रमोषात्मिका स्वप्नसदृशी, मनसैव विषयग्रहणसाम्यात्।"

(स्पं०वि०,पृ०,20)

स्मृत्युपाय :— स्मृतिरूपः स्वरूपलाभस्योपायः। यथाः— स्मृतिः पूर्वसंस्कारजनिता सती प्राक्तनानुभवावस्थायां स्थापयति स्मर्तारम्। मन्त्रादिसहाया वस्तुस्थितिरूपा स्मृतिरपि पुनः पुनरभ्यस्यमाना सती प्राक्तनामवस्थां प्रापयति। सा चावस्था परिपूर्णपरमेश्वरात्मता; तस्या एव सर्वारम्भभूतत्वात् तत्तन्मन्त्रार्थत्वाच्चेति। एतदभिप्रेत्योक्तम् :—

"स्मृतिश्च स्मरणं पूर्वं सर्वभावेषु वस्तुतः।
मन्त्रस्वरूपं तद्भाव्यस्वरूपापत्ति योजकम्।।"

(तं०आ०5,137)

"ध्यानादिभावं स्मृतिरेव लब्ध्वा चिन्तामणिस्त्वद्विभवं व्यनक्ति।"

(ई०प्र०वि०,1-4-1,खं०1,पृ०,120)

"स्मृतिः स्वरूपजनिका सर्वभावेषु रञ्जिका।
अनेकाकाररूपेण सर्वत्रावस्थितेन तु।।
स्वस्वभावस्य सम्प्राप्तिः संवित्तिः परमार्थतः।
व्यक्तिनिष्ठा ततो विद्धि सत्ता सा कीर्तिता परा।।"

(तं०आ०5,138-139)

स्रष्टा :— सृष्टिकर्त्ता। स्फुटक्रियाशक्तिविजृम्भाविष्टः परमेश्वरः, ब्रह्मदेवश्च।

यथा—

"ईश्वरः क्रियाशक्तिप्राधान्यात् स्रष्टा।"

(स्व०तं०उ०,प०4,पृ०,66)

स्रष्टृत्वम् :— सृष्टावधिकारवत्त्वम् तच्च भिन्नभिन्नेष्वण्डेषु भिन्नभिन्नानां देवाधिदेवानामधिकारिणाम्।

~ अशुद्धेऽध्वनि :— कञ्चुकादिसृष्टौ :— **भगवानन्तनाथो महामायामधितिष्ठन् मायां प्रक्षोभ्य ततः पञ्चकञ्चुकतत्त्वानि सृजति। तैश्च प्रमातृतत्त्वमावेष्टय तत्पुरुषतत्त्वतामापादयति। तस्य च परिमितं प्रमेयं गुणसाम्यात्मकप्रकृतितत्त्वरूपतां प्रापयति। इयत् पर्यन्तं स एव सृष्टिसंहारकर्त्ता। यथा—**

"अशुद्धं पुनरध्वानमनन्तापरनामाघोरेशः सृजति, ईश्वरेच्छावशेन प्रक्षुब्धभोगलोलिकानामणूनां भोगसिद्ध्यर्थम्।"

(तं०सा०,पृ०,75)

~ प्राकृतसृष्टौ :— **मूलप्रकृतिसकाशात् कार्यकरण-तत्त्वरूपाणां त्रयोविंशतितत्त्वानां स्रष्टृत्वं संहर्तृत्वं च भगवतः श्रीकण्ठनाथस्यैव। यथा—**

"ईश्वरेच्छावशक्षुब्धलोलिकं पुरुषं प्रति।
भोक्तृत्वाय स्वतन्त्रेशः प्रकृतिं क्षोभयेद् भृशम्।।"

(तं०आ०9,225)

"स्वतन्त्रेश इति श्रीकण्ठनाथः।"

(तं०आ०वि०,खं०6,पृ०,180)

~ शुद्धेऽध्वनिः :— **शुद्धेऽध्वनि तत्त्वानां शिवादीनां तत्त्वेश्वराणामनाश्रितादीनां प्रमातॄणां च शाम्भवादीनां सृष्टिसंहारकृत् स्वयं परमशिव एव। स एव स्वातन्त्र्यात् सततमेतेषामुदयलयकर्तृत्वेन स्वयं विजयते, नान्येन केनापि कारणाधिपेनैतत् कारयति। यथा—**

"इयति साक्षात् शिवः कर्त्ता।"

(तं०सा०,पृ०,75)

~ स्थूलसृष्टौ :— **तत्र स्रष्टृत्वं ब्रह्मणः, संहर्तृत्वं च कालाग्निरुद्रस्य। यथा—**

"ब्रह्मदिनान्ते कालाग्निदग्धे लोकत्रये अन्यत्र च लोकत्रये धूमप्रस्वापिते सर्वे जना वेगवदग्निप्रेरिता जनलोके प्रलयाकलीभूय तिष्ठन्ति। प्रबुद्धास्तु कूष्माण्डहाटकेशाद्या महोलोके क्रीडन्ति। ततो निशासमाप्तौ ब्राह्मी सृष्टिः।"

(तं०सा०,पृ०,54)

द्र०:- (तं०आ०6,140-145) इति।

स्रुक् :— इच्छादिशक्तिरूपम्, भावनामये यागे। यथा—

"इच्छादय एव स्रुक्।"

(तं०आ०वि०,खं०3,पृ०,370)

स्रुक्स्रुवौ :— भावनया क्रमेण शक्तिशिवतया द्रष्टव्यौ। यथा—

".....
स्रुक् शक्तिस्तु स्रुवः शिवः।"

(तं०आ०वि०,खं०9,पृ०,210)

~ संस्कारः (तयोः) :— **स्पष्टमेवोक्तः।**

यथा—

"स्रुवं स्रुचं च संपश्येदधोवक्त्रौ क्रमाद् गुरुः।
शिवशक्तितयाभ्यर्च्यौ तथेत्थं संस्क्रियानयोः।।"

(तं०आ०15,416-417)

स्रोतांसि :— ~ आगमानाम् :— आगम-शास्त्रोद्भवस्थानभूतानि ईशानतत्पुरुषदीनां मुखानि स्वच्छन्दनाथस्य।

द्र०:- (तं०आ०वि०,खं०1,पृ०,37-46) इति।

द्र०:- **'आगमाः'** ~ 'पञ्चस्रोतसः' इति।

स्वच्छता :— वस्तुतो व्यतिरेकराहित्येऽपि सति व्यतिरेकयुक्ततयावभासमानत्वसम्भवः। यथा—

"स्वच्छेति अनतिरिक्तत्वेऽपि अतिरिक्ततावभाससम्भवः।"

(ई०प्र०वि०वि०,खं०1,पृ०,7)

यथा दर्पणादनतिरिक्तत्वेऽपि प्रतिबिम्बस्य दर्पणादतिरिक्ततावभासः तथैव प्रपञ्चस्य संविदोऽनतिरिक्तत्वेऽपि ततो भिन्नतयावभासः। सैषा संविदः परा स्वच्छता दर्पणस्य चापेक्षिकी स्वच्छता।

~ तारतम्यतः :— **यथा घटादिविषयाद् दर्पणस्फटिकादिः स्वच्छः, तत एव तस्य घटादेः प्रतिबिम्बं गृह्णाति। स्फटिकादेरप्यपेक्षया स्वच्छतरा बुद्धिः यतस्तस्यापि प्रतिबिम्बं स्वात्मनि प्रकाशयति। बुद्धेररपि स्वच्छतरा संविद् यतस्तदाविश्य स्वात्मतया तत् प्रकाशयति सुख्यहं,घटादिज्ञानवानहमित्याद्यभिमननपूर्वकं तत्तत्प्रकाशकत्वात्। यथा—**

"स्वच्छमपि हि अधिकस्वच्छमपेक्ष्य अस्वच्छं नाधिकस्वच्छस्य प्रतिबिम्बं स्वीकरोति सितदुगूलमिव स्फटिकमणेः। तथा च बुद्धितत्त्वं पुरुषापेक्षया। तथैव हि आलोकोऽपि बुद्धिप्रकाशमपेक्ष्य अस्वच्छः, तथा सोऽपि पुरुषप्रकाशमपेक्ष्य। पुरुषप्रकाशो हि सर्वतः स्वच्छस्तस्यान्यापेक्षणादेव संविद्रूपत्वं यतः। यथा-यथा हि स्फुटा वेद्यता, तथा-तथा स्वच्छत्वाभावः। एवमधिकस्वच्छेन प्रतिबिम्बं स्वीक्रियते अस्वच्छस्येति।"

(ई०प्र०वि०वि०,खं०1,पृ०,158)

स्वच्छत्वम् :— परमेश्वरस्य निर्मलत्वम्। तथा-तथा विचित्रप्रमातृप्रमेयरूपतयाऽऽभासामानस्यापि तस्य सततशुद्धसंविन्मात्रतयैव प्रकाशमानत्वम्। दर्पणस्यैव प्रतिबिम्बात्मकविचित्राभाससम्भिन्नतयाऽऽभासमानस्यापि सततं दर्पणतयैव स्थितत्वम्। यथा—

"स्वच्छेति अनतिरिक्तत्वेऽपि अतिरिक्ताभाससम्भवः।"

(ई०प्र०वि०वि०,खं०1,पृ०,7)

द्र०:- **'स्वाच्छन्द्यम्'** इति।

स्वच्छन्दः :— (1) नियत्यनुवर्तनोल्लंघनादिधनतरस्वातन्त्र्यः परमेश्वरः। यथा—

"स्वभावात् परमेशानो नियत्यनियतिक्रमम्।।
स्पृशन् प्रकाशते येन ततः स्वच्छन्द उच्यते।"

(तं०आ०14,1-2)

(2) पराभट्टारिकासकाशादवाप्तत्रिकागमोपदेशः, ईश्वरभट्टारकस्यावतारः, लकुलीशस्य गुरुः, अनन्तनाथस्य च परमगुरुः। अस्यैव शक्तीरादाय प्रकटिताः ईशानाद्याः पञ्चप्राणिशरीराः गुरवः। ते च मूलतः स्वच्छन्दनाथस्य पञ्चसु मुखेषु कृताधिष्ठानाः।

तदुक्तं गुरुक्रमनिरूपणे—

"भैरवो भैरवी देवी स्वच्छन्दो लाकुलोऽणुराट्।।
गहनेशोऽब्जजः शक्रो गुरुः कोट्यपकर्षतः। इति।"

(तं०आ०36,1-2)

लाकुलो= लकुलीशः, अणुराड्= अनन्तनाथः। गहनेशोऽनन्तनाथस्यैवापरा मूर्त्तिः।

(3) उमापतिनाथोऽपि। यतो मातृकादेव्यस्तमेव निषेवन्ते। उमाया एव च सप्तधाऽसौ विभूतिरष्टशरीरा (मातृका) यथा—

"स्वच्छन्दास्ताः पराश्चान्याः परे व्योम्नि व्यवस्थिताः।
स्वच्छन्दं ता निषेवन्ते सप्तधेयमुमा यतः।।"

(तं०आ०8,243-244)

एता मातृका अप्यत्र स्वच्छन्दा इत्युक्ताः, स्वातन्त्र्यशीलत्वात्।

(4) उमापतिनाथोऽपि क्वचित् स्वच्छन्द इति कथितं आगमेषु, तस्यापि स्वातन्त्र्यलीलाविलासित्वादिति वेद्यं सुधीभिः।

(5) बीजपिण्डविशेषः, न सम्यक् स्पष्टीकृतः क्षेमराजेन।

यथा—

"हंसाख्यो बिन्दुसंयुक्तः षष्ठस्वरविभेदितः।
बालेन्दुनादशक्त्यन्तः स्वच्छन्दो निष्कलः स्मृतः।।"

(स्व०तं०,1,69)

स्वच्छन्दतन्त्रम् :— सुबृहत्काय एकस्त्रिकागमः। एष तावद् भैरवागमेषु भैरवाष्टकमध्ये परिगणितो वर्तते श्रीकण्ठीसंहितायाम्। यथा—

"स्वच्छन्दो भैरवश्चण्डः क्रोध उन्मत्तभैरवः।
असिताङ्गो महोच्छुष्मः कपालीशस्तथैव च।।
एते स्वच्छन्दरूपास्तु बहुरूपेण भाषिताः।"

(तं०आ०वि०,खं०1,पृ०,42)

~ तट्टीका :— **टीकाद्वयमभवत् स्वच्छन्दतन्त्रोपरिः—**

(1) उद्योत नाम्नी टीका क्षेमराजकृता या प्रकाशिता सती लभ्यते।

(2) राजानकभुल्लककृता बृहट्टीका येदानीं नैव लभ्या क्वापि।

द्र०:- **'भुल्लकराजानकः'** इति।

द्र०:- **'बृहट्टीका'** इति च।

~ तदुद्योतः :— **क्षेमराजकृता स्वच्छन्दतन्त्रटीका।**

यथा—

"क्षेमराजो विवृणुते श्रीस्वच्छन्दनयं मनाक्।।"

(स्व०तं०,खं०1,पृ०,1)

~ तद्बृहट्टीका :—

द्र०:- ~ **'तट्टीका'** इति।

स्वच्छन्दता :— विमर्शे स्वातन्त्र्यम्।

यथा—

"स्वच्छन्देति विमर्शस्वातन्त्र्ययोगः।"

(ई०प्र०वि०वि०,खं०1,पृ०,7)

"स्वच्छन्दा पार्यन्तिकप्रतिष्ठास्थानविमर्शा शून्यतया तद्विमर्शस्थानान्तरोपयाञ्चापारतन्त्र्यवियुक्ता .....।"

(तदेव,पृ०,7)

~ शिवस्य :— **नियतिक्रमोल्लङ्घनानुवर्तनस्वातन्त्र्यं परमेश्वरस्य। यथा—**

"स्वभावात् परमेशानो नियत्यनियतिक्रमम्।।
स्पृशन्प्रकाशते येन ततः स्वच्छन्द उच्यते।"

(तं०आ०14,1-2)

स्वच्छन्दनाथः :— ईश्वरभट्टारकावतारविशेषः। **पञ्चमन्त्रनिष्ठज्ञानादिशक्तिभिः विराजमानः सन् स्वच्छन्दनाथः। तत एव तस्य पञ्चमुखानि पञ्चमन्त्रप्रतीकभूतानि। ईशानाद्याः पञ्चमन्त्रास्तावदनन्तनाथाधिष्ठिताः। तेषां स्थितिर्महायायायां शुद्धविद्यायाः अवरकोटिभूतायाम्। स्वच्छन्दनाथस्योमापतिनाथस्य श्रीकण्ठनाथस्य च स्थितिर्गुणतत्त्वे। ततः पञ्चमन्त्राणां स्थानमुमापतिनाथस्थानादूर्ध्वतरम्। स्वच्छन्दनाथः पञ्चमन्त्राणां ज्ञानदृष्टिं बहुप्रकारसम्मिश्रामाश्रित्य शिवरुद्रभैरवोत्तराम्नायादिशास्त्राणि लोके प्रवर्तयामास। यथा—**

"ईशतत्पुरुषाजातैरुद्भूतैरुद्बुभूषुभिः।
एकैकैः षड्भिरेकेन त्रिकेण द्वयात्मकैस्त्रिभिः।।
जायते शिवभेदानां दशानां विविधा स्थितिः।"
(मा०वि०वा०1,374-375)

"यदा त्रयाणां वक्त्राणां वामदक्षिणसङ्गतिः।।
तदा प्रत्येकशक्तित्वं भविष्यद्भवदुद्भवैः।
षण्णां त्रित्वे रुद्रभेदस्तेनाष्टादशधा स्थितः।।"
(तदेव,376-377)

"तदत्र तिमिराकारे भैरवीये वपुष्यलम्।
अन्तर्लीनतया भाति यावद् वक्त्रचतुष्टयम्।।
उद्बुभूषुः तथोद्भूतं तिरोधित्सु तिरोहितम्।
इत्थं युगपदेवैतद् भिदा षोडशकात्मकम्।।
दक्षे वैसर्गिके हार्दे स्वतन्त्रे च शिवे विशत्।
अष्टाष्टकात्मकं शास्त्रं युगपद्भैरवाभिधम्।।"
(तदेव,388-390)

~ वक्त्रपञ्चकतः :—
"ऊर्ध्ववक्त्रं महेशानि स्फटिकाभं विचिन्तयेत्।।
आपीतंपूर्ववक्त्रं तु नीलोत्पलदलप्रभम्।
दक्षिणं तु विजानीयाद्धामं चैव विचिन्तयेत्।।
दाडिमीकुसुमप्रख्यं कुङ्कुमोदकसन्निभम्।
चन्द्रार्बुदप्रतीकाशं पश्चिमं तु विचिन्तयेत्।।
स्वच्छन्दभैरवं देवं सर्वकामफलप्रदम्।"
(स्व०तं०2,94-97)

द्र० — **'स्वच्छन्दः'** इति।

स्वच्छभावः :— ~ शिवस्य :— **स्पष्टीकृतोऽभिनवगुप्ताचार्येण।**

तद्यथा —
"अनधिकस्याप्यधिकस्येव भासनं स्वच्छभाव उच्यते दर्पणस्य इव।"
(ई०प्र०वि०वि०,खं०1,पृ०,6)

परमशिवादनधिकमपि विश्वं ततोऽधिकमिवाभाति स्वच्छत्वमहिम्ना परमशिवस्येति। यथा —
"केवलमस्य तथाविमर्शाभावादस्वाच्छन्द्यं जडत्वम्। परमेश्वरस्तु तथा भासमानमात्मानं विमृशत्येव संविदो विमर्शपर्यन्तत्वात्।"
(तदेव)

स्वच्छन्दभैरवः :— **स्वच्छन्दनाथः पञ्चवक्त्रः शिवः।**

यथा—
"विश्वैकरूपविश्वात्मविश्वसर्गादिकारणम्।
परप्रकाशवपुषं स्तुमः स्वच्छन्दभैरवम्।।"
(स्व०तं०उ०,खं०1,पृ०,1)

स्वच्छास्वच्छते :— **प्रकाशरूपा प्रकाशिता, हि स्वच्छता; प्रकाशनीयता, वेद्यता चास्वच्छता। तत्र स्फुटवेद्यता अत्यन्तमस्वच्छता, अस्फुटवेद्यता च मनागस्वच्छता। प्रतिबिम्बग्राहिता स्वच्छता। सा तावत् संविदि स्फटिकादौ, दर्पणादौ च। संविदः सर्वथाऽवेद्यत्वेनात्यन्तं स्वच्छता। स्फटिकस्यास्फुटवेद्यतया मध्या स्वच्छता, दर्पणादेः स्फुटवेद्यतया मन्दा स्वच्छता। यथा—**

"अत्यन्तस्वच्छता सा यत्स्वाकृत्यनवभासनम्।
अतः स्वच्छतमो बोधो न रत्नं त्वाकृतिग्रहात्।।"
(तं०आ०3,48)

"...बोधस्य तदितरेषां केषांचन भावानां च स्वच्छत्वस्य मुख्यामुख्यतया द्वैविध्यमुक्तम्। एवं दर्पणादि स्वच्छं, स्फटिकादि, स्वच्छतरं बोधस्तु, स्वच्छतम इत्याशयः।"
(तं०आ०वि०,खं०2,पृ०,59)

स्वतन्त्रता :— **(1) अनन्याधीनप्रकाशता। यथा—**
"स्वप्रकाशता हि स्वतन्त्रता।"
(ई०प्र०वि०वि०,खं०3,पृ०,257)

(2) पारमेश्वरस्य तत्त्वस्य क्रियात्मकत्वम्। अक्रियस्य जडप्रायत्वेन कुतः स्वतन्त्रता ? यथा—
"स्वतन्त्रेति प्रकाशनक्रियाकर्तृत्वम्, तस्य चेयत्तत्त्वं यत् स्वभित्तावेव स्वेच्छया सर्वं प्रकाशयतीति।"
(तं०आ०वि०,खं०2,पृ०,2)

स्वतन्त्रत्वम् :— **अतिदुर्घटकारित्वं यत् परमेश्वरस्य तदेव तस्य स्वतन्त्रत्वम्। यथा—**
"अतिदुर्घटकारित्वमस्यानुत्तममेव यत्।
एतदेव स्वतन्त्रत्वमैश्वर्यं बोधरूपता।।"
(बो०प०द०,7)

स्वतन्त्रभट्टारकः :— **(1) शक्त्येकघनः परमेश्वरः।**

यथा—
"परमेश्वरश्चिदानन्दघनः स्वतन्त्रभट्टारकः .... उन्मनाख्यया स्वस्वातन्त्र्यशक्त्या शून्यादिक्षित्यन्तमनन्तं वाच्यवाचकरूपं स्वभित्तौ स्वानधिकमप्यधिकमिव युगपदवभासयति।"
(स्व०तं०उ०,प०4,पृ०,50-51)

(2) कश्चनागमिको ग्रन्थविशेषः।

तद्यथा—
"स्वतन्त्रभट्टारिकादिषु च 'अकृत्वा मानसं यागम्' इत्यादि वाक्यैर्ध्वनिता मानसयागातिरेकिणी सर्वभावोपहृतिः।"
(भा०वि०,पृ०,2)

स्वतन्त्रशिवाद्वयदर्शनम् — **पराद्वैतशैवदर्शनम्। अद्यत्वे विद्वांस इमं दर्शनं कश्मीरशैवदर्शनं वदन्ति, अस्य कश्मीरमण्डल एव विकासो यतः सम्पन्नः। यथा—**

"इहैव च स्वतन्त्रशिवाद्वयदर्शने एकैकस्यार्थस्य अनेकत्वं सङ्गच्छते।"

(स्पं०सं०,पृ०,10)

अत्रैव प्रथमा टिप्पणी अद्योलिखिता टिप्पणी भागे। यथा—

"प्रकाशमयतापरमार्थवादानुसृत्या एकस्यैव अर्थस्य षट्त्रिंशत्तत्त्वमयतात्मानेकार्थत्वम् आम्नातमस्ति।"

(स्पं०सं०,पृ०,10,टि०,1)

द्र०:— च (ष०तं०सं०वि०,पृ०,1-2)

स्वतन्त्रेशः :— श्रीकण्ठनाथः करणकार्यतत्त्वसृष्टये प्रकृतितत्त्वस्य प्रक्षोभको भगवान्। यथा—

"ईश्वरेच्छावशक्षुब्धलोलिकं पुरुषं प्रति।
भोक्तृत्वाय स्वतन्त्रेशः प्रकृतिं क्षोभयेद् भृशम्।।"

(तं०आ०9,225)

"स्वतन्त्रेशः इति श्रीकण्ठनाथः।"

(तं०आ०वि०,खं०6,पृ०,180)

स्वतः समुदितं :— ~ ज्ञानम् :— स्वप्रतिभया समुदितं शुद्धं विकल्पज्ञानम्।

~ श्रेष्ठम् :— गुरुतः शास्त्रतश्चाप्ताज्ज्ञानात् स्वतः समुदितं ज्ञानमत्युत्तमम्, विशेषतः प्रातिभं ज्ञानम्। यथा—

"यस्य स्वतोऽयं सत्तर्कः सर्वत्रैवाधिकारवान्।।
अभिषिक्तः स्वसंवित्तिदेवीभिर्दीक्षितश्च सः।"

(तं०आ०4,42,43)

स्वनः :— वंशध्वनिनिभो ध्वनिस्तृतीयो नादो नादयोगाभ्यासे। यथा धर्मशिवाचार्येण स्वपद्धतौ :—

"ततो वंशध्वनिप्रख्यो निवाते सौम्यवर्षवत्।
स नादः स्वन इत्युक्तः .....।।"

(स्व०तं०उ०,प०11,पृ०,9)

वंशध्वनिप्रख्यः इति सौम्यवर्षवदिति दृष्टान्तद्वयं संशयोत्पादकमिव। न च संशयोन्मूलनमत्र कृतमाचार्येण। साधकोत्तमः कश्चन स्पष्टीकरणं कुर्यात्।

स्वपरप्रमात्रभेदः :— प्रमातॄणां परस्परमासमानो भेदोऽवास्तविक औपाधिकश्च। वस्तुतः एक एवात्मा सर्वेषु शरीरेषुचैत्रमैत्रादिरूपतया भाति स्व विलासतः। यथा—

"परज्ञानमपि स्वात्मैव; परत्वं केवलमुपाधेर्देहादेः, स चापि विचारितो यावन्नान्य इति विश्वः प्रमातृवर्गः परमार्थत एकः प्रमाता, स एव चास्ति। ..... ततश्च भगवान् सदाशिवो जानाति इत्यतः प्रभृति क्रिमिरपि जानाति— इत्यन्तम् एक एव प्रमाता।"

(ई०प्र०वि०,खं०1,पृ०,48)

स्वप्नः :— (1) प्राणिनोऽसाववस्था यस्यामन्तःकरणैरेव ज्ञानक्रियाव्यवहाराः प्रचलन्ति; भ्रान्त्यैव च बहिरिन्द्रियैः सम्पाद्यमानाः प्रतीयन्ते। प्रतिप्रमातृभिन्नोऽयं स्वाप्नप्रपञ्चो नैव जाग्रत्प्रपञ्चवत् सर्वसाधारणः। यथा—

"मनोमात्रजन्या असाधारणार्थविषया विकल्पाः स्वप्नः"

(शि०सू०वृ०1,9)

(२) अन्यैः प्रमातृभिर्नैव साधारणा या वैयक्तिकी प्रमातुरन्तःकरणमात्रव्यापारजन्यज्ञानावस्था सा स्वप्नः। यथा—

"ये तु मनोमात्रजन्या असाधारणार्थविषया विकल्पाः स एव स्वप्नः।"

(शि०सू०वि०,पृ०,11)

(3) संस्कारोद्भूतं मनोमात्रविषयं ज्ञानमस्थिरम्। स्वप्नान्तं तस्य बाधितत्वात्। यथा—

"यदेवास्थिरमाभाति सपूर्वं स्वप्न ईदृशः।"

(तं०आ०10,295)

सपूर्वमिति पूर्वसंस्कारोद्भूतम्।

~ तत्त्वभेदने :— **तत्र बहुधा स्वप्नकल्पना यथाग्रे प्रदर्श्यते—**

~(एकादशात्मकत्वे) :— **प्रलयकेवले वेद्ये विज्ञानाकलस्य शक्तिः स्वप्नस्थानीया।**

यथा—

"..... स्वप्नसुप्ते द्वे।।"

(तं०आ०10,304)

"द्वे इति विज्ञानाकलतच्छक्ती, तेन विज्ञानाकलशक्तिः स्वप्ने।"

(तं०आ०वि०,खं०7,पृ०,205)

~ त्र्यात्मकत्वे :— **द्र०: 'स्वप्नः'** — ~ '(मन्त्रमहेश्वरे)' इति।

~ (त्रयोदशात्मकत्वे) :— **पाञ्चदश्यवदेव प्रलयाकलस्तच्छक्तिश्च स्वप्नः।**

यथा—

"त्रयोदशाभिधे पुनः।
..... अन्यत्तु प्राग्वत्।"

(तं०आ०10,303-304)

~(नवात्मकभेदे) :— **द्र०:- 'स्वप्नः'** ~ 'विज्ञानाकले' इति।

~(पञ्चविधत्वे) :— **द्र०:- 'स्वप्नः'** ~ 'मन्त्रमहेश्वरे' इति।

~(पाञ्चदश्ये) :— **सशक्तिकेन प्रलयाकलेनानुस्यूतत्वं**

वेद्यत्वं च तत्र स्वप्न स्थानीयता। यथा—

"अकलौ द्वौ परिज्ञेयौ सम्यक् स्वप्नसुषुप्तयोः।"
(मा०वि०तं०,2,28)

"अकलौ स्वप्नसौषुप्ते .....।"
(तं०आ०10,303)

अकलौ = विज्ञानाकलप्रलयाकलौ।

द्र०:- 'अवस्थाभेदविस्तरः' इति।

~ (प्रलयाकले) :— **द्र०:- 'स्वप्नः'** ~ 'एकादशात्मकत्वे' इति।

~ (मन्त्रमहेश्वरे) :— **क्रियाशक्तिः शिवस्य।**

द्र०:- 'अवस्थाभेदविस्तरः' इति।

~ (मन्त्रे) :— **मन्त्रेश्वरस्तस्य च शक्तिः।**

द्र०:- 'अवस्थाभेदविस्तरः' इति।

~ (मन्त्रेश्वरे) :— मन्त्रमहेश्वरस्य शक्तिः।

द्र० **'अवस्थाभेदविस्तरः'** इति।

~ (विज्ञानाकले) :— **मन्त्रप्रमाता तच्छक्तिश्च स्वप्नः।**

द्र०:- 'अवस्थाभेदविस्तरः' इति।

~ (शिवतत्त्वे) :— **शिवस्य ज्ञानशक्तिरूपता तत्र स्वप्नावस्था तत्त्वभेदनानुसारम्।**

द्र०:- 'अवस्थाभेदविस्तरः' इति।

~ (सप्तात्मकभेदे) :— **द्र०:- 'स्वप्नः' 'मन्त्रे'** इति।

~ प्रमाणप्रधान :— **स्वप्नावस्थायां प्रमाणस्यैव प्राधान्यं न प्रमेयस्य नापि च प्रमातुः। यथा—**

"मानभूमिरियं मुख्या स्वप्नो ह्यामर्शनात्मकः।।"
(तं०आ०10,256)

स्वप्नजाग्रत् :— उत्प्रेक्षासंकल्पस्मृत्यादिव्यवहारो यः केवलं विकल्पात्मक एवाबाह्यश्चासावपि स्वप्नः एव। परमर्थानां किञ्चित् स्फुटत्वादसौ स्वप्नजाग्रदिति स्वीक्रियते। यथा—

"उत्प्रेक्षास्वप्नसंकल्पस्मृत्युन्मादादिदृष्टिषु।
विस्पष्टं यद्वेद्यजातं जाग्रदुन्मुख्यतयैव तत्।।"
(तं०आ०10,249-250)

"कामशोकभयोन्मादचौरस्वप्नाद्युपप्लुताः
अभूतानपि पश्यन्ति पुरतोऽवस्थितानिव।।"
उद्ध०:- (तं०आ०वि०,खं०7,पृ०,170)

स्वप्नदशा :— (1) यस्यां दशायां केवलं मनसैव कल्पितविषयोन्मुखा व्यापारा विधीयन्ते, परं भ्रान्त्या तथा प्रतीयते यथा बहिरिन्द्रियाणामेव ते व्यापाराः, असौ मानस-व्यापारदशा स्वप्नः। स च स्वाप्नो व्यापारः प्रतिजीवं भिन्नो नान्येन वेद्यः केनचित्। यथा—

"मनोमात्रपथेऽप्यक्षविषयेत्वेन विभ्रमात्।
स्पष्टावभासा भावानां सृष्टिः स्वप्नपदं मतम्।।"
(ई०प्र०,3-2-16)

द्र०:- (शि०सू०वृ०,1,9)

(2) माया प्रमातुः काल्पनिकौ ज्ञानक्रियाव्यापारौ। यथा—

"स्वतो भिन्नेषु वस्तुषु कल्पनामात्रेण ये माया-प्रमातुर्ज्ञानक्रिये तयोर्व्यवहारस्यावस्था स्वप्नदशा। .....
.....

पशोरियं स्वप्नसृष्टिः क्षणिका सपदि च नश्वरा।
पतेः पुनः पारमेश्वरीवासौ सृष्टिश्चिरं सुस्थिरा।"
(शि०सू०विवृ०,1, 9)

(3) आत्मसंकल्पमात्रतो विषयनिर्माणाध्यवसायादिवृत्तिः स्वप्नः। एषा वैयक्तिकी सृष्टिरसाधारणी, न च स्थिरा, ततो नापि पुनः पुनर्गृह्यमाणा। यथा—

"आत्मसंकल्पनिर्माणं स्वप्नो जाग्रद्विपर्ययः।"
(तं०आ०10,290)

स्वप्नप्रपञ्चः :— यत्तावत् स्थूलाकाररहितमपि बाह्येन्द्रि- यावेद्यमपि तैर्गृह्यमाणमिव बहिर्विद्यमान-मिवाधिष्ठानकरणादि- रूपमिव नामरूपादिमयमिव च वेद्यतया भासते तत् सर्वं स्वप्नप्रपञ्चरूपम्। वस्तुतस्तद्विकल्पज्ञाने एवाभासते। एतेन देवादिलोकाः तत्प्रपञ्चाश्च स्वप्नप्रपञ्चमयाः इति वेद्यम्।

यथा—

"यत्त्वधिष्ठानकरणभावमध्यास्य वर्तते।
वेद्यं सत्पूर्वकथितं भूततत्त्वाभिधामयम्।।
तत्स्वप्नो मुख्यतो ज्ञेयं तच्च वैकल्पिके पथि।"
(तं०आ०10,247-248)

"मेयच्छायावभासिनीमानप्रधानास्वप्नावस्थेयमित्यर्थः।"
(तं०आ०वि०,खं०7,पृ०,168)

"वैकल्पिकपथारूढवेद्यसाम्यावभासनात्।।
लोकरूढोऽप्यसौ स्वप्नः साम्यं चाबाह्यरूपता।"
(तं०आ०10,248-249)

एतेन लौकिकः स्वप्नोऽपि स्वप्न एव।

स्वप्नसृष्टिः :— संकल्पमात्रजनयो विषयावभासः।

~ पत्यु :— **पतिप्रमात्रावभासिता साङ्कल्पिकीसृष्टिस्तावच्चिर-कालस्थायिनी। सर्वापि देवादिलोकसृष्टिः स्वप्नसृष्टिरेव, यतः सूक्ष्मशरीरैरेव तत्र सर्वो व्यवहारो न स्थूलैर्न चापि स्थूलाधिष्ठानस्थितैर्बाह्यकरणैः।**

~ पशोः :— **स्वप्नसङ्कल्पचिन्तनमनोराज्यादाववभासमानो विषयप्रपञ्चोऽत्यन्तमस्थिरः प्रतिप्राणिभिन्नश्च।**

स्वप्नस्वप्नः :— उत्प्रेक्षास्वप्नादावपि यदस्पष्टमवभासजातं तत् स्वप्नस्वप्न इति।

यथा—

"यत्तु तत्राप्यविस्पष्टं स्पष्टाधिष्ठातृ भासते।।

विकल्पान्तरगं वेद्यं तत्स्वप्नपदमुच्यते।
तदैव तस्य वेत्त्येव स्वयमेव ह्यबाह्यताम्।।"
(तं०आ०10,250-251)

स्वप्नस्वातन्त्र्यम् :— एतच्च समयदीक्षाङ्गत्वेन प्रतिपादिते शय्याक्लृप्तिविधौ स्पष्टतां याति। यथा संसूचितम् यथा—

"यथेच्छाभ्यर्थितो धाता जाग्रतोऽर्थान् हृदि स्थितान्।
सोमसूर्योदयं कृत्वा संपादयति देहिनः।।"
(स्पं०का०,33)

द्र०:- **'शय्याक्लृप्तिः'** इति।

द्र०:- (तं०आ०15,474-491) इति।

~ अभीष्टार्थप्रकाशः (तत्र) :— समयदीक्षान्ते शिष्यः शय्यां विधिपूर्वकं शाय्यते, स च सुप्तः सन् भाविसत्यघटना एव पश्यति, न पश्यत्यालबिडालादिदृश्यानि। एवमेव व्याख्येया तत्सम्बन्धिनी स्पन्दशास्त्रकारिका।

यथा—

"तथा स्वप्नेऽप्यभीष्टार्थान्प्रणयस्यानतिक्रमात्।
नित्यं स्फुटतरं मध्ये स्थितोऽवश्यं प्रकाशयेत्।।"
(स्पं०का०,34)

"आयातनिद्रः शिष्योऽसौ निर्मलौ शशिभास्करौ।।
हृच्चक्रे प्रतिसंधत्ते बलात्पूर्णकृशात्मकौ।
हठनिर्मलचन्द्रार्कप्रकाशः सत्यमीक्षते।।
स्वप्नं भाविशुभान्यत्वस्फुटीभावनकोविदम्।"
(तं०आ०15,478-480)

स्वप्नावस्था :— यत्रान्तःकरणैरेव सूक्ष्माणां प्रमेयाणां बोधस्सा स्वप्नावस्था। अत्राधिष्ठानरूपस्य प्रमाणस्यैव प्राधान्यम्।

यथा—

"यदा तु तत्रैवाधिष्ठानरूपतया भानं सङ्कल्पस्तदा स्वप्नावस्था।"
(तं०सा०,पृ०,105)

स्वप्रकाशः :— (1) परापेक्षां विना स्वयं स्वेनैव प्रकाशेन प्रकाशमानः पदार्थः स च सदाप्रकाश एव नाप्रकाशः कथमपि। प्रकाशश्चात्र चित् प्रकाशो, न जडः सूर्यादिगभसिप्रकाशः। यथा—

"स्वस्यैव प्रकाशः, स्वस्य प्रकाश एव, स्व एव अस्य प्रकाशो न परः, स्वञ्च अस्य प्रकाश एवेति यत् बोधलक्षणम्।"
(ई०प्र०वि०वि०,खं०1,पृ०,119)

(2) स च चिद्रूपः परमेश्वर एव तत्तज्जीवरूपतयापि स्वयं स्वलीलयाऽवभासमानः।

यथा—

"आब्रह्मस्तम्बपर्यन्तं यद्विलासवशाऽनुगम्।
स्वप्रकाशः स भगवान् स्वतन्त्रः परमार्थतः।।"
(आ०वि०,3,3)

द्र०:- (सुन्दरी टीका, पृ०,44) इति।

स्वप्रकाशत्वं :— ~ ज्ञानस्य :— स्पष्टमुक्तम् :—

"परप्रकाशनात्मकनिजरूपप्रकाशनमेव हि स्वप्रकाशत्वं ज्ञानस्य भण्यते।"
(ई०प्र०वि०,खं०1,पृ०,95)

स्वबलनिभालनम् :— स्वात्मनो यः परमेश्वरत्व-विमर्शस्तस्य सम्यग् हृदयङ्गमीभावः स्वबलनिभालनम्। सैव परा पूजा।

यथा—

"स्वहृदयस्फुरत्तारूपः परमेश्वर एव देवतेत्युक्तं वक्ष्यते च। तत्र यन्निजं स्वात्मतादात्म्यानुप्रविष्टं बलं विश्वविक्षोभसहिष्णुत्व-लक्षणं विग्रष्टत्वम्, तत्पर्यालोचनमेव वरिवस्या।"
(म०मं०प०,पृ०,106)

असौ वरिवस्यैव स्वबलनिभालपम्।

स्वबोधोदयमञ्जरी :— किमपि योगशास्त्रपुस्तकम्। तद्यथा स्वबोधोदयमञ्जर्यां च—

"यद्यन्मनोहरं किञ्चिदक्षिगोचरमागतम्।
एकाग्रं भावयेत्तावद्यावल्लीनं निरोधकृत्।।"
(स्पं०प्र०,पृ०,53)

स्वभावः :— स्वो भावः। स्वसत्ताधारभूतो विशेषः। स्वमावश्यकं लक्षणम्।

यथा—

"येन यन्न हीयते, यतश्च न हीयते यत्, तदेवास्य अव्याप्त्यतिव्याप्तिशून्यं लक्षणं स्वभाव।"
(ई०प्र०वि०वि०,खं०2,पृ०,44)

स्वभावहेतुः :— उक्तो यथा —

"स्वभावहेतुश्च सर्वो मोहवशारोपितापारमार्थिकरूपान्तर-पराकरणमात्रपर्यवसित इति व्यवहारसाधक एव।"
(ई०प्र०वि०वि०,खं०1,पृ०,106)

स्वभ्यस्तज्ञानः :— ~ गुरुः :— अभ्यासेन येन सिद्धान्तज्ञानं क्रियात्मकतामापाद्य सम्यक् सफलतां नीतमसौ स्वभ्यस्तज्ञानवान् गुरुश्चेदनभषिक्तोऽपि स्यात, तथापि गुरुत्वेऽभिषेकमर्हति साधकत्वेऽपि च। असौ योग्यानां दीक्षाया अकरणेऽपि न प्रत्यवायी। न तत्करणे कथमपि बद्धोऽसौ सर्वथा स्वतन्त्रः।

यथा—

"स्वभ्यस्तज्ञानिनं साधकत्वे गुरुत्वे वा अभिषिञ्चेत् :— यतः सर्वलक्षणहीनोऽपि ज्ञानवानेव साधकत्वे अनुग्रहकरणे चाधि-कृतः, नान्यः अभिषिक्तोऽपि। स्वाधिकारसमर्पणे गुरुः दीक्षादि अकुर्वनपि न प्रत्यवैति।"
(तं०सा०,पृ०,173)

"यतश्च मोक्षदः प्रोक्तः स्वभ्यस्तज्ञानवान् बुधैः।।"
(तं०आ०13,332)

"तस्मात्स्वभ्यस्तविज्ञानतैवैकं गुरुलक्षणम्।"
(तदेव,13,333)

स्वयम्भूः :— (1) यः प्रातिभो योगी शिष्ट इति संज्ञाभाक् स एव स्वयम्भूरित्यपि समाख्यातः शास्त्रे।

यथा—

"शिष्टः सर्वत्र च स्मार्तपदकालकुलादिषु।।
उक्तः स्वयम्भूः शास्त्रार्थप्रतिभापरिनिष्ठितः।"
(तं०आ०13,134-135)

(2) स्वयमेवात्मानं जीविकोपार्जनार्थं गुरुं कथयन्नभिषेक-दीक्षारहितोऽनधिकारी दीक्षाप्रदाने।

यथा—

"न स्वयम्भूस्तस्य चोक्तं लक्षणं परमेशिना।
अभक्तो जीवितधिया कुर्वन्नीशानधिष्ठितः।।
पश्वात्मना स्वयम्भूष्णुर्नाधिकारी स कुत्रचित्।"
(तं०आ०23,8-9)

ग्रन्थकारैरर्थद्वये प्रयुक्तोऽयं स्वयम्भूरिति शब्दः इति वेदितव्यम्। प्रातिभज्ञानवानपि स्वयम्भूः, गुरुत्वेऽनभिषिक्तोऽपि दीक्षां विदधानो गुरुः स्वयम्भूरिति।

स्वयूथ्याः :— अद्वैतशैवदर्शनानुयायिनः शाक्ताः अपि शैवानां स्वयूथ्याः। यथा—

"स्वयूथ्यानद्वयवादिनः प्रतीदानीमारम्भः।"
(शि०दृ०वृ०,पृ०,94)

स्वराः :— (1) चित्तं स्वरयन्ति सूचयन्तीति स्वराः।

(2) साधकाय स्वं वास्तविकं स्वरूपं रान्ति ददतीति स्वराः, यदुपासनया साधकस्य स्वरूपलाभो भवतीति।

(3) स्वमात्मीयं व्यञ्जनरूपत्वं रान्ति बहिः प्रकाशयन्तो ददतीति स्वराः।

यथा—

"स्वरयन्ति शब्दयन्ति सूचयन्ति चित्तं स्वं च स्वरूपात्मानं रान्ति एवमिति परप्रमातरि संक्रामयन्तो ददति, स्वं चात्मीयं कादियोनिरूपं रान्ति-बहिः प्रकाशयन्तो ददति इति स्वराः, एत एव हि चित्तवृत्तिसूचका नादात्मकाः करुणाशृङ्गारशान्तादिकां चित्तवृत्तिमाक्रन्दनचाटुकस्तुत्यादौ .....।"
(प०त्री०वि०,पृ०,202)

~ चान्द्रमसाः :— **सौररश्मिस्थानीयानां स्वराणामेवान्तश्चन्द्रकलास्तेषां दीर्घत्वेऽभिव्यज्यन्ते। तेन ह्रस्वत्वे स्वराः सूर्यः रश्मयो दीर्घत्वे च चन्द्रकलाः।**

यथा—

"सौराणामेव रश्मीनामन्तश्चान्द्रकलाः यतः।।
अतोऽत्र दीर्घत्रितयं स्फुटं चान्द्रमसं वपुः।"
(तं०आ०3,185-186)

~ सौराः :— **ह्रस्वरूपतायां स्वराः सूर्यरश्मिकल्पाः सौराः इति परिभाषिताः।**

स्वरार्द्धम् :— एकाशीति विधौ स्वरार्द्धकल्पना। सा च नाऽन्याय्या। "तस्यादित उदात्तमर्द्धह्रस्वम्" (1-2-32) इति पाणिनिसूत्र एकस्यैव स्वरस्य पूर्वार्द्धपरार्द्धकल्पनायाः स्मीकृतत्वात्।

यथा—

"स्वरार्धमप्यस्ति यतः स्वरितस्यार्धमात्रकम्।।
तस्यादित उदात्तं तत्कथितं पदवेदिना।"
(तं०आ०33,27-28)

स्वरूपप्रवेशः :— (1) स्वात्मनः सूक्ष्मसूक्ष्मतरे सारभूते वास्तविके स्वरूपे क्रमेणावस्थानं योगाभ्यासतः।

यथा—

"तथाहि प्रथमं शरीरात् प्राणभूमावनुप्रविश्य, ततोऽपि बुद्धिभुवमधिशय्य, ततोऽपि स्पन्दनाख्यां जीवनरूपतामध्यास्य, ततोऽपि सर्ववेद्यप्रक्षयात्मशून्यपदमधिष्ठाय, ततोऽपि सकलमलतानवतारतम्यातिशयधाराप्राप्तौ शिवत्वव्यक्त्या अणुरपवृज्यते आरोपव्यर्थत्वात्।"
(प०त्री०वि०,पृ०,20)

(2) साधकेन षडध्वयोगाद् ध्वनियोगे, तस्मात् करणयोगे, ततोऽप्युच्चारयोगे, ततोऽपि च ध्यानयोगे पदं निधातव्यम्। इत्थमाणवयोगे परिपक्वतां प्राप्य शाक्तयोगस्ते-नाभ्यसनीयः, तत् परिपक्वतायां च शाम्भवः। शाम्भवस्य परिपक्वतैवानुपायस्थितिः। तत् स्थितावेव वास्तविके स्वरूपे प्रवेशो भवति। स च प्रवेशः क्रमेणैवाऽक्रमेणापि वा भवति।

यथा—

"लङ्घनेन परो योगी मन्दबुद्धिः क्रमेण तु।"
(तं०आ०5,158)

स एष स्वरूपे प्रवेशश्चतुस्त्रिंशे आह्निके संक्षेपतः प्रतिपादितस्तन्त्रालोके यथा—

"यदेतद्बहुधा प्रोक्तमाणवं शिवताप्तये।
तत्रान्तरान्तराविश्य विश्राम्येत्सविधे पदे।।
ततोऽप्याणवसंत्याग्राच्छाक्तीं भूमिमुपाश्रयेत्।
ततोऽपि शाम्भवीमेवं तारतम्यक्रमात्स्फुटम्।।
इत्थं क्रमोदित विबोधमहामरीचिसंपूरितप्रसरभैरवभावभागी।
अन्तेऽभ्युपायनिरपेक्षतयैव नित्यं
स्वात्मानमाविशति गर्भित- विश्वरूपम्।।"
(तं०आ०34,1-3)

~ अत्यान्ताश्चर्यकारी :— **स्वरूपप्रवेशे सति प्रवेष्टा स्वयमाश्चर्यचकित इव भवन्नङ्गेषु नैव माति।**

यथा—

"तदास्याकृत्रिमो धर्मो ज्ञत्वकर्तृत्वलक्षणः
यतस्तदेप्सितं सर्वं जानाति च करोति च
तमधिष्ठातृभावेन स्वभावमवलोकयन्।
स्मयमान इवास्ते यस्तस्येयं कुसृतिः कुतः।।"
(स्यं०का०,10-11)

~ हृद्यविषयोपयोगतः :— **ये खलु विषयाः मनसे इन्द्रियेभ्यश्च रुचिकरास्तेषां स्वरूपसाक्षात्कारे सुखोपायता।**

यतस्ते तावदानन्दोल्लासने समर्थाः सन्तः स्वात्मानन्दचमत्कारे सुखं प्रवेशयितुं क्षमाः यदि रहस्यप्रक्रियानुसारं तेषामुपयोगो विधीयते। शक्येत वा विधातुम्। परमतीव धीरतराः एव साधकास्तस्यानन्दयोगस्य पात्रभूताः। अतो नैव सर्वसामान्योऽसौ। अत एव रहस्योपाय इति ख्यातः सन् शास्त्रेष्वपि न क्वापि स्फुटं प्रतिपादितः।

यथा—

"यत्किञ्चिन्मानसाह्लादि यत्र क्वापीन्द्रियस्थितौ।
योज्यते बोधसद्ब्रह्मधाम्नि ब्रह्मबिलात्मनि।।
आत्मानुसारिसद्भावसमावेशदशाश्रयात्।
तत्तत्परकुलेशानशक्तिचक्रार्चनाक्रमे।।
प्रयात्येवाप्रयत्नेन करणत्वं स्वभावतः।"

(मा०वि०वा०2,124-125)

स्वरूपम् :— ~ तत्त्वभेदने :— **प्रायः संवित्स्वातन्त्र्यवर्जितमपि धारणाविषयभूतं जडम् तत्त्वमालम्बनवस्तुनः स्वरूपम्। प्रमातृरूपस्य सकलादेरपि भावनया धारणाविषयत्वेन स्वोत्तरवर्तिप्रमात्रापेक्षया जडत्वमेव धारणादौ कल्यते।**

यथा—

"यत्तु गृहीततारूपसंवित्संस्पर्शवर्जितम्।
शुद्धं जडं तत्स्वरूपम् .....।।"

(तं०आ०10,182)

स्वर्लोकः :— आदित्यादुपरि ध्रुवान्तं स्वर्लोकः।

यथा—

"स्वर्लोकस्तु भुवर्लोकाद् ध्रुवान्तं परिभाष्यते।।"

(तं०आ०8,143)

आदित्यास्तु भुवर्लोकमध्य एव परिगणिताः।

यथा—

"दशमे वसवो रुद्रा आदित्याश्च मरुत्पथे।
नवयोजनसाहस्रो विग्रहोऽर्कस्य मण्डलम्।।"

(तदेव8,142)

~ तन्निवासिनः :— **यज्ञादिकर्मकारिणः स्वर्लोके भोगान् भुक्त्वा समाप्तप्राये कर्मफले पुनरायान्ति भूलोकं पुण्यशेषमादाय।**

यथा—

"इतश्च क्रतुहोत्रादि कृत्वा ज्ञानविवर्जिताः।
स्वर्यान्ति तत्क्षये लोकं मानुष्यं पुण्यशेषतः।।"

(तं०आ०8,148)

स्वलक्षणता :— ~ आभासानाम् :— **नियतदेशकालपरिच्छिन्नता, इतरैराभासैरत्यन्तमसम्बद्धता, अत्यन्तं स्वस्वरूपसङ्कोच मय्याभासमात्ररूपता पदार्थानाम्।**

द्र०:- **'असामयिकी' ~ 'हृदन्ता'** इति।

स्वलक्षणम् :— ~ ज्ञानम् :— **(1) स्वम्-अन्याननुयायिलक्षणं स्वरूपं यस्यतस्याभासः स्वलक्षणज्ञानम्। तच्च निर्विकल्पकं ज्ञानम्। न तस्य कश्चनाप्यंशोऽन्येषु ज्ञानेषु सम्पृक्तो दृश्यते। सर्वथाऽसम्बद्धोऽनन्वितो जात्यादिवैशिष्ट्यरहितस्तस्यविषयो नियतदेशकालाकारमयः।**

यथा—

" 'स्वम्' अन्याननुयायि स्वरूपसंकोचभागि 'लक्षणं' देशकालाकाररूपं यस्य तस्य 'आभासः' प्रकाशनम् अन्तर्मुखं यस्मिन् बहिर्मुखीनस्वरूपधारिणि ज्ञाने तत् अविकल्पकं, विषयभेदेऽपि एकजातीयं स्वरूपे, तद्वैचित्र्ये कारणाभावात्।"

(ई०प्र०वि०,खं०1,पृ०,54)

(2) स्वात्मस्वरूपसङ्कुचितमन्यसम्बन्धरहितं केवलं निर्विकल्पकं ज्ञानम्।

यथा—

"स्वात्मा आत्मीयमेव वा लक्षणं यस्येति स्वरूपेण तदुपाधिभ्यां च देशकालाभ्यां यत् सर्वथैव सङ्कुचितं ..
.....
.....
स्वसामर्थ्योत्थनिर्विकल्पकज्ञानैकंलक्षणीयमुक्तम्।"

(ई०प्र०वि०वि०,खं०1,पृ०,114)

स्वल्पोपायः :— अनुपाययोगस्यापरं नाम।

द्र०:- **'अनुपायः'** ~ **'योगत्वं'** (तस्य) इति।

स्वसंवित्तिदेवयः :— स्वकीया इन्द्रियाधिष्ठातृ देव्यः इन्द्रियवृत्तय एव।

यथा—

"स्वा आत्मीया याः संवित्तय इन्द्रियवृत्तयस्ता एव :—
'बहिर्मुखस्य मन्त्रस्य वृत्तयो याः प्रकीर्तिताः।
ता एवान्तर्मुखस्यास्य शक्तयः परिकीर्तिताः।।' इति।"

उद्ध०:- (तं०आ०वि०,खं०3,पृ०,47)

स्वसंवेदनम् :— **स्वप्रकाशया संविदा स्वस्य स्वस्वभावस्य च योऽपरोक्षः साक्षात्कारः स एव स्वसंवेदनं नाम प्रमाणम्। यथा संविदा मूर्खतमा जडप्राया अपि प्राणिनः स्वस्य सत्तां स्वयमेव स्वत एव विदन्ति। विनापि ज्ञानकरणोपयोगम्। तदियमात्मनः स्वसंवेदनस्य सर्वत्र विजृम्भमाणा सत्ता न केनाप्यपह्नोतुं शक्या।**

यथा—

"स्वप्रकाशात्मिका येयं संवित्तिः पारमार्थिकी।
तत्स्वसंवेदनं प्रोक्तं यतो विश्वव्यवस्थितिः।।"

(मा० वि० वा० 1, 427)

स्वात्मसंवेदनाश्रया एव हि सर्वेषां प्रमाणानां व्यापारास्तदाश्रिता च विश्वव्यवस्था।

~ परब्रह्मसिद्धिकरम् :— **न हि लौकिक प्रमाणविषयं ब्रह्म। तथापि स्वसंवेदनसिद्धं तत् इति न सर्वथा निष्प्रमाणकम्।**

यथा—

"ननु यस्य प्रमातृतैव रूपं, तत् तावत् प्रमाणस्य न विषयः। यच्च एवं, तत् न व्यवहारपदं पिशाचवत्। तद्वरं स्वसंवेदनसिद्धत्वमस्य वक्तुमुचितम्, सर्वथैव प्रमाणाविषयता।"

(ई०प्र०वि०वि०,खं०1,पृ०,51)

~ प्रमाणम् :— स्वस्य स्वस्वभावस्य च यत् स्वतः एव सवेदनं तदेव मुख्यं प्रमाणं व्यावहारिके ज्ञानक्रियादिप्रपञ्चे।

यथा—

"स्वस्वसंवेदनं नाम प्रमाणमिति वर्ण्यते।
बालतिर्यक्सर्वविदां यत्साम्येनैव भासते।।"

उद्धः- (प०त्री०वि०,पृ०,212)

~ महेश्वरत्वसाधकम् :— स्वसंवेदनेनैव सर्वस्यात्मा महेश्वर इति सिद्धो भवति चेत्तत्र जनः सम्यक् सावधानो भवेत्।

यथा—

"आत्मैव सर्वभावेषु स्फुरन्निर्वृतचिद्विभुः।
अनिरुद्धेच्छाप्रसरः प्रसरद्वृक्क्रियः शिवः।।"

(शि०दृ०,1,2)

"कर्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे।
अजडात्मा निबोधं वा सिद्धिं वा विदधीत कः।"

(ई.ब्र.,1-1-2)

~ सर्वप्रमाणाधारभूतम् :— (1) सर्वेषामपि लौकिकानां प्रमाणानां मुख्यं भित्तिभूतं स्वसंवेदनमेवाधारशिलाकल्पम्।

यथा—

"इन्द्रियाणि त्रिरूपं च लिङ्गं परवचः क्रमः।
सारूप्यमन्यथायोगः प्रतीत्यनुदयो यमः।।
इत्यादिको यस्य सर्वं द्वारमात्रे निरूप्यते।
तत्स्वसंवेदनं प्रोक्तमविच्छेदप्रथामयम्।।"

(प०त्री०वि०,पृ०,212)

अत्र यमः इति पदस्यार्थः कः इति संशयस्यैव विषयः। यशः इति वा भवेत् पाठः, प्रसिद्धिस्तस्यार्थः। शारदालिप्यां शकारमकारयोः स्वल्पमेवान्तरं यतः।

(2) तिर्यचामपि व्यवहारेषु तस्य प्रामाण्यं निर्बाधमेव।

यथा—

"येषां नाक्षत्रिरूपादिनाममात्रेऽप्यभिज्ञता।
तेषामपि तिरश्चां हि समा संवित्प्रकाशते।।"

(तदेव,पृ०,212)

स्वस्वभावः :— स्वस्य वास्तविकं स्वरूपम्।

यथा—

" 'स्वस्य'- आत्मनः 'स्वः'- आत्मीयो 'भावः'— स्वरूपं, स्वस्वभावः।"

(स्पं०वि०,पृ०,11)

स्वस्वभावसम्बोधनम् :— भट्टकल्लटकृतः कश्चन दर्शनग्रन्थो य इदानीं नैव लभ्यः।

यथा—

"ग्रन्थकर्तुश्च स्वस्वभावसम्बोधने :—
बन्धनं बन्धकृद्बध्यस्त्रिष्वप्येको न भिद्यते।
स्वविकल्पकृतैर्बन्धैर्बध्यते त्वनिशं जगत्।।" इति।

(स्पं०प्र०,पृ०,7-8)

स्वस्वभावस्थिताः :— ~ भावाः :— भट्टकल्लटेन तथा प्रतिपादिताः।

यथा—

"ग्रन्थकृता तत्त्वविचारेऽप्युक्तम् :—
"स्वस्वभावस्थिता भावाः सम्बन्ध्यन्ते परस्परम्।
भोग्यभोक्तृत्वभावेन न कदाचित् स्वभावतः।।
द्रष्टाऽनुभविता स्मर्ता ग्राहको भोक्तृवेदकः।
कर्तोपलब्धा संवेत्ता ज्ञातेति ज्ञानसंज्ञकाः।।' इति।"

(स्पं०प्र०,पृ०,38-39)

स्वाच्छन्द्यम् :— अभेदेऽपि भेदावभासनं, भेदावभासेऽपि चाभेद एव विश्रान्ततेति बहुधा असम्भाव्यस्यापि सम्भावने यत् परमेश्वरस्य स्वभावात्मकं सामर्थ्यं पारमैश्वर्याख्यं तदेव तस्य स्वाच्छन्द्यं तदिच्छामात्रतोऽवभासमानत्वात्।

यथा—

"तदिदमेव भगवतः स्वाच्छंद्यम् :– यत् संविदात्मक एव भवन् विचित्रप्रमातृप्रमेयात्मना संविद्रूपानधिकेनापि संविद्रूपाधिकतया निर्भासमानवपुषा प्रकाशते च, तथा विमृशति च। अनधिकस्यापि अधिकस्येव भासनं स्वच्छभाव उच्यते दर्पणस्येव।"

(ई०प्र०वि०वि०,खं०1,पृ०,6)

"स्वच्छन्देति विमर्शस्वातन्त्र्ययोगः।"

(तदेव,पृ०,7)

द्र०:- **'इच्छास्वातन्त्र्यम्'** इति।

स्वातन्त्र्यदर्पणः :— डॉ० बलजिन्नाथपण्डित विरचितः शैवदर्शनग्रन्थो यः शास्त्रप्रवेशोपायरूपतया पाठकानां कृते उपयोगी। प्रकाशितश्च टीकया साकं श्री रणवीरकेन्द्रीय संस्कृत विद्यापीठेन जम्मूपुर्याम्।

स्वातन्त्र्यदीपिका :— श्री रणजीतसिंहस्य शासनकाले मनसारामारख्येन कश्मीरकेण सिद्धेन विरचितः सूत्रात्मको वृत्त्या च युक्तोऽमिनव एव शैवदर्शनग्रन्थः। न चाद्यावधि प्रकाशितः केनापि। अस्य मातृकाः श्रीनगरे लभ्यन्ते। श्रीरणवीर केन्द्रीय संस्कृत विद्यापीठेऽपि वर्तत एका मातृका।

स्वातन्त्र्यम् :— (1) पारिपूर्ण्यम्। स्वात्ममात्रनिर्भरत्वं सर्वत्र सर्वथा सर्वदा च। अन्यनैरपेक्ष्येणैव समस्तस्य स्वेच्छानुसारं सम्पादने समर्थत्वम्।

यथा—

"अन्यनिरपेक्षतैव परमार्थतः आनन्दः, ऐश्वर्यं स्वातन्त्र्यं, चैतन्यं च।"

(ई०प्र०वि०,खं०1,पृ०,207)

"एवमस्य स्वतन्त्रस्य निजशक्त्युपभेदिनः (भोगिनः)।
स्वात्मगाः सृष्टिसंहाराः स्वरूपत्वेन संस्थिताः।।
तेषु वैचित्र्यमत्यन्तमूर्ध्वाधस्तिर्यगेव यत्
भुवनानि तदंशाश्च सुखदुःखमतिश्चाः।।
यदेतस्यापरिज्ञानं तत्स्वातन्त्र्यं हि वर्णितम्।"

(बो०पं०द०,9-11)

"तस्य देवातिदेवस्य परापेक्षा न विद्यते।।
परस्य तदपेक्षतात् स्वतन्त्रोऽयमतः स्थितः।"

(तं०आ०1,59-60)

(2) सर्वशक्तिमत्त्वम् अपरिच्छिन्नप्रकाशत्वम्। अभेदे भेदस्य भेदिते चाभेदस्य प्रकाशेन स्वेच्छानुसारं समर्थत्वं तदनुकूलं च प्रसरणशीलत्वम्।

यथा—

"अपरिच्छिन्नप्रकाशत्वं च प्रकाशेन स्वातन्त्र्यमहमिति महत्सं-रम्भात्मा प्रतिघातशून्यो विमर्शः, तदेव चास्य सर्वशक्तित्वम्। सर्वशक्तित्वादेवान्तर्व्यवस्थितमपि चिन्मात्ररूपं भावजातं स्वशक्तिप्र-पञ्चमयं स्वरूपसंकोचनावभासनपुरःसरं- स्वतश्अन्योन्यतश्च विभक्तमिव निर्भासतामिति अमुनाऽपि रूपेण प्रकाशमानः स्वातन्त्र्याप्रतिघातात् भावभेदनिर्मातेति उच्यते।"

(ई०प्र०वि०वि०,खं०2,पृ०,8)

"तद्विचित्रस्वभावत्वाद्विचित्रप्रथनामयम्।
प्रथने पारतन्त्र्यं हि न जातु भजते क्वचित्।।"

(प०त्री०वि०,पृ०,213)

"स्वातन्त्र्यं चास्य अभेदे भेदनं, भेदिते चान्तरनु-सन्धानेनाभेदनम्—इति बहुप्रकारं वक्ष्यामः।"

(ई०प्र०वि०,खं०1,पृ०,31)

(3) जगत् स्रष्टृत्वे शक्तिमत्वं, पारमैश्वर्यम्।

यथा—

"तदेवास्य पारमैश्वर्यं मुख्यमानन्दमयं रूपम—इति पूर्वमुपात्तं 'कर्तरि' इति।"

(तदेव,पृ०,31-32)

"तेन सर्वक्रियास्वतन्त्रे सर्वशक्तिके इति यावदुक्तं भवेत्।"

(तदेव,पृ०,32)

(4) परमेश्वरस्य लक्षणं स्वातन्त्र्यमेव तस्य विभुत्वं नित्यत्वं सर्वव्यापकत्वं सर्वात्मत्वं विश्वोत्तीर्णत्वेऽपि सर्वं तस्य स्वातन्त्र्येणैवाक्षिप्तं भवति। तत एव स्वातन्त्र्यमेव तस्य लक्षणम्।

यथा—

"एक एवास्य धर्मोऽसौ सर्वाक्षेपेण वर्तते।।
तेन स्वातन्त्र्यशक्त्यैव युक्त इत्याञ्जसो विधिः।"

(तं०आ०1,67-68)

"स्वातन्त्र्यमेव चानन्यमुखप्रक्षित्वलक्षणम् आत्मनः स्वरूपम्, इति व्यतिरिक्तोन्मुख आत्मा अनात्मैव स्यात्।"

(ई०प्र०वि०,खं०1,पृ०,215)

(5) स्वयमेव स्वेनैव प्रकाशेन प्रकाशमानत्वं स्वातन्त्र्यम्।

यथा—

"स्वतन्त्र एकः प्रकाशः।"

(तं०सा०,पृ०,6)

(6) परमेश्वरस्यासौ नैसर्गिकः स्वभावो येनासावात्मानं माययाऽऽवृणुते। पुनश्च विद्योदयेन तदावरणमपाकृत्य कृतार्थ इव भवति।

यथा—

"तस्य स्वतन्त्रभावो हि-हि-किं-किं यन्न विचित्रयेत्
तदुक्तं त्रिशिरःशास्त्रे सम्बुद्ध इति वेत्ति यः।।"

(तं०आ०1,136-137)

(7) अप्रतिहता क्रियाशक्तिर्भगवतः।

यथा—

"अप्रतिहतमेव स्वातन्त्र्यं क्रियाशक्तिरूपं भगवतः।"

(ई०प्र०वि०वि०,खं०3,पृ०,28)

"एवं स्वातन्त्र्ये प्रकाशिते ज्ञानक्रिये अपि प्रकाशिते एव। तदेव च ऐश्वर्यमिति किमन्यदप्रकाशितं स्यात?"

(ई०प्र०वि०वि०,खं०1,पृ०,78)

(8) विविधाकारावभासनविलापनाद्यैश्वर्यं स्वेच्छया प्रकटयन्नपि शिवो यत् स्वरूप एव सदा तिष्ठति, न च मनागपि विकारमाप्नोति तदेव तस्य स्वातन्त्र्यम्।

यथा—

"तत्तदवस्था विप्रलोपे, समुत्पत्तौ वा स्वस्वरूप एव। एतदेव च दुर्घटकारि महेशानत्वं संवित्तत्त्वस्य, तद्यथा-तथा पशुप्रमातृतया स्वर्गनरकादिभोगभोक्ताऽपि सर्वानुभवितृतया संवित्स्वरूप एव।"

(प०सा०वि०,23)

(9) नियत्यनुवर्तनोल्लङ्घनपूर्वकं कर्तुमकर्तुमन्यथा च कर्तुं परमेश्वरस्य स्वच्छन्दत्वम्।

यथा—

"चेतन एव तु तथा-तथा भवति भगवान् भूरिभर्गो महादेवो नियत्यनुवर्तनोल्लङ्घनधनतर स्वातन्त्र्यः इत्यत्र पक्षे नियत्यनुवर्तिनि लौकिके प्रसिद्धे कार्यकारणभावे स्वातन्त्र्यं, तदुल्लङ्घनमाद्रियमाणस्य तु योगिप्रायप्रसिद्धे लोकोत्तरे, इति न कश्चिद्विरोधः।"

(ई०प्र०वि०,खं०2,पृ०,153)

(10) स्वयं स्वेच्छाविघातराहित्येन ज्ञानक्रियावैचित्र्य-विकासकत्वंपरेषामपि तथैव ज्ञानक्रिययोर्विकासकत्वे नियोजकत्वम्।

यथा—

"प्रकाशस्वातन्त्र्यमिह बोधसंवेदनादिशब्दवाच्यम्। स्वातन्त्र्यं च नाम यथेच्छं, तत्रेच्छा प्रसरस्याविघातः, तेन स्वयं प्रकाशते, परात्मना प्रकाशते, इति अनवच्छेदनया प्रकाशमानता, तदेव स्वातन्त्र्यं परात्मना प्रकाशते इति। एतदेवोच्यते परं प्रकाशयतीति। एतदेव हि राज्ञः सुतरां युद्धे स्वातन्त्र्यं यत्

युद्ध्यते योधयति चेति। तत् स्वयं निर्भासते निर्भासमानं घटादिकं निर्भासयतीति इयति क्रिया समुदाये ..... संविदादयो वर्तन्ते इति तावत् समस्तांशस्वीकारेण विमृशामीति .....।"

(ई०प्र०वि०वि०,खं०1,पृ०,82)

स्वातन्त्र्यशक्तिः :— (1) परिपूर्णा पारमेश्वरी परा शक्तिः।

यथा—

"स्वातन्त्र्यशक्तिरेवास्य सनातनी पूर्णाहन्तारूपा परा मत्स्योदरी, महासत्ता, स्फुरत्तोर्मिः, सारं, हृदयं, भैरवी, देवी, शिखा, इत्यादिभिरसंख्यैः प्रकारैस्तत्रतत्र निरुच्यते।"

(स्पं०,नि०पृ०,66)

(2) स्वाभाविकी परिस्फुरत्तात्मा विमर्शाभिधाना क्रमरूपतयाऽऽभासमानाऽपि वस्तुतोऽक्रमा परमेश्वरस्य परमेश्वरता।

यथा—

"नैसर्गिकी स्फुरत्तात्मा विमर्शाख्या परा प्रभोः।
अक्रमा क्रमरूपेव शक्तिः स्वातन्त्र्यलक्षणा।।"

(पू०प्र०,137)

"कर्तृत्वलक्षणा स्वातन्त्र्यशक्तिर्विश्वशक्तिश्रेणीसमाक्षेपेण वर्तते इति सैव विमर्शरूपा प्रधानमिति तात्पर्यम्।"

(ई०प्र०वि०वि०,खं०2,पृ०,207)

स्वातन्त्र्यसिद्धान्तः :— (1) जगत्सृष्टिं केचन वैशेषिकाद्याः परमाणूपादानामारम्भनीत्या प्रतिपादयन्ति, सांख्याद्याः प्रकृतिपरिणामतः, वैष्णवाद्याः परमेश्वरस्य शक्तेः परिणामतः प्रतिपादयन्ति। वेदान्तिनो मायात्मकोपाधिवशात् प्रातिभासिकतयावभासमानयाऽविद्ययैव जीवजगदीश्वराभासः स्वप्नसङ्कल्पाद्याभासवदसत्यः सत्ये ब्रह्मण्याभातीति मन्यन्ते। शैवाः पुनः परमेश्वरस्य या परमा स्वतन्त्रता—कर्तुमकर्तुमन्यथा वा कर्तुमप्रतिहतेच्छा, तद्वशादेव जगतः सृष्टिस्थितिसंहृतयो, जीवानां च बन्धमोक्षौ प्रतिबिम्बन्यायत एवाभासन्त इति सिद्धान्तं प्रतिपन्नाः। आरम्भाद्याः वादाः कल्पनाकल्पिताः, तर्कसाहाय्येन प्रतिष्ठापिताः। ततस्ते वादाः, वादलक्षणस्य तत्र विद्यमानत्वात्। शैवाः पुनरपरोक्षेण साक्षात्कारेण दृष्टस्य सिद्धस्यैव सत्यस्योपदेशमात्रं कुर्वन्ति, न स्वीयां कल्पनां कामपि विदधति। ततस्तेषामुपदेशः सिद्धस्य वस्तुनः कथनमात्ररूपत्वेन सिद्धान्त एव, न वादः। तदनुसारं स्वात्मनि स्वशक्तिरूपतया सततं सर्वथाऽभेदेन विद्यमानमेव भवति विश्वम्। ततः परमेश्वरोऽनिरुद्धया स्वेच्छया स्वयं भिन्नतया विश्वरूपतयाऽऽभासयति तत्।

ततः स्वयं भिन्नतया विश्वरूपतयाऽऽभासमानश्च न स्वकीयाच्छुद्धात् संविद्रूपत्वात् कथमपि मनागपि च्यवते। यतो विश्वावभासः प्रतिबिम्बन्यायेनैव सम्भवति न परिणामन्यायेन। परमेश्वरस्य स्वात्मरूपाः शक्तय एव तदिच्छानुसारं जगद्रूपतया प्रतिफलिताः सत्यस्तत्प्रकाशमध्य एव तथा तथाऽऽभासन्ते। तदाभासमय एव सर्वोऽपि सृष्टयादि प्रपञ्चः। स च तस्य स्वातन्त्र्यैणैवाभासते नाटयलीलातुल्यतयेति स्वातन्त्र्यसिद्धान्तस्य सारः।

यथा—

"संवित् एव अभ्युपगतस्वातन्त्र्या अप्रतीघातलक्षणात् इच्छाविशेषवशात् संविदोऽनधिकात्मताया अनपायात् अन्तःस्थितमेव सत् भावजातम् इदमित्येवं प्राणबुद्धिदेहादेः वितीर्णक्रियन्मात्रसंविद्रूपात् बाह्यत्वेन आभासयतीति, तदिह विश्वरूपाभासवैचित्र्ये चिदात्मन एव स्वातन्त्र्यं किन्नाभ्युपगम्यते स्वसंवेदनसिद्धम्।"

(ई०प्र०खं०1,पृ०,184-185)

(2) स एष पारमैश्वर्यप्रधानः स्वातन्त्र्यसिद्धान्तोऽविद्यावादनिष्ठादद्वैतवेदान्तवादादत्यन्तं भिन्नः। किञ्च सर्वथा परमाद्वयसिद्धान्त निष्ठत्वाद् वैष्णवादैश्वर्यवादादपि भिन्नः। तत्र वैष्णवे वादे भगवच्छक्तेः परिणामतो विश्वोत्पत्तिरङ्गीक्रियते। अत्र पुनः शैवदर्शने न भगवतो नापि भगवच्छक्तेः कथञ्चिदपि परिणामित्वं स्वीक्रियते। शक्तिशक्तिमतोरैक्येन शक्तिपरिणामे शिवपरिणामोऽप्यापद्यते। तेन च जगन्मूलकारणस्य परमेश्वरस्य विकारित्वं प्रसज्येत। ततोऽसौ स्वस्वभावत एव स्वाभिन्नाः स्वशक्तीरेव स्वात्मभित्तौ प्रतिबिम्बन्यायेन प्रमेयतयाभासयन् विजयते।

यथा—

"तस्मादनपह्नवनीय प्रकाशविमर्शात्मा संवित्स्वभावः परमशिवो भगवान् स्वातन्त्र्यादेव रुद्रादिस्थावरान्तप्रमातृरूपतया नीलसुखादिप्रमेयरूपतया च अनतिरिक्तयापि अतिरिक्तया इव स्वरूपानाच्छादिकया संविद्रूपनान्तरीयकस्वातन्त्र्यमहिम्ना प्रकाशत इति अयं स्वातन्त्र्यवादः प्रोन्मीलितः।।"

(ई०प्र०वि०वि०,खं०1,पृ०,9)

उद्यत इति वादः इति सामान्यतयाऽत्र वादशब्दस्य क्वचित्क्वचित् प्रयोगः कृतो गुरुभिः, वादपदस्य यः पारिभाषिकोऽर्थो न्यायदर्शने प्रोक्तस्तदभिप्रायेणात्र वादपदं नैव प्रयुक्तमिति वेदितव्यम्, अस्य स्वातन्त्र्यस्य सर्वथा सिद्धान्तरूपत्वात्।

स्वात्मदीक्षा :— (1) अस्ति तावच्छैवदर्शने कापि परम्परा यदनुसारं साधकः सस्फुरस्य गुरोर्लाभे तेनैव स्वस्य दीक्षां कारयेत्, परं तस्यालाभे स्वयमेव स्वात्मदीक्षां कुर्यात्। दीक्षकत्वेन तत्र देवीं चण्डिकां भावयेत्।

यथा—

"दीक्षयेज्जपयोगेन रक्तादेवी क्रमाद्यतः।
गुरोरलाभे प्रोक्तस्य विधिमेतं समाचरेत्।।"
(तं०आ०4,65)

(2) चेत् कदाचिद् गुरुरल्पसामर्थ्यः सन् शिष्यस्यान्तर्ज्ञानं नोत्तेजयेत् तदा शिष्येण स्वात्मदीक्षणेन स्वस्य परसंविद्रूपतया प्रत्यवमर्शनं कार्यम्। तेन तस्य ज्ञानं प्रदीप्तं भवति मन्त्रादि च सफलं भवति।

यथा—

"अनेन स्वात्मविज्ञानं सस्फुरत्वप्रसाधकम्।।
उक्तं मुख्यतयाचार्यो भवेद्यदि न सस्फुरः।"
(तं०आ०4,62-63)

"तदा किं तेन कार्यम्, इति भगवत्या चोदिते–प्रश्निते सति,..... ..... "आत्मैवेदं सर्वम्' इत्येवमात्म, यज्ज्ञानं तस्य क्रमः ..... जप्यस्य मन्त्रादेः स्वरूपोत्तेजनाय निमित्तान्तरभूतं, स्वात्मनो दीक्षणम्—परसंविद्रूपतया प्रत्यवमर्शनं नाम, भगवतोत्तरमुक्तम्।"
(तं०आ०वि०,खं०3,पृ०,68)

~ तत्फलम् :— **ब्रह्मयामलोक्तविधिना स्वात्मदीक्षां विधाय अभ्यसन् साधकः पादोऽनेन दिनचतुष्टयेन समयी, सार्धदिनसप्तकेन पुत्रकः, पक्षेण साधको, मासेन चाचार्यो भवति।**

यथा—

"विधिं प्रोक्तं सदा कुर्वन् मासेनाचार्य उच्यते।
पक्षेण साधकोऽर्धाऽर्धात् पुत्रकः समयी तथा।।"
(तं०आ०4,64)

स्वात्मपरामर्श :— शाक्तोपायनीत्या स्वात्मनो वास्तविकस्य पारमैश्वर्यमयस्य स्वभावस्य पुनःपुनः विमर्शनस्याभ्यासः।

~ तत्फलम् :— **संविद्रूपस्तु स्वात्मा स्वयं परामर्शक एव इति कथमेतस्य विकल्पसंवित्परामृश्यता। इत्येतद्दूषणमित्थमपास्यतेः— स्वात्मा हि क्रीडास्वभावः, तेन स्वयमेव मायामाभास्य तया स्वात्मानमसंविन्मयमिवाभासयति। तत्तथाविधं यदाभासनं तस्य विद्रावणार्थमेव विकल्पसंस्काराभ्यासो येन निर्विकल्पस्वात्म—परामर्शस्थितिः संविदः पुनश्चकास्ति इति।**

यथा—

"ननु संवित्पराम्रष्ट्री परामर्शमयी स्वतः।
परामृश्या कथं ताथारूप्यसृष्टौ तु सा जडा।।
उच्यते स्वात्मसंवित्तिः स्वभावादेव निर्भरा।
नास्यामपास्यं नाधेयं किञ्चिदित्युदितं पुरा।।
किन्तु दुर्घटकारित्वात्स्वाच्छन्द्यान्निर्मलादसौ।
स्वात्मप्रच्छादनक्रीडापण्डितः परमेश्वरः।।
अनावृत्ते स्वरूपेऽपि यदात्माच्छादनं विभोः।
सैव माया यतो भेद एतावान्विश्ववृत्तिकः।।
तथाभासनमेवास्य द्वैतमुक्तं महेशितुः।
तद्द्वयापासनेनायं परामर्शोऽभिधीयते।।"
(तं०आ०4,8-12)

स्वात्मपूजनविधिः :— उक्तमेतत्स्पष्टम् :—

"यदेव हृद्यं तद्योग्यं शिवसंविदभेदने।
कृत्वार्घपात्रं तद्विप्रुट्प्रोक्षितं कुसुमादिकम्।।
कृत्वा च तेन स्वात्मानं पूजयेत्परमं शिवम्।"
(तं०आ०15,292-293)

स्वात्मसप्ततिः :— कोऽपि दर्शनग्रन्थः।

तद्यथा—

"उक्तं हि स्वात्मसप्ततौ :—
"यद्वद् वस्तु स्वभावेन ज्ञानेन विषयीकृतम्।
तद्वत्तादात्म्यमायाति जीवो सर्वमयो ह्यतः।।' इति।"
(स्पं०प्र०,पृ०,36)

स्वात्मसम्बोधः :— किमपि दर्शनशास्त्रपुस्तकम्।

"उक्तं स्वात्म-सम्बोधे :—
'यथाग्निपोत्रंज्वलनोद्धृतं सच्छैत्यं प्रयायाच्छनकैर्न सद्यः।
अज्ञानपङ्केऽपि तथा निरस्ते कालेन कैवल्यमुपैति देही।।'
इति।"
(स्पं०प्र०,पृ०,21)

सोमयागोपयोगिपात्र विशेषः पोत्रमिति।

स्वात्मसाक्षात्कारः — (1) स्वयमेव स्वप्रकाशतया परस्य स्वात्मस्वरूपस्य निर्विकल्पः प्रकाशस्तथाविधश्च विमर्शः।

यथा—

"निराधारं मनः कृत्वा विकल्पान्न विकल्पेयत्।
तदात्मपरमात्मत्वे भैरवो मृगलोचने।।"
(वि०भै०,108)

(2) स्वात्मनः सृष्ट्यादिकरणे यत् स्वातन्त्र्यं तस्य साक्षादनुभूतिरेव स्वात्मसाक्षात्कारः।

यथा—

"स्वात्मन्येव चिदाकाशे विश्वमस्यवभासयन्।
स्रष्टा विश्वात्मक इति प्रथया भैरवात्मता।।
षड्ध्वजातं निखिलं मय्येव प्रतिबिम्बितम्।
स्थितिकर्ताऽहमस्मीति स्फुटेयं विश्वरूपता।।
सदोदितमहाबोधज्वालाजटिलतात्मनि।
विश्वं द्रवति मय्येतदिति पश्यन्प्रशाम्यति।।"
(तं०आ०3,283-285)

~ अद्वयात्मकः :— **सृष्ट्यादिकर्तृत्वेऽपि स्वात्मा परे साक्षात्कारे सर्वमग्निसात् कुर्वन्नग्निरिवैक एव प्रकाशते।**

यथा—

(क) "अनन्तचित्रसद्गर्भसंसारस्वप्नसद्मनः।

प्लोषकः शिव एवाहमित्युल्लासी हुताशनः।।"

(तं०आ०3,286)

(ख) "उल्लसनशीलोऽनवच्छिन्नसंविदात्मकः शिव एवाहमिति परामर्श एव हुताशनो विश्वसंस्कारस्यापि स्वात्मसंवित्सात्कारक इत्यर्थः।"

(तं०आ०वि०,खं०2,पृ०,257)

स्वानन्दभोगी :— ~ शिव :— शान्तब्रह्मवादे न परतत्त्वमानन्दभुक्। ततः शिवे शान्तत्वस्य निमज्जनम्, स्वात्मचमत्कारस्य च स्फुरत्तात्मकः प्रकाशः।

यथा—

"शान्तत्वन्यक्क्रियोद्भूतजिघत्सावृंहितं वपुः।
स्वयं प्रतिष्ठितं येन सोऽस्याभोगे विनश्यति।।"

(तं०आ०27,5)

स्वापः :— स्वप्नः। ततो बाह्याभिमतानां विषयाणामग्रहणं स्वापः। स च स्वप्नभेदेषु सर्वत्र।

यथा—

"बाह्याभिमतभावानां स्वापो ह्यग्रहणं मतम्।"

(तं०आ०10,254)

स्वाप्नप्रपञ्चभेदाः :— प्रमातृप्रमेयप्रमाणप्रमात्मकाः ये स्वाप्नप्रपञ्चस्य चत्वारो भेदास्तेषां क्रमेण संज्ञा :- गतागतं, सुविक्षिप्तं संगतं, सुसमाहितमिति।

यथा—

"तत्रापि चातुर्विध्यं तत् प्राग्दिशैव प्रकल्पयेत।।
गतागतं सुविक्षिप्तं संगतं सुसमाहितम्।"

(तं०आ०10,252-253)

"प्राग्दिशैवेति मेयादिगतत्वेन स्वप्नस्वप्नादिगतत्वेन च।"

(तं०आ०वि०,खं०7,पृ०,272)

स्वप्नस्वप्नादि च स्वप्नजाग्रत्, स्वप्नस्वप्नः, स्वप्नसुषुप्तिः, स्वप्नतुर्येति।

~ संज्ञाभेदतः :— तत्र योगिषु प्रवृत्ता स्वप्नस्य संज्ञा पदस्थमिति, ज्ञानिषु च व्याप्तिरिति।

यथा—

"द्विसंज्ञं स्वप्नमिच्छन्ति पदस्थं व्याप्तिरित्यपि।"

उद्धः:- (मा०वि०तं०2,37) (तं०आ०वि०,खं०7,पृ०,172)

स्वाप्नसत्ता :— स्वप्नसङ्कल्पमनोराज्यादिदशास्वाभासमाना विचित्रप्रकारा प्रमेयभावसत्ता।

~ वैयक्तिकी :— स्वाप्नं प्रमेयमान्तरमस्थिरं प्रमात्रान्तरैश्चावेद्यम्।

यथा—

"तदैव तस्य वेत्त्येव स्वयमेव ह्यबाह्यताम्।।
प्रमात्रन्तरसाधारभावहान्यस्थिरात्मते।"

(तं०आ०10,251-252)

स्वाभासा :— संविद इदं विशेषणम्। स्वयमेव प्रकाशते यतः।

यथा—

"दृक् ज्ञानम्। सा स्वस्यैव आभासः, स्वस्य आभासनं नाम तस्यैवेति। न चास्यां अप्रकाशमानं रूपमस्तीति।"

(ई०प्र०वि०वि०,खं०1,पृ०,213)

"दृगेव स्वाभासा, दृक् स्वाभासैवेत्येवमयोगान्ययोगापलक्षित-स्वाभासनियमवत्वं दृशो लक्षणम्।"

(तदेव,पृ०,215)

स्वायम्भुवसूत्रम् :— कश्चन शैवग्रन्थः।

यथा—

"अथानादिर्मलः पुंसां पशुत्वं परिकीर्तितम्।
तुषकम्बुकवज्ज्ञेयं मायाजमङ्कुरस्य तु।।
इति श्री स्वायम्भुवसूत्रे।"

(स्व०तं०उ०,प०5,पृ०,84)

स्वायम्भुवागम :— किमपि रौद्रागमशास्त्रम्, समाश्रितं प्रमाणतया तन्त्रालोके।

यथा—

"ज्ञानाज्ञानगतं चैतद् द्वित्वं स्वायुम्भुवे रुरौ।"

(तं०आ०1,46)

द्र०:- (तं० आ०15,3; 28,263) इति।

स्वालक्षण्यम् :— नियतदेशकालपरिच्छिन्नत्वं सर्वथाऽसम्बद्धत्वं च, तथा जात्यादिवाचकशब्दादि-सम्बन्धरहितत्वं सर्वथानिजे स्वरूप एव सङ्कुचितत्वम्। तच्च निर्विकल्पकाभासे प्रकाशते।

यथा—

"स्वालक्षण्ये च देशकालाभासयोजनस्यैव अन्तरङ्गत्वम्।"

(ई०प्र०वि०,खं०2,पृ०,104)

स्वाहा :— भोज्यभोजकचर्वग्निरूपाणां पदार्था-नामेकशित्वत्वामर्शः। यः स्वाहेति पदेन विधीयते होत्रा।

यथा—

"भोज्यभोजकचर्वग्न्योरित्थमेकानुसन्धितः।
स्वाहा प्रत्यवमर्शात्स्यात्समन्त्रादद्वयं परम्।"

(तं०आ०15,441-442)

भोज्यं= चारुरूपं, भोजकः- भोक्ता= अग्निरूपः, तयोः, इति द्विवचनमत्र।

ह

ह :— (1) मातृकावर्णक्रमे शक्तितत्त्वस्य वास्तविकस्यस्वरूपस्याभिव्यञ्जको वर्णः हकारः। अकारादिहाकरान्तक्रमे खल्वेषा भावना। अकारादिक्षकारान्ते क्रमे हकारः सादाशिवतत्त्वस्यैव वास्तविकस्य स्वरूपस्य व्यञ्जको वर्णः।

यथा—

"शादिक्षान्तं महामायाविद्येश्वरसदाशिवशक्त्याख्यं तत्त्वं-पञ्चकम्।"

(प०त्री०वि०,पृ०,117)

"तदूर्ध्वं शादिविख्यातं पुरस्ताद् ब्रह्मपञ्चकम्।"

(प०त्री०,7)

परात्रीशिकालघुवृत्तावस्य वाक्यस्य व्याख्याऽन्यथाकृता या खल्वभिनवगुप्तीयां व्याख्यां नानुसरति।

(2) कामतत्त्वं विसर्गात्मकत्वात्।

द्र०:- 'कामतत्त्वम्' इति।

अपरो हि विसर्गो हकार एव।

हंसः :— (1) हानसमादानशक्तिकः परः प्रमाता शिवः। स एव जीवदशायां स्थितोऽपि 'हंस' इति परिभाषितः शास्त्रे।

यथा—

द्र०:- 'आत्मा' ~ 'वस्तुतः' इति।

"'हंसो' हानसमादानधर्मा अग्निशब्दव्यपदिष्टः परप्रमाता।"

(तं०आ०वि०,खं०3,पृ०,147)

"अकृतार्थो नरस्तावद्यावद्धंसः न विन्दति।"

(तदेव,पृ०,147)

"विश्वसृष्टिसंहारात्मकहानसमादानधर्मा परमेश्वर एव हंसः।"

(स्त०चि०वि०,पृ०,17)

(2) सर्वप्रकारकः हानोपादानरूपो हि प्राणो, नासौ केवलं श्वासप्रश्वासात्मकः एवेति।

यथा—

"यत्रयत्र गतं चक्षुर्यत्र यत्र गतं मनः।
हंसस्तत्र द्विरभ्यस्यो विकासाकुञ्चनात्मकः।।"

(तं०आ०29,89)

"तत्रैव हंसो हानसमादानधर्मा प्राणः।"

(तं०आ०वि०,खं०11/2,पृ०,59-60)

"नादाख्यं यत्परं बीजं .....।"

उद्धः:- (स्व०तं०उ०,प०4,पृ०,161)

"व्याख्यातरूपः प्राण एव हंस ऊर्ध्वमधश्च स्वरसेन वहन् हानसमादानधर्मकहकारसकारविमर्शरूपतया स्फुरणात्।"

(स्व०तं०उ०,व०4,पृ०,162)

(3) जीवात्मा कुण्डलिन्या ऊर्ध्वगतौ।

यथा—

"पुरुषः क्षेत्रज्ञोऽनेनैव मध्योर्ध्वमार्गारोहणात्मना योगेन सर्वजन्तुषु हृत्कण्ठभ्रूमध्यललाटमार्गेण प्रसरन्नधरभूमि-हानोर्ध्वपदसमादानरूपो हंस उच्यते।"

(स्व०तं०उ०,प०4,पृ०,165)

(4) (क) ह इति बीजमन्त्रः।

यथा—

"हंसो = ह।"

(तं०आ०वि०,खं०30,पृ०,197)

(ख) हकारो, यत्र स्फुटस्य विसर्गस्य स्थितिः।

यथा—

"अत एव विसर्गस्य हंसे यद्वत्स्फुटा स्थितिः।।"

(तं०आ०3,148)

विसर्गस्यैव यथा हकारात्मतया स्थूलेन रूपेणावस्थानम् . . ..।"

(तं०आ०वि०,खं०2,पृ०,152)

"हंसपथसततसञ्चारिणाऽक्षरेण विचलद्रूपेण हकारेण।"

(स्व०तं०उ०,प०1,पृ०,34)

(ग) हकारात्मकतामाश्यानरूपतां प्राप्तो विसर्गः।

यथा—

"विसर्ग एव तत्तद्वैचित्र्योपारोहक्रमेण हकारात्मस्थौल्यमुपागतः सन् 'हंस' इत्येवमाद्यैः शब्दैः परिभाष्यते।"

(तं०आ०वि०,खं०2,पृ०,145)

द्र०:- 'आश्यानता' इति।

हंसजपः :— प्राणापानगतौ भावनया श्रूयमाणः हकारसकारजपः। यथा—

"हंस-हंसेति मन्त्रेण जीवो जपति सर्वदा।"

उद्धः:- (वि०भै०उ०,पृ०,135)

"सहौ क्षपादिनामानावधरोत्तरचारिणौ।
परस्परद्वैषरतौ मतौ नगहुडूपमौ।।
कस्तौ रोधयितुं शक्तो वीर्यं मुक्त्वा स्वकं महत्।"

उद्धः:- (तं०आ०वि०,खं०2,पृ०,169)

द्र०:- 'हंसमन्त्रः' इति।

हंसपारमेशः :— शैवसाधनापरोग्रन्थविशेषो हंसपारमेश्वर इत्यप्युक्तः।

यथा—

"शिवशक्तिरमोघेयं कर्तरी परिकीर्तित।
इति श्रीहंस पारमेशोक्तः .....।"

(स्व०तं०उ०,प०4,पृ०,81)

"उक्तं च हंस पारमेश्वरे :-
'पशुभावे स्थिता मन्त्राः केवला वर्णरूपिणः।
सौषुम्णेऽध्वन्युच्चरिताः पतित्वं प्राप्नुवन्ति ते।।' इति।"

(स्पं०प्र०,पृ०,33)

हंसभेदः :— किमपि शैवं शास्त्रं यस्य श्लोकद्वयं समुद्धृतं महार्थमञ्जरीपरिमले।

यथा—

"यदुक्तं श्री हंसभेदे:—
सेव्यन्ते गुरवोऽनेके .....।
इत्यादि।"
..... केवलो विदितः स्वयम्।।
इत्यन्तम्।"

(म०मं०प०,पृ०,6)

द्र०:- (तदेव,पृ०,55,115) चापि।

हंसमन्त्रः :— अजपाजपे प्राणापानध्वनौ "हंसः-हंसः" इति भाव्यमानो मन्त्रो 'हंसमन्त्रः'। तत्र प्रारम्भे पूर्वमपाने "सः" ततश्च प्राणे "हं" इति सोऽहं रूपमन्त्राक्षरभावना। सिद्धे च प्राक् प्राणे 'हं' ततोऽपाने सः इति शिवजीवाभेदभावे "हंसः-हंसः" इत्येव स्फुटं भावनाभ्यासवशाच्छ्रूयते। स एव हंसमन्त्रोऽहर्निशं 21600 वारं स्वत एव प्राणापानगता- वुच्चरञ्छ्रूयते साधकैः सततगत्या। तदर्थश्च विश्वमपि व्यवहारजातं कुर्वद्भिरपि सततगत्या भाव्यते तैः। यथा—

"षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः।
जपो देव्यः समुद्दिष्टः प्राणस्यान्ते सुदुर्लभः।।"

(वि०भै०,156)

विज्ञानकौमुद्यनुसारमस्य पाठोऽयम् :—

"षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः।
हंसः-हंसेति मन्त्रेण जीवो जपति नित्यशः।।
जपो देव्याः समुद्दिष्टः प्राणस्यान्ते सुदुर्लभः।"

(वि०कौ०,पृ०,61)

हंसरूपिणी :— बालसूर्यसमाऽरुणवर्णा 'हंसः' इति ध्वनिरूपा अजपा गायत्री।

द्र०:- (आ०वि०सु०,पृ०,22)

हंसी :— उन्मनाशक्तिः।

यथा—

"विश्वसृष्टिसंहारात्मकहानसमादानधर्मापरमेश्वर एव हंसः, तस्य च तादृशीमेवशक्तिमुन्मनाख्यां हंसीरूपाम्.....।"

(स्त०चि०वि०,पृ०,17)

हंसोच्चार :— वर्णयोगस्य प्रकारविशेषः।

यथा—

"..... हंसोच्चारस्तथोच्यते।
हकारस्तु स्मृतः प्राणः स्वप्रवृत्तो हलाकृतिः।।
अकारेण यदा युक्त उकार चरणेन तु।
मकार मात्रया युक्तो वर्णोच्चारो भवेत्स्फुटः।।
बिन्दुः शिरः समायोगात्सुस्वरत्वं प्रपद्यते।
नादोऽस्य वदनं प्रोक्तः वदनं शब्दमीरयेत्।
अनेनैव च योगेन हंसः पुरुष उच्यते।
ब्रह्मविष्वीष्मार्गेण चरन्वै सर्वजन्तुषु।।
शक्ति तत्त्वे लयं याति विज्ञानेनोर्ध्वतां व्रजेत्।
व्यापिनीं समनांत्यकृत्वा व्रजेदुन्मनया शिवम्।।
शिवतत्त्वगतो हंसो न चरेद् व्यापको भवेत्।
हंसोच्चारः समाख्यातः .....।।"

(स्व०तं०4,257-462)

हकला :— शक्तिस्फाराभिव्यञ्जिका वर्णकला हकाररूपा।

यथा—

"शक्तिस्फाररूपहकला।"

(प्र०ह०,पृ०,50)

हकारः :— (1) द्र०:- 'षट्त्रिंशत्तत्त्वदीक्षा' इति।

(2) प्राणः।

यथा—

"प्राणो हकारः।"

(ने०तं०उ०,खं०2,पृ०,52)

(3) शाम्भवो विमर्शः। यथा—

"हकारश्च शाम्भवविमर्शनस्वरूपः।"

(स्व०तं०उ०,प०4,पृ०,220-221)

हकारार्द्धार्द्धकला :— अकाररूपा अमाकला।

द्र०:- 'अमाकला' इति।

"सूर्यचन्द्रात्मप्राणापानप्रवाहरूपतयाप्यवस्थितः, सैव हि 'परा जीवकला' इति भावः।"

(तं०आ०वि०,खं०2,पृ०,120)

हठपाकक्रमः :— अलंग्रासाख्यो वह्नितुल्यः सद्यः समस्तोपाधिप्रशमनफलः शाम्भवोपायः। समस्तस्य वस्तुजातस्याक्रमेण स्वात्मवह्नौ सद्यो विलापनेन परिपूर्णभैरवभावावेशस्याभ्यासः। यथा—

"..... हठपाकक्रमेण तु।।
अलं ग्रासरसाख्येन सततं ज्वलनात्मना।"

(तं०आ०3,260-261)

"हठेन क्रमव्यतिक्रमरूपेण सकृदुपदेशाद्यात्मना बलात्कारेण यः पाकः, चिदग्निसात्कारः, तस्य क्रमः परिपाटी' .....।"

(तं०आ०वि०,खं०2,पृ०,240)

हठपाकप्रशमनम् :— शाम्भवोपायप्रकारविशेषः। साधकेन निजसंविदग्नौ हठतः सकलस्य विश्वस्य सममेव विलापनमस्मिन् शाम्भवयोगप्रकारे विधीयतेऽविकल्पमेव। तथा सति भेदविलगनपूर्वकं संवित्ति देवतास्तेन संविद्भूतेन विश्वहविषा तृप्यन्ति। ताश्च तृप्ताः सत्यो मध्ये तिष्ठन्तं चिद्भैरवमभेदेनवाविशन्त्यो योगिनं परिपूर्णस्य निजस्य भैरवभावस्य सद्यः साक्षात्कारं कारयन्ति। स एष एव योगप्रकारोऽलंग्रासक्रमः इति चाभिधीयते। यथा—

"हठपाकप्रशमनं यत्तृतीयं तदेव च
उपदेशाय युज्येत भेदेन्धनविदाहकम्
निजबोधजठरहुतभुजि भावाः सर्वे समर्पिता हठतः।
विजहति भेदविभागं निजशक्त्या तं समिन्धानाः।।
हठपाकेन भावानां रूपे भिन्ने विलापिते।
अश्नन्त्यमृतसाद्भूतं विश्वं संवित्तिदेवताः।।
तास्तृप्ताः स्वात्मनः पूर्णं हृदयैकान्तशायिनम्।
चिद्व्योमभैरवं देवमभेदेनाधिशेरते।।"

(तं० आ०3, 261-264)

द्र०:- 'उपाधिप्रशमः' ~ शान्त्या इति।
'अलंग्रासक्रमः' ~ हठेन इति च।

हठमेलकः — द्र०:- 'हठमेलापः' इति।

हठमेलापः :— मन्त्रशक्त्या बलात्कारेणाकृष्टाभिर्योगिनीभिर्मेलनम्। तेन च मेलनेन ताभ्यो रहस्योपायप्रक्रियाः गृह्यन्ते। ताश्च मन्त्रप्रभावविवशाः सत्यस्ताः रहस्योपायप्रक्रिया मनाग् वितरन्त्येव। रावणेनानेनैव विधिना सिद्धयोगीश्वरीमतापरनाम्नस्त्रिकशास्त्रस्यो- पासनापद्धतयो गृहीता अभूवन्। यथा—

"स्वर्गादर्धं रावणोऽथ जह्रे रामोऽर्धमप्यतः।
विभीषणमुखादाप गुरुशिष्यविधिक्रमात्।।"
(तं० आ०36, 6)

"स्वर्गादर्धं जह्रे इति हठमेलापभङ्ग्या प्राप्तवानित्यर्थः। अत इति रावणापहृतादर्धादर्धमिति।"
(तं० आ० वि०, खं०12, पृ०, 384)

"तदा तस्य तु यच्छेषं तत्सर्वं दुष्टचेतसा।
अपहृत्य गतो लङ्कां रावणो देवकण्टकः।।"
उद्धः०:- (तं० आ० वि०, खं०12, पृ०, 385)

~ तन्मन्त्र :— बलात्कारेण योगिनीमेलापप्रदो मन्त्रः। स च जयरथमतेन "ह्क्षूर्ज्ञौं" इति।

उद्धारो यथा—

"षष्ठप्राणात्रिकूटोर्ध्वबाहुशूलाख्यबिन्दुभिः।
अनच्क नासाधोवक्त्रचन्द्रखण्डैश्च मण्डितम्।।
हृदयं भैरवाख्यं तु सर्व संहारकारकम्।
अग्निमण्डलमध्यस्थभैरवानलतापिताः।।
वशमायान्ति शाकिन्यः स्थानमेतेन चेद् दहेत्।
विसर्जयेत्ताः प्रथममन्यथाच्छिद्रयन्ति ताः।।"
(तं० आ०30, 94-97)

"वशमायान्तीति हठेन मेलापं कुर्वन्तीत्यर्थः। प्रथममितिमेलाप सामनन्तर्येणेत्यर्थः।"
(तं० आ० वि०, खं०12, पृ०, 213)

छिद्रयन्तीत्यनेनैतद् ध्वनितं यद् हठमेलापोऽन्ततोन सदा शुभकरः इति। अत एवान्ते रावणस्य पातः सञ्जातः।

हठयोगानुपयोगः :— त्रिकसाधनायां नापेक्ष्यते हठयोगः। यथा—

"तत एव यमनियमादि क्लेशयोगोऽनुपयोग एवात्र।"
(ई० प्र० वि० वि०, खं०3, पृ०, 401)

नोपयोगो यस्य सोऽनुपयोग इति।

हरः :— पशूनां पाशहारी शिवः।

यथा—

उक्तं च—

"हरति पशुभ्यः पाशान् पुंसोऽप्यूर्ध्वं नयति यः स हरः इति।"
(ने० तं० उ० खं०1, पृ०, 7)

हरिः :— भर्तृहरिः।

यथा

"तत्रभवताहरिणा :—

'जलयन्त्रभ्रममावेशसदृशीभिः प्रवृत्तिभिः।
स कालः कलयन्सर्वान्कालाख्यां लभते प्रभुः।' इति।"
(स्व० तं०, उ०12, पृ०, 59)

हस्तनय :— ग्रन्थः कोऽपि।

"सदसद्विभेदसूतेर्दलनपरा काऽपि सहजसंवित्तिः। उदिता त्वमेव भगवति जयसि जयाद्येन रूपेण।। इत्यादिना श्रीहस्तनयाभ्युदितेन जयाद्येना पिरूपेण त्वमेव परिस्फुरितेत्युक्तम्।"
(तं०आ०वि०,खं०3,पृ०,200)

हार्दीशक्तिः :— इच्छाशक्तिः।

द्र०:- 'शक्तिपञ्चकम्' इति।

हूहुकः :— देशाध्वयोगे ब्रह्माण्डाधस्थानन्तभुवनस्य पतिः। तमेव आगमान्तरे शेषाहि कथयन्ति। यथा—

"यदुक्तं श्रीनन्दिशिखायाम् :—
.....
.....
.....
कटाहाधः स्थितं देवि हूहुकं भुवनेश्वरम्।"
(तं०आ०वि०,खं०5,पृ०,14-15)

"ऊर्ध्वबाहुर्महाकायो नागरूपी महाबलः।
फणानां तु सहस्रेण धारयित्वा जगत् स्थितः।।
अत एव श्रीतन्त्रराजभट्टारके शेषाहित्वेनोक्तः।"
(तं०आ०वि०,खं०5,पृ०,22)

हृदयनैर्मल्यम् :— स्वविमर्शस्य शरीरादि जडभावालम्बनत्वराहित्येन संविन्मात्रनिष्ठत्वम्।

यथा —

"हृदयं विमर्शः, तस्य नैर्मल्यम्-अनन्योन्मुखत्वाद-परिम्लानत्वम्।"
(तं०आ०वि०,खं०1,पृ०,207)

हृदय-पूजा :— येन केनापि प्रकारेणानन्दपरम्परोद्भावकोऽभ्यासविशेषः आनन्दयोग इति। स च आधारकन्दमध्ये चित्तनिवेशनेनाणवतया, स्वस्वरूपानन्दविश्रान्तयभ्यासेन शाम्भवतया, आनन्देन्द्रियसंघट्टनाभ्यासेन च चर्यात्मकतया, बहुधाभ्यस्यमानः स्वस्वरूपे सद्यः प्रतिष्ठापको भवति। स एवानन्दयोग इति कथ्यते।

यथा—

"नित्यानन्दरसप्रसरेणैव क्षोभात्मकविसर्गेणेति देवतानां सम्प्रदायः, यामलयोगे वीराणामप्यानन्देन्द्रियनित्यानन्दक्षोभात्मकदूतीसंघट्टजेनेति, एकवीरतायामपि स्वरूपानन्दविश्रान्तियोगेन, पुंसोऽप्यानन्देन्द्रिय निःसरणधामत्रिकोण कन्दाधोविनिविष्ट चित्तनिवेशादानन्दक्षोभप्रसवं करोति .....
..... एवामानन्दयोग एव हृदयपूजा।"
(प०त्री०वि०,पृ०,222-223)

हृदयप्रवेशः :— विसर्गभुवि समारोहः।

यथा—

"हृदयं प्रविशेत्, विसर्गभुवमधिशेत इत्यर्थः।

(तं०आ०वि०,खं०3,पृ०,380)

प्रविशेदिति लिङ्गो व्याख्याऽत्र 'अधिशेते' इति लङ्न्तेनाख्यातेन कृता वेदितव्या, पाठभेदो वात्रसम्भवेत्।

हृदयबीजम् :— (1) परिपूर्णपरमेश्वरताविमर्शः।

यथा—

"हृदयबीजस्य महामन्त्रात्मको विश्वमयो विश्वोत्तीर्णः परमशिव एवोदयविश्रान्तिस्थानत्वान्निजस्वभावः।"

(प०प्रा०,पृ०,11-12)

(2) 'सौः' इति रहस्यमन्त्रविमर्शः।

यथा—

"यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः।
तथा हृदयबीजस्थं जगदेतच्चराचरम्।।"

(प०त्री०,24)

द्र०:- 'अमृतबीजम्' इति।

(3) "सौः" इति बीजमन्त्रः। एतस्यान्तरेवामृतवर्णः सकारः। उक्तमेतद्विषये रहस्यमय्या शैल्या यथा—

"चतुर्दशयुतं भद्रे तिथीशान्तसमन्वितम्।।
तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्म नः।

(प०त्री०,9-10)

"सकारस्तावत् परमानन्दामृतस्वभावः।"

(प०त्री०वि०,पृ०,239)

हृदयम् :— (1) विश्वस्य प्रतिष्ठास्थानभूता परसंविदात्मिका पारमेश्वरीविमर्शशक्तिः। लोकेऽपि हृदयं जीवनस्य प्रतिष्ठास्थानम्।

यथा—

"हृदयं च नाम प्रतिष्ठास्थानमुच्यते। तच्चोक्तनीत्या जडानां चेतनं। तस्यापि प्रकाशात्मत्वं, तस्यापि विमर्शशक्तिः।"

(ई०प्र०वि०,खं०1,पृ०,211)

"विश्वप्रतिष्ठास्थानत्वाच्चित्प्रकाशो हृदयम्।"

(शि०सू०वि०,पृ०,15)

तस्य च प्रकाशस्य विमर्शसारत्वं सिद्धमेव।

"देहप्राणबुद्ध्यादेश्च परं प्रतिष्ठास्थानं संविदात्म् हृत्।"

(प०त्री०वि०,पृ०,61)

"पदेतद् हृदयं सर्वभावानां स्थानं प्रतिष्ठाधाम, नीलादीनां ह्यन्ततः क्रिमिपर्यन्तं चिदंशानिविष्टाचं न किञ्चिन्नीलादिरूपमिति।"

(प०त्री०वि०,पृ०,86)

ततश्चिदंशस्यैव प्राधान्यात्तदेव सर्वस्य हृदयमितिवे दितव्यं सुधीभिः।

"प्रकाशविमर्शद्वितयमेलापलक्षणमन्तस्तत्त्वं हृदयमित्युच्यते।"

(म०मं०प०,पृ०,174)

(2) परिपूर्णस्य परमेश्वरस्य या परिपूर्णतामयी स्वातन्त्र्यसारा पराशक्तिरसौ तस्य हृदयमित्युच्यते, यतः परमेश्वरस्य परमेश्वरतायाः प्राणप्रतिष्ठैव तदाश्रिता वर्तते। ततः पारमेश्वरी पराशक्तिरेव हृदयम्।

(3) परमेश्वरस्य परमेश्वरतायाः यदन्तस्तमं केन्द्रं, यतश्च तस्यासौ परमेश्वरताग्रे प्रसरति सृष्ट्यादौ। सा च शिवस्य स्वभावभूता पराशक्तिः।

यथा—

"तत्र परमेश्वरः पूर्णसंवित्स्वभावः, पूर्णतैवास्य शक्तिः कुलं, सामर्थ्यम्, ऊर्मिः हृदयम्, ... इत्यादिभिरागयभाषाभिस्तत्तदन्वर्थप्रवृत्ताभिरभिधीयते।

(तं०सा०,पृ०,57)

"यथा हि सर्वतत्त्वमयशरीरस्य विभक्तत्वगादिसन्तान-तन्त्रितस्य तद्विभागप्रकाशविमर्शविश्रान्तिधामहृदयपदमुच्यते, तथैव भगवतो भैरवानाथस्य तदिदं विभक्ततत्त्वभुवनादिमयं विश्वरूपं परामर्शसारं पञ्चाशद्वर्णमयं शरीरं तस्य तदविभागपरामर्शसारमिदं हृदयम् ..... विश्रान्त परमानन्दमयधामशक्तित्रय-गतानवरतसङ्कोचविकासरूपत्रिकोणपरिस्पन्दरूपमेतद् हृदयं भैरवात्मनो भैरवस्यात्मभूतायास्तदविभागवत्याः श्रीपरादेव्यास्तत्त्वंभवति।"

(प०त्री०ल०वृ०,पृ०,9-10)

द्र०:- 'ऊमिः।' इति, **'विमर्शः'** इति, **'काली'** इति च।

यथा—

"सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः।"

उद्ध०:- (ई० प्र०1-5-14)

इत्याद्युक्तेः हृदयं - विमर्शः।

(तं० आ० वि० खं०1, पृ०, 207)

(4) संविद्रूपः प्रमाता।

"हृदये संविद्रूपे।"

(प० त्री० ल० वृ०, पृ०, 3)

(5) ज्ञान क्रियोभयात्मकत्वं शुद्धायाः संविदः स्वसंवेदनसिद्धमेवाहमिति विमर्शरूपम्। ज्ञानक्रियायोरभिन्नं यद्रूपं तदिच्छात्मक संरम्भरूपम्। इच्छाज्ञानक्रियासामरस्यात्मकं संविदः स्वरूपमेव रहस्यप्रक्रियाशास्त्रेषुहृदयमिति परिभाष्यते।

यथा—

"सर्वस्यापि जनस्य बाह्यव्यवहारव्यतिरेकेण स्वहृदयोन्मुखः कश्चिदहमित्युद्योगः परिस्फुरति। स च जानामीति संविद्विशेषवपुरेवोपपद्यत इति ज्ञान शक्तेरनपह्नवः। जानामीत्यत्र विमर्शाकारसंरम्भरूपा काचित् क्रियाऽप्यर्थाक्षिप्ता। एतद्द्वितयानु-प्राणनावस्थायामिच्छाशक्तिव्यपदेश इत्यव्याकुलोऽयमिच्छाज्ञानक्रिया सामरस्यात्मा स्वभावः, यो हृदयमिति व्यवह्रिते।"

(म० मं० प०, पृ०, 25)

(6) रहस्य बीजमन्त्रविशेषः– सौः इति।

यथा—

"चतुर्दशेन स्वरेण परिपूर्णानुत्तरानन्दशालिना सम्पूर्णक्रियाशक्तिशरीरोन्मेषोनत्वसम्पदा क्रियाशक्तिद्वारान्तर्लीनेच्छाज्ञानयुंगलेन युतं सततं मिश्रीभूतं यदिदं तृतीयं ब्रह्मसदाशिवतत्त्वात्मकं ग्राह्यराशिविलक्षणं सद्रूपं विश्वं तत् तिथीशानां —— पञ्चदशानां स्वराणां योऽन्तः पर्यन्तस्थितिभूतो विसर्गस्तस्मिन् सम्यगवियोगेनान्वितं विश्रान्तं सद्भैरवात्मनो भगवतः शब्दराशेः विश्वशरीरस्य हृदयं सारभूतम्।"

(प० त्री० ल० वृ०, पृ०, 9)

यथा——

"परावाग्रूपस्य भैरवात्मनः सर्वव्यापकस्य चित्प्रकाशस्य हृदयं सारभूतो महामन्त्रः।"

(प० त्री० विवृ०, पृ० 7)

"तृतीयं ब्रह्म अधोरमन्त्रः। चित्परामर्शयुतो भैरवात्मनः स्वच्छन्द भैरवस्य हृदयं सारभूतो महामन्त्रः।"

(तदेव, पृ०, 8)

(7) बोधरूपतया प्रकाशमानं पराबीजम्।

यथा——

"परप्रमात्रात्मनि संहारहृदादि विलक्षणे च हृदि बोधे पराबीजे च।"

(तं० आ० वि०, खं०3, पृ०, 365)

(8) जुँ इति बीजमन्त्रः क्रियाजालमध्ये।

यथा——

"कृतान्तमध्यमं वर्णं स्वरराण्पञ्चमानुगम्।
प्रभञ्जनान्तशिरसं हृदयं सर्वसिद्धिदम्।।

कृतान्तस्य याम्यदलस्थस्य चवर्गस्य मध्यमं वर्णं 'ज', स्वराट् इन्द्रः, तत्पत्रस्थस्यावर्गस्य पञ्चम उकारोऽनुगोऽधोगतो यस्य प्रभञ्जनान्तो मकारो बिन्दुरूपः शिरसि यस्येति मान्त्रं द्वितीयं बीजमेवैतद् हृदयं निर्णीतम्, महामाहात्म्ययोगात् सर्वाः सिद्धीर्ददाति।"

(ने० तं०, खं०1, पृ०, 57)

(9) सारभूतं तत्त्वम्।

यथा——

"हृदयं जगदानन्दादिशब्दवाच्यं तथ्यं वस्तु" .... दिक्कालाद्यकलिततया स्फुरतात्।

(तं० आ० वि०, खं०1, पृ०, 4)

(10) दहराकाशो वा, सुषुम्नान्तस्थं प्राणशक्तिकेन्द्रं वा, चित्प्रकाशो वा हृदयम्। प्राक्तनं द्वयं प्रतिजीवं भिन्नं वैयक्तिकं हृदयम्। चित्प्रकाशश्च विश्वस्य हृदयम्।

यथा——

"हृदयपदेन वस्तुत्रयं वक्तुं शक्यम्। एकं हृदयकमलान्तर्दहराकाशस्थानमपरं नाडीचक्रानुचक्रकेन्दस्थानं सुषुम्नान्तः-स्थं, तृतीयं विश्वस्य स्फूर्तिकेन्द्रस्थानभूश्चित्प्रकाशः।"

(शि०सू०विवृ०,1,15)

(11) श्रीकालसङ्कर्षणीधाम।

यथा——

"हृदयं :—— 'हृदयं शक्तिसूत्रं तु .....।'

इत्याद्युक्त्या श्रीसृष्टिकाल्याद्यखिलशक्तिचक्रासूत्रणेन प्रस्फुरद्रूपं श्रीकालसङ्कर्षणीधाम।"

(तं०आ०वि०खं०1,पृ०,8)

(12) परस्य त्रिकस्य नामान्तरम्, पारमेश्वरमनुत्तरंतत्त्वम्।

द्र०:- **'त्रिकम्'**~'परम्' इति।

~ उच्चारयोगे :—— **उदानवृत्त्यभिव्यक्तिविश्रान्तिपदम्। तच्चजगदानन्दानुभूतिपदम्।**

यथा——

"यत्र कोऽपि व्यवच्छेदो नास्ति यद् विश्वतः स्फुरत्।।
यदनाहतसंवित्तिपरमामृतबृंहितम्।
यत्रास्ति भावनादीनां न मुख्या काऽपि सङ्गतिः।।
तदेव जगदानन्दमस्मभ्यं शम्भुरुचिवान्।
तत्र विश्रान्तिराधेया हृदयोच्चारयोगतः।।
या तत्र सम्यग् विश्रान्तिः सानुत्तरमयी स्थितिः।"

(तं०आ०5,50-53)

~ करणयोगे :—— **दहराकाशरूपम्।**

द्र०:- **'बुद्धिध्यानयोगे'** इति।

~ परात्परम् :—— **षट्त्रिंशत्तत्त्वानां सप्तत्रिंशस्य च परतत्त्वस्य कलना ध्यानोपासनादौ यद् बलाद् विधीयते सा परात्परतराशक्तिरष्टात्रिंशं तत्त्वं योगप्रक्रियानुसारं सर्वस्य सारभूतं हृदयम्।**

यथा——

"चिन्मात्रमेव देवी च सा परा परमेश्वरी।।
अष्टात्रिंशं च तत्तत्त्वं हृदयं तत्परापरम्। **(परात्परम्)।"**

(तं०आ०6,180-181)

~ प्राणापानगतौ :—— **शरीराङ्गभूतं हृदयस्थानम्।**

यथा——

"हृत्कण्ठयौष्ठयत्रिधामान्तर्नितरां प्रविकासिनि।
चतुर्दशः प्रवेशो य एकीकृततदात्मकः।।"
"ततो विसर्गोच्चारांशे द्वादशान्तपथावुभौ।
हृदयेन सहैकध्यं नयते जपतत्परः।।"

(तं०आ०5,143-144)

~ बीजमन्त्र :——

सौः इति रहस्यमन्त्रः।

यथा——

"चतुर्दशयुतं भद्रे तिथीशान्तसमन्वितम्।।
तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः।"

(प०त्री०,9-10)

चतुर्दशस्वरयुतं तृतीयं ब्रह्म = सकाररूपं तिथीशोऽनुस्वारस्तदन्तगो विसर्ग इति रहस्यसङ्केतः।

~ बुद्धिध्यानयोगे :—— **अन्तः प्राणस्पन्दकेन्द्रभूतं स्थानम्। स्थूलं हृदयाख्यं शरीराङ्गम्।**

यथा——

"कदलीसम्पुटाकारं स बाह्याभ्यन्तरान्तरम्।

ईक्षते हृदयान्तःस्थं तत्पुष्पमिव तत्त्ववित्।।"

(तं०आ०5,21)

~ शाक्तोपाये :— (1) परिपूर्णस्वात्मविमर्शमयोऽहमिति सदोदितः प्रकाशात्मा बोध एव हि परं हृदयम्। प्राणादिव्यापाराणां तत्रैव मुख्यतयाधिष्ठितत्वात्। तत्रापि विमर्शांश एव सारभूतस्ततस्तदेव हृदयम्। स एव हि स्पन्दरूपतया योगिभिः साक्षात्क्रियते।

यथा—

"हृदयं बोधपर्यायः .....।"

उद्धः- (तं०आ०वि०,खं०3,पृ०,213)

"परामर्शस्वभावत्वादेतस्या यः स्वयं ध्वनिः।।
सदोदितः स एवोक्तः परमं हृदयं महत्।"

(तं०आ०4,181-182)

(2) स च बोधः सततमन्तर्बहिः परिस्पन्दनशीलः। तस्य तत् स्पन्दमेव समस्ततत्त्वव्रातसृष्टिसंहारादिकारणभूतं सत् सर्वत्र विजयते।

यथा—

"हृदये स्वविमर्शोऽसौ द्राविताशेषविश्वकः।।
भावग्रहादिपर्यन्तभावी सामान्यसंज्ञकः।
स्पन्दः स कथ्यते शास्त्रे स्वात्मन्युच्छलनात्मकः।।"

(तं०आ०4,182-183)

~ शाम्भवोपाये :— चिन्मात्रस्वरूपानन्दचमत्कारपरिस्पन्दमयी परिच्छेदरहिता पूर्णा स्वात्मसंविद्।

यथा—

"चितिः प्रत्यवमर्शात्मा परा वाक् स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः।।
सा स्फुरत्ता महासत्ता देशकाला विशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः।।"

(ई०प्र०1-5,1314)

"हृदयस्था तु या शक्तिः कौलिकी कुलनायिका।
तां मे कथय देवेश येन तृप्तिं लभाम्यहम् **(व्रजाम्यहम्)**।।"

(प०त्री०,2)

हृदयाख्या :— ~ खेचरी :— लक्षिता परं रहस्यात्मकत्वान्न स्पष्टीकृता।

यथा—

"मुष्टिद्वितयसंघट्टाद् हृदि सा हृदयाह्वया।।"

(तं०आ०32,56)

हृद्भेदक्रमः :— न सम्यक् स्पष्टीकृतोऽयं शब्दः क्षेमराजेन। केवलं प्रमाणवाक्यमेकं तत् प्रतिपादकमुद्धृतम्।

यथा—

"ब्रह्मोपेन्द्रहराण्डवाच्य उमवागैक्यप्रथानादभूम्यारोहाय गलत्स्ववेद्यशशभृल्लेखा निरोधान्तगा।

नादज्ञातृतलोर्ध्वयोर्विगलिते वेद्ये स्फुटान्तर्ध्वनि स्पर्शव्याप्तिपदा तदात्तमनना तत्त्वोन्मना तां स्तुमः।।

इति हृद्भेद क्रमः।"

(ने०तं०उ०,खं०1,पृ०,51-52)

हैडरम् :— आगमविशेषः कुलाम्नाय सम्बन्धी।

यथा—

"यथोक्तं भैरवेकुले हैडरे .....।"

(तं०आ०28,14-15)

"हैडरेऽत्र च शब्दोऽयं द्विधा नान्तेतरः श्रुतः।"

(तं० आ०28,18)

नान्तोऽकारान्तश्चेति प्रयुक्तः पर्व शब्द इति।

होमः :— ~ शाक्तोपाये :— (1) शिवात्मकतादृष्ट्या दृश्यमानानां सर्वेषां भावानां भावनया स्वात्मसंविद्रूपे शिवाग्नौ विलीनतया दर्शनम्, तेन च स्वात्मशिवस्य तृप्ततविमर्शनं शाक्तोपायमयो होमः।

यथा—

"सर्वभावाः शिवाकाराः अन्तर्भूताः शिवानले।।
सोऽहं शिवः सुतृप्तोऽस्मि होम इत्युदितः परः।"

(शि०दृ०7,90-91)

"सर्वे भावाः परमेश्वरतेजोमयाः इति रूढविकल्पप्राप्त्यै परमेशसंविदनलतेजसि समस्तभावग्रासरसिकताभिमते तत्तेजोमात्रावशेषत्वसहसमस्तभावविलापनं होमः।"

(तं०सा०,पृ०,26)

(2) सर्वैराकारैः स्थितस्य स्वस्यैव सर्वभावभोक्तृत्वं पश्यतो या परमा तृप्तिस्तस्या विमर्शनमपि होमः शाक्तयोगिनः।

यथा—

"अत्राकारे न यन्मेऽस्ति तदाकारान्तरेऽस्ति मे।।
तस्मादस्मि निराकाङ्क्षस्तृप्त्यान्यो होम, ईदृशः।"

(शि०दृ०7,91-92)

द्रः- (प० सा०,76) चापि।

(3) प्रमाणप्रमेयादिप्रपञ्चशून्ये शुद्धचिदग्नौ सर्वस्य प्रमाणप्रमेयादि भावजातस्य चेतनास्त्रुचा हवनं होमः, सर्वस्य चिदेकमयताविमर्शनं होम इति तात्पर्यम्।

यथा—

"महाशून्यालये वह्नौ भूताक्षविषयादिकम्।
हूयते मनसा सार्धं स होमश्चेतनास्त्रुचा।।"

(वि०भै०,149)

(4) अन्तर्बोधाग्नि मध्ये सर्वविषयप्रक्षेपे तेषां विषयाणां बोधरूपतायां विगालनाभ्यासः शाक्तोपाये होमः।

यथा—

"अन्तरिन्धनसम्भारमनपेक्ष्यैव नित्यशः।
जाज्वलीत्यखिलाक्षौघप्रसृतोऽग्रशिखः शिखी।।
बोधाग्नौ तादृशे भावा विशन्तस्तस्य सन्महः।
उद्रेचयन्तो गच्छन्ति होमकर्मनिमित्तताम्।।"

(तं०आ०4,201-202)

~ अकृत्रिमः :— **शाक्तोपाये बिना यत्नं यः यं प्रचलति सदाभावनाबलादसावकृत्रिमो वास्तविकः स्वरसतः सिद्धो होमः।**

यथा—

"परब्रह्मात्मकस्य योगिनो देहादिप्रमातृताभिमानाभावाद् यः स्वरससिद्धः स्वरप्रमातृप्रमेयकलनपरिक्षयः स एव अकृत्रिमो होमः। यथाह भट्टश्रीवीरवामनक :—

'यत्रेन्धनं द्वैतवनं मृत्युरेव महापशुः।
अलौकिकेन यज्ञेन तेन नित्यं यजामहे।।' इति।"

(प० सा० वि०, पृ०, 146)

~ अध्वोपयोगविधौ :— **अर्पितानां वस्तूनां पारस्परिक प्रातिस्विकोभयभेदविगालनपूर्वकं स्वात्मचिद्वह्निरश्मिरूपत्वेन साक्षात्करणं होमः।**

यथा—

"तत्रार्पितानां भावानां स्वकभेदविलापनम्।
कुर्वंस्तद्रश्मिसद्भावं दद्याद् होमक्रियापरः।।"

(तं०आ०12,11)

रश्मिसद्भावं दद्यात् तेभ्यो भावेभ्य इति शेषः।

~ कौलिकेविधौ :— **निर्विकल्पसंविन्मये स्वात्मवह्नौ विश्वस्य लयीकरणम्।**

यथा—

"तदामृष्टस्य चिद्वह्नौ लयो होमः प्रकीर्तितः।।"

(तं०आ०29,93)

~ तद्दशांशता :— **संविद्विमर्शास्तावद्द्वादशकालीविमर्शात्मकाः प्रसिद्धाः। तत्रान्त्यं विमर्शद्वयं लयीकरणात्मकाहुतिसमर्पण-विमर्शात्मकम्। शेषं संविद्दशकं तत्र परे संवित्स्वरूपे लयी-करणस्योपायत्मकम्। तस्योपायभूतविमर्शस्य दशसंख्यत्वेन जपानन्तरं होमस्तद्दशांशो विधीयत इति।**

यथा—

"आमर्शश्च पुरा प्रोक्तो देवीद्वादशकात्मकः।
द्वे अन्त्ये संविदौ तत्र लयरूपाहुतिक्रिया।।
दशान्यास्तदुपायायेत्येवं होमे दशांशताम्।
श्री शम्भुनाथ आदिक्षत् त्रिकार्थामभोधिचन्द्रमाः।।"

(तं०आ०29,94-95)

~ परयोगिन :— **सर्वभावानां स्वात्मवह्नौ प्रवेशनेन तद्रूपतापादनं परयोगिनो होमः।**

यथा—

"अन्तरिन्धनसद्भावमनपेक्ष्यैव नित्यशः।।
यो ज्वलत्यखिलाक्षौघप्रसृताग्रशिखाशतः।
तत्रैव सर्वभावानां प्रवेशश्चेद् विमृश्यते।।
नूनं झटिति सम्लुष्टस्थूलरूपतयाहठात्।
यान्ति बोधमहाज्वालाप्रकाशैक्यं स्वरूपतः।।
स एष परमो होमो भैरवीयक्रमे मतः।
निजबोधजठरहुतभुजि भावाः सम्यक् समर्पिता युक्त्या
विजहतिभेदविभागं निजशक्त्या तं समिन्धते यस्मात्।।"

(मा०वि०वा०2,130-133)

ह्रस्वदीर्घप्लुताः :— स्वराणां सूर्यमयत्वे ह्रस्वत्वं सोममयत्वे दीर्घत्वं वह्निमयत्वे च प्लुतत्वम्।

यथा—

"एषां यत् प्रथमं रूपं ह्रस्वं तत् सूर्य उच्यते।।
क्षोभानन्दवशाद् दीर्घं विश्रान्त्या सोम उच्यते।
यत्तत्परं प्लुतं नाम "प्रकाशरूपः तत" सोमानन्दात्
परं स्थितम् प्राहुराग्नेयं शास्त्रकोविदाः।।"

(तं०आ०3,131-133)

"व्यक्तियोगाद्व्यञ्जनं तत्स्वरप्राणं यतः किल।
स्वराणां षट्कमेवेह मूलं स्याद्वर्णसन्ततौ।।
षड्देवतास्तु ता एव ये मुख्याः सूर्यरश्मयः।"

(तं०आ०3,184-185)

"सौराणामेव रश्मीनामन्तश्चान्द्रकला यतः।।
अतोऽत्र दीर्घत्रितयं स्फुटं चान्द्रमसं वपुः।
चन्द्रश्च नाम नैवान्यो भोग्यं भोक्तुश्च नापरम्।।"

(तं०आ०3,185-186)

ह्रस्वनाथः :— (1) अद्वयसम्पत्तिनामकस्य ग्रन्थस्य कर्त्ता हर्षदत्तसूनुः।

यथा—

"श्रीह्रस्वनाथेन हर्षदत्तसूनुनाऽपि :—
'अहङ्कारमयी भूमिः'
इत्यादिनाऽद्वयसम्पत्तौ।"

(वि०भै०उ०,पृ०,90)

(2) कोऽपि कालीनयोपासक आचार्यः। अस्य नामोल्लेखो जयरथेन कृतः।

यथा—

"श्रीह्रस्वनाथेनाऽपि स्वलिपिवर्णनेऽस्य श्लोकस्यदृष्टत्वात्।"

(तं०आ०वि०खं०3,पृ०,202)

"इति श्रीह्रस्वनाथस्यापि।"

(तं०आ०वि०खं०3,पृ०,196)

ह्रस्वाः :—

"अ, इ, उ, ए, ओ, इति पञ्च ह्रस्वाः।"

(तं०आ०वि०खं०12,पृ०,178)

मातृकाक्रमे एकार ओकारश्च ह्रस्वेष्वेव गणिता वेदितव्याः, एकारौकारापेक्षयाऽल्पप्रयत्नोच्चार्यत्वादिति। परं 'अं' इति कथं न कुत्रापि गणितो जयरथेन। न चतद्विषये स्पष्टीकरणं कृतम्। एकारस्य ओकारस्य चह्रस्वत्वं पारिभाषिकमेव मन्तव्यम्।